श्रीहरिः

भारुतशक्तिः

श्रीमन्मथुराधीश्वरचरणाब्जचञ्चरीकगोस्वामिवर्यश्रीमद्विट्ठल-
नाथमहाशयविरचितस्य प्राभञ्जनस्य शुद्धाद्वैत-
सिद्धान्तमण्डनग्रन्थस्य

पूर्वभागेण सहिता

तट्टीका

पञ्चनद्युपाह्वेन विद्वद्वरश्रीघनश्यामभट्टस्यात्मजेन शिष्येण च
गट्टूलालेत्यपरनामकेनभारतमार्तण्ड-
श्रीगोवर्धनशर्मणाप्रणीता

स्वसंप्रदायायानवरत प्रयतमानैस्तैः स्वयमेव स्वस्वव्ययेन मुद्रयित्वा
प्रथमं संस्करणं प्रकाशितम् । अस्य द्वितीय संस्करण श्रीजगद्गुरु-
वल्लभाचार्यवंशान्वयविश्रुतयशःपटहपरिपूरितदिगन्तर-
श्रीमद्गोकुलनाथाचार्यस्यात्मजेन गोस्वामिदीक्षितेन
निर्णयसागराख्यमुद्रणालये समुद्र्य
प्रकाशितम् ।

शके १८८७

श्री. श्रेष्ठि सर पुरुषोत्तमदास ठाकुरदास

,, रामनाथ बन्सीलाल अबीरचंद

,, रूपसी माधवजी एतेषां ट्रस्टव्यवस्थापकैः

श्रेष्ठि मन्नूभाई डुंगरसी जोशी इत्येतैः

,, श्रेष्ठि बालाभाइ गिरधरलाल

,, श्रेष्ठि रमणिकलाल माधवाणी

,, श्रेष्ठि गोर्धनदास जेठाभाइ

श्री. श्रेष्ठि नारायणदास जेठानंद आसनमल इत्येतेषां ट्रस्ट द्वारा एतद्

ट्रस्टव्यवस्थापकैः श्री० श्रेष्ठि गोवर्धनदास तुलसीदासादिभिः श्री० श्रेष्ठि शिवप्रकाशजी तथा श्री० श्रेष्ठि रामप्रकाशजी मूंदडा इत्येताभ्यां श्री० श्रेष्ठि उद्धवदास मुंदडा इत्येतैः

एतद्ग्रंथप्रकाशने साहाय्यं कृतमिति, तेषु सर्वेष्वपि साशीर्वादं कृतज्ञतां प्रकाशयामः—

गोस्वामि दीक्षितः

—: मुद्रक :—
लक्ष्मीबाई नारायण चौधरी,
निर्णयसागर प्रेस,
डॉ. एम्. बी. वेलकर स्ट्रीट, मुंबई २

—: प्रकाशक :—
गोस्वामि दीक्षितजी महाराज
बडा मंदिर ३ भोईवाडा
भुलेश्वर मुंबई नं. २

प्रस्तावना

श्रीकृष्णचरणपरिचरणप्रवणान्तःकरणा विजयन्ते केचन सज्जनाः सज्जनानाशास्त्रबोधाः।

अथेदं नाविदितं विदुषां वो यत्स्वधर्मसंरक्षणं श्रेयस्करमिति। तदनुरुन्धानैर्विविधानवद्यविद्यानिधानैः श्रुतिस्मृतिसमुचितसदाचारदत्तावधानैः स्वयमपि ग्रन्थनिर्माणनिपुणान्देशीदत्तादिविद्वद्वरान्सानुकम्पं साश्रयदानमनुगृह्णद्भिरधिवसद्भिः सद्भिः परिष्कृतं विविधवनोपवनराजिविराजितपरिसराभिरामं कोटापराख्यं नन्दग्रामं श्रीमथुराधीश्वरचरणकमलयमसंसेवनसाधितसकलपुरुषार्थसार्थैर्वैष्णवविबुधगोपीनाथशास्त्रितोऽप्यवाप्तबहुग्रन्थार्थै रश्मिवार्थीप्रभृत्यनेकप्रौढतरग्रन्थग्रथनकेलिकेभ्यो गोस्वामिवंशमौक्तिकेभ्यः श्रीमद्गोपीश्वराख्यमहाराजमहापण्डितेभ्योऽधिगतकतिपयस्वमार्गीयग्रन्थैर्गोस्वामिवर्यश्रीवल्लभात्मजैः श्रीविठ्ठलनाथ (कन्हय्यालाल) महाराजमहाशयैर्दैशिकमण्डलाखण्डल-मायावादमहान्धकारसंहतिसमुत्सारण-भक्तिमार्गपुण्डरीकमण्डन-मार्तण्डश्रीवल्लभाचार्यचरणानां मनोजवसै.[*] श्रीमद्विठ्ठलनाथप्रभुचरणैर्विरचितस्य विद्वन्मण्डनस्य खण्डनाभास वाराणसीवासिगोस्वामिवर्यश्रीगिरिधराख्यमहाराजविरचितस्य शुद्धाद्वैतमार्तण्डस्य खण्डनाभासं च सहस्राक्षनामानं ग्रन्थं तत्प्रसिद्धिं कुर्वाणेन मद्द्विजवंशजेन मथुरादासवर्मणा चिखण्डयिषया प्रेषितं समासाद्य सहस्राक्षाक्षेपभञ्जनप्राभञ्जननामा ग्रन्थो ग्रन्थयांचक्रे। समदिदृक्षि च संस्कृत्य मुद्रितो मोहमय्याम्। प्राहायि च तदर्थं समर्याद[†] पण्डितचक्रचक्रवर्तिना द्वादशदर्शनीदारद[§]पारदर्शिना श्रीमद्बालमुकुन्दपादारविन्दमकरन्दबिन्दुसंदोहमिलिन्दायमानमानसानां निगमागमपयःपयोधिमथनमन्दरायमाणगीर्वाणवाणीविलासानां प्रकृतिजन्यसौजन्यादूष्यवैदुष्यसर्वतन्त्रप्रवचनस्वातन्त्र्याद्यनेकानवद्यहृद्यप्रगुणगुणगणार्णवाविर्भूतयशःस्तोमसोमसमुदयविकासितसितशुद्धहृदयहृदयकुवलयवलयानां पद्मनगुप्तनामकानां श्रीघनश्याममट्टानाम्। तैस्तु मनोजवाय असंभवदवद्यलवाय वैतण्डिकवेतण्डमण्डलगण्डकण्डूतिखण्डनाकुण्ठोरकण्ठकण्ठीरवाय स्वनिदेशवशंवदाय वदावदाय च सभासु भासुरासु भाजनैरनुकम्पायाः श्रीहरेः समाजनैः प्रेमपात्राणां छात्राणां गोवर्धनेनान्वर्थितनामधेयाय स्वतनुजनुषे समार्पि स ग्रन्थः। आदेशि च यदस्य ग्रन्थस्य बहुशोधनं विधाय बहुशो धनव्ययेनापि मुद्रयैनं वस्यचिद्भागस्य च स्वकृतया टीकया तिलकितमिति। परमपूज्यपितृपादाज्ञां मालतीमालामिव शिरसि निधाय प्रारम्भितमाम्।

अथ प्रथमतरस्तु तेन प्रस्तुतमासीद्यत्खण्डनं तदपि नातिस्वल्पीयसानेहसानल्पकल्पं समाप्तकल्पमभूदभूतपूर्वम्। तदेव प्राभञ्जनस्यास्य टीकारूपतया पर्यणामि। अवशिष्टा विशिष्टा युक्तिमुक्तावली तत्र समग्रा हि समग्राहि 'अयमर्थः', 'अत्रायं भावः', 'इदमत्र ज्ञेयम्,' 'इदं त्वधिकमनुसंधेयम्', 'अत्रायं संदर्भार्थः', 'अत्रायं सारोऽवगन्तव्यः', 'अत्रायं निष्कर्षः' इत्यादि

---

* पितृसंनिभैः। † संपूर्णाद्वये. रात्रन्ताचिण्। ‡ समीपम्। § समुद्रः।

संदर्भः "श्रेयांसि बहु विघ्नानि" इति अभियुक्तोक्तिर्न मृषोचेति अर्थशून्येन पैशुन्येनान्तरायितः कंचिदवसरं ग्रन्थव्यवसायः। यतः सत्येकस्मिन्नपि बाधके साधकसहस्रस्याप्यकिंचित्करत्वात्कार्यमात्रं प्रति प्रतिबन्धकाभावस्य हेतुत्वम्। ततो नीहारतुषारशीकरासारवर्षिणी वेला भास्करकरनिकरेणेव क्षिप्रं प्रत्यक्षेपि। प्रत्यक्षेपि साधीयस्यर्थे सा धीयसे पुरोभागिना शुचिदुरुचि। अथ वाऽलमतिप्रसक्तेन। यत्तु केचन व्यतिविद्रते यथा मुद्रयित्वा प्रसिद्धिं प्रापिते सहस्राक्षग्रन्थे जीवति च ग्रन्थकारे न केनचित्सोयमखण्डि। अपि तु शुद्धाद्वैतसिद्धान्तपरिपन्थिनि परलोकपान्थे च ग्रन्थकर्तर्यस्मान इयमाविष्क्रियते खण्डनाहोपुरुषिकेति। तैरपि सूक्ष्ममीक्षणीयं विद्वन्मण्डनशुद्धाद्वैतमार्तण्डप्रभृतिग्रन्थकारसांनिध्यं क्व सहस्राक्षग्रन्थकारस्यासीदिति समानयोगक्षेममपर्यनुयोज्यम्। किं च यद्ग्रन्थमुद्रणात्प्राक्समस्थित ग्रन्थकार इति समभिव्यज्यते भावप्रधाने तत्प्रस्तावनान्तिमे पद्ये "यशोदेहेनास्मिन् जगति सततं सुस्थितिजुष" इत्युक्तया। प्राज्ञत्वप्रकर्षो यदुपज्ञः प्रस्तावनाप्रणेतुरिति नान्यथा संभावना संख्यावतां समाजं समाजिगमिषति। अन्यच्च सोयं सहस्राक्षस्तेन ग्रन्थकारेण द्वाविंशत्युत्तरैकोनशतमितविक्रमसंवत्सरे समपारीति प्रतीयते सहस्राक्षान्त्येन पद्येन। तथा हि—"सहस्राक्षाभिधो ग्रन्थ संपूर्णः कार्तिकेऽभवत्। वर्षे नेत्राक्षिनैनन्देन्दौ विक्रमस्य महौजस"॥ किं च सोयं यस्य स्मरणस्तम्भत्वेन संभावित सापि दीर्घनिद्रामशायिष्ट पञ्चविंशत्युत्तरैकोनविंशशतमितविक्रमादित्यवत्सरे तत्स्फुटं प्रस्तावनायाम्—"शैलनयनेननन्दनिशाकरप्रमितविक्रमवर्षान्तर्गतोर्जमासबलक्षपक्षचतुर्दशीसमासादितनिर्लिपनिलयवासायाः कोपि स्मरणस्तम्भ इवायम्" इत्याद्युक्त्या। किं चायं ग्रन्थकारोपि तस्मिन्नेव वत्सरे वैशाखे मासि वदि स्मरतिथौ शिवपदं प्रापत्। ग्रन्थमुद्रणसमयस्तु मुखपृष्ठलिखित. शकाब्द १७९२ मितोऽस्ति। अतोत आपामर युज्यतेवगन्तुं यद्ग्रन्थमङ्कयित्वा ग्रन्थकारेण न प्रेषितोस्ति विखण्डयिषया। अपि तु मुद्रितोपि ग्रन्थस्तत्प्रसिद्धिकर्त्रा वर्षं यावच्च प्रत्तः। भूयो भूयोनुयुक्तश्चाभाणीज्ञायापि प्रस्तावना मुद्रितेति तद्युक्त प्रसिद्धिं प्राप्स्यति तदुत्तरं समापयिष्यति भवदन्तिकमिति। अथैवं वत्सरान्ते प्राप्ते सहस्राक्षग्रन्थकारस्य प्रयाणं पारलौकिकमाकर्ण्य मन्थरोत्साहेन मन्दं मन्दं व्यरचि। प्राभञ्जनस्तु वसुगगननागेन्दु १८०८ मिते शालिवाहनशक एव मुद्रित. प्रसिद्धिं च प्रापित। अतस्ते खलोत्तरा सुहृदया श्यामलाशया। उपेक्षामहे च तानसूयापिशाचिकावेशविवशानिन्दाकुन्दिलान्मुखरान्खलान्। अथेयं शङ्का समुदेति—कुतो न मारुतशक्तिः प्राभञ्जनस्योत्तरभागे प्रणीता? तदुत्तरं तु तेनैव ग्रन्थकारेण दत्तं भूतानुवादेनोच्यते। उत्तरार्धं किमिति न कृतमिति मुहुर्मुहुरनुयुक्तोपि स्वहृदयगुहावरुद्धं खेदं बहिरप्रकटयन्स्वातिनिर्बन्धं तदन्तेवासिभिरस्माभिः स्वहृदयप्रकाशनायोपक्रान्तर्हि शृणुत किंचिदेव सविस्तरमिदं मम खेदोद्गारालपनमिति शनैःश्वासमुत्सृजेमान् पञ्चत्रिंशतं श्लोकान् हेल्या तदैवावादीत्। त इमे श्लोका अक्षरशोऽनूद्यन्ते—

कालं विशालमपि शक्त्यधिकं स्वचित्तं
चित्तं शरैरिव परैपचनैश्च विद्धम्।

देहश्रमं च परमं परियोज्य यावत्
किंचिद्यथामति कथार्थमथान्ववर्णि ॥ १ ॥

लोकेत तावदपि भावविबोधपूर्व-
मप्येकवारमखिलं खलु यः प्रहृप्यन्।
को निश्चितो निजजनस्वमताभिमन्ता
संतापहृद्वदत संप्रति सोऽस्मदीयैः[3] ॥ २ ॥

विद्या चरेषु चलिना कलिना विलीना
हीनादरेषु हरिभक्तिविधौ नवीनौ।
प्रायेण पद्धतिरुदेति मुदेऽतिगाना[4]
लेखास्ततो गतजनेषु वनेषु खेदाः[6] ॥ ३ ॥

ये वा मतान्तरनितान्तरता अतान्त-
विद्यावदातवपुषो विबुधा विभिन्नाः।
स्वैः स्वैः प्रसिद्धपुरुषैर्विहितान्विहाय
द्रक्ष्यन्ति हन्त किमु तत्त्वधिये[7] परोक्तिम् ॥ ४ ॥

उच्छूनमत्सरनमत्सरसावधाना
[9]नानागमा अपि धृतात्ममताभिमानाः।
विद्वेषरोपकलुषेण विलोचनेन
द्रक्ष्यन्ति केचन चिखण्डिषया परेऽपि ॥ ५ ॥

प्रायः परेष्वपि बलेन कलेः समल्पाः[10]
कल्पा जनेन सधनेन धनाशनाद्यैः।
न प्रेरिता निरुपधिस्वमताभिमानात्
कालेऽत्र ये कुशलशालिन आलिखेयुः ॥ ६ ॥

यत्साध्वसाध्वपि विसाध्वसमात्मबुद्ध्या
प्रोक्तं मया रसैः[11]मयात्समयात्समग्रम्।
बुद्ध्वा बुधा इह लिखन्तु सुखं तु दोषान्
वादोऽपि मार्मिकबुधैः सह पुण्यलभ्यः ॥ ७ ॥

---

१ कोटिक्रमाय। २ अस्मत्संप्रदायवर्ती। ३ इदं पद्धतिविशेषणम्। ४ अतिक्रामताम्। ५ निर्जनेषु। ६ अरण्यरुदितप्रायाः। ७ तत्त्वज्ञानाय। ८ अभिवृद्धमत्सरेण नमद्गुणीभूतं सरसावस्तून्यप्यवधानं येषां ते। ९ अनेकशास्त्रज्ञाः। १० अत्यल्पाः। ११ रसमयमाचार्यं संविदं चावलंब्य।

अग्रे न शक्त इति वक्ति विरक्तिवाचं
पण्याङ्गना भवितुमिच्छति भूरिपुण्या ।
वृद्धेति वक्रकुटिलभ्रु चलद्दृगास्य-
मुल्लास्यहास्यकृदपास्यति मां जनोऽन्यः ॥ ८ ॥

आस्तामियं परकथा न तथा व्यथायै
तोदः परान्मनसि मोदमहोदयार्थः ।
अङ्गप्रभङ्ग इह संगररङ्गभूमौ
भूमानमानयति मानभृतो बलानाम् ॥ ९ ॥

या स्वैरवैरपरमैरशमैरवश्या
स्वैरेव दैववशतो निशितोक्तिरस्त्रैः ।
सा हन्ति हन्त तु निरन्तरमन्तरं तत्
प्रोत्साहमत्युपरमं परमं तनोति ॥ १० ॥

वर्यं स्वकार्यमिह किं किमकार्यमार्यैः
सत्कार्यधुर्यपदगा अविचार्य चैवम् ।
मात्सर्यमेकमुपधार्य निवार्य धैर्य-
गाम्भीर्यवृत्तिमपकुर्वत आत्मपक्षम् ॥ ११ ॥

शक्त्याखिलागमगतिः खलु पण्डितः 'स्यात्
साभ्यासमेकमपि शास्त्रमवाप्य शास्त्री ।
श्लोकार्थमात्रमतिरेव न वैदुषी स्यात्
प्रायोऽद्य नैव सुलभा किल भाति सापि' ॥ १२ ॥

शास्त्रश्रमं परिविधाय निधाय चित्तं
स्वाचार्यवर्यचरणेष्ववधाय कृत्ये ।
संधाय सत्पतिरतिं स्वयमेव सेतु-
बन्धाय साधु सकलैर्यतनीयमेव ॥ १३ ॥

शक्येत न स्वयमिदं यदि शुद्धचित्तं
वित्तं प्रयुज्य च परैरपि कारणीयम् ।
हेतुस्त्वजोऽर्थ इह साधुगिरोपकार्यः
सोत्तेजनं निजजनः स्वयमेव कुर्वन् ॥ १४ ॥

---

१ 'वृद्धा वेश्या तपस्विनी' इति न्यायेन । २ वक्रदृ[illegible] [illegible] पदम् । ३ प्रभुत्वं [illegible] [illegible] [illegible] धर्म । ४ प्रमा-णमानेऽल्पप्रवृत्ते । ५ [illegible] । ६ [illegible] । ७ [illegible] । ८ भगवान् ।

वाचो व्ययेपि यदि भूरिपरिश्रमः स्या-
द्वीक्ष्य स्वतः स्वजनमुद्यतमार्यकार्ये ।
औदास्यमात्रमवलम्ब्य सदास्यमुद्रां[1]
कार्या दया परतयात्र परोपकारे ॥ १५ ॥
कुर्वन्ति न स्वयममी कतिचित्कृतेर्ष्या
नान्यैः सहन्त इह हन्त विधीयमानम् ।
निन्दन्ति सत्सरणिमत्सरिणः परार्था-
नुन्मूलयन्ति वचसा बहुमान्यवाचैः[2] ॥ १६ ॥
लब्ध्वा न शास्त्रमधियन्ति धियं विशालां
तां योजयन्ति कुपथेषु युताः कुभक्तैः ।
केचित्कथंचिदपि शास्त्रलवानवाप्य
स्वाचार्यवाचमतिमुच्यै[3] परं चरन्ति ॥ १७ ॥
आचार्यवर्यविभुपादगिरः समग्रा
दृक्कर्णशोधनकृते[4] किल वर्णशोपि ।
पीताः सकृज्जनुपि यैरधुना सुधन्याः
स्युर्वैष्णवेषु कातेि तान्दिशताभिधातः ॥ १८ ॥
अन्यस्तनोति न वयं निजकर्म कुर्म
एतत्तु नोचितमतो न परः करोतु ।
एवं प्रपञ्चपदसंचयमञ्चयन्तः
साधून्मृदूनधमयन्ति जनेषु वाग्भिः ॥ १९ ॥
दोषैकसेचनविवेचनदक्षवाचो
ग्रामेऽत्र केचन सदैव मदीयनिन्दाम् ।
प्रत्यालयं प्रतिजनं कृतिविघ्ननिघ्ना
आवर्तयन्त्यविदिताः किमु वैष्णवाग्र्याः ॥ २० ॥
यैर्भ्रांसितः स कितवामितवाक्प्रपञ्चैः
पूर्णाटवीष्वनुदकासु तपर्त्तुपूर्त्तौ ।
क्रूरैर्भ्रमन्सममदैकस्वजनैर्वियुक्त-
स्त्रातोऽस्मि दासकरुणेन गदाधरेण ॥ २१ ॥
श्रान्तं यथामतिबलं समधीत्य मार्गे
तत्पारितोषिकमिदं विफलं मयाप्तम् ।

१ सदा मुखमुद्रणं तूष्णींभाव इति यावत् । २ बहुभिर्विश्रब्धैर्मान्या वाक् येषाम् । ३ उल्लंघ्य । ४ दृशोः कर्णयोश्च शुद्ध्यै । ५ ग्रन्थनिर्माणविघ्नतत्परः । ६ स्वजनासंनिधानादगला कूरैः सह भ्रमन् । ७ अन्धः । ८ यच्छ्रान्तं तस्य श्रमस्य ।

अत्रत्यभावकचये धृतराष्ट्रशब्दैः
किं वर्णितैरुप[1]कृतैरितरैः कृतैस्तैः ॥ २२ ॥
आजीवनानि च धनानि जनानुरागा-
त्सौख्यानि कीर्तिमपि हन्त हठैर्हरन्तः ।
जीवन्तु संततमनन्तपदैकभक्ते-
र्हेतुं विरागमिह मन्मनसेर्पयन्तः ॥ २३ ॥
आचार्यवाच्यपि न चेद्यतते कथा का
श्रीपू[2]रुषोत्तममुखोक्तिसुधावधाने ।
भट्टस्य मे तु रणितं मशकोपमस्य
दूरं क्षिपेच्छ्रवणतो नहि वैष्णवः कः ॥ २४ ॥
लेखे स्वतन्त्र इह मेऽस्ति समासकल्पो
भागः परोष्णुहतो वहतो विरागम् ।
प्रायोवकाशवसुचित्तविकाशहैन्या-
द्व्याख्यात्मना परिणतिं न गतस्ततः किम् ॥ २५ ॥
श्रीवल्लभप्रभुपदाब्जरतिर्मुकुन्द-
सेवाकृतिः श्रु[3]तिमतिर्हरिचक्रमार्चाम् ।
अर्थाद्धृति[4]र्हृदि धृ[5]तिः प्रतिजन्म मे स्यात्
चित्रैश्चिरादिह भवे भ्रमतः स्वकृत्यैः ॥ २६ ॥
अष्टाक्षरस्मरणमेव गुरोः प्रसादा-
च्चित्ते चिरं शरणभारपुरःसरं चेत् ।
भव्याय किं न भविता भुवि तावदेव
सा[6]सूयमत्सरकरैरपरैः श्रमै[7]ः किम् ॥ २७ ॥
ये[8] नाम केचिदिति यो भवभूतिनोक्तो
न्यायेन तेन लिखितं व्यसनेन किंचित् ।
कर्तास्म्यहो उपरतः पुरतः स्वभाव-
कृत्यं प्रसह्य हृदि मां प्रकृति[*]र्नियुङ्क्ते ॥ २८ ॥

---

१ उपकारैः । २ एतन्नामा नानाग्रन्थकारास्तदादीनाम् । ३ गीतादीनां सुबोधिन्यां चार्थेष्वादरः । ४ वैदिकज्ञानम् । ५ तासामेव हृदये धारणम् । ६ असूयावतां मत्सरोत्पादकैः । ७ ग्रन्थनिर्माणादिरूपैः ।

८ ये नाम केचिदिह नः प्रथयन्त्यवज्ञां जानन्तु ते किमपि तान्प्रति नैष यत्नः ।
उत्पत्स्यतेऽस्ति मम कोपि समानधर्मा कालो ह्ययं निरवधिर्विपुला च पृथ्वी ॥

* प्रकृतिस्त्वां नियोक्ष्यतीति भगवद्वाक्यात् ।

चेन्मण्डनेऽपि विदुषां च सुवर्णसूत्रे
व्याख्या मनोभिलषिता कृपया हरेः स्यात् ।
वक्ष्ये मया यदिह वाच्यतयोक्तमग्रे
प्राभञ्जनोपकरणं च समासतोऽस्याम् ॥ २९ ॥
दूरं निजोरुयुगलाद्विरचय्य वासो
दृश्येत नग्न इह दूरयितेति जाने ।
निर्गच्छेदच्छसुहां पुरतः प्रतप्ता-
च्चित्ताद्बहिः प्रलपितं क्षणविश्रमाय ॥ ३० ॥
वाचाटितेन कुटिलैः परिभाव्य मूर्त-
दुर्दैववद्भि बहुधैव समर्दयद्भिः ।
अस्मन्मतानुगतलोकविशेषवार्ता
स्वल्पा मयाकथि नमः शिरसा महद्भ्यः ॥ ३१ ॥
गोस्वामिवंशतिलकः किल कश्मलाना-
हर्त्तोयतो निजमतोदयतोपहेतोः ।
गोवर्धनोस्ति गिरिभृत्पदपङ्कजालि-
र्विद्याविलास्यथ विभुः सदयो मयि स्वे ॥ ३२ ॥
श्रीदीक्षितान्वयविभूषणमार्यकार्यं
कुर्वन्स्वयं प्रमदितैश्च विधापयन्स्वैः ।
सेवास्वधर्मशुचिशास्त्रनिधिः स्वमार्गो-
द्धर्ता विभाति विभुविठ्ठलनाथनामा ॥ ३३ ॥
मादृग्जनेपि सदयाभ्युदयाः स्वधर्म-
शर्मस्पृहाः श्रमवहा हि महानुभावाः ।
अन्येऽपि सन्ति विलसन्तु यथोपकारी
श्रीदेवकीसुतसुहृद्धृतिधर्मधुर्यः ॥ ३४ ॥
पुनरमृतवनैर्दग्धमाशुप्ररोहे-
दुरविघटनवज्रा दासवर्गे दयार्द्राः ।
ददतु सुभगसिद्धीरत्र चामुत्र सर्वाः
सततमथ कटाक्षाः श्रीमुकुन्दस्य ते मे ॥ ३५ ॥

---

१ विद्वन्मण्डन श्रीविठ्ठलनाथप्रभुकृतो वादग्रन्थः सुवर्णसूत्र च तस्यैव टीका श्रीपुरुषोत्तममहाशयैः कृता । २ मारतशक्ताविदमग्रे वक्ष्यामि इदमुत्तरार्धे वक्ष्यत इत्यादिकथनेन मया यदग्रे वाच्यतया प्रतिज्ञातं तत्तस्या टीकाया वक्ष्ये प्राभञ्जनोपयुक्तमपि तत्रैव प्रसङ्गात्किंचिद्वक्ष्ये । ३ विमलाशयानां पुर प्रतप्ताच्चित्ताद्बहिर्निर्गच्छत्प्रतापः क्षणं विश्रान्तये भवति । ४ मूर्तदुर्दैवैनैवास्मन्तं पीडयद्भिर्वाचाटितेन मया लोकविशेषाणां वार्तोक्ता न तु सर्वेस्तादृश इति विशेषपदं तदेवाभिप्रेत्याह—नम इति । ५ देवकीनंदनाख्यः सुहृत् ।

प्राभञ्जनः

मुद्रालयमनुष्याणां विशेषतः प्रमादात्परिशोधेऽस्माभिर्नियुक्तानामपि दृष्टिप्रमादाच्च अत्र ग्रन्थे बहून्यशुद्धानि समापतितानि यानि प्रेक्षकैर्ग्रन्थकारप्रमादतयैव संभाव्येरंस्तादृशानि यथा पृ० ९६ पं० २४ "व्यवस्थातो नाना" इति काणादसूत्रानुवादे "व्याख्यातो नाना" इत्यापतितं तानि गुणैकग्राहिभिर्बुधैः परिशोध्यानुग्राह्योयं ग्रन्थ एतदर्थमेव ग्रन्थान्ते ग्रन्थकृता तेनामुना श्लोकद्वयेनाभ्यर्थ्यन्ते भवादृशा अकृशानुभावा विबुधाः ॥

वेदानुयायिविदुषः परभक्तिनिष्ठा-
न्विज्ञापयामि चरणौ परिगृह्य नम्रः ।
उच्चद्वयागुणदृशोन्यपरिश्रमज्ञा
अस्मिन्प्रमादशतकानि मम क्षमध्वम् ॥ १ ॥
अन्धोऽस्म्यहं निजकरेण न लेखशक्त-
स्तल्लेखितं निखिलमेव करैः परेषाम् ।
भ्रान्त्यादयो जगति मानुषबुद्धिधर्माः
सर्वांशतो न परिहर्तुमिमे च शक्याः ॥ २ ॥

अयं मारुतशक्तिग्रन्थनिर्माता गट्टूलालेति नाम्ना प्रसिद्धस्तैलङ्गवेल्लनाटीज्ञातीयः पञ्चनद्युपाह्वो गोवर्धनशर्मा विक्रमार्कशकस्य विंशशतकस्य प्रथमवर्षे लब्धजन्मा सौराष्ट्रदेशे गिरिनार इति प्रसिद्धस्य रैवतकपर्वतस्योपत्यकावर्तिनि (जूनागढ) जीर्णदुर्गपुरे श्रीमद्वल्लभाचार्यवंश्यगोस्वामिश्रीव्रजवल्लभमहाराजस्य स्वमातामहस्य गृहे वृद्धिं गतो गर्भाष्टमे वर्षे वैशाखशुक्लपक्षे पित्रोपनीयोपदिष्टसावित्रीकः स्वमातामहाद्वाप्तसंप्रदायदीक्षः स्वजन्मतो नवमे (१९०९) वर्षे शीतलाख्यरोगेण हतनयनद्वयः स्वपितुः परिश्रमादेवाधीतवेदतदङ्गषड्दर्शनादिको दशमे (१९१०) मुम्बापुरे निवासमिच्छता स्वतातेन सहागत्येह पुरे कृतसद्मा पद्मापतिदासो निजसदने स्वधनव्ययेन स्थापितविद्यालक्ष्मीपाठशालो बहूनन्तेवासिनोऽध्यापितवान्ग्रन्थांश्च निर्मितवान् । अद्यापि स्वयं स्थापितायां विद्यालक्ष्मीपाठशालायां स्वतः परतश्च छात्रान्पात्राणि विद्यादानस्याध्यापयमानः स्वमातामहदत्तं श्रीमत्प्रभुरणाङ्गजश्रीगिरिधरसेवितं श्रीबालमुकुन्दाख्यं भगवत्स्वरूपं तदिच्छोपलब्धैरुपचारैः सेवमानोस्वल्पविभवोपि यथोपपत्तिप्रायसंप्रदाय आवश्यकग्रन्थान्निर्मिमाणो दैवोपसादितमन्नं देवपित्रतिथ्यादिभ्यो यथासंभवं विभज्य शेषमुपभुञ्जानः "संतुष्टो यर्हि वर्तेत ब्राह्मणो येन केनचित्" इत्यादिशास्त्रमनुसृत्य आस्ते । अद्यापि तत्सदनं ग्रहणधारणपटुभिर्वटुभिः प्रौढैश्च साहित्यव्याकरणन्यायवेदान्तादिशास्त्रार्थकोलाहलेन मुखरीक्रियते । अथ मारुतशक्तिग्रन्थकारस्य प्रस्तावनाप्रणयनेऽनवकाशात्तदनुज्ञावशादेतां प्रस्तावनां भावेनायमचीक्लृपत् ।

विनिवेदयति च चराचरोद्भवनोपचयापचयचातुरीचणस्य सकलविद्यास्थानसंप्रवुपलम्भिनो जगदीश्वरस्य सच्चिदानन्दस्य श्रीहरेश्चरणारविन्दयोः प्रणतिततिपुरःसरं प्रस्तावनापुष्पाञ्जलिमिमं

जामनगरनिवासी गिरिनारायणज्ञातीयमहाभट्ट-
बालजीतनुजनुः दीनकविः शास्त्री,
श्यामशर्मा.

॥ श्रीः ॥

अथ मारुतशक्तिसहितः प्राभञ्जनः

सहस्राक्षखण्डनम्

श्रीकृष्णाय नमः ॥

श्रीगोपीजनवल्लभाय नमः ॥ श्रीमन्मथुरेशो जयति ॥

॥ श्रीगणेशाय नमः ॥

वृन्दारण्यनिकुञ्जमञ्जुभवने देदीप्यमानं सदा
भक्त्यास्वाद्यलसद्रसैकसदनं सेव्यं सदा सज्जनैः ॥
वेदान्तैकविचारवेद्यममलं गोपीजनानन्दकृद्
भक्तानां भयभञ्जनं भयहरं भव्यं महो भावये ॥ १ ॥

मारुतशक्तिव्याख्या

श्रीमदाचार्यश्रीविठ्ठलेश्वरचरणकमलेभ्यो नमः ॥

वन्दे श्रीसुखवृद्धये धृततनुं स्वैकाश्रितानाममुं
तीव्रासारघनोद्यमोद्धतसहस्राक्षस्य भिन्दन् मदम् ॥
दासं स्वं कृपया करेण मृदुना गोवर्द्धनं प्रोद्धरन्
हृत्त्वार्त्तिं स निजव्रजं सुखनिधिं यो लीलयैव व्यधात् ॥ १ ॥
अथोन्तस्सद्धामध्रुवमधुरलीलावलिपरः
परानन्दाकारो भुवि करुणयाऽऽविष्कृततनुः ॥
गदां विघ्नान् भेत्तुं तिमिरमपहर्तुं जनहृदां
दधच्चक्रं सोऽस्मानवतु मथुराऽधीश्वरहरिः ॥ २ ॥
शुभा विद्यासंपद्व्रजपसुतभक्तिः परपदं
स्वतः संसिद्ध्येद्यन्नखशशिकरव्यासवपुषाम् ॥
तदास्तां मस्ते मे सकलकलुषोन्मोषि रुचिरं
चिरं स्वाचार्याणां चरणमरुणं भूरिकरुणम् ॥ ३ ॥
सदालिसेवितौ वन्दे पराऽऽगमहितौ मृदू ॥
अरविन्दरुचौ चोरौ चरणौ विठ्ठलेशितुः ॥ ४ ॥
श्रीमद्बालमुकुन्दसुन्दरवपुःस्पर्शेन सानन्दतां
नीतो नित्यमहं महं च महतामहं जडोऽप्यापितः ॥
यैर्मद्यानुपदिश्य तान्हरिरतेर्दाने स्वतन्त्रान्सदा
गोस्वामिव्रजवल्लभाभिधगुरून् मातामहान्स्वान् भजे ॥ ५ ॥

श्रीमच्चक्रधराऽऽस्यचन्द्रिरुचां चञ्चच्चकोराश्चिरा-
दुर्वादोत्सतगर्वपर्वतपविप्रायप्रचण्डोक्तयः ॥
श्रीमद्विट्ठलनाथनामविभवो गोस्वामिवर्याः सदा
जीयासुः कुविदां विदारणकृते प्राभञ्जनो यैः कृतः ॥ ६ ॥
नृणां ये व्यामोहं मथितमतयो हन्त यतयो
वहन्ते वाग्जालैर्जगति कलिकालैधितबलैः ॥
समस्ताः प्रोद्स्तास्त इह सहसा तैर्विभुवरै-
र्वयं कुर्मस्तेषां वचसि पुनराद्दोषुरुषिकाम् ॥ ७ ॥
सत्पक्षपातिनो हंसा नूनं नालीकवल्लभाः ॥
गुणं गृह्णीत मा दोषं नीरक्षीरविवेकिनः ॥ ८ ॥
मार्तण्डेक्षणसकटां घनघटां क्षोदैः क्षिपन्ती क्षणा-
द्विघ्नानाप्यशनिं सहस्रनयनं निर्गर्वयन्ती स्वतः ॥
पुष्णन्ती हरिभावमात्मजमसावुच्छ्वासयन्ती जना-
ञ्जीयान्मारुतशक्तिराशुगतिदा सञ्जीवयन्ती जगत् ॥ ९ ॥

अथ श्रीपुरुषोत्तमवदनरूपश्रीमदाचार्यप्रकटिते वेदगीतासूत्रश्रीभागवतादिसिद्धे ब्रह्मवादसिद्धान्ते दोषोद्भावाभिलाषिणा केनचिद्द्वेषविशेषकषायकलुषमतिना वेषमात्रयतिनाऽधुना निबद्धं सहस्राक्षनामकं ग्रन्थं चिखण्डयिषवो गोस्वामिश्रीविट्ठलनाथचरणाः प्रारिप्सितग्रन्थस्य निष्प्रत्यूहपरिपूर्तिप्रचारादिफलकं शिष्टाचारानुमितश्रुतिबोधितकर्तव्यताकं श्रीपुरुषोत्तमध्यानलक्षणं मङ्गलमाचरन्ति—वृन्दारण्येत्यादिना ॥ महस्तेजः पुरुषोत्तमरूपं भावये ध्यायामीति संबन्धः ॥ "अथ यदतः परो दिवो ज्योतिर्दीप्यते ॥ भारूपः सत्यसङ्कल्पः ॥ परं ज्योतिरुपसंपद्य येन स्वरोचिषा विश्वं रोचितं रोचयाम्यहम् ॥ ज्योतिश्चरणाभिधानात्" इत्यादिश्रुतिस्मृतिन्यायेभ्यः परस्य महोरूपत्वं स्पष्टम् ॥ एतेन "प्रकाशाश्रयवद्वा तेजस्त्वात्" इत्यधिकरणसिद्धस्वधर्माभेदोऽपि दर्शितो ज्ञेयः ॥ मह्यत इति महः ॥ 'मह पूजायां' असुन्, तेन सर्वोत्तमत्वं बोधितम् ॥ "पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः" इति कठश्रुतेः ॥ "अक्षरात्परतः परः" इति मुण्डकश्रुतेः ॥ 'मत्तः परतरं नान्यदि'त्यादिस्मृतिभ्यः ॥ "परमतः" इति न्यायाच्च ॥ भावना ध्यानम् ॥ 'नचाभावयतः शान्तिरशान्तस्य कुतः सुख'मिति परमानन्दलाभार्थं तस्याऽऽवश्यकत्वम् ॥ परमानन्दप्राप्तिरूपफलस्य कर्तृगामित्वविवक्षणादात्मनेपदम् ॥ कीदृशं मह इत्याकाङ्क्षायां लौकिकतेजसो व्यवच्छेत्तुमाहुः—वृन्देत्यादि ॥ यत्र वृन्दावनं नाम वनं कामदुघैर्द्रुमैः ॥ मनोरमनिकुञ्जाढ्यं सर्वर्तुसुखसंयुतम्' इति वक्ष्यमाणबृहद्वामनादिवाक्येभ्यो वृन्दावनसंबन्धिनो ये निकुञ्जाः मञ्जुनि मनोरमे भवने स्वधामनि तद्रूपे वा मञ्जुभवने सदा देदीप्यमानं अतिशयेन प्रकाशमानम् ॥ दीप्यतेर्यङि द्विरुक्ते हलादिशेषे पूर्वखण्डगुणे च शानच् ॥ "न यत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः । तमेव भान्त-

मनुभाति सर्वं तस्य भासा सर्वमिदं विभाति" इति मुण्डकश्रुतेः ॥ कठवल्लीषु तु 'न सत्र' इति पाठः ॥ स्वधामनि स्थितिस्तु "यत्रैतत्पदमवभाति भूरि' 'यो वेद निहितं गुहायां परमे व्योमन्' 'तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः' 'सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम् ॥ आविस्संनिहितं गुहाचरं नाम महत्पदमत्रैतत्समर्पितं" इत्यादिबह्वृच-तैत्तिरीयकठमुण्डकादिश्रुतिभिः ॥ 'यं प्राप्य न निवर्तन्ते तद्धाम परमं मम ॥ न तद्भासयते सूर्य' इत्यादिस्मृतिभिः ॥ 'विष्णोर्द्धाम परं साक्षात् ॥ स्वधामनि ब्रह्मणि रंस्यते मन' इत्यादि-पुराणवचनैश्च निर्विचिकित्सैव ॥ सदेति कालपरिच्छेदराहित्यम् ॥ द्वादशस्कन्धचतुर्थाध्याये'न तस्य कालावयवैः परिणामादयो गुणा'इत्युपक्रम्य 'तन्मूलभूतं पदमामनन्ती'ति स्मरणात्, कालस्यापि तत एवोत्पत्तेश्च ॥ इदं यथा तथा सहस्राक्षतृतीयश्लोकखण्डने प्रपञ्चयिष्यामः ॥ 'योगास्त्रयो मया प्रोक्ता नृणां श्रेयोविधित्सया ॥ ज्ञानं कर्म च भक्तिश्च नोपायोऽन्योऽस्ति कर्हिचित्' इत्येकादशे भगवद्वाक्यान्मार्गत्रयस्य साधनतः फलतश्चोप-*योगं दर्शयिष्यन्तः प्रथमं भक्तिमार्गस्य निष्कर्षमाहुः*—भक्त्येति ॥ भक्त्यैव आस्वादयितुं शक्यो लसन् शोभमानो यो रसः "रसो वै सः' 'आनन्दं ब्रह्मण"इत्यादिषु श्रावितो निरवध्यानन्दस्तस्यैकं अद्वितीयं सदनं स्थानम् ॥ भक्त्यैकास्वाद्यत्वन्तु छान्दोग्यकैवल्यादिषु "ब्रह्मसंस्थोऽमृतत्वमेति' 'श्रद्धाभक्तिध्यानयोगादवेहि" इत्यादिश्रवणात् 'पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया' 'नाह वेदै'रित्युपक्रम्य 'भक्त्या त्वनन्यया शक्य' इति स्मरणात् 'भक्त्याहमेकया ग्राह्यः', 'भक्त्यैव तुष्टिमभ्येति विष्णुर्नान्येन केनचित्,' 'प्रीयतेऽमलया भक्त्या हरिरन्यद्विडम्बन'मित्यादिपुराणाच्च ॥ आनन्दस्यैकसदनत्वं तु तदानन्दांशत एवान्येषामानन्दवत्तायाः' 'तस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति एष ह्येवानन्दयाति" इत्यादावाम्नानात् ॥ स्पष्टं चेदं चतुर्लक्षण्यां 'तद्धेतुव्यपदेशाच्चे'त्यादौ ॥ कर्ममार्ग-निष्कर्षमाहुः—सेव्यं सदा सज्जनैरिति ॥ 'सद्भावे साधुभावे चे'त्याद्युक्तजनैर्दैवसर्गोत्पन्नैरिति यावत् ॥ निरन्तरं सेवितुं योग्यं शक्यं च ॥ 'मामप्राप्यैव कौन्तेये'त्यासुराणामनधिकारस्मरणात् ॥ एतेन "अतो बुध आभजेत भक्त्यैकयेशं गुरुदेवतात्मा', 'गृहशुश्रूषणं मह्यं दासवद्यदमायया। सर्वलाभोपहरणं" इत्याद्येकादशवाक्यसिद्धा तनुजवित्तजसेवाऽवश्यकर्तव्यत्वेन दर्शिता ॥ श्रौतस्मार्तकर्माण्यपि तत्तद्रूपस्य भगवत एव सेवेयमिति बुद्ध्याऽवश्यकर्तव्यानीति बोधितम् ॥ तेन कर्ममार्गनिष्कर्षो व्याख्यातः ॥ 'कर्माण्येकं तस्य देवस्य सेवे'त्युक्तेः ॥ ज्ञानमार्गस्य निष्कर्षमाहुः—वेदान्तेति ॥ विद्यते ज्ञायते तत्त्वमेभिरिति वेदाः धर्मब्रह्मप्रतिपादकापौरुषेयवाक्यानि ॥ 'हलश्चे'ति घञ् ॥ तेषामन्तो निश्चयोऽत्रेति वेदान्ताः ॥ 'वेदान्तविज्ञानसुनिश्चितार्था' इति वेदार्थनिश्चयं प्रति वेदान्तविज्ञानस्य हेतुत्वश्रवणात् ॥ यद्वा वेदस्यान्ताः शिरोभागाः ॥ 'ऋचां मूर्द्धानं यजुषामुत्तमाङ्गं साम्नां शिरोऽथर्वणां मुण्डमुण्डम्" इति कौषीतकिश्रुतेः ॥ उपनिषद इत्यर्थः ॥ तेषां एकेन केवलेन ॥ 'एके मुख्यान्यकेवला'इत्यमरः ॥ विचारेण युक्तिभिः परिचिन्तनरूपमननेनैव वेदितुं शक्यम् ॥ शाकल्यब्राह्मणे "अगृह्यो नहि गृह्यते" इत्यादिना प्रमाणान्तरप्रवृत्तिं प्रतिषिद्ध्य "तं त्वौपनिषदं पुरुषं पृच्छामि" इत्युपनिषन्मात्रप्रवृत्तेः प्रतिप्रसवात् ॥ मननस्याव-

द्वयकत्वं तु "तत्त्वेव भयं विदुषो भवति' इत्यानन्दवल्लीश्रुतेः ॥ **अमलं** निर्दोषं प्राकृतधर्मानाश्रयमिति यावत् ॥ स्पष्टमिदं तृतीयस्य द्वितीयचरणे "प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः" इत्यत्र ॥ भक्तवश्यत्वमाहुः—**गोपीजनानन्दकृदिति** ॥ गोपालतापनीवासुदेवाद्युपनिषत्प्रसिद्धा, गोपनोपयोग्याधिदैविकशक्तयो गोपीजनः ॥ एतच्च पञ्चरात्रेऽपि प्रपञ्चितम् ॥ तेषां परमभक्तत्वादानन्दकृत् ॥ नवमस्कन्धे 'अहं भक्तपराधीन'इत्यादिसंदर्भात् ॥ तनुजवित्तजसेवाया अवान्तरफलद्वयं विशेषणद्वयेनाहुः—**भक्तानामित्यादि** ॥ भक्तानां 'भज इत्येष वै धातुः सेवायां परिकीर्तितः ॥ तस्मात्सेवा बुधैः प्रोक्ता भक्तिः साधनभूयसी'ति गारुडवाक्यात् सेवाकर्तॄणां भवं संसारं भनक्तीति भवभञ्जनस्तम् ॥ भञ्जो आमर्दने ॥ पवनस्यन्दनादिशब्दवद् 'बहुलमन्यत्रापि' (पा० २ सू. १८) इत्यौणादिकसूत्रेण युच् ॥ 'यत्पादपोतेन महत्कृतेन कुर्वन्ति गोवत्सपदं भवाब्धि'मित्याद्युक्तेर्युक्तमेतत् ॥ तथा भक्तानामात्मनि प्रपञ्चे चाद्वैतब्रह्मत्वस्फोरणेन भयहरम् ॥ तथा च पुरुषविधब्राह्मणे "सोऽबिभेत्तस्मादेकाकी बिभेति सहाऽयमीक्षाञ्चक्रे यन्मदन्यन्नास्ति कस्मान्नु बिभेमीति तत एवाऽस्य भयं वीयाय कस्माद्ध्यभेष्यत् द्वितीयाद्वै भयं भवति" इति ॥ एकादशस्कन्धेऽपि 'भयं द्वितीयाभिनिवेशतः स्यादीशादपेतस्य विपर्ययोऽस्मृतिः ॥ तन्माययातो बुध आभजेत भक्त्यैकयेशं गुरुदेवतात्मे'त्याद्यनुसन्धेयम् ॥ एतेन 'ततः संसारदुःखस्य निवृत्तिर्ब्रह्मबोधन'मिति श्रीमदाचार्योक्तं तनुजवित्तजसेवाया अवान्तरफलद्वयं संगृहीतं ज्ञेयम् ॥ अत्र विशेषस्तु मदीये वेदान्तचिन्तामणौ पञ्चदशप्रकरणे द्रष्टव्यः ॥ तथा भव्यं कल्याणगुणपूर्णम्, अप्राकृतनिखिलधर्मरूपमिति यावत् ॥ "आह च तन्मात्रं" इति ब्रह्मसूत्रात् ॥ अत्र विस्तरस्तृतीयस्य द्वितीये पादे भाष्ये प्रकाशे चावधेयः ॥ किंच तत्तद्धर्मरूपेण तत्तत्फलरूपेण च भवतीति भव्यम् ॥ 'भव्यगेय—'इत्यादिना साधुः ॥ 'भक्तानां भयभञ्जन'मित्यादिविशेषणत्रयेण भक्तिज्ञानकर्ममार्गाणां फलान्यपि द्योतितानि ॥ अत्र वेदान्तरूपं प्रमाणं तत्प्रमेयं ब्रह्मस्वरूपं भक्त्यादिरूपं साधनं निरवध्यानन्दास्वादलक्षणं फलं च संक्षेपेण दर्शितमिति व्यासदर्शनानुरोधी सर्वोऽपि शास्त्रार्थः संगृहीतः ॥ तेनैव मङ्गलस्य वस्तुनिर्देशात्मकत्वमपि फलितम् ॥ 'आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुख'मिति मङ्गलस्य त्रैविध्याङ्गीकारात् स्वस्य भक्तत्वात् 'भक्त्यास्वाद्ये'त्यादिना प्रत्यगाशीरपि ध्वनिता ॥ नमस्क्रियारूपं त्वग्रिमश्लोके सेत्स्यति ॥ शार्दूलविक्रीडितं वृत्तम् ॥ 'सूर्याश्वैर्मसजास्ततः सगुरवः शार्दूलविक्रीडित'मिति वृत्तरत्नाकरे तल्लक्षणात् ॥ १ ॥

नमामि मथुराधिपं सकलवल्लवीवल्लभं
विचित्रवनमालया लसितपीतपट्टाम्बरम् ॥
किरीटमणिमेखलाकटककुण्डलैर्मण्डितं
समुल्लसितराधया नवनिकुञ्जतल्पे स्थितम् ॥ २ ॥

एवं वेदादिप्रमितं पुरुषोत्तमस्वरूपं स्मृत्वा विस्पष्टस्वेष्टदेवतानमनलक्षणं मङ्गलमाचरन्ति—**नमामि मथुराधिपमिति** ॥ भगवति जीवैर्नमनस्यैव कर्तुं शक्यत्वात्

'नमामी'त्यारम्भ एवोक्तम् ॥ "नमस्कृत्य हि यसीयाँसमुपचरन्ति" इति तैत्तिरीयश्रुतेः ॥ 'किमासनं ते गरुडासनाये'त्यादौ परितोषणक्षमस्य साधनान्तरस्याशक्यत्वस्मरणाच्च ॥ अत एव श्रीमदाचार्याः सर्वत्र नमनवाचकं पदमादावेव प्रयुञ्जते ॥ नमनं च प्रह्वीभावः, स च मत्तस्त्वमुत्कृष्टस्त्वत्तोऽहमपकृष्ट इत्यनुसंधानपूर्वकः कायादिव्यापारः ॥ विस्तरस्तु 'नमो भगवते तस्मा' इत्यत्रावरणभङ्गादाववधेयः ॥ मथुराधिपं श्रीमथुरेशाख्यं श्रीमदाचार्यसेव्यं श्यामचतुर्भुजाकृति स्वयमभिव्यक्तं भगवत्स्वरूपम् ॥ कीदृशं तम् ? ॥ सकलवल्लवीवल्लभं सकलाः सर्वाः कलाभिश्चातुर्यैः सहिता वा या वल्लव्यो गोप्यः ॥ 'गोपगोपालगोसंख्यगोधुगाभीरवल्लवाः' इत्यमरः ॥ पुंयोगलक्षणो ङीप् ॥ ता वल्लभा यस्य तम् ॥ 'नायं श्रियोऽङ्ग जनितान्तरतेः प्रसाद' इत्यादिवाक्येभ्यः ॥ तासां वा वल्लभम् ॥ इदं च गोपालविद्यायां तद्विवरणरूपपञ्चरात्रभागादिषु च प्रसिद्धम् ॥ अथवा सकलेत्यत्र कलया भगवद्रूपया लक्ष्म्या सहिताः सकलाः, रमावेशयुक्ता इति यावत्; अन्यथा भगवत्संबन्धायोगात् ॥ इदं च 'रेमे रमेशो व्रजसुंदरीभि'रित्यत्र सुबोधिन्यां स्पष्टम् ॥ लक्ष्म्याः कलात्वं तु कूर्मपुराणे प्रथमाध्याये इन्द्रद्युम्नेतिहासे 'तस्यैवं वर्तमानस्य कदाचित्परमा कला ॥ स्वरूपं दर्शयामास दिव्यं विष्णुसमुद्भवम् ॥ दृष्ट्वा प्रणम्य शिरसा विष्णोर्भगवतः प्रभाम्' इत्यादिना 'एवमुक्ताथ विप्रेण देवी कमलवासिनी' इत्यन्तेन दर्शितम् ॥ मध्ये 'न मे नारायणाद्भेदो विद्यते हि विचारतः ॥ तन्मयाहं परंब्रह्म स विष्णुः परमेश्वर' इति तस्या भगवदभेदोऽप्युक्तः ॥ अतो बृहद्वामनपुराणादौ प्रसिद्धं वरदानं सार्थकयितुं स्वाभिन्नपरमलक्ष्म्यावेशाद्ब्रह्मविष्टदारुन्यायेन स्वात्मकत्वं तासां संपाद्य ताभिः समं रमणं तद्वल्लभत्वं च युक्तमेव ॥ विचित्रेति ॥ विशेषेण चित्रा, 'स्वमायां वनमालाख्यां नानागुणमयीं दध'दिति द्वादशस्कन्धवाक्यादद्भुता विविधवर्णयुक्ता वा ॥

'चित्राखुपर्णीगोडुम्बासुभद्रादन्तिकासु च ॥ मायायां सर्पनक्षत्रे नदीभेदेषु च स्त्रियाम् ॥ तिलकालेख्ययोः क्लीबं कर्बुराद्भुतयोरपि ॥ तद्युक्तयोस्त्वन्यलिंग'मिति मेदिनी ॥ यद्वा चितं बुद्धिं त्रायत इति चित्रा ॥ 'प्रेक्षोपलब्धिश्चित्संविदि'त्यमरः ॥ विशेषेण चित्रा बुद्धित्रात्री ॥ श्रीसुबोधिन्यां 'बर्हापीड'मित्यादिश्लोकविवरणे वनमालायाः कीर्तिमयत्वनिरूपणात् ॥ अथवा विभिः पक्षिभिर्भ्रमरैश्चित्रा 'मधुव्रतव्रातविघुष्टया स्वया विराजितः श्रीवनमालया हरि'रित्यादिवर्णनात् । तादृशी या वनमाला तया लसितं पीतपट्टरूपं अम्बरं यस्य तम् ॥ किरीटेत्यादि ॥ इदं कौस्तुभादेरुपलक्षणम् ॥ एतेन 'तमद्भुतं बालकमम्बुजेक्षण'मित्यादिश्लोकद्वयेन निरूपितं स्वरूपमत्रापि प्रदर्शितम् ॥ मथुराधिपेति नाम्नैव चतुर्भुजत्वसायुधत्वादेर्लाभात् ॥ सान्द्रपयोदसौभगत्वं ध्वनयन्ति—समुल्लसितेति ॥ सम्यगुल्लसिता ॥ यद्वा मुदा सहिता समुत्, सा चासौ लसिता शोभिता चेति ॥ शीतोष्णं स्निग्धोष्णमित्यादिवदुत्तरपदार्थस्य विशेष्यत्वविवक्षया समासः ॥ सा चासौ राधा चेति तया ॥ सहार्थकपदयोगाभावेऽपि 'वृद्धो यूना' इति ज्ञापकात् सहार्थविवक्षया तृतीया ॥ नव्यास्तु 'सहयुक्ते प्रधान' इत्यत्र युक्तपदादेवायमर्थो लभ्यत इत्याहुः ॥ दृश्यन्ते चैवंविधा भोजराजादीनां प्रयोगाः—'रामे विदेहसुतया तरुमूलसंश्रमंतःपुरं विशति

लक्ष्मणसौविदल्ल'मित्यादयः ॥ तेनाप्रयुक्तत्वशङ्काप्यपास्ता ॥ अथ च **राधा** विद्युत् ॥ 'राधा विद्युद्विशाखयोः । विष्णुकान्तामलक्योश्च गोपीवेधविशेषयो'रिति हैमः ॥ श्लेषमहिम्ना समुल्लसितविद्युत्साहित्यबोधनेन सम्यङ्मेघलक्ष्मीर्ध्वनिता भवति ॥ **नवेति** ॥ नवं तत्कालकल्पितत्वादम्लानं निकुञ्जसंबन्धि अर्थात् पुष्पादिमयं यत् **तल्पं** शयनीयं तत्र स्थितम् ॥ यद्वा नवनं स्तवनम् ॥ णु स्तुतौ, नवमस्यास्तीति **नवनी**, पक्ष्यादिकर्तृकभगवत्स्तुतिविशिष्टः कुञ्जः ॥ 'शृण्वन्ति मीलितदृशो विगताऽन्यवाच' इत्यत्रान्यपदेन भगवदुपयोगिवाक्त्यागबोधनात् ॥ अथवा नवनी स्वयं स्तुतिविषयः कुञ्जः, तलवकारब्राह्मणे–"तद्ध तद्वनं नाम तद्वनमित्युपासितव्यं" इति भगवत एव लीलावनत्वेनोपासनाश्रवणात् ॥ यद्वा **नवनि** स्तुतिविषयः यत्कुञ्जतल्पं तत्र ॥ भगवत्पर्यङ्कस्य कौषीतकिब्राह्मणे अमितौजस्त्वाम्नानात् ॥ तथा हि—तत्र चित्रगाङ्ग्यायन्युपाख्याने (अ० १ खण्ड ३) "अपराजितमायतनमिन्द्रप्रजापती द्वारगोपौ विभुप्रमितं विचक्षणाऽऽसन् ह्यऽमितौजाः पर्यङ्कः" इति ॥ तथा (अ० १ खण्ड ५) "स आगच्छत्यमितौजसं पर्यङ्कं स प्राणस्तस्य भूतं च भविष्यच्च पूर्वौ पादौ श्रीश्चेरा चापरौ" इत्यादि श्रूयते ॥ अत्र नमनोक्त्या प्राधान्येन कायिकः प्रह्वीभावः ॥ पूर्वश्लोके भावनोक्त्या मानसः सः ॥ वाचिकस्तु श्लोकद्वयपठनादेव सिद्धः ॥ तेन 'मनः स्मरेतासुपतेर्गुणानां गृणीत वाक्कर्म करोतु काय' इत्यादिषष्ठस्कन्धादिवाक्यसंमतः कायादित्रयस्य भगवदुपयोगोऽत्र दर्शितः ॥ पृथ्वी वृत्तम् ॥ 'जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरु'रिति तल्लक्षणात् ॥ २ ॥

नत्वा श्रीवल्लभाधीशान् प्रभून् श्रीविठ्ठलेश्वरान् ॥
तद्वचःखण्डनाभासं खण्डयामि यथाक्रमम् ॥ ३ ॥

एवं भगवन्तं नत्वा "यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ॥ तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः" ॥ "आचार्यवान्पुरुषो वेद" इत्यादिश्वेताश्वतरच्छान्दोग्यादिश्रुतिभिराचार्यभक्तेरावश्यकत्वाच्छ्रीमदाचार्यश्रीविठ्ठलाचार्यनमनलक्षणं मङ्गलमाचरन्तः स्वचिकीर्षितं प्रतिजानते–**नत्वेति** ॥ नमनार्थकपदस्यारम्भ एव प्रयोगेऽभिसंधिस्तूक्त एव ॥ श्रीवल्लभाधीशांस्त्वा तथा प्रभून् सर्वविधफलदाने प्रभवतः ॥ विदा ज्ञानेन ठान् शून्यान् लान्त्यनुगृह्णन्तीति विठ्ठलाः, ते च ते ईश्वराः सर्वसमर्थाश्च तान्नत्वा ॥ **तद्वच इति** ॥ तेषां निर्दिष्टपूर्वाणां श्रीमदाचार्याणां श्रीविठ्ठलेश्वराणां च वचसां खण्डनस्य आभासम् ॥ ईश्वरवाचां वास्तविकखण्डनस्यासंभवादाभासपदम् ॥ **यथाक्रमम्** क्रममनतिक्रम्य खण्डयामि ॥ पूर्वं श्रीमदाचार्यवचसां खण्डनमनन्तरं श्रीविठ्ठलाचार्यवचसां तस्य तदिति क्रमः ॥ यद्यपि प्रथमभागे समर्थ्यमानः शुद्धाद्वैतमार्त्तण्डो न श्रीमदाचार्यकृतस्तथापि तत्प्रतिपाद्यः शुद्धाद्वैतपदार्थः श्रीमदाचार्योक्त एव समर्थ्यते ॥ तत्र तत्र दूषिताणुभाष्यभागा अपि समर्थ्यन्त एवेति श्रीमदाचार्यवचसां मण्डनमविवादम् ॥ द्वितीयभागे तु स्पष्टमेव श्रीविठ्ठलेश्वरचरणविरचितं विद्वन्मण्डनं मण्ड्यते ॥ यद्वा **यथाक्रमम्** येन क्रमेण खण्डनाभासः प्रवृत्तस्तेनैव क्रमेण खण्डयामि ॥ एतेन साकल्येन चिखण्डयिषा बोध्यते ॥ श्रीमदाचार्यादिवचस्सु निर्दूषणतायाः स्वयं सम्यग्ज्ञातत्वेऽपि परेषां तत्र

व्यामोहवारणार्थं ग्रन्थारम्भ इति क्रियाफलस्य परगामित्वात्परस्मैपदम् ॥ एतेन प्रयोजनमदर्शि ॥ तद्वचस्समर्थनरूपो विषयोऽप्यवायोधि ॥ तेनैव तज्जिज्ञासुरधिकारी प्रतिपाद्यप्रतिपादकभावस्संबन्धश्चास्फोरीत्यनुबन्धचतुष्टयं स्पष्टम् ॥ ३ ॥

शुद्धाद्वैतविभाकरस्य किरणैः प्रोद्बोधितान्सज्जनान्
विद्वन्मण्डनमण्डितान्बुधवरानालोक्य कोऽप्यासुरः ॥
व्यातेनेऽभ्रतमःपविं च युगपत्स्रष्टुं सहस्रेक्षणं
शक्तस्तद्वितयस्य नाशनविधौ प्राभञ्जनस्तन्यते ॥ ४ ॥

उत्तरार्द्धोक्तार्थं स्वयं स्पष्टयन्ति–**शुद्धाद्वैतेति** ॥ शुद्धाद्वैतमेव विभाकरः सूर्यः ॥ मयूरव्यंसकादित्वात्समासः ॥ अथवा शुद्धाद्वैतस्य विभाकर इव विभाकरस्तत्प्रकाशकः शुद्धाद्वैतमार्त्तण्डाख्यो ग्रन्थस्तस्य **किरणैः** वत्तादात्म्यापन्नैरुपदेशैः **प्रोद्बोधितान्** सर्वांशतो निरस्तमोहनिद्राकान् **सज्जनान्** साधुभावप्रशस्तकर्मयज्ञतपोदानस्थित्यादिसंपन्नान् ब्रह्मास्तित्वज्ञानादास्तिकान् ॥ 'सद्भावे साधुभावे चे'त्यादिगीतोक्त्या "अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदु"रिति इति ब्रह्मवल्लीश्रुत्या चेदं लभ्यते ॥ तथा ॥ **विद्वदिति** ॥ विदुषामुचितेन मण्डनेन वस्त्राभरणादिना अथ च विद्वन्मण्डनाख्येन ग्रन्थविशेषेण मण्डितान् ॥ मनुष्यो यः प्रातरुत्थाय प्रथमं शरीरकार्येष्वाह्निकं तत आभरणादिना मण्डनं च करोतीति प्रसिद्धम् ॥ दशमस्कन्धोक्तभगवदाह्निकेऽप्येष क्रमो दृश्यते ॥ तथात्रापि प्रथमं मार्त्तण्डाभ्यासेऽज्ञाननिवृत्त्या भगवत्सेवादौ प्रवृत्तिः, ततो बुद्धिदार्ढ्ये विद्वन्मण्डनाभ्यासंग इति क्रमिकाण्येव विशेषणानि ॥ **बुधवरान्** पण्डितश्रेष्ठान् दैवसर्गोत्पन्नान् ॥ 'बुधो वृद्धौ पण्डितेऽपी'त्यमरः ॥ अथ च देववरान् 'ज्ञातृचान्द्रिसुरा बुधा'इति क्षीरस्वामी ॥ प्रयुञ्जते चैनमुभयार्थं श्रीहर्षादयः–'तथाम्रियन्ते न बुधाः सुधामपी'ति ॥ एतेन बहुषु कोशेषु व्युपसर्गरहितबुधशब्दस्य देवपर्यायस्यानुपलम्भेऽप्यदोषः ॥ **आलोक्य** दृष्ट्वा **कोऽपि** अनिर्दिष्टनामकः ॥ भगवदवतारमहानुभावनिन्दकत्वात्तस्य साक्षान्नाम्नो न निर्देशः ॥ यद्वा कोपीति दीर्घान्तच्छेदः ॥ पूर्वोक्तान्दृष्ट्वा कोपी क्रोधवान् **आसुरः** तत्सर्गोत्पन्नः अथ च दैत्यः **अभ्रतमः** मार्त्तण्डस्याच्छादनार्थं मेघान्धकारविस्तारं विद्वन्मण्डनापकारार्थं **पविं** वज्रं च **युगपत्** एककालावच्छेदेन स्रष्टुं **सहस्रेक्षणं** एतन्नामकं ग्रन्थं, अथ च इन्द्रं **व्यातेने** ॥ स्वार्थोर्थं तस्य तथाकरणमिति बोधनार्थमात्मनेपदम् ॥ असुरा हि देवाभ्युदयासहिष्णुतया युद्धादौ मायया मेघविस्तारादिकं प्रदर्शयन्तीति पुराणेष्वपाणिपिहितम् ॥ व्यातेन इत्युक्त्या तत्कल्पितो मायिकोऽसौ सहस्राक्षः ॥ वास्तवे देवेन्द्रे मार्त्तण्डादिविरोधबुधविरोधभगवद्विरोधानामनुपपत्तेः ॥ अतस्तत्खण्डनमुचितमेवेति ज्ञाप्यते ॥ एतदेव प्रतिजानन्ति–**शक्त** इत्यादिना ॥ तद्वितयस्य सहस्राक्षभागद्वयस्य अथ च वास्तवाभ्रान्धकारवज्रयोर्द्वयस्य नाशनविधौ ॥ 'देवदत्तस्य गुरुकुल'मि-

त्यादिवन्नित्यसापेक्षत्वेऽपि गमकत्वात्समासः ॥ युगपदित्यत्राप्यनुवर्तते ॥ एकहेलया नाशनविधाने प्राभञ्जनः प्रबलपवनः ॥ वस्तुतस्त्वेतन्नामको ग्रन्थस्तन्यते ॥ प्रकर्षेण भनक्तीति प्रभञ्जनो वायुः ॥ 'बहुलमन्यत्रापी'ति युच् ॥ 'नभस्वद्वातपवनपवमानप्रभञ्जना'इत्यमरः ॥ प्रकर्षतो भञ्जकत्वात्प्रबलत्वमर्थसिद्धम् ॥ प्रभञ्जन एव प्राभञ्जनः ॥ प्रज्ञादेराकृतिगणत्वात्स्वार्थिकोऽण् ॥ अन्यपक्षे प्रकर्षेण भञ्जनं खण्डनं तत्संबन्धयं प्राभञ्जनः ॥ 'तस्येद'मित्यण् ॥ यद्वा प्रकर्षेणासमन्तात् भनक्ति खण्डयतीति तथा ॥ पूर्वोक्तो युच् ॥ 'कृत्यल्युटो बहुलम्' इति ल्युट् वा ॥ अथवा प्राभज्यते वादिपक्षोऽनेनेति तथा ॥ 'करणाधिकरणयोश्च' इति ल्युट ॥ खण्डने प्रमाणयुक्तिपुरस्सरत्वं प्रशब्दार्थः ॥ परोक्तदूषणानवशेष आङर्थः ॥ किंचैवमैतिहासिका वदन्ति–भगवत्कार्यसाधकं संसारसमानापारपारावारप्लवनप्रभुं मूर्तमिव भगवद्दावं हनूमन्तं मार्तण्डद्वेष्यसुरस्य वचनात्सहस्राक्षो वज्रेण हनुदेशे ताडयामास ॥ ततो मूर्छितं पतन्तं तं वहमानः पवमानः पुरन्दरमानभञ्जाय गिरिवर्यस्य गुहां न्यविशत ॥ ततो निरुच्छ्वासं विश्वमनुग्राहको वेदगर्भः स्ववाचा सहस्राक्षस्य दोषं प्रकाश्य जगत्प्राणं च प्रणुत्य प्रभञ्जनप्रचारार्थं स्वयं भगवद्भक्ताऽपराधिनं वृत्रहणं मार्तण्डप्रभृतिदैववर्गं चादाय तामेव क्षमाधरगुहां प्रविश्य समीरणं प्रसादयंस्तदुत्संगसंगतं सर्वासुरगर्वापहं भगवद्भक्तिमयमूर्तिं हनूमन्तं पुनरुदजीजिवत् ॥ अथ वेदगर्भप्रसादितप्रभञ्जनप्रचारात् सर्वेषां सुखं सहस्राक्षस्य मदभङ्गश्चाभूदिति ॥ तदेतन्न्यायेण सर्वमेवात्राऽपि संगच्छत इति युक्ततमं 'प्राभञ्जन' इत्यभिधानम् ॥ एतद्वाल्मीकीयरामायणस्योत्तरकाण्डे पञ्चत्रिंशषट्त्रिंशसर्गयोः किष्किन्धाकाण्डे षट्षष्टितमसर्गे च प्रसिद्धम् ॥ तत्र हि किष्किन्धाकाण्डे (सर्ग० ६६ श्लो० २५–२६) हनूमन्तं प्रति जाम्बवान्–'ततस्त्वां निहतं दृष्ट्वा वायुर्गन्धवहः स्वयम् ॥ त्रैलोक्यं भृशसंक्रुद्धो न ववौ वै प्रभञ्जनः ॥ संभ्रान्ताश्च सुराः सर्वे त्रैलोक्ये क्षुभिते सति ॥ प्रसादयन्ति संक्रुद्धं मारुतं भुवनेश्वरा'इति प्रभञ्जनशब्दोक्तिपूर्वकमाह उत्तरकाण्डे च (सर्ग ३५ श्लो० ५९–६० ६१) 'पुत्रस्तस्यामरेशेन इन्द्रेणाद्यनिपातितः ॥ राहोर्वचनमास्थाय ततः स कुपितोऽनिलः ॥ अशरीरः शरीरेषु वायुश्चरति पालयन् ॥ शरीरं हि विना वायुं समतां याति दारुभिः॥ वायुः प्राणः सुखं वायुर्वायुः सर्वमिदं जगत्। वायुना वा संपरित्यक्तं न सुखं विन्दते जगत् ॥ अद्यैव च परित्यक्तं वायुना जगदायुषा ॥ अद्यैव ते निरुच्छ्वासाः काष्ठकुड्योपमाः स्थिता' इति प्रजापतिना वायुस्तुतिर्दर्शिता ॥ तैत्तिरीयोपनिषच्छान्तिपाठादिषु श्रुतिभागेष्वपि "नमो ब्रह्मणे ॥ नमस्ते वायो ॥ त्वमेव प्रत्यक्षं ब्रह्मासि ॥ त्वमेव प्रत्यक्षं ब्रह्म वदिष्यामि" इत्यादिरूपा तत्स्तुतिर्दृश्यत एव ॥ अन्येऽपि तादृशोत्कर्षबोधनाय तथा नामधेयम् ॥ विस्तारार्थकतनोतिना स्वोत्प्रेक्षितं किमपि नोच्यते, किन्तु प्राक्तनोक्तमेव विशदीक्रियत इति प्रख्याप्यते ॥ वायुरपि प्रसरन्नेव मेघाद्यपहारे प्रभवति ॥ एतावता पूर्वश्लोकोत्तरार्धोदितं विशदितम् ॥ ननु सहस्राक्षकर्तुरासुरत्वं कथमुच्यत इति चेत् जगतोऽसत्यत्वादिकथनेन महानुभावाऽत्यन्तनिन्दाद्युग्रकर्मारम्भेण दम्भमानमदान्वितत्वेन सन्न्यासित्वेऽपि प्रचुराजानुसरणानुमीयमानबद्धाशापाशबन्धेन स्वाश्रमविरुद्धच्छत्रचामरसुवर्णा-

धर्मसञ्चयोपार्जनेन अहंकारबलदर्पादिवशात्तुलसीकाष्ठमालात्रोटनादौ प्रद्वेषेऽभ्यसूयने प्रवृत्त्या च तन्निश्चयादिति जानीहि ॥ एतेषां धर्माणामासुरलक्षणत्वन्तु गीताषोडशाऽध्याये–"आसुरं पार्थ मे शृणु" इत्युपक्रम्य "प्रद्विषन्तोऽभ्यसूयका" इत्यन्तं भगवतैव प्रदर्शितमित्यलं पल्लवितेन ॥ उक्तलक्षणकं शार्दूलविक्रीडितं वृत्तम् ॥ ४ ॥

श्रीवल्लभकुलोत्पन्नानामुदयं दृष्ट्वेर्ष्यया प्रतप्यमानेन केनचिद्यतिंमन्येन कृतस्य शुद्धाद्वैतमार्त्तण्डविद्वन्मण्डनयोः खण्डनाभासस्यादौ तदनुयायिना केनचित् कृतायां प्रस्तावनायामासीत्कश्चिदित्यारभ्य प्रार्थये परमात्मानमित्यन्तेन तदुत्पत्तिस्तस्य संन्यासाश्रमपरिग्रहप्रकारो ग्रन्थकरणे हेतुस्तत्प्रशंसा च प्रतिपादिताः ॥

अथ सहस्राक्षं खण्डयिष्यन्तो मुद्रिततत्पुस्तके ततः पूर्वनिबद्धां सहस्राक्षकृत्पक्षरक्षणप्रवणेन केनचित्प्रणीतां प्रस्तावनां बाध्यसामान्यचिन्तया प्रथमस्य त्यागे मानाभावात् प्रथमं दूषयितुं तदभिप्रायं तावदुपक्षिपन्ति—**श्रीवल्लभकुलेत्यादिना प्रतिपादिता** इत्यन्तेन ॥ ईर्ष्या अक्षमा ॥ 'अक्षान्तिरीर्ष्ये'त्यमरः ॥ हेतुत्वं तृतीयार्थः ॥ केनचिदिति नाम्नः स्वयमनिर्देशस्याशय उक्तः ॥ **यतिंमन्येन** आत्मानं यतिं मन्यत इति तथा ॥ 'आत्ममाने खश्चे'ति खश् ॥ शित्वेन सार्वधातुकत्वात् श्यन् ॥ 'अरुर्द्विषदजन्तस्ये'ति मुम् ॥ ननु वस्तुतः परिव्राजको वक्ष्यमाणरीत्या तद्धर्मविरहात् ॥ 'वेणुभिर्न भवेद्यति'रिति स्मरणात् ॥ **तदनुयायिनेति** ॥ द्वारकां निकषा त्रिपदविशेषनिवासिना केनचिद्द्विजन्मना क्षत्रियमथुरादासस्य नाम्ना प्रस्तावना निरमायीति किंवदन्त्यावगम्यते ॥ स्वसिद्धान्ते शिखच्छेपाभावमादित एव स्फुटयितुं श्रीमद्रमारमणेत्याद्यंशं विहाय पूर्वभागमेव गृह्णन्ति–**आसीदित्यादि*** ॥ अत्र प्रेक्षावतामनायासेनोभयग्रन्थयोस्तारतम्यावगमाय परप्रस्तावना स स सहस्राक्षभागश्चाक्षरशो मया पृथगेवानूद्यते ॥ तदुत्पत्तिरित्यादितच्छब्दचतुष्टयेनोक्तचरो यतिंमन्यः परामृश्यते ॥ उत्पत्त्यादयश्चत्वारः प्रस्तावनाया मुख्यविषयः ॥ ग्रन्थकरणे हेतोस्तुरीयविषयत्वेऽपि तस्येति पदस्योभयत्रान्वयार्थं मध्ये निर्देशः ॥ अन्तेऽपि प्रशंसायाः सत्त्वाच्च ॥

तत्र च प्रायेणान्योन्यं विरुद्धानि वाक्यान्यर्थान्तरप्रतिपादकानीव लक्ष्यन्ते ॥ तथा हि–कात्यायनीकान्तकृपापात्रेऽनपत्यताप्रतप्त-

---

सहस्राक्ष

* श्रीमद्रमारमणचरणकोकनदेषु विलसन्तु सर्वदा चेतश्चञ्चरीकास्सज्जनानामनवरतानन्द भरपूर्णाः ॥ आसीत्कश्चिदौत्तराहोऽनेकनगनगरारामरमणीयस्य निरुपमकमलकुलसंकुलसरस्सहस्रस्य कविविद्वन्मकरिगणकमनीयस्य कश्मीरमण्डलस्य निकटनिवासी कात्यायनीकान्तकृपापात्रं सारस्वतो विप्रः ॥ तेन चानपत्यताप्रतप्तचेतसा कस्यचित्कर्मन्दिनोनुग्रहेण चिराद्दृष्टा- पुनर्मुखसुधांशवः ॥ तन्मध्यात्प्राथमिकस्तनूजन्मा स्वप्रतिज्ञापालनपरेण कुरुक्षेत्रारण्य पुण्यावनिनिवासशालिने तस्माएव यतिवर्याय समर्पितः ॥

चेतस्त्वं विरुद्धम् ॥ हेतुं विनैव परदुःखप्रहाणेच्छा कृपा ॥ सा
चेत्समर्थस्येश्वरस्य यद्विषयिका जाता तत्र दुःखं सर्वथैव न
संभवति ॥ अथ प्रारब्धकर्म्मणो ज्ञानेनाप्यविनाश्यत्वेन प्रबल-
त्वात्तज्जन्यदुःखवारणे कात्यायनीकान्तस्याप्यसामर्थ्यम् दयालोर-
समर्थस्य दुःखायैव दयालुतेत्युच्यते चेदीदृशं दुःखं कर्म्मन्दिना
निवारितमित्यपि विरुद्धम् ॥ यद्यप्यपूर्वं कस्मिंश्चिद्भिक्षो तादृशसा-
मर्थ्यं संभावितं तथापि कुरुक्षेत्रनिवासिनि शिष्याभिलाषिणि स्वरू-
पानन्दाभिधे लोकैर्दृष्टगुणेऽसंभावितमेव ॥

दूषयन्ति-तत्र चेत्यादिना ॥ सहस्राक्षप्रस्तावनायामासीदित्यादिना सुधां-
शव इत्यन्तेनोक्तं शिवकृपापात्रपुत्रत्वयत्यनुग्रहजन्यत्वलक्षणमुत्पत्त्यायुत्कर्षं परिहरन्ति-
कात्यायनीत्यारभ्य असंभावितमेवेत्यन्तम् ॥ हेतुमित्यादि हेतुः फलं
कारणं च ॥ लक्षणहेत्वोः क्रियाया इत्यादौ तथा व्याख्यानात् ॥ निरुपाधिपरदुः-
खप्रहाणेच्छात्वं कृपात्वम् ॥ निरुपाधित्वं च हेत्वनधिकरणवृत्तित्वम् ॥ तदेतद्दुदिकृत्योक्तं-
हेतुं विनैवेति ॥ स्वेष्टानिष्टप्रवृत्तिनिवृत्तीच्छायाः प्राणिमात्रे सत्त्वात्तत्रातिप्रसङ्गवारणाय
परपदम् ॥ प्रहाणस्य चेष्टात्वात् दयया दुःखं हापयतीत्यादिप्रयोगाच्च तत्रातिव्याप्तिवार-
णायेच्छापदम् ॥ समर्थस्येश्वरस्येति ॥ सिद्धान्ते शिवस्येश्वरकोटावेव निवेशाद्वादिवि-
शेषवत्तत्र जीवत्वस्यानङ्गीकारादीश्वरपदम् ॥ एतच्च प्रहस्तवादादिषु प्रपञ्चितम् ॥ तथा च
यद्यसौ शिवकृपापात्रं स्यादनपत्यत्वदुःखेन न प्रतप्येतेत्यनुकूलतर्केण तस्मिंस्तत्कृपाविरहो
निश्चीयते ॥ ईश्वरस्य तद्दुःखप्रहाणेच्छासत्त्वेऽपि तदनिवृत्तावनीश्वरत्वापत्तेः सत्य-
संकल्पादिश्रुतिबाधापत्तेश्च ॥ मतान्तरेण समाधिं गृह्णन्ति-अथेति ॥ अथशब्दः
प्रश्नार्थः ॥ 'मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथे'त्यमरोक्तेः ॥ ज्ञानेनापीति ॥
"क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे" इत्यादिकठादिश्रुतिषु 'ज्ञानाग्निः सर्वकर्माणि
भस्मसात्कुरुते तथे'त्यादिस्मृतिषु च सर्वकर्मनाशकतया प्रसिद्धेनापि ॥ अविनाश्यत्वे-
नेति ॥ शारीरकभाष्ये चतुर्थस्य प्रथमपादे "अनारब्धकार्ये एव तु पूर्वे तदवधे" इत्यधि-
करणे प्रारब्धतया परिणतपापपुण्ययोर्ज्ञानेनाविनाश्यतायाः "भोगेन त्वितरे क्षपयित्वा
संपद्यते" इत्यधिकरणे तयोर्भोगैकनाश्यतायाश्चाङ्गीकारात्तथेत्यर्थः ॥ अतो युक्तं प्रबल-
त्वम् ॥ तज्जन्येत्यादि ॥ तस्य प्रारब्धजन्यमनपत्यतादुःखमीश्वरेणापि कृपासत्त्वेऽपि
नोच्छेत्तुं शक्यमिति निगर्वः ॥ दयालोरिति ॥ अयं माधवभट्टोक्तेरनुवादः ॥ एतेन
यदि स्यादीश्वरः कश्चित्फलरूप्यन्यकर्मणाम् ॥ कर्त्तारं भजते सोऽपि नह्यकर्त्तुः प्रभुर्हि स-
इत्यादौ दर्शितोऽनीश्वरवाद ईश्वरस्यानत्यन्तप्रयोजनकत्वं वा प्रसज्यत इति पूर्वपक्षिणः
स्वपादे कुठारः ॥ परिहरन्ति-ईदृशमित्यादि ॥ ईदृशं प्रारब्धजन्यम् ॥ कर्म्म-
न्दिना संन्यासिना ॥ विरुद्धं उपन्यस्तचराधिकरणादिविरुद्धम् ॥ ईश्वरेणापि तदपरो-
क्षज्ञानेनाप्यविनाश्ये आधुनिकसंन्यासिविशेषनाश्यताया अशक्यवचनत्वात्प्रारब्धे मनुष्य'

विशेषणाद्यस्यबोधकमानानुपलम्भाचेति भावः ॥ किंचैवं कल्पयताऽऽधुनिकपुरुषविशेषादपि शिवस्यापकर्षो वर्णितो भवतीति तस्यैव शिवद्वेषिताऽऽपद्यते ॥ न च शिव एव मस्करिणा दापितवानिति वाच्यम् ॥ स्वयमदाने चिरमुपेक्षणे च हेत्वभावात् ॥ न च दुष्टप्रारब्धस्य भोगेन क्षयपर्यन्तमुपेक्ष्य शुभप्रारब्धोदये दत्तवानिति वाच्यम् ॥ तथासति प्रारब्धेनैव तत्सिद्धौ लाघवेन शिवकर्मन्दिनोरुभयोरप्यप्रयोजकत्वापातात् ॥ कृपामन्तरापि तल्लाभसंभवाच्च ॥ एवं तत्कल्पनायास्तन्मतविरुद्धत्वं दर्शयित्वा भक्तविशेषणप्रारब्धानधीनत्वमते कथंचित्समाधिमाशङ्क्य पाक्षिकोऽपि दोषः परिहरणीय इत्याशयेनाहुः—यद्यपीति ॥ तेनैतद्वृत्तं कपोलकल्पितमेवेति द्योतितम् ॥

किंचायं संन्यासाश्रमपरिग्रहप्रकारोऽपि वर्णाश्रमधर्मप्रणेतृभिर्मनुयाज्ञवल्क्यादिभिरदर्शितोऽपूर्व एव तत्प्रदर्शितप्रकारविरुद्धश्च ॥ तथा चोक्तं याज्ञवल्क्येन 'वनाद्गृहाद्वा कृत्वेष्टिं सार्ववेदसदक्षिणाम् ॥ प्राजापत्यां तदन्ते तानग्नीनारोप्य चात्मनि ॥१॥ अधीतवेदो जपकृत्पुत्रवानन्नदोऽग्निमान् ॥ शक्त्या च यज्ञकृन्मोक्षे मनः कुर्यात्तु नान्यथा ॥२॥ मिताक्षरायां च तद्व्याख्याने "यावता कालेन तीव्रतपःशोषितवपुषो विषयकषायपरिपाको भवति, पुनश्च मदोद्भवाशङ्का नोद्भाव्यते तावत्कालं वनवासं कृत्वा तत्समनन्तरं मोक्षे मनः कुर्यात् ॥ वनगृहशब्दाभ्यां तत्संबन्ध्याश्रमौ लक्ष्येते; मोक्षशब्देन च मोक्षैकफलकश्चतुर्थाश्रमः" इत्युक्तम् ॥

अथ प्रस्तावमायां तन्मध्यादित्यारभ्य समर्पित इत्यन्तेन दर्शितं संन्यासाश्रमपरिग्रहप्रकारमशास्त्रीयत्वोद्घाटनेन दूषयन्ति—किंचायमित्यादि अबाधित एव बोध इत्यन्तम् ॥ मनुयाज्ञवल्क्यादिभिरिति ॥ (अ० १. श्लो० ४) 'मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोऽङ्गिरा' इति याज्ञवल्क्याद्युक्तक्रमानुरोधात् (संहिता काण्ड २ प्र० २ अनु० १०) "यद्वै किंच मनुरवदत्तद्भेषजं" इति तैत्तिरीयश्रुतिप्रशंसितत्वाच्च मनोः प्रथमनिर्देशः ॥ तद्वचनानि तु षष्ठाऽध्याये वानप्रस्थधर्मनिरूपणोत्तरं (श्लो० ३३) 'वनेषु च विहृत्यैवं तृतीयं भागमायुषः ॥ चतुर्थमायुषो भागं त्यक्त्वा संगान् परिव्रजेत् ॥ आश्रमादाश्रमं गत्वा हुतहोमो जितेन्द्रियः ॥ भिक्षाबलिपरिश्रान्तः प्रव्रजन् प्रेत्य वर्द्धते ॥ ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् ॥ अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः ॥ अधीत्य विधिवद्वेदान् पुत्रांश्चोत्पाद्य धर्मतः ॥ इष्ट्वा च शक्तितो यज्ञैर्मनो मोक्षे निवेशयेत् ॥ अनधीत्य द्विजो वेदाननुत्पाद्य तथा सुतान् ॥ अनिष्ट्वा चैव यज्ञैश्च मोक्षमिच्छन् व्रजत्यधः.' इति ॥ अग्रेऽपि (श्लो० ८७–८८) 'ब्रह्मचारी गृहस्थश्च वानप्रस्थो यतिस्तथा ॥ एते गृहस्थप्रभवाश्चत्वारः पृथगाश्रमाः ॥ सर्वेऽपि क्रमशस्ते ते यथाशास्त्रं निषेविताः ॥ यथोक्तकारिणं विप्रं नयन्ति परमां गति' मिति ॥ तथा (श्लो०–९४) 'दशलक्षणकं धर्ममनुतिष्ठन्समाहितः ॥

वेदान्तं विधिवच्छ्रुत्वा संन्यसेदनृणो द्विज' इति ॥ एतदेव याज्ञवल्क्येन तृतीयाध्यायेऽध्यात्मप्रकरणे संगृह्योक्तम् ॥ (श्लो० १-२) 'वनाद्गृहाद्वा कृत्वेष्टि'मिति ॥ याज्ञवल्क्यादिभिरित्यादिशब्दो ऋष्यन्तरसमुच्चायकः ॥ तथाच आचारमाधवापरार्कमदनपारिजातादिषु स्मृत्यन्तरम् 'ऋणत्रयमपाकृत्य निर्ममो निरहंकृतिः ॥ ब्राह्मणः क्षत्रियो वाथ वैश्यो वा प्रव्रजेद्गृहा'दिति ॥ कूर्मपुराणेऽपि 'अग्निनात्मनि संस्थाप्य द्विजः प्रव्रजितो भवेत् ॥ योगाभ्यासरतः शान्तो ब्रह्मविद्यापरायण' इति ॥ तथा तत्रैव 'प्राजापत्यां निरूप्येष्टिमाग्नेयीमथवा पुनः ॥ अन्तःपक्वकषायोऽसौ ब्रह्माश्रममुपाश्रये'दिति ॥ एकादशस्कन्धे च भगवान् (अ० १८ श्लो० १२-१३) 'यदा कर्मविपाकेषु लोकेषु निरयात्मसु ॥ विरागो जायते सम्यङ्न्यस्ताग्निः प्रव्रजेत्ततः ॥ इष्ट्वा यथोपदेशं मां दत्त्वा सर्वस्वमृत्विजे ॥ अग्नीन्स्वप्राण आवेश्य निरपेक्षः परिव्रजेत् ॥' अत्र मन्वादिवचनेषु 'ऋणानि त्रीण्यपाकृत्ये'त्यादिना ऋणत्रयापाकरणोत्तरमेव संन्यासेऽधिकारस्तदनपाकृतवतस्तत्प्रतिषेधो दुष्फलं च स्पष्टमायुष्टम् ॥ ऋणत्रयं च तैत्तिरीया आमनन्ति (संहिताकाण्ड ६ प्र० ३ अ० १०) —"जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवा जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य एष वानृणो यः पुत्री यज्वा ब्रह्मचारिवासी" इति ॥ मन्त्रवर्णोऽपि तैत्तिरीयब्राह्मणतृतीयकाण्डसप्तमाध्याये (अनुवाक ९) "अनृणा अस्मिन्ननृणाः परस्मिँस्तृतीये लोके अनृणास्स्याम ॥ ये देवयाना उत पितृयाणाः सर्वान्पथो अनृणा आक्षीयेम" इति ॥ अन्यदपि ब्राह्मणम् ॥ तैत्तिरीयारण्यकद्वितीयाध्याये (खण्ड १५) "सर्वान् लोकाननृणोऽनुसचरति" इति ॥ उक्तवचनेषु' त्यक्त्वा सगान्ति'त्यादिना दृढतरवैराग्यसंपन्नस्यैव तत्राधिकारो बोध्यते ॥ वाजसनेयिब्राह्मणेऽप्याम्नायते—"एवं वैतमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षां चरन्ति" इति ॥ तैत्तिरीयाणां नारायणोपनिषदि "वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्त्वाः" इति ॥ वेदान्तविज्ञानादर्थस्य सुनिश्चयोत्तरं संन्यासः श्रूयते ॥ एतदेवाभिप्रेत्य विज्ञानेश्वरो विषयकषायपरिपाकाद् पुनर्भेदोद्भवा भावनिश्चये प्रव्राजाधिकारं व्याचष्टे ॥ मूले 'यायता कालेने'त्यादिश्चतुर्थाश्रम' इत्यन्तो मिताक्षराग्रन्थोऽनूद्यते ॥ आश्रमसमुच्चयपक्षे जाबालश्रुतौ च श्रूयते —'ब्रह्मचर्यं परिसमाप्य गृही भवेत् गृही भूत्वा वनी भवेत् वनी भूत्वा प्रव्रजेत्'इति ॥

श्रुतिं प्रमाणयन्ति-जाबालश्रुतौ चेति ॥ ननु नेदमैकान्तिकम् —"यदहरेव विरजेत्तदहरेव प्रव्रजेत्" इति जाबालश्रुत्या कालविलम्बनिषेधात् ॥ नचेयं श्रुतिः'तृतीयं भागमायुष'इत्यादेरनैकान्तिकत्वबोधिना वनस्थपरत्वेन संकोच्या ॥ अत एव सप्तमस्कन्धद्वादशाध्याये (श्लो० २२) 'चरेद्वने द्वादशाब्दानष्टौ वा चतुरो मुनिः ॥ द्वावेकं वा यथा बुद्धिर्न विपद्येत कृच्छ्रत' इति पक्षान्तराणि स्मर्यन्त इति वाच्यम्, संकोचे मानाभावात् ॥ अत एव जाबाला ब्रह्मचर्यं परिसमाप्येत्यादिना समुच्चयमाम्नायानुपदं

विकल्पमप्यामनन्ति–"यदिवेतरथा ब्रह्मचर्यादेव प्रव्रजेद्गृहाद्वा वनाद्वा" इति ॥ एतदेवाश्रित्य याज्ञवल्क्योऽपि 'वनाद्गृहाद्वा'इति ब्रह्मचर्यात्पृथगुक्तवानिति वेदव्याख्या मूलम् भूयः। विकल्पपक्षादस्तु कथंचिद्ब्रह्मचर्यादपि प्रव्राजः परं वेदान्तश्रवणमननादिना प्रदृढवैराग्यसंपन्नस्याधीतसाङ्गवेदस्यैव वर्णिनस्तत्राधिकारो नत्वतिबाल्यात्संसारस्वरूपमविजानतोऽनधिगतवैराग्यमन्दस्यानधीताम्नायस्य॥ एतदेव दर्शयितुं विकल्पश्रुत्यर्थं स्मरति माधवीयेऽङ्गिराः–'संसारमेव निस्सारं दृष्ट्वा सारदिदृक्षया ॥ प्रव्रजन्त्यकृतोद्वाहः परं वैराग्यमाश्रितः'इति ॥ तत्रैव नारदोऽपि–'प्रथमादाश्रमाद्वापि विरक्तो भवसागरात् ॥ ब्राह्मणो मोक्षमन्विच्छंस्त्यक्त्वा संगान् परिव्रजेत्'इति ॥ उक्तश्रुतावपि–"यदहरेव विरजेत्" इति वैराग्यस्यात्यावश्यकत्वमुच्यत एव ॥ विकल्पश्रुतावपि 'इतरथा'पदस्यार्थं वेदवेदान्तश्रवणादिना दृढतरवैराग्ये सतीति स्वदीया व्याचक्षते, नाप्यविरक्ताधिकारज्ञापकं किमपि प्रमाणमुपलभामहे ॥ अनुपनीतस्यानधिकारं तु विकल्पश्रुतिरेव ब्रह्मचर्यप्रभृति तदधिकारकथनमुखेन बोधयति ॥ अन्यथा सावित्रीप्रवेशप्रेषोच्चारादिलक्षणवैदिकत्तदितिकर्तव्यतायाः "सखे मां गोपाय येन देवाः पवित्रेण" इत्यादिदण्डपवित्रादिग्रहणमन्त्राणां चाप्राप्त्या संन्यास एव नोपपद्येतेति निर्विवादेऽस्मिन्विषये किं बहुना ॥ परे तु बहुषु श्रुतिस्मृतिपाकरणस्यावश्यकत्वबोधनात् मन्वादिभिस्तथैव स्मरणाच्च विकल्पश्रुतौ 'ब्रह्मचर्य'शब्दो वैधुर्यपरः ॥ 'ब्रह्मचर्यमहिंसा च, सततं ब्रह्मचारिभिः' इत्यादौ स्त्रीसंगराहित्ये तस्य रूढिदर्शनात् ॥ एतदेवाभिप्रेत्य स्मरति माधवीये यमः–'पुनर्दारक्रियाभावे मृतभार्यः परिव्रजेत् ॥ वनस्थो धूतपापो वा परं पन्थानमाश्रयेत्'इति ॥ अङ्गिरोवचनमप्येतेनैव समानार्थकम् ॥ नारदवचनेऽपि प्रथमादाश्रमात्'इति वैधुर्यलक्षकम् ॥ अथवा बहुश्रुतिस्मृतिषु संन्यासाधिकारज्ञापकतया वनाश्रमस्यैवोक्तत्वेऽपि दृढवैराग्योत्पत्तौ ततः प्रथमादाश्रमाद्गार्हस्थ्यादपि परिव्रजेदिति तदर्थः ॥ अत एव याज्ञवल्क्यो 'वनाद्गृहाद्वा' इति पक्षद्वयमेवाह, नतु ब्रह्मचर्यादपीति ॥ मनुरपि (अ० ६ श्लो० ३३) 'वनेषु च विहृत्यैवम्' इति (श्लो० ३८) 'ब्राह्मणः प्रव्रजेद्गृहात्'इति च पक्षद्वयमेव दर्शयति ॥ अतो 'ब्रह्मचर्य'-शब्दो न साक्षाद्वर्णित्वपरः॥ बहूनामनुग्रहस्य न्याय्यत्वात् यदि श्रुत्यर्थस्तथाऽभविष्यत् कथं तर्हि "यः कश्चित्कस्यचिद्धर्मो मनुना परिकीर्तितः ॥ स सर्वोऽपि वेदोक्तः सर्वज्ञानमयो हि सः" इत्यादिवास्तवस्तव विषयस्स नाऽवक्ष्यत् ॥ कथं वा प्रत्युतात्यन्तं व्यगास्यत्? ॥ तस्मादाश्रमचतुष्टयसमुच्चयस्तत्त्रयसमुच्चयः "ऐकाश्रम्यं त्वाचार्याः" इति गौतमोक्तो गार्हस्थ्येतराश्रमबाधो चेति त्रय एव पक्षाः प्रामाणिकत्वाद्व्रीहियववदिच्छया विकल्पन्त इति इति मन्यन्ते ॥ अथ ब्रह्मचर्यप्रव्रज्योरीकारेऽपि श्रुतौ 'यदि वा'इत्यस्य नारदवचने 'वापी'त्यस्य चानादरार्थत्वमाश्रित्य तत्पक्षस्यातिगौणत्वं वर्णयन्ति ॥ अत एव एकादशस्कन्धे भगवता 'आश्रमादाश्रमं गच्छेन्नान्यथा मत्परश्चरेत्' इति स्वपरायणस्यासौ पक्षः प्रत्यषेधि ॥ सर्वमतेषु उपनयनात्प्राक् तु कामचारकामवादत्वादिकमेव प्रायो विधीयते, नतु प्रव्राजो नाप्युपनीतस्याप्यनधीतविद्यस्याऽधीतविद्यस्याप्यनत्यन्तविरक्तस्य सः ॥ नापि स्वप्रतिज्ञापालनार्थमेव जनकेन बालोऽप्यनुपनीतोऽप्यविरक्तोऽपि स्वेच्छया

वेदान्तं विधिवच्छ्रुत्वा संन्यसेदनृणो द्विज' इति ॥ एतदेव याज्ञवल्क्येन तृतीयाध्याये ऽध्यात्मप्रकरणे संगृह्योक्तम् ॥ (श्लो० १-२) 'वनाद्गृहाद्वा कृत्वेष्टि'मिति ॥ याज्ञवल्क्यादिभिरित्यादिशब्दो ऋष्यन्तरसमुच्चायकः ॥ तथाच आचारमाधवापरार्कमदनपारिजातादिषु स्मृत्यन्तरम् 'ऋणत्रयमपाकृत्य निर्ममो निरहंकृतिः ॥ ब्राह्मणः क्षत्रियो वाथ वैश्यो वा प्रव्रजेद्गृहा'दिति ॥ कूर्मपुराणेऽपि 'अग्निनात्मनि संस्थाप्य द्विजः प्रव्रजितो भवेत् ॥ योगाभ्यासरतः शान्तो ब्रह्मविद्यापरायण' इति ॥ तथा तत्रैव 'प्राजापत्यां निरूप्येष्टिमाग्नेयीमथवा पुनः ॥ अन्तःपक्वकषायोऽसौ ब्रह्माश्रममुपाश्रये'दिति ॥ एकादशस्कन्धे च भगवान् (अ० १८ श्लो० १२-१३) 'यदा कर्मविपाकेषु लोकेषु निरयात्मसु ॥ विरागो जायते सम्यङ्न्यस्ताग्निः प्रव्रजेत्ततः ॥ इष्ट्वा यथोपदेशं मां दत्वा सर्वस्वमृत्विजे ॥ अग्नीन्स्वप्राण आवेश्य निरपेक्षः परिव्रजेत् ॥' अत्र मन्वादिवचनेषु 'ऋणानि त्रीण्यपाकृत्ये'त्यादिना ऋणत्रयापाकरणोत्तरमेव संन्यासेऽधिकारस्तदनपाकृतवतस्तत्प्रतिषेधो दुष्फलं च स्पष्टमाघुष्टम् ॥ ऋणत्रयं च तैत्तिरीया आमनन्ति (संहिताकाण्ड ६ प्र० ३ अ० १०)—"जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवा जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य एष वानृणो यः पुत्री यज्वा ब्रह्मचारिवासी" इति ॥ मन्त्रवर्णोऽपि तैत्तिरीयब्राह्मणतृतीयकाण्डसप्तमाध्याये (अनुवाक ९) "अनृणा अस्मिन्ननृणाः परस्मिँस्तृतीये लोके अनृणास्स्याम ॥ ये देवयाना उत पितृयाणाः सर्वान्पथो अनृणा आक्षीयेम" इति ॥ अन्यदपि ब्राह्मणम् ॥ तैत्तिरीयारण्यकद्वितीयाध्याये (खण्ड १५) "सर्वान् लोकाननृणोऽनुसचरति" इति ॥ उक्तवचनेषु' त्यक्त्वा संगानि'त्यादिना दृढतरवैराग्यसंपन्नस्यैव तत्राधिकारो बोध्यते ॥ वाजसनेयिब्राह्मणेऽप्याम्नायते—"एवं वैतमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षां चरन्ति" इति ॥ तैत्तिरीयाणां नारायणोपनिषदि "वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्वाः" इति ॥ वेदान्तविज्ञानादर्थस्य सुनिश्चयोत्तरं सन्यासः श्रूयते ॥ एतदेवाभिप्रेत्य विज्ञानेश्वरो विषयकषायपरिपाकात् पुनर्मदोद्भवा भावनिश्चये प्रव्राजाधिकार व्याचष्टे ॥ मूले 'यावता कालेने' त्यादिश्चतुर्थाश्रम' इत्यन्तो मिताक्षराग्रन्थोऽनूद्यते ॥ आश्रमसमुच्चयपक्षे जाबालश्रुतौ च श्रूयते —'ब्रह्मचर्यं परिसमाप्य गृही भवेत् गृही भूत्वा वनी भवेत् वनी भूत्वा प्रव्रजेत्'इति ॥

श्रुतिं प्रमाणयन्ति–जाबालश्रुतौ चेति ॥ ननु नेदमैकान्तिकम् —"यदहरेव विरजेत्तदहरेव प्रव्रजेत्" इति जाबालश्रुत्या कालविलम्बनिषेधात् ॥ नचेयं श्रुतिः'तृतीयं भागमायुष'इत्यादेरनैकान्तिकत्वबोधिका वनस्थपरत्वेन संकोच्या ॥ अत एव सप्तमस्कन्धद्वादशाध्याये (श्लो० २२) 'चरेद्वने द्वादशाब्दानष्टौ वा चतुरो मुनिः ॥ द्वावेकं वा यथा बुद्धिर्न विपद्येत कृच्छ्रत' इति पक्षान्तराणि स्मर्यन्त इति वाच्यम्; संकोचे मानाभावात् ॥ अत एव जाबाला ब्रह्मचर्यं परिसमाप्येत्यादिना समुच्चयमाश्रमाणामुपदं

मनुवचनं तत्र हि 'ज्येष्ठेन जातमात्रेण पुत्री भवति मानवः ॥ पितॄणामनृणश्चैव स तस्मात्सर्वमर्हति ॥ यस्मिन्नृणं सन्नयति येन चानन्त्यमश्नुते ॥ स एव धर्मजः पुत्रः कामजानितरान्विदुः ॥ पितेव पालयेत्पुत्रान् ज्येष्ठो भ्रातॄन्यवीयसः ॥ पुत्रवच्चापि वर्तेरन् ज्येष्ठे भ्रातरि धर्मतः ॥ ज्येष्ठः कुलं वर्धयति विनाशयति वा पुनः ॥ ज्येष्ठः पूज्यतमो लोके ज्येष्ठः सद्भिरगर्हितः' इति स्मर्यते ॥ तथा च पित्रा धर्मजस्य ज्येष्ठस्य समर्पणे तस्यानृणीभावाऽऽनन्त्याशनकुलप्रतिष्ठादेरभावात्तदर्पणमत्यन्तानुचितमेव ॥ अत एव बह्वृचब्राह्मणेऽपि सप्तमपञ्चिकायां हरिश्चन्द्रोपाख्याने ॥ (खंड १५) "स ह ज्येष्ठं पुत्रं निगृह्णान उवाच नन्विममिति नो एवेममिति" इत्यादि श्रूयते ॥ अर्थस्तु वारुणपुरुषपश्वर्थमजीगर्तस्य सौयवसेस्त्रिषु पुत्रेष्वन्यतमं शतेन चिक्रीषन् हरिश्चन्द्रपुत्रो रोहितस्तेषु ज्येष्ठं निगृह्णानस्तमुवाच ॥ नन्विमं पुत्रमाददीयेति ॥ तं क्रेष्यमाणस्य पिता प्रत्युवाच नो एवेमं दास्यामि ज्येष्ठस्यादेयत्वादिति ॥ एवकारः सर्वथैवादेयत्वबोधनार्थः ॥ एतदेव लिङ्गमाश्रित्य वीरमित्रोदयादिषु दानक्रयादिकं ज्येष्ठस्य प्रतिषिद्धम् ॥ किंच कनिष्ठस्याप्यापद्येव दानम् (अध्याय ९ श्लोक १६८) 'माता पिता वा दद्यातां यमद्भिः पुत्रमापदीति' मनूक्तेः ॥ एतदेवाश्रित्य पूर्वोक्तस्थले विज्ञानेश्वरोऽपि "आपद्ग्रहणादनापदि न देयः दातुरयं प्रतिषेधः" इत्याह ॥ वीरमित्रोदयकारोऽपि "आपदीत्युक्तेरनापदि दातुः प्रत्यवायः' इत्याचष्टे ॥ अपि च केनचिद्दीयमानः पुत्रादिरपि यतिना प्रतिग्राह्य इति विधायकं वाक्यमन्वेष्टव्यम् ॥ यत्र तत्र श्रुतिस्मृतिषु तस्य वैणवदण्डकन्थादिस्वाश्रमलिङ्गातिरिक्तवस्तुपरिग्रहनिषेधात् ॥ तथा पुत्रदानप्रतिज्ञापनमपि यतिवर्यस्योचितं नवेति चिन्त्यम् प्रत्याशावत्तापत्तेः ॥ 'एक एव चरेद्भिक्षु'रित्यादिबाधप्रसक्तेश्च ॥

किंच "परीक्ष्य लोकान् कर्मचितान्ब्राह्मणो निर्वेदमायात्" इत्यादिना "शान्तो दान्त उपरतस्तितिक्षुः समाहितः श्रद्धावित्तो भूत्वात्मन्येवात्मानं पश्येत्" इत्यादिश्रुत्या च नित्यानित्यवस्तुविवेकेहामुत्रार्थफलभोगविरागशमदमादिषट्कसंपन्मुमुक्षुत्वरूपसाधनचतुष्टयसंपन्नस्यैव "तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठं" इत्याद्युक्तरीत्या गुरुसमीपे गमनाधिकारो भवन्मते ॥ नत्वनुपनीतस्य साधनचतुष्टयासंपन्नस्य ऋणत्रयाविनिर्मुक्तस्य बालस्येति परस्परविरुद्धमेवैतत्सर्वमतोऽर्थान्तरमनुमापयति ॥ तदुच्यते–दुर्भिक्षत्याजितदेशेन बुभुक्षितेन बहुपुत्रेण देशाद्देशान्तरं भ्रममाणेन कुरुक्षेत्रमागतेन केनचिद्ब्राह्मणब्रुवेणोल्लङ्घितशास्त्रमर्यादेन् ज्येष्ठस्तनूजन्मा विक्रीतः केनचित्कर्मन्दिना वणिग्वृत्त्युपजीविना क्रीत इत्यविरुद्धम् ॥

अपिच त्वन्मतरीत्या तु तादृशस्य बालस्य गुरूपसत्तिरेवासंभाविता कुतस्तरां संन्यास इत्याशयेनाहुः ॥ किच परीक्ष्य लोकानित्यादिना ऋणत्रयाऽविनिर्मुक्तस्य बालस्ये-

प्राजनीय इति विधिः क्वाप्युपलभ्यते ॥ तस्माच्छास्त्रविरुद्धः संन्यासाभास एवायम् ॥ तदेतत्सर्वं हृदिकृत्वाहुः – श्रुतिस्मृतिष्वित्यादि ॥

श्रुतिस्मृतिष्वेवं कुत्रापि न प्रतिपादितं पिता बालं पुत्रमनुपनीतं परिव्राजयेदिति ॥ किंच तत्पित्रापि कनिष्ठपुत्रसद्भावे ज्येष्ठं ददतानुचितमाचरितम् ॥ ज्येष्ठपुत्रस्य सर्वथैवादातव्यत्वात् ॥ तथा च मिताक्षरायां "अनेकपुत्रसद्भावेऽपि ज्येष्ठो न देयः ॥ ज्येष्ठेन जातमात्रेण पुत्री भवति मानवः" इति तस्यैव पुत्रकार्यकरणे मुख्यत्वात्' इति ॥

यत्तु जिज्ञासाधिकरणे भामत्यां "जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवा जायते" इति गृहस्थः संपद्यमान इति व्याख्येयम् ॥ अन्यथा "यदि वेतरथा ब्रह्मचर्यादेव" इति श्रुतिर्विरुध्येत" इत्यभाणि, – तदविचारचारु ॥ तथा सति गार्हस्थ्योत्तरमार्षेऋणापाकरणाय ब्रह्मचर्यस्य गुरुकुलवासस्य चानुष्ठेयतापत्तेः ॥ "ब्रह्मचर्येण ऋषिभ्यः ॥ ब्रह्मचारिवासी" इत्यनुपदं श्रावणात् ॥ न चेष्टापत्तिः, आरूढपातित्यप्रसङ्गात् ॥ यथाह दक्षः – 'त्रयाणामानुलोम्यं स्यात् प्रातिलोम्यं न विद्यते ॥ प्रातिलोम्येन यो याति न तस्मात् पापकृत्तमः ॥ यो गृहाश्रममास्थाय ब्रह्मचारी भवेत्पुनः ॥ नयतिर्न वनस्थश्च स सर्वाश्रमवर्जितः' इति ॥ एतदेवाश्रित्य पराशरव्याख्याने माधवः – "यदि गृही कथंचित्प्रत्यवरुह्य ब्रह्मचारी भवेत्तदासौ सर्वाश्रमबहिष्कृतः ॥ आरूढपतितत्वात् ॥ अतो न वनस्थादिभिराश्रमवाचिभिः शब्दैरभिलप्यो भवति" इत्याह ॥ अयं प्रत्यवरोहाभावश्च शङ्कराचार्यैस्तृतीयस्य चतुर्थे पादे (सूत्र ४०) "तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमातद्रूपाभावेभ्यः" इत्यधिकरणे विचारितः ॥ तत्र हि तद्भाष्ये – "तथा हि अत्यन्तमात्मानमाचार्यकुलेऽवसादयन्निति अरण्यमियादिति पदं ततो न पुनरेयादित्युपनिषद्" इत्याद्युक्तम् ॥ न च ब्रह्मचर्यादेवेत्यस्यानुरोधादिदमन्यथा नेतव्यम् ॥ एतदनुरोधेन तस्यैव वैधुर्यपरतया परैरन्यथा नयनात् ॥ न च विनिगमनाविरहादनिर्णयः शङ्क्यः ॥ समानबलेनैकेन बहूनां बाधाऽयोगात् ॥ ऋणापाकरणावश्यकतायाश्च बहुशाम्नानात् ॥ बहूनामनुग्रहस्य न्याय्यत्वात् प्रव्राजकप्राप्यदेवयानपथानामप्यनृणगम्यताम्नानाच्च ॥ अथ यैर्ब्रह्मचर्यात्प्रव्राज उच्यते तैरपि वेदान्ताध्ययनादिनात्यन्तविरक्तं कंचित्पुरुषधौरेयमेवाधिकृत्योच्यत इत्यग्रे स्फुटिष्यति ॥ न तु प्रकृते तथा संभवति ॥ सकलाध्ययनस्योत्तरकालिकतायाः प्रस्तावनाकृतैव वक्ष्यमाणत्वाच्छत्रचामरोरीकारादिना वैराग्याभावनिश्चयाच्च ॥ अनुपनीतस्य त्वत्यन्ताप्रसक्तमेवैतदिति प्रागेवावोचाम ॥ तत्पितृकर्तृकतत्प्रव्राजने दूषणान्तरमाहुः – किंच तत्पित्रेत्यादिमुख्यत्वादितीत्यन्तम् ॥ मिताक्षरायामिति ॥ व्यवहाराध्याये दायविभागप्रकरणे (श्लो० १७) दद्यान्माता पिता वायम्' इत्यस्य विवरण इति भावः ॥ 'अनेकपुत्रसद्भाव' इत्यादिर्मुख्यत्वादित्यन्तो मिताक्षराग्रन्थ एव ॥ मुख्यत्वादिति ॥ 'कामजानितरान्विदुः' इति स्मृत्याऽवरजानामुख्यत्वद्योतनाज्ज्येष्ठस्यैव तथात्वमिति भावः ॥ ज्येष्ठेन जातमात्रेणेति तु नवमाध्याये (श्लो० १०६)

मनुवचनं तत्र हि 'ज्येष्ठेन जातमात्रेण पुत्री भवति मानवः ॥ पितृणामनृणश्चैव स तस्मात्सर्वमर्हति ॥ यस्मिन्नृणं सन्नयति येन चानन्त्यमश्नुते ॥ स एव धर्मजः पुत्रः कामजानितरान्विदुः ॥ पितेव पालयेत्पुत्रान् ज्येष्ठो भ्रातॄन्यवीयसः ॥ पुत्रवच्चापि वर्त्तेरन् ज्येष्ठे भ्रातरि धर्मतः ॥ ज्येष्ठः कुलं वर्धयति विनाशयति वा पुनः ॥ ज्येष्ठः पूज्यतमो लोके ज्येष्ठः सद्भिरगर्हितः' इति स्मर्यते ॥ तथा च पित्रा धर्मजस्य ज्येष्ठस्य समर्पणे तस्यानृणीभावाऽऽनन्त्याशनकुलप्रतिष्ठादेरभावात्तदर्पणमप्यत्यन्तानुचितमेव ॥ अत एव बह्वृचब्राह्मणेऽपि सप्तमपञ्चिकायां हरिश्चन्द्रोपाख्याने ॥ (खंड १५) "स ह ज्येष्ठं पुत्रं निगृह्णान उवाच नत्विममिति नो एवेममिति" इत्यादि श्रूयते ॥ अर्थस्तु वारुणपुरुषपश्वर्थमजीगर्त्तस्य सौयवसेस्त्रिषु पुत्रेष्वन्यतमं शतेन चिक्रीषन् हरिश्चन्द्रपुत्रो रोहितस्तेषु ज्येष्ठं निगृह्णानस्सन्नुवाच ॥ नत्विमं पुत्रमाददीयेति ॥ तं क्रेष्यमाणस्य पिता प्रत्युवाच नो एवेमं दास्यामि ज्येष्ठस्यादेयत्वादिति ॥ एवकारः सर्वथैवादेयत्वबोधनार्थः॥ एतदेव लिङ्गमाश्रित्य वीरमित्रोदयादिषु दानक्रयादिकं ज्येष्ठस्य प्रतिषिद्धम् ॥ किंच कनिष्ठस्याप्यापद्येव दानम् (अध्याय ९ श्लोक २६८) 'माता पिता वा दद्यातां यमद्भिः पुत्रमापदीति' मनूक्तेः ॥ एतदेवाश्रित्य पूर्वोक्तस्थले विज्ञानेश्वरोऽपि "आपद्ग्रहणादनापदि न देय. दातुरयं प्रतिषेधः" इत्याह ॥ वीरमित्रोदयकारोऽपि "आपदीत्युक्तेरनापदि दातुः प्रत्यवायः' इत्याचष्टे ॥ अपि च येनचिद्दीयमानः पुत्रादिरपि यतिना प्रतिग्राह्य इति विधायकं वाक्यमन्वेष्टव्यम् ॥ तत्र तत्र श्रुतिस्मृतिषु तस्य वैणवदण्डकन्यादिस्वाश्रमलिङ्गातिरिक्तवस्तुपरिग्रहनिषेधात् ॥ तथा पुत्रदानप्रतिज्ञापनमपि यतिवर्यस्योचितं नवेति चिन्त्यम् प्रत्याशावत्त्वापत्तेः ॥ 'एक एव चरेद्भिक्षु'रित्यादिबाधप्रसक्तेश्च ॥

किंच "परीक्ष्य लोकान् कर्मचितान्ब्राह्मणो निर्वेदमायात्" इत्यादिना "शान्तो दान्त उपरतस्तितिक्षुः समाहितः श्रद्धावित्तो भूत्वात्मन्येवात्मानं पश्येत्" इत्यादिश्रुत्या च नित्यानित्यवस्तुविवेकेहामुत्रार्थफलभोगविरागशमदमादिषट्कसंपन्मुमुक्षुत्वरूपसाधनचतुष्टयसंपन्नस्यैव "तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठं" इत्याद्युक्तरीत्या गुरुसमीपे गमनाधिकारो भवन्मते ॥ नत्वनुपनीतस्य साधनचतुष्टयासंपन्नस्य ऋणत्रयाविनिर्मुक्तस्य बालस्येति परस्परविरुद्धमेवैतत्सर्वमतोऽर्थान्तरमनुमापयति ॥ तदुच्यते–दुर्भिक्षत्याजितदेशेन बुभुक्षितेन बहुपुत्रेण देशाद्देशान्तरं भ्रममाणेन कुरुक्षेत्रमागतेन केनचिद्ब्राह्मणब्रुवेणोल्लङ्घितशास्त्रमर्यादेन ज्येष्ठस्तनूजन्मा विक्रीतः केनचित्कर्मन्दिना वणिग्वृत्त्युपजीविना क्रीत इत्यविरुद्धम् ॥

अपिच त्वन्मतरीत्या तु तादृशस्य बालस्य गुरूपसत्तिरेवासंभाविता कुतस्तरां संन्यास इत्याशयेनाहुः ॥ किंच परीक्ष्य लोकानित्यादिना ऋणत्रयाऽविनिर्मुक्तस्य बालस्ये-

त्यन्तेन ॥ अयमर्थः "वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्त्वाः" इत्यत्र "समिधो यजति तनूनपातं यजति इडो यजति बर्हिर्यजति स्वाहाकारं यजति" इत्यादिवत् पाठः क्रमनियामकतयावगम्यते ॥ तथा च वेदान्तविज्ञानोत्तरमेव संन्यासः ॥ "शान्ता विद्वांसो भैक्षचर्यां चरन्तः" इति मुण्डकादिश्रुतिष्वपि तथैव निश्चीयते ॥ नचाग्निहोत्रयवागूपाकन्यायेन पाठक्रमादार्थक्रमस्य बलीयस्त्वमाश्रित्य विपर्ययोऽत्र शङ्क्यः ॥ वाजसनेयिभिः "एतमात्मानं विदित्वा" इति क्त्वाश्रुत्या स्पष्टमेवात्मवेदनस्य भिक्षुचर्यापूर्वकालिकत्वबोधनात् ॥ अतो 'दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेत'इत्यादिवच्छ्रौत एव क्रमः ॥ युक्तं चैतत् ' अन्यथा दृढतरवैराग्यानुदयात्" इति विरक्तस्यैव संन्यासेऽधिकारात्तद्रहितसंन्यासिनोऽत्यन्तविगानाच्च ॥ वेदान्तविज्ञानं च गुरूपसत्त्येकसाध्यम् ॥ सामगानां श्वेतकेतुविद्यायां गन्धाराऽऽनीताभिनद्धाक्षपुरुषदृष्टान्तमुपन्यस्य "एवमेवेहाचार्यवान् पुरुषो वेद" इति श्रावणात् ॥ उपसत्तिश्च विविदिषादिजन्या 'तद्विज्ञानार्थमिति श्रुतेः ॥ विविदिषा च वेदानुवचनयज्ञदानतपःप्रभृतिजन्या "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन" इति तेषां तत्कारणत्वाम्नानात् ॥ अतः पूर्वमेव वेदानुवचनयज्ञाद्यपेक्ष्यते ॥ अथ जन्मान्तरीयदृढतरयज्ञाद्यपूर्वसत्त्वेऽपि वेदानुवचनं वेदान्तव्यासङ्गश्चैतज्जन्मीय एवापेक्षितः ॥ अत एव जिज्ञासासूत्रभाष्ये शङ्कराचार्याः "धर्मजिज्ञासायाः प्रागप्यधीतवेदान्तस्य ब्रह्मजिज्ञासोपपत्तेः" इत्याहुः ॥ अध्ययनादेव हि विविदिषानियतपूर्ववृत्तीनि नित्यानित्यवस्तुविवेकादीनि संपद्यन्ते ॥ अत एव जिज्ञासासूत्रस्थ अथ' शब्दस्यानन्तर्यार्थकत्वमाश्रित्य तदवधित्वेन तदादिचतुष्टयं निरूपितं शङ्कराचार्यैः ॥ तथा हि तद्भाष्ये-'अथशब्द आनन्तर्यार्थः परिगृह्यते' इत्यादिना ॥ प्राचीनाभिमतमधिकारार्थत्वं प्रतिषिध्य मङ्गलस्याऽऽर्थिकत्वमर्थान्तरासंभवं च प्रदर्श्य कैश्चिदभिप्रेतं स्वाध्यायानन्तर्यं कर्मावबोधानन्तर्यं च निराकृत्योच्यते-"तस्मात्किमपि वक्तव्यं यदनन्तरं ब्रह्मजिज्ञासोपदिश्यत' इति । उच्यते, नित्यानित्यवस्तुविवेकः इहामुत्रार्थफलभोगविरागः शमदमादिसाधनसंपत् मुमुक्षुत्वं च तेषु हि सत्सु प्रागपि धर्मजिज्ञासाया ऊर्ध्वं च शक्यते ब्रह्म जिज्ञासितुं ज्ञातुं च ॥ न विपर्यये ॥ तस्मादथशब्देन यथोक्तसाधनसंपत्त्यानन्तर्यमुपदिश्यते" इति ॥ अत्र भामत्यां "तस्मात्किमपि वक्तव्यमिति ॥ यस्मिन्नसति ब्रह्मजिज्ञासा न भवति, सति तु भवन्तीभवत्येवेत्यर्थः" इत्यादिना "नित्यानित्यवस्तुविवेकइत्यादि नित्यानित्ययोर्वस्तुनोरिति नित्यानित्यवस्तु तद्धर्मः नित्यानित्ययोर्धर्मिणोस्तद्धर्माणां च विवेको नित्यानित्यवस्तुविवेकः इहामुत्रार्थ भोगविरागः अर्थ्यते प्रार्थ्यत इत्यर्थः फलमितियावत् । तस्मिन्विरागोऽनाऽऽभोगात्मिकोपेक्षाबुद्धिः । ततः शमदमादिसाधनसंपत् वैराग्यहेतुको मनोविजयः शम इति वशीकारसंज्ञ इति चाख्यायते ॥ विजितं च मनस्तत्त्वविषयविनियोगयोग्यतां नीयते, सेयमस्य योग्यता दमः । क्षान्तिग्रहणेन च विषयतितिक्षातदुपरमतत्त्वश्रद्धाः संगृह्यन्ते ॥ ततोऽस्य संसारबन्धनान्मुमुक्षाभवतीत्याह (मुमुक्षुत्वं च) तस्य च नित्यशुद्धबुद्धमुक्तसत्यस्वभावब्रह्मज्ञानं मोक्षस्य कारणमित्युपश्रुत्य तज्जिज्ञासा भवति तस्मात्तेषामेवानन्तर्यं" इति व्याख्यायि ॥

अत्र मूलभूताम्नायस्तु यथा—"तद्यथेह कर्मचितो लोकः क्षीयते" इत्यादिषु स्वर्गादिसुखस्यानित्यत्वमाम्नायते ॥ मुण्डकेष्वपि प्रथममुण्डकद्वितीयखण्डे ऋक् ७ "प्लवा ह्येते अदृढा यज्ञरूपाः" इत्यादिना (ऋक् १०) "नाकस्य पृष्ठे ते सुकृतेऽनुभूत्वेमं लोकं हीनतरं चाविशन्ति" इत्यन्तेन स्वर्गादिसुखस्य क्षयिताम्नाय 'तपःश्रद्धे ये ह्युपवसन्त्यरण्य' इत्यृचा निवृत्तिनिष्ठस्य परमपुरुषार्थसिद्धिमुक्त्वोच्यते "परीक्ष्य लोकान्कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन ॥ तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् ॥ तस्मै स विद्वानुपसन्नाय सम्यक् प्रशान्तचित्ताय शमान्विताय ॥ येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्याम्" इति अत्र स इत्यनेन कर्मचितलोकपरीक्षया निर्विण्णो ब्राह्मणः परामृश्यते ॥ प्रोवाचेति लकारव्यत्ययो 'व्यत्ययोबहुलम्' इत्यनुशासनात् ॥ प्रब्रूयादित्यर्थः ॥ स्पष्टं चेदं शाङ्करोपनिषद्भाष्येऽपि अत्रापि श्रद्धापूर्वकोपसत्तिप्रशान्तचित्तत्वादिगुणविशिष्टं प्रत्येवोपदेश आचार्येण कर्त्तव्य इति विधीयते नतु तद्रहितं प्रति ॥ अत एव शमदमादिसंपन्नस्यैवात्मदर्शनविधिं काण्वा दर्शयन्ति ॥ तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुस्समाहितः श्रद्धावित्तो भूत्वात्मन्येवात्मानं पश्यति" इति ॥ इह तस्मादिति प्रकृतप्रशंसापरिग्रहाद्विधित्वं स्वीकृतम् ॥ तैत्तिरीयसंहिता (काण्ड २ प्र० ६ अनु० ८) "तस्मात्पूषाप्रपिष्टभागोऽदन्तको हि" इत्यादिवदपूर्वत्वाच्च ॥ माध्यन्दिनास्तु "तस्माच्छान्तो दान्त उपरतस्तितिक्षुः श्रद्धावित्तो भूत्वात्मन्येवात्मानं पश्येत् सर्वमात्मनि पश्यति" इति पठन्ति ॥ शमादिस्वरूपं तु रत्नप्रभायां दर्शितम् ॥ "लौकिकव्यापारान्मनस उपरमः शमः ॥ बाह्यकरणानामुपरमो दमः ॥ ज्ञानार्थं विहितनित्यादिकर्मसंन्यास उपरतिः ॥ शीतोष्णादिद्वन्द्वसहनं तितिक्षा ॥ निद्रालस्यप्रमादत्यागेन मनःस्थितिः समाधानम् ॥ सर्वत्रास्तिकता श्रद्धा ॥ एतत् षट्कप्राप्तिः शमादिसंपत्" इति दिक् ॥ अत्रोपरतिस्वरूपं चिन्त्यमित्यन्यत्र विस्तरः ॥ अतो नित्यानित्यवस्तुविवेकादिचतुष्कसंपन्नेनैव ब्रह्मविविदिषा कर्तव्येति प्रथमसूत्रस्यार्थं वर्णयन्ति शङ्कराचार्याः—"तस्माद्यथोक्तसाधनसंपत्त्यनन्तरं ब्रह्मजिज्ञासा कर्त्तव्या ॥ ब्रह्मणो जिज्ञासा ब्रह्मजिज्ञासा ब्रह्म च वक्ष्यमाणलक्षणं" इत्यादि ॥ उपसत्तिश्च विविदिषया ॥ तस्यैव चोपदेशार्हत्वम्—'नचाशुश्रूषवे वाच्यम्' इत्यजिज्ञासमानायोपदेशस्य प्रतिषेधात् ॥ तथा च प्रकृते यथोक्तविवेकवैराग्यादिसाधनचतुष्टयाभावाज्जिज्ञासानुदयाच्च तादृशबालस्य गुरूपसत्तिरेव प्रत्यक्षतरीत्याऽत्यन्तविरुद्धा ॥ वस्तुतस्तु 'अथ'शब्दस्यानन्तर्यार्थकत्वेऽधिकाकाङ्क्षाध्याहारादिदोषान् विवेकादीनामानन्तर्यावधित्वेन परिग्रहे चक्रकापत्तिगर्भान्योन्याश्रयादिदोषांश्च प्रदर्श्य तस्याधिकारार्थत्वमेव समर्थितमाकरे प्रकाशे च ॥ तदेतदभिप्रेत्य मूले भवन्मत इत्यवादि ॥ सर्वमतेषु स्वयमविरक्तस्याविविदिषोरनुपनीतत्वाद्यधिकारप्रतिबन्धकधर्मशालिनो बालस्य परेच्छया प्रव्राजार्थमुपसत्तिस्तु सर्वथा शास्त्रविरुद्धैवेति दिक् ॥ तदेतत्सर्वमनुसंधायोक्तं किं च परीक्ष्येत्यादिबालस्येत्यन्तम् ॥ अत्र इत्यादिनेति ॥ 'तद्विज्ञानार्थम्' इत्यस्यादि भागेनेत्यर्थः ॥ तृतीयान्वद्वयं प्रकृतश्रुत्युक्तोपसत्तौ साधनचतुष्टयसंपन्नस्यैवाधिकारे हेतुबोधकम् ॥

अथ "तत्र च प्रायेणान्योन्यं विरुद्धानि वाक्यान्यर्थान्तरप्रतिपादकानि" इति प्रतिज्ञावाक्यानुरोधात्परस्परविरुद्धत्वमुपपाद्य वास्तवार्थभिन्नार्थप्रतिपादकत्वं स्पष्टयन्ति- **अतोर्थान्तरमित्यादिना** अविरुद्धमित्यन्तेन ॥ **तदुच्यत इति** ॥ तत् अर्थान्तरम् ॥ तदुक्तार्थातिरिक्तो वास्तवो भूतार्थ इति यावत् ॥ **भ्रममाणेनेति** भ्रमणशीलेन ॥ ताच्छील्यवयोवचनशक्तिष्विति चानश् ॥ आत्मानं मण्डयमान इत्यादिवत् ॥ **ब्राह्मणब्रुवेणेति** ब्राह्मण इत्युच्यतेऽसौ ब्राह्मणब्रुवः न तु वस्तुतस्तल्लक्षणाक्रान्तः ॥ बाहुलकात्कर्मणि पचाद्यच् ॥ घरूपेत्यादिना निपातनाद्वच्यादेशगुणयोरभावः ॥ तल्लक्षणं तु दानचन्द्रिकादिषु व्यासः 'गर्भाधानादिभिर्युक्तस्तथोपनयनेन च ॥ न कर्मविन्न चाधीतः स भवेद्ब्राह्मणब्रुव' इति ॥ **उल्लङ्घितशास्त्रमर्यादेनेति** ॥ पुत्रक्रयज्येष्ठक्रयादिप्रतिषेधोल्लङ्घनाच्चथेति भावः ॥ प्रकृतानुमितिसाधकं विश्वजनीनमितिवृत्तमाहुः ॥ **काश्मीरे**

> **काश्मीरदेशे प्रबलदुर्भिक्षमभूत् सन्ति च कुरुक्षेत्रे व्यवहारकर्त्तारो धनिकाः कर्मन्दिन इत्यबाधित एव बोधः ॥**

इत्यादिना बोधइत्यन्तेन ॥ तथा च शिष्ट किंवदन्त्या निर्विचिकित्सप्रतिपन्नोऽयमर्थोऽनुमितिसंप्रतिपत्त्या सार्वजनिकनिश्चयगोचरो भविष्यतीति किं बहुना ॥ **व्यवहारकर्त्तार इति** ॥ 'घटानां निर्म्मातुस्त्रिभुवनविधातुश्च कलह' इतिवच्छेषषष्ठ्या समासः ॥ तेन 'तृजकाभ्यां कर्त्तरी'त्यस्याविषयः ॥ किंच चतुर्विधेषु भिक्षुषु कतमोऽयं भिक्षुः ॥ तेषां चातुर्विध्यं तु माधवीये हारीतः – चतुर्विधा भिक्षवस्तु प्रोक्ताः सामान्यलिङ्गिनः ॥ तेषां पृथक् पृथग् ज्ञानं वृत्तिभेदात्कृतं श्रुतम् ॥ कुटीचरो बहूदश्च हंसश्चैव तृतीयकः ॥ चतुर्थः परमो हंसो यो य. पश्चात्स उत्तम इति ॥ पितामहोऽपि ॥ चतुर्विधा भिक्षवस्तु प्रख्याता ब्रह्मणो मुखात् ॥ कुटीचरो बहूदको हंसश्चैव तृतीयकः ॥ चतुर्थः परहंसश्च सञ्ज्ञाभेदैः प्रकीर्तिता' इति ॥ एवं वृद्धपराशरादिस्मृतिष्वपि द्रष्टव्यत् ॥ तत्र न तावदाद्यः ॥ प्रजापतिना "कुटीचरो नाम स्वगृहे वर्त्तमान आहिताग्निषु भिक्षां भुञ्जानोपगतकामक्रोधलोभमोहोहंकारवर्जितो य आत्मानुग्रहं कुरुते" इति ॥ वृद्धपराशरेण च "कुटीचरानामपुत्रादिभिः कुटीं कारयित्वा कामक्रोधलोभमोहमदमात्सर्यभयादीन्हित्वा विधिवत्संन्यासं कृत्वा" इत्यादिना दर्शितलक्षणस्याऽप्रवेशात् ॥ नापि द्वितीयः ॥ 'स्कन्देन बहूदकश्च संन्यस्य बंधुपुत्रादिवर्जितः ॥ सप्तागारं चरेद्भैक्षमेकान्नं च परित्यजेत् ॥ गोवालरज्जुसंबद्धत्रिदण्डंशिक्यमुद्धृतम् ॥ जलपात्रं पवित्रं च खनित्रीं चक्रपाणिकाम् ॥ शिखां यज्ञोपवीतं च देवताराधनंचरेत्' इति ॥ वृद्धपराशरेणापि "तत्र बहूदकानामत्रिदण्डकमण्डलुपद्मपवित्रकाषायवस्त्रधारिणः" इत्यादिना प्रोक्तत्वरसाधारणधर्माणामभावात् ॥ माधवादिभिः कुटीचरबहूदकयोर्नियतधर्मत्वेन व्यवस्थापितत्रिदण्डशिखासूत्राद्यभावाच्च ॥ वस्तुतस्तु त्रिदण्डधारणमेव मुख्यम्; मनुयाज्ञवल्क्यादिभिरेकदण्डस्याप्रुक्तत्वात् तथा च मनुः – (अध्या. १२ श्लोक १०) 'यस्यैते नियता बुद्धौ स त्रिदण्डीति चोच्यत' इत्यान्तरनियमवत एव मारुतसंन्यासित्वं वदन्संन्यासस्य त्रिदण्डत्वं बोधयति ॥ यात्तव-

ल्क्योऽपि (अ० ३ यतिधर्मप्रकरणे श्लो० ३) 'सर्वभूतहितः शान्तस्त्रिदण्डी सकमण्डलुः ॥ एकारामः परिव्रज्य भिक्षार्थी ग्राममाश्रयेत् ॥' मिताक्षरादिषु स्मृत्यन्तरम्–"त्रीन्वैणवान्दण्डान्मूर्द्धप्रमाणान् दक्षिणेन पाणिना धारयेत् सव्येन सोदकं कमण्डलुं" इति ॥ देवलोऽपि–"काषायी त्रिदण्डी सकमण्डलुपवित्रपादुकासनकन्थामात्रः" इति ॥ माधवीये हारीतदत्तात्रेयपितामहाः कुटीचरादींश्चतुरोऽप्युपन्यस्य सर्वेषां त्रिदण्डमेव विदधते–'वृत्तिभेदेन भिद्यन्ते नैव लिङ्गेन ते द्विजाः॥ लिङ्गं तु वैणवं तेषां त्रिदण्डं सपवित्रक' मिति ॥ दक्षोऽपि सर्वेषामाश्रमाणां क्रमाल्लक्षणमभिदधानः–"त्रिदण्डो यतिश्चैव" इति यतेर्लक्षणमभिधाय त्रिदण्डरहितस्य यतित्वं निषेधति–'यस्यैतल्लक्षणं नास्ति प्रायश्चित्ती न चाश्रमी'ति॥ यत्तु क्वचिदेकदण्डवचनं तत्त्वपहारादिना त्रिदण्डनाशे तत्त्रयलाभपर्यन्तमेकेन निर्वाहाभिप्रायम् ॥ यथाह अत्रिः–'यावन्न स्युस्त्रयो दण्डास्तावदेकेन पर्यटे' दिति ॥ हारीतोऽपि–'नष्टे जलपवित्रे वा त्रिदण्डं वा प्रमादतः ॥ एकं तु वैणवं दण्डं पालाशं बैल्वमेव वा ॥ गृही त्वा विचरेत्तावद्यावल्लभेत्त्रिदण्डक' मिति॥ यत्तु 'एकदण्डी वेति बौधायनतत्स्मरणं यच्च 'चतुर्थमाश्रमं गच्छेद्ब्रह्मविद्यापरायणः ॥ एकदण्डी त्रिदण्डी वा सर्वसंगविवर्जित' इति चतुर्विंशतिमते विकल्पाभिधानं तदप्येतेनैव व्याख्यातम् ॥ यत्तु केचित्–'वाग्दण्डोऽथ मनोदण्डः कायदण्डस्तथैव च ॥ यस्यैते नियता बुद्धौ स त्रिदण्डीति चोच्यते ॥ त्रिदण्डमेतन्निक्षिप्य सर्वभूतेषु मानवः। कामक्रोधौ तु संयम्य ततः सिद्धिं निगच्छती"ति द्वादशाध्याये (श्लो० १०–११) मनुवचनात् ॥ 'वाग्दण्डोऽथ मनोदण्डः कर्मदण्डस्तथैव च ॥ यस्यैते नियता दण्डास्त्रिदण्डीति स उच्यत' इति दक्षवचनाच्च सर्वेषां त्रिदण्डवचनानि वाग्दण्डादिविषयाणीति वदन्ति,–तन्न; तथा सति कुटीचरबहूदकयोरप्येकदण्डप्रसंगात्तयोस्त्रिदण्डावश्यकतायाः स्वयमङ्गीकारात् ॥ अथ शास्त्रबलात्तयोर्वेणुत्रयधारणमप्यावश्यकमिति चेत्तर्हि सर्वेषां तथास्तु; पूर्वोक्तशास्त्रबलात् ॥ 'परः परमहंसस्तु तुर्याख्यश्रुतिरब्रवीत ॥ यमैश्च नियमैर्युक्तो विष्णुरूपी त्रिदण्डभृदिति ॥ पितामहेन परमहंसस्यापि त्रिदण्डधारण विधानाच्च॥ तथा च वाग्दण्डादिरहितस्य केवलमात्रत्रिदण्डधारणाच्च त्रिदण्डिव्यपदेशार्हत्वमित्येवमनुदक्षवचसोराशयः ॥ मनुना 'न लिङ्गं धर्मकारण'मिति केवललिङ्गस्य नैष्फल्यकथनात् । याज्ञवल्क्येनापि (अ० ३ आध्यात्मिकप्रकरणे श्लो० ७) 'कर्तव्याशयशुद्धिस्तु भिक्षुकेण विशेषतः ॥ ज्ञानोत्पत्तिनिमित्तत्वात्स्वातन्त्र्यकरणाय चेति' तथा (श्लो० ७) 'नाश्रमः कारणं धर्मे क्रियमाणो भवेद्धि स' इति च स्मरणात् ॥ श्रीभागवतेऽपि एकादशस्कन्धाष्टादशाध्याये (श्लो० १७) 'मौनाऽनीहाऽनिलायामा दण्डा वाग्देहचेतसाम् ॥ नह्येते यस्य सन्त्यङ्ग वेणुभिर्न भवेद्यति'रिति कथनाच्च॥ 'ननु लिङ्गं तु वैणवं' 'तेषां त्रिदंड सपवित्रक' मिति स्पष्टम्। वैणवदण्डत्रयस्य चतुर्णां लिङ्गताधानं वाग्दण्डादिपरतया नेतुं शक्यम्॥ पराशरमाधवीये कालिकापुराणे–'वैणवा ये स्मृता दण्डा लिङ्गमात्रप्रबोधकाः ॥ लिङ्गव्यक्त्यै हि धार्यास्ते न पुनर्धर्महेतवः ॥ कायिका ये बुधैर्नित्यं नृणां पापप्रमोक्षणात् ॥ जितेन्द्रियैर्जितक्रोधैर्धार्या वै तत्त्वदर्शिभि'रिति बाह्याभ्यन्तराणामुभयेषां धारणाविधानाच्च॥

"कृषिवाणिज्यसेवादौ काव्यतर्कादिकेषु च ॥ विक्षिप्यन्ते प्रवृत्ता धीस्तैस्तत्त्वस्मृत्यसंभवात्" इति ॥

अथ प्रस्तावनायां स च[1] प्राक्तनेत्यादिना संबभूवुरित्यन्तेन दर्शितायां वधप्रशंसायां कल्पितत्वमाश्रमविरुद्धत्वं चोद्घाटयन्ति । स चाभ्यासगार्हस्थ्यसुख इत्यादिना अग्रे वक्ष्यन्त इत्यन्तेन ॥ अभ्यासगार्हस्थ्यसुख इत्यादि ॥ षष्ठस्कन्धे दक्षवचनेषु 'नानुभूय न जानाति पुमान्विषयतीक्ष्णताम्' इत्यादिकथनाद्धर्मतो गार्हस्थ्यानुभवमन्तराऽऽहत्यसंन्यसने कथंचित्कर्मेन्द्रियसंयमनेऽपि श्रवणदर्शनादिजन्यविषयसंस्कारविशिष्टमनसा स्मरणावश्यंभावान्मिथ्याचारत्वमेवापद्यते ॥ 'कर्मेन्द्रियाणि संयम्ये'ति भगवद्वाक्यात् ॥ वस्तुतस्त्ववैधप्रव्राजाश्रयणात्तदाश्रयणोत्तरमपि तद्धर्मानाचरणात्तद्विरुद्धधर्माचरणाच्च पातित्यप्रसक्त्या शास्त्रोक्तं संन्यासफलमलभमानो गार्हस्थ्यभैक्षवोभयाश्रमत उभयलोकतश्च परिभ्रष्ट एव ॥ यथाह एकादशस्कन्धे (अ० १८ श्लोक ४०।४१) भगवान् 'यस्त्वसंयतषड्वर्गः प्रचण्डेन्द्रियसारथिः ॥ ज्ञानवैराग्यरहितस्त्रिदण्डमुपजीवति ॥ सुरानात्मानमात्मस्थं निह्नुते मां च धर्महा ॥ अविपक्वकषायोऽस्मादमुष्माच्च विहीयते' इति ॥ माधवीये च ज्ञानादिरहितप्रव्राजस्य फलमाम्नायते—'काष्ठदण्डो धृतो येन सर्वाशी ज्ञानवर्जितः ॥ स याति नरकान्घोरान् महारौरवसंज्ञितान्' इति ॥ तत्रैव

---

१ स च प्राक्तनसंस्कारबलादल्पेनैव कालेनाधिगतपाणिनीयगोनर्दीयशास्त्रमर्वस्वोनवद्वीपगमनेन संपादितकणभुक्चरणाक्षसिद्धान्तसपत् भाट्टप्राभाकरमतपारावारपारदृश्वा व्याससूत्रशारीरकादिनिखिलनिगमान्तपयःपयोधिपारीणः काश्यादिपत्तनेषु स्वदिग्विजयं नाटयन्दिग्गज इव देशिकमण्डलाखण्डलश्रीशङ्करार्यसिद्धान्तसन्मार्गाऽवरोधिनो वादिविटपानामूलं समुत्पाटयंस्तत्तद्देशक्ष्मापालपूजितपादपद्मोऽनेकभूजानिलब्धच्छत्रचामराद्यखिलराजचिह्नउत्तरदिक्स्थशङ्कराचार्याभिमानितामुद्वहन्सकलसद्गुणरत्नरोहणगिरिस्सदानन्दगिरिरित्यभिख्यामलङ्कुर्वन्निखिलदेशावलोकनकौतुकी हरिच्चकचंक्रमणक्रमेण समाससाद मेदपाटविषयराजधानीम् ॥ अथ तत्रत्यकीर्त्तिश्रवणसमुत्पन्नदर्शनाभिलापेण योजनपरिमितभूभागं सन्मुखसमागतेन श्रीमच्चन्द्रचूडचरणदत्तावधानेन सद्गुणसंपन्निधानेन सरूपसिंहाभिधानेनोदयपुटमेदनाधिपतिना समानीय निजनगरे स्वगुरुवर्यतया स्थापितः ॥ तदनन्तरं प्रतिदिनवर्द्धमानप्रतापैर्निजविद्याविभवक्ष्वीकृतानेकविद्वद्भिस्स्वसिद्धान्तप्रतिपादनपुरस्सरापरमतोत्पादनप्रवलयुक्तिकप्रचुरप्रबन्धकर्द्भिर्वागीश्वरीविहारभूमिभिस्तैस्तथा चरितं यथाऽऽकल्पमयाह्लादिताखिलविद्वद्वरविहङ्गानिस्तापनिर्मलीकृतसमस्तमनुजमानसभूमयस्सत्कीर्तिकूलंकषानिर्विरामा भवितारः ॥ येषाञ्च सद्विद्यावैदग्ध्यवाक्पाटवप्रौढप्रतापाखिलसिद्धावनिमण्डलमण्डनानि विद्वन्मण्डलानि न प्रेम्णाद्यापि विस्मरन्ति ॥ कदाचित्तीर्थयात्राप्रसंगवशादुदयपुरं प्राप्ता विद्वांसो गोस्वामिनः श्रीजीवनजिच्छर्माणः समर्पयामासुरात्मरचितां बालकृष्णचंपूमुदयपुरभूजानिसरूपसिंहाय तां विलोक्य सोपि स्वामिनां सकाशे प्रेषयामास तद्विलोकनसमुत्पन्नतत्समागमाभिलाषैश्चर्यैः समागमायामंत्रिता अपि ते गोस्वामिनः कस्माच्चित् कार्यवशात् प्रयाणप्रणयिनः संबभूवुः ॥

स्मृतावपि—'एकदण्डं समाश्रित्य जीवन्ति बहवो नराः ॥ नरके रौरवे घोरे कर्म्मत्यागात्पतन्ति ते' इति ॥ निर्णयसिन्धावपीदमुदाहारि—'काष्ठदण्डो धृतो येन' इति तु यमवचनत्वेन समग्राहि ॥ **महतां निन्दनमिति** ॥ इदं सहस्रासे "शास्रैः पुरा ब्राह्मणैः वाल्लभिकृतं विन्मण्डनं" इत्यादावतिस्फुटी भविष्यति ॥ **एतादृशाचरणमिति** ॥ विद्योपजीवनराजसेवादिप्रतिषिद्धाचरणम् ॥ स्वस्य तत्सदृशदुराग्रहलेशस्याप्यभावात्तस्य लेखानुमित वैदुष्यं साश्चर्यं स्वीकुर्वन्ति—**परं त्वित्यादिना** ॥ **तेनेति** ॥ प्रस्तावना कृता ॥ प्रस्तावनायां **स च प्राक्तने पारीणइत्यन्तेन** दर्शितं दूषयन्ति **तत्र-व्यासेत्यादिना स्मृत्यसंभवादितीत्यन्तेन** ॥ अयमत्राशयः-यतेर्व्याकरणादिबहुग्रन्थाभ्यासोन्यायाद्यसच्छास्त्रव्यासङ्गश्च नैव युक्तः ॥ "नाभ्यसेद्बहून् च्छब्दान्वाचो विग्लापनं हि तत्" इति प्रतिषेधात् ॥ श्रीभागवते च सप्तमस्कन्धे त्रयोदशाध्याये (श्लोक० ७-८) यतिधर्मानुपक्रम्य नारदः 'नासच्छास्त्रेषु सज्जेत नोपजीवेत जीविकाम् ॥ वादवादांस्त्यजेत्तर्कान् पक्षं कंचन संश्रयेत् ॥ न शिष्याननुबध्नीत ग्रन्थान्नैवाभ्यसेद्बहून् ॥ न व्याख्यामुपयुञ्जीत नारंभानारभेत् क्वचित्' इति ॥ किंच यतेरध्ययनमेव प्रतिषिध्यते ॥ यथाह पराशरमाधवीये दक्षः—'नाध्येतव्यं न वक्तव्यं न श्रोतव्यं कदाचन ॥ एतैः सर्वैः सुनिष्णातो यतिर्भवति नेतर' इति ॥ बह्वृचशाखायामपि तृतीयारण्यके द्वादशखण्डे "एतद्ध स्म वै तद्विद्वांस आहुर्ऋषयः कावषेयाः किमर्था वयमध्येष्यामहे किमर्था वयं यक्ष्यामहे" इति ॥ न्यायादीनामसच्छास्त्रत्वं तु चतुर्लक्षण्यामविरोधस्य द्वितीयपादे तर्काऽप्रतिष्ठानसूत्रे शिष्टापरिग्रहसूत्रे च स्पष्टमेव ॥ ननु विविदिषुस्याश्रवणाद्याध्ययनं विरुद्धम् ॥ अस्ति संन्यासिनां विद्वद्विविदिषुभेदाद्द्वैविध्यमिति चेत्—सत्यम्; अस्ति द्वैविध्यं, तथापि कुटीचरबहूदकयोरेव प्राक्षिकं विविदिषुत्वं न तु हंसपरमहंसयोः साक्षाद्विद्यासाधन' इत्यादिविरोधात् ॥ अयं तु शिखासूत्रत्यागात्परमहंसतया भावत्कैरभिप्रेयत इति न तस्य तथात्वम् ॥ यत्तु कैश्चित् परमहंसस्यापि विद्वद्विविदिषुभेदेन द्वैविध्यमुक्तं तत्र मूलं चिन्त्यम् ॥ तैर्दर्शितस्य "एतमेव विदित्वा मुनिर्भवत्येतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति" इति वाजसनेयिब्राह्मणस्य कुटीचरादिपरतयोपपत्तेः पारमहंस्यद्वैविध्ये स्पष्टमानानुपलम्भाच्च ॥ किंच यैस्तद्द्वैविध्यमङ्गीक्रियते तैरपि विविदिषोरेकदण्डादिधारणमावश्यकमभ्युपगम्यते ॥ सर्वथा विद्वद्दशायामेव तदनावश्यकत्वं चोच्यते ॥ प्रकृतपुरुषस्तु मूलत एव दण्डादिरहित इति नासौ विविदिषुव्यपदेशार्हः ॥ विद्वद्विषयकतया कमलाकरभट्टेनोदाहृतायां "न दण्डं न शिखां नाच्छादनं चरति परमहंसः" इति महोपनिषदि ज्ञानमेवास्य दण्ड इति वाक्यशेषात् ज्ञानरहितः पिपटिषुस्सास्वादनोयं न विद्वत्पदाभिलप्यः ॥ अपि च विविदिषुसंन्यासेऽपि "एतमयं भूस्वाहेत्यप्सु परित्यज्यात्मानमन्विच्छेत्" इति माधवोदाहृतजाबालश्रुतौ श्रुतपरस्य वेदान्तस्यैव दार्ढ्याय पुनः परिशीलनरूपात्मान्वेषणापरपर्यायमध्ययनं विधीयते "आवृत्तिरसकृदुपदेशात्" इत्यधिकरणे व्रीह्यवघातादिवच्छ्रवणादीनामाफलोदयमावर्तमानस्य मीमांसितत्वात् ॥ "ऊर्ध्वगमनं विसृजेन्निर्मथ्यासौ ध्यानमाचरेत्सम्यं

समाधायात्मन्याचरेत्सर्वेषु वेदेष्वारण्यमावर्तयेदुपनिषदामावर्तयेत्'' इति माधवोपन्यस्तारुणिश्रुतेः ॥ तत्रैव पूर्वं ''दण्डमाच्छादनं कौपीनं परिग्रहेच्छेषं विसृजेच्छेषं विसृजेत्'' इति श्रावणाच्च ॥ न तु तस्यापूर्वमेवाध्ययनं नापि न्यायादीनां विक्षेपहेतूनामध्ययनं विविदिषुसंन्यासे क्वापि विधीयते ॥ प्रत्युत प्रतिषिद्धं तद्बृहस्पतिना—'न तीर्थवासी नित्यं स्यान्नोपवासपरो यतिः ॥ न चाध्ययनशीलः स्यान्न व्याख्यानपरो भवेत्' इति ॥ 'इदं वेदान्तब्रह्ममीमांसातिरिक्तविषयम्' इति माधवादयः ॥ किंच संन्यासोत्तरं दार्ढ्यार्थं संन्यासगुरोरेव समीपे वेदान्तपरिशीलनमपि संवत्सरमात्रमेवोच्यते, न तु वादिविजिगीषया बहुत्रा बहुशास्त्राभ्यासः ॥ यथोक्तं लिङ्गपुराणे—'आश्रमत्रयमुत्सृज्य प्राप्तस्तु परमाश्रमम् ॥ यतिः संवत्सरस्यान्ते प्राप्य ज्ञानमनुत्तमम् ॥ अनुज्ञाप्य गुरुं चैव चरेद्धि पृथिवीमिमाम् ॥ त्यक्तसंगो जितक्रोधो लब्धाहारो जितेन्द्रियः ॥ पिधाय बुद्ध्या द्वाराणि ध्यानेनैकमना भवेत्' इति ॥ मत्स्यपुराणेऽपि—'गुरोरपिहिते युक्तः न तु संवत्सरं वसेत् ॥ नियमेष्वप्रमत्तस्तु यमेषु च सदा भवत् ॥ प्राप्य चान्ते ततश्चैव ज्ञानयोगमनुत्तमम् ॥ 'अविरोधेन धर्मस्य चरेत पृथिवीमिमाम्' इति ॥ 'आश्रमत्रयमुत्सृज्य' इत्युक्त्या अध्ययनस्य पुनः परिशीलनरूपत्वमेवार्थात्फलति ॥ श्रीभागवतेऽप्येकादशस्याष्टादशाध्याये (श्लो० ३८।३९) 'दुःखोदर्केषु कामेषु जातनिर्वेद आत्मवान् । अजिज्ञासितमद्धर्मो गुरुं मुनिमुपाव्रजेत् ॥ तावत्परिचरेद्भक्तः श्रद्धावाननसूयकः ॥ यावद् ब्रह्म विजानीयान्मामेव गुरुमादृत' इति। सर्वकामनिर्विण्णस्यात्मवत एव संन्यासेपि पुनर्ब्रह्मधर्मविचारद्वारा ब्रह्मानुभवार्थमेवाभ्यासो विधीयते ॥ यत्तु आत्मज्ञाने शमे च स्याद्वेदाभ्यासे च यत्नवान्' इति, तत्र वेदाभ्यासः प्रणवाभ्यास इति मिताक्षरामदनपारिजातादयः ॥ एवं च नवद्वीपगमनादिप्रयासपुरस्सरस्तर्काद्यभ्यासस्तस्य विक्षेपद्वारा पातित्यहेतुरेव ॥

दिग्विजयादिनाटनमपि धनाद्यर्जनार्थं नटवदेव ॥ किंच दिग्विजयस्य काश्यादिपत्तनेषु केनाप्याप्तेनानुच्यमानत्वेन सद्वादिशालिनां च प्रतिदिनं वर्द्धमानत्वेन जयपुरबुन्दीकोटाद्युत्तमभूपतिभ्यः स्वप्नेऽप्यलब्धच्छत्रचामरत्वेन बाधितार्थमेतद्वाक्यजालम् ॥ यदि त्वेतत्सर्वं तन्मुखादवगत्य वर्णितं भवेन्न तु स्वयं स्तुत्यर्थं कल्पितं तदा त्विदं तस्मिन्ननृतवादित्वे सत्युत्तरदिक्स्थशङ्कराचार्यसंबन्धिस्पर्द्धावत्त्वं द्योतयदतिपातकित्वमपि संपादयति ॥ तथा चोक्तम्—निषिद्धभक्षणं जैह्म्यमुत्कर्षे च वचोऽनृतम् ॥ रजस्वलामुखास्वादः सुरापानसमानि तु ॥' इति महापातकतुल्येषूत्कर्षार्थानृतवचनस्य मिताक्षराकारेण गणितत्वात् ॥

अथ प्रस्तावनायां काश्यादिपत्तनेष्वित्यादिं राजधानीमित्यन्तं भागं दूषयन्ति—दिग्विजयादिनाटनमित्यादिना गणितत्वादित्यन्तेन ॥ अत्रेदमाकूतम्—प्रस्तावना-

कृतैव दिग्विजयं नाटयन्तीति कथनान्नटवन्नाटनमेव सिद्ध्यति, न तु वास्तवो विजयः ॥ तस्य धनाद्यर्जनार्थत्वं तु राजचिह्नादिप्राप्तिं वर्णयता तेनैव स्पष्टीकृतम् ॥ वस्तुतस्तु यतेर्न वादिविजयोऽपि योग्यः ॥ 'वादवादांस्त्यजेत्तर्कान्' इति दर्शितपूर्वप्रतिषेधात् ॥ मनुरपि (अध्याय ६ श्लोक ४७।४८।४९) 'अतिवादांस्तितिक्षेत नावमन्येत कंचन ॥ नचेमं देहमाश्रित्य वैरं कुर्वीत केनचित् ॥ क्रुध्यन्तं न प्रतिक्रुध्येदाक्रुष्टः कुशलं वदेत् ॥ सप्तद्वारावकीर्णां च न वाचमनृतां वदेत् ॥ अध्यात्मरतिरासीनो निरपेक्षो निरामिषः ॥ आत्मनैव सहायेन सुखार्थी विचरेदिह ॥ बृहस्पतिरपि–'यस्मिन्वाचः प्रतिष्ठाः स्युः कूपे प्राप्ताः शिला इव ॥ न वक्तारं पुनर्यान्ति स कैवल्याश्रमे वसेत् ॥ यस्मिन्कामाः प्रविशन्ति विषयेभ्योपसंहृताः ॥ विषयान्न पुनर्यान्ति स कैवल्याश्रमे वसेत् ॥ यस्मिन्क्रोधं शमं याति विफलः सम्यगुत्थितः ॥ आकाशेऽसिर्यथाक्षिप्तः स कैवल्याश्रमे वसेत् ॥ यस्मिन्क्षान्तिः शमः शौचं सत्यं संतोष आर्जवम् ॥ आकिंचन्यमदंभश्च स कै० ॥ वृथालापी च यो न स्यान्न लोकाराधने रतः ॥ नान्यविद्याभियुक्तश्च स कै० ॥ अतीतान्न स्मरेद्भोगांस्तथैवानागतानपि ॥ प्राप्तांश्च नाभिनन्देत स कै० ॥ अन्धवन्मूकवत्पङ्गुबधिरक्लीबवच्च यः ॥ आस्ते व्रजति यो नित्यं स कैवल्याश्रमे वसेदिति ॥ एकादशस्कन्धे च (अ० १८ श्लो० ३०।३१) वेदवादरतो न स्यान्न पाषण्डी न हैतुकः ॥ शुष्कवादविवादे न कंचित्पक्षं समाश्रयेत् ॥ नोद्विजेत जनाद्धीरो जनं चोद्वेजयेन्न तु ॥ अतिवादांस्तितिक्षेत नावमन्येत कंचन ॥' वादिनामुत्पाटनमपि स्वाश्रमविरुद्धम् ॥ तस्याऽभयदानादेव सन्याससिद्धेः परपदलाभोक्तेश्च ॥ यथाह मनुः (अ० ६ श्लो० ३९।४०) 'यो दत्वा सर्वभूतेभ्यः प्रव्रजत्यभयं गृहात् ॥ तस्य तेजोमया लोका भवन्ति ब्रह्मवादिनः ॥ यस्मादण्वपि भूतानां द्विजान्नोत्पद्यते भयम् ॥ तस्य देहाद्विमुक्तस्य भयं नास्ति कुतश्चन ॥ याज्ञवल्क्योऽपि (अ० ३ यतिधर्म प्र० श्लो० ६) 'संनिरुद्ध्येन्द्रियग्रामं रागद्वेषौ प्रहाय च ॥ भयं हत्वा च भूतानाममृती भवति द्विज' इति ॥ किंचाभयदानमन्तरा सन्यास एव न सिद्ध्यति, तदिति कर्तव्यतायां तद्विधानात् ॥ तदाह पराशरमाधवनिर्णयसिन्ध्वादिषु कपिल-विधिवत्प्रैषमुच्चार्य त्रिरुपांशु त्रिरुच्चकैः ॥ अभयं सर्वभूतेभ्यो मत्तः स्वाहेत्यधो भुवि ॥ निनीय दण्डशिक्यादि गृहीत्वाऽथ बहिर्व्रजेत्' इति ॥ अत एव सर्वभूताऽपीडनपुरस्सरं विहरणं मनुनोच्यते (अ० ६ श्लो० ५२) 'कॢप्तकेशनखश्मश्रुः पात्री दण्डी कुसुम्भवान् । विचरेन्नियतो नित्यं सर्वभूतान्यपीडयन्' इति ॥ कुसुम्भं कमण्डलु ॥ यच्च तत्तद्देशक्ष्मापालपूजितपादत्वं तेभ्यश्छत्रचामराद्यखिलराजचिह्नोपार्जनं च वर्णितं तदपि सन्यासोज्वालरूमेव ॥ राजसत्कारादिप्रतिषेधं तु दर्शयति मनुः (अ० ६ श्लो० ५८) अभिपूजितलाभांस्तु जुगुप्सेतैव सर्वशः ॥ अभिपूजितलाभैश्च यतिर्मुक्तोऽपि बध्यते' इति ॥ तथा (श्लो० ४१) 'आगारादभिनिष्क्रान्तः पवित्रोपचितो मुनिः ॥ समुपोढेषु कामेषु निरपेक्षः परिव्रजेत्' इति ॥ किंच (श्लो० ५३।५४) 'अतैजसानि पात्राणि तस्य स्युर्निर्व्रणानि च ॥ तेषामद्भिः स्मृतं शौचं चमसानामिवाध्वरे ॥ अलाबु दारुपात्रं च मृन्मयं वैदलं तथा ॥ एतानि यतिपात्राणि मनुः स्वायम्भुवोऽब्रवीत्' इति ॥

पानाण्यल्पमौल्यलभ्यानि प्रतिपाद्य (श्लो० ५५) 'एककालं चरेद्भैक्षं न प्रसज्जेत विस्तरे॥ भैक्षे प्रसक्तो हि यतिर्विषयेष्वपि सज्जत इति। भिक्षाया अपि विस्तारं प्रतिषिध्य (श्लो० ५७) प्राणयात्रिकमात्रः स्यान्मात्रासंगाद्विनिर्गत इतीतरवैभवस्याभावमेव बोधयति॥ याज्ञवल्क्योऽपि उक्तस्थले (श्लो० ४१५) 'अप्रमत्तश्चरेद्भैक्षं सायाह्ने नाभिलक्षितः॥ रहिते भिक्षुकैर्ग्रामे यात्रामात्रमलोलुपः॥ यतिपात्राणि मृद्वेणुदार्वलाबुमयानि च॥ सलिलैः शुद्धिरेतेषां गोवालैश्चावघर्षण'मिति॥ तदेवाह बौधायनोऽपि॥ दारवं वैणवं वापि मार्दं धातुमयं तथा॥ पात्रं शिलामयं ताम्रपर्णादिमयमेव वा॥ चतुरस्रं वर्तुलं वाप्यासनं दारवं शुभम्॥ कौपीनाच्छादनं वासः कन्थां शीतनिवारिणी'मित्यादि॥ यमोऽपि 'हिरण्मयानि पात्राणि कृष्णायसमयानि च॥ यतीनां तान्यपात्राणि वर्जयेत्तानि भिक्षुकः' ॥ पुनर्बौधायन.—'स्वयमाहृतपर्णेषु स्वयं शीर्णेषु वा पुनः॥ भुञ्जीत न वटाश्वत्थकरञ्जानां तु पर्णके॥ कुम्भतिन्दुकयोर्वापि कोविदारार्कयोस्तथा॥ आपद्यपि न कांस्ये तु मलाशी कांस्यभोजनः॥ सौवर्णे राजते ताम्रमये वा त्रपुसीसयो'रिति पर्णपुटादौ भोजनं विदधाति कांस्यादिपात्राणि च निषेधति क्व पुना राजचिह्नस्यावसरः॥ वैभवाभावादेव भिक्षापात्रेणापि भोजनं विदधाति मदनपारिजातादिषु देवल.—"तद्भैक्षं गृहीत्वैकान्ते तेन पात्रेणान्येन वा तूष्णीं भुञ्जीत" इति॥ तथा देशविशेषस्याचार्याभिमाननिखिलदेशावलोकनकौतुके अपि प्रव्राजस्य विभूषणे—'ज्ञानामृतेन तृप्तस्य कृतकृत्यस्य योगिनः॥ नैवास्ति किञ्चित्कर्तव्यमस्ति चेन्न स तत्त्ववि'दिति माधवाद्युदाहृतस्मृत्यादिषु कर्तव्यस्य प्रतिषेधात्तादृशस्यैव दण्डशिखादित्यागयोग्यताभिधानाच्च॥ एतत्सर्वं तदुक्तमभ्युपेत्य वदाम॰॥ वास्तवं भूतार्थमाहु.—किञ्च काश्यादीत्यादिना जालमित्यन्तेन॥ अनुच्यमानत्वेनेति॥ तत्समानकालिका अपि काशीस्थाः सर्वे विद्वांसोऽन्ये चास्ता॰ केऽपि वाराणस्यां तदागमनमपि न विदन्ति, बहवस्तन्नामापि न जानते, क्व तर्हि स्वप्नेऽपि दिग्विजयस्येति भावः॥ सह्यादिशाखिनामिति॥ प्रस्तावनाकारो विटान् पान्तीति दुष्टार्थान्तरमभिप्रेत्य विटपशब्दं प्रायुङ्क्त॥ इह तु तन्निरसितुं श्लेषेण वेदशास्त्रासंबन्धं वेदमार्गवर्तिनां तापहरणच्छायाऽऽवरणफलवितरणश्रमश्रमग्मसुद्धरणमस्मृतिविविधोपकरणचणतां शरणप्राप्तद्विजादिभरणभारं च ध्वनयितुं शाखिपदमुपात्तम्॥ स्पष्टमन्यत्॥ तथा चोक्तमिति॥ तृतीयाध्याये कर्मविपाकपूर्वकपातकपरिगणनप्रकरणे (श्लो० २३) याज्ञवल्क्येनोक्तमित्यर्थः॥ अत्र उत्कर्ष इति सप्तम्या निमित्तार्थत्वे विज्ञानेश्वरसंमतिं बोधयितुमाहुः—महापातकेत्यादि॥ गणितत्वादिति॥ इद सपादयतीति पूर्वत्र हेतुतयान्वेति॥ महापातकसमानामतिपातकत्वं तूपपातकमिताक्षरायां 'महापापं चातिपापम्'इति स्मृते.॥ अथ प्रस्तावनायां तत्तत्कीर्तीत्यादिना संचभूवुरित्यन्तेन दर्शितं दूषयन्ति—उदयपत्तनाधिपस्येत्यादिना वचनादित्यन्तेन॥

उदयपत्तनाधिपस्य नगरे स्थितिरुत्कर्षहेतुत्वेन प्रतिपादितापि वस्तुतोऽपकर्षहेतुरेव॥ तुर्याश्रमिणां तस्या अविहितत्वात् प्रत्युत

१ तूपपादितमितिपाठोभाति।

निषिद्धत्वाच्च ॥ उक्तं च-सर्वभूतहितः शान्तस्त्रिदण्डी सकमण्डलुः ॥ एकारामः परिव्रज्य भिक्षार्थी ग्राममाश्रयेत् ॥ मिताक्षरायां च-"भिक्षाप्रयोजनात् ग्राममाश्रयेत्प्रविशेन्न पुनः । सुखनिवासार्थम्" ॥ ऊर्ध्वं वार्षिकाभ्यां मासाभ्यां नैकस्थानवासीति शङ्खस्मृतिरपि--'एकरात्रं वसेद्ग्रामे नगरे पञ्चरात्रक'मिति कण्वेनाप्युक्तम् ॥ किंच नृपान्नभक्षणविद्योपजीवित्वराजाश्रितत्वादिकमाह स्वधर्म्महानिकरमेव ॥ तथा चोक्तं मनुना-'न चोत्पातनिमित्ताभ्यां न नक्षत्राङ्गविद्यया ॥ नानुशासनवादाभ्यां भिक्षां लिप्सेत कर्हिचित् ॥ संवर्त्तः-अष्टौ भिक्षाः समादाय स मुनिः सप्त पञ्च वा ॥ अद्भिः प्रक्षाल्य ताः सर्वास्ततोऽश्नीयाच्च वाग्यतः ॥ तथा च सर्वाश्रमोत्तमं चतुर्थमाश्रममारूढे विद्योपजीवित्वनृपाश्रितत्वविवादकर्तृत्वादींस्तुरीयाश्रमिणां पतितत्वसंपादकाँस्तस्मिन् दर्शयता एकारामत्वादींश्चादर्शयता तस्मिन्नारूढपतितत्वं सम्यक्तया संपाद्यते-'विहितस्याननुष्ठानान्निषिद्धस्य च सेवनात् ॥ 'अनिग्रहाच्चेन्द्रियाणांनरः पतनमृच्छति इति' वचनात् ॥ यथा पित्तपीतिमदूषितचक्षुषा शङ्खं पीतमिव पश्यता धवलोऽपि शङ्खः पीत इत्युच्यते एवमनेनापि स्वनिष्टारूढपतितत्वदूषितहृदा सज्जनानारूढपतितानिव जानता सत्कर्मनिष्ठा अप्यारूढपतिता इत्यग्रे वक्ष्यन्ते ॥

अयं भावः-राज्ञः सम्मुखगमनादिकं तु पूर्वंत्वप्रशंसार्थं मनोराज्यविजृम्भितमेव ॥ तात्कालिकतत्रत्यराजकीयजनतानुभवागोचरत्वात् ॥ तत्र्वं तु राज्ञा आजीविकां दत्वा स्वाश्रितविद्वत्त्वेन स्थापित इत्येव ॥ या च राजगुरुतया स्थितिरस्यकर्याकल्पि सा तदाश्रमविरोधात्प्रत्युतापकर्षमेवापादयति उक्तं चेति-- (यतिधर्मप्रकरणे अ० ३ श्लो० ३) याज्ञवल्क्येनेति शेषः ॥ सुखनिवासार्थमित्यन्तो मिताक्षराग्रन्थः ॥ मूलोक्तं कण्ववचनादिकं तु मिताक्षरामाधवीयमदनपारिजातादिष्वुदाहृतमेवेति नामूलत्वशङ्कावकाशः ॥ मनुरपि यतेः सर्वदैकाकित्वाऽसिहेतनत्वादिकमसार्थमेव ग्रामप्रवेशं च वदति--(अ० ६ श्लो० ४२-४३) 'एक एव चरेन्नित्य सिद्ध्यर्थमसहायवान् ॥ सिद्धिमेकस्य संपश्यन्न जहाति न हीयते ॥ अनग्निरनिकेतः स्याद्ग्राममन्नार्थमाश्रयेत् ॥ उपेक्षकोऽशङ्कुसुको मुनिर्भावसमन्वितः' 'अशङ्कुसुकः स्थिरमति' रिति कुल्लूकभट्टः ॥ 'असंचायक' इत्यन्ये ॥ पुनः स एव (श्लो० ५९-६०) 'अल्पान्नाभ्यवहारेण रहःस्थानासनेन च ॥ ह्रियमाणानि विषयैरिन्द्रियाणि निवर्तयेत् ॥ इन्द्रियाणां निरोधेन रागद्वेषक्षयेन च ॥ अहिंसया च भूतानाममृतत्वाय कल्पते' इति ॥ एकादशस्कन्धे (अ० १८ श्लो० २०-२१) 'एकश्चरेन्महीमेतां निस्संगः संयतेन्द्रियः ॥ आत्मक्रीड आत्मरत आत्मवान्समदर्शनः ॥ विविक्तक्षेमशरणो मद्भावविमलाशय' इति ॥ तथा (श्लो० २४-२५) 'पुरग्रामव्रजान्

सार्थान् भिक्षार्थं प्रविशंश्चरेत् ॥ पुण्यदेशसरिच्छैलवनाश्रयवर्ती महीम् ॥ यानप्रस्थाश्रमपदेष्वभीक्ष्णं भैक्ष्यमाचरेत् ॥ सलिलस्याश्रमसम्मोहः शुद्धसत्त्वशिलान्धसा' ॥ सप्तमस्कन्धे (अ० १३ श्लो० ९) 'कल्पस्त्वेवं परिव्रज्य देहमात्रावशेषितः ॥ ग्रामैकरात्रविधिना निरपेक्षश्चरेन्महीम्' (श्लो० ३) 'एक एव चरेद्भिक्षुरात्मारामोऽनपाश्रयः ॥ सर्वभूतसुहृच्छान्तो नारायणपरायण' इति ॥ मदनपारिजाते पराशरविवरणे च मत्स्यपुराणे—'अष्टौ मासान्विहारः स्याद्यतीनां संयतात्मनाम् ॥ एकत्र चतुरो मासान्वार्षिकान्निवसेत्पुनः' इति ॥ माधवीयमिताक्षरादिषु दक्षः—'एको भिक्षुर्यथोक्तस्तु द्वावेव मिथुनं स्मृतम् ॥ त्रयो ग्रामः समाख्यात ऊर्ध्वं तु नगरायते ॥ नगरं नहि कर्तव्यं ग्रामोऽपि मिथुनं तथा ॥ एतत्त्रयं च कुर्वाणः स्वधर्माच्च्यवते यतिः ॥ राजवार्ता हि तेषां च भिक्षावार्तापरस्परम् ॥ स्नेहपैशुन्यमात्सर्यं सन्निकर्षान्न संशय' इति राजवार्तादिः स्नेहादेश्च संभवात् परिव्राजकान्तरस्यापि संगं प्रतिषेधति कः पुनर्नगरनिवासपूर्वकराजादिसंगस्यावसरः ॥ माधवीये श्रुतिः—"वर्षासु ध्रुवशीलोऽष्टौ मास एकाकी चरेत्" इति ॥ बौधायनः—'विधूमे सन्नमुसले व्यङ्गारे भुक्तवज्जने ॥ कालेऽपराह्णभूयिष्ठे भिक्षाटनमथाचरेत् ॥ ऊर्ध्वं जान्वोरधो नाभेः परिधायैकमम्बरम् ॥ द्वितीयमन्तरं वासः पात्री दण्डी च वाग्यत' इत्युपक्रम्य सूर्योपस्थानं जपं चोक्त्वा, 'भिक्षापात्रादिशुद्ध्यर्थमुपमुच्याप्युपानहौ ॥ ततो ग्रामं व्रजेन्मन्दं युगमात्रावलोककः ॥ ध्यायन् हरिं च तच्चित्त इदं च समुदीरयेत्' इति भिक्षार्थमेव ग्रामप्रवेशं तत्राप्यटनभिक्षाग्रहणयोः प्रकारं च विस्तरेण दर्शयित्वा, 'प्राणयात्रिकमन्नं तु भिक्षेत विगतस्पृह' इति तदतिरिक्तापरिग्रहं बोधयति ॥ किंच नृपादेरेकस्यैवाश्रयेण भिक्षासंपादनं निन्दति स एव—'एकत्र लोभाद्वा भिक्षुः परिपूरणमिच्छति ॥ दाता स्वर्गमवाप्नोति भोक्ता भुञ्जीत किल्बिषम्' इति॥ यमोऽपि—'स्नात्वा शुचिः।' शुचौ देशे कृतजप्यः समाहितः॥ भिक्षार्थी प्रविशेद्ग्रामं रागद्वेषविवर्जितम् ॥ चरेन्माधुकरं भैक्षं यतिर्म्लेच्छकुलादपि ॥ एकान्नं न च भुञ्जीत बृहस्पतिसमो यदि ॥ मेध्यं भैक्षं चरेन्नित्यं सायाह्ने वाग्यतः शुचिः ॥ एकवासा विशुद्धात्मा मन्दगामी युगान्तदृक् ॥ यथालब्धं तदश्नीयात्प्राज्यसंस्कारवर्जितम् ॥ भैक्षं माधुकरनाम सर्वपातकनाशनम्' इति ॥ अत्र एकान्नभक्षणनिषेधे तात्पर्यं, नतु म्लेच्छकुलाद्भैक्षग्रहणे ॥ अत एव बौधायनः—'ब्राह्मणक्षत्रियविशां भैक्ष्यानामसमाहरेत् ॥ असंभवे तु पूर्वस्याप्याददीतोत्तरोत्तरम् ॥ सर्वेषामप्यभावे तु भक्तद्वयमनश्नता ॥ भैक्षं शूद्रादपि ग्राह्यं रक्ष्याः प्राणाविजानता' इति ॥ अत्र साधारणक्षत्रियादन्नग्रहणमपि ब्राह्मणालाभ एवोच्यते ॥ अपि च माधवीये जाबालश्रुतौ सर्ववस्तुत्यागमुक्त्वा "यथाजातरूपधरो निर्द्वन्द्वो निष्परिग्रहस्तत्त्वब्रह्ममार्गे सम्यक्संपन्नः शुद्धमानसः प्राणसंधारणार्थं यथोक्तकाले विमुक्तो भैक्षमाचरन्करपात्रेण लाभालाभौ समौ भूत्वा शून्यागारदेवगृहतृणकूटवल्मीकवृक्षमूलकुलालशालाग्निहोत्रनदीपुलिनगिरिकुहरकंदरकोटरनिर्झरस्थंडिलेष्वनिकेतवास्यप्रयत्नो निर्ममः शुक्लध्यानपरायणोऽध्यात्मनिष्ठो शुभकर्मनिर्मूलनपरः संन्यासेनदेहत्यागं करोति स परहंसो नाम" इत्याच्छादनादि

परिग्रहग्रामस्थित्यादिकं परमहंसस्य प्रतिषिध्यते ॥ अभिपूजितलाभादिनिषेधाश्च प्रागेव दर्शिताः ॥ अतो राजाश्रयादौद्धत्यमाश्रित्य नगरे चिरं स्थितिः सर्वदा तदन्नाशनं तदा तत्रत्यैरनुभूतं वैष्णवानां तुलसीकाष्ठमालोर्ध्वपुण्ड्रादेर्बलादपलोपनं च तस्य पातित्यसंपादकमेव ॥ विहिताननुष्ठानप्रतिषिद्धाचरणादौ पातित्यस्मरणात् ॥ **किंच नृपान्नेत्यादि** ॥ राजान्नादिप्रतिषेधस्तु यमस्मृतौ चतुर्थाध्याये (श्लो० ५९) 'राज्ञां प्रतिग्रहस्त्याज्यो लोकत्रयजिगीषुभिः ॥ राज्ञः प्रतिग्रहाच्चैव ब्राह्मण्यं हि विलुप्यते' इति ॥ अत्रिस्मृतौ—अधीत्य चतुरो वेदान् सर्वशास्त्रार्थतत्त्ववित् ॥ नरेन्द्र भवने भुक्त्वा विष्ठायां जायते कृमिः' इति ॥ **नचोत्पातनिमित्ताभ्यामिति** ॥ इदं षष्ठाध्याये (श्लो० ५०) अस्ति ॥ तथा 'च विद्ययोपजीवनं स्वदुरुक्त्या गुरुत्वेनानुशासनं वादकरणं च प्रतिषिद्धाचरणरूपमेवेति सिद्धम् ॥ प्रतिषेधबाहुल्यं तु प्रागेव प्रापञ्चि। नचोत्पातेत्यस्याविद्योपजीवनादिप्रतिषेधपरत्वं तु माधवविज्ञानेश्वरमेधातिथिप्रभृतयो व्याचक्षत एव ॥ भिक्षालब्धान्नमात्रस्याशनेतस्याधिकारं बोधयितुं संवर्तवचनमाहुः—**अष्टौभिक्षा इति** ॥ इदमपि मिताक्षरामाधवीयमदनपारिजातादिषु स्फुटं संगृहीतम् ॥ भिक्षाप्यसंकल्पितसप्तागारेभ्य एव संपाद्या, नतु नित्यं राजगृहात् ॥ यथाह मिताक्षरायां वसिष्ठः—"सप्तागाराण्यसंकल्पितानि चरेद्भैक्षम्" इति ॥ एकादशस्कन्धाष्टादशाध्याये च भगवान् (श्लो० १८) *'भिक्षां चतुर्षु वर्णेषु विगर्ह्यान्वर्जयंश्चरेत् ॥ सप्तागारान-संक्लृप्तांस्तुष्येल्लब्धेन तावता'* इति ॥ भिक्षाविषयेऽपि विशेषस्तु प्रागेवादर्शि ॥ यत्तु प्रस्तावनायां **तदनन्तरमित्यादिना विस्मरन्तीत्यन्तेन** विवादकर्तृत्वादिकमुक्तं,–तदप्ये-तेनैवापास्तम् ॥ प्रचुरप्रबन्धकर्तृत्वं तु मिथ्यैव भाति; शैवसुधाकरातिरिक्ततत्प्रबन्धानुप-लम्भात् ॥ सुधाकरे च प्रबलयुक्तिकत्वाभावात् ॥ प्रायेण तत्खण्डनं तु मत्कृते सत्सिद्धान्तमार्तण्डे द्रष्टव्यम् ॥ नापि निखिलावनीमण्डलस्थपण्डितमण्डलीनि:शेषा *तदभिधानमपि श्रवणातिथीकृतवती क्व पुनः सर्वदा स्मरणसंभावना ॥ यच्च कदाचिदि-त्यादिना गोस्वामिश्रीजीवनजीमहाराजानां वृत्तं वर्णितं,* तदप्यन्यथाकारमेव ॥ तथा हि–श्रीमद्वल्लभाचार्यवंशमुक्तामणयः पण्डितवेतण्डमण्डलमूर्द्धमण्डनकराः श्रीजीवनजी-महाराजाः पुरुषोत्तमपुरपर्यन्तप्राच्यतीर्थसार्थयात्रापवित्रगात्रास्तत्फलतया श्रीमद्गोवर्ध-नोद्धरणचरणपरिचरणमभिलषन्तः श्रीनाथद्वारमागच्छन् ॥ ततश्चिरादाकर्णितभृशविशद-यशस्कानाचार्यांस्तान् भक्त्या दिदृक्षमाणो भूपभूपः स्वरूपसिंहाभिधो विविधोचिताचार-सत्कारप्रकारप्रणयी सादरं समाह्वत ॥ तदा तदाऽऽकारणं सद्धर्मशर्मकारणं सफलयितुं सदयमुदयपत्तनमलंकुर्वाणास्ते स्वसंदर्शनविदितामन्दानन्दायानन्ताकान्तवृन्दारकवृन्दपुर-न्दराय तस्मै मूर्तामिवाशिषं स्वप्रणीतां श्रीबालकृष्णचंपूमपस्पृशन् ॥ ततः समहीक्षित्सत्कृत्य चक्षु सत्कृत्य तान्याथार्हं विसृज्य तत्प्रसप्रबन्धप्रमेयं जिज्ञासमानः स्वाश्रितसदानन्दगिरेः करे तत्पुस्तकमदात् ॥ सोपि मदादिवर्जितस्य तस्य सागरांबराकान्तस्य तेषु तादृशं भृशं स्वविविदिषितविषयावरोधिनं विनयप्रणयप्रकर्षं प्रेक्ष्य श्रीमत्सरं स्वहृदयाकल्पी-कुर्वन्नुर्वीजानेस्तेष्वरुचिमुत्पिपादयिषन्निःदोष एष निबन्धो धनेशवन्धोरमन्दया निन्दया

पूर्ण इति तूर्णमचकथत् ॥ अथ श्रीगोवर्द्धनधरमेकलिङ्गेश्वरं चपरंपरया भजतो हरिहराऽभेदविदो मम हस्ते हिमरश्मिमस्तकनिन्दाग्रन्थपुस्तकं यद्विश्राणितं तत्तैरनुचितमनुष्ठितमिति दूयमानमानसः पुनस्तान् समार्चीकरत् ॥ ततो यतिस्तैर्महाराजैस्समभदं यादरणे नवाऽऽदरणवानसि यदि ते भूयोऽभ्येष्यन्तीति कांश्चन मानवान्मानवानयादीत् ॥ इदं कर्णाकर्णिकयाऽऽकर्ण्य ते महाराजा नाऽस्मिन्ग्रन्थे लवस्यापि सम्भवोऽस्ति शिवनिन्दायाः यदि चावनीवल्लभः पुनराह्वयेत्तर्हि तदेतदुपपादयितुं सिद्धोऽहमिति व्याहार्षुः ॥ तदेतदवगतवतापि क्षितिभृता स्वसम्मतयोः शैववैष्णवमतयोर्वादोत्पादनमरोचयता भूयस्ते न समाकारिषत इति तात्कालिकतत्तत्सभ्यवदनादवगम्यते ॥ सा चम्पूश्च मुद्रितेदानीमुपलभ्यत एवेति तत्र शिवनिन्दाया अभावस्तु स्वयमेव विद्वद्भिरवगंस्यते ॥ प्रस्तावनायां "कस्माचित्कार्यवशात्" इत्यत्र तु कस्यचित्कार्यस्य वशादिति रम्यम् ॥ समासादेकार्थीभावापत्ते कार्ये कस्माचिदित्यस्य विशेषणतयान्वये सामर्थ्याभावात् ॥ अन्यथा चक्रवर्तिनो राजपुरुष इत्यपि शक्येत प्रयोक्तुम् ॥ कस्माचिदित्यपरिज्ञानं तु कार्यस्यैवाऽवगम्यते ॥ अथ मूले एतावता सिद्धमर्थमाहुः ॥ तथाच सर्वेत्यादिना वक्ष्यन्त इत्यन्तेन ॥ एकारामत्वादीनिति ॥ एकारामः परिव्रज्येत्यादौ याज्ञवल्क्यादिभिर्दर्शितान् ॥ आरूढपतितत्वमिति ॥ अत्र माधवीये मेधातिथिः ॥ श्रद्धयापरयोपेतः परमात्मपरायणः ॥ स्थूलसूक्ष्मशरीराभ्यां मुच्यते दशपञ्चवित् ॥ त्रिदण्डं कुण्डिकां कन्थां भैक्षभाजनमासनम् ॥ कौपीनाच्छादनं वासः षडेतानि परिग्रहेत् ॥ स्थावरं जङ्गमं बीजं तैजसं विषमायुधम् ॥ षडेतानि न गृह्णीयाद्यतिर्मूत्रपुरीषवत् ॥ रसायनक्रियांवादं ज्योतिषं क्रयविक्रयम् ॥ विविधानि च शिल्पानि वर्जयेत्परदारवत् ॥ भिक्षाटनं जपः स्नानं ध्यानं शौचं सुरार्चनम् ॥ कर्तव्यानि षडेतानि सर्वथा नृपदण्डवत् ॥ नाभिद्मेक्षणं स्पृष्टं प्रमदां सुहृदां तथा ॥ भक्ष्यं भोज्यमुदक्यां च पण्यं पश्येत्कदाचन ॥ स्कंधावारे खले सार्थे पुरे ग्रामे च सद्गृहे ॥ नवसेत यतिः षट्सु स्थानेष्वेतेषु कर्हिचित् ॥ रागं द्वेषं मदं मायां दम्भं मोहं परात्मसु ॥ षडेतानि यतिर्नित्यं मनसापि न चिन्तयेत् ॥ मञ्चकं शुक्लवस्त्रं च स्त्रीकथालौल्यमेव च ॥ दिवास्वापश्च यानं च यतीनां पतनानि षट् ॥ संयोगं च वियोगं च विभोगस्य च साधनम् ॥ जीवेश्वरप्रधानानां स्वरूपाणि विचिन्तयेत् ॥ आसनं पात्रलोपश्च संचयः शिष्यसंग्रहः ॥ दिवास्वापो वृथा जल्पो यतेर्बन्धकराणि षट् ॥ एकाहात्परतो ग्रामे पञ्चाहात्परतः पुरे ॥ वर्षाभ्योऽन्यत्र यत्स्थानमासनं तदुदाहृतम् ॥ उक्तानां यतिपात्राणामेकस्यापि न संग्रहः ॥ भिक्षोर्भैक्षभुजश्चापि पात्रलोपः स उच्यते ॥ अजिह्वः षण्डकः पङ्गुरन्धो बधिर एव च ॥ मुग्धश्च मुच्यते भिक्षुः षड्भिरेतैर्न संशयः ॥ इदमिष्टमिदं नेति योऽश्नन्नपि न सज्जति ॥ हितं सत्यं मितं वक्ति तमजिह्वं प्रचक्षते ॥ सद्योजातां यथा नारीं तथा षोडशवार्षिकीम् ॥ शतवर्षां च यो दृष्ट्वा निर्विकारः स षण्डकः ॥ भिक्षार्थमटनं यस्य विण्मूत्रकरणाय च ॥ योजनान्न परं याति सर्वथा पङ्गुरेव सः ॥ तिष्ठतो व्रजतो यापि यस्य चक्षुर्न दूरतः ॥ चतुर्युगां भुवं त्यक्त्वा परिव्राट् सोऽन्ध उच्यते ॥ हिताहितं मनोरामं वचः शोकावहं तु यत् ॥ श्रुत्वा यो न शृणोतीव बधिरः स प्रकीर्तितः ॥ सान्निध्ये विषयाणां यः समर्थो विकलेन्द्रियः ॥ सुप्तव-

द्वर्तते नित्यं स भिक्षुर्मुग्ध उच्यत इति ॥ तथा च षडतिरिक्तानां राजचिह्नानां परिग्रहात् वादादिप्रतिषिद्धाचरणात् भिक्षाटनादिविहिताकरणात् प्रतिषिद्धनिवासात् परेषु रागद्वेषादिविधानात् सर्वदागमनार्थं यानस्यैव निषेवणात् आसनादिप्रणयनात् प्रकृतग्रन्थे शैवसुधाकरे वादेषु चाहितासत्यामितभाषणात् वादार्थमटनात् मुग्धत्वाभावाच्च तस्मिन्नारूढपतितत्वमसंदिग्धमेव ॥ स च द्वारकाप्रान्तप्रवेशोत्तरं राजधानीषु प्रायः शिबिकायामेव स्थितिमभिनिविशानस्तत्प्रान्ते ग्रामनगरान्तर्गमनावसरे बहुवसुव्ययतोऽपि शिबिकावाहकपुरुषाऽलाभाद्धाटकलब्धयानदुच्छकट्योपरि स्वशिबिकां बद्ध्वा तामधिष्ठाय ततो निरगादित्येवंविधा यानाभ्यासप्रभृतयः पतनहेतवस्तस्मिन्बहुभिरेवसन्त्यनुभूता इति कितत्कथनेन ॥ अत एवोक्तं–सम्यक्तयेति ॥ पातित्ये मतान्तरमाहुः—विहितस्येति ॥ वचनादिति ॥ तृतीयाध्याये कर्मविपाकपूर्वकपातकपरिगणनप्रकरणे (श्लो० १३) याज्ञवल्क्यवचनादित्यर्थः ॥ मनुरपि (अ० ११ श्लो० ४४) अकुर्वन्विहितं कर्म निन्दितं च समाचरन् ॥ प्रसक्तश्चेन्द्रियार्थेषु प्रायश्चित्तीयते नरः ॥ अत्र इति ॥ द्वितीयभागे प्रथमखण्डखण्डनादिस्थले ॥

एवं च भावनगराधिपमान्यनागरनगरनिवासं खण्डनमण्डनौदीच्यं संसारकूपपतनहेतून्निःसरणप्रतिबन्धकांश्च कुर्वाणेन स्वनिःसरणस्यापि दुर्विभाव्यत्वात् प्रज्ञाविरहिणां संसारकूपान्निःसारणं दूरापास्तम् ॥ 'स्वयमसिद्धः कथं परान् साधयेत्' इति न्यायात् ॥ किंच श्रीवल्लभसिद्धान्तखण्डनाय संतोपरामनामकस्य प्रार्थनमुपशमशीलानां प्रवृत्तिश्चेति द्वयमपि स्वरूपहानिकरम् ॥ श्रीवल्लभसिद्धान्तस्य वज्रदृढत्वाच्च ॥

एवं वृथाप्रशंसां दूषयित्वा प्रस्तावनायां [1]एवमनेकेत्यादिना रचयामासुरित्यन्तेन दर्शितं ग्रन्थकरणे हेतुं सप्रशंसं दूषयन्ति—एवंचभावनगरेत्यादिना दृढत्वाच्चेत्यन्तेन ॥ अत्र प्रस्तावनायां 'अनेकप्रतिद्वन्द्वी'त्यादिप्रथमविशेषणेन निर्वैरत्वाभयदानोपशमशीलत्वादिभ्यः सम्यक्तिलाञ्जलिरदायि ॥ सौराष्ट्रदेशे नगरविशेषे तीर्थस्थानास्पदे भावनगरे धनिकाश्रयफलकनिवासस्य वर्णनेन धारणोतीर्थयात्रापि साध्वी समर्थिता मूले ॥ नागरनगरेति ॥ नागरसंबन्धि तदधिष्ठितं यन्नगरमित्यर्थः ॥ पतनेत्यादि ॥

---

१ एवमनेकप्रतिद्वंद्विविद्वदनुभूतप्रौढप्रतापाः प्रत्यक्कुम्भस्थतीर्थयात्राप्रसङ्गेन सौराष्ट्रभूभागं भूषयन्तोभावनगरक्षितिमानिमान्येन वेदशिखरनिहितनिष्ठेन चमत्कारनगरनिवासिनागरगृहस्थविप्रेण सन्तोषरामनामकेन श्रीवल्लभसिद्धान्तखण्डनपूर्वकाद्वैतसिद्धान्तमण्डनाय प्रार्थितारसन्तः स्वयमुपशमशीला अपि प्रज्ञाविरहिणां संसारकूपाद्वादैर्निःसारणं स्वधर्मं जानन्तस्समवलोक्य तदीयाणुभाष्यविद्वन्मण्डनशुद्धाद्वैतमार्तण्डादीन् ग्रंथान् परार्थमेव धृतवीतरोषाः श्रुतिस्मृत्यविरुद्धानेकप्रौढोक्तिभिः प्रथमतः शुद्धाद्वैतमार्तण्डमनन्तरंविद्वन्मण्डनं सटीकं राम्ययन्तःसहस्राक्षनामकमपूर्वनिरन्धमिमं रचयामासुः ॥

नगरनिवाससरण्डनमण्डनादीनां पतनहेतुत्वं निस्सरणप्रतिबन्धकत्वं चोपन्यस्तचराद्यनेकप्रमाणसिद्धमेव ॥ क्षुर्वाणेनेति ॥ अस्य निस्सरणमित्यग्रिमे कर्तृतयान्वयः उभयप्राप्तौ कर्मणीत्यनेन विरहिणामिति कर्मणि षष्ठीसत्त्वात् कर्तरि तृतीया ॥ गवां दोहो गोपेनेत्यादिवत् ॥ स्वरूपहानिकरमिति ॥ राज्याधिकारे नियुक्तानां कस्मिंश्चिदपि धर्मे द्वेषस्यायोग्यत्वादुपनिपतितस्य च सर्वथा तदसंभवाद्यथमस्य स्वरूपहानिः ॥ 'लोभः प्रवृत्तिरारंभ' इति स्मृत्या प्रवृत्तेरजःकार्यत्वाद्रजसा सत्त्वोपमर्दनिश्चयेनोपशमभङ्गापत्तेर्द्वितीयस्य सा ॥ न च परोपकाराय खण्डनाद्यारंभो नानुचित इति वाच्यम् ॥ माधवेन "हिंसाचरणं नाम हिंसाननुष्ठानमात्रं न पुनरपकारेषु प्रवृत्तिः, 'हिंसानुग्रहयोरनारंभ इति गौतमस्मरणात्'' इत्युक्तेः ॥ (अ० ३ यतिधर्मप्रकरणे श्लो० ३) 'सर्वभूतहितः शान्त' इत्यत्र विज्ञानेश्वरेणापि तथैव विवरणाच्च ॥ नारंभानारभेत् क्वचिद्' इत्यादिप्रतिषेधदर्शनाच्च ॥ अपि च (अ० ६ श्लो० ४४) 'कपालं वृक्षमूलानि कुचेलमसहायता ॥ समता चैव सर्वस्मिन्नेतन्मुक्तस्यलक्षणम्' इति मन्वाद्युक्तलक्षणाभावादुपशमशीलत्वादिकथनमुपचारमूलकमेव ॥ (अ० ६ श्लो० ६६) 'न लिङ्गं धर्मकारणम्' इति मनुना केवलवेशस्यासाधकत्वस्मरणादकृतपुरुषे दण्डवादित्वेहाविशिष्टत्वादिधर्मदर्शनेन मनुदक्षादिस्मृतवाग्दण्डाद्यान्तरधर्माभावनिश्चयाच्च ॥ वाग्दण्डादिस्वरूपं तु दक्षेणोक्तम्—'वाग्दण्डे मौनमातिष्ठेत् कर्मदण्डेत्वऽनीहताम् ॥ मानसस्य तु दण्डस्य प्राणायामो विधीयते' इति ॥ वज्रदृढत्वादिति ॥ वज्र इव दृढत्वात् ॥ 'उपमानानिसामान्यवचनै'रिति समासः तथा चाशक्यार्थप्रार्थना । तत्र प्रवृत्तिश्चायोग्यैवेति भावः ॥ ग्रन्थस्य खण्डनाभासरूपत्वन्तु प्रागुक्तम् ॥ दर्शयिष्यते च तथा—

श्रीवल्लभमतानुयायिनो मथुरादासवर्म्मण एतादृशग्रन्थप्रसिद्धिकर्तृत्वमपि तन्मताननुयायित्वमेव व्यनक्ति ॥ प्रचुरकालातिक्रमणेनाप्यनुन्मूलनीयमूलत्वं प्रचण्डवातातपैरप्यलोपनीयलावण्यत्वं सकललोकलोचनानन्दजनकत्वमित्यादिभिरारोप्यमाणगुणैः परैस्तोष्टूयमानोऽपि स्मरणस्तम्भत्वेनाभिमतोऽप्येकेनैव श्रीवल्लभवंश्येन परीक्षणार्थं हसता मन्दं स्पृष्ट एव कीटाकीर्णविशीर्णजीर्णतरस्थूणेव स्वल्पकालेनाप्युन्मूलनीयमूलत्वं फूत्कारेणाप्यपलोपनीयलावण्यत्वमारोपयितृणामपि पश्चात्तापाद्यनेकदुःखोत्पादकत्वं सर्वजनोपेक्षणीयत्वमित्यादीन्साहजिकान्गुणान्प्रदर्शयन् स्तोतॄंश्च ह्रेपयञ्छतधा भिद्यमानो निपपातेति ॥ तच्च श्रुतिस्मृत्युक्तसंन्यासाश्रमधर्मप्रतिपालनरहितस्य तद्विपिद्धाचरणशीलस्य केवलं शिखासूत्रवर्जनकाषायवस्त्रपरिधानाभ्यामेव मस्करित्वेन प्रतीयमानस्य न लज्जाकरमस्ति ॥ प्रत्युत आपातालतलप्ररूढमूलसकललोकव्याप्तप्रकाण्डश्रीवल्लभसिद्धान्तशाखिप्रबलप्रभञ्जनाहतः शङ्करसिद्धान्तानभिज्ञो गजम्मन्यो मशकः कान्दिशीकः स सहस्राक्षसहितः क्वचिल्लीनोवा गतोवा प्रमीतो वेति तस्य वृत्तं नोपलभामहे ॥

एवं प्रस्तावनायां मुख्यांश्चतुरोऽपि विषयान्निराकृत्य तत्र सच श्रीवल्लभार्येत्यादिना परमात्मानमित्यन्तेन वर्णितं मुद्रणकारणादिकं परिहरन्ति—श्रीवल्लभमते-त्यादिना नोपलभामह इत्यन्तेन । तोष्टूयमान इति ॥ अतिशयेन पौनःपुन्येन वा स्तूयमानः ॥ स्तौतेर्यङन्तात्कर्मणि लटः शानचि शित्वेन सार्वधातुकत्वाद्यकि स्थानेमुगिति मुगागमे च सिद्धम् ॥ श्रीवल्लभवंश्येनेति ॥ श्रीवल्लभस्य वंशभवेन ॥ दिगादि-त्वाद्यत् यस्तु 'श्रीवल्लभवंशीया' इति प्रस्तावनायां प्रयोगः स चिन्त्यः ॥ अवृद्धत्वेन 'वृद्धाच्छ'इत्यस्याप्राप्तेः ॥ दिगादिषु वंशशब्दपाठं निश्चितमप्यनादृत्य बलाद्गहादिषु तत्पाठकल्पनस्यागतिकगतित्वात्; 'सख्यावंश्येने'त्यादिविरुद्धनिर्देशोपलम्भात्, देव-दत्तादिवद्वंशशब्दस्य नामधेयत्वाभावाच्च ॥ परीक्षणार्थमिति ॥ वर्ण्यमानगुणकोऽय-मस्ति न वेति परीक्षणार्थम् ॥ 'मन्द'मिति स्पर्शक्रियाविशेषणम् ॥ स्थूणा स्तंभः ॥ स्रोद्दन् ॥ प्रस्तावनाकारादीन् लज्जयन् ॥ निपपातेति ॥ अन्यस्य प्रत्यक्षत्वेऽपि तद्विष्ट-निपतनक्रियाया अनायासजन्यत्वादननुसन्धानेन पारोक्ष्याल्लिट् ॥ अत एव भाष्ये "कस्मिन् पुनः परोक्षे लिड्भवति" इत्यादिना परोक्षविचारे "परोक्षे धातौ परोक्षे धात्वर्थ इति कः पुनर्धात्वर्थः क्रिया क्रियायां परोक्षायामिति" व्याख्याय क्रियापारोक्ष्ये मतान्तराण्युक्त्वा तेषूत्तमपुरुषासिद्धिं स्वमते सुप्तादिव्यापारे तत्सिद्धिं च दर्शयित्वोच्यते "अथ भवति वै कश्चिज्जाग्रदपि वर्तमानकालं नोपलभते ॥ तद्यथा—वैयाकरणानां शाकटायनो राजमार्गे आसीनः शकटसार्थं यान्तं नोपलेभे । किं पुनः कारणम्? कश्चिज्जाग्रदपि वर्तमानं कालं नोपलभते ॥ मनसा प्रयुक्तानीन्द्रियाण्युपलब्धौ कारणानि

---

१ सत्यश्रीवल्लभार्यमतानुयायिना सर्वश्रेयोभिलाषिणा भक्तिराजेन लवजितनूजन्मना मथुरादासवर्मणा शैरनयेननन्देनिशाकरप्रमितविक्रमवर्षान्तर्गतोर्जमासवलक्षपक्षचतुर्दशीसमासा-दितनिलिंपनिलयवासायालाडकँवाईसमाख्यायानिजाङ्गजाया प्रचुरकालातिक्रमणेनाप्यनुन्मू-लनीयमूल प्रचण्डवातवर्षातपैरप्यलोपनीयलावण्यस्सकललोकलोचनानन्दजनकः योपि स्मर-णस्तम्भइवायमनेकद्वैतमतान्धकारसभ्रान्तहृग्भ्योजनेभ्य सन्मार्गावबोधप्रदानप्रवीणो मयाङ्क-यित्वा प्रसिद्धिं नीत ॥ विलोक्यैमं निबन्धं सम्भूय सर्वेपि श्रीपल्लभवशीयास्स्वकीयसिद्धान्ता-नुसारेण तत्खण्डनाय बद्धपरिकरा भवितारइति महतीमाशां मन्मनसि स्थापयामि ॥ हन्ताय-मसन्तोषोयत् येपि ते वीणावेणुमृदङ्गाद्यनेकवाद्यवादनगीतपिपासासङ्गीतमेव समारम्भं मन्यमाना. प्रबलेन शङ्करसिद्धान्तसिन्धुरेणामूलतउन्मूलितं स्वसिद्धान्तशाखिनं दृष्ट्वापि न पश्यन्तीति ॥ हा हतं निगमागमोक्तम्यधर्मपालनप्रीतिस्वकीयसिद्धान्तदृढीकरणबद्धपरिकरता-व्यासपूत्रभाष्यकरणशक्तिमत्ताशमदमतितिक्षोपरतिश्रद्धान्यताप्रभृतिनिष्ठतायाराचार्याणां चिरवि-रहिणां केवलमाचार्यकुलउत्पत्तितएवाचार्यपदाभिमानमुद्वहतां तेषां नैतत्किञ्चिदपि प्रयास्यम-स्ति ॥ तद्दयामयारमाऽनवरतनिखिलजगज्जनहितपरायणस्सर्वेशाभिमानीश्वरसौम्यसन्मार्ग-दर्शिनीं दृशं प्रयच्छतादिति प्रार्थये परात्मानम्—'जयत्यद्वैतार्यासमरसुधासाराश्रयसमा-श्रिताद्वैताभासाऽपरगततमश्चण्डकिरणः ॥ यशोदेहेनास्मिन् जगति सततं गुम्फितगुणो विपश्चिद्वर्यास्ते यतिवरसदानन्दगिरयः' ॥

भवन्ति मनसोऽसांनिध्यात्" इति ॥ अत्र कैयट —"केचिदिति मतभेददर्शनाया- नेकदर्शनोपन्यासः ॥ इन्द्रियागोचरसाधनसाधितानद्यतनक्रियावाचिनस्तु धातोर्लिट्- प्रत्यय." इत्याद्युक्त्वा "असांनिध्यादिति । विषयान्तरेणाकृष्टत्वान्मदाद्यभिभवाद्वेति भाव'" इति व्याचष्टे ॥ भाष्ये वर्तमानकालमिति वर्तमानकालं वस्त्विति विवरणकारः ॥ तथा चात्र स्तम्भे परैरारोपितेषु गुणेषु तत्परीक्षणे च चित्तस्याभिनिवेशादयत्नसिद्धं तत्पतनं वर्तमानकालमपि नानुसहितमिति भाव' ॥ नचैवं मत्ततापत्तिः शक्या, शाकटायनादिवत्तदभावोपपत्तेः ॥ अत एव विवरणे "वैयाकरणानां शाकटायन इत्यनेन तस्यामत्ततोक्ताऽन्यचित्तता च भाष्य" इत्युक्तम् ॥ इति दिक् ॥ निपपातेति निशब्देन पुनरारोपणस्याशक्यत्व बोध्यते ॥ शिखासूत्रेत्यादि ॥ तथा च पराशरमाधवीये पद्मपुराणे ॥ 'शिखायज्ञोपवीतेन त्यक्तेनासौ कथं द्विज' इति ॥ तत्रैवात्रि. —'यज्ञोपवीतं सर्वेषां द्विजानां मुक्तिसाधनम् ॥ परित्यजन्ति ये मोहात्सरा निरयगामिन' इति ॥ हारीतः चत्वारोऽप्याश्रमा ह्येते सन्ध्यावन्दनवर्जिताः ॥ ब्राह्मण्यादेव हीयन्ते यदप्युपगतं बुधै' रिति ॥ यच्छाखविद्भिरुपगत तेनापि वर्जिता हीयन्त एवेति तद्व्याख्यातार ॥ अथ सन्ति शास्त्रोक्तधर्मानुष्ठायिनां विदुषां परमहंसानामेव पाक्षिकतत्त्यागवचनान्यपि, परन्तु विहिताननुष्ठायिन प्रतिसिद्धसेविनो वेषमात्रेण तु नकार्यसिद्धिरिति सर्वसम्मतम् ॥ दण्डाभावान्नमस्कारित्वमप्यौपचारिकमेव ॥ कान्दिशीकः भयात्पलायित', 'कान्दिशी- को भयद्रुत' इत्यमर ॥ स. सदानन्दगिरि. ॥ शिष्टं सर्वमतिरोहितार्थम् ॥ यत्तु प्रस्तावनाया 'वीणावेणुमृदङ्गे'त्यादिना वीणावादनादेरनौचित्यं बोधितं, तदसत्,— भगवद्गुणविशिष्टसगीते भगवत्प्रीत्यर्थं तदग्रे भक्त्या वीणादिवादने च दोषाभावात् ॥ प्रत्युत तस्य भगवत्प्रीतिसंपादकत्वात् ॥ अतएव पाद्मे कार्तिकमाहात्म्यपञ्चमाध्याये पृथुं प्रति नारद — 'तालवेणुमृदङ्गादिध्वनियुक्तान् सनर्तकान् ॥ पुष्पैर्गन्धैः सताम्बूलैर्गाय- कानपि चार्चयेत् ॥ १९ ॥ देवालये गीतपरा यतस्ते विष्णुमूर्तयः ॥ तपांसि यज्ञदानानि कृतादिषु जगद्गुरो. ॥ २० ॥ तुष्टिदानि कलौ यस्माद्भक्त्या गानं प्रशस्यते ॥ क्व त्वं वससि देवेश मया पृष्टस्तु पार्थिव ॥ २१ ॥ विष्णुरेवं तदा प्राह मद्भक्तिपरितोषित. ॥ नाहं वसामि वैकुण्ठे योगिनां हृदये रवौ ॥ २२ ॥ मद्भक्ता यत्र गायन्ति तत्र तिष्ठामि नारद' तथा 'मत्पुराणकथा श्रुत्वा मद्भक्तानां च गायनम् ॥ २४ ॥ निन्दंति ये नरा मूढास्ते मद्द्वेष्या भवन्ति हि' ॥ नचास्य शूद्रमात्रपरत्वं शक्यम् ॥ तैत्तिरीयब्राह्मणे तृतीयकाण्ड- नवमप्रपाठके (अनु० १२) "ब्राह्मणौ वीणागाथिनौ गायतः श्रिया वा एतद्रूपं यद्वी- णा श्रियमेवास्मिन्तद्धत्त" इत्यादिना "दिवा ब्राह्मणो गायेत् नक्तम्राजन्य." इति ब्रह्मक्षत्रयोरपि गानविधानात् ॥ यावदनुवाकसमाप्तितत्फलाम्नानाच्च ॥ याज्ञवल्क्योऽपि तृतीयाध्यायेऽध्यात्मप्रकरणे (श्लो० ६०) 'वीणावादनतत्त्वज्ञः श्रुतिजातिविशारद ॥ तालज्ञश्चाप्रयासेन मोक्षमार्गं निगच्छती' ति मोक्षसाधनत्व तस्याह ॥ अष्टमस्कन्धादा- वपि 'अत्यद्भुतं तच्चरितं सुमङ्गलं गायन्त आनन्द समुद्रमग्ना' इत्यादिना भगवत्संबधि- तद्गानेकत्र प्रशस्यते ॥ न च 'गायन्त' इत्यस्य कथयन्त इत्यर्थः कल्प्य' ॥ 'नामान्य-

मन्तस्य यशोङ्कितानि यच्छृण्वन्ति गायन्ति गृणन्ति साधव' इत्यादिषु स्पष्ट भेदेन निर्देशात् ॥ कूर्मपुराणेऽपि सप्तचत्वारिंशाध्याये हरिवर्षवर्णने 'गायति चैव नृत्यन्ती' त्यादिना विष्णोर्गानप्रियत्व दर्शितम् ॥ विस्तरस्त्वन्यत्र द्रष्टव्य ॥

॥ इति प्रस्तावनाखण्डनम् ॥

अथ प्राप्तावसरः सहस्राक्षः खण्ड्यते ॥

श्रीमद्बालमुकुन्दमिन्दुवदन वृन्दावनानन्दित
वन्दे सुन्दरमेकमेव न पराञ्चिन्दामि वृन्दारकान् ॥
वर्तन्तामचिरन्तनादिविपदोनन्ता अनन्तातले
मन्तु ते गणयन्तु माऽयमितरान् मूर्धा न नतु क्षम ॥ १ ॥

एव तदनुयायिना कृता प्रस्तावना बाध्यसामान्यचिन्तया दूषयित्वा साक्षात्कृत सहस्राक्षग्रन्थ दूषयितुमुपक्रमन्ते ॥ **अथेति** ॥ अथ सूचीकटाहन्यायेन प्रस्तावनाखण्डनानन्तरमवसरसगत्या सहस्राक्ष खण्ड्यते ॥ सगतिस्तु अनन्तराभिधानप्रयोजकाकाङ्क्षाजनकज्ञानविषयोर्थ इति दीधितिकारादय ॥ वस्तुविशेषस्य वस्तुविशेषानन्तर निरूपणे प्रयोजिका या जिज्ञासा तज्जनक तत्स्वरूपोपयोगि यज्ज्ञान तद्विषयोऽर्थ इत्यर्थ ॥ अवसरश्च सगतिविशेष ॥ 'सप्रसगउपोद्घातो हेतुताऽवसरस्तथा ॥ निर्वाहकैक्यकार्यैक्ये षोढासगतयोमता' इत्युक्ते ॥ वस्तुवस्तु परिगणन प्रायिकमाक्षेपादीना सगत्यन्तराणामुपलब्धेरित्याद्यन्यत्र द्रष्टव्यम् ॥ तत्राऽवसरो नाम प्रतिबन्धकीभूतजिज्ञासानिवृत्ताववश्य वक्तव्यत्वम् ॥ 'अथ' शब्दश्चात्र साक्षाद्ग्रन्थखण्डनारम्भे पुनर्मङ्गलार्थ ॥ 'ॐकारश्चाथशब्दश्च द्वावेतौ ब्रह्मण पुरा ॥ कण्ठ भित्त्वा विनिर्यातौ तस्मान्माङ्गलिकावुभा' विति "अथ वर्णसमाम्नाय " इत्यत्रत्य त्रिभाष्यरत्नाद्यावुदाहृतशिक्षाकारवचनात् ॥ नच तस्यानन्तर्यार्थकत्वेन व्याख्यातत्वान्न मगलार्थकत्व सकृदुच्चरित शब्द सकृदर्थं गमयतीति व्युत्पत्तेरिति शङ्क्यम् ॥ सगीतोपकारार्थं कृतनापि मृदङ्गध्वनिनेव इतरार्थकतया प्रयुक्तेनानेनापि मङ्गलसिद्धिसभवात् ॥ अव्ययतत्त्वबोधिन्यादिषु "निपातस्तु स्वरूपेणैव मङ्गल मृदङ्गध्वनिवत्" इत्यङ्गीकारात् ॥ "सिद्धे शब्दार्थसबन्ध वृद्धिरादैच्" इत्यादाय न्यार्थकैरपि सिद्धवृद्ध्यादिशब्दैर्मङ्गलसिद्धेर्महाभाष्यादौ दर्शितत्वाच्च ॥ मङ्गलप्रयोजन तु तत्रैव पस्पशाह्निकवृध्याह्निकयोरुक्तम् "मङ्गलादीनि हि शास्त्राणि प्रथन्ते वीरपुरुषकाणि च भवन्त्यायुष्मत्पुरुषकाणि चाध्येतारश्च सिद्धार्था यथा स्यु रिति वृद्धियुक्ता यथास्युरिति" एतदेव प्रयोजन साधयितु पूर्वोत्तरमीमांसापातञ्जलयोगादिसूत्रप्रणेतृजैमिनिश्रीमदाचार्यश्रीव्यासाचार्यादिप्रणीततत्तद्भाष्यवच्चाथशब्देनैव साक्षाद्ग्रन्थखण्डनारम्भे पुनर्मङ्गलमाचरितम् ॥ भूयो मङ्गल तु प्रागेव कृतमापरिसमाप्तिविघ्नपरिहारार्थं भविष्यति ॥

तत्रादौ 'ओं तत्सत्' इत्यारभ्य 'विष्णो स्मृत्या च मङ्गलम्' इत्यन्तग्रन्थेन श्रीशङ्कराचार्यनमस्कारपूर्वक वैष्णवसम्प्रदायप्रवर्तकाचार्याणा तन्मतवर्तिना च दासत्व कीर्तयाप्यबोधितलक्षणसत्त्वेन

प्रतिपादितम् ॥ तत्र शङ्कराचार्याणां शिवावतारत्वेऽपि तदुक्तकौर्मवचनानि तु शिवविषयाण्येव ॥ तेषामवतारप्रयोजनं तु पाद्मवाराहादिषु प्रसिद्धमित्यन्यत्र विस्तरः ॥

अथ सहस्राक्षकृता भगवदनुयायिनोऽपार्थाभिधानरहितानजय्यानपि जिगीषता स्वग्रन्थपूर्वभागे दुःशासनप्रधानाः कौरवाक्षौहिणीकल्पा एकादश श्लोकाः प्राणायिषत ॥ व्यवरिषत च स्वयमेव ॥ तत्राद्यं पद्यं सव्याख्यानं खण्डयितुं तत्तात्पर्यकथनमुखेन गृह्णन्ति—तत्रादाविति ॥ सहस्राक्षे ॐमित्यादिपदत्रयेणेत्यादि उपपादयिष्यत इत्यन्तं भागमेकहेलया निराकुर्वन्ति—तत्रशङ्कराचार्याणामित्यादिना विस्तरइत्यन्तेन ॥ अयमत्राशयः—तदीयश्लोकारम्भे ॐतत्सदिति पदत्रयं क्रियापदाभावाद्गौरश्वः पुरुषो हस्ती शकुनिर्मृगो ब्राह्मण इत्यादिवदाकाङ्क्षानुपशमादप्रमाणमेव ॥

सहस्राक्ष.

१.श्रीगणेशाय नमः ॥ ओं तत्सत्स्वनिषेवितिष्यमलहृच्छ्रीशंकरं देशिकं न्याय्यश्रौतमतस्य शिष्यसहितं नत्वा पुरा ब्राह्मणैः ॥ शश्वद्विप्रकुलोद्भवैः श्रुतिपथादुष्टार्थबोधैर्नरमाप्रच्याविषतेति तान्प्रति मया ज्ञाप्यः सहस्रेक्षणः ॥ १ ॥ ओमित्यादिपदत्रयेण ब्रह्म निर्दिश्यते ॥ 'ओंतत्सदिति निर्देशो ब्रह्मणस्त्रिविधस्स्मृत' इति भगवदुक्तेः ॥ १ ॥ श्रीशङ्कराचार्यस्य स्वभक्तकलिमलहर्तृत्वं श्रौतधर्मोपदेष्टृत्वं च कौर्मे पूर्वखण्डे त्रिंशेऽध्याये वर्णितम् ॥ तथा हि—'करिष्यत्यवताराणि शंकरो नीललोहितः ॥ श्रौतस्मार्तप्रतिष्ठार्थं भक्तानां हितकाम्यया ॥ १ ॥ उपदेक्ष्यति तज्ज्ञानं शिष्याणां ब्रह्मसंज्ञितम् ॥ सर्ववेदान्तसारं हि धर्मान्वेदनिदर्शनान् ॥२॥ ये तं प्रीत्या निषेवन्ते येनकेनोपचारतः ॥ विजित्य कलिजान् दोषान् यान्ति ते परमं पदम् ॥३॥ अनायासेन सुमहत्पुण्यं ये यान्ति मानवाः ॥ अनेकदोषदुष्टस्य कलेरेष 'महान् गुणः' ॥ ४ ॥ इति ॥ करिष्यत्यवताराणीत्यत्राऽवतारशब्दः 'अवेतृस्त्रो'रित्यधिकरणघनन्तः ॥ तेन पुल्लिङ्गनियमो न ॥ अत्र 'इहाऽवतरिता लोके' इत्येवाऽसंदिग्ध शिवमात्राऽवतारबोधकवाक्यप्रयोगे कर्तव्येऽवताराणि करिष्यतीति स्वेतरसाधारणाऽवतारकरणबोधहेतुवाक्यप्रयोगं कुर्वता अवतरन्ति येष्वित्यर्थसूचनात्स्वस्य परेषां चाऽवताराणि करिष्यतीति सूचितम् ॥ तत्र च के त इतर इत्याकांक्षा 'उपदेक्ष्यति तज्ज्ञानं शिष्याणां ब्रह्मसंज्ञित'मिति प्रत्यासन्नेन वाक्येन शाम्यते ॥ एवञ्च शिष्याणामप्यवतारत्वं बोधितम् ॥ एतेन कलीनां बहुत्वेन प्रतिकलि शङ्करावतारसत्त्वेन चावतारबहुत्वसिद्धौ बहुवचनस्य प्रक्षीणशक्तिकतया शिष्याणामवतारत्वे न मानमिति कस्यचिदुक्तिः प्रत्युक्ता ॥ किञ्च चतुर्भिः सह शिष्यैस्तु शङ्करोऽवतरिष्यतीति वायुपुराणमप्यत्र मानम् ॥ तत्र हि शिष्याणामवतारक्रियया साहित्यमुक्तम् ॥ एवं च तच्छिष्याणां सामान्यतोऽवतारत्वे सिद्धे बुद्धाद्युक्तिष्विवेहाऽप्रामाण्ये मानाभावेन तदुक्तीनां व्यासाद्युक्तिवत्प्रामाण्ये शङ्करदिग्विजयादिरूपतदुक्तिभिर्विशिष्य तेषां तत्तदवतारत्वं निश्चेतव्यमिति तेषां सर्वेषामपि कलिमलहर्तृतया नमनीयत्वेन शिष्यसहितमित्युक्तम् ॥ प्रत्यक्षत्वाऽनुमितत्वाभ्यां

यथा वदन्ति—'यद्यदाऽऽकाङ्क्षितं योग्यं सन्निधानं प्रपद्यते ॥ तेन तेनान्वितः स्वार्थः पदैरेवावगम्यते' इति ॥ एतच्च दिनकरभट्टाचार्याः—"स्वार्थाकाङ्क्षितं स्वार्थयोग्यं यद्यत्सन्निधानं प्रपद्यते स्वार्थोपस्थितिविषयो भवति तेन तेनान्वितः स्वार्थः पदैः प्रथममनुभाव्यते, अनन्तरं च महावाक्यार्थबोधः" इति व्याचक्षते ॥ आकाङ्क्षास्वरूपं तु तार्किकाः—'येन पदेन विना यत्पदस्यान्वयाननुभावकत्वं तत्पदविशिष्टत्वं तस्याकाङ्क्षा ॥ क्रियापदं विना कारकपदं नान्वयबोधं जनयति तेन तस्याकाङ्क्षा' इत्याहुः ॥ यच्च एकपदे अपरपदवत्त्वं तत्पदे अपरपदाव्यवहितोत्तरत्वं तच्च प्रकृतिप्रत्यययोरेव संभवति ॥ तेन 'घटम्' इत्यादौ घटपदवैशिष्ट्यमंपद आकाङ्क्षा ॥ क्रियाकारकपदयोस्तु नोत्तरपदत्वनियमः ॥ पचति चैत्रः, चैत्रः, पचतीति वाक्यद्वयादन्वयबोधात् ॥ अतः क्रियाकारकपदानां सन्निधानमासत्त्या चरितार्थमिति वदन्ति ॥ तत्पक्षेपि प्रकृते नमामीत्यादिपदान्तराभावादन्वयाननुभावकत्वदोषस्तदवस्थः ॥ शाब्दिकास्तु—'वाक्यसमयग्राहिका चाकाङ्क्षा ॥ सा च एकपदार्थज्ञाने तदर्थान्वययोग्यार्थस्य यज्ज्ञानं तद्विषयेच्छा अस्यार्थः क इत्येवंरूपा पुरुषनिष्ठैव ॥ तथापि तस्या आकाङ्क्षाविषयेर्थे आरोपः ॥ एतदेवाभिधानापर्यवसानमित्युच्यते ॥ अयमर्थोऽर्थान्तरमाकाङ्क्षत इति व्यवहारात् ॥ पदे तु नारोपः ॥ अर्थबोधोत्तरमेव जिज्ञासोदयात् ॥ समर्थसूत्रे भाष्ये अर्थयोर्व्यपेक्षाकथनाच्च ॥ जिज्ञासोत्थापकं चैकपदार्थेऽपरपदार्थव्यतिरेकप्रयुक्तस्यान्वयबोधाजनकत्वस्य ज्ञानमिति तद्विषये तादृशान्वयबोधाजनकत्वेप्याकाङ्क्षिते व्यवहारः ॥ अन्वयबोधश्च तदाकाङ्क्षितसकलक्रियाकारकादिविषयो विवक्षितः ॥ एतेन तस्य हेतुत्वे खण्डवाक्यार्थबोधोत्तरं महावाक्यार्थबोधो न स्यादित्यपास्तम् ॥ खण्डबोधस्य क्रियातद्विशेषणकारकत-

---

द्विविधया श्रुत्योक्तस्य धर्मस्य पुराणे श्रौतस्मार्तेति भेदेन कीर्तनेऽपि इहाऽभेदविवक्षया श्रौतत्वेनैव कीर्तनं—**श्रौतेति** ॥ ज्ञानमुपदेक्ष्यति उपदेशेन सपादयिष्यति ॥ ब्रह्मसज्ञितं ब्रह्मविषयकं सर्ववेदान्तानां सारं फलम् ॥ यद्वा ब्रह्मसंज्ञितं ब्रह्माऽऽख्यम् ॥ सर्ववेदान्तसारं, सर्ववेदान्ततात्पर्यविषयभूतम् ॥ ज्ञानं चिद्रूपम् । उपदेक्ष्यति वर्णयिष्यति ॥ 'धर्मान्वेदनिदर्शनानि'त्यत्रोपदेक्ष्यतीत्यनुवर्त्य पृथग्वाक्यता ज्ञेया ॥ निदर्श्यन्तेऽनेनेति निदर्शनम् ॥ वेदो निदर्शनं येषां ते वेदनिदर्शनाः, वेदप्रमाणकास्तानित्यर्थः ॥ ननु पुराणे 'विजित्य कलिजान्दोषानि'त्यत्र दोषजयादिकं प्रति सेवकानामेव कर्तृत्वमुक्तं तत्कथं शङ्कराचार्यस्य कलिमलहर्तृत्वमुच्यते इति चेद् वक्ष्यमाणरीत्येश्वरस्य कर्मफलदातृत्वे जीवानां तद्द्वारैव फलाऽऽप्त्येति गृहाण ॥ इदमुपलक्षणं-तेन पुण्यहेतुत्वं तद्द्वारा हितसम्पादकत्वं चाऽनायासेन सुमहदिति 'भव्यानां हितकाम्यये'ति च कौर्मोक्तं बोध्यम् ॥ 'व्याकुर्वन्व्याससूत्राऽर्थं श्रुतेरर्थं यथोचिवान् ॥ श्रुतेर्न्याय्यः स एवाऽर्थः शङ्करः सवितानन' इति शिवपुराणवाक्यमवष्टभ्याह—**न्यायेति** ॥ वितानतो व्याख्याता ॥ क्वचित् 'सवितानना' इति पाठः, तत्र न नेतास्य नरो नेत्यर्थः ॥ न्यायादनपेतो न्याय्यः ॥ न्यायो युक्तिस्तत्सहितस्तदविरुद्धश्चेति निष्कर्षः ॥ श्रौतेऽर्थे श्रुतेरपेक्षोत्तरभागे षोडशखण्डखण्डनावसरे उपपादयिष्यते ॥ २ ॥

द्विशेषणैतदन्यतरमात्रविषयकत्वात् किंच उक्तस्यान्वयबोधाजनकत्वज्ञानस्य समभिव्याहारकारणताज्ञानमूलकत्वात्साप्याकाङ्क्षा ॥ अतः ससमभिव्याहारस्यादशतादृशान्वयबोधजनक इति ज्ञानं कारणं तदजानतामबोधाच्च ॥ ससमभिव्याहारस्तत्तदन्वयबोधजनक इत्ययमेव वाक्यविषये ऐश्वरः समयस्तत्परिपाटिका च मीमांसा' इत्याद्याहुः ॥ तेन तन्मतेऽप्यसमभिव्याहृतक्रियापदकं साकाङ्क्षार्थमेतद्वाक्यमबोधकमेव ॥ अन्यथा दश 'दाडिमानि षडपूपा' इत्यादिकमपि प्रमाणं स्यात् ॥ नन्वनन्वितार्थमपि पदत्रयं मङ्गलार्थमुच्यत इति चेत्—नहि मङ्गलार्थत्वमात्रेण पूर्वोक्तदोषनिस्तारः ॥ अत एव 'ॐकारश्चाथशब्दश्चे'ति स्मृत्योंकारसमानयोगक्षेमस्याप्यथशब्दस्यान्यार्थमृदङ्गादिध्वनिवच्छ्रवणमात्रेण मङ्गलसिद्धिमभिप्रेत्य तस्यार्थान्तरं तद्घटितवाक्येऽन्वयश्चादर्शि शारीरकभाष्ये जिज्ञासासूत्रे शङ्कराचार्यैः ॥ तथाप्यपि प्रामाण्यसिद्ध्ये तदन्वययोग्यं किमपि वक्तव्यम् ॥ अन्यथा तत्रापि केवलमङ्गलार्थक एव 'अथ' शब्दोऽनन्वितः स्वीक्रियताम् ॥ कृत तस्यार्थान्तरपरत्वकल्पनया ॥ अथ प्रथमतरेऽप्यस्मिन्वाक्ये ओमादिपदवाच्यं नमामि स्मरामीत्यध्याहारेण पूरणं तु प्रथमग्रासे मक्षिकापातः ॥ द्वारमित्यादौ पिधेहीत्यादेरिव नमामीत्यादेः शीघ्रोपस्थितिकत्वाभावोऽपि प्रचुरव्यवहारविरहाद्द्रष्टव्यः ॥ न च समासादि कल्प्यम्, स्वयमव्याख्यानेन तथाभिप्रायाभावनिश्चयात् ॥ स्वशब्दपरामृष्टद्वयव्यक्तिविशेषेऽन्वयायोगाच्चेत्यलम् ॥ अपि च गीताभाष्ये ब्रह्मशब्दोऽक्षरपरः प्रतीयते, प्रणवस्याक्षरवाचकत्वात् ॥ माण्डूक्ये "ॐमित्येतदक्षर" इति श्रावणात् ॥ कठवल्लीष्वपि "तत्ते पद संग्रहेण ब्रवीम्योमित्येतत्" इति स्फुट धामवाचकताबोधनात् ॥ अग्रेऽपि "एतद्ध्येवाक्षर ब्रह्म ॥ एतदालम्बनं श्रेष्ठं" इति तथैव प्रपञ्चनात् ॥ द्वादशस्कन्धेऽपि ॥ स्वधाम्नो ब्रह्मण साक्षाद्वाचकः परमात्मन इत्युपबृंहणाच्च ॥ तेन ततः परस्य तत्र रममाणस्य स्मरणलक्षणे मूलस्थमङ्गल एतदपेक्षयोत्कर्षः स्वतः सिद्ध इति ध्येयम् ॥ यच्च कौर्मगाथयावलम्बेन शङ्कराचार्याणा शिवावतारत्वादिकमुक्त तत्र तेषां तदवतारत्वं त्वस्माकमभिमतमेव ॥ पर त्वदुक्तवचनविषये तु वदामः ॥ कौर्मब्रह्माण्डसूतसंहितादिषु द्राविडकेरलशैवैर्भूय एव प्रक्षिप्तमिति विद्वत्किंवदन्तीसत्त्वात्, सम्प्रदायान्तरग्रन्थेष्वपि तस्या उज्जीवनाभावात्तावदेतेषा समूलत्व एव सन्देह. ॥ अत एव तान्त्रकोपि न कोपि प्रामाणिक एतान्युदाहार्षीत् ॥ यदीदं समूलमेवमर्थपरचाभविष्यत्कथं तर्हि माधवादयो दिग्विजयादौ नोदाहरिष्यन् ॥ तथापि त्वयैव नास्माभिरंहोरहोभयादार्पितया व्यवह्रियमाणे वस्तुनि सहसा प्रक्षिप्तत्वं शक्यवचनमत सति समूलत्वे समादधाम· ॥ करिष्यत्यवताराणीत्यादिवचासि तु न शङ्कराचार्यविषयाणि ॥ तेषामेकत्वेन अत्रावताराणीति बहुवचनेन चातत्परत्वप्रतीते ॥ न च शङ्करपदोपादानमात्रात्तत्परत्वं शङ्क्यम् ॥ तस्मिन्पुराणे (अध्याय १०) अव्ययानि दशैतानि नित्यं तिष्ठन्ति शङ्करे (अध्याय ७) निशम्य भगवान् वाक्य शङ्करो धर्मवाहन· ॥ एवमादिष्वनेकत्र देवाभिप्रायेणैव शङ्करशब्दाभ्यासदर्शनात् ॥ किञ्चात्र शङ्करपदमवतारपरमवतारिपरं वा ॥ नाद्य· ॥ तस्मिन्नीललोहितत्वाप्रसिद्धेः ॥ शङ्कराचार्याणामनेकावतार-

कर्तृत्वापत्त्या तेषामवतारत्वासिद्धिप्रसक्तेश्च ॥ द्वितीयश्चेदों कुर्मः ॥ तथा सति तत्पुराणप्रसिद्धा रुद्रशुकसांबादयः शिवावतारा एवाऽत्रावतारपदेन गृह्येरन् ॥ एकग्रन्थावगतत्वात् ॥ न तु शङ्कराचार्याः ॥ एकत्वेन बहुवचनविरोधात् ॥ अमुकस्मिन्देशे काले च अमुको नाम भविष्यतीति निर्देशाऽभावाच्च ॥ रुद्रादीनां शिवावतारत्वं तु यथा तत्रैव सप्तमाध्याये ॥ भ्रूकुटीकुटिलात्तस्य ललाटात्परमेष्ठिनः ॥ समुत्पन्नो महादेवः शरण्यो नीललोहित इत्याद्युक्त्वोच्यते ॥ निशम्य भगवान् वाक्यं शङ्करो धर्मवाहनः ॥ स्वात्मना सदृशान् रुद्रान् ससर्ज मनसा शिवः ॥ कपर्दिनो निरातङ्कांस्त्रिनेत्रान् नीललोहितानिति ॥ एकादशाध्याये च स्वात्मना सदृशान् रुद्रान् ससर्ज मनसा शिवः ॥ कपर्दिनो निरातङ्कान् नीलकण्ठान् पिनाकिनः ॥ त्रिशूलहस्तान् उद्रिक्तान् महावृषभवाहनान् ॥ वीतरागांश्च सर्वज्ञान् कोटिकोटिशतान् प्रभुरिति ॥ तथा एकोनविंशाध्याये–द्वैपायनाच्छुको जज्ञे भगवानेव शङ्करः ॥ अंशांशेनावतीर्योर्व्यां संप्राप परमं पदमिति ॥ चतुस्त्रिंशाध्याये च शैवान्व्यासं प्रत्यभिज्ञापयन्तः पैलादयः ॥ यस्य देवो महादेवः साक्षाद्देवः पिनाकधृक् ॥ अंशांशेनाभवत्पुत्रो नाम्ना शुक इति प्रभुरिति ॥ तथा चतुर्विंशाध्यायसमाप्तौ–तत्कृष्णश्च मुनिश्रेष्ठा यथासौ देवकीसुतः ॥ दृष्ट्वा लेभे सुतं रुद्रं तप्त्वा तीव्रं महत्तप इति ॥ ततो विस्तरेण ॥-कथमुक्त्वा सप्तविंशाध्यायारंभे पुनरुदितम् ॥ ततो लब्धवरः कृष्णो जांबवत्यां महेश्वरात् ॥ अजीजनन्महात्मानं सांबमात्मजमुत्तममिति ॥ महेश्वराल्लब्धवर इत्यन्वयः ॥ न च लृडर्थबाधः शङ्क्यः ॥ तस्मिन्पुराणे "व्यत्ययमिच्छति शास्त्रकृदेषां" इत्याश्रित्य क्वचिद्भूतेपि लृटः प्रयोगात् ॥ यथा कलिप्रवृत्त्यनन्तरं युग धर्मान् वदता व्यासेनैकोनत्रिंशे ॥ कृतं त्रेता द्वापरं च सर्वेष्वेतेषु ते नराः ॥ भविष्यन्ति महात्मानो धार्मिकाः सत्यवादिन इत्यत्र भविष्यन्तीति प्रयुक्तम् ॥ मुख्योर्थस्तु वक्ष्यते ॥ यत्तु बहुवचनं सार्थकयितुं अवेतृस्त्रोरित्यधिकरणे घञं स्वीकृत्य प्रयोगसाधुत्वाय पुल्लिङ्गानियम उक्तः स तु पाणिनीयगौनर्दीयसर्वस्वानधिगमादेव ॥ अवेतृस्त्रोरित्यत्र पुंसि संज्ञायामित्यनुवृत्तेस्तत्रापि पुल्लिंगनियमात् घापवादतयापि तत्समानविषयतौचित्यात् अत एव तत्त्वबोधिन्याम् "अवेउपपदेतृस्तृभ्यां करणाधिकरणयोः पुंसि संज्ञायां घञ् स्यात् ॥ घस्यापवादः" इति व्याख्यातम् ॥ ननु पुंसिसंज्ञायां घः प्रायेणेत्यधिकारात् प्रायेणेत्युक्त्या पुंस्त्वानियमः स्यात् ॥ न स्यात् ॥ प्रायेणेत्यस्य प्रधानेन प्रत्ययेनैव सहान्वयस्य भाष्यकृता स्वीकारात् ॥ तथा च गोचरसञ्चरसूत्रे भाष्ये "गोचरादीनां ग्रहणं शक्यमकर्तुम् घञ् कस्मान्न भवति प्रायवचनात् यथाकषः निकष इति प्रायवचनाद्घञ् न भवति" इति ॥ न च प्रायेण पदमावर्त्य प्रायेण पुंसि प्रायेण संज्ञायामिति व्याख्येयम् ॥ आवृत्तौ तत्र तत्र तस्यान्वये च मानाभावात् ॥ न हि प्राञ्चोऽर्वाञ्चो वा केपि तथा व्याचक्षते ॥ अतोऽत्र पुंस्त्वं नियतमेव ॥ सूत्रकृतापि पूर्वोत्तरसूत्रेषु गोचरसञ्चरादीनामुदङ्काऽऽनायान्तानां पुंस्त्वेनैव निर्देशात् वार्तिकोक्ताऽवहारादीनामपि "अवह्रियतेस्मिन्नवहारः" इत्यादिना भाष्ये तथा निर्देशात् ॥ क्वापि लिङ्गान्तरानिर्देशाच्च ॥ अत एव अवस्तारो जवनिकेति प्रकृतसूत्रोदाहरणं सङ्गच्छते ॥ अनियमे तु स जवनिकापर्यायतया दाबन्तो व्यवह्रियेत ॥

प्रायिकत्वे च पुंसीत्यनर्थकमेव स्यात् पाक्षिकपुंस्त्वस्य निर्देशादिनैव सिद्धेः ॥ किंच एतेनैव चेत्यत्र खनतौ चजोः कुघिण्यतोरिति कुत्वाप्राप्त्याऽनन्यार्थकादित्वाज्ज्ञापकादन्यतोऽपि घं स्वीकृत्य भगः पदमित्युदाहृतम् ॥ तत्र तत्त्वबोधिन्याम् "ननु पदमित्यत्र घस्य किं प्रयोजनमिति चेदत्राहुः करणाधिकरणयोः पुंसि संज्ञायामिति यदि घः स्यात्तदापदमिति नपुंसकं न स्यादनेन चेद्घो भवति तदा योरुभयविधेष्टसिद्धिरिति" इत्युच्यते ॥ तेन पूर्वत्र पुंस्त्वं नियतमेवेत्यवगम्यते ॥ एतदपि प्राचामनुरोधेन भगपदयोरुभयोरुदाहरणत्वाभिप्रायम् ॥ नव्यानुरोधाच्च "भगःपदमिति क्वचित्प्रयोगः" इत्याश्रित्य भग इत्यस्यैवोदाहरणत्वेऽभिप्रेयमाणे त्वत्रापि पुंस्त्वमेव नियतम् ॥ "लिङ्गमशिष्यं लोकाश्रयत्वात्" इति तु लिङ्गानुशासनस्यैव प्रत्याख्यानं न त्वष्टाध्यायीस्थानां पुंसीत्याद्यधिकाराणाम् ॥ अन्यथा स्त्रियामित्यादेरभावात्पुंस्यपि टाबादयः स्युः ॥ चतुर्थीतदर्थार्थेति सूत्रे अर्थेन नित्यसमासो विशेष्यलिंगता चेति वार्तिककारोक्तं प्रत्याचक्षाणेन भाष्यकृता "यदप्युच्यते सर्वलिंगता वक्तव्येति ॥ न वक्तव्या लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य" इति कथनादत्र प्राधान्येन लिङ्गमनुशिष्यते परवल्लिङ्गमित्यादौ तदेव प्रत्याख्यायत इति ज्ञायते ॥ तत्त्वबोधिनीकारादयस्तु "लिङ्गानुशासनं प्रत्याख्यानं प्रौढिवादमात्रं अन्यथा व्याकरणस्यैव वैयर्थ्यप्रसङ्गात्" इत्याहुः ॥ तत्प्रत्याख्यानबलाल्लिङ्गानियमविवक्षणे तु भावार्थघञं परित्यज्याधिकरणार्थकघञ्पर्यन्तानुधावनप्रयासोऽप्यनर्थ एव ॥ शेषंपुंवदित्यादिप्रयोगदर्शनेन घञन्तस्य पुंसीत्यस्य प्रायिकतायाः शक्यवचनत्वात् ॥ अधिकरणार्थतदाश्रयणे त्ववतारः कूपादेरित्यादाविव सुतरां पुंस्त्वनियमापत्त्या व्याधिनाशाय भक्षिते लशुने प्रत्युत वृद्धो व्याधिः ॥ अपि च अवतरन्ति येष्विति व्याख्याने कानि तान्यवतारशब्दवाच्यान्यवतरणाधिकरणानीत्याकाङ्क्षानुपशमान्मूलवाक्ये स्वार्थबोधनासामर्थ्यं दोषः ॥ तथा व्याख्यात्रा त्वयाप्यकथितत्वेन तवापि तदनवबोधप्रतीतेश्च ॥ अथ यथाकथंचित्कस्यचिद्विशेष्यतयाऽत्राध्याहारं ब्रूयात्तथापि तेन सहावतारशब्दस्य सञ्ज्ञासंज्ञिभावग्राहकं शास्त्रं शिष्टव्यवहारो वा त्वया दर्शनीयः ॥ सञ्ज्ञायां घञ्विधानात् ॥ न च प्रायेण सञ्ज्ञायामिति वाच्यम् ॥ दत्तोत्तरत्वात् ॥ गुणप्रधानसन्निधौ प्रधानस्य विशेषणनिरूपिताकाङ्क्षावत्त्वे सति गुणे विशेषणान्वयस्यायुक्तत्वेन तथा व्याख्यातुमशक्यत्वात् ॥ उपदेशेऽजिति सूत्रे भाष्ये "नह्युपाधेरुपाधिर्भवति विशेषणस्य वा विशेषणं" इति भाष्यकृता तादृशार्थस्यावहेलनाच्च ॥ इहहि विधेयत्वेन प्रत्ययः प्रधानं तत्रैव प्रायेण पदस्यान्वयः ॥ तत्रैव भाष्यकृत्कैयटाभ्यां हलश्चेतिसूत्रे सञ्ज्ञानुवृत्तेः कण्ठरवोक्ततया अवेत् सूत्रेऽपि तदनुवृत्तिस्तदभिप्रेतैव ॥ एतत्सर्वमुपदेशशब्दार्थविचारे मनोरमाशब्दरत्नयोरपि स्पष्टम् ॥ किञ्चाधिकरणार्थघञङ्गीकारेऽवतरणाधिकरणानामेव बहुत्वं सिद्ध्यति नत्ववतरणस्य ॥ तेन स्वस्य परेषां चावतारकरणं निरस्तम् ॥ के त इतर इत्याकाङ्क्षायाः शिष्याणामित्यनेन शमनोक्तिरपि कुशकाशावलंबनमेव ॥ तेषामुपदेशकर्मतयैवोपादानस्य प्रतीतेः ॥ कस्तर्ह्येषां वाक्यानां वास्तवोऽर्थ इति चेदुच्यते ॥ पूर्वोत्तरवाक्यपर्यालोचने त्रिलोचनलिङ्गार्चनपरत्वमेवैषां सिद्ध्यति ॥ तथा हि ॥ कौर्मे पूर्वखण्डेऽष्टाविंशेऽध्याये उवाच परमप्रीत्या कस्मादेत-

न्महामुने ॥ इदानीं गच्छसि क्षिप्रं गंगादेशं प्रति प्रभो ॥ संदर्शनाद्धि भवतः शोको मे विपुलो गतः ॥ इदानीं मम यत्कार्यं ब्रूहि पद्मदलेक्षणेत्यर्जुनेन पृष्टो व्यास एकोनत्रिंशारंभे (श्लोक १) इदं कलियुगं घोरं संप्राप्तं पाण्डुनन्दन ॥ गच्छामि देवदेवस्य वाराणसीं महापुरीमिति ॥ तथा (श्लो० ३) नान्यत्पश्यामि जन्तूनां मुक्त्वा वाराणसीं पुरीम् ॥ सर्वपापोपशमनं प्रायश्चित्तं कलौ युग इत्याद्याह ॥ ततोर्जुनेन पृष्टांश्चतुर्युगधर्मान्निरूपयन् (श्लो० ११) ब्रह्मकृतयुगे देवस्त्रेतायां भगवान्रविः ॥ द्वापरे दैवतं विष्णुः कलौ देवो महेश्वर इति कलौ शिवार्चनस्य मुख्यत्वं बोधयित्वा यावदध्यायसमाप्तिक्रमेण त्रियुगीधर्मान्निरूप्य त्रिंशाध्याये (श्लो० १) तिष्ये मायामसूयां च वधं चैव तपस्विनः ॥ साधयन्ति नरा नित्यं तमसा व्याकुलीकृता इत्यादिना कलिधर्मान्वदन् (श्लो० ३२) कलौ रुद्रो महादेवो लोकानामीश्वरः परः ॥ तदेवसाधयेन्नृणां दैवतानां च दैवतमिति शिवोपासनया यज्ञादिकर्मसिद्धिसंभवं बोधयित्वा कथं तदुपासनादीत्याङ्क्षायामाह ॥ करिष्यत्यवताराणीत्यादि ॥ अत्र द्वितीयश्लोके कतिपुचित्पुस्तकेषु उपदेक्ष्यन्तीति बहुवचनपाठोपि दृश्यते तदुत्तरार्धं च सर्ववेदान्तसारं यद्धर्मान्वेदनिदर्शनादित्यपि दृश्यते ॥ तृतीयश्लोके तु ये तं प्रीता निषेवन्त इत्येव पाठः ॥ तुरीये च कलेरेको महान्गुण इत्येव ॥ अग्रे चानुपदं कलौ तु केवलं कर्ता लिप्यते पुण्यपातकैः ॥ आद्ये तु वासनामात्रश्चत्वा तत्प्राप्नुवन्तिहि ॥ तस्मात्सर्वप्रयत्नेन प्राप्य माहेश्वरं युगम् ॥ विशेषाद्ब्राह्मणान् रुद्रमीशानं शरणंव्रज ॥ ये नमन्ति विरूपाक्षमीशानं कृत्तिवाससम् ॥ प्रसन्नचेतसो रुद्रं ते यान्ति परमं पदम् ॥ यथा रुद्रनमस्कारः सर्वकामफलो ध्रुवः ॥ अन्यदेवनमस्कारान्न तत्फलमवाप्नुयात् ॥ एवंविधे कलियुगे दोषाणामेव शोधनम् ॥ महादेवनमस्कारो ध्यानं दानमिति श्रुतिः ॥ तस्मादनीश्वरानन्यांस्त्यक्त्वा देवं महेश्वरम् ॥ समाधयेद्विरूपाक्षं यदीच्छेत्परमं पदम् ॥ नार्चयन्तीह ये रुद्रं शिवं त्रिदशवंदितम् ॥ तेषां दानं तपो यज्ञो वृथाजीवितमेव चेत्युक्त्वा ॥ नमो रुद्राय महत इत्यादिना भास्करं परमं तप इत्यन्तेन काश्यां समहं गच्छामीत्यभिधाय ॥ इत्येतल्लक्षणं प्रोक्तं युगानां वै समासत इत्यादिनोपसंजहार ॥ अग्रे च सूतः ॥ एवमुक्तो भगवता किरीटी श्वेतवाहनः ॥ बभार परमां भक्तिमीशानेऽव्यभिचारिणीमिति ॥ तमुवाच पुनर्व्यास इत्युक्त्वा दृष्टवानसि ॥ तं देवं विश्वतो विश्वाक्षं विश्वतोमुखम् ॥ प्रत्यक्षमेव सर्वेषां रुद्रं सर्वजगन्मयम् ॥ ज्ञानं तदैश्वरं दिव्यं यथावद्विदितं त्वया ॥ इत्यादि व्यासवचांसि प्रजल्प परया भक्त्या शरण्यं शरणं दिवमित्यन्तान्यनूद्य एवमुक्त्वा स भगवाननुगृह्यार्जुनं प्रति ॥ जगाम शङ्करपुरीं समाराधयितुं भवम् ॥ पाण्डवेयोपि तद्वाक्यात्संप्राप्य शरणं शिवम् ॥ संत्यज्य सर्वकर्माणि ज्ञात्वा तत्परमो भवदित्याह ॥ अत्र इदानीं मम यत्कार्यमिति द्वितीयप्रश्नस्य एकोनत्रिंशे ॥ पाल्याय परं धर्मं स्वकीयं मुच्यसे भयादित्युत्तरमुक्त्वा तदेवोपसंहारे प्रजल्पपरयाभक्त्येत्यनेन प्रकृतपुराणाभिप्रेतं परधर्मस्वरूपं दर्शितमिति प्रतीयते ॥ तथामत्यप्रमीपामर्थः सिद्ध्यति वचसाम् ॥ अत्रावतारशब्दोयदाधिकरणपर्यन्तस्तदा शैव्यमार्गम् ॥ भावयन्तोयाभिः क्लिष्टं धनञ्जयः पुंसीत्वस्य प्राथिकत्वाभिप्रायमार्षं वा तुर्वन्ति पापाराणीत्यत्रैव ॥

अधिकरणपक्षे स्वयमवतरस्येष्विति स्वप्रादुर्भावाधिकरणानि लिङ्गान्यवतारा्णि ॥ पञ्च-शाध्याये मार्कण्डेयं प्रति श्रीकृष्णेन ॥ एषदेवोमहादेव.सदासंसारभीरुभिः ॥ याज्यः पूज्यश्चवंद्यश्चज्ञेयोलिङ्गेमहेश्वरइति लिङ्गस्याधिकरणत्वमुक्तम् ॥ ततो मार्कण्डेयेन किंतल्लिङ्गंसुरश्रेष्ठलिङ्गेसंपूज्यतेचकः इत्याधेयाधिकरणयोः स्वरूपे चोदिते अव्यक्तंलिङ्गमित्या-हुरानन्दंज्योतिरक्षयम् ॥ वेदामहेश्वरंदेवमाहुर्लिङ्गिनमव्ययमित्यादिना लिङ्गंतद्ब्रह्मणा-ब्रह्मन्ब्रह्मणः परमंवपुरित्यन्तेन स्पष्टं तस्य तदधिकरणत्वं निरणायि ॥ भावपक्षेपिस एवार्थः ॥ लिङ्गानामर्चावतारत्वात् ॥ अर्चाचेतनभेदेनावतारद्वैविध्यस्य बहुवादिसम्म-तत्वात् ॥ यथा भगवतोमत्स्याद्याश्चेतनावताराः ॥ व्यङ्कटेशवरदराजपाण्डुरङ्गप्रभृतयो-र्चावताराः ॥ तावकैरपि कलायाकाशलिङ्गादयस्तदवतारावर्ण्यन्ते ॥ यथोक्तमानन्दगिरि-कृते शङ्करदिग्विजये अवतारकथाख्येद्वितीयप्रकरणे ॥ ततः सर्वोत्मकोदेवश्चिदम्बरपुरा-श्रितः ॥ आकाशलिङ्गनाम्नानुविख्यातोभून्महीतलइति ॥ स्वकृतदिग्विजयद्वितीयसर्गे माधवोप्याह (श्लोक १) ततोमहेशःकिलकेरलेषुश्रीमद्वृषाद्रौकरुणासमुद्रः ॥ पूर्णानदी पुण्यतटेस्वयंभूलिङ्गात्मनाऽनङ्गधगाविरासीदिति ॥ तथा चावताराणि स्वलिङ्गानि भक्तानां श्रौतस्मार्तकर्मणोः प्रकर्षेण स्थित्यर्थं करिष्यति भावयिष्यतीत्यर्थः ॥ क्रियाभावनयोरै-क्यात् ॥ स्वलिङ्गद्वारा द्विविधधर्मप्रतिष्ठारूपं प्रयोजनं संपादयिष्यतीति भावः ॥ भक्ता-नामिति देहलीदीपकवदुभयत्रान्वेति ॥ तेषांहि लिङ्गार्चनादेव श्रौतस्मार्तप्रतिष्ठानम् ॥ नार्चयन्तीहयेरुद्रमित्यग्रिमवाक्ये तदन्तरेण तयोरानर्थक्यबोधनात् ॥ अत्रावतारशब्द-प्रयोगोलिङ्गएव भक्तानां शिवसाक्षात्काररूपस्य हि तस्य सिद्धिबोधनार्थः ॥ अतएव त्रयस्त्रिंशे कृत्तिवासेश्वरलिङ्गमाहात्म्ये तेषांलिङ्गान्महादेवः प्रादुरासीत्त्रिलोचनः ॥ रक्ष-णार्थंद्विजश्रेष्ठाभक्तानांभक्तवत्सलइति ॥ तथा चतुस्त्रिंशे मध्यमेश्वरलिङ्गमाहात्म्ये तस्य वैबहवः शिष्याब्रह्मचर्यपरायणाः ॥ लब्ध्वातद्वचनाज्ज्ञानंदृष्टवन्तोमहेश्वरमित्युक्तम् ॥ अथ साक्षात्कारहेतोर्ज्ञानस्य कथं सिद्धिरित्याकाङ्क्षायामाह ॥ उपदेक्ष्यन्तीति ॥ सर्व-वेदान्तानां सारभूतं यज्ज्ञानं वेदनिदर्शनाद्धर्मात्संपद्यते तच्छिवस्वरूपज्ञानं शैवा महा-त्मान उपदेक्ष्यन्ति "ऋतँसत्यंपरंब्रह्म" इतिश्रुत्या ब्रह्मसंज्ञितत्वम् ॥ इदं च ज्ञानं तत्पुराणाभिप्रेतं शिवविषयकमन्यदेव नतु त्वदभिमतनिर्विशेषब्रह्मज्ञानम् ॥ तथाहि ॥ चतुर्विंशाध्याये कथंसभगवानीशोदृश्योयोगविदांवरइति श्रीकृष्णेन पृष्ट उपमन्युः प्रत्याहभगवानुक्तोदृश्यतेपरमेश्वरः ॥ भक्त्यैवोग्रेणतपसातत्कुरुष्वेहसंयुतइत्यादिना भक्ते-रेव साक्षात्कारहेतुत्वं तस्य ध्यानाराधने वसिष्ठाद्युदाहरणानि चोक्तवानिति वर्णयित्वो-च्यते ॥ एवमुक्त्वाददौज्ञानमुपमन्युर्महामुनिः ॥ व्रतंपाशुपतंयोगंकृष्णायाक्लिष्टकर्मणइति ॥ एकत्रिंशाध्याये च जैमिनिना धर्मसाङ्ख्ययोगादीनि सर्वाणि निर्दिश्य किमेषांचभवेच्छ्रेयः प्रब्रूहिमुनिपुङ्गव ॥ यदिचाविद्यतेप्यन्यद्गुह्यंतद्वक्तुमर्हसीति पृष्टोव्यास ईश्वरेणपुराप्रोक्तं ज्ञानमेतत्सनातनम् ॥ गूढमप्राज्ञविद्विष्टंसेवितंसूक्ष्मदर्शिभिः ॥ नाश्रद्दधानेदातव्यंना-भक्तेपरमेष्ठिनः ॥ नावेदविदुषेज्ञेयंज्ञानानामुत्तमोत्तममित्यादिना शिवपार्वतीसंवादमुखेन यावज्जीववाराणसीवासकृत्तिवासः समाराधनादिरूपं तथावदध्यायसमाप्ति प्रपञ्चितवान् ॥

तत्रवेदादीनां सर्वेषां सारभूतत्वं तादृशज्ञानस्यैव समर्थितम् ॥ चतुस्त्रिंशाध्यायेच व्यासवर्णने योवैसाक्षान्महादेवंसर्वभावेनशङ्करम् ॥ प्रपन्नः परयाभक्त्यायस्यतज्ज्ञानमैश्वरमिति तदेवोक्तम् ॥ ततः भगवन्नूभवताज्ञानंविज्ञातंपरमेष्ठिनः ॥ प्रसादाद्देवदेवस्य यत्तन्माहेश्वरंपरम् ॥ तद्वदास्माकमव्यग्रंरहस्यंगुह्यमुत्तमम् ॥ क्षिप्रंपश्यामतंदेवंश्रुत्वाभगवतोमुखादिति मुनिप्रश्नानन्तरं समाभाष्यैवताञ्शिष्यान्सुमन्तुप्रमुखांस्तथा ॥ प्रोवाचमध्यमेशस्यमाहात्म्यंपैलपूर्वकानित्यादिना व्यासकर्तृकस्तादृशज्ञानोपदेशोवर्णितः ॥ एवमेकत्रिंशाध्यायमारभ्याध्यायपञ्चके तेषुतेषु स्थलान्तरेषु च तस्मिन्पुराणे तदेवमुख्यं ज्ञानं ॐकारेश्वरकृत्तिवासेश्वरमध्यमेश्वरादिलिङ्गेषु शिवप्रादुर्भावाधिकरणत्वं तदर्चादिना श्रौतस्मार्तप्रतिष्ठा च विस्तरेण निरूप्यतएवेति किंबहुना ॥ उपदेक्ष्यतीत्येकवचनपाठे तु शिवएव तज्ज्ञानं महात्मनामुपदेशेन संपादयिष्यति ॥ कारीषोग्निरध्यापयतीत्यादिवत्कर्तृत्वम् ॥ अन्तर्भावितण्यर्थोवा प्रयोगः ॥ अथवा स्वाश्रमवाराणसीवसननैष्ठिकब्रह्मचर्यादिना शिष्यान् शासितुं योग्यांस्तारकब्रह्माख्यं ज्ञानं शिवः स्वयमेव साक्षादुपदेक्ष्यतीत्यर्थः ॥ यथोक्तमेकत्रिंशे दिवेनैव ॥ कृत्वावानैष्ठिकींदीक्षामविमुक्तेवसन्तिये ॥ तेषांतत्परमंज्ञानंददाम्यन्तेपरंपदमिति ॥ पुनस्तत्रैव ॥ यत्रसाक्षान्महादेवोदेहान्तेक्षयमीश्वरः ॥ व्याचष्टेतारकंब्रह्मतत्रैवह्यविमुक्तकमिति अतएव कलौ व्यासस्यापि तत्र गमनमवर्णि ॥ ननुकलिजदोषाक्रान्तानां कथमेतज्ज्ञानप्राप्तिरिति चेत्तत्राह ॥ येतमिति ॥ येजनाः प्रीताः सन्तस्तं शिवं येन केन बिल्वपत्रपुष्पादिरूपेण सुलभेनाप्युपचारेण ॥ उपचारतइति सार्वविभक्तिकस्तसिः ॥ नितरां सेवन्ते ते कलिजान्दोषांस्त्रिंशाध्यायारंभे तिष्येमायामसूयांचेत्यादिना दर्शितपूर्वान्विजित्य परमं पदं रुद्रधाम यान्ति ॥ पत्रपुष्पाद्युपचारेण सेवनं लिङ्गपक्षएव संगच्छते नतुशङ्कराचार्यपक्षे ॥ तद्व्यक्तेरिदानीमनुपलम्भात्तन्मूर्तिप्रतिष्ठापनस्याप्यभावाच्च ॥ निषेवन्तइति वर्तमानप्रयोगोपि तथैव स्वरसतो युज्यते ॥ लिङ्गार्चनव्यवहारस्य व्यासार्जुनकालेपि सत्त्वात् ॥ अन्यथा निषेविष्यन्तइति वदेत् ॥ तत्काले शङ्कराचार्यावतारार्चनप्रचारस्य सर्वथैवाभावात् ॥ मायादिकलिदोषजयोपि लिङ्गार्चनसाध्यतयैवास्मिन्पुराणेऽभिप्रेयते ॥ यथा द्वितीयाध्याये जगन्मोहयेतिमायामुपदिशता हरिणोच्यते ॥ येयजन्तिजपैर्होमैर्देवदेवंमहेश्वरम् ॥ स्वाध्यायेनेज्यया दूरात्तान्प्रयत्नेनवर्जय ॥ भक्तियोगसमायुक्तानीश्वरार्पितमानसान् ॥ प्राणायामादिषुरतान्दूरात्परिहरामलान् ॥ प्रणवासक्तमनसोरुद्रजाप्यपरायणान् ॥ अथर्वशिरसोध्येतॄन्धर्मज्ञान्परिवर्जय ॥ बहुनात्रकिमुक्तेनस्वधर्मपरिपालकान् ॥ ईश्वराराधनरतान्मन्नियोगान्नमोहयेति ॥ एवं तत्र स्थलान्तरेष्वपि द्रष्टव्यम् ॥ प्रकृतवचनतोप्येष्यनुपदं येनमन्तिविरूपाक्षमीशानंकृत्तिवाससमित्यादिना रुद्रार्चनमेव प्रशस्यते नतु तदवतारविशेषस्यार्चनम् ॥ दोषाणामेवशोधनं ॥ महादेवनमस्कारइति तदाराधनस्यैव कलिदोषप्रशोषकत्वं भाष्यते ॥ रुद्रार्पणादेव च परमपदप्राप्तिः प्रतिपाद्यते ॥ परमपदं च रुद्रधामैव प्रकृतपुराणस्य संमतं तत्त्वविधानावाप्तिर्विशेषस्वरूपेण व्यवस्थानं स्वरूपाभिमननम् ॥ यथोक्तं चतुश्चत्वारिंशे ॥ ऊर्ध्वंतद्ब्रह्मसदनात्पुरंज्योतिर्मयंशुभम् ॥ वह्निनावपरिक्षिप्तंतत्रास्तेभगवान्हरः ॥ देव्यासहमहादेवश्चिन्त्यमानो-

मनीषिभिः ॥ योगिभिःशतसाहस्रैर्भूतैरुद्रैश्चसंवृतः ॥ तत्रतेयान्तिनिरताभक्ताश्चैवब्रह्म-चारिणः ॥ महादेवपराःशान्तास्तापसाः सत्यवादिनः ॥ निर्ममानिरहंकाराः कामक्रोध-विवर्जिताः ॥ द्रक्ष्यन्तिब्राह्मणायुक्तारुद्रलोकः सवैस्मृतइति ॥ किञ्च धर्माब्धिसारे तृतीयपरिच्छेदे वचनानि ॥ विष्णुंशिवंवाभजतांगुरोः पित्रोश्चसेविनाम् ॥ गोवैष्णवमहा-शैवतुलसीसेविनामपि ॥ नस्यात्कलिकृतोदोषः काश्यांनिवसतामपि ॥ तथा ॥ कलौदानंमहाश्रेष्ठंशिवविष्णोश्चकीर्तनमिति ॥ एवमादिवाक्यैकवाक्यतयापि प्रकृतवचसां लिङ्गार्चनपरत्वमेव सिध्यति ॥ ननु पापदूषितहृदां कथं सत्कर्मणि प्रवृत्तिरतआह ॥ अनायासेनेति ॥ अनुपदमग्रे रुद्रनमस्कारेणापि महाफलकथनात् अनायासेनसुमहत्पुण्य-माप्नोति ॥ अथवा कलौसंकल्पमात्रेणापिपुण्यागमिकथनादनायासतएव तदाप्नोति ॥ अतएव धर्माब्धिसारे कुशलान्याशुसिध्यन्तिनेतराणिकृतानियदितिश्रीभागवतवचनमुदा-हृत्य "कलौपुण्यकर्मणांसंकल्पेपिसिद्धिः पापानांत्वाचरणादेव" इत्युक्तम् ॥ एवमन्यत्रापि द्रष्टव्यम् ॥ अनेकदोषेपि गुणमेवानुपदंस्पष्टयति ॥ कलौतुकेवलंकर्तेति ॥ आद्ये पुण्येतु वासनामात्रस्य धृत्या तत्पुण्यंप्राप्नुवन्ति ॥ यद्वा आद्ये शिवइत्यर्थः ॥ यातु प्रतिकलियुगं शङ्कराचार्यावतारसत्वाद्बहुवचनं प्रक्षीणशक्तिकमिति कस्यचिदुक्तिस्त्वयानूदिता सा स्वसंगतैव ॥ तथासति कलिष्ववतरत्येवेति करोत्यत्रावतारंहीतिवा वदेत् ॥ ननुकरिष्यत्य-वताराणीति ॥ करिष्यनीतिलृट्प्रयोगासंगतेः ॥ तथाहि ॥ अयव्यासार्जुनसंवादोवर्तमान-कलेरारम्भेभूदिति मैन मन्तव्यम् ॥ एवंसति कल्पारंभात्प्रभृति सप्तममन्वन्तरसप्तविंश-कलियुगपर्यन्तं न तस्यावतारः अष्टाविंशतितमादिसर्वकलियुगेषु तु तदवतारइति करिष्यतीत्युक्त्या सिध्येत् ॥ तत्र तावत्सु कलिष्वनवतारे इतःप्रभृत्यवतारे च कारणं सप्रमाणं वक्तव्यम् ॥ तथाङ्गीकारे वक्ष्यमाणानां त्रिपञ्चाशत्तमाऽध्यायवचसां विरोधश्चा-पद्येत ॥ किंच प्रतिकलियुगावसानभाविकल्क्यवतारादौ न क्वापि बहुवचनं प्रयुज्यत इति प्रकृतेपि बहुवचनानर्थक्य तदवस्थमेव ॥ येतं प्रीताइत्यत्र त्वत्पक्षे येतान्प्रीताइति पठनीयं स्यात् ॥ त्वयापि सोक्तिः प्रत्युक्तेति किंविशेषतस्तत्खण्डनेन ॥ वस्तुतस्तु तत्सकलंपुराणं त्वयानालोकितमिति प्रतिभाति ॥ अस्तितत्रप्रतिकलियुगं शिवावतारस्य तेनसहचतुर्णांशिष्याणामवतारस्य च वर्णनम् ॥ तथापि न शङ्कराचार्यावतारस्तत्पुराणसंमतः ॥ तथाहि ॥ तत्र एकपञ्चाशाध्यायारंभे ऋषयोतीतानागतमन्वन्तराणि व्यासावतारं शाखाप्रणयनं च पृष्ट्वाऽप्राक्षुः ॥ धर्मार्थिनांप्रवक्तारोह्यीशानस्यकलौयुगे ॥ कियन्तोदेव-देवस्यशिष्याःकलियुगेपिवाइति ॥ ततः सूतः प्रश्नक्रमानुरोधेन शाखाप्रणयनान्तं निरूप्य त्रिपञ्चाशाध्यायारंभआह ॥ वेदव्यासावताराणि द्वापरेकथितानितु ॥ महादेवावताराणि कलौशृणुतसुव्रताः ॥ आद्येकलियुगेश्वेतोदेवदेवोमहाद्युतिः ॥ नाम्नाहितायविप्राणाम-भूद्वैवस्वतेन्तरे ॥ हिमवच्छिखरेरम्येसकलेपर्वतोत्तमे ॥ तस्यशिष्याः प्रशिष्याश्चबभूवुर-मितप्रभाः ॥ श्वेतःश्वेतशिखश्चैव श्वेताश्वः श्वेतलोहितः ॥ चत्वारस्तेमहात्मानोब्राह्मणावेद-पारगाः ॥ इति वैवस्वतमन्वन्तरप्रथमकलियुगेश्वेताख्यं शिवावतारमुक्त्वा द्वितीयकलि-युगात्प्रभृत्यष्टाविंशतितमकलियुगपर्यन्तं प्रतिकलियुगं भाविनएकैकावतारस्य क्रमेण

नामान्याह ॥ सुतारोमदनश्चैवसुहोत्रःकङ्कणस्तथा ॥ लोकाक्षिस्त्वथयोगीन्द्रोजैगीषव्योथ-सप्तमे ॥ अष्टमेदधिवाहःस्यान्नवमेऋषभःप्रभुः ॥ भृगुस्तुदशमेप्रोक्तस्तस्मादुग्रःपुरःस्मृतः ॥ द्वादशेतिसमाख्यातोबालीचाथत्रयोदशे चतुर्दशेगौतमस्तुवेदशीर्षास्ततःपरः ॥ गोकर्णश्चा-भवत्तस्माद्गुहावासःशिखण्डधृक् ॥ जयमाल्यट्टहासश्चदारुकोलाङ्गलीतथा ॥ महाकायो मुनिःशूलीमुण्डीमुण्डीश्वरस्तथा ॥ सहिष्णुः सोमशर्माचनकुलीश्वरएवचइत्यष्टाविंशतितमे-स्मिन्कलियुगे नकुलीश्वराख्योवतारउक्तोनतुशङ्कराख्यः॥ नच शङ्कराचार्याणामेव नकुलीश्वर इतिनाम कल्पनीयम् ॥ कल्पने मानाभावात् प्राचीनार्वाचीनदिग्विजयादिषु क्वाप्य-दर्शनाच्च ॥ तेषु तु शङ्करइत्येव नाम निर्दिश्यते ॥ अतएव माधवेन स्वकृतशङ्करविजय-द्वितीयसर्गे नामकरणस्थले (श्लो० ८३) यत्पश्यतांशिशुरसौकुरुतेशमप्र्यंतेनाऽकृतास्य-जनकः किलशङ्कराख्याम् ॥ यद्वाचिरायकिलशङ्करसंप्रसादाज्जातस्ततोव्यधितशङ्करनाम-धेयमित्युक्तम् ॥ तस्मात्पाशुपतादिग्रन्थप्रसिद्धोमहाशैवप्रस्थानप्रवर्तकोनकुलीश्वरएवेहाऽ-ष्टाविंशेशिवावतारतयाभिमतोभाति ॥ शिष्याश्च प्रथमकलियुगे श्वेत.श्वेतशिखश्चैवश्वेताश्वः श्वेतलोहित इत्युक्ताः ॥ नकुलीश्वरएवचेत्यस्यामेनुपदं प्रतिकलियुगं चत्वारस्तत्तदवतारस्य शिष्याभवन्तीत्युक्त्वा क्रमेणतान्प्रवक्ष्यामियोगिनोयोगवित्तमान् ॥ दुन्दुभिः शतरूपश्चऋ-चीकः केतुमांस्तथेत्यादिना द्वितीयकलियुगात्प्रभृति प्रतिकलिं चतुरश्चतुरो नामतोनिर्दि-श्याष्टाविंशतितमे कलियुगे कुशिकश्चैवगर्गश्चमित्रकोरुरुएवच ॥ शिष्याएतेमहात्मानः सर्वावर्तेषुयोगिनामिति कुश्यादींश्चतुरोवदति नतुशङ्करदिग्विजयोक्तान्विष्ण्वादिदे-वावतारान्पद्मपादादीन् ॥ एतेच प्रतिकलिके चत्वारोऽवतरन्तीत्याकाङ्क्षापि तत्रैवाष्टचत्वा-रिंशाध्यायेतत्पर्वतविशेषे तत्तद्देवधाम्नां निरूपणे रत्नधारगिरिवर्णनप्रकरणे पठितैः तस्यै-कशिखरेरम्येमहापद्मैरलंकृतम् ॥ स्वच्छामृतजलंपुण्यंसुगन्धंसुमहत्सरः ॥ जैगीषव्याश्रमं-पुण्यंयोगीन्द्रैरुपसेवितम् ॥ तत्रास्तेभगवान्नित्यस्सर्वशिष्यैः समावृतः ॥ प्रशान्तदोषैरक्षुद्रै-र्ब्रह्मविद्भिर्महात्मभिः ॥ शङ्खोमनोहरश्चैवकौशिकः कृष्णएवच ॥ सुमहान्तोवेदविदः शिष्यास्तस्यप्रसादतः ॥ सर्वेयोगरताःशान्ताभस्मोद्धूलितविग्रहाः ॥ उपासतेसदाचार्या-ब्रह्मविद्यापरायणाः ॥ तेषामनुग्रहार्थाययतीनांशान्तचेतसाम् ॥ सान्निध्यंकुरुतेभूयो-देव्यासहमहेश्वरइतिवाक्यैः पूर्यते ॥ तथाच शङ्खमनोहरकौशिककृष्णाख्याश्चत्वारोयतयएव प्रत्यवतारमवतरन्तीति सिध्यति ॥ माधवकृतशङ्करविजयेतु तृतीयसर्गे (श्लोक २) कमला-निलयः कलानिधेरित्यादिना (श्लोक ६) चरणोजायतचित्सुखाह्वयइत्यन्तेन पद्मपादहस्ता-मलकत्रोटकोदङ्कसुरेश्वरानन्दगिरिसनन्दचित्सुखान्विष्णुपवनतक्षशानन्दिमहाब्रह्मबृहस्पति-वरुणावतारत्वेन वर्णयित्वा (श्लोक ७) अपरेप्यभवन्दिवौकसइत्यन्येषामप्यवतरणं निरूप्यते ॥ केषांचिन्मते सुरेश्वरस्य बृहस्पत्यवतारत्वमानन्दगिरेश्चनन्दीश्वरावतारत्वंचा-भिधीयते ॥ अतोनशङ्करदिग्विजये शिष्याणां चतुष्टुं नापि कौर्मशङ्करदिग्विजययोरेक-वाक्यत्वम् ॥ त्रिपञ्चाशाध्यायैकवाक्यतया तु करिष्यत्यवताराणीति त्रिंशाध्यायवचसो नकुलीश्वरपरत्वापत्तेः ॥ अथ नकुलीश्वरस्यैकत्वेनावताराणीति बहुवचनविरोधार्थैव युक्तमितिचेत्तर्हि प्रागुक्तं लिङ्गार्थकपरत्वमाद्रियस्व ॥ त्रिंशाध्यायस्थप्रकृतवचनेपूर्वरीत्या-

सिध्यन्तं लिङ्गार्धेनोत्कर्पमेव तस्मादित्यनेन हेतुतया परामृशन्ननुपदं व्यासआह ॥ तस्मात्सर्वप्रयत्नेनप्राप्यमाहेश्वरंयुगम् ॥ विशेषाद्ब्राह्मणानूरुद्रमीशानंशरणंव्रजेति ॥ नह्यस्यार्थः शङ्कराचार्यं नकुलीश्वरं वा शरणंव्रजेति शक्योव्याख्यातुम् ॥ नन्वेवंसति कलौ देवोमहेश्वरइतिवाक्यादिदानीं विष्ण्वाद्यर्चनमयुक्तमेवेति चेन्नैवम् ॥ तत्र एकोनत्रिंशे कलौदेवोमहेश्वरइत्यतोनुपदमेवाग्रे ॥ ब्रह्माविष्णुस्तथासूर्यः सर्वएवकलिष्वपि ॥ पूज्यते भगवान्रुद्रश्चतुर्थ्येपिपिनाकधृगितिकथनात् ॥ किंच त्रयोविंशाध्याये सहस्रार्जुनपुत्राणां कथायाम् ॥ जयध्वजस्तुमतिमान्देवंनारायणंहरिम् ॥ जगामशरणंविष्णुंदैवतंधर्मतत्परः ॥ तमूचुरितरेपुत्रानायंधर्मस्तवानघेत्यादिना तेषां विष्णुशिवार्चनविषये विवादं कोटिक्रमं चोक्त्वोच्यते ॥ एवंविवादेविततेशूरसेनोब्रवीद्वचः ॥ प्रमाणमृषयोह्यत्रब्रूयुस्तेयत्तथैवतत् ॥ ततस्तेराजशार्दूलाः पप्रच्छुर्ब्रह्मवादिनः ॥ गत्वासर्वेसुसंरब्धाः सप्तर्षीणांतदाश्रमम् ॥ तानब्रुवंस्तेमुनयोवसिष्ठाद्यायथार्हतः ॥ यायस्याभिमतापुंसः साहितस्यैवदेवता ॥ किन्तुकार्यविशेषेणपूजिताचेष्टदानृणाम् ॥ विशेषात्सर्वदानायंनियमोह्यन्यथानृपाः ॥ नृपाणांदैवतंविष्णुस्तथैवचपुरन्दरः ॥ विप्राणामग्निरादित्योब्रह्माविष्णुः पिनाकधृक् ॥ देवानांदेवताविष्णुर्दानवानांत्रिशूलधृक् ॥ गन्धर्वाणांतथासोमोयक्षाणामपिकथ्यते ॥ विद्याधराणांवाग्देवीसिद्धानांभगवान्हरिः ॥ रक्षसांशङ्कारोरुद्रः किन्नराणांचपार्वती ॥ ऋषीणांभगवान्ब्रह्मामहादेवस्त्रिशूलभृत् ॥ मान्यास्त्रीणामुमादेवीतथाविष्णुशभास्कराः ॥ गृहस्थानांचसर्वेस्युर्ब्रह्मावैब्रह्मचारिणाम् ॥ वैखानसानामर्कः स्याद्यतीनांचमहेश्वरः ॥ भूतानांभगवान्रुद्रःकूष्माण्डानांविनायकः ॥ सर्वेषांभगवान्विष्णुर्ब्रह्मादेवःप्रजापतिः ॥ इत्येवंभगवान्ब्रह्मास्वयंदेवोभ्यभाषत ॥ तस्माज्जयध्वजोनूनंविष्ण्वाराधनमर्हतीति ॥ अतोयादेवतायस्यसंप्रदायप्राप्तासैवतेनाराधनीया ॥ तैत्तिरीयसंहिताद्वितीयकाण्डे प्रपाठक (५ अनु० ४) "योवैस्वांदेवतामतियजतेप्रस्वायैदेवतायैच्यवतेनपरांप्राप्नोतिपापीयान्भवति" इत्यन्याश्रयणेन स्वदेवतातिक्रमे दोषश्रावणात् ॥ अपिच द्वितीयाऽध्याये आश्रमचतुष्टयंनिरूप्य ॥ आश्रमोवैष्णवोब्राह्मोहराश्रमइतित्रयः ॥ तल्लिङ्गधारीनियतंतद्भक्तजनवत्सलः ॥ ध्यायेदथार्चयेदेकंब्रह्मविद्यापरायणइतित्रयः संप्रदायाउक्ताः ॥ तत्रहैरण्यगर्भसंप्रदायस्येदानीमुच्छेदेपि शैववैष्णवसंप्रदायावुभावपि शास्त्रसिद्धौ परस्पराविरुद्धौ शिष्टसंमतावेव ॥ तत्र योयस्य पारंपरिकोधर्मः सएव तेन सेवनीयः ॥ स्वधर्मेनिधनंश्रेयइतिभगवद्वाक्यात् ॥ येच विष्णुभक्ताः शिवं वेदाविरुद्धशैवशास्त्राणि वा निन्दन्ति येच शिवभक्ताभगवन्तं तदविरुद्धभगवच्छास्त्राणिवा गर्हयन्ति तउभयेऽन्तकभयेनिपतन्ति ॥ एकस्यैव हि वेदगीताश्रीभागवतादिषु परब्रह्मपरमात्मपुरुषोत्तमभगवदादिशब्दैरभिधीयमानस्य परवस्तुनोनिर्गुणस्य सत्त्वाद्युपाधिभेदाल्लीलावताराब्रह्मविष्णुमहेश्वराः ॥ अतोनिर्गुणपुरुषोत्तमभक्तानां शुद्धाद्वैतब्रह्मवादनिष्ठानां तु न क्वापि निन्दाऽवकाशइति दिक् ॥ विस्तरस्तु बालबोधसहस्रवादादिषु प्राक्तनप्रबन्धेषु तदुच्छिष्टसंग्राहके मम सत्सिद्धान्तमार्तण्डादौ च द्रष्टव्यः ॥ तस्मात् कलावपि वैष्णवानां भगवदर्चनमेव ॥ तत्कीर्तनादितएव च निःशेषकलिदोषलोपः ॥ श्रीभागवतादिवचनोपन्यासपुरःसरं हेमाद्रिकौस्तुभधर्माब्धि-

सारादिषु तथा निर्णयादिष्वलं प्रासङ्गिकेन ॥ यच्च वायुपुराणवचनं शिवपुराणवचनं चोक्तं तत्त्वनाकरमेव ॥ तत्तत्पुस्तकेष्वनुपलंभात् ॥ त्वयाप्यदृष्टमूलं च ॥ अतएवास्मा- वश्यकेपि विषये पूर्ववद्ध्यायसङ्ख्यादिकं नोदाहारि ॥ (अवतारक्रियया साहित्यं) इत्यत्रावतारक्रियायामिति रमणीयम् ॥ साहित्यस्थले हि अप्रधानएव तृतीया प्रयुज्यते नतु क्रियायाम् ॥ व्युत्पत्तिवादादिषु "सहशब्दार्थस्तत्क्रियाकालः क्वचित्तत्क्रियान्वयि- प्रथमान्तपदार्थेन्वेति क्वचित्स्वसमभिव्याहृतक्रियायाम् ॥ सपुत्रआगच्छतीत्यस्य पुत्रेण सहागच्छतियइतिविग्रहात्प्रथमान्तान्यपदार्थेएवपुत्रागमनकालान्वयोनतुक्रियायामितिन- समासानुपपत्तिः" इत्यादौगदाधरभट्टादिभिः क्रियायां सप्तम्येव प्रयुज्यते ॥ नतु क्वापि तथा प्रयोगोविद्वद्व्यवहारगोचरः ॥ शिष्योक्तीनां व्यासाद्युक्तिवत्प्रामाण्यकथनं तु स्वीयगोष्ठ्यैव श्रद्धेयम् ॥ व्यासादितौल्ये मानाभावात् ॥ शङ्करदिग्विजयादीनां मानतयोदाहरणे कपिलोयदिसर्वज्ञःकणादोनेतिकाप्रमा ॥ इतिन्यायःप्रसज्येतसर्वत्रैव व्यवस्थिताविति पराशरस्मृतिव्याख्यायां माधवोक्तदिशैव तत्तत्संप्रदायप्रसिद्धतत्त- दाचार्यदिग्विजयादिग्रन्थानां त्वयापि मानतयाऽऽदर्तव्यत्वापत्तेः ॥ तथासति गृहाद- र्कापसारणधर्मे क्रमेलकप्रवेशः ॥ तेषांसर्वेषां कलिमलहर्तृत्वमुक्तं तदपि मानाभा- वात्स्वानुयायिमात्रश्रद्धागोचरः ॥ स्वयं प्रामाण्येनोपन्यस्ते येतंप्रीताइतिवाक्ये तमित्येक- वचनप्रयोगेण त्वदुक्तार्थादर्पणेपि शिष्याणां कलिमलहर्तृतायास्ततोप्राप्तेः ॥ तेषु फलमत- इतिन्यायस्याप्रवृत्तेश्च ॥ ब्रह्मसंज्ञितमित्यस्य ब्रह्मविषयकमित्यर्थः कथमितिविचार्यम् ॥ इतरत्तु प्रागेवापास्तम् ॥ किंच श्रौतपदेन श्रौतस्मार्तधर्मं स्वयं व्याख्याय तत्र स्वयं विशेषितन्यायव्यतोपष्टम्भकत्वेन व्याकुर्वन्व्याससूत्रार्थमितिपद्योपन्यासोहासोल्लासकः ॥ व्याससूत्रेषु श्रौतस्मार्तकर्मणोर्निर्णयस्याभावात् ॥ सूत्रानुसारिवाक्यैः सूत्रार्थवर्णनरूपे भाष्येपि तदसम्भवात् ॥ व्याससूत्रैरेव धर्मनिर्णयाङ्गीकारे जैमिनीयद्वादशलक्षण्या आपा- र्थक्यप्रसङ्गाच्च ॥ व्याकुर्वन्निति श्लोके ऊचिवानिति भूतार्थप्रयोगोपि तस्यार्वाचीनकल्पितत्व- मेवावगमयति ॥ शङ्कराचार्यावतारस्य वर्षसहस्रादेवप्रागजातत्वेन तत्कृतशारीरकभाष्ये पुराणापेक्षया प्राक्तनताया अशक्यवचनतया पुराणे तथा प्रयोगानुपपत्तेः ॥ अपिच एतच्छ्लोकमत्र यद्यपि शक्यते वक्तुम् ॥ चतुर्भिः सहेतिवाक्यं वक्ष्यमाणपाश्ववाराहादिविषये विशेषसमर्पकम् ॥ उक्तश्लोकैर्वाक्यैकवाक्यतया नकुलीश्वरपरं वा ॥ व्याकुर्वन्निति वाक्यं तु शिवः सूत्रार्थं सूत्रात्मना कारणरूपेण स्थितं सर्वमर्थं पदार्थं नामरूपाभ्यां व्याकु- र्वन् "तद्धेदंतर्ह्यव्याकृतमासीत् ॥ तन्नामरूपाभ्यांव्याक्रियत" इतिबृहदारण्यके श्राव- णात् ॥ व्यास ॥ विशेषेण आस जगद्रूपेणाविर्बभूव ॥ "महेतावानास" इतितत्रै- वाम्नानात् यथा यथावत् श्रुतेरर्थमुक्तवान् ॥ नारदादीन्प्रतीतिशेषउपबृंहणेभ्योऽवगन्तव्यः 'ईशानः सर्वविद्यानामीश्वरः सर्वभूतानांब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्मा शिवोमे अस्तु सदाशिवोम्" इत्यादिश्रुतिसिद्धमिदम् ॥ सः व्याकरणादिकर्ता सवितानकः वितान- तया प्रपंचस्य पटवद्विस्तारतया सहितः शङ्करएव व्यापादनपेतः श्रुतेरर्थः ॥ सवितानके-

तिपाठे तु सविता जगत्प्रसविता शिवो नतु ना जीव ॥ शिवस्य पुरुषोत्तमलीलावत्ता स्यात् ॥ नृशब्दस्य जीवपरत्वंतु "इतिनृगतिंविविच्यकवयोनिगमावपनं" इत्यादौ प्रसिद्धम् ॥ एवं शिवस्य परब्रह्मतया स्तुतिपरत्वेन व्याख्येयम् ॥ निर्णीतंचेदं ब्रह्मैनतादृशं-यस्मात्सर्वात्मकतयोदिताविल्यादौ च ब्रह्मविष्णुशिवास्ततः ॥ देवतारूपवत्प्रोक्ताइत्यादौ श्रीमदाचार्यचरणैः ॥ स्वपक्षेतु ॥ शङ्करः सवितानन्नइति समासपुनरात्तिः ॥ केचिदिमंदोषसमासपुनरात्तमितिव्यवहरन्ति ॥ एतत्स्वरूपतुमञ्जूषायाम् ॥ क्रियाकारकभावेनान्वयबोधकसकलपदोक्त्यनन्तर तद्धटकयत्किंचिदन्वयिविशेषणोपादानहि समासपुनरात्त" इत्युक्तम् ॥ यथोचिवानित्यत्र च यमूचिवानिति पठनीय स्यात् ॥ अन्यथा सहत्यनेन सामानाधिकरण्यायोगात् ॥ ऊचिवानितिप्रयोगात्तदभिमताऽसिद्धिश्च ॥ तथाहि ॥ भूतइत्यधिकृत्य "छन्दसिलिट् ॥ लिट कानज्वा ॥ क्वसुश्च ॥" इतिमूलार्थकस्यैव लिट· स्थाने पक्षे क्वसुर्विधीयते ॥ अतोभाष्यादिस्थे आजिवानतितीर्वानित्यादावञ्जनतरणादिवदिहापिभूतकालमेववचनम् ॥ तच्च न संगच्छेत ॥ पुराणापेक्षयाशङ्कराचार्याणामुत्तरकालिकत्वादितिप्रागेवादर्शयाम ॥ नचोक्तव्याख्यानेपि आसेतिप्रयोगोनुपपन्नः ॥ अस्तेर्हि भ्वादेशेन बभूवेत्येव स्यादिति वाच्यम् ॥ प्रामाणिकग्रन्थेष्वनेकेषु तथाप्रयोगदर्शनात् ॥ धात्वन्तरत साधयितुं शक्यत्वाच्च ॥ यथा माधवकृतशङ्करदिग्विजये तृतीयसर्गे (श्लोक ६) विधिरासमुरेश्वरोगिरानिधिरानन्दगिरिर्व्यजायतेतिप्रयुज्यते ॥ कालिदासोपि कुमारसम्भवप्रथमसर्गे (श्लोक ३५) वृत्तानुपूर्वेचनचातिदीर्घेजङ्घे शुभेसृष्टवतस्तदीये ॥ शेषाङ्गनिर्माणविधौविधातुर्लावण्यउत्पाद्यइवासयत्नइतिप्रयुङ्क्ते ॥ अत्र आसेतिबभूवाऽर्थेतिङन्तप्रतिरूपकमव्ययमित्याह शाकटायन ॥ वल्लभपण्डितस्तु नतिङन्तप्रतिरूपकमव्ययम् ॥ अस्तेर्भूरितिभ्वादेशनियमात्ताहक्तिङन्तस्यैवाभावात् ॥ किन्तुकवीनामय प्रामादिक प्रयोगइत्याह ॥ वामनस्तु असगतिदीप्त्यादानेष्वितिधातोर्लिटिरूपमिदमित्याह ॥ असेत्यनुदात्तेदीप्त्यर्थे ॥ आस दिदीपेप्रवृत्तइत्यर्थइतिमल्लिनाथ ॥ वस्तुतस्तुभ्वादावथगूहत्यन्ता स्वरितेतइत्युदीर्य हिक्कअव्यक्तेशब्देइत्यारभ्य पठितेषु गूहत्यन्तेष्वष्टत्रिंशत्स्वतुष्वन्तर्भूतोऽयमपि स्वरितेत्त्वादुभयपदी ॥ कुर्दखुर्दगुर्दगुदक्रीडायामेवेत्येवकारग्रहणाज्ज्ञापकात्परीभुवोऽवज्ञानइतिसौत्रज्ञापकाद्वा धातूनामनेकार्थत्वमाश्रित्यास्य सत्तार्थकत्वमपि शक्यवचनम् ॥ गतिदीप्तिभ्या वोक्तार्थनिर्वाह ॥ श्रुतिपुराणादिषु च "तस्यहनचिकेतानामपुत्रआस ॥ सहैतावानास ॥ नयदिद्वमग्रआसनभविष्यदतोनिधनात्" इत्यादिप्रचुरप्रयोगदर्शनात्प्रकृते नानुपपत्ति काचित् ॥ तस्मादुक्तएवार्थोयुक्तइति ॥ तथापि कादम्बरीकल्पस्य किं व्याख्यानेन ॥ श्रुत्यर्थे युक्त्यपेक्षायामपि न्यग्रोधफलाहरणलवणाऽऽचमनादिरूपा वैदिक्येव सा तत्राऽपेक्षिता ॥ तदनुकूला च लौकिक्यपि ॥ न तु तद्विरुद्धा सा तथा ॥ आर्षधर्मोपदेशस्य वेदशास्त्राविरोधितर्केणानुसन्धेयत्वस्मरणादित्यादि मयापि द्वितीयभागे वक्ष्यते ॥ तदेतत्सर्वमनुसधायोक्तमूले ॥ शिवविषयाण्येवेति ॥ एवकार कारिष्यत्यवताराणीत्यादिवचसां शङ्कराचार्यविषयकत्वं व्यवच्छिनत्ति ॥ तेषामित्यादि ॥ अत्रप्राञ्च ॥ पाद्मोत्तरखण्डे चत्वारिंशेऽध्याये

(श्लोक १) भगवञ्छ्रोतुमिच्छामिद्वादश्याश्चविधानकम् ॥ विष्णोःपूजाविधानंचकर्तव्यं-तत्र चैप्रभो ॥ इत्यादिपार्वत्या पृष्टःशिवः (श्लोक ४) एकादश्यांतुप्राप्तायांसमुपोष्य-तुमानवइत्यादिना तत्कृत्यं चदनुपवासावश्यकत्वमरुणोदयवेधादिकं चोक्त्वा दशम्यादि-दिनत्रयकृत्यकथने (श्लोक २९।३०।३१) पापण्डिनंविकर्मस्थंपतितंश्वपचंतथा ॥ नाव-लोकेन्नसंभाषेन्निदिनंतत्रवैष्णवः ॥ अवैष्णवस्तुयोविप्रःसपाषण्डीप्रकीर्तितः ॥ शिखोपवीत-त्यागीचविकर्मस्थइतीरितः ॥ महापापोपपापाभ्यांयुक्तःपतितउच्यते ॥ अन्त्यज श्वपचः-प्रोक्तोदेवितत्रैपनिर्णयइत्याह ॥ ततएकचत्वारिंशे ॥ पाषण्डिनांचसँलापंवर्जयेदितियत्त्वया ॥ उक्तंममेह भगवन्ब्रूहित्वंगर्हिताह्लितान् ॥ तेषांवृत्तीःसमाचक्ष्वकैर्लिङ्गैश्चिन्हिताभुवीति पार्वत्या पृष्टः सः येन्यंदेवंपरत्वेनवदन्त्यज्ञानमोहिताः ॥ नारायणाज्जगन्नाथात्तेवैपा-षण्डिनोमताः ॥ द्वेष्टारोविष्णुभक्तानांयेचावैष्णवसंश्रयाः ॥ पाषण्डिभिश्चसयुक्तास्तेवै-पाषण्डिनःस्मृताः ॥ कपालभस्मास्थिधरायेचावैदिकलिङ्गिनः ॥ अन्तेवनस्थादेमाच-जटावल्कलधारिणः अवैदिकक्रियोपेतास्तेवैपाषण्डिनःस्मृताः ॥ शङ्खचक्रोर्ध्वपुण्ड्रादिचिह्नैः-प्रियतमैर्हरेः ॥ रहितायेनरादेवितेवैपापण्डिनःस्मृताः ॥ श्रुतिस्मृत्युक्तमाचारंयस्तुना-चरतिद्विजः ॥ सपाषण्डीतिविज्ञेयःसर्वलोकेपुगर्हितः ॥ स्वातंत्र्यात्क्रियतेयैस्तुनचवेदो-दितंमहत् ॥ विनैवभगवत्प्रीत्यातेवैपाप० ॥ समस्तयज्ञभोक्तारमविदित्वाऽच्युतंहरिम् ॥ उद्दिश्यदेवताअन्याञ्जुहोतिचददातिच ॥ सपाषण्डीतिविज्ञेयःस्वतन्त्रोवापिकर्मसु ॥ यस्तुनारायणंदेवंब्रह्मरुद्रादिदैवतैः ॥ समत्वेनैववीक्षेतसपापण्डीभवेत्सदा ॥ अवस्था-त्रितयेयस्तुमनोवाक्कायकर्मभिः ॥ वासुदेवंनजानातिसपाषण्डीभवेन्नरः ॥ किमत्रबहु-नोक्तेनब्राह्मणायेह्यवैष्णवाः ॥ तेवैपाषण्डिनोज्ञेयाःसर्वलोकेपुगर्हिताइत्याद्याह ॥ ततोगिरि-जया कपालभस्मचर्मास्थिधारणप्रभृतिदुराचारकारणेऽनुयुक्ते श्रीमहादेवः (श्लोक २०) नमुच्याद्यामहादैत्याःपुरास्वायंभुवान्तरइत्यादिना कर्मज्ञानभक्तिसंपन्नैर्दैत्यैर्देवानां स्थाना-देर्हरणं ततोनिर्जराणां श्रीहरिं प्रति शरणभावेन सरणं प्रार्थनं च वर्णयित्वाह ॥ (श्लोक २७) इत्याकर्ण्यहरिर्वाक्यंदेवतानां भयार्तितः ॥ तानवध्यान्विदित्वायममाह-पुरुषोत्तमः ॥ (तान्दैत्यान्) त्वंचरुद्रमहाबाहोमोहनार्थंसुरद्विषाम् ॥ पाषण्डाचरणं-धर्मंकुरुष्वसुरसत्तम ॥ तामसानिपुराणानिकथयस्वचतान्प्रति ॥ मोहनानिचशास्त्राणि-कुरुष्वचमहामते ॥ मत्प्रभक्ताश्चयेत्वेन्निन्दविष्यन्तिमहर्षयः ॥ स्वच्छतयातान्समाविश्य-रचयस्वचतामसान् ॥ कणादंगौतमंशक्तिमुपमन्युंचजैमिनिम् ॥ दुर्वाससंचकपिलंमृकण्डुंच बृहस्पतिम् ॥ भार्गवंजमदग्निंचदशैतांस्तामसानृषीन् ॥ तत्रवाक्यासमाविश्यकुरुष्वजगतो-हितम् ॥ स्वच्छत्वयासन्निविष्टास्ते तमसोद्रिक्तयाभृशम् ॥ तामसान्भविष्यन्तिक्षणा-देवनसंशयः ॥ कथयिष्यन्तितेविप्रास्तामसानिजगन्मये ॥ पुराणानिचशास्त्राणित्वत्परत्वेन-बृंहिताः ॥ कपालभस्मचर्मास्थिचिह्नान्यमरपूजित ॥ त्वमेवधृत्वातांल्लोकान्मोहयस्वजग-न्मये ॥ तथापाशुपतंशास्त्रंत्वमेवकुरु सुव्रत ॥ कङ्कालशैवपाषण्डमहाशैवादिभेदतः ॥

अवलम्ब्यमतंसम्यग्वेद्याह्यंद्विजोत्तमाः ॥ भस्मास्थिधारिणःसर्वे भविष्यन्तिनसंशयः ॥ त्वांपरत्वेनवक्ष्यन्तिसर्वशास्त्रेषुतामसाः ॥ तेषांमतमधिष्ठायसर्वेदैत्याश्चदानवाः ॥ भवेयुस्तेमद्विमुखाः क्षणादेवनसंशयः ॥ अहमप्यवतारेषुत्वांचरुद्रमहाबल ॥ तामसानांमोहनार्थं पूजयामियुगेयुगे ॥ मतमेतदवष्टभ्यपतन्त्येवनसंशयइति भगवदाज्ञामनूद्य पाषण्डप्रवर्तने स्वस्योद्वेगं तद्वारणाय भगवताज्ञप्तं नामसहस्रस्य रामषडक्षरतारकमन्त्रस्य च जपितव्यत्वं (श्लो० ५३) मनसैवार्चयित्वात्तुमांनाथंपुरुषोत्तमम् ॥ मदाज्ञांकुरुमच्छीत्यासर्वमेतच्छुभंतवेत्यन्तेन निरूप्य ततः स्वयं पाशुपतादिशास्त्रोत्पादनं तमःप्रधानशक्त्याऽऽविष्टविप्रद्वारा मोहकशास्त्रोत्पादनं च यावदध्यायसमाप्तिनिर्दिष्टवान् ॥ ततोद्विचत्वारिंशे ॥ पार्वत्युवाच ॥

तामसानिचशास्त्राणिसमाचक्ष्वममानघ ॥ संप्रोक्तानीहतैर्विप्रैर्भगवद्भक्तिवर्जितैः ॥ तेषांनामानिक्रमशःसमाचक्ष्वसुरेश्वर ॥ श्रीरुद्रउवाच ॥ शृणुदेविप्रवक्ष्यामितामसानि यथाक्रमम् ॥ येषांश्रवणमात्रेणपातित्यंज्ञानिनामपि ॥ प्रथमंतुमयैवोक्तंशैवंपाशुपतादिकम् ॥ मच्छक्त्यावेशितैर्विप्रैःसंप्रोक्तानिततःपरम् ॥ कणादेनतुसंप्रोक्तंशास्त्रंवैशेषिकंमहत् ॥ गौतमेनतथान्यायंसाङ्ख्यंतुकपिलेनवै ॥ धिषणेनतथाप्रोक्तंचार्वाकमतिगर्हितम् ॥ दैत्यानांनाशनार्थायविष्णुनाबुद्धरूपिणा ॥ बौद्धशास्त्रमसत्प्रोक्तं नग्ननीलपटादिकम् ॥ मायावादमसच्छास्त्रंप्रच्छन्नंबौद्धमुच्यते ॥ मयैवकथितंदेवि कलौब्राह्मणरूपिणा ॥ अपार्थं श्रुतिवाक्यानांदर्शयल्लोकगर्हितम् ॥ कर्मस्वरूपत्याज्यत्वमत्रैवप्रतिपाद्यते ॥ सर्वकर्मपरिभ्रष्टंविकर्मित्वंतदुच्यते ॥ परेशजीवयोरैक्यंमयात्रप्रतिपाद्यते ॥ ब्रह्मणश्चपरंरूपंनिर्गुणं वक्ष्यतेमया ॥ सर्वस्यजगतोप्यत्रमोहनार्थंकलौयुगे ॥ वेदार्थवन्महाशास्त्रंमायावादमवैदिकम् ॥ मयैववक्ष्यतेदेविजगतांनाशकारणात् ॥ द्विजन्मनाजैमिनिनापूर्वंवेदमपार्थतः ॥ निरीश्वरेणवादेनकृतंशास्त्रंमहत्तरम् ॥ शास्त्राणिचैवंगिरिजेतामसानिनिबोधमइति ॥ इमानि च वचनानि विज्ञानेन्द्रभिक्षुनागोजीभट्टादिभिः प्रामाणिकैरप्युदाहृतानीति न तेषु कल्पितत्वादिशङ्कावकाशः ॥ वाराहे च प्रागितिहासे रुद्रगीतासु भगवान् ॥ त्वंचरुद्र महाबाहोमोहशास्त्राणिकारय ॥ अतथ्यानिवितथ्यानिदर्शयस्वमहाभुज ॥ प्रकाशंकुरु चात्मानमप्रकाशंचमांकुरु ॥ इति ॥ इतिवदन्ति ॥ अवशिष्टं तूत्तरभागे वक्ष्यते ॥ तदेतद् सर्वमनुसंधायोक्तंमूले ॥ पाद्मवाराहादिषुप्रसिद्धमिति ॥ अन्यत्रेति ॥ निबंधादिषु बुद्धावतारेत्वधुना हरौ तद्वशगाः सुरा इत्यादिस्थले विस्तरइत्यर्थः ॥ अथ सहस्राक्षे ब्राह्मणैरितीत्यादिना उदाहृतमेवेत्यन्तेनारोपितं वैष्णवाचार्येषु तदनुयायिषु च शठत्वं परिहर्तुं तं मार्गं निराकुर्वन्ति ॥ यच्चशठानामित्यादिनाफलानीतिबहुवचनस्यानुपपन्नत्वादित्यन्तेन ॥ अत्रेदं बोध्यम् ॥ यत्सहस्राक्षे सप्तविंशाध्यायवचनं प्रथममुक्तं तत्पूर्वापरविचाराद्व वैष्णवविषयकम् ॥ तथाहि ॥ तस्मिन्नध्याये

यच्च शठानां लक्षणसप्तकमुक्तं तदपि तेषांलक्षणत्वेनाभिमतानां वास्तवलक्षणत्वमेव घटते नत्वारोपमात्रेण ॥ नहि मरुमरीचिका केनचिदज्ञेन जलत्वेनारोपितापि स्नानपानादि कार्यक्षमाभवति ॥

किंतावद्वास्तवं लक्षणत्वम् ॥ लक्ष्यतावच्छेदकसमनियतत्वमिति गृहाण ॥ लक्ष्यतावच्छेदकसमनियतत्वं च लक्ष्यतावच्छेदकवन्निष्ठभेदप्रतियोगितानवच्छेदकत्वे सति लक्ष्यतावच्छेदकनिष्ठावच्छेदकताकप्रतियोगिताकभेदवदवृत्तित्वम् ॥ इदमेवासाधारणत्वम् ॥ तादृशमेव च लक्षणमव्याप्त्यतिव्याप्त्यसंभवरूपदोषत्रयरहितं भवति ॥ तद्भिन्नं च लक्षणाभासत्वेन व्यवह्रियते ॥ नहिलक्षणाभासेन व्यवहर्तव्यव्यवहारो भवति ॥ अन्यथाशृङ्गित्वरूपलक्षणेन महिष्यादावपि गौरिति व्यवहारापत्तिः ॥ तस्माद्दोषत्रयविनिर्मुक्तेनैव लक्षणेन प्रामाणिकानां व्यवहारः ॥ तस्यैव लक्ष्यतावच्छेदकसमनियतत्वात् ॥ त्वदुक्तलक्षणानां तु दोषदूषितत्वेन न प्रामाणिकव्यवहारप्रयोजकत्वम् ॥ लक्षणाभासत्वात् ॥

पृथिव्यां धर्मस्थापनादिसर्वकार्यानन्तरं श्रीकृष्णः स्वधाम जिगमिषुंस्तस्मिन्नवसरे समागतान्भृग्वादीन्यथोचितं सत्कृत्याह ॥ गमिष्यामिपरंस्थानंस्वकीयंविष्णुसंज्ञितम् ॥ कृतानिसर्वकार्याणिप्रसीदध्वंमुनीश्वराः ॥ इदंकलियुगंघोरंसंप्राप्तमधुनाऽशुभम् ॥ भविष्यन्तिजना सर्वेह्यस्मिन्पापानुवर्तिनः ॥ प्रवर्तयध्वंविज्ञानमज्ञानांचहितावहम् ॥ येनेमेकलिजैःपापैर्मुच्यंतेहिद्विजोत्तमाः ॥ येमांजनाःसंस्मरन्तिकलौसकृदपिप्रभुम् ॥ तेषांनश्यतितत्पापंभक्तानांपुरुषोत्तमे ॥ येचैवंयिष्यन्तिमांभक्त्यानित्यंकलियुगेद्विजाः ॥ विधिनावेददृष्टेनतेगमिष्यन्तितत्पदम् ॥ येब्राह्मणावंशजातायुष्माकंवैसहस्रशः ॥ तेषां

ब्राह्मणैरिति ॥ गौतमादिभिरित्यर्थः ॥ उक्तंहि कौर्मे पूर्वखण्डे सप्तविंशेऽध्याये श्रीकृष्णेन भृग्वादीन्प्रति ॥ द्विषन्तो देवमीशानं युष्माकं वंशसंभवाः ॥ शप्ताश्च गौतमेनोर्व्यां न सम्भाष्या द्विजोत्तमैः ॥ १ ॥ तत्रैवैकोनत्रिंशेऽध्यायेऽर्जुनं प्रति व्यासेन ॥ कुर्वन्ति चायतारारणि ब्राह्मणानां कुलेषु वै ॥ देवीशापाग्निनिर्दग्धाः पुरा दक्षाऽध्वरे द्विजाः ॥ १ ॥ निन्दन्ति च महादेवं तमसाऽऽविष्टचेतसः ॥ वृथाधर्मं चरिष्यन्ति तस्मिन्काले युगान्तके ॥ २ ॥ येचाऽन्ये शापनिर्दग्धा गौतमस्य महात्मनः ॥ सर्वेतेऽवतरिष्यन्ति ब्राह्मणास्तासु योनिषु ॥ ३ ॥ इत्याद्युक्त्वोक्तम् ॥ मोहयन्ति जनान्सर्वान्दर्शयित्वा फलानि वै इति ॥ कौर्मे पूर्वखण्डएव दक्षं प्रति दधीचेन ॥ भविष्यन्ति त्रयीबाह्याः सर्वेऽपीश्वरविद्विषः ॥ निंदन्तोहेश्वरं मार्गं कुशास्त्राऽऽसक्तचेतसः ॥ १ ॥ मिथ्याऽधीतसमाचारामिथ्याज्ञानप्रलापिनः ॥ प्राप्य कलियुगं घोरं कलिजैः परिपीडिताः ॥ २ ॥ त्यक्त्वा तपोबलं कृत्स्नं गच्छध्वं नरकान्पुनः ॥ भविष्यति हृषीकेश स्वाश्रितोऽपि पराङ्मुखः ॥ ३ ॥ ये ये शापाऽग्निनिर्दग्धा दधीचस्य महर्षयः ॥ द्विषन्तो मोहितादेवं सम्भूतास्ते कलिष्वथ ॥ ४ ॥ इत्याद्युक्त्वा त्यक्त्वा तपोबलं कृत्स्नं विप्राणां कुलसम्भवाः ॥ इतिचोक्त्वा कल्पान्ते रौरवादिषु निपात्यमानाः कालेनेत्युक्तम् ॥ तत्र द्विषन्तोदेवम् इत्यत्र लक्षणहेत्वोः क्रियाया इति सूत्रेण लक्षणे हेतौ वा शता भवन्विप्रो न नमनीयः पचन्विप्रोन श्राद्धे भोजनीयइत्यादिवत् ॥

नारायणेभक्तिर्भविष्यतिकलौयुगे ॥ परात्परतरंयान्तिनारायणपरायणाः ॥ नतेतत्रगमिष्यन्तियेद्विषन्तिमहेश्वरम् ॥ ध्यानंयोगस्तपस्तसंज्ञानंयज्ञादिकोविधिः ॥ तेषांविनश्यति क्षिप्रंयेनिन्दन्तिमहेश्वरम् ॥ योमांसमर्चयेन्नित्यमेकान्तभावमाश्रितः ॥ विनिन्दन्देवमीशानं सयातिनरकायुतम् ॥ तस्मात्संपरिहर्तव्यानिन्दापशुपतौद्विजाः ॥ कर्मणामनसावाचामद्भक्तेष्वपियत्नतः ॥ येचदक्षाध्वरेशापाद्दधीचेनद्विजोत्तमाः ॥ भविष्यन्तिकलौभक्तैःपरिहार्याः प्रयत्नतः ॥ द्विषन्तोदेवमीशानंयुष्माकंवंशसंभवाः ॥ शप्ताश्चगौतमेनोर्व्यांनसंभाष्याद्विजोत्तमैः ॥ एवमुक्ताश्चकृष्णेनसर्वेतेवैमहर्षयः ॥ ओमित्युक्त्वाययुस्तूर्णंस्वानिस्थानानिसत्तमाः ॥ ततोनारायणःकृष्णोलीलयैवजगन्मयः ॥ संहृत्यस्वकुलंसर्वंययौतत्परमंपदमिति ॥ अत्र सर्वेषां पापानुवर्तनमज्ञानां तेषां हितार्थं कलिजपापनाशार्थं च स्वविज्ञानस्य प्रवर्तनमाज्ञाप्य कथंत्वद्विज्ञानमित्याकाङ्क्षायां सर्वदापुरुषोत्तमस्मरणनिष्ठतत्सेवनादिनेत्याशयेन येमांजनाः संस्मरन्तीतिश्लोकद्वयमुक्त्वा पुरुषोत्तमस्मरणसेवाऽपरोक्षज्ञानसाधकवैष्णवसंप्रदायानां भवनं सूचयित्वा श्रीमहादेवनिन्दकस्यदुष्फलावश्यंभावाद्वैष्णवैरपिशिवनिन्दा न कार्येति निश्चाय्य वैष्णवनिन्दापि यत्नतस्त्याज्येति चाभिधाय वेदादिविमुखैः सह संसर्गोवैष्णवैर्नकार्यइत्युच्यते येचेतिश्लोकेन ॥ देवमीशानमिति तूपलक्षणम् ॥ विनिन्दन्तिहृषीकेशं ब्राह्मणान्ब्रह्मवादिनइति वक्ष्यमाणत्रिंशाध्यायवाक्यैकवाक्यत्वसिद्धेः ॥ अतोविष्णुशिवदेववेदादिद्वेषिणोये वेदबाह्यास्ते न संभाष्याइत्येवार्थः ॥ तत्रैव षोडशाध्याये ॥ कापालंलाकुलंवामंभैरवंपूर्वपश्चिममित्यादिना गौतमशप्तानां कापालादिवेदबाह्यशास्त्रेष्वेव प्रवृत्तिकथनात् ॥ शिवादिद्वेषरहिताः प्रत्युत शिवप्रवर्तितपुरुषोत्तमभक्तिमार्गनिष्ठा वेदानुयायिनो वयंतु नास्य चान्यस्य गोचराः ॥ एवमुक्ताश्चेति श्लोके ओमित्युक्त्वेति ॥ प्रवर्तयध्वंविज्ञानमित्यादिना भगवताऽऽज्ञसं तत्साक्षात्कारसाधनसंप्रदायप्रवर्तनादिकमङ्गीकृत्येत्यर्थः ॥ एवं स्वस्थापितधर्मज्ञानादीनां भुवि चिरमवस्थानसिद्धये भृग्वादीन्प्रत्याज्ञापनोत्तरं भगवतः स्वधामगमनं वर्णितम् ॥ लोकक्षेमार्थमेवकलौ भूयो भक्तिमार्गप्रवृत्तिरित्यत्र साधकानि ब्रह्माण्डादिवचनानि मूले वक्ष्यन्ते ॥ यच्च कुर्वन्तिचावताराणीत्यादिवचसामेकोनत्रिंशाध्यायस्थत्वमुक्तं तत्प्रमादात् ॥ तेषांत्रिंशाध्यायएवोपलंभात् ॥ तत्रापि ब्राह्मणास्तासुयोनिष्वित्यस्याग्रेऽनुपदमेवोच्यते ॥ विनिन्दन्तिहृषीकेशंब्राह्मणान्ब्रह्मवादिनः ॥ वेदबाह्यव्रताचाराद्दुराचारावृथाश्रमाः ॥ मोहयन्तिजनान्सर्वान्दर्शयित्वाफलानिवै ॥ तमसाऽऽविष्टमनसोवैडालव्रतिकाधमाइति ॥ इमान्यपि वचनानि शिवविष्ण्वादिनिन्दक वेदबाह्यनिरर्थकाचारविशिष्टविषयिकाणि ॥ कण्ठरवेण वेदबाह्यव्रताचाराइत्याद्युक्तेः ॥ षोडशाध्यायैकवाक्यत्वसिद्धेश्च ॥ विरागिशब्दवाच्यवर्णाश्रमपरिभ्रष्टत्वाद्दशयतिविषयाणि च ॥ एकोनत्रिंशे ॥ अस्मिन्कलियुगेघोरेनराःपापानुवर्तिनः ॥ भविष्यन्तिमहाबाहोवर्णाश्रमविवर्जिता इत्यर्जुनंप्रति व्यासेन कथनात् ॥ प्रकृताध्यायेच ॥ यतयश्चभविष्यन्तिशतशोथ सहस्रशः ॥ नाशयंतः स्वकंधर्मंनाधिगच्छन्तितत्पदमिति तेनैवनिरूपणात् ॥ एतच्च सर्वं मूलएव स्फुटीभविष्यतीति व्याख्यानेपि तत्रैव प्रपञ्चयिष्यते ॥ यानिचभविष्यन्तितथी-

यायादृत्यादीनि पूर्वखण्डपञ्चदशाध्यायवचांसि प्रकरणगोपनाय पूर्ववद्ध्यायादिक्रमनिर्दिश्योक्तानि तेषामपि पूर्वापरभागपर्यालोचनेऽन्यएव विषयः सिध्यति नतु तेषु त्वदुक्तं किञ्चिदपीति मूलपद्योपपादयिष्यते ॥ लक्षणहेत्वोरिति शताऽपि विचारयिष्यते ॥ वास्तवार्थाऽऽच्छादनाय त्वया यथा त्रिंशाध्यायवाक्येषु विनिन्दन्तिहृषीकेशमित्येकं श्लोकं "इत्याद्युक्त्वा" इत्युक्त्या पिधाय मोदयन्तिजनान्सर्वानित्यर्धमेवानूदितम् ॥ तथा पञ्चदशाध्यायवचस्स्वपि पूर्वापरभागौ मध्यमान्भागविशेषांश्च तिरोधायभ्रमजननक्षमएव भागोऽनूद्यते तत्सर्वंपुरस्तादुद्घाटयिष्यामः ॥ तस्मादज्ञानदुर्बलच्छलनमात्रफलकमखिलमेतदिति प्रेक्षावतामुपेक्षार्हम् ॥ तथापि शास्त्रविनोदरसिका मूलग्रन्थकाराः प्रथमं तदुक्तमभ्युपेत्य तेन लक्षणतयाभिमतेषु सत्सु वास्तवलक्षणत्वमास्ति नवेत्येव तावत्परीक्षन्ते ॥ **तदपितेषामित्यादिना** ॥ **कार्यक्षमेति** ॥ कार्ययोग्या कार्यस्य भूमिर्वा ॥ **लक्ष्यतावच्छेदकसमनियतत्वमिति** ॥ समनियतत्वं हि तद्व्यापकत्वविशिष्टतद्व्याप्यत्वम् ॥ वैशिष्ट्यं च स्वरूपवदितसामानाधिकरण्यसंबन्धेन ॥ तादृशसामानाधिकरण्यं च स्वरूपसंबन्धावच्छिन्नतद्व्यापकत्वनिष्ठाधेयतानिरूपिताधिकरणतावन्निरूपितस्वरूपसंबन्धावच्छिन्नतद्व्याप्यत्वनिष्ठाधेयतारूपम् यथा प्रमेयत्वेऽभिधेयत्वसमनियतत्वमभिधेयत्वे च तत्समनियतत्वम् ॥ लक्ष्यतावच्छेदकव्यापकत्वं च लक्ष्यतावच्छेदकाधिकरणनिष्ठात्यन्ताभावप्रतियोगितानवच्छेदकधर्मवत्त्वम् ॥ लक्ष्यतावच्छेदकवन्निष्ठभेदप्रतियोगिताऽनवच्छेदकत्वं वा ॥ लक्ष्यतावच्छेदकसमानाधिकरणा यावन्तोधर्मायत्समानाधिकरणास्तत्त्वं वा ॥ लक्ष्यतावच्छेदकव्याप्यत्वं च लक्ष्यतावच्छेदकावच्छिन्नप्रतियोगिताकभेदवदवृत्तित्वम् ॥ लक्षणाधिकरणनिष्ठात्यन्ताभावाप्रतियोगिलक्ष्यताऽवच्छेदकसामानाधिकरण्यं वा अत्र गोत्वाव्याप्ये तद्व्यापकेशृङ्गित्वे गोलक्षणत्वाभावाय विशेष्यदलम् ॥ लक्ष्यतावच्छेदकव्याप्यस्यैव लक्षणत्वे तु गृष्टित्वसमानाधिकरणशृङ्गित्वेपि गोलक्षणत्वं स्यात् ॥ तथाच द्विखिः प्रसूतगव्यादावव्याप्तिरिति तत्र तल्लक्षणत्वव्यवच्छेदाय विशेषणदलम् ॥ एतदेव सर्वमुरसि कृत्वाहुः ॥ **लक्ष्यतावच्छेदकवन्निष्ठेत्यादि** ॥ अत्र तद्व्यापकत्वं सत्यन्तदलस्यार्थः ॥ तद्व्याप्यत्वं प्रथमान्तदलस्य ॥ यथा ॥ शृङ्गित्वसमानाधिकरणसास्नावत्त्वं गोर्लक्षणम् ॥ सरटेऽतिव्याप्तिवारणाय शृङ्गित्वसामानाधिकरण्यम् ॥ शृङ्गित्वंहि शृङ्गसंबन्धः ॥ सास्नावत्त्वे तत्सामानाधिकरण्यं च स्वरूपसंबन्धावच्छिन्नशृङ्गित्वनिष्ठाधेयतानिरूपिताधिकरणतावन्निरूपितस्वरूपसंबन्धावच्छिन्नाधेयताशालित्वम् ॥ शृङ्गित्वमात्रस्य महिष्यादावतिप्रसङ्गात्तद्वारणाय सास्नावत्त्वम् ॥ अत्र लक्ष्यतावच्छेदकं गोत्वम् ॥ तद्वन्निष्ठोभेदश्च घटादिप्रतियोगिकोभेदःतादृशभेदप्रतियोगितावच्छेदकं लक्षणम् ॥ तथा गोत्वनिष्ठा अवच्छेदकता यस्यास्तादृशी प्रतियोगिता यस्य तादृशोयोभेदः लक्ष्यतावच्छेदकावच्छिन्नप्रतियोगिताकभेदइतियावत् ॥ तद्वन्तो घटादयः तदवृत्तित्वं गोलक्षणस्य वर्ततइति तत्र लक्षणेसमन्वयः ॥ दलद्वयकृत्यं तु प्रागेव दर्शितम् ॥ प्रतियोगिताकपदरहितपाठेतु अवच्छेदकतायां भेदस्य स्वनिरूपितप्रतियोगितावच्छेदकतात्वं संसर्गः ॥ **तादृशमेवेति** ॥ असाधारणमेव वास्तवमेवेति यावत् ॥ **अव्याप्त्यतिव्याप्त्यसंभवरूपदोषत्रयरहित-**

मिति ॥ अव्याप्तिर्हि लक्ष्यतावच्छेदकसमानाधिकरणात्यन्ताभावप्रतियोगित्वम् ॥ लक्षणतावच्छेदकतयाभिमतसंबंधेन लक्ष्यैकदेशावृत्तित्वं वा ॥ यथा कपिलत्वं गोर्लक्षणमित्युच्यमाने शुक्लादिगवीष्वव्याप्तिः ॥ कालिकसंबन्धेन तद्वृत्तित्वस्यानपनोद्यतया द्वितीयलक्षणे संबन्धविशेषनिवेशः ॥ अतिव्याप्तिस्तु लक्षणस्यालक्ष्यवृत्तित्वम् ॥ लक्ष्यतावच्छेदकाधिकरणवृत्तित्वे सति लक्ष्यतावच्छेदकावच्छिन्नप्रतियोगिताकभेदसामानाधिकरण्यं वा ॥ यथा शृङ्गित्वस्य गोलक्षणत्वे महिष्यादावतिव्याप्तिः ॥ असंभवश्च लक्ष्यमात्रावर्तनम् ॥ लक्ष्यतावच्छेदकव्यापकीभूताभावप्रतियोगित्वं वा ॥ यथा एकशफत्वरूपगोलक्षणस्यासंभवः ॥ एतद्दोषत्रयात्यंताभाववदित्यर्थः ॥ व्यावृत्तिर्व्यवहारोवालक्षणस्यप्रयोजनमित्यभियुक्तोक्तेर्व्यवहारस्य लक्षणप्रयोजनत्वमभिप्रेत्याहुः ॥ व्यवहर्तव्यव्यवहारइत्यादि ॥ व्यवहर्तव्यानांगवादिपदानांव्यवहारइत्यर्थः ॥ अन्यथेति ॥ लक्षणाभासवत्यपि तत्वेन व्यवहारस्याङ्गीकारे ॥ लक्षणेनेति ॥ लक्षणाऽऽभासेन ॥ अतएव (आर्या ५ व्याख्या) साङ्ख्यतत्वकौमुद्यां वाचस्पतिमिश्रः ॥ "समानासमानजातीयव्यवच्छेदोलक्षणार्थः" इत्याह ॥ अत्र "समानजातीयेभ्यश्चासमानजातीयेभ्यश्च व्यवच्छिद्यतेयेनेतिव्युत्पत्तिलभ्योलक्षणशब्दार्थः" इतिकश्चिद्व्याचष्टे ॥ वस्तुतस्तु तदुभयव्यवच्छेदोलक्षणप्रयोजनमित्यक्लिष्टोर्थः प्रतीयते ॥ एवं च समानासमानजातीयव्यवच्छेदकत्वं लक्षणत्वमिति तन्मतं फलति ॥ समानजातीयव्यवच्छेदकत्वमात्रं विशेषणेतिव्याप्नोति ॥ नीलोघटइत्यादौ नीलादिपदेन समानजातीयस्य रक्तघटादेरेव व्यवच्छेदात् ॥ लक्षणं तु स्वलक्ष्यं गवादिकंअसमानजातीयेभ्योपि महिष्यादिभ्योव्यवच्छिनत्ति ॥ असमानजातीयव्यवच्छेदकत्वमात्रकथने सामान्येतिव्याप्तिः ॥ गोत्वादिसामान्यस्यासजातीयव्यवच्छेदकत्वात् ॥ अतउभयग्रहणम् ॥ एवंलक्षणस्य व्यावृत्तिरूपे प्रथमप्रयोजने सिद्धे व्यावृत्तस्थलएव तत्वव्यवहारोऽर्थात्सिद्ध्यतीति नलक्षणाभासेन व्यवहार. ॥ एतदेवाहुः ॥ तस्मादित्यादि ॥

कथं तेषां दुष्टत्वमिति चेच्छृणु ॥ शिवद्वेषोविप्रशास्तस्य प्रथमं लक्षणमुक्तं तत्र लक्ष्यतावच्छेदकं विप्रशास्तत्वम् ॥ शिवद्वेषोलक्षणम् ॥ एवंच लक्ष्यतावच्छेदकनिष्ठावच्छेदकताकभेदवत्स्वन्धकजालंधरादिदैत्येषु शिवद्वेषस्य सत्वेनातिव्याप्तिः ॥ न तेषां विप्रशास्तत्वं पुराणेषु प्रसिद्धम् ॥ मनुष्यत्वे सतीति विशेषणान्नैवमिति चेद्बौद्धेष्वतिव्याप्तिः ॥ स्वस्यव्याप्तिश्च ॥ विप्रत्वावच्छिन्नयावद्विप्रशास्तत्वस्याप्रसिद्धत्वेनतत्तद्व्यक्तित्वावच्छिन्नशास्तत्वस्य च तत्तद्व्यक्तीनां ज्ञानासंभवात् दुर्ज्ञेयत्वेन यत्किंचिद्व्यक्तिशास्तत्वस्यैव लक्ष्यतावच्छेदकस्य वक्तव्यत्वेनेदृशग्रन्थकर्तृत्वेन वैष्णवविप्रशास्ते स्वस्यप्येतादृशलक्ष्यतावच्छेदकाक्रान्ते लक्षणस्यासत्वादव्याप्तिः स्यादेव ॥

सहस्राक्षे तेनशिवद्वेषइत्यादिनाऽनभिरक्षनमित्यन्तेन दर्शितं प्रथमलक्षणं दूषयन्ति ॥ शिवद्वेषोविप्रशास्स्येत्यादिना शिवद्वेषोनलक्षणमित्यन्तेन ॥ लक्ष्यताव-

च्छेदकनिष्ठावच्छेदकताकेति ॥ लक्ष्यतावच्छेदकावच्छिन्नप्रतियोगिताकोयोभेदस्त-
द्वत्त्वमितिभावः ॥ अवच्छेदकतायां भेदस्य स्वनिरूपितप्रतियोगितावच्छेदकत्वं संसर्गः ॥
अन्धकजालंधरादिदैत्येष्विति ॥ अल्पाच्तरत्वादन्धकस्यपूर्वनिपातः ॥ अन्धकोहि
हिरण्याक्षपुत्रः शिवं द्विष्टवान् ॥ तथाच कौर्मएव पूर्वखण्डे षोडशाध्याये ॥ अभिषेकेन
युक्तेनहिरण्याक्षमयोजयत् ॥ सबाधयामाससुरान्रणेजित्वा मुनीनपि ॥ लब्ध्वान्धकं
महापुत्रंतपसाराध्यशङ्करमितितदुत्पत्तिरुक्ता ॥ अग्रेच अथापतन्महद्राज्यमन्धकोऽसुर-
पुङ्गवः ॥ हिरण्यनेत्रतनयः शंभोर्देहसमुद्भवः ॥ मन्दरस्थांउमांदेवींचकमेपर्वतात्मजा-
मित्यादिना विस्तरेण शिवद्वेषोवर्णितः ॥ अतएवान्धकरिपुरिति शिवस्याभिख्या सुप्रसिद्धा ॥
जालंधरस्तु पुरन्दरोपरि क्रुद्धस्य शङ्करस्य नेत्रजन्मा वह्निर्बृहस्पतिप्रसादितेन तेन
गङ्गासागरसंगमे क्षिप्तः सागरपुत्रोभूत्वा दैत्येश्वरतां प्राप्तः श्रियः प्रार्थनया हरिणापि
रणे न हतः सर्वसुराञ्जित्वा नारदगिरा गिरिसुताकामः शिवं द्विष्टवानितिपद्मपुराणे
कार्तिकमाहात्म्ये नवमाध्यायमारभ्य सप्तदशाध्यायपर्यंतंविस्तरेण निरूपितम् ॥ आदिपदेन
श्रीभागवतादिप्रसिद्धा वृकासुरप्रभृतयः शिवद्वेषिणः संगृह्यन्ते ॥ नतेषांविप्रशप्तत्व-
मिति ॥ पुराणेषु तथाकथाया अदर्शनाच्छ्रुतशिवप्रसादजन्यत्वशंभुदेहसमुद्भवत्वादि-
कथनेन शप्तत्वाभावनिश्चयाच्च तथा ॥ किञ्चिदाशङ्क्यपरिहरन्ति ॥ **मनुष्यत्वइत्यादिना** ॥
बौद्धेषु वेदादिद्वेषिषु शिवद्वेषस्यापि सत्त्वादितिभावः ॥ वस्तुतस्तु लक्षणसप्तकस्य
कौर्मवचोभ्यएवावगमस्य स्वीकारात्तेष्वस्य विशेषणस्यानुपादानाच्च मनुष्यत्वे सतीति
वादिनःकल्पनमेवायुक्तम् ॥ मानाभावात् ॥ नच ऋषीन्प्रतियुष्माकंवंशसंभवाइत्युक्तिरेव
तत्र मानमिति वाच्यम् ॥ दैत्यानां दानवानां च कश्यपवंशसंभवत्वेन राक्षसानां
पुलस्त्यपुत्रसंभवत्वेन च ऋषिवंशोद्भवतानपायात् ॥ प्रत्युत तासु योनिष्वितिबहुवचनेन
दैत्यादेरपि संग्रहस्यौचित्यं प्रतीयते ॥ तत्तद्व्यक्तित्वावच्छिन्नशप्तत्वस्येति ॥ अस्य
दुर्ज्ञेयत्वेनेत्युत्तरेणान्वयः ॥ तत्तद्व्यक्तीनामित्यादिस्तु दुर्ज्ञेयत्वेहेतुः ॥ वैष्णवविप्रशप्त
इति ॥ कौर्मे सप्तविंशे कर्मणामनसावाचाभक्तेष्वपियत्नत इतिवैष्णवनिन्दाया विशे-
षतः प्रतिषेधात् ॥ त्रिंशेपि विनिन्दन्ति हृषीकेशंब्राह्मणान्ब्रह्मवादिनइति भगवन्निन्दायां
परमाणुप्रधानमायादिवादान् हित्वा ब्रह्मवादमाश्रयतां ब्राह्मणानां निन्दायां च त्वद्रीत्यैव
शप्तलक्षणतासिद्धेश्च तथेति भावः ॥ किंच श्रीभागवते चतुर्थस्कन्धद्वितीयाध्याये (श्लो०
२८।२९।३०।३१।३२) भवव्रतधरायेचयेचतान्समनुव्रताः ॥ पाखण्डिनस्तेभवन्तुसच्छा-
स्त्रपरिपन्थिनः ॥ नष्टशौचामूढधियोजटाभस्मास्थिधारिणः ॥ विशन्तुशिवदीक्षायां यत्रदै-
वंसुरासवम् ॥ ब्रह्मच ब्राह्मणांश्चैवयद्यूयंपरिनिन्दथ ॥ सेतुंविधारणंपुंसामतःपाखण्डमा-
श्रिताः ॥ एषएवहि लोकानांशिवःपन्थाःसनातनः ॥ यंपूर्वेचानुसंतस्थुर्यत्प्रमाणंजनार्दनः ॥
तद्ब्रह्मपरमंशुद्धं सतांवर्त्मसनातनम् ॥ विगर्ह्ययातपाखण्डंदैवंवोयत्रभूतराडितिभृगोः शापः
पठ्यते ॥ त्वयि तादृशधर्मसत्त्वं तु त्वदीयशैवसुधाकरदर्शनान्निःसंशयमवगम्यते ॥ पुनः
किंचिदाशङ्क्य परिहरन्ति ॥ **नन्वित्यादि** ॥ **बौद्धेष्विति** ॥ इदमुपलक्षणम् ॥ तेन

ननु नाहं शिवद्वेषपदेन देवतात्मकेश्वरद्वेषं ब्रवीमि येनान्धकादिष्वतिव्याप्तिः प्रसज्येत ॥ किंतु शिवावतारशङ्कराचार्यद्वेषम् ॥ अतएवोक्तं श्रौतधर्मवक्तरि कलिमलहर्तरीतिचेत्तथापि बौद्धेष्वतिव्याप्तिः स्यादेव ॥ मण्डनमिश्रादावतिव्याप्तिश्च ॥ किंचाप्रीतिपदेन प्रीतिभेदो विवक्षितः प्रीत्यत्यन्ताभावोवा प्रीतिविरोधि वा ॥ नाद्यः ॥ वृक्षादावतिव्याप्तेः शिवभक्तेष्वतिव्याप्तेश्च ॥ नापि द्वितीयतृतीयौ ॥ घटादावतिव्याप्तेः ॥ प्रीतिविरोधिनोद्विष्टसाधनताज्ञानजन्यस्यांतःकरणवृत्तिविशेषस्य शिवभक्तेषु रावणादिष्वसत्त्वेन सनकादिशप्तेषु तेषु विप्रशप्तत्वरूपलक्ष्यतावच्छेदकान्तेष्वव्याप्तेर्दुर्वारत्वाच्च ॥ तस्माच्छिवद्वेषो न लक्षणम् ॥

येये वादिनोदिग्विजयादिषु शङ्कराचार्यैः समग्रमहपूर्वकवादादिकर्तृत्वेन प्रसिद्धास्तेषु सर्वेष्वतिव्याप्तिः ॥ नचेष्टापत्तिः ॥ अशेषस्य जगतः शप्ततायां वक्तुमशक्यत्वात् ॥ शङ्कराचार्यानुयायिष्वप्यतिव्याप्तिमाहुः ॥ मण्डनमिश्रादाविति ॥ प्रतिज्ञापूर्वकवादादिकरणात्स्पष्टैव तदादेः शङ्कराचार्येष्वप्रीतिः ॥ अथ विधातृशप्तगीष्पत्यवतारपक्षाश्रयणाद्दोषइतिचेत्तदर्थं विधातुर्विप्रत्वमाश्रयणीयम् ॥ शिष्यभावोत्तरमव्याप्तिश्च ॥ दुर्वासःशप्तभारत्यामपि सा ॥ वस्तुतस्तु द्विषन्तोदेवमीशानमितिवाक्ये ईशानपदं न शङ्कराचार्यपरं भवितुमर्हति ॥ सप्तविंशाध्याये शङ्कराचार्यावतारगन्धस्याप्यभावात् ॥ ननु त्रिंशे तदवतारकथनं मया स्वीक्रियतइत्येकपुराणस्थत्वादेतद्वाक्यमपि तत्परं भविष्यतीतिचेत्तर्हि ॥ एवंसंबोधितोरुद्रोमाधवेनमुरारिणा ॥ चकारमोहशास्त्राणीति कौर्मषोडशाध्यायवाक्यमपि तत्परं कुतोन भवेत् ॥ किंच ॥ श्रीभागवते बुद्धोनाम्नाजिनसुतःकीकटेषुभविष्यतीत्युक्तत्वात् तत्रप्रकरणान्तरे पठितानि तानानयध्वमसतोकृतविष्णुकृत्यानित्यादिवचांसि अकृतबुद्धकृत्यपराणि कुतो न स्युः ॥ तस्माद्देवमीशानमित्युक्तेर्देवतारूपशिवपरमेवैतदिति न त्वदुक्तं किंचित् ॥ त्रिंशाध्यायवचसामपि वास्तवार्थस्य दर्शितचरत्वाच्च ॥ यत्तु "द्वेषोऽप्रीतिः अनभिरञ्जनम्" इत्युक्तं तदर्थं विकल्प्य दूषयन्ति ॥ किंचाप्रीतिपदेनेत्यादिना ॥ अयंभावः ॥ तत्सादृश्यमभावश्चतदन्यत्वंतदल्पता ॥ अप्राशस्त्यंविरोधश्चनञर्थाःषट्प्रकीर्तिता इति मनोरमादौ संगृहीतेषु मीमांसकग्रन्थप्रसिद्धेषु षट्सु नञर्थेषु अब्राह्मणः अनुदराकन्या अपशवोवान्येगोअश्वेभ्यइत्यादिवदप्रकृते सादृश्याल्पत्वाप्राशस्त्यानामन्यतमस्य त्वदविवक्षितत्वप्रतीतेर्भेदादयस्त्रयएवावशिष्यन्ते ॥ तत्र न तावद्भेदः ॥ तथासत्यनश्वइत्यादिनाऽश्वभिन्नोगवादिरिव अप्रीतिरित्यनेन प्रीतिभिन्नोधर्मोगृह्येत ॥ शिवविषयकप्रीतिभिन्नधर्मश्च वृक्षादौ शिवभक्तेषु चास्त्येवेति तत्रातिव्याप्तिः ॥ नापि अपापमविघ्नमित्यादिवदत्यन्ताभावः ॥ तथासति वक्ष्यमाणरीत्या जडे चिदानन्दयोस्तिरोभावाद्घटादावतिव्याप्तिः ॥ तत्र प्रीतिमात्रस्यासत्त्वेन शिवविषयकप्रीतेरप्यभावात् ॥ नाप्यधर्मोऽसितइत्यादिवद्विरोधः ॥ रावणादिषु सनकादिविप्रशप्तत्वे सत्यपि शिवविषयकप्रीतिविरुद्धधर्माभावादव्याप्तेः ॥ भगवन्तं दिदृक्षमाणैर्द्वारि निरुद्धैः सनकादिभिः शप्तौ जयविजयावेव

हिरण्यकशिपुहिरण्याक्षौ रावणकुम्भकर्णौ शिशुपालदन्तवक्त्रौ चाभूतामिति श्रीभागवततृतीयस्कन्धसप्तमस्कन्धादौ प्रसिद्धम् ॥ वृक्षादिष्वत्यन्ततामसेषु प्रीतिविरोधिनो विषादस्य सत्त्वादतिव्याप्तिरपि ॥ तमसो विषादात्मकत्वं ह्याहुः साङ्ख्याः ॥ प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणा इति ॥ तस्माद्विष्णुद्वेषो न विप्रशप्तानां लक्षणम् ॥ अस्माकं तु शिवे तदवतारशङ्कराचार्येषु च न द्वेषगन्धोऽपि ॥ नच तन्मतखण्डनमात्राद्द्वेषः सम्भावनीयः ॥ तथासति स्वभाष्यादौ विष्णववतारकपिलनारदादिमतं खण्डयत्सु शङ्कराचार्येष्वपि विष्णुद्वेषितायास्तदवतारद्वेषितायाश्च प्रसक्तेर्दुर्वारत्वात् ॥ एतच्च मूले प्रपञ्चयिष्यते ॥ सहस्राक्षेनिन्दन्तीति लदप्रयोग इत्यादिना वेदार्थपृच्छेत्यन्तेनोक्तं द्वितीयलक्षणं दूषयन्ति ॥ द्वितीयं लक्षणमित्यादिना त्वयाप्यङ्गीकरणीयत्यादित्यन्तेन ॥ अत्र शतृबहुत्वोल्लक्षणहेत्वोर्विधानस्याभावान्निन्दन्तीत्युक्तनिन्दाया लक्षणत्वकल्पने मानमन्वेष्टव्यम् ॥ कलिप्रवृत्त्यनन्तरं कुर्वन्ति चावतारणीत्यादिकथनात्तत्रापि कुर्वन्तीति लट्प्रयोगात्तदानीमपि शिवनिन्दकानां बौद्धादीनां सत्त्वात् ॥ अस्तये चतुर्लक्षण्यां तर्कपादे स्वयं व्यासेन तेषां खण्डनस्यासम्भवान्निन्दन्तीत्यस्यार्थत्वकल्पनमप्यनत्यन्तप्रयोजनम् ॥ वस्तुतस्तु पुरादक्षाध्वरेद्विजाइतीदमुत्तरश्लोकपूर्वाऽन्येति ॥ कौर्मे दक्षाध्वरकाले देवीकर्तृकशापस्यानिरूपणात् ॥ नच यज्ञे देहमुत्सृजन्त्या दाक्षायण्याः शापः संभवतीति वाच्यम् ॥ तस्मिन्पुराणे तथाकथाया अप्यभावात् ॥ प्रत्युत यज्ञतो बहुतिथात्कालात्प्रागेव दाक्षायणीभावं परित्यज्य हिमगिरिगेहे तस्याः प्रादुर्भावस्य सिद्धेः ॥ अतएव पञ्चदशाध्याये दक्षयज्ञे प्रवर्तमाने ॥ दक्षोयस्तेनयजतेपितामेपूर्वजन्मनीत्यादिना देवीकर्तृके तद्यज्ञविनाशनवरप्रार्थने पूर्वजन्मनि पितेत्युच्यते ॥ द्वादशाध्याये हिमाचलं प्रति देवीवाक्येष्वपि तथैव फलति ॥ अतो न देवीशापेन दक्षाध्वरस्य सम्बन्धः ॥ केचित्तु तत्र देवी शापस्याश्रुतत्वात्पञ्चदशाध्यायोक्तरीत्या देवीशा चण्डीश्वरेण पतिना वज्रेण निर्दग्धाः देवीशाभ्यां पार्वतीमहेश्वराभ्यां अपनिनिर्दग्धा वा इत्यर्थमाहुः ॥ तत्र नास्माकं निर्बन्धः ॥ पुरादक्षाध्वरइत्यस्यान्वयस्तूत्तरत्रैव ॥ तथाच ये द्विजास्तमसाविष्टचेतसः सन्तः पुरा दक्षाध्वरे महादेवं निन्दन्ति अनिन्दन् ॥ पुरिलुङ्चास्मइति चाल्लट् ॥ वसन्तीह पुराच्छात्रा इत्यादिवत् ॥ ते तस्मिन्काले वृथाधर्मं षोडशाध्यायाद्युक्तं कापालिकाचरणादिरूपनिष्फलधर्मं चरिष्यन्तीति कौर्मवाक्यस्यार्थः ॥ यत्तदोरध्याहारस्तु त्वयापि कल्प्यः ॥ अन्यथा "निन्दाफलचधर्माचरणस्यवृथात्वम्" इत्यस्यासिद्धेः ॥ अतोन कोप्यस्मासु चोद्यावकाशः ॥ अभ्युपेत्य दूषयन्ति ॥ तत्रतादृशार्थकेत्यादिना ॥ उत्तरखण्डइति ॥ तत्र द्विचत्वारिंशोऽध्यायइति प्रागेवादर्शाम ॥ सहस्राक्षकारेण वक्ष्यमाणा कल्पितकिंवदन्तीं हृदि निधाय शङ्क्यते ॥ ननु नव्यासैरिति ॥

द्वितीयं लक्षणं शिवनिन्दा ॥ सा च शिवो मोहनायावतीर्णइत्येवंकथनम् ॥ तत्र तादृशार्थकवाक्यस्यप्रणेतृत्वं लक्षणत्वेनाभिमतमनुवादकत्वं वा ॥ आद्ये नास्माभिस्तादृशं वाक्यं रचितं किंत्वनूदितम् ॥

प्रणीतच्च पद्मपुराण उत्तरखण्डे व्यासे [तथाच तत्रातिव्याप्तिः ॥ ननु नव्यासैरीदृशःश्लोको रचित.किंतु केनचित् कायस्थेन तत्र प्रक्षिप्त इतिचेत्तस्मिन्नतिव्याप्तिः द्वितीये त्वनुवादकत्वेन सूतस्यापि विप्रशप्तत्वापत्तिः ॥ किंच त्वयापि तादृशवाक्यस्य स्वग्रन्थेलिखितत्वात्तथाप्यनुवादकत्वेन त्वय्यतिव्याप्ति ॥

तस्मिन् कायस्थे ॥ इदसमाधान तुष्यतुदुर्जनइति न्यायात् ॥ वस्तुतस्तु सा व्यासकृतिरेवेत्याशय ॥ अतएव सूतेऽनुवादकत्वाद्दोष स्वयमुच्यते ॥ प्रक्षिप्तत्वाभिप्रायेतु स न सङ्गच्छेत ॥ ननु कथ व्यासकृतित्वनिश्चयइतिचेत् ॥ दर्शनान्तरग्रन्थकारै शङ्कराचार्यानुयायिभिश्चोदाहृतत्वादित्यवधारय ॥ तथाहि ॥ साङ्ख्यसूत्रभाष्ये प्रथमाध्याये (सूत्र २२) "विजातीयद्वैतापत्तिश्च" इतिसूत्रव्याख्याने "एभिश्चसूत्रैर्ब्रह्ममीमासासिद्धान्तोनिराक्रियतइतिभ्रमोनकर्तव्य" इत्याद्युक्त्वोच्यते "यत्तुवेदान्तिब्रुवाणामाधुनिकस्यमायावादस्यात्रलिङ्ग दृश्यतेतत्तेषामपिविज्ञानवाद्येकदेशितयायुक्तमेव ॥ (मायावादमसच्छास्त्र प्रच्छन्नबौद्धमुच्यते ॥ मयैवकथितदेविकलौब्राह्मणरूपिणा) इत्यादिपद्मपुराणस्थशिववाक्यपरपराभ्य ॥ नतु तद्वेदान्तमतम् ॥ (वेदार्थवन्महाशास्त्रमायावादमवैदिकम्) इति तद्वाक्यशेषादिति ॥ मायावादिनोत्र च न साक्षात्प्रतिवादित्वम् ॥ विजातीयेतिविशेषणवैयर्थ्यात् ॥ मायावादे सजातीयद्वैतस्याप्यनभ्युपगमादिति ॥ तस्मादत्रप्रकरणे विज्ञानवादिना बन्धहेतुत्वव्यवस्थैव साक्षान्निराक्रियते ॥ अनयैव च रीत्या नवीनानामपि प्रच्छन्नबौद्धाना मायावादिनामविद्यामात्रस्य तुच्छस्य बन्धहेतुत्व निराकृत वेदितव्यम्" इति ॥ नागोजीभट्टोऽपि मार्कण्डेयपुराणस्थसप्तशतीविवरणे त्रयोदशाध्याये (श्लो० ९) ददतुस्तौवलिंचैवेत्यस्य व्याख्याने पुराणेषु क्वाचित्कतान्त्रिकांशे वैदिकाऽनादरणीयताया बोधकानि पराशरोपपुराणादिवचासि कौर्मे प्रसिद्ध गौतमशापोपकाराय शिवकेशवाभ्या मोहशास्त्राणा निर्माण चोक्त्वा पाद्मे पार्वतीश्वरसवादे शृणुदेविप्रवक्ष्यामितामसानियथाक्रममित्यादीनिपूर्वोक्तान्युत्तरखण्डवचनान्यनूदितवान् ॥ तत्र वेदार्थवन्महाशास्त्रमायावादमवैदिकम् ॥ मयैवकथितदेविजगतानाशकारणादित्यन्त लिखित्वाऽग्रेनुपदम् "अस्य पूर्वार्धे आश्रित्येतिशेष ॥ न्यायवैशेषिकयो सुखदु खादिमत्त्वमात्मन श्रुतिविरुद्ध निरीश्वरतासाङ्ख्यमीमासयो श्रुतिविरुद्धेति तदशे तेषामप्रामाण्यम् ॥ मायावादोनास्तिका नाम्" इत्यादिना तद्वचन नास्तिकवादपरतयान्यथानीत्वा समाहितवान् ॥ काशीपुण्य-

निन्दन्तीत्यादिलट्प्रयोग आर्ष ॥ अनेन तेषां द्वितीय लक्षणमुक्तम् ॥ निन्दाचाऽविद्यमानदोषकथनम् ॥ तत्र शिवोमोहनायाऽवतीर्णइत्येव शुद्धाऽद्वैतमार्तण्डटीकाविद्वन्मण्डनाद्युक्तरीत्या प्रलपनम् ॥ तन्निन्दाफल धर्माचरणस्य वृथात्वम् ॥ त्रयीबाह्यत्वं नाम त्रयीतदर्थग्रहणाऽयोग्यत्वम् ॥ कथञ्चित्तद्ग्रहणेऽपि तत्फलानर्हत्व च ॥ मूर्खं वाच्छूद्रवदनधिकाराच्च ॥ तत्राऽपि सर्वेऽपीश्वरैत्यादिनैकोहेतुर्लक्षण चोक्तम् ॥ भागवतेऽपि यएतन्मर्त्यमुद्दिश्यभगवत्प्रतिद्रुहि ॥ इहत्यत्र पृथग्दृष्टिस्तस्ततोविमुखोभवेदित्युक्तम् ॥ तत्त्व तु वेदार्थएव ॥

प्रामाणिकेष्वपरेषु प्राचीनेषु विद्वत्पुस्तकेषु सर्वत्राऽयं ग्रन्थउपलभ्यतएव ॥ एतावता तद्ग्रन्थस्य व्यासकृतत्वं तु तदभिमतमेव ॥ एवं प्रामाणिकग्रन्थान्तरेष्वपि स्थलविशेषप्रदर्शनपुरःसरमुपन्यासो द्रष्टव्य॰ ॥ अथ अनुवादोनेत्येति द्वितीयपक्षं दूषयन्ति ॥ द्वितीयेत्वि-त्यादिना ॥ इत्थंकारं कौर्मवाराहादिष्वपि चकारमोहशास्त्राणि त्वंचरुद्रमहाबाहोमोह-शास्त्राणिकारयेत्यादिकथनात् विष्ण्ववतारेष्वपि श्रीभागवतादौ यादवैर्विमोहयतियज्ञकृतोऽत-दर्हानित्यादिकथनाच्च तत्रतत्र तादृशग्रन्थप्रणेतरि व्यासे तदनुवादकसूतादौ तदुदाहारकेषु निबन्धकारेषु च निन्दन्तिचमहादेवंविनिन्दन्तिहरीश्वरमिति कौर्मोक्तस्य लक्षणस्य दोषस्य वा प्रसक्तिर्द्रष्टव्या ॥ किंचदोषइत्यादि ॥ कथनमात्रस्येतिपदं सपादकत्वमित्यग्रिमे णान्वेति ॥ नेतिनिषेधोपि तत्रैवान्वेति ॥ अत्र मात्रपदमवधारणार्थं विष्ण्वादिदेवविषयकं तथाकथनं व्यवच्छिनत्ति ॥ मात्र कार्त्स्न्येऽवधारणइत्यमर ॥ तत्तद्धर्मेति ॥ व्यर्थीभू-तपुण्यत्वत्रयीग्राह्यत्वतत्फलानर्हत्वादिधर्माणां सपत्तेर्निश्चयेनेत्यर्थं ॥ व्यभिचारापत्ते रिति ॥ गौतमपञ्चलक्षण्यां प्रथमाध्यायद्वितीयाह्निके (सूत्र ४६) अनैकान्तिक सव्य-भिचारइतिसूत्रस्य भाष्ये "व्यभिचारएकत्राव्यवस्था" इतिवात्स्यायन ॥ तत्राप्यत्र व्यतिरेकव्यभिचार ॥ कारणे कार्यसमानाधिकरणात्यन्ताभावप्रतियोगित्वात् ॥ तथाच व्यतिरेकव्यभिचारज्ञानरूपप्रतिबन्धकसत्वान्नियतान्वयव्यतिरेकसहचारनिश्चयरूपकारणा-सम्भवेन तादृशकथनेन धर्माचरणवृथात्वादिनिरूपितकारणतासिद्धिरितिभाव ॥ वस्तुतस्तु-तादृशकथनशालिष्वपि व्यासादिषु पूर्वोक्ततत्तद्धर्मासंपत्तिनिश्चयेन कार्ये कारणसमाना-धिकरणात्यन्ताभावप्रतियोगित्वादन्वयव्यभिचारोप्यग्रे सूचयिष्यते ॥

किंच शिवोमोहनायावतीर्णइत्यादिकथनमात्रस्य न धर्माचरणस्य वृथात्वं त्रयीतदर्थग्रहणायोग्यत्वं कथञ्चिद्ग्रहणेपि तत्फलानर्हत्व मित्यादिधर्मसंपादकत्वम् ॥ तादृशनिन्दाकर्तृत्वरहितेष्वपि वेद विष्णुतद्भक्तनिन्दाकर्तृषु तत्तद्धर्मसंपत्तिदर्शनेन व्यभिचारापत्ते॰ ॥ स्वाव्यवहितोत्तरत्वस्य कार्यतावच्छेदकधर्मघटकतया निवेशेन तृणा रणिमणिन्यायेन कार्यतावच्छेदकवैजात्यकल्पनेन वा व्यभिचारवार णेपि त्वयाप्येतत्कुत्सावरावसदीयौ श्लोकावित्यादिना निन्दाया॰ कृतत्वेन विष्णुभक्तनिन्दानिष्ठजनकतानिरूपितजन्यतावच्छेदकवैजा त्याक्रान्ततत्तद्धर्माणां त्वय्युत्पत्तेर्दुर्वारत्वमेवेत्यपि विभावनीयम् ॥

पूर्वपक्षिमतेन व्यतिरेकव्यभिचारमात्रस्य वारणमनूद्य दूषणान्तरमाहु ॥ स्वाव्यव हितोत्तरत्वस्येत्यादिना ॥ निवेशेनेति ॥ यथाऽनुमितित्वेनच कार्यकारणभावेपि धूमत्वगाहिपरामर्शजन्यवह्निविधेयकानुमितिस्थले वह्निव्याप्यालोकवानितिपरामर्शाभावा द्व्यभिचार ॥ एवमालोकाऽवगाहिपरामर्शजन्यवह्निसाध्यकानुमितिस्थले धूमविषयकतद भावाद्व्यभिचार ॥ तद्वारणायकार्यताऽवच्छेदककोटौस्वाऽव्यवहितोत्तरत्व निवेशयन्ति ॥ स्वकारणम् ॥ स्वाव्यवहितोत्तरत्वसबन्धेन धूमाऽवगाहिपरामर्शविशिष्टवह्निसाध्यकानुमि-

तित्वाऽवच्छिन्नं प्रति तादृशपरामर्श एव कारणम् ॥ तेन संसर्गेणाऽऽलोकविषयकपरामर्शविशिष्टतादृशानुमितित्वावच्छिन्नं प्रति तद्विषयकः स एव कारणमिति न व्यभिचारः ॥ तथात्रापि स्वाव्यवहितोत्तरत्वसंबन्धेन शिवनिन्दाविशिष्टत्रयीबाह्यत्वादीन्प्रति तन्निन्दा हेतुः ॥ तेन संसर्गेण विष्णुनिन्दाविशिष्टतद्धर्मान्प्रति सा हेतुरिति न व्यभिचारः ॥ स्वाव्यवहितोत्तरत्वविशिष्टत्रयीबाह्यत्वादेरेव कार्यतावच्छेदकधर्मत्वात्तत्तद्घटकतया तस्य निवेशः ॥ तृणारणिमणिन्यायेनेति ॥ यथातृणं मणिररणिश्चेत्येकैकमपि वह्निं प्रति कारणम् ॥ इतराऽसमवधानदशायामपि कार्योत्पत्तेः ॥ ननु काव्यहेतुतयोक्तानां कवित्वबीजभूतसंस्कारविशेषलोकशास्त्रकाव्याद्यवेक्षणजन्यनिपुणताकाव्यज्ञशिक्षापूर्वकाभ्यासानामिव त्रितयपर्याप्तसमुदायत्वं तत्र कार्योत्पत्तिप्रयोजकतावच्छेदकम् ॥ स्पष्टं चेदं प्रथमाकारके व्युत्पत्तिवादे ॥ तथाच त्रयीबाह्यत्वादितत्तद्धर्मत्वावच्छिन्नकार्यतानिरूपितकारणतावच्छेदकं शिवनिंदात्वादिकं स्वतन्त्रमेव नतु शिवनिन्दाविष्णुनिन्दादिघटितसमुदायत्वं कारणतावच्छेदकमिति न व्यभिचारः ॥ कार्यतावच्छेदकवैजात्यकल्पनेनेति ॥ यथाऽवयवचिन्तामणौ "पञ्चाऽवयवाद्विजातीयं शाब्दज्ञानमेवोत्पद्यतइति तद्वीजनकवाक्यसंन्यायत्वम् ॥ एवं प्रतिज्ञाद्यवयवादेरपि प्रत्येकं विजातीयंशाब्दज्ञानमिति तद्धीजनकशब्दत्वमेव तल्लक्षणम्" इति केषांचिन्मतमनूदितम् ॥ अत्र प्रतिज्ञादिनिष्ठजनकतानिरूपितजन्यतावच्छेदिका तत्तच्छाब्दबोधवृत्तिर्विलक्षणैव जातिः स्वीक्रियतइति प्रतिज्ञाजन्यशाब्दबोधवृत्तिजातेर्हेतुजन्यशाब्दबोधे तज्जन्यशाब्दधीवृत्तिजातेः प्रतिज्ञाजन्यबोधे चाऽभावात् परस्परात्यन्ताभावसमानाधिकरणतया न व्यभिचारः ॥ तथाऽत्र शिवनिन्दाजन्यत्रयीबाह्यत्वादिनिष्ठा विष्णुनिन्दादिजन्यत्रयीबाह्यत्वादितत्तद्धर्मनिष्ठा जातयश्च परस्परविलक्षणाएवेति कार्यताऽवच्छेदकवैजात्यान्न व्यभिचारः ॥ वस्तुतस्तु "तन्न ॥ ज्ञानविशेषजनकत्वं तज्ज्ञानजनकत्वं वा न्याये प्रतिज्ञादौ अनतिप्रसक्तमनुगतरूपमन्तरेण दुर्निरूपम् ॥ तत्स्वीकारे तस्यैव लक्षणत्वात् ॥ अन्यथा जातिसङ्करप्रसङ्गम्" इतिवदता चिन्तामणिकृतैव तथाकल्पनं निरस्तम् ॥ तथा प्रकृतेऽपि शक्यं निरसितुम् ॥ तथाहि ॥ जनकतावच्छेदकस्य निन्दात्वस्यैक्येन त्रयीबाह्यत्वादिनिष्ठजन्यतावच्छेदकजातीनां नानात्वं न शक्यं प्रतिपत्तुम् ॥ नच शिवसम्बन्धादिविशिष्टनिन्दात्वस्यावच्छेदकत्वाददोषः ॥ विशिष्टनिन्दात्वे शुद्धनिन्दात्वाऽनतिरेकात् ॥ विशिष्टं शुद्धान्नातिरिच्यतइतिन्यायात् ॥ अथापि जातिसङ्करोदुर्निवारएव ॥ शिवाद्येकैकनिन्दाजन्यत्रयीबाह्यत्वादितत्तद्धर्मनिष्ठजन्यताऽवच्छेदकजातीनां परस्पराऽसमानाधिकरणानां शिवविष्णुवेदतद्भक्तादिसमुदायनिन्दाजन्यत्रयीबाह्यत्वादौ सर्वासां सङ्करापत्तेः ॥ एव शिवविष्ण्वादिद्वित्रादिनिन्दाजन्यतत्तद्धर्मे द्वित्रादिजातीनां साङ्कर्यम् ॥ नचैकैकनिन्दासमुदायनिन्दाजन्यतत्तद्धर्मेषु जन्यताऽवच्छेदकजातीनां नानात्वकल्पनान्नसङ्कराऽवकाशइति वाच्यम् ॥ समुदायनिन्दाजन्यतद्धर्मवृत्तेः शिवनिन्दानिरूपितजन्यतावच्छेदकजातेर्विष्णुनिन्दानिरूपितजन्यतावच्छेदकतया विष्णुनिन्दानिरूपितजन्यतावच्छेदकजातेः शिवनिन्दादिनिरूपितजन्यतावच्छेदकतयाच तत्तन्निन्दात्वेन तन्निरूपितजन्यतावच्छेदकजात्यवच्छिन्नतत्तद्धर्मत्वेनाभिमतस्य कार्यकारणभावस्य

व्यभिचारेण भङ्गप्रसङ्गात् ॥ उभयादिजन्यत्रयीबाह्यत्वादिधर्मे तत्तत्साध्यत्वावच्छिन्नकार्यतानिरूपितकारणताऽवच्छेदकत्वेनाभिमतधर्मस्य तदुभयनिष्ठकार्यतानिरूपितकारणतावच्छेदकत्वस्यैव स्वीकार्यत्वात् ॥ अन्यथा कारणतावच्छेदकस्यैकस्यैव ह्यनुगमापत्तेः ॥ इत्यत्र ...

व्यभिचारेण भङ्गप्रसङ्गात् ॥ उभयादिजन्यत्रयीबाह्यत्वादिधर्मे तत्तत्साध्यत्वावच्छिन्नप्रति-बन्धप्रतिबन्धकभावकल्पने महागौरवात् ॥ इतरदपि तत्र शिरोमणिगदाधरभट्टाचार्यादियुक्तं प्रकृते यथासंभवमवगन्तव्यम् ॥ तस्मात्पूर्वपक्षिणः कुशकाशाऽवलम्बनमेवैतत् ॥ एतत्कृतस्वापराधस्मदीयौ श्लोकावित्यादिनेति ॥ इदं सहस्राक्षे द्वितीयभागारम्भेऽस्ति ॥ तत्रहि आत्तात्मार्थमनःसमर्पणपथाहर्तुंपरस्त्रीधनमित्यादिश्लोकद्वयेन विष्णुभक्तेष्वविद्यमानदोषकथनरूपा निन्दा व्यधायि ॥ वैजात्यकल्पनमभ्युपेत्याहुः ॥ विष्णुभक्तनिन्देत्यादि ॥ कौर्मएव पूर्वखण्डे सप्तविंशेऽध्याये भृग्वादीन्प्रति श्रीकृष्णः ॥ येमांजनाःसंस्मरन्तिकलौसकृदपिप्रभुम् ॥ तेषांनश्यतितत्पापंभक्तानांपुरुषोत्तमे इत्यादिना वैष्णवान्प्रशस्य परात्परतरंयान्ति नारायणपरायणाइति तेषामक्षरातीतवस्तुप्राप्तिलक्षणं मोक्षमभिधाय वैष्णवशिरोरत्ने गङ्गाधरे स्वाऽभिन्ने द्वेषवतां वैष्णवानामपि दुष्फलमुक्त्वा तस्मात्संपरिहर्तव्यानिन्दापशुपतौद्विजाः ॥ कर्मणा मनसावाचामद्भक्तेष्वपियत्नतइति शिवनिन्दावद्वैष्णवनिन्दाया अपि कर्मणा मनसा वाचा यत्नतः सम्यक्परिहर्तव्यत्वं वक्ति ॥ अनुपदमेवाग्रे येषदक्षाऽध्वरेशप्तादधीचेनद्विजोत्तमाः ॥ भविष्यन्तिकलौमर्त्यैः परिहार्याःप्रयत्नतइति स्वादृशप्रच्छन्नकापालिकादीनां वैष्णवैः प्रयत्नतः परिहरणीयत्वं बोधयति ॥ तत्रैवचत्विंशेऽर्जुनं प्रति व्यासः ॥ कुर्वन्तिचाऽवताराणिब्राह्मणानांकुलेषुवै इत्यादिना दक्षाऽध्वरे शिवं निन्दितवतामवतरणं वृथाधर्माचरणं चोक्त्वा विनिन्दन्ति हृषीकेशं ब्राह्मणान्ब्रह्मवादिनः ॥ वेदबाह्यव्रताचारादुराचारावृथाऽऽश्रमाः इत्याचाह ॥ त्वद्रीत्या चेदमपि शप्तानां लक्षणमेव ॥ तेन वृथाश्रमसंपन्ने हृषीकेशनिन्दके ब्रह्मवादितद्भक्तनिन्दके च त्वयि शप्तत्वनिश्चयेन त्वदुक्तयुक्त्यात्वय्येव त्रयीबाह्यत्वादितद्धर्मापत्तिर्निश्चलाऽतोयुक्तमेवोक्तं दुर्वारैवेति ॥ अस्माभिरित्यादि ॥ अविद्यमान

अस्माभिर्न शिवनिन्दा क्रियते किंतु प्रसंगागतानां तादृशवचनानामनुवादमात्रम् ॥ सूतवैशंपायनादीनामप्यनुवादकत्वमयुक्ततादृशधर्मवत्त्वापत्तिभियाऽनुवादस्य त्रयीबाह्यत्वादिधर्माहेतुतायास्त्वयाप्यङ्गीकरणीयत्वात् ॥

दोषकथनएव निन्दात्वस्य त्वयाप्यङ्गीकृतत्वेनास्माभिस्तु पुराणोक्तस्यैवानूदितत्वेन च मास्मासु शिवनिन्दानिरूपितकार्यत्वेनाभिमतधर्माणां सङ्क्रान्तिः ॥ अन्यथा व्याससूतप्रभृतिष्वपि तथाकथनशालितया तत्तद्धर्मसङ्क्रान्तिर्दुर्वारा स्यात् ॥ सा च तवाप्यनिष्टेतिभावः ॥ अत्रेदं बोध्यम् ॥ परोक्तमभ्युपेत्येह व्यभिचारादिकमुक्तम् ॥ धर्माचरणवृथात्वादौ तेन मानतयाऽवलंबितानां कौर्मवचसां विचारे तु तदुक्तं सकलं जले विलेखनकौशलदेशीयमेव ॥ तथाहि ॥ वृथात्वे मानं वृथाधर्मंचरिष्यन्तीतिवाक्यमेव त्वयाभिप्रेयते ॥ वस्तुतस्तु तत्र तेषांवृथामवेद्धर्मइत्यादिकथनाभावात् यथाश्रुतपाठे तदाचरितधर्मोद्देश्यकवृथात्वविधेयकशाब्दबोधानुदयात् पूर्वोक्तएव तस्य वाक्यस्यार्थइति न किञ्चिदेतत् ॥ यच्च कलिभुवां शिवनिन्दायाः फलं त्रयीबाह्यत्वमिति दधीचवचनबलाद्दर्शितं तदेव

मोहयन्तिजनानितिशापयस्य विषयः ॥ निन्दन्तिचमहादेवमित्यस्य त्रिंशे सर्गेन भविष्यन्तित्रयीबाह्याइत्यस्य च पञ्चदशे सर्गेन तयोः परस्परसंबन्धगन्धस्याप्यभावात् ॥ ननु मास्त्वनयोः संबन्धः ॥ परं पञ्चदशाऽध्यायेपीदं तन्निन्दाफलमेव पठ्यतइति चेत्सत्यम् ॥ परंतु यज्ञकाले साक्षाच्छिवे देव्यां च वेदाप्रतिपाद्यत्वलक्षणाऽविद्यमानदोषारोपणरूपाया दक्षादिभिः कृताया निन्दायाएव फलं तत्पठ्यते न तु पाद्मादिवचनानुवादस्य ॥ नापि तस्मिन्नध्याये कलौ शप्ता भवतीयं शिवं निन्दिष्यन्ति निन्दातश्च त्रयीबाह्या भविष्यन्तीति निरूप्यते ॥ तत्रहि (श्लोक ८) सर्वेष्वेवहियज्ञेषुनभागःपरिकल्पितः ॥ नमन्नाभार्ययासार्धंशङ्करस्येतिनेज्यते ॥ (श्लोक ११) नह्ययंशङ्करोरुद्र सहर्तातामसोहरः नग्न.कपालीविदितोविश्वारमानोपपद्यते इत्यादिरूपायां निन्दायां दक्षेण कृतायां बाढमित्युक्तया मुनिभिर्देवैश्च सा स्वीकृतेत्यादिवर्णयित्वोच्यते ॥ (श्लोक २५) पुनःप्राहचतंदक्षंदधीचोभगवानृषिः ॥ समेक्ष्यर्षिगणान्देवान्सर्वान्वैरुद्रविद्विषइति ॥ तत कांचित्तदुक्तिमनूद्य पुनरभिधीयते ॥ (श्लोक २८) एवमुक्त्वासविप्रर्षिःशशापेश्वरविद्विषः ॥ समागतान्ब्राह्मणांस्तान्दक्षसाहाय्यकारिणः ॥ यस्माद्बहिष्कृतो वेदाद्भवद्भिःपरमेश्वरः ॥ विनिन्दितोमहादेव.शङ्करोलोकवन्दितः ॥ भविष्यन्तित्रयीबाह्याः सर्वेपीश्वरविद्विषः ॥ निन्दन्तीह्यैश्वरमार्गंकुशास्त्रासक्तचेतसइत्यादि ॥ अत्र यस्माद्बहिष्कृतोविनिन्दितइतिक्तान्तप्रयोगेण तत्कालकृतस्याविद्यमानदोषकीर्तनस्यैव तत्फलमिति निश्चाय्यते ॥ यच्च तत्रापीश्वरविद्विषइत्यादिनैकोहेतुर्लक्षणं चोक्तमित्यजल्पि तदपि न विद्वदादरणीयम् ॥ शतृवत्क्तिपोर्लक्षणहेत्वोर्विधानस्याभावात् ॥ वचने त्वीश्वरविद्विषइतिपदमुद्देश्यबोधकम् ॥ समेक्ष्यर्षिगणान्देवान्सर्वान्वैरुद्रविद्विषइति शशापेश्वरविद्विष इति च पूर्ववचनबलेन तथैव निश्चयात् ॥ तथाच यस्मात्परमेश्वरोभवद्भिर्वेदाद्बहिष्कृतोनमन्त्रामार्ययासार्धमित्यादिना अतो भवन्तएव त्रयीबाह्याः कापालिकादिमतानुयायिनोभविष्यन्तीत्येव तदर्थः ॥ अधिकं तु मूले वक्ष्यते ॥ एतेन "त्रयीबाह्यत्वं नाम त्रयीतदर्थग्रहणायोग्यत्वम् ॥ कथञ्चित्तद्ग्रहणेपि तत्फलानर्हत्वं च मूर्खत्वाच्छूद्रवदनधिकाराच्च" इति तस्य कपोलकल्पनामात्रमूलकमकाण्डताण्डवमपास्तम् ॥ अत्र त्रयीतदर्थयोरुभयोर्ग्रहणाऽयोग्यत्वे कथंचिद्ग्रहणेपि तयोः फलाऽनर्हत्वे वा शूद्रवदिति दृष्टान्तोपन्यासस्तु तस्यैव शास्त्रार्थाऽपरिज्ञानमवगमयति ॥ शूद्रस्य त्रयीग्रहणायोग्यत्वेऽपि पुराणादिद्वारा तदर्थग्रहणे योग्यत्वात् ॥ अत एव बृहत्पराशर ॥ कपिलाक्षीरपानेनब्राह्मणीगमनेनच ॥ वेदाक्षरविचारेणशूद्र.पततिजातित इत्यक्षरपदादानुपूर्वीविचारस्यैव प्रतिषेधं गमयति ॥ जातित इत्यत्र तत्क्षणादित्यपि पाठान्तरम् ॥ श्रीभागवतादिष्वपि स्त्रीशूद्रद्विजबन्धूनां त्रयीनश्रुतिगोचरा ॥ कर्मश्रेयसिमूढानां श्रेय एवंभवेदिह ॥ इतिभारतमाख्यानं कृपयामुनिनाकृतमिति भारतव्यपदेशेन ह्याम्नायार्थश्चदर्शित इति चोच्यते ॥ भारतादिषु–श्रावयेच्चतुरोवर्णान्कृत्वा ब्राह्मणमग्रतइति शूद्रस्यापि श्रावणमभिधीयते ॥ स्मृतिकौमुद्यां स्कान्दे ॥ भक्तिशूद्रस्य शुश्रूषापुराणेनैववेदनम् ॥ यदग्रिते चिद्विद्वांस स्त्रीणांशूद्रसमानताम् ॥ सिद्धान्तश्रवणं प्राहुर्द्विजानांमुनिसत्तम ॥ शूद्राणांचविरक्तानांतथास्त्रीणांमहामुने ॥ सिद्धान्तश्रवणंप्रोक्तं

पुराणश्रवणंतुधैरिति ॥ एकादशस्कन्धेपि ॥ साधवेशुचयेब्रूयाद्भक्तिःस्याच्छूद्रयोषितामिति भागवद्वाक्यम् ॥ श्रवणाध्ययनार्थप्रतिषेधोक्तिस्त्वानुपूर्वीपूर्वकार्थाभिप्राया ॥ श्रवणादेः साहचर्यात्क्रमस्वारस्याच्च ॥ नच प्रकृतेति तादृशार्थग्रहणमेव विवक्ष्यतइति वाच्यम् ॥ तथाऽर्थग्रहणायोग्यत्वमपि वेदबाह्यत्वमित्यापत्त्या शूद्रस्य तद्बाह्यत्वापातात् ॥ नचेष्टापत्तिः ॥ नवेदबाह्येपुरुषेधर्मलेशोपिशङ्कर ॥ संगच्छतेमह्यादेवधर्मोवेदाद्धिनिर्बभाविति कौर्मपूर्वखण्डषोडशाध्यायादिवचोभिः सर्वथा निर्धर्मकत्वप्रसङ्गात् ॥ तथासति निर्णयसिन्धुप्रथमपरिच्छेदाद्युदाहृतानां शूद्रोवर्णश्चतुर्थोपिवर्णत्वाद्धर्ममर्हतीत्यादिव्यासादिवचसां व्याकोपात् ॥ प्रकाशे तु पुराणादेः साकल्येन पठनस्यैव प्रतिषेधो न तु तद्द्वाराऽर्थज्ञानस्येति दिक् ॥ विशेषस्तु मदीये सत्सिद्धान्तमार्तण्डे प्रथमाष्टके किंवर्णनिष्ठइत्यस्योत्तरे तृतीयाष्टके शूद्राश्चेदुपदेश्याइत्यस्योत्तरे च द्रष्टव्यः ॥ प्रकृतमनुसरामः ॥ यच्च श्रीभागवतचतुर्थस्कन्धद्वितीयाध्यायस्थं (श्लोक २१) यएतन्मर्त्यमुद्दिश्येति वचनमुदाहृतं तत्र ब्रूमः ॥ तस्मिन्नेवाध्याये पठितेषु भवव्रतधरायेच विशन्तुशिवदीक्षायां विगर्ह्ययातपाखण्डंदैवं घोषप्रभूतराडित्यादिवचनेषु भवशिवादिपदेन शङ्कराचार्या गृह्यन्ते न वा ॥ आद्ये "सदीक्षयाचार्यमूर्तिस्थः" इत्यादिवचनात्तुरीयास्तद्दीक्षाधरस्य तव पाखण्डित्वापत्तिः ॥ ननु प्रकरणबलाद्भवादिशब्दानां साक्षाच्छिवपरतया न तत्र शङ्कराचार्याणां संबन्धोऽतोन दोष इति चेद्युक्तमेव ॥ तर्हि यएतदितिवाक्यमपि-साक्षाच्छिवपरमेवेति संतुष्येः ॥ तत्रहि (श्लोक १०) अयंतुलोकपालानामित्यादिना दक्षेण कृतां शिवनिन्दां पार्वतीसंबन्धायोग्यत्वश्मशानवासनग्नत्वादिलक्षणमनूद्य (श्लोक १७) निनिन्दैवंसगिरिशमप्रतीपमवस्थितमित्यादिना निन्दाश्रवणेपि शिवस्याप्रतिद्रोहं दक्षकर्तृकं शापविसर्जनं च निरूप्य ततोरोषकषायितेन नन्दीश्वरेण कृतः प्रथमं दक्षाय शापविसर्गो पठ्यते (श्लोक २१) यएतन्मर्त्यमुद्दिश्येत्यादिभिः सार्धैस्त्रिभि श्लोकैः ॥ यच्च स्वाभिमतत्रयीबाह्यत्वसमर्थनार्थं "तत्त्वंतुवेदार्थएव" इति व्याख्यातं तदपि मोहनमात्रम् ॥ तत्र तत्त्वशब्दस्योत्तरकाण्डार्थब्रह्मतत्त्वपरत्वात् ॥ अतएवानुपदं (श्लोक २२) गृहेषुकूटधर्मेषुसक्तोग्राम्यसुखेच्छया ॥ कर्मतन्त्रंवितनुतेवेदवादविपन्नधीः ॥ बुध्यापराभिध्यायिन्याविस्मृतात्मगति पशुः ॥ स्त्रीकामःसोस्त्वतितरांदक्षोबस्तमुखोऽचिरात् ॥ विद्याबुद्धिरविद्यायांकर्ममय्यामसौजडइति केवलपूर्वकाण्डार्थे सकामतया प्रवृत्तिरुच्यते ॥ अग्रे तदनुसारिणामपि पुष्पितवेदवाचा चित्तोन्मथनं वर्ण्यते ॥ तस्मादत्रत्यं तत्त्वतो वैमुख्यं न त्रयीबाह्यत्वरूपम् ॥ अतएवात्र "तत्त्वतःपरमार्थात्" इति श्रीधरस्वामी ॥ यएतन्मर्त्यमित्यस्य स्पष्टतया दक्षमात्रपरत्वं प्रतीयतइति तस्य सर्वसाधारणत्वावधारणमपि विचारणकारणकारणकम् ॥ अस्माकं तु शुद्धाद्वैतावलम्बितया क्वापि द्वेषस्यानवसरात्कुतस्तरां महेश्वरावतारेषु शङ्कराचार्येषु तस्य संभावनापि ॥ खण्डनादिकं तु कापिलमतखण्डनादिवत्त दोषायेति दर्शितंप्राग्दर्शयिष्यते च पुरतः ॥

ईश्वरसंमतमार्गनिन्दा तृतीयं लक्षणम् ॥ सापि विप्रशप्तत्वरूपलक्ष्यताऽवच्छेदकसमनियता न भवति ॥ रुद्रयामलादिपूक्तत्वेनेश्वरसंमतस्य वाममार्गादेर्निन्दाया वैदिकैर्दक्षिणमार्गस्थैः क्रियमाणत्वेन

विप्रशासत्वरूपलक्ष्यताऽवच्छेदकनिष्ठाऽवच्छेदकताकभेदवत्वेन निश्चितेषु तेष्वतिव्याप्तत्वात् ॥ एतेनेश्वरसमंतमार्गनिन्दायास्त्रय्यनधिकारहेतुत्वं लक्षणत्वं चेत्यादिप्रलापोऽप्यपास्तः ॥ दक्षिणमार्गस्थानां वैदिकानां त्रय्यधिकारस्य सर्वं संमतत्वात् ॥

सहस्राक्षे ऐश्वरमार्गश्चाऽश्रेत्यादिना तृतीयं लक्षणमित्यन्तेनोक्तं तृतीयं लक्षणं खण्डयन्ति ॥ ईश्वरसंमतमार्गनिन्देत्यादिनाऽतिव्याप्त्यादिदोषग्रस्तत्वादित्यन्तेन ॥ कौर्मवचने ऐश्वरंमार्गमित्यत्रैश्वरपदघटकेश्वरपदेन साक्षाद्विरूपाक्षो विवक्ष्यवउताहो शङ्करा-

*ऐश्वरमार्गश्चाऽश्रेशासमतश्रुत्यर्थवर्णनरूपएव ॥ तन्निन्दयैव त्रयीवाह्यतायायुक्तत्वात् ॥ योयं निन्दति सतद्भेष्योभवतीति न्यायाऽऽनुरुत्यात् ॥ अस्य वाक्यस्याऽपि कौर्मैक्यार्थ्येनोक्तविधशङ्करनिष्ठोपदेष्टृत्वबोधकर्कौर्मवाक्यैः प्रत्यासत्त्याऽत्रापि शिवनिन्दायाः प्रराह्येन चोक्तविधमार्गग्रहणस्यैव युक्तत्वाच्च ॥ ईश्वरसमतमार्गनिन्दाऽपि त्रय्यनधिकारस्य हेतुर्लक्षणंच ॥ शास्त्रानारिवयं तृतीय लक्षणम् ॥

चार्याएव ॥ तत्राद्यं दूषयन्ति ॥ रुद्रयामलादिष्वित्यादिना ॥ अत्रादिशब्दः प्रकारवचनः सजातीयानि तन्त्रान्तराणि पाशुपतशास्त्रप्रभृतीनि च संगृह्णाति ॥ तत्र पाशुपतशास्त्रं नाम भगवता पशुपतिना पशुपाशविमोक्षणायाऽथातः पाशुपतयोगविधिं व्याख्यास्याम इत्यादिना पञ्चाध्यायात्मकं प्रणीतम् ॥ तत्र प्रथमेध्याये कार्यरूपोजीवः पशुः ॥ द्वितीये कारणपशुपतिरीश्वरः ॥ तृतीये योगःपशुपतौ चित्तसमाधानम् ॥ तुरीये विधिर्भस्मना त्रिषवणस्नानादि. ॥ पञ्चमे दुःखान्तसंज्ञको मोक्षश्च तत्फलत्वेन निरूपितः ॥ अत एव तस्य पञ्चाध्यायाः क्रमात्कार्यकारणयोगविधिदुःखान्ताख्या उच्यन्ते ॥ अस्य शिवकर्तृकत्वं उमापतिर्भूतपतिःश्रीकण्ठोब्रह्मणःसुतः ॥ ऊचिवानिदमव्यग्रोज्ञानंपाशुपतंशिवइतिमोक्षधर्मादावपि प्रसिद्धम् ॥ तन्त्राणि च चतुःषष्टिरत्यन्तविस्तरवन्ति सन्ति विशेषतोमोहनानि ॥ तन्त्रार्थसंक्षेपस्तु व्युत्पादनाय प्रसङ्गात्प्रदर्श्यते ॥ तत्र महामायाशम्बरं तन्त्रम् ॥ अन्यस्मिन्पदार्थेऽन्यथाप्रतिभानरूपमायाप्रपञ्चरचनोपायप्रतिपादकमैन्द्रजालिकविद्यारूपम् ॥ १ ॥ योगिनीजालशम्बरं तन्त्रं योगिनीजालदर्शनोपायप्रतिपादकम् ॥ २ ॥ तत्त्वतन्त्रमिन्द्रजालविद्याविशेषः पृथिव्यादितत्त्वानामन्यत्रान्यबोधोपायप्रतिपादकम् ॥ ३ ॥ सिद्धभैरवं तन्त्रम् ॥ ४ ॥ मायिकभैरवं तन्त्रम् ॥ ५ ॥ कङ्कालभैरवं तन्त्रम् ॥ ६ ॥ कालाग्निभैरवं तन्त्रम् ॥ ७ ॥ शक्तिभैरवं तन्त्रम् ॥ ८ ॥ योगिनीभैरवं तन्त्रम् ॥ ९ ॥ महाभैरवं तन्त्रम् ॥ १० ॥ भैरवनाथतन्त्रम् ॥ ११ ॥ भैरवाष्टकमिदं कापालिकमतप्रतिपादकम् । बहुरूपा शक्तिस्तत्प्रतिपादकतन्त्राणां गणो बहुरूपाष्टकम् ॥ यथा ब्रह्माणीतन्त्रम् ॥ इदमेव ब्राह्मीतन्त्रम् ॥ १२ ॥ माहेश्वरीतन्त्रम् ॥ १३ ॥ कौमारीतन्त्रम् ॥ १४ ॥ वैष्णवीतन्त्रम् ॥ १५ ॥ वाराहीतन्त्रम् ॥ १६ ॥ इन्द्राणीतन्त्रम् ॥ १७ ॥ चामुण्डातन्त्रम् ॥ १८ ॥ शिवदूतीतन्त्रं चेति ॥ १९ ॥ ब्राह्म्याद्यष्टकमिदं प्राधान्येन तत्तद्देवताप्रतिपादकम् ॥ यामलानाम सिद्धान्तप्रतिपादकानि तन्त्राणि रुद्रयामलादीन्यष्टौ ॥ यथा रुद्रयामलम् ॥ २० ॥ भैरवयामलम् ॥ २१ ॥ शिवयामलम् ॥ २२ ॥ विष्णुयामलम्

॥ २३ ॥ स्कन्दयामलम् ॥ २४ ॥ ब्रह्मयामलम् ॥ २५ ॥ देवीयामलम् ॥ २६ ॥ यामलम् ॥ २७ ॥ शाक्त तन्त्रतया चतुःषष्टितन्त्राणामपि यामलतया व्यावहारः ॥ अत एव मूले रुद्रयामलादिष्विति प्राधान्येन तस्य निर्देशः चन्द्रज्ञानतन्त्रं कामेश्वर्यादिषोडश-नित्याप्रतिपादकं कापालिकमतदर्शकं च ॥ तिथिनामधेयं नित्येति ॥ २८ ॥ मालिनीतन्त्रं समुद्रयानोपायप्रतिपादकम् ॥ २९ ॥ महासंमोहन तन्त्रं जाग्रतामपि निद्रितोपायप्रति-पादकम् ॥ ३० ॥ वामजुष्टवामकेश्वरं तन्त्रं चतुःशतीत्यपि कथ्यते ॥ ३१ ॥ महादेवतन्त्रं बटुकादिसिद्धकुलाचारप्रदर्शकम् ॥ ३२ ॥ वातुलम् ॥ ३३ ॥ वातुलोत्तरम् ॥ ३४ ॥ कामिकचेति ॥ ३५ ॥ त्रीण्येतानि तन्त्राणि क्षेत्रकर्षणादिविधिप्रतिपादकानि ॥ हृद्भेदतन्त्रं कापालिकाचारप्रदर्शकम् ॥ ३६ ॥ तन्त्रभेद ॥ ३७ ॥ गुह्यतन्त्रयोः ॥ ३८ ॥ प्रकाशं रहस्यं वा परकृतमन्त्रतन्त्र प्रयोगाणां पराभृत्युपायाः प्रदर्शिताः ॥ कलावादं कामशास्त्रं वात्स्या यनादिमतम् ॥ ३९ ॥ कलासारं रूपादिवृद्ध्युपायप्रतिपादकम् ॥ ४० ॥ कुण्डिकामतं गुटिकासिद्धिप्रदर्शकम् ॥ गुटिका पानपात्रम् ॥ ४१ ॥ मतोत्तरं तन्त्रं रससिद्धिप्रकाशम् ॥ ४२ ॥ वीणातन्त्रम् ॥ वीणानाम योगिनी संभोगयक्षिणीत्यस्यानामान्तरम् ॥ तस्याः साधनोपायप्रदर्शकम् ॥ ४३ ॥ त्रोतलतन्त्र गुटिकाञ्जनपादुकासिद्धिप्रतिपादकम् ॥ ४४ ॥ त्रोतलोत्तरतन्त्रे चतुःषष्टिसहस्रयोगिनीनां दर्शनोपायः ॥ ४५ ॥ पञ्चामृततन्त्रं पृथिव्या-दिपञ्चभूतानां साधनेन मरणाभावप्रतिपादकं कापालिकतन्त्रम् ॥ ४६ ॥ रूपभेदादिपञ्चतन्त्रा-ण्युच्चाटनादिप्रतिपादकानि ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ सर्वज्ञानादितन्त्रपञ्चकं कापालिकसिद्धान्तैकदेशिदिगम्बरमताचारप्रदर्शकम् ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ॥ ५६ ॥ पूर्वतन्त्रादिदेवीमतपर्यन्तं तन्त्राष्टकं दिगम्बरैकदेशिक्षपणकमताचारप्रदर्शकम् ॥ ५७ ॥ ॥ ५८ ॥ ५९ ॥ ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ एवमेतानि सर्वाण्यपि त्रयीनिष्ठैर्नितरां हेयानि ॥ एषां सर्वेषामीश्वरकर्तृकत्वं तु प्रायेण तेषु तेषु तन्त्रभागेषु तत्र तत्र पुराणेतिहासादौ च स्फुटमेव ॥ वाममार्गैरिति ॥ अत्राप्यादिशब्दः प्रकारव-चनः ॥ तेन वैदिका वैष्णवाः शैवाः शाक्ताः वामाः सैद्धान्ताः कौला इति तत्रापि शाक्त-भेदास्तत्सब्रह्मचारिणः पाशुपतप्रभृतयश्च संगृह्यन्ते ॥ अत्राद्याः त्रयः शुद्धवैदिकवैष्णवशै-वेभ्योऽतिरिक्ताएव ॥ एषां स्वरूपं तत्त्वदीपनिबन्धादितो ज्ञेयम् ॥ क्रियमाण-त्वेनेति ॥ पत्नीःस्वंदीक्षयारण्डाचण्डाअपिभजन्तिहि ॥ दिगम्बराश्रमचिह्नाः-सुरापानपरायणाः ॥ पापरूपादुराचारास्तेकौलापरिकीर्तिता इति निन्दादर्शनात् मिता-क्षरायां (अ० ३ आशौचप्रकरणे श्लो० ३० उदक्याशुचिभिः स्नायादित्यस्य विवरणे ब्रह्माण्डपुराणे शैवान्पाशुपतान्स्पृष्ट्वालोकायतिकनास्तिकान् ॥ विकर्मस्थान्द्विजाञ्छूद्रा-न्सवासाजलमाविशेदिति निबन्धेष्वेवमादिनिन्दादर्शनाच्च क्रियमाणत्वेनेत्यर्थ ॥

र्त्तिचेश्वरसंमतमार्गप्रतिपादितानां पञ्चमकारत्वेन तन्मार्गस्थैर्व्यव-ह्रियमाणानां मद्यमत्स्यमैथुनादीनां मनुयाज्ञवल्क्यादिभिर्वैदिकत्वेन प्रत्यधिकारित्वेन विप्राऽशास्त्वेन च निश्चितैर्ब्रह्महत्यासुरापानंस्तेयं-गुर्वङ्गनागमहत्यादिना निषिद्धभक्षणंजेह्यमित्यादिना पारदार्यपारिवि-

त्यमित्यादिना च महापातकातिपातकोपपातकत्वेन प्रतिपादितत्वे-
नेश्वरसंमतमार्गनिन्दकेषु तेष्वतिव्याप्त्यापत्तिः ॥ शङ्कराचार्यसंम-
तमार्गनिन्दायालक्षणत्वे पूर्वोक्तेषु मीमांसकबौद्धादिष्वतिव्याप्तिः ॥

पञ्चमकाररत्वेनेति ॥ मद्यं मांसं मत्स्या मैथुनं मुद्रा इति पञ्च मकाराः कुलार्णवादिषु मोक्षसाधनतया सुप्रसिद्धाः ॥ ननु ऐश्वरमार्गशब्देन यथा ईश्वरसंमतश्रुत्यर्थवर्णनरूपोमार्ग उच्यते ॥ वामादिमार्गस्य तु तथात्वाभावात् सर्पमेतरकर्णप्रभे कटिचालनस्य सहोदरीभूतमितिचेन्नैवम् ॥ तत्रापि मधुवातातृतायतइत्यादिश्रुतीनां मद्यपरतायाः पश्वालम्भनविध्यादीनां मांसादिपरतायाश्च स्वयमीश्वरेण वर्णनाद्बहूनां श्रुतिवाक्यानां तत्तत्तन्त्रे तेनैव स्वयमन्यथा नयनाच्च ॥ तथाहि ॥ कुलार्णवे द्वितीयोल्लासे पार्वतीं प्रति शिवो बहुलं कुलधर्ममाहात्म्यं वदन् (श्लोक ४७) कुलधर्ममजानन्योमोक्षमिच्छतिदुर्मतिः ॥ पारावारमपारंसपाणिभ्यांतर्तुमिच्छति ॥ योवान्यदर्शनेभ्यश्चभुक्तिमुक्तिंचकाङ्क्षति ॥ स्वप्नलब्धधनेनांधधनवान्समवेयदीत्यादिना तद्धर्मवत्तामत्युत्कर्षं तद्रहितानामत्यन्तगर्हणां च दर्शयित्वा (श्लोक ११३) पेयंमद्यंपलंखाद्यंसमालोक्यंप्रियामुखम् ॥ इत्येवंचरणंजप्यंपरंमाप्यपरंपदम् ॥ गुरुकारुण्यलब्धव्यमीदृशंकुलदर्शनम् ॥ स्वभ्रकाश्वजानन्तिनेतरेमुक्तिमुक्तिदमित्यादिनामद्यमांसमैथुनादिसेवनं धर्मत्वेनोक्त्वा सुरामांससेवनादौ दूषणानि प्रायश्चित्तानि च धर्मशास्त्रोक्तानि (श्लोक १२७) सुरात्रैमलमन्नानामित्यादिनाऽनूद्य तेषां प्रायश्चित्तानां कौलशास्त्रदर्शितविधिं विना सेवनविषयकत्वं तद्विधिना सेवने तु न दोषइत्याशयेन (श्लोक १२५) मांसस्यदर्शनंकृत्वासुरादर्शनमाचरेत् ॥ तस्मात्वाविधिनामद्यंमांसंसेवेत्कदाचन ॥ विधिवत्सेवितेदेवितत्सात्वंप्रसीदसि ॥ नाशयस्यप्यविधिनासत्यमेतद्वरानने ॥ तृणंवाप्यविधानेनच्छेदयेन्नकदाचन ॥ विधिवद्ब्राह्मणंद्विजंवापिहत्वापापैर्नलिप्यतइत्याद्यभिधाय तस्य मार्गस्य स्वसंमतस्व श्रुत्यर्थवर्णनरूपत्वं चाह ॥ (श्लोक १४०) कुलशास्त्राणिसर्वाणिमयैवोक्तानिपार्वति ॥ प्रमाणानिनसन्देहोनहंतव्यानिहेतुभिः ॥ देवताभ्यःपितृभ्यश्चमधुवाताऋतायते ॥ स्वादिष्ठयामदिष्ठयाक्षीरंसर्पिर्मधूदकम् ॥ हिरण्यपात्रंमधोःपूर्णमदधन्पुरुषंपशुम् ॥ सद्योदीक्षयतीत्याद्याःप्रमाणश्रुतयःप्रियेइति ॥ अग्रे च चतुर्थोल्लासे (श्लोक १०) अथप्रातः समुत्थायगुरुदेवात्मचिन्तनम् ॥ कर्णमूलस्थसूत्रंचकुर्याद्विण्मूत्रमोचनम् ॥ शौचास्यशोधनंस्नानसंध्यातर्पणमाचरेदित्यादौ श्रौतस्मार्तकर्मणामप्यनुष्ठेयत्वं बोधयति ॥ तथा पञ्चमोल्लासे (श्लोक १२) थंभसांद्वादशप्रस्थंप्रस्थार्धंतत्क्रमेणचेत्यादिना पैष्ट्यादिमदिरोत्पादनप्रकारान्प्रपञ्च्य (श्लोक ३३) मद्यान्येकादशैतानिभुक्तिमुक्तिप्रदानिच ॥ द्वादशंतुसुरामद्यंसर्वेषामुत्तमम्प्रिये ॥ गौडीमाध्वीचपैष्टीतिविज्ञेयात्रिविधासुरा ॥ सर्वसिद्धिकरापैष्टीगौडीभोगप्रदायिनीत्यादिना पैष्ट्यादीनां पृथक्पृथक् फलविशेषं सर्वासां दर्शनस्पर्शनाघ्राणादिपुण्यविशेषं पूजायामुपयोगं चोक्त्वा (श्लोक ४७) मांसन्तुत्रिविधंप्रोक्तंखभूजलचरंप्रिये ॥ यथासंभवमेध्येकंतर्पणार्थंप्रकल्पयेत् ॥ मांससंदर्शनेनापिसुरादर्शनवत्फलम् ॥ पितृदैवतयज्ञेषुवेदेहिंसाविधीयते ॥ आत्मार्थंप्राणिनांहिंसाकदाचिन्नोदिता प्रिये ॥ अनिमित्तंतृणंवापिच्छेदयेन्नकदाचन ॥ देवतार्थंद्विजंगांवाहत्वापापैर्नलिप्यते ॥ मामनादृत्यपुण्ये-

पिपासंस्यात्मस्ययायतः ॥ मक्षिमिर्चंकृतंपापंपुण्यंमवतिशांभवि ॥ यैरेवपतनंद्रव्यैःसिद्धिस्तैरेवचोदितेत्यादिना तत्र वेदानुकूल्यं दर्शयति ॥ तथा (श्लोक ८३) सुराशक्तिःशिवो मांसंतद्भोक्ताभैरवःस्वयम् ॥ तयोरैक्यंसमुत्पन्नमानन्दोमोक्षउच्यते ॥ आनन्दोब्रह्मणोरूपंतच्चदेहेव्यवस्थितम् ॥ तस्याभिव्यञ्जकंद्रव्यंयोगिभिस्तेनपीयतइत्यादौ "अन्योन्तर आत्मानन्दमयः ॥ आनन्दोब्रह्मेतिव्यजानात् ॥ आनन्दरूपममृतंयद्विभाति" इत्यादिश्रुतीनामर्थमद्वैतं च वर्णयति ॥ (श्लोक ८९) देवान्पितॄन्समभ्यर्च्यवेदशास्त्रोक्तवर्त्मना ॥ गुरुंस्मरन्पिबन्मद्यंखादन्मांसंनदोषभागित्यादिना वेदशास्त्रानुकूल्यं प्रकाशयन्निषेधानामभिलापपूर्वकात्वैधपानादिपरत्वं स्वसंमतपानादेः सोमपानादिवददूषितत्वं च मपञ्चयति ॥ पष्ठोल्लासे च (श्लोक ५२) प्रथमःप्रकृतेर्दक्षःमतद्विष्णुरनन्तरम् ॥ त्र्यम्बकस्तुतृतीयःस्याच्चतुर्थस्त्रिपदाभिधः ॥ (सप्तदाभिधइति पाठान्तरम्) विष्णुर्यौनिकइत्याख्यःपञ्चमःकल्पतांमनुरित्यादौ तत्तद्वैदिकमन्त्रानुग्रहं स्फुटयति ॥ एवं तत्रतत्र तन्त्रग्रन्थेषु श्रुत्यादिप्रामाण्यादरणं श्रुत्यर्थवर्णनं चावेक्षणीयम् ॥ विस्तरभयाद्विरम्यते ॥ अतस्तादृशमार्गेष्वीश्वरसंमतश्रुत्यर्थवर्णनरूपतायाः सत्वात्तन्निन्दकेषु वैदिकशिष्टेष्वतिप्रसंगोमूले यदुक्तः सयुक्तएव ॥ वस्तुतस्तु कौर्मवचने ईश्वरमार्गशब्देन ईश्वरस्यायमीश्वरेण प्रोक्तोवा मार्गइत्येवार्थौलभ्यते नतु तत्संमतश्रुत्यर्थवर्णनरूपइति कल्पनेकिंचिदपि लिङ्गं वचनेऽस्ति ॥ ननसा कल्पनेष्वनिस्तारस्तु प्रकाशितः ॥ ननु नेश्वरसंमतश्रुत्यर्थवर्णनरूपत्वमात्रं मार्गस्याऽऽदरणीयत्वे बीजमपितु वास्तवतदर्थवर्णनरूपत्वमेव ॥ अतोवामादिमार्गेष्वीश्वरसमतश्रुत्यर्थवर्णनरूपत्वे सत्यपि प्रयोजनविशेषार्थं शिवेन तथा कथनात्तु तेषामनिन्द्यत्वमितिचेदिष्टं नः ॥ परं कोवास्तवः श्रुत्यर्थः कश्चाऽवास्तवइत्यत्र किं निर्णायकम् ॥ वेदाङ्गादीनां पूर्वोत्तरमीमांसासिद्धन्यायानां चानुकूल्यप्रातिकूल्ये एव वास्तवावास्तवत्वयोर्निर्णायके इति चेदोंकुर्मः ॥ श्रीमदाचार्यादीनां हि तदनुकूलवेदार्थज्ञापनार्थमेव प्रवृत्तिः ॥ एवंच सत्यसत्संमतश्रुत्यर्थस्तदनुकूलोऽन्यसमतोवा सतथेत्यत्रैवावयोर्विवादः पर्यवस्यति नतु पुराणवचनैरहं वा निन्द्यस्त्वं वा निन्द्यइत्यत्र वृथाकलहः ॥ ब्रह्महत्यासुरापानमित्यादि ॥ मनुना एकादशाध्याये (श्लोक ५४) ब्रह्महत्यासुरापानंस्तेयगुर्वङ्गनागमः ॥ महान्तिपातकान्याहुःसंसर्गश्चापितैःसहेति सुराप्रतिषेधोबोधितः ॥ याज्ञवल्क्येन तृतीयाध्याये कर्मविपाकपूर्वकप्रायश्चित्तप्रकरणे (श्लोक १३) निषिद्धभक्षणंजैह्म्यमुत्कर्षेचवचोऽनृतम् ॥ रजस्वलामुखास्वादःसुरापानसमानित्विति निषिद्धस्य मांसलशुनादेः स दर्शितः ॥ मनुयाज्ञवल्क्यादिशास्त्रेष्वनुपाकृतमांसनिषेधाः स्पष्टतराएवेति किमिह बहुना ॥ तैनैव तत्रैव (श्लोक २८) गोवधोव्रात्यतास्तेयमित्यादिना (श्लोक ३६) भार्यायाविक्रयश्चैषामेकैकमुपपातकमित्यन्तेन उपपातकान्युक्तानि तत्र (श्लोक २९) पारदार्यंपारिवित्र्यमिति परदारसङ्गस्य प्रतिषेधः प्रकाशितः ॥ एवं मत्स्यादिप्रतिषेधाअपि सन्त्येव ॥ महापातकातिपातकेत्यादि ॥ यद्यपि प्रायश्चित्तेन्दुशेखरादिषु महापातकसमान्यनुपातकत्वेनोक्तानि अतिपातकानि चातिरिक्तान्येवोक्तानि तथाप्यत्र महापातकसमानामनिपातकत्वव्यवहारस्तु महापापंचातिपापंतथापातकमेवच ॥ प्रासङ्गिकंचोपपापमित्येवंपञ्चकोगणइति मिताक्षरा-

यामुपपातकनिरूपणउदाहृतस्मरणानुरोधात् ॥ अतउभयथापि व्यवहारो न विरुद्धः ॥ अथेश्वरशब्देन शङ्कराचार्यएव ग्राह्यइति द्वितीय कल्पं दूषयन्ति ॥ शङ्कराचार्येत्यादिना ॥ मीमांसकादिभिर्बहुभिरेव शाङ्करमतस्य खण्डितत्वात्तथेतिभावः ॥ वस्तुतस्तु पञ्चदशाध्याये तथा परिगते प्रकृतत्वान्यप्रकृतात्ययागमीमांसज्येयालाम् ॥ भार्यासाहित्यनग्नत्वकपालित्वादिभिर्दक्षाद्युक्तैः सूर्यमूर्तित्वादिभिर्दधीचोक्तैश्च धर्मैः साक्षाच्छिवस्यैव प्रकृतत्वात् ॥ अग्रे देवीप्रार्थितेन तेनैव स्वगणद्वाराऽध्वरस्य विध्वंसात् ॥ तत्र शङ्कराचार्याणां कथायालेशतोऽप्यभावाद्दक्षस्य तेषु द्वेषस्याप्यभावाच ॥ यत्तु अस्य वाक्यस्यापि कौर्मस्वरसेनोक्तविधशङ्करनिष्ठोपदेष्टृत्वबोधककौर्मवाक्यैः प्रत्यासत्त्येत्याद्युक्तं तदसत् ॥ तथासति पञ्चदशापेक्षया षोडशस्याधिकप्रत्यासत्त्यात्तत्रत्येषु चकारमोहनाख्याणीत्यादिवाक्येष्वप्याचार्याणां कर्तृत्वमानयं स्वीकुर्याः ॥ नच कापालंभैरवमित्यादिपरिगणनविरोधः शङ्क्यः ॥ तथान्यानिसहस्रशइत्यनेन सग्रहसंभवात् ॥ ननु प्रकरणाभावाद्विरुद्धलिङ्गदर्शनाच न स्वीक्रियतइतिचेत्प्रकृतेपि तुल्यम् ॥ नचैकपुराणस्थस्वसाम्येण तथाऽर्थः शक्यकल्पयितुम् ॥ श्रीभागवतादिषु बुद्धस्य भगवदवतारतया वर्णितत्वेन तत्पुराणस्थेषु हरिःभक्त्याऽवश्यकत्वबोधकवचस्सु धिग्जन्मनस्त्रिवृद्विद्यामित्यादिषु तद्रहितनिन्दावचस्सु च बुद्धभक्तिपरतायाबुद्धविरुद्धवैदिकनिन्दापरतायाश्चापातात् ॥ वस्तुतस्तु त्रिंशाध्यायवचांस्यपि न शङ्कराचार्यविषयाणीति प्रकाशित प्राक् ॥ ऐश्वरमार्गश्चात्र ईश्वरस्य तज्जायायाश्च वैदिकमन्त्रपूर्वकाऽऽहुतिभिर्यजनीयत्वादिलक्षणएव नतु शङ्कराचार्यकृतश्रुत्यर्थवर्णनरूप ॥ दक्षादिकाले तस्याऽभावात् उपक्रमोपसंहारविरोधाश्च ॥ कौर्मवचनानां स्वयमक्षरलभ्योऽर्थ ॥ यस्मात्परमेश्वरो भवद्भिर्वेदाद्बहिष्कृतोऽतो भवन्तस्त्रयीबाह्या भविष्यन्ति इह यज्ञे सर्वेऽपीश्वरविद्विषोभवन्तएश्वर मार्गं नमन्त्राभार्ययासार्धंशङ्करस्येतिनेज्यतइत्यादिना निन्दन्ति अतो यज्ञरक्षार्थं स्वाश्रितोपि हृषीकेशः पराङ्मुखोभविष्यतीति ॥ तदेतदग्रे प्रपञ्चयिष्यतइत्याहु ॥

कौर्मवाक्यानि तु न निन्दादीनां लक्षणत्वेन प्रतिपादकानि किंत्वन्यपराणीत्यग्रे वक्ष्यते ॥ स्वकपोलकल्पनया तु तेषां लक्षणत्वं न संभवति ॥ अतिव्याप्त्यादिदोषग्रस्तत्वात् ॥

कौर्मवाक्यानीति ॥ तथाच निन्दतोहैश्वरमार्गमिति शत्रन्तघटितपाठस्य केवलस्वकपोलकल्पितत्वात्तन्मूलिका "ईश्वरसमतमार्गनिन्दापित्र्यनधिकारस्य हेतुर्लक्षणच" इत्युक्तिरपि केवलद्योम्नि चित्रारम्भमेवानुकरोति ॥ यच्च शतानां त्रिंशद् तृतीय लक्षणमिति तदप्यसत् ॥ सप्तविंशे प्रथम तेषा लक्षण त्रिंशे द्वितीय पदञ्चशे तृतीयमिति कल्पने मानलेशस्याप्यभावात् ॥ यश्च योऽय निन्दति स तद्द्वेष्योभवतीति न्याय उक्त सोपि जीवन्मुक्ताना स्वनिन्दकेषु द्वेषाऽभावादनैकान्तिक ॥ यच्छब्दयोस्तच्छब्दयोश्च क्रमानपेक्षसामानाधिकरण्याङ्गीकारे तु शिक्षार्थं पित्रादिना निन्द्यमानेपि पुत्रादौ द्वेषस्याऽभावादनैकान्तिकत्वम् ॥

कुशास्त्राऽऽसक्तमानसत्वं चतुर्थं लक्षणम् ॥ कुशास्त्रमप्युक्तविधेश्वरमार्गभिन्नमार्गरूपम् ॥ उक्तश्च त्वयाशङ्कराऽऽचार्यसंमतश्रुत्यर्थवर्णनरूपोमार्गः ॥ तथाच तादृशश्रुत्यर्थवर्णनरूपमार्गभिन्नशास्त्राभ्यासकर्तृत्वं लक्षणं संपन्नम् ॥ तच्च तत्प्राक्तनेषु सर्वेष्वतिव्याप्तम् ॥ किंच तादृशश्रुत्यर्थाऽनभिज्ञेषु शिवभक्तेषु पुराणाद्यभ्यासशालिष्वतिव्याप्तिश्च ॥ किंचाधिगतपाणिनीयगौनर्दीयसर्वस्वे नवद्वीपगमनेन संपादितकणभुक्चरणाक्षसिद्धान्तसंपदि भाट्टप्राभाकरमतपारावारपारदृश्वनि तादृशशास्त्राभ्यासशीले त्वय्यतिव्याप्तिश्च ॥

अथ सहस्राक्षे कुशास्त्रमित्यादिना लक्षणत्रयमित्यन्तेन दर्शितानि तुर्यपञ्चमषष्ठलक्षणानि क्रमेण युगपच्च दूषयिष्यन्तः कुशास्त्राऽऽसक्तचेतस्त्वरूपं तुर्यं तावत्प्राधान्येन परिहरन्ति ॥ कुशास्त्राऽऽसक्तमानसत्वमित्यादिना चतुर्थं पूर्वं निरस्तमित्यन्तेन ॥ उक्तश्चेति ॥ उक्तविधेश्वरेत्याद्युक्त्या सूचित इत्यर्थः ॥

कुशास्त्रमपि उक्तविधेश्वरमार्गभिन्नमार्गरूपम् ॥ प्रकरणस्वारस्यात् ॥ एवं मिथ्याऽधीतसमाचारत्वमपि शङ्कराऽनभिमताऽधीतसमाचारत्वं ॥ मिथ्याज्ञानप्रलापित्वमपि शिवाऽनभिमतज्ञानप्रलापित्वमेव ॥ समानमिदमपि लक्षणत्रयम् ।

अत्राऽयं भावः ॥ यद्धि "कुशास्त्रमप्युक्तविधेश्वरमार्गभिन्नमार्गरूपम् ॥ प्रकरणस्वारस्यात्" इत्युक्तं तदसत् ॥ नहि तस्मिन्नध्याये पूर्वोऽपराध्यायेषु वा लेशमात्रमपि शङ्कराचार्याणां प्रकरणमस्ति ॥ तत्र दक्षयज्ञादिनिरूपणे रुद्रेश्वरत्वतदध्वरविध्वंसकत्वादिभि साक्षात्त्र्यक्षस्यैव प्रकरणात् ॥ नग्नत्वकपालित्वाऽष्टमूर्तित्वादितन्मात्रलिङ्गदर्शनात् स्पष्टरुद्रमहादेवादिशब्दश्रुतेश्च अतो न कुशास्त्रशब्देन शङ्कराचार्यमार्गभिन्नमार्गएवाऽऽहत्य ग्रहीतुं शक्यः ॥ ननु कुशास्त्रशब्देन तु शिवप्रवर्तितातिरिक्तमार्गएव गृह्यते शङ्कराचार्याणामपि शिवावतारत्वादिष्टसिद्धिरिति चेत्तथासति पाशुपतशास्त्रमपि शिवप्रवर्तितमस्ति प्रशंसितं च तत् कथंचिन्मोक्षफलकतया महाभारतादौ ॥ तत्किं कुशास्त्रं न वा आद्ये शाङ्करमतं तच्चोभयमपि कुशास्त्रतयाऽङ्गीकरणीयं स्यात् ॥ परस्परमतियौगिकभेदवत्त्वात् परस्परविरुद्धत्वात् उभयस्यापिश्रुत्यर्थवर्णनरूपत्वाच्च ॥ न द्वितीयः ॥ शिवप्रवर्तितमितरत्सर्वमपि विहाय केवलशाङ्करभिन्नमार्गपरिग्रहे मानाऽभावात् ॥ ननु प्रकृताध्याये तत्प्रकरणाऽभावेऽपि त्रिंशे तदवतारकथासत्वात्प्रकृते तथा व्याख्यायत इति चेदत्र प्रक्रान्तस्य त्यागे अप्रक्रान्तस्य दवीयस उपादाने च किं मानम् ॥ किंचैवंसति षोडशाध्यायद्वादशाध्याययोः स्पष्टतरमुक्तमेवात्र कुशास्त्रशब्देनोपादीयताम् ॥ अतिसान्निध्यात् कण्ठरवेण कुशास्त्रत्वकथनाच्च ॥ तथाहि तत्र पूर्वखण्डे षोडशाध्याये पुरादारुवनेपुण्येमुनयोगृहमेधिन इत्यादिना दारुवनस्थतापसानामनावृष्टिजतापतोऽन्नार्थं गौतमं प्रति प्रार्थनं तेन द्वादशवर्षपर्यन्तमन्नादिना तेषां निर्वहणं ततोद्वादशे वर्षे दुरसनिवारिवर्षे संपन्ने पुनर्देवदारुवने निर्गमिषतां तेषामादरणविशेषाद्गौतमेन कृतमुपरोधं स्वनिर्गमार्थं मायया गां विधाय तस्यां गौतम-

कृतस्पर्शमात्रेण मृतायां गौतमे वृथादुरितमारोप्य तेषां पुनर्दैवदारुवनप्राप्तिं च वर्णयित्वोच्यते ॥ सतेषामयथाजातांगोवध्यांगौतमोमुनिः ॥ येनापिहेतुनाज्ञात्वाशशापानीचमोपवः ॥ भविष्यन्तित्रयीवाह्यामहापातकिभिःसमाः ॥ बहुशस्तेतथाशापाज्जायमानाःपुनःपुनः ॥ सर्वेसंप्राप्यदेवेशंशंकरंविष्णुमव्ययम् ॥ अस्तुवँल्लौकिकैःस्तोत्रैरुच्छिष्टाइवसर्वगौ ॥ देवदेवौ महादेवौभक्तानामार्तिनाशिनौ ॥ कामवृत्त्यामहायोगौपापान्नस्त्रातुमर्हथः ॥ तदापार्श्वस्थितं विष्णुंसंप्रेक्ष्यवृषभध्वजः ॥ किमेतेषांभवेत्कार्यंप्राहपुण्यैषिणामिति ॥ तत सभगवान्विष्णुः शरण्योभक्तवत्सलः ॥ गोपतिंप्राहविप्रेंद्रानालोक्यप्रणतोहरिः ॥ नवेदवाह्येपुरुषेधर्मलेशोपिशङ्कर ॥ संगच्छतेमहादेवधर्मोवेदाद्विनिर्बभौ ॥ तथापि भक्तवात्सल्याद्रक्षितव्यामहेश्वर ॥ अस्माभिःसर्वएवैतेगंतारोनरकानपि ॥ तस्माद्विवेदवाह्यानांरक्षणार्थायपापिनाम् ॥ विमोहनानिशास्त्राणिकरिष्यावोवृषध्वज ॥ एवंसम्बोधितोरुद्रोमाधवेनमुरारिणा ॥ चकारमोहशास्त्राणिकेशवोपिशिवेरितः ॥ कापालंलांगलंवामंभैरवंपूर्वपश्चिमम् । पञ्चरात्रंपाशुपतंतथान्यानिसहस्रशः ॥ सृष्ट्वातान्याहुनिर्वेदाःकुर्वाणाःशास्त्रचोदितम् ॥ पतन्तोनरकेघोरेबहून्कल्पान्पुनःपुनः ॥ जायन्तेमानुषेलोकेक्षीणपापचयास्ततः ॥ ईश्वराराधनबलाद्गच्छध्वंसुकृतांगतिम् ॥ वर्तध्वंमत्प्रसादेननान्यथानिष्कृतिर्हिवः ॥ एवमीश्वरविष्णुभ्यांचोदितास्तेमहर्षयः ॥ आदेशंप्रत्यपद्यन्तशिवस्यासुरविद्विषः ॥ चक्रुस्तेन्यानिशास्त्राणितत्रतत्ररताःपुनः ॥ शिष्यानध्यापयामासुर्दर्शयित्वाफलानिच ॥ मोहायसङ्क्रमंलोकमवतीर्यमहीतले ॥ चकार शङ्करोभिक्षांहितायैषांद्विजैःसहेत्यादि ॥ तथा द्वादशाध्याये जनमोत्तरं हिमालयेन स्तुतागिरिसुता तं प्रति शृणुध्वचतःप्रथमंगुह्यमीश्वरगोचरमित्यादिनेश्वरस्वरूपतद्भक्त्यादिकं निरूप्य श्रुतिस्मृत्युदितंसम्यक्कर्मवर्णाश्रमात्मकम् ॥ अध्यात्मज्ञानसहितंमुक्तयेसततंकुरु ॥ धर्मात्संजायतेभक्तिर्भक्त्यासंप्राप्यतेपरम् ॥ श्रुतिस्मृतिभ्यामुदितोधर्मोयज्ञादिकोमत इत्यादिना ज्ञानकर्मसमुच्चयादेव फलसिद्धिं भक्तेरेव प्राधान्यं च सर्वं तावकमतातिरिक्तप्रकारकं प्रतिपाद्य वेदस्यैव मुख्यत्वं चोक्तवाह ॥ नहिवेदादृतेकिंचिच्छास्त्रंधर्माभिधायकम् ॥ योन्यत्ररमतेसोसौनसंभाष्योद्विजातिभिः । (ब्रह्माभिधायकमिति पाठान्तरम्) यानिशास्त्राणिदृश्यन्तेलोकेस्मिन्विविधानितु ॥ श्रुतिस्मृतिविरुद्धानिनिष्ठातेषांहितामसी ॥ कापालंभैरवंचैवयामलंवाममार्हतम् ॥ एवंविधानिचान्यानिमोहनार्थायतानितु ॥ येकुशास्त्राभियोगेनमोहयंतीहमानवान् ॥ मयासृष्टानिशास्त्राणिमोहायैषांभवान्तरइति ॥ ततः वेदार्थवित्तमैःकार्यंयत्स्मृतंकर्मवैदिकमित्यादिना स्वायंभुवादिस्मृत्यष्टादशपुराणोपपुराणशिक्षाद्यङ्गप्रभृतीनां प्रादुर्भावं प्रादिदेश ॥ अतोऽत्र कुशास्त्रशब्देन वेदविरुद्धं कापालादिकमेवोपादातुमुचितं तस्मिन्पुराणे निःसंदिग्धप्रसिद्धत्वात् ॥ अतिसन्निहितत्वाद्द्वादशाध्याये तानि नामतोनिर्दिश्य येकुशास्त्राभियोगेनेति कथनाच्च ॥ न तु वेदगीताव्याससूत्रादिमूलकोऽनादिसिद्धोवैष्णवसिद्धान्तः शङ्कराचार्यमार्गप्रतियोगिकभेदमात्रेण कुशास्त्रशब्देनोपादातुं शक्यः ॥ अतएवैकादशाध्याये (श्लोक ६५) असच्छास्त्राधिगमनंकौशील्यस्यचक्रियेति मनुवचने तृतीयाध्याये कर्मविपाकपूर्वकप्रायश्चित्तप्रकरणे (श्लोक ३६) असच्छास्त्राधिगमनमाकरेष्वधिकारितेति याज्ञवल्क्यवचने च तादृशस्यैवाऽसच्छास्त्रत्वमभिप्रेयते ॥

"श्रुतिस्मृतिविरुद्धशास्त्रशिक्षणं" इति कुल्लूकभट्टेन "असच्छास्त्रस्य चार्वाकादिग्रन्थ-समधिगमः" इतिविज्ञानेश्वरेणचविवरणात् ॥ एवं "असच्छास्त्राभिगमनंनास्तिकताकु-शीलवतामद्यस्त्रीनिषेवणमित्युपपातकानि" इत्यादिपुम्बृहद्विष्ण्वादिवचनेष्वपि द्रष्टव्यम् ॥ विशेषस्तु कश्चिदग्रे वक्ष्यते ॥ अथ प्रसह्य कुशास्त्रशब्देन शाङ्करमार्गभिन्नमार्गस्यैव परिग्रहे लक्षणे दोषमाहुः ॥ **तथाचेत्यादिना** ॥ **अभ्यासकर्तृत्वमिति** ॥ अभ्या-सोहि पुनः पुनः कीर्तनरूपोऽभ्यासः सचाऽऽसत्त्या संभवति तामन्तरा पठनाऽनिष्पत्तेः यथोक्तं केनचिदभियुक्तेन ॥ संस्कारबुद्धिविनयोद्यमशास्त्ररागाः पञ्चाऽऽन्तराःपठनसिद्धिक-राभवंति ॥ आचार्यपुस्तकनिवाससहायभिक्षाबाह्यास्तुपञ्चपठनंपरिवर्धयन्तीति ॥ यथाय-थाहि पुरुषःशास्त्रं समधिगच्छति । तथातथाविजानातिविज्ञानंचास्यरोचतइति मनुनाऽपि रुचिनियमः स्मर्यते ॥ अतः कुशास्त्रासक्तचेतस्कत्वमेते संगृहीतं भवति ॥ **तत्प्राक्त-नेष्विति** ॥ शङ्कराचार्यतः प्राचीनेषु वसिष्ठव्यासप्रभृतिषु गौडपादगोविंदयोगीन्द्रपर्यंतेषु सर्वेष्वपि महर्षिषु निबन्धाविकारेषु मानुषविद्वत्सु चाऽतिव्याप्तमित्यर्थः ॥ प्रागिति-कालार्थकमव्ययम् ॥ तत.सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौतुट्चेतिट्युष्ट्युल्वा तुडागमश्च॥ अनद्यतनइत्यादिनिर्देशात्तुटः प्रागमादेशः ॥ इदानींत्वेपि लक्षणस्य दुष्टत्वमाहुः ॥ **किंचतादृशेति** ॥ अलक्ष्यत्वं स्पष्टयितुं शिवभक्तपदम् ॥ अतिव्याप्तिश्चेति चकारोदोषा-न्तरसमुच्चायकः ॥ तथाच तदुक्तमार्गाऽसंमतं परस्य सविशेषत्वं ज्ञानाऽपेक्षया भक्तेः प्राधान्यं तथैव परपदप्राप्तिमेवमादीतरद्व्यावेदयत्कौर्मादिपुराणमपि कुशास्त्रतयाऽभि-लप्यं स्यादितिभावः ॥ एवचानेन वचनेन कौर्मस्य कुशास्त्रत्वं ततश्चास्यापि कुशास्त्रवचनतया-ऽप्रामाण्यं प्रसज्येतेति स्वारूढशाखाच्छेदनम् ॥ तत्र तथा निरूपणं तु पूर्वखण्डे द्वादशा-ऽध्यायादौ उत्तरखण्डईश्वरगीतादौ चापाणिपिहितमेव ॥ प्रस्तावनोक्तमनुवदन्तःप्रतिवादि-व्यतिव्याप्तिमाहुः ॥ **किंचाधिगतेति** ॥ पाणिनिना प्रोक्तं पाणिनीयं व्याकरणम् ॥ वृद्धाच्छः ॥ गोनर्दे काश्मीरमण्डले देशविशेषे भवोगोनर्दीयः पतञ्जलिः ॥ एङ्प्राचां-देशइति पाक्षिकवृद्धत्वाच्छ. ॥ न बहुव्रीहाविति सूत्रे भाष्ये गोनर्दीयस्त्वाहेति पतञ्जलौ गोनर्दीयशब्दः प्रयुज्यते ॥ तेन प्रोक्तं गोनर्दीयं महाभाष्यम् "याज्ञवल्क्यानि ब्राह्म-णानिआश्मरथः कल्प" इत्यादिवत्प्राग्दीव्यतीयोऽण् ॥ अधिगतं पाणिनीयगोनर्दीययोः सूत्रमहाभाष्ययोः सर्वस्वं येनेति तथा ॥ नवद्वीपो लोके नदिया इति प्रसिद्धः प्राच्यः स्थलविशेषः ॥ कणभुक् कणादः सप्तपदार्थनिरूपकदशाऽध्यायवैशेषिकदर्शनस्यप्रणेता ॥ चरणे अक्षि यस्येति चरणाक्षो गौतमः षोडशपदार्थनिरूपकपञ्चाध्यायन्यायदर्शनस्य निर्माता ॥ बहुव्रीहौसक्थ्यक्ष्णो स्वाङ्गात्षजिति षच् ॥ भट्टः कुमारिलभट्टाचार्यः तस्येदं भाट्टम् ॥ प्रभाकरोगुरुरिति व्यवह्रियमाणः ॥ तस्येदं प्राभाकरम् ॥ इमे द्वे मते पूर्वतन्त्रविषयके तद्रूपयोः पारावारयोः समुद्रयोः पारं दृश्वानिति तथा ॥ दृशेः क्वनिबिति क्वनिप् ॥ **तादृशशास्त्रेति** ॥ शाङ्करभिन्नतत्त्वदर्शीविष्णुस्वा-मिश्री रामानुजश्रीपूर्णप्रज्ञादिभिःकाशितवेदान्तशास्त्राऽभ्यसनशीले ॥ अन्यथा निखिलनिग-मान्तपयःपयोधिपारीणत्वाऽसिद्धेः ॥ खण्डनोपपादेनापि तदभ्यासस्यानुमितेश्च ॥ अत्र

गौनर्दीयेतिप्रयोगेण प्रस्तावनायां गोनर्दीयेत्यपप्रयोगः सूचितः ॥ गोनर्दीयशब्देन तत्प्रोक्तग्रन्थस्यालाभात् ॥ पतञ्जलिमात्रपरत्वे स्वधिगतपाणिनिगोनर्दीयसर्पस्यक्षुद्रस्येव मन्तव्यम् ॥ अतिव्याप्तिश्चेति चकारः शाङ्करवेदान्तानध्येतृषु व्याकरणन्यायपूर्वमीमांसाशास्त्रहृदयेषु शङ्कराचार्यतः प्राचीनार्वाचीनेषु बहुषु ख्यातविद्वत्स्वतिप्रसंगं समुच्चिनोति ॥ नहि सर्वेषां विदुषां तदध्ययननियमोऽस्ति ॥ तथाचप्रतिलक्षणमित्यादि ॥ परदूषणाय कल्पितेषु लक्षणेषु प्रत्युत तस्यैव दोषमापद्यतइति भावः ॥ अत्र शशमि पुपलक्षणम् ॥

तथाच प्रतिलक्षणं परोद्देशेन प्रक्षिप्तं शास्त्रं दुर्बलं प्रक्षेप्तारमेव हन्तीतिन्याय आपततीति कौतूहलम् ॥ यत्तु प्रकरणस्वारस्यात्तादृशाऽर्थलाभ इत्युक्तं तदपि प्रकरणाज्ञानमनुमापयति ॥ तथाहि कूर्मपुराणे पूर्वखण्डे पञ्चदशोऽध्याये ॥ सशप्तःशंभुनापूर्वंदक्षः प्राचेतसोनृपः ॥ किमकार्षीन्महाबुद्धेश्रोतुमिच्छामसांप्रतमित्येवं शौनकादिभिः पृष्टः सूतो दक्षस्य चरितं प्रोक्तवान् वक्ष्येनारायणेनोक्तमित्यादिना ॥ तत्र पूर्वं वैर मनुस्मरता दक्षेण यज्ञ आरब्धः ॥ तत्र विष्णुप्रमुखा देवाः शङ्करं विना समागता ऋषयश्च ॥ तत्र दधीचो महादेवमदृष्ट्वा सदेवःसांप्रतंरुद्रोविधिनाकिनपूज्यत इतिदक्षं पृष्टवान् ॥ ततो दक्ष उवाच ॥ सर्वेष्वेवहियज्ञेषुनभागः परिकल्पितः ॥ नमन्त्राभार्यया सार्धं शङ्करस्येतिनेज्यते। एवंदक्षेणोक्ते पुनर्दधीचेन यज्ञप्रसूतिर्विश्वस्येत्याद्युक्त्वा संस्तूयतेसहस्रांशुसामगाध्वर्युहोतृभिः ॥ पश्यैनंविश्वकर्माणंरुद्रमूर्तिंत्रयीमयमित्युक्तम् ॥ ततो दक्षउवाच ॥ यएतेद्वादशाऽऽदित्याआगतायज्ञभागिनः ॥ सर्वेसूर्याइतिज्ञेयानह्यन्योविद्यतेरविः ॥ दक्षेणैवमुक्ते ये ब्राह्मणास्तत्र समायातास्तेपि तमसाविष्टमनसो नमन्यंतेवृषध्वजम् ॥ सहस्रशोथशतशोबहुशोभूयएव ते ॥ निन्दन्तो वैदिकामन्त्रान्सर्वभूतपतिंहरम् ॥ अपूजयन्दक्षवाक्यंमोहिताविष्णुमायया ॥ ततो दक्षेण ब्राह्मणैश्च कृतां निन्दां श्रुत्वा ब्रह्मा अंतर्हितः ॥ ततो दक्षो नारायणं शरणं जगाम यज्ञं च विष्णुना रक्षितः प्रवर्तयामास ॥ तदनन्तर च दधीचो दक्षसाहाय्यकारिणो ब्राह्मणान् शशाप ॥ भविष्यध्वंत्रयीबाह्याः सर्वेपीश्वरविद्विषः ॥ निन्दन्तोह्यैश्वरं मार्गंकुशास्त्रासक्तमानसाः ॥ मिथ्याधीतसमाचारामिथ्याज्ञानप्रलापिनः ॥ प्राप्यघोरकलियुगंकलिजैःपरिपीडिताः ॥ त्यक्त्वातपोबलं कृत्स्नंगच्छध्वंनरकान्पुनः ॥ भविष्यतिहृषीकेशः स्वाश्रितोपिपराङ्मुखः ॥ इत्यन्तेन सूतैः सर्वं व्याख्यातम् ॥ तथाच दक्षयज्ञे समागतैर्ब्राह्मणैर्यः शिवद्वेषः शिवनिन्दा शिवमार्गनिन्दा च कृता तत्सर्वमनूद्य तदनु कुशास्त्रासक्तचेतस्त्वमिथ्याधीतसमाचारत्वादिकं चानूद्य त्रयीबाह्यत्वघोरकलिकल्मषाभ्यर्दितत्वतपोबलहानिनरकप्राप्ति-

रूपान् शापान्दत्तवान् ॥ ननु तत्र शङ्करोक्तश्रुत्यर्थस्य प्रकरणमस्ति नापि लक्ष्यलक्षणभावस्य येन मिथ्याधीतसमाचारत्वादीनां लक्षणत्वं स्वदुक्तसमाचारत्वादिपरत्वं वा भवेत् ॥ एवं यज्ञकाले दक्षेण यज्ञोपकारिब्राह्मणरक्षणार्थं नियुक्तोपि श्रीविष्णुर्भवद्भिराश्रितोपि मद्वाक्यात्पराङ्मुखोभविष्यति समर्थोपि मच्छापमन्यथा न करिष्यतीत्यर्थः ॥ अयमपि शापएव दधीचेन दत्तः ॥ एतेन विष्णोः सम्यगसम्यग्वाऽऽश्रितत्वं शप्तानां लक्षणमिति प्रलपितमपास्तम् ॥

तेन यथा परोपद्रवायैव शङ्करभक्तिं भावयता सुदक्षिणेन भगवति तदनुयायिषु च प्रयुज्यमानः कृत्याऽभिचारः सुदर्शनेन परिभूतः परावृत्य प्रत्युत तमेव सपरिवारं समर्दं समदहत् ॥ अनन्तरं चानुप्रविष्टं सुदर्शनं तदाश्रयस्थलं दग्ध्वा तं समूलघातं जघान ॥ तथा वैष्णवाऽऽचार्येषु वैष्णवेषु च प्रयुक्तोदूषणाऽभिचारोवैष्णवसुदर्शनाभिभूतः सएव ज्ञानदुर्बलं तमेव प्रथमं प्रमथ्नाति ॥ तदनु वैष्णवसुदर्शनं तदवलंबं सकलं समूलमुन्मूलयतीति गूढोऽभिसंधिः ॥ अथ तदुक्तहेतुदूषणमुखेन वास्तवं कौर्मवचसामर्थं समर्थयन्ति ॥ यत्तुप्रकरणेत्यादिना ॥ अधारंभात्प्रभृति तावांस्तदध्यायभागोऽत्यपेक्षितव्याख्यान मध्येकृत्वाऽनूद्यते ॥ तत्र चतुर्दशाध्यायान्ते दशभ्यस्तुप्रचेतोभ्योमारिषायांप्रजापतिः ॥ दक्षोजज्ञेमहाभागोयःपूर्वंब्रह्मणःसुतः ॥ सतुदक्षो महेशेनरुद्रेणसहधीमता ॥ कृत्वाविवादंरुद्रेणशप्तःप्राचेतसोभवदित्यादिना संक्षेपेण सतीदेहत्यागः शिवप्रत्तः क्षत्रियकुलेऽवतरणरूपः शापश्च निरूपितः ॥ ततः पञ्चदशाध्यायारंभे ॥ नैमिषेयाऊचुः॥देवानांदानवानांचगन्धर्वोरगरक्षसाम्॥ उत्पत्तिविस्तरंसूतब्रूहिवैवस्वतेन्तरे ॥ १ ॥ सशप्तःशंभुनापूर्वंदक्षःप्राचेतसोनृपः ॥ किमकार्षीन्महाबुद्धेश्रोतुमिच्छामिसांप्रतम् ॥ २ ॥ सूतउवाच ॥ वक्ष्येनारायणेनोक्तंपूर्वकल्पानुषङ्गिकम् ॥ त्रिकालबद्धपापघ्नंप्रजासर्गस्यविस्तरम् ॥ ३ ॥ सशप्तःशंभुनापूर्वंदक्षःप्राचेतसोनृपः ॥ विनिन्द्यपूर्ववैरेणगङ्गाद्वारेऽयजत्क्रतुम् ॥ ४ ॥ अत्रं विनिन्द्येत्यन्वयः ॥ देवाश्चसर्वेभागार्थमाहूताविष्णुनासह ॥ सहैवमुनिभिःसर्वैरागतामुनिपुङ्गवाः ॥ ५ ॥ मुनिपुङ्गवाइति संबोधनमतो न पुनरुक्तिः ॥ दृष्ट्वादेवकुलंकृत्स्नंशङ्करेणविनाऽऽगतम् ॥ दधीचोनामविप्रर्षिः प्राचेतसमथाब्रवीत् ॥ ६ ॥ दधीचउवाच ॥ ब्रह्माऽऽद्यास्तुपिशाचान्तायस्याऽऽज्ञानुविधायिनः ॥ सदेवःसांप्रतंरुद्रो विधिनाकिंनपूज्यते ॥ ७ ॥ दक्षउवाच ॥ सर्वेष्वेवहियज्ञेषुनभागःपरिकल्पितः ॥ नमन्त्राभार्ययासार्धंशङ्करस्येतिनेज्यते ॥ ८ ॥ यतोयज्ञेषु न भागोनापि मन्त्राइति हेतोर्नेज्यते ॥ मन्त्राऽभावकथनेन शिवस्य वेदाद्बहिर्भावोयज्ञेषु भागाऽभावमापणेनैश्वरपदजनमार्गस्य निन्दा चाऽबोधि ॥ ततः कुपितोदधीचस्तत्तद्देवरूपेण स्वरूपेण च शिवस्य यज्ञभागभाग्भावं बोधयितुमाहेत्युच्यते ॥ विहस्यदक्षंकुपितोवच प्राहमहामुनिः ॥ शृण्वतांसर्वदेवानां सर्वज्ञानमयः स्वयम् ॥ ९ ॥ दधीचउवाच ॥ यस्मात्प्रवृत्तिर्विश्वात्मायश्चात्मापरमेश्वरः ॥ संपूज्यतेसर्वयज्ञैर्विदितःकिंनशङ्करः ॥ १० ॥ आद्यपादे यतःप्रवृत्तिरिति विश्वस्येति च पाठान्तरम् ॥ विदितइत्यत्र विदित्वेत्यपि ॥ अथ वेदे विधात्मत्वादिधर्मैः स्तूयमानोरुद्रो-

ऽन्यएव न त्वयं पार्वतीपतिरशादिविशिष्टइत्याशयेन दक्षउवाच ॥ नह्ययंशङ्करोरुद्रःसंहर्तातामसोहरः ॥ नग्नःकपालीविदितोविश्वात्मानोपपद्यते ॥ ११ ॥ संहर्तृत्वेन मुख्यकरत्वाभावाशयं शङ्करः किन्त्वयं सर्वसंहारकस्तामसोहरएव ॥ संहर्तृत्वनग्नत्वाद्ययोग्यधर्मशालिनोविश्वात्मत्वादिकंनघटते ॥ तस्याऽऽत्महिताऽकरणप्रसङ्गात् ॥ तमसोमुख्यत्वापत्तेः सर्वस्य नग्नत्वादिप्रसक्तेश्चेतिभावः ॥ किन्त्वीश्वरादिशब्दाभिधेयः सर्वदेवाद्यात्मना सर्वैरिज्यमानः सत्त्वोपहितो विष्णुरेवेत्याह ॥ ईश्वरोहिजगत्स्रष्टाप्रभुर्नारायणोहरिः ॥ सत्त्वात्मकोसौभगवानिज्यतेसर्वकर्मसु ॥ १२ ॥ अथ वेदत्रयस्यापि शिवपरत्वं तत्तद्देवरूपेण शिवस्यैवाराध्यत्वं च स्थालीपुलाकन्यायेन दर्शयितुं तदीयाष्टमूर्त्यन्तर्भूते भास्करे तथात्वं दर्शयन्दधीचउवाच ॥ किंत्वयाभगवानेषसहस्रांशुर्नदृश्यते ॥ सर्वलोकैकसंहर्ताकालात्मापरमेश्वरः ॥ १३ ॥ यंगृणन्तीहविद्वांसोधार्मिकाब्रह्मवादिनः ॥ सोयंसाक्षीतीव्ररोचिःकालाऽऽत्माशाङ्करीतनुः ॥ १४ ॥ एषरुद्रोमहादेवःकपालीचघृणीहरः ॥ आदित्योभगवान्सूर्योनीलग्रीवोविलोहितः ॥ १५ ॥ सस्तूयतेसहस्रांशुःसामगाध्वर्युहोतृभिः ॥ पश्यैनंविश्वकर्माणंरुद्रमूर्तित्रयीमयम् ॥ १६ ॥ संस्तूयतइत्यत्र संश्रूयतइत्यपिपाठः ॥ अत्र सूर्येपि संहर्तृत्वादिकं वर्णितम् ॥ सामगाध्वर्युहोतृभिरिति ॥ सामगाः प्रसिद्धाः ॥ अध्वर्यवोयाजुषाः होतारोबह्वृचाः ॥ तेन संपूर्णत्रय्यास्तत्रैव तात्पर्यं बोधितम् ॥ तैत्तिरीयाणां नारायणोपनिषदि "आदित्योवाएषएतन्मण्डलंतपतितत्रताऋचः" इत्याद्युक्त्या "सैषात्रय्येवविद्यातपतीति" श्रावणात् ॥ तैत्तिरीयब्राह्मणे (काण्ड ३ प्रपाठक १२ अनु० ९) "ऋग्भिःपूर्वाह्णेदिविदेवईयते ॥ यजुर्वेदेतिष्ठतिमध्येऽह्नः ॥ सामवेदेनास्तमयेमहीयते ॥ वेदैरशून्यैस्त्रिभिरेतिसूर्यः ॥" इत्याम्नानाच्च ॥ अथात्र द्वादशाऽऽदित्याः समागताएते तु न शिवमूर्तयः ॥ एतद्व्यतिरिक्तश्च सूर्योनैवास्ति यस्तन्मूर्तित्वेन संभाव्येत ॥ तस्मान्न शिवस्य वेदगोचरत्वमित्याशयेन । दक्षउवाच ॥ यएतेद्वादशादित्या आगतायज्ञभागिनः ॥ सर्वेसूर्याइतिज्ञेयानह्यन्योविद्यतेरविः ॥ १७ ॥ एवमुक्तेतुमुनयःसमायातादिदृक्षवः ॥ बाढमित्यब्रुवन्दक्षंतस्यसाहाय्यकारिणः ॥ १८ ॥ तमसाविष्टमनसोनपश्यन्तेवृषध्वजम् ॥ सहस्रशोथशतशोबहुशोभूयएवहि ॥ १९ ॥ द्वितीयचरणे नपश्यन्तिमहेश्वरमितिपाठान्तरम् ॥ श्लोकान्ते भूयएवतद्धस्यापि ॥ निन्दन्तोवैदिकान्मन्त्रान्सर्वभूतपतिंहरम् ॥ अपूजयन्दक्षवाक्यंमोहिताविष्णुमायया ॥२०॥ देवाश्चसर्वेभागार्थमागतावासवादयः ॥ नापश्यन्देवमीशानमृतेनारायणं हरिम् ॥२१॥ नारायणं विनाऽन्ये नापश्यन् नारायणस्तु सर्वान्माऽपश्यदेवेति भावः ॥ एवमनाम्नवेदार्थकथनं तत्राऽनुमतिं चालोक्य वेदगर्भोऽन्तरधादित्याह ॥ हिरण्यगर्भो भगवान्ब्रह्माब्रह्मविदांवरः ॥ पश्यतामेवसर्वेषांक्षणादन्तरधीयत ॥ २२ ॥ पश्यतः सर्वाननादृत्येत्यर्थः ॥ षष्ठीचानादरइतिषष्ठी ॥ अथ शिवमाहात्म्यप्रकाशनाय विष्णुना विधापितां यज्ञप्रवृत्तिमाह ॥ अन्तर्हितेभगवतिदक्षोनारायणंहरिम् ॥ रक्षकंजगतांदेवंजगामशरणंस्वयम् ॥ २३ ॥ प्रवर्तयामासचतंयज्ञंदक्षोथनिर्भयः ॥ रक्षकोभगवान्विष्णुःशरणागतरक्षकः ॥ २४ ॥ एतावता अत्राध्याये साक्षाद्दक्षस्यैव प्रकरणं लिङ्गं श्रुतिश्च उत्तरोत्तरं बलिष्ठानि स्पष्टतराण्युपलभ्यन्ते ॥ नत्विह कलिप्रभवभवावतारविशेषश्रीशङ्कराचा-

यैकथायागन्धोऽप्यस्ति ॥ पातकस्य दण्डयोग्यतायाश्च सत्त्वं शापबीजभूतं दर्शयति ॥
पुनःप्राहचतंदक्षंदधीचोभगवानृपिः ॥ संप्रेक्ष्यापिंगणान्देवान्सर्वान्वैरुद्रविद्विषः ॥ २५ ॥
अपूज्यपूजनेचैवपूज्यानांचाप्यपूजने ॥ नरःपापमवाप्नोतिमहद्वैनात्रसंशयः ॥ २६ ॥
असतांप्रग्रहोयत्रसतांचैवावमानना ॥ दण्डोदैवकृतस्तत्रसद्यःपततिदारुणः ॥ २७ ॥ ऋपि-
गणान्नृपध्वजमन्यमानान्देवांश्च यज्ञभागार्थमागतान्वासवादीन्देवमीशानमपश्यतः
सर्वानपीश्वरविद्विपःसम्यक् प्रेक्ष्य प्राह ॥ एतेन कलावीश्वरविद्विषः शङ्कराचार्यद्वेपिणोभवि-
ष्यन्तीति व्याख्यानमनोरथोऽपास्तः ॥ ईशानादर्शित्वादपूज्यानां वासवादीनां पूजने पूज्यानां
रुद्रादीनाम् ॥ असतां तमसाऽऽविष्टत्वाद्वैदिकमन्त्रनिन्दकानामृपीणाम् ॥ सतां वास्तववे-
दार्थवादिनाम् ॥ दारुणोदण्डः पुरस्ताद्ध्वरविध्वंसनरूपः ॥ इत्थं दक्षे दण्डसंभवं प्रदर्श्य
तदनुयायिनोब्राह्मणान् शशापेत्याह ॥ एवमुक्त्वासविप्रर्षिः शशापेश्वरविद्विपः ॥ समाग-
तान्ब्राह्मणास्तान्दक्षसाहाय्यकारिणः ॥ २८ ॥ अयोग्यस्यापि दक्षवचनस्य बाढमित्युक्त्या
स्वीकारेण साहाय्यकारिणईश्वरविद्विपः शशापेत्यनेनापि तात्कालिकशिवद्वेपशालिनामेव
शापोद्देश्यत्वं स्पष्टं बोधितं ननु त्वदिष्टम् ॥ पूर्वश्लोकद्वयं दक्षंप्रत्युक्तमिदं तु
समागतान्ब्राह्मणान्प्रत्युच्यते तेन (दक्षंप्रतिदधीचेन) इति सहस्राक्षोक्तिः प्रत्युक्ता ॥
सहेतुनिर्देशं शापाकारमाह ॥ यस्माद्बहिष्कृतोवेदान्भवद्भिःपरमेश्वरः ॥ विनिन्दितोमहादे-
वः शङ्करोलोकवन्दितः ॥ २९ ॥ भविष्यन्तित्रयीबाह्याःसर्वेपीश्वरविद्विपः ॥ निन्द-
न्तीहैश्वरंमार्गंकुशास्त्रासक्तचेतसः ॥ ३० ॥ मिथ्याधीतसमाचारामिथ्याज्ञानप्रलापिनः ॥
प्राप्यघोरंकलियुगंकलिजैःपरिपीडिताः ॥३१॥ त्यक्त्वातपोबलंकृत्स्नंगच्छध्वंनरकान्पुनः ॥
भविष्यतिहृपीकेशःस्वाश्रितोपिपराङ्मुखः ॥३२॥ एवमुक्त्वाथविप्रर्षिर्विरराममतपोनिधिः ॥
जगामसमनसारुद्रमशेषाघविनाशम् ॥ ३३ ॥ परमेश्वरः सर्वमूलभूतोपि भवद्भिर्यस्माद्य-
मख्याभार्यपासार्धमित्यादिदक्षवाक्यपूजनेन वेदाद्बहिष्कृतः तथा सूर्यादिमूर्तिभिः शंकरः
सर्वेपां शुभकर्ता सर्वलोकैर्वन्दितोऽपि महादेवो नग्न.कपालीत्यादिवाक्यपूजनेन विनि-
न्दितः ॥ निन्दन्तोवैदिकान्मन्त्रान्सर्वभूतपतिंहरमितिपूर्वमुक्तेश्च ॥ तस्माद्यूयमेव त्रयी-
बाह्याभविष्यन्ति ॥ पूर्वश्लोकोक्तस्य भवच्छब्दस्यैवाऽत्र विभक्तिविपरिणामेनान्वयात्स-
मक्षवचनेपि भविष्यन्तीति प्रथमपुरुपः ॥ भवच्छब्दान्वयमन्तरेण यस्मादिति हेतुहेतुम-
द्भावानुपपत्तेः ॥ कतिपु चित्पुस्तकेपु भविष्यथत्रयीबाह्याइतिपाठः ॥ आत्मनेपदं
गच्छध्वं नरकान्पुनरित्यत्रैवाऽऽर्पम् ॥ अतोपिवैष्णवाअमी शाङ्करमतखण्डनात्त्रयीबाह्या
भविष्यन्तीतिवचनाशयो न न शक्यकल्पनः ॥ त्रयीबाह्यशब्दस्यार्थोऽक्तघरकापालिकादिपरएव॥
नवेदबाह्येपुरपह्लत्याद्युदाहृतपूर्वकौर्मवचनसंदर्भात् ॥ तथापाशुपतंशाक्तंसोमंकुरसुमत ॥
कङ्कालशैवपापण्डमहाशैवादिभेदतः ॥ अवरस्व्यमतंसम्यग्वेदबाह्यद्विजोत्तमाः ॥ भस्मा-
स्थिधारिणः सर्वेभविष्यन्तिनसंशयः ॥ स्वांपरायेनवक्ष्यन्तिसर्वेशास्त्रेपुतामसाइत्यादिभ्यो
निर्दिष्टस्थलपाद्मादिवचनेभ्यश्च ॥ यथा इह पक्षे सर्वेपि शापो देवाश्च ईश्वरविद्विपः
शिवद्वेपिणः सन्तश्चैश्वरं .मार्गं वैदिकादुर्जनिभिः शिवयजनादिलक्षणं निन्दति ॥
सर्वेष्वेवहिपक्षेपुनमागःपरित्यक्तिपतइतिदक्षवाक्यस्यपूजनेन तमसाऽविष्टतया श्रुप-

ध्वजस्यामानेन चाविद्यमानदोषारोपविषयं कुर्वन्ति ॥ अतोहपीवेशः पराङ्मुखो भविष्यतीत्यग्रे वक्ष्यते ॥ अत्रहेतूननुवदति कुशास्त्रेत्यादिपदत्रयेण ॥ कुशास्त्राणि तामसानि वेदबाह्यशास्त्राणीति दर्शितं प्राक् ॥ तदासक्तिमन्तरा मनसि तमआवेशा-योगात् ॥ एवं तदाविष्टमनस्कताकथनेन निष्पद्यमानस्यैवायमनुवादः ॥ वस्तुतस्तु कुशास्तरि सर्वेष्वेवहियज्ञेष्वित्यादिना कुत्सितशासनकर्तरि दक्षआसक्तं चेतोयेषां तद्व्यैव युक्ततरं भाति ॥ शास्त्राणामिह विशेषतः प्रसक्त्यभावात् ॥ तस्यैव साहाय्यकरणात् ॥ वैदिकमन्त्रान्सर्वभूतपतिं हर च निन्दित्वापि तद्वाक्यस्यैव पूजनाच्च सिद्धमेवैतदनूद्यते ॥ चेतसइत्यत्र मानसाइति पाठान्तरम् ॥ यद्यपि तृन्तृचौ शंसिक्षदादिभ्य.संज्ञायांचानिटाविल्यौणादिकसूत्रेण शासेः क्षदादित्वाच्छासिक्षदादिभ्यइ-तिशेखरोक्तपाठान्तराद्वा शासेस्तृचि संज्ञायामेव शास्तेतियुक्तं ॥ मुनीन्द्र.श्रीघनःशास्तेत्य-मरोक्तेः ॥ तथापि बुद्धसंज्ञायामेवेति न शक्यं वक्तुम् ॥ मैत्रावरुणादृत्विग्विशेषपर्याये प्रशास्तृशब्दे इडभावानुपपत्तेः ॥ बाहुलकात् संज्ञायांचानिटावितिचकाराद्वा असंज्ञायामपि स्वीकारे तु नियामकपर्यायोपि साधुः ॥ अतएव शास्तासमंतभद्रेनाशासकेपुनरन्यवदिति विश्वमेदिन्यो ॥ प्रकृतसूत्रमनोरमातत्वबोधिन्यादिष्वप्यस्य कोशस्य प्रमाणत्वेनसंग्रहा-च्छासकवाचित्वमप्यसन्दिग्धमेव ॥ चान्द्रे शासे.त्रिचिशिष्टिरित्यत्र शास्तेतिप्रत्युदाहरवा रत्नमतिना स्वनौणादिकतृचोपीडभावोव्याकरणान्तरसंमत इति दर्श्यते ॥ पुराणादिषु तु श्रीभागवतादिषु (स्कं० १ अ० २२ श्लो० २६) शास्ताचोत्पथगामिनाम् ॥ (अ० १७ श्लोक० ९) खलानांमयिशास्तरि ॥ (स्कं ५ अ० १० श्लोक० २६) शास्ताभिगोप्तानृपतिःप्रजानां ॥ (स्कं० ६ अ० ३ श्लोक० ४) कतिसंतीहशास्तारः ॥ (श्लोक० ५) शास्तारोदण्डधारिण इत्यादिस्थलेषु शास्तृशब्दस्य प्रचुरप्रयोगदर्शनात्पौ-राणिकपरिभाषयाप्यत्र तत्प्रयोगोनिर्बाधएव ॥ नन्वध्ययनसदाचाराभ्यां सपन्नानां कथं कुशास्त्रेषु कुशास्तरि वाऽऽसक्तिरित्यतआह ॥ मिथ्याधीतेति ॥ अधीतं वेदादिकमध्ययनं वा ॥ नपुंसकेभावेक्तः ॥ समाचारः संध्यावन्दनाद्यनुष्ठान मिथ्या अधीतसमाचारौ येषां ते तथा ॥ अथवा मिथ्यैव अधीत समाचारोवेदव्रतोपदेशपरोग्रन्थोयैरित्येव मुख्यो-ऽर्थः ॥ अन्यथा सहस्रशोथशतशोबहुशोभूयएवहि ॥ निन्दन्तोवैदिकान्मन्त्रानित्यस्या-योगात् ॥ ननु ज्ञानिनामध्ययनानुष्ठानयोः समाचाराध्ययनस्य वा कथं वैयर्थ्यमितिचे-त्तत्राह ॥ मिथ्याज्ञानेति ॥ नन्न कपालीविदितोविश्वारमानोपपद्यतइत्यादिदक्षवाक्यस्य बाढमितिस्वीकारात्पूजनाच्च वास्तवज्ञानिनां तमआवेशस्य मायया मोहस्य चायोगात् ॥ इहतु तमसाविष्टमनसइति मोहिताविष्णुमाययेतिचोक्तत्वात्तथेति भावः ॥ अतइदं पदद्वयमपि सिद्धस्यैवार्थस्यानुवादकम् ॥ एवमनूद्य तत्फल दर्शयितुं पुनः शपति ॥ प्राप्यघोरमिति ॥ अनूदितहेतूनामिह्वानरोहक्रमेण फलान्युच्यन्ते ॥ यस्मादेव तस्माद्घोर कलियुगं प्राप्य मिथ्याज्ञानप्रलापित्वेन दोषप्रक्षेपकत्वात्त्विकज्ञानाभावात्कलिजैर्दोषैर्मद्य-पानादिभिः परित. पीडिताः सन्तोमिथ्याधीतसमाचारत्वादशेष तपोबलं त्यक्त्वा तत्त्यागात्कुशास्त्रेषु कुशासनकर्तरि वाऽऽसक्तमानसत्वाच्च नरकान्प्राप्नुत ॥ यस्माच्च

भवन्तः सर्वेपीश्वरविद्विषः सन्तऐश्वरं मार्गं निन्दन्ति तस्मादिदानीं स्वाश्रितःयज्ञरक्षार्थं स्वेन आत्मना आत्मीयेन दक्षेण वा आश्रितोपि हृषीकेशः पराङ्मुखो भविष्यति ॥ हरिहरयोरभेदेन हरद्वेषे हरिद्वेषस्य हरेज्यायामविद्यमानदोषारोपेण हरीज्यानिन्दनस्य च सिद्धेरिति भावः ॥ अयमपि शापएव ॥ स्वाभिन्नशिवद्वेषिषु भवत्सु प्रवृत्तं मच्छापं समर्थोपि सोन्यथा न करिष्यतीति निगर्वः ॥ हृषीकेशे पराङ्मुखे भवतामन्तःकरणं बाह्येन्द्रियाणि च सत्कर्मसु न प्रवर्तिष्यन्ते ॥ तद्वैमुख्ये सकलदुष्फलसंभवइति नातःपरं शप्स्यमतो विरामेति सूतआह ॥ एवमुक्त्वेति ॥ भविष्यतिहृषीकेशइति ॥ शापानुरोधादेव तस्मिन् यज्ञे विष्णोर्गरुडरूपेण पराङ्मुखीभावः स्वयमपि यज्ञस्यानिर्वहणं चाग्रेऽस्मिन्नेवाध्याये वर्ण्यते ॥ एवंचेह त्रयीब्राह्मत्वं कलिजदोषपरिपीडितत्वं तपोबल-त्यागो नरकप्राप्तिर्यज्ञरक्षार्थं प्रार्थितस्यापि विष्णोः पराङ्मुखत्वं चेति पञ्चैव दक्षयज्ञे शिवद्वेषादिकर्तृषु शापस्य विषयाः ॥ ईश्वरद्वेषादेस्तद्धेतुतयैवानुवादइति सिद्धम् ॥ तदेवत्सर्वमनुसन्धायोक्तं मूले ॥ **तथा हि कूर्मपुराण इत्यादिना प्रलपितमपास्त-मित्यन्तेन** ॥ अत्र यः **शिवद्वेष इति** ॥ वेदाप्रतिपाद्यत्वादिकथनरूपः सः ॥ प्रकरणस्वारस्यात् ॥ तेन "कलिमलहतैरिश्रौतधर्मवक्तरिचतस्मिन्ननभिरक्तनम्" इति कल्पनमपास्तम् ॥ यच्छब्दोलिङ्गविपरिणामेन शिवनिन्दाशिवमार्गनिन्दयोरप्यन्वेति ॥ **तत्सर्वमनूद्येति** ॥ यस्माद्बहिष्कृतोवेदादित्यनेन शिवद्वेषं विनिन्दितोमहादेवइत्यनेन तन्निन्दां निन्दन्तीहैश्वरं मार्गमित्यनेनतद्यजनलक्षणमार्गनिन्दांचानूद्येत्यर्थः ॥ **कुशास्त्रे-त्यादि** ॥ आदिपदं मिथ्याज्ञानप्रलापित्वसंग्राहकम् ॥ यच्छब्दनियमितप्रकृतशिवद्वेषा-दिपरामर्शिना तत्सर्वमितितच्छब्देन शिवोमोहनायावतीर्णइतिकथनशाङ्करमतखण्डना-देर्नेह संबंधगन्धोपीति द्योतितम् ॥ तदेवाहुः ॥ **नतुतत्रशङ्करोक्तेति** ॥ शङ्कराचार्य-व्याख्यातश्रुत्यर्थस्येत्यर्थः ॥ इदमुपक्रमबलात्समर्थितम् उपसंहारबलाद्भूयःसमर्थ्यते ॥ तथाहि ॥ जगाममनसारुद्रमिति शापदानजन्यपापलोपनार्थं शापनिर्वहणार्थं च शिवं प्रत्येव मनसा गमनं ज्ञायते ॥ एतदग्रे चानुपदमेव ॥ एतस्मिन्नन्तरेदेवीमहादेवंमहे-श्वरम् ॥ पतिंपशुपतिंदेवंज्ञात्वैतत्प्राहसर्वदृक् ॥ ३४ ॥ एतद्दाधीचशापादि दक्षयज्ञवृत्तं ज्ञात्वा तद्वचननिर्वाहार्थं प्राहेत्यर्थः ॥ यतः सर्वदृक् ॥ देव्युवाच ॥ दक्षोयज्ञेनयजते पितामेपूर्वजन्मनि ॥ विनिन्द्यभवतोभावमात्मानंचापिशङ्कर ॥ ३५ ॥ भवतो भावं वेदेषु सत्तां सहरणस्वभावं नग्नतयाऽस्थानकपालधारणादि चेष्टां च विनिन्द्य तथा भवत आत्मानं विश्वात्मत्वाष्टमूर्तित्वादिगुणविशिष्टं विग्रहं च विनिन्द्येत्यर्थः ॥ देवामहर्षयश्चा-सस्तत्रसाहाय्यकारिणः ॥ विनाशयाशुतंयज्ञंवरमेतंवृणोम्यहम ॥ ३६ ॥ तत्र पूर्वोक्तनि-न्दापूर्वकयज्ञे ॥ एतेन महर्षिकृता शापहेतुमूला निन्दापि साक्षाच्छिवस्यैवेति निश्चीयते ॥ दण्डोदैवकृतइति दाधीचवचननिर्वाहार्थं विनाशयेति प्रार्थनम् ॥ एवंविज्ञापितोदेव्यादेव-देवःपरःप्रभुः ॥ ससर्जसहसारुद्रंदक्षयज्ञजिघांसया ॥ ३७ ॥ एतेनाप्यसन्दिग्धं साक्षा-च्छिवस्यैव प्रकरणम् ॥ ततः श्लोकद्वयेन सृष्टस्य स्वरूपमायुधानि च निरूप्योच्यते ॥ वीरभद्रइतिख्यातंदेवदेवसमन्वितम् ॥ सजातमात्रोदेवेशमुपतस्थेकृताञ्जलिः ॥ ४० ॥

तमाहदक्षस्यमखंविनाशयशिवोऽस्तुते ॥ विनिन्द्यमांसयजतेगद्भाद्वरिगणेश्वर ॥ ४१ ॥ द्वितीयान्तानां ससर्जेति पूर्वेणान्वयः ॥ देवेशं शिवम् ॥ शिवोस्त्विति पुंस्त्वमार्षम् ॥ विनाशने हेतुर्विनिन्द्येति ॥ सः मां विनिन्द्ययजतद्दस्युत्तयापि पूर्वोक्तनिन्दादीनां श्रीमहादेवविषयकत्वमेव दृढीभवति ॥ अग्रे ततोबन्धप्रमुक्तेनासिंहेनैकेनलीलया ॥ वीरभद्रेणदक्षस्यविनाशमगमत्क्रतुः ॥ ४२ ॥ मन्युनाचोमयासृष्टाभद्रकालीमहेश्वरी ॥ तयाचसार्धंवृषभंसमारुह्ययर्योगणः ॥ ४३ ॥ अत्र भद्रकालीसाहित्यकथनेन देवीशापविनिर्दग्धाइति त्रिंशाध्यायस्थव्यासवचने देवीशादेवीशेन वा भद्रकालीपतिना वीरभद्रेण अपविनिर्दग्धाइत्यर्थः साधुः ॥ देवीशेन शिवेनैव वीरभद्रद्वारेति वा ॥ अग्रे श्लोकचतुष्टयेनरोमजास्यैरन्यैरुद्रगणैः सपत्नीकैः परिचारितस्य तस्य यज्ञदेशं प्रति ससमारंभं गमनं वर्णयित्वोच्यते ॥ उवाचसप्रियोरुद्रैर्वीरभद्रःस्मयन्निव ॥ वयंह्यनुचराः सर्वेशर्वस्यामिततेजसः ॥ ४८ ॥ भागार्थलिप्सयाप्राप्ताभागान्यच्छध्वमीप्सितान् ॥ अथचेत्कस्यचिदियंमायामुनिवरोत्तमाः ॥ ४९ ॥ भागोभवद्भ्योदेयस्तुनास्मभ्यमितिकथ्यताम् ॥ तंब्रूताज्ञापयतियोविनङ्क्ष्यामोवयंततः ॥ ५० ॥ सप्रियः भद्रकालीसहितः ॥ रुद्रैः सहेति शेषः ॥ स्वस्य सवर्गस्य शर्वानुचरत्वं प्रकाश्य यज्ञभागानां प्रार्थनेन पूर्वमुक्ता ऐश्वरमार्गनिन्दा रुद्रभागप्रतिबन्धरूपैव नतु शङ्कराचार्यमतखण्डनरूपेत्यसन्दिग्धमवगम्यते ॥ अथचेदित्यत्र इयं सगणरुद्रभागावरोधनरूपा यदि कस्यचिन्मायाकपटं दंभोदर्पोवा स्यात्तदा भवद्भ्योरुद्रानुचरेभ्यस्तु भागोन देयइत्यस्मभ्यं कथ्यताम् ॥ तथाचेद्योऽस्मद्भागप्रतिषेधमाज्ञापयति तं निर्दिशत ॥ ततोवयं तं विनंक्ष्यामोविनाशयिष्यामः ॥ अन्तर्भावितण्यर्थः प्रयोगः ॥ चतुर्थचरणे वेत्स्यामोहिवयंतुतमिति पाठान्तरम् ॥ तं शिवयजनस्य प्रतिषेद्धारं वेत्स्यामः कीदृक् समर्थः सइति परीक्षिष्यामहे ॥ ततः ॥ एवमुक्तागणेशेनप्रजापतिपुरःसराः ॥ देवाऊचुः ॥ प्रमाणंवोनजानीमोभागेमन्त्राइतिप्रभुम् ॥ ५१ ॥ प्रजापतिर्दक्षः ॥ मन्त्राः वोयुष्माकं भागे प्रमाणं सन्तीति न जानीमः ॥ यज्ञेषु रुद्रभागोमन्त्रप्रमितोनास्तीति भावः ॥ इति प्रभुं वीरभद्रमूचुरित्यर्थः ॥ ततः ॥ मन्त्राऊचुःसुरायूयंतमोपहतचेतसः येनाध्वरस्यराजानंपूजयेयुर्महेश्वरम् ॥ ५२ ॥ ईश्वरःसर्वभूतानांसर्वदेवतनुर्हरः ॥ पूज्यतेसर्वयज्ञेषुसर्वाभ्युदयसिद्धिदः ॥ ५३ ॥ एवमुक्तामहेशानंमाययानष्टचेतसः ॥ नमेनिरेययुर्मन्त्रादेवान्मुक्त्वास्वमालयम् ॥ ५४ ॥ येनाऽध्वरस्येति ॥ ये यूयं अध्वरस्य राजानमपि महेश्वरं न पूजयेयुः पूजयेत ॥ पूजयेयुरिति पुरुषव्यत्ययआर्षः ॥ अन्यत्स्पष्टम् ॥ एवं साक्षान्मन्त्रैरुक्ताअपिदेवाभगवन्मायया नष्टचेतस्त्वान्महेशानं तथात्वेन न मेनिरे ॥ ततोमन्त्रादेवान्मुक्त्वा स्वस्थानं ययुः ॥ एतेनापि साक्षाच्छिवे विद्यमाना अध्वरराजत्वसर्व भूतेश्वरत्वसर्वदेवाऽभिन्नत्वसर्वयज्ञपूज्यत्वादयोधर्मामन्त्रप्रतिपादिताअपि देवैर्न स्वीकृताइति वर्णनेन साक्षाच्छिवस्यैवोक्तविधैव निन्दा प्रकृतकलहबीजमिति फलति ॥ न त्वेतच्छङ्कराचार्यपरतयोपपद्यते नापि निर्विशेषवादविवर्तवादादिखण्डनमिह तद्बीजं प्रतीयते ॥ अग्रे च ॥ ततःसरुद्रो भगवान्सभार्यःसगणेश्वरः ॥ स्पृशन् कराभ्यांविप्रर्षिं दधीचंप्राहदेवहा ॥ ५५ ॥ मन्त्राः

प्रमाणंनकृतायुष्माभिर्बलदर्पितैः ॥ यस्मात्प्रसह्यतस्माद्वोनाशयाम्यद्यगर्वितान् ॥ ५६ ॥
इत्युक्त्वायज्ञशालांतांददाहगणपुङ्गवः ॥ गणेश्वराश्चसंक्रुद्धायूपानुत्पाट्यचिक्षिपुः ॥ ५७ ॥
वीरभद्रोपिदीप्तास्यःशक्रस्यैवोद्यतंकरम् ॥ व्यष्टंभयद्दीनात्मातथान्येषांदिवौकसाम् ॥ ५८ ॥
इत्यादिनामुनीनपिमुनीश्वराः (६१) इत्यन्तेनयज्ञभङ्गोवर्णितः ॥ अत्र वज्रस्तम्भनस्य वर्णनेन देवीशापविनिर्दग्धाइतित्रिंशाध्यायवाक्यस्य अपवि निर्यत्रं यथास्यात्तथेत्यर्थान्तरमपि निर्बाधमेव ॥ ततः ॥ भविष्यतिहृषीकेशइतिशापस्य फलं प्रदर्श्यते ॥ तथाविष्णुःसगरुडंसमायांतंमहाबलः ॥ विव्याधनिशितैर्बाणैःस्तम्भयित्वासुदर्शनम् ॥ ६२ ॥
समालोक्यमहाबाहुरागत्यगरुडोगणम् ॥ जघानपक्षैःसहसाननादांबुनिधिर्यथा ॥ ६३ ॥
ततः सहस्रशोरुद्र.ससर्जगरुडान्स्वयम् वैनतेयादभ्यधिकान्गरुडंतंप्रदुद्रुवुः ॥ ६४ ॥
तान्दृष्ट्वागरुडोधीमानपायतमहाजव ॥ विसृज्यमाधवंवेगात्तदद्भुतमिवाभवत् ॥ ६५ ॥
अन्तर्हितेवैनतेयेभगवान्पद्मसंभवः ॥ आगत्यवारयामासवीरभद्रंचकेशवम् ॥ ६६ ॥
अत्र सुदर्शनस्तंभनं विष्णुनापि यज्ञरक्षाया अनिर्वाहश्च निरूपित. ॥ तदेतत्सर्वं विष्णोः सामर्थ्याभावमूलकमिति नहि केनापि निर्मत्सरेण शक्यं वक्तुम् ॥ किंतु भेदबुद्धेः फलं दर्शयितुं शापं सार्थकयितुं च हरेरेतत्पाराङ्मुख्यमेव ॥ अत एव गरुडरूपेणापि पराङ्मुखतया गमनम् ॥ अन्यथा वैनतेयश्चपक्षिणामितिगीतावाक्याद्भगवद्रूपस्य तस्य तथा पाराङ्मुख्यं न संगच्छेत ॥ अतएव तदद्भुतमिवाभवदिति तादृशवृत्तान्तस्याद्भुतत्वमुच्यते ॥ वस्तुतस्तु शापं सफलयितुं भगवतैव तथा कृतमतोनाद्भुतमिति ज्ञापनायेवशब्दः ॥ धीमानिति गमनस्य बुद्धिपूर्वकत्वज्ञापनार्थम् ॥ देवैर्मन्त्राणां तिरस्करणाच्छन्दोमयगरुडरूपेणैव पराङ्मुखतया गमनम् ॥ स्वयं त्वनिर्वहणरूपं पराङ्मुखत्वमवलम्बितम् ॥ स्वातन्त्र्यबोधनायैव अन्तर्हितेवैनतेयइतिस्वेच्छयाऽन्तर्धानं वर्ण्यते ॥ अथ भगवतएव स्वाभिन्नशिवमाहात्म्यं प्रचिकाशयिषतोमायया देवादीनां व्यामोहादिदमभूदतः शिरस्य तत्रागमनं विष्णुमायारूपायाउमायाविशेषत स्तवनं ततः क्लेशोपशमनं च प्रतिपाद्यते प्रसादयामासेत्यादिना ॥ तस्याविष्णुमायारूपत्वं तु यादेवीसर्वभूतेषुविष्णुमायेतिशब्दितेतिसप्तशतीवाक्यात् विष्णोर्मायाभगवतीययासंमोहितंजगत् ॥ आदिष्टाप्रभुणांशेनकार्यार्थेसंभविष्यतीति भागवतवाक्याच्च ॥ श्लोकास्तु प्रसादयामासचतंगौरवात्परमेष्ठिनः ॥ संस्तूयभगवानीशंशंभुस्तत्रागमत्स्वयम् ॥ ६७ ॥ वीक्ष्यदेवाधिदेवंतमुमांसर्वगणैर्वृताम् ॥ तुष्टावभगवान्ब्रह्मादक्षःसर्वेदिवौकसः ॥ ६८ ॥ विशेषात्पार्वतींदेवीं शङ्करार्द्धशरीरिणीम् ॥ स्तोत्रैर्नानाविधैर्दक्ष प्रणम्यचकृताञ्जलिः ॥ ६९ ॥ ततोभगवतींदेवीमहसन्तीमहेश्वरम् ॥ प्रसन्नमनसारुद्रंवच प्राहघृणानिधिः ॥ ७० ॥ त्वमेवजगत.स्रष्टाशासिताचैवरक्षिता ॥ अनुग्राह्योभगवतादक्षश्चापिदिवौकसः ॥ ७१ ॥ ततःप्रहस्यन् भगवान्कपर्दीनीललोहितः ॥ उवाचप्रणतान्देवान्प्राचेतसमथोहरः ॥ ७२ ॥ गच्छध्वं देवता सर्वा.प्रसन्नोभवतामहम् ॥ संपूज्य.सर्वमखेपुनिन्द्योहंविशेषतः ॥ ७३ ॥ त्वंचापिशृणुमेदक्षवचनंसर्वरक्षणम् ॥ त्यक्त्वालोकैषणामेतांमद्भक्तोभवयत्नतः ॥ ७४ ॥ भविष्यसिगणेशान.कल्पान्तेनुग्रहान्मम ॥ तावत्तिष्ठममादेशात्स्वाधिकारेषुनिर्वृतः ॥ ७५ ॥

एवमुक्तस्तुभगवान्सपत्नीकःसहानुगः ॥ अदर्शनमनुप्राप्तोदक्षस्यामिततेजसः ॥ ७६ ॥ अत्रापि संपूज्यःसर्वयज्ञेषुननिन्द्योहमित्युक्त्या यज्ञभागराहित्यकथनलक्षणनिन्दायास्त्यागः सर्वयज्ञेष्वाहुतिभिः सत्करणं चेत्येव प्रसादबीजमवगम्यते ॥ न तु विवर्तवादादिरूपमतविशेषस्वीकरणम् ॥ यच्च यज्ञस्यारक्षणं तच्छापानुरोधेन हरेः पराङ्मुख्यादेव नतु सामर्थ्याभावादिति ज्ञापयितुम्॥ हरिहरयोरभेदोभगवतः प्रचिकाशयिषितं शिवमाहात्म्यं च ब्रह्ममुखेन प्रकाश्यते ॥ अन्तर्हितेमहादेवेशङ्करेपद्मसंभवः ॥ व्याजहारस्वयंदक्षमशेषजगतोहितम् ॥ ७७ ॥ ब्रह्मोवाच ॥ किंतवायंभवतोमोहःप्रसन्नेवृषभध्वजे ॥ यदाचसस्वयंदेव.पालयेत्त्वामतन्द्रितः ॥ ७८ ॥ सर्वेषामेवभूतानांसवीजंपरमागतिः स्तूयतेवैदिकैर्मन्त्रैर्देवदेवोमहेश्वरः ॥ ७९ ॥ तमर्चयन्तियेरुद्रंस्वात्मनाचसनातनम् ॥ चेतसाभावयुक्तेनतेयांतिपरमंपदम् ॥ ८० ॥ तस्मादनादिमध्यान्तंविज्ञायपरमेश्वरम् ॥ मनसाकर्मणावाचासमाराधययत्नतः ॥ ८१ ॥ यत्नात्परिहरेशस्यनिन्दांस्वात्मविनाशिनीम् ॥ भवन्तिसर्वदोषाय निन्दकस्यक्रियाहिताः ॥ ८२ ॥ यस्तुचैषमहायोगीरक्षकोविष्णुरव्ययः ॥ सदेवोभगवान्रुद्रोमहादेवोनसंशयः ॥ ८३ ॥ मन्यन्तेयेजगद्योनिंविभिन्नंविष्णुमीश्वरात् ॥ मोहादवेदनिष्ठत्वात्तेयान्तिनरकंनराः ॥ ८४ ॥ वेदानुवर्तिनोरुद्रंदेवंनारायणंतथा ॥ एकीभावेनपश्यन्तिमुक्तिभाजोभवन्तिते ॥ ८५ ॥ योविष्णुःसस्वयंरुद्रोयोरुद्रःसजनार्दनः ॥ इतिमत्वाभजेद्देवंसयातिपरमांगतिम् ॥ ८६ ॥ सृजत्येवजगत्सर्वंविष्णुस्तत्पश्यतिमहेश्वरः ॥ इत्थंजगत्सर्वमिदंजगन्नारायणोद्भवम् ॥ ८७ ॥ तस्मात्त्यक्त्वाहरौनिन्दांहरेचापिसमाहितः ॥ समाश्रयमहादेवंशरण्यंब्रह्मवादिनाम् ॥ ८८ ॥ उपश्रुत्याथवचनंविरञ्चस्यप्रजापतिः ॥ जगामशरणंदेवंगोपतिंकृत्तिवाससमिति ॥ ८९ ॥ एतावतासाक्षाच्छिवस्यैवेदं प्रकरणं नतु तदवतारपरिवाद्विशेषवृत्तस्यात्र संबन्धगन्धोपीत्युपसंहारबलादप्यसन्दिग्धं सिद्धम् ॥ अग्रे चानुपदं येन्येशापाग्निनिर्दग्धादधीचस्यमहर्षयः ॥ द्विषन्तोमोहितादेवंसंबभूवुः कलिष्वथ ॥ ९० ॥ त्यक्त्वातपोबलंकृत्स्नंविप्राणांकुलसंभवाः ॥ पूर्वसंस्कारमाहात्म्याद्ब्रह्मणोवचनादिह ॥ ९१ ॥ मुक्तशापास्ततःसर्वेकल्पान्तेरौरवादिषु ॥ निपात्यमानाःकालेनसंप्राप्यादित्यवर्चसम् ॥९२॥ ब्रह्माणंजगतामीशमनुज्ञाता.स्वयंभुवा ॥ समाराध्यतपोयोगादीशानंत्रिदशाधिपम् ॥ ९३ ॥ संबभूवुर्यथापूर्वंशङ्करस्यप्रसादतः ॥ इतिशप्तानां मुनीनामतिक्रान्तकलियुगेषु जन्मादिकं शापमुक्तिं च वर्णयित्वाऽध्यायउपसंहृतः ॥ एतद्विषये मूलेऽग्रे किंचिद्वक्ष्यते तत्रैव विशेषं दर्शयिष्यामः ॥

यदि शप्ताः कीदृशा इति कस्यचिज्जिज्ञासा स्यादित्थंभूताः शप्ता ज्ञेया इत्युत्तरं वा भवेत्तदा लक्षणपरत्वं तादृशप्रकरणस्य स्यात् ॥ तस्माल्लक्षणपरत्वं तादृशानां वर्णयन् प्रतारकएवेत्यवधेयम् ॥ स्वकपोलकल्पनयापि तेषां लक्षणत्वं न संभवति ॥ अतिव्याप्त्यादिदोषग्रस्तत्वादित्युच्यते ॥ लक्षणचतुष्टयं तु पूर्वं निरस्तम् ॥

प्रकृतसन्दर्भस्य लक्षणपरत्वं वारयितुं स्पष्टं युक्त्यन्तरमाहुः ॥ यदिशप्ताइत्यादि ॥ तादृशानामिति ॥ उक्तरीतिकार्थान्तरपरवचनानाम् ॥ प्रतारकएवेति ॥ मोहय-

न्तिजनान्सर्वानिति कौर्मवाक्यार्थानुगमात्सएव तथेत्यर्थं ॥ एवं चतुर्थलक्षणदूषणे प्रसङ्गात्पञ्चमषष्ठसप्तमलक्षणान्यपि निरस्तानि ॥ पुनः प्रत्येकं तानि निराकरिष्यन्तः सह-स्तान्से (एवमिथ्याधीतसमाचारत्वमपिशङ्करानभिमताधीतसमाचारत्वं) इत्युक्तं पञ्चमलक्षणं दूषयन्ति ॥ पञ्चमलक्षणमित्यादिनाऽव्यतिव्याप्तिरित्यन्तेन ॥

पञ्चमलक्षणं मिथ्याधीतसामाचारत्वं ॥ तदपि न संभवति ॥ तत्र मिथ्यैव अधीतः समाचारोयैरितिविग्रहः ॥ तद्भावस्तत्वम् ॥ मिथ्या शब्दोभवन्मतेऽनिर्वचनीयवचनः ॥ अतएव भवदीयैर्मिथ्यात्वंसद-सत्वानधिकरणत्वमनिर्वचनीयत्वम् ॥ तद्धि किमसत्वविशिष्टसत्वा-भावः ॥ उतसत्वात्यन्ताभावासत्वात्यन्ताभावरूपं धर्मद्वयं ॥ सत्वा-त्यन्ताभाववत्वे सत्यसत्वात्यन्ताभावरूपं विशिष्टं वेति विकल्पत्रयमु-द्भाव्य तत्र सिद्धसाधनसाध्यवैकल्यादिदोषैर्दूषयित्वा मैवमित्यादिना सत्वात्यन्ताभावासत्वात्यन्ताभावरूपधर्मद्वयएव निर्भरः कृतः ॥ एवंचसाहशार्थं त्यक्त्वा शङ्करानभिमतेत्यर्थे कुर्वेतोऽपसिद्धान्तः ॥ समाचारोवेदव्रतोपदेशपरोग्रन्थः ॥ अतएव श्रीशङ्कराचार्यैः स्वाध्या-यस्य तथात्वेनहिसमाचारेधिकाराच्चसवच्चतन्नियमइतिसूत्रे "स्वा-ध्यायस्यैवधर्मोनविधायाः ॥ कथमिदमवगम्यते यतस्तथात्वेनस्वाध्या-यधर्मत्वेनसमाचारे वेदव्रतोपदेशपरे ग्रन्थआथर्वणिका इदमपि वेद-व्रतत्वेनसमाख्यातमितिसमामनन्ति" इत्युक्तं ॥ तत्रच शङ्करानभि-मतत्वं दुरुपपादम् ॥ सर्वस्यैव वेदव्रतोपदेशपरस्य ग्रन्थस्य शङ्करा-भिमतत्वात् ॥ तदर्थावर्णनमात्रेणैव तदनभिमतत्वं चेच्छङ्कराऽवर्णि-तार्थकवेदव्रतग्रन्थाद्यध्ययनकर्तृषु दधीचादिष्वतिव्याप्तिः ॥ दधीचो-क्तिस्तु नशङ्कराभिमतसमाचाराभिप्रायेण किंतु यतोभवद्भिरीश्वर-स्य निन्दा कृता अतोभवतां समाचाराध्ययनादिकं मिथ्या वृथैवेत्यु-पालम्भः ॥ यथा कश्चिद्धर्माचरणशीलः कुत्सितं कर्म कुर्याच्चेत्तदा तमन्यउपालभेत तव धर्माचरणं वृथैवेति तथेयमुक्तिः ॥ यदिच सम्यगाचारः समाचारोयथार्थआचारइतियावत् ॥ धनार्जनादिरू-पोनृपसेवादिरूपोगृहस्थाश्रमिणां विहितइत्युच्यते तदातु तत्तत्प्रति-पादकस्मृत्यध्ययनमपि तेषामेव शङ्कराभिमतं नतु संन्यासिनाम् तेषां सर्वसंन्यासस्यैवाभिमतत्वात् ॥ तथाच धनार्जनराजसेवादिपरे स्वव्यतिव्याप्तिः ॥

अनिर्वचनीयवचनइति ॥ "मिथ्याशब्दोऽनिर्वचनीयतावचनः" इतिपञ्चपादिका-दिषु कथनात्तथेत्यर्थः ॥ भवदीयैरिति ॥ अद्वैतसिद्धिकारादिभिः ॥ अस्य कृतइत्युत्तरे-णान्वय ॥ तद्धि ॥ सदसत्वानधिकरणत्वं हि ॥ असत्वविशिष्टेति ॥ वैशिष्ट्यं सत्वस्याभावस्य वा विशेषणम् ॥ अयं प्रथम कल्पः ॥ धर्मद्वयमिति द्वितीयः ॥ विशि-

ष्टमिति तृतीयः ॥ तच्च ॥ विकल्पत्रयम् ॥ दूषयित्वेति ॥ अद्वैतसिद्धौ प्रथमपरिच्छेदारंभएव विप्रतिपत्तिप्रतिपादनोत्तरं "विमतं मिथ्या दृश्यत्वात् जडत्वात्परिच्छिन्नत्वात् शुक्तिरूप्यवत्" इति प्राचां प्रयोगानुपन्यस्य ननु किमिदं मिथ्यात्वं साध्यत इत्यादिना विकल्पत्रयमुद्भाव्य "नाद्यः ॥ सत्वमात्राधारे जगत्यसत्वविशिष्टसत्वानभ्युपगमाद्विशिष्टाभावसाधने सिद्धसाधनात् ॥ न द्वितीयः ॥ सत्वासत्वयोरेकाभावेऽपरसत्वावश्यकत्वेन व्याघातात् ॥ निर्धर्मकब्रह्मवदसत्वराहित्येपि सद्रूपेणामिथ्यात्वोपपत्त्याऽर्थान्तराच्च ॥ शुक्तिरूप्ये बाध्यत्वरूपसत्वव्यतिरेकस्यैव बाध्यत्वरूपासत्वस्य व्यतिरेकासिद्ध्यासाध्यवैकल्याच्च ॥ अत एव न तृतीयः ॥ पूर्ववद्व्याघातादर्थान्तरात् साध्यवैकल्याच्च" इति दूषयित्वेत्यर्थः ॥ मैवमिति ॥ "मैवम् ॥ सत्वात्यन्ताभावासत्वात्यन्ताभावरूपधर्मद्वयविवक्षायां दोषाभावात्" इत्यादिना व्याहत्यादिकं परिहृत्य मिथ्याशब्दस्य तादृशार्थकत्वे निर्भरः कृत इत्यर्थः ॥ तथा च मिथ्याशब्दस्य शङ्करानभिमतार्थकत्वमेव शङ्कराऽनभिमतमिति भावः ॥ अत्रेदं बोध्यम् ॥ मिथ्याधीतसमाचारा इत्यत्र किं मिथ्या अधीतं वेदादिकं समाचारोऽनुष्ठानं च येषामित्यर्थं आहोस्विद्ब्रह्मसत्यपान्तसाहचर्येण भावार्थकक्तस्वीकरणादधीतमध्ययनमिति उताहो पूर्वोक्तः ॥ नाद्यौ ॥ वेदादेस्तदध्ययनस्य सन्ध्यावन्दनाद्यनुष्ठानस्य च शङ्कराऽनभिमतत्वाऽभावात् ॥ न चवैष्णवग्रन्थतदाचरणे एवाऽत्राऽधीतसमाचारौ कल्प्यौ ॥ मानाभावात्कपोलकल्पनामात्रस्याऽनुपादेयत्वात् ॥ वैष्णवानां सिद्धान्ताचरणयोर्वेदादिमूलकताया उपपादयिष्यमाणत्वाच्च ॥ तदध्ययनं तु त्वयापि कृतमतस्त्वय्यतिव्याप्तिः ॥ समाचाराभावाददोषइति चेत् वैष्णवानां भगवत्सेवाद्याचरणं वेदादिप्रमितं मनुषे न वा ॥ आद्ये शङ्कराभिमतत्वं स्वीकुरु ॥ द्वितीये स्वबुद्ध्या पापरूपे समाचारशब्दोऽशक्यः प्रयोक्तुम् ॥ पातञ्जलाद्यनुयायिषु चातिव्याप्तिः ॥ "एतेन योगः प्रत्युक्त" इत्यादिस्थलेयोगस्य शङ्कराऽऽचार्यैः प्रत्युक्तत्वात् ॥ नहि सकले जगति शास्ता सुवचा ॥ एतेनैव पातञ्जलादिसूत्रव्याख्यातृषु वैष्णवाचारप्रतिपादकेषु भगवन्मन्त्रग्रहणाऽऽद्याचारवत्तया पुराणादौ प्रसिद्धेषु व्यासनारदादिष्वतिव्याप्तिरवधेया ॥ वस्तुतस्तु समाचारशब्दस्य तथा व्याख्यानमेव शङ्करानभिमतमतस्तृतीयएव विग्रहआदर्तव्यइत्याशयेनाहुः ॥ समाचारइत्यादि ॥ शङ्कराचार्यैरिति ॥ उक्तमित्यग्रिमेणाऽन्वयः ॥ स्वाध्यायस्यैषइत्यादिः समामनन्तीत्यन्तः साधनाध्याये गुणोपसंहारपादे (सूत्र ३) स्वाध्यायस्येतिसूत्रस्य शङ्करभाष्यस्थोग्रन्थः ॥ वादिति शङ्करानभिमताधीतसमाचारत्वं स्पष्टयितुं शङ्कराचार्याणामेव निर्देशः ॥ वस्तुतस्तु रामानुजानां श्रीभाष्ये भास्कराचार्याणां भेदाभेदभाष्ये श्रीकण्ठशैवभाष्ये भिक्षोरविभागाद्वैतभाष्ये तत्तदनुयायिवृत्तिषु च सएव समाचारशब्दार्थः ॥ यद्यप्यासाक्तीनभाष्ये मध्वभाष्यतत्प्रकाशिकायां च सम्यगाचारइत्यर्थोपि दृश्यते तथापि तत्त्वाऽनभिमतमेवेति किं तेन ते ॥ तथा च कौर्मवाक्ये सम्यगाचारः समाचारइति योगेन समाचारशब्दोऽनुष्ठानपरोभवता न शक्योव्याख्यातुम् ॥ भवन्मते ग्रन्थविशेषे तस्य रूढेर्योगरूढेर्वा सत्वात् ॥ योगाद्रूढिर्बलीयसीति सिद्धान्तात् ॥ अन्यथा सूत्रेऽपि सोऽर्थोमाभूत ॥

तत्रचेति ॥ समाचारग्रन्थे ॥ **तदर्थेत्यादि** ॥ समाचारग्रन्थार्थस्य ॥ **तदनभीति** ॥ शङ्कराऽऽचार्योऽनभिमतत्वम् ॥ वेदव्रतग्रन्थादीत्यादिपदेन द्वादशोपनिषदतिरिक्तसकलवेदभागस्य संग्रहः ॥ शङ्कराचार्यैरीशावास्यादिदशोपनिषदां श्वेताश्वतरनृसिंहतापनीययोश्चेति द्वादशानामेव व्याख्यातत्वात् ॥ तथाच तत्तच्छाखाध्यायिषु सर्वैर्वैदिकेष्वतिप्रसङ्गः ॥ वेदप्रामाण्यवादिनां तेषां वैदिकभागोनानभिमतइति चेदाथर्वणानां समाचारेपि तुल्यम् ॥ एवंचाऽसंभवोलक्षणदोषः ॥ अथ स्तोकं पाकः स्तोकं स्पृष्टइत्यादिवदधीतेतिकृदन्तस्यैकदेशेऽपि धात्वर्थे मिथ्याशब्दान्वयं स्वीकुर्यास्तदाप्यसंभवस्तदवस्थः ॥ तदध्ययने तदनभिमतत्वाभावात् ॥ अध्ययने तदनभिमतत्वं नाम तदनभिमतेतिकर्तव्यताकत्वमिति चेत् क्व तैस्तदध्ययनेतिकर्तव्यता निरणायीति दर्शय ॥ अथ कौर्मवाक्यस्य वास्तवार्थमाहुः ॥ **दधीचोक्तिस्त्विति** ॥ अतोवैदिकमन्त्रादिनिन्दाऽनुमितसमाचाराध्ययनवैयर्थ्यानुवादाभिप्रायमेव मिथ्याऽधीतसमाचाराइति संबोधनमिति भावः ॥ समाचारे शिरोव्रतस्याऽऽम्नातत्वात्तस्य च रुद्रदेवताकतायाः कैश्चिदभ्युपगमादैश्वरमार्गे निन्दतां भवतां समाचाराऽध्ययनं वृथैवेति संबोधनाभिसन्धिः ॥ त्वया त्वाऽऽथर्वणभागप्रसिद्धस्य शिरोव्रतस्य भस्मोद्धूलनरूपत्वमेवाऽभ्युपगतं स्वकृतशैवसुधाकरे द्वितीयकिरणे ॥ अतोऽत्र संतोष्टव्यम् ॥ वस्तुतस्तत्रत्यत्वदुक्तेरयुक्तता तु सत्सिद्धान्तमार्तण्डादौ मया प्रपञ्चितेति कृतं प्रासङ्गिकेन ॥ प्रस्तावनोक्तं छत्रचामरादि धनार्जनराजसेवादिकं स्मारयन्तोवादिन्येव लक्षणाऽतिप्रसक्तिं वक्तुमाहुः ॥ **यदि चेत्यादि** ॥ **स्मृत्यऽध्ययनमपीति** ॥ नच तत्प्रतिपादकस्मृत्यभाव शङ्क्यः ॥ (अ० १ गृहस्थप्रकरणे श्लोक २) राजाऽन्तेवासियाज्येभ्यःसीदन्निच्छेद्धनंक्षुधेति याज्ञवल्क्यादिभिर्गृहस्थधर्मेषु तस्य स्मरणात् ॥ तेषामेवेति ॥ गृहस्थानामेव ॥ शेषे षष्ठी ॥ अथ सहस्राक्षे (मिथ्याज्ञानप्रलापित्वमपि शिवाऽनभिमतज्ञानप्रलापित्वमेव) इत्युक्तं षष्ठं लक्षणं दूषयन्ति ॥ **मिथ्याज्ञानप्रलापित्वंशास्तानांषष्ठंलक्षणमित्यादिना दुर्वारैवेत्यन्तेन** ॥ **लक्षणाभासएवेति** ॥

मिथ्याज्ञानप्रलापित्वं शास्तानां षष्ठं लक्षणमुक्तं तदपि लक्षणाभासएव ॥ दोषदुष्टत्वात् ॥ कथमितिचेच्छृणु ॥ मिथ्यापदस्य शङ्करानभिमतपरत्वं वर्णयतस्तव पूर्वोक्तयुक्त्याः निगृहीतत्वसंपादकत्वेनेत्यवेहि ॥ अन्येपि दोषायैर्दुष्टत्वं लक्षणस्य तेऽप्युच्यन्ते ॥ शङ्करानभिमतस्य प्रमाणादिषोडशपदार्थतत्त्वज्ञानस्य मोक्षहेतुत्वेन प्रतिपादके गौतमेतिव्याप्तिः ॥ नहि शास्ताश्च गौतमेनोच्यामिति वदतस्तव गौतमस्यापि विप्रशास्तत्वमभिमतम् ॥ गौतमेनेति तृतीयया तस्य कर्तृत्वावगमात् ॥ किंच स्वस्वामिशक्त्योः स्वरूपोपलब्धिहेतुः संयोगइति योगसूत्रस्य भाष्ये "पुरुषः स्वामीदृश्येनस्वेनदर्शनार्थसंयुक्तः तस्मात्संयोगाद्दृश्यस्योपलब्धिर्यासभोगः यातु द्रष्टुःस्वरूपोपलब्धिःसोपवर्ग" इत्यादिना शङ्करानभिमततादृशज्ञानप्रतिपादकेषु व्यासेष्वतिव्याप्तिश्च ॥ एवं धर्मविशेषप्रसूताद्द्रव्यगुणकर्मसामान्यविशेषसमवायानांपदा-

र्थानांसाधर्म्यवैधर्म्याभ्यांतत्त्वज्ञानान्निःश्रेयसमित्यादिना पदार्थतत्त्वज्ञानस्य मोक्षहेतुत्वं वदति कणभुज्यतिव्याप्तिः ॥ किंच तत्तदुक्तज्ञानाध्येतरि तत्तज्ज्ञानप्रलापिनि त्वय्यतिव्याप्तिर्दुर्वारैव ॥

घञजपाः पुंसीत्याभासशब्दस्य क्लीबविशेषणत्वेऽपि पुंस्त्वाऽनपायः ॥ अयं भावः ॥ पूर्वत्र शङ्करशब्दस्याऽत्र शिवशब्दस्य च प्रयोगेण शब्दभेदात् "सोमेनयजेत ॥ दाक्षिणाग्निजुहोति ॥ हिरण्यमात्रेयायददाति" इत्यादिवद्वस्तुभेदमभिप्रेत्य साक्षाच्छिवोऽत्र विवक्ष्यत उत शङ्कराऽऽचार्यएव ॥ आद्येऽस्माभिरुच्यमानं ज्ञानं न शिवाऽनभिमतम् ॥ चतुर्षु वैष्णवसंप्रदायेष्वाद्यसाकीनसंप्रदायस्य शिवप्रवर्तितत्वात् ॥ श्रीब्रह्मरुद्रसनकवैष्णवा क्षितिपावना इति वक्ष्यमाणपाद्मादिवचनेभ्यः ॥ द्वितीयस्त्विष्टमपत्र मिथ्याशब्दस्य त्वदुक्तार्थकत्वं मानाऽभावादनास्थेयं पूर्वापरतदध्यायसदर्भविरोधाद्बाधितं च तथाप्यभ्युपेत्य दूषयन्ति॥ पूर्वोक्तयुक्त्याइत्यादि ॥ अपसिद्धान्तइतिपूर्वोक्तयुक्तयाः ॥ निगृहीतत्वेति ॥ अपसिद्धान्तस्यापि निग्रहस्थानत्वादिति भाव. ॥ अतएव गौतमपञ्चलक्षण्यां (अ० ५ आह्निक २ सूत्र १) "प्रतिज्ञाहानि प्रतिज्ञान्तरंप्रतिज्ञाविरोध.प्रतिज्ञान्यासोहेत्वन्तरमर्थान्तरनिरर्थकमविज्ञातार्थमपार्थकमप्राप्तकालं न्यूनमधिकंपुनरुक्तमननुभाषणमज्ञानमप्रतिभाविक्षेपोमतानुज्ञापर्यनुयोज्योपेक्षणंनिरनुयोज्यानुयोगोऽपसिद्धान्तोहेत्वाभासाश्चनिग्रहस्थानानि" इति द्वाविंशतिनिग्रहस्थानेष्वपसिद्धान्तमपि तत्वेन गणयित्वा (सू० २४) "सिद्धान्तमभ्युपेत्यानियमात्कथाप्रसङ्गोऽपसिद्धान्तः" इति सलक्षितः ॥ प्रमाणादीति ॥ गौतमसूत्रेषु हि (अ० १ आ० १ सू० १) "प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्ताऽवयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानांतत्त्वज्ञानान्नि.श्रेयसाऽधिगम" इति षोडशपदार्थतत्त्वज्ञानान्मोक्षाऽधिगमं प्रतिज्ञाय कथं तेषां तत्त्वज्ञानान्नि.श्रेयसमित्याकाङ्क्षायां तेन मिथ्याज्ञानस्य नाशात्तन्नाशेन दु.खजन्मप्रवृत्तिदोषाणामवरोहक्रमेण नाशाच्च तदित्याशयेन (सूत्र २) "दु.खजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापायेतदनन्तरापायादपवर्ग." इति सूत्रयित्वा तेषां तत्त्वज्ञानसंपादनाय (सूत्र ३) "प्रत्यक्षानुमानोपमानशब्दा.प्रमाणानि" इत्यादिभिरेकोनचत्वारिंशता सूत्रै प्रथमसूत्रोद्दिष्टपदार्थेषु निर्णयान्तान्नव पदार्थान्प्रथमाऽध्यायस्य प्रथमाह्निके लक्षयित्वा द्वितीयाह्निके वादादीन्सप्तपदार्थान् विंशत्यासूत्रैर्लक्षयित्वा (अ० २ आ० १-सू० १) "समानानेकधर्मोऽध्यवसायादन्यतरधर्मोऽध्यवसायाद्वानसंशयः" इत्यादिना (अ० ५ आ० २ सू० २५) "हेत्वाभासाश्चयथोक्ताः" इत्यन्तेनाऽध्यायचतुष्टयेन तएवपदार्थाः सप्रपञ्चं परीक्षिताः ॥ तत्र (अ० १ आ० १ सू० १०) "इच्छाद्वेषप्रयत्नसुखदु खज्ञानान्यात्मनोलिङ्गमिति" इत्यादौ शङ्कराचार्योऽनभिमतमात्मस्वरूपादिकं प्रतिपादयतीति युक्तस्तत्राऽतिप्रसङ्गः नच गौतमस्य देवीशत्वं मानाभावात् ॥ सर्वर्षिशिरोरत्नेषु व्यासचरणेष्वतिव्याप्तिमाहु ॥ किंचेति ॥ पातञ्जलसूत्रेषु साधनपादे (सू०-१६) "हेयंदुःखमनागतम्" इति दुःखस्य त्याज्यत्वमुक्त्वा (सू० १७) "द्रष्टृदृश्ययोः संयोगोहेतुर्हेयहेतुः" इति दु खहेतुमुक्त्वा किं तद्दृश्यमित्याकाङ्क्षायां सूत्रद्वयेन भूतेन्द्रियरूपं

दृश्यं सूत्रद्वयेन द्रष्टुः स्वरूपं भोक्तृत्वं चाभिधाय (सू० २२) " कृतार्थंप्रतिनष्टमप्यनष्टंतदन्यसाधारणत्वात्" इत्येकस्यैव प्रधानस्य सर्वपुरुषसाधारणत्वं सर्वथा नाशाभावं च प्रतिपाद्य संयोगस्वरूपं निरूप्यते ॥ (सू० २३) " स्वस्वामिशक्त्योः स्वरूपोपलब्धिहेतुःसंयोगः" इति ॥ संक्षेपत एतदर्थं तु राजमार्तण्डाख्यतद्वृत्तौ भोजराजः ॥ " स्वशक्तिर्दृश्यस्यस्वभावः ॥ स्वामिशक्तिर्द्रष्टुःस्वरूपं ॥ तयोर्द्वयोरपिसंवेद्यसंवेदकत्वेनव्यवस्थितयोर्यास्वरूपोपलब्धिस्तस्याःकारणंयःससंयोगः ॥ सचसहजभोग्यभोक्तृस्वभावस्वरूपान्नान्यः ॥ नहिवयोर्नित्ययोर्व्यापकयोश्चस्वरूपादतिरिक्तःकश्चित्संयोगोस्ति ॥ यदेवभोग्यस्यभोग्यत्वंभोक्तुश्चभोक्तृत्वमनादिसिद्धंसएवसंयोगः ॥ " इत्याह ॥ तथा च पुरुषाणामनौपाधिकं नानात्वं द्रष्टृदृश्ययोर्वास्तवं भेदं नित्यत्वं च श्रीशङ्कराऽऽचार्योऽनभिमतं स्वीकुर्वंति पतञ्जल्यावतिव्याप्तिः ॥ न केवलं तत्र किंतु परमाचार्येषु व्यासेऽपि सेत्याहुः ॥ भाष्य इति ॥ पुरुषःस्वामीत्यादिरपवर्गइत्यन्तः पातञ्जलभाष्यग्रन्थः ॥ इत्यादिनेति ॥ अनूदितग्रन्थादग्रेऽनुपदं "दर्शनकार्यावसानःसंयोगइतिदर्शनंवियोगस्यकारणमुक्तंदर्शनमदर्शनस्यप्रतिद्वंद्वीतिअदर्शनंसंयोगनिमित्तमुक्तंनात्रदर्शनंमोक्षकारणमदर्शनाभावादेवबन्धाभावःसमोक्ष इति" इत्यादिना ज्ञानस्य मोक्षं प्रत्यकारणत्वमौपचारिककारणत्वं च शङ्कराचार्यानभिमतप्रायमुक्तम् ॥ द्रष्टृदृश्ययोः सार्वदिकः स्वस्वामिभावश्च तदनभिमतएवोक्तः ॥ इतः पूर्वसूत्रे भाष्ये " अतश्चदृग्दर्शनशक्त्योर्नित्यत्वादनादिःसंयोगोव्याख्यातइति " इत्यादि तदनभिमतमेवोदितम् ॥ एतद्व्याख्याने च वाचस्पतिमिश्रः ॥ " नचप्रधानवदेकएव पुरुषस्तन्नानात्वस्यजन्ममरणसुखदुःखोपभोगमुक्तिसंसारव्यवस्थयासिद्धेः ॥ एकत्वश्रुतीनांचप्रमाणान्तरविरोधात्कथंचिद्देशकालविभागाभावेनभक्त्याप्युपपत्तेः प्रकृत्येकत्वपुरुषनानात्वयोश्चश्रुत्यैवसाक्षात्प्रतिपादनात्" इत्युक्त्वाजामेकामिति श्रुतिमुदाहरति ॥ शङ्कराचार्यैस्त्वियं श्रुतिः समन्वयस्य तुरीये (सू० ८) चमसवदविशेषादित्यधिकरणेऽन्यथैव व्याख्याता ॥ तथा प्रकृतसूत्रे भाष्ये किंचेदमदर्शनंनामेत्यादिना तद्विषयकानष्टौ कल्पानुपन्यस्यता भगवता व्यासेन " कारणान्तरेष्वपिकल्पितेष्वेवसमानश्चर्चः " इत्यस्यधायि ॥ एतच्च " नकेवलंप्रधानेकारणान्तरेष्वपिपरमब्रह्मतन्मायापरमाण्वादिपुकल्पितेष्वसमानश्चर्चोविचारः " इति विवृण्वता वाचस्पतिमिश्रेणास्माकं शङ्कराचार्याणां नैयायिकादीनां च सिद्धान्तादन्यदेव तत्रत्यमिति स्पष्टीकृतम् ॥ तस्माद्व्यासेषु तद्विवरणे सांख्यकौमुद्यादिषु च तदनभिमतं निरूपयति वाचस्पतिमिश्रे सर्वदर्शनसंग्रहादिप्रणेतृविद्यारण्यादिषु चातिप्रसङ्गः सुस्थः ॥ एतदेवातिव्याप्तिश्चेति चकारेण बोध्यते ॥ एवंधर्मेत्यादि ॥ अत्रेदं ज्ञेयम् ॥ कणादो हि तर्काचार्यो वैशेपिकदशलक्षणीं प्रणिनाय (अ० १ आ० १ सू० १) " अथातोधर्मंव्याख्यास्यामः " इति धर्मव्याख्यानं प्रतिज्ञाय (सू० २) " यतोऽभ्युदयनिःश्रेयससिद्धिःसधर्मः " इति तं लक्षयित्वा (सू० ३) " तद्वचनादाम्नायस्यप्रामाण्यम् " इति वेदप्रामाण्यमभिधाय (सू० ४) " धर्मविशेषप्रसूताद्द्रव्यगुणकर्मसामान्यविशेषसमवायानांपदार्थानांसाधर्म्यवैधर्म्याभ्यांतत्त्वज्ञानान्निः-

श्रेयसम्" इति सुकृतविशेषजन्यात् द्रव्यादितत्त्वज्ञानादेव मोक्षं प्रतिपादयति ॥ अत्र साधर्म्यंसमानोधर्मः वैधर्म्यंविरुद्धोधर्म इति मुक्तावलीकारादयः ॥ एतदुपस्कारे शङ्करमिश्रः "सर्वपदार्थप्रधानोद्वंद्वश्चात्रसमासः ॥ सर्वपदार्थतत्त्वज्ञानस्यनिःश्रेयसहेतुत्वात् ॥ तद्यदा-ख्यनिःश्रेयसयोर्हेतुहेतुमद्भावः ॥ शास्त्रतत्त्वज्ञानयोर्व्यापारव्यापारिभावः ॥ निःश्रेयसतत्त्व-ज्ञानयोःकार्यकारणभावः ॥ द्रव्यादिपदार्थशास्त्रयोःप्रतिपाद्यप्रतिपादकभावः संबंधोऽवग-म्यते ॥ एतेषांचसंबंधानांज्ञानाद्विःश्रेयसार्थिनामिहशास्त्रेप्रवृत्तिः" इति वक्ति ॥ मुक्ति-स्वरूपं च अशेषविशेषगुणध्वंसावधिकदुःखप्रागभाव इति सिद्धान्तयति ॥ एतच्च सर्वं शङ्कराचार्याऽनभिमतमेव ॥ तथा तृतीयाध्यायद्वितीयाह्निकेसूत्रकारः (सू० ४) "प्राणा-पाननिमेषोन्मेषजीवनमनोगतीन्द्रियान्तरविकाराःसुखदुःखेच्छाद्वेषप्रयत्नाश्चात्मनोलिङ्गा-नि" इति सूत्र आत्मनां नित्यसविशेषत्वमभिधाय (सू० ५) "तस्यद्रव्यत्वनित्यत्वेवा-युनाव्याख्याते" इति तेषां द्रव्यत्वं स्वीकृत्य सूत्रत्रयेणाऽऽगमिकत्वं पूर्वपक्षीकृत्य (सू०-९) "अहमितिशब्दस्यव्यतिरेकान्नागमिकम्" इत्यादिना सूत्रदशकेन निराकरोति ॥ तथा (सू० १९) "सुखदुःखज्ञाननिष्पत्त्यविशेषादैकात्म्यम्" इत्यात्मैक्यं पूर्वपक्षीकृत्य (सू० २०।२१) "व्यवस्थातोनाना ॥ शास्त्रसामर्थ्याच्च" ॥ इत्यात्मनां नानात्वमेव सिद्धान्तयति ॥ एतद्वृत्तिकाराजयनारायणतर्कालङ्कारप्रभृतयश्चात्र मायावादस्यानुवादपुरः-सरनिरासं स्पष्टमेव दर्शयन्ति ॥ चतुर्थाध्याये च (सू० ११२) "सदकारणवन्नित्यम्" "तस्यकार्यंलिङ्गम्" इत्यादिना नित्यानां परमाणूनां प्रपञ्चोपादानतया विवर्तवाद-विरोधिनमारंभवादमेवोरीकरोति ॥ अतोयुक्तेव तत्र तदनुयायिषु चातिव्याप्तिः ॥ अथ पाञ्चोत्तरखण्डवचनाश्रयणादक्षच्छास्त्रवमङ्गीकृत्येष्टापत्तिमभ्युपेयात्तर्हि मायावादेपि तुल्यम् ॥ किंचतत्तदिति ॥ प्रस्तावनायां तेन न्यायादिशास्त्रं सम्यगम्यस्तमिति प्रतिपादनायपञ्चमलक्षणस्य प्रकृतग्रन्थे शैवसुधाकरे च क्वचिदनुवादात्पञ्चलक्षणस्य च व्यथतिव्याप्तिरिति भावः ॥ नचाभिनिवेशपूर्वकत्वमुभयत्राभिनिवेद्यवद्व्यदोषः शास्त्रवचनः ॥ लक्षणग्राहकमानतयाऽभिमते कौर्मवाक्ये विशेषणस्यानुक्तया तन्निवेशे मानाभावात् ॥ अस्माभिस्तु तयोः शास्त्रलक्षणत्वमेव पुरा निराकारीति नास्मासु *प्रसङ्गप्रसङ्ग इति भावः ॥ सहस्राक्षे ननु वैष्णवानामित्यादिनाऽनुचितवादित्वन्तेव* दर्शितं सप्तमं लक्षणं दूषयन्ति ॥ विष्णोःसम्यगित्यादिना असंभवापत्ते-रित्यन्तेन ।

विष्णोः सम्यगसम्यग्वाऽऽश्रयणं तदपि शास्त्राणां लक्षणमुक्तं तदपि न लक्षणम् ॥ अत्र सम्यगाश्रितत्वमसम्यगाश्रितत्वं प्रत्येकं लक्षणं मिलितं वा ॥ नाद्यः ॥ सम्यगाश्रितेष्वतिभक्तेषु नारदोद्धवसनका-दिष्वतिव्याप्तेः ॥ नहि तत्र शास्त्रत्वसंभावतमपि येनेष्टापत्तिं कुर्याः ॥ असम्यगाश्रयणं चान्यदेवताभक्तानामेव संभवति ॥ येप्यन्यदेवता भक्तायजन्तेश्रद्धयान्विताः ॥ तेपिमामेवकौन्तेययजन्त्यविधिपूर्वकं-

मित्यनेन तेषामेवासम्यगाश्रयणस्य भगवता प्रतिपादितत्वात् ॥ तथाच सर्वेष्वन्यदेवताभक्तेष्वतिव्याप्तिः स्यात् ॥ किंच विनिन्दन्ति हृषीकेशंब्राह्मणान्वब्रह्मवादिनः अस्यापि श्लोकस्य तादृशप्रकरणस्थत्वेन हृषीकेशनिन्दकतद्भक्तब्राह्मणनिन्दकानां शप्तत्वस्य त्वयाप्यङ्गीकरणीयतया विष्णुपराङ्मुखेषु तेषु विष्णोः सम्यगसम्यग्वाऽऽश्रयणस्य (स्वाश्रितोपीत्यपिशब्देनकथंचिदाश्रितस्यग्रहणंनत्वनाश्रितस्य) इति वदतस्तवाप्यभिप्रेततया तत्राव्याप्तिः स्यात् ॥ किंच व्यावृत्तिर्व्यवहारोवालक्षणस्य प्रयोजनम् ॥ तत्र व्यावृत्तिरितरभेदानुमितिस्तज्जनकत्वेनाभिमतस्य लक्षणद्वयस्य कुत्राप्यसत्वेन प्रत्येकं च तयोः सम्यगाश्रितेष्वसम्यगाश्रितत्वस्यासम्यगाश्रितेषुसम्यगाश्रितत्वस्यासत्वेन भागासिद्धतया पक्षतावच्छेदकावच्छेदेनेतरभेदानुमित्यजनकतया निष्फलत्वमेव ॥ एवं व्यवहारजनकत्वमपि प्रत्येकं सर्वत्र न संभवति परस्पराव्याप्तत्वात् ॥ नद्वितीयः ॥ मिलितयोर्द्वयोरेकत्रासंभवस्योक्तत्वेन लक्ष्यतावच्छेदकव्यापकीभूताभावप्रतियोगित्वेनासंभवापत्तेः ॥ तस्मात्सप्तानामपि लक्षणत्वेनाभिमतानामव्याप्त्यतिव्याप्त्यादिदोषग्रस्तत्वेनानिश्चायकतया तैर्लक्षिते व्यवहारं कुर्वन्भ्रान्तएव शिष्टैरनादेयवचनश्चेति ॥

अत्रेदं ज्ञेयम् ॥ भविष्यतिहृषीकेशइति वाक्यस्याऽर्थः प्रकरणादिलभ्योऽसंदिग्धः प्रकाशतएवाऽतोनवैष्णवानामित्यादिशङ्का तदुत्तरपरत्ववर्णनं च प्रलाप एव ॥ यच्च स्वाश्रितोपीत्यत्र प्रलपितं तन्न ॥ अनाश्रितस्यौदासीन्यमात्रसंभवेन पाराङ्मुख्याऽनियमात् ॥ स्वतः सर्वाऽनुग्राहके सर्वपालके विष्णौ स्वौदासीन्यस्याप्यसंभवात् ॥ स्वेन स्वैर्वाऽऽश्रितइति व्याख्यानस्यौचित्येन तत्र सूपसर्गस्याप्यभावाच्च ॥ अत्राऽपिशब्दस्वारस्यं तु विष्णोहव्य रक्षस्वेत्यादिमन्त्रलिङ्गादकृताऽऽश्रयोपि सयज्ञवस्तु रक्षेदेव किं पुनर्यजमानादिना कृताश्रय ॥ प्रकृते तूक्तकारणवशात्कृताऽऽश्रयोपि पराङ्मुखोयज्ञरक्षा-

---

* ननु वैष्णवानां न क्य नरके पातोविष्णोरक्षायां समर्थत्वादतआह ॥ भविष्यतीति ॥ सत्यं तस्याऽस्ति तन्न सामर्थ्यं सोऽपि चेत्पराङ्मुखस्स्यात् कस्तर्हि त्रातेतिभावः ॥ स्वाश्रितोऽपीत्यपिशब्देन कथंचिदाश्रितस्य ग्रहणं नत्वनाश्रितस्य ॥ तथाभूतस्य पराङ्मुखतायाः प्राप्तत्वेन तत्कथनस्य निष्फलत्वापत्तेः ॥ सुशब्दस्वारस्यभङ्गापत्तेश्च ॥ एवञ्च तादृशानां सम्यग्विष्णोराश्रयणमेव न सम्भवति ॥ यदि केषांचित्तत्स्यात्तथाऽपि स पराङ्मुखोभविष्यतीत्यपिना सूचितम् ॥ तथाच विष्णोरसम्यगसम्यग्वा यदाश्रयणं तत्तेषां साम्यं लक्षणम् ॥ परन्तु इदं लक्षणमितरस्य कस्यचित्संदिग्धस्याऽपि सत्त्वे एव शप्तत्वनिर्णायकम् ॥ भुक्तिमुक्तिसाधनविष्णुभक्तिमात्रस्य तत्रिङ्गतया वक्तुमनुचितत्वात् ॥ विष्णोः पराङ्मुखता शिरश्छेदादेः फलम्

विमुखोभविष्यतीति बोध्यम् ॥ इतरस्य शासलक्षणस्य सन्दिग्धस्य सत्त्वे शासत्वसंदेहे श्रीविष्णुभक्तेः शासत्वनिर्णायकत्वं वदन् श्रीमान् महानाऽऽस्तिकएव ॥ भगवद्गीतादयस्तु दुराचारदर्शनादसाधुत्वसंदेहेपि भगवतः सम्यगाश्रयणात्साधुत्वनिश्चयं बोधयन्ति ॥ अपिचेत्सुदुराचारोभजतेमामनन्यभाक् ॥ साधुरेवसमंतव्यः सम्यग्व्यवसितोहिसइत्यादौ ॥ अतोऽयं प्रलापोविष्णुभक्तानां द्वेषादेव ॥ यदस्तु लक्षणेष्वन्यतमस्य कस्यचिदपि सन्दिग्धस्य सर्वत्रानेतुं शक्यतया शासतायां विष्णुभक्तिव्यापकतायाः कथनएव पर्यव-सानसिद्धेः ॥ तस्मान्मुक्तिभुक्त्योरित्यादिकथनं व्यामोहनमात्रम् ॥ (तथाचविष्णोः सम्य-गसम्यक्त्वायदाश्रयणंतत्तेषांसप्तमंलक्षणम्) इति स्वसोक्तिं विकल्प्य दूषयन्ति ॥ **अत्रेति** ॥ सम्यगाश्रितोयैस्तद्भावस्तत्त्वं सम्यगाश्रयणमित्यर्थः ॥ सम्यगाश्रितमाश्रयणं येषां तत्त्वं वा ॥ एवमसम्यगाश्रितत्वमसम्यगाश्रयणम् ॥ सम्यगसम्यग्वेति परोक्तौ वाशब्दस्य विकल्पार्थत्वाऽभिप्रायात्प्रथमः कल्पः ॥ अवधारणार्थत्वाभिप्रायाद्वितीयः ॥ **नारदोद्धवेत्यादि** ॥ नच लक्षणान्तराभावाद्दोषः शङ्क्यः ॥ पञ्चरात्रैकादशस्कन्धादिषु तैः शङ्कराचार्यानभिमतसाकारवादादेर्वर्णिततया त्वद्रीत्या निश्चितस्य तस्य सत्त्वात् ॥ **प्रतिपादितत्वादिति** ॥ गीतानवमाध्यायवाक्ये मामेवेतिसावधारणोक्त्या योयोयांयां-तनुमित्युक्त्या चान्यदेवताकर्मकस्याप्याश्रयणस्य भगवत्कर्मकत्वम् ॥ अविधिपूर्वकत्वोक्त्या-कामैस्तैस्तैर्हृतज्ञानाइत्युक्त्या चासम्यक्त्वमिति भावः ॥ **किंचेति** ॥ विनिन्दन्तिहृषी-केशमिति वाक्यं कौर्मेपूर्वखण्डत्रिंशाध्यायस्थम् ॥ **तादृशेति** ॥ शासनिरूपकेत्यर्थः ॥ **तद्भक्तेति** ॥ वाक्ये महत्पादिपदान्मद्भक्तेष्वपियत्नतइति सप्तविंशाऽध्यायवाक्याच्च तद्भक्तत्वलाभः प्राग्दर्शितः ॥ **तेष्विति** ॥ शासेषु ॥ **इतरभेदानुमितिरिति** ॥ व्यावृत्तिरितरभेदइति दीपिका ॥ इतरभेदानुमितिरिति वाक्यवृत्त्यादयः ॥ यथा गौरित-रेभ्यो भेदवती शृङ्गवत्त्वे सति सास्नावत्त्वादित्यादौ गवीतरभेदानुमितिः ॥ **असत्त्वे-नेति** ॥ परस्परप्रतिद्वन्द्वितया तेजस्तिमिरयोरिव तयोः सामानाधिकरण्यासंभवात्स-योगवदाश्रयणस्याव्याप्यवृत्तित्वाभावाद्युक्तं द्वयोः कुत्राप्यसत्त्वम् ॥ निष्फलत्वमित्यग्रिमे हेतुतया तृतीयान्तस्यान्वयः ॥ **तयोरिति** ॥ लक्षणयोः ॥ इदं भागासिद्धतयेत्यनेना-न्वेति ॥ **भागासिद्धतयेति** ॥ पक्षतावच्छेदकसामानाधिकरण्येन हेत्वभावोभागा-सिद्धिरिति गदाधरभट्टादयः ॥ यथा पृथिवी गन्धवती घटत्वादित्यादौ पृथिवीत्वसामा-नाधिकरण्येन पटादौ घटत्वाद्यभावः ॥ यथा वा पृथिव्यादयश्चत्वारः परमाणवोनित्या-गन्धवत्त्वादिति ॥ अत्र गन्धवत्त्वस्य पार्थिवपरमाणुषु सत्त्वाज्जलादिपरमाणुष्वसत्त्वाद्भागा-सिद्धिः ॥ **पक्षतेति** ॥ पक्षतावच्छेदकं शासत्वं तद्व्यापिकामितरभेदानुमितिविषयतां लक्षणद्वयमपि न जनयति ॥ शासाइतरेभ्योभिद्यन्ते विष्णोः सम्यगाश्रयणादिति प्रयोगे असम्यगाश्रयणवत्सु शासेष्वनुमितेरसिद्धेः असम्यगाश्रयणलिङ्गकप्रयोगे सम्यगाश्रयणवत्सु तदसिद्धेश्चेति भावः ॥ **परस्पराव्यापकत्वादिति** ॥ सम्यगाश्रयणवति शासे असम्य-

गाश्रयणस्य तद्वति सम्यगाश्रयणस्य चाऽव्याप्तत्वात् ॥ सम्यगाश्रयणासम्यगाश्रयणे मिलिते लक्षणमिति पक्ष दूषयन्ति ॥ नद्वितीयइति ॥ एवं सप्त लक्षणानि दूषयित्वा सिद्धमर्थमाहुः ॥ तस्मादिति ॥ व्यवहारं विप्रशप्तत्वव्यवहारम् ॥ ननु लक्षणसप्तकसन्दर्भे लक्षणशब्देन मया नासाधारणधर्मोविवक्ष्यते किन्तु "इत्थंभूतलक्षणे ॥ लक्षणेत्थभूताख्यानभागवीप्सासु ॥ लक्षणहेत्वोः" इत्यादिवज्ज्ञानजनकज्ञानविषयोवा परिचायकं वाऽभिप्रेयतेऽतोभवदुक्तदोषाणामनवकाशएवेति चेन्नैवम् ॥ तथासति लक्ष्यतावच्छेदकसमनियतत्वाऽभावेनाव्याप्तिपरिहारेप्यतिव्याप्तिदोषापरिहारात् ॥ तत्राप्यव्यभिचारिणएव लक्षणत्वात् ॥ तथाहि ॥ ज्ञानजनकज्ञानविषयः परिचायकमितित्यनर्थान्तरम् ॥ तत्र लक्षणशब्देन च करणव्युत्पत्त्या ज्ञापकमुच्यते ॥ ज्ञापकत्वं च व्यभिचारिणोन संभवति ॥ नहि व्यभिचारिविषयकज्ञानेन सन्दिग्धलक्ष्यनिर्णयोजन्यते ॥ जटाभिस्तापसइत्यत्र विवक्षितजटाविशेषस्य तापसाव्यभिचारित्वमस्त्येव ॥ अन्यथामात्र जटाज्ञानेन तापसत्वनिश्चयस्यायोगात् ॥ वृक्षंप्रतिविद्योततेविद्युदित्यत्र तत्कालसंबन्धविशिष्टतद्वृक्षव्यक्तेर्विद्युत्प्रकाशदेशव्याप्यत्वमस्त्येव ॥ अन्यथा प्रकाशानधिकरणदवीयःप्रदेशस्थवृक्षान्तरेणापि प्रकाशदेशोलक्ष्येत ॥ एवं तिष्ठन्मूत्रयतीत्यादौ तिष्ठतिक्रिया मूत्रयतिक्रियायालक्षणमित्याद्युक्तं भाष्यकृता ॥ तेन वर्तमानकालिकमूत्रणक्रियाज्ञानजनकज्ञानविषयस्तात्कालिकस्थितिक्रिया तद्व्याप्यैव ॥ अथवाऽस्तु तत्र कथञ्चिद्व्यभिचारिणोपि लक्षणत्वम् ॥ तथापि तादृशलक्षणस्याश्रयणे प्रकृते तव नकापीष्टसिद्धिः ॥ तत्र वृक्षप्रत्यक्षोत्तर विद्युद्विद्योतनप्रत्यक्षमिव तिष्ठतिक्रियादिप्रत्यक्षोत्तर कदाचिन्मूत्रणक्रियादिप्रत्यक्षमिव च नह्यत्र निन्दादिप्रत्यक्षोत्तरमपि विप्रशप्तत्वप्रत्यक्षंभवति ॥ किन्त्वनुमितिरेव त्वयावाच्या ॥ साच व्याप्तिनिश्चयमन्तरा न संभवतीति स्वसंमतलक्षणानां विप्रशप्तत्वव्याप्यत्वमेव वाच्यमायुष्मता ॥ एवं च सति पूर्वोक्तातिव्याप्तिदोषाः सुस्थाः ॥ अनुर्लक्षणइतिसूत्रेच किंभवान्कमण्डलुपाणिछात्रमद्राक्षीदित्युदाहरता भाष्यकृता काकवद्देवदत्तस्यगृहमित्यादौ काकतत्संयोगादेरिवोपलक्षणस्यापि कमण्डलोस्तत्पाणित्वस्य वा छात्रज्ञानजनकज्ञानविषयत्वाल्लक्षणत्वमुक्तम् ॥ तच्च लक्षणं पूर्वं कमंडलुपाणिं तं चक्षुर्विषयीकृतवत्येव पुरुषे तज्ज्ञानं जनयितुं प्रभवति नतु तथा त्वमदृष्टवति ॥ अतएव भाष्ये "सकृदप्यसौकमण्डलुपाणिश्छात्रोदृष्टस्तस्यतदेवलक्षणम् ॥ इत्युक्तम् ॥ तथाचात्र येन पुरा निन्दादिकं विप्रशप्तत्वं चोभयमप्यनुभूतं स्यात्तस्यैव निन्दादिराहित्यकालेपि तत्र शप्तोयमितिनिश्चयो नतु शापमदृष्टवतस्तत्साहित्यकालेपि तत्र तथा निश्चयः ॥ अतः प्रकृते तादृशलक्षणस्याश्रयणमपार्थकमेवेत्यतिदुर्बलत्वान्न मूलेऽनूद्य दूषितम् ॥ लक्षणहेत्वोरितिनिशाव्यभिचारे चाग्रे स्वतो दूषितं तस्मादिति ॥

ननु कूर्मपुराणे पूर्वखण्डे एकोनत्रिंशेऽध्यायेऽर्जुनं प्रति व्यासेन
कुर्वन्तिचावताराणिब्राह्मणानांकुलेषुवै ॥ देवीशापविनिर्दग्धाः पुरा-

दक्षाध्वरेद्विजाः ॥ निन्दन्तिचमहादेवंतमसाविष्टचेतसः ॥ वृथाधर्मं चरिष्यन्तितस्मिन्कालेयुगान्तके ॥ येचान्येशापनिर्दग्धागौतमस्य महात्मनः ॥ सर्वेतेवतरिष्यन्तिब्राह्मणास्तासुयोनिषु ॥ इत्याद्युक्त्वोक्त- मोहयन्तिजनान्सर्वान्दर्शयित्वाफलानिवै ॥ इति ॥ एवमादिवाक्यै- स्तादृशानि लक्षणानि दर्शितानि तैरेवास्माभिरपि व्यवहारः क्रियत इति कुतोस्माकं भ्रान्तत्वमितिचेन्न ॥ तादृशप्रकरणस्य लक्षणपर- त्वाभावात् ॥ नह्यर्जुनस्य विप्रशप्ताः कीदृशाइत्याकारकः प्रश्नः किंतु कृतंत्रेताद्वापरंचकलिश्चेतिचतुर्युगम् ॥ एषांस्वभावंसूताद्यकथयस्व समासतइति ऋषिभिः शौनकादिभिः पृष्टः सूतोयुगधर्मान्यक्रमर्जुन- प्रश्नं युगधर्मविषयकमवतारितवान् ॥ गतेनारायणेकृष्णेस्वमेवपरमं पदम् ॥ पार्थःपरमधर्मात्मापाण्डवः शत्रुतापनः ॥ पृष्टवान्प्रणिपत्या- सौयुगधर्मान्द्विजोत्तमाः ॥ तस्मैप्रोवाचसकलंमुनिःसत्यवतीसुतः ॥ प्रणम्यदेवमीशानंयुगधर्मान्सनातनान् ॥ इत्यादिना ॥ एवंचार्जुनस्य युगधर्मजिज्ञासया प्रश्ने कथं विप्रशप्तलक्षणानि व्यासोब्रूयात् ॥ अनाकांक्षिताभिधानेऽर्थान्तरं च कथं न स्यात् ॥ अतएव वक्ष्यामि तेसमासेनयुगधर्मान्नरेश्वर ॥ नशक्यतेमयापार्थविस्तरेणाभिभाषि- तुम् ॥ आद्यंकृतयुगंप्रोक्तंततस्त्रेतायुगंबुधैः ॥ तृतीयंद्वापरंपार्थचतुर्थः कलिरुच्यत इत्युपक्रम्य कृतेतुमिथुनोत्पत्तिरित्यादिना सत्ययुगधर्मा- नुक्त्वा वर्तयन्तिसतेभ्यस्तास्त्रेतायुगमुखेप्रजा इत्यादिना त्रेतायुग- धर्मानुक्त्वा द्वापरेप्यथवियन्तेमतिभेदास्तदानृणाम् ॥ रागोलोभ- स्तथायुद्धसत्वानामविनिश्चय इत्यादिना द्वापरधर्मानुक्त्वा तिष्ये- मायामसूयांचवधंचैवतपस्विनाम् ॥ साधयन्तिनरानित्यंतमसाव्या- कुलीकृता इत्यादिना कलिधर्मा उक्ताः ॥ अन्तेच इत्येतल्लक्षणंप्रोक्तं युगानांवैसमासतः ॥ अतीतानागतानांवैयावन्मन्वन्तरक्षयः ॥ इत्युप- संहृतम् ॥ तथाच उपक्रमोपसंहाराभ्यां युगधर्मबुबोधयिषयैव व्यासैस्तादृशवाक्यानि प्रणीतानीति निश्चीयते ॥ तादृशग्रन्थस्य संदर्भमज्ञात्वा विप्रशप्तलक्षणपरत्वं वर्णयन्भ्रान्त एव ॥ त्रिंशाध्याया- न्तर्गतांस्तादृशश्लोकांस्तत्रैवेत्यादिना एकोनत्रिंशेध्याये वर्णयन्भ्रा- न्तत्वे सत्यदृष्टकूर्मपुराणश्चेति शिष्टापरिगृहीत एव ॥ किंच तादृश- प्रकरणस्य विप्रशप्तलक्षणपरत्वे शुक्लदंताजिताक्षाश्चमुण्डा कापाय- वाससः ॥ तथा ॥ कापायिनोन्येनिर्ग्रन्थास्तथाकापालिकाश्चये ॥ वेदविक्रयिणश्चान्येतीर्थविक्रयिणःपरे ॥ तथा ॥ यतयश्चभविष्यन्ति शतशोथसहस्रशः ॥ नाशयन्तिस्वधीतानिनाधिगच्छन्तिचापरे ॥

तथा ॥ वामाःपाशुपताचारास्तथावैपाञ्चरात्रिकाः ॥ भविष्यन्तिकलौ तस्मिन्ब्राह्मणाः क्षत्रियास्तथा इत्यादिवचनानामपितादृशप्रकरणस्थत्वात्तादृशयतीनामपि विप्रशस्तत्वं कथं न स्यात् ॥ भवतु तेन किं स्यादितिचेत्तन्मध्यपातिनस्तवापि स्यादित्यवधारय ॥

अथ सहस्रासे एकोनत्रिंशाध्यायस्थतयोक्तानां वस्तुतस्त्रिंशाध्यायस्थानां कुर्वन्तिचावताराणीत्यादिवचसामाशयं प्रकाशयिष्यन्तः शङ्कन्ते ॥ **ननुकूर्मेत्यादिना** ॥ परिहरन्ति ॥ **तादृशेति** ॥ व्यासार्जुनसंवादरूपप्रकरणस्य ॥ लक्षणपरत्वाऽभावमेवोपपादयन्ति ॥ **नह्यर्जुनस्येत्यादिना** ॥ कौर्मे पूर्वखण्डेऽष्टाविंशाध्यायारम्भे (श्लो० १) कृतंत्रेताद्वापरंचेति प्रश्नः ॥ सूतस्तु (श्लो० २) गतेनारायण इत्यादिना व्यासार्जुनसमागमादि वर्णयित्वा एकोनत्रिंशे (श्लो० ६) एवमुक्तोभगवतापार्थः परपुरञ्जयः ॥ पृष्टवान्प्रणिपत्यासौयुगधर्मान्द्विजोत्तमाः ॥ इतियुगधर्मविषयकंप्रश्नं (श्लो० ७) तस्मैप्रोवाचेत्यादिना व्यासोक्तांस्तद्धर्मांश्चोक्तवान् ॥ तदेतदनुसन्धायाहुः ॥ **अवतारितवानिति** ॥ **कथमिति** ॥ नापृष्टःकंचनब्रूयान्नचान्यायेनपृच्छतइति मनुना प्रतिषेधात्कथं ब्रूयादिति भावः ॥ बाधकान्तरमप्याहु ॥ **अनाकाङ्क्षितेत्यादि** ॥ अर्थान्तरं हि निग्रहस्थानम् ॥ गौतमेन पञ्चलक्षण्यां (अ० ५ आ० २ सू० १) प्रतिज्ञाहानिप्रतिज्ञान्तरप्रतिज्ञाविरोधप्रभृतिद्वाविंशतिनिग्रहस्थानेष्वर्थान्तरमपि निर्दिश्य (सू० ७) "प्रकृतादर्थादप्रतिसंबद्धार्थमर्थान्तरम्" इति तस्य लक्षणमुक्तम् ॥ लक्षणपरत्वपक्षे प्रतिज्ञाहानिमपि सूचयन्ति ॥ **अत एवेति** ॥ (श्लो० ८) वक्ष्यामीतिप्रतिज्ञावाक्ये युगधर्मान्वक्ष्यामीत्युक्त्वा युगधर्माणामपि सङ्क्षेपेण कथनं प्रतिज्ञाय विस्तरेण कथनस्याशक्यतां चाभिधाय वक्तुं प्रवृत्तेन भगवता श्रोतृजिज्ञासाविषया युगधर्मा अपि समासेनैव निरूपणीयाः क्व पुनस्तत्नापृष्टदासलक्षणप्रपंचनस्यावसर इति भावः ॥ (श्लो० १४) कृतेत्वित्यादिना (श्लो० २२) वर्तयन्तीत्यादिना (श्लो० ४२) द्वापरेप्यथेत्यादिना च यावदध्यायसमाप्ति त्रियुगीधर्मानिरूपिता. ॥ **अत्र तेभ्यइति** ॥ कृतयुगे प्रजानां निर्वाहकावृक्षास्तत्राध्याये वर्णितास्तेभ्यः ॥ **सत्त्वानामिति** ॥ प्राणिनाम् ॥ क्वचित्तत्वानामिति पाठः ॥ अथ त्रिंशे (श्लो० १) तिष्येमायामित्यादिना कलिधर्मान् (श्लो० ३८) तस्मात्सर्वप्रयत्नेनेत्यादिना कलौ शिवप्रपत्यादितः सिद्धिं च प्रदर्श्य (श्लो० ५३) इत्येतल्लक्षणंप्रोक्तमिति चतुर्युगधर्मनिरूपणमुपसंहृतम् ॥ अत्रापि समासत एव प्रवचनं वर्णितम् ॥ **उपक्रमोपसंहाराभ्यामिति** ॥ उपक्रमोपसंहारावभ्यासोऽपूर्वताफलम् ॥ अर्थवादोपपत्तीचलिङ्गंतात्पर्यनिर्णयइत्युक्तेस्ताभ्यां तथा निश्चीयतइति भावः ॥ **शुक्लदन्ताऽजिताक्षा इति** ॥ सवर्णदीर्घआर्षः ॥ शुक्लदन्ताश्च ते अजिताक्षाश्चेति शीतोष्णमितिवद्विशेषणयोः समासोवा ॥ तत्रमहाकोपाल्पतेजसइत्यादावपि तथाप्रयोगो दृश्यते ॥ शूद्रसंन्यासिनस्तु स्वादृशाविराशिवशब्दवाच्या वृथा गिरिपुरीत्याद्यभिख्यानंतोवर्णादिविभागरहिता. प्रसिद्धा एव ॥ कापायिनोन्य

इति ॥ कृतसंन्यासाब्राह्मणाभासाः ॥ नाशयंतिस्वधीतानीत्यत्र नाशयंतःस्वकंधर्मं-नाधिगच्छंतितत्पदमित्यपिपाठः ॥ पाञ्चरात्रिकाः कापिलादिपञ्चरात्रानुयायिनः ॥ नारदपञ्चरात्रस्य श्रीभागवतभारतमोक्षधर्मादिषु प्रशंसितत्वया भगवच्छास्त्रत्वसिद्धेरित्य-न्यत्र विस्तरः ॥ अत्र मध्येमध्येऽनुपयुक्तश्लोकान्विहायोपयुक्तश्लोकाएव संगृह्यन्ते ॥ तथाच (श्लो० १३) शुक्लदन्ताः (श्लोक १६) काषायिनोन्ये (श्लो० २१) यतयश्चेति (श्लो० २५) यामाइति॥ एवमादिषु स्पष्टतया निरूपणात्वादृशविरागिष्वेव विप्रशसत्वमापतेत् ॥ तचापिस्यादिति ॥ स्वस्य ब्राह्मणत्वे स्वयं वर्ण्यमानेपि वर्णादि-विभागविरहितविरागिवर्गान्तःपातितया तथात्वं सुस्थमिति भावः॥ नच पञ्चदशाध्या-यवचस्सूत्प्रेक्षितलक्षणानामत्रासमन्वयात्तदभावः शंक्यः॥ त्रिनेत्रत्वपञ्चाननत्वादिविशि-ष्टविग्रहस्यानित्यत्वाभ्युपगमेन तदाराधनस्यापि साधनविशेषत्वमात्रस्वीकारेण च शिवद्वे-षतन्मार्गनिन्दयोरनपायात् ॥ तादृशशास्त्रासक्तत्वात् ॥ वेदसमाचारादावपि मिथ्यात्वो-रीकारात् सर्वंमिथ्येत्येवाऽऽलपनात् भागवतनिन्दादिलिङ्गाऽनुमितहृषीकेशपाराङ्मुख्याच्च तस्मिंस्तत्समन्वयसिद्धेः॥ इदं चात्र ज्ञेयम्॥ तस्मिन्नध्याये (श्लो० ३) अधार्मिका निराधारामहाकोपाल्पतेजसः॥ अनृतंब्रुवतेलुब्धास्तिष्येजाताःसुदुष्प्रजाः॥ ३॥ दुरिष्टै-र्दुरधीतैश्चदुराचारैर्दुरागमैः॥ विप्राणांकर्मदोषैश्चप्रजानांजायतेभयम् ॥ ४॥ नाधीयतेत-दावेदान्नयजन्तिद्विजातयः ॥ यजन्तियज्ञान्वेदांश्चपठन्तेचाल्पबुद्धयः ॥ ५॥ तथा (श्लो० ८) स्नानंहोमंजपंदानंदेवतानांतथार्चनम् ॥ तथान्यानिचकर्माणिनकुर्व-न्तिद्विजातयः॥८॥ विनिन्दन्तिमहादेवंब्राह्मणान् पुरुषोत्तमम्॥ आम्नायंधर्मशास्त्राणिपु-राणानिकलौयुगे॥९॥ कुर्वन्त्यवेददृष्टानिकर्माणिविविधानिच ॥ स्वधर्मेतुरुचिर्नैवब्राह्मणा-नांप्रजायते॥१०॥ इत्यादिकथनादधार्मिकाः कापालिकादिदुरागमदुराचारदुरध्ययनतज्जन्य-दुरिष्टादिशालिनोवेदाध्ययनस्नानजपादिरहिताः शिवकेशवयोर्निन्दकाः श्रुतिस्मृतिपुरा-णगर्हिणोमवादृशाः प्रच्छन्नकापालिकादयएव कुर्वन्तिचावताराणीत्यादिवचसां गोचराः॥ एवं (श्लो०१५) तथाकापालिकाश्चयइत्याद्युक्तेः साक्षात्कापालिकप्रभृतयश्च तद्विषयाः॥ वेदाद्यध्यायिनस्तदुक्तस्यनुयायिनः॥ श्रीहरिसंप्रदायिनस्तु नामीषां विषयाः॥ अनुपदं विनिन्दन्तिहृषीकेशंब्राह्मणान्ब्रह्मवादिनः ॥ वेदबाह्यव्रताचारादुराचारावृथाश्रमाः ॥ २० ॥ मोहयन्तिजनान्सर्वान्दर्शयित्वाफलानिच ॥ तमसाविष्टमनसो बैडालव्रतिका-धमाः ॥ २१ ॥ इति कथनेन वैष्णवेषु वदप्रवृत्तेष्षोडशाध्यायादौ मोहकत्वादिना वर्णितेषु तत्प्रवृत्तेश्च निश्चयात्॥ किञ्च तत्र (श्लो० २६) ज्ञानकर्मण्यपगतेलोकेनि-ष्क्रियतांगते ॥ कीटमूषकसर्पाश्चधर्षयिष्यन्तिमानुपान् ॥ (श्लो० २७) कुर्वन्ति-चावताराणीत्यादिपठ्यते ॥ तथाच सर्वथा ज्ञानकर्मापगमलोकनिष्क्रियत्वयोरधिकरणे कलियुगान्तएव तेषामवतरणं सिद्ध्यति ॥ (श्लो० २८) तस्मिन्कलियुगान्तकइत्युक्तयापि तदेव दृढीक्रियते ॥ बहुषु पुस्तकेष्वेवमेव पाठः ॥ तस्मिन्कालेयुगान्तकइतिपाठे-

ऽप्येतदक्षतम् ॥ एवंसति कुर्वन्तिचेति वचसामवत्वे नावसरः ॥ अपिच कुर्वन्तिचेत्यवतारशब्दं क्लीबत्वसाधुत्वाय स्त्रीत्वाऽधिकरणघञन्तं स्वीकरोषि न वा ॥ आद्येऽवतारक्रियाधिकरणानामेव करणं प्राप्यते नत्ववतरणम् ॥ द्वितीये लिङ्गविरोधस्तदवस्थः ॥ ब्राह्मणास्तासुयोनिषुवितिबहुवचनेन शस्मानां पश्वादियोनिष्वप्यवतारोगम्यते ॥ वाक्यार्थस्तु प्रागेव व्याख्यातः ॥

वस्तुतस्तु नास्मन्मते शिवनिन्दा नापि शिवद्वेषः ॥ अतएवास्मदाचार्यैस्तत्रतत्र श्रीशिवस्योत्कृष्टतयैव वर्णनं कृतम् ॥ स्वस्वमतं व्यवस्थापयितुमवतीर्णानां वास्तवीमाचार्यपदवीमुद्वहतांतेषां तत्तन्मतव्यवस्थापनस्य परमतखण्डनं विना दुर्विभाव्यतया तत्तन्मतखण्डनावरे खण्डनयुक्तिसहकारित्वेनोत्कर्षापकर्षबोधकवचनानि तु न देवनिन्दात्वेन व्यवह्रियन्ते ॥ अत एव कापिलमतखण्डनावसरे शङ्कराचार्याणां ईक्षतेर्नाशब्दमितिसूत्रे "नसाङ्ख्यपरिकल्पितमचेतनंप्रधानं जगतःकारणंशक्यंवेदान्तेष्वाश्रयितुंअशब्दंहितत्" अग्रे च गौणश्चेन्नात्मशब्दादिति सूत्रे "प्रधानमचेतनंसच्छब्दवाच्यमितियदुक्तं तदसत्" इति ॥ द्वितीयाध्यायारंभे च स्मृत्यनवकाशदोषप्रसङ्गइतिचेन्नान्यस्मृत्यनवकाशदोषप्रसंगादितिसूत्रव्याख्याने "परतन्त्रप्रज्ञास्तु प्रायेणजना" इत्याद्युक्त्वा "असत्कृतेच व्याख्याने न विश्वसेयुर्बहुमानात्स्मृतीनां प्रणेतृषु कपिलप्रभृतीनां चार्षं ज्ञानमप्रतिहतं स्मर्यते ॥ श्रुतिश्च भवति ॥ ऋषिंप्रसूतंकपिलं" इत्याद्या ॥ अग्रे "या च श्रुतिः कपिलस्य ज्ञानातिशयं प्रदर्शयन्ती प्रदर्शिता ॥ न तया श्रुतिविरुद्धमपि कापिलं मतं श्रद्धातुं शक्यं कपिलमिति श्रुतिसामान्यमात्रत्वादन्यस्य च कपिलस्य सगरपुत्राणां प्रतप्तुर्वासुदेवनाम्नः स्मरणात्" इति ॥ ततः पूर्वं च प्रधानादिकारणवादा अशब्दत्वेन निराकृताः ॥ एवमादिस्थलेषु कापिलं मतं वेदविरुद्धमित्यादिप्रतिपादनं न निन्दात्वेन व्यवह्रियते ॥ एवं बलादापतितो मायावादःसाङ्ख्यस्यदुर्मतेरित्यादि विद्यारण्यस्य वचनमपि ॥ अन्यथा विष्णोरवतारत्वेन निश्चितस्य कपिलस्य दुर्मतित्वेन वर्णनं तन्मतस्य वेदबाह्यत्ववर्णनं च कथं न विष्णुनिन्दा स्यात् ॥ यद्याप्येतत्कुत्सापरायस्त्वदीयोश्लोकानित्यादिनिर्बन्धेन कथनं तत्तु निन्द्यैव ॥ अत एव तस्य विनिन्दन्तिहृषीकेशंब्राह्मणान्ब्रह्मवादिन इति तदङ्गीकृतविप्रदासलक्षणप्रकरणमध्यपतितश्लोकप्रतिपाद्यब्रह्मवादिनिन्दाकर्तृत्वेन तस्मिन्विप्रदासत्वं दुरुद्धरमेव ॥

(सहस्राक्षविष्णोःपराङ्मुखताशिवद्वेषादेःफलम्) इत्युक्तिं दूषयन्तस्तत्कल्पितलक्षणसप्तकस्य स्वेषु सर्वथैवाप्रवृत्तिं प्रकाशयन्ति ॥ यस्तुतस्तु नास्मदित्यादिना दुरुद्धरमेवेत्यन्तेन ॥ एवंच यदि शिवद्वेषादिकं स्यात् स्यात्राम तर्हस्मासु यथाकथंचित्प्रभुपराङ्मुख्योत्प्रेक्षणस्यावसरः ॥ तदेव तु नास्ति कुतस्तरां तदा तदारोपणस्यावकाश इति भावः ॥ द्वेषनिन्दयोरभावमेवोपपादयन्ति ॥ अतएवेत्यादिना ॥ तत्रतत्रेति ॥ बालबोधसिद्धान्तमुक्तावल्यादिषु प्रकरणग्रन्थेषु अतःशिवश्चविष्णुश्चजगतो हितकारकाविति महाविष्णुशिवास्ततः ॥ देवतारूपवत्प्रोक्ताइत्याद्युक्तम् ॥ तथा चतुर्थस्कन्धनिबन्धे (श्लोक २२) तस्मादन्यतरद्वेषेनेतराःकर्मसिध्यतीति (श्लोक ३९) शिवद्वेषनिवृत्त्यात्तुधर्मःसिध्येदपिक्वचिदिति चोक्तम् ॥ एतद्विवरणे श्रीविठ्ठलाचार्याः "संमुख्यन्तुहरद्विषइतिवाक्यात् तद्द्वेषयुक्तस्यैव तस्यशापात्तन्निवृत्तौ धर्मः सिध्येदित्यर्थः ॥ अपीतिसंभावनायाम् ॥ पूर्वोक्तवैपरीत्ये संभावनापि नास्तीतिभावः" इत्याहुः ॥ अस्यावरणभङ्गे च श्रीपुरुषोत्तमचरणाः "अपीतिसंभावनायामित्यादि ॥ तथाचशिवद्वेषोनकार्यइत्येवमुख्यःपक्षइत्यर्थः" इति व्याचक्षते ॥ अष्टमस्कन्धनिबन्धे च (श्लोक ४५) विष्णुर्ब्रह्मामहेशश्चसर्वेत्रैवहिकारणम् ॥ एकमेकतराभावेनकार्यंजनयेत्क्वचिदित्यभिहितम् ॥ एतद्योजनायां च श्रीपुरुषोत्तमचरणाः "आत्मेश्वरउपद्रष्टास्वयंदृगविशेषणइतिदक्षंप्रति भगवद्वचनात्कार्यमात्रंप्रतित्रयाणांकारणत्वेनतत्रापित्रयाणांकारणत्वमनुसन्धेयमित्यर्थः" इति विवृण्वन्ति ॥ पत्रावलंबनग्रन्थसमाप्तौ च काशीपतिस्त्रिलोकेशोमहादेवःसतुष्यत्विति स्वयं विहितेन वेदविरुद्धवादव्युदासेन ब्रह्मवादस्थापनेन च श्रीमहादेवस्य तोषोऽभ्यर्थितः ॥ एवं सुबोधिन्यादिषु ग्रन्थान्तरेष्वपि द्रष्टव्यम् ॥ चतुर्थस्कन्धनिबन्धादौ शिवस्य स्वमार्गप्रथमाचार्यत्वमपि वर्णितं तदग्रे दर्शयिष्यामः ॥ तस्मादस्मासु शिवद्वेषादिकं संभाव्य तस्य लक्षणत्वं चोत्प्रेक्ष्य शास्त्रत्वमारोपयन् शशं तच्छृङ्गप्राप्तये पुष्करप्रसूनैः पिपूजयिषन्तमनुकरोति ॥ ननु मास्तु शिवद्वेषः शङ्कराचार्यद्वेषस्तु विद्यत एव तन्मतखण्डनात् ॥ खण्डनावसरे क्वचिदपकर्षबोधकशब्दानां प्रयोगाच्चेतिचेल्लक्षणग्राहकमानतयाऽभिमते शङ्कराचार्याणां न संबन्धगन्धोपीति प्रागेव प्रत्यपादयाम ॥ नापि वयं तेषामपि द्वेषाद्युन्मेषयामइत्याशयेनाहुः ॥ स्वस्वमतमित्यादि ॥ अतएवेति ॥ अयं भावः ॥ ईक्षतिसूत्रे पूर्वं साङ्ख्यादीन्निर्दिश्य "एवमन्येपितार्किकावाक्याभासयुक्त्याभासावष्टंभाःपूर्वपक्षवादिनइहोत्तिष्ठन्ते" इति तेष्वपकर्षबोधकशब्दाः प्रयुक्ताः ॥ सूत्रव्याख्याने च अशब्दंहितदित्यन्तेन साङ्ख्यस्यावैदिकत्वमुक्तम् । गौणश्चेन्नेतिसूत्रेपि तदुक्तस्यासत्त्वमुक्तम् ॥ द्वितीयाध्यायारंभसूत्रे च प्रधानादिवादानां न्यायाभासोपबृंहितत्वप्रतिपादनमपि द्वितीयाध्यायप्रयोजनं कण्ठरवेणोक्त्वा पर्वपक्षे परतत्रप्रज्ञास्स्थित्यादि ऋषिं प्रसूतमित्यन्तमुक्त्वा सिद्धान्ते श्रुतिविरोधात्कापिलादिस्मृतीनां सर्वथानादरणीयत्वं प्रपञ्च्य याचश्रुतिरित्यादिना ऋषिंप्रसूतमितिश्रुतिरन्यथानीता ॥ अत्र ॥ प्रतप्तुरिति ॥ प्रदाहकस्येतिरत्नप्रभादयः ॥ ततःपूर्वमिति ॥ स्मृत्यनवकाशसूत्रात्पूर्वं प्रथमाध्यायइत्यर्थः ॥ तत्र प्रथमे पादे (सू० १८।२७) कामाच्चनानुमानापेक्षेत्यादौ भाष्ये शङ्कराचार्यैः

सांख्यपरिकल्पिताचेतनप्रधानस्याऽनपेक्षितत्वस्य कथनात् द्वितीयपादे (सू० १९) नचसार्तंमतद्धर्माभिलापादित्यादौ कण्ठरवेण साङ्ख्यस्य निराकरणात् तृतीयपादे (सू० १) द्युभ्वाद्यायतनंस्वशब्दादित्याद्यधिकरणेषु तथाकरणात् चतुर्थपादे (सू० १) आनुमानिकमप्येकेषां (सू० ८) चमसवदविशेषादित्यादौ तदनुकूलतया प्रतीयमानश्रुतीनां तदननुकूलवादेः कथनाच्च निराकृताइति भावः ॥ तथाच तेषु कपिलादिद्वेषिता कथं न स्यात् ॥ अथ स्वसिद्धान्तस्थापनावसरे खण्डनं खण्डने सहकारितयाऽपकर्षबोधकशब्दप्रयोगश्च न दोषइति चेत्तुल्यम् ॥ **बलादापतितइति** ॥ इदं पञ्चदश्यां चित्रदीपाख्ये षष्ठप्रकरणे (श्लोक २३२) अविवेककृतःसङ्गोनियमश्चेतिचेत्तदेतिपूर्वार्धस्योत्तरार्धमस्ति ॥ **वचनमपीति** ॥ न निन्दात्वेन व्यवह्रियतइत्यनुपज्यते ॥ तदुक्तवाक्यैस्तस्यैव शस्तत्वं निर्धारयन्ति ॥ **यच्चापीत्यादिना** ॥ **तत्तुनिन्दैवेति** ॥ अविद्यमानदोषकथनरूपत्वादिति भावः ॥ इदं तत्रैव स्फुटीभविष्यति ॥

यत्तु (लक्षणहेत्वोःक्रियाया इतिसूत्रेण द्विषन्तोदेवमित्यत्र लक्षणे हेतौ वा शता ॥ अदन् विप्रोन्नमनीयः पचन् विप्रोनश्राद्धेभोजनीय इत्यादिवत् तेन शिवद्वेषः शतानामेकं लक्षण) मित्युक्तं तदत्यन्तमसत् ॥ तेन सूत्रेण क्रियायाःपरिचायकेहेतौचार्थेवर्तमानाद्धातोर्लटः शतृशानचौविधीयेते नतु कारकपरिचायकार्थात् ॥ अत एव तत्सूत्रभाष्ये लक्षणहेत्वोः क्रियाया इत्युक्त्वा कारकार्थंगुणउपसङ्ख्यानमित्युक्तम् ॥ तथाच भाष्यं "लक्षणहेत्वोः क्रियायागुणउपसङ्ख्यानं कर्तव्यं तिष्ठन्मूत्रयति गच्छन्भक्षयतीति" अग्रेच "इहतावत्तिष्ठति क्रियामूत्रयतिक्रियायालक्षणं गच्छन्भक्षयतीतिगच्छतिक्रियाभक्षयतिक्रियायालक्षणंयोधीयानआस्तेसदेवदत्तइतिअध्ययनक्रियाआसनक्रियायालक्षणं" इत्युक्तम् ॥ तदुपरि कैयटेन "गुणशब्देनात्रसाधनमुच्यतेतिष्ठन्मूत्रयतीतियदास्थानादिनामूत्रादिक्रियालक्ष्यतेतदातेनैवसूत्रेणादेशसिद्धिर्यदातुकारकंलक्ष्यतेतदर्थमिदंवचनं" इत्युक्तम् ॥ अतस्तादृशभाष्यकैयटोक्तरीत्या क्रियायालक्षणएव वर्तमानाद्धातोः परस्य लटः शत्रादेशस्तादृशसूत्रेण भवतीति तत्सूत्रानुसारेण शिवद्वेषोविप्रशतानामेकं लक्षमितिवदन्भाष्यानभिज्ञएव ॥ किंच योधीयानआस्तेसदेवदत्तइत्यादिवत्तादृशश्लोके यत्तत्पदघटिताख्यातान्तद्वितीयधातुयुक्तवाक्यस्याभावात्तादृशसूत्रस्य प्राप्तिरेव न संभवति ॥ तिङन्तसमभिव्याहारस्थलएव सर्वोदाहरणेषु भाष्ये शत्रादेशस्य दर्शितत्वेन भाष्यानारूढे अदन् विप्रोन्नमनीयःपचन्विप्रोनश्राद्धेभोजनीयइत्युदाहरणे दृष्टान्तविधया प्रदर्शयन्नुपेक्षणीयः ॥ वस्तुवस्तु तादृशप्रकरणालोचने शिवद्वेषस्य शिवनिन्दायाश्च मुनिकोपोत्पादनद्वारा शापहेतुत्वं संभवत्यतोऽत्र तादृश-

तिङन्तक्रियाध्याहारे हेत्वर्थकधातोर्लटः शत्रादेशस्तु संभावितः ॥ तदनध्याहारे तु न संभवतीति ॥

यच्च सहस्राक्षे लक्षणसत्कप्रतिपादनारम्भात् तद्दोधकतयोपन्यस्तेषु वाक्येषु (पृ० ५६ पं० ५) द्विपन्तइत्यादौ लक्षणे हेतौ वा शता स्वप्रतिपिपादयिषितार्थसमर्थनार्थमुक्तः स न युक्तइति सिंहावलोकनन्यायेनाऽनूद्य दूषयन्ति ॥ यत्तुलक्षणेत्यादिना न संभवतीत्यन्तेन ॥ अयमर्थः ॥ लक्षणहेत्वोरित्यत्र लक्ष्यतेनेनेतिलक्षणं परिचायकम् ॥ हेतुशब्दश्च फलकारणोभयपरः ॥ क्रियाया इत्यस्य सर्वत्र संबन्धः ॥ तथाच क्रियायाः परिचायके क्रियायाः फले क्रियायाः कारणे च वर्तमानाद्धातोः परस्य लटः शतृशानचौ स्त इत्यर्थः ॥ तत्र लक्षणे यथा ॥ शयानाभुञ्जते यवनाः ॥ अत्र शेखरे ॥ "शयनंभुज्यर्थपरिचायकं तदुपलक्षितभुज्यर्थेनचयवनाः परिचाय्यन्ते" इत्युक्तम् ॥ एवंच प्रकृते लक्षणे शतेतिचेच्छेतिक्रिया भुजिक्रियायाइव द्वेष्टिक्रिया कस्याः परिचायिका यया च शत्राः परिचाय्येरन् ॥ नहि शत्रानामेव लक्षणं द्वेष्टिक्रिया शक्या वक्तुम् ॥ तेषामक्रियात्वात् ॥ ननु लक्षण हेत्वोःक्रियाया गुणउपसङ्ख्यानमितिवार्तिकेन शत्राइति कर्मणोपि लक्षणे स्यात् ॥ गुणशब्दस्य कारकपरत्वात् ॥ कैयटेन "गुणशब्देनात्रसाधनमुच्यते" इतिव्याख्यानात् ॥ तत्रैव विवरणे "भाष्येक्रियायागुणेइतिक्रियायाः कारकेइत्यर्थः" इत्यादिव्याख्यानाच्चेति चेन्मैवम् ॥ वार्तिकेन प्रत्याख्यानीकारे लक्षणहेत्वोःक्रियायाइतिसूत्रेण शतेतिस्वोक्तेर्बाधात् ॥ तत्रैव कैयटेन "तिष्ठन्मूत्रयतीत्यादौ यदास्थानादिनामूत्रादिक्रियालक्ष्यतेतदासूत्रेणैवादेशसिद्धिः ॥ यदातुकारकंलक्ष्यते तदर्थमिदंवचनम् ॥ बहुपुमूत्रयत्सुकोदेवदत्त इत्युक्ते यस्तिष्ठन्मूत्रयतीतिप्रतिवचनेनदेवदत्तोलक्ष्यते ॥ अथवा अशौचादिगुणोगृह्यते" इति सूत्रवार्तिकयोर्विषयस्य विभागात् ॥ वस्तुतस्तु कारकलक्षणेऽपि स्थितिगमनादिक्रियायां मूत्रणभक्षणादिक्रियाया इव द्वेष्टिक्रियायां क्रियान्तरस्य सहकारोऽपेक्षितएव ॥ अत एव विवरणे "देवदत्तोलक्ष्यत इतिमूत्रणसमानकालिकस्थानक्रिययेत्यर्थः" इति व्याख्यातम् । किंचास्मिन्वार्तिके गुणशब्देन कर्तृरूपकारकमेव गृह्यते ॥ भाष्ये तिष्ठन्मूत्रयति गच्छन्भक्षयतीति तथैवोदाहरणात् ॥ एवमरुच्या स्वीकृते अशौचादिगुणोगृह्यतइति पक्षान्तरे तु प्रकृतेऽप्रसक्तिरेव ॥ "कर्तुश्चलक्षणयोःपर्यायेणाऽचयोगे" इत्यग्रिमवार्तिकेपि "यदापूर्ववाक्येगुणः साधनंगृह्यतेतदातेनैवासिद्धेपर्यायार्थः ॥ यदा त्वशौचादेर्गुणस्यतत्रग्रहणंतदाविध्यर्थः" इति वदता कैयटेन पूर्वत्र वार्तिके प्रथमपक्षे कर्तुरेव ग्रहणं द्वितीयपक्षस्य मुख्यत्वं च ध्वनितम् ॥ अन्यथा कर्तुश्चेतिवार्तिकमपार्थकमेव स्यात् ॥ योऽधीयानआस्तेसदेवदत्तः यआसीनोधीतेसदेवदत्तः इति पर्यायेपि प्रत्येकं पूर्वेण सिद्धौ बाधकाभावात् ॥ एवंसति अशौचादिगुणस्य लक्षणे प्रथमं कर्तुर्लक्षणे द्वितीयं वार्तिकं प्रवर्ततइति न प्रकृते तयोः प्रवृत्तिः ॥ नापि तद्व्याख्याने चेत्यनेन शयानावर्धतेदूर्वाआसीनंवर्धतेविसमित्यादिवत्स्वभावकथनेत्र शता शक्यः ॥ लक्षणे हेतौ वा शतेति स्वोक्तेरपि विरोधात् ॥ "नह्यासनंवृद्धेर्लक्षणंकिंतर्हिस्वभावमात्रकथनम्" इतिकैयटोक्तेः ॥ वर्धतइत्यादेरिव समानकर्तृकक्रियोपस्थापकतिङन्त-

पदस्य प्रकृतेऽनुपलम्भाच्च ॥ वस्तुतस्तु भाष्यकृता " तत्तर्हिवक्तव्यं नवक्तव्यम् ॥ लक्षण-हेत्वोःक्रियायाइत्येवसिद्धम् ॥ इहतावत्तिष्ठन्मूत्रयतीतितिष्ठतिक्रियामूत्रयतिक्रियायालक्षणम् ॥ गच्छन्भक्षयतीतिगच्छतिक्रियाभक्षयतिक्रियायालक्षणम् ॥ योधीयानआस्ते सदेव-दत्तइतिअध्ययनक्रिया आसनक्रियायालक्षणम् " इत्यादिना प्रत्याख्यातं वार्तिकजातं तदिति न ततोपि तवेष्टसिद्धिः ॥ अत्र कैयटः " तिष्ठतिक्रियेति ॥ स्थितिक्रियालक्षितामूत्रणक्रियायस्तिष्ठन्मूत्रयतिसदेवदत्तइतिसर्वनामपरामर्शैदेवदत्तस्यलक्षणंतद्गतस्यवाऽशौचादेरितिभाव. " इति व्याचष्टे ॥ एतच्च नागोजीभट्टः ॥ " ननुक्रिययोरेवलक्ष्यलक्षणभावे कोदेवदत्तइतिप्रश्नेइदमुत्तरंनस्यादत आह ॥ स्थितिक्रियेति ॥ सर्वनामपरामर्शेइति ॥ यत्तद्रूपसर्वनामपरामृष्टदेवदत्तस्यलक्षणमितिफलितम् ॥ अन्यथावचनान्तराऽऽरम्भेपितिएते शब्रनापत्तिः ॥ नहितद्वाच्यक्रियादेवदत्तस्यलक्षणंकिन्तुतदुपलक्षितमूत्रणक्रियेति बोध्यम् " इति विवृणोति ॥ एवं सति प्रकृते लक्षणहेत्वोरिति क्रियालक्षणे शतुरङ्गीकारे द्वेष्टिक्रियया लक्षितं क्रियान्तरमेव शतानां लक्षणं भवितुमर्हति ॥ न तु द्विष्यर्थक्रियैव ॥ नच क्रियान्तर वाक्ये श्रूयते ॥ तेषां कर्मत्वात्तु सत्यपि क्रियान्तरे प्रयोगोन स्यात् ॥ भाष्यादिषु सर्वत्र तिष्ठन्मूत्रयतीत्याद्युदाहरणेषु लक्ष्यक्रियायां समानकर्तृकतायास्तिङन्तपदोपस्थाप्यतायाश्च नियमदर्शनात् ॥ नहि केनापि प्रामाणिकेन अदन्विभेनननमनीय-इत्याद्युदाहृतम् ॥ शतजीवलक्षणे शतु. स्वीकारे च सूत्रे क्रियाया इति पदमपार्थकमेव स्यात् ॥ अत एव काशिकायां " लक्षणेहेतौचार्थेवर्तमानाद्धातो परस्यलट शतृशानचावादेशौभवतः ॥ तौचेल्लक्षणहेतुक्रियाविषयौभवत. ॥ लक्षणे ॥ शयानाभुञ्जतेयवनाः ॥ तिष्ठन्तोऽनुशासतिगणकाः ॥ हेतौ ॥ अर्जयन्वसति ॥ अधीयानोवसति ॥ लक्षणहेत्वोरितिकिम् ॥ पचतिपठति ॥ क्रियायाइतिकिम् ॥ द्रव्यगुणयोर्माभूत् ॥ य कम्पते सोऽश्वथः ॥ यदुत्प्लवतेतल्लघु ॥ यन्निपीदतितद्गुरु " इत्युक्तम् ॥ एतदेव हृदि निधाय शेखरकारोपि ॥ " क्रियायाइतिकिम् ॥ य'कम्पतेसोऽश्वत्थइत्यादौमाभूत् " इत्याह ॥ एवं हेतौ शतुरङ्गीकरेपि अर्जयन्वसतीत्यादौ हेतुमत्क्रियायास्तिङन्तपदोपस्थाप्यत्वसमानकर्तृकत्वयोर्दर्शनादिह तादृशपदाऽभावाच्च फले शतरि द्वेष्टिक्रिया कस्याः क्रियाया फलम् ॥ कारणे शतरि सा कस्याः कारणमिति चिन्त्यम् ॥ समानकर्तृकत्वाऽनियमे चैत्रस्य लाभार्थं भोजनार्थं वा मैत्रस्य वासेऽप्यर्जयन्वसति भुञ्जानो वसतीति प्रयुज्येतेति दिक् ॥ तादृशतिङन्तेति ॥ अत्र यत्तदोरप्यध्याहारो बोध्यः ॥ तिङन्तं तु अकोपयन् अनिन्दन् इत्यादिरूपं किञ्चिदध्याहर्तव्यम् ॥ तथाच ये शिवं द्विषन्तः दधीच गौतमं वा मुनिं अकोपयन्द्वेषादेवमीशानमनिन्दन्वा ते शठास्ते च न संभाष्या इत्यर्थं ॥ योऽधीयानआस्तेसदेवदत्तइतिप्रयोग ॥ इह हेतावेव शतेत्यत्रहेऽसावध्याहारक्लेशः ॥ हेताऽऽनादरे स्याहुः ॥ तदनध्याहारइति ॥ तथाचास्मिन्पक्षे लट-शतृशानचावित्ति शता ॥ वर्तमानेलडित्यतोलडित्यनुवर्तमानेऽपि पुनर्लड्ग्रहणमधिकवचनार्थम् ॥ तेन अप्रथमासामानाधिकरण्येऽपि क्वचिदिति व्याख्यानात् ॥ गौतमकर्तृकत्वे शिवद्वेषस्याऽकारणत्वमपि द्विषन्तोदेवमित्यत्र हेतौ शतुरनादरे बीजं द्रष्टव्यम् ॥

इदं पुनरत्र बोध्यम् ॥ पूर्वोक्तरीत्या दोषपरिहारोऽस्माभिः परोक्तं यथाश्रुतं दोषमङ्गीकृत्य कृतः ॥ वस्तुतस्तु दोषएव नास्ति ॥ तथाहि ॥ कूर्मपुराणे पञ्चदशेऽध्याये दधीचशापमुक्त्वा ततउक्तं येन्येशापाग्निनिर्दग्धादधीचस्यमहर्षयः ॥ द्विपन्तोमोहितादेवंसंबभूवुःकलिष्वथ ॥ अत्र संबभूवुरित्युक्तं नतु भविष्यन्तीत्युक्तम् । अग्रे च कलिष्वितिबहुवचनमुक्तम् ॥ एवं च सूतशौनकसंवादात्प्राक्तनकलिष्वेव ते जाता नतु वर्तमानकलियुगे ॥ कथमन्यथा सूतेन व्यासैर्वा भविष्यन्तीतिनोक्तं स्यात् ॥ तस्मात्तादृशकौर्मप्रकरणं व्यतीतकलिविषयकमेव ॥

अथ श्रुत्यन्तरेण तु त्वदुक्तदोषप्रसक्तिरेव नास्तीत्याहुः ॥ इदंपुनरत्रेत्यादिना विषयकमेवेत्यन्तेन ॥ अत्र कौर्मे ॥ उक्तचरस्थले ब्रह्मणा शुद्धाद्वैतावलम्बेन विष्णुशिवयोरभेददृष्टौ मुक्त्यादिकं 'भेददृष्टौ नरकप्राप्त्यादिकं चाऽभिहितं निशम्य दक्षकयज्ञं शरणं जगामेति वर्णयित्वा ब्रह्मवचनश्रवणेऽपि शुद्धमद्वैतमनादृत्य साक्षाच्छिवं द्विषतां सप्तमहर्षीणां वृत्तान्तोवर्ण्यते ॥ येन्येशापाग्निनिर्दग्धाद्दधीचस्य महर्षयः ॥ द्विपन्तोमोहितादेवंसंबभूवुःकलिष्वथ ॥ त्यक्त्वातपोबलंकृत्स्नंविप्राणांकुलसम्भवा ॥ पूर्वसंस्कारमाहात्म्याद्ब्रह्मणोवचनादिह ॥ मुक्तशापास्ततः सर्वेकल्पान्तेरौरवादिषु ॥ निपात्यमानाःकालेनसंप्राप्याऽऽदित्यवर्चसम् ॥ ब्रह्माणंजगतामीशमनुज्ञाताःस्वयंभुवा ॥ समाराध्यतपोयोगादीशानंत्रिदशाधिपम् ॥ संबभूवुर्यथापूर्वंशङ्करस्यप्रसादतइति ॥ इह महर्षयइत्यत्र महात्मन इत्यपि पाठः ॥ प्राक्तनकलिष्विति ॥ संबभूवुरित्यनद्यतनपरोक्षभूतार्थकलकारप्रयोगात्कलिष्विति बहुवचनस्वारस्याचेति हृदयम् ॥ क्वचित्पुस्तके चरमश्लोके भविष्यन्तियथापूर्वमितिपाठेऽपि शापमुक्तिब्रह्मलोकप्राप्त्यनन्तरस्य पूर्वकालिकत्वं नापैति ॥ किन्त्वस्मिल्लोके पुनस्तपोभिलापाद्यथापूर्वं जननमेव तादृशपाठेऽर्थः ॥ अन्यथा संबभूवुःकलिष्वितिवचनं विरुध्येतैव ॥ त्वद्गुरुकूलोव्यासाऽभिप्रायश्चेत्पूर्ववाक्ये भविष्यन्तिकलाविहेत्येव वदेत् ॥ गृहिलतयैवं नाद्रियमाणे तु प्रागुक्तयाऽसन्दिग्धया व्यवस्थया सन्तुष्य ॥ संभूतास्तेकलिष्वयेति त्वन्मात्रकल्पितपाठेऽपि भूतत्वं तदवस्थमेव ॥ एतेन सहस्राक्षे पूर्वं (पृ० ५६ पं० ४) द्विपन्तोमोहिताइत्यादिना कालेनेत्युक्तमित्यन्तेन विहितं व्यामोहनवैदग्ध्यं व्यर्थितम् ॥

श्वेतवाराहकल्पे वैवस्वतमन्वन्तर्गताऽष्टाविंशतितमकलिविषयकाणि तु ब्रह्माण्डादिपुराणवाक्यानि ॥ कलौदशसहस्रेणविष्णुस्त्यक्ष्यति मेदिनीम् ॥ तदर्द्धंजान्हवीतोयंतदर्द्धंग्रामदेवताः ॥ श्रीभागवते च ॥ कलिंसभाजयन्त्यार्यागुणज्ञाःसारभागिनः ॥ यत्रसङ्कीर्तनेनैवसर्वःस्वार्थोभिलभ्यते ॥ तथा ॥ कृतेयद्ध्यायतोविष्णुंत्रेतायांयजतोमखैः ॥

द्वापरेपरिचर्यायांकलौतद्धरिकीर्तनात् ॥ कलेर्दोषनिधेराजन्नस्तिह्येकोमहान्गुणः ॥ कीर्तनादेवकृष्णस्यमुक्तबन्धःपरंव्रजेत् ॥ पुनस्तत्रैव ॥ कृतादिषुप्रजाराजन्कलाविच्छन्तिसंभवम् ॥ कलौखलुभविष्यन्तिनारायणपरायणाः ॥ क्वचित्क्वचिन्महाराजद्रविडेषुचभूरिशः ॥ ताम्रपर्णीनदीयत्रकृतमालापयस्विनी ॥ कावेरीचमहापुण्याप्रतीचीच महानदी ॥ येपिबन्तिजलंतासांमनुजामनुजेश्वर ॥ प्रायोभक्ताभविष्यन्तिवासुदेवेऽमलाशयाः ॥ स्कन्दपुराणेच ॥ कर्मणामनसावाचा श्रीकृष्णंहिभजन्तिये ॥ संप्रदायिगुरोर्वाक्यात्तेविष्णोर्नकलेर्नराः ॥ वेदोक्तधर्महीनत्वात्सर्वेनिरयगामिनः ॥ अनाश्रित्यहरिंजीवाःकलौपाषण्डसङ्कुले ॥ पद्मपुराणेच ॥ यदाभागवतीसृष्टिः कलौभवतिवैतदा ॥ अंशेनभगवान्विष्णुःस्वात्मानंसृजतिस्वयम् ॥ तमाश्रित्यजना सर्वे भक्तिभाजोभवन्तिहि ॥ तथातत्रैव ॥ चत्वारस्तेकलौभाव्या संप्रदायप्रवर्तकाः । भविष्यन्तिप्रसिद्धास्तेह्युत्कलेपुरुषोत्तमात् ॥ इत्यादीनि द्रष्टव्यानि ॥

अत पर वैष्णवसम्प्रदायानां तत्प्रवर्तकाचार्याणां च जगदुद्धारकारणत्वं तत्संमतहरिसेवनाद्याचारतत्स्वरूपविषयकज्ञानयोर्हरिपरितोषपुरःसरमोक्षफलकत्वं च पुराणादिषु प्रसिद्धमिति बोधयितुमाहुः ॥ श्वेतवाराहकल्पइत्यादि द्रष्टव्यानीत्यन्तम् ॥ अत्र ॥ विष्णुस्त्यक्ष्यतीति ॥ दशसहस्रवर्षपर्यन्तमेव विशेषतोविष्णुः स्वसेवादिधर्मप्रचारं स्थापयिष्यतीति भावः ॥ श्रीभागवतवचनेषु हरिकीर्तनमात्रेणापि बन्धमोक्षपुरःसरपरप्राप्तिपर्यन्तसर्वस्वार्थलाभस्य कथनात्तदनन्यभक्तानां वैष्णवानां प्रत्युत नरकप्राप्त्यन्तदुष्फलप्राप्तेः खण्डयिष्यमाणसहस्राक्षे प्रलपनं प्रद्वेषमात्रमूलकम् ॥ स्कान्दवचस्सु ॥ संप्रदायिगुरोरिति ॥ विष्णुस्वाम्यादिप्रकाशिताऽनादिसिद्धचतुर्विधवैष्णवसम्प्रदायाऽन्यसंबन्धिनोगुरोरिति भावः ॥ अत्र मूलमनुपदं वक्ष्यते ॥ तेविष्णोरिति ॥ तादृशगुरुतो दीक्षां लब्ध्वा सर्वात्मना भगवन्तं सेवमाना ये तएव विष्णोः संबन्धिनो वैष्णवाः ॥ नतु ते कलेःसंबन्धिनस्तदधीनाः ॥ कलिकल्मषक्षपणसाधनसंपन्नत्वात् ॥ अतो न ते कलिजैः परिपीडिताभवन्ति ॥ वेदोक्तेति ॥ हरिमनाश्रित्य वैष्णवत्वमप्राप्य ॥ वेदोक्तैःसत्सेव्यासङ्कीर्तनादिधर्मैर्हीनत्वादेव जीवा निरयं गच्छन्ति ॥ भगवद्धर्मास्तु मुक्तिसाधनतयैव ऋगादिषु चतुर्ष्वपि वेदेषु "तमुस्तोतारःपूर्व्यंयथाविदऋतस्यगर्भंजनुषापिपर्तन" इत्यादिना "भर्तासन्भ्रियमाणोबिभर्ति" इत्यादिना "ब्रह्मसंस्थोऽमृतत्वमेति" इत्यादिना "भक्तिरस्यभजनम्" इत्यादिना च वचःशतेन सप्रपञ्चं निरूपिता इति किं बहुना ॥ नरकप्राप्तिस्तु तद्रहितानामेव ॥ षष्ठस्कन्धादिषु जिह्वानवक्तिभगवद्गुणनामधेयमित्यादिवचनेभ्यः ॥ विष्णुपुराणादिष्वपि स्वपुरुषमभिवीक्ष्यपाशहस्तंवदतियमः खलुतस्यकर्णमूले ॥ परिहरमधुसूदनप्रपन्नान्प्रभुरहमन्यनृणांनवैष्णवानाम् ॥ १ ॥

इत्यादिसन्दर्भदर्शनाच्चेतिदिक् ॥ पाण्डवधनेषु ॥ यदेति ॥ भागवती दैवी सृष्टिः ॥ दैवी संपद्विमोक्षायेतिभगवद्वाक्यान्मोक्षयोग्यापि यदा कलौ भवति तदोपवती संपद्यते तदा भगवान्विष्णुरंशरूपेण वा अंशेन सह स्वयमेव वा स्वस्वरूपं प्रकटयति॥ तं प्रकटितात्मानमाश्रित्य तत्तउपदेशादिकं प्राप्येति भावः ॥ सर्वे जना ब्राह्मणादयो भगवद्भक्तिभाजो भवन्ति ॥ इह विष्णुरिति निर्देशादिदं विष्णुस्वाम्याख्यभगवदवतारपरमिति केचित् शिष्टाः ॥ भगवान्स्वयं विष्ण्वाख्यं स्वात्मानं सृजतीति तेषामाशयः ॥ क्वचिच्चेति चकारद्वित्वम् ॥ शङ्करोनीललोहित इत्यस्य शङ्कराचार्यपरत्वं यद्वता भवतास्विदं न शक्यं प्रत्याख्यातुम् ॥ अस्माकं तु नैवं व्याख्याने निर्बन्धः ॥ चत्वारस्तइति ॥ इतः पूर्वं संप्रदायविहीनायेमन्त्रास्तेनिष्फलामताः ॥ अतःकलौभविष्यन्तिचत्वारःसंप्रदायिनः ॥ श्रीब्रह्मरुद्रसनकावैष्णवाःक्षितिपावनाः ॥ चत्वारस्तेकलौभाव्याइति पठ्यते ॥ उत्कले देशविशेषे ॥ पुरुषोत्तमात् श्रीजगन्नाथक्षेत्रात्तदधिष्ठातृजगन्नाथतोवा प्रसिद्धाभविष्यन्तीत्यर्थः ॥ इह ब्रह्मादिसंबन्धिनः संप्रदायाः क्रमेण रामानुजमाध्वविष्णुस्वामिनिम्बार्काख्याभिर्विदिता ज्ञेयाः ॥ रामानुजानांसरणीरमातोगौरीपतेर्विष्णुमतामताऽनुगानाम् ॥ निम्बार्कगानांसनकादितश्चमाध्वानुगानांपरमेष्ठितश्चेत्युक्तेः ॥ तत्राऽस्माकं रुद्रसंप्रदायः ॥ अतएवतस्य भक्तिदातृत्वं तत्र तत्र वर्णयन्ति श्रीमदाचार्याः ॥ यथा पुरुषोत्तमनामसहस्रे महादेवस्वरूपश्चभक्तिदाताकृपानिधिरिति ॥ निबन्धे चतुर्थस्कन्धविवरणेपि सायुज्याधिकारिणां प्रचेतसां श्रीशिवकर्तृकोपदेशादेव सिद्धिर्दर्शिता ॥ तपसासाधनेतस्यनबन्धोभवतीतिहि ॥ तत्रापिकृष्णसेवायांकृतार्थत्वंहिसर्वथा ॥ इतितान्सर्वथाशुद्धान्विलोक्यपेशोहरिप्रियः ॥ प्रोवाचसर्वसन्देहवारकंसर्वबोधकम् ॥ हेतुपूर्वंस्तोत्रमाहशीघ्रंतुष्यतियद्धरिः ॥ अयमेवोपदेशोहिविश्वासर्थंपरंपरेति ॥ एतद्विवरणे च श्रीप्रभुचरणाः "तत्रापि विशेषमाहुः ॥ तपसेति ॥ तस्यपित्रादेशस्ततपसासाधनेप्रवृत्तिमार्गत्वेनस्वस्यसर्वकरणजबन्धोयः सन भविष्यतीतितपसिप्रवृत्ताः ॥ तत्रापिनकेवलंतावन्मात्रत्वंकिन्तुतपस्यपिपुरुषोत्तमभजनंकरिष्यामस्तेनकृतार्थाभविष्यामइतिनिश्चयवन्तः ॥ अतइत्थंभूतत्वेनाऽधिदैविक्यपिशुद्धिःसंपन्नेतिसर्वप्रकारेणशुद्धान्ज्ञात्वातान्प्रतिप्रोवाचेत्यर्थः ॥ ईशत्वेनान्तरज्ञानम् ॥ तत्रापि हरिभक्तिज्ञानं हरिप्रियत्वेन ॥ अन्यथाकथमकस्माद्बहिरागच्छेत्" इत्याद्याहुः ॥ द्वादशस्कन्धनिबन्धेच श्रीमदाचार्याः ॥ योधिकारीभक्तिमार्गेतत्प्रसादमवाप्यहि ॥ भक्तश्चेरसर्वेचिन्त्स्वस्थस्तृतीयःसउदाहृतः ॥ भक्तियुक्तोमहादेवस्तांदातुंशक्नुयात्तथा ॥ भक्तस्ययावान्संक्लेशःसमायेत्यपिरूपितम् ॥ भक्तिमार्गानुसारेणभक्तिनिष्ठेयमीरितेति ॥ एतद्व्याख्याने च श्रीपुरुषोत्तमचरणाः ॥ "एवंद्वितीयाध्यायार्थउक्तः ॥ तृतीयस्याहुः ॥ यइत्यादि एतेननारायणपरःप्रशान्तात्माइतितृतीयइत्युक्तंभवति ॥ नन्वत्रशिवदर्शनसंवादाद्युपनिबन्धनस्यकिंप्रयोजनमतआहुः ॥ भक्तियुक्तइत्यादि ॥ एतेन महादेवे गुरुत्वबोधनायतदुपनिबन्धनमित्युक्तम् ॥" इत्यादिव्याचक्षते ॥ एतेन शिवस्य भक्तिमार्गाऽऽचार्यत्वं प्रद्विषन्तः स्वमार्गाऽनभिज्ञाअस्मासु शिवद्वेषस्यारोपकाश्चसर्वथैव प्रत्युक्ताः ॥ परेषां नारायणंपद्मभवंवसिष्ठमित्यादिवदस्माकमाचार्यपरंपरातु आदौश्रीपुरु-

पोत्तमंपुरहरंश्रीनारदाख्यंमुनिंकृष्णव्यासगुरुंशुकंतदनुविष्णुस्वामिनंद्राविडम् ॥ तच्छिष्यंकिलबिल्वमङ्गलमहंवन्देमहायोगिनंश्रीमद्वल्लभनामधामचभजेऽस्मत्संप्रदायाधिपम् ॥ इति बोद्धव्या ॥ इयं च मिताक्षरादौ विज्ञानेश्वरादिभिरुदाहृतवचनान्तरायां शाण्डिल्यसंहितायां भक्तिखण्डे पञ्चमाध्यायेऽपि दृश्यते ॥ यथा ॥ अथातःश्रूयतां विप्राःसंप्रदायःपुरद्विपः ॥ एकदाशङ्करोदेवोगतोगोकुलमण्डलम् ॥ १ ॥ तत्रवृन्दावनेरम्येसच्चिदानन्दमन्दिरे ॥ त्रिभङ्गललितंदेवंकोटिमन्मथसुन्दरम् ॥ २ ॥ अनौपम्यंवेणुधरंव्रजस्त्रीगणसेवितम् ॥ श्रुतिभिर्मुनिभिश्चैवसेव्यमानंमुदान्वितम् ॥ ३ ॥ प्रणिपत्यमुदादेवंसामगानादतोषयत् ॥ जगतोहिसमुद्धर्तुंसंप्रदायस्यलब्धये ॥ ४ ॥ तस्मैददौप्रसन्नात्मातन्नत्यानामनुग्रहात् ॥ सलब्ध्वापरमंलाभंस्वधामसंन्यवर्तत ॥ ५ ॥ परमानन्दसंमग्नोनृत्यंचक्रेदिगम्बरः ॥ समुपासततंदेवंतत्रप्रष्टुंभृतकौतुकः ॥ ६ ॥ नचाचष्टतदादेवाहत्वात्रिपुरमाहवे ॥ तदाहर्षसमाविष्टोनारदेनप्रसादितः ॥ ७ ॥ जगौतमेवसन्मार्गंश्रुतंयच्छ्रीपतेर्मुखात् ॥ नारदोऽपिमहायोगीपरमानन्दपूरितः ॥ ८ ॥ अलंप्रसादतःप्रादाद्व्यासायामिततेजसे ॥ कौण्डिन्यायमयाप्रोक्तोगर्गाचार्यमहात्मने ॥ ९ ॥ व्यासस्तुवक्तिपुत्रायमहारातायविष्णवे ॥ अथोकलौसंप्रवृत्तेपूर्वाचार्यैरथागतैः ॥ १० ॥ भविष्यतिपराभक्तिःकिञ्चित्कालंमुनीश्वराः ॥ वेदवेदान्ततत्त्वज्ञैर्वैष्णवैर्ब्राह्मणोत्तमैः ॥ ११ ॥ निर्वाहितात्ततोभक्तिर्लुप्तप्रायाभविष्यति ॥ ततोपिश्रीपतेरस्यस्वीयानुग्रहतोहरेः ॥ १२ ॥ माथुरेमण्डलेतत्रगोकुलेऽस्मिन्गिरावपि ॥ प्रादुर्भविष्यतिमहापुरुषैरुपभाविता ॥ १३ ॥ तस्याःसंप्रीतयेतत्रसंप्रदायैरिरक्षिषुः ॥ महात्मासुमहातेजाभगवद्वदनोदितः ॥ १४ ॥ प्रादुर्भविष्यतिततःसर्वश्रुतिविशारदः ॥ योगीयोगीश्वरस्तंवैसंप्रदायंवदिष्यति ॥ १५ ॥ भगवानपितंसाक्षादुपदेष्टानिजागमम् ॥ आसाद्यगोकुलंधामभक्तिंसंवर्धयिष्यति ॥ १६ ॥ गिरिराजंततःप्राप्यमहात्मैकान्तसंश्रयैः ॥ निर्गुणंभक्तिमार्गंहिवर्धयन्विचरिष्यति ॥ १७ ॥ निजात्मप्रेमसंपूर्णैर्भगवल्लालनतत्परैः ॥ तद्रसाप्लुतचित्तानांस्वाचारपरिवर्त्तिनाम् ॥ १८ ॥ सर्वभूतैकसुहृदांवेदप्रामाण्यमीयुषाम् ॥ विरलेष्वेवभवितासंप्रदायोऽत्यनुत्तमः ॥ १९ ॥ आश्चर्याणिचरित्राणिकृत्वानानाविधान्यसौ ॥ स्थापयिष्यतिवैतस्याःपारंपर्यक्रमंकुलम् ॥ २० ॥ समुद्धृत्यततोजीवान्हरेःप्रीतिंकरिष्यति ॥ ततःकतिपयेकालेकालदोषप्रभावतः ॥ २१ ॥ विलयंयास्यतिपन्थाःक्वापक्ष्मेमाकुलःपरः ॥ परदोषान्वितैःपुम्भिर्निजाचार्यपराङ्मुखैः ॥ २२ ॥ इत्येवंहिसमाख्यातःसंप्रदायःपुरद्विपः ॥ अयमेवपरःपुण्योभक्तिशास्त्रैकसम्मतः ॥ एतन्माहात्म्यमतुलंनालंवक्तुंचतुर्मुखः ॥ २३ ॥ अयंहरेःश्रीव्रजदेवतायाअनुगृहीत.किलसंप्रदायः ॥ आविर्बभौवेणुगृहीतयेदैर्विभावयध्वंत्रिपुरारिसंमतम् ॥ २४ ॥ अत्र विष्णवे विष्णुस्वामिनाम्ने इत्यर्थः ॥ भगवद्वदनोदितः श्रीवल्लभाऽऽचार्यः ॥ श्रीमद्गोवर्द्धनधरवदनवैश्वानररूपत्वात् ॥ एतदनुकूलैः श्रुतिस्मृतिपुराणनारदपञ्चरात्रादिवाक्यैर्विस्तरस्तुचरित्रचिन्तामणिसंप्रदायप्रदीपश्रुतिरहस्यादिषु मामके सत्सिद्धान्तमार्तण्डे च द्रष्टव्यः ॥

एतेन शापेन चेतसि तमसः प्रवेशस्तासु योनिषु कलौ जन्म च तमःप्रवेशेन मोह इत्यादिकं सर्वमपास्तम् ॥ शस्तब्राह्मणसंभवस्य कूर्मपुराणे संबभूवुरित्यादिना पूर्वमेवोक्तत्वात् ॥

सदृशासे एवञ्चशापेनेत्यादि तासुयोनिष्वितिचोक्तमित्यन्तं भागं दूषयन्ति ॥ एते-नेत्यादिना पूर्वमेवोक्तत्वादित्यन्तेन ॥ अयं भावः ॥ तदुक्तः क्रमः केवलं कपोल-कल्पितएव ॥ तथाहि ॥ अत्र शापेन तमःप्रवेशउक्तः कौर्मे तु तमसाऽऽविष्टमनसो निन्दकान्दृष्ट्वा शशापेत्युक्तम् ॥ अत्र तासु योनिषु जन्म द्वितीयं फलमुक्तम् ॥ पुराणे तु द्वेषाद्युत्तरकालिकं तत् ॥ एवं पुराणे कुशास्त्राऽऽसक्त्यादित्रयस्य कलिजपरिपीडा-कारणत्वं बोधितम् ॥ इह तु प्रत्युत तस्य तत्कार्यत्वम् ॥ पुराणे शिवद्वेषः शिवतन्मार्ग-योर्निन्दा च शापहेतुतयोपात्ता ॥ अत्र तु शापजन्यतया ॥ जनमोहकत्वं तु पुराणोक्तान् हृषीकेशशङ्करनिन्दकत्वादिधर्मानप्रकाश्य मध्यतएवोपात्तम् ॥ पुराणे वृथाधर्मंचरि-ष्यन्तीत्यनेन कापालिकादिषु व्यर्थधर्मस्याऽऽचरणमेव बोध्यते नतु श्रौतस्मार्तधर्मस्य वृथात्वमतः पूर्वोक्तरीत्या तदुदाहृतपुराणस्यैव विरोधस्तदुक्तक्रमेऽवर्णितोऽपि सुबोधएव सुधियाम् ॥ तस्माद्वैष्णवप्रद्वेषादेवेदं कपोलकल्पितनानाफलकथनं सर्वजनमोहनार्थम् ॥ मोहयन्तिजनान्सर्वान्दर्शयित्वाफलानिवै इति तत्रैवोक्तेरिति दिक् ॥ यश्च कौर्मस्थे शाप-प्रकरणे नहिनिन्देतिन्यायस्याऽनवतारस्तत्रतत्र स्तुत्यन्तराऽभावादुक्तः सोप्यविचारात् ॥ यत्रयत्र प्रकरणे स्थितानि वचांसि त्वयोपात्तानि तत्रतत्र (अ० २७ श्लो० १६) तस्मा-त्सर्वप्रयत्नेन निन्दापशुपतौद्विजाइति ॥ (अ० ३० श्लो० ३८) तस्मात्सर्वप्रयत्नेनप्राप्य-माहेश्वरंयुगम् ॥ विशेषाद्ब्राह्मणानुद्रमीशानंशरणंव्रजेति ॥ (अ० १५ श्लो० ८१।८२) तस्मादनादिमध्यांतंविज्ञायपरमेश्वरम् ॥ मनसाकर्मणावाचासमाराधययत्नतः ॥८१॥ यत्ना-त्परिहरेशस्यनिन्दांस्वात्मविनाशिनीम् ॥ भवन्तिसर्वदोषायनिन्दकस्यक्रियाहिताः ॥ ८२ ॥ इति यथायथं निन्दानिषेधादिविधीनां सत्वेन शापादिकथनस्य तत्तद्विधिवाक्यविधेयार्थ-स्तुतौ तात्पर्यमिति कल्पनेऽपि बाधकाऽभावात् ॥ यथा "स्तेनंमनोनृतवादिनीवाक्" इति निन्दावचनस्य हिरण्यस्तुत्यर्थत्वम् ॥ अत एव प्रमाणाध्यायेऽर्थवादपादे (सू० ११)

---

* एवंच शापेन चेतसि तमसः प्रवेशः तासुयोनिषुतत्रौजन्मच तमःप्रवेशेन मोहः तेनपरस्त्र्यासक्त्यादिप्रयुक्तकलिजपापपरिपीडितत्वं कुशास्त्राऽऽसक्तचेतस्कताच तयामिथ्या-ऽधीतसमाचारता मिथ्याज्ञानप्रलापिता शिवद्वेषः शिवनिन्दा शिवोक्तवेदार्थनिन्दा ऐहिका-ऽऽमुष्मिकानां फलानां बोधनेन जनमोहकत्वं च मिथ्याऽधीतसमाचारत्वादिभिश्च यथायथं ब्राह्मणैरसमाप्यत्वं धर्माचरणस्य वृथात्वं तपोबलहानिर्व्रयीबाह्यत्वं विष्णौ पराङ्मुखत्वं ततोनरकेपातइति ॥ नच नहि निन्दा निन्द्यं निन्दितुं प्रवृत्ता किन्तु स्तुत्यं स्तोतुमिति न्यायेन शप्तविप्रनिन्दायां नैतत्तात्पर्यमिति वाच्यम् ॥ तत्रतत्र स्तुत्यन्तराऽभावेनैतन्न्यायाऽनवतारात् ॥ किञ्च शापादिविषयेऽपि तन्न्यायाऽवतारे पुराणकथानां बहुविप्लवः स्यादिति दिक् ॥ अत्र ब्राह्मणैरित्युपलक्षणं तेन देव्या शप्तैरित्यपि बोध्यम् ॥ अत्रचेदानीम्पदमध्याहृत्य पुरा ब्राह्मणैरिति पदद्वयमावर्त्त्येत्थं व्याख्येयम् ॥ पुरा पूर्वजन्मनि ब्राह्मणैस्तत्रैव ब्राह्मणैः शप्तैरिदानीं विप्रकुलोद्भवैरिति ॥ अनेनेदानीं विप्रकुले जन्मसत्वेऽपि ब्राह्मण्यनियमोनेति सूचितम् ॥ अतएव कौर्मे विप्राणां कुलसम्भवा इति तासु योनिषु इति चोक्तम् ॥

"रूपात्प्रायात्" इत्यत्र शबरस्वामी "हिरण्यंहस्तेभवतिअथगृह्णाति-इतिसाकाङ्क्षत्वादस्यविधेःशेषः॥ स्तेनंमनोनृतवादिनीवागित्यतिनिन्दावचनंहिरण्यस्तुत्यर्थेन॥ यथाकिंचनपिणादेवदत्तएवभोजयितव्यः" इत्याह॥ यथावा तैत्तिरीयसंहितायां (कां० १ प्रपाठक ५ अनु० १) "सोरोदीद्यदरोदीत्तद्रुद्रस्यरुद्रत्वम्॥ यदश्रूवशीयततत्॥ १॥ रजतँहिरण्यमभवत्तस्माद्रजतँहिरण्यमदक्षिण्यमश्रुजँहियोबर्हिषिददातिपुराऽस्यसंवत्सराद्गृहेरुदन्ति" इति निन्दायाः "तस्माद्बर्हिषिनदेयं" इति विधेः शेषत्वम्॥ तेन च देयस्य हिरण्यस्य स्तुतिः॥ अतएव तत्र (सू० १०) "गुणवादस्तु" इत्यत्र भाष्ये "अथसोऽरोदीत् इतिकस्यविधेःशेषःतस्माद्बर्हिषिरजतंनदेयंइत्यस्य" इत्यादिना पदानां साकाङ्क्षत्वं प्रदर्श्य "योबर्हिषिरजतंदद्यात्॥ पुराऽस्य संवत्सराद्गृहेरोदनंभवतीत्यस्यहेतुत्वेनाऽयंप्रतिनिर्दिश्यतेतस्माद्बर्हिषिरजतंनदेयंइति॥ एवं सर्वाणिसाकाङ्क्षाणिकथंविधेरुपकुर्यन्तीति॥ गुणवादेनरोदनप्रभवंरजतंयबर्हिषिददतोरोदनमापद्यते॥ तत्प्रतिषेधस्यगुणःयत्प्ररोदनमिति" इत्याद्युक्तं॥ तथाऽत्रापिशिवनिन्दादिकरणे दुष्फलसम्भवात्तदकार्यमिति॥ तेन च शिवाराधनं स्तुत्यमित्येव तात्पर्यं॥ न तु वैष्णवसंप्रदायवर्तिनां निन्दायाम्॥ एवमुदिताऽनुदितहोमस्थलेऽपि (तैत्तिरीयब्राह्मणे अष्टक २ अध्याय १ अनुवाक २) "आग्नेयीवैरात्रिः॥ ऐन्द्रमहः॥ यदनुदितेसूर्येप्रातर्जुहुयात्॥ उभयमेवाऽऽग्नेयँस्यात्॥" इत्यनुदितहोमनिन्दायाः॥ "उदितेसूर्येप्रातर्जुहोति॥ तथाग्नयेसायँहूयते॥ सूर्यायप्रातः॥" इति विहितोदितहोमस्तुतावेव तात्पर्यं न तु निन्द्यमानाऽनुदितहोमनिन्दने तथाऽत्रापि शिवसमाराधन एव तात्पर्यं न तु शिवनिन्दनइतिशिवम्॥ वेदे (तैत्तिरीयसंहिता कांड २ प्रपा० ६ अनुवाक ६) अग्नेस्त्रयोज्यायाँसो भ्रातरआसन्नित्युपक्रम्य "तंमत्स्यःप्राब्रवीत् तमशपद्धियाधियात्वावध्यासुर्योमाप्रावोचइति॥ तस्मान्मत्स्यंधियाधियाघ्नन्तिशप्तोहि" इत्याम्नातासु शापादिकथास्वपि मीमांसकैः पुराकल्पार्थवादतायाङ्गीकाराच्च॥ पुराणेषु शापस्थलेषु तत्त्वायाऽनवतारं वदन् भववतधरायेचेत्यादिसन्दर्भमपि निर्बाधमेव मन्यते भवान्॥ यत्तु देव्या शप्तैरित्यपि बोध्यमित्युक्तं तत्र देवीकर्तृकशापाऽऽख्यायिका तु न क्वापि प्रसिद्धा प्रत्युत तद्विरुद्धा च॥ अतोऽत्र मानभूता साऽन्वेष्टव्यैव॥ यच्च प्रद्विषन्तोऽभ्यसूयकाइत्याद्युक्ताऽसुरधर्मशालितया वैष्णवप्रद्वेषादेव तेषामब्राह्मण्यं ध्वनयितुं प्रलपितं तत्तु स्वस्य तथात्वादेव॥ चोरोवेत्तिजगच्चोरमिति न्यायात्॥ नहि विरागिपदवाच्येषु नाममात्रयतिष्वाऽऽधुनिकेषु वर्णादिनियमः कोप्यस्तीतिसुप्रसिद्धमेवैतत्॥ तासु योनिष्वितिवाक्यात्तु पश्वादियोनिष्वेव जन्म स्वारस्यतोवगम्यते नतु वर्णसाङ्कर्यम्॥ अतः स्वजातिख्यापनमात्रफलकोयं प्रयासः॥ तदुक्तवचसां वयं त्वऽविषया एवेति प्रागेव समर्थितमतोस्माभिरत्र यदिचोरस्यजननींषण्ढःपरिणयेत् क्वचित्॥ तर्हिलाभोप्यलाभोवाशिष्टानांतेनकोभवेदिति न्यायएवानुसरणीयः॥

यत्तुमोहयन्तिजनान्सर्वानितिकौर्मवाक्येन तेषां मोहनसामर्थ्यावधारणादित्युक्तं तदपि तादृशवाक्यतः पूर्वं पठितानां कुर्वन्त्यवेददृष्टानि कर्माणिविविधानिच ॥ स्वधर्मेतुरुचिर्नैवब्राह्मणानांप्रजायते ॥ कुशीलचर्यापाषण्डैर्वृथारूपैःसमावृताः ॥ विनिन्दन्तिहृषीकेशंब्राह्मणान्ब्रह्मवादिनः ॥ वेदबाह्यव्रताचारादुराचाराद्वृथाश्रमाः ॥ तमसाविष्टमनसोवैडालव्रतिकाधमाइत्यादिवाक्यानां पर्यालोचनया धनार्जनादिनिरतेषु शान्तिदान्त्यादिस्वधर्मरुचिहीनेषु फलाजनककाषायवस्त्रधारणशिखासूत्रवर्जनादिना वृथारूपधरेषुब्रह्मवादिब्राह्मणनिन्दकेषु स्वाश्रमधर्मानाचरणेन निष्फलीभूताश्रमेषु वाममार्गीयमारणोच्चाटनविद्वेषणाद्यनेकफलप्रदर्शकेषु केषुचिदुभयभ्रष्टेष्वेव तादृशप्रकरणोक्तसर्वधर्मसंपन्नेषु मोहनसामर्थ्यमवधार्यते नतु मोक्षरूपफलप्रदर्शकेष्वस्मासु ॥ अस्मद्दर्शितमोक्षरूपफलस्यैकत्वेन तत्रफलानीति बहुवचनस्यानुपपन्नत्वात् ॥

सहस्राक्षे ॥ *मामच्याविपतेतीत्यादिमुदाहृतमेवेत्यन्त्यंभागंदूषयन्ति ॥ यत्तुमोहयन्तीत्यादिना अनुपपन्नत्वादित्यन्तेन ॥ मोक्षरूपफलप्रदर्शकेष्विति ॥ स्वस्य व्यासदर्शनानुसारित्वात् ॥ तत्रच "अथातोब्रह्मजिज्ञासेतिप्रथमसूत्रप्रथमातःशब्देन यस्मात्कर्मादिभ्योब्रह्मज्ञानमेव पुरुषार्थसाधकमतस्तज्ज्ञानाय विचारारम्भस्य प्रतिज्ञानादिति भावः ॥ यत्तु सहस्राक्षेऽसंभाव्यत्वमुक्तं तत्तु भगवद्भक्तद्विषि तन्निन्दैकजीविते तस्मिन्नेव जाघटीति ॥ कौर्मपूर्वखण्डे यत्र सप्तविंशाध्याये द्विषन्तोदेवमितिवाक्यं पठ्यते तत्रैव तस्मात्संपरिहर्तव्यानिन्दापशुपतौद्विजाः ॥ कर्मणामनसावाचामद्भक्तेष्वपियत्नतइति वदता भगवता शिवनिन्दावत्स्वभक्तमात्रनिन्दायाविशेषतः प्रतिषेधात् ॥ नत्वस्मासु ॥ अस्माकं शिवे द्वेषलेशस्याप्यभावात् ॥ प्रत्युतपूर्वोक्तरीत्या श्रीशिवोक्तमार्गस्यैवास्माभिरनुसरणाच्च ॥ कौर्मे च पूर्वखण्डद्वादशाध्याये हिमाचलं प्रति गिरिजया श्रुतिस्मृत्युदितंसम्यक्कर्मवर्णाश्रमात्मकम् ॥ अध्यात्मज्ञानसहितंमुक्तयेसततंकुरु ॥ धर्मात्संजायतेभक्तिर्भक्त्यासंप्राप्यते परमित्यादिना भवदनभिमतमस्माभिरेवाभिमतं ज्ञानकर्मसमुच्चयं भक्तेरेव परप्राप्तिसाधनत्वमित्यादि यावदध्यायसमाप्ति उपदिशन्त्या नचवेदादृतेकिञ्चित्शास्त्रंधर्माभिधायकम् ॥ योन्यत्ररमतेसोसौनसंभाष्योद्विजातिभिरिति कथनात्कौर्मपाद्मोत्तरखण्डादिप्रसिद्धवेदविरुद्धकुशास्त्ररतानां त्वादृशामेवासंभाष्यत्वं प्राप्यते नतु सर्वात्मना वेदमनुसरतां वैष्णवानामिति किंबहुना ॥

---

* माप्रच्याविपतेति ॥ मोहयन्तिजनानिति कौर्मवाक्येन तेषां मोहनसामर्थ्यस्याऽवधारणात् ॥ तान्प्रतीति ॥ नरान्प्रतीत्यर्थः ॥ एतेन शास्त्राणामसंभाष्यत्वं सूचितम् ॥ तत्र मानन्तु द्विषन्तोदेवमित्यादिकौर्मवाक्यमुदाहृतमेव ॥ ३ ॥

पुराणानां तामसत्वेनाऽनादेयत्वं राजसत्वेन सात्विकत्वेन चाऽऽदेयत्वमित्यत्रापि नाग्रहोस्माकं सर्वेषामेव पुराणानां व्यासप्रणीतत्वेन समत्वात् ॥ पुराणन्यायमीमांसाधर्मशास्त्राङ्ग मिश्रिताः ॥ वेदाःस्थानानिविद्यानांधर्मस्यचचतुर्दशेति याज्ञवल्क्यवाक्याच्च सर्वेषांधर्मस्थानत्वबोधनात् ॥ ननु सर्वेषां पुराणानां समत्वेन तुल्यबलतया तत्तत्पुराणस्यपरस्परविरुद्धवाक्यैः सत्प्रतिपक्षवत्परस्परप्रतिबद्धकार्यैः प्रमितिरेव न स्यादुभयत्राप्रामाण्यज्ञानात्संशयोवा स्यादितिचेन्न ॥ कल्पभेदेन विरोधपरिहारस्य सर्वत्रैव संभवात् ॥ अत एव नचवैष्णवग्रन्थेष्वित्यारभ्यस्तुल्यलाभादित्यन्तोवाक्यनिचयः स्वकल्पितपूर्वपक्षसमाधानरूपउन्मत्तप्रलपिततुल्योनादेयः ॥ सतिकुड्येचित्रमिति न्यायादित्यलं पल्लवेन

सहस्राक्षैर्नचवैष्णवग्रन्थेष्वित्यादिं स्तुल्यलाभादिति द्विगित्यन्तं भागं मूलच्छेदेवृक्षच्छेद इतिन्यायेन परिहरन्ति ॥ पुराणानांतामसत्वेनेत्यादिना अलंपल्लवेनेत्यन्ते-

---

* नच वैष्णवग्रन्थेषुधृतेन मात्स्यं कौर्मं तथा लैङ्गं शैवं स्कन्दं तथैवच ॥ आग्नेयं च षडेतानि तामसानि निबोध मे ॥ १ ॥ इति पाद्मोत्तरखण्डवाक्येन कौर्मस्य तामसतया सात्विकामोक्षदा प्रोक्ताराजसा स्वर्गदामता ॥ तथैवतामसादेविनिरयप्राप्तिहेतव ॥ १ ॥ इति तत्रधृतेन पाद्मवाक्येन तामसस्य निरयहेतुत्वेन च शिष्टैस्तदुक्ताऽर्थस्याऽग्राह्यत्वमिति वाच्यम् ॥ लिङ्गार्चनचन्द्रिकादिशैवग्रन्थधृतेन–तत्र शैवानि शैवंच भविष्यच्च द्विजोत्तमाः ॥ मार्कण्डेयं तथा लैङ्गंवाराहंस्कन्दमेवच ॥ मात्स्यमन्यत्तथा कौर्मं वामनं च मुनीश्वरा ॥ ब्रह्माण्डंच दशेमानीति ब्राह्मं पाद्मं ब्रह्मणो द्वे इति चोपक्रम्य पठितेन दशशैवपुराणानि सात्विकानिविदुर्बुधा इत्यनेन ब्राह्मे तु राजसे वैश्यसेव्ये इत्यनेनच स्कान्दवाक्येन सात्विकतया निश्चितस्य कौर्मस्य राजसतया निश्चितेन पाद्मेन शिष्टाऽनादेयार्थकताया वक्तुमशक्यत्वात् ॥ अतएव वैष्णवग्रन्थधृतेन–वैष्णवं नारदीयं च तथा भागवतं शुभम् ॥ गारुडं च तथा पाद्मं वाराहं शुभदर्शने ॥ १ ॥ षडेतानि पुराणानि सात्विकानि मतानिमे । इतिपाद्मेनैव सात्विकतयोक्ते नारदीये–एतत्कूर्मपुराणं तु चतुर्वर्गफलप्रदम् ॥ पठतां शृण्वतांनृणां सर्वोत्कृष्टगतिप्रदम् ॥ १ ॥ इत्यादिनोक्त कौर्मपुराणतच्छ्रवणादिमहिमासंगतस्तस्य तामसत्वेतु सन सन्नच्छेत ॥ येषां श्रवणमात्रेणेति वक्ष्यमाणतदध्यायोपक्रमवाक्यविरोधात् ॥ तामसस्य निरयप्राप्तिहेतुत्वाच्च ॥ एवञ्च पुराणनिन्दावाक्यं पाद्मे प्रक्षिप्तमेव ॥ किञ्च पाद्मे मात्स्यमपि तामसेष्वेव गणितम् ॥ तत्र सात्विकेषु गणिते भागवते तु मात्स्यमुपक्रम्य पुराणं वेदसमतमित्युक्तम् ॥ अतएवाऽस्य महतोभूतस्य निश्वसितमेतद्यदृग्वेदोयजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासपुराणं विद्योपनिषदइत्यादिना बहुषु स्थलेषूपनिषत्सु सामान्यतोवेदवत्पुराणानामपि ब्रह्मनिश्वसितत्वादिश्रूयते ॥ अतएवच–पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः ॥ वेदा स्थानानिवि-

न ॥ पल्लवेन विस्तरेण ॥ पल्लवोऽस्त्रीकिसलयेविटपेविस्तरेवनद्धतिमेदिनी ॥ अयं भावः ॥ नहिपाद्मसंमतः सात्विकादिभावः पुराणानां प्रतिषिध्यते ॥ व्यासोक्तस्य प्रतिषेधायोगात् किन्तु तामसभावकथनमुपलक्ष्य कैश्चित्कल्प्यमानं तेषां पुराणानामनादेयत्वमेव प्रतिषिध्यते ॥ व्यासस्यानादेयत्वे तात्पर्याभावात् ॥ सर्वथाऽनादेयत्वे तन्निर्माणस्यैवानर्थक्यप्रसङ्गात् ॥ वक्ष्यमाणतैत्तिरीयशतपथछान्दोग्यश्रुतिभ्यः पुराणन्यायमीमांसेत्यादिस्मृतिभ्यश्च साधारण्येन यावत्पुराणानां प्रामाण्यसिद्धेश्च ॥ नचोपादेयत्वे शृणुदेविप्रवक्ष्यामितामसानियथाक्रमम् ॥ २ ॥ येषांश्रवणमात्रेणपातित्यंज्ञानिनामपीतिपाद्मोत्तरखण्डवाक्यविरोधः शङ्क्यः ॥ तदर्थाऽनवबोधात् ॥ अत्र हि येषामिति कर्मणि षष्ठी ॥ यत्कर्मकश्रवणमात्रेणेत्यर्थः ॥ मात्रपदं सात्विकादिश्रवणं वेदसात्विकपुराणाद्यविरोधेन तामसानामपि मननं च व्यवच्छिनत्ति ॥ तथाच यदि सर्वाणि श्रूयेरन्यदि वा वेदोपबृंहकतया वेदाविरोधेन सात्विकपुराणाद्येकवाक्यतया च तामसानि मननविषयीक्रियेरन् तदा न पातित्यम् ॥ यदा तु केवलान्येव श्रूयेरन् नाप्युक्तरीत्या मन्येरंस्तदा त्वापाततो विरुद्धार्थबोधात्तद्वद्ज्ञानवतामपि स्वार्थच्यवनात्पातित्यमिति हृदयम् ॥ वस्तुतस्तु शृणुदेविप्रवक्ष्यामीति प्रतिज्ञा न तामसस्मृतिपु-

---

द्यानांधर्मस्यचचतुर्दशेति याज्ञवल्क्यस्मृतावविशेषेण पुराणानां विद्याधर्मयोः स्थानत्वमुक्तम् ॥ अतएव सात्विकनया त्वदभिमते नारदीयेऽष्टादशानामपि प्रत्येकं महिमा वर्णितः॥ तत्सर्वव तादृशवाक्यस्य प्रामाणिकत्वे न संगच्छते ॥ अतएव पाद्मे वङ्गदेशजकायस्थविशेषेण प्रक्षेपः कृतोस्तीति विदुषां किंवदन्ती सगता ॥ अतएव व्यासवाक्येषु न विश्वासोच्छेदः ॥ प्रक्षेपकर्त्ता मूर्खइत्यपि भाति ॥ अतएव तथैव स्मृतयः प्रोक्ता ऋषिभिस्त्रिगुणान्विताः ॥ सात्विकाराजसाश्चैव तामसा. शुभदर्शने ॥ १ ॥ वासिष्ठं चैव हारीतमिति तदीयसर्वपुस्तकस्थपाद्मपाठे लिङ्गनियमो न दृश्यते ॥ अग्रेपि–भारद्वाजं काश्यपं च सात्विकामोक्षदाः शुभाः इत्यादिना स्मृतीनां क्लीबत्वेन निर्देशः सात्विकराजसतामसशब्दानां पुलिङ्गे नैव निर्देशोऽस्ति ॥ एवञ्च स्थालीपुलाकन्यायेन विज्ञानभिक्ष्वादिधृततदध्यायस्थश्लोकान्तरोक्तशास्त्रान्तरनिन्दापि हेयैव ॥ प्रधानकारणवादाद्यप्रामाण्यं तु व्यासादिदर्शितप्रकारान्तरेण बोध्यम् ॥ तस्माद्येषु पुराणादिषु विदुषा प्रक्षेपसभावना प्रमाणान्तरविरुद्धाऽशोपलब्धिर्वा तेषु प्रमाणान्तरविरुद्धांऽशोहेयएव अंशान्तरं तु सतिसंवादे ग्राह्यम् ॥ एवञ्च लिङ्गार्चनचन्द्रिकादिधृतस्कान्दवाक्यस्याऽपि यदि प्रक्षिप्तत्वमुच्यते नारदादिपुराणान्तरविरोधात्तर्ह्यपि न नोविद्वेषः ॥ यत्तु स्मृतिनिन्दारूपद्विविधवाक्यदर्शनेन कश्चिदंशोहेयः कश्चिद्ग्राह्यइति ॥ तन्न ॥ स्कन्दवाक्ये शैवेतरांऽशनिन्दायां पाद्मवाक्ये वैष्णवेतरांशनिन्दायां च तात्पर्येण बहुविप्लवापत्तेः ॥ अतात्पर्यविषयहानोपादानस्वीकारस्तु न युक्तोनिर्मूलत्वात् ॥ पाद्मवाक्यानामत्यसंगत्या तद्विरोधस्याऽकिञ्चित्करत्वाच ॥ नहिनिन्दानिन्द्यमितिन्यायेनाऽपि न पाद्मवाक्यमुदाहरतां सतोषसंभावना ॥ शृणु देवि प्रवक्ष्यामि तामसानि यथाक्रमम् ॥ येषां श्रवणमात्रेण पातित्यं ज्ञानिनामपि ॥ इत्युपक्रम्य निन्दायामेव समाप्त्या स्तुत्यलाभादिति दिक् ॥

राणविषयिका ॥ तत्र (श्लोक १) तामसानिचशास्त्राणिसमाचक्ष्वममानघ ॥ संप्रोक्तानीहतैर्विप्रैर्भगवद्भक्तिवर्जितैः ॥ तेषांनामानिक्रमशःसमाचक्ष्वसुरेश्वरेति पार्वत्या तमःसमाविष्टऋषिविशेषप्रणीतशास्त्राणामेव पृष्टत्वात् ॥ शिवेनापि शृणुदेवीति प्रतिज्ञाय प्रथमंहिमयाप्रोक्तंशैवंपाशुपतादिकम् ॥ ३ ॥ मच्छक्त्यावेशितैर्विप्रैःसंप्रोक्तानिततः परम् ॥ कणादेनतुसंप्रोक्तमित्यादिना तेषामेव कथनाच्च ॥ अग्रेच तदुपसंहृत्य तामसपुराणकथनं तादृशस्मृतिकथनं च पृथक्प्रतिज्ञातम् (श्लो० १३) शास्त्राणिचैवंगिरिजेतामसानिनिबोधमे ॥ पुराणान्यपिवक्ष्यामितामसानियथाक्रममिति (श्लो०२२) तथैवस्मृतयः प्रोक्ताऋषिभिस्त्रिगुणान्विता इतिच ॥ अत्र एवमनेन प्रकारेणोक्तानि शास्त्राणि तामसानि निबोध जानीहीतिनिन्द्यशास्त्रकथनस्योपसंहारः ॥ ननु तर्हि सात्विकत्वादिना विभागः किंप्रयोजनक इतिचेदुच्यते ॥ सर्वेषामेव जीवानां भगवदंशत्वादिना तौल्येपि व्युच्चरणोत्तरं क्रीडाहेतुवैचित्र्यार्थं प्राधान्येन तत्तद्गुणोपहिततयातेषां त्रैविध्यस्य (बृहदारण्यके अ० ७ ब्रा० २ पृ० ९६४) "त्रयाःप्राजापत्याः" त्रिविधाभवतिश्रद्धादेहिनांसास्वभावजा ॥ त्रिविधाजीवसंघास्त्वित्यादिश्रुतिस्मृतिनारदपंचरात्रादिवचनैः सिद्धत्वेन व्यासस्य च सर्वक्षेमार्थं प्रवृत्तत्वेन तादृशतादृशजीवबोधानुकूलस्तत्तदधिकृतविषयविशिष्टोवेदार्थस्तैस्तैः पुराणैस्तेन निरूपितः ॥ अतउत्तमैस्तु वेदाविरोधेन सर्वैकवाक्यतया सिध्यन्नर्थएव ग्राह्यइत्येवयोग्यम् ॥ केवलतामसश्रवणे मननाभावे च तामसानुकूलविषयएव सिद्धांततया गृह्येत ॥ यथा केवलकौर्मश्रवणे शिवादुत्पन्नयोः परस्परानपेक्षयोर्विधातृनारायणयोरन्योन्यमहमेवेश्वरः कस्त्वमिति विवादादिः ॥ वस्तुतस्तु बहुश्रुतिबाधितमिदमिति प्रहस्तवादादौ विस्तरः ॥ तस्य सिद्धान्ततया ग्रहणे च तदनुकूलमात्रानुष्ठाने वेदविरोधं निरयप्राप्तिरपि नासंभाविता ॥ एतेन तथैव तामसादेविनिरयप्राप्तिहेतवइति स्मृतिविशेषविषयकवाक्यमपि व्याख्यातम् ॥ एतत्कूर्मपुराणंत्विति नारदीयविरोधोप्येतेन परिहृतः ॥ पठतां शृण्वतामिति केवलश्रवणस्यानुपादानात् ॥ सर्वस्य शिवस्य संबंधिन्याउत्कृष्टगतेः प्रदायकमिति तदुक्तमेव ॥ सर्वशब्दोपि शिवपर्यायः ॥ ईश्वरःशर्वईशानइत्यत्राऽमरविवेकादिव्याख्यासु शर्वः सर्वइति शब्दद्वयस्वीकारात् ॥ शर्वस्तु सर्वोभगवान्शंभुः कालंजरः शिव इतितत्रैव रामाश्रम्यामुदाहृतान्नामविधानाच्च ॥ यत्तु पुराणंवेदसम्मितमिति मात्स्यविषयकं भागवतवाक्यतयोक्तं तत्प्रमादात् ॥ भागवते तस्य वाक्यस्याभावात् ॥ भागवते (स्कं० ८ अ० २४ श्लो० ५५) पुराणसंहितांदिव्यांसांख्ययोगक्रियावतीमित्यादिना वर्णितो मात्स्योत्कर्षस्तु निर्दिष्टचरदिशा नैव विरुद्धः ॥ अतोन कोपि निंदावकाशो नापि प्रक्षिप्तत्वसंभावनागंधोपि ॥ नच तथैवस्मृतय प्रोक्ताऋषिभिस्त्रिगुणान्विताः ॥ सात्विकाराजसाश्चैवतामसाःशुभदर्शने ॥ वासिष्ठंचैवहारीतंव्यासंपाराशरंतथा ॥ भारद्वाजंकाश्यपंचसात्विकामोक्षदाःशुभा इत्यादौलिंगनियमाभावात्प्रक्षिप्तत्वं शंक्यम् ॥ कौर्मेपि करिष्यत्यवताराणिशंकरोनीललोहितइति कुर्वंतिचावताराणिब्राह्मणानांकुलेषुवैइति ॥ एवमादिषु अवतारादिशब्दलिंगनियमाभावेन प्रक्षिप्तत्वापातात् ॥ तद्युक्त्यंतरेण समाहितमितिचेत्तन्निरस्तं प्राक् ॥ अस्ति चात्रापि समाधायिका युक्तिः ॥ शास्त्राणिचैवंगिरिजेइति पूर्ववाक्यानुरो-

धेन चासिद्धंचैवहारीतमित्यादौ शास्त्रमितिविशेष्यस्याभिप्रेततया क्लीबनिर्देशो न बाधितः ॥ सात्विकाराजसास्तामसाश्चेति तु शर्यतानिस्मृतिविशेषणानि स्त्रीलिंगान्येव न तु पुल्लिंगानि ॥ न च टिड्ढाणितिङीबभावोदोषः सात्विकं प्रमेयं सात्विको विषयो वा विद्यतेत्रेति सात्विकाः अर्शआदेराकृतिगणत्वान्मत्वर्थीयोऽच् ॥ एवंराजसास्तामसाश्च ॥ यातु कायस्थेन प्रक्षिप्तमिति किंवदंती कथिता सा केवलकपोलकल्पितैव ॥ अद्यावधि विदुषः कस्यापि मुखात्तस्या अवगमाभावात् ॥ शैवग्रंथेष्वपि क्वापि तदनुपलंभाच्च अतो द्राविडेषु प्रसिद्धां रामानुजादिग्रंथेष्वध्यात्मरामायणादिविचारस्थले दर्शितां कौर्मादौ प्रक्षेपस्य किंवदन्तीमुपलभ्य पाद्मविषयिकां तादृशजनश्रुतिं प्रकल्प्य तत्कर्तरि मूर्खत्वं यदन्प्रच्छन्नोक्त्यासनिंदकोसि न च लिंगार्चनचंद्रिकाद्युक्तवचनविरोधात्प्रक्षिप्तत्वम् ॥ कल्पभेदादिना तदविरोधसिद्धेः ॥ अन्यथा विनिगमनाविरहादनिर्णयप्रसक्तेः ॥ वस्तुतस्तु नारदीयविरोधाच्छतपथश्रुतियाज्ञवल्क्यविरोधाच्च तद्वचसां प्रक्षिप्तत्वं त्वयैव स्वीकृतमिति विराधवहनन्यायावतारः ॥ युक्तं चैतत् लिंगार्चनचंद्रिकायां तत्रशैवानिशैवंचेत्यादिना दशानां शैवत्वमुक्त्वा दशशैवपुराणानिसात्विकानिविदुर्बुधा इति शैवानां सात्विकत्वं कथ्यते ॥ एकस्यैव परब्रह्मणो लीलावताराणां ब्रह्मविष्णुमहेश्वराणामैश्वर्यतस्तौल्येपि शिवस्य तमोगुणोपाधिकतायाः (प्रपाठक ५ मंत्र २) "अथयोहखलुवावास्यतामसोंऽशोऽसौसब्रह्मचारिणोयोऽयंरुद्रोथयोहखलुवावास्यराजसोंशोऽसौसब्रह्मचारिणोयोयंब्रह्माथयोहखलु वावास्यसात्विकोंऽशोऽसौसब्रह्मचारिणोयोऽयंविष्णुः" इति मैत्रायण्यादिश्रुतिभ्यः सत्वंरजस्तमइतिप्रकृतेर्गुणास्तैरितिश्रीभागवतादिपुराणेभ्यश्च सिद्धतया शैवेषु सात्विकतायाव-कुसुमशक्यत्वेन सुगमं तत्राभद्रकल्पितत्वं निष्पक्षधियाम् ॥ नापि पाद्मवत्पण्णां पण्णां विभागसौकर्यं दृश्यते ॥ नापि तत्तत्पुराणपर्यालोचने भगवद्गीताद्युक्तसात्विकादिविषयाणां तत्र तत्र पाद्मोक्तेष्विव बाहुल्यं दृश्यते ॥ किंच पुराणांतराणां तत्तद्गुणांतरसेव्यत्वकथनमपि नारदीयादिसंदर्भेभ्यः सुतरां विरुद्धम् ॥ हेमाद्रिमाधवादिप्रामाणिकनिबंधेषु ब्राह्मणादिनिर्णयस्थले बहूनामेव पाद्मादिवचसामुपन्यासोपि भ्रमप्रमादादिमूलकतामापद्येत ॥ तस्मात्तदेव प्रक्षिप्तमिति युक्तम् ॥ नचास्माकमीदृशविषये निर्बंधः ॥ तवेव विद्वेषकलुषहृदयत्वस्याभावात ॥ एवं पाद्मस्थवचसामप्रक्षिप्तत्वनिश्चये विज्ञानेंद्रभिक्ष्वादिधृतवचसामपि सिद्धं साकरत्वम् ॥ एतच्च प्रागेव दृढीकृतम् ॥ प्रधानकारणवादादीनामप्रामाण्यमपि ततएव सम्यगवबुध्यते ॥ सूत्राणामतिसंक्षिप्तत्वेन अनेकैरनेकधा व्याख्यातत्वेन च तादृशवादादिकं व्यासानभिमतमेव तादृशसूत्राणां च प्रधानकारणवादादिखंडनपरत्वमेवेति व्यासतात्पर्यस्य पाद्मसंदर्भतः सुखेननिश्चयसिद्धेः ॥ महर्षीणामपि तादृशवेदविरुद्धवादप्रवर्तने कारणं तु ततएव निश्चीयते नतु सूत्रेभ्यः ॥ नापि पाद्मवचसां पुराणनिंदायां तात्पर्यम् ॥ एतच्चेसर्वमाख्यातंप्रसंगाच्चशुभदर्शने इत्युपसंहारवाक्ये स्मृतिपुराणानां सात्विकादिविभागवर्णनस्याप्रासंगिकत्वकथनात् ॥ शृणुदेवीतिवाक्यं तु तामसशास्त्रपरमेवेत्युक्तंप्राक् ॥ सामान्यतः पुराणानां

सर्वेषां श्रुतिसंमतत्वमस्मदभिप्रेतमेवतैत्तिरीयब्राह्मणेकांड ३ (प्रपा० १२ अनु० ९) काठकचयनमंत्रेषु "ऋचोयजूंषिसामानिअथर्वांगिरसश्चये ॥ सर्वास्ताः" इतिचतुरोवेदानुक्त्वा "इतिहासपुराणंचसर्पदेवजनाश्चये ॥ सर्वास्ता" इतीतिहासपुराणयोः पृथग्ग्रहणात् ॥ सायणमाधवीयभाष्येपि अत्रेतिहासपुराणशब्दयोर्भारतादिब्राह्मादिपरतया व्याख्यातत्वात् ॥ छांदोग्ये भूमविद्यायां "सहोवाचऋग्वेदंभगवोध्येमियजुर्वेदँसामवेदमाथर्वणंचतुर्थमितिहासपुराणंपंचमंवेदानांवेदंपित्र्यँराशिंदैवंनिधिम्" इत्यादि पठ्यते ॥ शतपथब्राह्मणेपि चतुर्दशकाण्डेमैत्रेयीब्राह्मणे खंड १० "सयथार्द्रैधाग्नेरभ्याहितात्पृथग्धूमाविनिश्चरन्त्येवंवा अरेऽस्यमहतोभूतस्यनिश्वसितमेतद्यदृग्वेदोयजुर्वेदः सामवेदोथर्वांगिरसइतिहासः पुराणंविद्याउपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानिव्याख्यानान्यस्यैवैतानिसर्वाणिनिश्वसितानि" इत्याम्नायते ॥ ब्रह्मयज्ञप्रकरणेपि तैत्तिरीयशतपथादिषु तत्पठ्यतइति किंबहुना ॥ यत्तु निश्वसितश्रुतौ बहुतरोऽपपाठउपन्यस्तः सतु श्रुतीनामपि गुरुसन्निधावध्ययनाऽभावात्पुस्तकप्रत्ययाधीतत्वात् ॥ उक्तंहि ॥ पुस्तकप्रत्ययाधीतंनाधीतंगुरुसन्निधौ ॥ शोभतेनसभामध्येजारगर्भइवस्त्रियाइति ॥ यत्तु सामान्यतः पुराणानां ब्रह्मनिश्वसितत्वनिरूपकत्वमस्याः श्रुतेस्त्वयोक्तं तत्तु शंकराचार्यविरोधात्त्वदुक्तरीत्या तवैव शशस्त्वापादकम् ॥ शंकराचार्यास्त्वत्रैवोपनिषद्भाष्ये "यहग्वेदोयजुर्वेदः सामवेदोऽथर्वांगिरसश्चतुर्विधंमन्त्रजातंइतिहासइत्युर्वशीपुरूरवसोः संवादादिरुर्वशीहाप्सरसइत्यादिब्राह्मणमेवपुराणमसद्वाइदमग्रआसीदित्यादि" इत्यादिना "एवमष्टविधंब्राह्मणम् ॥ एवंमंत्रब्राह्मणयोरेवग्रहणंनियतरचनावतोविद्यमानस्यैववेदस्याभिव्यक्तिः ॥ पुरुषनिश्वासवत्" इतिव्याचक्षाणाः श्रुतावितिहासाद्यष्टशब्दैर्ब्राह्मणभागविशेषानेव गृह्णंति नतुमहाभारतादिब्राह्मादिसंदर्भान् ॥ अत शंकराचार्यविरोधः स्पष्टएव ॥

अग्रेच सहस्रेक्षण इन्द्रस्तत्सादृश्यं त्वस्य सयुक्तिकवेदान्तवाक्यरूपमेघैःशुद्धाद्वैतमार्तण्डस्यतिरस्कारेणेत्युक्तंतदपिनशोभते ॥ वेदान्तवाक्यैरद्वैतमार्तण्डस्यप्रकाशएव भवति ननु तिरस्कारोऽन्यथासर्वेषामाचार्याणामद्वैतप्रकाशनार्थं वेदान्तवाक्यप्रदर्शनंविपरीतफलमेवस्यात् ॥ भवतिचतामसाऽसुरविनिर्मितकुयुक्तिमायामेघैरद्वैतमार्तण्डस्यलोकबुध्याऽऽच्छादनद्वारातिरोभावइव ॥ तदुक्तम् ॥ घनच्छन्नदृष्टिर्घनच्छन्नमर्कंयथालोकतेनिष्प्रभंचातिमूढइति ॥ तादृशकुयुक्तिमेघस्य सयुक्तिकवेदान्तवाक्यमहावायुना निवारणेशुद्धाद्वैतमार्तण्डस्य प्रकाशोभवति अतएवास्यास्मन्निर्मितस्यग्रन्थस्य प्रभञ्जनो महावायुस्तत्सादृश्यात् प्राभञ्जनइत्याख्या

सहस्राक्षे ॥ *सहस्रेक्षण इंद्रइत्यादि स्मृत्याचमंगलमित्यंतंभागंकृपयंति ॥ अग्रेचसहस्रेक्षणइत्यादिना इत्याख्येत्यंतेन ॥ परेण तिरस्कारशब्दोऽनादराच्छादनोभयार्थतया प्रयुक्तः ॥ परीभावस्तिरस्क्रियेत्यमरोक्तेस्तिरस्करिणीत्यादिप्रयोगाच्चोभयार्थकत्वम् ॥ तत्र मार्तंडेनादरस्तु कैश्चिदेकदेशीयभिन्नानां नैव संभवति ॥ अथाच्छादनमपि मद्वैतमार्तंडस्य वेदांतवाक्यैर्न संभवति ॥ सर्वेषां वेदान्तानामद्वैतएव तात्पर्यस्योभयवादिसंमतत्वात् ॥ बृहदारण्यके "यत्रहिद्वैतमिवभवतितदितरइतरंपश्यति" इत्याद्युक्त्वा "यत्रत्वस्यसर्वमात्मैवाभूत्तत्केनकंपश्येत्" इत्यादिना तत्प्रतिषेधात् ॥ "ब्रह्मतंपरादाद्योन्यत्रात्मनो ब्रह्मवेद" इत्यादिश्रवणात्तैत्तिरीये "यदाह्येवैषएतस्मिन्नुदरमंतरंकुरुते ॥ अथतस्यभयं भवति" इति द्वैतदर्शिनोभयश्रवणाच्चेत्यलम् ॥ ननु शुद्धाद्वैतमार्तंडस्यैव तिरस्कारोनत्वद्वैतमार्तंडस्येतिचेच्छुद्धपदेन किंचिद्व्यावर्त्यते न वा ॥ द्वितीये दोषस्तद्वस्थः ॥ आद्ये किं तद्व्यावर्त्यम् ॥ नहि त्वन्मतेऽतिरस्करणीयमशुद्धमद्वैतमन्यत्प्रसिद्धमस्ति ॥ परोक्तमनूद्य दूष्यत इतिचेत् अस्माभिरपि परेषामभिमतं व्यवच्छेत्तुं शुद्धपदं निवेशितमित्यग्रे वक्ष्यामः ॥ वस्तुतस्तु मायासंबंधरहितस्य शुद्धस्यैवाद्वैतस्य सर्ववेदांतसंमतत्वात्तस्य तैर्न तिरस्कारःकिंतु मायावादमेघैरेव ॥ सोपि लोकदृष्टीनां तिरस्कारो भास्वते उपचर्यते ॥ अत्र तदीयाचार्यपरंपरास्थहस्तामलकाचार्यसंमतिमाहुः ॥ घनच्छन्नेति ॥(तत्कृतस्तोत्रे श्लो० १३) अस्योत्तरार्धं तु तथाबद्धवद्भातियोमूढदृष्टेःसनित्योपलब्धिस्वरूपोहमात्मा ॥ इत्यस्ति ॥ तत्प्रयोजनाभावान्मूले नालेखि ॥ प्रकाशोभवतीति । घनोयथार्कप्रभवोविदीर्यंते चक्षुःस्वरूपं प्रतिपद्यते तदा ॥ तथाह्यहंकारउपाधिरात्मनोजिज्ञासयानश्यतितर्ह्यनुस्मरेदित्यादिभिर्द्वादशस्कंधादिवाक्यैरितिभावः ॥ मेघविस्तारे खंडिते च तत‍उद्भाविभंगयंतरवज्रमपि स्वतोदूरापास्तं भवति ॥ यत्त्वसौ सहस्राक्षइति विष्णुसादृश्यारोपविषयोग्रंथोन खंडमार्हं इतिकश्चित् ॥ तदाहोपुरुषिकामात्रम् ॥ ग्रंथे तेनेंद्रसादृश्यस्यैवांगीकारात् ॥ इह ग्रंथांते च तथैव वर्णनात् ॥ आवृत्त्या वाक्यभेदेन कृतेन विष्णुप्रार्थनरूपाऽर्थांतरवर्णनेन ग्रंथे विष्णुसादृश्यारोपस्यानापत्तेः ॥ यदि च सादृश्यमारोपितं भवेत्तदापि प्रत्यवस्थानमदुष्टम् ॥ अन्यथाऽऽस्माकीनग्रंथेपि शंकररूपतया अंते वर्णयिष्यमाणतया शैवस्मार्तैरपि न प्रत्यवस्थातव्यम् ॥ प्रकृते त्वारोपस्याप्यभावः ॥ मेघविस्तारेण मार्तण्डमाच्छादयन्नपि भगवत्साक्षात्कारिमंडनं चिचूर्णयिषन्नपि सहस्राक्षः श्रीगोवर्धनधरचरणैकशरणैः शक्यस्तृणमिव लंघयितुम् ॥ अत्र तत्कृतं विष्णुप्रार्थनमपि

---

* सहस्रेक्षण इन्द्रस्तत्सादृशं त्वस्य ग्रन्थस्य सयुक्तिकवेदान्तवाक्यरूपमेघैः शुद्धाऽद्वैतमार्तण्डस्य तिरस्कारेण तादृशमेघोद्भूतभक्त्यन्तररूपवज्रेण विद्वन्मण्डनस्य चूर्णीकरणेन चेति ग्रन्थान्ते वक्ष्यते ॥ किञ्च सहस्रेक्षणोविष्णुः सहस्राक्षः सहस्रपादितिश्रुतेः समया तदर्थज्ञाप्यइमे नरारक्ष्यन्तामिति प्रार्थ्यः इति वाक्यान्तरकल्पनयाऽऽवृत्त्यादिनाऽर्थइति विष्णोः स्मृत्याच मङ्गलम् ॥ १ ॥ ४ ॥

श्लोकव्यामोहायैव ॥ शैवसुधाकरेऽग्र च तस्मिन्विष्णुद्वेषितायानिश्चयात् ॥ तथाचायं प्रथमश्लोकखंडनस्य निष्कर्षः ॥ श्रीमद्वैष्णवाचार्यास्तदनुयायिनश्च न शाताः किंतु भवभंगादिभूयोभावुकभावकभक्तिमार्गस्य भगवदाज्ञया देवोद्धारार्थं प्रवर्तकास्तत्रप्रवृत्ताश्च ॥ श्रीशंकराचार्या अपिसाक्षाच्छिवावताराः स्वयं परमतत्त्वज्ञानपरमभक्तिशालिनस्तत्कृततत्तत्स्तोत्राद्यालोचनेन निश्चीयमानतथाभावाश्च ॥ तेषामवतारादिकमपि तादृशभगवदाज्ञानुरोधादेव ॥ वादाश्च सर्वे प्रायोऽनादिसिद्धाः ॥ ब्रह्मसूत्रादिषु पुराणेषु च तत्तद्वादानुवादखंडनमंडनादिदर्शनात् ॥ वेदेपि छांदोग्ये (अध्याय ८ खंड २) "सदेवसौम्येदमग्रआसीदेकमेवाऽद्वितीयं ॥ तद्धैकआहुरसदेवेदमग्रऽआसीदेकमेवाद्वितीयंतस्मादसतःसज्जायत ॥ कुतस्तुखलुसोम्यैवं स्यादितिहोवाचकथमसतःसज्जायेतेतिसत्त्वेवसोम्येदमग्रआसीदेकमेवाद्वितीयम्" इत्यादौ तथाश्रवणाच्च ॥ अतोभगवतोनुग्रहावतीर्णैस्तैस्तैर्दिव्यैराचार्यैस्तस्य श्रीडेच्छानुरोधेन तस्मिंस्तस्मिन्नवसरे तत्तत्प्रयोजनसिद्धयेस संवादः प्रकाश्यतइति सर्वमविरुद्धम् ॥

इति सहस्राक्षस्यप्रथमश्लोकस्यखंडनम्

अग्रेच नानात्वेपि चेत्यारभ्यसंक्षेप इत्यन्तेन शुद्धाद्वैतपदार्थनिर्वचनखण्डनम् ॥ तत्प्रकारश्च (तत्रतावच्छुद्धाद्वैतमार्तण्डोक्तः शुद्धाद्वैतपदार्थोसंगत) इत्युपक्रम्य प्रदर्शितः "भेदज्ञानाभावे" इत्यस्य (भेदज्ञानाभावः) इति पाठः प्रकल्पितः

अथसहस्राक्षे नानात्वेपिचेतिद्वितीयंश्लोकं ननु गौतमादीत्यादिना तवेष्टसिद्धिरितिसंक्षेप इत्यंतेन व्याख्यानेन सहितं दूषयितुं सारार्थकथनमुखेन गृह्णंति ॥ अग्रेचनानेति ॥ खंडनमिति ॥ तेन कृतमस्तीति शेषः ॥ अत्र सहस्राक्षे *नानात्वेपिचेत्यादिः प्रायेणेत्युपक्रमित्यंतोभाग शुद्धविधवाविविधवादसगंधत्वादुपेक्षितोमूले ॥ अथापि तत्र तथात्वस्फुटीकाराय

---

* नानात्वेऽपिच शास्त्रविप्रवचसा जिज्ञासया कस्य चिच्छुद्धाद्वैतनिरूपणं प्रथमतः सखण्ड्यतेऽत्राऽपितु ॥ शुद्धाद्वैतमतोष्णरश्मिरवरे प्रायेण टीकायुतोभागेऽन्यत्र तथैव वाह्नभिकृत विन्मडन खण्ड्यते ॥ २ ॥ ननु गौतमादिशास्त्रविप्रवचारि शुद्धाऽद्वैतविशिष्टाद्वैतद्वैतभेदाऽभेदतदवान्तरभेदैर्विभिन्नानां मिथ्याज्ञानानां प्रलापरूपाणि नानोपलभ्यन्ते तथाच कथं मतान्तराणि विहाय शुद्धाऽद्वैतमतमेव खण्ड्यते इत्यतआह ॥ नानात्वेऽपीति ॥ कस्यचित् भावनगरवासिनोनागरस्य सतोपरामशर्मणः जिज्ञासया खण्डनज्ञानेच्छया अत्रापि शुद्धाऽद्वैतमतखण्डनेऽपि अवरे पूर्वभागे टीकायुत सटीकः शुद्धाद्वैतमतोष्णरश्मिः शुद्धाऽद्वैतमार्तण्ड कस्यचिज्जिज्ञासयेतीहापि सवध्यते प्रायेण बाहुल्येन खण्ड्यते ॥ अन्यत्र उत्तरभागे

किंचिद्ब्रूमः ॥ तत्र श्लोके चतुःप्रभृतिनिरर्थकपदबाहुल्यं द्रष्टव्यम् ॥ व्याख्याने शुद्धाद्वैतेत्यादिना श्रीविष्णुस्वामिरामानुजमध्वनिम्बार्कसिद्धान्तानां मिथ्याज्ञानत्वं तन्निरूपणस्य प्रलापरूपत्वं तत्प्रवर्तकानां चतुर्णामाचार्याणां गौतमादिवदसत्त्वं चाऽपाणिपिहितमेवाभाणि ॥ तत्तु प्रागेव पाद्मादिवचोभिर्निराकृतम् ॥ रामानुजानां सरणीरमातो गौरीपतेर्विष्णुमतानुगानाम् ॥ निम्बार्कगानां सनकादितश्च माध्वानुगानां परमेष्ठितश्चेत्यादौ तेषां प्रसिद्धत्वाच्च ॥ अतो हरिभक्तप्रद्वेषालिंगात्स्वस्मिन्नासुरभावनिश्चायनायेदम् ॥ खण्डनज्ञानेच्छयेत्यत्र खण्डनकर्मभावविषयिणी बुभुत्सा वक्तव्या ॥ खण्डनमिति ज्ञानस्य खण्डनशब्दमात्रेणापि संभवात् ॥ ज्ञानेच्छयाजीवान्तरसमवेततया खण्डनव्यापारस्य च स्वसमवेततया हेतुकार्ययोर्वैयधिकरण्यम् ॥ (अत्रापिशुद्धाद्वैतमतखंडनेपि,) इति व्याख्यानमपि न मनोरमम् ॥ संखण्ड्यतइति पूर्वमुक्तायां खण्डनक्रियायां पूर्वोत्तरभागयोरभावात् ॥ तद्बोधकग्रंथएव तयोः सत्वात् ॥ शुद्धाद्वैतमतस्य खण्डनं यत्रेति व्यधिकरणबहुव्रीह्याश्रयणेनग्रन्थपरत्वकल्पने तु मूलश्लोकविरोधः ॥ श्लोके संखण्ड्यत इति पदसमभिव्याहृतेन अत्रेतिपदेन खण्डनक्रियायाएव परामर्शस्य शीघ्रोपस्थितिकतया तत्परामर्शस्यायोगात् । पूर्वार्थकतयाऽवरशब्दस्य प्रयोगस्तु प्रमादात् ॥ अन्यथा ब्राह्मणज्येष्ठभ्रातृप्रभृतयोऽवरवर्णावरजन्मादिशब्दैर्व्यवह्रियेरन् ॥ व्यवह्रियन्ते तु शूद्रकनीयःप्रभृतयः ॥ उपेंद्रइंद्रावरजइत्यादौ चेंद्रस्य पूर्वजइत्यादिरर्थमापद्येत ॥ ग्रंथकारप्रयुक्तं मार्तंडपदं विहाय स्वयमुष्णरश्मिपदमुपादाय तादृशपदतोपि लभ्यं जाड्यनिवर्तकत्वादिकं परिहाय ग्रन्थनिन्दायाः करणं तु जलौकः स्वभावादेव ॥ यथोक्तम् दुग्धंविहायरुधिरंपिबतिजलौकाःस्तनेपुसल्लग्नाइति ॥ परैरपि सहस्राक्षशब्दं विहाय मार्तंडद्वेषितया कौशिकशब्दो वा गौतमस्त्रीजारशब्दोवा विश्वरूपादिब्रह्महशब्दोवा शक्येत ग्रहीतुं यदि तुभ्यमिवाशिष्टालापएव तेभ्यो रोचेत ॥ असन्मतग्रन्थे मार्तंडत्वारोपतात्पर्यं तु सूर्योदयेशीतमपैतिसर्वमार्गावलोकोजलजप्रकाशः ॥ तमोनिवृत्तिर्द्विजकर्मवृत्तिस्तथैवमार्तण्डनिबन्धबोधेइति तत्समाप्तिश्लोकाज्ज्ञेयम् ॥ सद्ग्रंथेषु मोहकत्वारोपस्तु प्रागेव मनोरथमात्रविषयतां नीतः ॥ वल्लभशब्दस्य नानार्थकोशेष्वित्यादिभंगवद्रूपेषु महानुभावेषु साक्षाद्गालिप्रयोगस्तु नजारजातस्यललाटशृंगंकुल-

---

तथैव सटीकं प्रायेणच विन्मण्डनं विद्वन्मण्डनम् ॥ मार्तण्डशब्दं विहायोष्णरश्मिशब्दोपादानमुक्तरीत्या मोहकत्वेन तन्मताऽऽश्रयिणा सतापएव फलमिति बोधनाय ॥ वल्लभशब्दस्य नानार्थकोशेषु अश्वाऽध्यक्षादिवाचित्वकथनात्तदपत्यस्याऽपि तद्वत्साधारणजनतायास्तत्कृतग्रन्थस्यान्धेषु काणोराजेतिन्यायेन तादृशेषु ये विद्वांसस्तन्मण्डनतायाश्च बोधनाय वाल्लभिकृतमिति विन्मण्डनस्यविशेषणं दत्तम् ॥ अस्मिन्ग्रन्थे क्वचित्सटीकैतद्ग्रन्थद्वयस्योक्तिभ्योऽन्या उक्तयोऽपि खण्डिताः क्वचित्तु नैयायिकादिमतदूषणपरास्संरम्भेण प्रवृत्त्या प्रपद्यमानपराश्च तदुक्तयः प्रयोजनाऽभावादुपेक्षया नखण्डिता इति आधिक्यन्यूनतयोः परिहाराय प्रायेणेत्युक्तम् ॥ ५ ॥

प्रसूतस्यनपाणिपश्चम् ॥ यदायदामुञ्चतिवाक्यचाणंतदा तदानस्यकुलप्रमाणमित्यभियुक्तोक्तिं स्मारयत्येव ॥ यदि त्वादृशः कश्चिदशिष्टस्त्वां प्रत्यवास्थास्यत तर्हि त्वदीयप्रथमश्लोकखण्डनावसरएव मलहृच्छब्दस्य चाण्डालाद्यर्थकतामादाय त्वदनुरूपं त्वां प्रत्यवक्ष्यत् ॥ अस्माकं तु गिरं निरंतरं निजनामभिर्निर्मलनीयां कदाचिदपि महानुभावेषु मा दुर्वादप्रादुर्भावभाजं बीभवद्भगवान् ॥ यच्चवल्लभशब्दस्याश्वपालार्थकताज्ञापनं तत्तु धौर्त्याद्यामोहनमेव ॥ हैमानेकार्थहैमनाममालाहलायुधहारावलीविश्ववररुचिधरणिधनंजयद्विविधद्विरूपमहीपमेदिन्यमरत्रिकांडशेषहरदत्तीयनाममालानेकार्थध्वनिमञ्जरीप्रभृतिष्विदानीमुपलभ्यमानेषु कोशेषु तस्य तदर्थकतायाअनुपलंभात् ॥ अतएव न तेन कोशवचनमुदाहारि ॥ नापि कोशनाम निरदेशि ॥ मेदिन्यादौ सल्लक्षणतुरंगमादिवाचितावर्णनेपि नाममात्रेण साम्यं न दोषाय ॥ अथहरिर्दिवाकरसमीरयोः ॥ यमवासवसिंहांशुशशाङ्कपियाजिषु ॥ पिङ्गवर्णेहरिद्वर्णेभेकोपेन्द्रशुकाहिषु ॥ लोकान्तरेचेति हैमोक्त्या हरिशब्दस्य वानरभेकाद्यर्थकत्वेपि हरिर्हरतिपापानि इत्येनमद्युक्त्वा मुच्यतेसर्वपातकादित्यादौ नकोपिशिष्टोवानरादिपरतामाद्रियते नापि हरिश्रितादेशा हरिपुत्रोजयंतइत्यादौ ॥ एतेन तस्या एतेन तस्यात्मविद्वत्तानुरूपं प्रलापान्तरमप्यतास्तम् ॥ शुद्धाद्वैतमार्तण्डे नत्प्रकाशे च मायावादोच्छेदपरस्तद्विरुद्धसिद्धांतप्रतिपादकोपिबहुतरोभागः खंडनयुक्त्यस्फूर्त्या न दूषितः ॥ विद्वन्मंडने तद्विवरणे चानेकत्र पूर्वपक्षेषु सूचितायुक्तयः सिद्धांततया सहस्राक्षउपन्यस्ताः ॥ एतच्चान्यमाच्छादयितुं श्लोके प्रायेणेत्युक्त्वा धार्ष्ट्यादितरथा व्याख्यातम् ॥ तत्र सप्रकाशस्य मार्तण्डस्याङ्कनादिना सति सौलभ्ये स्वयमेव तद्बोत्स्यते सर्वैः संख्यावद्भिः ॥ मूलविद्वन्मंडनं तु तेनानूदितत्वात्सकलमिहपृथगनुवदिष्यतइति करकंकणपरीक्षणक्षणे न दर्पणमर्पणीयम् ॥ तद्विवरणस्यापि विलोकने वर्णितच्चरं व्यक्तमेव वेत्स्यन्ति विद्वांसः ॥ इतः परं ग्रन्थस्य पूर्वार्धे सप्रकाशः शुद्धाद्वैतमार्तण्डः समर्थ्यते ॥ मार्तण्डमंडलाऽखण्डमण्डनाः खण्डयन्त्यथ ॥ वितण्डोद्दण्डपाषण्डपण्डिताऽकाण्डताण्डवम् ॥ १ ॥ सहस्राक्षे *तत्रतावच्छुद्धाद्वैतेत्यादि इष्टसिद्धिरितिसंक्षेप

*तत्रतावच्छुद्धाऽद्वैतमार्तण्डोक्तः शुद्धाऽद्वैतपदार्थोऽसगतः ॥ तथाहि द्विधा ज्ञानं तु यत्तस्याज्ञामरूपात्मना मुहुः ॥ ईशजीवात्मनावाऽपि कार्यकारणतोऽथवा ॥ द्वीतं तदेव द्वैतं स्याददैतं तु ततोऽन्यथा इति शुद्धाद्वैतपदार्थउक्तः ॥ तट्टीकाकृता तु ये गत्यर्थकास्ते ज्ञानार्थकाइति न्यायेन गत्यर्थकादिणधातोर्भावेक्ते इतमितिसिद्धौ द्विधा इतं द्वीत तस्मात्स्वार्थेऽणि द्वैतमिति निष्पन्नम् ॥ तस्य च द्विप्रकारकं ज्ञानमित्यर्थः ॥ अन्यथा भेदज्ञानाऽभावोनद्वैतम् अद्वैतमिति व्याख्यातम् ॥ अग्रे एतन्मते सुनिष्पन्नं साकर्यं क्षयकारणम् ॥ तन्निवृत्त्यर्थमाचार्यैः पदं शुद्धं विशेषितम् ॥ शुद्धाऽद्वैतपदे ज्ञेयः समासः कर्मधारयः ॥ अद्वैतं शुद्धयोः प्राहुः षष्ठी तत्पुरुषं बुधाः ॥ मायासंबन्धरहित शुद्धमित्युच्यते बुधैः ॥ कार्यकारणरूपंहि शुद्धं ब्रह्मनमा-

इत्यन्तं भागमर्थतोऽनूद्य दूषयन्ति ॥ तत्प्रकारश्चेत्यादिनाविनिर्णयइतिसंक्षेपइत्यन्तेन ॥ प्रकल्पितइति ॥ मार्तण्डटीकायां अद्वैतंतुततोन्यथेत्यस्य व्याख्याने प्रकल्पितः ॥ तेन चास्त्वेव सप्तम्यंतपाठे तु तदुक्ता सर्वाप्यनुपपत्तिर्मृगतृष्णातोयावगाहनकल्पैवेति वक्ष्यामः ॥ एवं "सांकर्यं कार्यकारणे" इत्यत्र सांकर्यं क्षयकारणमिति पाठः प्रकल्पितः ॥ तादृशपूर्वोक्तपाठसत्वादेव कार्यं च कारणं चेत्यनयोः समाहारमभिप्रेत्य तट्टीकायां "अविद्यावच्छिन्नंचैतन्यं कार्यम् ॥ मायावच्छिन्नंचैतन्यंकारणमितिसांकर्यम्" इति व्याख्यातम् ॥ तथा "द्विधाज्ञानंतुयद्यत्स्यात्" इत्यादौ यत्तत्स्यादित्यादीनि तत्कृतपाठान्तराणि विशेषतः प्रयोजनाभावान्न चिन्त्यन्ते ॥ द्विधाज्ञानमित्यस्य टीकायां कृतं नामरूपमायिकत्वस्य खण्डनादिकं तु स्वमतोपमर्दकत्वान्नानूदितम् ॥ अथ सप्तम्यन्तपाठे तु न काप्यनुपपत्तिः ॥ तथाहि ॥ द्वैतंहि द्विप्रकारकं ज्ञानम् ॥ इतमितिभावेक्तस्याङ्गीकारात् ॥ प्रज्ञादेराकृतिगणत्वादणि पूर्वाऽर्थनिपातात् ॥ अद्वैतमिति तु पर्युदासोलाघवात् ॥ एवं चाब्राह्मणादिशब्दैर्ब्राह्मणादिभिन्नतत्सदृशइवाद्वैतशब्देन द्वित्वप्रकारकज्ञानभिन्नं ज्ञानत्वेन तत्सदृशमेकत्वप्रकारकज्ञानमभिधीयते ॥ पर्युदासस्थले "नञिवयुक्तमन्यसदृशाऽधिकरणेतथाह्यर्थगतिः" इत्यङ्गीकारात् ॥ तथा च (अ० ३ पा० १ सूत्र० १२) "भृशादिभ्योभुव्यच्वेर्लोपश्चहलः" इत्यत्र महाभाष्यम् "यथान्यासमेवास्तु ॥ ननुचोक्तमिहकस्मान्नभवति ॥ क्वदिवाभृशाभवन्तीति ॥ नञियुक्तमन्यसदृशाधिकरणेतथाह्यर्थगतिः ॥ नञ्युक्तमिवयुक्तंवायत्किञ्चिदिहदृश्यते ॥ ततःअन्यस्मिंस्तत्सदृशेकार्यंविज्ञायतेतथाह्यर्थोगम्यते ॥ अब्राह्मणमानयेत्युक्तेब्राह्मणसदृशएवानीयते नासौलोष्टमानीयकृतीभवति ॥ एवमिहाप्यच्वेरितिप्रतिषेधादन्यस्मिन्नच्व्यंतेच्विसदृशे कार्यंविज्ञायते ॥ किञ्चाऽन्यदतोऽच्व्यन्तंच्विसदृशम् ॥ अभूततद्भावः" इति ॥ अत्र "यथान्यासमेवास्तु ॥ अच्वेरितिपर्युदासाश्रयणे दोषद्वयस्यापिपरिहारइत्यर्थः" इति कैयटः ॥ एवं (अ० १ पा० १ सूत्र ४३) सुडनपुंसकस्येत्यत्रापि कुण्डानितिष्ठन्ति वनानितिष्ठन्तीत्यादौ जसि संज्ञार्थं पूर्वं पर्युदासाऽऽश्रयणात्तत्सदृशयोः स्त्रीपुंसयोरेव प्रवृत्तिः साधिता भाष्यकृता "नायं प्रसज्यप्रतिषेधो नपुंसकस्यनेति ॥ किं तर्हि ॥ पर्युदासोऽयं यदन्यन्नपुंसकादिति ॥ नपुंसके न व्यापारः" इति ॥ अथ च विरोधोत्र नञर्थः ॥ अविद्येत्यादिवत् ॥ उक्तंचयोगभाष्ये साधनपादे (सूत्र ५) "अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या" इति सूत्रं व्याचक्षाणैर्व्यासपादैः तस्याश्चामित्रागोष्पदवद्वस्तुसतत्वं विज्ञेयंयथानामित्रोमित्राभावोन मित्रमात्रंकिन्तुतद्विरुद्धःसपत्नः ॥ यथावा-

---

यिकम् ॥ इत्युक्तम् ॥ एतदपि तट्टीकाकृता एतन्मते शङ्कराचार्यमते अविद्याऽवच्छिन्नचैतन्यं कार्यं मायाऽवच्छिन्नचैतन्यं कारणमिति साङ्कर्यम् ॥ तन्निवृत्त्यर्थं साङ्कर्यनिवृत्त्यर्थं कर्मधारय इति ॥ शुद्धं च तदद्वैतमिति विग्रहः ॥ नचाऽद्वैते सति साङ्कर्याऽभावः स्पष्टएवेति शुद्धपदमपार्थकमितिवाच्यम् ॥ परेषां मते पूर्वं साङ्कर्यं ततोऽद्वैतं मन्मते तु सदैव शुद्धत्वमिति ज्ञेयम् ॥ अतएव स्पष्टतया बोधार्थं षष्ठीतत्पुरुषमाहुरित्यादिना व्याख्यातम् ॥ तन्न युक्तम् ॥ समासद्वयस्याऽप्यसंगतेः ॥

ऽगोष्पदंगोष्पदाभावोनगोष्पदमात्रं किन्तुदेशएवताभ्यामन्यद्वस्त्वन्तरम् ॥ एवमविद्यान-प्रमाणं नप्रमाणाभावः किन्तुविद्याविपरीतं ज्ञानान्तरमविद्येति" इति ॥ भवन्मतस्थाअपि भावरूपाज्ञानमविद्यापदार्थं मन्यन्ते ॥ इत्थ च प्रकृते अभेदाऽवगाहिज्ञानमेवाद्वैत-शब्दार्थः॥ तेन शुद्धपदार्थमायासंबंधरहितकार्यकारणात्मकब्रह्मणोऽभेदसंसर्गेण तत्रान्वयो-नानुपपन्नः॥ "सत्यंज्ञानमनन्तंब्रह्म" इति स्वरूपलक्षणवाक्येन तस्याज्ञानरूपत्वनिश्चयात् ॥ "तदात्मानँ स्वयमकुरुत ॥ एकमेवाद्वितीयम् ॥" इत्यादिश्रुतिशतैकवाक्यतया माया-संबन्धरहितयोरेव कार्यकारणयोरभेदसिद्धेश्च ॥ धर्मधर्मिणोः प्रकाशाश्रयन्यायेनाभेदस्य वक्ष्यमाणतयापि ज्ञानरूपतायाअबाधाच्च ॥ ज्ञानगुणएवेति तु नावयोरभ्युपगमः ॥ तादृशज्ञानं च भेदभ्रमनिवृत्तावेव प्रकाशतइति युक्तमुक्तं "भेदज्ञानाभावे" इति ॥

अत्रशुद्धाद्वैतपदे कर्मधारयःसमासः ॥ संभवतिषष्ठीतत्पुरुषोऽपि ॥ अथकर्मधारयपक्षे शुद्धपदार्थस्य मायासंबंधरहितकार्यकारणात्मक-ब्रह्मणोऽद्वैतपदार्थेन भेदज्ञानाभावेन तादात्म्यस्य बाधादसंगति-रितिचेत्सत्यं नहिनैयायिकवैशेषिकादीनां मतइवास्मन्मतेप्यभावो-तिरिक्तःपदार्थोयेन तत्रकार्यकारणात्मकब्रह्मणस्तादात्म्यस्यबाधः स्यात् किंत्वधिकरणात्मक एव ॥ ब्रह्मनिष्ठस्यभेदज्ञानाभावस्य ब्रह्म-रूपत्वेन कार्यकारणात्मकब्रह्माभिन्नतया कथंतादात्म्यासंगतिः ॥ नचाऽभावस्याधिकरणात्मकत्वे आधाराधेयभावानुपपत्तिरितिवाच्यं न्यायमतेऽभावाधिकरणकाभावस्याधिकरणभिन्नत्वे तद्भेदस्यापि भिन्नत्वेऽनवस्थापत्त्या तादृशाभावस्याधिकरणीभूताभावाभिन्नत्वे-प्याधाराधेयभाववद्भवन्मतेचाविद्याध्वंसस्य ब्रह्माधिकरणकस्य ब्रह्म-स्वरूपत्वेनाभ्युपगमेप्याधाराधेयभाव वदत्रापितत्स्वीकारे विरोधा-भावात् ॥ ननुकार्यकारणयोर्भेदस्यप्रत्यक्षसिद्धत्वाद्ब्रह्मणःकार्यकारणा-त्मकत्वंनसंभवति ॥ किंचतद्भेदज्ञानाभावस्य ब्रह्मणिस्वीकारे ब्रह्म-णोऽल्पज्ञस्यापत्तिरितिचेत्स्यादेवं ॥ यदिब्रह्मणोनिमित्तकारणत्वमेव-स्यात्॥अभ्युपगम्यतेतूपादानकारणत्वमपि॥तत्रचकार्यस्यकारणात्म-त्वंवल्गुवादिसंमतमतोभवत्येवकार्यकारणात्मकत्वं ॥ अल्पज्ञत्वंतु भेदासंभवेनैवापास्तम् ॥ नचब्रह्मणः समवायिकारणत्वेमानाभाव इतिवाच्यम् ॥ "प्रकृतिश्चप्रतिज्ञादृष्टान्तानुपरोधा" दितिसूत्रस्य "यथासोम्यैकेनमृत्पिण्डेनसर्वंमृण्मयं विज्ञातंस्या"दित्यादिश्रुतीनां त्वय्यग्रआसीत्त्वयिमध्यआसीत्त्वय्यन्तआसीदिदमात्मतन्त्रे ॥ त्वमादि-रन्तोजगतोस्यमध्यंघटस्यमृत्स्नेवपरः परस्मादिति भागवतस्यच प्रमा-णत्वात् ॥ नचोपादानकारणत्वेपि तन्तुपटवद्भेदःकुतोनस्यादिति वाच्यं ॥ आरंभवादस्यभाष्येदूषितत्वेन तादृशभेदस्यप्रादुर्भवितुमशक्य-

त्वात् ॥ अत्रतु "सर्वंखल्विदंब्रह्मतज्जलानिति ॥ तदात्मानँस्वयम-
कुरुत ॥ सच्चत्यच्चाऽभवत् ॥ ब्रह्मैवेदममृतंपुरस्ताद्ब्रह्मपश्चाद्ब्रह्म
दक्षिणतश्चोत्तरेण ॥ अधश्चोर्ध्वंचप्रसृतंब्रह्मैवेदंविश्वमिदंवरिष्ठं"
इत्यादिश्रुतिभिःशुद्धस्यैवब्रह्मणः सर्वाऽभिन्नत्वंस्वीक्रियते ॥ नन्व-
विक्रियमाणस्यसमवायित्वं नलोकप्रसिद्धं ॥ प्रकृत्यादीनांविक्रियमाणा-
नामेवसमवायित्वस्यप्रसिद्धत्वात् ॥ लोकविरुद्धकल्पनाचाप्रामाणि-
क्यैवेतिचेन्न ॥ नहिलोकप्रसिद्धमेवयद्यत्तत्तदेवब्रह्मणिकल्पनीयमिति
नियमः ॥ किन्तुवेदप्रतिपाद्यम् ॥ ब्रह्मणोवेदैकसमधिगम्यत्वात् ॥
"तंत्वौपनिषदंपुरुषंपृच्छामी"तिश्रुतेः ॥ लौकिकेतुलोकप्रसिद्धमेव
कल्पनीयम् ॥ यथा पशौलोमवल्लाङ्गूलवत्त्वं ॥ वेदेतुब्रह्मणिविरुद्धधर्म-
वत्त्वंतत्रतत्रप्रतिपाद्यते ॥ यथा "आसीनोदूरंव्रजति शयानोयाति
सर्वतः ॥ अपाणिपादोजवनोग्रहीतापश्यत्यचक्षुःसश्रृणोत्यकर्णः"
इत्यादिश्रुतिभ्यः॥नहिलोकेऽचक्षुषोद्रष्टृत्वमकर्णस्यश्रोतृत्वंवाप्रसिद्धं॥
लोकप्रसिद्धमेवकल्प्यतेचेत्तादृशश्रुतीनामप्रामाण्यंस्यात् ॥ एवंचावि-
कृतस्यैवब्रह्मणोऽलौकिकस्य "तदात्मानँ स्वयमकुरुते"तिवेदप्रति-
पाद्यंमृत्स्नादिवैदिकदृष्टान्तैर्दृढीकृतमुपादानकारणत्वं नदूषणाय ॥
किन्त्वलौकिकत्वसंपादकतयाभूषणायैव भवति नच "मायीसृजत"
इत्यादिवाक्यानुरोधेन"तदाऽऽत्मानँस्वयमकुरुत" इत्यस्यापि माय-
यात्मानमाकाशादि रूपं कृतवानित्येवार्थः ॥ मृदादिदृष्टान्तानां चवा-
चारम्भणं वागालम्बनमित्यादिरीत्याकार्यमिथ्यात्वकारणसत्यत्वपर-
त्वमेवेति वाच्यम् ॥ प्रसिद्धार्थपरित्यागेऽप्रसिद्धार्थकल्पनेच माना-
भावात् ॥ किंच 'तदात्मानंस्वयमकुरुते"त्यत्रमायापदस्याभावेनमा-
ययात्मानमित्याद्यर्थस्य "वाचाऽऽरम्भण" मित्यत्रवागालम्बन-
पदाभावेन तादृशार्थस्यचकर्तुमशक्यत्वाच्च ॥ मायापदेन भगवच्छ-
क्तिरेवाऽभिधीयतइत्यग्रेवक्ष्यते ॥ नन्वेवमपि "वाचारम्भणंविकार"
इतियथाश्रुतपाठे विकारोवाङ्मात्रेणैवारभ्यते नतुवस्तुतइत्येवाऽर्थः
करणीयः ॥ तथाच कार्यस्य मिथ्यात्वमेवेतिचेन्न ॥ एवंसति कस्य
ब्रह्मकारणंभवेत् ॥ नतुत्रैकालिकनिषेधप्रतियोगिनः खपुष्पतुल्यस्य
किञ्चिदपिकारणं भवति ॥ किञ्च ॥ "तदनन्यत्वमारम्भणशब्दा-
दिभ्य" इति सूत्रेकारणानन्यत्वंकार्यस्यव्यासैः प्रतिपादितं विरुध्येत
नहिमिथ्याभूतस्य सत्याऽनन्यत्वं संभवति ॥ कार्यस्यापिसत्यत्वं
कारणस्यापि वा मिथ्यात्वं विनातयोरनन्यत्वमनुपपन्नं ॥ तत्र कार-
णस्य मिथ्यात्वे "सत्यंज्ञानमनन्तंब्रह्मे" त्यादिश्रुतिविरोधः ॥ कार्य-

स्वकारणात्मनासत्यत्वे नकोपिविरोधः प्रत्युत एकविज्ञानेनसर्व-विज्ञानश्रुतिरपिसङ्गच्छते ॥ तस्मात्कारणमिव कार्यमपिसत्यमेव ॥ वाचारम्भणमित्यस्यायमर्थः॥योविकारस्तद्वाचारम्भणम्॥ यदारभ्यते तदारम्भणम्॥ कृत्यल्युटोबहुलमितिल्युट्॥ वागारब्धम्॥ कारणस्य-वनामधेयं कारणमेवहितत्तत्क्रियासिध्यर्थंतेनतेननाम्नाव्यवह्रियतेइति कारणादभिन्नमेवकार्यंनतुस्वेनरूपेण कारणाद्भिन्नम्॥तदाहमृत्तिकेत्ये-वसत्यमिति॥ अतःकारणाभिन्नत्वात्कार्यंसत्यमेवनतुमिथ्या॥मिथ्या-त्वेतु "यतोवाइमानिभूतानिजायन्ते" इत्यादयःश्रुतयःकुप्येरन्॥ नच शुक्त्यादीनांरजतादीन्प्रतीवब्रह्मणोपिजगत्प्रतिकारणत्वस्यवक्तुंशक्य-त्वेनतादृशश्रुतिसङ्गतिरिति वाच्यम्॥ शुक्त्यादौरजतादेरुत्पत्त्यनङ्गी-कारादित्यन्यत्र विस्तरः॥ वस्तुतस्तु भेदज्ञानाभावे इत्येवसर्वपुस्तकेषु पाठः॥ ननु तादृशपाठेद्विप्रकारकज्ञानाऽभावेऽद्वैतंचेद्विप्रकारकज्ञाने द्वैतमेवपरिशिष्यतइति चेन्न॥ कार्यकारणयोर्भेदस्याऽभावात्तज्ज्ञान-मपिवास्तवंनसंभवति कार्यकारणयोर्भेदोयदिस्यात्तदाद्विप्रकारक-ज्ञानमपिवास्तवंस्यात्॥ तद्भेदस्यैवाऽभावेनद्विप्रकारकज्ञानस्याऽभा-वादद्वैतमेवसार्वदिकमित्यत्रतात्पर्यात्॥ अतएवाऽन्यथाइत्यस्य सप्तम्यन्तपदेनव्याख्यातंसर्वत्रदृष्टं सङ्गच्छते॥ अत्रप्रथमान्तपदेन व्याख्याने तदसङ्गतमेवस्यात्॥ व्युत्पत्तिस्तु नविद्यते द्वैतंयस्मि-स्तदद्वैतम्॥ द्विधाज्ञानंतुयद्यस्यानामरूपात्मनामुहुरित्यादे "द्विधा इतंद्वीतंद्विप्रकारक ज्ञानमित्यर्थं" इत्यादेरपि तत्रैवतात्पर्यम्॥ अथवा नद्वैतमद्वैतमित्येवविग्रहः अतएवशुद्धं च तदद्वैतमिति कर्मधारय-समासे शुद्धपदार्थेनाद्वैतपदार्थस्य भेदज्ञानाऽभावस्य तादात्म्या-भाव इतिपूर्वोक्तदोषोदूरादेवनिरस्तः॥ १॥

अथ रामकृष्णभट्टकृतपरिष्काराद्यनुरोधात् भेदज्ञानाभावइति प्रथमान्तपाठमभ्युप-गम्यापि समासद्वय समर्थयितुमुपक्रमन्ते॥ अत्रेति॥ तत्र तावत्कर्मधारयपक्षे सहस्राक्षे *तथाहिस्वसंमततयेत्यादिना तन्मतेऽभावादित्यन्तेन परेणापादितदोषाभासान् अथ कर्मधारयेत्यादिना॥ किञ्चेत्यादिकमसङ्गतमेवेत्यन्तेन॥ उद्धरिष्यन्तः प्रथमं तदुक्तमसङ्गतिदोषं परिहरन्ति॥ दूरादेवनिरस्तइत्यन्तेन॥ प्रभार्थोथ शब्दः॥

---

*तथाहि॥ स्वसम्मततयोपन्यस्ते कर्मधारयपक्षे तावच्छुद्धपदार्थमायासबन्धरहितकार्य-कारणात्मकस्यब्रह्मणोऽद्वैतपदार्थेन भेदज्ञानाभावेनतदात्म्यस्य बाधादसङ्गतिः॥ किञ्च नील-घटादिसमासघटकनीलादिपदैरनीलादिघटस्येव शुद्धाऽद्वैतसमासघटकशुद्धपदेनाऽशुद्धाऽद्वैतस्य व्यावृत्तेर्वाच्यतया तादृशस्य तव मतेऽप्रसिद्धत्वेन व्यावर्त्यालाभ॥ एतेनाऽहंताममतापाशस्य

नैयायिकवैशेषिकादीनामिति ॥ अत्र वैशेषिकग्रहणं (अ० १ आ० १ सू० ४) "धर्मविशेषप्रसूताद्द्रव्यगुणकर्मसामान्यविशेषसमवायानांपदार्थानांसाधर्म्यवैधर्म्याभ्यांतत्त्वज्ञानान्निःश्रेयसम्" इति काणादसूत्रे उपलक्षणविधयाऽभावमपिसङ्गृह्णतां केषांचित्तद्व्याख्यातृणां "अत्रपट्पदार्थकीर्तनं भावाभिप्रायेण वस्तुतोऽभावोपि पदार्थान्तरतयामुनेरभिप्रेतः" इत्यादि वदतांवृत्तिकारादीनामनुरोधेन ॥ वस्तुतस्त्वत्रापि षडेव पदार्थाः सूत्रकाराभिमताइति कणादमतेपि प्रकृते न बाधः ॥ नचप्रथमाध्यायद्वितीयाह्निके (सूत्र १) "कारणाभावात्कार्याभावः" नवमाध्याये (आ० १ सू० १।२) "क्रियागुणव्यपदेशाभावात्" इत्यादीनामसङ्गतिः शङ्क्या ॥ पूर्वोत्तरमीमांसकानामभावपदघटितप्रयोगवन्निषेधमात्रपरतया तदुपपत्तेः ॥ अन्तर्भावस्तु गुणादौ यत्र विधेः कल्प्येत तत्र निषेधस्यापि स्यात् ॥ एतेन "अभावश्चवक्तव्यो निश्रेयसोपयोगित्वाद्भावप्रपञ्चवत्" इत्यादि वदन् न्यायलीलावतीकारः । "एतेचपदार्थाः प्रधानतयोपदिष्टाः अभावस्तुस्वरूपवानपिनोद्दिष्टःप्रतियोगिनिरूपणाधीननिरूपणत्वात् नतुतुच्छत्वात्" इति वदन्तोद्रव्यकिरणावल्यादयोपि सूत्रविरोधादप्रयुक्ताः ॥ परं तेषामपि वैशेषिकपदाभिलप्यत्वात्तद्ग्रहणम् ॥ वैशेषिकसूत्रोपन्यासकारशङ्करमिश्रादयस्तु "अत्रचद्रव्यादिपदार्थानामुद्देशएव विभागःपर्यवसन्नः सचन्यूनाधिकसङ्ख्याव्यवच्छेदफलकत्वेन षडेवपदार्थाइतिनियमःपर्यवस्यति" इति षडेव पदार्थान्मन्यन्ते ॥ मूले आदिपदेन बौद्धभेदाग्राह्याः ॥ वैधर्म्येण दृष्टान्तोयम् ॥ बहुभिः पूर्वोत्तरमीमांसकैर्निर्णीतमभावस्याधिकरणात्मकत्वमभिप्रेत्य समादधते ॥ किन्त्विति ॥ एवञ्च अभावस्याधिकरणात्मकतया ब्रह्मणेच भेदज्ञानस्याभावेन कर्मधारयसमासे च पूर्वोत्तरपदार्थयोरभेदस्य प्रवृत्तिनिमित्तत्वेन प्रकृतेशुद्धपदार्थ-

---

मायाकृतताया अनैव टीकाकृतोक्तत्वेन मायासम्बन्धस्य तन्मतेऽपि संभवात्तद्युक्तएवाऽशुद्धइति सएव व्यावर्त्य इतिपरास्तम् ॥ जीवस्याऽशुद्धत्वेऽप्यद्वैतपदार्थस्य तस्याऽभावात् ॥ मायाया अपि भगवच्छक्तितया ततोऽभिन्नत्वेन न परमतवन्मायासंबन्धः ॥ किञ्चाऽध्यासएव मायिकोनजीवइति तेनैवोक्तत्वेन मायायास्तत्सम्बन्धिनोवाऽशुद्धत्वस्य वक्तुमशक्यत्वाच्च ॥ मायाकार्याऽहंताद्यध्यासस्य कथंचिदशुद्धत्वेऽपि तद्विशिष्टस्य जीवस्य तन्मतेऽशुद्धत्वाऽभावाच्च ॥ तद्व्यावृत्तेस्तदुक्त्यैव तदसमतत्वप्रतीतेश्च ॥ अन्यथाहि द्वैतापत्तिः ॥ सर्वं खल्विदमित्यादि श्रुतिविरोधश्च ॥ एतेन शङ्कराचार्यवदद्वैत न मम समतमिति बोधनमेवेतरनिवृत्तिरिति प्रत्युक्तम् ॥ अन्वयासम्भवव्यावर्त्याऽलाभयोर्दर्शितत्वात् ॥ किञ्चैवमद्वैते शुद्धत्वं विधीयतइत्यायाति एवञ्चैकप्रसरताभङ्गभयादपि नसमासोपपत्तिः ॥ एवञ्च ननु अद्वैतपदस्यतदुक्तार्थत्वे भवत्वन्वयानुपपत्तिर्नास्तिद्वैतं यस्मिन्नित्यर्थकत्वे तु नसेत्यप्यपास्तम् ॥ एकप्रसरताभङ्गप्रसङ्गात् ॥ अशुद्धाऽद्वैताभावेन व्यावर्त्यालाभाच्च ॥ किञ्च शङ्कराचार्यमतेऽद्वैतज्ञानात्पूर्वमपि ब्रह्मणः शुद्धत्वमेव ॥ त्वन्मते स्वाभिन्नाया मायायाः संबन्धोऽस्ति तन्मते तस्या अपि मिथ्यात्वेन सोऽपि नेति तन्मते एव शुद्धाऽद्वैतं स्यात् ॥ एवञ्चैतन्मते इत्याद्यसंमतम् ॥ साङ्कर्यस्य तन्मतेऽभावात् ॥

मायासंबन्धरहितकार्यकारणात्मकब्रह्माभिन्ने अद्वैतपदार्थे द्वित्वप्रकारकज्ञानाभावे तदभिन्नाभिन्नस्य तदभिन्नत्वमितिनियमानुरोधाच्छुद्धपदार्थयोर्भेदस्यापि सत्त्वेन पूर्वोत्तरपदार्थयोरभेदान्वयोनानुपपन्नइति कृष्णसारङ्गोमृगइत्यादिवत्कर्मधारयोनिर्बाधः ॥ अथवा नीलोत्पलमित्यादौ प्रथमं भेदेन गृहीतं नीलत्वोत्पलत्वरूपधर्मद्वयमिव शुद्धत्वाद्वैतत्वरूपधर्मद्वयं लोकदृष्ट्या भिन्नत्वेन कल्पितमादाय तयोर्धर्मयोः सामानाधिकरण्येन शुद्धत्वाद्वैतत्वसमुदायवद्ब्रह्मेति मञ्जूषारीत्या बोधः ॥ ननु घटाभाववद्भूतलं भूतले घटाभावइत्यादौ भूतलादिविशेषणतया तद्विशेष्यतया वा प्रतीयमानोऽभावपदार्थः कथं भूतलादिस्वरूपतया शक्यवचनइति चेदुच्यते ॥ यथा अभावविशिष्टबुद्धिर्विशेषणविशेष्यसंबन्धविषया विशिष्टबुद्धित्वात्, दण्डीपुरुषइति विशिष्टबुद्धिवदित्यनुमाने संयोगादिबाधाद्गुणक्रियादिसमवायवद्भूतलादौ सिध्यदपि वैशिष्ट्यम्, तस्यनित्यत्वे भूतले घटानयनानन्तरमपि घटाभावबुद्धिप्रसङ्गम्, तस्याऽनित्यत्वे च अनन्तवैशिष्ट्यकल्पनगौरवं प्रदर्श्य नाङ्गीक्रियते ॥ किन्तु घटाभाववद्भूतलमित्यादिप्रमितिकालिकं तत्तद्भूतलादिकमेव तत्तदभावानां संबन्धइति वदद्भिरभाववादिभिस्तत्र स्वरूपविशेषस्यैव संबन्धत्वं स्वीक्रियते ॥ तथात्र घटाद्यनुपलब्धिकालिकभूतलादिस्वरूपमेव तत्तदभावत्वेन कल्प्यतइतिनिरवद्यम् ॥ वैशिष्ट्यनित्यानित्यत्वपक्षयोरुक्तदूषणानामभावनित्यानित्यत्वयोरपिदुर्वारत्वात् ॥ नचाभावनित्यत्वेपि तद्बुद्धिं प्रति तद्वत्ताबुद्धेः प्रतिबन्धकतया घटादिसमवधानस्थलेनाभावबुद्धिरिति वाच्यम् ॥ वैशिष्ट्यनित्यत्वेपि तथा परिहारसंभवात् ॥ येतु नव्याः वैशिष्ट्यं पदार्थान्तरं स्वीकुर्वन्ति तैरष्टपदार्थवादिभिः सम्यक् स्वशास्त्रमुज्ज्वलितमिति किं तैः ॥ तन्मतेप्यस्वरसस्तु रामरुद्रादिभिर्दर्शितएवेत्यलम् ॥ एतेनाभावस्याधिकरणात्मकत्वे भूतले घटसमवधानदशायामपि घटाभावबुद्धिप्रसङ्गइति कुचोद्यमपास्तम् ॥ तथा अधिकरणात्मकत्वपक्षे अनन्ताधिकरणकल्पने गौरवात् भावातिरिक्तकल्पनैव लघीयसीति तार्किकोक्तिरप्यनेनैव निरस्ता ॥ भावसमुदायविलक्षणातिरिक्तकल्पने महागौरवात् ॥ प्रतियोगिभेदादनन्ताभावान्कल्पयित्वापि तदनित्यत्वे त्वत्यन्तगौरवमिया तन्नित्यत्वं प्रकल्प्य तथासति सर्वदा घटाभावबुद्धिप्रसक्त्याधिकरणस्वरूपविशेषस्यैव संबन्धत्वस्वीकारे कण्ठगडुभूतातिरिक्ताभावकल्पनैव गरीयसीति तदपेक्षयाऽभावस्याधिकरणस्वरूपविशेषत्वस्वीकारएव लाघवमिति शुभम् ॥ किञ्च किमिदमभावत्वं नाम ॥ नतावद्द्रव्यादिषट्कान्योन्याभाववत्त्वम् ॥ द्रव्यत्वादेः प्रतियोगितावच्छेदकत्वे गुणत्वद्रव्यत्वादिकमादाय द्रव्यगुणादिष्वतिप्रसङ्गात् षट्त्वावच्छिन्नभेदस्य अभावत्वत्वे घटपटोभयभेदस्य प्रत्येकं घटपटयोरिव तस्य प्रत्येकं द्रव्यादावपि सत्त्वात्पर्याप्तिसंबन्धेन षट्त्वावच्छिन्नभेदस्य प्रत्येकं द्रव्यादिषु सत्त्वस्य वारयितुमशक्यत्वात् ॥ नचापेक्षाबुद्धिरूपं द्रव्यादिगतषट्त्वमेव प्रतियोगितावच्छेदकम् ॥ द्विप्रतियोगिकभेदस्य द्वित्वमिवेति वाच्यम् ॥ व्यासज्यवृत्तिधर्माणां पर्याप्तिसंबन्धेनैव प्रकारत्वनियमाङ्गीकारात् ॥ अन्यथा द्वित्वस्य समवायेन प्रत्येकमपि सत्त्वेन

एकोद्वावित्येकविशेष्यकद्वित्वप्रकारकप्रमितिप्रसङ्गात् ॥ एकोद्वित्ववानिति प्रतीतौ तु मत्वर्थसमवायस्यैव प्रकारत्वमङ्गीकृत्य व्यासज्यवृत्तिधर्माणां समवायेन प्रकारताया-स्तार्किकैरेव निराकृतत्वाच्च ॥ एवञ्च पटभिन्नमिति प्रतीतौ पर्याप्तिसंबन्धेनैव पटत्वस्य प्रकारतानुभूयतइति पटत्वावच्छिन्नभेदोऽसङ्गतः ॥ नच द्रव्यादिभेदपञ्चकमभावत्वमिति कल्प्यं गौरवात् ॥ लोके सर्वेषां विशेषान्तपदार्थपञ्चकनिश्चयानियमेन तदनिश्चय-वतामभावाप्रतीतेः प्रसङ्गाच्च ॥ नच तर्हि भावभिन्नत्वं तत्त्वं शङ्क्यम् ॥ भावत्वेन भावमजानतस्तदप्रत्ययापातात् ॥ वस्तुतश्च भावत्वावच्छिन्नप्रति-योगिताकभेदस्यैवाप्रसिद्धतायाः ॥ परैरङ्गीकारात् ॥ अभावरूपधर्मिसिद्धौ तद्वृत्ति-तादृशभेदसिद्धिस्तत्सिद्धौ चाभावसिद्धिरित्यन्योन्याश्रयाच्च ॥ किञ्च भेदस्त्वन्मतेऽन्यो-न्याभावएव ॥ अन्योन्याभावत्वं चाभावत्वगर्भभूतोधर्मः ॥ तथाच भावान्योन्या-भाववत्त्वमभावत्वमित्युररीकारेऽभावत्वज्ञानमन्योन्याभावत्वज्ञानाधीनं तज्ज्ञानं चाभाव-त्वज्ञानाधीनमित्यन्योन्याश्रयः ॥ अन्योन्याभावेऽभावलक्षणसमन्वयेआत्माश्रयश्च ॥ अपिचैवंसति अभावोन भावइति वाक्याच्छाब्दबोधोन स्यात् ॥ उद्देश्यतावच्छेदकस्य भावभेदस्यैव विधेयतायाअनौचित्यात् ॥ यत्तु नव्याः भावभिन्नत्वं समवायसामानाधिकर-ण्यान्यतरसंबन्धावच्छिन्नप्रतियोगिताकसत्ताभावरूपम् ॥ सामान्यादित्रिकेद्रव्यादित्रिके चातिप्रसङ्गवारणाय समवायसामानाधिकरण्योरुभयोर्ग्रहणमित्याहुः ॥ तन्न ॥ सत्ता-भावरूपत्वोक्तावप्यात्माश्रयानपायात् ॥ सत्तानुपस्थितिदशायामभावाप्रत्ययस्यापत्तेश्च ॥ सत्ताऽभावनिष्ठमभावत्वमपि सत्ताऽभावरूपं पुनस्तन्निष्ठमभावत्वमपि तद्रूपमित्यनवस्था-पत्तेश्च ॥ नच सत्तात्यन्ताभावव्यक्तेः स्वरूपतएव प्रकारत्वमुपगम्यते ॥ अतएव सत्तारूप-प्रतियोगिज्ञानं विनापि घटोनास्तीति बुद्धौ सोऽत्यन्ताभावः प्रकारः अभावत्वप्रकारक-प्रत्यक्षएव ॥ प्रतियोगिधियोहेतुत्वात् ॥ अन्यथा इदं तमइति प्रतीत्यनापत्तिरिति वाच्यम् ॥ कल्पने मानाभावात् ॥ प्रतियोगिज्ञानमन्तरेणाभावज्ञानस्यानिष्पत्तिनियमेन सत्तोपस्थिति-मन्तरासत्ताभावज्ञानाऽसम्भवात् ॥ इदं तमइति ज्ञानं तु न तेजोऽभावविषयकम् ॥ मीमांसकैस्तमसः स्वतन्त्रद्रव्यतायाः स्वीकारात् ॥ वस्तुतस्तु मायिकं पदार्थान्तरं तदिति (स्कन्ध २ अध्याय ९ श्लोक ३३) यथाभासोयथातमइत्यत्र सुबोधिनी-तत्प्रकाशयोरन्धकारवादादौ च प्रपञ्चितम् ॥ तेन तेजोधियं विनापीदंतमइति धीर्निर्बाधा ॥ तत्रसत्ताभावरूपस्याभावत्वस्यानुपस्थितस्य प्रकारत्वे नागृहीतविशे-षणेति न्यायव्यभिचारादिकमपि द्रष्टव्यम् ॥ अथाभावस्याधिकरणात्मकत्वपक्षे नैयायिकोक्तदोषाभासानुद्धर्तुमाशङ्कन्ते ॥ नचेति ॥ आधाराधेयभाववदिति ॥ लोकदृष्ट्या कल्पितं भेदमादाय आधाराधेयभावव्यवहारवदित्यर्थः ॥ भवन्मतेप्यभाव-स्याधिकरणात्मकताङ्गीकारआवश्यकएवेत्याहुः ॥ भवन्मतेचेति ॥ अन्यथा अवि-द्याध्वंसस्य सादनन्ततयामोक्षेनुच्छेद्यद्वैतमेव प्रसज्येतेति भावः ॥ नन्वेवमाधाराधे-यभावानुपपत्तिरूपदोषपरिहारेपि येनेन्द्रियेण या व्यक्तिर्गृह्यते तेनैवेन्द्रियेण तद्गताजा-तिस्तदभावश्चेतिनियमेन जलादौ गन्धाद्यभावस्य जलादिरूपतया जलादेर्घ्राणादिजन्य-

प्रत्यक्षविषयत्वं चाक्षुषाद्यविषयत्वं चापद्येतेति चेदत्रब्रूमः ॥ यथा जलमभास्वरशुक्ल-रूपवत्त्वेन चक्षुषा गृह्यते ॥ शीतस्पर्शवत्त्वेन तु त्वगिन्द्रियेण एवं गन्धाभावत्वेन रूपेण तुजलादेर्घ्राणग्राह्यत्वेपि न किञ्चिद्बाधकमिति प्राभाकराः ॥ अतएव "गन्धाभावस्य जलादिरूपत्वेजलत्वादिनैवतेषांनघ्राणेन्द्रियग्राह्यता गन्धाभावत्वेनतुतेषामपितथात्वमिष्ट-मेवेतिप्राभाकराणामभिप्रायः" इतिरामरुद्रोप्याह ॥ अन्येतुमन्यन्ते जलस्य चक्षु-र्ग्राह्यत्वेपि जलत्वजातेस्त्वगिन्द्रियग्राह्यत्वमेव ॥ शीतस्पर्शस्य त्वग्ग्राह्यत्वेन तत्समा-नाधिकरणद्रव्यत्वसाक्षाद्व्याप्यजातेस्ततएव निश्चयस्यौचित्यात् ॥ अन्यथाऽनुमेयत्वा-पत्तेः ॥ दृश्यतेचप्रज्ञाचक्षुषामपि स्पर्शमात्रेणात्र पात्रे जलमिति ज्ञानम् ॥ नहि तज्ज-लत्वानुपस्थितौ संभवति ॥ नागृहीतविशेषणेति न्यायात् ॥ यत्र तु जलचाक्षुषमात्रं तत्रस्पार्शनानुभवविषयजलत्वस्मरणमेव सामान्यतोदर्शनोद्बुद्धं जलमिदमितिनिश्च-यजनकमतोनोक्तन्यायविरोधइति ॥ तस्माज्जलत्वतेजस्त्वयोस्त्वग्ग्राह्यत्वपक्षे येनेन्द्रियेणेति नियमोनैकान्तिकः किञ्चाभावानां प्रत्यक्षविषयत्वाभ्युपगमे तार्किकनियमव्यभिचारशङ्का-वकाशः ॥ मीमांसकनयेत्वधिकरणानामभावत्वेन रूपेणानुपलब्धिरूपप्रमाणगम्यत्वस्याङ्गी-काराच्च सः तार्किकैरपि प्रत्यक्षस्थलएव तादृशनियमस्योरीकारात् ॥ नच प्रमाणान्तराभ्यु-पगमे गौरवं शङ्क्यम् प्रत्यक्षवादिभिरपि अभावप्रत्यक्षकारणीभूतविशेषणविशेष्यभावा-ख्यषष्ठसन्निकर्षस्य कल्पनीयतया तौल्यानपायात् नच वैशिष्ट्यं स्वरूपसंबन्धरूपत्वाद-धिकरणात्मकमिति नातिरिक्तं कल्प्यतइति वाच्यम् अभावानामधिकरणात्मकत्वेन प्रकृतेपि गौरवाभावात् तन्मतेऽभावज्ञाने प्रतीन्द्रियाणामपि कारणत्वकल्पनस्याधिक्याच्च ॥ अपिच येनेन्द्रियेणेत्यस्यैकान्तिकत्वाभ्युपगमे रूपादिप्रतियोगिकाभावानामपि चक्षुर्मात्र-ग्राह्यतापत्त्या या यौ रूपाभावबुद्धिश्चक्षुर्व्यापारमन्तरैव जायमाना नोपपद्येत ॥ एवंपर-माण्वादिषुमहत्त्वाद्यभावबुद्धिरपि ॥ वाय्वादेश्चाक्षुषविषयत्वंचापद्येत ॥ तस्मादनुपलब्धि-प्रमाणेनैवाधिकरणमभावत्वेन गृह्यते ॥ घटाभाववद्भूतलमितिज्ञानस्यापि भूतलांशेप्रत्यक्ष-त्वमभावांशेपरोक्षत्वम् ॥ पर्वतोवह्निमानित्यादेः पर्वतांशे प्रत्यक्षत्वं वह्निमत्त्वांशे परो-क्षत्वमिवेति ध्येयम्। वस्तुतस्तु द्वितीयस्कन्धसुबोधिन्यां (अ० ९ श्लो० ३२) अहमे-वासमेवाग्रइत्यत्र "अभावास्त्वस्मन्मतेतिरोभावातिरिक्तानभवन्ति" इत्युक्तम् ॥ तेनतिरोभवनं तिरोभावइतिपक्षे तस्य वस्तुधर्मत्वाद्धर्मधर्मिणोश्चाभेदाद्गुणादीनां द्रव्या-त्मकतायावाक्यप्रदीपे हरिणापि द्रव्यात्मानस्त्रयस्तस्माद्गुद्धौनानाव्यवस्थिताः ॥ आश्रया-श्रयिभावेनेत्ययपूर्वेभ्यआगमइतिकथनात् ॥ तिरोभावयतीति तिरोभावइतिव्युत्पत्त्या शक्तित्वेपि तादात्म्यानपायाच्च स्वमतेप्यभावस्याधिकरणात्मकत्वकथनं न विरुद्धम् ॥ तस्मात्पदार्थान्तरतयाऽभावस्याङ्गीकारोभिमानमात्रम् ॥ तस्याऽलीकत्वात् ॥ अयमिति निर्देष्टुमशक्यत्वात् अतएव लोके वेदे च घटोनास्ति "यस्मात्परनापरमस्तिकिञ्चि" दित्यादिनंपदघटितवाक्यप्रयोगव्यवहारएव प्रायो दृश्यते ॥ नतु घटाभाववद्भूतलमिति कोपि लौकिकः प्रयुङ्क्ते ॥ किंबहुनाऽभावपदेपि न भावोऽभावइति नञ्समासएव ॥ नञर्थस्य पृथक्पदार्थताभिमाने त्वब्राह्मणोऽधर्मइत्यादौ प्रतीयमानसादृश्यविरोधादिन-

मर्थानामपि पदार्थान्तरत्वं स्वीकुरु ॥ तेन बहुपदार्थसिध्या सप्तपदार्थवादोदत्तजिला-ञ्जलिः स्यात् ॥ वस्तुतस्तु नञः समभिव्याहृतपदार्थद्योतकत्वादेव न पृथक्पदार्थवाचकता ॥ किन्तुपदार्थ एव आविर्भूततिरोभूतत्वाभ्यां द्विविधः ॥ तत्र पदार्थस्य तिरोभूतस्वरूपद्योतकोनञ् ॥ आविर्भावतिरोभावौ तु पुरस्तात्प्रपञ्चयिष्येते ॥ अभावस्यतिरोभावानतिरिक्ततयाऽसन्मते ॥ तदनङ्गीकारस्य शुद्धाद्वैतमार्तण्डे ॥ प्रागभावादयोनाङ्गीकार्या आम्नायतोसिद्धम् ॥ तद्विस्तरभियानात्रलिख्यतेन्यत्रद्रष्टव्यमिति दर्शितत्वेपि तदप्रकाशयन् भेदज्ञानाभावइति प्रथमान्तपाठं चकल्पयन् अन्यानभिज्ञजनव्यामोहकएवेत्युपेक्ष्यः ॥ अथ विवर्तवादेन कार्यकारणयोर्मायासंबन्धस्याप्रामाणिकत्वमविकृतपरिणामवादेन शुद्धस्यैव कार्यकारणात्मकत्वं च शुद्धाद्वैतसिध्यर्थं दर्शयितुं शुद्धपदार्थं तावदाक्षिपन्ति ॥ **नन्विति** समादधते ॥ **स्यादेवमित्यादिना** ॥ यदि नैयायिकवन्निमित्तकारणत्वमात्रमीश्वरस्य स्वीक्रियेत तदा प्रपञ्चेश्वरयोर्भेदः भेदानभिज्ञतयेश्वरेऽल्पज्ञत्वं चापद्येतेत्यर्थः ॥ **तत्रचेति** ॥ उपादानत्वपक्षे ॥ स्वपक्षे तन्त्रान्तराणामपि संमतिं दर्शयितुमाहुः **बहुवादिसम्मतमिति** तथा च प्रकृत्युपादानकत्ववादिभिः साङ्ख्यपातञ्जलादिभिः कार्ये प्रकृतितादात्म्यमुच्यते ॥ कटकादेःसुवर्णादितादात्म्यं तत्रापिभाष्यभामत्यादावुपपादितमिति परिणामवादे कार्यस्य कारणात्मकत्वं निर्विवादमिति भावः ॥ **कार्येति** ॥ ब्रह्मणइति शेषः ॥ **अपास्तमिति** ॥ कार्यकारणाभेदज्ञानस्य भ्रमरूपत्वादीश्वरस्य चाभ्रान्तत्वात्तथेतिभावः ॥ अभिन्ननिमित्तोपादानवादे मानमाहुः ॥ **प्रकृतिश्चेत्यादि** ॥ समन्वयस्य चतुर्थपादेऽभिन्ननिमित्तोपादानत्वस्थापनायेदमधिकरणम् ॥ तत्रधर्मविचारे *श्रुतिस्मृत्योरेकवाक्यत्ववद्ब्रह्मविचारेपि तयोस्तदपेक्षितमितिसांख्यादिस्मृतिसिद्धा प्रकृति-*रेवोपादानंश्रुतिसिद्धं ब्रह्म तु निमित्तमात्रमिति पूर्वपक्षे प्राप्तेइदमारभ्यते ॥ अर्थस्तु मृत्प्रकृतिकोघटस्तन्तुप्रकृतिकः पटइत्यादिव्यवहारात् प्रकृतिशब्दउपादानवचनः ॥ तथा च जगतः प्रकृतिरुपादानकारणं चान्निमित्तकारणं च ब्रह्मैव ॥ अथवा रूढ्या प्रकृतिरुपादानं प्रकृष्टाकृतिर्यस्येति योगेन निमित्तं च ब्रह्मैव ॥ चकारो यत्र येनयतोयस्येत्यादिवाक्योक्ताधिकरणत्वकरणत्वादिसङ्ग्राहकः ॥ कुतः ॥ प्रतिज्ञादृष्टान्तानुपरोधात् ॥ तत्रतत्रोपनिषत्सु श्रूयमाणाः प्रतिज्ञाः दृष्टान्ताश्चाभिन्ननिमित्तोपादानत्वेसत्येव नोपरुध्येरन् ॥ यथा छान्दोग्ये श्वेतकेतुविद्यायां "उततमादेशमप्राक्ष्योयेनाश्रुतंश्रुतंभवत्यमतंमतमविज्ञातंविज्ञात" इतिप्रतिज्ञा ॥ अनन्तरं "कथन्नुभगवःसआदेशोभवति"इतिश्वेतकेतुप्रश्ने "यथासोम्यैकेनमृत्पिण्डेनसर्वंमृण्मयंविज्ञातंस्याद्वाचारम्भणंविकारोनामधेयंमृत्तिकेत्येवसत्यं ॥ यथासोम्यैकेनलोहमणिनासर्वंलोहमयं विज्ञातंस्यात् ॥ यथासोम्यैकेननखनिकृन्तनेनसर्वंकार्ष्णायसंविज्ञातंस्यात्" इति दृष्टान्ताउक्ता ॥ प्रथममुण्डके "कस्मिन्नुभगवोविज्ञातेसर्वमिदंविज्ञातंभवति" इति प्रतिज्ञा ॥ "यथोर्णनाभिःसृजतेगृह्णतेचयथापृथिव्यामोषधयः सम्भवन्ति ॥ यथासतः पुरुषात्केशलोमानितथाऽक्षरात्संभवतीहविश्वम्" इति दृष्टान्ताः ॥ बृहदारण्यकेमैत्रेयीब्राह्मणे "आत्मनोवाअरेदर्शनेनश्रवणेनमत्याविज्ञाने-

नेदꣳ सर्वं विदितं" इतिप्रतिज्ञा ॥ अग्रेच "मह्यतंपरादाद्योन्यत्रात्मनोब्रह्मवेद" इत्यादिनाकार्यकारणभेददर्शनेऽनिष्टमुक्त्वा "इदंसर्वंयदयमात्मा" इति सर्वस्यब्रह्मरूपतां प्रतिज्ञाय दृष्टान्ताआम्नाताः ॥ "सयथादुन्दुभेर्हन्यमानस्यनबाह्याँञ्छन्दाञ्छक्नुयाद्ग्रहणायदुन्दुभेस्तुग्रहणेनदुन्दुभ्याघातस्यवाशब्दोगृहीतः" इत्यादयः ॥ नहि निमित्तकारणविज्ञानेन कार्यविज्ञानं सम्भवति ॥ मृत्सुवर्णादीनि च समवायीन्येव दृष्टान्तीक्रियन्ते ॥ मृत्पिण्डदृष्टान्तश्रुतिरेव श्रीभागवतेऽष्टमस्कन्धेपष्ठाध्याये स्तुवता विधिनोपबृंहिता॥ (श्लो १०) त्वय्यग्रआसीदिति एवं यथासुवर्णसुकृतंपुरस्तात् ॥ यथाहिरण्यंबहुधासमीयते यथोर्णनाभिर्हृदयात् ॥ इत्यादिषु श्रौताळोहादिदृष्टान्ताउपबृंहिताः ॥ भाष्यइति ॥ अविरोधाध्यायेतर्कपादे (सू. ११) महद्दीर्घवद्वेत्यधिकरणे ॥ सर्वखल्वित्यादि ॥ छान्दोग्येपञ्चमाध्याये (खंड० १४) शाण्डिल्यविद्यायां "सर्वंखल्विदंब्रह्मतज्जलानितिशान्तउपासीत" इतिपठ्यते ॥ अर्थस्तु ॥ इदं परिदृश्यमानं सर्वं खलु निश्चयेन ब्रह्म ॥ तत्र हेतुः ॥ तज्जलानिति जायतइतिजं ॥ लीयत इति लम् ॥ अनितीत्यन् ॥ एषां कर्मधारये तस्मिञ्जलान्तज्जलान् तस्माज्जायमानं तत्रैव लीयमानं स्थितिदशायां तद्रूपेण वर्तमानं चेत्यर्थः ॥ यद्यस्माज्जायते यत्र लीयते यद्रूपेणावतिष्ठते तत्तदभिन्नमितिनियमः ॥ यथा मृत्प्रभवोमृद्विलयः स्थितिदशायां मृद्भावमपरित्यजन्घटोमृदभिन्नएव ॥ इति हेतोः शान्तो रागद्वेषादिशून्यः सन् ब्रह्मैवोपासीतेति ॥ अत्रविस्तरस्तु समन्वयस्यद्वितीये पादेप्रथमाधिकरणे ज्ञेयः ॥ "तदात्मानꣳ स्वयमकुरुत "ति तु तैत्तिरीयब्रह्मवल्लीस्थम् ॥ अर्थस्तु ब्रह्मैव स्वयमितरानपेक्षं सदात्मानमेवजगद्रूपमकुरुतेति ॥ सच्चत्यच्चाभवदित्यपि तत्रत्यमेव ॥ अर्थस्तु सचेतनमचेतनंच स्वयमेवाभवदिति ॥ ब्रह्मैवेदममृतमितितु द्वितीयमुण्डकसमाप्तिवाक्यम् ॥ अत्र ब्रह्मणएवामृतस्याविकृतस्य सतः सर्वतः सर्वरूपेण प्रसृतत्वम् ॥ विश्वस्यावधारणपूर्वकं ब्रह्मरूपत्वम् ॥ अभेदाद्विश्वस्यवरतमत्वंचाम्नायते ॥ अविकृतपरिणामवादबोधनाय शङ्कते ॥ नन्वविक्रियमाणस्येत्यादिना ॥ समाधत्ते ॥ नहि लोकेत्यादिना ॥ यद्यपि लोके सुवर्णादीनि स्वरूपपरित्यागादिविकारमलभमानान्येव कटकरुचकादिरूपेण परिणमन्ति ॥ ननु दध्यादिरूपेण परिणमद्दुग्धादिवद्विक्रियमाणानि ॥ तान्येव वेदे पुराणे च यथासोमयैकेन लोहमणिना ॥ यथासुवर्णसुकृतंपुरस्तादित्यादिषु ब्रह्मणो दृष्टान्तीक्रियन्ते ॥ चिन्तामणिकल्पतरुकामधेनुप्रभृतीनि चाविकारीण्येवोपादानानि प्रसिद्धानि ॥ तेनाविकृतमेव ब्रह्म जगद्रूपेण परिणमतीति कथनं नलोकविरुद्धम् ॥ तथापीदमग्रेऽवसरे प्रपञ्चनीयमेवेति प्रकृते वेदैकवेद्यवस्तुनि कुतर्कानवसरमेवाश्रित्य समादधतइति ज्ञेयम् ॥ तन्त्वौपनिषदमिति ॥ बृहदारण्यके शाकल्यब्राह्मणे "सएषनेतिनेत्यात्माऽगृह्योनहिगृह्यते" इत्यादिना प्रत्यक्षादिप्रमाणग्राह्यतां प्रतिषिध्य शाकल्यं प्रति याज्ञवल्क्येन "तन्त्वौपनिषदंपुरुषंपृच्छामि" इति कथने औपनिषदपदेन उपनिषदामेवतत्रप्रवृत्तिः प्रतिप्रसूयतइति युक्तमतोवेदैकवेद्यत्वम् ॥ यथापशाविति ॥ एवं "ब्रह्मपुच्छंप्रतिष्ठा" इति श्रवणेपि तस्य पशुसदृशलोमादिविशिष्टं लाङ्गूलं न कल्प्यते ॥ लोकप्रसिद्धस्यैव तत्र कल्पनाया अनियमादितिभावः ॥ आसीनइति ॥ कठवल्लीपुद्वितीं-

यथदयां "अन्यत्रधर्मादन्यत्राधर्मात्" इति नचिकेतःप्रश्ने "सर्वेवेदायत्पदमामनन्ति" इत्यादिना ब्रह्मनिरूपणमुपक्रम्य आसीन इति पठ्यते ॥ अस्योत्तरार्धंतु "कस्तंमदामदंदेवं मदन्योज्ञातुमर्हति" इति ॥ अत्र आसीनस्य सतोदूरगमनं शयानस्य सतः सर्वतो गमनं च विरुद्धम् ॥ अत एव परमभक्तात्त्वत्तोऽन्यस्य तज्ज्ञानानर्हत्वमुत्तरार्द्धे दर्शितं यमेन ॥ तस्य तज्ज्ञत्वं तु क्वाहमेतेविजानीमइति पष्ठस्कन्धादौप्रसिद्धम् ॥ अपाणिपादइति ॥ श्वेताश्वतरे तृतीयाध्यायइदं पठ्यते ॥ अस्योत्तरार्धंतु" सवेत्तिवेद्यंनचतस्यवेत्तातमाहुरग्र्यं पुरुषंमहान्तम्" इति ॥ एतदग्रेऽप्यनुपदं "अणोरणीयान्महतोमहीयान्" इति विरुद्ध-धर्माश्रयत्वं श्रावितम् ॥ अत एव लौकिकानां तदवेत्तृत्वं वीतशोकस्य तत्प्रसादात्तद्वेत्तृ-त्वंचोक्तमृग्द्वयेन ॥ नदूषणायेति ॥ तादर्थ्ये चतुर्थी ॥ ब्रह्मणि विकारित्वादिदूषणापा-दकं न भवति किन्तुविरुद्धसर्वधर्माश्रयत्वेन ब्रह्मतामेव द्रढयतीति भूषणापादकम् ॥ कार्यकारणयोर्मायासंबन्धं निराकर्तुं तयोस्तत्संबन्धं पराभिप्रेतं गृह्णन्ति ॥ नचमायीति इदमपि वाक्यं श्वेताश्वतरे चतुर्थेऽध्याये "छन्दांसियज्ञाःक्रतवोव्रतानिभूतंभव्यं यच्चवेदा वदन्ति ॥ यस्मान्मायीसृजतेविश्वमेतत्तस्मिंश्चान्योमाययासन्निरुद्धः" इति पठ्यते ॥ दृष्टान्तानामिति ॥ दृष्टान्तवाक्यानां ॥ परिहरन्ति ॥ प्रसिद्धेत्यादिना ॥ आत्मान-मेवप्रकाशान्तजगद्रूपमकुरुतेति प्रसिद्धोर्थः ॥ श्रूयमाणपदलभ्यत्वात् ॥ माययाकुरुतेत्यप्र-सिद्धः ॥ तत्र मायापदाश्रवणात् ॥ उच्चारितएव शब्दः प्रत्यायको नानुच्चारितइतिनियमस्य बहुसंमतत्वात् ॥ ननुमायीसृजत इति वाक्यमेव तत्र तत्र तथाकल्पने मानमिति चेन्न ॥ अनेकेषामन्यथानयनस्याशक्यत्वात् ॥ बहूनामनुग्रहस्य न्याय्यत्वात् ॥ ननु तथापि तस्य वाक्यस्य कोर्थइति चेत्तत्राहुः ॥ मायापदेनेति ॥ तथा चायं वाक्यार्थः पूर्वत्रि "ऋचो अक्षरेपरमेव्योमन्प्रतिष्ठिताः" इति वेदानामक्षरैकप्रतिष्ठितत्वमुक्तं तत्कथं सङ्गच्छते ॥ वेदेषु यज्ञादिप्रतिपादनादत उच्यते ॥ छन्दांसीति ॥ यत्पूर्वोक्तं ब्रह्म ॥ छन्दांसि ऋगादिमन्त्राः ॥ यज्ञाग्नियूपाः ॥ क्रतवः सयूपाः ॥ व्रतानि कृच्छ्रादीनि ॥ भूतं भविष्यच्चाद्वर्तमानं च सर्वं ब्रह्मैव ॥ यच्चान्यद्वेदावदन्ति तत्सर्वं यद्ब्रह्मैव ॥ तच्च सर्वं यस्माद्ब्रह्मणोभवति ॥ यस्तं न वेदेति पूर्वेण तच्छब्देन यच्छब्दद्वयस्यान्वयः ॥ एतेन एवंसर्वंतत सर्वंसइतिज्ञानयोगवइति दर्शितं तथा च वेदानां तद्रूपत्वात्तदेकप्रति-पादकत्वाच्च युक्तं तत्रप्रतिष्ठितत्वम् ॥ यस्मादित्यस्योत्तरत्र वा हेतुतयान्वयः ॥ ननु सर्वस्य तद्रूपत्वे यस्तंनवेदकिमृचाकरिष्यतीत्यवेदनं कथमतउच्यते ॥ मायी ॥ सर्वभवन-सामर्थ्यरूपमायाख्यस्वाभिन्नशक्तिशाली परमात्मा एतद्विश्वं सृजति तस्मिंश्चान्य' अंशतया भेदमापन्नोजीवः देहेन्द्रियादिप्रपञ्चे माययाऽध्यासेन सम्यङ्निरुद्धइति ॥ अत्र च माया भगवच्छक्तिरेव तत्रैव "देवात्मशक्तिं ॥ परास्यशक्तिः" इतिशक्तित्वाभ्यासात् ॥ ननु पराभिमतं ब्रह्माधिष्ठानकमज्ञानं ॥ मानाभावात् ॥ तथाच माली गच्छतीत्यादौ मालया गच्छतीत्यर्थो यथा न संपद्यते तथात्रापि मायया सृजतीति न लभ्यते पुराणवचनैस्तस्याः करणत्वसाधनेपिनह्विर्दहति वह्निर्दाहकशक्त्या दहतीति वाक्ययोरिवमायाकरणत्वबोधक-पुराणस्य तदाऽऽत्मानमित्यादेश्च न विरोधः पराभिमतमायोपाधिककर्तृत्वं तु मार्तण्डादिषु

किञ्चजन्यात्वजन्यावामायाऽऽद्यजनकोहिकः अन्याऽभावात्तुप्रह्मैवसविशेषत्वमागतम् ॥ द्वितीये स्वद्वैतभङ्गः कादाचित्कत्वसंगतं ॥ आत्मैवेदमग्रआसीदित्यादिश्रुतिबाधतः ॥ अनादित्वेतु सान्तत्वमितिपक्षोऽप्यसंगतः अनादित्वमनन्तत्वं मायाया इति निश्चयात् इत्यादिदोषैर्निरस्तमेव ॥ विस्तरतश्च पुरतो निराकरिष्यते ॥ एवं च प्रकृतवाक्ये स्रष्टुर्माया-शक्तिकत्वेन मायायास्तदधीनतया तया न सृज्यप्रयुक्तोव्यामोहइति मायिपदतात्पर्यं ॥ जीवस्य तु स्युच्चरणाभेदमापन्नस्य मायया सन्निरोधादवेदनं साधनैर्वेदनंच पूर्वेऽरुगुत्तरार्द्धोक्तं घटतइति चतुर्थचरणाशयः ॥ शक्तित्वाच्छक्तिशक्तिमतोश्चाभेदस्योपपादयिष्यमाणत्वान्न कारणे मायासंबन्धः ॥ प्रकृतवाक्ये सृज्यस्य मायिकतावोधनपरत्वस्य कल्पने तु तस्मिन्ने-वाध्याये "तदेवाऽग्निस्तदादित्यस्तद्वायुस्तदुचन्द्रमाः ॥ तदेवशुक्रंतद्ब्रह्मतदापस्तत्प्रजापतिः ॥ २ ॥ त्वंस्त्रीत्वंपुमानसित्वंकुमारउतवाकुमारी" इति श्रावितं सर्वव्यक्तीनां तद्रूपत्वं पीड्येत ॥ एवंकारणे मायासम्बन्धं संक्षेपेण निराकृत्य कार्येतन्निराकरणाय वाचारम्भण-श्रुत्यर्थं निर्मलयितुं शङ्कन्ते ॥ **नन्वेवमिति** ॥ समादधते ॥ **एवंसतीत्यादिना** ॥ **तदनन्यत्वमिति** द्वितीयस्य प्रथमे पादे सप्तसूत्रमिदमधिकरणं ॥ अग्रेजगन्मिथ्यात्व-निराकरणावसरे एतदधिकरणं वाचारम्भणादिश्रुत्यर्थोविवर्तवादेऽनुपपत्तयश्च विस्तरेण निरूपयिष्यन्तेऽतोत्रविरम्यते ॥ **यतोवाइति** ॥ तैत्तिरीयभृगुवल्यां "यतोवाइमानि-भूतानि जायन्ते येन जातानि जीवन्तियत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद्ब्रह्मेति" इति पठ्यते मिथ्यावस्तुनउत्पत्तिस्थितिलयाभिसंवेशानामसंभवात्तद्बोधकश्रुतिव्याकोप इति भावः ॥ **अन्यत्रविस्तर इति** निबन्धावरणभङ्गभाष्यतत्प्रकाशादिषु विस्तरइत्यर्थः एवमभ्युपेत्य वादेन मार्तण्डटीकायां "भेदज्ञानाभाव." इतितत्कल्पितम् प्रथमान्तपाठं समाधायवास्तवेसप्तम्यन्तपाठे समादधते ॥ **वस्तुतस्त्वित्यादिना** ॥ **वास्तवंनेति** ॥ कठकाण्वादिभिः "नेहनानास्तिकिञ्चन ॥ यत्रहिद्वैतमिवभवतितदितरइतरंपश्यति" इति भेदस्यातात्विकतायाआम्नानाद्भेदज्ञानं वास्तवंप्रमारूपं न भवति किन्तु भ्रमरूप ॥ मुण्ड-कश्वेताश्वतरादिषु "अनीशयाशोचतिमुह्यमानः" इति मोहस्याविद्याहेतुकत्वश्रावणात् ॥ **यदिस्यादिति** ॥ तात्विकोयदि स्यात् ॥ **तात्पर्यादिति** इति चेन्नेति पूर्वत्रास्य हेतुतयाऽन्वयः ॥ **अतएवेति** ॥ सप्तम्यन्तपाठस्य वास्तवत्वादेव ॥ **सप्तम्यन्तमिति** ॥ सप्तम्यन्तपदघटितम् ॥ सर्वत्र ग्रन्थान्तरेषु व्याख्येयग्रन्थस्यान्यथापदं सप्तम्यन्तपर्यायक-थनेनैव व्याख्यायते ॥ अतोव्याख्यानशैल्यापि सएव पाठोनिश्चीयते ॥ सहस्राक्षकृता-ऽद्वैतपदे नञ्बहुव्रीहेः स्वयमुत्प्रेक्ष्य दूषितत्वेन तदुक्तमपाकर्तुं तथाविग्रहमपि स्वीकुर्वन्ति ॥ **व्युत्पत्तिस्त्विति** ॥ परोक्तैकप्रसरताभङ्गादेर्वक्ष्यमाणरीत्या निराकरणसंभवादयमपि पक्षोन दुष्टइति भावः ॥ मार्तण्डकारिकाटीकयोरभिप्रायलभ्योऽयपक्षइत्याहुः ॥ **द्विधाज्ञानमिति** ॥ नन्वेवं सति मार्तण्डटीकायां "अन्यथाभेदज्ञानाभावे ॥ नद्वैत-मद्वैतमिति विग्रहः" इति व्याख्यानं कथं सङ्गच्छतामत आहु. ॥ **अथवेति** ॥ अस्मिन्पक्षे पर्युदासाऽऽश्रयणेन नञोविरोधार्थतया वाऽद्वैतपदस्याभेदज्ञानमित्यर्थः प्राग्दर्शितः ॥ एवकारोन्ययोगव्यवच्छेदकोस्य विग्रहस्य मुख्यता द्योतयति ॥ प्राचीनैरस्यैव

विग्रहस्याऽऽदरणे बीजं स्वस्मिन्पक्षे लाघवमिति ध्येयम् ॥ अन्यपदार्थप्रधानबहुव्रीह्यपेक्षया व्यधिकरणतत्पुरुषेततोपिसमानाधिकरणे कर्मधारये लाघवमतएव श्रुतिष्वनेकत्र ब्रह्मलोकइत्यादौ कर्मधारयादरणमिति मञ्जूषादिषु स्फुटतरम् ॥ अतएवेति ॥ पक्षद्वयस्याप्यदुष्टत्वादेव ॥ एवमसङ्गतिदोषोनिरस्तः ॥ असङ्गत्याऽऽपादकसहस्राक्षवाक्ये शुद्धपदार्थेत्यत्र शुद्धपदार्थस्येति पृथक्पदमपेक्षितम् ॥ कार्यकारणात्मकब्रह्मणइति सर्वं वा समस्तम् ॥ समस्तपदैकदेशस्य शुद्धपदार्थेत्यस्य ब्रह्मणोविशेषणतयाऽन्वयस्यायोगात् ॥ कार्यकारणरूपंहिशुद्धंब्रह्मनमायिकमित्यादौ तादृशब्रह्मणएव शुद्धपदार्थतायाः कथनाच ॥ अतस्तद्वाक्यमेवासङ्गतम् ॥

नन्वेवमपिनीलघटादिसमासघटकनीलादिपदैरनीलादिघटस्येवशुद्धाद्वैतसमासघटक शुद्धपदेनाऽशुद्धाद्वैतस्य व्यावृत्तेर्वाच्यतया तादृशस्य तवमतेऽप्रसिद्धत्वेन व्यावर्त्यालाभः॥व्यावर्तकस्यैवविशेषणत्वात् अन्यथाव्यर्थमेवशुद्धपदमितिचेन्न ॥ नहिस्वमतसिद्धस्य सजातीयस्य व्यावर्तकतयैव विशेषणस्य सार्थक्यमिति नियमः तादृशनियमस्वीकारे भवन्मतेऽपि सत्यंज्ञानमनन्तंब्रह्मेत्यत्रासत्यस्य जडस्यसान्तस्य चब्रह्मणोऽप्रसिद्धत्वेनव्यावर्त्याऽलाभेन तादृशविशेषणत्रयस्य वैयर्थ्याऽऽपत्तिः कुतो नस्यात् ॥ किन्तुयत्रकुत्रचित्प्रसिद्धस्यविरुद्धधर्मस्याऽऽपाततोविशेष्ये संभावना ॥ तद्व्यावृत्त्यर्थंविशेषणमितिसर्वेसंमतम् ॥ अतएवतैत्तिरीयभाष्ये "सत्यमिति यद्रूपेणयन्निश्चितं तद्रूपं न व्यभिचरति तत्सत्यम् ॥ यद्रूपेण निश्चितंयत्तद्रूपं व्यभिचरति तदनृतमित्युच्यते ॥ अतोविकारोऽनृतं ॥ वाचारम्भणं विकारो नामधेयंमृत्तिकेत्येव सत्यं एवंसदेवसत्यमित्यवधारणात् अतः सत्यंब्रह्मेतिब्रह्मविकारान्निवर्तयती"त्युक्तंनतुविकारिब्रह्मणो निवर्तयतीत्युक्तमतो विकारस्य कार्ये प्रसिद्धस्य ब्रह्मण्यपि संभावना स्यात्तन्निवृत्त्यर्थं सत्यपदमिति भाष्यकृतामाशयः ॥ ननु सत्यंज्ञानमनन्तंब्रह्मेत्यत्र सत्यादिपदानां लक्षणपरत्वं नतुविशेषणपरत्वंयेनेदृशं व्यावर्तकत्वं स्यादिति ॥ अत एव "ननुविशेष्यंविशेषणान्तरंव्यभिचरद्विशिष्यते यथानीलंरक्तंचोत्पलमिति ॥ एकमेवचब्रह्म नब्रह्मान्तराणियेभ्योविशिष्येतनीलोत्पलव"दितिपूर्वपक्षे "नलक्षणार्थत्वाद्विशेषणाना"मिति भाष्ये तत्पूर्वमुक्तमितिचेन्न ॥ "विशेषणार्थत्वेपिचसत्यादीनां स्वार्थापरित्याग एवे"त्यादितदग्रिमभाष्यपर्यालोचनयासत्यादिपदानां विशेषणपरत्वस्यापिभाष्यकृत्संमतत्वात् ॥ अतएवतट्टीकाकृताऽपि "नीलंमहत्सुगंधमितिविशेषणपदानिस्वार्थसमर्पणेनतद्विरुद्धव्यावर्तकानिप्रसिद्धानि ॥ तथा सत्यशब्दोप्ययाधितत्वेव्युत्पन्न"

इत्याद्युक्तम् ॥ एवंचपरमेमायाशवलस्यैवाद्वैतब्रह्मणोजगत्कारणत्वंस्वीकृतं तद्वदत्रापिशुद्धपदानुक्तौमायाशवलस्यैवकारणत्वंसंभाव्येत अतस्तद्व्यावृत्त्यर्थंशुद्धपदंसार्थकं एतेनेत्यारभ्यपरास्तमित्यन्तेनाक्षेपस्तवनद्वीकारेणैवपरास्तः ॥ टीकाकृतापूर्वपक्षविधयातस्योपन्यासंकृत्वाऽग्रेखण्डितत्वात् ॥ त्वन्मतेऽपिजडब्रह्मणोऽभावेन व्यावर्त्याऽलाभस्य समानत्वेनशानपदवैयर्थ्यस्यदुर्वारत्वात् ॥ जडब्रह्मणोऽभावेऽपिब्रह्मणिसंभावितजडत्वव्यावृत्त्यर्थंतदितिचेदत्रापिमायासंबंधसंभावनानिवृत्त्यर्थं शुद्धपदमितितुल्यम् ॥ एतेन (जीवस्याऽशुद्धत्वेऽप्यद्वैतपदार्थस्य तत्त्वाऽभावात् मायाया अपि भगवच्छक्तितया ततोभिन्नत्वेन)-त्यादिकः प्रलापोप्यपास्तः ॥ जीवेमायासंबन्धस्यास्मन्मतेऽसत्त्वेन स्वयमेवमायासंबंधंकल्पयित्वातद्व्यावृत्तिचोक्त्वापुनस्तत्राऽऽक्षेपंकुर्वन्नुन्मत्तएवपरमताऽनभिज्ञश्च ॥

अथ सहस्राक्षे भिन्ननीलघटादिसमासेत्यादिना श्रुतिविरोधश्चेत्यन्तेनाऽऽपादितं शुद्धपदव्यावर्त्याऽलाभमंशतोनूद्य परिहरन्ति ॥ नन्वेवमपि नीलेत्यादिना ॥ परमतानभिज्ञश्चेत्यन्तेन ॥ नहिस्वमतेति ॥ अतएव तार्किकाणां शब्दगुणकमाकाशमित्याकाशलक्षणे तन्मते गुणातिरिक्तशब्दाभावेन स्वमते गुणपदव्यावर्त्यालाभेपि भाट्टैः शब्दे द्रव्यत्वस्याङ्गीकारात्तन्निरासाय गुणपदमिति सिद्धान्तचन्द्रोदयकारादयोवदन्ति ॥ एवं द्रव्यगुणकर्मसामान्यविशेषसमवायाभावा सप्तपदार्थाइत्यत्र स्वमते सप्तातिरिक्तपदार्थस्याप्रमिततयाऽधिकसङ्ख्यारूपव्यावर्त्यालाभेपि पराभिमतशक्तिसादृश्यादिकमादायाधिकसङ्ख्याव्यवच्छेदार्थं तदिति वदन्ति ॥ तथा षट्पदार्थवादेपि वैशेषिकसूत्रोपन्यासे (अ० १ आ० १ सू० ४) "द्रव्यगुणकर्मसामान्यविशेषसमवायानां" इत्यत्र "षडेवपदार्थाइतिनियमः पर्यवस्यति" इत्युक्त्वा "सप्तानुपपन्न.व्यवच्छेद्यस्यपदार्थान्तरस्य प्रतिपत्तौनियमानुपपत्तिः॥ अप्रतीतौव्यवच्छेदानुपपत्ति." इत्यादिनाक्षिप्य "शक्तिसङ्ख्यासादृश्यादिषुपदार्थेषु पराभिमतेषु षड्लक्षणायोग' परैरुच्यते ॥ तद्व्यवच्छेदोनियमार्थ." इति शक्त्यादीनां स्वमतेऽप्रसिद्धत्वेपि पराभिमतानां तेषां व्यवच्छेदोदर्शितः ॥ एवं साङ्ख्यग्रन्थेष्वपि (आर्या ४) दृष्टमनुमानमाप्तवचनंचसर्वप्रमाणसिद्धत्वात् ॥ त्रिविधंप्रमाणमिष्टप्रमेयसिद्धिःप्रमाणाद्धीत्यत्रस्वमते त्र्यधिकप्रमाणाऽभावाद्व्यावर्त्यालाभेपि नैयायिकमीमांसकाऽऽलङ्कारिकाद्यभिमतचतु.षडष्टप्रमाणपक्षव्यावर्तकं त्रिविधमिति विशेषणम् ॥ अतएवैतद्व्याचक्षाणोवाचस्पतिमिश्र "सङ्ख्याविप्रतिपत्तिं निराकरोति ॥ त्रिविधमिति" इत्याद्याह एव नैरुक्तवैयाकरणादिग्रंथेष्वपि "भावप्रधानमाख्यातं सत्त्वप्रधानानि नामानि" इत्यादौ विशेषणानां स्वमते व्यावर्त्यलाभालाभौदृश्यौ ॥ तथा ॥ कठगीतादिश्रुतिस्मृतिष्वपि "अजोनित्यःशाश्वतोयंपुराण" इत्यादिजीवविशेषणानां स्वमते व्यावर्त्यालाभाद्वैयर्थ्यं नापेयात् ॥ श्रुतिस्मृतिषु भावविकारयुक्तजीवस्याऽप्रसिद्धेः ॥ अथदेहादौ भावविकाराणांप्रसिद्धतया

जीवेपि ते संभाव्येरन्नतस्तद्व्यावर्तनार्थानितानि नापार्थानीति चेत् ॥ प्रकृतेपि लोके मायासंबन्धविशिष्टं कार्यकारणयोरद्वैतं भवद्भिरभिप्रेतमद्वैतशब्देन संप्रतिसंप्रतीयतइति तद्व्यावर्त्तनार्थमद्वैते शुद्धमितिविशेषणं सार्थकमेव ॥ अनेकत्रैतत्सुलभमेवेति तत्रतत्र स्वयमेव द्रष्टव्यम् ॥ किंच किमनेन शाखान्तरोदाहरणान्वेषणेन ॥ सर्वप्रमाणमूर्धन्यायांश्रुतावपि स्वमतप्रसिद्धविशेष्यसजातीयव्यावर्त्यशून्यानि विशेषणानि भास्करभाष्यस्थताद्दशव्याख्यानविशिष्टानि सन्त्येवातो न त्वया ताद्दशनियमः शक्योऽभ्युपगन्तुमित्याशयेनाहुः ॥ **ताद्दशनियमेत्यादिना** ॥ **सत्यंज्ञानमनन्तंब्रह्मेति** ॥ इदं तैत्तिरीयब्रह्मवल्लीवाक्यम् ॥ **तैत्तिरीयभाष्यइति** ॥ श्रीशङ्कराऽऽचार्यकृते तैत्तिरीयोपनिषद्भाष्ये ॥ सत्यमितीत्यादिर्निवर्तयतीत्यन्तस्तत्रत्यभाष्यग्रंथः ॥ ननुविशेषणमित्यादेर्भाष्यस्यपूर्वपक्षस्यानुवादरूपत्वमितीत्यतोग्रिमएकमेवचेत्यतः प्राक्तनोमध्यमोग्रन्थः प्रकृते विशेषतउपयोगस्याऽभावान्नान्ववादि ॥ **तत्पूर्वमिति** ॥ लक्षणपरत्वमनूदितचरव्याख्यानतः पूर्वं तत्र भाष्यउक्तम् ॥ **तट्टीकाकृतेति** ॥ उपनिषद्भाष्यटीकाकृता आनन्दज्ञानेन ॥ विशेषणपरत्वमपि तत्र स्फुटं ततोऽवधेयम् । प्रकृते शुद्धपदव्यावर्त्यमाहुः ॥ **एवंच परैरित्यादिना** ॥ मायाशबलस्यैव कारणत्वमित्युपलक्षणम् ॥ अविद्यापरपर्यायमलिनसत्त्वमायोपहितस्यैव जीवत्वेन कार्यत्वम् ॥ मायिकस्यैव प्रपञ्चस्य कार्यत्वं च परैरुक्तमिति भावः ॥ तथाच मायासंबन्धरहितकार्यकारणरूपंयद्वैवेत्यपरोक्षज्ञानं ब्रह्मरूपं शुद्धाद्वैतशब्दार्थः ॥ एवमेव शुद्धपदस्य व्यावर्त्यं गोस्वामिश्रीगिरिधरैः शुद्धाद्वैतमार्तण्डे अत्रैव शाङ्कराः प्राहुर्मायिकनश्वरजगदित्यादिना ॥ इतिब्रह्मविदांहार्दंशुद्धाद्वैतंश्रुतेर्मतमित्यन्तेन परोक्तानुवादपुरःसरं दर्शितम् ॥ तट्टीकायां च रामकृष्णभट्टैः "एवमद्वैतपदार्थं निरूप्य शुद्धपदव्यावर्त्यमाहुः" इत्यादिना "एवं च श्रुतिषु सर्वस्य शुद्धाद्वयत्वं स्पष्टमतः श्रुतेर्मतमित्यर्थः" इत्यन्तेन स्फुटीकृतम् ॥ एवं सत्यपि व्यावर्त्यालाभं वदन्वृथादोषारोपकएवेति निर्मत्सरैरुभयग्रन्थचिन्तकैरवगंस्यते ॥ आक्षेपान्तरं परिहरन्ति ॥ **एतेनेतीत्यादिना** ॥ **इत्यन्तेनेति** ॥ कृतइति शेषः ॥ **अनङ्गीकारेणेति** ॥ सिद्धान्ते जीवे मायासंबन्धस्यानङ्गीकारेण ॥ **टीकाकृतेत्यादि** ॥ मार्तण्डे (श्लो० २८) मायासंबन्धरहितमित्यस्य टीकायाम् ॥ "नचाहन्ताममतापाशस्य मायाकृतत्वेनमायासंबन्धस्यस्वमतेपिसंभव इतिवाच्यम्" इति पूर्वपक्षत्वेन जीवे मायासंबन्धस्योपन्यासं कृत्वाऽग्रे "स्वमतेमायाया अपि" इत्यादिना सखण्डितोऽतस्तदनङ्गीकारइति भावः ॥ **व्यावर्त्यालाभस्येति** ॥ स्वमतप्रसिद्धं यद्व्यावर्त्यं तदलाभस्येत्यर्थः ॥ साङ्ख्यमते तु ब्रह्मशब्दवाच्यं जडं प्रधानं प्रसिद्धमिति तदनुरोधादेव प्रकृतब्रह्मणि जडत्वसंभावनोदय ॥ तथात्र त्वन्मतप्रसिद्धमद्वैतमादाय कार्यकारणयोर्मायासंबन्धः संभाव्येतेति हृदयम् ॥ अत्र सहस्राक्षे (तद्युक्तएवाशुद्धइतिसएवव्यावर्त्यइति) इत्यत्र क्लीबनिर्देशोपेक्षितः मायासंबन्धयुक्तमेवाद्वैतमशुद्धमतस्तादृशाद्वैतमेव व्यावर्त्यमिति तदर्थात् ॥ नच जीवइति विशेष्याऽध्याहाराददोषइति वाच्यम् ॥ कार्यकारणयोर्मायासंबन्धराहित्यंवदद्भिरस्माभिर्जीवमात्रस्य व्यावर्त्यताया अनुक्ततया तस्यानुपस्थितेः ॥ नीलघटादिविशेषणनीलादि-

पदैरनीलघटादीनां व्यावृत्तिं दर्शयता त्वयाऽद्वैतविशेषणशुद्धपदेन जीवस्य व्यावृत्तेर्वक्तुमशक्यत्वाच्च ॥ अथ जीवस्यैवाद्वैतपदार्थत्वात्तद्युक्तोऽध्याहारइति चेज्जीवस्याशुद्धत्वेपीत्याद्यग्रिमग्रन्थविरोधः जीवाशुद्धतायाः स्वयमुक्ततया व्यावर्त्यलाभश्च ॥ एतेन तद्युक्तोवादीत्यादिपुल्लिङ्गविशेष्यान्तराध्याहृतिरपि निरस्ता अनुपस्थितेः ॥ अद्वैतविशेषणेन मायादेर्व्यावर्तनस्य वक्तुमनौचित्याच्च ॥ क्लीबनिर्देशोऽमायासेनाद्वैतविशेषणतायात्योधेपि बलात्पुल्लिङ्गानि विशेषणमात्राण्यभिधायाद्वैतपदार्थइति तदनुकूलविशेष्याऽध्याहारस्त्वाहोपुरुषिकामात्रम् ॥ यच्च (जीवस्याशुद्धत्वेऽप्यद्वैतपदार्थस्य तत्त्वाभावात्) इत्युक्तं तत्र ॥ कार्योपाधिरयंजीवःकारणोपाधिरीश्वरः इति मायासंबन्धवतोरेव कार्यकारणत्वाङ्गीकारे तयोरद्वैतेपि तद्वत्ताऽनपायात् ॥ अद्वैतपदस्य भेदज्ञानाभावइत्यर्थे सामानाधिकरण्यसंबन्धेनाभेदज्ञानमित्यर्थे विषयतादिसंबन्धेन तस्मिन्मायासंबन्धसाहित्यस्य सिद्धेः ॥ नच "द्वैतशब्देनचद्वाभ्यांप्रकाराभ्यामितंज्ञातंद्वीतंतस्यभावोद्वैतमितिव्युत्पत्त्यानामरूपे उच्येतेतद्रहितं चाद्वैतशब्देन" इतिमध्वपाद्युक्तयनुरोधेन नाम्निद्वैतंयस्मिन्निति विग्रहेण निर्विशेषमद्वैतपदवाच्यमतस्तथोक्तमिति वाच्यम् ॥ निर्विशेषे वाच्यतायाअनङ्गीकारात् ॥ अद्वैतपदलक्ष्यत्वे तद्वाच्यमन्यद्वक्तव्यं तच्च मायासंबन्धवदेव सेत्स्यति ॥ किञ्च निर्विशेषपरत्वेपि तदेकदेशे माया स्वीक्रियतएव ॥ यत्र प्रतिबिम्बितं यदवच्छिन्नं वा चैतन्यं कर्तृतामापद्येत ॥ यतश्च सृष्टिः स्यात् ॥ अन्यथा पुनःसृष्ट्युच्छेदः प्रसज्येत ॥ तस्यास्त्वेकदेशवर्तित्वं तु (पञ्चदशीप्रकरण २ श्लोक ५४।५५) नकृत्स्नब्रह्मवृत्तिःसाशक्तिः-किन्त्वेकदेशभाक् ॥ घटशक्तिर्यथाभूमौस्निग्धमृद्येववर्तते ॥ पादोस्यसर्वभूतानित्रिपादस्यस्वयंप्रभः ॥ इत्येकदेशवृत्तित्वंमायायावदतिश्रुतिरिति विद्यारण्यादयोभाषन्ते ॥ तथाच बलादापतितस्तत्रापिमायासंबन्धः ॥ तस्मात्त्वदभिमतमायासंबन्धसहिताद्वैतव्यावर्तनार्थं शुद्धपदमिति निरवद्यम् ॥ यत्तुमायासबन्धरहितमित्यस्यटीकास्थं मायायाअपीत्यादिकिञ्चित्पाठभेदेनानूद्य (मायायास्तत्संबन्धिनोवाऽशुद्धत्वस्यवक्तुमशक्यत्वाच्च) इत्यादि विरोधश्चेत्यन्तमुक्तमायितं तत्र ब्रूमः ॥ मार्तण्डे हि अनैवशाङ्कराःप्रादुर्भावयिकंनश्वरं जगत् ॥ मायासंबन्धतोब्रह्मकारणंनान्यथैवहीति परोक्ताऽनुवादे मायोपाधिसंबन्धादेव ब्रह्मणःकारणत्वं नतु तद्विनेति तेषामाशयोदर्शितः ॥ तेन "मायासंबन्धरहितंशुद्धमित्युच्यतेबुधैः ॥ कार्यकारणरूपंहिशुद्धंब्रह्मनमायिकम्" इत्यत्रमायासंबन्धपदेन कारणेऽनन्यथासिद्धकारणभावनिर्वाहकएवोपाधिभावरूपस्तत्संबन्धोहेयतयाविवक्षितः । एवं कार्येपि जीवेऽनन्यथासिद्धकार्यभावनिर्वाहकएवोपाधिभावरूपः सतथात्वेन विवक्षितः ॥ तथासत्येव कार्यकारणयोरशुद्धत्वम् ॥ कार्यत्वकारणत्वयोर्मायासंबन्धैकहेतुकत्वात् ॥ एवं प्रपञ्चेपि अस्तिभातिप्रियंरूपंनामचेत्यंशपञ्चके । तन्मते नामरूपयोर्मायिकत्वमेव ॥ स्वमते तु कार्ये कारणे च नोक्तविधस्तत्संबन्धः ॥ ब्रह्मैव स्वेच्छया जीवादिरूपेण परिणमतीत्यङ्गीकारात् ॥ नामरूपयोरपि भगवच्छिष्टयोरेव व्याकरणस्वीकारात् ॥ मायाशब्देन चात्र सदसत्त्वाभ्यां विलक्षणमज्ञानमेव पराभिमतं विवक्ष्यते प्रकरणात् ॥ ननु भगवदभिन्ना स्वाभाविकी तच्छक्तिः ॥ शक्तिशक्तिमतोरभेदेन सबन्धायोगात् ॥ शक्तिशक्तिमद्भावस्य जिज्ञासुबोध-

नार्थत्वात् ॥ एतच्च पुरस्तात्प्रपञ्चयिष्यते ॥ अतउक्तविधाज्ञानसंबन्धाभावात्कारणं नाशुद्धम् ॥ जीवोपि भगवदंशस्तदिच्छया स्वचरणात्ततः पृथग्भूतः ॥ तस्य जीवभावस्त्विच्छया स्वचरणात्स्वविद्योपाधिकृतः ॥ एवं प्रपञ्चोपि न मायिकः ॥ अतः पराभिमताज्ञानसंबन्धाभावात्कार्यमपि नाशुद्धमिति मार्तण्डकारिकाशयः ॥ एवञ्च परास्यशक्तिरित्यादिश्रुत्या परस्य स्वाभाविकशक्तेर्मायायाः पररूपतया नाशुद्धत्वम् ॥ भावरूपाज्ञानापरपर्यायमायायास्तत्संबन्धतएव कारणत्वशालिनश्चाशुद्धत्वं तु यदुक्तं शक्यमेव ॥ यद्यपि देहाद्यध्यासोमायिकस्तथापि जीवोनाशुद्धः ॥ स्वरूपस्य मायामूलकत्वाभावात् ॥ त्वन्मतेतुजीवभावएवाविद्यामूलकइति सोशुद्धः ॥ यथा काञ्चनपाञ्चालिकोपरि परितोमषीसलिललापनेपि न सा स्वरूपतोमलिना भवति ॥ प्रक्षालनादिना तदपसारणे शुद्धपुत्तलिकास्वरूपोपलब्धेः कज्जलजलमिलितमृत्स्नाकलितपुत्तलिकायायथा तु सा स्वरूपतो मलिनैव ॥ अतएव ततोमषी नापसारयितुं शक्या ॥ कथंचित्तदपसारणेपि तस्याः स्वरूपनाशएव ॥ नहि कज्जलापलेपनोत्तरं सा पुत्तलिकापदाभिलप्यावतिष्ठते ॥ एवमध्यासनिरासे शुद्धं जीवस्वरूपमस्मन्मते प्रकाशतइति तत्स्वरूपं नाशुद्धम् ॥ भवन्मते त्वविद्याध्वंसे जीवस्वरूपहानिरेव शुद्धचैतन्यस्य जीवपदानभिलप्यत्वात् ॥ अतोजीवस्वरूपमशुद्धमेव ॥ नन्वस्त्वेवं तथाप्यस्मत्सम्मताज्ञानसंबन्धस्य तद्विशिष्टकार्यकारणयोश्चाशुद्धत्वं कुतइति चेत्तावकैरेव तस्य मोक्षविरोधितायास्तदुच्छेदाय साधनानामुपयोगस्य च कथनादिति जानीहि ॥ तस्य शुद्धत्वे तु मोक्षेपि सोयतिष्ठतां कृतं तदुच्छेदप्रयासेन ॥ कार्यकारणयोरशुद्धत्वादेव त्वन्मते-कार्योपाधिरयंजीव कारणोपाधिरीश्वरः ॥ कार्यकारणतांहित्वापूर्णबोधोवशिष्यत इति तत्त्वावत्यागउच्यते ॥ प्रपञ्चस्य तु मायिकत्वात्तन्नाशएव मोक्षस्याङ्गीकाराच्चाशुद्धत्वं स्पष्टमेव ॥ मन्मते ब्रह्मणएव सर्वकार्यात्मनाऽऽविर्भूतत्वान्न द्वैतापत्तिगन्धोनापि सर्वं खल्विदमित्यादिश्रुतिविरोधगन्धः ॥ किन्तु तवैव तद्विरोधस्तदापत्तिश्च ॥ सर्वस्य मिथ्यात्वेन ब्रह्मणश्च सत्यत्वेन सर्वस्य ब्रह्मत्वानुपपत्तेस्तेजस्तिमिरयोरिव मिथ्यासत्यवस्तुनोरभेदस्यासंभवाच्च ॥ ननुसर्वस्य मिथ्यात्वेन द्वितीयस्याभावाद्द्वैतापत्तिस्तुन भवतीति चेदध्यासस्याब्रह्मत्वेपि तस्य मिथ्यात्वान्मन्मतेपि नसेति सन्तोष्टव्यम् ॥ तदेतत्सर्वमुररीकृत्याहुः ॥

एतेन जीवस्येत्यादिना ॥

किंचशङ्कराचार्यवदद्वैतं नाऽस्माकं संमतमिति बोधनमपिशुद्धपदस्य फलं व्यावर्त्यलाभान्वयसंभवौचदर्शितौ तेनव्यावर्त्यालाभेत्यादिदत्तोत्तरं ॥ यत्तु (किंचैवमद्वैतेशुद्धत्वं विधीयतइत्यायाति एवंचैकप्रसरताभङ्गभयादपिनसमासोपपत्तिः ॥ एवंच ननुअद्वैतपदार्थस्य त्वदुक्तार्थकत्वे भवत्वन्वयाऽनुपपत्ति) रित्याद्युक्तं तन्न एकप्रसरताभङ्ग एकवाक्यताभङ्गः ॥ सचाऽद्वैतेशुद्धत्वविधानेपिनसंभवति ॥ अन्यथाराज्ञःपुरुषइत्यत्रापिसमासो न स्यात् ॥ तत्रापिपुरुषेराजसंबन्धस्यैवविधेयत्वात् ॥ अतएवोक्तं भेदःसंसर्गउभयंवेतिवाच्यव्यव-

स्थितेरिति ॥ तत्रव्यपेक्षावादिनां नैयायिकमीमांसकादीनांमतेऽजह-
त्स्वार्थावृत्तिरतोराजलक्ष्यराजसंबन्धिनः पुरुषपदशक्यपुरुषत्वाव-
च्छिन्नाभेदान्वये राजसंबन्धीपुरुषइति वाक्यार्थस्वीकारेणराजसं-
बन्धः पुरुषे बोध्यते ॥ एकार्थीभावस्वीकर्तॄणांवैयाकरणानांमतेनमा-
सेशक्त्यस्वीकारेतस्यार्थवत्वाऽभावेनप्रातिपदिकसंज्ञानस्यादतःसमा-
सस्यैवार्थवत्वेनपदार्थस्याप्रयोजकत्वात्प्रपदस्यार्थवत्त्वमतोजहत्स्वार्था-
वृत्तिस्तैःस्वीक्रियतेतन्मतेऽपिराजसंबन्धविशिष्टपुरुषस्यवाक्यार्थत्वे-
पिपुरुषेराजसंबन्धबोधोऽर्थसिद्धएव ॥ एकप्रसरताभङ्गस्तुवषट्कर्तुः
प्रथमभक्षइत्यादौप्रैतुहोतुश्चमसइतिसमाख्याप्रापितस्यभक्षस्यानु-
वादेन प्राथम्यंविधीयतइतिचेत्तदाभवति ॥ प्रथमभक्षइतिपदस्यस-
मस्तत्वेनतादृग्भक्षपदार्थेवषट्कर्तृसंबन्धोबोध्यते तत्रैवप्राथम्यविधा-
नेचवषट्कर्तृसम्बन्धीभक्षः योभक्षः सप्रथमएवं वचनव्यक्तिः स्यात् ॥
तथा चस्पष्टोवाक्यभेदः ॥ प्राथम्यविशिष्टभक्षविधाने चसन्नसंभव-
तिभक्षे प्राथम्यमितरव्यावृत्तिस्त्वर्थतएवसंभवति ॥ एवमेव वषट्-
काराच्चभक्षयेदितिसूत्रे आद्यभक्षोवषट्कर्तुर्विधिःप्राथम्य एवहि किंवा-
तद्युक्तभक्षेस्याद्वषट्कारनिमित्तके अप्राप्तेरग्निमोमैवंसमासच्छित्यसं-
भवाद्विशिष्टस्यविधिस्तस्माद्वषट्कारोऽपिकारणमितिन्यायमालामुक्तं ॥
एवं चशुद्धाऽभिन्नाद्वैतस्यवाक्यार्थत्वे नमायासंबन्धनिवृत्तेरार्थिक-
त्वादेकप्रसरताभङ्गस्यानवकाशः ॥ अन्यथानीलघटइत्यत्रापि पीत-
व्यावृत्त्यर्थंघटेनीलत्वस्यैवत्वदुक्तरीत्याविधेयतयैकप्रसरताभङ्गभिया
तत्रापिसमासाऽनुपपत्तिः स्यात् ॥ अशुद्धाऽद्वैताभावेपिमायासंब-
न्धस्याऽशुद्धत्वप्रयोजकस्यव्यावर्त्यस्योक्तत्वादेव अशुद्धाद्वैताभावे-
नेत्यादिकंमत्युक्तम् ॥

सहस्राक्षे एतेनशङ्कराचार्येत्यादिभाग दूषयन्ति किञ्चशङ्कराचार्येत्यादिना ॥ सहस्राक्षे
एवकार शुद्धपदप्रयोगस्य प्रयोजनान्तरव्यवच्छेदार्थः ॥ मूले तूक्तरीत्या मायासंबन्धरहि-
तकार्यकारणात्मकत्वबोधनं ततएव शङ्कराचार्यसमताद्वैताद्वैलक्षण्यबोधनं च तत्प्रयोजन-
मिति ज्ञापनाय समुच्चयार्थोऽपिशब्दः प्रयुक्तः ॥ सहस्राक्षकृताऽऽपादितमेकप्रसरताभङ्ग-
मनूद्य परिहरन्ति ॥ यत्तुकिञ्चेत्यादिना ॥ इत्याद्युक्तमिति ॥ आदिपदेन व्यावर्त्याऽ-
लाभाच्चेत्यन्तस्तद्ग्रन्थोगृह्यते ॥ एकवाक्यताभङ्गइति ॥ नैयायिकमीमांसकादिसाधार-
ण्येनैतदुक्तम् ॥ वैयाकरणाभिप्रेतंत्वग्रे वक्ष्यते ॥ नैयायिकादिभिर्हि वाक्यादिव समासा-
दिवृत्तेरप्याकाङ्क्षासहकृतया वृत्तिघटकपृथक्पृथक्पदजन्यपदार्थोपस्थित्यैव शाब्दबोधः
स्वीक्रियते नतुविशिष्टशक्तिः ॥ तथाचवाक्यइवसमासेप्युद्देश्यविधेयभावस्तन्मते नानु-
पपन्नः ॥ शाब्दिकानामवयवशक्तिसहकृतया समुदायशक्त्या वृत्तिस्थले शाब्दबोधइति

पक्षेऽप्याथिकः सोऽस्त्येवेति वक्ष्यामः। विधानेपीति ॥ अपिशब्दः कैमुतिकद्योतनार्थः ॥ तेन विधानाङ्गीकारेपि न दोषः ॥ किमुत शुद्धस्यविशिष्टाद्वैतस्य स्वातन्त्र्येण विधानाङ्गीकारे नस्यादिति ॥ एकप्रसरताभङ्गभयात्स्यादिति भावः ॥ विधेयत्वादिति ॥ नच यद्वृत्त-योगःप्राथम्यमित्याद्युद्देश्यलक्षणम् ॥ तद्वृत्तयोगः पश्चात्त्वंस्याद्विधेयस्यलक्षणमित्यभियुक्तो-क्तेरनन्तरोपात्तपुरुषपदार्थे प्रथमोपात्तराजपदार्थतत्संबन्धस्य विधेयत्वमनुपपन्नमिति वाच्य-म् ॥ तस्याः प्रायिकतायाः "भावप्रधानमाख्यातंसत्त्वप्रधानानिनामानि॥ (अ० १ पा० १ सू० १) वृद्धिरादैच् (अ० १ पा० १ सू० ४१) अपृक्तएकाल्प्रत्ययः (अ० १ पा० २ सू० ४१) समर्थःपदविधिः (योगसूत्रपाद १ सूत्र २) योगश्चित्तवृत्तिनिरोधः (पूर्व-मीमांसा अध्याय २ पाद १ सूत्र ५) औत्पत्तिकस्तुशब्दस्यार्थेनसंबन्धः (सू० १२) समंतु तत्रदर्शनम् (पा० २ सू० ८) तुल्यंचसांप्रदायिकम्" इति निरुक्तपाणिनीयपात-ञ्जलजैमिनीयादिषु प्रयोगदर्शनतोऽवधारणात् ॥ दर्शितंचेदंपण्डितोब्राह्मणइत्यादौयद्वृत्ते-तिनियमव्यभिचारप्रदर्श्य "अतएववृद्धैरपियद्वृत्तयोगःप्राथम्यमित्याद्युद्देश्यलक्षणमित्यत्रा-दिपदोपादानेनास्याऽनैयत्यंसूचितम्" इति प्राचीनमतमुदाहरतामप्पाकृता ॥ किञ्च नहि वैयाकरणैरपि समासादावन्तर्वर्तिविभक्त्यर्थस्य संसर्गमर्यादयैवभानमङ्गीक्रियते येनाविधेयत्वंतस्याशङ्क्येत अपितु प्रकारतयापीत्यभिप्रेत्याहुः ॥ अतएवोक्तमिति ॥ भूषणे जहत्स्वार्थाजहत्स्वार्थेद्वेवृत्तीतेपुनस्त्रिधा ॥ भेद.संसर्गउभयंवेतिवाच्यव्यवस्थितेः ॥ इत्युक्तमित्यर्थ. ॥ एतदर्थस्तु जहति पदानि स्वार्थं यस्यां सा जहत्स्वार्था ॥ धनंवनमि-त्यादिपदेषु धकारादिवर्णानामिव राजपुरुषइत्यादिवृत्तौ तद्घटकराजादिपदानामानर्थक्यम् ॥ अयंभावः ॥ समासशक्त्यैव राजविशिष्टपुरुषबोधे संभवति नराजपुरुषपदयोरपि पुनस्त-द्बोधकत्वं कल्प्यम् ॥ आनुपूर्व्यन्तरघटकत्वाभावविशिष्टानुपूर्व्याएव शक्ततावच्छेदकतया वृषभादिपदघटकवृषाद्यानुपूर्व्याः शक्तानवच्छेदकत्ववत्समासान्तर्गतराजाद्यानुपूर्व्याः शक्तावच्छेदकत्वासंभवात् ॥ अन्यथा रामादिपदात्तदवयवरेफाद्यभिधेयवन्ह्याद्यर्थोप-स्थितिशाब्दबोधावापद्येताम् ॥ एकवचनमुत्सर्गतः करिष्यतइत्यौत्सर्गिकत्वावान्तरगोरुप-त्तिर्धनंवनमित्यादौ जस्त्वादिकं चापद्येत ॥ वाक्येतु पदानामेवार्थवत्त्वम् ॥ राजसंबन्धि-पुरुष इत्याद्यर्थे राज्ञः पुरुषः पुरुषोराज्ञः इत्यादिविशिष्टतत्तदानुपूर्वीणां पृथक्पृथक्शक्त-तावच्छेदकत्वकल्पनापेक्षया पदशक्तिकल्पनायाएव लघीयस्त्वात् ॥ वाक्यवद्वृत्तावपि व्यपे-क्षाङ्गीकारे तु राजपदेन विग्रहवाक्यइव राज्ञः स्वातन्त्र्येणोपस्थितिसंभवाद्वाक्ये ऋद्धस्य राज्ञः पुरुषः राज्ञः पुरुषोभार्यायाश्चेत्यादिवदृद्धस्य राजपुरुषः राजपुरुषोभार्यायाश्चेत्यपि प्रयुज्येत ॥ विशिष्टशक्तिस्वीकारे तु राजेत्यस्य पदार्थैकदेशत्वाद्भेदेपि शक्तेर्वक्ष्य-माणतयाऽराजकीयमिवइति बोधाच्च नोक्तदोषप्रसङ्गः ॥ अजहदिति ॥ न जहति पदानि स्वार्थं यस्यां सा ऽजहत्स्वार्था ॥ अयमाशयः ॥ राजपुरुषादिसमास-स्थले क्लृप्तप्रत्येकपदशक्त्यतिरिक्ता शक्तिर्न कल्प्या ॥ विशिष्टशक्तिकल्पकस्याऽन्य-थानुपपत्त्यादेरभावात् ॥ विग्रहवाक्यइव क्लृप्तशक्त्यैव बोधसंभवे शक्त्यन्तरकल्पने गौरवाच्च ॥ वाक्येऽवश्यक्लृप्तप्रत्येकपदशक्तेस्त्यागे मानाभावाच्च ॥ काञ्चभेदेनान्वे-

कस्यैव राजादिशब्दस्यार्थवत्त्वानर्थवत्त्वे कल्पनामात्रमूलके ॥ राजशब्दादेरर्थवत्त्वाभावेऽप्रातिपदिकत्वेननलोपशास्त्राप्रवृत्त्या नलोपाद्यनुपपत्तिश्च ॥ एवंमहाबाहुरित्यादौ समानाधिकरणमहच्छब्दाऽभावादात्वाद्यसंभवश्च ॥ तस्माद्वृत्तावपि वाक्यइव क्लृप्तशक्त्यैवविशिष्टार्थोपस्थितिरितिसंक्षेपः ॥ नचास्मिन्पक्षे ऋद्धस्य राजपुरुषइत्यादिप्रयोगापत्तिः शङ्क्या ॥ "सविशेषणानांवृत्तिर्न वृत्तस्यवाविशेषणयोगोन" इति वार्तिककृता प्रतिषेधात् ॥ यद्यपि वैयाकरणाभिप्रेतं अजहत्स्वार्थास्वरूपमन्यदेव भाष्यादौ दर्शितं तथाप्ययं व्यपेक्षापक्षोमहाभाष्ये समर्थसूत्रे "परस्परव्यपेक्षांसामर्थ्यमेके" इत्यादिना मतान्तरतया सङ्गृहीतइत्यत्राविसव्याख्यातः ॥ तेपुनस्त्रिधेति ॥ तेद्वे अपि वृत्तौ पुनस्त्रिविधे भेदः संसर्गः तदुभयं चेति वाच्यस्य त्रिविधस्य मतभेदेन व्यवस्थितत्वात् ॥ तत्र भेदोऽन्योन्याभावः ॥ तथाच राजपुरुष इत्यादावराजकीयभिन्नइतिबोधः ॥ भेदस्यावाच्यत्वे राजपुरुषः सुन्दरइत्यादिवद्राजपुरुषो भार्यायाश्चेत्यपि प्रयुज्येत ॥ अथवा राजसंबन्धवानित्येव शाब्दं भानं भेदस्तु पश्चादुपतिष्ठत इत्याशयेनोक्तं संसर्गइति ॥ भेदाविनाभावित्वादनुमापकस्तन्मूलकः संबन्धः ॥ अथवा विनिगमनाविरहादस्वामिकेऽन्यस्वामिके वा राजपुरुषइत्यादिप्रयोगापत्तेश्च तदुभयं वाच्यमित्याशयेनोक्तमुभयंचेति ॥ तथाचाराजकीयभिन्नोराजसबन्धवानिति बोधइति भूषणादेः संक्षेपः ॥ तदेतत्सर्वमुक्तं समर्थसूत्रे भाष्ये ॥ तद्यथा "अथवासमर्थाधिकारोयंवृत्तौक्रियेत ॥ सामर्थ्यंचनामभेदः संसर्गोवा ॥ अपरआह भेदसंसर्गौवा सामर्थ्यमिति ॥ कःपुनर्भेदः संसर्गोवा ॥ इहराज्ञ इत्युक्तेसर्वंस्वंप्रसक्तंपुरुषइत्युक्तेसर्वे.स्वामीप्रसक्तः ॥ इहेदानींराजपुरुषमानयेत्युक्तेराजापुरुषंनिवर्तयत्यन्येभ्यःस्वामिभ्यः ॥ पुरुषोपिराजानमन्येभ्यःस्वेभ्यः" इति ॥ अत्र कैयटः ॥ यदिचवृत्तौभेदससर्गौनस्यातांतदासामर्थ्यमेवनस्यात्तदात्मकत्वात्सामर्थ्यस्येत्यर्थः ॥ तत्रभेदः संसर्गाविनाभावित्वादनुमीयमानससर्गःसामर्थ्यम् ॥ संसर्गोवाभेदाविनाभाव्यनुमेयभेदः ॥ उभौवायौगपद्येनाश्रीयमाणौसामर्थ्यमित्यर्थः ॥ सर्वंस्वमिति ॥ राज्ञइतिषष्ठ्यासंबन्धिमात्रस्याक्षेपात् ॥ सर्वःस्वामीति ॥ यदातुपुरुषस्यपारतन्त्र्यं प्रमाणान्तरेणावगतंतदपेक्षयैतदुच्यते ॥ अन्यथापुरुषइत्युक्तेअस्तीति प्रतिपत्तिः स्यान्नतुस्वामिमात्राक्षेपः ॥ तत्रभेदपक्षे राजापुरुषंस्वाम्यन्तरेभ्योनिवर्त्यस्वार्थंजहाति ॥ पुरुषस्तुअजहदपिस्वार्थंस्वान्तरेभ्योनिवर्तयतिराजानंततश्चकृतकार्यस्यभवतुराजार्थस्यनिवृत्तिः ॥ अकृतकार्यस्यनिवृत्तौवृत्तिरेवनस्यात् ॥ एवंसंसर्गेपियोज्यमितिव्याचष्ट ॥ अत्रोद्योतकारः ॥ तत्रभेदइति ॥ स्वत्वसमानाधिकरणो राजभिन्नस्वामिकभेदोराजसंसर्गव्याप्यः ॥ एवंवृत्त्युपस्थाप्यराजसबन्धवद्व्यक्तिगतराजसंबन्धो राजभिन्नस्वामिकभेदव्याप्यइतिभावः ॥ एवंचभेदवद्व्यक्तिबोधेसाराजसंसर्गवत्यपीतितद्वत्तीव्यक्तिरपिबुध्यतएव ॥ एवमितरत्रापीति तात्पर्यम् ॥ उभौवायौगपद्येनेति ॥ अयंभावः ॥ उक्तरीत्योभयो समनियतत्वेनविनिगमनाविरहइति ॥ एवंचभेदवदर्थप्रत्यायकत्वंसामर्थ्यम् ॥ इतिव्यवृणोत् ॥ एवं प्रकृतेप्यद्वैतेऽशुद्धभेदःशुद्धत्वं तदुभय वावगम्यतइत्यनवद्यम् ॥ सर्वमतेष्वपि प्रकृते दोषाभावं समर्थयन्ते ॥ तत्रेत्यादिना ॥ तत्र ॥ जहत्स्वार्थाऽजहत्स्वार्थापक्षयोर्मध्ये ॥ व्यपेक्षेति ॥ समर्थसूत्रेभाष्ये "तथेदम-

परंद्वैतंभवति ॥ एकार्थीभावो वासामर्थ्यंव्यपेक्षावेति" इति द्विविधंसामर्थ्यमुक्तम् ॥ एतत्स्वरूपं तु "यत्रपदान्युपसर्जनीभूतस्वार्थानि निवृत्तस्वार्थानिवाप्रधानार्थोपादानाद्व्यर्थान्यर्थान्तराभिधायीनि वास एकार्थीभावः ॥ परस्पराकांक्षारूपाव्यपेक्षा" इति कैयटः ॥ अत्र विवरणे "अनेकार्थस्यैकार्थत्वमेकार्थीभावइतिशब्दशक्तिमनुसृत्यजहत्स्वार्थाजहत्स्वार्थयोस्तं दर्शयिष्यन्नादावजहत्स्वार्थायांतं दर्शयति यत्रपदानीति ॥ उपसर्जनपदानीत्यर्थः ॥ तदेवध्वनयन्नाह ॥ उपसर्जनभूतस्वार्थानीति ॥ इतरविशेषणभूतस्वार्थोपस्थापकानीत्यर्थः ॥ नतु पृथक्स्वार्थोपस्थापकानीतितात्पर्यम् ॥ एवंचतत्पुरुषादौएकंपदं तादृशंबहुव्रीहौद्वन्द्वेच पदद्वयमपीतिबोध्यम् ॥ जहत्स्वार्थायामाह ॥ निवृत्तस्वार्थानिवेति ॥ उभयत्रापिहेतुःप्रधानार्थोपादानादिति ॥ आद्येप्रधानार्थेनस्वोपस्थितिकालेएवउपसर्जनपदार्थस्यविशेषणतयोपादानादित्यर्थः ॥ अन्त्येप्रधानेन पदेन तदर्थस्याप्युपादानादित्यर्थः ॥ बहुव्रीहौतुप्रधानं पदंसमुदायइतिबोध्यम् ॥ एवंद्वन्द्वेपि प्रधान पदंसमुदायस्तदर्थेनसाहित्येनस्वविशेषणतया धवाद्यर्थस्योपादानादुपसर्जनभूतस्वार्थानियद्वाविशेष्यसाहित्योपस्थापकतयाप्रधानेनसमुदायेनैव धवाद्यर्थस्याप्युपादानान्निवृत्तस्वार्थानिवेति ॥ तत्राप्ययमेकार्थीभावः ॥ समाहारेतरेतरयोगयोरुभयोरपिसाहित्यंविशेष्यम् ॥ आद्येऽनुद्भूतावयवभेदमन्त्ये उद्भूतावयवभेदमित्येव तयोर्भेदइतिबोध्यम् ॥ व्यर्थानीतिसन्निहितत्वान्निवृत्तस्वार्थानीत्येतत्पक्षान्वयि ॥ आद्येआह ॥ अर्थान्तरेति ॥ अर्थान्तरान्वितस्वार्थाभिधायीनीत्यर्थः ॥ प्रत्येकशक्तिसहकृतसमुदायशक्त्याविशिष्टार्थप्रतिपादकानीतिभावः ॥ पदानीतिबहुवचनंतुबहुव्रीह्याद्यभिप्रायेण ॥ सएकार्थीभावइति ॥ आद्येएकीभूतार्थानिमिलितार्थानीत्यर्थः ॥ तत्रमिलितस्येतरसाकांक्षत्वाद्द्वयोरपिसमर्थत्वंतत्पुरुषादौ ॥ अन्त्येपदद्वयार्थयोरेकपदार्थत्वप्राप्तिरित्यर्थः" इति वैयाकरणाभिप्रेतजहत्स्वार्थाजहत्स्वार्थयोरपि दिङ्मदर्शितेत्यन्यदेतत् ॥ व्यपेक्षास्वरूपं तु स्वार्थपर्यवसायिनांपदानामाकांक्षादिवशात्परस्परसंबन्ध इति बहवः ॥ वाक्यइव वृत्तावपि व्यपेक्षां वदतां नैयायिकमीमांसकादीनां मते राजादिपदानि स्वार्थं न जहतीत्यजहत्स्वार्था वृत्तिः ॥ अयं तेषामाशयः ॥ समर्थःपदविधिरितिसूत्रे परस्परान्वययोग्यत्वरूपा व्यपेक्षैव सामर्थ्यमभिप्रेयते ॥ इसुसोःसामर्थ्यइत्यत्र तादृशसामर्थ्यस्यैव सर्वैरङ्गीकारात् ॥ अतएव पुत्रोराज्ञः पुरुषोदेवदत्तस्येत्यादौ व्यपेक्षासामर्थ्याभावादेव न समासप्रसक्तिः ॥ किञ्चवृत्तित्वावच्छेदेनैकार्थीभावस्याङ्गीकारे स्वावयवार्थातिरिक्ताभिप्रायकत्वरूपवृत्तिलक्षणस्य कर्मधारयेऽव्याप्तिः नीलोत्पलमित्यादाववयवार्थातिरिक्तार्थाभावात् ॥ वृत्तित्वसामानाधिकरण्येन तु रथन्तरादिशुद्धरूढे पङ्कजादियोगरूढे च कोशव्यवहारादिसिद्धायाः समुदायशक्तेरस्माभिरपि स्वीकारेण सिद्धसाधनम् ॥ शुद्धयौगिकचित्रगवादिसमुदाये तु शक्त्यन्तरं तद्बोधककोशाद्यभावादवयवपदवृत्त्यैवोपपत्तेश्च हेयमिति ॥ तथाच राजपुरुष इत्यादौ राजपदादेः संबन्धिलक्षणयैव राजसंबन्ध्यभिन्नः पुरुष इति बोधः ॥ नच संबन्ध एव लक्ष्योस्तु ॥ एवं च व्याससमासयोः समानाकारबोधजनकत्वप्रवादोऽप्युपपत्स्यते ॥ राजादिसंबन्धरूपलक्ष्यार्थस्योत्तरपदार्थे आश्रयतयान्वयेनैवोपपत्तौ संबन्धिनि लक्षणाभ्युपगमे प्रयोजनाभावश्चेतिवाच्यम् ॥ राजा पुरुषइत्या-

कस्यैव राजादिशब्दस्यार्थवत्त्वानर्थवत्त्वे कल्पनामात्रमूलके ॥ राजशब्दादेरर्थवत्त्वा-
भावेऽप्रातिपदिकत्वेनलोपशास्त्राप्रवृत्त्या नलोपाद्यनुपपत्तिश्च ॥ एवंमहाबाहुरित्यादौ
समानाधिकरणमहच्छब्दाऽभावादात्वाद्यसंभवश्च ॥ तस्माद्वृत्तावपि वाक्यइव शुद्धशक्त्यै-
वविशिष्टार्थोपस्थितिरितिसंक्षेपः ॥ नचास्मिन्पक्षे ऋद्धस्य राजपुरुषइत्यादिप्रयोगापत्तिः
शङ्क्या ॥ "सविशेषणानांवृत्तिर्न वृत्तस्यवाविशेषणयोगोन" इति वार्तिककृता प्रतिषे-
धात् ॥ यद्यपि वैयाकरणाभिप्रेतं अजहत्स्वार्थास्वरूपमन्यदेव भाष्यादौ दर्शितं तथा-
प्ययं व्यपेक्षापक्षोमहाभाष्ये समर्थसूत्रे "परस्परव्यपेक्षांसामर्थ्यमेके" इत्यादिना
मतान्तरतया सङ्गृहीतइत्यत्रापिसव्याख्यातः ॥ तेपुनस्त्रिधेति ॥ तेद्वे अपि वृत्ती पुनस्त्रि-
विधे भेदः संसर्गः तदुभयं चेति वाच्यस्य त्रिविधस्य मतभेदेन व्यवस्थितत्वात् ॥ तत्र
भेदोऽन्योन्याभावः ॥ तथाच राजपुरुष इत्यादावराजकीयभिन्नइतिबोधः ॥ भेदस्यावा-
च्यत्वे राजपुरुषः सुन्दरइत्यादिवद्राजपुरुषो भार्यायाश्चेत्यपि प्रयुज्येत ॥ अथवा राज-
संबन्धवानित्येव शाब्दं भानं भेदस्तु पश्चादुपतिष्ठत इत्याशयेनोक्तं संसर्गइति ॥ भेदा-
विनाभावित्वादनुमापकस्तन्मूलकः संबन्धः ॥ अथवा विनिगमनाविरहादस्वामिकेऽन्य-
स्वामिके वा राजपुरुषइत्यादिप्रयोगापत्तेश्च तदुभयं वाच्यमित्याशयेनोक्तमुभयंचेति ॥
तथाचाराजकीयभिन्नोराजसंबन्धवानिति बोधइति भूषणादेः संक्षेपः ॥ तदेतत्सर्वमुक्तं
समर्थसूत्रे भाष्ये ॥ तद्यथा "अथवासमर्थाधिकारोयंवृत्तौक्रियेत ॥ सामर्थ्यंचनामभेदः
संसर्गोवा ॥ अपरआह भेदसंसर्गौवा सामर्थ्यमिति ॥ कःपुनर्भेदः संसर्गोवा ॥ इहराज्ञ
इत्युक्तेसर्वंस्वंप्रसक्तंपुरुषइत्युक्तेसर्वःस्वामीप्रसक्तः ॥ इहेदानींराजपुरुषमानयेत्युक्तेराजा
पुरुषंनिवर्तयत्यन्येभ्यःस्वामिभ्यः ॥ पुरुषोपिराजानमन्येभ्यःस्वेभ्यः" इति ॥ अत्र कैयटः ॥
यदिचवृत्तौभेदसंसर्गौनस्यातांतदासामर्थ्यमेवनस्यात्तदात्मकत्वात्सामर्थ्यस्येत्यर्थः ॥ तत्रभेदः
संसर्गाविनाभावित्वादनुमीयमानससर्गःसामर्थ्यम् ॥ संसर्गोवाभेदाविनाभावाद्नुमेयभेदः ॥
उभौवायौगपद्येनाश्रीयमाणौसामर्थ्यमित्यर्थः ॥ सर्वंस्वमिति ॥ राज्ञइतिषष्ठ्यासंबन्धि-
मात्रस्याक्षेपात् ॥ सर्वःस्वामीति ॥ यदातुपुरुषस्यपारतन्त्र्यं प्रमाणान्तरेणावगतंतदपेक्षयै-
तदुच्यते ॥ अन्यथापुरुषइत्युक्तेऽस्तीति प्रतिपत्तिः स्यान्नतुस्वामिमात्राक्षेपः ॥ तत्रभेदपक्षे
राजापुरुषंस्वाम्यन्तरेभ्योनिवर्तयन्स्वार्थंजहाति ॥ पुरुषस्तुअजहदपिस्वार्थंस्वान्तरेभ्योनिवर्त-
यतिराजानंततश्चकृतकार्यंस्यभवतुराजार्थस्यनिवृत्तिः ॥ अकृतकार्यस्यनिवृत्तौवृत्तिरेवनस्यात् ॥
एवंसंसर्गेपियोज्यमितिव्याचष्ट ॥ अत्रोद्योतकारः ॥ तत्रभेदइति ॥ स्वत्वसमानाधिकरणो
राजभिन्नस्वामिकभेदोराजसंसर्गव्याप्यः ॥ एवंवृत्त्युपस्थाप्यराजसंबन्धवद्व्यक्तिगतराज-
संबन्धो राजभिन्नस्वामिकभेदव्याप्यइतिभावः ॥ एवंचभेदवद्व्यक्तिबोधेसाराजसंसर्गवत्य-
पीतितद्वतीव्यक्तिरपिबुध्यतएव ॥ एवमितरत्रापीति तात्पर्यम् ॥ उभौवायौगपद्येनेति ॥
अयंभावः ॥ उक्तरीत्योभयो समनियतत्वेनविनिगमनाविरहइति ॥ एवंचभेदवदर्थप्रत्याय-
कत्वंसामर्थ्यम् ॥ इतिव्यवृणोत् ॥ एवं प्रकृतेप्यद्वैतेऽशुद्धभेदःशुद्धत्वं तदुभयं वाव-
गम्यतइत्यनवद्यम् ॥ सर्वमतेष्वपि प्रकृते दोषाभावं समर्थयन्ते ॥ तत्रेत्यादिना ॥
तत्र ॥ जहत्स्वार्थाऽजहत्स्वार्थपक्षयोर्मध्ये ॥ व्यपेक्षेति ॥ समर्थसूत्रेभाष्ये "तयेदम-

परंद्वैतंभवति ॥ एकार्थीभावो वासामर्थ्यंव्यपेक्षावेति" इति द्विविधंसामर्थ्यमुक्तम् ॥ एतत्स्वरूपं तु "यत्रपदान्युपसर्जनीभूतस्वार्थानि निवृत्तस्वार्थानिवाप्रधानार्थोपादानाद्व्यर्थान्यर्थान्तराभिधायीनि वास एकार्थीभावः ॥ परस्पराकांक्षारूपान्यपेक्षा" इति कैयटः ॥ अत्र विवरणे "अनेकार्थस्यैकार्थत्वमेकार्थीभावइतिशब्दशक्तिमनुसृत्यजहत्स्वार्थाजहत्स्वार्थयोस्तं दर्शयिष्यन्नादावजहत्स्वार्थायांतं दर्शयति यत्रपदानीति ॥ उपसर्जनपदानीत्यर्थः ॥ तदेवध्वनयन्नाह ॥ उपसर्जनभूतस्वार्थानीति ॥ इतरविशेषणभूतस्वार्थोपस्थापकानीत्यर्थः ॥ नतु पृथक्स्वार्थोपस्थापकानीतितात्पर्यम् ॥ एवंचतत्पुरुषादौएकंपदं तादृशंबहुव्रीहौद्वन्द्वेच पदद्वयमपीतिबोध्यम् ॥ जहत्स्वार्थामाह ॥ निवृत्तस्वार्थानिवेति ॥ उभयत्रापिहेतुःप्रधानार्थोपादानादिति ॥ आद्येप्रधानार्थेनस्वोपस्थितिकालेएवउपसर्जनपदार्थस्यविशेषणतयोपादानादित्यर्थः ॥ अन्त्येप्रधानेन पदेन तदर्थस्याप्युपादानादित्यर्थः ॥ बहुव्रीहौतुप्रधानं पदंसमुदायइतिबोध्यम् ॥ एवंद्वन्द्वेपि प्रधान पदंसमुदायस्तदर्थेनसाहित्येनस्वविशेषणतया-धवाद्यर्थस्योपादानादुपसर्जनभूतस्वार्थानियद्वाविशेष्यसाहित्योपस्थापकतयाप्रधानेनसमुदायेनैव धवाद्यर्थस्याप्युपादानान्निवृत्तस्वार्थानिवेति ॥ तत्राप्ययमेकार्थीभावः ॥ समाहारेतरेतरयोगयोरुभयोरपिसाहित्यंविशेष्यम् ॥ आद्येऽनुद्भूतावयवभेदमन्त्ये उद्भूतावयवभेदमित्येव तयोर्भेदइतिबोध्यम् ॥ व्यर्थानीतिसन्निहितत्वान्निवृत्तस्वार्थानीत्येतत्पक्षान्वयि ॥ आद्येआह ॥ अर्थान्तरेति ॥ अर्थान्तरान्वितस्वार्थाभिधायीनीत्यर्थः ॥ प्रत्येकशक्तिसहकृतसमुदायशक्त्याविशिष्टार्थप्रतिपादकानीतिभावः ॥ पदानीतिबहुवचनंतुबहुव्रीह्याद्यभिप्रायेण ॥ सएकार्थीभावइति ॥ आद्येएकीभूतार्थानिमिलितार्थानीत्यर्थः ॥ तत्रमिलितत्वेतरसाकांक्षत्वाद्वयोरपिसमर्थत्वंतत्पुरुषादौ ॥ अन्त्येपदद्वयार्थयोरेकपदार्थत्वप्राप्तिरित्यर्थः" इति वैयाकरणाभिप्रेतजहत्स्वार्थाजहत्स्वार्थयोरपि दिक्प्रदर्शितेत्यन्यदेतत् ॥ व्यपेक्षास्वरूपं तु स्वार्थपर्यवसायिनांपदानामाकांक्षादिवशात्परस्परसंबन्ध इति बहवः ॥ वाक्यइव वृत्तावपि व्यपेक्षां वदतां नैयायिकमीमांसकादीनां मते राजादिपदानि स्वार्थं न जहतीत्यजहत्स्वार्था वृत्तिः ॥ अयं तेषामाशयः ॥ समर्थःपदविधिरितिसूत्रे परस्परान्वययोग्यत्वरूपा व्यपेक्षैव सामर्थ्यमभिप्रेयते ॥ इसुसोःसामर्थ्यइत्यत्र तादृशसामर्थ्यस्यैव सर्वैरङ्गीकारात् ॥ अतएव पुत्रोराज्ञः पुरुषोदेवदत्तस्येत्यादौ व्यपेक्षासामर्थ्याभावादेव न समासप्रसक्तिः ॥ किञ्चवृत्तित्वावच्छेदेनैकार्थीभावस्याङ्गीकारे स्वावयवार्थातिरिक्ताभिधायकत्वरूपवृत्तिलक्षणस्य कर्मधारयेऽव्याप्तिः नीलोत्पलमित्यादावयवार्थातिरिक्तार्थाभावात् ॥ वृत्तित्वसामानाधिकरण्येन तु रथन्तरादिशुद्धरूढे पङ्कजादियोगरूढे च कोशव्यवहारादिसिद्धायाः समुदायशक्तेरस्माभिरपि स्वीकारेण सिद्धसाधनम् ॥ शुद्धयौगिकचित्रग्वादिसमुदाये तु शक्त्यन्तरं तद्बोधककोशाद्यभावादवयवपदवृत्त्यैवोपपत्तेश्च हेयमिति ॥ तथाच राजपुरुष इत्यादौ राजपदादेः संबन्धिलक्षणयैव राजसंबन्ध्यभिन्नः पुरुष इति बोधः ॥ नच संबन्ध एव लक्ष्योस्तु ॥ एवं च व्याससमासयोः समानाकारबोधजनकत्वप्रवादोप्युपपत्स्यते ॥ राजादिसंबन्धरूपलक्ष्यार्थस्योत्तरपदार्थे आश्रयतयान्वयेनैवोपपत्तौ संबन्धिनि लक्षणाभ्युपगमे प्रयोजनाभावश्चेतिवाच्यम् ॥ राजा पुरुषइत्या-

दावपि राजादिपदार्थस्य स्वस्वामिभावसंबन्धेन पुरुषाद्यन्वयवारणाय निपातातिरिक्त-नामार्थनिष्ठभेदातिरिक्तसंबन्धावच्छिन्नप्रकारतानिरूपितविशेष्यतासंबन्धेन शाब्दबुद्धिं प्रति विशेष्यतासंबन्धेनप्रत्ययनिपातान्यतरजन्योपस्थितेर्हेतुत्वस्यावश्यकतया प्रकृते राजसंबन्ध-रूपनामार्थस्य प्रत्ययनिपातान्यतरानुपस्थिते पुरुषाद्यन्वयासंभवात् ॥ निपातातिरिक्त-त्वविशेषणाच्चन्द्र इवमुखमित्यादाविव पदार्थसादृश्यस्य नामार्थस्य प्रत्ययनिपातजन्यो-पस्थितत्वविषये मुखे निपातातिरिक्तनामार्थचन्द्रस्यच निपातजन्योपस्थितिविषये सादृश्येऽन्व-येपि नक्षति. ॥ अभेदातिरिक्तसंबन्धावच्छिन्नत्वस्य प्रकारतायां निवेशाच्च राजा पुरुषइत्या-दावभेदान्वयेपि न सा ॥ संबन्धिनि लक्षणाभ्युपगमादेव राज्ञ. पदार्थैकदेशतयानतत्र शोभ-नस्येत्यादिविशेषणान्वयः ॥ पदार्थः पदार्थेनान्वेतीतिव्युत्पत्तेः ॥ ननुगभीरायांनद्यांघोपइत्या-दौनदीपदलक्ष्यनदीतीरार्थैकदेशजलादौगभीराद्यन्वयवदत्राप्येकदेशान्वयोदुर्वारइति चेन्न ॥ तत्राप्येतन्मतेनदीपदस्यगभीरनदीतीरेलक्षणा ॥ गभीरपदं तात्पर्यग्राहकमित्यदोपात् ॥ पूर्वोक्तव्युत्पत्ते ससंबन्धिकव्यतिरिक्तविषयतयाचैत्रस्यनप्तेत्यादावेकदेशान्वयेपिनक्षति· ॥ निष्कौशाम्बिर्धनश्यामोगोरथइत्यादौकौशाम्ब्यादिपदस्यैवकौशाम्ब्यवधिकनिष्क्रमणकर्त्रर्थे लक्षणाभ्युपगमेनैवेप्सितार्थबोधोपपत्तौक्रान्तेवयुक्तादिशब्दानामुपादानस्यानापत्तिः ॥ एवं चित्रगुरित्यादावपिगवादिशब्दानामेवचित्रगवीस्वाम्यादौलक्षणाचित्रादिपदतात्पर्यग्राह-कम् ॥ नचसमासेखलुभिन्नैवशक्ति पङ्कजशब्दवदितिप्रतिबन्दी विशिष्टशक्तिसाधिका वाच्या ॥ तत्रावयवशक्तिमजानतोपिबोधात् ॥ नह्यवयवशक्त्यग्रहेलक्षणयापङ्कादिशब्दे-भ्योविशिष्टार्थप्रत्ययोवस्तुतस्तत्रैवनलक्षणा ॥ अतएव राजादिपदशक्त्यग्रहे राजपुरुषइत्यादौ न बोध. ॥ प्राप्तोदकइत्यादौ तूत्तरपदमेव लाक्षणिकम् ॥ शीघ्रोपस्थितिकत्वात् ॥ पूर्वपदस्य यौगिकत्वेन तल्लक्षणायाधातुप्रत्ययतदर्थज्ञानसाध्यतयाविलंबितत्वात् ॥ प्रत्य-यानासंनिहितपदार्थगतस्वार्थबोधकत्वव्युत्पत्तेश्च ॥ घटादिपदे व्यतिरिक्ताशक्तिः कल्प्य-माना विशिष्टे कल्प्यते ॥ विशिष्टएव तत्सङ्केतस्य व्यवहारादितोनिर्धारात् ॥ प्रत्येकवर्णेषु बोधकत्वस्याभावाच्च ॥ स्वीकृत च घटादिपदेष्वपि पूर्वपूर्ववर्णानुभवजन्योद्बुद्धसंस्कार-सहितचरमवर्णस्यैव वाचकत्व मीमांसकै ॥ अत केवलचरमवर्णादर्थबोधस्तु नापद्यते ॥ उपकुम्भमित्यादावुत्तरपदस्यैव समीपाद्यर्थेलक्षणा पूर्वपद तात्पर्यग्राहकम् ॥ अर्धपिप्पली-त्यादौ षष्ठीतत्पुरुषेपिचरमपदस्यैव पिप्पल्यर्धाद्यर्थे सा ॥ नीलोत्पलमित्यादौकर्मधारये तु न सा ॥ प्रत्येकपदशक्त्युपस्थितयोरभेदान्वयसौलभ्यात् ॥ शङ्खपटहमिति द्वन्द्वेप्यु-त्तरपदस्य शङ्खपटहसमाहारे लक्षणा पदान्तर द्योतकम् ॥ तत्रैव परम्परया वादनकर्म-त्वान्वयः इतरेतरयोगद्वन्द्वे साहित्यापन्नप्रत्येकपदार्थयोरुत्तरपदस्यैवसा ॥ अतएव द्विवच-नार्थद्वित्वाद्यन्वयस्तत्र ॥ समाहारद्वन्द्वे साहित्यं विशेष्यमत्र तु विशेषणमिति भेद· यद्वा समाहारद्वन्द्वे साहित्याप्रतीतेर्नै लक्षणा तत्र ॥ किन्तुप्रत्येकपदशक्त्युपस्थाप्ययोरेव तयोः साक्षाद्वादनादिकर्मत्वाद्यन्वय. ॥ एवमितरेतरयोगेपि न लक्षणा ॥ एकस्मृत्यारूढपदद्व-याप्रत्येकशक्त्युपस्थितार्थयोर्द्वित्वान्वयसंभवात् ॥ एकक्रियान्वयित्वरूपस्यैकबुध्यव-

चिछन्नस्वरूपस्य वा साहित्यस्य पश्चाद्वगमेनपूर्वं तत्र लक्षणाग्रहासंभवाच्च ॥ पङ्कजरथकारादियोगरूढपदेषु पद्मत्वजातिविशेषादिरूपेणोपस्थितये रूढिशक्तिः स्वीक्रियत एव ॥ नच तत्रापि लक्षणैवास्त्विति वाच्यम् ॥ तस्यास्तत्रासंभवात् ॥ तथाहि सा किं पङ्कजपदे उत उभयत्र ॥ नाद्यः ॥ समुदाये शक्त्यभावेन शक्यघटितलक्षणाया असंभवात् ॥ मण्डपादिशब्दवज्जहत्स्वार्थायावृत्तेस्तत्रासत्त्वाच्च ॥ यत्र ह्यवयवार्थविरोधिनी रूढिस्तत्रैव साभ्युपगम्यते ॥ जहत्स्वार्थातु तत्रैवयत्ररूढिर्विरोधिनीत्यभियुक्तोक्तेः ॥ न द्वितीयः ॥ प्रकृत्यर्थस्यानन्वयापत्तेस्तदर्थे प्रत्ययस्यासाधुतापत्तेश्च राजपुरुषइत्यादौ तु प्रत्येकपदवृत्त्यापि विशिष्टार्थबोधनिर्वाहे समुदायशक्तिकल्पनं तत्रानुचितमेव ॥ नापि षष्ठे (पा० १ सू० ४४) "वचनाद्रथकारस्याधानेऽस्यसर्वशेषत्वात्" इत्यादिसप्तसूत्ररथकाराधिकरणबाधः ॥ "वर्षासुरथकारआदधीत" इत्यत्र यौगिकार्थेरथकरणनिमित्ते वर्षर्तुविधानस्य संकरस्य विशिष्टाधानापेक्षया लघुत्वेपि तैत्तिरीयब्राह्मणप्रथमकाण्डे (प्रपा० १ अनु० ४) "ऋभूणांत्वादेवानांव्रतपतेव्रतेनादधामीतिरथकारस्य" इति श्रवणेन "ऋभूणांत्वा" इति मन्त्रवर्णादृभुसौधन्वनपर्यायप्रतिलोमजातिरथकारस्यैव तदधिकारावगत्या लाघवानादरेण रूढार्थे तत्र विशिष्टाधानकल्पनात् ॥ मन्त्रवर्णे विशेषस्तु (अ० ६ पा० १ सू० ५०) "सौधन्वनास्तुहीनत्वान्मन्त्रवर्णात्प्रतीयेरन्" इति सूत्रे भाष्ये "सौधन्वनानामजातिरभिधीयते ॥ हीनास्तु किञ्चित्त्रैवर्णिकेभ्यः, जात्यन्तरम्, नतु शूद्राः न वैश्यानक्षत्रियाः तेषां इदमाधानम् ॥ कथमवगम्यते ॥ प्रसिद्धेर्मन्त्रवर्णाच्च ॥ मन्त्रवर्णोहि भवति ॥ "सौधन्वनाऋभवःसूरचक्षसः" इति 'ऋभूणांत्वा' इति रथकारस्याधानमन्त्रः ॥ तस्मात्सौधन्वनाऋभवः इति, ऋभवश्चरथकाराः ॥ अपिच "नेमिंनयन्ति ऋभवोयथा" इति ये नेमिं नयन्तिते ऋभवः इत्युच्यन्ते ॥ रथकाराश्च नेमिं नयन्ति ॥ तस्मात् अत्रैवर्णिकानां अशूद्राणां एतत् आधानमिति" ॥ इति शबरस्वामिना दर्शितः ॥ रथकारशब्दस्य तत्र रूढिं तु प्रथमाध्याये वर्णजातिविवेके याज्ञवल्क्यो दर्शयति ॥ माहिष्येणकरण्यांतुरथकारः प्रजायत इति ॥ वैश्यायांक्षत्रियादुत्पन्नोमाहिष्यः ॥ शूद्रायां वैश्यादुत्पन्नाकरणीत्यन्यदेतत् ॥ नच तस्याऽपूर्वविद्याध्ययनादिकल्पनागौरवम् ॥ फलमुखत्वात् ॥ प्रकृते राजपुरुषादिसमुदाये शक्तिग्राहकंन तादृशं कोशादिकं येन तद्बलादवयवार्थः परित्यज्येतेति स्थिते कोनामैकप्रसरताभङ्गदोषः ॥ विशिष्टशक्तिं स्वीकुर्वतां मते हि तदाशङ्कामात्रमपि प्रसज्यते ॥ नतुव्यपेक्षावादे ॥ नीलोत्पलादौ कर्मधारयस्थले तु लक्षणापि नास्तीत्युक्तं प्राक् ॥ एवं शुद्धाद्वैतपदेपि ॥ अतएव वृत्तिविग्रहयोः समानार्थकत्वाय राजा पुरुषइत्यादौ राजा चासौ पुरुषइति चित्रगुरित्यादौ चित्राणां गवामयमिति मीमांसकाविगृह्णन्ति ॥ अथकथंतर्ह्येकप्रसरताभङ्गभिया "वषट्कर्तुःप्रथमभक्षः" इत्यत्र भक्षमुद्दिश्य प्राथम्यं विधीयतइत्यस्यायुक्तत्वमुक्तं तृतीयइति चोद्यं तु मूलएव समाधास्यते ॥ एकार्थीभावेत्यादि ॥ अयं भावः ॥ समासे विशिष्टशक्त्यस्वीकारे तस्य प्रातिपदिकसंज्ञादिकंनस्यात् ॥ अर्थवत्त्वाभावेनार्थवदधातुरप्रत्ययःप्रातिपदिकमित्यस्याप्रवृत्तेः ॥ नच कृत्तद्धितेत्यत्रसमासग्रहणेन सा संभवति ॥ तस्य नियमार्थतायाभाष्यकारा-

दिभिरुक्तत्वात् ॥ समासेशक्त्यभावेन वाक्यसंबन्धरूपलक्षणाया अप्यसंभवेन लाक्षणिकार्थवत्वस्याप्यसंभवाच्च ॥ किञ्च राजपुरुषइत्यादौ राजादिपदस्य संबन्धिनि संबन्धे या लक्षणा ॥ नाद्यः ॥ राज्ञः पुरुषइति विवरणविरोधात् समासमानार्थकवाक्यस्यैव विग्रहत्वात् ॥ अन्यथा तस्माच्छक्तिनिर्णयोन स्यात् ॥ नान्त्यः ॥ राजसंबन्धरूपः पुरुष इति बोधापत्तेः ॥ विरुद्धविभक्तिरहितप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्तेः ॥ अपिच ॥ बहूनांवृत्तिधर्माणांवचनैरेवसाधने ॥ स्यान्महद्गौरवंतस्मादेकार्थीभावआस्थितः ॥ चकारादिनिषेधोथबहुव्युत्पत्तिभञ्जनम् ॥ कर्तव्यंतेन्यथासिद्धंत्वस्माकंतदितिस्थितिरिति भूषणोक्तकारिकाभ्यामेकार्थीभावस्वीकारपक्षस्यैवसम्यक्त्वंप्रतीयते ॥ तदर्थस्त्वयम् ॥ वृत्तेर्धर्मालिङ्गसंख्याविशेषणाद्यऽयोगादयस्तेषाम् ॥ "सविशेषणानांवृत्तिर्नवृत्तस्यवाविशेषणयोगोने"त्यादिवचनैःसाधने गौरवम् ॥ तथा चवस्त्रदिरौ निष्कौशांबिर्गोरथोघृतघटो गुडधानाः केशचूडः सुवर्णालङ्कारोद्विरदाः सप्तपर्णइत्यादावेवेतरेतरयोगादिक्रान्तयुक्तपूर्णमिश्रसंघातविकारसुत्प्रत्ययलोपवीप्साद्यर्थवाचनिकोवाच्यइत्यतिगौरवं स्यादिति ॥ दूषणान्तरमुक्तम् चकारादीति ॥ आदिना घनश्यामो हंसगमना इत्यादाविवाऽऽदीनां पूर्वोक्तानां च सङ्ग्रहः ॥ दूषणान्तरमाह ॥ बहुव्युत्पत्तिभञ्जनमिति ॥ अयमाशयः ॥ चित्रगुरित्यत्र स्वाम्यादिप्रतीतिरनुभवसिद्धा ॥ नच तत्र लक्षणा ॥ प्राप्तोदकोग्राम इत्यादौ तदसंभवात् ॥ प्राप्तिकर्त्रभिन्नमुदकमित्यादिबोधोत्तरं तत्संबन्धिग्रामलक्षणायामपि उदककर्तृकप्राप्तिकर्मग्रामइत्यर्थालाभात् ॥ प्राप्तेति क्तप्रत्ययस्यैव कर्त्रर्थकस्य कर्मणि लक्षणेति चेत्तर्हि समानाधिकरणप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्तेरुदकाभिन्नं प्राप्तिकर्मेति स्यात् ॥ अन्यथा समानाधिकरणप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्तिभङ्गापत्तिः ॥ एवमूढरथः उपहृतपशुः उद्धृतौदनेत्यादावपि द्रष्टव्यम् ॥ अधिकं तु भूषणादौ स्पष्टमेवेत्यलं प्रासङ्गिकेन ॥ प्रकृतमनुसरताभङ्गस्त्वित्यादि ॥ अयमाशयः ॥ पूर्वतन्त्रे तृतीयस्य पञ्चमे पादे ॥ (सूत्र १८) "ऐन्द्रवायवेतुवचनात्प्रतिकर्मभक्षःस्यात्" इत्येकसूत्रे पञ्चमाधिकरणे संस्कारार्थत्वात्पूर्वाधिकरणन्यायेन सकृद्भक्षे प्राप्ते "द्विरैन्द्रवायवस्यभक्षयतिद्विर्हितस्यवषट्करोति" इति वचनाद्द्विर्भक्षं स्थापयित्वा (सूत्र १९) "सोमेऽवचनाद्भक्षोनविद्यते" इत्यादित्रिसूत्रे षष्ठाधिकरणे ग्रहाणां होमाद्वचनाभावाच्चाभक्षं पूर्वपक्षीकृत्य "भक्षं जुहोति" इति विशेषवचनात्सोमस्य शेषसत्वेन तत्प्रतिपत्तौ विचार्यमाणायां "सर्वतः परिहारमाश्विनं भक्षयति" इत्याद्यपूर्वार्थवचनैर्भक्षणमुत्तरपक्षीकृत्य (सूत्र २२) "चमसेषुसमाख्यानात्संयोगस्यतन्निमित्तत्वात्" इत्येकसूत्रेसप्तमाधिकरणे ज्योतिष्टोमे श्रूयमाणं "प्रैतुहोतुश्चमसःप्रब्रह्मणःप्रोद्गातॄणांप्रयजमानस्यप्रयन्तुसदस्याना"मिति वाक्यं विचारितम् ॥ तत्र चमसिनां चमसेषु भक्षणमस्ति नवेति संशये पूर्ववद्वचनाभावादभक्षे प्राप्ते "होतुश्चमसोब्रह्मणश्चमसः" इत्यादिसमाख्याबलाद्भक्षणं सिद्धान्त्यते ॥ तथाहि चम्यतेऽस्मिन्निति चमसः ॥ भक्षणार्थाच्चमतेरधिकरणार्थे औणादिकोऽसन् ॥ नच तत्र होताऽन्यदोदनादि चमिष्यति ॥ सोमचमस इति हि तं समाचक्षते ॥ नच तद्धोतुर्द्रव्यं किन्तु यजमानस्य ॥ स्पष्टं चेदं

तत्र भाष्ये ॥ अतोहोतुः संयोगश्चमसे भक्षनिमित्तम् ॥ यदातृणादीनामभ्युत्पन्नत्वमाश्रीयते तदापि भाट्टदीपिकायाम् "यदितृणादयोऽभ्युत्पन्नाइतिपक्षाश्रयणंतदाचमसशब्दस्यपात्रेरूढत्वेयोग्यतयैवहोतृसोमादिसंबन्धोभक्ष्यभक्षकत्वादिसंबंधेनैवेतितयाभक्षणसिद्धिरविकला अतश्चहोतृभक्षोद्गातृयजमानमैत्रावरुणब्राह्मणाच्छंसिपोतृनेष्टृच्छावाकाग्नीध्राणां स्वस्वचमसेपुसमाख्ययाभक्षः ॥ तदस्यपक्षेतस्यापिस्वचमसेवचनंत्वग्रेनिरूपयिष्यते" इत्युक्तम् ॥ ततश्च चतुःसूत्रेऽष्टमाधिकरणेभाष्यवार्तिकभेदेन सुब्रह्मण्यसहितानां तद्रहितानां वा सामगानामुद्गातृचमसे भक्षणं चतुःसूत्रेनवमाधिकरणे ग्रावस्तुतोहारियोजनभक्षं च व्यवस्थाप्य (सू० ३१) "वषट्काराच्चभक्षयेत्" इत्येकसूत्रे दशमाधिकरणे "वषट्कर्तुःप्रथमभक्षः" इति चिन्त्यते ॥ अत्र किं भक्षमुद्दिश्य प्राथम्यं विधीयतउत प्राथम्यविशिष्टोभक्षः ॥ तत्र सप्तमाधिकरणे समाख्यया प्राप्ते प्राथम्यमभाससमत्रविधीयत इतिप्राप्ते प्रथमभक्षइति समस्तपदेन योभक्षः सप्रथमइति व्यक्तेरसंभवात्प्राथम्यविशिष्टभक्षएवात्र वषट्कारनिमित्तकोविधीयते ॥ अतएवेहभाष्ये शबरस्वामी ॥ "अथकिंसमाख्यैवैकाभक्षकारणम् ॥ नइतिब्रूमः ॥ "वषट्काराच्चभक्षयेत्" वषट्कारश्चभक्षणेनिमित्तम् ॥ कथम् ॥ वचनात् ॥ एवंहिश्रूयते ॥ "वषट्कर्तुः प्रथमभक्षः" इति ॥ भक्षणस्यअप्राप्तत्वान्नप्राथम्यविधानार्थएपशब्दःकिन्तु प्राथम्यविशिष्टंभक्षणमेवविदधाति इति" इत्याह ॥ कमलाकरभट्टोपिमीमांसाकमलाकरे "वषट्कर्तुः प्रथमभक्षइत्यत्रान्त्येपदेसमाख्याप्राप्तभक्षानुवादेनकर्तृविशिष्टभक्षानुवादेनवाप्राथम्यविधौवैरूप्याद्वाक्यभेदाच्च कर्त्रादिविशिष्टभक्षविधेर्वषट्कारोपिनिमित्तम्" इत्याचष्टे ॥ एवंचात्रसूत्रे समाख्याप्राप्तभक्षादतिरिक्तएवायंप्राथम्यविशिष्टोभक्षइति बोधनार्थएवसमुच्चयार्थश्चशब्दइति मम प्रतिभाति ॥ अत्र भाट्टदीपिकायां खण्डदेवः सयुक्तिकं पूर्वपक्षमुपन्यस्य "प्रथमभक्षइति समासरूपेएकस्मिन्पदेएकांशेनोद्देश्यत्वेएकांशेनविधेयत्वेचाङ्गीक्रियमाणेएकप्रसरताभङ्गापत्तेःकर्मान्तरमेवेदम् ॥ नचतस्मिन्नुपकतानीज्ञाभावः ॥ सामर्थ्यभङ्गस्यैवतद्बीजत्वात् ॥ तथाहि ॥ सर्वत्रोद्देश्यविधेयभावस्थलेउद्देश्येविधेयान्वयात्पूर्वमुद्देश्यस्योद्देश्यत्वेनक्रियान्वयोवश्यंवक्तव्यः ॥ अतएवयच्छब्दयोगःप्राथम्यमित्याद्युद्देश्यलक्षणमित्यपिसङ्गच्छते ॥ प्राथम्यंतत्वेनप्रथमं क्रियान्वयोन्यस्यातिप्रसक्तत्वात् ॥ तदत्र यद्भिन्नपदस्थले यागेनस्वर्गंभावयेदित्यादौ तत्तत्पदात्पदार्थोपस्थित्यनन्तरं स्वर्गस्योद्देश्यत्वेन यागस्य च विधेयत्वेन क्रियान्वये प्रथममवगते पश्चादेव विधेयस्य यागस्योद्देश्ये स्वर्गे अन्वयइति स्थितिः ॥ तद्वच्चेहाप्येकपदस्थले भक्ष्ये प्राथम्यान्वयात्पूर्वं भक्षस्य क्रियान्वयोभ्युपगन्तव्यः ॥ ततश्च क्रियान्वयात्पूर्वं भक्षप्राथम्ययोर्विशेषणविशेष्यभावानवगमादेकार्थीभावलक्षणसामर्थ्यभङ्गादपरिपूर्णस्य समासपदस्य पदान्तरेणाख्यातेनाप्यन्वयायोगः ॥ यद्यपि चास्मिन्मते वैयाकरणनद्धिशिष्टार्थवाचकत्वं न सामर्थ्यं तथापि क्रियान्वयात्पूर्वं उद्देश्यस्य सत्त्वेन क्रियान्वयस्य वक्तुमशक्यत्वात् ॥ अतएवविविदिषन्तियज्ञेनेत्यादौ विविदिषोद्देशेन यज्ञादिभाव-

नाविधानेपि न क्षतिः ॥ अतश्चैकप्रसरताभङ्गभिया भक्षान्तरमेव विधेयम् ॥ अतएव लोहितोष्णीषेत्यादावतिदेशात्पूर्वमेवलोहितोष्णीषविशिष्टाः कर्तारएवप्रचारोद्देशेन विधीयन्ते विशेषणमात्रविधिपक्षकादतिवज्ञतत्रैकप्रसरताभङ्गपरिहारप्रकारोवक्ष्यते ॥ अतश्च प्रकृते एकप्रसरताभङ्गभिया प्राथम्यस्य पूर्वकर्मण्यनिवेशाद्गुणादेव वषट्कर्तृप्राथम्योभय-विशिष्टभक्षान्तरमेवविधीयते सोमसंस्कारार्थम् ॥ तत्र च यागार्थत्वेन वषट्कारस्य कृत-त्वात्कर्तुरुपलक्षणमात्रत्वेनार्थान्निमित्तत्वावगतेर्वषट्कारनिमित्तकमिदं भक्षणं ग्रहेषु चम-सेषुचाविशेषात्सिद्धं भवति" इत्याचष्टे ॥ एवमपि भावत्काभिप्रेतमद्वैतमेवोद्दिश्य न शुद्धत्वं विधीयते येन एकप्रसरताभङ्गप्रसङ्गः स्यात् किन्तु ततोतिरिक्तमेव शुद्धत्वविशिष्ट-मद्वैतं बोध्यते ॥ तत्रार्थिकः शुद्धत्वगुणयोगस्त्वशक्यप्रतिषेधः ॥ तेन त्वदभिप्रेतस्य व्यावृत्तिरप्यर्थसिद्धैवेति एतदधिकरणार्थप्रकाशकं माधवकृतजैमिनीयाधिकरणमालास्थं कारिकाद्वयमाहुः ॥ आद्यभक्षेवषट्कर्तुरिति ॥ समासस्यविछित्तिश्छेदः ॥ क्वचित्समा-सस्थित्यसंभवादितिपाठस्तुव्याख्यानविरोधादयुक्तोभाति ॥ एतच्च माधवेनैव न्यायमाला-विस्तराख्येतद्विवरणे स्फुटीकृतम् ॥ "वषट्कर्तुःप्रथमभक्षइत्येवंश्रूयते ॥ वषट्कर्ताहोता-तस्यभक्षणंसमाख्ययाप्राप्तम् ॥ प्राथम्यत्वमप्राप्तमितितदेवात्रविधीयतइतिचेत् ॥ मैवम् ॥ प्रथमभक्षइत्यस्यसमस्तपदत्वेनयोभक्षः सप्रथमइत्येवंविच्छिद्यान्वेतुमयोग्यत्वात्प्राथम्यवि-शिष्टंभक्षणमत्रविधीयते ॥ तस्मिन्भक्षणेवषट्कारःकारणम्" इति ॥ अत्रेदमपिबोध्यम् ॥ मीमांसकैर्विशिष्टशक्तेरनभ्युपगमेपिविशिष्टलक्षणायाअंगीकारादेकप्रसरतातन्मतेसिध्यति॥ एकप्रसरत्वंनाम समासघटकपदयोरुद्देश्यविधेयभावेनान्वयाबोधकत्वं ननु विशिष्टार्थो-पस्थितिजनकत्वम् ॥ तादृशव्युत्पत्तिशरीरं तु समासघटकपदार्थनिष्ठविधेयतानिरूपितोद्दे-श्यतासंबन्धेन शाब्दबुद्धिं प्रति समासघटकपदजन्योपस्थितिःप्रतिबन्धिकेति ॥ नचतादृ-शप्रतिबन्ध्यप्रतिबन्धकभावकल्पने गौरवमितिवाच्यम् ॥ सर्वत्र विशिष्टशक्तिकल्पनापेक्षया क्वचित्प्रतिबन्ध्यप्रतिबन्धकभावकल्पने एव लाघवात् ॥ वस्तुतस्तु प्रथमपदार्थान्वितभक्ष-विशेष्यकबोधानुभवएवेतिमीमांसकैर्विशिष्टशक्तिरभ्युपेता ॥ एवं च यत्र वृत्तिघटकपदार्थस्य मानान्तरेणसिद्धस्वरूपस्योद्देश्यत्वमवगतं तत्रैवेयं व्युत्पत्तिर्न सर्वत्र ॥ अन्यथा क्वापिसमा-सोनस्यादित्यभिप्रेत्योक्तं प्राक् ॥ क्वापि समासोनस्यादिति ॥ यच्चकैश्चिद्वैयाकरणै-रयमेवैकप्रसरताभंगोनाम यद्विशिष्टैकोपस्थितिजनकत्वरूपसामर्थ्यभङ्गः ॥ उद्देश्यविधेय-भावेनान्वये पृथगुपस्थितेस्तन्त्रत्वेनतद्भङ्गादित्युक्तं तन्न ॥ भाष्यकृतानुक्तत्वात् ॥ किञ्चो-द्देश्यत्वविधेयत्वे यच्छब्दतच्छब्दोपव र्ण्यइत्वे ॥ वृत्तौ ऋद्धस्यादिवत्तदन्वयासंभवान्न तथान्वयः ॥ एकार्थीभावाभावेपि घटमित्यादौयोघटः सकर्मेत्युद्देश्यविधेयतयाऽन्वयस्या-भावेन सतितात्पर्ये वसोरेद्धावभ्यासलोपश्चेत्यादौ समासेपि तथान्वयदर्शनेनचैकप्रसरता-भङ्गस्यैकार्थीभावकृतत्वाभावनिश्चयाच्च ॥ किञ्च तयान्वयाऽभिप्रायेणसमासप्रयोगेपि प्राप्तत्वाप्राप्तत्वादिपर्यालोचनोत्तरं लोहितोष्णीषाइत्यादौ तथाबोधोभवत्येवेति नासाधुते-

स्याशयेनायं भाष्ये नोक्तः ॥ विशेषणंविशेष्येणबहुलमितिसूत्रे "उभयविशेषणत्वादुभयोश्चविशेष्यत्वादुपसर्जनाप्रसिद्धि"रितिवार्तिके उभयमुद्दिश्य विशेषणत्वस्य विधेयताप्रतीतेश्च ॥ प्राप्ताप्राप्तविवेकस्तुपण्डितत्वविधिस्त्वपण्डितब्राह्मणइतिप्रयोगेब्राह्मणत्वमवगतंपण्डितत्वंचानवगतमितिध्येयः ॥ अतएव काव्यप्रकाशकृतेदशसमासवाक्यानि द्वितीयमौर्वीमिवकार्मुकस्य ॥ वपुर्विरूपाक्षमलक्ष्यजन्मतेत्यादीनिसप्तमोल्लासेच्युतसंस्कृतिदोषेनोदाहृतानि किन्त्वविमृष्टविधेयांशएव ॥ एवं च पृथगुपस्थितयोस्तथान्वयइत्युत्सर्गस्य त्यागेनसहृदयहृदयस्य वैमुख्यं केवलं तस्यदूषकताबीजम् ॥ यत्तु काव्यप्रदीपे गोविंदसूरिणा "उद्देश्यंविधेयंचयदिपृथक्पदाभ्यामुपतिष्ठतेतदाप्राप्तमुद्दिश्याप्राप्तंविधीयते नच समासे पृथक्पदादुपस्थितिरपृथगुपस्थितौ च न तथा व्युत्पत्तिरित्युक्त तत्रोत्सर्गेणेति शेषोबोध्यः इतिमञ्जूषाकारः साहित्यदर्पणेपिसप्तमपरिच्छेदे स्वर्गग्रामटिकाविलुण्ठनवृथोच्छूनैःकिमेभिर्भुजैरित्यादीन्यविमृष्टविधेयांशस्थलएवोदाहृतानि ॥ च्युतसंस्कारतायांतु गाण्डीवीकनकशिलानिभंभुजाभ्यामाजघ्नेविषमविलोचनस्यवक्षइत्येवोदाहृतम् ॥ "आङोयमहनः ॥ स्वाङ्गकर्मकाचेतिअनुशासनबलादाङ्पूर्वस्यहनःस्वाङ्गकर्मकस्यैवात्मनेपदंनियमितम् ॥ इह तु तल्लङ्घितमितिव्याकरणलक्षणहीनत्वाच्च्युतसंस्कारत्वम्" इति यद्येकप्रसरताभङ्गेऽपप्रयोगोऽभिप्रेयेत्तर्हितान्यत्रोदाह्रियेरन् ॥ किञ्च समासादावपि तथाव्युत्पन्नस्य तद्बोधोदुर्वारः ॥ भाष्याद्यनुक्तेश्च नासाधुत्वम् ॥ विशिष्टोपरिस्थितावपि विशेषणादौ प्रकारतादिस्वीकारवदुद्देश्यत्वादिस्वीकारे बाधकाभावात् ॥ स्पष्टं चेदं प्रायेण सर्वं लघुमञ्जूषायाम् वृत्तिविचारे ॥ अधिकं च तत्रैव कर्मधारयविचारे "सप्तदशारत्निर्वाजपेयस्ययूपोभवति ॥ लोहितोष्णीषाऋत्विजःप्रचरन्तीत्यादौ वाजपेययूपारत्नीनुष्णीषंचानूद्यसप्तदशत्वलौहित्यादिविधिरितिमीमांसकाः" इत्यादि द्रष्टव्यम् ॥ तदेतत्सर्वंमनसि कृत्वाहुः ॥ एवञ्चशुद्धाभिन्नेत्यादि ॥

मायायाभगवच्छक्तिरूपत्वेनभगवदभिन्नतयाशुद्धत्वेनसदसद्विलक्षणस्याऽनिर्वचनीयस्याज्ञानस्याऽशुद्धत्वसंपादकस्यास्वीकाराद्वस्मन्मतेशुद्धाद्वैतंसार्ववैदिकम् ॥ भवन्मतेतुतादृशाज्ञानविशिष्टस्यैवजगत्कारणत्वेनजीवस्यापिमायोपहितत्वस्वीकारेणजगतोपिभ्रमाधिकत्वेनैतन्मतेइतिसङ्गतम् ॥ एवंचकिञ्चेत्यादिकमसङ्गतमेव ॥

यच्चसहस्राक्षे किञ्चशङ्कराचार्यमतइत्यादितन्मते अभावादित्यन्तं तद्दूषयन्ति ॥ मायाया भगवच्छक्तीत्यादिना ॥ अयं भाव. ॥ मायायाभगवच्छक्तित्वं "यस्मान्मायी" विद्ययाऽविद्यायाशक्त्यामाययाचलिप्तेवितमित्यादिश्रुतिपुराणसिद्धम् ॥ तस्याभगवदभिन्नत्वं तु "पराऽस्यशक्तिः" इत्यादौ परत्वस्वाभाविकत्वादिश्रावणात् ॥ प्रकाशाश्रयादिसूत्रैः कौर्मादिवचनैश्चशक्तिशक्तिमतोरभेदस्योपपादयिष्यमाणत्वाच्च ॥ एतेन मिथ्यात्वमनोरथोपास्तः ॥ मिथ्यावस्तुनः परत्वस्वाभाविकत्वाद्ययोगात् ॥ अभेदादेव

नास्माकं द्वैतापत्तिर्नाप्युक्तरीतिकःसंबन्धः ॥ पराऽभिन्नत्वाच्च न तस्याशुद्धत्वम् ॥ परस्य शुद्धबुद्धत्वाधाम्नानात् ॥ नहि वह्नौ शुद्धे तद्गताशक्तिरशुद्धा भवति ॥ त्वदभिमत मायाशब्दवाच्यमज्ञानं तु मोक्षविरोधित्वात्साधनैरुच्छेद्यत्वाच्चाशुद्धत्वसंपादकमेवेत्युक्तं प्राक् ॥ तस्य तथात्वादेव तदनुपहिततया जीवेश्वरातिरिक्तस्यैव चैतन्यस्यशुद्धत्वं तावक-ग्रन्थेष्वभ्युपगम्यते जीवईशोविशुद्धाचिदित्यादौ ॥ अतः शुद्धकार्यकारणात्मकब्रह्माद्वैता-भावान्न तव मते शुद्धाद्वैतम् ॥ नच मन्मते अद्वैतज्ञानात्पूर्वमपि ब्रह्मणः शुद्धत्वमेवेति वाच्यम् ॥ ब्रह्मैकदेशे मायायाः सार्वदिकसत्वाङ्गीकारेण तदभावात् ॥ अनङ्गी-कारे पुनः सृष्ट्युच्छेदप्रसङ्गात् ॥ सृष्टिप्रलययोः पौनःपुन्यबोधकस्य "प्रजायन्ते तत्रैवापियन्ति ॥ धातायथापूर्वम्" इत्यादिशास्त्रस्यव्याकोपाच्च ॥ नच तस्यामिथ्या-त्वेन न तत्संबन्धइति वाच्यम् ॥ अज्ञानस्य मिथ्यात्वेन भावरूपत्वासिद्धेः ॥ कल्पित-त्वानादित्वानुपपत्तेश्च ॥ मायया जीवभावोजीवकल्पिताचसेत्यन्योन्याश्रयाच्च ॥ सद-सत्वाभ्यामनिर्वचनीयत्वस्वीकारेण सत्वांशेन तत्संबन्धस्यानपायाच्च ॥ तस्मात् जीवई-शोविशुद्धाचिद्विभागस्त्वनयोर्द्वयोः ॥ अविद्यातत्कृतोबन्ध.षडस्माकमनादयइत्यूरीकारा-द्भवतामद्वैतज्ञानात्पूर्वमपि द्वैतमशुद्धत्वं च ॥ अनादित्वेनानादिभावत्वेन वा मायाया नित्यत्वसाधने तु सार्वदिकमपि तत् ॥ मायासङ्कीर्णं कारणमविद्यासङ्कीर्णं कार्यमिति कार्ये कारणे च साङ्कर्यस्य मायाऽविद्यासंबन्धे हेयत्वेनाशुद्धतासंपादकत्वस्य च त्वन्मतग्रन्थेषु कार्योपाधिरयंजीव कारणोपाधिरीश्वरः ॥ कार्यकारणतांहित्वापूर्णबोधोवशिष्यतइत्यादाव-नेकत्रकण्ठरवेण स्वीकारादेतन्मतेसुनिष्पन्नमिति मार्तण्डोक्तं सुसङ्गतमेव ॥ औपनिषदमते कार्यकारणयोः शुद्धत्वे मानं तु श्रुतिसूत्रादिषु तत्र तत्र ब्रह्मणएवकारणत्वकथनं जीवादेः कार्यत्वकथनं मायाऽविद्योपाधिभावस्यानभिधानं च स्पष्टमेव ॥ तयोः स्फुटशुद्धत्वबोध-कोनृसिंहतापनीसन्दर्भस्तु मार्तण्डटीकायां इतिब्रह्मविदांह्रादेमितिकारिकाव्याख्यानेद-र्शितः ॥ समार्तण्डखण्डनाकाण्डताण्डवे पण्डितायमानेन भवता नाघ्रातोपि ॥ कुतस्तरां तद्दूषणकथा ॥ विशेषतश्चससन्दर्भो (अ० २ पा० १ सू० ६) दृश्यतेत्वित्याद्य-धिकरणभाष्यप्रकाशे उपनिषद्दीपिकादौ च विशदितइत्यलम् ॥ तस्माद-स्माकमेव शुद्धाद्वैतं सार्वदिकम् ॥

किञ्चास्मन्मतेजीवस्यापिशुद्धत्वेनषष्ठीतत्पुरुषोपिसंभवति ॥ तत्रापि-शुद्धेऽद्वैतमितिसमासेसप्तमीतत्पुरुषेकार्यस्याऽशुद्धत्वशङ्कास्यादेवं-शुद्धेनाद्वैतमित्यत्रापि ॥ शुद्धस्याद्वैतमितिसमासेकारणेऽशुद्धत्वश-ङ्कास्यादतः शुद्धयोरद्वैतमितिसमासः कर्तव्यः ॥ त्वन्मतेचजी-वस्याऽशुद्धत्वेनशुद्धयोरितिसमासाऽसंभवः ॥ नचशुद्धयोस्तत्वंप-दार्थयोरद्वैतमितिसमासः संभवत्येवेतिवाच्यं ॥ तत्वंपदार्थयोरि-त्यत्रतत्वंपदवाच्ययोरित्यर्थकत्वेतयोरद्वैतासंभवः ॥ नहितत्पदवा-

ध्यस्यसर्वज्ञत्वादिविशिष्टस्यमायाप्रतिबिंबितस्यतदवच्छिन्नस्यवाऽल्पज्ञत्वादिविशिष्टेनान्तःकरणाऽवच्छिन्नेनतत्प्रतिबिंबितेनवात्वंपदवाच्येनाभेदस्तवसंमतः ॥ तत्त्वंपदलक्ष्ययोरित्यर्थकत्वेतुद्विवचनानुपपत्तिः ॥ पदद्वयस्यापित्वन्मतेस्वरूपमात्रलक्षकत्वात् ॥ स्वरूपस्यैकत्वेनतन्नद्वित्वाऽन्वयस्याऽसंभवात् ॥ एवंचषष्ठीतत्पुरुषेपीत्याद्यसङ्गतमेव ॥ ब्रह्मणःशुद्धत्वेऽपिजीवस्यत्वन्मतेमायिकत्वेनशुद्धत्वाऽसंभवात् ॥ अद्वैतपदार्थेब्रह्मणिशुद्धपदार्थस्याभेदेनान्वयस्यशुद्धयोरभेदबोधस्य चोपपादितत्वेन तत्रदोषलेशस्याप्यसम्भवात् ॥ तदज्ञानमूलकः (शुद्धपदार्थस्यान्वयःक्वेतिवाच्यं ॥ भेदेवातज्ज्ञानेवा तज्ज्ञानाभावेवे)त्यादिकःस्वकपोलकल्पितशंकासमाधानखण्डनरूपोग्रन्थः (कर्तुराशय) इत्यन्तःप्रलापोऽपास्तः ॥ यदपि ॥ किञ्चेत्यादिनाब्रह्मणोघटादिविषयकमिथ्याज्ञानविषयत्वंशङ्कराऽऽचार्याः स्वीकुर्वन्तीत्युक्तंतदपिशङ्कराचार्यमतमज्ञात्वैव ॥ ब्रह्मणोघटादिविषयकस्यायंघटइत्यादिज्ञानस्य विषयत्वे तावतैवब्रह्मज्ञानसंभवेन मोक्षः स्यात् ॥ कित्वखण्डाकारवृत्तिविषयत्वमेवतैःस्वीकृतं ॥ अस्मन्मतेचभेदज्ञानेन शुद्धपदार्थस्यान्वयोनास्त्येवेत्यसकृदावेदितमेवातःशुद्धस्यभेदज्ञानेकःसम्बन्धइतिशङ्कैवनसंभवति ॥ कर्मधारयसमासपक्षेशुद्धपदार्थस्याऽभेदसम्बन्धेनाऽद्वैतपदार्थेऽन्वयस्वीकारेणसप्तमीप्रसङ्गस्याऽऽशङ्कैवनसम्भवत्यसत्संमतार्थसिद्धिश्चसंभवति ॥ तथाच (नापितृतीयः तत्रानुयोगितयाऽन्वयेसप्तमीप्रसङ्गात् ॥ त्वत्संमतार्थासिद्धेश्चे)त्यादिकंनिरस्तं ॥ किञ्चत्वन्मतेप्यद्वैतमित्यस्यद्वैताभावार्थकत्वेपारमार्थिकमद्वैतंप्रविश्यशरणंश्रुतिः ॥ बाधनादुपजीव्येननबिभेतिकदाचनेतित्वत्संमतश्लोकेपारमार्थिकपदस्यान्वयः कुत्रेतिवक्तव्यम् ॥ भेदेवाऽभावेवा ॥ नाद्यः ॥ भेदस्यपारमार्थिकत्वेद्वैतापत्तिः ॥ नद्वितीयः ॥ तत्रप्रतियोगितयाऽन्वयेषष्ठीप्रसङ्गादनुयोगितयाऽन्वयेसप्तमीस्यात् ॥ इत्यादिदोषस्यापादयितुंशक्यत्वेनतुल्यत्वात् ॥ उक्तंचयतः ॥ यत्रोभयोःसमोदोषः परिहारोपिवासमः ॥ नैकःपर्यनुयोक्तव्यस्तादृशार्थविनिर्णयइति संक्षेपः ॥

एवं कर्मधारयपक्षं समर्थ्य षष्ठीतत्पुरुषपक्षमपि समर्थयितुं तत्र प्रत्यवस्थायकं ॥ सहस्राक्षे ऐवंशुद्धयोरित्यादि सिद्धिरितिसक्षेपइत्यन्तं भाग दूषयन्ति ॥ किञ्चास्मन्मत-

---

१ एव शुद्धयोस्तत्त्वंपदार्थयोस्तन्मतेऽद्वैतपरत्वेन षष्ठीतत्पुरुषपक्षेऽपि शङ्कराचार्यमते शुद्धाऽद्वैतपदसगति ॥ त्वन्मतेतु तत्पक्षे उक्तविधशुद्धपदार्थस्य सबन्ध क्वेतिवाच्यम् ॥ भेदे

इत्यादिना ॥ विनिर्णयइतिसंक्षेपइत्यन्तेन ॥ जीवस्यापिशुद्धत्वेनेति ॥ अपिशब्दोजडप्रपञ्चस्य कारणस्याक्षरस्य च समुच्चायकः ॥ तेन कार्यकारणयोरुभयोः सिद्धान्ते शुद्धत्वम् ॥ मार्तण्डटीकानुरोधेन समासान्तरानुपपत्तिं दर्शयन्ति ॥ तत्रापीति ॥ सप्तमीतृतीयातत्पुरुषयोः शुद्धपदं कारणमात्रपरं संभवति ॥ तस्मिंस्तेनसह वा कार्यस्याद्वैतमित्यर्थः ॥ तावता कार्ये शुद्धत्वं न प्राप्यते ॥ षष्ठ्येकवचनेन तत्पुरुषे शुद्धपदं कार्यमात्रपरम् ॥ तेन कारणे तन्नायातीत्युभयोः शुद्धताबोधनाय शुद्धयोरद्वैतमित्येव विग्रहोयुक्तः ॥ सप्तमीतत्पुरुषादिपक्षेषु सप्तमीतियोगविभागात्समासाश्रयणमित्यादिदोषान्तराणि विशेषतः प्रयोजनाभावान्न लिख्यन्ते ॥ जीवस्याशुद्धत्वेनेति ॥ जीवस्येत्युपलक्षणम् ॥ कार्योपाधिरयंजीवःकारणोपाधिरीश्वरः ॥ कार्यकारणतांहित्वापूर्णबोधोवशिष्यत इति कण्ठरवेण सङ्कीर्णयोरेव कार्यकारणभावस्तयोरेवोपाधिभागत्यागेनाद्वैतं च भवत्संमतमिति न त्वन्मते षष्ठीतत्पुरुषः ॥ उभयोः शुद्धत्वे तु न क्वापि भागत्यागोपेक्ष्यते ॥ तदपेक्षणे तु कार्ये कारणे चोभयत्राशुद्धत्वापादकसाङ्कर्यप्रयोजकस्याज्यभागोस्त्येवेति न शुद्धयोस्तयोरद्वैतं त्वन्मते ॥ तेन (शुद्धयोस्तत्वंपदार्थयोस्तन्मतेऽद्वैतसत्वेन) इत्याद्युक्तिर्निरस्ता ॥ किञ्च काव्यप्रकाशादिषु स्याद्वाचकोलाक्षणिकःशब्दोत्रव्यञ्जकस्त्रिधा ॥ वाच्यादयस्तदर्थास्युरितिकथनात्पदार्थयोरित्यत्र च वृत्तिद्वयस्वीकारपक्षेप्यर्थपदं वाच्यपरं लक्ष्यपरं चेति विकल्प्य दूषयन्ति ॥ तत्वंपदार्थयोरित्यत्रेत्यादिना ॥ अभेदस्तत्संमत इति ॥ सर्वज्ञत्वाल्पज्ञत्वादिपरस्परविरुद्धधर्मशालिनोरैक्यस्यासंभवात्साक्षात्तयोः सन संमतइत्यर्थः ॥ किन्तु कार्यत्वकारणत्वनिर्वाहकभागस्य त्यागेन केवलचैतन्यस्यैक्यं संमतम् ॥ तथासति शुद्धयोरिति द्विवचनस्यानुपपत्तिमाहुः ॥ तत्पदलक्ष्ययोरिति ॥ स्वरूपमात्रेति ॥ स्वरूपपदं शुद्धचैतन्यपरम् ॥ मात्रपदमशुद्धत्वापादककार्यकारणभावप्रयोजकोपाधिभागव्यवच्छेदार्थम् ॥ द्वित्वस्योपाधिमात्रमूलकत्वादुपाधिरहितस्यैव शुद्धतायास्त्वन्मतेपि स्वीकाराच्च शुद्धे द्वित्वानुपपत्तिर्युक्तैव ॥ सिद्धान्ते द्विवचनोपपत्तिं च दर्शयिष्यामः ॥ तस्मात्तदुक्ता तन्मते शुद्धाद्वैतपदसङ्गतिरसङ्गतैव ॥ अपिचैवं समास-

---

मातज्ज्ञानेयातज्ज्ञानाऽभावेवा ॥ नाद्यः ॥ अप्रसिद्धेः ॥ नहि ते शुद्धब्रह्मसंबन्धी भेदः प्रसिद्धः ॥ सामर्थ्याऽभावेन समासाऽभावप्रसङ्गाच्च ॥ अतएव न द्वितीयः ॥ नहि देवदत्तस्य यद्घटज्ञानं तदभावोगृहदत्त इत्यर्थे देवदत्तस्याऽघटज्ञानं यज्ञदत्त इति विज्ञाः प्रयुञ्जते ॥ किञ्च शुद्धस्य भेदज्ञानेन कः संबन्धः ॥ नतावद्विषयिता ॥ तत्राऽप्रसिद्धेः ॥ भ्रमात्मकस्याऽपि तस्य सत्वे त्वत्संमतस्य शुद्धाऽद्वैतस्याऽसिद्धेश्च ॥ नहि तत्सत्त्वे तन्निषेधः कर्तुं शक्यः ॥ किञ्चेदमेव शङ्कराचार्याः स्वीकुर्वन्ति यद्ब्रह्मणोघटादिविषयकमिथ्याज्ञानविषयत्वं तच्चेत्त्वमपि स्वीकुर्यास्तर्हि कर्मधारयपक्षे स्वमतेन सहैव तन्मतं व्यावर्तयेः ॥ नाप्याश्रयाश्रयिभावः ज्ञानस्य सत्यत्वे भेदसिद्धेः ॥ असत्यत्वे ईश्वरस्य भ्रान्तत्वापत्तेः ॥ नापि तृतीयः ॥ तत्राऽनुयोगितयाऽन्वये सप्तमीप्रसङ्गात् ॥ त्वत्संमतार्थासिद्धेश्च ॥ प्रतियोगितया तु नान्वयसंभवः ॥ भेदज्ञानस्य तथान्वितत्वात् ॥ किञ्च शुद्धप्रतियोगिकोद्वैतप्रतियोगिकोऽभावइत्यर्थे का तवेष्टसिद्धिरितिसङ्क्षेपः ॥ २ ॥ ६ ॥

द्वयेपि स्वमते शुद्धाद्वैतपदसङ्गतिंस्वीकुर्वन्स्वोक्तपूर्वरीत्या शुद्धपदव्यावर्त्यं स्वमतप्रसिद्धं पक्षद्वयेपि प्रदर्शय ॥ मतान्तरप्रसिद्धव्यावर्तनार्थमेव तदिति चेज्जितमस्माभिः ॥ फलितमाहुः ॥ एवञ्चषष्ठीति ॥ ब्रह्मणः ॥ मायाविद्योपाधिरहितचैतन्यस्य ॥ जीवस्येति शबलस्याप्युपलक्षणम् । अथवा विशुद्धचितैव सह जीवस्याभेदमिच्छन्तमेकदेशिनं प्रतीयमुक्तिः ॥ स्वमते समासद्वयेपि तदुक्तदोषाप्रसक्तिं बोधयितुमाहुः ॥ अद्वैतपदार्थ इत्यादिना ॥ कर्मधारये शुद्धपदार्थस्याभेदेनान्वयः ॥ षष्ठीतत्पुरुषे शुद्धयोरभेदबोधइति विवेकः ॥ तथाहि षष्ठीतत्पुरुषपक्षेप्यद्वैतशब्दार्थउक्तरीत्या द्वित्वप्रकारकज्ञानविरुद्धमैक्यज्ञानमेव ॥ तत्र शुद्धपदार्थस्य विषयितासंबन्धेनान्वयः ॥ तथाच शुद्धयोरद्वैतमित्यस्य मायासंबन्धरहितकार्यकारणविषयकमभेदज्ञानमित्यर्थोऽभिप्रेयतेऽतोन काप्यनुपपत्तिः ॥ यद्यद्वैतशब्दार्थोभेदज्ञानाभावः स्यात् ॥ स्यात्तदा (भेदेवातज्ज्ञानेवातज्ज्ञानाभावेवा) इति विकल्पावकाशः ॥ तथार्थानङ्गीकारादेव पक्षत्रयउपक्षिप्तदोषानिरस्ताः ॥ किञ्चाभ्युपेत्यापि ब्रूमः ॥ अस्त्वद्वैतशब्दार्थभेदज्ञानाभावैकदेशो भेदे शुद्धपदार्थस्यान्वयः ॥ संबन्धश्च शुक्तिरूप्यमित्यादौ समस्तस्थले शुक्त्यादेरूप्यादाविव स्वाधिकरणकारोपविषयत्वम् ॥ नच शुद्धसंबन्धी भेदस्तत्राप्रसिद्धइति वाच्यम् ॥ मायोपाधिसंबन्धसत्त्वात् शुद्धस्य ब्रह्मणएव बहुस्यामितीच्छया आकाशादितत्तत्कार्यरूपेण परिणततायाः "सदेवसौम्येदमग्र आसीत् ॥ तदात्मानꣳ स्वयमकुरुत" इत्यादिकाण्ववैत्तिरीयप्रभृतिश्रुतिभिर्निश्चयात्कार्यकारणयोरनयोः शुद्धत्वेपि आकाशोवायुश्च वस्तुतोऽतिरिक्तावेवेत्येवं कार्यकारणयोरारोप्यमाणस्य भेदस्य मन्मते शुद्धसंबन्धितायाः प्रसिद्धत्वात् ॥ एतेन सिद्धान्ते शुद्धयोरिति द्विवचनस्योपपत्तिरपि सिद्धा ॥ एकमेवेत्यादिश्रुतिभिरेकसङ्ख्येव "सएकधाभवतित्रिधाभवतिपञ्चधासप्तधानवधाचैवपुनश्चैकादशःस्मृतः शतञ्चदशचैकञ्चसहस्राणिचविꣳशतिः" इत्यादिभिश्छान्दोग्यभूमविद्यादिश्रुतिभिः सङ्ख्यामात्रमपि ब्रह्मधर्मएव ॥ सच बहुस्यामितीच्छयाग्निसंयोगेन जतुघृतगतद्रवत्वमिवाभिव्यज्यते ॥ सङ्ख्यामात्रस्य ब्रह्मधर्मत्वादेवाश्वमेधप्रकरणेतैत्तिरीयसंहितासप्तमकाण्डद्वितीयप्रपाठकेएकादशानुवाकमारभ्य यावदध्यायसमाप्ति "एकस्मैस्वाहाद्वाभ्यांस्वाहात्रिभ्यःस्वाहा" इत्यादिना "समुद्रायस्वाहामध्यायस्वाहान्तायस्वाहापरार्धायस्वाहा" इत्यन्तेन सर्वसङ्ख्याविशिष्टपरमात्मनआहुतयआम्नाताः॥ तच्चाज्जलात्मनोः समुद्रतरङ्गयोरितीव शुद्धयोर्हेतुकार्ययोरिति द्विवचनं नानुपपन्नम् ॥ नचवृत्त्येकदेशेन्वयःसामर्थ्याभावानुपपन्नइति शंक्यम् ॥ शरैःशातितपत्रइत्यादावन्वयितावच्छेदकरूपेणोपस्थितवृत्त्येकदेशार्थेप्यन्वयस्य सर्वैः स्वीकारात् ॥ एतेन (असिद्धेः सामर्थ्याभावेनसमासाभावाप्रसङ्गाच्च) इति तदुक्तं हेतुद्वयमपास्तम् ॥ भेदज्ञानेऽन्वयस्वीकारपक्षेपि अतएवेति परामृष्टोद्वितीयहेतुश्चनिरस्तः ॥ देवदत्तस्य घटज्ञानमित्याद्युदाहरणं त्वत्यन्तविरूपम् ॥ तत्र देवदत्तसंबन्धि यद्घटज्ञानं तदभावस्याधिकरणं देवदत्तभिन्नमिह तु शुद्धसंबन्धि यद्भेदज्ञानं तदभावस्याधिकरणं न भिन्नं ज्ञाने देवदत्तसंबन्धआश्रयिता भेदज्ञाने तु शुद्धसंबन्धोविषयितेति भेदात् ॥ देवदत्तोघटं नानयति तस्य घटज्ञाना-

भावादिति तु विज्ञाः प्रयुञ्जतएव ॥ घटाज्ञानं पटाज्ञानमिति च ॥ तत्रदेवदत्तस्य वृत्येक-देशे घटज्ञानेऽन्वयः ॥ अन्यथा त्वदुक्तरीत्या सप्तमीप्रसङ्गात् ॥ घटाज्ञानमित्यादौ तु घटादिविषयकज्ञानस्याभावइत्येवार्थः ॥ अत्रापि वृत्त्येकदेशेज्ञानेघटादेर्विषयिता ॥ अपि च भवानपि शतशस्तथा प्रयुङ्क्ते ॥ यथा संप्रति शुद्धाद्वैतपदार्थदूषणारंभएव (समास-द्वयस्याप्यसङ्गतेः) इति भवान्प्रायुङ्क्त ॥ अत्र समासद्वयशब्दार्थस्य सङ्गतावन्वयस्तद-भावे वा ॥ नाद्यः ॥ समासैकदेशेन्वयासंभवस्य त्वया स्वीकारात् ॥ न द्वितीयः ॥ अनुयोगितयान्वये सप्तमीप्रसङ्गस्य त्वयोक्तत्वात् ॥ तत्र यथा समादध्यास्तथात्रापि समाधिमवधारय ॥ प्रयोगान्तराण्यप्युदाहरिष्यन्ते ॥ शुद्धस्य भेदज्ञाने संबन्धस्तु विषयिता ॥ शुद्धयोः कार्यकारणयोर्मिथ्याद्वैतविषयत्वंतुममप्रसिद्धमेव ॥ द्वैतस्यमिथ्या-त्वान्मत्संमतशुद्धाद्वैतस्यसम्यक्सिद्धिः ॥ त्वन्मतेद्वाभ्यांप्रकाराभ्यामितज्ञातमितिविग्रहे-णद्वैतशब्दवाच्यस्यनामरूपात्मकप्रपञ्चस्यमिथ्याभूतस्यप्रतीतिविषयत्वेप्यद्वैतपदेनयथानि-षेधः ॥ स्पष्टंचेदंमञ्जूपादिष्वपि ॥ तथाशुद्धकार्यकारणविषयकभेदज्ञानस्यभ्रमात्मकस्य निषेधःकर्तुंशक्य. ॥ द्वाभ्यांप्रकाराभ्यामितंज्ञानंतदेवद्वैतमितिविग्रहेणद्वित्वेप्रकारताख्यावि-षयता ॥ शुद्धयोस्तुविशेष्यताख्यासेतितत्वम् ॥ यथातवघटादिप्रपञ्चविषयकमिथ्या-ज्ञानविषयत्वंब्रह्मणस्तथास्माकंभेदभ्रमविषयत्वमुपाधिसंबन्धरहितब्रह्मात्मककार्यकारण-योरितिजानीहि ॥ यदेतत्सर्वमनुसन्धायोक्तंमूले ॥ **तदज्ञानेत्यादि** ॥ अपास्तइत्य-न्तम् ॥ एतेनैवकिञ्चेदमित्यादिर्व्यावर्तयेरित्यन्तातदुक्तिरपिप्रत्युक्ता ॥ तेषांमतेकार्यस्य-मिथ्यात्वंकार्यकारणयोरौपाधिकत्वमस्माकंतुकार्यस्यापिसत्यत्वंतयोरनौपाधिकत्वंचेत्यावि-हुवरतारतम्यस्यासकृद्बोधितत्वेन (तच्चेत्वमपिस्वीकुर्याः) इतिकथनस्याशक्यत्वात् ॥ शुद्धपदार्थभेदज्ञानयोराश्रयाश्रयिभावस्तुनैवस्वीक्रियते ॥ शुद्धयोरभेदज्ञानमितिमुख्ये-ऽस्मत्पक्षेतुसोपिनविरुद्धः ॥ अभेदस्यसत्यत्वादीश्वरस्यभ्रान्तत्वानापत्तेः ॥ (किञ्चेदमेव-शङ्कराचार्याः) इत्याद्युक्तौदूषणान्तरमप्याहुः ॥ **यदपीत्यादिना** ॥ वस्तुतश्चशुद्ध-योरद्वैतमैक्यज्ञानमितिसिद्धान्तात्तत्तदीयकल्पनावकाशइत्याशयेनाहुः ॥ **अस्मन्मते चे-त्यादि** ॥ किञ्चास्माकंकर्मधारयपक्षोमुख्यः ॥ तत्रशुद्धाद्वैतशब्दस्यपरब्रह्मपरतायाः शीघ्रमुपस्थितेः ॥ षष्ठीतत्पुरुषपक्षस्तुसिद्धान्तबोधसौकर्यार्थः ॥ अतएवमार्तण्डटीका-कृद्भिः ॥ शुद्धाद्वैतपदेशेयः ॥ समास कर्मधारयः ॥ अद्वैतंशुद्धयो.प्राहु.षष्ठीतत्पुरुषंबु-धाइत्यस्यविवरणेकर्मधारयपक्षंव्याख्याय "अतएवस्पष्टतयाबोधायषष्ठीतत्पुरुषमाहुः" इत्युत्तरार्धमवतारयद्भिःस्पष्टतयाबोधनार्थमेवपक्षान्तरादरणमितिदर्शितम् ॥ अभावश्चा-स्मन्मतेप्रतियोग्यपदार्थतयानैवाङ्गीक्रियतेऽत सहजासे (नापितृतीयः) इत्यादिनाऽभावेन्वय-पक्षमाश्रित्यसप्तमीप्रसङ्गादिशङ्का मूलेनाखिलत्र शासेतिन्यायादेवनिरस्तेत्यभिप्रेत्याहुः ॥ **कर्मधारयसमासइत्यादिना** ॥ यदिचशुद्धमद्वैतमित्यत्रापिकथञ्चित्सतान्दोषान्सूचा-सदाप्रतिबन्दीमाहुः ॥ **किञ्चत्वन्मतेपीति** ॥ यद्यपिमतिबन्धाअनुत्तरत्वंतथापि तास-माधिना प्रकृतेपि समाधिसंभवेन व्यासचरणैरपि (अ० २ पा० २ सू० १३) "सम-वायाभ्युपगमाच्च" इत्यादौतस्याश्रादरणादित्रापितदादरणमदोषः ॥ नन्वेतावतापिषष्ठीत-

स्युरस्यपक्षे किमायातमिति चेत्सन्तितादृशाःषष्ठ्यन्तघटिता अपिशतशःप्रामाणिकप्रयोगाः ॥ यथागीतायाम् (अ० ५ श्लो० १६) ज्ञानेनतुतदज्ञानंयेषांनाशितमात्मनइति ॥ अत्र आत्मनइत्यस्य अज्ञानमित्यत्रापिसंबन्धःशङ्कराचार्यैः "तदज्ञानंयेषांजन्तूनांविवेकज्ञानेनात्मविषयेणनाशितमात्मनोभवति" इति व्याचक्षाणैर्दर्शितः ॥ शङ्करानन्दकृततात्पर्यबोधिन्यांच "ज्ञानेनतुश्रवणादिसमुत्पन्नेनात्मविषयेणात्मनोबुद्धेःसंबन्धिबुद्धिनिष्ठमित्येतत्" इत्यादिना सोतिस्फुटीकृतः ॥ येषामित्यस्यापितत्रसंबन्धःश्रीधरस्वाम्यादिभिरसन्दिग्धो दर्शितः ॥ तथा चाज्ञानपदैकदेशे ज्ञानआत्मादेः संबन्धे असामर्थ्यापि ॥ तदभावेसंबन्धेऽनुयोगिनः षष्ठ्यनुपपत्तिः ॥ इहाज्ञानशब्दस्य ज्ञानविरुद्धावरकवस्तुपरत्वेत्वद्वैतपदस्यापि उक्तरीतिकोऽर्थइति तुल्यम् ॥ तथा (अ० १६ श्लो० ४) अज्ञानंचाभिजातस्यपार्थसंपदमासुरीमिति ॥ अत्रापि श्रीधरस्वामिशङ्करानन्दादिभिः "अज्ञानमविवेकः ॥ अज्ञानंसदसद्विवेकाभावः" इत्यादिव्यवारि ॥ इह आसुरींसंपदमभिजातस्यज्ञानाभावएवसंबन्धः ॥ तस्य यज्ज्ञानं तदभावइत्यर्थस्यतुतावकैरप्यकृतत्वादनौचित्याच्च ॥ एवञ्चषष्ठ्यसङ्गतिः ॥ न चापैत्वं कल्प्यम् ॥ स्वग्रन्थेषु दोषप्रसङ्गात् ॥ अकल्पनाच्च ॥ किञ्चमहाभाष्यादिषु (अ० १ पा० ४ सू० ९३) अधिपरीअनर्थकावित्यादिसूत्रेषु "उक्तार्थानामप्रयोगः" इत्यादयस्तादृशप्रयोगादृश्यन्ते ॥ एवमन्येपिशतशः सहस्रशः प्राचां प्रयोगाद्रष्टव्याः ॥ अथवा किमेभिः ॥ त्वं तावत्स्वप्रयोगानेव विचारय ॥ यथा षष्ठीतत्पुरुषखण्डनावसरेपि (तवाप्रसिद्धेः ॥ भ्रमात्मकस्यापितस्यसर्वेश्वरसंमतस्यशुद्धाद्वैतस्यासिद्धेश्च) इतिस्वयं प्रयुङ्क्षे ॥ इह षष्ठ्यन्तार्थस्य क संबन्धः ॥ सिद्धौ वा तदभावे वा ॥ नाद्यः ॥ असामर्थ्योक्तेः ॥ मत्संमतशुद्धाद्वैतसिद्धिश्च नहिते प्रसिद्धा ॥ न द्वितीयः ॥ सप्तमीप्रसङ्गात् ॥ एवं कर्मधारयखण्डनावसरे त्वया (समासद्वयस्याप्यसङ्गतेः ॥ तादृशस्यतवमतेऽप्रसिद्धत्वेनव्यावर्त्यालाभः ॥ जीवस्याशुद्धत्वेप्यद्वैतपदार्थस्यतत्त्वाभावात् ॥ मायायास्तत्संबन्धिनोवाऽशुद्धत्वस्यवक्तुमशक्यत्वाच्च ॥ अध्यासस्याशुद्धत्वेपिजीवस्याशुद्धत्वाभावाच्च) इत्यादयोबहुतरास्तादृशास्त्वीयाःप्रयोगाद्रष्टव्याः ॥ अत्रसप्तमीप्रसङ्गान्तास्त्वदुक्तदोषाःप्रायः प्रतिवाक्यं त्वदुक्तावेव प्रसज्यन्ते ॥ (व्यावर्त्यालाभ ॥ अन्वयासंभवव्यावर्त्यालाभयोः) इत्यादीनि तादृशसमासघटितपदान्यपि प्रायुज्यन्तायुष्मता ॥ अत्र व्यावर्त्यस्याऽलाभइत्यादिरेव विग्रहश्चन्तितोनतु व्यावर्त्येऽलाभइति ॥ इहापि व्यावर्त्यादेर्लाभादौ संबन्धस्तदभावेवेत्यायूह्यम् ॥ एवं तदनन्यत्वसूत्रेप्यन्यत्वाभावसेनार्थं वदतस्तव "तयो कार्यकारणयोरनन्यत्वं" इतिस्वभाष्येपि स्वोक्तदोषप्रसंगः आसत्यादौ तयोरिति षष्ठ्याअवगमात् ॥ तस्मान्मार्तण्डएकत्र दोषलेशानापादयितुं शतकृत्वस्तद्दोषघटितवाक्यानि प्रयुञ्जानोभवान् भास्करे पङ्कसीकरनिकरं संपर्चयितुं महति पङ्कगर्ते प्रोच्चैः पतन्तमनुकुरुते ॥ एवं च अज्ञानंचाभिजातस्येत्यादिवदभावेप्यनुयोगितयान्वयः शक्यवचनः ॥ अभावपदेनाभाव उपात्तेऽनुयोगिनः प्रायः सप्तमीनियमोनतु नञ्समासघटितपदप्रयोगे ॥ प्रतियोगितयाऽन्वयस्तु शङ्कापि बालप्रलापकल्पा ॥ महात्मककार्यकारणयोर्नित्यत्वात् ॥ नञ्समासस्थले पदान्तरोपात्तवस्तुनः प्रतियोगितयाऽन्वये सामर्थ्यस्याभावाच्च ॥ अन्यथा वायौ

गन्धरूपयोरभावइत्यर्थे रूपस्यागन्धइति प्रयुज्येत ॥ तदेतत्सर्वमनुसन्धाय प्रकृते निरनुयोज्यानुयोगं निग्रहस्थानं वादिनोबोधयितुमभियुक्तोक्तिमाहुः ॥ उक्तंचेति ॥ निग्रहस्थानं तु लक्षितं गौतमेन ॥ (अ० १ आ० २ सू० ६०) "विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम्" इति ॥ अत्राप्रतिपत्तिस्वरूपं तु तद्भाष्ये "परेणस्थापितंवानप्रतिषेधति ॥ प्रतिषिद्धं वा नोद्धरति" इति वात्स्यायन. ॥ तथाच अनिग्रहस्थाने निगृहीतोसीति कथनाय परेणापादितदोषेषु भूयस्तदुक्तावेवापाद्यमानेषु तदुद्धारे तस्यासामर्थ्यात्तस्यैव पराजयस्थानं सुस्थिरम् ॥ पञ्चमेऽपि (आ० २ सू० २३) "अनिग्रहस्थानेनिग्रहस्थानाभियोगोनिरनुयोज्यानुयोग." इत्युक्तेः ॥ वस्तुतस्तु अभावोऽस्मन्मते न पदार्थान्तरमतोनेय शङ्का नापि समाधानम् ॥ किन्तु ज्ञानेनतुतदज्ञानमित्यादौ भवतामात्मादिसबन्ध्यज्ञानमिवास्माकं शुद्धसबंध्यभेदज्ञानमिति निरवद्यम् ॥ तस्मात्समासद्वयस्यापि सङ्गतेः शुद्धाद्वैतमार्तण्डप्रकाशितः शुद्धाद्वैतपदार्थ सङ्गतएवेति शुभम् ॥ ॥ २ ॥

इति सहस्राक्षस्य द्वितीयश्लोकस्य खण्डनम् ।

अग्रेचईशानःसृजतीच्छयैवेत्यादिनाईश्वरेच्छायाजगद्धेतुत्वखण्डनपूर्वकंस्वमतव्यवस्थापनंकृतं तत्रक्रमः ॥ (रमणार्थमिदंसर्वंब्रह्मैवस्वेच्छयाऽभवदितिशुद्धाद्वैतमार्तण्डोक्तमीश्वरेच्छामात्रस्यजगद्धेतुत्वंन संभवति ॥ यदिईश्वरेच्छानित्यास्यात्तदासर्वदासर्वंकार्यंस्यात्तस्य चसर्वेभावविकारा स्युरेकस्याअपीश्वरेच्छायाः प्रतिवस्तुकालभेदेनाऽऽकारस्यधर्मस्यवाभेदकल्पनेतुलोकविरोधः ॥ लोकेज्ञानादिवदिच्छायाअपिअनुभवबलेनसमानविषयकत्वेनस्थित्यनङ्गीकारात् ॥ तत्रलौकिकेच्छातोऽत्यन्तवैलक्षण्येपीच्छाशब्दप्रयोगस्त्वादैचोर्वृद्धिप्रयोगइवपारिभाषिकःस्या)दित्यादिः ॥ अत्रोच्यतेब्रह्मैवस्वेच्छयास्वात्मभूतयाजगद्रूपमभवत् ॥ तत्रहेतूरमणेच्छैवप्रतीयते ॥ कुतः ॥ तथैववेदेप्रतिपादनात् ॥ तथाचश्रुतयः "एकाकीनरमतेसद्वितीयमैच्छत् ॥ बहुस्यांप्रजायेय ॥ सोकामयतबहुस्यांप्रजायेयेति ॥ तदात्मानंस्वयमकुरुत ॥ सच्चत्यच्चाऽभव"दित्यादयः ॥ नच मायया तथाभवनम् ॥ श्रुतिषुमायावाचकपदाऽभावात् ॥ यदिमायाऽकुरुतेतिस्यात्तदातथैवस्वीकृतंस्यात् ॥ वैदिकानांवेदैकसमधिगम्येऽर्थेश्रुतेरेवप्रमाणत्वात् ॥ कुतर्काश्रयणेत्वनवस्थास्यात् ॥ मोक्षाऽभावश्चस्यात् ॥ अतएवोक्तं "तर्काऽप्रतिष्ठानादप्यन्यथाऽनुमेयमितिचेदेवमप्यविमोक्षप्रसङ्गः" इति ॥ ननुब्रह्मणोजगद्रूपत्वे तस्यविकारित्वापत्तिरतोमाययातथात्वमेवाङ्गीकरणीयम् ॥ एवञ्चमाययाप्यविकारित्वंब्रह्मणश्चकूटस्थत्वेननिर्विकारत्वमेवेतिचेन्न ॥ ब्रह्मणःकार्याकारत्वेपिविकारित्वंनसंभवति ॥ सर्वभवनसमर्थत्वात् ॥ अन्यथोपादानाभिन्ननिमित्तत्वमपिनस्यात्तस्याऽपिलोकेऽदृष्टत्वात् ॥ कल्पना-

याश्चतवलोकानुसारित्वमेव ॥ असन्मतेचयथावेदउपदिष्टं तथैवमन्तव्यम् ॥ वेदेचनिर्विकारस्यैवजगत्कारणत्वंप्रतिपादितमतस्तथैवमंतव्यम् ॥ अतएवमृदादीनांदृष्टान्तत्वे नोपादानंवेदेष्टतम् ॥ नहिमृदो घटादिरूपत्वेपिविकारित्वम् ॥ विकारस्त्वन्यथाभावः ॥ यथादुग्धस्यदधिरूपतायां ॥ नह्येवंमृदोऽप्यन्यथाभावः ॥ अन्यथाघटतिरोभावेपुनर्मृद्रूपतानस्यात् ॥ दध्नोदुग्धरूपतेव ॥ नापिमृदादीनांमायया घटादिभावः ॥ मृत्त्वेनज्ञानेघटादीनांबाधःस्यात् ॥ किन्तुमृदादीनामवस्थाविशेषएवघटादिरेवंब्रह्मणोप्यवस्थाविशेषएवजगदित्यन्यत्रविस्तरः ॥ साचेश्वरेच्छानित्या ॥ नचेच्छायानित्यत्वेसर्वदासर्वकार्योत्पत्तिप्रसङ्गइतिवाच्यम् ॥ यदायथायस्योत्पत्तिर्वृद्धिस्तिरोभावादिरिच्छायाविषयीभूतस्तदातथातस्याऽविर्भावादिर्जायतेनान्यथा ॥ त्वन्मतेपिब्रह्मणोनित्यत्वेनसर्वदासर्वकार्योत्पत्तिःकुतोनस्यात् ॥ तदेतत्सर्वमग्रेवक्ष्यते ॥ नचाऽऽकारबाहुल्यंसर्वकार्याकारायाएकस्याएवेच्छायाःकल्पनात् ॥ तथैवश्रुत्यानिरूपणात् ॥ नहिलोकानुसारिण्येववेदे कल्पना ॥ लोकेशरीरान्तःकरणादिविशिष्टएवेच्छादर्शनेनेश्वरस्यापिशरीरान्तःकरणादिकंलोकानुसारिभिर्भवद्भिःकुतोनकल्प्यते ॥ लोकेभवन्मतेरजतताऽधिष्ठानस्यानित्यत्वाज्जगद्भ्रमाधिष्ठानस्यब्रह्मणोमिथ्यात्वंचकुतोनाङ्गीक्रियते ॥ लोकेजगद्धेतुभूतायाइच्छायाअदर्शनेनलोकेच्छातोऽत्यन्तविलक्षणत्वेनेच्छापदस्यपारिभाषिकत्वमीश्वरेच्छायांभवन्मतेऽपिकुतोनस्यादितिविभावनीयम् ॥ स्याद्वेच्छाशब्दस्यनानार्थतेत्यादिप्रलापस्त्वनभ्युपगमेनैवपरास्तः ॥

अथ नित्यायाभगवदिच्छायाः श्रुतिसिद्धे जगत्कारणत्वे मतस्थस्याथिनं मायादेस्तत्कारणत्वबोधकं जगज्जन्मादिकारणत्वरूपश्रौतसौत्रब्रह्मलक्षणबाधकम् ॥ सहस्राक्षे ईशानः

---

१ ईशानःसृजतीच्छयैव यदिता केनाऽऽत्मनाऽऽत्माश्रयाश्चान्येष्टयापिमयात् श्रुतिस्मृतिगणैरिच्छोद्भवः कालतः ॥ चक्षुदाञ्जनकर्मणोबत तथाऽविद्याख्यमायावशात्हेतुत्वं च परस्य लक्षणमिदं शाखेन्दुवद्वाऽन्यगम् ॥ २ ॥ अथ रमणार्थमिदं सर्वं ब्रह्मैव स्वेच्छयाऽभवदिति शुद्धाऽद्वैतमार्तण्डोक्तमीश्वरेच्छामात्रस्य जगद्धेतुत्वं खण्डयति ॥ ईशानःसृजतीति ॥ एवकारेण कर्मादिव्यावृत्तिः ॥ तत्र यदीश्वरेच्छा नित्या स्यात्तदा सर्वदा सर्वं कार्यं स्यात्तस्य च सर्वे भावविकाराः स्युः ॥ एकस्या अपीच्छायाः प्रतिवस्तु कालभेदेनाऽऽकारस्य धर्मस्य वा भेदकल्पने तु लोकविरोधः ॥ लोके ज्ञानादिवदिच्छायाअपि अनुभवबलेन समानविषयकत्वेन स्थितत्वीकारात् ॥ तत्र लौकिकेच्छातोऽत्यन्तवैलक्षण्येऽपीच्छाशब्दप्रयोगस्त्वादैचोर्वृद्धिशब्दप्रयोगइव पारिभाषिकःस्यात् ॥ स्याद्वेच्छाशब्दस्य नानार्थता ॥ सोऽकामयतेति श्रौतव्यवहारस्य तथाप्युपपत्ते. ॥ तस्मान्निसेच्छापक्षपरतायावक्ष्यमाणत्वाच्च ॥

सृजतीच्छयैवयदीतितृतीयं श्लोकं अथरमणार्थमिदमित्यादिना ब्रह्मणोनान्यत्वमित्यन्तेन व्याख्यानेन सहितं **अग्रेचईशानइत्यादिना अलमप्रकृतविचारेणेत्यन्तेन** खण्डयिष्यन्तः अथरमणार्थमित्यादिं वक्ष्यमाणस्थाचेत्यन्तं भागंतावत्परिहरन्ति ॥ **अत्रोच्यत इत्यादिना ॥ अनभ्युपगमेनैवपरास्तइत्यन्तेन** ॥ तत्र मार्तण्डकारिकायां एवकारः स्वाव्यवहितपूर्वब्रह्मपदेनैव संबध्यमानउपादानान्तरकर्त्रन्तरे एव व्यवच्छिनत्ति ॥ ननु कारणान्तरम् ॥ नापि टीकाकृता तस्योत्तरग्रन्थयोर्व्याख्यातः ॥ अतः सहशास्त्रे (शुद्धाद्वैतमार्तण्डोक्तमीश्वरेच्छामात्रस्य जगद्धेतुत्वं) इति न वक्तुं युक्तं किन्तु निबन्धादिसिद्धं शङ्कराचार्यपरमगुरुगौडपादनिरूपितं वा तदिच्छामात्रस्य जगदाविर्भावे प्रथमतरकरणत्वमित्येवोचितं वक्तुम् ॥ प्रथमतरेतिविशेषणानुपादाने त्वस्माभिः कर्मादीनामवान्तरकारणत्वस्याप्रत्याख्याततयाऽसदनुवादे एवकारेण कर्मादिव्यावृत्त्युक्तिरसङ्गतैव स्यात् ॥ स्पष्टं तेषामवान्तरकारणत्वंव्याकरे (अ० २ पा० १ सूत्र ३४) "वैषम्यनैर्घृण्येनसापेक्षत्वा" दिति (अ० २ पा० ३ सू० ४२) "कृतप्रयत्नापेक्षस्त्वि" त्याद्यधिकरणेषु ॥ रमणेच्छैवेति ॥ रमणार्थमेव जगद्रूपेणाविर्भवनमितितु विशेषतः प्रमाणोपन्यासपुरःसरं तदीयनवमश्लोकनिरसनावसरे दर्शयिष्यामः ॥ इह त्विच्छायाएव जगदाविर्भावे करणत्वं पूर्वमुपपादयिष्यते ॥ अथभगवान् स्वेच्छयैव स्वरूपादेव प्रपञ्चमाविष्कुरुतइति बोधकानि प्रमाणानि तावदुपन्यस्यन्ते ॥ तत्र बह्वृचशाखायां ऐतरेयब्राह्मणे "आत्मावाइदमेकएवाग्रआसीत् ॥ नान्यत्किञ्चनमिषत् ॥ सईक्षतलोकान्नुसृजाइति ॥ सइमाँल्लोकानसृजत" तैत्तिरीयाणामानन्दवल्ल्याम् "सोकामयत ॥ बहुस्यांप्रजायेयेति ॥ सतपोतप्यत ॥ सतपस्तप्त्वाइदꣳसर्वमसृजत" मैत्रायणीयोपनिषदि (प्रपाठक १ खंड २ मंत्र ६) "प्रजापतिर्वाएकोऽग्रेऽतिष्ठत्सनारमतैक स्वात्मानमभिध्यात्वाबह्वीःप्रजाअसृजत" इतिवाजसनेयिनां पुरुषविधब्राह्मणे "आत्मैवेदमग्रआसीत्पुरुषविध सोऽनुवीक्ष्यनान्यदात्मनोपश्यत्" इत्युपक्रम्य "सवैनैवरेमे तस्मादेकाकीनरमतेसद्वितीयमैच्छत् सहैतावानास" छन्दोगानां श्वेतकेतुविद्यायां "सदेवसोम्येदमग्रआसीदेकमेवाद्वितीयम्" इत्युपक्रम्य "तदैक्षतबहुस्यांप्रजायेयेति । तत्तेजोसृजत" इत्यादि ॥ आथर्वणानां गोपथब्राह्मणे "ब्रह्महवाइदमग्रआसीत्स्वयंत्वेकमेवतदैक्षतमहद्वैयक्षंतदेकमेवास्मिहन्ताहमदेवमन्मात्रंद्वितीयंदेवनिर्ममे" इति तेषां प्रश्नोपनिषदि (प्रश्न ६) "सईक्षांचक्रे" इत्युपक्रम्य "सप्राणमसृजतप्राणाच्छ्रद्धांखंवायुर्ज्योतिरापः पृथिवीन्द्रियम् ॥ मनोऽन्नमन्नाद्वीर्यंतपोमन्त्राः कर्मलोकालोकेषुचनामच" इतिनत्स्पत्तु सामाथर्वस्त्वेवमादीनि तत्रतत्र श्रुत्यन्तराण्यप्यनुसन्धेयानि ॥ एवं वेदाद्यन्यतां मायापरपर्यायप्रकृतिकारणवादं च निरस्यन्सूत्रकारोप्याह ॥ (अ० १ पा० १ सू० ५।१७) "ईक्षतेर्नाशब्दम् ॥ कामाच्चनानुमानापेक्षा ॥" (अ० १ पा० ४ सू० २४) "अभिध्योपदेशाच्च" इत्यादि ॥ एवमादिषु ब्रह्मणा जगदुत्पादने इच्छायाएव साधकतमत्वश्रवणात् सैव कारणम् नतु विशेषोद्बुद्धजीवकर्माणिमाया वा तत् ॥ अश्रवणात् ॥ अद्वितीयतया तथाङ्गीकारे तु श्रुतहान्यश्रुतकल्पनापातात् ॥ यदि श्रुतिस्त्वयाभिप्रेयात्तदुक्तं

प्रक्रियां सैववदेत् ॥ ननु इच्छामात्रेण सर्गम् ॥ तदेतदभिप्रेत्याहुः ॥ **नचमाययेत्यादिना** ॥ **श्रुतिषु** ॥ सर्वप्रकरणश्रुतिषु ॥ **मायाकुरुतेति** ॥ तदात्मानमिति स्वपरिणामबोधकवाक्यवदेवं श्रुतिवाक्यं यदि स्यादिति भावः ॥ श्वेताश्वतरे पुराणेषुचोच्यमाना माया तु तत्रैव तच्छक्तितया प्रतिपादितेति *सर्वभवनसामर्थ्यरूपा सा नब्रह्मातिरिक्ता* ॥ अतोब्रह्म यथा यथा भवनमिच्छति तथा तथा स्वसामर्थ्येनैव भवतीति तत्राभिप्रायः ॥ ननु भावरूपाऽज्ञानस्वरूपात्वदभिमता सा श्रूयते ॥ विशेषस्तु वक्ष्यते ॥ **अनवस्थास्यादिति** ॥ कैश्चिद्बुद्धिमद्भिर्यत्नेनोत्प्रेक्षिताअपि तर्काबुद्धिमत्तरैरितरैराभास्यन्ते ॥ तदुत्प्रेक्षिताश्चान्यैर्बुद्धिमत्तमैरित्येकत्रतर्के प्रतिष्ठाभावादनवस्था ॥ **मोक्षाभावश्चेति** ॥ अलौकिकेर्थे यथाश्रुतप्रतिपत्तिमन्तरा केवलतर्कैः पर्यवसानस्यासिध्या संशयात्मत्वानपाये साधनासंपत्त्या मोक्षाभावः ॥ एतेन तर्काप्रतिष्ठानसूत्रस्यार्थोदर्शितः ॥ **अतएवोक्तमिति** ॥ अविरोधस्य प्रथमे पादे व्यासचरणैः (सूत्र ११) उक्तमित्यर्थः ॥ अथ कण्ठरवेणास्मत्संमतप्रक्रियायाः श्रुतितोऽसिद्धावपि युक्त्या तां साधयिष्यामइत्याशयेन शङ्कते ॥ **नन्विति** ॥ समाधत्ते ॥ **कार्याकारत्वइत्यादिना** ॥ **नसंभवतीति** ॥ यथा तदात्मानमितिश्रुत्योपादानत्वं तथाऽजरत्वाऽमरत्वाऽविक्रियत्वादिश्रुत्या निर्विकारत्वमपि यथागमं तत्र प्रतिपत्तव्यमेव ॥ तस्यौपनिषदत्वात् ॥ श्रुतिभिश्च "तदेजतितन्नैजति" इत्यादिना तत्र विरुद्धधर्माश्रयतायाबोधनात् ॥ **अन्यथेति** ॥ श्रुतिमनाश्रित्य तर्काश्रयणे ॥ **वेदेचेत्यादि** ॥ मुण्डकादिषु "अथपराययातदक्षरमधिगम्यतेयत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रंतदपाणिपादंनित्यंविभुंसर्वगतंसुसूक्ष्मंतदव्ययंयद्भूतयोनिंपरिपश्यन्तिधीराः" इत्यादावदृश्यत्वादिना निर्विकारस्यैव भूतयोनिपदेन जगत्कारणत्वमुक्तम् ॥ अग्रे चानुपदंदृष्टान्तपूर्वकं "तथाक्षरात्संभवतीहविश्वम्" इति तदेव स्फुटीकृतम् ॥ एवं तत्र तत्रोपनिषत्सु द्रष्टव्यम् ॥ **अतएवेति** ॥ अविकृतपरिणामवादस्यैव वेदाभिप्रायगोचरत्वादेव ॥ **वेदेकृतमिति** ॥ छान्दोग्यादिषु "यथासोम्यैकेनमृत्पिण्डेन ॥ यथासोम्यैकेनलोहमणिना" इत्यादिना कृतम् ॥ **विकारस्त्वन्यथाभावइति** ॥ स्वासाधारणधर्मपरित्यागपुरःसरः पुनः कारणभावप्रतिरोधिधर्मान्तरोदयोविकारः ॥ यथा दुग्धस्य दधिभावे दुग्धासाधारणधर्मस्य माधुर्यादेः परित्यागः ॥ पुनर्दुग्धभावापत्तिप्रतिरोधिनोऽम्लत्वघनत्वादेरुदयश्च ॥ श्रुत्युक्तानां मृत्सुवर्णायःप्रभृतीनां तु घटकटककटाहादिभावेपि तदसाधारणधर्माणां गन्धवत्त्वकषपट्टिकारोहित्वकृष्णकठिनधातुत्वादीनां न परित्यागः ॥ नापि घटादीनां भूयः कारणभावानापत्तिः ॥ अतएवघटादेः पाकादिदशायां धर्मान्तरोदयेपि न दोषः ॥ तस्य कारणभावापत्तिप्रतिरोधित्वाभावात् ॥ किञ्च यदि मृदादेः श्रौतदृष्टान्तस्य मायया घटादिभावः स्यात्तर्हि ब्रह्मणोपि तथा प्रपञ्चभावः ॥ तदेवतु नास्तीत्याहुः ॥ **नापीत्यादि** ॥ यथा रज्जुत्वेन ज्ञानादेव तत्र सर्पप्रत्ययोन भवति तथा मृत्त्वादिना ज्ञानेपि घटादिप्रत्ययस्तथासति नस्यात् ॥ घटाद्याविर्भावे कुलालादिव्यापारोपि नापेक्ष्येत ॥ नहिरज्जौ सर्पप्रत्यये सर्पिण्यागर्भधारणप्रसवाद्यपेक्ष्यते ॥ एतच सर्वं पुरस्तात्प्रपञ्चयिष्यते ॥

इति ॥ सर्वदर्शीविमुक्तात्मेयत्र "सर्वेषांप्राणिनांकृताकृतंसर्वंपश्यतिस्वाभाविकेन-बोधेनेति सर्वदर्शीति" एवमादिषु शङ्कराचार्यैरपि तस्य नित्यैकज्ञानस्योरीकारात् ॥ नच नाना ज्ञानानि कल्प्यानि ॥ तेषांयुगपदेकाधिकरणवृत्तितायालोकविरुद्धत्वे घट्टकु-

टीप्रभातापातात् ॥ सर्वविषयकज्ञानानङ्गीकारे च "यः सर्वज्ञः सर्वशक्तिः ॥ सवेत्तिवेद्यं नचतस्यवेत्ता" इति मुण्डकश्वेताश्वतरादिश्रुतयः ॥ वेदाहंसमतीतानिवर्तमाना-निचार्जुन ॥ भविष्याणिचभूतानिमांतुवेदनकश्चन ॥ इत्यादिस्मृतयश्च व्याकुप्येयुः ॥

नच पर्यायेणसर्वज्ञत्वं शङ्क्यम् ॥ सर्वएवहिसर्वेषां भवन्तिक्रमशोमिथइति श्रीभा-गवतोक्तरीत्या पर्यायतः सर्वज्ञतायाजीवेपि समर्थनेश्वरमात्र तथात्वबोधकश्रुत्या-दिविप्लवानपायात् ॥ तत्त्वमसीत्यादौ स्पष्टसर्वज्ञत्वकिंचिज्ज्ञत्वादित्याज्यभागव्यवस्था-भङ्गप्रसङ्गाच्च ॥ तान्यहंवेदसर्वाणिनत्वंवेत्थपरंतपेत्यासदिसार्वदिकसर्वज्ञत्वबोधकप्रमा

णविरोधाच्च ॥ पर्यायेणसार्वज्ञ्येऽभिप्रेतेतत्तत्काले तत्तज्जन्मज्ञानस्यार्जुनेपिसत्वेन नत्वं वेत्थेति निषेधोनोपपद्येत ॥ अथ श्रुत्याद्यनाकुलत्वाय सदा सार्वज्ञ्यं तस्य स्वीक्रियेत तदा तानि ज्ञानानि नाना एकमेव वा नाद्य ॥ एककालावच्छेदेनानेकेषां तेषां सामानाधिकरण्यस्य बहुकालावस्थायित्वस्य च लोकविरुद्धत्वात् ॥ यदि चेश्वरध-र्मेषु लोकविरोधं सह्येततर्हि तं सोढ्वा लाघवादेकमेव तत्सर्वावगाहि स्वीक्रियताम् ॥ लोकेपि समूहालम्बनाना ज्ञानविशेषाणामनेकावगाहित्वस्य दर्शनेन प्रथमपक्षवत्प्रबललो-कविरोधाभावाच्च ॥ एवमीश्वरज्ञानस्य सिद्धएकत्वे तदिच्छायामपि तथात्वमस्तु ॥ तस्या-ज्ञानसमानविषयकत्वनियमात् ॥ किञ्च कार्यमात्रं प्रतीश्वरेच्छाप्रयत्नौ कारणं न वा ॥

न द्वितीयः ॥ "सोकामयत ॥ इदंसर्वमसृजत ॥ कर्तारमीशंपुरुषंब्रह्मयोनिम्" अहंसर्वस्यप्रभवोमत्तः सर्वंप्रवर्ततइति तपाम्यहमहंवर्षंनिगृह्णाम्युत्सृजामिचेत्यादिकर्तृत्वा-दिबोधकश्रुतिस्मृतिशतपीडापत्तेः ॥ लोकायतिकादितन्त्रनिरीश्वरवादापत्त्या श्रुतिस्मृ-तिसर्वविप्लवप्रसक्तेश्च ॥ आद्यश्चेत्तत्तद्विषयिण्यइच्छानाना एकैव वा ॥ न प्रथमः ॥ लोके एकैकस्यास्तस्याक्षित्रिक्षणावस्थायित्वनियमेनानेकासां तासां यौगपद्यस्य लोकविरुद्धत्वात् ॥

यदि चेश्वरधर्मेषु तद्विरोधस्याकिञ्चित्करत्वमाश्रीयेत तर्हि तंसोढ्वा लाघवादेकैवेच्छा सर्वानुगता स्वीक्रियताम् ॥ इच्छाविशेषाणामनेकविषयावगाहितायाअनुभवेन प्रथमपक्ष-वत्प्रबलतद्विरोधाभावाच्च ॥ नच पर्यायेणतत्तदिच्छा कल्प्या ॥ कार्ययौगपद्यानुपपत्तेः ॥ एतेनापि ज्ञाननित्यत्वं दृढीकृतम् ॥ तदन्तरेणेच्छायास्तामन्तरेण कार्याणां चासम्भवात् ॥

समानविषयकत्वं च तद्विषयविषयकत्वम् ॥ इदं चेच्छाया किंविषयविषयकत्वेन स्थिति-रनुभवबलेनाङ्गीक्रियते ॥ ज्ञानादिसमानविषयकत्वेनेति चेन्न ॥ ज्ञानादिवदिति दृष्टान्तत-योपन्यासासङ्गतेः ॥ अतएकैकविषयानवगाहित्वाभिप्रायेण समानविषयत्वोक्तिस्तु प्रेक्षाव-च्छैलीविरुद्धा ॥ यच्च तत्र लौकिकेच्छातइत्यादि वक्ष्यमाणत्वाच्चेत्य तमभ्यधायि तदप्या-ह्योपुरुषिकामात्रम् ॥ इच्छात्वं हि नाम इच्छतीति प्रमितिगोचरेच्छात्वजातिमत्वम् ॥ प्रवृत्तेः साक्षादनुकूलगुणत्वं वा ॥ अत्राद्यलक्षणे प्रमितिः प्रत्यक्षशाब्दाद्यन्यतमा विव-

क्ष्यते ॥ तेनेश्वरेच्छायां तादृशशब्दविषयत्वात्तत्व्याप्तिः द्वितीयस्मिंश्च ज्ञानेतिप्रसङ्गवारणाय साक्षात्पदम् ॥ विषये तद्वारणाय गुणपदम् ॥ परे तु विषयस्यापि ज्ञानेच्छाद्वारैवानुकूल्यत्वमभिप्रेत्यगुणपदं त्यजन्ति ॥ आस्तांचैतत् ॥ तथात्वं चेश्वरेच्छायामपि समन्वेत्येवेति नात्यन्तवैलक्षण्यं तस्याः ॥ उद्देश्यताख्यविषयतावत्वेन तौल्याच्च ॥ अतोन तत्रेच्छाशब्दप्रयोगःपारिभाषिकोनानार्थोवा सः ॥ नित्यत्वसर्वविषयत्वाभ्यामेवात्यन्तवैलक्षण्यस्वीकारे तु ईश्वरज्ञानेज्ञानशब्दप्रयोगोपि पारिभाषिकः स्यात् ॥ स्याद्वा ज्ञानशब्दस्य नानार्थता ॥ किञ्चनित्यत्वेनविभुत्वात्सर्ववस्तुसंबन्धित्वेन धर्मान्तरैश्च लौकिकप्रतिबिंबतोविलक्षणतमेपि जीवे लोकविरोधमनुसन्धाय किञ्चिद्वैलक्षण्यस्यादोषत्वंस्वाष्टमश्लोकविवरणे वदन् प्रकृते च ताभ्यामेवात्यन्तवैलक्षण्यंप्रतिपिपादयिषन्कुतोन जिन्हेषि ॥ ईशज्ञानेच्छयोश्च तंतं शब्दं न वयं स्वयमेव प्रयुंज्मः ॥ किन्तु "सआत्मानमेवावेत् ॥ सद्वितीयमैच्छत्" इत्यादिवैदिकव्यवहारानुसारात् ॥ नच श्रौतव्यवहारोनानार्थकल्पनेन पारिभाषिकत्वेन चोपपादनीयः ॥ हनहिंसागत्योरित्यादिवज्ज्ञानातीच्छयोरनेकशक्तिकताग्राहकमानाभावात् धातून-पारिभाषिकार्थान्तरादर्शनाच्च ॥ अतएव वृध्यादिसञ्ज्ञास्थलेपि क्तिवन्तादयस्तेते शब्दा एव तत्रतत्रार्थेपरिभाष्यन्ते नतु तत्तत्प्रकृतयोधातवः ॥ तस्माद्वेत्तिकामयतिप्रभृतीनामनेकेषांपारिभाषिकत्वकल्पनमरोचिष्णु ॥ इच्छाशब्दमात्रस्य पारिभाषिकत्वकल्पने तु "सद्वितीयमैच्छत् ॥ सोकामयत" इत्यादौ न तत्कल्पनावकाशः ॥ अपिच मूलोक्तरीत्या ईश्वरेशरीराद्यभावादीक्षितृशब्दस्य ब्रह्मणिपारमार्थिकसत्यत्वाद्भ्रमाधिष्ठानशब्दस्य भवन्मतेपीश्वरेच्छायांजगद्धेतुभावादिच्छाशब्दस्यच प्रयोग.पारिभाषिकःकुतोनस्यात् ॥ कुतो वानस्यादीक्षित्रादिशब्दानांनानार्थतेत्याद्यूह्यम् ॥ ईश्वरेच्छायाएवजगद्धेतुत्वंनान्येच्छाया इतितु (अ० ४ पा० ४ सू० १७) "जगद्व्यापारवर्जंप्रकरणादसंनिहितत्वाच्च" इत्यधिकरणेभाष्येमुक्तानामपिजगद्व्यापारंप्रतिषिध्येश्वरएवतंस्थापयद्भिःशङ्कराचार्यै.स्वीकृतमेव ॥ तदैक्षतेत्यादिश्रुतीनामनित्येच्छापक्षपरत्तात्विच्छानित्यत्वनिर्णयेननिराकारिनिराकरिष्यतेच ॥ किञ्च तावका अपि बहवः सर्गसमयएव समुदयज्ज्पामीश्वरज्ञानेच्छामयत्नानामाप्रलयस्थायिनीमेकैकामेवव्यक्तिं मन्यंतेऽतस्तादृशानित्येच्छापरत्वपक्षेपि वैलक्षण्यतादवस्थ्याक्तदोषनिस्तारः ॥ इच्छाजन्यसर्वकार्याणां सर्गारंभकालएवोद्भवस्यापत्तेश्च ॥

यत्तु (किञ्चतदाऽऽकारास्तद्धर्मावायावन्तः कल्प्यन्तेतावत्यइच्छा एवकल्प्यन्ता)मित्याद्युक्तंतन्न ॥ श्रुत्यनुसारेणैवकल्पनाऽस्मन्मतेसंभवतीत्युक्तमसकृदेवतादृशश्रुत्यभावेनतत्कल्पनाऽसंभवात् ॥ धर्मभेदेनाकारभेदेनचधर्मिभेदकल्पनेस्मृत्यनुभवस्यमाद्यनेकवृत्तिविशिष्टस्याऽनेकाकारस्यान्तःकरणस्यैकत्वंनस्यात् ॥ तत्तत्क्षणवृत्तित्वविशिष्टैकघटादिकल्पनापेक्षयातावन्तोघटपटादयःकल्प्यन्तां ॥ नत्वेकं घटंप्रकल्प्यतत्रतत्रतत्क्षणवृत्तित्वचैशिष्ट्यानि ॥ घटकल्पनायाआ-

धिक्यात् ॥ धर्मकल्पनातोधर्मिकल्पनागौरवस्यत्वन्मतेऽकिञ्चित्करत्वात् ॥ त्वन्मतेत्रापियौक्तिकगौरवस्यासत्वान्मानाभावस्यचोक्तत्वात् ॥ एवंचजितंक्षणिकवादिभिर्नास्तिकैः ॥ "तदैक्षतबहुस्यांप्रजायेये"त्यादिश्रुतौतत्तत्पदार्थाऽऽकारानेकेच्छानामप्रतीतेस्तादृशश्रुतिसत्वे नचेदृशीश्रुतिः स्मृतिर्वाकाचिदस्तीत्यादिकथनमयुक्तम् ॥ तत्रैकेच्छायाएवप्रतीतेः ॥

सहस्राक्षे ॥ किंचैतदाकाराइत्यादिमाश्रीयेतेत्यन्तं भागं दूषयंति ॥ यत्तुकिंचेत्यादिना ॥ प्रतीतेरित्यंतेन ॥ अयमयं भावः ॥ यच्च किंचतदाकाराइत्यादिमानाभावादित्यंतमवादि तदपि कुशकाशावलंबनम् ॥ वह्निच्छानादिनापि कश्चिदाकारः प्रतीच्छमुपगंतव्योन वा ॥ नाद्यः ॥ निराकारकेच्छायाअप्रसिद्धेः ॥ आद्यश्चेद्वह्निच्छानां कल्पनंबाधिका नत्वेकेच्छायाः सा ॥ किंच प्रकारताविशेष्यतासंसर्गतात्यत्रिविधविषयतानिरूपितविषयितारूपधर्मः प्रतीश्वरज्ञानं प्रति तदिच्छं च मंतव्योन वा ॥ न द्वितीयः ॥ निर्विषयेच्छाद्यनुपपत्तेः ॥ आद्येइच्छाया स्वाश्रयनिरूपितधर्मत्वेपिपूर्वोक्तविषयितानिरूपितधार्मित्वमक्षतमितिधर्मकल्पनातोधर्मिकल्पनायागुरुत्वान्नेच्छाबह्वःकल्प्यतइतियुक्तमेव ॥ अन्यथात्वयापियावंतस्तत्तद्विषयाकारा मायावृत्तिविशेषाःकल्प्यंतेतावत्योमायाएवकल्प्यंतां ॥ मायाकल्पनायास्तुतरामाधिक्याद्वचनमात्रेणगौरवादिव्यवस्थायाअसिद्धेस्त्वयांऽगीकारात्॥ तथायावतीत.करणवृत्तिविशेषाजीवेषुकल्प्येरन्तावंत्यंत.करणान्येवाभ्युपेयंतां ॥ धर्मिकल्पनात्वेनगौरवेमानाभावस्यत्वयैवोक्तत्वात् ॥ यदिचतत्कल्पनेगौरवस्ययौक्तिकत्वमाश्रीयेततर्हिप्रकृतेपितदाश्रीयतांसमानयोगक्षेमत्वात् ॥ धर्मिकल्पनस्यागुरुत्वेघटादिषुघटत्वैकत्वनीलत्वाद्येकैकधर्माश्रयनानाधर्मिसमुदायरूपत्वमपिसुवचम् ॥ मूलदर्शितदिशाक्षणिकवादस्यापादनमपिसुकरम् ॥ वह्निच्छावादिनास्वाश्रयेऽनंतेच्छानांसंबंधास्तासुचविषयितादेस्तेऽनताएवकल्प्याइतिमहदेवगौरवम् ॥ यच्च (नचेदृशीश्रुति.स्मृतिर्वाकाचिदस्तियद्बलात्सत्यपिगौरवेबहुधर्मानुगतैकेच्छाऽऽश्रीयेत) इत्युक्तंतदबोधाद्बहुधर्मानुगतामेकामन्वाश्रित्यैकैकधर्मानुगतानां बह्वीनामाश्रयणेपीच्छासुधर्मितायाःस्वमुखेनैवोपादानेन (इच्छैवधर्मपदेन) इत्यादिस्वोक्तपूर्वस्य स्वयमेवनिरासात् ॥ तस्याः सर्वथानिर्धर्मकत्वेऽभिप्रेयमाणेतुधर्मानुगतेत्येवक्तुंयुक्तं ॥ ननुबहुपदम् । विषयितादिधर्मशून्येच्छाचाप्रसिद्धैव ॥ वस्तुतस्तुप्रपंचाविर्भावहेतुतयाम्नाताया परब्रह्मेच्छायालाघवाद्बहुत्वबोधकश्रुत्याद्यभावाच्चसिद्ध्यदेकत्वं सर्वकार्यान्यथानुपप-

---

१ किंच तदाकारास्तद्धर्मावा यावन्त कल्प्यन्ते तावत्यइच्छाएवकल्प्यन्ता ननुएकामिच्छाम्प्रकल्प्य तदाकारादय ॥ इच्छाकल्पनायाआधिक्यात् ॥ इच्छैवच धर्मपदेनोच्यतां तस्याइच्छाश्रयधर्मत्वात् ॥ एतेन धर्मकल्पनातोधर्मिकल्पनायागुरुत्वान्नेच्छाबह्व्य कल्प्यन्तइतिप्रत्युक्तम् ॥ वचनमात्रेण गौरवादिव्यवस्थायाअसिद्धेश्च ॥ नह्यसति यौक्तिकगौरवेधर्मिकल्पनात्वेनैव गौरवम् ॥ मानाभावात् ॥ नचेदृशी श्रुतिः स्मृतिर्वा काचिदस्ति यद्बलात्सत्यपिगौरवे बहुधर्मानुगतैकेच्छाऽऽश्रीयेत ॥

स्यासिद्धत्वदपितत्तदाकारवत्त्वंचकुतोनस्वीकार्यम् ॥ लोकविरोधादितिचेत्सर्वास्ताः सृष्ट्यव-सरएवसंभूताआसंवर्तवर्तिन्योमन्यंतेनवा ॥ नाद्यः ॥ तद्विरोधतादवस्थ्यात् ॥ ताद-शीच श्रुतिःस्मृतिर्वावाच्या ॥ यथातावत्कालस्थायिन्योबह्व्यईश्वरेच्छाबोधिताःस्युः ॥ द्वितीयश्चेजीववत्त्रिक्षणावस्थायिन्योनानेच्छाएकैकशःक्रमेणोत्पद्यंतेयुगपदपिवाआद्यएकक्ष-णावच्छिन्नबहुकार्यानुपपत्त्याप्रागेवापास्तः ॥ अंत्येतद्विरोधोनिरुच्छेदः ॥ किंचसृष्टिकाल-एवोत्पन्नानांतत्तत्सर्वकार्यतत्तद्भावविकारविषयिणीनां लोकानुरोधात् क्षणत्रयमात्रावस्था-यिनीनामनन्तेच्छानामाप्रलयं तत्तत्कालनियततत्तत्कार्यसंभवनिर्वाहायानन्तसंतानकल्पने महदेवनिरर्थकगौरवम् ॥ न च कार्यपूर्वक्षणएवेच्छाउत्पद्यंतइति न सृष्टिदिष्टात्प्रभृति तत्संततिः कल्प्येतिवाच्यम् ॥ सतपोतप्यतेतिश्रुतिविरोधात् सार्वज्ञ्यविरोधाच्च ॥ तथाहि परमेश्वरः सर्गावसरएव भावीनि यावत्कार्याणि तत्तज्जन्मास्तित्ववृद्ध्यादीनि तत्र सर्वत्र स्वेच्छानिमित्तकत्व च जानाति न वा ॥ प्रथमे सर्वेच्छास्तदैवसिद्ध्यन्ति ॥ द्वितीये सर्वविच्त्वश्रुतीनां वेदाहंसमतीतानीत्यादिस्मृतीनां च व्याकोपः ॥ अतएकस्याअपि तदिच्छायाः सर्वाकारकत्वं श्रुत्यनुकूलयुक्तिसिद्धम् ॥ ईश्वरधर्मेषु लोकविरोधस्याकिंचित्करत्वात् अन्यथा तदीयैकनित्यज्ञानस्यापि सर्वावगाहित्वं न स्यात् ॥ तत्र ब्रह्मधर्मत्वादिना तद्विरोधसहनेत्वत्रापि स सोढव्यइति पूर्वमेवावोचाम किंच तदिच्छायाएकत्वं "सईक्षांचक्रे" (स्कं० १०अ० ३०।२३ श्लो० ३५) तस्येच्छयात्तवपुषः कुत एव बंध इत्याद्येकत्वबोधकानेकश्रुतिस्मृतिसिद्धम् ॥ नचोक्तश्रुतौ ईक्षांचक्रइतीक्षतेरेव लिटि रूपमाश्रित्यैकपदं तदितिशंक्यम् ॥ शंकराचार्यैरप्युपनिषद्भाष्ये "ईक्षांचक्रेईक्षणं दर्शनं चक्रे कृतवान्" इतिव्याचक्षाणैरीक्षामित्यत्र पृथक्पदत्वस्य बोधनात् ॥ नच द्वितीयाश्रुत्या प्रहगतैकत्ववत्तदविवक्षितमितिशंक्यम् ॥ तस्येच्छया (स्कं० १ अ० ३ श्लो० १) आदौ लोकसिसृक्षयेत्यादौ तृतीयाश्रुत्या गवाक्रीणातीत्यादिवत्तस्याभ्युपेयत्वसिद्धेः ॥ एतेन "सोकामयत तदैक्षत सेयंदेवतैक्षत" इत्यादावेकैव सा ज्ञेया ॥ अतएव सूत्र-कारोपि "कामाच्च नानुमानापेक्षा ॥ पराभिध्यानात्तु ॥ संकल्पादेवतु" त्यादौ तस्याएक-त्वमेवाह ॥ नित्यत्वं च "भारूपः सत्यसंकल्पआकाशात्मा" इत्यादिसामगशांडिल्यविद्या प्रभृतिश्रुतिप्रतिपन्नं औपनिषदैः सत्यनित्यशब्दयोः पर्यायतायाः पर्याश्रितत्वात् ॥ ईश्वर-धर्मत्वाच्च "विनाशी वा अरेयमात्माऽनुच्छित्तिधर्मा" इत्यादिश्रुतिसम्मतम् ॥ नचात्रोच्छि-त्तिधर्मत्वाभावोर्थः कल्प्यः ॥ अविनाशिपदेन पौनरुक्त्यापातात् ॥ नाप्यनुच्छित्तिर्धर्मो-यस्येति ॥ तावताऽपि सधर्मकत्वापत्तेः उक्तदोषाच्च ॥ धर्मनित्यत्वञ्च तुरीयश्लोकखण्डनादौ विस्तरेणोपपादयिष्यते ॥ एवं सिद्धएकत्वे नित्यत्वे च तस्याएवानेकाकारकत्वं तत्तद्देशकाला-वच्छिन्नसर्वकार्यान्यथानुपपत्तेः ऋगादिशाखासु क्रमेण "सईक्षत लोकान्नुसृजा इति ॥ सद्वितीयमैच्छत्सहैतावानास सेयंदेवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेना-त्मनानुप्रविश्य नामरूपे व्याकरवाणीति" इत्यादिभ्यस्तस्याः सर्वकारणत्वबोधकैतरेय-काण्वच्छन्दोगादिश्रुतिभ्यश्च श्रौतार्थापत्त्यैवासिद्ध्यति ॥ किंच "बहुस्यांप्रजायेयेति"

इतियह्यवह्लिश्वेतकेतुविद्याश्रुतिः स्पष्टमेकस्यास्यानेकाकारानुगतत्वम्बोधयति ॥ अन्यथा इतिशब्दद्वयं भूयात् बहुस्यामित्याकारस्य भिन्नत्वात् ॥ अकामयतेतिचावर्तनीयं स्यात् ॥ नित्यत्वञ्च सिद्धार्थेसिद्धसंकल्प इतिविष्णुनामसहस्रस्मृतिः स्फुटमाह सिद्धशब्दस्य नित्यपर्यायत्वंतु महाभाष्ये पस्पशाह्निके "सिद्धे शब्दार्थसंबंध" इतिवार्तिकव्याख्याने स्पष्टम् ॥

तादृश्याश्चेच्छायाब्रह्माभिन्नैस्तत्तत्पदार्थैः संवन्धे न किंचिद्बाधकम् ॥ पदार्थस्योत्पन्नत्वानुत्पन्नत्वेनाऽसत्संमते सर्वेषां पदार्थानां ब्रह्मस्वरूपेण सत्वात् ॥ एतेन एवंचेत्यादिदूषणमनवकाशं जीवेच्छानां नित्यत्वापादनं सत्कार्यवादिनां मते नसंभवति ॥ इष्टाऽऽपत्तिपराहतत्वात् ॥ नच जीवेच्छानामुत्पत्तिविनाशयोरनुभवसिद्धत्वात्कथमिष्टापत्तिरितिवाच्यम् ॥ अनुभवस्याविर्भावतिरोभावविषयकत्वात् ॥ तिरोभावेऽपिसद्रूपेणास्त्येव ॥ एवञ्चतदृष्टान्तेनेश्वरेच्छायाअनित्यत्वाऽऽपादनंनसंभवति ॥ जीवेच्छेश्वरेच्छयोर्नित्यत्वे प्रकारभेदस्त्वस्त्येव ॥ "सोकामयते"त्यादावुत्पत्तिवाचकपदाऽभावाद्नाशवाचकपदाऽभावाच्च कथंतादृशश्रुत्योत्पत्तिविनाशयोः सिध्या नित्यत्वं चक्रमशक्यम् ॥ वस्तुतस्तु किञ्चेत्यादिप्रलापः परमताज्ञानेन स्वकल्पितशङ्कासमाधानरूपउन्मत्तप्रलापतुल्य एव (कश्चायमिच्छाविषययोस्त्वन्मते संवन्धः किंस्वरूपात्मक उत तद्भिन्नः) इत्यादिना इच्छासंवन्धविषयकप्रश्नः कृतः तत्र ब्रूमः ॥ इच्छाविषययोः स्वरूपएव संवन्धः ॥ सचाविर्भविष्यत्तद्विषयस्वरूपएव फलजनकः ॥ इच्छास्वरूपस्तु नाङ्गीक्रियतेतेनेच्छायानित्यत्वइत्यादिकादोषा अनवकाशाः ॥ नचस्वरूपस्य संवन्धत्वसंभवे संयोगादिर्व्यर्थः स्यादिति वाच्यम् ॥ नहिकिञ्चित्प्रतियोगिकस्य किञ्चिदनुयोगिकस्य स्वरूपस्य संवन्धत्वसंभवोन्यप्रतियोगिकानां संयोगादीनांव्यर्थत्वसंपादकइति कस्यचिदपिसंमतम् । एवं चेच्छायाविषयैर्विषयत्वात्मकस्वरूपसंवन्धस्वीकारेपि घटादीनां भूतलादौ संयोगे कोविरोधः ॥ किञ्च घटादीनां भूतलादौ कालिकदैशिकैकज्ञानविषयत्वादीनां संवन्धानां संभवेपि संयोगस्य संवन्धत्वं प्रतीत्यनुसारेण वैशेषिकैरङ्गीक्रियते ॥ एवं च समानाधिकरणसंवन्धस्यापि संवन्धान्तरानुच्छेदकत्वे व्यधिकरणस्योच्छेदकत्वशङ्कातुदूरादपास्ता ॥ घटादीनांत्वदभिमतानुत्पन्नतादशायामनाविर्भूतत्वेपिसद्रूपे ब्रह्मणि घृतकाठिन्यवल्लीनत्वात्सत्वेन तत्रेच्छायाः स्वरूपसंवन्धः संभवत्येव ॥ तथा च एतेनेत्यादिकं

दत्तोत्तरम् ॥ नाप्युभयभिन्नइत्यादिकं दूषणं तूभयभिन्नस्य संबन्धस्यात्रानङ्गीकारेणैवानवकाशं सतिकुड्ये चित्रमितिन्यायात् ॥

सहस्तासे एवञ्च नित्येच्छाया इत्यादिंस्थितेरितिन्यायादित्यन्त भागवूपयति ताद्दृश्याश्चेच्छायाइत्यादिना ॥ चित्रमितिन्यायादित्यन्तेन उत्पन्नत्वेति ॥ कालभेदेन व्यवस्थिते ते नास्मत्सम्मते ॥ इदानीमयमुत्पन्न पूर्वमनुत्पन्नइतिसत्कार्यवादेवक्तुमशक्यत्वात् ॥ नित्यत्वादनुत्पन्नत्व तु सम्मतमेवेति हृदयम् ॥ अत्रेदमाकूतम् ॥ यत् एवञ्च नित्यच्छायास्तैस्तैरित्यादि समानमित्यन्तमत्रापि तत्तु कोलाहलमात्रम् । आप्रलयस्थायित्वपक्षे ईशेच्छायास्तैस्तै सृज्यमानपदार्थै संबधस्य तत्तत्कार्याणामनुभूयमानक्रमिकत्वोपपत्तये विरम्य व्यापारस्य च त्वयापि स्वीकार्यत्वात् ॥ अनन्तेच्छासन्तानपक्षस्तु पुरैव निराकृत ॥ तत्पक्षे कार्यसाक्षाज्जनकेच्छातिरिक्ततत्सन्तानस्य जीवेच्छावत्फलव्यभिचारितयैश्वर्यमपि भज्येत ॥ समानविषयत्वेनोपक्षयोक्तिस्तु विद्वच्छैलीविरुद्धा ॥ किञ्चैकैककार्यनियतैकैकच्छापि तत्तत्कार्यक्षणएवोत्पद्यते तत पूर्वं वा ॥ नाद्य तस्या कारणत्वासिद्धे ॥ अनन्यथासिद्धकार्यनियतपूर्ववृत्तेरेवकारणत्वात् ॥ द्वितीयश्चेत् उत्पत्स्यमानेन कार्येण तत्सम्बन्ध क्षण विरम्य व्यापारश्च वक्तव्य एव कार्यस्य यत्नोत्तरकाले सभवात् ॥ विषयत्वरूपस्य तस्यास्तत्तत्कार्ये सम्बन्धस्यानङ्गीकारेतु घटेच्छात पटोप्युत्पद्येतेति महत्येव कार्यकारणभावाऽव्यवस्था ॥ अस्तुचेयमसत्कार्यवादिना त्वादृशातार्किकाणाञ्चाविद्यमानेन वस्तुना तत्सम्बन्धचिन्ता ॥ अस्माक सत्कार्यवादिनान्तु कार्यस्यापि नित्यत्वेन सार्वदिकस्तत्सम्बन्धो नानुपपन्न ॥ आविर्भावश्च

---

१ एवच नित्येच्छायास्तैस्तै सृज्यमानै सबन्धमात्राङ्गीकारपक्षोपिनिरस्त ॥ अनुत्पन्नेन पदार्थेन तदाविर्भावेन वा इच्छाया सब न्धाऽयोगात् ॥ समानविषयतयैवोपक्षयेण विरम्य व्यापाराभावाच ॥ अन्यथा लाघवेन जीवेच्छानामपि नित्यत्वप्रसङ्गात् ॥ नच जीवेच्छाना न नित्यत्वमनुभवेनोत्पत्तिनाशयो सिद्धत्वादिति वाच्यम् ॥ इश्वरेच्छायाअपि सोऽकामयतेत्यादिश्रुत्योत्पत्तिनाशयो सिद्धानित्यत्वस्य वक्तुमशक्यत्वात् ॥ ईश्वरेच्छायामुत्पत्तिनाशयोर्व्यपदेशस्य सब न्धोत्पत्तिनाशाभ्या स्वीकारे तु जीवेच्छायामपि तयोरनुभवस्ताभ्या स्वीक्रियेतेति समानम् ॥ किञ्च लाघवमात्रेण श्रुत्यर्थस्यौपचारिकत्वस्वीकारे स्वमादेरप्यनित्यत्वाऽसिद्धि ॥ कश्चायमिच्छाविषययोरत्व मतेसब न्ध ॥ किं स्वरूपात्मकउत तद्भिन्न ॥ आद्येऽपि किमिच्छास्वरूपात्मक आहोस्विद्विषयस्वरूपात्मक ॥ नतावदाद्य ॥ इच्छायानित्यत्वेन तस्य नित्यत्वानपाये उक्तदोषाऽनिस्तारात् ॥ सब न्धत्वरूपेणेच्छायाअप्यनित्यत्वेतु तदीयनित्यरूपमजागलस्तनायमानमेव ॥ अनित्यरूपस्य स्वीकृतत्वेन गौरवाऽनपायात ॥ किञ्च स्वरूपस्य सब न्धत्वसम्भवे सयोगादिर्व्यर्थ स्यात् ॥ एतेन सबन्धस्य विषयस्वरूपत्वमपि निरस्तम् ॥ घटादेस्तदाविर्भावस्य वाऽनुत्पत्तिदशाया तत्स्वरूपाऽभावेनेश्वरस्य तदिच्छाऽनुपपत्तेश्च ॥ नाप्युभयभिन्न सबन्ध ॥ निर्वक्तुमशक्यत्वात् ॥ किञ्च तस्याऽपि संबन्धान्तरकल्पनायामनवस्था ॥ समवायाभ्युपगमाच्च साम्यादवस्थितेरिति न्यायात् ॥

अस्मिन्देशेऽस्मिन्काल इदमेवं लौकिकानुभवगोचरीकरिष्यामीतीश्वरेच्छाविषयत्वमेव ॥ अतो यस्मिन्कालोपाधौ यद्देशावच्छेदेन यत्प्रचिकाशयिषितं तदैव तत्र तत्संसारिजीवैरनुभूयते यस्मिंश्च कालोपाधौ यत्तिरोबिभावयिषितं तदैव तत्तिरोधत्तइति न काप्यव्यवस्था ॥ आपाद्यमानञ्जीवेच्छानित्यत्वन्तु सत्कार्यवादिनेष्टतयाऽभ्युपगम्येत ॥ तदुत्पत्तिनाशप्रतीतेराविर्भावतिरोभावविषयकत्वात् ॥ नन्वेवंसति जीवेच्छेश्वरेच्छयोः को विशेष इति चेदुच्यते ॥ जीवेच्छा घटादिवदाविर्भावतिरोभावशालिनी तेन तत्र जन्यत्वव्यवहारः ॥ वृत्तिरूपतज्ज्ञानवत् ॥ स्पष्टञ्चेदं सर्वार्थनिर्णये (कारिका १३८) बुद्धेर्वृत्तिः स्थितिर्नाम गुणतः सा त्रिधा मतेत्यत्र निबंधावरणभंगयोः तृतीयस्कंधसुबोधिन्यादौ च ॥ ईश्वरेच्छात्वीश्वरवत्स्वातंत्र्येण नित्या तद्धर्मत्वात् ॥ अतोजीवेश्वरज्ञानयोरिवतदिच्छयोरपि नित्यत्वे अनित्येजननमित्याद्युक्तदिशा प्रकारभेदोऽस्त्येव ॥ एवञ्च जीवेच्छास्तु नानाव्यक्तयो नेश्वरेच्छावन्नित्याः आविर्भावतिरोभावरूपतदुद्भवोपरमयोरनुभूयमानत्वात् ॥ नचानुभवः सम्बन्धोत्पत्तिनाशादिनाऽन्यथानेयः श्रुतिसंवादित्वात् ॥ संगात्संजायते कामः कठवल्लीबृहदारण्यकयोः "यदासर्वे प्रमुच्यंते कामाः" सप्तमस्कन्धदशमाध्याये (श्लोक ७) विमुञ्चति यदा कामान्मानवो मनसि स्थितान् ॥ तर्ह्येव पुण्डरीकाक्ष भगवत्त्वाय कल्पते एवमादिषु तज्जननप्रलययोर्व्यक्तिबाहुल्यस्य च श्रवणात् ईश्वरेच्छावत्स्वातंत्र्येण तन्नित्यताबोधकमानानुपलंभाच्च "सोकामयत" इत्यादिश्रुतयस्तु "बहुस्याम्प्रजायेयेति" इतिस्वरूपव्यवस्थापकेन पूर्वान्वयिनेतिशब्देन तादृशतदाकारस्यैव तदाप्राकट्यंबोधयन्ति न तु नित्येच्छाशक्तेरुत्पत्तिनाशौ ॥ अश्रुतेः ॥ न च भूतार्थकाख्यातश्रुत्या तौ शक्यवचनौ "सदेव सोम्येदमग्रआसीत् ॥ ब्रह्मवा इदमग्र आसीत्" इत्यादौ तच्छ्रुत्या ब्रह्मणोपि तयोरापत्तेः ॥ ननु "सत्यंज्ञानं" इत्यादि तन्नित्यताबोधकश्रुतिविरोधात्सैवमितिचेत् "अनुच्छित्तिधर्मा ॥ सत्यसंकल्पः ॥ पराऽस्यशक्तिः" इत्यादिनित्यत्वगमकश्रुतिविरोधः प्रकृतेपि तुल्यः ॥ स्वतःप्रमाणशब्दप्रतिकूललाघवन्त्वलौकिकेर्थेनादरणीयम् ॥ तस्य स्वतःप्रामाण्यन्तु पूर्वतन्त्रे तर्कपादऔत्पत्तिकाद्यधिकरणेषुसिद्धमेव ॥ अन्यथा लाघवाज्जीवेश्वरज्ञानयोरप्यविशेषो वाच्यः "तस्मात्मानमेवावेदहं ब्रह्मास्मीति" इत्यादौलङ्श्रुत्याप्रहिलतयोत्पत्तिनाशयोस्तत्रापि शक्यवचनत्वात् ॥ नचेष्टापत्ति ॥ शङ्कराचार्यैरपि (अ० १ पा० ३ सू० ४) "प्राणभृच्च" इत्यादिसूत्रेषु "यद्यपि प्राणभृतोविज्ञानात्मनश्चात्मत्वंचेतनत्वं च संभवति ॥ तथाप्युपाधिपरिच्छिन्नज्ञानस्य सर्वज्ञत्वाद्यसंभवेसती" त्यादिन्याकुर्वद्भिस्तयोः परिच्छिन्नत्वापरिच्छिन्नत्वादिना विशेषस्यांगीकारात् ॥ प्रथमपादे ईक्षतिसूत्रेऽपि "यस्यहिसर्वविषयावभासनक्षमंज्ञानं नित्यमस्तिसोसर्वज्ञइति विप्रतिषिद्धम् ॥ अनित्यत्वेहि ज्ञानस्य कदाचिज्जानाति कदाचिन्नजानाति इत्यसर्वज्ञत्वमपि स्यात्" इत्यादिनेश्वरीयज्ञाने विशेषो दर्शितः ॥ एवमीशजीवेच्छयोरपि नित्यत्वानित्यत्वसर्वविषयकत्वाल्पविषयकत्वादिनावैलक्षण्य तैरप्यनेकत्रस्पष्टीकृतम् ॥ यथा नेतरोऽनुपपत्तेरित्यत्र "प्राक् शरीराद्युत्पत्तेरभिध्यानं सृज्यमानानां विकाराणां

स्रष्टुरव्यतिरेक ॥ सर्वविकारसृष्टिश्च न परस्मादात्मनोऽन्यत्रोपपद्यते" इतिवदद्भिः सर्वत्रप्रसिद्धोपदेशाधिकरणे विवक्षितगुणसूत्रे "सत्यसंकल्पत्वं हि सृष्टिस्थितिसंहारेष्व-प्रतिबन्धशक्तित्वात् परमात्मनोवकल्पते परमात्मगुणत्वेन च यआत्मापहतपाप्मा इत्यत्र सत्यकाम. सत्यसंकल्पइतिश्रुतम्" इत्याद्युक्त्वा अनुपपत्तेस्तु नशारीरइत्यग्रिमसूत्रे जीवे त्वादृताशेच्छाद्यनुपपत्तिर्व्याख्याता ॥ एतेन वैलक्षण्येसतीश्वरेच्छायामिच्छाशब्दप्रयोगपारि-भाषिकत्वापाताद्युक्तिस्तस्य स्वाचार्याधिक्षेपरूपेति पुनरप्यपास्तावेदितव्या ॥ अवैलक्षण्य-दुराग्रहेतु उभयेच्छयोर्मायामात्रवृत्तिविशेषत्वमन्त करणमात्रवृत्तिविशेषत्वं वा स्वीक्रियतां नतु स्वैरीत्या तद्भेद ॥ तथासति त्वदुक्तदोषाणां त्वन्मतेऽप्यनिस्तारात् ॥ किञ्च नहिक-श्चित्क्षणमपि जातुतिष्ठत्यकर्मकृदिति वाक्याज्जीवज्ञानेच्छाप्रयत्नानामपि प्रवाहसातत्यमव-श्यमभ्युपेयम् ॥ यावत्तज्ज्ञानेच्छादिकं प्रति कारणत्व चेश्वरेच्छादेर्वाच्यमेव ॥ उन्निनी-षाऽधोनिनीषाश्रुतेः "परात्तुतच्छ्रुते" इतिन्यायाच्च ॥ एवंकारंचसति जीवाना-मानन्त्येनानन्तायुगपत्प्रवर्तमानायावत्तदिच्छा.प्रतिकारणभूतायायुगपदनेकाकारकत्वमी-श्वरेच्छायाअर्थात्सिद्धम् ॥ जीवेच्छानां नित्यत्वेतु कार्यकारणभावोपि दुर्वचः ॥ तस्मादनेकश्रुतिसंमतमीश्वरेच्छाया नित्यत्वमेकत्वमनेकधर्मशालित्वं सर्वकारणत्वं जीवे-च्छातोवैलक्षण्यं च निर्बाधम् ॥ यत्तु लाघवमात्रेणश्रुत्यर्थस्यौपचारिकत्वस्वीकारे स्वप्नादेरप्यनित्यत्वासिद्धिरिति तदकिंचित्करम् ॥ नहिवयंसोकामयतेत्यादावप्युपचार-माद्रियामहे किन्तु तद्घटेतिशब्दमहिम्नासिद्धमेवार्थमनुवदाम इति सन्ध्यसृष्टिश्रुतौ नोपचारशंकाप्रसक्तिः ॥ किञ्च "नतत्ररथानरथयोगानपन्थान" इति स्वाभिकत्वस्व-भावबोधकश्रुतिरिवनेश्वरेच्छायास्तद्बोधिकासोपलभ्यते ॥ नापितदिच्छायाइव स्वप्नस्य-नित्यत्वबोधिका सा ॥ अतोनान्यतरस्य नित्यत्वेनानित्यत्वेन वाऽन्यतरस्य तत्सिध्यति ॥ स्वप्नस्य मायामात्रत्वे न मिथ्यात्वंच सन्ध्येसृष्टिरित्यधिकरणे परमाचार्यैरेव निरणायि ॥ नेत्थंतदिच्छायास्तथात्वसाधकं किंचिदधिकरणमस्ति ॥ अतोन किंचिदेतत् ॥ यच्च कश्चायमित्यादि इतिन्यायादित्यन्तं तत्तु प्रायोनैयायिकानेवोद्दिश्य प्रावर्ततेति तद्ग्रन्थैरेव दत्तोत्तरस्यात् ॥ अतएव पिशाच पिशाचभाषयैव बोधनीय इति न्यायमनुसृत्य मूले समाहितम् ॥ स्वरूपएवेति ॥ स्वं विषयस्यात्मा रूपं यस्येति तथा ॥ वैशेषिकैरिति ॥ सिद्धान्ते संयोगस्य स्पर्शविशेषतयाङ्गीकारादेवमुक्तम् ॥ अत्रायं निगर्वः ॥ वस्तुतस्त्विच्छाविषययोर्विषयविषयिभाव संबन्धः ॥ ईश्वरेच्छाप्रपंचयोस्तु कार्यकारणभावोधिक ॥ तौचानुभवबलात् "सोकामयत ॥ एषउएव" इत्यादिश्रुति-शतबलाच शक्येते एवनिर्वक्तुम् ॥ तत्र भूम इत्यादिमूलस्याप्ययमेव तात्पर्यमित्यवगन्त-व्यम् ॥ विषयताच स्वरूपसंबन्धएवेति प्राञ्चस्तार्किकाः ॥ तथाहि घटादिनिष्ठं ज्ञानादि-विषयत्वं तत्प्रतियोगिकः संबन्धविशेषः सच प्रतियोगित्वादिवत्स्वरूपानतिरिक्तएव क्लृप्तेन स्वरूपेणैवोपपत्तौ अतिरिक्तकल्पनानवकाशात् ॥ नचताहशसंबन्धस्य ज्ञानविषयान्यतर-स्वरूपत्वादरे विनिगमकाभावादुभयस्वरूपत्वं कल्प्यम् । तदपेक्षयाऽतिरिक्तैकविषयता-

कल्पनैव लघुरिति वाच्यम् ॥ विषयताया विषयस्वरूपत्वे घटादिनिरूपिताधेयतायास्तस्या-मनुपपत्त्या ज्ञानादिस्वरूपाया एवोपगमात् ॥ अभेदेप्याधाराधेयभावोपगमे घटो ज्ञानादि-विषयतावानितिवद्धटो घटवानित्यादिप्रतीयेत ॥ नच विषयतात्वावच्छिन्ननिरूपिताधिकरण-तैव घटादावुपेयते न घटत्वावच्छिन्ननिरूपितेति नातिप्रसङ्ग इति वाच्यम् ॥ विषयतात्वाव-च्छिन्ननिरूपितत्वस्य विषयतात्वाश्रयघटादिरूपविषयतानिरूपितत्वविलक्षणस्य दुर्वच-त्वात् ॥ अस्तु वा विनिगमनाविरहादुभयरूपा विषयता तथापि तादृशोभयस्य क्लृप्तत्वाद-तिरिक्तविषयतायास्तत्र ज्ञानादिसंबन्धतायाश्च कल्पनापेक्षया तदुभयस्य ज्ञानादिसंबंध-त्वकल्पने गौरवानवकाश इति ॥ अत्र नव्यास्तु मन्यंते ॥ विषयत्वं पदार्थांतरमेव नतु स्वरूपसंबन्धविशेषः ॥ तथाहि ज्ञानविषयताया ज्ञानात्मकत्वे ज्ञानाधिकरणस्य कालादेर-ज्ञानविषयतापत्तिः कालनिष्ठज्ञानसंबंधस्यापि ज्ञानस्वरूपानतिरिक्तत्वात् ॥ एवं स्वाभावेन समं प्रतियोग्यनुयोगिभावरूपज्ञानसंबन्धस्यापि स्वरूपानतिरिक्ततया घटादिज्ञानस्य घटा-दिविषयकत्ववत्स्वाभावविषयकत्वस्य तत्रापत्तिः कालादौ ज्ञानादिसंबन्धस्यातिरिक्त-त्वे च विनिगमनाविरहात् विषयनिष्ठतत्संबंधस्याप्यतिरिक्तत्वसिद्धिर्निष्प्रत्यूहैव एवं विषयताया ज्ञानस्वरूपत्वे घटवद्भूतलमित्यादिज्ञाननिरूपितानां घटभूतलादिवृत्तिवि-षयतानामभेदाऽऽपत्त्या तादृशज्ञानानन्तरं घटप्रकारकज्ञानवानहमित्यादिप्रत्ययवद्भू-तलप्रकारकज्ञानवानहमित्यादिप्रत्ययप्रसंगः घटनिष्ठप्रकारत्वाख्यतज्ज्ञानरूपविशेष्यताया एव भूतलवृत्तित्वात् ॥ घटपटावित्यादि समूहालंबनात्मकैकज्ञानीयघटपटादिरूपनाना-विषयनिष्ठविषयतानामैक्यतया तादृशज्ञानानां घटत्वपटत्वाद्यवच्छिन्नपटघटादिनिष्ठविषय-ताकतया भ्रमत्वापत्तिः तद्वृत्तिधर्मावच्छिन्नतन्निष्ठविषयताशालिबुद्धेरेव भ्रमत्वात् ॥ तदा घटत्वेन पटं वेद्मीत्यनुव्यवसायश्च स्यात् ॥ घटत्वावच्छिन्नपटनिष्ठविषयताकज्ञानस्यैव तादृशानु-व्यवसायविषयत्वात् ॥ विषयताया विषयस्वरूपत्वे च घटत्वप्रकारकप्रमाविषयतायाः पटत्व-प्रकारकभ्रमनिरूपितायाश्च घटनिष्ठविषयताया ऐक्यप्रसंगेन घटत्वप्रकारकप्रमाया अपि भ्रमत्वापत्तिः ॥ एवं घटवद्भूतलं संयोगश्च घटभूतलसंयोगा इति ज्ञानयोः समूहालंबन-विशिष्टबुद्धिरूपयोरविशेषश्च स्यात् ॥ विषयाणां तत्तदात्मकविषयतानां चाविलक्षणत्वात् ॥ तस्मादनन्यगत्या ज्ञानतद्विषयातिरिक्तमेव विषयत्वं सिध्यति ॥ तच्च विषये घटादावाश्रयतया ज्ञाने च निरूपकतया वर्त्तते ॥ एतेन विषयित्वमप्यतिरिक्तं व्याख्यातम् ॥ अधिकं तु गदाधरभट्टा-चार्यैर्विषयतावादे प्रपंचितम् । तदेवेह दिङ्मात्रमनूदितम् ॥ एतेन ज्ञानतद्विषयस्वरूपाति-रिक्तविषयताया अशक्यनिर्वचनत्वोक्तिरपास्ता ॥ नच तस्या अपि संबन्धान्तरं कल्प्यम् ॥ अनवस्थापातात् ॥ नन्विष्टापत्तिः समवायाभ्युपगमन्यायानुरोधादिति चेत् किमिदं सूत्रं संबन्धमात्रमुच्छेत्तुं प्रवृत्ते कणभक्षाभिमतसमवायमात्रं वा ॥ नाद्यः ॥ सौत्राक्षरतोऽप्रतीतेः ॥ "असिद्धस्य च तद्योगं शास्ति ॥ अध्यात्मसंबन्धभूमाद्यस्मिन् ॥ इह तद्योगात् ॥ परमतःसेत्वन्मानसंबन्धभेदव्यपदेशेभ्यः ॥" इत्यादिषु स्पष्टतयाऽऽचार्यस्य संबन्धोदाहरण-

स्रष्टुर्व्यतिरेक ॥ सर्वविकारसृष्टिश्च न परस्मादात्मनोऽन्यत्रोपपद्यते" इतिवदद्भिः सर्वत्रप्रसिद्धोपदेशाधिकरणे विवक्षितगुणसूत्रे "सत्यसंकल्पत्वं हि सृष्टिस्थितिसंहारेष्वप्रतिबन्धशक्तित्वात् परमात्मनोवकल्पते परमात्मगुणत्वेन च यआत्मापहतपाप्माइत्यत्र सत्यकामः सत्यसंकल्पइतिश्रुतम्" इत्याद्युक्त्वा अनुपपत्तेस्तु नशारीरइत्यग्रिमसूत्रे जीवे तादृशेच्छाद्यनुपपत्तिर्व्याख्याता ॥ एतेन वैलक्षण्येसतीश्वरेच्छायामिच्छाशब्दप्रयोगपारिभाषिकत्वापाताद्युक्तिस्तस्य स्वाचार्याधिक्षेपरूपेति पुनरप्यपास्तावेदितव्या ॥ अवैलक्षण्यदुराग्रहेतु उभयेच्छयोर्मायामात्रवृत्तिविशेषत्वमन्तःकरणमात्रवृत्तिविशेषत्वं वा स्वीक्रियतां नतु स्वेष्टरीत्या तद्भेद ॥ तथासति त्वदुक्तदोषाणां त्वन्मतेऽप्यनिस्तारात् ॥ किञ्च नहिकश्चित्क्षणमपि जातुतिष्ठत्यकर्मकृदिति वाक्याज्जीवज्ञानेच्छाप्रयत्नानामपि प्रवाहसातत्यमवश्यमभ्युपेयम् ॥ यावत्तज्ज्ञानेच्छादिकं प्रति कारणत्वं चेश्वरेच्छादेर्वाच्यमेव ॥ उन्निनीषाऽधोनिनीषाश्रुतेः "परात्तुतच्छ्रुतेः" इतिन्यायाच्च ॥ एवंकारंचसति जीवानामानन्त्येनानन्तायुगपत्प्रवर्तमानायावत्तदिच्छाःप्रतिकारणभूतायायुगपदनेकाकारकत्वमीश्वरेच्छायाअर्थात्सिद्धम् ॥ जीवेच्छानां नित्यत्वेतु कार्यकारणभावोपि दुर्वचः ॥ तस्मादनेकश्रुतिसंमतमीश्वरेच्छाया नित्यत्वमेकत्वमनेकधर्मशालित्वं सर्वकारणत्वं जीवेच्छातोवैलक्षण्यं च निर्बाधम् ॥ यत्तु लाघवमात्रेणश्रुत्यर्थस्यौपचारिकत्वस्वीकारे स्वप्नादेरप्यनित्यत्वासिद्धिरिति तदकिंचित्करम् ॥ नहिवयंसोकामयतेत्यादावप्युपचारमाद्रियामहे किन्तु तद्घटकेतिशब्दमहिम्नासिद्धमेवार्थमनुवदाम इति सन्ध्यसृष्टिश्रुतौ नोपचारशंकाप्रसक्तिः ॥ किञ्च "नतत्ररथानरथयोगानपन्थानः" इति स्वाप्निकवस्त्वभावबोधकश्रुतिरिवनेश्वरेच्छायास्तद्बोधिकासोपलभ्यते ॥ नापितदिच्छायाइव स्वप्नस्यनित्यत्वबोधिका सा ॥ अतोनान्यतरस्य नित्यत्वेनानित्यत्वेन वाऽन्यतरस्य तत्सिध्यति ॥ स्वप्नस्य मायामात्रत्वे न मिथ्यात्वंच सन्ध्येसृष्टिरित्यधिकरणे परमाचार्यैरेव निरणायि ॥ नेत्थंतदिच्छायास्तथात्वसाधकं किंचिदधिकरणमस्ति ॥ अतोन किंचिदेतत् ॥ यच्च कश्चायमित्यादि इतिन्यायादित्यन्तं तत्तु प्रायोनैयायिकानेवोद्दिश्य प्रावर्ततेति तद्ग्रन्थैरेव दत्तोत्तरंस्यात् ॥ अतएव पिशाच' पिशाचभाषयैव बोधनीय इति न्यायमनुसृत्य मूले समाहितम् ॥ स्वरूपएवेति ॥ स्वं विषयस्यात्मा रूपं यस्येति तथा ॥ वैशेषिकैरिति ॥ सिद्धान्ते संयोगस्य स्पर्शविशेषतयाङ्गीकारादेवमुक्तम् ॥ अत्रायं निगर्वः ॥ वस्तुतस्त्विच्छाविषययोर्विषयविषयिभावःसंबन्धः ॥ ईश्वरेच्छाप्रपंचयोस्तु कार्यकारणभावोधिकः ॥ तौचानुभवबलात् "सोकामयत ॥ एषउएव" इत्यादिश्रुतिशतबलाच्च शक्येते एवनिर्णेतुम् ॥ तत्र भूम इत्यादिमूलस्याप्यत्रैव तात्पर्यमित्यवगन्तव्यम् ॥ विषयताच स्वरूपसंबन्धएवेति प्राञ्चस्तार्किकाः ॥ तथाहि घटादिनिष्ठं ज्ञानादिविषयत्वं तत्प्रतियोगिकः संबन्धविशेषः सच प्रतियोगित्वादिवत्स्वरूपानतिरिक्तएव क्लृप्तेन स्वरूपेणैवोपपत्तौ अतिरिक्तकल्पनानवकाशात् ॥ नचतादृशसंबन्धस्य ज्ञानविषयान्यतरस्वरूपत्वाद्द्वे विनिगमकाभावादुभयस्वरूपत्वं कल्प्यम् । तदपेक्षयाऽतिरिक्तैकविषयता-

यत्तु मम मते मायावृत्तिविशेषस्तद्विषयाकारईश्वरेच्छा इत्यादिना स्वमतप्रदर्शनं कृतं तदपि जल्पवितण्डान्यतरकथामाश्रित्य परमतं खण्डयतो न संभवति तथैव परेणापि खण्डने प्रतीकारासंभवात् ॥ न च प्रतितन्त्रसिद्धान्तेनापि प्रतिकर्तुं शक्यते ॥ तत्रापि दोषोद्भावनस्याशक्यत्वात् ॥ तदेवोच्यते तत्तद्विषयाकारोमायावृत्तिविशेषईश्वरेच्छाइत्यसङ्गतम् ॥ सृष्टेःपूर्वं तत्तदाकारताप्रयोजकानां विषयाणामभावेन मायावृत्तेस्तत्तदाकारत्वासंभवात् ॥ नच तत्तत्पदार्थाभावेपि तत्संस्काराणां पूर्वं मायायां सत्वान्मायावृत्तेस्तदाकारतासंभवत्येवेति वाच्यम् ॥ तत्तत्संकाराणां वासनारूपाणां भवन्मतेऽनादित्वात्सदैवसृष्टिः स्यात् ॥ नचोद्बुद्धानामेव तद्धेतुत्वमिति वाच्यम् ॥ सृष्टेः पूर्वमुद्बोधकस्याप्यसत्वात् ॥ न चादृष्टविशेषस्यैवोद्बोधकत्वम् ॥ तस्यापि भवन्मतेऽनादित्वे तद्दोषतादवस्थ्यात् ॥ किञ्च तादृशेच्छायाविषयैः सह संबन्धोपि नसंभवति तदानीं विषयाणामनुत्पन्नत्वात् ॥ अनुत्पन्नैस्तत्संबन्धासंभवस्तु त्वयैवोक्तः ॥ नचेश्वरेच्छायास्तत्तद्विषयाकारतैव संबन्धव्यपदेशप्रयोजिका इति वाच्यम् ॥ तत्तद्विषयाकारत्वस्य पूर्वोक्तयुक्त्याऽसंभवात् ॥ किञ्च तत्तदाकारतायाः वृत्तिनिष्ठत्वेन विषयवृत्तित्वाभावात्कथं विषयेषु संबन्धत्वव्यपदेशप्रयोजकत्वम् ॥ एवमन्तःकरणवृत्तिविशेषोजीवेच्छापि न संभवति वृत्तौ विशेषस्य वक्तुमशक्यत्वेन ज्ञानतोवैलक्षण्यस्य दर्शयितुमशक्यत्वात् ॥ संबन्धव्यपदेशस्तु पूर्ववदेवापास्तः ॥ तथाचेत्यादिनोक्ताः (ईश्वरेच्छाया अनित्यत्वे तत्कारणं वाच्यम् ॥ इच्छैव तत्कारणं चेदात्माश्रयः तदिच्छान्येच्छया चेदनवस्था) इत्यादयोदोषास्त्विच्छायाअनित्यत्वास्वीकारादेवापास्ताः ॥

सहस्राक्षे ममेतु तत्तद्विषयेत्यादिं अनवस्थादिरूपमित्यन्तं भागं दूषयन्ति ॥ यत्तु

१ ममतुतत्तद्विषयाऽऽकारोमायायावृत्तिविशेषईश्वरेच्छा तस्याश्च तत्तद्विषयाऽऽकारतैव तत्तत्सबन्धव्यपदेशप्रयोजिका एवमन्तःकरणवृत्तिविशेषोजीवेच्छासंबन्धव्यपदेशस्तु पूर्ववज्ज्ञेयः ॥ तथाचेश्वरेच्छाया अनित्यत्वे तत्कारणं वाच्यमित्याह ॥ तावेनेति ॥ तामिच्छां केन सृजतीत्यर्थः ॥ ननु तामपीच्छयैव सृजतीतिचेत्किंतयैवेच्छयोतान्यया ॥ नतावदाद्य ॥ आत्माश्रयप्रसङ्गादित्याह ॥ आत्मनाऽऽत्माश्रयाच्चेति ॥ आत्माश्रयप्रसङ्गादात्मना नसृजतीत्यर्थः ॥ नद्वितीयः ॥ अनवस्थापत्तेः ॥ एकैककार्यार्थमेकैकाऽनादीच्छासन्ततेः कल्पनेऽनन्तकार्यार्थमनन्तेच्छासन्ततीना कल्पनेऽत्यन्तगौरवाच्चेत्याद्यान्येष्ट्यापिभयादिति ॥ अपिशब्दबलान्नसृजतीति संबध्यते ॥ भयन्त्वनवस्थादिरूपम् ॥ ७ ॥

व्याघातापाताच ॥ द्वितीयश्चेदों कुर्मः ॥ तथाच सति गुणकर्मजातिविशेषादि स्थित्यर्थं काणादैर्यथाङ्गीक्रियमाणोऽयुतसिद्धयोर्नित्यसंबन्धएव समवायाख्योनेन न्यायेननिराक्रियतइति न प्रकृते एतत्प्रवृत्त्यवकाशः ॥ नचैवमनवस्थाभयात्समवायएव विश्रांतिः स्वीकरिष्यत इति प्रकृतन्यायबाधःशङ्क्यः ॥ संबन्धिनि संयोगादिस्थित्यर्थं विलक्षणं संबन्धान्तरं स्वीकृत्य तत्र विश्रमाङ्गीकरणापेक्षया अन्ते रण्डाविवाहश्चेदादावेव कुतोन सइतिन्यायेन संयोगादिरेवाश्रयतादात्म्येन तत्र तिष्ठतीति स्वीकारस्यैव रामणीयकात् विलक्षणव्यर्थपदार्थान्तरस्वीकारे गौरवाच्च ॥ नहिसमवायवत् संयोगादि संबन्धाअपि त्यक्तुं शक्यन्ते ॥ प्रत्यक्षादिप्रमितिसिद्धत्वात् तस्य वैलक्षण्यंतु संबन्धमात्रस्यापाणिपिहितमुभयनिष्ठतानियममुल्लंघ्य द्यणुकत्र्यणुकादिसंबन्धिध्वंसप्रागभावदशायामपि परमाण्वादिषु नित्यस्य तस्याङ्गीकारात्स्फुटमेव ॥ समवाये दूषणान्तराणि श्रीहर्षमिश्रादिभिः खण्डनखण्डखाद्यादिषु श्रीपुरुषोत्तमचरणैः प्रस्थानरत्नाकरेच दर्शितान्येवेति किमिह प्रासङ्गिकेन ॥ न्यायेतस्य (साम्यादवस्थिते) रितिलेखस्तु लेखकप्रमादाद्वाऽस्यात् ॥ एवमीश्वरेच्छायानित्यत्वे उक्तरीत्या ततोव्यवस्थया क्रमेण सर्वकार्योद्भवेच नको- पिव्याहतशचोद्यावकाशः ॥ ननु तन्नित्यत्वे सृष्टिप्रलययोर्व्यवस्था नस्यादितिचेन्न ॥ आकारभेदादेव तदुपपत्तेः ॥ तथाहि भगवत इच्छाशक्तिर्नित्या ॥ उक्तादिमानेभ्यः ॥ भगवदभिन्नाच प्रकाशाश्रयन्यायात् ॥ तस्याअनेकआकाराभगवत्स्वभावसिद्धाः ॥ "परास्यशक्तिर्विविधैवश्रूयते स्वाभाविकीज्ञानबलक्रियाच" इति वैविध्यश्रुतेः ॥ तत्रसाऽऽदौकरिष्यद्ब्रह्म बहुस्यांप्रजायेयेति तदाकाररूप भवति ॥ " प्राणन्नेवप्राणोभवतिवदन्वाक् " इतिश्रौतन्यायेन "सोकामयते " त्यादिश्रुतिभ्यस्तथासिद्धेः ॥ ततः सर्वकार्यकलनानुकूलं कालात्मकं स्वस्वरूपं प्रकटयति "अहोरात्राणिविदधत् ॥ सर्वे निमिषाजज्ञिरे " ॥ इत्यादि श्रुतिभ्यः ॥ ततस्तत्तत्कालावयवेषु क्रमिकाणिसर्वकार्याणि पर्यालोचयति ॥ स्वेच्छाऽऽकारेषु सर्वकार्यंचतदधिकरणत्वेन तत्तत्कालोपाधीनपि विषयत्वेन निवेशयतीति निष्कर्षः ॥ सतपोतप्यतेत्यादिश्रुतिभ्यः ॥ नचोक्ताकाररूपेण भवने कारणान्तरसहकारोपेक्ष्यते ॥ सर्वशक्तेः सर्वेश्वरस्येतरनिरपेक्षत्वात् ॥ नच बहुस्यामित्याद्याकाररूपं सर्वदा भवत्विति शंक्यम् ॥ कालस्यैवाभावात् ॥ तस्यभगवच्चेष्टारूपत्वात् योयंकालस्तस्यतेव्यक्तबंधोश्चेष्टामाहुश्चेष्टतेयेनविश्वमिति श्रीभागवतवाक्यात् ॥ चेष्टाया इच्छाधीनत्वात् अखिलानंदशक्तेः स्वतंत्रस्यापर्यनुयोज्यत्वाच ॥ नहिलौकिकेश्वरोमहाराजादिरपि उपवनभवनवनप्रभृत्यन्यतमस्थानेविजिहीर्षन्पर्यनुयोज्योभवति ॥ ह्यःकथंवनविहारमिष्टवानिदानींचोपवनविहारं कथंकारं कामयत इति ॥ अन्यथा तवापि मायाया अनादित्वेन तद्वृत्तिविशेषरूपाईश्वरेच्छाः कुतोनसदाऽऽभवेयुः ॥ तथासति सर्वकार्यं सर्वदास्यात् ॥ नचोद्बोधकेन निर्वाहः ॥ तस्यापि नित्यमनित्यंवा ॥ आद्येसर्वदातदुद्बोधादनिस्तारः ॥ अन्त्येतस्यापिकारणकल्प्यम् ॥ तत्राप्युक्तएवविकल्पः ॥ तत्रप्रथमेयट्कुटीप्रभातम् ॥ द्वितीयेऽनवस्था ॥ यदिच मायायानित्यत्वेपि तद्वृत्तिविशेषाणां यथाचिद्भुततया प्रमित्यमाधीयेत ॥ तर्हि लाघवान्नुत्यनुग्रहाच इच्छाकाराणामेव तथात्वमाधीयताम् ।

यत्तु मम मते मायावृत्तिविशेषस्तद्विषयाकारईश्वरेच्छा इत्यादिना स्वमतप्रदर्शनं कृतं तदपि जल्पवितण्डान्यतरकथामाश्रित्य परमतं खण्डयतो न संभवति तथैव परेणापि खण्डने प्रतीकारासंभवात् ॥ न च प्रतितन्त्रसिद्धान्तेनापि प्रतिकर्तुं शक्यते ॥ तत्रापि दोषोद्भावनस्यशक्यत्वात् ॥ तदेवोच्यते तत्तद्विषयाकारोमायावृत्तिविशेषईश्वरेच्छाइत्यसङ्गतम् ॥ सृष्टेःपूर्वं तत्तदाकारताप्रयोजकानां विषयाणामभावेन मायावृत्तेस्तत्तदाकारत्वासंभवात् ॥ नच तत्तत्पदार्थाभावेपि तत्संस्काराणां पूर्वं मायायां सत्वान्मायावृत्तेस्तदाकारतासंभवत्येवेति वाच्यम् ॥ तत्तत्संस्काराणां वासनारूपाणां भवन्मतेऽनादित्वात्सदैवसृष्टिः स्यात् ॥ नचोद्बुद्धानामेव तद्धेतुत्वमिति वाच्यम् ॥ सृष्टेः पूर्वमुद्बोधकस्याप्यसत्वात् ॥ न चादृष्टविशेषस्यैवोद्बोधकत्वम् ॥ तस्यापि भवन्मतेऽनादित्वे तद्दोषतादवस्थ्यात् ॥ किञ्च तादृशेच्छायाविषयैः सह संबन्धोपि नसंभवति तदानींविषयाणामनुत्पन्नत्वात् ॥ अनुत्पन्नैस्तत्संबन्धासंभवस्तु त्वयैवोक्तः ॥ नचेश्वरेच्छायास्तत्तद्विषयाकारतैव संबन्धव्यपदेशप्रयोजिका इति वाच्यम् ॥ तत्तद्विषयाकारत्वस्य पूर्वोक्तयुक्त्याऽसंभवात् ॥ किञ्च तत्तदाकारतायाः वृत्तिनिष्ठत्वेन विषयवृत्तित्वाभावात्कथं विषयेषु संबन्धत्वव्यपदेशप्रयोजकत्वम् ॥ एवमन्तःकरणवृत्तिविशेषोजीवेच्छापि न संभवति वृत्तौ विशेषस्य वक्तुमशक्यत्वेन ज्ञानतोवैलक्षण्यस्य दर्शयितुमशक्यत्वात् ॥ संबन्धव्यपदेशस्तु पूर्ववदेवापास्तः ॥ तथाचेत्यादिनोक्ताः (ईश्वरेच्छाया अनित्यत्वे तत्कारणं वाच्यम् ॥ इच्छैव तत्कारणं चेदात्माश्रयः तदिच्छान्येच्छया चेदनवस्था) इत्यादयोदोषास्त्विच्छायाअनित्यत्वास्वीकारादेवापास्ताः ॥

सहस्राक्षे ममंतु तत्तद्विषयेत्यादिं अनवस्थादिरूपमित्यन्तं भागं दूषयन्ति ॥ यत्तु

---

१ ममतुतत्तद्विषयाऽऽकारोमायायावृत्तिविशेषईश्वरेच्छा तस्याश्च तत्तद्विषयाऽऽकारतैव तत्तत्संबन्धव्यपदेशप्रयोजिका एवमन्तःकरणवृत्तिविशेषोजीवेच्छासंबन्धव्यपदेशस्तु पूर्ववज्ज्ञेयः ॥ तथाचेश्वरेच्छाया अनित्यत्वे तत्कारण वाच्यमित्याह ॥ तत्केनेति ॥ तामिच्छा केन सृजतीत्यर्थ ॥ ननु तामपीच्छयैव सृजतीति चेत्किमर्थैवेच्छयोतान्यया ॥ नतावदाद्य ॥ आत्माश्रयप्रसङ्गादित्याह ॥ आत्मनाऽऽत्माश्रयान्नेति ॥ आत्माश्रयप्रसङ्गादात्मना नसृजतीत्यर्थः ॥ नद्वितीयः ॥ अनवस्थापत्ते ॥ एकैककार्यार्थमेकैकाऽनादीच्छासन्तते कल्पनेऽनन्तकार्यार्थमनन्तेच्छासन्ततीना कल्पनेऽत्यन्तगौरवाच्चेत्याह॥न्येष्वपिभयादिति ॥ अपिशब्दबलान्नसृजतीति सबध्यते ॥ मयन्त्वनवस्थादिरूपम् ॥ ७ ॥

ममत्त इत्यादिनाऽपास्ता इत्यन्तेन ॥ जल्पवितण्डेति ॥ अनयोः स्वरूपं गौतमेन पञ्चलक्षण्यां (अ० १ आ० २ सू० ४३) "यथोक्तोपपन्नश्छलजातिनिग्रहस्थानसाधनोपालंभोजल्पः (४४) स प्रतिपक्षस्थापनहीनो वितण्डा" इति दर्शितम् ॥ यथोक्तोपपन्नः प्रमाणतर्कसाधनोपालंभ सिद्धान्ताविरुद्धःपक्षप्रतिपक्षपरिग्रह. छलादिभिःसाधनमुपालंभश्चास्मिन्क्रियतइति तथा ॥ सजल्पः ॥ यद्यपि छलादिभिर्नकोप्यर्थःसाधयितुं शक्यः ॥ तथापि तदुपयोगोदर्शितो न्यायभाष्यकृता ॥ "यत्तत्प्रमाणैरर्थस्य साधनं तत्र छलजातिनिग्रहस्थानानामङ्गभावोरक्षणार्थत्वात् ॥ तानि हि प्रयुज्यमानानि परपक्षविघातेन स्वपक्षं रक्षयन्ति" इति ॥ सजल्पएव प्रतिपक्षस्थापनया हीनोवितण्डाभवति ॥ अतएव भाष्यम् "यौतौसमानाधिकरणौ विरुद्धौ धर्मौपक्षप्रतिपक्षावित्युक्तौ तयोरेकतरं वैतण्डिकोनस्थापयतीति परपक्षप्रतिषेधेनैव प्रवर्तत इति" इति ॥ एतदन्यतरकथाश्रयणंतु परपक्षखण्डनद्वारा स्वपक्षरक्षणार्थम् ॥ अतएव प्राच कस्यचिदुक्तिस्तत्रैव भाष्ये संगृहीता "तत्वाध्यवसायसंरक्षणार्थं जल्पवितण्डे बीजप्ररोहरक्षणार्थंकंटकशाखावरणव" दिति ॥ **प्रतितन्त्रसिद्धांतेति ॥** पंचलक्षण्यां (अ० १ आ० १ सू० २६) "सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगमसंस्थित्यर्थान्तरभावात्" इति तन्त्रभेदात्सिद्धान्तानां चातुर्विध्यमभिधाय (सू० २९) "समानतन्त्रसिद्धः परतन्त्रसिद्धः प्रतितन्त्रसिद्धान्तः" एतत्स्वरूपमुक्तम् ॥ **तदेवोच्यत इत्यादेरयमाशयः ॥** यच्च ममत्वित्यादिनेयइत्यन्तंतदसंगततरम् ॥ स्वोक्तदोषानुन्मोषादोषान्तरपोषाच्च ॥ तथाहि मायायानित्यत्वेन तद्वृत्तीनामपि तथात्वौचित्यात्सर्वदा सर्वं कार्यं स्यात् ॥ सर्वेच भावविकारास्तस्य युगपत्स्युः ॥ तस्याः सान्तत्वकल्पनेतु पुनःसृष्टिर्नस्यात् ॥ तथाच धातायथेत्यादेर्व्याकोपः ॥ अतोमायायाः सान्तत्वं न शक्यवचनम् ॥ यावच्च तस्याः स्थितिस्तावत्सर्वकार्यसातत्यं सुस्थमेव ॥ एककालिकानेककार्यनिर्वाहाय तस्यायुगपदनेकवृत्तिविशेषाङ्गीकारे लोकविरोधः ॥ अंतःकरणे तथा अदर्शनात् ॥ ईश्वरेच्छायां नित्यत्वानेकाकारकत्वमात्रप्रयुक्तवैलक्षण्यस्य च तत्र प्रयुज्यमानेच्छाशब्दे पारिभाषिकत्वाद्यापादकत्वे सति त्वन्मते मायावृत्तित्वेनान्तःकरणवृत्तित्वेन चात्यन्तवैलक्षण्यस्य सुतरां तथात्वं स्यात् ॥ अनेकाकारकत्वाद्यनपायाच्च ॥ किंच यावन्तोवृत्तिविशेषाः कल्प्यन्ते तावत्योमायाएवकल्प्यंतां लाघवात् ॥ इन्द्रोमायाभिरित्यादिश्रौतबहुवचनानुकूल्याच्च ॥ एवमन्तःकरणान्यपि ॥ नचेदृशीश्रुतिः स्मृतिर्वाकाचिदस्ति यद्बलाज्जडाया अपि मायायाइच्छादिचेतनधर्मवत्त्वमाश्रीयेत ॥ अवैलक्षण्याग्रहेतु लाघवाज्जीवेच्छानामपि मायावृत्तिविशेषत्वं स्वीकुरु ॥ नहितस्यामायावृत्तितांतासां चान्तःकरणवृत्तितां बोधयत्किंचिद्वाक्यमौपनिषदैराम्नायते ॥ किमिदंच वृत्तिविशेषस्य विषयाकारत्वं नाम ॥ विषयावगाहित्वं विषयप्रतियोगिकयत्किंचित्संबन्धानुयोगित्वं वा ॥ आद्येनुत्पन्नस्य पदार्थस्य कथमवगाहः ॥ सर्वज्ञत्वादितिचेत् अनुत्पन्नेनपदार्थेनेत्यादि स्वोक्तिबाधः ॥ एतेनद्वितीयोपि परिहृतः ॥ मूलोक्तदूषणप्रस्ततया मायावृत्तिविशेषरूपेच्छाविषययोः संबन्धस्य निर्वक्तुमशक्यत्वाच्च ॥ कश्च त्वन्मतेपीच्छाविषययोः संबन्धः ॥ यद्व्यपदेशप्रयोजकं विषयाकारत्वं

विषयविषयिभावोन्योवा ॥ आद्ये सिद्धसाधनम् ॥ विषयाकारपदार्थयोर्धक्षणएव संसर्गतया भासमानत्वात् ॥ नाप्यन्त्यः ॥ अशक्यनिर्वचनत्वात् ॥ निर्वचनेच निर्वक्तुमशक्यत्वादिति स्वोक्तिविरोधः ॥ एवं मायातद्वृत्तिविशेषयोरपि कःसंबन्धः ॥ न स्वरूपात्मकः ॥ मायाया नित्यतया त्वदुक्तदूषणग्रासात् ॥ नापि समवायः ॥ अनङ्गीकारात् ॥ तदन्यश्चेन्निरुच्यतां सोपि वृत्तिविशेषाणामनित्यत्वे दुर्वचः ॥

किंचेश्वरेच्छायामायावृत्तिविशेषत्वेतस्यामायाधर्मत्वसिध्या "गौणश्चेन्नात्मशब्दात् ॥ कामाच्च नानुमानापेक्षा" इत्यादि सूत्राणि त्वद्रीत्येक्षतिसूत्रंच बाध्येत ॥ तथाहि लक्षणप्रमाणाद्यधिकरणसिद्धब्रह्मकारणवादमाक्षिप्य रजःसत्वाभ्यां क्रियाज्ञानसंभवेन प्राप्तं प्रकृतिकारणवादं पूर्वपक्षीकृत्येदमुच्यते ॥ "ईक्षतेर्नाशब्दम्" इति ॥ अशब्दं प्रकृतिः न जगत्कारणं तद्धि अशब्दं ॥ वेदे "तदैक्षत ॥ स ईक्षत" इत्यादौ ईक्षणपूर्वकसृष्टिश्रवणात् ॥ ईक्षणस्य च चेतनमात्रधर्मत्वात् ॥ यद्यपीदं सूत्रमणुभाष्ये नैवं परं दृश्यते तथाप्यस्यायमप्यर्थ आस्माकीनश्रीभगवत्पादानां संमतइत्यग्रिमभाष्यशास्त्रार्थतत्त्वप्रकाशादिभ्योज्ञायते॥ अग्रेच ईक्षणमुपाधिभूतप्रकृतिगुणसंबन्धाद्ब्रह्मण्युपचर्यतइत्याशंक्य परिहरति॥ "गौणश्चेन्नात्मशब्दात्" इति ॥ तथा "सोकामयत" इत्यत्र "यदाह्येषएतस्मिन्नदृश्य" इति ॥ तदैक्षतेत्यत्रतस्य तावदेव चिरमिति ॥ एवमादिषु ईक्षितृनिष्ठस्य मोक्षोपदेशोपीक्षणस्य प्रकृतिधर्मत्वापाकरणपूर्वकं शुद्धब्रह्मधर्मत्वसाधकउपन्यस्तः यदि मायावृत्तिविशेषएवेशेच्छापदार्थः स्यात् नैतत्तर्हिकिंचिदपि संगच्छेत ॥ किंचानंदमयशब्दार्थस्य परमात्मत्वं साधयित्वा सत्वांशेन सुखरूपाप्रकृतिरेव तदर्थोऽस्त्वित्याशंकायां सूच्यते "कामाच्च नानुमानापेक्षे" ति ॥ आनन्दमयस्य सोकामयतेतीच्छाश्रवणान्नजडाप्रकृतिस्तदर्थः चकारेण तपः श्रवणाच्चेत्यर्थः ॥

तथा प्रकृतेरुपादानत्वं निरस्य ब्रह्मणएव तथात्वं साधयन् "अभिध्योपदेशाच्चे" ति श्रौतमिच्छोपदेशं तन्निरासे तस्यैव तथात्वेच हेतूकरोति यदीच्छामायाधर्मः स्यात् ईक्षतिकामादयस्तर्हि विरुद्धतया हेत्वाभासतामापद्यमानास्तत्तत्सूत्राणि प्रलापवचनयेयुः ॥ ननु मायावृत्तिविशेषोपि चेतनसन्निधानेन जायमानत्वात्तद्धर्मो भवत्विति चेन्मैवं ॥ नहिचुंबुकसन्निधानादेवायस्युत्पद्यमानं चलनं चुंबकधर्मो भवितुमर्हति ॥ नाप्युभयसंयोगजन्यत्वादुभयधर्मस्सेति

शब्दयवचनं ॥ निर्विशेषस्यानुयोगिप्रतियोगित्वान्यतरापादकसंयोगासिद्धेः ॥ अ० २ पा० २ सू० ७ "पुरुषाश्मवदितिचेत्तथापी"त्याद्युभयकारणतावादस्य निरासाच्च ॥ त्रिगुणप्रकृतिरेव च मायाशब्दार्थइतितु त्वयैवाष्टमश्लोके वक्ष्यते ॥ किंच मायाधर्मरूपेश्वरेच्छा सुखदुःखमोहादिवत्सर्वैरपि जीवैरनुभूयेत ॥ त्वयाऽष्टमश्लोकेवक्ष्यमाणरीत्या तेषां तत्र प्रतिबिंबरूपत्वात्तदवच्छिन्नत्वाद्वा ॥ नच जीवानधिकरणमायादेशे ईशेच्छोत्पद्यतेऽतोनतथेतिशंक्यम् ॥ जीवविभुत्वाभिमानभंगप्रसंगात् तस्यदेशविभागबोधकश्रुत्याद्यभावाच्च ॥ तथा सति तदेकदेशोपहितेश्वरस्याप्यव्यापकत्वं च प्रसज्येतेति दिक् ॥ यत्तु तथाचेश्वरेच्छायाइत्यादि अनवस्थादिरूपमित्यंतं तत्तु तत्सिद्धत्वाभ्युपायेनैव निरस्तं ॥ किंचपूर्वंतद्वैत्युक्तैकदेशिमतेन प्रथमं साक्षादिच्छारूपेण भवनोरीकारेपिनेच्छांतररूपकरणसहकारापेक्षा सर्वज्ञस्य सर्वशक्तेरितरनैरपेक्ष्यात् लोकन्यायाच्च ॥ लोके हिजीवाः कार्यकरणेस्वेच्छामपेक्षंते ॥ नत्विच्छानिर्माणे तामेवेच्छामिच्छांतरं वा ॥ किंतु ज्ञानवशास्स्वतएव तामुत्पादयंति ॥ अज्ञातेर्थे इच्छानुदयात् ॥ एवं सर्वज्ञोऽपि स्वतएव तादृशेच्छारूपोभवति इति समंजसम् ॥ एतदेवानुसृत्य आकाशस्व्यापकहीतिशास्त्रार्थकारिकावरणभंगादिषु पूर्वमिच्छारूपेण ततोमायारूपेण भूत्वेत्यादि समगादि ॥ ननु स्वतएवेच्छारूपेणेव प्रपंचरूपेणापि भवनस्य तामंतरेणैव संभवादिच्छाया अप्रयोजकत्वं स्यादिति चेत्तर्हि जीवेच्छानामपि तथात्वं स्वीक्रियतां ॥ प्रयत्नमात्रेण कार्यसंभवात् ॥ अथ जानातीच्छतियतत इत्यनुभवबलेनानन्यथासिद्धनियतपूर्ववृत्तित्वनिश्चयात्तैवमितिचेत्तर्हि प्रकृतेपि सृष्टिश्रुतिशतेप्रपंचं प्रतीच्छाया कारणत्वश्रवणात् ॥ तांप्रतिकारणांतरस्य तत्रक्वाप्यश्रवणाच्चनैवमिति बुध्यस्व ॥ किंच लोके प्रयत्नानामिच्छापूर्वकत्वसिध्यर्थमेव प्रथममिच्छारूपेण भवनं ॥ यथा अहमिति व्यवहारसिध्यर्थंस्वयमहन्नामकतयाभवनं एकाकिनोभयादिसिद्ध्यर्थंच भयादिरूपेण भवन "सोऽहमस्मीत्यग्रेव्याहरत्ततोहन्नामाभवत्तस्मादप्येतर्ह्यामन्त्रितोहमयमित्येवाग्रउक्त्वाथान्यन्नामप्रब्रूते ॥ सोबिभेत्तस्मादेकाकीबिभेती"त्यादिश्रुतिपूष्यते ॥ तस्मात्तवानित्येच्छावादएव त्वदुक्तदोषाः स्वाल्वशाखाच्छेदनन्यायेन प्रसज्यते ॥

तथाहि कापिलजैमिनीयकाणादाद्यभिमतान्प्रकृत्यदृष्टपरमाणवादिकारणतावादानीक्षत्यधिकरणादिष्वाभासीकृत्य शंकराचार्यैरपि कार्यमात्रं प्रतीश्वरस्य कारणतायाः स्वीकारादिच्छाशब्दाभिधेयवृत्तिविशेषनिरूपितं तत्र कारणत्वमस्ति न वा ॥ नद्वितीयः लक्षणप्रमाणाद्यधिकरणसिद्धतन्निरंकुशकारणतावाधेन परतंत्रेच्छत्वेनचानीश्वरत्वप्रसंगात् ॥ सर्वहेतुभूतामीशेच्छां प्रत्यपि ब्रह्मभिन्नस्य जडस्य कस्यचित्कारणत्वे तस्यैव मुख्यकारणत्वसिध्या बहुश्रुतिसिद्धेश्वरकारणतावादोच्छेदप्रसक्तेर्वादांतरापाताच्च ॥

आद्यश्चेद्बहुस्यामिति वृत्तिविशेषं किं तेनैव वृत्तिविशेषेण जनयति उत वृत्तिविशेषांतरेण ॥ उभयत्रक्रमेण त्वदुक्तात्माश्रयानवस्थाने यदिचेश्वरत्वमात्रमिच्छानिरूपितकारणतावच्छेदक प्रपंचं प्रतिबहुस्यामितीच्छाविशिष्टेश्वरत्वेन कारणतेत्यंगीक्रियेत तर्हि उक्त-

कदेशिमतएवप्रवेशः दूषणोद्भावनप्रयासापार्थक्यंच ॥ इयांस्तुविशेषः सत्यसंकल्पादिश्रुतिसिद्धमिच्छायाईश्वरधर्मत्वं विहायाश्रुतमायावृत्तिविशेषरूपत्वकल्पने श्रुतहान्यश्रुतकल्पने प्रसज्येयातामिति ॥

यत्तु स्वमतेऽपीच्छायाःसृष्टिहेतुत्वेनानित्यत्वेनचेत्युक्त्वा कालादुद्बुद्धाज्ञनकर्मणइच्छोद्भवइत्युक्तं तन्न सम्यक् सृष्टेःपूर्वंकालसत्वे तस्य नित्यत्वमनित्यत्वं वा ॥ नाद्यः ॥ तस्य सर्वदैवसत्वेनकारणसत्वस्य कार्यसत्वव्याप्यत्वात्सदैवकर्मोद्बोधेनेच्छोत्पत्तिसत्वात्प्रलयाभावप्रसङ्गः ॥ किञ्च सृष्टेः पूर्वंकालकर्मादिस्वीकारे "सदेवसोम्येदमग्र आसीदेकमेवाद्वितीयम्" इत्यादिश्रुतिविरोधस्तत्रैक्यावधारणाद्वितीयपदैःसजातीयविजातीयस्वगतभेदव्यावृत्तेस्त्वदभिमतायाविजातीयकर्मकालादिसत्त्वेऽसिद्धेः ॥ न द्वितीयः ॥ कालस्यानित्यत्वे तदुत्पादकं वक्तव्यम् ॥. इच्छैवचेदन्योन्याश्रयः ॥ अन्येच्छाचेत्तस्या अप्यनित्यतयातदुत्पादकमन्यच्चेदप्रामाणिक्यनवस्थास्यात् ॥ किञ्च मायायाअप्यनादित्वस्य भवत्संमततया तस्याश्च दुर्घटघटनापटीयस्त्वात्तथैव सर्वकार्यसंभवे कालेच्छाकर्मणांस्वीकारोनिरर्थकः ॥ किञ्च कर्मपदेन क्रियाविवक्षिताअदृष्टंवा ॥ नाद्यः ॥ क्रियायाः क्षणिकत्वेन कर्तृनिष्ठत्वेन च कर्तृणांसृष्टेः पूर्वमभावेन वक्तुमशक्यत्वात् ॥ न द्वितीयः (अस्मन्मतेऽदृष्टाभावा) दित्यग्रिमस्वग्रन्थविरोधापत्तेः ॥ अपिचत्वन्मते सृष्टिहेतुरीश्वरेच्छा तद्धेतुभूतानि कर्माणि तदुद्बोधहेतुः काल कालेनकर्मोद्बोधे संहाराव्यवहितप्राक्क्षणे भविष्यत्फलजनकर्मभिरनुद्बुद्धैरेव स्वज्ञानद्वारा जनिता एतावताकालेन जनकर्माण्युद्बोधयिष्यामीतीश्वरेच्छा हेतुस्तत्राप्यन्यएव हेतुरिति महागौरवं वेदविरुद्धकल्पनाचेयं ॥ नहीदृशप्रणालीबोधिका काचिच्छ्रुतिरस्तिस्मृतिर्वैत्यास्तां विस्तरः ॥ योगिनस्तु योगजन्यसामर्थ्यविशेषेणैव नियतकालउत्थानं नतु व्यवहितकारणजन्यमिति विषमोदृष्टान्तः ॥ किञ्च योगिनि पुण्यपापादीनां सत्वाददृष्टविशेषेणोद्बोधोयुज्यते ॥ सृष्टेः पूर्वंतु "आत्मावाइदमेकएवाग्र आसीत्" इत्यादिश्रुत्या तेषामसत्वादिच्छा न संभवत्येव ॥ आगन्तुककारणमागन्तुककार्येऽपेक्षितमिति न्यायस्त्वप्रामाणिकत्वादनादरणीयः ॥ पुण्यपापानामागन्तुकत्वाभावात् ॥ "ज्योतिष्टोमेन स्वर्गकामो यजेत" त्यादिश्रुतीनां तत्रप्रामाण्यं वक्ष्युपेक्ष्यः ॥ किञ्चातिप्रसक्तमागन्तुकत्वमप्यनिर्वचनीयम् ॥ यत्तवाभिमतएव स्यात् ॥ तथाच दृश्यतेहीत्यादिकमसङ्गतम् ॥ अग्रे च (पुण्योवैपुण्येन कर्मणा इत्यादिना कर्मणां फलहेतुत्वम् ॥ जडस्य चेतनमन्तरा

हेतुत्वायोगादीश्वरः कल्प्यते एषह्येवसाधुकर्मेत्यादिश्रुतिभ्यः ॥ तस्य चेच्छाद्वारैवहेतुता लोकेतथैवदृष्टत्वात्) इत्याद्युक्तं ॥ तत्रलोकदृष्ट्यैवकल्पने लोके प्रथमं फलेच्छा ततः फलसाधनताज्ञानं तत उपायेच्छा भवति ॥ लोकानुसारेणैवेश्वरेपि कल्पने तत्रापि तथैव कल्पनीयं ॥ लोकानुसारिभिर्भवद्भिः ॥ तथा चेश्वरस्याप्तकामत्वंन-स्यात् ॥ लोकानुसारित्वात्तत्रापीष्टापत्तिस्वीकारआप्तकामश्रुति-विरोधः ॥ तदनादरे वेदबाह्यत्वं दोषः ॥ विलक्षणसामग्रीमन्तरा कार्यवैलक्षण्यानुपपत्तेश्चेति कथनमपि वेदान्तिनां न शोभते ॥ तैरेकस्यैव ब्रह्मणोजगत्कारणत्वस्वीकारात् ॥ अतएव "नविलक्षण-त्वादस्यतथात्वं चशब्दात्" इति सूत्रे "यदुक्तं चेतनं ब्रह्म जगतः प्रकृतिरिति तन्नोपपद्यते ॥ कस्माद्विलक्षणत्वादस्य विकारस्य ॥ जगद्ब्रह्मविलक्षणमचेतनमशुद्धंचदृश्यतेब्रह्मचजगद्विलक्षणंचेतनशुद्धं चश्रूयते" इत्यादिना पूर्वपक्षंनिरूप्य "दृश्यते" त्वितिसूत्रे "तुशब्दः पूर्वपक्षं व्यावर्तयती" त्याद्युक्त्वा दृश्यतेहिलोके चेतनत्वेन प्रसिद्धेभ्यः विलक्षणानां केशनखादीनामुत्पत्तिरचेतनत्वेनप्रसिद्धेभ्योगोमया-दिभ्योवृश्चिकादीनामुत्पत्तिरेवं ब्रह्मणोपि चेतनादचेतनजगदुत्पत्तिः शङ्कराचार्यैर्निरूपिता ननु सामग्रीवैलक्षण्यं कार्यवैलक्षण्ये निरूपितं नापीच्छाकृतं वैलक्षण्यदर्शितमिति तन्मतविरोधः ॥ अस्मन्मते च रमणेच्छयैव ब्रह्म जगद्रूपमभवत्तत्र श्रुतिरेव प्रमाणं ननु तादृशनिय-मोलोकदृष्टिर्वा ॥ एवं चास्मन्मतएव सोकामयतेतिश्रुतिसङ्गतिः ॥ तेनातएवेत्यादिकमसङ्गतमेव "फलमतउपपत्ते" रितिसूत्रमपि अन्यथानुपपत्त्याकल्प्यमानमदृष्टमेवफलदानार्हकल्प्यतां किमीश्वरे-णेतिमीमांसकमतखण्डनार्थमप्रवृत्तम् ॥ तदग्रिमेण "धर्मंजैमिनिरत एवे"तिसूत्रेण तन्मतप्रदर्शनस्य "पूर्वंतुबादरायणो हेतुव्यपदेशा"-दितिसूत्रेणपुनस्तत्खण्डनस्यचत्वदुक्तरीत्यावैयर्थ्यापातात् ॥ किन्तु मध्यमाधिकारिणंप्रति निरूपण ते हिफलेऽसक्षएवभवन्ति ॥ तच्चफलं फलदातृसत्त्वएव संभवतीति तदाह अतईश्वरादेव फलंभवति यत्कि-ञ्चिदैहिक पारलौकिक वा ॥ कुत उपपत्तेः ॥ "सर्वस्यवशीसर्वस्ये-शान" इति श्रुतिर्वस्तुमात्रेशितृत्वमसङ्कुचितमाह ॥ नह्यन्यस्यच स्त्वन्योदातुं समर्थोतोभगवानेव तथेत्यर्थः ॥ अतएव "श्रुतत्वाच्चे"-त्यनेन सूत्रेण "सवाएषमहानजआत्मान्नादोवसुदान" इत्यादिरू-पा श्रुतिरपि फलदातृत्वबोधिकाप्रमाणत्वेनदर्शिता ॥ ईश्वरस्ये-च्छाद्वाराफलदातृत्वमित्येवयुक्तिरुपपत्तिशब्देन दर्शिता ॥ लोके राज्ञः सेवाचौर्यादिजन्यतोषरोषद्वारैवतत्तत्कर्मफलदातृत्वमेवमत्रा-

पितोपरोपद्वारैवफलं भवतीति यदुक्तं तदपि तन्मते न संभवति ॥ तथाहि सूत्रस्थेनाऽतइतिपञ्चम्यन्तेनकस्यपरामर्शोब्रह्मणः पारिभाषिकस्यमायावच्छिन्नस्येश्वरस्य वा ॥ नाद्यः ॥ ब्रह्मणितोपरोपादीनां त्वयाऽनङ्गीकारात् ॥ तस्यनिर्धर्मकत्वंभवद्भिःस्वीक्रियते ॥ नद्वितीयः ॥ "तदव्यक्तमाहहि" इत्यादिपूर्वसूत्रेषुतथाविधस्यानिरूपणेनाप्रकृतत्वेनैतच्छब्देनपरामर्शासंभवात् ॥ तस्मादतएवेत्यारभ्य सर्वमसङ्गतमेव ॥

अथसहस्राक्षे[1] स्वमतेपीच्छायाइत्यादि अचेतनस्य तथा कल्पयितुमशक्यत्वाचेत्यंतं भागं दूषयंति ॥ यत्तु स्वमतेपीत्यादिना सर्वमसंगतमेवेत्यंतेन ॥ अयमाशयः तथाहि उद्बोधकस्य कालस्य सृष्टेः पूर्वमपि सत्वे सदोद्बोधप्रसंगः सदेवेत्यादि श्रुतिविरोधश्च ॥ तत्र एकमेवाद्वितीयमित्येकपदेन सजातीयभेदस्य एवेत्यवधारणेन विजातीयभेदस्याद्वितीयपदेन स्वगतभेदस्यच व्यावृत्तेस्तावकग्रंथेष्वपि दर्शितत्वात् अनित्यत्वेतु चक्रकापत्तिगर्भोन्योन्याश्रयः ॥ इच्छयाकालस्य जननं कालेन कर्मणामुद्बोधः ॥ उद्बुद्धकर्मभिरिच्छायाजननमिति ॥ किंच कर्मणां क्रियारूपत्वे लोके तस्यास्त्रिक्षणावस्थायितया संहारप्राक्कालिककर्मणां पुनः सृष्टिकालेऽसत्वेन तेषामुद्बोधनं तैरिच्छायाजननं चासंभवि ॥ तेषामदृष्टरूपत्वेतु अदृष्टस्याभावादिति त्वदुक्तिव्याघातः सदेवेत्यादिव्याको-

---

१ स्वमतेऽपीच्छायाः सृष्टिहेतुत्वेनाऽनित्यत्वेनच तत्कारणमाह ॥ इच्छोद्भवइत्यादि ॥ कालादुद्बुद्धाज्जनकर्मणइच्छोद्भवः ॥ कालेन कर्मोद्बोधस्तु संहाराऽव्यवहितप्राक्क्षणे भविष्यत्फलजनककर्मभिरनुद्बुद्धैरेव स्वज्ञानद्वाराजनितयैतावताकालेन जनकर्माण्युद्बोधयिष्यामीतीश्वरेच्छयादृश्यतेहि योगिनइच्छायाअपि व्यवहितकाले फलजनकत्वम् ॥ अमुष्मिन्कालउत्थास्यामीति संकल्प्य युञ्जतस्तस्मिन्नेव कालउत्थानदर्शनात् ॥ आगन्तुकं कारणमागन्तुककार्येऽपेक्षितमितिन्यायसम्भावितमर्थं प्रमाणेन विशिष्य द्रढयितुमाह ॥ श्रुतिस्मृतिगणैरिति ॥ निश्चीयतेइतिशेषः ॥ ज्योतिष्टोमेन स्वर्गकामोयजेतेत्यादिभिः पुण्योवैपुण्येन कर्मणा भवति पापःपापेन साधुकर्मकारीसाधुर्भवति पापकर्मकारीपापोभवति पुण्यःपुण्येनकर्मणाभवति पापःपापेन यइहरमणीयचरणाः एषह्येवसाधुकर्मकारयति इत्यादिभिश्चश्रुतिभिः योद्रव्यदेवतात्यागसम्भूतोरसउत्तमः ॥ देवान्संतर्प्यसरसोयजमानंफलेनचेति समवायीतुपुरुषोमोहेच्छाद्वेषकर्मजः इति विपाकः कर्मणाप्रेत्यकेषांचिदिहजायते ॥ इहचामुत्रचकेषांभावस्तत्रप्रयोजनम् इत्यादियाज्ञवल्क्यादिस्मृतिभिश्च कर्मणां फलहेतुत्वमुक्तम् ॥ जडस्य च चेतनमन्तरा हेतुत्वायोगादीशःकल्प्यते एषएवसाधुकर्मेत्यादिश्रुतिभ्यश्च ॥ तस्यचेच्छाद्वारैव हेतुता लोकेतथैवदर्शनात् विलक्षणसामग्रीमन्तराकार्यवैलक्षण्यानुपपत्तेश्च ॥ अतएवसोऽकामयतेत्यादिश्रुतीनांसंगतिः ॥ अतएवफलमतउपपत्तेरितिसूत्रं संगतम् ॥ वस्तुतस्तु लोके राजसेवाचौर्यादेराजतोषरोषद्वारैव हेतुत्वदर्शनादिहाऽपि कर्मभिरीशतोषादिकमेवकल्प्यते ॥ इयमेवयुक्तिःसूत्रउपपत्तिशब्देनोक्ता ॥ एवञ्चाऽन्यथाऽनुपपत्त्या कल्प्यमानमदृष्टमेवफलदानार्हं कल्प्यतामित्यपास्तम् ॥ अस्मन्मतेऽदृष्टस्याऽभावात् ॥ अचेतनस्यतथाकल्पयितुमशक्यत्वाच्च ॥

पक्ष ॥ किञ्च उभयथापिकर्मणां कर्तृनिष्ठत्वेनेश्वरनिष्ठेच्छायाजनकत्वमप्युपपादनसापेक्षम् ॥ हेतुकार्ययोर्वैयधिकरण्यात् ॥ किञ्च किमिदंकर्मणामुद्बुद्धत्वंनाम ॥ फलजननसामर्थ्यमितिचेत्तदपिअधुनैतत्कर्म स्वफलं जनयत्वितीश्वरेच्छाविषयत्वमेव वक्तव्यम् ॥ अन्यथा स्वातंत्र्येण कर्ममात्रात्फलनिष्पत्तेःसंभवेनेशतदिच्छादेरजागलस्तनत्वापातात् ॥ तथेच्छाविषयत्वरूपोद्बुद्धत्वस्वीकारेत्विच्छयोद्बोधउद्बुद्धैरिच्छायाजननमित्यन्योन्याश्रयादयः ॥ नापि संहारप्राक्क्षणेऽनुद्बुद्धैः कर्मभिः इयताकालेन कर्माण्युद्बोधयिष्यामीतीच्छायाजननं संभवति ॥ नच कालविशेषस्योद्बोधकत्वं स्वभावोवाच्यः ॥ प्रलयोत्तरं विशेषस्य निर्वक्तुमशक्यत्वात् ॥ सविशेषोऽपि नित्योजन्योवेति विकल्पे पूर्वोक्तदोषानिस्ताराच्च ॥ अनुद्बुद्धैरपि तस्याजननसंभवे सृष्टिकालेपि तज्जननार्थं कर्मोद्बोधसाधनप्रयासोव्यर्थः द्वारभूतज्ञानस्य नित्यत्वात् ॥ नचेष्टापत्तिः प्रलयकालेपीच्छाजननेन सदासृष्टिप्रसंगात् ॥ अथ तद्वारणार्थमुद्बुद्धानामेव जनकत्वं नियम्यत इतिचेत्संहारप्राक्क्षणे तदसिद्धिः ॥ नापीच्छाकारे कालपरिमाणनिवेशे भविष्यत्फलककर्मणां हेतुत्व युज्यते तेषां जडत्वेन इयताकालेन वयं फलं साधयिष्याम इति बुद्ध्यसंभवात् ॥ फलमत इतिन्यायेन फलस्येश्वरतंत्रत्वाच्च ॥ कालनिवेशःस्वातंत्र्यादिति चेदिच्छाकारप्रकटनेपि स्वातंत्र्यमस्तु श्रौतप्रक्रियानुपरोधात् ॥ किञ्च तथासतिपापादेस्तौल्येऽपि केषांचित्त्वरितमेव फलं केषांचिच्च कारणमंतरैव स्वेच्छयात्यंततरविलंबेन फलं जनयत ईश्वरस्य वैषम्यनैर्घृण्ये नापेयातां ॥ आत्मसृष्टेनैवैषम्यमितिवक्ष्यमाणस्य श्रुतिहृदयसमाधेस्त्वदप्रियत्वात् ॥ नापि कर्मणामनुद्बुद्धत्वाददोषः तदुद्बोधानुद्बोधयोरपि कालद्वारा स्वेच्छयैव भवनस्य त्वया स्वीकारात् ॥ कालेन कर्मोद्बोधइति प्रयोगस्तु कर्मणिचेति समासनिषेधाच्चिंत्य ॥ यद्यपि विवरणकारादिभिरिध्मप्रव्रश्चनादिशब्दसिद्ध्ये इहचस्येत्यर्थकत्वमाश्रित्य कर्मणीत्युच्चार्य विहितषष्ठ्याएव समासनिषेधोव्यवस्थापितः ॥ एवमेव च शब्दानुशासनमित्यादिप्रयोगाः संगच्छंते तथापि प्रकृते कालकर्मणोः कर्तृकर्मणोरुभयोरुपात्ततया उभयप्राप्तौ कर्मणीत्यनेनैव षष्ठीसिद्ध्या निषेधस्तदवस्थः ॥ नापिचेतनप्रयत्नासमवहितेन कालेन कर्मणामुद्बोधःशक्यवचनः जडत्वात् ॥ नच वह्न्यादेर्दाहकत्वादिवत्स्वभावादुद्बोधकत्वं वाच्यं स्वभावानपायेन सर्वदोद्बोधप्रसंगात् ॥ नच मण्यादिवत्प्रतिबंधकं किंचित्कल्प्यं अप्रसिद्धेः ॥ किंचोद्बोधसिद्ध्ये तन्निवर्तकं किंचिदुपपादनीयं ॥ तस्य नित्यत्वे सदोद्बोधस्य अनित्यत्वे तस्यापि कारणापेक्षत्वेनानवस्थायाश्चापातः ॥ तच्च निवर्तकमीश्वरेच्छाजन्य नवा ॥ आद्येचक्रकापत्तिरनवस्थावा ॥ द्वितीयेसिद्धिःसर्वोदिरन्युतहत्यादिमानविरोध ॥ कारणांतरं चाप्रसिद्धं एतेन तद्गुलविच्छित्त्यादिवत्तस्यागंतुककल्पनापि निरस्ता ॥ तेजःसंयोगादितुल्यनिमित्तापेक्षत्वात् ॥ निमित्तस्य चोक्तनित्यानित्यत्वादि विकल्पग्रस्तत्वात् ॥ वसंतादिकालेषु पुष्पाद्युत्पत्तिरपि न वसंतकालमात्रहेतुका व्यभिचारदर्शनात् ॥ किंतु ईश्वरेच्छाजन्येत्यन्यत्र विस्तरः ॥ अतोनतद्दृष्टांततोपि निर्वाहः ॥ अन्यथा कालमात्रात्सृष्टेरपि संभवेन ईश्वरवैयर्थ्यप्रसंगस्य दुर्वारत्वात् ॥ नापि संहारप्राक्क्षणावच्छिन्नेच्छायाप्यव्यवहितकाले

तात्कालिकप्रयत्नसमवधानंविना फलजनकत्वं युक्तं लोकविरोधात् स्पष्टतया तथाबोधकशास्त्राभावाच्च ॥ नचेश्वरस्य प्रयत्नाभावः शंक्यः "सोकामयत ॥ सईक्षते" इत्युक्तितः पृथक् "इदꣳसर्वमसृजत ॥ सइमाँल्लोकानसृजते" त्यादौ सर्जनानुकूलव्यापारादिरूपस्य तस्य श्रावणात् । अन्यथा सोकामयतेत्यनेनैव गतार्थत्वाच्छ्रुतिरिमं वदेत् ॥ नचेश्वरप्रयत्नसहकारात्कालेनोद्बोधोंऽगीकार्यः । तन्नित्यतायांतस्येच्छांविनाऽनुपपत्त्येच्छानित्यताया अर्थादापत्तेः अनित्यतायां चक्रकाद्यापाताच्च ॥ योगिनस्तूत्थाने नतदिच्छासाक्षाद्धेतुः किंतु तथा कृतानि योगशास्त्रीयसाधनानि सर्वव्यवस्थानियामकनिखिलफलप्रतिपादकेश्वरेच्छाच ॥ नैवमीशेच्छायानाशे व्यवहितकाले तस्याः फलं भवितुमर्हति तस्य फलसमर्पकेश्वरांतराभावात् ॥ किंच त्वन्मते कालकर्मणोरधिष्ठाने भ्रमकल्पितत्वेनेश्वरज्ञानागोचरत्वया इयता कालेन कर्माण्युद्बोधयिष्यामीति तदिच्छाकारोप्युपपादनसापेक्षः ॥ नहि शुक्त्यादिकं सत्वविशिष्टेंद्रियोवाकल्पितरजतादिकमनुभवति । नापीयताकालेनेति कालपरिमाणं संहारोत्तरमुपपद्यते । परिच्छेदकसूर्यगत्याद्यभावात् ॥ सर्वशक्तिनेश्वरेणैव परिमाणस्य नियमनेतु तन्नियमनरूपकार्यार्थमिच्छाप्रलयेप्यवश्यमंतव्या ॥ आगंतुकं कारणमित्यादिं भागं परिहरंति ॥ **इतिन्यायस्त्वप्रामाणिकत्वादित्यादिना ॥ आगंतुकत्वाभावादिति ॥** सकलं प्रलयकालं तूष्णीं स्थित्वा पुनः सृष्टिकाले फलजनकानां तेषां चिरस्थाय्यदृष्टरूपतया आगंतुकत्वस्य वक्तुमनौचित्यादिति भावः ॥ **किंचानतीति ॥** अतिप्रसंगरहितमागंतुकत्वमपि न निर्वक्तुं शक्यम् ॥ त्वन्मतेऽभिधेयमात्रस्य मिथ्यात्वेनेदमागंतुकमिदमनागंतुकमिति कार्येषु कारणेषु वा विवेकस्य दुर्घटत्वात् ॥ **आप्तकामश्रुतीति ॥** श्रुतिस्तु "सर्वमिदमभ्याऽऽत्तोऽवाक्यनादरः ॥ न तस्य कार्यं करणं च विद्यते" इति छांदोग्यश्वेताश्वतरादिरूपाबोध्या ॥ "नानवाप्तमवाप्तव्य" मित्यादिस्मृतिश्चात्रानुसंधेया ॥ नचेच्छावादेऽयं दोषःशक्यः श्रुत्याद्युपरोधेन लोकानुरोधस्यानादरात् ॥ जगतोब्रह्मपरिणामत्वेन ब्रह्मानन्यतया तद्विषयकेच्छायामुक्तदोषस्याप्रसक्तेः । नवमश्लोकखंडनादिस्थलेषु दर्शयिष्यमाणत्वाच्च ॥ अतोजन्येच्छापक्षएवोक्तरीत्या आप्तकामत्वभंगप्रसंगः ॥ **तैरेकस्यैवेति ॥** "एतस्माज्जायते प्राणो मनः सर्वेंद्रियाणिच ॥ खंवायुर्ज्योतिरापः पृथिवीविश्वस्य धारिणी" इति मुंडकादिवाक्यानुरोधाद्वेदांतिभिः परस्परविलक्षणमपि प्राणादिकं प्रति एकस्यैव ब्रह्मणः कारणत्वं स्वीक्रियते ॥ ननु सांख्यैरिव मनइंद्रियादिकं प्रति सात्विकराजसाद्यहंकारः काणादैरिव नित्याः पृथिव्यादि परमाणवः ॥ किंच विलक्षणसामग्रीमंतरेत्यादि वदतस्तस्य तत्तत्कार्याणि स्वस्वकारणसलक्षणानि संभवंतीत्याशयमभिप्रेत्य तद्भाष्यसमतं बाधकमाहुः ॥ **नविलक्षणत्वादित्यादिना ॥** अविरोधस्य प्रथमे पादे (सू. ४) "न विलक्षणत्वात्" इत्यादि सूत्रद्वयेन सालक्षण्याभावाज्जगद्ब्रह्मणोः कार्यकारणभावाभावं पूर्वपक्षीकृत्य (सू. ६) "दृश्यतेतु" इत्येतेन चेतनजन्यकेशलोमादिगोमयाद्यचेतनजन्यवृश्चिकादिदर्शनोपन्यासेन सनिराकृत ॥ **सूत्र इति ॥** अस्य निरूप्येत्यग्रेणान्वयः ॥ **यदुक्तमिति ॥** प्रथमस्य चतुर्थे

(सू. २३) "प्रकृतिश्च प्रतिज्ञा" इत्यादौ यत्पूर्वमुक्तमित्यर्थः ॥ सूत्रमपीति ॥ नप्रवृत्तमित्यग्रेणान्वेति ॥ अत्रायमाशयः ॥ यदपि आगंतुक कारणमित्यादि सूत्रं संगवमित्यंतमुक्तम्। तदकिंचित्कर त्वदुक्तरीत्या सिद्धनित्यताकस्य कालस्यागंतुकं कर्मोद्बोधं प्रति अनादेर्मायाया आगंतुकं प्रपंचं प्रति नित्यस्य ब्रह्मणोधिष्ठानतया तं प्रति च कारणत्वं वदता त्वयाऽऽगंतुकं कारणमिति नियमस्यावश्यबाध्यत्वात् ॥ "ज्योतिष्टोमेन स्वर्गकाम" इत्यादीनितु स्वर्गाद्युद्दिश्यज्योतिष्टोमादीन्विदधानानि आख्यातार्थभावनाकरणभावमयागस्वर्गादीनां प्रपंचाविर्भावावसरे साधनफलभावं बोधयंति। प्रलयकाले नियोज्य जीवानां स्वर्गादेश्चतिरोहितत्वेन यजेतेति विधेः कौत्स्यात् ॥ एतेनैव "पुण्योवैपुण्येन कर्मणे-" त्यादीन्यपि सृष्टौ प्रवृत्तायामुत्तरोत्तराधमोत्तमजन्मादिपरपराव्यवस्थावेदकतया व्यवस्थापितानि वेदितव्यानि ॥ तथाहि "पुण्योवै पुण्येने" ति वाक्य काण्वानां बृहदारण्यके पंचमाध्याये द्वितीयब्राह्मणे जारत्कारवसवादेऽस्ति ॥ तत्प्राणोत्क्रांत्यादि विचाराज्जन्मपरंपरापर प्रतीयते ॥ अग्रिमवाक्यं च तत्रैव सप्तमाध्याये द्वितीयब्राह्मणे "यथाकारीतथाचारीतथाभवति साधुकारीसाधुर्भवति पापकारीपापोभवति पुण्यः पुण्येन कर्मणा भवति पापः पापेनेति" इति पठ्यते ॥ तथासति साधुकर्मकारीत्यादिपाठभेदस्त्वनन्यासहेतुकाद्वेदविद्यावकत्वादेव। काण्वमाध्यंदिनैरुभयैरपि तत्र कर्मपदस्यापाठात् अत्रापि "तद्यथातृणजलायुकातृणस्यांतंगत्वाऽऽत्मानमुपसंहरत्येवमेवायं पुरुषः शरीरं निहत्याविद्यां गमयित्वाऽऽत्मानमुपसंहरति" इत्यादिना पूर्वशरीरत्यागेपित्र्यगांधर्वाद्यन्यतमशरीरांतरप्राप्त्यादेः श्रावण प्रागुक्तमेवार्थं गमयति ॥ ननु सृष्ट्यारंभे प्राक्सृष्टिकर्मणा पुण्यत्वादिकम्। बोधकपदाद्यभावात् ॥ एव छांदोग्ये पंचाग्निविद्यातेऽर्चिर्मार्गेधूममार्गेनिरूपणे धूममार्गगाना "मासेभ्यःपितृलोकपितृलोकादाकाशमाकाशाच्चंद्रमसमेषसोमो राजातद्देवानामन्नंतद्देवाभक्षयंतितस्मिन्यावत्संपातमुषित्वाऽथैतमध्वानंपुनर्निवर्तंते" इत्यादिना स्वर्गादेः परलोकात्पुनरिहागमनमुक्त्वाक्रमेणान्नभावं वीर्यभावं चापन्नानां वीर्यद्वारा स्वकर्मानुरोध्युत्तमाधमशरीरापत्तिरुच्यते "तद्यइहरमणीयचरणाअभ्याशोहयत्तेरमणीयां योनिमापद्येरन्ब्राह्मणयोनिंवा" इत्यादिना ॥ "अथ यइहकपूयचरणाअभ्याशोहयत्तेकपूयां योनिमापद्येरञ्छ्वयोनिंवा" इत्यादिनाच ॥ अभ्याशोह। शीघ्रमेव ॥ अतएतदपि सृष्टिदशायां जन्मपरंपरामेवदर्शयति नतु प्रलयोत्तरं पुनःसृष्ट्यारंभे शरीरपरिग्रहम्। श्रूयमाणक्रमहान्यश्रुतकल्पनाप्रसंगात्। इच्छाया कर्महेतुत्वबोधिकाया एषहेवेति श्रुतेरदाहारस्तु तावदेककर्मणामिच्छाहेतुत्ववादे स्वपादे कुठारप्रहारः ॥ तथा उक्तयाज्ञवल्क्यस्मृतिवाक्येष्वपि (अध्याय ३ यतिधर्मप्रकरणांते श्लो० ६६) योद्रव्यदेवतात्यागेति प्रथमं वाक्यं सृष्टिकालिकव्यवस्थापरमेव सगच्छते देवतोद्देशेन द्रव्यत्यागलक्षणयागादेस्तदैव संभवात् ॥ अनुपदमग्रे (श्लो० ६७) संयोज्य वायुना सोमं नीयते रश्मिभिस्तत इत्यादिना छांदोग्याद्युक्तरीतिकपरलोकपर्यायतस्य प्रयनाच्च ॥ एवं द्वितीयं (श्लोक ७०) समवायिग्वक्षवाक्यमपि जीवस्यागंतुकसमवायबोधकम्। मोहेच्छादिपदघटितं सर्गोत्तरकालि-

कधृत्ताऽऽश्वेदकमेव ॥ इच्छाद्वेषसमुत्थेन द्वंद्वमोहेन भारत ॥ सर्वभूतानि संमोहं सर्गे यांति परंतपेति भगवद्वाक्यैकवाक्यतया तथाऽध्यवसायात् ॥ एवंतृतीयं (श्लो० ७८) विपाकः कर्मणां प्रेत्य केषांचिदिह जायते । इह चामुत्र चैकेषां भावस्तत्र प्रयोजनमिति वाक्यमपि प्रेत्यादिशब्दघटितम्। तथैव। मरणेदं लोकादौ लोकादिव्यवस्थायाः सृष्टावेवा-भिव्यक्तेः ॥ अवइदमेकस्मिञ्जन्मनि जन्मांतरे वा लोकांतरे वा कर्मणां फलावश्यंभावमेव बोधयति ॥ नतु सृष्ट्यंतरव्यवस्थाम् ॥ किंच कर्मणां तौल्येऽपि फले विलंबाविलंबयो-र्नियामिकाभगवदिच्छैव मंतव्या यया संचितकर्मसमुदायात्प्रारब्धं देहोत्पत्तिसमये निर्मीयते ॥ सैवात्राभिप्रायपर्यायभावशब्देन प्रतिभाति ॥ जीवाभिप्रायपरत्वे पुत्रेप्सुस-साधनवंध्यादिषु प्रत्यक्षविरोधात् ॥ अतःसृष्ट्यंतरे प्राक्कर्मणां फलजनकत्वपक्षेपि सर्व-निर्वाहिकातदिच्छा नित्यैव मंतव्या ॥ तस्मादेमाः श्रुतिस्मृतयआम्नायसिद्धभगवदिच्छा-सर्वकारणतापारणतात्पर्यवत्यः । तन्निषेधाश्रवणात् ॥ नच "पंचपंचनखाभक्ष्या" इत्यादाविवेतरनिषेधः फलतीति वाच्यम्। रागतः पंचनखापंचनखभक्षणस्येव प्रकृते उभयोः कारणतायाः प्रत्यक्षेणाप्राप्त्यान्यतरपरिसंख्यानायोगात् ॥ इमामगृभ्णन् रशनामृतस्येत्यादौ लिंगेनेवशाब्दलिंगादिनोभयप्रसंजनेपि अश्वगर्दभाभिधान्योर्ग्रहणेतुल्यविनियोगवदिच्छा-कर्मणोस्तुल्यकारणत्वस्याभावेन सर्वनिदानभूतेच्छायाहेतुतानिरासासिद्धेः ॥ कर्मणांहि फलं प्रत्येवकारणता इच्छायास्तुकर्माणिप्रत्यपिसेतिनतौल्यम् ॥ नहिदंडचक्रव्यापारेण घटइत्युक्त्या कुलालव्यालसायास्तत्रनिमित्ततानिवर्त्यते । कर्मणां रोषतोषादिद्वारेश्वरेच्छा-जनकत्वं तस्याश्च केवलफलहेतुतेतिकलहे तु जीवानां नानाकर्मकरणे कारणं मृग्यम्। कुतस्सर्वोपि नपुण्यमेवानुतिष्ठतीति ॥ जीवेच्छावैचित्र्यमेवानुष्ठानवैचित्र्ये प्रयोजकमिति चेत्तत्रापि तन्मृग्यम् ॥ कुतोनसर्वोपि सुखसाधनं साधु कर्मैव विधित्सतीति ॥ अथ पुण्यकर्मणां तथास्वेच्छया तदनुष्ठानमेवं पापकर्मणामपीति पूर्वपूर्वकर्मणामेव जीवकाम-कारणताकल्प्यतइति चेत्तर्हि सकृदपि सुकृतानुष्ठाने कदाचिदपि कलुषं न स्यात्। एकवारमपि दुरिताचरणे कदाचिदपि सदाचरणं च नघटेत । दृश्यंतेत्वेकस्यापि देहिनो विविधानि सुकृतदुष्कृतानि। कस्मिंश्चिज्जनुषि कल्मषाधिक्यं कस्मिंश्चिच्च पुण्याधिक्यम् ॥ किंच तथासति सर्वेपि श्रौतस्मार्ताश्च विधिप्रतिषेधाअपि व्यर्थाभवेयुः। प्राक्तनकर्मणैव प्रवर्त्तननिवर्त्तनयोः सिद्ध्या तदनुपयोगात् । नचेच्छावादेप्ययंदोषः शंक्यः। कृतप्रयत्ना-पेक्षसूत्रेण तस्यपरिहरिष्यमाणत्वात्। तस्मात्परमेश्वरएव स्वेच्छानुसारेणाऽऽप्रलयम्। तानि तानि कर्माणि कारयित्वा तानि तानि फलानि प्रयच्छतीत्येव स्वच्छम् । यथा कौषी-तकिब्राह्मणे (अ० ३) इंद्रप्रतर्दनसंवादे "सएषप्राणएवप्रज्ञात्मानंदोऽजरोऽमृतो नसाधुनाकर्मणाभूयान्भवतिनोऽएवासाधुनाकनीयानेषह्येवसाधुकर्मकारयतितंयमेभ्योलो-केभ्यऽउन्निनीषतऽएषउऽएवासाधुकर्मकारयतितंयमधोनिनीषतऽएषलोकपालऽएषलोका-धिपतिरेशलोकेश·समआत्मेतिविद्यात्समआत्मेतिविद्या" ८ दिति पुण्यपापैरशक्यस्पर्शत्व-

माकारविशेषविशिष्टेच्छयैव साध्वसाधुकर्मकारयितृत्वं तत एव निरतिशयैश्वर्यादिकं च श्राव्यते॥ यत्त्वन्मतेतु जडेनापि कालेनेश्वरनिरपेक्षेण कर्मणामुद्बोधस्य जडैरपि तैःकर्मान्तरानुष्ठानस्येदेच्छायाश्च जनने तेषामितरनिरपेक्षं नरकनाकलोकादिप्रापकत्वमप्यपथ्यभेषजभजनादेरोगारोग्यादिजनकत्ववत्सुवचमतो (जडस्य च चेतनमंतराहेतुत्वायोगादीशःकल्प्यत) इत्युक्तिररण्यरुदितायते कारणभूतकर्मणां वैलक्षण्येन फलरूपकार्यवैलक्षण्यस्याप्युपपत्तेश्च॥ चेतनस्यैव फलदातृत्वाग्रहे तत्तत्कर्माराध्यानां चेतनानामेव तथात्वसंभवेन तदात्रीश्वरकल्पनायावैफल्याच्च॥ तस्मादास्मात्रीनरीत्यैव फलमतद्व्यधिकरणं संगच्छते नतु त्वद्रीत्या। प्रपंचयिष्यते चेदं पुरस्तात्॥ कर्मणामिच्छाहेतुकत्वबोधकश्रुतेरपपाठेन पुनःपुनरुपन्यासस्तु प्रकृतिविरुद्धः॥ किंच दर्शनानुरोधादीश्वरस्येच्छाद्वारैवकारणतां समिरमाणस्तस्य जन्यमात्रं प्रतिकारणत्वात् जन्यानिसाध्वसाधुकर्माणि प्रतिसृष्टिकाले जन्यं तदुद्बोधं प्रति च तस्य तद्द्वारा कारणतां कुतोनन्वे॥ तदवचनेच जडकारणवादाभ्युपगमादनीश्वरवादापातः त्वदिष्टोपपत्तिबाधात्फलमतद्व्यधिकरणासंगतिश्च॥ मन्मतेतु कर्मफलान्यारोग्यादिकंच प्रतीश्वरेच्छायाएव निदानत्वात्कर्मौषधादेश्च द्वारतयावांतरकारणत्वात् नकोपि शंकावकाशः। सोकामयतेत्यादिश्रुतयस्तु नत्वन्मतेसंगताः। श्रुतहान्यश्रुतकल्पनापत्तेः। तास्विच्छायाएव बहुभावमुच्चनीचभावं लोकसर्जनादिकं च प्रति निमित्तत्वश्रवणात् कालेनोद्बोधितैः कर्मभिस्तस्येच्छोदपाद्यतेति तत्राश्रवणात्॥ यच्च वस्तुतस्त्वित्यादि कल्पयितुमशक्यत्वाच्चेत्यंतं तदसत् इहैवसूत्रे उपपत्तिशब्देनोक्तयुक्तेर्ग्रहणेऽग्रैव जैमिनिमतनिरासासिद्ध्या पुरस्त्ययोस्तदुपन्यासतन्निरासपूत्रयोरापार्थ्यापातात्॥ किंच राजानोहि स्वविषयेषु चौर्यादेर्निवृत्तये स्वेष्टकर्मणां प्रवृत्तयेच तत्तत्फलमर्पयंति। अकुर्वंश्चेवं पूर्वतरोर्वीपतयः सर्वदुराचरणानां स्वराज्यसमये समुच्छेदमिति पुराणादिषु प्रसिद्धम्॥ ईश्वरश्च सर्वोपायज्ञसर्वशक्तिर्बहुकालाद्दुष्कृतिनो दंडयन्नपि स्वरोपपोषककल्मषाणामविशेषाद्देषाणामुच्छेदमेव कुतो न संपादितवान्। तदुपासकानां ज्ञानिनामपि नस्तुवीत न निंदेतस्वभावविपर्मजनं सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबंधुषु॥ साधुष्वपिचपापेषुसमबुद्धिर्विशिष्यतइति भागवताद्युक्तप्रक्रियादर्शनात् सर्वमुक्तोपसृप्यस्य तस्य कथंरोषतोषौ॥ गुणोद्रेकादितिचेद्युगपदुभयविधफलवितरणानुपपत्तिः। उद्रेकेचेश्वरातिरिक्तं किं बीजं स्यात्। तदितरतदुद्धाटनेत्वनीश्वरवादप्रसक्तिः॥ किंच राज्ञांचोरादिदंडने ईश्वरलोपसपिपादयिषा तद्रीतिश्च प्रयोजिका। तथेश्वरस्य फलदाने किं प्रयोजनम्॥ (अ० ३ पा० २ सू० ३१) परमतस्सेतिवत्यधिकरणे तद्वियामकनिषेधात्॥ मन्मतेतु क्रीडार्थमेव प्रपंचरूपेण प्रादुर्भावात्कृतप्रयत्नापेक्षात्वाच्च न काप्यनुपपत्तिः॥ अतएव (अ० २ पा० १ सू० ३२-३३) नप्रयोजनवत्त्वादित्याशंक्य लोकवत्तु लीलाकैवल्यमित्येवासूत्रि श्रीबादरायणाचार्यैः॥ एवं तगोपपत्तेर्बाधितत्वेन अन्यथानुपपत्त्या कल्प्यमानमदृष्टमेव फलदानार्हं कल्प्यतामित्यासाक्षीनाक्षेपोदुरुद्धरः। अन्यथानुपपत्तिस्तु "धर्मंजैमिनिरतएव" त्यत्र शारीरकभाष्ये या दर्शिता सैव॥ नचादृष्टाभाव-

स्वयाशक्यवचनः अपूर्वानंगीकारे कर्मणां कालांतरीयफलसाक्षात्कारणत्वस्यानुपपत्त्या त्वदुक्तश्रुतिस्मृतीनां बाधात्। संभूतोरसउत्तम इतित्वदुक्तवाक्येरसशब्देनामिताक्षरायां तस्यैवव्याख्यानात्। कालतउद्बुद्धाज्ञानकर्मणइच्छोद्भवइति त्वदभिमतव्यवस्थाभंगाच्च॥ शंकराचार्यैः फलमतइत्यादिसूत्रव्याख्याने कर्मणोनुक्षणविनाशितायांगीकारेण तस्य यावत्प्रलयकालमनुद्बुद्धतया स्थितेः सृष्ट्यारंभउद्बोधस्य चासंभवदुक्तिकत्वात् स्वोक्तनिर्वाहायापूर्वाभ्युपगमे तु गले पादुकान्यायेनादृष्टमूरीकृतम्। अदृष्टपदस्य तत्पर्यायत्वात्॥ जडस्यापि तथाकल्पनं शक्यमिति त्वौषधादिदृष्टांतेन प्रागेवादर्शयाम॥ अथ कस्तर्हि सूत्रउपपत्तिशब्दार्थइति चेदुच्यते॥ निष्कामानां भजनसिद्धये पूर्वाधिकरणे सर्वोत्तमत्वं निरूप्य सकामानां तत्सिद्धये फलदातृत्वं कर्मादिसर्वनियंतृत्वं च निरतिशयैश्वर्यबोधकमुपपदयितुमिदमधिकरणमारभ्यते॥ अत्र फलं तत्तत्कर्मसचिवेभ्योदेवेभ्य उत भगवत इति संशयः॥ देवानामुद्देश्यतया श्रवणं भगवतः सर्वेश्वरत्वसर्वहेतुश्रवणं च संशयबीजम्॥ तत्र "यदाग्नेयोष्टाकपालोमावास्यायांच पौर्णमास्यांचाच्युतो भवति॥ ऐंद्रंदध्यमावास्यायाम्। ऐंद्रंपयोमावास्यायामि"त्यादि तत्तदुत्पत्तिवाक्याबलेन देवतोद्देशेनैव द्रव्यस्य त्यज्यमानत्वात्। याज्यापुरोनुवाक्याद्यनुरोधेन देवानामेवहव्यभोक्तृत्वनिश्चयात्। "वायुमेव स्वेन भागधेयेनोपधावति सएवैनं भूतिं गमयती" त्यादिना तेषामेव फलदातृत्वश्रवणात्। आयुः प्रजां धनं विद्यां स्वर्गं मोक्षं सुखादि च॥ प्रयच्छंति तथा राज्यं प्रीता नृणां पितामहा इत्यादिस्मरणाच्च। द्वितीयस्कंधतृतीयाध्यायाद्युक्तरीत्या प्रतिनियतत्वाच्च। देवेभ्य एव फलमिति पूर्वपक्षेऽभिधीयते॥ (अ० ३ पा० २ सू० ३८) "फलमतउपपत्तेः"॥ अतईश्वरादेव फलं भवति यत्किंचिदैहिकं पारलौकिकं वा॥ कुतः॥ उपपत्तेः "सर्वस्य वशी सर्वस्येशान" इति श्रुतिर्वस्तुमात्रेशितृत्वमसंकुचितमाह नह्यन्यस्य वस्त्वन्योदातुं समर्थ इति॥ न चोद्देश्यत्वादिविरोधः। "चक्षोः सूर्यो अजायत॥ अग्निर्मूर्द्धाचक्षुषीचंद्रसूर्यौ॥ देवा नारायणांगजः॥ इंद्रादयोबाहव आहुरुस्रा" इत्यादिश्रुतिस्मृतिभिस्तेषां भगवदवयवोद्भवत्वतद्रूपत्वयोर्बोधनेन भगवतउद्देश्यत्वानपायात्॥ भोक्तारंयज्ञतपसां सर्वलोकमहेश्वरम्। अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च। सुरुचिर्हुतभुग्विभुः। यज्ञभुग्यज्ञसाधन इत्यादौ तस्यैव सर्वरूपेण भोक्तृत्वावगमाच्च॥ सएवैनमित्यादिकंतु द्वारत्वाभिप्रायकम्। योयो यांयांतनुमित्युपक्रम्य लभतेच ततः कामान्मयैवविहितानिति स्मरणात्॥ एतेन तेषांतत्तत्कर्मतत्तत्फलप्रतिनियतत्वमपि तदिच्छयैवेतिसिद्धम्॥ अग्रेच सएवैनमित्यादिप्रत्यक्षश्रुतेः प्राबल्यमाशंक्य स्वमतेपि प्रत्यक्षश्रुतिमाहाचार्यः (सू० ३९)॥ "श्रुतत्वाच्चे"ति "सवाएष महानजआत्मान्नादोवसुदान" इत्यादिश्रुतिषु तस्यैव भोक्तृत्वफलदातृत्वयोः श्रवणात्। चकारेण यो योयांयामित्यादिस्मरणात्तथेत्यर्थः॥ अहिकुंडलत्वदेवादिसर्वकार्यरूपत्वनिरतिशयैश्वर्यादिप्रतिपादकपूर्वाधिकरणानां पर्यालोचनेपि इयमेवोपपत्तिरिहोपपत्तिशब्देनोपतिष्ठते॥ एवं पूर्वपक्षोपि देवानामेव तत्तत्कर्मभिराराध्यमानानां सर्वफलदातृत्वे

तस्यपूर्वोक्त पारमेश्वर्यं कथमिति पूर्वाधिकरणाक्षेपेणोक्तरीतिकएवोत्तिष्ठति नतुकर्मणामेवफलदातृत्वमिति स भ्रमसगात् तेषां जडत्वस्यापिप्रत्यक्षसिद्धत्वात् ॥ साधितेतु सूत्रद्वयेनेश्वरस्यैव फलदातृत्वेऽउपपत्तिश्रुतत्वाभ्यां कर्मणामेव तद्दत्वमस्त्विति निरीश्वरमीमांसकचोद्यप्रासावसरमतउपन्यस्य निरस्यते सूत्रद्वयेन ॥ नचधर्मंजैमिनिरितिसूत्राभिप्रेतोपपत्त्या प्रथम पूर्वपक्ष प्रसञ्जनीय । फलमत इति सूत्राभ्यां जैमिन्यभिमतोपपत्त्यादेरसमाहितत्वादुक्तपूर्वपक्षतादवस्थ्येन ॥ तयोरकिंचित्करत्वापत्ते । अग्रे स्वयमुपन्यासस्य हेत्वन्तरेण तन्निरासस्य चानर्थक्यप्रसक्तेश्चेति पूर्वमेवासूचयाम ॥

वैषम्यनैर्घृण्ये अपित्वन्मतएव संभवतः ॥ नचकर्मापेक्षयासुखदुःखदातृत्वात्कथंवैषम्यनैर्घृण्येइति वाच्यम् ॥ तस्यैव कर्मकारयितृत्वेन स्वयमेव कर्मकारयित्वा स्वयमेव कस्मिंश्चिज्जीवे सुखं कस्मिंश्चिज्जीवे दुःख प्रयुञ्जतः कथंनवैषम्यं नैर्घृण्यं वा स्यात् ॥ एतेनातएव वैषम्यनैर्घृण्येनेत्यादिकप्रत्युक्तम् ॥ ननु कर्मण फलजनकत्व इत्यादि प्रश्नस्तु पूर्वापरविरुद्धः ॥ पूर्वमीश्वरेच्छांप्रति कर्मणोहेतुत्वस्योक्तत्वात् ॥ किञ्च कर्तृत्वानुपपत्तिपदेनेच्छाकर्तृत्वानुपपत्तिरुक्ता जगत्कर्तृत्वानुपपत्तिर्वा ॥ नाद्यः ॥ कर्माधीनत्वेपीच्छाश्रयत्वरूपेच्छाकर्तृत्वानपायात् ॥ नापि द्वितीय ॥ तस्याप्रकृतत्वात् ॥ यदपि कर्तृत्वानुपपत्तावीश्वरत्वासिद्धिरित्याक्षेपेऽस्वतन्त्रस्यापि काष्ठादेः कर्तृत्वप्रदर्शनम् ॥ तत्र स्वतन्त्रः कर्तेतिसूत्रविरोधोद्भावनं तदुपरि स्वातन्त्र्येण विवक्षितोर्थः कर्तेत्याद्युत्तर तदपि तुच्छम् ॥ कर्तृत्वानुपपत्तेरीश्वरत्वव्याघातस्त्वे मानाभावः सुद्धपाकाद्यकर्तृणामपि लोके राज्ञामीश्वरत्वाव्याहतेः ॥ नचफलदातृत्वमीश्वरमितिवाच्यम् ॥ फलमददतां बलात्कारेण कर्मकारयितृणामपीश्वरत्वदर्शनात् ॥ काष्ठादेश्च पारिभाषिकं कर्तृत्वं नतुवास्तवम् ॥ अतस्तादृशकर्तृत्वविवक्षणेपि नाभिमतसिद्धिः ॥ अतएव तादृशस्यात विवक्षणेपि पुरुषव्यापाराधीनव्यापारवतांकाष्ठादीनामन्यव्यापारानधीनक्रियानुकूलव्यापारवत्त्वरूपस्वातन्त्र्यस्याभावात्तद्बोधकविभक्तीनामप्रामाण्य दुर्वारमेवेत्याशङ्क्य समभिव्याहृतत क्रियाश्रयान्तरव्यापारानधीनतत्तत्क्रियानुकूलव्यापारवत्त्वरूपं स्वातन्त्र्यमेव स्वतन्त्रः कर्तेतिसूत्रघटकस्वतन्त्रपदार्थत्वेन विवक्षितं भट्टाचार्यैः ॥ उपादानगोचरज्ञानचिकीर्षाकृतिमत्त्वस्य काष्ठाद्यभावेन स्वतन्त्र कर्तेत्यनुशासनविरोधो दुर्वारश्च ॥ नहितद्वियक्षयापि परिहारः संभवति ॥ तादृशकर्तृत्वस्य वैयाकरणासंमतत्वेन तेषां तादृशविवक्षाया असंभवात् ॥

सहस्राक्षे *अतएववैषम्येत्यादिं अबाधाचेत्यंतं भागं परिहरंति ॥ वैषम्यनैर्घृण्येअपि त्वन्मतइत्यादिना ॥ विवक्षायाअसंभवादित्यंतेन ॥ अत्रमातंडे अनादिकर्मचाश्रित्यसमाधानेत्वनीशतेतिकारिकां तट्टीकां च यथाकथंचिदनुसृत्य सहस्राक्ष उपन्यस्तस्य ननुकर्मणः फलजनकत्वमिति प्रश्नस्य विरोधोभिस्तु तदीयग्रंथे पूर्वापरविरोधप्रदर्शनार्थो ॥ वस्तुतस्तुत्वन्मतेकर्तृत्वोपपत्तिः अनीशतावारणंच नसंभवतीत्यर्थः ॥ अयंभावः ॥ यत्तु अतएव वैषम्यनैर्घृण्येनेत्यादि अबाधाचेत्यंतंतद्विचारचारु ॥ सिद्धांते आत्मसृष्टेन वैषम्यमिति दोषपरिहारस्योपपादयिष्यमाणत्वात् अन्यथा त्वन्मतेपि तदपरिहाराच्च ॥ तथाहि फलवत् कर्मनिरूपितापि कारणताग्रहणएवास्तिनवा ॥ आद्यश्चेत्केनचित्सुकृतं कारयित्वा तस्मै सुखं केनचिदेनः प्रणाय्य तस्मै दुःखंच विश्राणयति तत्रसत्रानृशंसतयोदितदूषणेमुख्ये ॥ द्वितीयस्तु प्रागेव "एषउएव । पराचि" तिप्रभृतिश्रुतिसूत्रावहेलनादिदोषाणां दिशोदर्शनया दूरीकृतः ॥ किंचोक्तचरोपपत्त्याक्षितिपत्यादिवद्वैषम्याद्यनुपपत्तिस्तवाशयगोचरः ॥ परंतु धराधीशादिमेनंभूयश्चौर्यादिकुर्याअस्यत्वत्कर्मणएतत्फलमितिस्फुटं ज्ञापयंतः पाटचरप्रमुखं दुःखाकुर्वंति । मुहुरनुष्ठानेचोत्तमोत्तमंदमंयथागमं समर्पयंति । प्रवृत्तिंजानानाश्च पापेप्रवर्तमानमेव प्रतिबध्नंति । नतुविदितामपि दुरितप्रवृत्तिमुपेक्ष्य तत्फलंकर्मोत्तरं वितरंति ॥ परमेश्वरस्तु तस्मिञ्जन्मनि जन्मांतरे वा तत्तत्कर्मफलानिभोजयन् सर्वस्यचाहं हृदि सन्निविष्टोमत्तः स्मृतिर्ज्ञानमपोहनंचेत्यादिप्रमाणेन सर्वांतःकरणशरणः सकलसारणसमर्थोपि इदममुष्यफलमितिनैवज्ञापयति येन ज्ञापितेन दुःखसाधनाद्वृजिनाज्जनोनिवर्तेतैव । प्रवर्तेतचपुण्यएव ॥ नाप्युत्तरोत्तरजन्मसु तस्यैवाघस्यानुष्ठानेदमे तारतम्यंप्रयुंक्ते । तथाबोधकस्मृत्याद्यनुपलभात् ॥ नापिपापेप्रवर्तमानसर्वज्ञःसर्वसमर्थोपि निरुणद्धि । येन दुःखमेव कस्यापि नस्यात् ॥ निरोधनाशक्तौतु महीक्षिदमुष्यापेक्षयापि दुर्बलतया फलस्पर्शनमप्यशनयम् ॥ किंच चौर्याद्यनार्याचरणचणानपि स्वचरणारणाश्रितांसुखयश्रितरांश्चविनयवचनैनाथोनह्यविषमोभिलप्येत ॥ भगवांस्तु तेषामहंसमुद्धर्तामृत्युसंसारसागरात् ॥ भवामिनचिरात्पार्थमय्यावेशितचेतसाम् ॥ तेषामेवानुकंपार्थमहमज्ञानजंतमः ॥ नाशयाम्यात्मभावस्थोज्ञानदीपेनभास्वता ॥ मांहिपार्थव्यपाश्रित्य येपिस्युः पापयोनयः ॥ अपिचेत्सुदुराचारः । अहंत्वासर्वपापेभ्यो मोक्षयिष्यामिमाशुच. "तन्निष्ठस्य मोक्षोपदे-

---

* अतएव वैषम्यनैर्घृण्ये न ॥ जीवसुखदुःखेच्छांप्रति कर्मणोहेतुत्वात् ॥ अन्यथा स्वेच्छया कस्मैचित् सुखस्य कस्मैचिद्दुःखस्य दानेन वैषम्यं क्लेशाऽभावकरणसमर्थस्य तदकरणेन नैर्घृण्यंचापद्येत ॥ ननु कर्मण. फलजनकत्वे ईश्वरस्य कर्माऽऽधीनतया स्वातन्त्र्याभावात्कर्तृत्वानुपपत्तावीश्वरत्वाऽसिद्धिरितिचेन्न ॥ अस्वतन्त्रस्याऽपि देवदत्त पचति काष्ठानि पचन्तीत्यादौ देवदत्तकाष्ठादेः कर्तृताया दर्शनात् ॥ नच स्वतन्त्र· कर्तेतिसूत्रविरोध ॥ तस्य स्वानन्येग विवक्षितोऽर्थः कर्तेतितद्व्याख्यातृभिर्व्याख्याततयातद्विरोधाभावात् ॥ उपादानगोचरज्ञानेच्छाइत्यादिरूपकर्तृत्वस्यसहकारिसमवधानेऽबाधाच्च ॥

शादि" त्याद्युदितदिशा स्वभक्तान् सकलकलुषकुलतूलज्वालनपुरःसरं परमदुःखद-संसारान्मोचयन्नपरांश्च हृदिस्थित्वा माययाभ्रामयन्कथंनविषमः। सुदामद्विजवायक-मालाकारादिभ्योऽल्पतरसाधनेभ्योऽधिकतरंतरसाधनादिकंचददत्कथंनतथा ॥ भूरितर-दुरितपूरितस्वधर्मौदासीनदासीपत्यपत्यप्रणयिदुष्टाजामिलादीन्स्वनाममात्रग्रहेणात्यंतपवि-त्रतापात्राणिसहसाकुर्वंश्चकथंनतथा ॥ शंकराचार्यैरपि सर्वप्रलयकारितयोक्तंनैर्घृण्यंतु कर्मसापेक्षत्वान्नापैति ॥ तस्माद्वक्ष्यमाणःपरिहारएव रमणीयः ॥ यच्च शुद्धाद्वैतमार्तंड-टीकायां अनादिकर्मचाश्रित्यसमाधानेत्वनीशतेत्यत्रे "श्वरस्यकर्माधीनत्वेनस्वातंत्र्या-भावात् कर्तृत्वानुपपत्तावीशत्वासिद्धिरि" त्युक्तम् ॥ तस्यायमाशयः ॥ दयालोरसमर्थस्य दुःखायैवदयालुतेतिन्यायेन सघृणत्वेपि प्रतिबंधाद्यसमर्थतया दुःखितस्य फलदानादि-यावत्कार्येषु कर्मवशंवदस्य दुर्बलतरेश्वरस्यापेक्षायाऽऽवश्यकानि कर्माण्येव लाघवात्स्वीका-र्याणि। जडानामपि तेषामौषधादिवत्स्वतःफलजनकत्वोपपत्तेः। दधिक्षीरगोमयवृश्चिका-दिन्यायेन जडाजडसर्गस्य ज्वलनहालाहलादिन्यायेन संहारस्यापि ततएव संभवाच्च ॥ अथ कथंचिदीश्वरोरीकारेप्यप्रयोजकप्रायस्यात्यंतपरतंत्रस्य नियोगनिबद्धभृत्यवदवश्यंफलमात्रस-मर्पकस्य तस्य लक्षणप्रमाणाद्यधिकरणसाधितनिरंकुशकर्तृत्वानुपपत्त्याऽनीशत्वं स्फुटमेव ॥ नहिपराधीनतया यथाकथंचित्कर्तृत्वमात्रादीश्वरत्वसिद्धिः कुलालादावतिप्रसंगात् ॥ किंतु निरंकुशादेव तत्इति विस्तीर्णमाकरे ॥ काष्ठानिपचंतीत्यादौ तु विवक्षातःकारकाणि भवंतीति सिद्धांतात् काष्ठादेः कर्तृत्वं विवक्ष्यते मात्रं अतस्तथा प्रयोगः ॥ एवमीश्वरेपि लोकानसृजतेत्यादौवैवक्षिककर्तृत्वांगीकारे काष्ठादेरिव तस्यापि वास्तवकर्तृत्वासिद्ध्या सुतरामीश्वरत्वासिद्धिः ॥ स्वतंत्रः कर्तेत्यनुशासनस्य त्वयमर्थः स्वः आत्मा तंत्रं प्रधानं यस्य स स्वतंत्रः अन्यानधीनव्यापारः कर्ता स्यादिति ॥ अतएव हरिणा "धातूपात्तक्रिये नित्यं कारके कर्तृतेष्यतइति सामान्यतोऽभिधाय प्राधान्यतः शक्तिलाभात्प्रागभावापाद-नादपि। तदधीनप्रवृत्तित्वात्प्रवृत्तानां निवर्तनात्। अदृष्टत्वात्प्रतिनिधेः प्रविवेके च दर्श-नात्। आरादप्युपकारत्वात्स्वातंत्र्यं कर्तुरिष्यत" इति तदेव समर्थितम् ॥ अस्यार्थं त्वित्थं वर्णयंति ॥ इतरव्यापारात् प्रागपि प्राधान्येनात्मशक्तेः कर्तृव्यापारस्य सत्त्वात् ॥ तथाच इतरव्यापारानधीनव्यापारवत्त्वादित्यर्थः तथाकारकांतरेभ्यःप्रागभावस्य तस्मिन्नेव भाव्या-दायापादनात् दंडादिरूपकरणादीनां प्रवृत्तेः कर्त्रधीनत्वात् तेषांनिवृत्तेरपि तथात्वात् छेदनादौ दात्रादेः कुठारादिवत्कर्तुः प्रतिनिधेरदर्शनात् प्रविवेके आस्ते शेते इत्यादौ कारकांतराप्रयोगेपि तस्य प्रयोगात् कर्तृरहितानां करणादीनां च त्वप्रय-योगात् आरात् साक्षाद्धातूपात्तफलजनकव्यापाराश्रयत्वाच्च कर्तुः स्वातंत्र्यमिष्यते ॥ उक्तः कारिकार्थः कारक इतिसूत्रे कैयटेपि सूचितः ॥ किंच स्वतंत्रसूत्रे भाष्ये वितानें तंत्रशब्दमाशंक्य "अस्तिप्राधान्ये वर्तते तद्यथा स्वतंत्रोसौ ब्राह्मण इत्युच्यते स्वप्रधान-इति गम्यते तद्यःप्राधान्येवर्तते तंत्रशब्दस्तस्येदं ग्रहणम्" इत्युक्तम् ॥ अत्रकैयटः "स्वशब्दआत्मवाची स्वआत्मा तंत्रं प्रधानं यस्य सस्वतंत्र उच्यते" इत्याद ॥

किंचानेककारकनिर्वर्त्यायामपि क्रियायां यथा कर्तुरेव प्राधान्यं तथा कारकइति सूत्रे भाष्ये प्रपंचितम् ॥ तथाहि महासंज्ञाकरणात्कारकशब्दस्य करोतीति व्युत्पत्त्यान्वर्थसंज्ञात्वम् । विभक्तिव्यत्ययात्सप्तमीस्थाने प्रथमां अपिमाणां ध्रुवादीनां संज्ञित्वं चाश्रित्य ध्रुवमपायइत्यादौ योगविभागेन कारकसंज्ञाविधानात् कारकस्य सतोऽपादानादिसंज्ञाविधानाच्चोभयसंज्ञासमावेशं बोधयित्वा सर्वापेक्षे यान्तुरेव प्राधान्यमुच्यते "किंपुनःप्रधानम् । कर्ता कथंपुनर्ज्ञायते कर्ता प्रधानमिति यत्सर्वेषु साधनेषुसंनिहितेषु कर्ता प्रवर्तयिता भवति" इति ॥ एवंच फलदानादौ कर्माद्यत्यंतसापेक्षस्य स्वतः सर्वथा निष्क्रियस्योपाधिमात्रमूलकक्रियस्यास्वातंत्र्येणाकर्तृत्वाद्भवतोऽनुशासनविरोधोवस्तुतः स्यादेव । यत्तु स्वातंत्र्येण विवक्षितोर्थइतिवृत्तौ व्याचक्षते तत्तु अवांतरक्रियाविशेषसंबंधस्य करणादिकारकमात्रे सत्त्वात् कर्तुर्देवदत्तादेः प्रधानस्याप्रयोगे करणादिकमपि ज्वलनधारणादिस्वव्यापारे स्वातंत्र्येण विवक्ष्यमाणं काष्ठानि पक्ष्यन्ति स्थालीपचतीत्यादौ कर्तृतया प्रयुज्यत इत्यभिप्रायेण ॥ अतएव हरिणा "निष्पत्तिमात्रे कर्तृत्वं सर्वत्रैवास्ति कारके । व्यापारभेदापेक्षायां करणत्वादिसंभव" इत्युक्तम् ॥ कारकसूत्रेच महाभाष्ये "कोसौ प्रतिकारकं क्रियाभेदः पचादीनामधिश्रयणोदकासेचनतंडुलावपनैधोपकर्षणक्रियाः प्रधानस्य कर्तुः पाकः । संभवनक्रियां धारणक्रियांच कुर्वती स्थाली पचतीत्युच्यते तत्र तदा पचिर्वर्तते ज्वलनक्रियां कुर्वंति काष्ठानि पचंतीत्युच्यन्ते तत्र तदापचिर्वर्तते" इत्याद्युक्तम् ॥ अत्रसंभवनं ग्रहणमिति कैयटः ॥ अत्रेच स्वातंत्र्यपारतंत्र्ययोः पर्यायेण सर्वत्रविवक्षासंभवात् संभवनादौ स्थाल्यादेः स्वातंत्र्यस्य सार्वदिकत्वाच्च कर्तुरधिकरणादितो नकोपि विशेष स्यादित्याशंकावारणाय प्रक्षालनपरिवर्तनादौ स्थाल्यादेः पारतंत्र्यमुक्त्वोच्यते "ननु च भोः कर्तृस्थेपि यत्ने कथ्यमाने स्थाली संभवनक्रियां धारणक्रियां च करोति तत्रासौ स्वतंत्रा क्वेदानीं परतंत्रा स्यात् ॥ एवं तर्हि प्रधानेन समवाये स्थाली परतन्त्रा व्यवायेस्वतंत्रा । तद्यथा अमात्यानां राज्ञासहसमवाये पारतंत्र्यं व्यवाये स्वातंत्र्यं किंपुनः प्रधानं कर्ता" इत्यादि ॥ एवंच ब्रह्मणोऽस्वतन्त्रस्यापि स्वातंत्र्यविवक्षामात्रेण काष्ठस्थाल्यादिवत्कर्तृत्वमितिचेत्तदतिरिक्तस्तस्य प्रवर्तननिवर्तनसमर्थः प्राधान्येन तत.प्राग्लब्धात्मशक्तिस्तत्अविवेकेपि कांचित्क्रियां कर्तुं शक्त. सर्वथास्वतंत्रोदेवदत्तादिवत्कश्चित्कर्ताऽवश्यंकल्प्यः । तत्कल्पने चसुतरां सिद्धं वस्यानीश्वरत्वम् ॥ किंच मनोरमाशेखरादिषु प्रधानीभूतधात्वर्थाश्रयत्वम् । शवादिकर्तृप्रत्ययसमभिव्याहारे तदाश्रयत्वं वा कर्तृत्वमिति स्वीकारात् भाष्येचान्वर्थसंज्ञानुरोधात्कारकांतरस्यैव वैवक्षिककर्तृतायास्तत्रापि करणाधिकरणयोरेव पर्यायाख्यास्तत्र्यादर्शितत्वात्प्रकृते विवक्षया कर्तृत्वस्य कल्पने ब्रह्मणः काष्ठादिवद्धात्वर्थी करणाद्यन्यतमता ज्वलनसंभवनादिवद्धात्वर्थक्रियाच काचित्साक्षात्तस्मिन्वाच्यैव॥संभवनादानपि पचेः शक्तिर्भाष्यकृतोक्तेतिसापि क्रिया धात्वर्थोस्त्येव ॥ एवंसति तावतापि स्वाभिमतनिष्क्रियत्वस्य भंगोऽनीशत्वप्रसंगे चाधिरेऽनुप्रविष्टे शास्त्रसिद्धं स्वातंत्र्यमेव तस्य स्वीकर्तव्यं नतूपाधिगुणजीवकर्मादिपारतंत्र्यमित्येव

कमनीयम् ॥ एतदेवाभिप्रेत्योक्तं श्रीमदाचार्यचरणैस्तत्त्वदीपे ॥ कर्तास्वतन्त्र एव स्यात्सगुणत्वे विरुध्यतइति उपादानादिगोचरेत्यादिकर्तृत्वमपि नयन्नते वाक्यवचनम् । सहकारितया स्वीक्रियमाणयोः कालकर्मणोरधिष्ठाने भ्रमकल्पितस्येनाभ्रां भगवज्ज्ञानागोचरत्वा-लक्षणेउपादानादीत्यादिपदेन सहकारिणोप्यरहस्यसंप्राप्त्यर्थात् मायावृत्तिनिर्देशात्मकत्वे-न तदेकनिष्ठयोश्चिकीर्षाकरणयोरपि निर्निर्देशे मध्यस्थभावाच्च । सहकारिस्वीकारे स्वाभी-ष्टाभिन्ननिमित्तोपादानस्वरूपकारणतायाश्च ॥ अनीश्वरत्वनिवारणाय तादृशकारणतासमर्थ-नायच सहकारिणोपीश्वरजन्यत्वे तदिच्छयासहकारित्वे तदभिन्नत्वे च स्वीक्रियमाणे वैय-र्थ्यनैर्घृण्ये इच्छायाः प्रथमतरकारणत्वंच वेतालालंबनन्यायेन भूयः प्राप्नुवंति ॥

कर्ताशास्त्रार्थवत्त्वादित्यधिकरणस्थसूत्राणां तद्विषयवाक्यानां च न स्वतन्त्रस्याकर्तृत्वे चाऽस्वतन्त्रस्य कर्तृत्वमितिविचारे तात्पर्यम् ॥ किन्तु प्रकृतेः क्रियमाणानि गुणैःकर्माणि सर्वशः ॥ अहंकारविमूढात्मा कर्ताहमितिमन्यत इति वाक्यात्प्रकृतकर्तृत्वं जीवस्य न वेति सन्देहे जीव एव कर्ता ॥ कुतः ॥ शास्त्रार्थवत्त्वात् ॥ शास्त्रस्य अर्थवत्त्वं शास्त्रार्थवत्त्वं तस्माच्छास्त्रस्य फलवत्त्वादिति यावत् ॥ "कारीर्यावृष्टिकामोयजेत ॥ ज्योतिष्टोमेन स्वर्गकामो यजेत" इत्यादिभिर्वेदैरभ्युदयनिःश्रेयसफलार्थं सर्वाणि कर्माणि विहितानि । यदि जीवः कर्ता नेष्यते तदा स्वर्गकामादिपदानि फलाधिकारिशून्यानि कुप्यन्ति तत्तच्छास्त्रवैयर्थ्यमेवापादयेयुः ॥ नहि तादृशकामवत्त्वं ब्रह्मणः संभवति ॥ तस्याप्तकामत्वेन तत्फलानुपयोगात् जडस्यच कामासंभवादतः सन्दिग्धे कर्तृत्वे बहूनामनुग्रहस्य न्याय्यत्वात्तत्तत्फलकामिनां जीवानामेव कर्तृत्वमित्यर्थः ॥ तस्मात्स्वातन्त्र्यविवक्षामतएवेत्यादिना परामृश्य कर्ताशास्त्रार्थवत्त्वादित्यधिकरणस्थानि बहूनि वाक्यानि सङ्गतानीत्यादि यदंस्तदधिकरणस्थसंशयपूर्वपक्षाद्यनभिज्ञोनुपादेयवचनएव ॥ इच्छासहकारित्वेन कर्तृत्वानुपपत्तिकथनं तु न युज्यत इच्छायाः कर्तृत्वोपपादकत्वात् ॥ यस्तु तत्रहेतूपन्यासः (ब्रह्माभेदवादिनस्ते इच्छाकर्मणोरभेदे वैलक्षण्यं येनेच्छासमवधाने स्वातन्त्र्य) मित्यादिना कृतः सोप्यविचारितरमणीयः ॥ कार्याणां कारणात्मनाऽवैलक्षण्येपि तद्रूपेण वैलक्षण्यं वर्तत एव ॥ नहि घटशरावादीनां मृदात्मनाऽभेदेपि घटत्वशरावत्वादिनापि परस्परमभेदः ॥ किञ्च त्वमतेपि खड्गकार्यं व्रणादिकं दुग्धेन कुतो न संभवति तवाप्यभेदवादित्वात् ॥ खड्गदुग्धयोश्च मायिकत्वेन पार्थिवत्वेन ब्रह्मकल्पितत्वेन चाविशेषात् नहितयोरभेदे वैलक्षण्यं वर्णयितुं शक्यम् । येन खड्गेन व्रणादिकं भवेत् दुग्धेन च न भवेत् ॥ तद्रूपेण वैलक्षण्यं चेदत्रापि तत्कथं न स्यात् ॥

सहस्राक्षे *अतएव कर्ताशास्त्रार्थवत्वादित्यादिश्लोकटीकोक्तंप्रत्युक्तमित्यंतं भागंदूषयति ॥ कर्ताशास्त्रार्थवत्वादित्यधिकरणस्येत्यादिना अत्रापि तत्कथंनस्यादित्यंतेन ॥ अभ्युदयेति ॥ पृथ्व्याद्यैहिकमभ्युदयः कारीर्यादिफलम् ॥ स्वर्गपदवाच्यात्मसुखादि निःश्रेयसम् ॥ अथवास्वर्गादिरप्यामुष्मिकोऽभ्युदयःसकामानाम् ॥ निष्कामानां तु तान्येव कर्माणि मोक्षफलकानि ॥ कुर्व्यंतीति ॥ इदंशब्नन्तम् ॥ अत्रायं भावः ॥ यस्तुतस्वीश्वरगतमेव कर्तृत्वं विस्फुलिंगवत्तदंशेऽतिरोहितचित्कतया ज्ञानेच्छाकृतियोग्ये जीवेप्यनुवर्तते पृथ्वीनिष्ठोगंधइव पार्थिवेषु ॥ एवं सत्यपि जडस्य प्रकृतिबुद्ध्यादेरेव कर्तृत्वं नतु ब्रह्मांशस्यापि जीवस्येति तारकानिव भ्रांतान्सांख्यान्प्युदसितुं परमाचार्यो जीवस्यैव विद्यादिबोधितकर्मकर्तृत्वं (अ. २ पा. ३ सू. ३३) "कर्ताशास्त्रार्थवत्वा" दित्यधिकरणेन निर्णीतवान् ॥ लौकिकनिखिलवस्तुजातापेक्षया जीवस्यैव स्वतंत्रत्वाद्बुद्ध्यादेश्चपरतंत्रत्वादेवमेव युक्तमिति तदाशयः ॥ जीवस्य स्वतंत्रत्वं तु हस्तदंडादिव्यापारस्य तदिच्छाप्रयत्नसाध्यत्वदर्शनात्स्फुटमेव ॥ अनंतरं जीवस्यापि स्वतएव कर्तृत्वमीशप्रेरणयावेतिसंशये स्वतएवेतिपूर्वपक्षे अ० २ पा० ३ सू० ४१ "परात्तुतच्छ्रुते" रित्यधिकरणं तत्प्रेरणयैवेतिसिद्धांतयति ॥ एवं भगवत्प्रयोज्यत्वेपीतरापेक्षया स्वातंत्र्यात्तदुक्तकर्तृत्वस्यैवात्रानुवर्तनाच्च नप्रकृते कर्ताशास्त्रार्थेत्यधिकरणविरोधगंधोपि ॥ नहिपृथिव्याएव वास्तुप्रगंधवत्वमिति तदंशपुष्पादेर्गंधवत्वमसंगतं भवति ॥ नचैवमीश्वरे सातिशयं स्वातंत्र्यं शक्योक्तिकम् ॥ ईश्वरांतराभावात्, अभिन्ननिमित्तोपादानवादभंगाच्चेति किं चर्वितचर्वणेन ॥ तस्मात्कर्मणां कार्यविशेषे सहकारित्वमपि तदेच्छयैव । अतोनेच्छायास्तज्जन्यत्वं नापि वैषम्यादिनिस्तारः ॥ इच्छायास्तु साक्षाद्ब्रह्मधर्मत्वात् तद्धर्माणां तदभिन्नतायाः प्रकाशाश्रयाद्यधिकरणसिद्धत्वात् इच्छारूपेण तदाकाररूपेण चाविर्भवनेपीतरनिरपेक्षतया स्वातंत्र्यानपायाच्च तत्सहकारे न दोषः ॥ पापपुण्यकर्मापूर्वाणितु नसाक्षाद्ब्रह्मधर्माः । "नतस्य कार्यं करणं च विद्यते । अनश्नन्न्यो अभिचाकशीति । नसाधुना कर्मणा भूयान्भवति नोएवासाधुनाकनीयान्" इति श्वेताश्वतरमुंडककौषीतकिब्राह्मणादिषु श्रवणात् । अनादित्वान्निर्गुणत्वात्परमात्मायमव्ययः । शरीरस्थोपि कौंतेय न करोति

---

* अतएव कर्ता शास्त्रार्थवत्त्वादित्यधिकरणस्थानि जीवस्य कर्तृत्वप्रतिपादकानि बहूनि सूत्राणि तेषां विषयवाक्यानि च संगतानि ॥ अन्यथा सापेक्षतरस्य जीवस्य सुतरांकर्तृत्वाऽभावे तानि न संगच्छेरन् ॥ अन्यथा च त्वमन्तेऽपीच्छायाः सहकारित्वेनेश्वरस्य कर्तृत्वं नोपपद्येत ॥ नह्यभेदवादिनस्ते इच्छाकर्मणोरभेदे वैलक्षण्यं वर्णयितुं शक्यं येनेच्छासमवधानेनास्वतन्त्रता कर्मसमवधाने त्वस्वतन्त्रता स्यात् ॥ एतेन यत्र कर्मानुसारेण फलदातृत्वमुक्तं तत्राऽपि कर्मकारयितृत्वमीश्वरस्यैव ॥ तथा चाह श्रुतिः ॥ एषह्येवसाधुकर्म कारयति तमित्याद्या ॥ एतदनुरोधेन साधुकर्मकारी साधुर्भवतीति श्रुतावपि भगवत्प्रेरणया साधुकर्मकर्तृत्वं बोध्यमिति वैषम्यनैर्घृण्ये इति श्लोकटीकोक्तं प्रत्युक्तम् ॥

नलिप्यते इत्यादि स्मरणाच्च ॥ अत एव सूत्रकृता "अ० १ पा० २ सू० ८" "संभोगप्राप्तिरितिचेन्नवैशेष्या"दिति जीववत्फलसाधने निषिद्धे । सम्यगभिनिवेशेनभोगः संभोगः सम्यग्भोगो यस्मात् सोपि संभोगस्तयोः प्राप्तिरिति व्याख्यानात् । किंतु तानि जीवनिष्ठान्येव । "तयोरन्यःपिप्पलंस्वाद्वत्ती" त्यादिश्रुतिभ्यः ॥ किंच जीवेष्वपि तत्साक्षात्कारवतां नैष्कर्म्यं "एतँ ह वावनतपति किमहँ साधुनाकरवं किमहंपापमकरवमिति । यथा पुष्करपलाशआपोनश्लिष्यंत एवमेवंविदिपापंकर्म नश्लिष्यते" इत्यानंदवल्ल्युपकोसलविद्यादिषु श्रूयते ॥ बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते (स्कंध २ अ० १ श्लो० ७) प्रायेणमुनयोराजन्निवृत्ताविधिषेधत इतिगीताभागवतादिषु स्मर्यंतेच ॥ तर्हि परमात्मनस्तथात्वं कैमुतिकसिद्धम् ॥ एवमिच्छाकर्मापूर्वाणां साक्षाद्ब्रह्मधर्मत्वजीवधर्मत्वादिना वैलक्षण्यात् कर्मापूर्वाणां नेच्छावत्प्रकाशाश्रयादिन्यायेनाभेदोनित्यत्वं वा शक्यं वक्तुमतस्त्वद्रीत्या जीवेच्छाप्रयत्नमात्रजन्यकर्मसहकारे पारतंत्र्यं स्फुटमेव ॥ नच तद्वारणायेच्छा तदाकारवत्कर्मरूपेणापि स्वयमेव भवनमिति तव सुवचम् । तथा सति कस्यचित्पापरूपेण भूत्वा तस्मै दुःखं कस्यचित्सुकृतरूपेण भूत्वा तस्मै सुखं चार्पयति तस्मिन्वैषम्यादेरनुच्छेदात् ॥ तस्मादिच्छापक्षएव न पारतंत्र्यम् । लोकेपि यथेच्छं कार्यं कुर्वन्स्वतन्त्रएवोच्यते । अहिफेनादिनेतरेणोद्बोध्यशक्तिरसहकारिसमवधानमंतरेणाशक्यकार्यस्तु परतंत्रः ॥ एतावता अतएव कर्ताशास्त्रार्थवत्वादित्यादि स्वतंत्रता स्यादित्यंतं व्युदस्तम् ॥ एतेनैव यन्मार्तंडटीकायां यत्रतु कर्मानुसारेणफलभोक्तृत्वमित्यादि कर्तृत्वं बोध्यमित्यंतमुक्तमिह किंचित्पाठविपर्यासेनानूदितं तत्समर्थितं ज्ञेयम् । कर्मणां फलहेतुताया ईश्वरमात्रस्य सर्वहेतुतायास्तस्यैव कर्मकारयितृतायाश्च बोधिकानां श्रुतीनामेवमेव सामंजस्येनैकवाक्यत्वसिद्धेः ॥ स्मृतावपि बुद्धिर्ज्ञानमसंमोहः क्षमा सत्यं दमः शमः । सुखं दुःखं भवो भावो भयं चाभयमेव च ॥ अहिंसासमतातुष्टिस्तपोदानंयशोयशः । भवंति भावाभूतानांमत्त एवपृथग्विधाः ॥ इति क्षमासत्यादीनां साधनानां सुखादीनां फलानां च स्वमात्रहेतुकत्वमुच्यते ॥ अतएव सूत्रकारोपि कर्मकारणतावादं (अ० ३ पा० २ सू० ४०) "धर्मं जैमिनिरतएवे"ति सूत्रेणानूद्य निराकरोति (सू० ४१) "पूर्वंतु बादरायणो हेतुव्यपदेशा" दिति ॥ बादरायण आचार्यस्तु पूर्वं पूर्वोक्तमीश्वरमेव कारणं मन्यते । तुशब्दः कर्मादेः कारणताव्यावर्तकः ॥ कुतः ॥ हेतुव्यपदेशात् श्रुतिषु एष उ एवेत्यादौ तस्यैव सर्वहेतुत्वेन कथनादित्यर्थः ॥

किञ्च भवमन्ते वैषम्यनैर्घृण्यरूपं दोषद्वयं दुरुद्धरं कस्यचित्सुखं कस्यचिद्दुःखं च ददतः स्वयमेव तद्धेतुभूतकर्म कारयतः कुतो न स्यात् ॥ अस्मन्मते च तादृशदूषणद्वयं न संभवति ॥ तथाहि ब्रह्म स्वयंरमणेच्छयैवोच्चनीचादिभावेन जातम् ॥ "तदात्मानं स्वयमकुरुत । सच्चत्यच्चाभवत् । यथोर्णनाभिः सृजते गृह्णते च यथा पृथिव्यामोषधयःसंभवंति । यथा सतः पुरुषात्केशलोमानि तथाक्ष-

रात्संभवतीह विश्वमि" त्यादिश्रुतेः ॥ अतः स्वाभिन्नत्वान्नवैषम्यनैर्घृण्ये ॥ नन्वेवमपि जीवानां ब्रह्माभिन्नानां सुखं दुःखं चेश्वरेच्छयैव भवतीति भवन्मते तत्र च कर्मणां वैयर्थ्यं स्यात् । तत्प्रवृत्तिरपि कस्यचिन्न स्यात् कृतहानिरकृताभ्यागमरूपदूषणद्वयमपि स्यादिति चेन्न ॥ कर्मापेक्षोहि भगवान्सुखं दुःखं च जीवानां तत्तत्कृतसुकृतदुष्कृतानुसारेणैव ददातीत्यतोनकृतहान्यादिरूपं दूषणम् ॥ नच "एषह्येवसाधुकर्मकारयति तंयमेभ्योलोकेभ्य उन्निनीषते एषउएवाऽसाधुकर्म कारयति तंयमधोनिनीषते" इति श्रुत्याकर्मापि सएव कारयतीत्यङ्गीकरणीयम् । तथाच वैषम्यनैर्घृण्यरूपदोषतादवस्थ्यमितिवाच्यम् ॥ सृष्ट्यादौ भगवान् रमणेच्छया "बहुस्यांप्रजायेये" त्यादिरूपया क्रीडार्थमेव कृतप्रयत्नस्तत्साधनीभूता अनेकमर्यादाः कृतवान् य एवं कर्मकरिष्यति तस्यैवं फलं भविष्यति तत्तद्विषये तस्य रागद्वेषादिकं भविष्यति पुनस्तत्तत्कर्म करिष्यति पुनस्तस्य सुखं दुःखं वा भविष्यतीति ॥ तत्र कर्मणि सुखे दुःखे च साधारणतयैव भगवतो हेतुत्वं नत्वसाधारणतया ॥ तत्र मुख्याक्रीडैवान्यत्सर्वमुपसर्जनम् ॥ यथालोके कश्चिद्राजा क्रीडार्थं स्वयमेव नियमान्कृत्वा क्रीडति तत्र स्वकृतनियमानुसारेणैव यो यथा करोति तस्मै तथैव सुखदुःखरूपं फलं ददाति न तावता तस्य वैषम्यं नैर्घृण्यं वा भवति नाप्यनीशत्वम् । तथा प्रकृतेपि तादृशनियमाभावेतु दोषो दुर्वारएव ॥ अतएव "कृतप्रयत्नापेक्षस्तुविहितप्रतिषिद्धावैयर्थ्यादिभ्य" इति सूत्रेण वैषम्यनैर्घृण्ययोः परिहारोऽनयैव रीत्या व्यासैः कृतः ॥ तत्र ननु वैषम्यनैर्घृण्ययोर्नपरिहारः अनादित्वेन स्वस्यैव कारयितृत्वादिति पूर्वपक्षं तुशब्दो निवारयति ॥ जीवकृतप्रयत्नापेक्षोभगवान्सुखंदुःखं चददाति ॥ प्रयत्नपर्यन्तं जीवकृत्यं अग्रे तस्याशक्यत्वात्स्वयमेव कारयति ॥ यथा पुत्रं यतमानं बालं पिता पदार्थगुणदोषौ वर्णयन्नपि तत्प्रयत्नाभिनिवेशं दृष्ट्वा तथैव कारयति । तत्कथमवगम्यते ॥ यतस्तैत्तिरीये "अथातोनुप्रश्ना" इत्यादिना अविदुषोविदुषश्च समानेव ब्रह्मप्राप्तिरुतकश्चिद्विशेष इति प्रश्ने उत्तरत्वेन "सोकामयते"त्यादिना स्वस्यैवबहुभवनेनोच्चनीचरूपेण स्वसृष्टिमुक्त्वा तत्रानुप्रवेशेन स्वस्यैव "सच्चत्यच्चाभव" दित्यादिना अनेकविधं द्वैधीभावं चोक्त्वा सत्यमभवदिति समाप्तौ ब्रह्मरूपत्वं निगमयामास ॥ तथासति सर्वस्य ब्रह्मरूपत्वेऽविशिष्टेपि मध्ये "सतपोतप्यते" त्यादिना तपोरूपस्यालोचनस्यापि सृष्टौ कारणत्वेन कथनाद्यथाधिकारं तत्तत्फलं तत्त-

दधिकारश्च नानाविधस्तत्रकारणं तस्यापि कारणं नानाविधः स्वभाव इति फलति ॥ एवंसत्यालोचनानुसारेण प्रयत्नपर्यन्तं जीवकृत्यं तदपेक्षः मध्ये बाह्यकृताद्युपकरणबाहुल्यमपेक्षितम् । तच्च जीवेन केवलेन संपादयितुमशक्यमतस्तत्संपादनद्वारा स्वयमेव कारयति ॥ तत्र दृष्टान्तोपि यथा बालं पुत्रमित्यादिः पूर्वमुक्तएव ॥ एवं च कार्यमात्रं प्रति भगवानेव कारणम् ॥ तथाच प्रयत्नोत्तरकाले फलदातृत्वाभिव्यापिका या इच्छा आलोचनाकारान्तःपातिनी तामेव श्रुतिरनुवदति "उन्निनीषत्यधोनिनीषती"ति ॥ अतोगुणदोषकथनपूर्वकं बालेच्छानुरूपेण सामग्रीसंपादके पितरि यथा न दोषः किंतु बालस्वभाव एव । तथा ब्रह्मण्यपि न दोषः किंतु जीव एव ॥ ननूक्तदृष्टांतन्यायेनैव कारयतीत्यत्र किं गमकमत आह सूत्रकृत् विहितप्रतिषिद्धावैयर्थ्यादिभ्य इति ॥ यद्युक्तन्यायं विहाय केवलं जीवकृतकर्मापेक्षः कारयतीत्येवाङ्गीक्रियेत तदा विहितप्रतिषिद्धयोर्यागादिब्राह्मणहननादिरूपयोः कर्मणोर्वैयर्थ्यं स्यात् । पूर्वकर्मण एव प्राधान्ये तत एव सुखादिसिद्धेः ॥ सूत्रस्थादिपदादिदं विहितमिदं निषिद्धमिति बोधकस्य प्रमाणव्यवहारस्य वैयर्थ्यं बोध्यम् ॥ अतोविहितप्रतिषिद्धावैयर्थ्यप्रमाणव्यापारावैयर्थ्यप्रामाणिकप्रेक्षावत्कृतप्रमाणानुसरणेभ्यो हेतुभ्य इदं ज्ञायते यत्फलदाने कर्मापेक्षः कर्मकारणे प्रयत्नापेक्षः प्रयत्ने कामापेक्ष इति मर्यादा या स्वयंकृता तद्रक्षार्थं वेदं चकार यथा लोके राज्यमर्यादारक्षार्थं नीतिशास्त्रम् ॥ तस्मा"ल्लोकवत्तु लीलाकैवल्य"मिति न्यायेन जीवकृतप्रयत्नानुसरणाच्च ब्रह्मणि वैषम्यादिगन्धोपि ॥ नाप्यनीश्वरत्वं । मर्यादामार्गस्य तादृशापेक्षावैशिष्ट्यपूर्वकत्वेन स्वयमेव निर्माणात् ॥ कचिच्च स्वतन्त्रत्वान्मर्यादां भिनत्त्यपि ॥ अत एव तेनाधीतश्रुतिगणा इत्यादिवाक्यैस्तदनपेक्ष्यैव गोकुलस्थेभ्यः फलदानकथनमपि सङ्गच्छते ॥ इदमपि लोकवत्तु लीलाकैवल्यमिति न्यायादेव समाहितं । लोके राज्ञामपि कृपापात्रेषु तथादर्शनात् ॥ लोकयुक्त्यनुसारेण समाधानमिदम् ॥ वस्तुतस्तु ब्रह्मणः कर्मापेक्षत्वेपि नास्वातन्त्र्यम् ॥ किन्त्वलौकिकत्वसंपादकतया भूषणमेव ॥ यतोविरुद्धधर्माश्रयं सर्ववादानवसरं समाभ्यधिकरहितं ब्रह्मवेदे प्रतिपाद्यते औपनिषदं हि ब्रह्म नतु युक्तिसिद्धम् ॥ येन युक्तिविरोधः स्यादत एवोक्तं 'यत्किञ्चिद्दूषणंत्वत्र दूष्यंचापि हरिः स्वयम् ॥ विरुद्धपक्षाः सर्वेपि सर्वमत्रैव शोभत इति ॥ एतेन सहकारिसमवधानेत्यारभ्य तथावक्ष्यत इत्यन्तं समाहितं यत्तु तत्रैवोक्तं

(किमिमे जीवास्ततोऽभिन्ना अपि दुःखं जानन्ति नवाद्ये दोषानपायोदुःखानिरासात् ॥ अन्त्ये नुभयविरोधः ॥ किञ्चात्मनि दुःखोत्पादक आत्महादिरिवेश्वरो निन्द्येतप्रेक्षावद्भिरितितच्च समीचीनम् ॥ "इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्ति"रितिसूत्रेणेममेव पूर्वपक्षं कृत्वा "अधिकंतु भेदनिर्देशात्" इति सूत्रेण स्वयमेव व्यासैः समाहितत्वात् ॥ तत्र तत्सृष्ट्वेति श्रुतौ स्रष्टावनुप्रवेशः श्रुतः सचानेनेति श्रुत्या जीवेनेति श्राव्यते तस्यात्मत्वेन कार्यविलक्षणतया ब्रह्मत्वं च बोध्यतेऽत इतरस्यात्मत्वेन व्यपदेशात्सिद्धे तस्य शुद्धब्रह्मत्वे तद्धितं कर्तव्यम् । तच्च सर्वानर्थदुःखनिकरहेतुभूतायां सृष्टौ प्रवेशनाम्न करोतीति हिताकरणस्याहितकरणस्य च प्रसक्तिः ॥ लोकविरुद्धं चात्मनोहिताकरणमिति जीवानां ब्रह्माभेदोनयुक्त इति पूर्वपक्षे समाधानमाह "अधिकं तु भेदनिर्देशात्" इति सूत्रेण तत्र तुशब्दः पूर्वपक्षं व्यावर्तयति ॥ तथा च यथैक्यं श्रुत्या बोध्यते तथा ज्ञेयत्वेनानन्दरूपत्वेन च भेदोपि बोध्यतेऽयं भेदोब्रह्मण आधिक्ये पर्यवस्यत्याधिक्यं चांशित्वात् ॥ पूर्णत्वाच्च पूर्णश्चांशस्य हितमेव नियमेन करोतीति न नियमः स्वदेहेपि नखनिकृन्तनकेशप्रसाधनादेर्दर्शनात् ॥ अन्यथा सर्वेन्द्रियव्यापाराभावप्रसङ्गात् । किन्तु स्वलीलया हितमहितं वा यथेष्टं करोतीत्येव लोके दृश्यते ॥ तथाचेयमाशङ्कैव न संभवति ॥ यच्चोक्तं जीवदुःखेन ब्रह्मणोदुःखित्वं स्यात्तदपि न संभवति ॥ कार्यकारणयोरभेदेपि कार्यकारणव्यवहारजनकः कश्चिद्भेदोप्यभ्युपगन्तव्यः अन्यथेदं कार्यमिदं कारणमिति व्यवहारो नस्यात् ॥ एवं च नामरूपाभिव्यक्तिदशायां कार्यगता धर्माः कारणेन सन्तीत्यङ्गीकरणीयम् ॥ यथा घटगता जलाहरणादयः पटगता आच्छादकत्वादयस्ते मृत्पिण्डादौ न सन्त्येवं जीवस्य चिद्रूपत्वेन ब्रह्माभिन्नत्वेपि तद्गता दुःखादयो न ब्रह्मणीति नकोपि दोष इत्यलं विस्तरेण ।

सहस्राक्षे *सहकारिसमवधानरूपेत्यादिं तथावक्ष्यतद्ग्रसंतं भागं निराकुर्वन्ति ॥ किंच भवन्मत इत्यादिना इत्यलं विस्तरेणेत्यंतेन ॥ तत्र "वैषम्यं नैर्घृण्यमिति दूषणे

* सहकारिसमवधानरहितत्वरूपस्वतन्त्रत्वस्वरूपकर्तृत्वस्येश्वरेसत्त्वे प्रमाणाभावात् ॥ परमेश्वरस्येच्छया साधुकर्म ततउन्नयनमित्यर्थस्य तस्याः श्रुत्याः प्रतीत्या इच्छाया सर्वत्र हेतुत्वेन कर्म प्रत्यपि हेतुत्वेऽप्यनन्यथासिद्धनियतपूर्ववर्तिनः कर्मणः फलहेतुताया दुर्वारत्वाच्च ॥ ईश्वरस्येच्छाद्वारा तदिच्छाया वा वृष्टिन्यायेन हेतुत्वमित्यन्यत्रविस्तर. ॥ एवमेव पराभुतच्छुवे-

द्वेपरे स्थिते" इतिमार्तंडकारिकाद्वयसमर्थनार्थं किंचेत्यादि कुतो नस्यादित्यंतम् ॥ स्वमते तद्दूषणोद्धाराय अस्मन्मतेचेत्यादिग्रंथः ॥ अत्रेदं ज्ञेयम् ॥ यत्तु सहकारिसमवधानेत्यादि बोद्धव्यमित्यंत तदमूलम् ॥ ईश्वरस्य तादृशकर्तृत्वे "तदात्मान९स्वयमकुरुते" त्यादि प्रमाणानां जागरूकत्वात् । अत्रात्मानमिति तस्यैवोपादानत्व अकुरुतेति तस्यैव कर्तृत्व स्वयमिति सहकारिकारणांतराभावश्च बोध्यते । (अ० १ पा० ४ सू० २६) स्पष्टंचेदं "मात्मकृते परिणामा"दिति सूत्रे शांकरभाष्येपि ॥ अकुरुतेत्यात्मनेपदेन क्रीडार्थमात्मन इति स्मृत्यनुसारात् स्वक्रीडार्थमेव जगत्करणस्य बोधनेन

रितिसूत्र परादीश्वराज्जीवस्य कर्तृत्वमित्यर्थक लब्धव्यवस्य बोद्धव्यम् ॥ एतेन वैषम्यनैर्घृण्ये इति दूषणेद्वेपरेरिथते ॥ अनादिकर्मचाश्रित्य समाधानेत्वनीशता ॥ अत्राऽपि शाङ्करा शैवामाध्वारामानुजादय ॥ निम्बार्कभास्कराभिमुर्येऽन्येवेदोषसंश्रिता इति प्रत्युक्तम् ॥ तट्टीकायां दोषशब्देन याऽनीश्वरत्वापत्तिरुक्ता तस्या उद्धृतत्वात् ॥ यत्तु तत्रवैषम्यनैर्घृण्यपरिहारार्थं आत्मसृष्टेर्नवैषम्य नैर्घृण्य चाऽपि विद्यते ॥ श्रीमदाचार्यचरणैर्निबन्धइदमीरितम् ॥ श्रीमत्प्रभुवरैर्विद्वन्मण्डनेपि निरूपितम् ॥ रमणार्थमिदविश्वमुच्चनीचादिभावत ॥ आत्मरूपचकारातो हरिर्यस्माददूषणमित्युक्त तन्न युक्तम् ॥ तट्टीकायामात्मसृष्टेरित्येतत्तात्पर्यविषयाऽभेदमात्रस्यैव तादृग्दोषाऽभावे हेतुत्वोक्त्यातावतादोषाऽनुद्धारात् ॥ तथाहि ॥ किमिमे जीवास्ततोऽभिन्ना अपितु स्वजानतिनवा ॥ आद्ये दोषानपायोदु स्वानिरासात् ॥ अन्त्येऽनुभवविरोध ॥ किञ्चात्मनि तु स्वोत्पादकआत्महादिरिवैश्वरोनिन्द्येतप्रेक्षावद्भि ॥ एतेन भैक्षवमतमुपन्यस्य तन्मायावादिविध्वसध्वस्तप्रायमित्यस्य टीकायां भेदवादे वैषम्यादिदोषाभिधानमपि प्रत्युक्तम् ॥ अभेदवादेप्यनिरस्तत्वात् ॥ यच्च तट्टीकाकारेण विद्वन्मण्डनोक्त किञ्चिदनूदितम् ॥ कृतप्रयत्नापेक्षस्तुविहितप्रतिषिद्धावैयर्थ्यादिभ्य प्रपञ्चेनरमणेच्छयाहिभगवान् क्रीडार्थं कृतविविधमर्यादादिरूपप्रयत्नोजन्मकालादारभ्य मोक्षपर्यन्त विचारितवान् । तन्नहि क्रीडैवमुख्याऽन्यत्सर्वमुपसर्जनीभूत तथाच तदपेक्षोभगवांस्तदनुसारेणैव कारयति यतोविहितस्य यागादे प्रतिषिद्धस्य विप्रहननादेरवैयर्थ्यमेव भवेत् ॥ मर्यादाऽभावेतु ईश्वरस्यैव स्वर्गनरकादिदातृत्वेन विधिनिषेधवैयर्थ्यं भवेदिति ॥ तच्च न सम्यक् ॥ एतादृशसत्यसंकल्पपरमेश्वरसंकल्पस्य तु स्वादिप्रयोजकत्वेन परमेश्वरे वैषम्यादेर्दुष्परिहरत्वात् ॥ किञ्च तवैव तत्सूत्रविरोध ॥ सापेक्षतायाः सूत्रात्स्पष्टप्रतीते ॥ स्वनिर्मितजीवकर्मणामिव स्वनिर्मितविचारादेरपेक्षायामपिसापेक्षत्वानपायात् ॥ सूत्रार्थस्तु जीवकृतप्रयत्नापेक्ष इत्यादि न्यायानुरोधात् नतुविचारितमर्यादापेक्षइत्यादि मानाऽभावात् ॥ किञ्चतथा सति स्वविचारापेक्षइतिवामर्यादापेक्ष इतिवास्पष्टंब्रूयात् ॥ एववैषम्यनैर्घृण्ये न सापेक्षत्वात् पत्युरसामञ्जस्यादितिसूत्रद्वयविरोधोऽपि तन्मतेबोध्य ॥ प्रपञ्चितश्चायमर्थस्तत्रतत्र भगवत्पादैरिति नानाधिकप्रयत्यते ॥ तादृशकर्मणामिच्छा प्रति हेतुत्व तु ज्ञानद्वारा तदैक्षतेत्यादिश्रुत्या ज्ञानस्याऽपिहेतुत्वात्, लोकेऽपिकर्मणातैर्जाततोषादिकस्य भूपादेर्ज्ञानद्वारैवेच्छा प्रति हेतुत्वदर्शनाच्च ॥ क्रीडार्थं यथासृष्टिरनुपपन्ना तथावक्ष्यते ॥ ८ ॥

प्रयोज्यकर्तृत्वमपि प्रतिविधीयते। तथा सदेवसोम्येत्यत्राद्वितीयपदेन सहकारिकारण-निराकरणमुपनिषद्भाष्ये शंकराचार्यैर्दर्शितम् ॥ अतएव "एषह्येवसाधुकर्मकारयति "मत्तएव पृथग्विधा" इत्यादि श्रुतिस्मृतिष्वेवकारेण भगवद्व्यतिरिक्तस्य हेतुत्वं व्यवच्छिद्यते ॥ वेदविरुद्धबाह्याबाह्यस्मृतिनिराकरणपादे चोभयकारणवादो निरस्तः ॥ भगवान्स्वेच्छया तत्तत्साधनद्वारा तत्तत्फलं ददातीति सिद्धांतयद्भिरस्माभिः कर्मणां फलहेतुता न प्रत्याख्यायतेऽतः कर्मणः फलहेतुताया दुर्वारत्वोक्तिः सिद्धसाधनम् ॥ वस्तुतस्तु नानन्यथासिद्धनियतपूर्ववर्तित्वमपि । अनुग्रहविशेषे निःसाधनेभ्यः काम-क्रोधादिविरुद्धसाधनवद्भ्यश्च फलदानस्यदर्शनात् ॥ अपाणिपिहितं चैतत् श्रीभागवत-प्रभृतिषु "अन्धाश्रुतंनिशि शयानमतिश्रमेण लोकं विकुंठमुपनेष्यति गोकुलं स । तेनाधीतश्रुतिगणाः। गोप्यः कामाद्भयात्कंसोद्वेषाच्चैद्यादयोनृपा" इत्यादौ ॥ वृष्टिन्या-येनापीच्छायाः कर्मादिहेतुत्वांगीकारे तस्याः कर्मजन्यत्वं स्वोक्तचरं परित्याज्यं तस्याः कारणांतरजन्यत्वं नित्यत्वं वा वक्तव्यम् । वैषम्यादिकं च तदवस्थम् ॥ किंच भगवतो-वृष्टिवत् कारणत्वे बीजवत्कारणांतरमपिवाच्यम्। तथा च सति सृष्टेः पूर्वं सजाती-यादिभेदशून्यब्रह्मसत्ताबोधकानां सदेवेत्यादीनां व्याकोपोऽनीश्वरत्वापातश्च ॥ यदितु "तामापऐक्षंतबह्व्यः स्याम प्रजायेमहीति ताअन्नमसृजंत तस्माद्यत्रक्वचवर्षतितदेव भूयिष्ठमन्नं भवत्यद्भ्य एवतदध्यन्नाद्यं जायत" इति छंदोगादिश्रुतिभ्यः पार्थिवत्वाज्जल-जन्यान्येव बीजानि जलादेव फलान्वितानि यथाभवंति तथा भगवद्धेतुकान्येव कर्मा-दीनि तत्तएव फलमर्पयंति कार्यवैचित्र्यंच धान्यवैचित्र्यवदिति भाष्यकारचरणाभिप्रेतं वृष्टिवत्कारणत्वं स्वीक्रियेत तदोंकुर्मः ॥ एवंसति निरपराधं "परात्तुतच्छ्रुते" रिति सूत्रमपि नान्यथा नेयम् । "नान्योतोस्तिद्रष्टानान्योतोस्तिश्रोता नान्योतोस्तिमंता। नान्योतोस्तिविज्ञाता। सविश्वकृत्सहिविश्वस्यकर्ते"त्यादिश्रुतिभ्यो ब्रह्मगतस्यैव कर्तृत्वस्य जीवे प्रतीतेर्निर्बाधत्वात् तस्यैवोन्निनीषाधोनिनीषाभ्यां साध्वसाधुकारयितृताया श्रव-णाच्च ॥ एतेन "वैषम्यं नैर्घृण्यमिति दूषणेद्वेपरेस्थिते" इति मार्तंडकारिकाद्वयं सव्याख्यं समर्थितं वेदितव्यम् ॥ विपक्षेऽनीश्वरत्वापत्तेर्बहुधोपपादितत्वात् ॥ वैषम्यं नैर्घृण्यद्वतीति-प्रथमपादपाठस्तु मूलपाठं विभाव्य इंदुदेदितिप्रगृह्यस्यापि प्रकृतिभावाभावादशुद्धिख्या-पनाय तेन स्वयं कल्पितः ॥ द्वितीयपादे परइति सप्तम्यंतं द्वितीयकारिकायां नैवार्का भास्कराभिक्षुरितिपाठेपि निंबार्काइति लेखस्तु पाठपरिवर्तनादशुद्धपुस्तकोत्पादितभ्र-माद्वा ॥ अथ कथंतर्हि सिद्धांते वैषम्यनैर्घृण्ययोः परिहारइतिचेत् अत्राहुस्तत्त्वदीपाख्य-प्रकरणे श्रीमदाचार्याः ॥ "आत्मसृष्टेर्नवैषम्यंनैर्घृण्यंचापि विद्यते" इति ॥ अयमर्थः ॥ "तदात्मानꣳस्वयमकुरुत। सवैनैवरेमे। हंतविरोसानी"त्यादि श्रुतिभिः क्रीडार्थमात्मन एव तत्तद्रूपातिरोभावादुच्चनीचभावेन जगद्रूपेण करणात्सर्वस्य स्वाभिन्नतया न वैषम्य-नैर्घृण्ये । नापि पक्षपरिगृहीताभ्यदेशोषाः । लोकेसर्वस्वात्मत्वाभेददर्शी पुरुषः पुरुशर्कराकंटकाकीर्णसरणौ चरणेन चलन् करेण द्रविणमुपार्जयन् सुखेन तल्लब्धमसाद्य-

सुखमुंजानो नहि हस्तपादे द्वेष्यवयवांऽतरउदासीनो मुखे स्निग्धोविषमोर्थनिर्घृणोवामिति व्यपदिश्यते। एवं भगवानपिमाह्मणक्षत्रियाद्युत्थानचसर्गकर्तांप्यदुष्टः। यथाच लीलया तालं वादयन् वामं पाणिमधः कृत्वोचीकृतेन दक्षिणेन तं ताडयन्नपि पुमान्नविषमो निर्घृणोवा। हस्तद्वयेपि तुल्याभेददर्शित्वात्॥ तथा विविधां प्रपंचप्रवृत्तिं प्रणयन्नस्मत्प्रभुरपि। "इदं सर्वं यदयमात्मे"त्यादिभिः सर्वात्मकत्वात्। एतदेव वासुदेवः सर्वमिति निर्दोषं हि समंब्रह्म समोहंसर्वभूतेषु नमेद्वेष्योस्तिनप्रियइत्यादिस्मृतीनाम् (स्कंध० २ अ० १) अहमेवासमेवाग्रेनान्यद्यत्सदसत्परम्। (स्कंध ११ अ० १३ श्लो० २४) मनसावचसादृष्ट्या गृह्यतेन्यैरपींद्रियैः। अहमेवनमत्तोन्यदितिबुध्यध्वमंजसा (स्कं. १० अ. ३८ श्लो. २२) नचास्यकश्चिद्दयित.सुहृत्तमोनचाप्रियोद्वेष्य उपेक्ष्यएवचेत्यादिश्रीभागवतवचसांचैकवाक्यतया पर्यालोचने फलति॥ त्वदुक्तरीत्या कर्मणा राजवच्छीतिद्वेषयोरंगीकारे त्वेतद्विरोधः स्फुट एव॥ एवं सूत्रकारोप्यात्मसृष्टेरेव वैषम्यादिपरिहारमभिप्रेत्य केवलनिमित्तत्ववादिनां सांख्ययोगैकदेशिनैयायिकवैशेषिकपाशुपतकापालिककालामुखशैवादीनां मते ईश्वरस्य वैषम्यादिप्रासादसामंजस्यमाह (अ० २ पा० २ सूत्र ३७) "पत्युरसामंजस्या"-दिति॥ अत्र शंकराचार्या अपि "प्रकृतिश्च प्रतिज्ञादृष्टांतानुपरोधात् अभिध्योपदेशाच्चे"-त्यादौ श्रीबादरायणेन समर्थितं परमेश्वरस्य स्वेच्छयात्मोपादानकानेककार्यकर्तृत्वपक्षमदुष्टमुक्त्वासूत्राक्षरव्याख्याने किंपुनरसामंजस्यं हीनमध्यमोत्तमभावेनहि प्राणिभेदान् विदधत ईश्वरस्य रागद्वेषादिदोषप्रसक्तेरस्मदादिवदनीश्वरत्वं प्रसज्येत॥ प्राणिकर्मापेक्षितत्वाददोषइति चेन्न॥ कर्मेश्वरयोः प्रवर्त्यप्रवर्त्तयितृत्वे इतरेतराश्रयदोषप्रसंगात्॥ अनादित्वादितिचेन्न वर्तमानकालवदतीतेष्वपि कालेष्वितरेतराश्रयदोषाविशेषादन्धपरंपरापत्तिन्यायादित्याद्याहुः॥ तस्माच्छ्रीमदाचार्योक्तएव वैषम्यादेर्मुख्यः परिहार इति निखिलाम्नायस्मृतिन्यायपुराणेभ्योनिष्कृष्यते। एवं प्रलयमपि अनेकधा जन्मादिपरंपरया क्लिश्यमानानां जीवानां तद्विश्रमेण सुखार्थं करोति। यथेदानींत्वेक्षणदामित्यन्यत्र विस्तरात्ततोपि न नैर्घृण्यम्॥ एतावता तदुपन्यस्ता आत्मसृष्टेरित्यादिमार्तंडकारिकासार्धद्वितयीसमर्थिता॥ यत्तु तत्रेत्यादिर्दोषानुद्धारादित्यंता तदुक्तिश्च निरस्ता॥ यच्च तथाहीत्यादि अनिरस्तत्वादित्यंतमभापि तदनादरणीयम्॥ तथाहि॥ हस्तादिश्रमोपार्जितं सुखेनोपभुज्यते नवा तालवादनेऽन्यतरः करोऽन्यतरेणताड्यतेनवा॥ द्वितीये प्रत्यक्षविरोधः॥ आद्ये सोपि विषमोभिलप्यतां सुखेन भुंजानानां शर्करादौ चरणाभ्यां चरतां च किंच नवैषम्यप्रायश्चित्तमपि स्वयैव नवेरम्। किंच जीवाहि आविद्यकाद्देहाद्यहंतागेहादिममतालक्षणसंसारादेव स्वस्मिन्दुःखसबंधं प्रतियंति "समानेवृक्षेपुरुषोनिविष्टोनीशयाशोचतिमुह्यमान" इति मुंडकश्रुतेः॥ अज्ञानेनावृतंज्ञानंतेनमुह्यंति जंतव इति स्मृते॥ यावद्धतोऽस्मिहंतास्मीत्यात्मानंमन्यतेऽस्वदृक्। तावत्तदभिमान्यज्ञोबाध्यबाधकतामियादिति श्रीभागवतोक्तेश्च। अतएवैकादशस्कन्धयोविंशे भिक्षुः॥ संसारचक्रपरिवर्तकस्य मनसएव स्वस्मिन्सुखदुःखित्वप्रत्यायकत्वमाह नायंजनोमेसुखदुःखहेतुरित्यादिना॥ अतएवच संपन्नज्ञानानां

योगिनां भगवद्भक्तानां न दुःखित्वप्रत्ययः "मत्वाधीरोहर्षशोकौजहाति महांतंविभुमात्मानंमत्वाधीरोनशोचति तरतिशोकमात्मवित् यस्मिन्सर्वाणिभूतान्यात्मैवाभूद्विजानतः तत्रकोमोहःकःशोकएकत्वमनुपश्यतः आत्मानंचेद्विजानीयादयमस्मीतिपूरुषः किमिच्छन्कस्यकामायशरीरमनुसंज्वरेत्" इति कठभूमविद्येशावास्यबृहदारण्यकश्रुतिभ्यः "यस्मिन्स्थितोनदुःखेनगुरुणापिविचाल्यते" इति स्मृतेःषष्ठस्कंधे "नारायणपराःसर्वेनकुतश्च न बिभ्यति। स्वर्गापवर्गनरकेष्वपितुल्यार्थदर्शिनः ॥ देहिनांदेहसंयोगाद्द्वंद्वानीश्वरलीलया। सुखंदुःखं स्मृतिर्जन्मशापोनुग्रहएवच ॥ अविवेककृतःपुंसोह्यर्थभेदइवात्मनि। गुणदोषविकल्पश्चभिदेवस्रजिवत्कृत इतिश्रीरुद्रोक्तेश्च। अतः स्वस्मिन्दुःखित्वप्रतीतेराविद्यकत्वाद्दोषः। अन्यथा अभेदवादिनस्तवापि जीवादुःखंजानंतीश्यनुभवाद्ब्रह्मणोदुःखित्वं प्रसज्येत। तथाच "आनंदरूपममृत"मित्यादिश्रुतिकोपः। नाप्यात्मदेहेचेश्वरोनियः "आदित्यश्चक्षुर्भूत्वाक्षिणीप्राविश"दित्यैतरेयश्रुतेः। सूर्यांशभूतचक्षुर्गततिमिरभ्रमरिकादेः सूर्य इव स्वांशभूतानामपि जीवानां दुःखादेः परमात्मन्यसंबंधात्। यथा कठवल्लीषु पंचमवल्ल्यां श्रूयते "सूर्योयथासर्वलोकस्यचक्षुर्नलिप्यतेचाक्षुषैर्बाह्यदोषैः ॥ एकस्तथासर्वभूतांतरात्मा नलिप्यतेलोकदुःखेनबाह्यः" समर्थितंचैतच्छ्रीबादरायणाचार्यैः (अ० २ पा० ३ सू० ४६ "प्रकाशादिवन्नैवंपर" इत्यत्र। अन्यथा जीवोब्रह्मैव केवलमिति सिद्धांतयतस्तव कर्मसापेक्षतापक्षेपि अबुद्धया पापं कृत्वा प्रायश्चित्तीयब्रह्मइव बुद्ध्या दुःखसाधनं कर्मकृत्वा दुःख्यन्साहसिकइवचाधिकं रानिंद्येत ॥ तस्मादभेदवादएव समाधिः साधीयान् ॥ अतएव षष्ठस्कंधे सप्तदशाध्याये चित्रकेतुना (श्लो० १८) संसारचक्रएतस्मिन्जंतुरज्ञानमोहितः ॥ भ्राम्यन्सुखंचदुःखंचभुंक्ते सर्वत्र सर्वदेत्यादिना स्वस्मिन्सुखदुःखानुभवस्य संसारभ्रममूलकत्वमुक्त्वा एकःसृजति भूतानिभगवानात्ममायया। एषांबंधंचमोक्षंचसुखंदुःखंचनिष्कल इति भगवत एव स्वशक्त्या सर्वकर्तृत्वमभिधाय (स्कं० ६ अ० १७ श्लो० २२) नतस्यकश्चिद्दयितःप्रतीपइतिश्लोकद्वयेन अद्वितीयस्य शक्तिविसर्गेण क्रीडतो नदोषइति ध्वनितम् ॥ तथा तत्रैव देहिनांदेहसंयोगाद्द्वंद्वानीश्वरलीलयेत्यादिना सर्वस्य क्रीडाहेतुकत्वमुक्त्वा (श्लो० ३३) नह्यस्यास्तिप्रियःकश्चिन्नाप्रियःस्वःपरोपिवा ॥ आत्मत्वात्सर्वभूतानांसर्वभूतप्रियोहरिरिति श्रीमहादेवेन स्पष्टमात्मदृष्टेरेव वैषम्यादिपरिहारोदर्शितः। तथा दशमस्कंधे (अ० ४१ मालाकारप्रसंगे श्लो० ४७) नहिवांविषमा दृष्टिःसुहृदोर्जगदात्मनोरिति जगदात्मकत्वमवैषम्ये हेतुत्वेनोक्तम् ॥ सप्तमस्कंधे (अ० ९ श्लो० २७) नैषा परावरमतिर्भवतोननुस्याज्जंतोर्यथात्मसुहृदोजगतस्तथापि ॥ एवमभेदवादेन वैषम्यादिसमाधानमन्यत्रापि बहुशोद्रष्टव्यम् ॥ तदेतत्सर्वं मनसि कृत्वाहुः ॥ अस्मन्मते तादृशदूषणद्वयं न संभवतीत्यादि ॥ तदात्मानमित्यादि वाक्यद्वयं मन्त्रवल्लीस्थं यथोर्णनाभिरिति मुंडकस्थम्। यच्च यच्च तट्टीकाकारेणेत्यादिस्पष्टंब्रूयादित्यंतं तद्गुराग्रहजल्पितम् ॥ अत्रानूदितोविद्वन्मंडनलेखस्तु प्रासावसरत्वादुत्तरभागएव व्याख्यास्यते ॥ तत्र तदुक्तानि दूषणानि खिद्वैव निराकुर्मः ॥ तत्र वैषम्यं तु परिहृतम्। सूत्रान्मर्यादासापेक्षत्वप्रतीता-

अपि तस्याः स्वकृतत्वात्पारतंत्र्यम् ॥ नहि लोकेपि मतिमान् राजादिः स्वयं कार्यं पर्यालोच्य स्वपर्यालोचनानुसारेण सर्वं कुर्वन्नस्वतंत्र उच्यते । एवमपारतंत्र्यख्यापनायैव सूत्रे कृतपदम् ॥ अन्यथा मतद्वयेपि पृनरुक्त्यर्थादेव लाभात्तद्ग्रहणमपार्थं स्यात् ॥ स्वेच्छया कर्माण्यपेक्ष्यैव फलदानमिच्छायाः सर्वहेतुत्वादपारतंत्र्यं चास्मत्संमतमेव नतु कर्मणां स्वतंत्रत्वमिच्छायाश्च तदन्यपरम् ॥ न्यायानुरोधस्त्वस्मत्कृतसूत्रार्थएव । पूर्वाधिकरणे पुरुषादिकं व्यावर्त्य जीवे निर्धारितस्य कर्तृत्वस्यैवतः पूर्वसूत्रे परहेतुकत्वकथनात् ॥ नचास्माकीनार्थे मानाभावः "सतपोतप्यते"त्यादिश्रुतीनां (स्कं. १० अ. ३३ श्लो. २८) सकथं धर्मसेतूनांकर्ताभक्ताभिरक्षिता । स्वकृतसेतुपरीप्सयेशः (अ. ५८ श्लो. ३७) इत्यादि पुराणवचसांच मानत्वात् ॥ भूतेनुशिष्टक्तांतकृतपदप्रयोगोपि सूत्रेभगवदुद्योगपरिग्रहे सुष्ठु संगच्छते ॥ तस्य सृष्ट्यारंभएव जातत्वात्प्रामोजिज्ञासुकर्मणां च सूत्रकारापेक्ष्याभावित्वात् ॥ स्वविचारापेक्षइत्याद्यसूत्रयित्वा यथाश्रुतं सूत्रणंत्वर्थांतरसंग्रहाय ॥ "स्वरितेनाधिकार" इत्यादिवत् ॥ अन्यथा जीवकृतकर्मापेक्षइति जीवकर्मापेक्षइत्येव वा स्फुटं सूत्रयेत् भांतरधर्मविशेषे प्रसिद्धात्प्रयत्नशब्दात्स्पष्टतया चेष्टारूपकर्मणां बोधानुदयात् ॥ तस्माद्यथाधिकारमुभयार्थावगमनायैव यथाश्रितपाठोभगवतः ॥ अर्थद्वयं तु भाष्ये विद्वन्मंडने च स्फुटम् । इह मूलेच संगृह्य दर्शितम् ॥ नचानेकार्थत्वं दोषः ॥ "सुमेधाअमृतोक्षित" इत्यादि श्रुतिप्वक्षितउक्षितइत्यादिच्छेदेन "जन्माद्यस्ये"त्यादिसूत्रेषु तद्गुणसंविज्ञानातद्गुणसंविज्ञानाद्याश्रयणेन च बह्वर्थसंग्रहस्य शंकराचार्यैरपि दर्शितत्वात् ॥ यच्च वैषम्यनैर्घृण्येनेत्यादि वक्ष्यतइत्युक्तं तदपेशलम् । तत्र (अ० २ पा० १ सू० ३४) "वैषम्यनैर्घृण्येन सापेक्षत्वात्तथाहि दर्शयती"ति सूत्रे कर्मसापेक्षत्वात्तत्परिहारस्तु मीमांसकदुर्दुरूढादिवादिबुद्धिमनुसृत्य पिशाच पिशाचभाषया बोधनीयइतिन्यायेनोक्तः ॥ तेनैव परिहारसंभवे तस्यैव समाधेः सूत्रकाराभिप्रेतत्वे च केवलनिमित्तवादे तदुक्तं "पत्युरसामंजस्य"मसंगतं स्यात् ॥ अदृष्टांगीकारिणां वैशेषिकप्रमुखानामपि तत्सापेक्षतयैव समाधिसंभवात् ॥ नचासामंजस्य स्वयाऽन्यथाव्याख्येयं स्वभाष्यविरोधात् । किंचेह फलार्पणे सापेक्षत्वमात्रमुच्यते न स्वेच्छायानित्यत्वं कर्महेतुत्वं फलहेतुत्वं वा प्रत्याख्यायते ॥ नापि सापेक्षतोक्तिः स्वमतेपि बाधिता स्वेच्छयातत्तत्कर्मकारयित्वा तत्तत्फलदानस्य परात्विति फलमतइत्यधिकरणद्वितये निर्णीतत्वात् ॥ अतउत्तरसर्गे फलदित्सया पूर्वकल्पाते यानि कर्माणि सकारयति तानि जीवादिसर्वैतिरोभावे ब्रह्मण्येव तिरोभवंति नच भगवतस्तल्लेपः ॥ "नसाधुना कर्मणाभूयान्भवतिनोएवाऽसाधुनाकनीया"निति कौषीतक्यादिश्रुतेः । "नमां कर्माणि लिंपंति न मे कर्मफले स्पृहे" ति स्मृते सृष्टिप्रकरणेपि नचमांतानिकर्माणि निबध्नंतिधनंजयेतिस्मरणाच्च ॥ तत्तदपूर्वादृष्टादिशब्दवाच्योलेपस्तु जीवधर्मएव । लेपाभावान्नैष्कर्म्यं भगवत । अतः "सर्वकर्मे"ति शांडिल्यविद्याश्रुत्या भगवन्निष्ठत्वादेवाविभागदशायामपि अनादित्वं द्वितीयसूत्रेभिहितम् ॥ अथ सर्गेच्छायां स्वांशाञ्जीवादीन्

स्वतश्चाविर्भाव्य धर्मसेतुंश्चाविष्कृत्य स्वेच्छया तत्तत्कर्मानुसारेण जीवेभ्यउत्तमाधमशरीरादिदानेप्यदोषउपपत्तेः श्रुतिस्मृत्यानुपूर्व्याच्चेति "उपपद्यतेचापी" तितृतीयसूत्रस्याशयः ॥ सूत्रेपि पूर्वपक्षगर्हायाम् । वस्तुतस्तु तत्कर्मप्रक्षाभिप्रं नचा भाष्ये दोषस्तद्वस्थः ॥ द्वितीये द्वैतापत्तिः पूर्वोक्तदोषश्चातउपसंहारे स्वाभिप्रेतं मुख्यसमाधिमाह (अ० २ पा० १ सू० ३७) "सर्वधर्मोपपत्तेश्चे"ति । तदनन्यत्वाद्यधिकरणैर्निरूपिते सर्वात्मके हिताकरणादिदोषरहिते क्षीरदेवादिवत्सर्वभवनसमर्थशब्दैकवेद्ये विचित्रसर्वशक्त्युपेतरि लीलाशालिनि परमात्मनि स्वेच्छया कर्मकारयितृत्वतत्फलदत्वसमत्वसघृणत्वादयः परस्परविरुद्धतया भासमानाः श्रौताः सर्वेपि धर्माउपपद्यंतएवातोनवैषम्यादिदोषगंधइत्यर्थः ॥ तथाचात्मसृष्टेर्नवैषम्यमित्येव फलितम् । तस्मादस्मन्मते वैषम्यसूत्रं नविरुद्धम् ॥ पत्युरसामंजस्यादित्यस्योपन्यासस्तु तस्यैव प्रतिकूलः ॥ भावाकभाष्यादिभाषितंतु भाष्यतत्प्रकाशरश्मिद्वितीयप्रकाशभाष्यविवरणभाष्यप्रदीपादिषु दूषितमशेषमितिकिं विशेषतः ॥ "तदैक्षत बहुस्यां प्रजायेयेती"ति श्रुतिस्तु इच्छया स्वस्यैव जडजीवादिबहुरूपेण भवनमुच्चनीचभावं च वक्ति । नतु कर्मविषयकं ज्ञानं ज्ञानद्वारा तेषामिच्छाजनकत्वं वा ॥ तस्मिन्प्रकरणे तद्गंधस्याप्यभावात् उपक्रमे सदेवेतीश्वरप्रतिपेधाच्च ॥ अथ तदत्रार्थादापादनीयमितिचेत्स्पष्टतद्ग्राहकं मानांतरमेवोदाहर यद्बलात्तदिहापादेत ॥ भूपादेरिव कर्मज्ञानद्वारेच्छाकल्पने त्वीश्वरज्ञानस्य नित्यत्वेनातीतानागतवर्तमानसर्वविषयकत्वेन चेच्छापि नित्यैव स्यात् । तथा च घट्टकुटीप्रभातम् श्रुतिपुराणसिद्धं सृष्टेः क्रीडार्थकत्वं तु तदनुपपत्तिदर्शकतावकनवमश्लोकनिरासावसरउपपादयिष्यामः ॥ मूले यत्किंचिद्दूपणंत्वत्रेति ॥ इयं कारिकाद्वितीयस्कंधनवमाध्याये अहमेवासमेवाग्रइतिश्लोकसुबोधिनीस्था एतेन "सर्वधर्मोपपत्तेश्च" इतिसूत्राशयउपन्यस्तः ॥ तत्र समीचीनमित्यादि द्वितीयस्य प्रथमेपादे तदनन्यत्वाधिकरणेन जगतो ब्रह्मानन्यत्वे साधिते जीवस्यापि तथात्वे जडाद्वैलक्षण्ये च सिद्धेआक्षेपसङ्गत्या (सू० २१ । २२) इतरव्यपदेशादितिद्विसूत्रमधिकरणं प्रवृत्तम् ॥ तत्राद्यं पूर्वपक्षसूत्रं । द्वितीयन्तु सिद्धान्तसूत्रम् । तदर्थमाहुः; तत्रेत्यादिना तैत्तिरीये "तत्सृष्ट्वातदेवानुप्राविशत्" इति ब्रह्मणोनुप्रवेशः श्रूयते सएव श्वेतकेतुविद्यायां "सेयं देवतैक्षत हन्ताऽहमिमास्तिस्रोदेवता अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणीति" इति जीवरूपेण श्राव्यते "सेयं देवतेमास्तिस्रोदेवता अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरोत्" इति च ॥ अत्र जीवेनात्मनेति जीवस्य तेजोऽबन्नलक्षणकार्यात् प्रवेशाधिकरणाद्वैलक्षण्येन शुद्धब्रह्मरूपत्वं बोध्यते ॥ परदेवतया तस्यात्मतया निरूपणात्सूत्रे इतरव्यपदेशादित्यस्य इतरस्य जीवस्य आत्मतया व्यपदेशादित्यर्थः ॥ तदाहुः ॥ इतरस्येति सर्वानर्थेति अनर्थाः कामा धर्मादयो दुःखानि तज्जन्यानि ॥ अहितकरणस्यचेति ॥ सौत्रादिपदेन परिगृहीतमेतत् ॥ हितस्य मोक्षसाधनस्याकरणसहितस्य बंधस्य च करणमिति दोषः ॥ श्रेयस्येनेति ॥ "आत्मा वा अरे द्रष्टव्यः

सोऽन्वेष्टव्यः सविजिज्ञासितव्यः । तमेवंविद्वानमृतइह भवति । तमेवविदित्वाऽतिमृत्युमेति" इत्यादिषु ज्ञातृज्ञेयभावेन जीवब्रह्मणोर्भेदव्यपदेशः ॥ "सत्यं विज्ञानमानंदं ब्रह्म । आनन्दरूपममृतं यद्विभाति । योवै भूमा तत्सुखम् । अन्योंतरआत्मानंदमयः" इत्यादिषु ब्रह्मणआनंदरूपत्वेन तिरोहितानंदाज्जीवाद्भेदव्यपदेशः ॥ अतएव "रसंँह्येवायं लब्ध्वानन्दी भवती" ति कर्मकर्तृव्यपदेशः । एव भेदव्यपदेशात् ब्रह्म अधिकं समुद्रवदंशि । जीवस्तु तरंगवदंशः ॥ अतएव आत्मत्वश्रुतावप्यहमिति सर्वकारणात्स्वांशिनः पृथङ्निर्देशः ॥ अनेन जीवेनात्मनेति भिन्नतया इदमा परामृश्यमानस्य जीवरूपस्यांशस्यतः ॥ एवच यस्मिन्काले हिताकरणं तदा ऐच्छिकभेदस्यापि सत्वात्तांशिन्युक्तदोषप्रसक्तिरितिभावः ॥ पूर्णत्वाच्चेति ॥ पूर्णमदइतिश्रुतेरितिभावः ॥ नत्वनिर्बंधनेत्यादि ॥ "यथासतः पुरुषात्केशलोमानी"त्यंशांशिभावेपि क्लेशप्रसाधको न हिताकरणादिना दूष्यते ॥ सर्वेन्द्रियेति । करचरणादीनां स्वांशत्वेपि गमनादानादिपरिश्रमेषु तत्तद्वियोजयत्नोक्तदोषास्पद भवति ॥ तथा परमात्मापि नात्मदाहादिवर्तिदुः ॥ तदपि न संभवतीत्यादि ॥ अत्रमाने "सूर्यो यथासर्वलोकस्य चक्षु. प्रकाशादिवदेवंपरः" इति श्रुतिसूत्रादिरूपं युक्तिश्च प्रागेवादर्शि ॥ कार्यकारणयोरसाधारणधर्मास्तत्तन्मात्रनिष्ठा इत्यादिवैश्वानराद्यधिकरणेषुस्फुटमित्यलम् ॥

अग्रेच (कर्मणां स्वाव्यवहितोत्तरक्षणएव फलानुकूलेश्वरेच्छाजनकत्वाभावेनोद्बुद्धानामेव तथात्वंवाच्यमित्यादिकः) स्वमतदर्शनार्थं भाष्याद्यनुक्तः स्वकपोलकल्पितः प्रलापः सोप्यसङ्गतः ॥ तत्रैवं प्रक्रिया तेन दर्शिता ॥ जीवकर्मणां फलानुकूलेश्वरेच्छां प्रति हेतुत्वं । तैरीश्वरेच्छायाजननउद्बुद्धत्वरूपधर्मस्य हेतुत्वं । तत्र चोद्बोधकस्य कालस्य तत्र सःप्रष्टव्यः ॥ तत्तत्कर्मफलं प्रति एकैवेश्वरेच्छाहेतुर्भिन्नावा ॥ नाद्यः युगपत्सर्वकर्मफलोपभोगासंभवात् ॥ तत्स्वीकारे च भाविनांमनूनामिन्द्रादीनां सृष्ट्यादावेवोत्पत्तिः स्यात् ॥ इच्छारूपकारणसत्वात् ॥ द्वितीयेतु तत्तत्फलभेदेनानंतेच्छाकल्पने गौरवम् ॥ तत्तदिच्छापियुगपत्कुतोनोत्पद्यते इत्याक्षेपे तत्तत्कर्मोद्बोधस्य तत्रापि कालस्य हेतुत्वकल्पनेकालस्यैकत्वात्पुनरप्याक्षेपानुद्धारः ॥ कालस्यानेकत्वेतेषां नित्यत्वे पुनर्दोषापत्याऽनित्यत्वे तस्योत्पादकनियामकाकांक्षायां पुनर्दोषापत्त्या स्वभावविशेषकस्य नियामकत्वांगीकारे इच्छांप्रत्येवेश्वरस्वभावस्य हेतुत्वेन श्रुतिसिद्धेनोपपत्तौ किमनयास्वकपोलकल्पितया कुसृष्ट्या ॥ किंच कर्मणां क्षणिकत्वेनादृष्टस्यच त्वयाऽस्वीकृतत्वेन कस्योद्बोधः कालेन क्रियत इति वक्तव्यम् ॥ नचादृष्टकल्पनाधादिमतेनेदं । अतएव इयं च कालतः कर्मणामुद्बोधस्य प्रक्रिया अदृष्टकल्पना-

चादिरीत्या मूले प्रोक्ता इत्युक्तमिति वाच्यम् ॥ तन्मतेप्यदृष्टस्य कुत्र कल्पना । जीवस्यपारमार्थिकेस्वरूपे व्यावहारिकेवा ॥ नाद्यः पारमार्थिकस्वरूपस्य शुद्धब्रह्मरूपत्वेन तत्रादृष्टस्वीकारे निर्धर्मकत्वहानिः ॥ नापि द्वितीयः सृष्टेःपूर्वं व्यावहारिकस्वरूपस्याभावात्तत्स्वीकारे "सदेवसोम्येदमग्रआसी"दित्यादि श्रुतिविरोधः ॥ भवन्मते सजातीयविजातीयस्वगतभेदशून्यत्वस्यैव तादृशश्रुत्या प्रतिपादितत्वात् ॥ किंचांतःकरणावच्छिन्नस्य तत्प्रतिबिंबितस्य वा व्यावहारिकजीवस्य प्रलयेऽविद्यायां लयस्वीकारेण तादृशस्वसिद्धान्तविरोधः ॥ नन्वविद्याया आविद्यकस्यजीवस्यच सत्वेपि न सदेवेत्यादिश्रुतिविरोधः ॥ कल्पितस्याधिष्ठानसत्तातिरिक्तसत्ताया अस्वीकारात् ॥ यथा शुक्तौ रजतभ्रमदशायामनिर्वचनीयस्य कल्पितरजतस्य सत्वेपि शुक्तिरेवेदमितिकथनं न विरुध्यते तथा प्रकृतेपीतिचेन्न ॥ एवंसति तादृशश्रुतावग्रइतिकथनं निरर्थकतामापद्येत ॥ सृष्टिदशायामपि सर्वस्य त्वन्मते कल्पिततया तस्याधिष्ठानसत्तातिरिक्तसत्ताया अभावेनानुपपत्त्यभावात् ॥ यदपि स्वमतेपीश्वरतोषादेः फलोपधायकत्वलक्षणमौत्कट्यं कालेन क्रियतइत्युक्तं तन्मन्दम् ॥ एतादृशमतस्य प्राभाकराचार्यप्रणीतोपनिषत्सूत्रगीतादिभाष्येष्वनिरूपितत्वात् ॥ किंचात्रेश्वरपदेन शुद्धं ब्रह्मविवक्षितं । पारिभाषिकोमायावच्छिन्नस्तत्प्रतिबिंबितोवा विवक्षितः ॥ नप्रथमः तस्मिंस्तोषरोषाद्यंगीकारस्य शुद्धत्वव्याघातकत्वात् ॥ प्रलये मायायाअपि ब्रह्मणि लयस्यांगीकृतत्वेन तद्वृत्तिरूपतोषरोषादेरप्यभावेन कस्योत्कट्यं कालेन क्रियतइति वक्तव्यम् ॥ अपिच कर्मभिरीश्वरतोषः कालेनतन्नौत्कट्यं तत्रापि प्रलयपूर्वकालोत्पन्नेच्छाया व्यवहिताया हेतुत्वमिति त्वन्मते कर्मणामेव निरपेक्षाणां व्यवहितानां सूक्ष्मरूपेण स्थितानां वा फलजनकत्वमिति मीमांसकमतापेक्षया किंलाघवं प्रत्युत गौरवमेव ॥ नचलाघवाभावेपि जडस्यचेतनं विना कार्यकरणत्वभावात्तथा कल्प्यतइति वाच्यम् ॥ निर्झरप्रसृतस्य जडस्य जलस्य धान्यवृक्षाद्याप्यायनरूपकार्यजनकत्वस्य दृष्टत्वेन तादृशकल्पनायाअप्रामाणिकत्वात् ॥ एतेन (यद्वा कर्मशब्देन तज्जन्येश्वरतोषादिकमेव गृह्यते) इत्याद्यपिप्रत्युक्तम् ॥ पूर्वोक्तरीत्याऽनुपपत्तेरभावेन लक्षणायां मानाभावात् । तादृशतोषादेरप्यसंभवाच्च ॥ वस्तुतस्तु पूर्वापरविरुद्धत्वादिदं प्रकरणमपार्थकमेव ॥ तथापि यक्षानुरूपोबलिरितिन्यायेन किंचिदुच्यते ॥ वस्तुतस्त्वित्यादिना

(कालस्य विशिष्य हेतुत्वकल्पने तादृशसहकार्यभावादेव कालान्तरे फलानतिप्रसक्तौकर्मणांनोद्बोधकापेक्षा) इत्युक्तम् तत्र कालस्य विशिष्य हेतुत्वं तत्तदुपाध्यवच्छिन्नस्यैव वक्तव्यम्॥ कालस्यैकत्वादुपाधीनां च रविपरिस्पन्दादीनां पूर्वमभावाद्विशिष्य हेतुत्वमेव न संभवति॥ कथंचिद्विशिष्य हेतुत्वसंभवेपि तेनैव सफलकार्यसंभवे किमुक्तप्रक्रियया॥ अस्मन्मतेच कालस्येश्वराभिन्नतया न प्रागुक्तदोषः॥ नापि कालमदकारित्वेन पारतन्त्र्यम्॥ मानाभावात्॥ किंच अन्याहतेच्छावत्वं स्वातन्त्र्यं व्याहतिश्चेच्छाविषयसिद्धेरभावः॥ सचेश्वरस्य नास्ति॥ इच्छानुरूपेणसकलपदार्थसिद्धिसत्त्वात्॥ अतएव लोके स्वच्छन्दचारीस्वतन्त्रइत्युच्यते॥ एतेन स्वनिर्मितविचारादेरपेक्षायामपि सापेक्षत्वं स्यादिति प्रलपितमपास्तमेवंचेत्याद्यपि॥ यच्च (सर्वस्येश्वराभिन्नत्वे कर्मणां हेतुत्वनिराकरणप्रयासवैफल्यापत्ति) रित्युक्तं तदपि स्वमतमनवलोक्यैव॥ तथाप्यद्वैतवादित्वेन सर्वस्यब्रह्माभिन्नतयाऽदृष्टादिनिराकरणप्रयासो विफलएव॥ किंच त्वन्मतेसर्वस्य मिथ्यात्वेन परमतस्वमतयोरपि मिथ्यात्वात्तत्वेनज्ञानवतस्तत्र तत्खंडनमंडनप्रयासोपि लोके हास्यकरएव॥ कालोस्मिलोकक्षयकृत्प्रवृद्धइत्यत्र स्वस्यैव महाभारतयुद्धव्याजेन लोकनाशकत्वेनकाल कलयतामहमित्यादिनाक्षणादिरूपत्वस्यापि स्वस्मिन्नुक्तत्वेन साक्षाद्वाच्यार्थस्यैव संभवे गौणार्थकल्पनायाअन्याय्यत्वात्॥ किंच सर्वात्मकत्वेन यमाद्यात्मकत्वं तव संमतं चेत्सर्वात्मकक्षणाद्यात्मकत्वस्यापि संभवात्तत्र कथं तव द्वेषः॥ एतेन कालकत्वेनैव रूपेणावतीर्णइत्याद्यपि व्याख्यातम्॥ कल्पितस्याधिष्ठानानतिरिक्तत्वेनाविरोधस्तु पूर्वमेव दूषितः॥

सहस्राक्षे *कर्मणां च स्वाव्यवहितोत्तरक्षणइत्यादिं अवधारणाविरोधादित्थंतं

---

* कर्मणाच स्वाऽव्यवहितोत्तरक्षणएव फलानुकूलेश्वरेच्छाजनकत्वाभावेनोद्बुद्धानामेवतथात्वं वाच्य॥ तदुद्बोधार्थं च कालविशेषोऽपेक्षित॥ अतएवकाल कलयतामहमिति भगवदुक्त कालस्य कलयितृत्व सगच्छते॥ यद्यपिचाऽनेनसामान्येनैव कालस्यहेतुत्वमुक्तं तथाप्यतिप्रसङ्गवारणाय विशिष्यहेतुताकल्पनीया साऽपिकर्मोद्बोधद्वारैव कर्मणामुद्बोधकापेक्षाया तस्या क्लृप्तहेतुताकेन कालेनैवोपशान्तौकारणान्तरकल्पनस्याऽयोगात्॥ इत्थंच कालत कर्मणामुद्भवस्यप्रक्रिया अदृष्टकल्पनावादिरीत्यामूलेप्रोक्ता॥ स्वमतेत्वीश्वरतोषादे फलोपधायकत्वलक्षणमौत्कट्यं कालेनक्रियते इतिबोध्यम्। यद्वा कर्मशब्देन तज्जन्येश्वरतोषादिकमेवलक्षणयागृह्यते॥ उद्बोधश्चतादृशमौत्कट्यम्॥ वस्तुतस्तु कालस्यविशिष्यहेतुत्वकल्पनेतादृशसहकार्यभावादेव कालान्तरेफलानतिप्रसक्तौ कर्मणानोद्बोधकापेक्षा॥ एवंच

भागं निरस्यंति ॥ अमेच कर्मणामेवेत्यादिना पूर्वमेव दूषित इत्यन्तेन ॥ उद्बोधकस्य कालस्येति ॥ अत्रापि हेतुत्वमिति सम्बध्यते ॥ तत्रापि कालस्येति ॥ इच्छासु हेतुस्तच्चरकर्मोद्बोधः कर्मोद्बोधे च हेतुः कालइति कल्पने इत्यर्थः ॥ तेषामिति ॥ कालभेदानाम् चस्येति ॥ अनित्यानेकस्वरूपस्य कालस्य कालभेदानां सर्वेषां प्रत्येकमुत्पादकं किञ्चिद्वक्तव्यं तस्यापि नित्यत्वमनित्यत्वं चेत्यादिविकल्पैरनिस्तारइति भावः ॥ एवं सति तादृशश्रुताविति ॥ शून्यत्वस्येति ॥ एवकारैकाद्वितीयपदैरितिभावः ॥ अत्र व्यावहारिकजीवस्वरूपंकल्पितश्चेत्तत्कल्पकः पारमार्थिकः किमुत व्यावहारिकः ॥ नाद्यः अविद्यारहितस्य शुद्धस्य कल्पकत्वस्यासम्भवात् ॥ भ्रान्तत्वे शुद्धत्वव्याघातापातात् ॥ नद्वितीयः आत्माश्रयापत्तेः ॥ नहि शुक्तौ कल्प्यमानं रजतमेव शुक्तावात्मानं कल्पयति ॥ किञ्चशुद्धस्याप्यविद्यामूलकोजीवभावः सा च जीवेन कल्पिता नतु विशुद्धचैतन्येन अभ्रान्तत्वादित्यन्योन्याश्रयः ॥ तस्याकल्पितत्वे सदेवेत्यादि व्याकोपइत्यादिदूषणान्यग्रेप्यस्माभिर्वक्ष्यमाणान्यनुसन्धेयानि ॥ गीतादिभाष्येति ॥ आदिपदं विष्णुनामसहस्रग्राहकम् तद्भाष्यस्यापि तैः कृतत्वात् ॥ किञ्चात्रेश्वरे इत्यादिना कृते विकल्पे प्रथमपक्षे दोषमुक्त्वा द्वितीयेपि तमाहुः ॥ प्रलये मायायाइत्यादिना तथाच मायालये तदवच्छिन्नस्तत्र प्रतिबिम्बितोवा नावतिष्ठेव ॥ घटदर्पणयोर्लये घटाकाशदर्पणस्थप्रतिबिम्बाविव ॥ अतः कुतस्तरां मायावृत्तिरूपौरोषतोषौ ॥ त्वन्मतइति ॥ इदं किं लाघवं प्रत्युत गौरवमित्यभिप्रेणान्वेति ॥ कर्मणामेवेत्यादिस्तु मीमांसकमतानुवादः ॥ तन्मते च प्रवाहनित्यतास्वीकारात् ॥ तदेकदेशिभिः सहस्रार्जुनोपरद्धपुनःप्रवृत्तसोमोद्भवाप्रवाहन्यायेन सृष्टिप्रलययोरप्यूरीकारात् ॥ लक्षणायामिति ॥ कर्मपदेन रोषतोषयोर्लक्षणायां ॥ तादृशतोषादेरिति ॥ कर्मजन्यतायाः वृत्तिरूपरोषतोषादेः परस्मिन्नसम्भवात् ॥ नप्रागुक्तदोषइति ॥ नहि करचरणादिना गमनादानाद्यनुतिष्ठतस्तत्पारतन्त्र्यस्य स्वीकारे किंचिन्मानमस्तीतिभावः ॥ एतदिहसंदर्भेज्ञातव्यम् । यत्तु कर्मणां चेत्यादि कल्पनस्यायोगादित्यंतं तत्तु प्रागेव निरस्तं पुनरधिकं निरस्याम । तत्र कर्मणामुत्तरक्षणएवेच्छाऽजनकत्वे कारणं

कालस्याऽपिसहकारित्वात्सुतरांत्वन्मतेस्वतन्त्रतास्यात् ॥ नचकालईश्वरादभिन्नएव अतएव सदेवसोम्येदमग्रआसीदितिश्रुति संगच्छते अन्यथाऽवधारणंनसंगच्छते कालस्यतदानींसत्वात् अन्यथाऽमेपदासंगतेः तथाचकालसत्वेऽपिनाऽस्मदभिमतस्वतन्त्रताहानिरितिवाच्यम् ॥ आत्माश्रयप्रसङ्गात् ॥ सर्वस्येश्वरभिन्नत्वेन कर्मणाहेतुत्वनिराकरणप्रयासनैष्फल्यापत्तेश्च ॥ कालोऽस्मिलोकक्षयकृदित्यनतु कालशब्देनयमोदानधर्मप्रथमाध्यायोक्तस्तत्सहचारीवाकश्चिद्विवक्षितोनतुक्षणादिरूपः ॥ लोकक्षयकृदितिविशेषितत्वात् ॥ सर्वोऽऽत्मकस्यतस्यमायात्मकतायाअविरोधाच्च ॥ एवंकालरूपोऽवतीर्णइत्यनाऽपिबोध्यम् ॥ एतत्समानाऽर्थत्वलाभात् ॥ कालःकलयतामितितु विभूतिवर्णनम् अतोमनआदिष्विवतनाऽपिपरमात्मदृष्टिमात्रविधितात्पर्यकम् ॥ नचैवंकालादेरतिरिक्तत्वे सदेवेत्यवधारणविरोधइतिवाच्यम् ॥ कल्पितस्याऽधिष्ठानाऽनतिरिक्ततयाऽवधारणाऽविरोधात् ॥ ९ ॥

दृश्यं कर्मज्ञानोत्तरं राजादेः फलादित्सायां विलंबादर्शनात् । ईश्वरस्य सर्वज्ञत्वाच्च ॥ नचोद्बोधककालविशेषाभावस्तदिति वाच्यम् । विशेषस्वरूपस्य दुःशकनिरुक्तिकत्वात् । कालत्वेन कारणत्वे सर्वदोद्बोधप्रसंगाच्च ॥ नाप्युद्बुद्धानामेवेत्यवधारणं संगच्छते । प्रलयपूर्वक्षणेऽनुद्बुद्धानां तज्जनकत्वोक्तिव्याघातात् ॥ न च सुखदुःखलक्षणफलेच्छां प्रत्येवोद्बुद्धानां हेतुत्वमवधार्यते । नखिच्छांतरं प्रतीति वाच्यम् । व्यवस्थापकश्रुत्याद्यनुपलंभात् । श्रुतिसिद्धनित्येच्छावादे सर्गोपपत्त्याऽन्यथानुपपत्त्यभावाच्च ॥ किं च तथासति "यदुत्कालोकासुसृजा" इत्यादिरूपांसर्गेच्छां प्रत्यनुद्बुद्धानामपि हेतुत्वसिद्ध्या उद्बुद्धात्मनकर्मणइच्छोत्पत्तइति स्वोक्तिविरोधः । सदा सर्गसंभवेन प्रलयोच्छेदश्च । अथ सर्गेच्छायामपि परंपरया फलानुकूलत्वादुद्बुद्धमात्रजन्यत्वमिति चेत् इयता कालेन कर्माण्युद्बोधयिष्यामीतीच्छायामपि तथात्वादनुद्बुद्धैर्जननमसंभवि । कश्चायं कर्मसु कालविशेषेणोत्पाद्यो धर्मउद्बुद्धत्वमित्युच्यते ॥ यदृच्छाजनकतावच्छेदकः । न तावत्फलजनकत्वं । इच्छासमवधानं विना फलाजनकत्वेन तज्जननं विनेच्छाऽजनकत्वेन चान्योन्याश्रयात् । नापि फलजननयोग्यत्वं फलसाधनभावबोधकविधिप्रतिषेधवाक्यानुरोधेन योग्यतायाऔत्पत्तिकत्वात् । अयोग्यस्यसाधनत्वाभिलापायोगात् । नापीच्छाजनकत्वं आत्माश्रयात् । नापितज्जननयोग्यत्वं इच्छानियतपूर्ववृत्तिकफलजननयोग्येष्विच्छाजननयोग्यतायाअपि सार्वदिकत्वात् । नाप्यन्यत् प्रमाणाभावात् । नापिकालविशेष ईश्वरेच्छाप्रयत्नासमवहितः स्वयमेव कर्माण्युद्बोधयितुमीष्टे जडत्वात् । जडस्य च चेतनमंतरा हेतुत्वायोगादीशः कल्प्यतइति त्वयैव कथनात् । कालःकलयतामिति भगवद्वाक्ये तु कलनमायुर्गणन तदुद्बोधनं गीताभाष्ये ("कलयतांकलनंगणनंकुर्वता")मिति शंकराचार्यैर्विवरणात् । युक्तं चैतत् कल संख्यानइति भीमसेनोक्तेः । कालस्य कलयितृत्वमपि भगवदिच्छयेत्यन्यत्र विस्तरः । तस्मान्नेदमुद्बोधकत्वे मानं । एतेनैव सापि कर्मोद्बोधद्वारैवेत्यपि निराकृतं अवधारणे मानाभावात् । यदि जडोपीश्वरनिरपेक्ष उद्बोधयेत् तर्हि सर्गादिकमपि स्वयमेव कुर्यादिति स्वभाववादापातः संन्यासिकुचमर्दनन्यायात् । योहिसन्यासीभूत्वापिकामबुद्धि. स्त्रीकुचौमर्दयेत्सोऽगम्याशतमपि गच्छेत् । विशिष्यहेतुतेति प्रयोगश्चिंत्यः । हेतुतायाअक्रियात्वेन समानकर्तृकत्वालाभात्समानकर्तृकयो. पूर्वकालइत्यनुशिष्टस्य क्त्वोऽसंभवात् । कल्पनीयेत्यनेन समानकर्तृकत्वविलक्षणे तु विशेष्येति णिजंतात् क्त्वोल्यप् प्रयोक्तव्य. । कश्च स विशेषणरूपोधर्मः येन कालांतरं व्यावर्त्य कालविशेषोवक्तुं शक्येत । सामान्यधर्मवत्त्वे सति तद्व्याप्यावांतरधर्मवत्त्वं हि विशेषत्वं । नहि प्रलये सूर्यगत्यादिकमस्ति "सूर्याचंद्रमसौधातायथापूर्वमकल्पयत्" इति श्रुते । येन प्रात संगवत्वादयोवसतत्वादयोवा कालत्वव्याप्यधर्माःसिद्ध्येयुः ॥ किं चोद्बोधगतावच्छेदकविशेषस्यनिर्वाहकधर्मोजन्योन वा । द्वितीये तस्य सर्वकालवृत्तितयाऽतिप्रसंगवादवस्थ्यम् । आद्ये इच्छाविशिष्टेश्वरजन्योन वा । प्रथमश्चेदिच्छायां सर्वनिदानत्वमजन्यतया नित्यत्वं च सिद्धम् ॥ न द्वितीयः कारणांतरस्या-

प्रसिद्धेः ॥ तस्यापि नित्यत्वे सर्वदा सर्वं कार्यं स्यादित्यतिप्रसंगस्तदवस्थः । अनवस्थ-
त्वेऽनवस्थेत्यादि प्रागेवावादि ॥ एतेन कालेनोद्बोधकाकांक्षोपशमः प्रत्युक्तः ॥ यत्तु
इयंचेत्यादि उद्बोधकापेक्षेत्यंतं तदप्यमंजुलं । सेश्वरादृष्टवादिभिः केवलकालस्य हेतुत्वे
कार्ययौगपद्याद्यापातादीश्वरेच्छा नित्यैव सर्वहेतुः स्वीक्रियते कालादेश्च तत्सहकारित्व-
मुच्यते निरीश्वरैस्तैस्त्वदृष्टादिमात्रेण सर्वं साध्यतेऽतस्त्वदुक्तप्रक्रियोभयविधादृष्टवादिवि-
संमतैव ॥ यच्च स्वमते राजादिवद्रोषतोषौत्कट्यमभिहितं तदपि (स्कं० ६ अ० १७)
नतस्यकश्चिद्दयितः प्रतीपोनज्ञातिर्बंधुर्नपरोनचस्वः ॥ समस्यसर्वत्रनिरंजनस्यसुखेनरागः
कुतएवरोषइत्यादिश्रीभागवतादिवचोविरोधादुपेक्ष्यम् । फलोपधायकत्वं च नियमेन
फलजनकत्वं तज्जननयोग्यत्वं वा उभयमपि दूषितचरं । किंच तोषहृतरस्य सुखोत्पि-
पादयिषा रोषश्च दुःखोत्पिपादयिषेति बहवः । तथा च सतीच्छाविशेषयोरोषतोषयोः
कर्मपदलक्षितयोरिच्छोद्भावकत्वकथनमसंगतम् । तयोरेव फलदित्सारूपत्वात् ॥ किं
चास्मिन्कालएव एतत्कर्मजन्यस्य रोषस्य तोषस्य वौत्कट्यं भवत्वित्यत्रापीश्वरेच्छातिरिक्तं
किं नियामकं । कालविशेषः स्वभावएव तदिति चेत्स्वभावात्स स्वयमेव फलानि दद्यात्
सृष्टिकालइत्यादिव्यपदेशात्सर्गादिकमपि स्वयमेव कुर्यात् कर्माणि वा सर्वं कुर्युः । अतः
कृतं प्राकृतवद्रोषतोषवत्त्वेऽप्यशक्यफलदानेन कालकर्माधीनेनेश्वरेण ॥ तद्बोधकश्रुतय-
स्त्वनुष्ठातुर्जीवस्य जगत्कर्तृत्वादिधर्मस्तावकतयोपपद्येरन् ॥ अर्थवादानांविधितत्संबंध्य-
न्यतरस्तुत्यर्थतया विध्येकवाक्यतायाः प्रथमस्य द्वितीयपादे सिद्धेः ॥ ईश्वरं प्रकल्प्य
तद्भयप्रदर्शनेन कर्मणि प्रवर्तकतया वा विधिशेषाः स्युः ॥ यथाह भट्टः । इत्याहनास्ति-
क्यनिराकरिष्णुरात्मास्तितांभाष्यकृदत्रयुक्त्या ॥ दृढत्वमेतद्विषयप्रबोधःप्रयातिवेदांतनिषे-
वणेनेति ॥ अथ जडस्य चेतनाधीनव्यापारकत्वमाश्रित्येश्वरेच्छायाएव नियामकत्व-
मुच्येत तर्हि सिद्धमीश्वरेच्छायां कालाद्यजन्यत्वं सर्वनिदानत्वं च । अन्यथा प्रलयोत्तरं
स्थितरोषतोषयोरत्यंतांतरायेणौत्कट्यं सृष्टिकाले च स्वल्पांतरायेण तदित्यपि निर्हेतुकम-
समंजसं स्यात् । तथा अनंतजीवेषु समकालं सुखदुःखयोर्दर्शनात्तद्धेतुभूतोत्कटानुत्कटा-
नंततोषादीनां युगपदैकाधिकरण्यं लोकविरुद्धमप्यंगीकार्यम् । एवं प्रलयसंनिहितकर्म-
जनिततोषादिरूपनानेच्छानां सकलप्रलयकालस्थायित्वे सार्गकालिकीनामपि तासां
फलपर्यंतचिरस्थायित्वे च त्रिक्षणावस्थायित्वभंगाज्जीवेच्छातोवैलक्षण्यानपायः तस्मात्स-
कलश्रुतिसंमतमगुरुभूतं नित्येच्छायाहेतुत्वकथनमेव कमनीयम् ॥ वस्तुतस्त्वित्यादिना
तु परित्यक्तपूर्वोऽप्यदृष्टवादः पुनरुपात्तः ॥ शंकराचार्यैः कर्मणां त्रिक्षणावस्थायित्वस्वां-
गीकारेण अदृष्टमंतरा कालांतरकरणीयोद्बोधानुपपत्तेः ॥ फलानतिप्रसक्तये कल्प्यमानः
सहकारिकालनिष्ठधर्मस्तु नित्योजन्योवेत्यादि विकल्पासहइति दर्शितं प्राक् । यदि
चानतिप्रसंगाय नित्ये काले स्वाभाविकाधर्मविशेषाः क्रमिकाः स्वीक्रियंते तर्हि तान्
श्रुत्युक्तायामिच्छायामेव स्वीकुरु । ततश्च नकार्ययौगपद्याद्यतिप्रसंगः । तत्तज्जीवे
तत्तत्फलेच्छायावस्तुतोन कर्मजन्यत्वम् "एषह्येवसाधुकर्मकारयतितंयमेभ्योलोकेभ्य-

उक्षिनीपती" ति श्रुतौ कर्मणामेव तादृशेच्छाजन्यत्वश्रवणात् ततएवेच्छायाः कर्मतः पूर्ववृत्तित्वनिश्चयात् श्रुतिषु च इतरकारणवाद्वारणपुरःसरं परमेश्वरस्यैवाभिन्नेच्छाशक्तेरभिन्ननिमित्तोपादानत्वं समर्थ्यते। यथाश्वेताश्वतरे "ब्रह्मवादिनोवदंति किंकारण"-मित्यादिना सर्गोत्पत्त्यादिकारणप्रश्नमुक्त्वा "कालःस्वभावोनियतिर्यदृच्छये"त्यूचा कालकर्मादीनां निदानत्वं निराकृत्य "ते ध्यानयोगानुगताअपश्यन्" इत्यादिना ईश्वरस्यैव स्वात्मकस्वाभाविकशक्तेर्निखिलनिदानत्वमुपपादि। एवं श्रीभागवतेपि कालंकर्मस्वभावंचमायेशोमाययास्वया॥ आत्मन्यदृच्छयाप्राप्तंविबुभूषुरुपाददइति वैविध्येन भवनेच्छायाएव सर्वमूलत्वमुदितम्। श्रुत्यनुसार्येतदर्थविस्तरस्तु तत्त्वदीपसर्वार्थनिर्णयावरणभंगसुबोधिनीतत्प्रकाशेभ्योवगंतव्यः। तथा चैव प्रक्रियासंक्षेपः भगवान् बहुस्यामितीच्छाकाररूपेण तादृशेच्छारूपेण वा भवन् स्वस्मिंस्तिरोभाविनानां नित्यसर्ववस्तूनां क्रमेणाभिव्यंजनाय स्वात्मकं चेष्टारूपत्वात्क्रियाशक्तिप्रधानमीषत्प्रकटसदंशमात्रं नित्यगतिं लोकव्यवहारोपयोगिकालं प्रथममाविष्करोति। तदवयवांश्च घटीमुहूर्तादीन् क्रमिकान्नियमयति। तैत्तिरीयाणां नारायणप्रपाठके "सर्वेनिमेषाजज्ञिरेविद्युतःपुरुषादधि कलामुहूर्ताःकाष्ठाश्चाहोरात्राश्चसर्वशः अर्धमासामासाऋतवःसंवत्सरश्चकल्पंता"मिति श्रवणात्। अष्टमस्कंधपंचमाध्याये (श्लो० ४२) भ्रुवोर्यमःपक्ष्मभवस्तुकालः प्रसीदतांनःसमहाविभूतिरित्युत्पत्तिस्मरणात्। द्रव्यंवयः कर्मगुणान् विशेषंयद्योगमायाविहितान्वदंतीत्यनुपदमुक्तेश्च। तस्य तिरोहिताभिव्यंजकत्वं तु। सतोभिव्यंजकःकाल इत्येकादशस्कंधवाक्यात्। भगवद्रूपत्वं कालोस्मीतिगीतावाक्यात्। चेष्टारूपत्वं योयं कालस्तस्यतेव्यक्तबंधोचेष्टामाहुश्चेष्टतेयेनविश्वं। निमेषादिर्वत्सरांतोमहीयानितिदशमस्कंधतृतीयाध्यायवाक्यात्। एवं नित्यगतित्वादिकमपि गुणव्यतिकराकारोनिर्विशेषोप्रतिष्ठित इत्यादिश्रीभागवतप्रभृतिवच प्रचयसिद्धं निबंधात्सुबोधिनीतश्च बोद्धव्यम्॥ अप्रतिष्ठितोनित्यगमनः। क्रमिकेषु तत्तत्कालावयवेषु च यथेच्छं नानाकार्याणि क्रमेण कर्तव्यतया परिच्छिनत्ति ईश्वरेणपरिच्छिन्नंकालेनाव्यक्तमूर्तिनेतिश्रीभागवतोक्तेः॥ अयमेवालोचनयत्नः श्रुतिषुतपःशब्देन सूत्रे च कृतप्रयत्नशब्देनोच्यते। अतः स्वेच्छया तत्तत्कालएव तत्तत्कार्यं करोतीति न सर्वकार्ययौगपद्यम्। तथा "पुरुषएवेदँ सर्वंयद्भूतंयच्चभव्यं॥ तदेवभूतंतदुभव्यमाहृद"मित्यादिश्रुतिषु ब्रह्मात्मकत्वान्नित्यानामपि प्रापंचिकवस्तूनां नाथेत्वेनयोगिनोभाविःवभूतत्वादिव्यवहारास्तत्कृताभिव्यक्तिनिबंधनाएव लोकज्ञापनार्थं च सूर्यगत्यादिना तं परिच्छिनत्ति॥ ततश्च चिर क्षिप्रमित्यादिव्यवहाराः एव (श्लो० १९) सर्गःप्रवर्तते तावत्पौर्वापर्येणनित्यशः॥ महान्गुणविसर्गार्थे स्थित्यंतोयावदीक्षणमित्येकादशस्कंधचतुर्विंशाध्यायवाक्यात्। यथापर्यालोचनमाप्रलयमखिलं विधायेच्छया प्रलयं कुर्वन् स्वकालशक्तिरंहसा सर्वमक्षराख्यस्वरूपे तिरोभाव्याते व्यवहारगोचरं कालमपि तिरोभावयति। व्यक्तेव्यक्तंकालवेगेनयातेभवानेकःशिष्यतेशेषसज्ञइत्यादिवचनेभ्यः कालस्याप्युत्पत्तिश्रवणाच्च॥ द्वितीयस्कंधे (अ० २) नयत्रकालोनिमिषांपरःप्रभुरित्यक्षरावस्थायां तदभाव-

बोधनाच्च ॥ न चाधुनिकदृष्ट्या कालोत्पत्तिमसंभाव्य तदुत्पत्तिश्रुतिरुपचारेणान्यथानेया तस्य स्वातंत्र्येण नित्यत्वे सदेवेत्यादिविरोधात् । एकविज्ञानेन सर्वविज्ञानप्रतिज्ञाबाधाच्च ॥ लौकिकदृष्टेः प्रबलत्वाश्रयणे त्वाकाशोत्पत्तिश्रुतिरप्यसंभवात्तथैवान्यथा नीयेत ॥ सूत्रकारस्तु अविरोधतृतीयपादे (सू. ३) "गौण्यसंभवा"दित्यादिना तत्रोपचारमाशंक्य (सू० ६) "प्रतिज्ञाहानिरव्यतिरेका" दित्यादिना उक्तहेतुतएव समाधत्ते । तस्मात्सृष्टीच्छातः पूर्वमाकाशादेरिव कालस्याभावात्तदुक्तप्रक्रियाबाधितैव ॥ न च कालाभावे इच्छातः पूर्वमित्युक्तिरेव व्याहतेतिवाच्यम् । आधुनिकदृष्टिमनुरुध्य बोधनार्थमेव तथोक्तेः ॥ एतेन यदासिसृक्षति तदासृजतीत्याद्युक्तयोपि व्याख्याताः ॥ अलौकिककालाश्रयाद्वा तथोक्तयउपपद्येरन् । व्याघातस्तु सृष्टीच्छातः पूर्वं कालोस्तीत्युक्तावपि तुल्यः । एतत्कालाश्रयकालांतराभावात् ॥ किं चेदानींत्वे पूर्वकालउत्तरकालइत्यादिव्यवहारः किंहेतुकः स्यात् । घटादीनां परापरत्वे हि तत्तत्कालसंबंधमूलके कालावयवानां तु तथात्वे क्रमनियामकभगवदिच्छामूलके एव मंतव्ये । अनंगीकारे संहाराव्यवहितप्राक्क्षणइत्यादिस्त्वदुक्तिरपि बाध्येत ॥ अलौकिककालस्तु प्रलयेप्यस्त्येव । अहमेवाक्षयःकालइतिभगवद्वाक्यादक्षयत्वावगतेः ॥ कालःकलयतामित्यायुर्गणनादिलोकव्यवहारोपयोगिकालमुक्त्वा ततः पृथक्कीर्तितोऽयमलौकिकएव । अभ्यासस्य भेदकत्वं तु पूर्वतंत्रे कर्मभेदाध्यायद्वितीयपादे (सू० २) "एकस्यैवंपुनःश्रुतिरविशेषादनर्थकंहिस्या"दित्यधिकरणे मीमांसितम् ॥ अत्राहमेवेत्येवकारेण विभूतित्वं व्यवच्छिद्य साक्षात्स्वरूपत्वं बोध्यते । इत्थं चैनं कालमाश्रित्य इयता कालेन पुनः प्रपंचमाविर्भावयिष्यामीतीच्छा प्रलयेपि सुवचा । एकादशे (अ० २२ श्लोक १४) मयाकालात्मनाधात्रेतिवाक्यात् (स्कं० ७ अ० ९ श्लो० ३३) तस्यैवतेवपुरिदंनिजकालशक्त्यासंचोदितप्रकृतिकर्मणआत्मगूढमित्याद्युक्तेश्चापरिमाणंस्वात्मनैव अचिंत्याखिलशक्तित्वात् । अतस्तादृशेच्छानुरोधादेव बहुस्यामिति तदाकाराविर्भावः । त्वन्मतेनित्ये काले यथा सृष्ट्यादितत्तत्कार्यानुकूलावस्तुस्वभावसिद्धाधर्मविशेषाः सर्वकार्यासांकीर्यहेतवस्तथा नित्यायां भगवच्छक्तित्वादचिंत्यायामिच्छायामेव संभवंतीति नानुपपत्तिः काचित् ॥ यच्च (एवं च कालस्येत्यादि अवधारणाविरोधादित्यंतम्) तदुर्बलं । स्वात्मकस्य स्वयमाविष्कृतस्य स्वेच्छया सहकारितया स्थापने नाऽस्वतंत्रतागंधोपि । "सदेवसोम्येदमग्रआसीदेकमेवाद्वितीय"मित्यादिश्रुतिषु तु पक्षद्वयमाकरेषु प्रसिद्धम् । कालस्य सर्वतः पूर्वमाविर्भावित्वेन सर्वांते तिरोभावित्वेन च वस्तुमात्रे तत्संबंधमव्यभिचरितमनुभवतां जीवानां बोधनायाग्रपदात्कालोपरंजनेनमूलकारणं तत्र निरूप्यते । सर्वगमचिंत्यचेत्यादौ देशोपरंजनवदित्येकः पक्षः । सदतिरिक्तवस्तुसत्वेऽवधारणंसहकारिप्रतिषेधकाद्वितीयपदं च व्याकुप्येव । इदानींतनप्रतीत्यनुसरणे तु कालरहितायाइव देशरहितायाअपि सत्ताया अप्रसिद्धेराकाशस्यैव मुख्यदेशत्वाद्यासीदितिपदेन सोप्याक्षिप्येत । सर्वत्रगमितिस्मरणाच्च ॥ तथा च सति (अ० १ पा० ३ सू० १) "नवियदश्रुते"रित्यधिकरणबाधः । एतेन कालोत्पत्तिश्रुतौ

भूतइत्यधिकारे निहितलिङ्प्रयोगात्काक्षेपशंकाऽपि व्युदस्ता। कार्यमात्रस्याकाशो जनना-
" दाकाशःसंभूत " इति श्रुतावपि तदाक्षेपस्य दुर्वारत्वात् ॥ अथ सृष्ट्यनंतरमंतरिक्षस्य
देशत्वं प्रागुत्पत्तेस्तु ब्रह्मस्वरूपमेव देशइत्युच्येत चेत्सृष्ट्युत्तरमेव कालस्य कार्याश्रयत्वं।
पूर्वं तु ब्रह्मैव कालइत्युक्तिरपि युक्तिमती ॥ इत्थं चाप्रपदार्थः कालोभगवानेवेति
निष्कर्षलेशोद्वितीयः । अयमेव नचेत्यादिना त्वयाऽनूदितः । न चात्रप्रशब्दार्थस्या-
धारत्वं सताआधेयत्वं च प्रतीयतइति तयोरैकार्थ्यमाश्रयः संनयः । भगवति तस्या-
दोषत्वात् महिम्नि स्वे महीयतइति वाक्यात् अन्यथा तदनिस्तारात्व ॥ तथा हि काल-
स्याधिष्ठानं ब्रह्म उताहो ब्रह्मणोधिष्ठानं सः । आद्ये प्रकृतश्रुतिप्रतीताधाराधेयभाव-
विपर्यासोब्रह्मणः स्वातिरिक्ताधाराभावादात्माश्रयश्च तदवस्थः । द्वितीयश्चेत्तया
विधास्यमानस्यावधारणविरोधसमाधेर्बाधः । कालस्यापि स्वातंत्र्येणानादित्वे षडस्माक-
मनादयइति सिद्धांतभंगः । कालशब्दशक्यतावच्छेदकरूपेण सत्वे पूर्वं सर्वस्याव्याकृतत्वं
बोधयतः (अ० २ पा० १ सू० १७) " असद्व्यपदेशान्नेतिचेन्नधर्मांतरेणवाक्यशेषा "-
दितिसूत्रस्य " असद्वाइद "मित्यादितद्विषयवाक्यानां च पीडाप्रसंगः । विद्यमानस्य तस्य
दर्शनावश्यंभावात्सोनुनीक्ष्येत्यदर्शनश्रुतिविरोधः । षडनादिरप्रसिद्धांतभंगादिदूषणानि
कर्मप्रवाहस्यानादित्वेपि ध्येयानि । ईश्वरभिन्नत्वेनेत्यत्रत्वीश्वराभिन्नत्वेनेति स्यात् । सिद्धांते
भेदस्यानंगीकरणात्कर्मणां भगवदात्मकत्वं तदिच्छया तत्र तत्र कारणत्वं च न वयं
निरस्यामइति आक्षेपप्रयासएव व्यर्थं ॥ कालोस्मीत्यत्र कालः क्षणादिरूपएव । तस्य
भगवद्रूपत्वे प्रमाणबाहुल्यात् । यथा धर्मग्रंथेऽधिकमासदानप्रस्तावे पाद्मे कलाकाष्ठा-
दिरूपेणनिमेषघटिकादिना ॥ योवंचयतिभूतानितस्मैकालात्मनेनमः ॥ यस्यहस्तेगदाचक्र-
मित्यादि तृतीयस्कंधे षड्विंशाध्याये (श्लो० १७) प्रकृतेर्गुणसाम्यस्यनिर्विशेषस्यमानवि-
चेष्टायत सभगवान् कालइत्युपलक्षितः एकादशस्य चतुर्विंशे प्रकृतिर्ह्यस्योपादानमाधारः
पुरुष परः । सतोभिव्यंजकः कालोब्रह्मतत्त्रितयंस्त्वहम् ॥ तत्रैव मयाकालात्मनाधात्रेति
सप्तमस्कंधाष्टमाध्याये (श्लो० ९) सईश्वरःकालउरुक्रमोसौ तत्रैव नवमाध्याये
(श्लो० २२) सत्वंनिहत्यविजितात्मगुणःस्वधाम्नाकालोवशीकृतविसृज्यविसर्गशक्तिः ।
(श्लो० २४) नेच्छामितेविलुलितानुरुविक्रमेणकालात्मनोपनयमांनिजभृत्यपार्श्वम् ।
दशमस्कंधेइंद्रस्तवे (अ० २७ श्लो० ६) पितागुरुस्त्वंजगतामधीशोदुरत्ययःकालउपात्त-
दंडः । तृतीयस्कंधेपरमाण्वादिलक्षणप्रस्तावे (अ० ११ श्लो० ३) एवंकालोप्यनुमितः
सौक्ष्म्येस्थौल्येचसत्तम ॥ संस्थानभुक्त्याभगवानव्यक्तोव्यक्तभुग्विभुः तृतीयस्कंधस्यै-
कोनत्रिंशे (श्लो० ३७) रूपभेदास्पदंदिव्यंकालइत्यभिधीयते (श्लो० ३८) सविष्ण्वा-
ख्योऽधियज्ञोसौकाल कलयनांप्रभुः महाभारतीयविष्णुनामसहस्रे ऋतु सुदर्शनःकालः
एवंवचनांतराण्यपि तत्र तत्र प्रसिद्धानि नचैतेषुसर्वेषु कालशब्देन यमादि परिग्राह्यः
उपपत्तिलिंगप्रकरणादिविरोधात् अन्यथा कालनिरूपणस्य प्रायेणोच्छेदप्रसंगात् ॥
दुराग्रहे च कालःकलयतामित्यत्रापि त्वदभिमतोयमसहचारी शक्योवक्तुं । भास्करत्वेन

तस्य सर्वायुःपरिगणकत्वौचित्यात् । इष्टापत्तौ कालस्य कलयितृत्वमित्यादिस्वोक्तिव्याघातः ॥ न च कालोस्मीत्यत्र क्षणादिरूपस्य परिग्रहे लोकक्षयकृदितिविशेषणासंगतिः शंक्या । तृतीयस्कंधस्यैकोनत्रिंशे (श्लो० ४५) सोनंतोंतकरःकालोनादिरादिकृदव्ययः । जनंजनेनजनयन् मारयन्मृत्युनांतकमित्यंतकस्यापि मारकत्वकथनेन मुख्यतया लोकक्षयकृत्त्वस्य तत्रैव सिद्धेः ॥ किं च कालोस्मीत्यत्रोपक्रमे द्रष्टुमिच्छामितेरूपमैश्वरं । परमंरूपमैश्वरमितिसाक्षादैश्वर्यं दिव्यचक्षुर्मात्रदृश्यत्वं चोक्तं । उपसंहारकाले रूपंपरंदर्शितमात्मयोगादित्यादिना सर्वतः परत्वं देवानामपि सुदुर्दर्शत्वं वेदयज्ञतपःप्रभृत्यसाध्यदर्शनकत्वं च निरूपितं । यमं तु जंतवोदुष्कृतमपि कृत्वा प्राकृतेनैव चक्षुषा पश्यंतीतिकालशब्देन यमपरिग्रहे तद्विरोधः । तथा वसुरुद्रादित्यब्रह्मेशप्रभृतिसर्वदेवाश्रयत्वानादिमध्यांतत्वशशिसूर्यनेत्रदीप्तहुताशवक्त्ररूपधरत्वादिबोधकानि पूर्ववाक्यानि गरीयसेब्रह्मणोप्यादिकर्त्रे नत्वत्समोस्त्यभ्यधिकःकुतोन्यः सहस्रबाहोभवविश्वमूर्तेइत्यादीन्युत्तरवाक्यानि च पीड्येरन् । एवं आख्याहिमेकोभवानितिप्रश्नस्य त्वद्रीत्या यमोस्मीत्युत्तरे सति वायुर्यमोग्निर्वरुणःशशांकःप्रजापतिस्त्वंप्रपितामहश्चेतिसाधारण्येनसार्वात्म्यकथनमसंगतं स्यात् । अतः शंकराचार्यैरपि गीताभाष्ये न तथाख्यातं । भाष्यव्याख्यातानंदगिरिश्च तत्र "काल-क्रियाशक्त्युपहितःपरमेश्वर" इति व्याचष्टे ॥ दानधर्मप्रथमाध्यायोक्तोयमसहचारी कश्चिदित्युक्तिस्तुभ्रमादेव । तत्रेश्वरस्यैव कालरूपस्य निरूपणात् ॥ तथाहि । तत्र (श्लो० ५०) प्रचोदितोहंकालेनपन्नगत्वामचूचुदमिति कालस्य प्रथमतरं प्रतिपादके मृत्युवाक्ये कालेनेश्वरेणेत्येव नीलकंठचतुर्धरोव्याचख्यौ । अग्रे चानुपदं (श्लो० ५१) यथावायुर्जलधरान्विकर्षतिततस्ततः ॥ तद्वज्जलदवत्सर्पकालस्याहंवशानुगः ॥ सात्विकाराजसाश्चैवतामसायेचकेचन ॥ भावाःकालात्मकाःसर्वेप्रवर्तंतेहजंतुषु ॥ जंगमाःस्थावराश्चैवदिविवायदिवाभुवि ॥ सर्वेकालात्मकाःसर्पकालात्मकमिदंजगत् । प्रवृत्तयश्चलोकेस्मिंस्तथैवचनिवृत्तयः ॥ तासांविकृतयोयाश्चसर्वंकालात्मकंस्मृतम् । आदित्यश्चंद्रमाविष्णुरापोवायुःशतक्रतुः । अग्निःखंपृथिवीमित्रःपर्जन्योवसवोदितिः । सरितःसागराश्चैवभावाभावौचपन्नग ॥ सर्वेकालेनसृज्यंतेह्रियंतेचपुनःपुनरिति । अत्र प्रथमश्लोकःमृत्युर्धावतिपंचमइत्यादिश्रुतिसिद्धं भगवल्लिंगं । द्वितीये येचैवसात्विकाभावाइत्यादिस्मरणसिद्धं तत् । तृतीयादिषु चाशेषजगदात्मकत्वं जगज्जन्मादिकारणत्वं च समन्वयाध्यायसिद्धं ब्रह्मलिंगमेव । विष्णुश्चात्रसत्त्वोपाधिः गुणोपाधिब्रह्मविष्णुशिवानां कालात्मकेश्वरनियम्यत्वं तृतीयस्कंधस्यैकोनत्रिंशे गुणाभिमानिनोदेवाइत्यत्र स्फुटं ॥ अग्रे च लुब्धकं प्रति (श्लो० ६७) याकाचिदेवचेष्टास्यात्सर्वाकालप्रचोदिता ॥ पूर्वमेवैतदुक्तंहिमयालुब्धककालतः । तस्मादुभौकालवशावावांनिर्दिष्टकारिणौ । इदमपि मत्तःसर्वंप्रवर्त्तते योयंकालइत्यादिप्रमाणसिद्धं तल्लिंगमेव ॥ अतएवात्रापि चतुर्धरः परमार्थतः परिहारमाह येति ईश्वराधीनोजनः सदसद्वाकुर्वाणो न स्तुत्यो न वा निंद्यइति भाव इतिव्याख्यातवान् । अग्रे कर्मानुसारेण फलदातृत्वमपि फलमतइत्यधिकरणसिद्धम्

ब्रह्मलिंगमेव । कर्मपारतंत्र्योक्तिस्तु कृतप्रयत्नापेक्षत्वादिति प्रागेवावोचाम । अतआनुशासनिकपर्वप्रथमाध्यायः कालोस्मीत्यादौ क्षणादिरूपग्रहणएव साधकः । एतेन कालरूपोवतीर्णः कालात्मनानिवसतायदुदेवगेहे कालरूपोप्यन्वमोदत इत्यादीन्यपि व्याख्यातानि । स्वरीत्या कालोस्मीत्येतत्समानार्थकत्वलाभात्तु कालः कलयतामित्यत्रापित्वेदृंयमसहचारिणं कुतो न कल्पयसि । वस्तुतस्तु अतोस्मि लोके वेदेचप्रथितः पुरुषोत्तमः ॥ कृष्णस्तुभगवान्स्वयं वसुदेवगृहेसाक्षादवतीर्णः परःपुमान् । गूढंपरंब्रह्ममनुष्यलिंगमित्यादिप्रमाणेभ्यः पूर्णपुरुषोत्तमतया प्रतीतमपि श्रीकृष्णंयमावतारत्वोक्त्याऽवजानन् प्रकृत्या राक्षसोसुरो चाऽसि । अवजानंतिमांमूढाइत्यत्र राक्षसीमासुरींचैवेतिचरमहेतुकथनात् । तदात्वे यमावतारस्तु विदुरएव भारतभागवतादिषु प्रसिद्धः । नापि मुखे चंद्रत्वस्येवारोपेणापरमात्मनि परमात्मत्वस्य दृष्टिः कर्तव्येति विभूत्यध्यायतात्पर्यं । किंतूपक्रमोपसंहारयोः दिव्याह्यात्मविभूतयः नांतोऽस्तिममदिव्यानांविभूतीनामित्यलौकिकत्वकथनात् । याभिर्विभूतिभिर्लोकानिमांस्त्वंव्याप्यतिष्ठसीतिभगवतएव तत्तद्विभूतिरूपेण सर्वत्र स्थितिवचनात् । ममतेजोंशसंभवमितिस्वांशत्वोक्तेश्च ॥ विभूतयोहि सर्वधर्माश्रयस भगवतभावेशिततत्तद्धर्मविशिष्टांशरूपाः काश्चित्त्ववतारूपाअपि । अतईश्वरस्य सर्वधर्माश्रयत्वसर्वशक्तित्वसर्वरूपत्वविज्ञानफलकं तत्र तत्र वास्तवपरमात्मत्वपरिचिंतनमेव तत्तात्पर्यगोचरः । त्वांसदापरिचिंतयन् चिंत्योसिभगवन्मयेत्युक्तेः ॥ कालस्यातिरिक्तत्वे सदेवेत्यवधारणविरोधोदुरपनोदः । न च कल्पितस्याधिष्ठानानतिरिक्ततया तदविरोधोवाच्यः । आत्माश्रयनिराकरणे निराकृतत्वात् । तथा सत्यविद्याकार्यत्वापत्त्या कार्यस्य च कारणाश्रितत्वनियमेन "तमआसीत्तमसागूढमग्र" इतित्वद्विवक्षितविधयाऽविद्यायाः कालाश्रितत्वबोधकश्रुतिविरोधात् । अभ्रांतस्येश्वरस्य जीवकल्पितकालादर्शनेन इयता कालेन कर्माण्युद्बोधयिष्यामीत्यादीच्छानुपपत्तेश्च ॥ देवदत्तेन शुक्तिकायां रजते कल्पितेऽपि नहि शुक्तिरभ्रांतोयज्ञदत्तादिर्वा तेन रजतेन तस्य भूषणभाजनादि निर्माति निर्मित्सति वा ॥ किंच प्रलये जीवाः स्वाविद्यया अधिष्ठाने पदार्थान् कल्पयितुं प्रभवति न वा । आद्येघटादियावत्प्रापंचिकवस्तूनि कल्पयेयुरिति प्रलयोच्छेदः । द्वितीये कालमपि न कल्पयेयुरिति प्रकृतश्रुतावप्रपदार्थस्तस्योद्बोधकत्वादिकल्पनं च चिंत्यमेव । कल्पनीयवस्तुषु विभागस्तु नियामकाभावादशक्यवचनः । प्रलये कालमात्रस्य कल्पनं सृष्टौ तु घटादीनामपीत्यत्रेश्वरेच्छायानियामकत्वे तु घट्टकुटीप्रभातं ॥ किं च शुक्तिरजतादिवदधिष्ठाने वस्त्वंतरकल्पनं हि सादृश्यसंस्कारादिसापेक्षं । ब्रह्मणोनिर्धर्मकत्वेन सादृश्यस्य सत्यकालांतरसाक्षात्काराभावेन संस्कारस्य चानुपपत्त्या प्रकृतेकल्पनाऽसंभवः ॥ अविद्यैकत्वादेकेन जीवेनैव कदाचिद्दुष्कृतस्य कदाचित्सुकृतस्य च कल्पने हेतुर्मृग्यः । ईश्वरेच्छायास्तज्जनकत्वे तस्याः कर्मजन्यतयाऽन्योन्याश्रयात् ॥ तथा प्रलयकाले तैः कर्मणां कल्पनेप्रतिबंधकमप्यन्यदन्वेष्टव्यम् । कल्पनहेतोरविद्यायाविद्यमानत्वात् । कल्पने तु प्रलयोच्छेदः ॥ अविद्यायामब्रह्मणि स्वस्वीकारे कर्मणामप्यभावात्कैरिच्छा जन्येत ॥ पुनः कल्पनं चोच्छिद्येत ॥ इच्छाया.प्रतिबंधकत्वं तु तव दुर्वचम् ॥ प्रलये स्वया

नाशमंगीकृत्य सृष्टिप्राक् क्षणे कर्मभिस्तस्याजननस्यादरात् ॥ अपि च कल्पितानि कर्माणि अभ्रांतस्येश्वरस्य ज्ञानविषयाएव नभवितुमर्हंति ॥ येन रोषतोषौ जनयेयुः ॥ अपि च कालविशेषत्वनिर्वाहकः कालनिष्ठः कादाचित्कोधर्मोपि जीवकल्पितस्त्वया वक्तव्यः ॥ तथा सति तदैव तस्मिंस्तस्य तैः कल्पने कारणं मृग्यम् ॥ कर्मणां तत्कारणत्वेऽन्योन्याश्रयादिप्रसंगात् ॥ किं च सर्वैः कर्मणां परस्परविलक्षणानां कल्पने कालस्य तत्तिष्ठधर्मस्य चैकस्यैव सर्वैर्युगपत्कल्पने च किंनियामकं । एतेन कालविशेषः कर्मविशेषकल्पनेहेतुरित्यप्यपास्तम् । उक्तादिदोषानिस्तारात् ॥ एतद्द्वयात्कालादेर्नित्यत्वे ब्रह्मातिरिक्तत्वे चावधारणविरोधस्तदवस्थइति दिक् ॥ अस्माकं तु सर्वं ब्रह्मात्मकं प्रलये तत्र लीनं अव्याकृतत्वेन सृष्टौ तु पुनर्व्याकृतत्वेन व्यवहारयोग्यमिति न काप्यनुपपत्तिः ॥

अग्रेच इन्द्रोमायाभिःपुरुरूपईयते मायांतुप्रकृतिंविद्यादित्यादिश्रुतिभिः संभवाम्यात्ममाययेत्यादिस्मृतिभिर्मायायाजगद्धेतुत्वं निश्चीयत इत्युक्तम् ॥ तत्रोच्यते ॥ तादृशश्रुतीनां यदित्वदभिमतपारिभाषिकमायावाचकत्वं स्यात्तदा तस्याजगद्धेतुत्वमपिस्यात्तदेव न संभवति ॥ इन्द्रआत्मा मायाभिरिन्द्रियवृत्तिभिःपुरुरूपो बहुरूपईयते प्रतीयतेतत्तदाकारोभूत्वा प्रतीयतइत्यर्थः ॥ मायांतुप्रकृतिंविद्यादित्यत्र भूतसूक्ष्मरूपा प्रकृतिर्विवक्षिता । अतएव सांख्यसिद्धा प्रकृतिरपि न संभवति । संभवाम्यात्ममायया इत्यत्रापि मायापदेन सामर्थ्यं विवक्षितंनतु सदसत्त्वाभ्यामनिर्वचनीयंभावरूपमज्ञानम् । प्रमाणाभावात् ॥ ननु तादृशाज्ञानास्वीकारेजगतः सत्यत्वमेव स्वीकरणीयं । तत्स्वीकारेचद्वैतापत्तिरद्वैतश्रुतिव्याकोपश्च स्यात् । तत्स्वीकारेत्वमायिकस्य मिथ्यात्वेन त्रैकालिकनिषेधप्रतियोगित्वात्सार्वकालिकमद्वैतं श्रुतिसिद्धं संगच्छतइतिचेन्न । जगतः सत्यत्वं ब्रह्मस्वरूपकारणात्मना सर्वस्य ब्रह्मोपादानकत्वेन ब्रह्माभिन्नत्वात्कुतोद्वैतापत्तिः कथंच श्रुतिविरोधः ॥ "तदात्मानँ स्वयमकुरुत" इत्यादिश्रुत्यनुरोधेन ब्रह्मणएवोच्चनीचादिभावेनपरिणतत्वान्मायाकल्पने बीजाभावः । ब्रह्मणएव सर्वभवनसमर्थत्वात् ॥ ननु मायानंगीकारे बंधस्याविद्याकृतत्वाभावेन सत्यत्वे सत्यस्य च ज्ञानानिवर्त्यत्वा "तरति शोकमात्मवि" दित्यादि श्रुतिविरोधः ॥ तत्स्वीकारे चाविद्याकृतस्य रजतस्य शुक्तिज्ञानान्निवृत्तिदर्शनेन ब्रह्माविद्याकृतस्य तस्य ब्रह्मज्ञानान्निवृत्त्यङ्गीकारे तादृशश्रुतिसंगतिरितिचेन्न । बन्धस्याविद्याकार्यत्वाभावेपि ब्रह्मज्ञानेन तत्कृपया निवृत्तिस्वीकारे श्रुतिविरोधाभावात् ॥ नहि काशीमरणोत्तरशिवदर्शनतत्कृततारकोपदेशोत्तरमोक्षस्वीकारेपि "काशीमरणान्मुक्ति"रिति-

श्रुतिविरोधस्तवसंमतः ॥ "किंचेंद्रोमायाभिःपुरुरूपईयत" इति मंत्रस्य त्वदभिमतरीत्या व्याख्यानेपि मायायाः पुरुरूपत्वज्ञानएव हेतुत्वं नतु पुरुरूपभवने "रूपंरूपंप्रतिरूपोबभूवे" त्यत्र मायाभिरित्यनुक्त्वा उत्तरार्धएव तथोक्तेः ॥ युक्तंचैतत् ॥ कारकविभक्तीनां क्रिययान्वयस्योचितत्वात् ॥ नहि काष्ठैस्तण्डुलः पच्यतइत्यत्र काष्ठकरणकत्वस्य तंडुलेऽन्वयः कस्यचित्संमतस्तण्डुलत्वे वा। येन बहुरूपत्वे मायाकरणकत्वस्यान्वयस्त्वदभिमतःस्यात् ॥ नच पुरुरूपज्ञानस्य मायिकत्वे पुरुरूपत्वस्य सुतरां मायिकत्वान्ममाभीष्टसिद्धिरिति वाच्यम् । मायिकज्ञानविषयस्य मायिकत्वमेवेतिनियमाभावात् ॥ तादृशनियमस्वीकारे मायिकाखण्डाकारवृत्तिविषयस्य ब्रह्मणोपि मायिकत्वेन मिथ्यात्वापत्तिः ॥ नच तादृशवृत्तिविषयस्य परिच्छिन्नत्वेन मिथ्यात्वमिष्टमेवेतिवाच्यम् । तस्यापि मिथ्यात्वे शून्यवादापत्तिः ॥ किंच परिच्छिन्नज्ञानान्मोक्षस्वीकारे घटादिज्ञानान्मोक्षापत्तिः ॥ घटाद्याकारवृत्तिरूपज्ञानस्यापि घटादेः कल्पितत्वेन कल्पितस्यचाविद्यानाश्रयत्वेन घटाद्यवच्छिन्नचैतन्यगताविद्यानाशार्थं तद्विषयकत्वस्यैवांगीकरणीयत्वात् तस्मान्मायिकज्ञानविषयस्य मायिकत्वमेवेति नियमोभवन्मतएव दोषावहइति नादरणीयः ॥ यत्तु विवर्तवादे दृष्टेरेव सृष्टित्वान्मायिकविज्ञानविषयस्याऽमायिकत्वासिद्धेः ॥ नहि शुक्तिरजतविज्ञानविषयस्य रजतस्यामायिकत्वमित्युक्तं ॥ दृष्टिसृष्टिवादस्यैव तुच्छत्वात्तत्तुच्छतरमेव ॥ तथाहि दृष्टेरेव सृष्टित्वादिति वदतादृष्टिर्विज्ञानमेवसृष्टिरित्यभ्युपगतं तच्चसंभवति ॥ दृग्दृश्ययोर्जडचेतनयोस्तमःप्रकाशवद्विरुद्धस्वभावयोरैक्यासंभवादेकस्मिन्कर्मकर्तृभावासंभवेन प्रकाश्यप्रकाशकभावानुपपत्तेश्च ॥ ननु दृग्दृश्ययोर्भिन्नसत्ताकत्वं यदि स्यात्तदा विरुद्धस्वभावत्वमपि स्यात्तदेव नोपेयते। दृश्यस्य दृष्टिभेदे प्रमाणाभावात् ॥ अतएव ज्ञानस्वरूपमेवाहुर्जगदेतन्मनीषिणः अर्थस्वरूपं भ्राम्यंतः पश्यंत्यन्ये कुदृष्टयइति स्मृतिरपि संगच्छते। किंतु दृष्टिरेव पूर्वपूर्ववासनाभिर्घटाद्याकारेण परिणतासृष्टिरित्युच्यते । यथा स्वप्ने बाह्यघटादेरभावेपि जाग्रद्वासनाविशिष्टं विज्ञानमेव तत्तदाकारं भवति। तथैव प्रकृतेपीति नानुपपत्तिः। नापि कर्मकर्तृभावविरोधः। स्वप्ने एकस्यैव कर्मकर्तृत्वप्रकाश्यप्रकाशकत्वयोर्दर्शनेन तादृशविरोधे मानाभावात् ॥ नच स्वप्नेघटादयः संत्येवेति वाच्यम्। "नतत्ररथानरथयोगा" इत्यादि श्रुतिविरोधा-

पत्तेः ॥ अतएव "मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वा"-दिति सूत्रमपि संगच्छतेऽन्यथा तद्विरोधोपि स्यादितिचेन्न। दृष्टिरेव सृष्टिरित्यत्र दृष्टिर्विज्ञानमित्युक्तम्। तत्र विज्ञानपदेन ब्रह्मरूपं विज्ञानं विवक्षितं। "विज्ञानमानंदंब्रह्मेति श्रुतेः" ॥ अथवा बुद्धि-र्विवक्षिता "विज्ञानंयज्ञंतनुत" इत्यादि श्रुतेः। ब्रह्मणःसाधनां-तरानपेक्षस्यसृष्टिरूपत्वे सृष्टेर्नित्यत्वापत्तिः विवर्तवादहानिश्च। नद्वितीयः बुद्धेः पुरुषभेदेन भिन्नत्वात्कस्य बुद्धिःसृष्टिरूपेत्यत्र विनि-गमकंदुर्लभं ॥ ननु पुरुषभेदेन सृष्टिर्भिन्नैव। यथैकस्यां शुक्तौदश-पुरुषाणां रजतभ्रमे जाते पुरुषभेदेन रजतं भिन्नंभिन्नमेवोत्पद्यते नत्वेकमेव। अतएव पुरुषस्याधिष्ठानसाक्षात्कारे जाते तदज्ञान-निवृत्त्या तत्कार्य्यरजतनिवृत्तावपि द्वितीयपुरुषाज्ञानकल्पितरजत-सत्वेन तस्येदं रजतमितिप्रत्ययोजायते। नच पुरुषस्यापि सृष्ट्यंतर्ग-तत्वात्तस्यापि कल्पितत्वाद्द्वितीयपुरुषकल्पितत्वं वाच्यं। तेन यत्रैकएव पुरुषस्तत्र कल्पकाभावात्पुरुषएव नस्यादिति वाच्यं। तत्र तत्पुरुषस्यैव कल्पकत्वात्। नच देहेंद्रियादिसत्त्वे बुद्धिसत्त्वे बुद्धे-स्तत्तदाकारत्वे देहेंद्रियांतःकरणाविद्यादिसंघातरूपपुरुषस्यैवा-भावात्कथं तस्य स्वकल्पकत्वमितिवाच्यं। पूर्वपूर्वकल्पिताविद्यो-पहितोजीवउत्तरोत्तराविद्यादिकल्पकः। यथा निद्रारूपा याऽविद्या तत्कल्पितोजीवोदिग्देशादिविभागं घटपटादिंच प्रकल्पयति तथैवा-धुनापि स्वयं कल्पितः कांश्चिदनादित्वेन कांश्चित्सादित्वेन कल्पय-तीति नानुपपत्तिरतएव जीवईशोविशुद्धाचित् तथा जीवेशयोर्भिदा अविद्यातच्चितोर्योगः षडस्माकमनादयइति सिद्धांतोपि संगच्छते। यथा स्वप्ने कल्प्यमानं गोपुरादि किंचित्पूर्वसिद्धत्वेन कल्प्यते किंचित्तदानीमुत्पाद्यत्वेन। एवं जागरेपि किंचित्कल्प्यमानं सादित्वेन कल्प्यते किंचिदन्यथेत्यनेनैव। साद्यनादिविभागोपपत्तेरिति चेन्मैवं। श्रुतिसिद्धस्य वियदादिप्रपंचस्य तत्क्रमस्य च कल्पितत्वकल्पने माना-भावात् ॥ तस्यापि कल्पितत्वे तस्य कः कल्पक इति वक्तव्यं न कोपि चेत्तर्हि सृष्ट्यादिश्रुतिप्रतिपाद्यस्य वियदादिसृष्टितत्क्रमादेः शश-शृंगायमाणतया श्रुतेरालंबनाभावादप्रामाण्यं स्यात्। नच तादृश-श्रुतीनां निष्प्रपंचब्रह्मात्मैक्यप्रतिपादनपरत्वेन तात्पर्यविषयी-भूतार्थस्य सत्यत्वान्नाप्रामाण्यापत्तिरिति वाच्यम्। सृष्ट्यादिवा-क्यानां श्रुतार्थपरित्यागाश्रुतार्थतात्पर्यकल्पनापेक्षया वियदादि-सर्गस्य सत्यत्वमेव युक्तं ॥ नन्वध्यारोपापवादाभ्यां निष्प्रपंचब्रह्म-

प्रतिपत्त्यर्थमेव श्रुतौ सृष्टिप्रलयोपन्यासौ नतु तत्सत्यत्वतात्पर्येण यथा लोके गगनत्वबोधनाय प्रवृत्तः कश्चित्प्रथमं नैल्यवैशाल्याद्यध्यारोपेण तं गगनं ग्राहयित्वा पश्चान्नेदं वस्तुतो नैल्यादियुक्तमिति तदपवादेन नीरूपमुदासीनं गगनतत्त्वमिति बोधयति तथा वेदांता अपीति चेन्न। अत्रिवृत्कृतस्याकाशस्याप्रत्यक्षत्वेन तत्र नीलरूपादेरध्यारोपासंभवात्। त्रिवृत्कृतस्य तु रूपवत्त्वात्तत्र नीलरूपापवाद एव न संभवतीत्युभयथापि दृष्टांतप्रदर्शनस्यासंभवात्॥ किं च श्रुतीनां सृष्ट्यादिषु तात्पर्याभावे वियदादिसर्गप्रतिपादकतत्क्रमप्रतिपादकश्रुतीनां परस्परं विरोधपरिहाराय सूत्रकारभाष्यकारयोर्यत्नोपि व्यर्थ एव स्यात्। तात्पर्याविषयीभूतेर्थे विद्यमानस्यापि विरोधस्याकिंचित्करत्वात्॥ अपिच दृष्टिसृष्टिवादिनो मते ब्रह्मणोपि तदाकारवृत्तिभिन्नत्वं न स्यात्तथासति सर्वविप्लव एव स्यात्॥ तस्मात्सनशून्यवादपर्यवसायी दृष्टिसृष्टिवादो वेदवादिभिर्नांगीकरणीय इत्यलमप्रकृतविचारेण॥ इदं रजतमित्यत्र तु शुक्तिकैव रजतमिव प्रतीयते नतु तत्रानिर्वचनीयं प्रातीतिकं रजतं प्रतीयते न वा सत एव रजतस्याविर्भावः तेन नचेत्यादिपूर्वपक्षोऽसंगतः। वस्तुतश्चान्यदेव मिथ्यारजतं। आविर्भावस्य दूषयिष्यमाणत्वेन सत्कार्यवादासंभवादितितु प्रलापमात्रं। आविर्भावदूषणस्यैवासंभवेन सत्कार्यवादस्यापलपितुमशक्यत्वात्॥ किंचेत्यादिना स्वप्नादेर्मायिकतया तदज्ञाने पुमायिकविषयकत्वदर्शनेनेहापि तादृशपुरूरूपविज्ञानस्य मायिकविषयकत्वं स्यात्तत्रापि विषयस्याविर्भावित्वे पसिद्धांत इत्युक्तं तन्नसंभवति। यतो मायिकज्ञानविषयत्वनिष्ठसामानाधिकरण्यमात्रेण मायिकत्वमनुमातुं नशक्यते किंतु मायिकत्वसंबंधितावच्छेदकरूपवत्त्वमायिकज्ञानविषयत्वेनैव। एवंचास्मन्मतसिद्धमायिकत्वाभाववति स्वगृहादौ स्वप्नकालिकस्मृतिरूपमायिकज्ञानविषयत्वसत्त्वेन व्यभिचारितया तत्संबंधितावच्छेदकरूपवत्त्वाभावविशिष्टेन तेन मायिकत्वस्यानुमानासंभवात् अन्यथा वह्निधूमयोः पर्वते सामानाधिकरण्यदर्शनेनायोगोलके धूमानुमितिर्वह्निदर्शनेन कुतो न स्यात्। स्वप्ने सतो विषयस्याविर्भावस्तु नांगीक्रियते येनापसिद्धांतः स्यात्। किंतु जीवव्यामोहार्थमीशकर्तृकैव सा सृष्टिः। ईशो हि स्वमायया सृष्टिं करोति। माया च सामर्थ्यविशेषो नतु सदसत्त्वाभ्यामनिर्वचनीयं भावरूपं पारिभाषिकं। अत एवोक्तं प्रथमस्कंधे अपश्यत्पुरुषं पूर्वं मायां च तदपाश्रयां। यया संमोहितो जीव आत्मानं त्रिगुणात्मकं परोपि मनुतेऽनर्थं तत्कृत-

चाभिपद्यतेऽतईश्वरस्ययाव्यामोहिकाशक्तिः सा माया तयैवबाह्यो-पादाननिरपेक्षया स्वप्ने सृष्टिः क्रियते। तथाचैंद्रजालिकेन नटेन यथा सामाजिकव्यामोहार्थं मायासृष्टिः क्रियते तथेश्वरेण जीवव्यामोह-रूपकौतुकार्थमेव स्वप्नसृष्टिः क्रियतइति नतस्याःसत्यत्वं । अत-एवोक्तं "मायामात्रंतुकार्त्स्न्येनाऽनभिव्यक्तरूपत्वा"दितिव्यासैरपि॥ एतेन किंचेत्यादिकः सर्वकारणत्वंनस्यादित्यंतोवृथाऽऽलापोप्य-पास्तः॥ पूर्वोक्तमायाकार्य्यस्य स्वाश्रये तथाविर्भावानभ्युपगमात्॥ यत्तु किंचपारमार्थिकवस्तुविज्ञाने क्लृप्तप्रमाणातिरिक्तसामग्र्यपेक्षा-भावेन तत्रमायानापेक्ष्येतेति। तन्न युक्तं। तादृशनियमाभावात्। स्वप्नेदेवतादिवाक्यजन्ये भाविपारमार्थिकवस्तुविषयके वर्तमाननि-ध्यादिविषयके ज्ञाने वा क्लृप्तप्रमाणातिरिक्तनिद्रादिसामग्र्यपेक्षणेन व्यभिचारात्। एतत्सर्वंपुरुरूपज्ञानस्य टीकोक्तंमायिकत्वमभ्युपेत्य॥ वस्तुतस्तु इंद्रोमायाभिरित्यस्य पूर्वोक्तेर्थेदोषएवनास्ति॥ ब्रह्मपरत्वे तस्यसर्वभवनसमर्थत्वाद्विरुद्धधर्माश्रयत्वाच्च तन्न विरुध्यते॥ एवं च तस्मादित्यादिकंप्रत्युक्तम्॥

सहस्राक्षे *इंद्रोमायाभिः पुरुरूपइत्यादिं विवर्तवादमेव पुष्णातीत्यंतं भागं परिहरति॥

---

* इन्द्रोमायाभि पुरुरूपईयते मायांतुप्रकृतिंविद्यादित्यादिश्रुतिभिः सम्भवाम्यात्ममाय-येत्यादिस्मृतिभिश्च मायायाअपिजगद्धेतुत्व निश्चीयतइत्याह॥ तथेति॥ श्रुतिस्मृतिगणैरित्यर्थ.॥ ईशानःसृजतीति इच्छोद्भव इति चाऽनुवर्तते॥ यत्तु अन्नैवशाङ्कराःप्राहुर्मायिनंनश्वरंजगत्॥ मायासम्बन्धतोब्रह्मकारणंनाऽन्यथैवहि॥ इति श्लोकेतट्टीकाकार ऊचे॥ रूपं रूपंप्रतिरूपोबभूव यत्तस्यरूपंप्रतिचक्षणाय। इन्द्रोमायाभि·पुरुरूपईयत इति मन्त्रान्मायाज्ञानस्यकारणंनतुब्रह्मणो बहुस्वरूपत्वस्य अन्यथापूर्वार्द्धं एवमायाभि पुरुरूपोबभूवेति वदेदित्युक्तम्॥ तन्न तथोक्तावपि विधेयभेदेन वाक्यभेदाऽनिवारणाच्छब्दगौरवस्य स्पष्टप्रतिपत्त्यर्थत्वेनाऽदूषणत्वात्॥ पुरुरूप-विज्ञानस्यमायिकत्वे पुरुरूपत्वस्य सुतरांमायिकत्वसिद्धेश्च॥ विवर्तवादिदृष्टेरेवसृष्टित्वात्॥ मायिकविज्ञानविषयस्यामायिकत्वासिद्धेः॥ नहि शुक्तिरजतविज्ञानविषयस्य रजतस्यामायि-कत्वम्॥ नच तत्रसत एव रजतस्याऽऽविर्भावः सर्वत्र सर्वसत्त्वस्य सत्कार्यवादेऽभ्युपगमादिति न रजतं मायिकमिति वाच्यम्॥ आविर्भावस्य दूषयिष्यमाणत्वेनसत्कार्यवादासंभवात्॥ किञ्च स्वप्नादेर्मायिकत्वाचार्यत्वयोक्तत्वेन तज्ज्ञानेषुमायिकेषु मायिकविषयकत्वदर्शनेनेहाऽपितादृश-ज्ञानस्यमायिकविषयकत्वं स्यात्॥ तत्राऽपिविषयस्याविर्भावाभ्युपगमेत्वपसिद्धान्तः॥ किंवे-र्धविज्ञानस्याऽपि स्वाश्रयेसतएवघटादिवदीश्वरेच्छालआविर्भावोपपत्तौ तत्रापिमायिकत्वाप्रा-पत्तिः॥ ईश्वरतदिच्छयोर्ज्ञानाकारणत्वे ईश्वरस्य सर्वकारणत्वंरूपंसर्वोत्तमत्वं तदिच्छायाश्च सर्वकारणत्वं नस्यात्॥ किंचपारमार्थिकवस्तुविज्ञानेक्लृप्तप्रमाणातिरिक्तसामग्र्यपेक्षाभावेन तत्रमायानापेक्ष्येत तस्मान्निर्विशेषस्यतथाभवनासंभवशङ्कायां तन्निवृत्त्यर्थंवाक्यशेषोबहुरूप-ज्ञानमेव तथाभवनमितिवदन्विवर्तवादमेव पुष्णाति॥

अग्रे च इंद्रोमायाभिरित्यादिना तस्मादित्यादिकं प्रत्युक्तमित्यंतेन ॥ पारिभाषिकेति ॥ शक्तिग्राहकेषु कोशव्याकरणादिषु मायाशब्दस्य तादृशार्थकतायाअनुपलंभात् । तंत्रांतरेपि तदस्वीकाराच्च ॥ स्वन्मतएव सदसत्त्वाभ्यामनिर्वचनीये वस्तुनि मायाशब्दः परिभाष्यत इति युक्तं तस्य तथात्वम् ॥ अयं भावः-यत्तु इंद्रोमायाभिरित्यादि अनुवर्तत इत्यंतं तदसत् ॥ अत्र हि प्रथमं वाक्यं ऋक्संहितायां चतुर्थाष्टकसप्तमाध्याये (वर्ग ३३ ऋक् ३) तत्र समग्रमंत्रस्तु "रूपंरूपंप्रतिरूपोबभूव तदस्यरूपंप्रतिचक्षणाय ॥ इंद्रोमायाभिःपुरुरूपईयते युक्ताह्यस्यहरयःशतादश" इति अर्थस्तु प्रतिरूपः ॥ सर्वाकारस्त्वात्सर्वधर्माश्रयत्वात्प्रतिनिधिः ॥ परमात्मा रूपं रूपं अग्निवाय्वादिसर्वरूपाणि स्वयमेव बभूव ॥ अस्य परमात्मनस्तत् कार्यात्मना पृथक्पृथग्भूतं रूपं प्रतिचक्षणाय अग्निरेवायंनवायुरित्यादिप्रतिनियतनामव्यवहाराय ॥ ननु तथापि घटादिषु मृत्वमिव कार्यरूपेषु ब्रह्मत्वं सर्वैः कुतोन प्रतीयत इत्याशंकायामाह इंद्रइति इदि परमैश्वर्यं इत्यतो नमिकंपीत्यादिना रक् । इंद्रः परमेश्वरः मायाभिः तत्तदिंद्रियवृत्त्यात्मना परिणतबुद्धिभिः बहुरूप ईयते नानारूपोज्ञायते ॥ तत्र हेतुः हि यतः युक्ताः शरीररूपरथवहने कृतयोजनाः अस्य परमात्मनोहरयः हरंतीति हरय. इंद्रियरूपाअश्वाः "इंद्रियाणिहयानाहु" रितिकठश्रुतेः शता शतानि दश सहस्रं तत्तत्प्राणिभेदेनापरिमिताः सति सहस्रमिति वक्तव्ये शतादशेत्युक्तिः । दशेंद्रियरूपाश्वज्ञापनाय बहुवचनांतशतशब्दादेवानंत्यलाभाच्च ॥ देहेंद्रियाभिमानवद्भिः सएव नानारूपो ज्ञायते तन्निवृत्तौ तु सएव सर्वत्रसर्वरूप इति भावः । अत्र मायाशब्दोन त्वदभिप्रेतार्थपरः अप्रसिद्धेः बहुवचनाच्च । किं तु बुद्धिपर्यायः । मायास्याच्छांबरीबुध्यो-रिति मेदिनीनानार्थयोः । स्यान्माया शांबरीकृपा । दंभोबुद्धिश्चेति विश्वहेमचंद्रयोश्चोक्तेः ॥ अतएव सायनमाधवीये ऋक्संहिताभाष्ये एतन्मंत्रविवरणे "मायाभिः ॥ ज्ञाननामैतत् ॥ ज्ञानैः आत्मीयैः सकल्पैः" इति पूर्वं स्वाभिप्रायेण व्याख्यातम् ॥ त्वदभिमतकल्पमायापरत्वं चापरमततयाऽनंतरं सगृहीतम् ॥ बृहदारण्यकभाष्ये शंकराचार्यैरपि अस्मिन्मंत्रे मायाशब्दस्य प्रज्ञापरत्वं मिथ्याभिमानपरत्वं च विकल्पेन व्याख्यातम् ॥ हरिशब्दश्चेंद्रियपर एव व्याख्यात. ॥ ततश्चतुर्थचरणस्वारस्याद्बहुवचस्वारस्याच्च । इंद्रियवृत्तिरूपा बुद्धिपरिणामा गृह्यंते ॥ अधिकं तु वक्ष्यते ॥ तस्मान्नास्माद्वाक्यादविद्याख्यमायावशादीशान.सृजतीत्यर्थोलभ्यते ॥ मायांतुप्रकृतिविद्यादिति तु श्वेताश्वतरीये तुरीयेऽध्यायेऽस्ति ॥ तत्र "यएकोवर्णो बहुधाशक्तियोगात्" इति प्रथममंत्रे एकस्यैवानेकशक्तिकस्य सर्वधर्माश्रयत्वं सर्वकर्तृत्वं सहर्तृत्वं चोक्त्वा "तदेवाग्नि" रिति "त्वंस्त्रीत्वं पुमानसि" इति च मंत्रद्वये सर्वकार्यात्मकत्वं सर्वलिंगकत्वं चोक्त्वा चतुर्थे ततएव विश्वोत्पत्तिमुक्त्वा "अजामेकां" इति पंचमे उत्पत्त्यादिहेतुरजःसत्वतमोरूपां प्रकृतिं चमसवदधिकरणानुरोधात्तेजोबन्नात्मकं कार्यं वा जुषमाणं जीवं तद्विलक्षणं परमात्मानं चोक्त्वा तयोः कथं भेद इत्याकांक्षायां द्वासुपर्णेति समाने वृक्षइति षष्ठसप्तमयोः कार्यदशायामेव जीवांतर्यामिभावेन भेदंजीवस्यैवाविद्यया मोहं सेवितमीतपरमात्म-

दर्शनादेव तन्निवृत्तिं चाभिधाय "एतस्मिन्नक्षरे" इति अष्टमे चेतनमक्षरं निरूप्य नवमे छंदःप्रभृतीनां परमात्मनः सकाशादेव प्रवृत्तिं मायानियामकस्य तस्यैव स्रष्टृत्वम् "तस्मिंश्चान्यो मायया संनिरुद्ध" इति जीवस्य तत्सम्बद्ध निरुद्धत्वं च श्रावयित्वा कोसौ मायापदार्थः कश्च मायानियामकः कश्च तदन्यः संनिरोद्धव्य इत्याकांक्षायां तदनन्तरमयं मंत्रः पठ्यते "मायांतुप्रकृतिं विद्यान्मायिनं तुमहेश्वरम् ॥ तस्यावयवभूतैस्तु व्याप्तंसर्वमिदं जगत्" इति ॥ अर्थस्तु ॥ पूर्वोक्तां मायां प्रकृतिं श्रीभागवतादिषु प्रकृतिर्गुणसाम्यं स्यादित्यादिकथनाद्गुणसाम्यरूपां प्रथमतमं सदंशकार्यं विद्यात् ॥ महांतमीश्वरं परमात्मानं मायिनं मायानियामकं विद्यात् ॥ प्रकृतिर्हि सर्वजडप्रपंचमूलभूतं परमात्मनः प्रथमं कार्यम् ॥ अतोमहाभूतादीनां प्रकृतितदुद्भवांगीकारेपि ब्रह्मोपादानकत्वं न व्याहन्यते ॥ मृत्पिंडादुत्पन्नघटादिषु मृदुपादानकत्वमिव ॥ अतएवैकादशस्कंधे–'प्रकृतिर्ह्यस्योपादानमाधारःपुरुषः परः ॥ सतोऽभिव्यंजकःकालोब्रह्मतत्त्रितयंत्वहं इति भगवतोक्तं ॥ मायाशब्दश्च प्रकृतिपर्यायतयापि पुराणेषु प्रसिद्धः ॥ यथा तृतीयस्कंधे (अध्या. ५ श्लो० २६) कालवृत्त्यातुमायायां गुणमय्यामधोक्षजः ॥ पुरुषेणात्मभूतेनवीर्यमाधत्तवीर्यवान् ॥ इति ॥ एवमन्यत्रापि द्रष्टव्यम् ॥ प्रकृतिपुरुषकालानां ब्रह्मोपादानकत्वं च विष्णुपुराणे प्रथमेंऽशे द्वितीयाध्याये विरुद्धधर्माश्रयत्वादिना परब्रह्मस्वरूपं निरूप्योच्यते (श्लोक १४) तदेव सर्वमेवैतद्व्यक्ताव्यक्तस्वरूपवत् ॥ तथापुरुषरूपेण कालरूपेणचस्थितम् ॥ १४ ॥ परस्य ब्रह्मणोरूपं पुरुषःप्रथमंद्विज ॥ व्यक्ताव्यक्तेतथैवान्ये रूपेकालस्तथापरम् ॥ १५ ॥ प्रधानपुरुषाव्यक्तकालानांपरमंहियत् ॥ पश्यंतिसूरयः सिद्धं तद्विष्णोःपरमंपदम् ॥ १६ ॥ प्रधानपुरुषव्यक्तकालास्तुप्रविभागशः ॥ रूपाणिस्थितिसर्गांतव्यक्तिसद्भावहेतवः ॥ १७ ॥ व्यक्तंविष्णुस्तथाव्यक्तंपुरुषःकालएवच ॥ क्रीडतोबालकस्येवचेष्टांतस्यनिशामय ॥ अव्यक्तं कारणंयत्तत्प्रधानमृषिसत्तमैः ॥ प्रोच्यतेप्रकृतिःसूक्ष्मानित्यंसदसदात्मकम् ॥ इति ॥ एवमितरत्रापि पुराणेषु तत्र तत्र प्रसिद्धमेवेति ॥ किंबहुना श्रुतिष्वपि "कर्तारमीशं पुरुषंब्रह्मयोनिं" इति मुंडकादिषु प्रकृतियोनित्वं परमात्मनः श्राव्यते ॥ एतेन "अजामेकां" इति पूर्ववाक्ये का साऽजेति शंकापि व्युदस्ता ॥ श्वेताश्वतरविद्यैकवाक्यतया लोहितशुक्लकृष्णामित्यत्र तेजोऽबन्नात्मकत्वादेरपि पंचभूतमूलभूतायां तस्यां तेजोऽबन्नात्मतया अनपायात्" ॥ एतेनैव सांख्यमतप्रवेशशंकाप्यपास्ता ॥ तैः प्रकृतेः स्वातंत्र्येण नित्यत्वं पुरुषाणां च बहुत्वं स्वातंत्र्येण नित्यत्वमभ्युपगच्छद्भिरेवमनंगीकारात् ॥ तस्याः स्वकार्यरूपाया मायाया नियामकस्तु महानीश्वरएव ॥ कस्तर्हि मायया संनिरुद्ध इति चेत्तत्राह ॥ तस्यावयवेति तस्य परमेश्वरस्य अवयवभूतैः स्वांशैर्जीवैः ॥ सर्वमिदं परिदृश्यमानं जगज्जंगमदेहप्राणेंद्रियांतःकरणादिकं व्याप्तं पूर्णं गुणतो व्याप्तेः ॥ यत्र यत्र संघातस्तत्र तत्र जीवइति नियमाद्व्याप्तम् ॥ तथा च प्रकृतिकार्यदेहाद्यभिमानवशात्तदंशएव सम्यङ्निरुद्धः ॥ यत्तु तद्भाष्ये "तस्यप्रकृतस्यपरमेश्वरस्यरज्ज्वाद्यधिष्ठानेषु कल्पितवत्सर्पादिस्थानीयैर्मायिकैःस्थानयवै" रिति व्याख्यातम् । तन्न । कल्पितसर्पादौ रज्ज्वाद्यवयववत्तायाअयो-

गात् ॥ नहि रज्जवयवोनष्टइत्युक्ते तत्र कल्पितः सर्पोनष्ट इति प्रतीयते ॥ किं तु तदेकांश एवेति ॥ इदं "अंशोनानाव्यपदेशात्" इत्यादिषु सिद्धमतः किं प्रासंगिकेन ॥ तथा च मायां सदसत्त्वाभ्यामनिर्वचनीयां जगतः प्रकृतिमुपादानं विद्यादित्यर्थमनोरथोऽपास्तः ॥ श्रौतप्रतिज्ञादृष्टांतादिव्याकोपात् ॥ साधितं च ब्रह्मणएव सर्वप्रकृतित्वं परिणामित्वं च श्रीबादरायणाचार्यैः "प्रकृतिश्चप्रतिज्ञादृष्टांतानुपरोधादित्यधिकरणे ॥ तृतीयंतु गीतावाक्यं ॥ अजोपि सन्नव्ययात्माभूतानामीश्वरोपिसन् ॥ प्रकृतिंस्वामधिष्ठायसंभवाम्यात्ममाययेति ॥ अत्रापि गुणात्मकं वस्तु न मायाशब्दार्थः ॥ ध्वद्गीत्यादरे प्रकृतिंस्वामित्यनेन पौनरुक्त्यस्यापातात् ॥ अतः स्वाभाविकं तस्य सर्वभवनसामर्थ्यमेव तदर्थः ॥ दशमे विद्ययाऽविद्ययाशक्तया माययाचनिषेवितमिति शक्तित्वोक्तेः ॥ एकादशे मायां वेदितुमिच्छामइति प्रश्नोत्तरयोस्तथैव सिद्धेश्च ॥ अतः स्वां प्रकृतिं अधिष्ठाय नित्यसिद्धं स्वस्वभावमपरित्यज्य आत्मनोमायया सर्वभवनसामर्थ्यरूपया शक्त्या मत्स्यकच्छपादिनानारूपः संभवामीति वाक्यार्थः ॥ अथवा आत्मसु जीवेषु मायया कृपया सर्वेष्वनुग्रहबुध्या संभवामीत्यर्थः ॥ रामानुजाचार्यास्तु मायाशब्दं ज्ञानपर्यायमाश्रित्य आत्मनः संकल्पेनेति व्याचक्षते ॥ तथापि सर्वभवनसामर्थ्येनेत्यर्थोत्र मुख्यः ॥ अवतारव्यवस्थाबोधकमिदं वाक्यं च प्रपंचमायिकत्वासाधनस्य गंधमपि नस्पृशति ॥ प्रकारार्थकेन तथेत्यव्ययेन श्रुतिस्मृतिगणपरामर्शोपि नातिरमणीय ॥ मायावशादिच्छोद्भवस्य बोधकस्तु वाक्याभासोनैकोप्युपन्यस्तः ॥ तदेतदेतदनुसधायाहुः ॥ तादृशश्रुतीनामित्यादि ॥ वाचकत्वमिति ॥ प्रतिपादकत्वं ॥ तादृशार्थवाचकमायापदघटितत्वमिति भावः ॥ नन्वित्यादि ॥ प्रपंचमायिकताबोधकप्रत्यक्षश्रुत्यभावेप्यद्वैतश्रुत्यन्यथानुपपत्त्या तदाक्षिप्यतइति शंकाशयः ॥ समादधते ॥ जगतः सत्यत्वमित्यादिना ॥ इत्यादिश्रुतीति ॥ आदिपदात् "बहुस्यांप्रजायेये-"त्यादिसंग्रहः । तथा च तत्र बहुभवनमुक्त्वा प्रजायेय प्रकृष्टोजायेयेत्युच्चनीचभावस्यापीच्छया विषयीकरणात्सर्वभवनसामर्थ्यादेव विचित्रजगत्संभवेन कार्यवैचित्र्यार्थः पारिभाषिकमायांगीकारोपि प्रत्युक्तः । स्वाभिन्नविचित्रशक्तिकतया सर्वोपपत्तेः ॥ स्पष्टं चेदम् । (अ० २ पा० १ सू० २८) "आत्मनिचैवंविचित्राश्चहि" इत्यादि तत्वसूत्रेषु । नाप्यद्वैतश्रुतिविरोधः । अमायिकस्यैव कार्यस्य ततएवाविर्भावस्तत्रैव तिरोभावइति स्वीकारेण समुद्रतरंगवदभेदानपायात् ॥ कार्यसत्यत्वब्रह्माद्वैतयोरुभयोरपि श्रुतिसिद्धत्वेनान्यतरबाधस्यायोगात् ॥ मृद्रूपेषु घटादिषु गंधसत्त्वेपि पृथिव्येकागंधवतीत्युक्तेरबाधवद्ब्रह्माभिन्ने कार्ये सत्यत्वे सत्यपि अद्वैतश्रुत्यबाधस्य सुवचत्वात् ॥ शिलाकाष्ठवद्भिन्नसत्ताकत्वाऽभावात् ॥ इतिसमाधानाशयः ॥ अतोमायिकत्वपक्षएव "सर्वंखल्विदंब्रह्म ॥ पुरुषएवेदंसर्वं" इत्यादिश्रुतिविरोधः ॥ मायिकस्य सर्वस्य ब्रह्मत्वायोगात् ॥ मायायाः कारणत्वानंगीकारे बंधसत्यत्वापत्त्या मोक्षोच्छेदेन शास्त्रवैफल्यापातान्मायावाद आक्षिप्यत इत्याशयेन शंकते ॥ ननु मायेति । तरतीति ॥ छांदोग्ये भूमविद्यायामिदं श्रूयते ॥ समादधते ॥ बंधस्याविद्याकार्यत्वेत्यादिना ॥ स्वत्संमतरीतिकाऽविद्या-

कार्यत्वस्याभावे इत्यर्थः । वस्तुतस्तु यथः अविद्याशक्तिकार्यं शुक्तिरजतवन्मिथ्यैव ॥ अत एव ब्रह्मज्ञानात्तन्निवृत्तिः ॥ सा चाविद्या न भावरूपाज्ञानम् किं तु भगवच्छक्तिविशेष एवेति न स्वमतप्रवेशः ॥ स्पष्टं चेदं निर्बंधादिषु तच्छक्तयाविद्ययाल्पस्वजीवसंसार उच्यत इत्यादौ ॥ तथापि पिशाचःपिशाचभाषयेति न्यायाज्जिहोत्तरम् ॥ किंच इंद्रो मायाभिरित्यादि ॥ अयं भावः-यच्च अत्रैव शांकरा इति मार्तंडश्लोकटीकास्थं पाठं भित्वा किंचिदनूदितं तत्र टीकाकाराभिप्रेतपाठस्तु "पुरुरूप ईयत इतिमंत्रः मायाज्ञानं प्रति करणं न तु ब्रह्मणो बहुरूपत्वे" इति ज्ञेयः ॥ तथा च मायाभिरिति करणस्य क्रियान्वयित्वमेव योग्यम् ॥ यदपि तत्र तथेत्यादि अमायिकत्वमित्यन्तं तदपि कुशकाशावलंबनम् ॥ तथाहि मायया बहुभवने विवक्षितेतु पूर्वार्द्धएव माययेति वदेत् ॥ न च तयोक्तावपि विधेयभेदेन वाक्यभेदानिवारणमिति शंक्यम् ॥ मायया भवनस्यैव विधेयत्वात् ॥ अथ मायायाः करणत्वेन विधानात् "दध्ना जुहोती"त्यादौ दध्यादेरिव विधेयतया वाक्यभेदप्रसंग इति चेन्न ॥ एकहेलया बहूनां विधानस्य वाक्यभेदाप्रसंजकत्वात् ॥ यथा "सोमेन यजेते" त्यत्र सोमलतागुणविशिष्टोयागोविधीयते ॥ यथावा "उद्भिदा यजेत पशुकामः" इति पशुरूपफलविशिष्ट उद्भिद्यागः ॥ यथाच "यदाग्नेयोष्टाकपालोमावास्यायां चपौर्णमास्यां चाच्युतोभवति" इति द्रव्यदेवताकालादिकंवाक्यांतरेणाप्राप्तमेकहेलया विधीयते ॥ एवं सगुणकर्मोत्पत्तिवाक्यफलगुणवाक्यादिषु बहुविधानं द्रष्टव्यम् ॥ उक्तंच ॥ प्राप्तेकर्मणिनानेको विधातुंशक्यतेगुणः ॥ अप्राप्तेतुविधीयंते बहवोप्येकयत्नत इति ॥ अतस्तथोक्तौ दोषाभावान्मायया बहुभवनेऽभिप्रेते तथैव वदेत् ॥ वदति तु स्वयं बहुभवनं मायाभिश्च पुरुरूपतया दर्शनम् ॥ अतोद्वैतप्रत्ययएव मायाजन्यो न तु कार्यमिति मंत्राशयः ॥ पुरोवादवैलक्षण्यस्यावश्यकत्वात् ॥ नापि शब्दगौरवस्य स्पष्टप्रतिपत्त्यर्थत्वेनादूषणत्वं वाच्यम् । सर्वत्र तथांगीकारे ॥ (अ० २ पा० २ सू० २) "एकस्यैवं पुनः श्रुतिरविशेषादनर्थकं हि स्यात्" इत्यादिपूर्वतंत्राधिकरणविरोधात् ॥ नापि मायिकविज्ञानविषयस्य मायिकत्वमेवेति नियमः शक्यवचनः । उपनेत्रादिना स्थूलोयं ककार इति प्रत्ययस्य स्थौल्यांशे भ्रमतया मायिकत्वेपि तद्विषये वर्णे मायिकत्वाभावात् । प्रसह्य तथा नियमस्यांगीकारे मूलोक्तरीत्या ब्रह्मण्यपि मायिकतापाताच्च ॥ तस्माद्यथा पूर्वोक्तस्थले स्थौल्यप्रतीतिरेव मिथ्या न तु वर्णः । तथात्र भेदप्रतीतिरेव मायिकी न तु कार्यमिति सारः ॥ दृष्टिसृष्टिवादं दूषयंति ॥ यत्तु विततेत्यादिना ॥ ज्ञानस्वरूपमेवाहुरिति सत्यार्थत्वेऽस्य ज्ञानस्वरूपं ब्रह्मस्वरूपम् ॥ अर्थस्वरूपं नामरूपव्याकरणानुरोधाद्दर्शितत्तत्पदवाच्यपरिच्छिन्नार्थरूपमित्यर्थः ॥ स्पष्टं चेदमाकरे समन्वयाद्यधिकरणेषु ॥ वासनासन्तानवादस्तु विद्वन्मंडने निराकृत इत्युत्तरभागे सम्यक्परिहरिष्यते ॥ स्वप्ने प्रकाश्यविषयस्तु मायोपादानक ऐंद्रजालिकवस्तुवदीश्वरप्रदर्शितो वक्ष्यतेऽतस्तत्र नटादिवदीश्वरस्य प्रकाशकतया कर्मकर्तृभावाविरोधेपि प्रकृते तद्विरोधे सुस्थ इति बोध्यम् ॥ समाधाने विज्ञानं यज्ञमिति ॥ यद्यप्यस्मिन्महावल्लीवाक्ये विज्ञानशब्दार्थोजीवो नतु

बुद्धिः स्पष्टं चेदं (अ० २ पा० ३ सू० ३६) "व्यपदेशाच्च क्रियायां नचेन्निर्देशविपर्ययः" इति सूत्रे तथापि तन्मतानुरोधाद्बुद्धिपरः सइत्याश्रित्यैवमुक्तम् ॥ उपनिषद्भाष्ये तैर्विज्ञानस्य कोशत्वांगीकारात् ॥ अथ बुद्धिरेव सृष्टिश्चेत् बुद्धिमंतो जीवा नाना एकएव वा ॥ न द्वितीयः शुको मुक्तो वयं बद्धा इत्यादिव्यवस्थाभंगप्रसगात् । एकमुक्तितः सर्वमुक्त्यापत्त्या शास्त्रोच्छेदाच्च ॥ आद्यश्चेदेकस्य बुद्धिः सृष्टिरूपा । अन्यतमस्य चेत्सर्वेषां जगदप्रत्ययः प्रसज्येत ॥ अविशेषात्सर्वेषामिति चेत्तत्काले सर्वेषां बुद्धिः परस्परसगतिमत्त्येवोत्पद्यत इत्यत्र किं नियामकम् ॥ यदा देवदत्तः स्वप्ने यज्ञदत्तं स्वनिकटेऽधीयानं कल्पयति तदा यज्ञदत्तोपि स्वप्ने स्वमध्यापयंतं तं कल्पयेदेवेति नहि नियमोस्ति ॥ तेन स्वप्नदृष्टांतेन पूर्वपक्षे दृष्टिसृष्टिवादस्य समर्थनं निरस्तं ज्ञेयम् ॥ अध्यारोपापवादादिकं तु पुरस्तान्निराकरिष्यते ॥ **तं गगनमिति** ॥ तं श्रोतृपुरुषं ॥ गतिबुद्धीत्यादिना कर्मत्वम् ॥ गगने नैल्यप्रत्ययस्तु वस्तुस्वभावादित्यावरणभंगादिषु ॥ अथवा शून्यवद्गाढं व्योमवद्ब्रह्म तादृशमित्यादिस्थलेषु विस्तरः ॥ तथापि तद्बापयैव तं बोधयंति ॥ **अत्रिवत्कृतस्येत्यादिना** ॥ त्रिवृत्करणोक्तिस्तु छांदोग्यानुरोधात् ॥ **सूत्रकारेत्यादि** ॥ द्वितीयस्य तृतीयपादादौ तत्कृतो यत्नइति भावः ॥ **वेदवादिभिर्नांगीकरणीय इति** ॥ द्वितीयस्य द्वितीये पादे सूत्रकृता अर्धवैनाशिकमतेशिष्टापरिग्रहादनपेक्षणीयत्वमुक्त्वा सर्ववैनाशिकमतस्यापि सम्यग्दूषिततया तत्राप्यनपेक्षणीयतया बोधनात्तत्रोक्तदूषणानामत्राप्यवताराच्चेति भावः ॥ **इदं रजतमित्यादि** ॥ इदं नैयायिकाभिमतामन्यथाख्यातिमनुसृत्योक्तम् ॥ वस्तुतस्त्वन्यख्यातिरेव स्वीक्रियते ॥ इंद्रियसम्प्रयोगजनकक्रियाविषयाद्भिन्नार्थप्रतिपत्तिरूपाया बुद्धिवृत्तेरेव विपर्यासपदार्थत्वात् ॥ अतः तृतीयस्कंधषड्विंशाध्याये (श्लो० ३०) संशयोऽथविपर्यासोनिश्चय.स्मृतिरेवच ॥ स्वापइत्युच्यतेबुद्धेर्लक्षणंवृत्तित.पृथक् ॥ इत्यत्र सुबोधिन्यां "विपर्यासोभिन्नार्थप्रतिपादकः ॥ क्रियाज्ञानयोश्च भिन्नविषयत्वम् ॥ अनेनान्यख्यातिरेव सिद्धांतइत्युक्तम्" इत्याचार्यचरणा. ॥ क्रिया शुक्त्यादिविषयिका ॥ ज्ञानं रजतादिविषयकमित्यर्थ. ॥ अन्यथा ख्यातिपक्षे तु कस्यान्यथात्वम् ॥ विषयस्य ज्ञानस्य वा ॥ नाद्यः देवदत्तस्य विपर्यासे यज्ञदत्तादेरपि तथाप्रतीत्यवश्यंभावापत्तेः ॥ द्वितीयश्चेत् रजताकार ज्ञानं शुक्तिमालंबतइति वाच्यम् ॥ तादृशज्ञाने रजतत्वं प्रकारतया भासत इति वा ॥ तथा सति शुक्त्या स्वात्मसमर्पणे रजतत्वेन शुक्तिं जानामीत्यनुव्यवसायापत्ति असमर्पणे ज्ञानस्य तदनालंबकत्वम् ॥ भवति तु तत्र रजतमहं जानामीत्येवानुव्यवसायः ॥ अयं च वादः तत्रत्यसुबोधिनीतत्प्रकाशयोः ख्यातिवादादिषु च विस्तरेण निराकृतः ॥ नापि बाह्याभिमतात्मख्यातिः स्वीक्रियते ॥ विज्ञानवादे आत्मनो बुद्धिरूपत्वात् । ख्यायमानबुद्धिरूपोपि सएवेत्यात्मख्यातिः ॥ तत्र आत्मनस्तथात्वे घटोहमित्यादिप्रत्ययापत्तिरित्यन्यत्र विस्तरः ॥ अस्माकं तु बुद्धेस्तत्त्वांतरत्वाद्विपर्यासस्यतद्वृत्तित्वेपि न सा ॥ भाट्टास्तु रजतसंस्कारवत्त्वएव शुक्तौ यथाप्रत्ययनियमात्तत्ररजतं स्मर्यंते रजतत्वं तु न स्मर्यते ।

कर्तृगतदोषात् ॥ दोषाश्चान्यचित्तत्वादयः इत्यख्यातिवादे स्वीकुर्वंति ॥ तथा सति रजतमनुभवामीत्यनुव्यवसायविरोधः ॥ तत्र स्मरामीत्यनुव्यवसायस्यानिस्यात् ॥ तदुपादानार्थप्रवृत्त्यादिविरोधश्च ॥ नहि कश्चिदपि भोज्यं स्मरन्नेव भोक्तुमारभते ॥ प्राभाकरास्तु तत्र ग्रहणस्मरणात्मकं ज्ञानद्वयं मन्यंते ॥ तत्र शुक्तिमनुभवामि रजतं स्मरामीत्यनुव्यवसायद्वयापत्तिः ॥ सर्वत्र विशिष्टज्ञाने विशेषणस्मरणमात्रेण निर्वाहापत्तिश्चेत्यादिरितरत्र प्रपंचः ॥ नाप्यनिर्वचनीयं रजतं विषयनिष्ठाविद्यया जन्यत इत्यनिर्वचनीयख्यातिः पराभिमता शक्यस्वीकारा ॥ संस्काराभावेपि तत्प्रतीतिप्रसंगात् । संस्कारप्राबल्येऽन्यथाख्यातिस्तदप्राबल्ये स्मरणं चोपपद्यत इत्यन्यत्र विस्तरात् ॥ तथा च विषयेंद्रियसंप्रयोगेण प्रथमं सामान्यज्ञाने जाते यदा बुद्धिः सत्त्वाविष्टा तदा निश्चयः ॥ सत्त्वात्संजायते ज्ञानं ॥ प्रवृत्तिंच निवृत्तिंच कार्याकार्ये भयाभये इति भगवद्वाक्यात् ॥ रजसाविष्टया तु संशयः ॥ अयथावत्प्रजानाति बुद्धिः सा पार्थ राजसीत्युक्तेः ॥ यदा तु तमोगुणाविष्टा तदा मायानुग्रहात्संस्कारप्राबल्याच्च तदनुगुणं पदार्थांतरमंतरोत्पाद्य विषयीकरोति ॥ प्रमादमोहौ तमसो भवतोऽज्ञानमेव चेति सर्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ तामसीति चोक्तेः ॥ एतदेव सर्वमभिप्रेत्य अनुमितमंतरा त्वयि विभाति नृपैकरस इत्यत्र सुबोधिन्यां "प्रत्यक्षे तु रजतं न दृश्यते । इंद्रियार्थसन्निकर्षस्य शुक्तिविषयत्वात् ॥ नहि रजतेन सह सन्निकर्षोस्ति । सतोरेव संयोगात् । सत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्यतत्प्रत्यक्षमिति प्रत्यक्षलक्षणम् । रजतं तु तदनंतरं बुद्ध्या जन्यते विषयीक्रियते । च तत्र सा बुद्धिरेव कारणं" इति "किंच अंतरा विभाति । इंद्रियार्थयोर्मध्ये भाति तन्मृषा" इति चोक्तम् । द्वितीयस्कंधनवमाध्याये च ऋतेऽर्थमित्यत्र विषयतायामायाजन्यत्वादिकं निर्णीतम् ॥ अधिकं तु सुबोधिन्यादिभ्यः पुरुषोत्तमचरणलालूभट्टादीनां ख्यातिवादख्यातिविवेकादिभ्यश्चावधेयम् ॥ एतदेवोरसि कृत्य वस्तुतश्चेत्याद्युक्तम् ॥ एवं च यथा तत्र इदं रजतमित्यत्र इदमंशेन मिथ्या किं तु रजतमेव ॥ तथात्र पुरुरूप ईयत इत्यनेन भगवदात्मकेषु रूपेषु नानात्वमेव मिथ्या न तु रूपाणीति न कोपि विरोधः ॥ सहस्राक्षे नहि शुक्तीत्याद्युक्तिस्तु परमताज्ञानात् ॥ आविर्भावः सत्कार्यवादश्च सम्यक् समर्थयिष्यते ॥ तच्च संभवतीत्यादि ॥ परमात्मनो रूपाणि मायिकानि मायिकज्ञानविषयत्वात्स्वाप्निकगजादिवदित्यनुमानेन मायिकत्वं साध्यम् ॥ तत्र हेतोः साध्यसामानाधिकरण्यं विवक्षितम् ॥ अन्यथा व्याप्त्यसिद्धेः ॥ तथाच स्वाप्निकांतर्भावेन उक्तविषयत्वनिष्ठसाध्यसामानाधिकरण्यमात्रेण न तत्सिद्धिः किं तु तेषु मायिकत्वं येन संबंधेन स्वरूपात्मकेन विद्यते तदवच्छेदकं तादृशगजादिवृत्तियद्रूपमुत्तरकाले बाधितत्वतत्तन्नियतोपादानशून्यत्वादिलक्षणम् ॥ सामानाधिकरण्येन तद्विशिष्टं यन्मायिकज्ञानविषयत्वं तेनैव तत्सिद्धिः ॥ विशिष्टस्य हेतुतांगीकारे युक्तिमाहुः ॥ एवं चेति ॥ अन्यथेति ॥ यत्र क्वचित् दृष्टसामानाधिकरण्यमात्रेण हेतुतायाः स्वीकारे ॥ ननु मायिकज्ञानविषयत्वादित्यत्र ज्ञानपदमनुभवमात्रे परमतानभ्यभिचार इति चेन्नैवम् ॥ स्वप्ने देवतादिदर्शने तदानीं-

स्वप्नेऽर्जुनाय शिवेन पुनः पाशुपताद्युपदिष्टमिति वर्ण्यते तदप्युदाहरिष्यामः ॥
अतोहेतोर्व्यभिचारितया मायिकज्ञानविषयत्वेपि रूपाणां न मायिकत्वम् ॥ देवादिवत् ॥
एतेन किं च स्वप्नादेरित्यादि अपसिद्धांतइत्यंतं निरस्तम् ॥ स्वप्नसृष्टिस्वरूपं निर्णेतुमाहुः ॥
स्वप्नेऽसतो विषयस्येत्यादि ॥ अयं भावः ॥ तृतीयस्य द्वितीयेस्मिन्पादे प्रथमा-
धिकरणे तत्स्वरूपं विचारितं तत्र (सूत्र० १) "संध्येसृष्टिराह हि" इति प्रथमसूत्रे
ज्योतिर्ब्राह्मणस्थां "नतत्र रथानरथयोगानपंथानो भवंत्यथरथान् रथयोगान्पथः सृजते"
इति श्रुतिमादाय स्वप्नेपि सृष्टेः संभवात् ॥ तस्याः सत्यत्वं पूर्वपक्षविषयोक्त्वाज्ज्योति-
र्ब्राह्मणे "स्वयंविहत्यस्वयंनिर्माय" इतिजीवकर्तृकतायाः प्रतीतेस्तां वारयितुमाह-(सूत्र०
२) "निर्मातारंचैके पुत्रादयश्च" इति ॥ एके कठशाखिनः परमात्मानं तत्सृष्टिकर्तारं
आमनंति॥ यथा कठवल्लीषु "यएषसुप्तेषु जागर्तिकामं कामं पुरुषोनिर्मिमाणः ॥ तदेव
शुक्रंतद्ब्रह्मतदेवामृतमुच्यते ॥ तस्मिँल्लोकाःश्रिताःसर्वेतदुनात्येतिकश्चन ॥ एतद्वैतत्"
इति ॥ कामाश्चात्र काम्यंतइति व्युत्पत्त्या पुत्रादयो न तु कामनाएव ॥ येयेकामादुर्ल-
भामर्त्यलोके इत्युपक्रमे ततः पूर्वं "शतायुषःपुत्रपौत्रान्वृणीष्वे"ति तेषामेव तथात्वश्राव-
णात् ॥ तथा च यएषः "स्थाणुमन्येऽनुसंयंति" इति प्राप्यतया उक्तः परमात्मा सएव
जीवेषु देहेंद्रियादिषु वा सुप्तेषु स्वप्ने जीवस्य तांस्तान्सर्वान्कामान्निर्मिमाण इति भगवत
एव नटवत्तत्कर्तृत्वं बोधितम् ॥ यथा नटः सामाजिककामविषयान्सृजते तद्वन्निर्माणस्य
कामं काममित्यनेन प्रतीतेः ॥ एतेन ज्योतिर्ब्राह्मणेपि तस्यैव कर्तृत्वम् ॥ जीवस्य तु
तदिच्छया गौणं तत् ॥ अन्यथा स्वदुःखजनकं भयादिकं न सृजेत् ॥ श्रूयते तु तत्रैव
भयादिकमपि ॥ भगवांस्तु नटः सर्पवह्निज्वालादिकमिव कौतुकार्थं तदपिकरोति ॥
दृश्यते च रत्नावल्यां चतुर्थेके राजादीनां भयद्वाराऽप्रेक्षकौतुकार्थमैंद्रजालिकेन राजगृहेषु
वह्नेर्निर्माणम् ॥ कठवल्लीवाक्यंतु निःसंदिग्धं भगवतः कर्तृतां बोधयति ॥ जागर्तीति
वचनात् "अन्यत्र धर्मादन्यत्राधर्मात्" इतिब्रह्मप्रकरणात्तदेवशुक्रंतद्ब्रह्मेति वाक्यशेषा-
त्सर्वेलोकाश्रयत्वानतिक्रमणीयत्वलिंगाच्च ॥ एवं भगवत्कृतत्वादपि सत्यत्वेप्राप्ते सिद्धांत-
माह ॥ (सू० ३) "मायामात्रं तुकार्त्स्न्येनानभिव्यक्तस्वरूपत्वात्" तुशब्दस्सत्यत्व-
पूर्वपक्षनिरासार्थः ॥ संध्येसृष्टिर्मायामात्रम् ॥ व्यामोहिका भगवच्छक्तिर्माया ॥ मायां
च तदपाश्रयामि युक्तेः ॥ तयैव जीवस्य संमोहनोक्तेश्च ॥ तन्मात्रम् ॥ तदेको-
पादानिका ॥ कुतः कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात् । देशकालौ विषयसंनिधिः
इंद्रियव्यापारः बाधाभावश्चेति कृत्स्नत्वम् ॥ तेनजगदभिव्यज्यते ॥ स्वाप्निकं तु न
तथा ॥ नापि स्वाप्निकघटादिस्वरूपं मृत्कुलालचक्रादिनियतकारणैरभिव्यज्यते ॥
तस्मात्तथा ॥ अत एव नतत्र रथा इत्यादिना तत्तद्वस्तुनोऽसत्त्वं बोध्यते ॥
सृजत इतितु सृष्टिरेवोच्यते नतु सत्ता ॥ यथा छांदोग्यब्रह्मवल्ल्यादिषु प्रपंचसृष्टि-
मुक्त्वा तत्सत्यतोक्ता । न तथात्र ॥ विस्तारस्त्वाकरेष्ववधेयः ॥ तथाचात्रद्वितीयसूत्रे
तत्सृष्टेरपि भगवत्कर्तृकतायाबोधनात्तत्कृताविच्छापूर्वकतायाःस्वतोलाभादन्यथा सार्वज्ञ्य-

स्वातंत्र्यादिभंगप्रसंगात् । कामंकाममिति वीप्सया क्रियाविशेषणत्वादरेणच इच्छापूर्वकताया वाक्यतोपि लाभात् । आवृत्त्या णमुलंतत्वादपि तल्लाभात् । व्यामोहकनटादिकृतावपीच्छापूर्वकत्वदर्शनाच ॥ किंचैवमित्यादिः नस्यादित्यंतः प्रलापोपास्तः ॥ मायिकत्वादेव तत्रकारणे सतश्चाविर्भावो नाभ्युपगम्यते ॥ नहि मायिकघटफलादीनांमृद्वृक्षादिषु पूर्वसत्वं कस्याप्यभिमतम् ॥ नच निर्मातृसूत्रस्यपूर्वपक्षसमर्थकत्वात्तैवमितिवाच्यम् ॥ तत्रतत्सृष्टिसत्यतामात्रस्यपूर्वपक्षतयातत्समर्थकतयोक्तस्यापिवास्तवस्य भगवतातत्सृष्टेर्निर्माणस्य तत्त्वाभावात् ॥ अतएव सत्यतामात्रमुत्तरत्र निराकृतं नतु निर्माणमपि ॥ अन्यथा तदपि निराकुर्यात् ॥ अतोऽप्रतिषिद्धमनुमतंभवतीतिन्यायात्तत्संमतमेव ॥ अन्यथा नविलक्षणत्वादित्यधिकरणेअभिमानिव्यपदेशसूत्रस्य पूर्वपक्षस्थत्वात् "मृदब्रवीत् । अपोब्रुवन्" इत्यादौतद्व्यपदेशोपिनाद्रियेत ॥ तस्मात्प्रत्यक्षासंदिग्धकठश्रुतिसिद्धंनिर्मातृत्वंनबाधितुंशक्यम् ॥ (अ० १ पा० ३ सू० ४२) "सुषुप्त्युत्क्रांत्योर्भेदेन" इत्यत्र ज्योतिर्ब्राह्मणस्यापिसाक्षाद्ब्रह्मपरतायाःसिद्धेश्च ॥ तच्चयुक्तमित्यादि ॥ अयमाशयः ॥ यत्तु (किंचपारमार्थिकेत्यादिनापेक्ष्येतेत्यंतं) तदसत् ॥ व्यभिचारदर्शनेनतादृशनियमस्याशक्यत्वात् ॥ पारमार्थिकस्यसूर्यस्यतदुक्तवृत्तस्य च विज्ञानंनिद्रारूपांस्वप्नाख्यबुद्धिवृत्तिरूपां च सामग्रीमपेक्षमाणंप्रागुदाहृतम् ॥ तत्रयुद्धेपराजयःकुंतीमुखात्सूर्यपुत्रताश्रवणंचेत्यादिभाविपारमार्थिकवस्तुनः वर्तमानस्येंद्रनिश्चयस्यतत्संनिहितदिव्यशक्तेश्च विज्ञानंस्वप्नद्वारैवार्जुनस्यैव तथाद्रोणपर्वणिएकोनाशीतितमाध्याये (श्लो० १) ततोर्जुनस्यभवनंप्रविश्याप्रतिमविभुः ॥ स्पृष्ट्वांभःपुंडरीकाक्ष.स्थंडिलेशुभलक्षणे ॥ १ ॥ संतस्तारशुभांशय्यांदर्भैर्वैडूर्यसंनिभैः इत्यादिनाउत्तमस्वप्नयोग्यशय्यानिर्माणमर्जुनस्यापार्थमुक्त्वा (श्लो० ५) स्मयमानस्तुगोविंद.फाल्गुनंप्रत्यभाषत ॥ ५ ॥ सुप्यतांपार्थ भद्रंते कल्याणायव्रजाम्यहम् ॥ इतिस्वापमाज्ञाप्य भगवतिस्वशिबिरंगतवति अशीतितमाध्याये (श्लो० १२) कुंतीपुत्रस्तुतमंत्रंस्मरन्नेवधनंजय ॥ प्रतिज्ञामात्मनो रक्षन्मुमोहाचिंत्यविक्रम. ॥ १ ॥ तंतुशोकेनसंतप्तंस्वप्नेकपिवरध्वजं ॥ आससादमहातेजाध्यायंतंगरुडध्वज ॥ २ ॥ इत्यादिना स्वप्नेभगवद्दर्शनं तदाज्ञयापाशुपतमंत्रलाभार्थं तेन गृहीतदक्षिणभुजस्यार्जुनस्याकाशेगमनं तत्तत्स्थलावलोकनपुरःसरमहेश्वरदर्शनं ततोमंत्रादिलाभश्चाध्यायद्वयेन निरूपितः ॥ एवमन्यत्रापिद्रष्टव्यम् ॥ मूले निध्यादीत्यादिपदं मंत्रादिसंग्राहकम् ॥ वस्तुतस्तु प्रकृतश्रुतौज्ञानविषयस्यभेदस्य मायिकत्वाच्च काऽपि क्षतिः ॥ किंच द्वितीयस्कंधनवमाध्याये ऋतेर्थमित्यत्रसुबोधिनीप्रकाशे "शुक्तिरजतादावपिबुद्धिवृत्ते.सत्यायाएवरजतरूपेणांतराख्यानादवपुवबुद्धिरेव पिधानं नतु शुक्तेः" इत्युक्तेः ॥ तदाविषयस्यैवस्रूपावृं नतुज्ञानस्यस्वरूपतस्तत् ॥ अतोज्ञानस्यमायिकत्वंमायिकविषयावगाहित्वादौपचारिकम् ॥ अतोपिनकोपिदोष. ॥ किंचप्रकृतेबहुवचनांतमायाशब्दार्थइंद्रियवृत्तिरूपज्ञानानि ॥ संध्याधिकरणादौभास्कराचार्यादिभिरुदाहृतम् "मायावयुनमभिख्या" इतिवैदिकनिघंटुवचनमप्यत्र साधकम् ॥ ऐंद्रियकज्ञानेचेंद्रियवृत्तीनां द्रुतरत्वात्सदुक्तरी-

त्वापिन शंकावकाशः ॥ तदेतदाहुः ॥ वस्तुतस्त्विति ॥ प्रत्युक्तमिति ॥ अयमाशयः ॥ यच्च तस्मादित्यादि पुष्णातीत्यंततदेवमायिकज्ञानमूलकम् ॥ पूर्ववाक्यप्राप्तेभवने प्रतीतिमात्ररूपतायाः ज्ञानेरूपेषु वा मायायाहेतुतायाश्चविधाने तथैव वाक्यभेदप्रसंगात् ॥ प्राप्तेकर्मणिनानेकोविधातुंशक्यतेगुणइतिन्यायात् ॥ अन्यथा "चित्रयायजेते" त्यादा "पशुनायजेते" तिप्राप्तपशौ चित्रत्वस्त्रीत्वरूपगुणद्वयं विधीयतइत्यादि स्वीकर्तुं शक्येत ॥ नतु दधिमध्वादिसंसृष्टप्राजापत्यादि ॥ प्रकृतश्रुतौच त्वदभिमतंपारिभाषिकमज्ञानं मायापदेनग्रहीतुमशक्यम् ॥ बहुवचनविरोधात् । शंकराचार्यैरपि प्रज्ञापरतया व्याख्यानाच्च ॥ प्रहिलत्वयातद्ग्रहणेकरणतानादरेच्च कृतेसत्यपि शरैःशातितपत्रइत्यादौ शातनक्रियायामिव एकदेशेपुरुत्वएवान्वयइति भेदस्यैवाविद्यकत्वासिद्धिः ॥ वस्तुतस्त्विंद्रियवृत्तयएवात्रमायाशब्दार्थइति असकृदवोचाम ॥ किंचेदंवाक्यंऋग्वेदेपठ्यते तत्र (अष्टक० ४ अध्याय ७ वर्ग ३० ऋक् १) "स्वादुष्किलायं मधुमाँ उतायं". इत्याद्येकत्रिंशदृचे सूक्ते पंचसोमपरा ऋचउक्त्वा षष्ठीमारभ्येंद्ररूपेण परमात्मानिरूपितः ॥ तत्र (ऋक् ७।८) "इंद्रप्रणःपुरएतेवपश्यप्रनोनयप्रतरंवस्योअच्छ ॥ भवासुपारोअतिपारयोनोभवासुनीतिरुतवामनीतिः ॥ ७ ॥ उरुंनोलोकमनुनेषिविद्वान्स्वर्वज्ज्योतिरभयंस्वस्ति ॥ ऋष्वातइंद्रस्थविरस्यबाहूउपस्थेयामशरणाबृहंता ॥ ८ ॥" इत्यादिऋग्भिः हेइंद्रपरमेश्वर त्वं पुरएतेव पुरतो गंतेव नोऽस्मान्प्रकर्षेण पश्य ॥ यथा मार्गेयूथाग्रेसरः स्वरक्ष्यान्पश्यति तथा पश्येत्यर्थः ॥ तथावस्योवसीयः ॥ त्वत्सेवानुकूलंश्रेष्ठंधनं अच्छ आभिमुख्येन प्रतरं प्रकृष्टतरं नः प्रणय अस्मान् प्रापय ॥ तथा सुपारः सुष्ठुपारयिता संसारदुःखेभ्यस्तारयिता भव तथा नः अस्मान् स्तोतॄन् अतिपारयः कामक्रोधादिशत्रून् जन्ममरणादिक्लेशान्वा अतिक्रामय सुनीतिः शोभननयनश्चास्माकंभव ॥ उतापि च वामनीतिर्वामानां वननीयानां धनानां नेता भव ॥ यद्वाऽस्मदर्थं श्रेष्ठप्रापणो भव ॥ ७ ॥ तथा हे इंद्र परमेश्वर विद्वान् सर्वज्ञः त्वं उरुं विस्तीर्णं लोकं अक्षराख्यं स्वं धाम नोऽस्माननुनेषि अनुगमय ॥ तदेव स्पष्टयति स्वर्वत् ॥ यच्च दुःखेन संभिन्नं नच ग्रस्तमनंतरं ॥ अभिलाषोपपन्नं च तत्सुखं स्वःपदास्पदमित्युक्तलक्षणकसुखविशिष्टज्योतिः स्वप्रकाशं अभयं अद्वितीयत्वात् भयरहितं तत्स्वस्ति क्षेमेणानुनेषि अस्माननुगमय ॥ हे इंद्र स्थविरस्य सर्वतो वृद्धस्य ते तव संबंधिनौ ऋष्वादर्शनीयौ बृहंता महांतौ बाहू संबाहुभ्यांधमतीत्यादिश्रुतिप्रसिद्धौ त्वदीयौ हस्तौ शरणा रक्षकौ शरणतया उपस्थेयाम ॥ उपतिष्ठेम सेवेमहि ॥ इत्याद्यर्थबोधिकाभिः अप्राकृताशेषविशेषशालितयैव निरूपणात् ॥ निर्विशेषताया अभावात् ॥ निर्विशेषस्य भवनासंभवशंकामुत्थाप्य तत्समाधानार्थं वाक्यशेष इति कल्पनं शशस्य शृंगभंगभिया नेत्रनिमीलनमिति कल्पनासगंधम् ॥ अतः पूर्वार्द्धे मायापदमनुक्त्वा उत्तरार्धं एव तथोक्त्या भेदज्ञानमेव मायाकरणकं नतु भवनमपीत्यध्यवसीयते ॥ उत्तरार्द्धे विवरणरूपतांगीकारे मानाभावाच्च ॥ किंचेदं वाक्यं बृहदारण्यकेऽपि चतुर्थप्रपाठके मधुब्राह्मणाख्ये पंचमब्राह्मणे पठ्यते ॥ तत्रोपक्रमोपसंहारौ केचिदत्रातिविमलप्रज्ञा इत्यत्रावरणभंगे

न्तेर्थमित्यत्रसुबोधिनीप्रकाशेच श्रीपुरुषोत्तमचरणैर्विचारितौ ॥ तौयथा "तत्रचमैत्रेयी-ब्राह्मणोक्तस्यात्मन पृथिव्यादिषुविद्यमानत्वममृतत्वब्रह्मत्वसर्वात्मकत्वचोक्त्वातत पुर-श्चक्रेद्विपदइत्यादिनापुराकरणतासुप्रवेशसर्वस्यतत्स्वृत्तत्वचोवाद ॥ तेनप्रासेमेदेसर्वसमा-प्रोषितोस्मिसर्वं इतिचब्राप्तिकृतागौणीसर्वात्मकताभविष्यतीतिशकानारणायरूपरूप-मितिमत्र पठ्यते ॥ अथवैहरयोयवैदशाचसहस्राणिचबहूनिचानतानिचेतिविश्रियतेच ॥ ततोयस्यैवरूपता अत्र विवृताब्राह्मणोपक्रमेचोक्ता ॥ तस्यैवतदेतद्ब्रह्मापूर्वमनपरमनन्तरम-बाह्यमित्यनेनतत्स्वरूपमुक्त्वाअयमात्माब्रह्मसर्वानुभूरित्यनुशासनमित्युपसंहृतम् ॥ एव-चात्रविचारेउपक्रमोपसंहारविवरणेषु मायाविनैवात्मन सर्वरूपत्वाभ्यासात् ॥ स्वरूप-कथनेपूर्नेत्यादिनिषेधेन प्राप्तस्यशून्यवादभ्रमस्यवारणायसर्वानुभूरितिसर्वानुभवकर्तृत्व-रूपोपपत्तिकथनाच्च ॥ भ्रमरहितस्यात्मन सर्वभूतरूपताश्रुत्यन्तरोक्तस्वेच्छाकृतैवेति विनिगमनोपपत्तेरपि मायापदेनेंद्रियवृत्तिरेवतत्रग्राह्या" इति ॥ तस्मान्नानेन विवर्त-वादस्य पुष्टि ॥

पुराणेषु तु प्रपचस्ययन्मायिकत्ववर्णनंतद्वैराग्यार्थं ॥ दोषदृष्टेर्वैराग्य हेतुत्वात् ॥ मायिकत्वमपि मायिकसदृशत्वात् ॥ तदपिकार्य्यात्म नातिरोभावशालित्वात् ॥ अन्यथा "तदात्मानँस्वयमकुरुत" "सच्चत्यच्चाभवत्" इत्यादिश्रुतिविरोध. स्यात् ॥ नच भूतार्थवादस्य तस्य कथस्वार्थे तात्पर्याभावइतिवाच्य ॥ आविर्भावतिरोभावशा लित्व एवतात्पर्य्याभ्युपगमात् ॥ एतेन पुराणेषुतुप्रपंचस्येत्यारभ्य-वक्तुमुचितमित्यादिकदत्तोत्तर ॥

सहस्राक्षे *पुराणेषुतुप्रपचस्यस्यार्थं वक्तुमुचितमित्यत भाग निरस्यति ॥ पुराणेष्वि-त्यादिना ॥ दत्तोत्तरमित्यतेन ॥ अयभाव ॥ यथापुराणेषुमायिकत्वमुक्त तथा सत्यत्वमपिबहुशउक्तमेव ॥ यथा तृतीयस्कधे (अध्याय० १० श्लोक १२) विश्वहि ब्रह्मतन्मात्रसस्थितविष्णुमायया ॥ ईश्वरेणपरिच्छिन्नकालेनाव्यक्तमूर्तिना ॥ यथेदानीं तथाचाग्रेपश्चादप्येतदीदृशमिति ॥ अष्टमस्कधेपि (अध्याय० ६ श्लोक १०) त्वय्यग्र आसीत्त्वयि मध्य आसीत्त्वय्यतआसीदिदमात्मतन्त्रे ॥ त्वमादिरन्तोजगतोस्य मध्य घटस्य मृत्स्नेवपर परस्मात् ॥ इति ॥ दशमे च (अ० २ श्लो० २८) त्वमेकएवास्यसत प्रसूतिस्त्वसनिधान त्वमनुग्रहश्च ॥ त्वन्मायया सवृतचेतसस्त्वापश्यतिनानानविपश्चितोये ॥

---

* पुराणेषुतु प्रपञ्चस्यमायिकत्वबहुश उक्त तत्तुविदुषांसुविदितमितिनास्माभिरुपन्य-स्तम् ॥ यत्तु मायिकत्वपुराणेषुवैराग्यार्थमुदीर्यते इतितद्दुष्टवाक्य तन्नोच्यते ॥ कथ भूतार्थ वादरूपस्यतस्यस्वार्थतात्पर्याभावउच्यते ॥ किञ्च प्रपञ्चस्यवस्तुतोमायिकत्वाभावे त्वदीयसगत स्त्वद्गोष्ठीकुशलोनैतैर्वाक्यैर्वैराग्यमाक्ष्यादिति परमतस्थपुरुषाणांबोधार्थतानिवाक्यानीति-वाच्यम् ॥ नचतेषामोमाधिकाररवत्सम्मतइतितानिवाक्यानि०यर्थान्यप्रमाणानिचस्युः तस्मा-च्छ्रौतवाक्यार्थोपबृंहक त्वमेवैतेषांवक्तुमुचितम् ॥

इति ॥ अत्र असेति प्रत्यक्षस्य जगतः सत्त्वमेवोक्त्वा नानात्वदर्शनस्यैव मायासंवरणहेतु-त्वमुक्तम् ॥ एकादशेपि (अ० २४ श्लो० १८) प्रकृतिर्ह्यस्योपादानमाधारः पुरुषः परः ॥ सतोऽभिव्यंजकः कालोब्रह्मतत्त्रितयंत्वहमिति ॥ एवंस्थलांतरेप्यपि ज्ञेयम् ॥ यथा-विष्णुपुराणेप्रथमेंऽशे समाप्त्यध्याये (अध्या० २२ श्लो० ५९) तदेतदक्षरंनित्यंजगन्मु-निवराखिलम् ॥ आविर्भावतिरोभावजन्मनाशविकल्पवदिति ॥ वचनांतराणिस्वाविर्भाव-तिरोभावनिरूपण उदाहरिष्यामः ॥ ननु एवंसति पुराणवचसांपरस्परविरोधपराहतत्वाद-प्रामाण्यमापद्येतेतिचेन्नैवम् ॥ मायिकत्वबोधकानांतेषां वैराग्यजननतात्पर्यकत्वेन विरो-धाभावात् ॥ नच पौराणत्वाविशेषादन्यतरपक्षपातस्याशक्यत्वं शक्यम् ॥ श्रुतिषु "एतदात्म्यमिदँ सर्वं तत्सत्यं" इत्यादिवाक्यशतेन सत्यतायाबोधनेन मायिकत्वस्य मिथ्यात्वस्य च तत्रक्वाप्यश्रवणेन श्रुतिसंवादिनांस्वार्थेतात्पर्यम् ॥ तदसंवादिनामितरत्रेति कल्पनस्यैवावश्यकत्वात् ॥ अन्यथापूर्वतंत्रेस्मृतिपादे (सू० ३) "विरोधेत्वनपेक्षं स्यादसतिह्यनुमानं" इति न्यायादप्रामाण्यापत्तेः ॥ अत्रचायं ममवेदांतचिंतामणौ संग्रहः ॥ दृढाहंतापददेहंगेहादिममतास्पदम् ॥ यदासत्यंविजानीयात्तविरज्येतकश्चन ॥ वैराग्यार्थमसत्यत्वंपुराणेषुक्वचित्क्वचित् ॥ अभिप्रेत्यतिरोभावंकुत्रचित्संसृतिंतथा ॥ क्रीडा-मयेप्रभोरस्मिन्संयोगविगमास्पदे ॥ तिरोभाविनिनोरागः कर्तव्यः क्षणिकेवृथा ॥ तथाहि ॥ पुराणंहिमित्रसंमितं ॥ यथाहि मित्रं कथमपिबोधयित्वाऽहितवस्तुन्यरुचि-मुत्पाद्य ततोनिवर्तयति तथा तदपि ॥ यथाच मित्रं कदाचिदुन्नहस्थलेभुंजानं प्रति विषंभुंक्ष्वमाऽस्य गृहेभुङ्क्थाइतिब्रूते न तस्याविषभोजने तात्पर्यम् किंतु तत्रभो-जनस्यपरित्यागएव ॥ तथाच मायिकत्वंक्वचिद्वैराग्यार्थं क्वचित्तिरोभावमभिप्रेतत्य कुत्रचिच्च तन्निवृत्तसंसृतिमभिप्रेत्योक्तम् ॥ यदिच केवलव्यामूढोहमहंताममतास्पदं शरीरदारागारादिकंसत्यत्वात्सार्थेदिकंविजानीयात्तर्हियद्वाक्यतोधर्मेइतीत्वरस्थितोनमन्यते-तस्यनिवारणजनइतिन्यायान्नैव विरज्येत प्रत्युत तदेवाधिकतरमभिनिविशेत ॥ मायिकत्वंविवर्तत्वंस्वप्नाभत्वं वा श्रुत्वातु तत्रविरज्यमानः भगवत्सेवात्पूर्वाणादौप-तमानः सर्वंस्वमब्रह्मरूपतांश्रुत्वा ब्रह्मणएव तत्तद्रूपत्वात्सर्वत्रसत्यतांसम्यग्विजानीयात् ॥ असत्येवर्त्मनिस्थित्वाततः सत्यंसमीयतइतिन्यायात् ॥ किंच सत्यस्यापिप्रपंचस्य पराभिध्यानाद्राविर्भावतिरोभावौतु भवतएव ॥ तथाच सत्यत्वंताभीष्टमपि दारादिकं प्राप्तेतिरोभावकाले क्षणमपि नैवावतिष्ठते ॥ अतस्तिरोभावमभिप्रेत्यापि तथावचनं ॥ यथाराज्ञास्वेच्छयाऽधिकारविशेषेस्थापितंममैवायंग्रामादिरित्यभिमत्याप्रमाद्यतंप्रति तन्मि-त्राणांभयंतत्पूर्वंनासीत्तापिपरतः स्यात् मध्येपिस्वप्नइवैवायंविभवइतिवचनं ॥ एवंच यथामायिकाआम्रादयोविवर्तारजतादयः स्वप्नसमृद्धयश्चमिथ्यात्वाच्चिरनानुभूयते ॥ तथेदमपितिरोभावादित्यल्पकालिकानुभवविषयत्वादिदमायिकमुच्यते ॥ क्रौर्यादिमत्वा-त्सिंहोमाणवकइव ॥ तथादेहगेहादिप्रपंचेऽनुभूयमानमहंताममतारूपं स्वप्नमायामनोरथ-सब्रह्मचारिणंसंसारं मृषाभिप्रेत्य तदाश्रयस्यकायनिकायमुखस्य मायिकतादि प्रतिपाद्यते

वैराग्यार्थं ॥ देशवर्तिमनुष्याणांसाहसिकत्वेपि कालिंग स्साहसिकइतिवत् ॥ अतो वैराग्योत्पादनएव तेषांतात्पर्यं ॥ अतएव यत्रपरित्यागादिप्रतिपादकमवांतरप्रकरणम् ॥ तत्रैवतथोच्यते ॥ तथा एकादशस्कंधेसप्तमाध्याये त्वंतुसर्वंपरित्यज्यस्नेहंस्वजनबंधुषु-त्याद्युपदिशताभगवता विद्धिमायामनोमयमित्याद्युक्तम् ॥ एवं कानिचिदवांतरप्रकरणानि तादृशवचसांमायिकत्वं पुराणेष्वितिकारिकावरण भंगेश्रीपुरुषोत्तमचरणैर्दर्शितानि ॥ तथादिशाऽन्यत्रापिनिर्णेयं ॥ (तन्नुविदुषांसुविदित) मितिनिष्ठांतप्रयोगस्तु चिंत्यः ॥ यत्तु (कथंभूतार्थवादरूपस्यतस्यस्वार्थेतात्पर्याभाव) इति ॥ तत्स्वग्रंथास्मरणात् ॥ शंकराचार्यैरुपनिषद्भाष्येषु तत्रतत्र "त्रयोहोद्गीथेकुशलाबभूवुः ॥ उशस्तिरहचाक्रायण इभ्यग्रामेप्रद्राणकउवास ॥ भृगुर्वैवारुणिः" इत्याद्याख्यायिकानां भूतार्थवादरूपाणां स्वार्थे तात्पर्याभावस्य दर्शितत्वात् ॥ अस्माकंतु ॥ विषयतारूपप्रपंचस्यमिथ्यात्वात्न तेषांस्वार्थेतात्पर्याभावोऽपि ॥ स्पष्टं चेदं ऋतेर्थमित्यादिस्थलेषु सुबोधिनीतत्प्रकाशयो. ॥ यच्च (त्वत्संगतस्त्वद्गोष्ठीकुशलोनैतैर्वाक्यैर्वैराग्यभाक्स्या) दित्यादि तन्न ॥ सत्यत्वेपि तिरोभावशालित्वात्प्रथमस्कंधादिषु यथाक्रीडोपस्कराणांसंयोगविगमाविह ॥ इच्छयाक्रीडितुः स्यातांतथैवेशेच्छयानृणामित्यस्मदिच्छानधीनसंयोगविगमास्पदत्वाद्यासक्तमगतानां सत्यत्वं जानतामपि सुखेन वैराग्यसिद्धेः ॥ तर्हिवैराग्यार्थमपितथाकथनंकिमर्थमितिचेत् सुदृढसंसारासक्तिसमेधितदुरपोहव्यामोहभाजांमदाधिकारिणांतथोपदेशमंतरा तदसिद्धेरुचितमेव मिथ्यावत्तथाकथनमितिदर्शितंप्राक् ॥ अतोनवाक्यानांवैयर्थ्यमप्रामाण्यंवा ॥ तैस्मात्तेषांश्रुत्युपबृंहकत्वं ॥ श्रुतिषुतदभावात् ॥ एवपरतानंगीकारे श्रुतिस्मृतिपुराणानांविरोधोयत्रदृश्यते ॥ तत्रश्रुतिर्बलिष्ठाम्याद्वयोर्द्वैधेस्मृतिर्वरेतिलघुव्यासस्मरणाद्व्यवस्थांतरापत्तेः ॥

किंचासतोहेतुत्वादर्शनाच्चासतोऽज्ञानस्यजगद्धेतुत्वंसंभवति ॥ नच मायायाअसत्वंनांगीक्रियते नासदासीदित्यादिश्रुतेरितिवाच्यं ॥ नासदासीदितिश्रुतेर्मायायाअसद्विलक्षणत्वप्रतिपादनपरत्वे मानाभावात् ॥ ननु मायायास्तत्कार्यस्यचशुक्तिरजतस्यसत्यत्वेबाधानुपपत्तिः ॥ नहिसत्यस्यवस्तुतोबाधःसंभवति ॥ त्रिकालाबाध्यस्यैव सत्यत्वात् असत्यत्वेच शशशृंगादिवन्नप्रतीयेत ॥ शुक्तिरजतादिकंचप्रतीयते ॥ शुक्तिसाक्षात्कारेणतदवच्छिन्नचैतन्यसाक्षात्कारेणबाध्यतेऽतः सदसद्भ्यामनिर्वचनीयमेव एवं मायापि नसद्रूपा नाप्यसद्रूपा किंत्वनिर्वचनीयेवेति चेन्न ॥ यदि शुक्तौ रजतमुत्पद्यत इत्यसत्संमतंस्यात्तदा तस्यसत्यत्वासत्यत्वयोरसंभवं प्रदर्श्य परिशेषादनिर्वचनीयत्वं साधयित्वा मायायां तादृश्यां तेनानिर्वचनीयत्वप्रतिपादनं स्याच्चदेव नसंभवति ॥ शुक्तौरजतोत्पादकसामग्र्यभावेन तदुत्पत्तेरसंभवात् ॥ नच सादृश्यदर्शनादिसध्रीचीनाऽविद्यातदुत्पादिकेतिवाच्यं ॥ आपणस्थरजतस्यापि त्वन्मतेऽविद्याजन्यत्व-

स्वीकारेणास्याप्यविद्याकार्य्यत्वेनाविशेषात्तद्रजतवदस्याप्यर्थक्रिया- कारित्वापत्तेः ॥ नच तस्यमूलाविद्याकार्य्यत्वं शुक्तिरजतस्य च तूला- विद्याकार्य्यत्वमितिविशेषइतिवाच्यं ॥ वेदबाह्यायास्तादृशकल्प- नायाअनादरणीयत्वात्स्वप्नस्यापि नार्थक्रियाकारित्वं ॥ ननु यदि स्वप्नस्यार्थक्रियाकारित्वंनस्वीक्रियते तदा यदाकर्मसुकाम्येषुस्त्रियं स्वप्नेपुपश्यति समृद्धिंतत्रजानीयात्तस्मिन्स्वप्ननिदर्शने इत्यादिश्रुति- विरोधइतिचेन्न ॥ तत्रस्वप्नेपुपश्यतिस्वप्ननिदर्शने इतिकथनेन तादृशस्वप्नज्ञानस्यैव समृद्धिहेतुत्वं प्रतीयते ॥ नतुस्वप्नस्य ॥ ज्ञानस्य- चसत्यत्वात्ततएवसत्यसमृद्धेःसंभवःइत्थं च नासतःसद्धेतुत्वं नापि श्रुतिविरोधः

सहस्राक्षे *यत्तुअसतइत्यादिं अद्वैतसिद्धौस्थितमित्यंतं भागं दूषयंति ॥ किंचास- तइत्यादिना नापिश्रुतिविरोधइत्यंतेन ॥ अत्रायंभावः ॥ अज्ञानस्यासत्वेतज्जगद्धेतुत्वं न युक्तंश्रुत्यामायायाः सदसद्रूपतायाअसिद्धौ युक्त्यैव तत्सिद्धिमाशंकते ॥ नन्विति ॥ शुक्तिसाक्षात्कारेणेति ॥ चैतन्यसाक्षात्कारेसौहेतुः ॥ तादृश्यंतेनेति ॥ रजतवत्सबाधायां प्रतीतिविषयं च तेन परिशेषेण अत्रायंभावः अज्ञानस्यासत्वेसज्जगद्धेतुत्वंनयुक्तं ॥ " कथ- मसतः सज्जायेत " इतिश्वेतकेतुविद्यायांश्रवणात् ॥ जगत्सत्तात्विहसदित्युक्त्यासिध्यति ॥ स्वमेकएवास्यसतः प्रसूतिः । सतोभिव्यंजकः कालइत्याद्युपबृंहणाच्च ॥ अज्ञानस्यसदसत्त्वां- गीकारेपि नेष्टसिद्धिः ॥ त्वन्मते सदसत्त्वाभ्यामनिर्वचनीयस्यापिशुक्तिरजतादेरर्थक्रिया- कारित्वाभावात् ॥ नहि तेन रजतेन पात्रभूषणादि शक्यं कर्तुं ॥ तथानाज्ञानादपिकार्यं निष्पद्येत ॥ किंच तस्मिन्नसत्वांशेन अद्वैतस्येव सत्वांशेन द्वैतस्यापि सार्वदिकत्वमापद्येत ॥ तथाच स्वमतहानिर्भेदाभेदवादप्रवेशश्च ॥ नापि ब्रह्मातिरिक्ताऽनाद्यविद्याबोधिका काचिच्छ्रुतिरस्ति ॥ कुतस्तरां तस्याः सदसत्त्वबोधिकासा ॥ नच नासदासीदितिश्रुतिस्तथा शंक्या ॥ तस्याः सृष्टेः पूर्वंस्थूलसूक्ष्मकार्यस्वकारणात्पृथक्सत्त्वनिषेधमात्रपरत्वात् ॥ इदंहि वाक्यं तैत्तिरीयब्राह्मणे द्वितीयाष्टकेऽष्टमप्रपाठके नवमानुवाकेपठ्यते " नासदासी- न्नोसदासीत्तदानींनासीद्रजोनोव्योमापरोयत् ॥ किमावरीवः कुहकस्यशर्मन्नम्भः किमासी- द्गहनंगभीरम् " ॥ नमृत्युरमृतंतर्हिन । रात्रियाअन्हआसीत्प्रकेतः । आनीदवातंस्वधया तदेकं । तस्माद्धान्यंनपरःकिंचनास । तमआसीत्तमसागूढमग्रेप्रकेतंआनीदवातंस्वधयात- देकंतस्माद्धान्यंनपरः किंचनासतम आसीत्तमसागूढमग्रेप्रकेतं सलिलँसर्वमाइदम् । अर्थस्तु तदानीं सृष्टेः पूर्वं न असत् सूक्ष्मं कार्यं आसीत् ॥ नो सत् स्थूलं कार्यं कारणे

* यत्त्वसतोहेतुत्वदर्शनान्नासतोऽज्ञानस्यकार्यंजगत्सम्भवतीत्याह ॥ तन्नयुक्तम् ॥ अज्ञानस्यासत्त्वानङ्गीकारात् ॥ नासदासीदितिश्रुतेः ॥ सद्विलक्षणस्यतुकूटनार्षापणस्यादेर्हे- तुत्वंदृष्टम् ॥ अतएवमिथ्याभूतस्वप्नहेतुत्वपरा यदाकर्मसुकाम्येषुस्त्रियंस्वप्नेनुपश्यति ॥ समृद्धिं- तत्रजानीयात्तस्मिन्स्वप्ननिदर्शने इतिश्रुतिःसंगता ॥ विस्तरेणचैतदद्वैतसिद्धौस्थितम् ॥

था आसीत् ॥ सदेवेत्यादिश्रुतिभिः जगतः पार्थक्येन स्थित्यभावात् ॥ सदेव प्रपंचयति ॥ नासीद्रज. ॥ प्रेरकोरजोगुणोनासीत् ॥ उपलक्षणविधयान्नयोपिगुणा नासन् ॥ अथवा रजःशब्देन तार्किकप्रतिपन्नभूतचतुष्टयपरमाणवः ॥ स्वहृवरजांसियांतीत्यादौतथादर्शनात् ॥ नो व्योम आकाशोपलक्षितसर्वभूतानां निषेधः ॥ भूताकाशस्यैवायंनिषेधो नत्वक्षरस्य ॥ अग्रे "योअस्याध्यक्षः परमेव्योमन्" इतिश्रवणात् ॥ उपलक्षणविधया तार्किकप्रतिपन्नानि आकाशकालदिगात्ममनांसि नासन्निति वा ॥ अपरो यत् यो भौतिकप्रपंचः सोपि नासीत् ॥ एवं भूतभौतिके निषिध्य आवरकमायां निषेधति किमावरीवः किं आवृणुयात् ॥ आवरणीयाभावात् ॥ कुह कुत्र आश्रये ॥ कस्यशर्मन्कस्यसुखनिमित्तं ॥ कार्याश्रयप्रयोजनाभावात्सानासीदेवेत्यर्थः ॥ अथ तैत्तिरीयसंहिता (कां० ७ प्र० १ अनु० ५) "आपोवाइदमग्रेसलिलमासीत्" इतिश्रुत्यातदाजलमासीदितिभ्रमः स्यात् तद्वारणायाह ॥ अंभः किमासीत् ॥ गहनंप्रवेष्टुमशक्यम् ॥ गभीरं अत्यंतमगाधं अंभः किमासीत् ॥ नैवासीदित्यर्थः ॥ नमृत्युः तर्हिप्रलयकालेप्राणिनामभावात् मृत्युर्नासीत् ॥ अमृतंजीवनंनासीत् ॥ जगतस्तदानीमव्याकृतत्वात् ॥ मरणजीवनव्यवहारो नासीत् ॥ राज्याः प्रकेतः चिह्नंचंद्रनक्षत्रादिकंनासीत् ॥ अतः प्रकेतः चिह्नं सूर्यादिकंनासीत् ॥ कालज्ञापकंकिमपिनासीदित्यर्थः ॥ तर्हिकिमासीत्तत्राह ॥ आनीदवातं तत् शास्त्रप्रसिद्धं एकं अद्वितीयंस्वधयाकार्यमात्रस्यस्वशक्त्यास्वस्मिन्कारणेधारणेन अवातंवायुरहितंनिश्चलं आनीत् अचेष्टत ॥ अंतारमणात् ॥ इदमेवविरुद्धधर्माश्रयत्वं श्वासोच्छ्वासादिरूपवातंविनाप्राणनस्यचेष्टायाश्चलोकविरुद्धत्वात् ॥ एकपदस्यमुख्यार्थत्वशंकांवारयति ॥ तस्माद्धान्यपरः किंचनास ॥ तस्मात् अद्वितीयब्रह्मणः ह स्पष्टं ॥ अन्यत् भिन्नं ॥ परः परं उत्कृष्टं च ॥ किंचन किमपि ॥ न आस नैवासीत् ॥ एतेन ब्रह्मातिरिक्ताऽनाद्यविद्यादिकं तदानींप्रतिषिद्धं ॥ तथाच नाऽनया श्रुत्या तस्यअनिर्वचनीयत्वसिद्धिः ॥ "किंतदानींतस्मैसह्योवाचनसन्नासन्नसदसत्" इतिसौवालश्रुत्या तदानींसदसतोपि निषेधाच्च ॥ अग्रेपि तमआसीदिति तमःशब्देन सर्वाच्छादकं ब्रह्मैव पूर्वं तदेकशब्दाभ्यामुक्तं निरूप्यते ॥ आसमंतात् इदं नामरूपाभ्यां व्याकृतं सर्वंजगत् अग्रेसृष्टेः पूर्वं अप्रकेतं अप्रज्ञायमानं सलिलंकारणादविभक्तंतमसा सर्वाच्छादकेन ब्रह्मणा गूढंतिरोभावितं आसीदिति तदर्थात् ॥ स्पष्टंचेदंसुबोधिनीतत्प्रकाशयोर्ग्रंथांतरेषु च ॥ नापिमूलेपूर्वपक्षे उक्तरीत्यारजतदृष्टांतेनानिर्वचनीयत्वसिद्धिः ॥ श्रौतदर्शने अश्रौतस्याज्ञानस्यतत्रसदसत्त्वस्यचानादरणीयत्वात् ॥ रजतसपक्षकानुमाने हेत्वभावात् ॥ सपक्षस्यापि पक्षे प्रवेशाच्च ॥ नापि तस्यास्तादृशरजतकारणत्वात्कारणस्य कार्यसजातीयत्वाच्चतत्सिद्धिः ॥ तूलाविद्यायाएवतत्सिद्धिप्रसंगात् ॥ गोमयवृश्चिकादौव्यभिचारदर्शनेनानैकांतिकत्वाच्च ॥ किंच शुक्तिरजतमपिनासदसत्त्वाभ्यामनिर्वचनीयं ॥ सत्यायाएवबुद्धेः प्रकृतिगुणतमसाविष्टायारजतरूपेणख्यानात्तत्रबौद्धकल्पितमेवसत्त्वं ॥ वस्तुतस्त्वसत्त्वमेवेतिनिर्वचनात् ॥ यत् द्रव्यादिकं कल्प्यते तत्सत्ताविशिष्टमेवकल्प्यते ॥ प्रतिनियतशौक्ल्यादिविशिष्टमिवरजतादिकं ॥ नहिकल्पितेरजते शौक्ल्यंवास्तवं ॥ तथारजतादौ सर्वत्रसत्तापि न वास्तवी ॥ शशशृंगादेस्तु वाचनिक्येव-

सत्ता ॥ अतोवचसैव तथाव्यवहारः ॥ अथ शशशृंगादिकमपि स्वप्नेकदाचिद्दृश्यते इति चेत्तर्हि अत्यंतासतोप्युपलंभादुपलब्ध्यापि नरजतादेरांशिकसत्वसिद्धिः ॥ अज्ञानंरजतकल्पमितिचेत् कीदृक्स्वरूपकस्यसत्या बुद्धिः किमियगुणाविष्टा तदज्ञानं कल्पयतीति प्रश्नोप्युत्तरणीयः ॥ किंच आपणस्थशुक्त्यधिष्ठानकरजतयोरविद्याकार्यत्वादविशेषः प्रसज्येत ॥ मूलाविद्यातूलाविद्यादिकल्पनंतु तथाबोधकश्रुत्याद्यभावान्निर्मूलम् ॥ अतोऽसतोऽज्ञानस्यनहेतुत्वं ॥ नापिकूटकार्षापणवद्धेतुता शंक्या ॥ ताम्रभिन्ननिकृष्टधातुजन्ये ताम्ररससेचनादिना ताम्रमयतया प्रतीयमाने कूटकार्षापणे अशीतिगुंजामितताम्ररूपत्वाभावेपि सत्तायामनपायात् ॥ नहि आरकूटघटितहाटकवत्प्रतीयमानमपि हेममुद्रादिकंशुक्तिरजतादिवदसत्यमितिशक्यंवक्तुम् ॥ तस्मात्सदविलक्षणस्यतस्यार्थक्रियाकारित्वं युक्तमेव ॥ अथनटेनमंत्रादिनाकल्पितंतात्कालिकमात्रव्यवहारपात्रंद्रव्यंदृष्टांतीक्रियेत तथापि तत्रमंत्रादियुक्तिरूपामायासत्या तत्कल्पितंवस्त्वेवासत्यं ॥ तथात्रमायाकल्पनहेतुः सत्यंमायांतरमापद्येत ॥ वस्तुतस्तु तत्रापिद्रव्यमिदमितिविपर्यासवृत्तिमतीसत्यामतिरेवसतोव्यवहारस्यकारणं ॥ तत्रमायिकत्वनिश्चयोत्तरंव्यवहाराभावात् ॥ एवंस्वप्नदृष्टांततोपिनहेतुता ॥ तस्यार्थक्रियाकारित्वेस्वाप्निकभोजनादिनातृप्त्याद्यापत्तेः ॥ भयादिकारणंतु सिंहादिज्ञानमेव नतुस्वाप्निकसिंहादयः ॥ वास्तवसिंहादिसन्निधानेपितदज्ञानेभयाद्यनुत्पत्तेः ॥ ज्ञानंचसत्यमित्यदोषः ॥ "यदाकर्मसुकाम्येषुस्त्रियंस्वप्नेषुपश्यति ॥ समृद्धिंतत्रजानीयात्तस्मिन्स्वप्ननिदर्शने" इतिश्रुतिरपि "पश्यति निदर्शन" इत्युक्त्या ज्ञानमेवसमृद्धिहेतुतयावदति ॥ किंचकाम्यकर्मणामपिफलदाताभगवानेव ॥ फलमत इतिन्यायात् ॥ सएवचस्वप्नसृष्टिनिर्माता ॥ अतः सएव यथायथं तत्तत्प्रदर्शनेन तत्तत्फलंसूचयति ॥ एवमेवाभिप्रेत्य सूत्रितं भगवता तृतीयस्यद्वितीये (सू० ४) "सूचकश्चहितच्छ्रुतेराचक्षतेचतद्विदः" इतिस्वप्नस्तुनसदसद्रूपः ॥ मायामात्रंत्विति सौत्रमात्रपदविरोधात् ॥ श्रुतौ स्त्रियंस्वप्नेनुपश्यतीत्यपपाठोपन्यासस्तु पुस्तकप्रत्ययेनाध्ययनात् ॥ उक्तसूत्रे स्वव्याख्येपिस्वप्नेष्वित्येवपाठः ॥ यत्रचच्छांदोग्येसप्तमप्रपाठके प्राणविद्याद्यग्रे (खं० २) इदंवाक्यंपठ्यतेतत्रापितथैवपाठः ॥ विस्तरेण चैतदद्वैतसिद्धिनिरासे प्रस्थानरत्नाकरे प्रकाशादिषु च निर्णीतम् ॥

किंच "सन्मूलाःसोम्येमाःसर्वाःप्रजाःसदायतनाःसत्प्रतिष्ठाः कथमसतः सज्जायेत तत्सत्यं यदिदं किंच तत्सत्यमित्याचक्षते" इत्यादिश्रुतिशतैरपि सतएवजगद्धेतुत्वं प्रतीयते नासतः अतोब्रह्मणएव जगद्धेतुत्वं नमायायाः श्रुतिविरोधापत्तेः । नचसतोजगद्भ्रमाधिष्ठानतया सन्मूलत्वं जगतः संभवत्येवेतिवाच्यं । यथा "सोम्यैकेनमृत्पिंडेनसर्वंमृण्मयंविज्ञातंस्या" दित्यादिदृष्टांतानुरोधेन घटशरावादिकं प्रति मृत्तिकायाः सुवर्णस्य कटकादिकं प्रति यथोपादानकारणत्वं तथैव कार्यजातं प्रति ब्रह्मणउपादानकारणत्वस्य निश्चयेन सन्मूलाइत्यत्रापि मूलपदेन तादृशोपादानस्यैव ग्राह्यतया

भ्रमाधिष्ठानस्य च लोके लोकानुसारिणस्तवमतेप्युपादानत्वासंभवेन तादृशश्रुतिविरोधोदुर्वारएव ॥ नहिरज्जुसर्पस्य रज्ज्ववच्छिन्नंचैतन्यंरज्जुर्वा उपादानं किंत्वविद्यैवातोमायामूलाः सोम्येमाः प्रजाइतिब्रूयान्नतुसन्मूलाइति ॥ किंच मायायाजगद्धेतुत्वे " कथमसतः सज्जायेत " इतिश्रुतिविरोधापत्तिः । ननुतादृशश्रुतेः सत्वेनाप्रतीयमानात्सत्वेनप्रतीयमानंकथंजायेतेत्यर्थकत्वेन शून्यवादनिराकरणपरत्वम् ॥ नतुमायावादनिराकरणपरत्वं मायायाःसत्वेन प्रतीयमानत्वादितिचेन्न ॥ शक्त्यातादृशार्थस्यासत्सत्पदाभ्यामलाभेनवेदेनिर्मूललक्षणाकल्पनस्याप्रामाणिकत्वात् ॥ अतएव वाचारंभणादिपदानांवागालंबनाद्यर्थकत्वं नसंभवति ॥ लक्षणापत्तेः । यत्तु (वस्तुतस्तुएकआहुरसदेवेदमग्रआसीत्ततोवैसदजायतेत्युपक्रम्य प्रवृत्तेयंश्रुतिरसद्धेतुकसत्कार्यवादंखण्डयतीतिभाति ॥ तथाच तद्वादप्राप्तसत्कार्य्यानुवादेन कारणासत्त्वनिराकरणेतस्यास्तात्पर्य्यान्नतद्विरोधः) इत्याद्युक्तं तदपिनकिंचित् ॥ मायायाः सद्भिन्नत्वेनासत्त्वस्यदुरपोहतया मायावादस्याप्यसद्धेतुकसत्कार्य्यवादतया तन्निराकरणपरत्वाभावस्य वक्तुमशक्यत्वात् ॥ किंच त्वन्मतेजगतः सद्विलक्षणत्वेनासत्त्वा दसत्यमप्रतिष्ठं ते जगदाहुरनीश्वरमिति भगवद्वाक्यमपि त्वन्मतनिंदापरमिति प्रतिभाति ॥ नचास्माभिर्जगतोऽसद्विलक्षणत्वस्यापि स्वीकारात्कथमस्मन्निंदापरत्वंभगवद्वाक्यस्येतिवाच्यम् ॥ सद्विलक्षणत्वासद्विलक्षणत्वयोःसद्भिन्नत्वासद्भिन्नत्वरूपयोरेकत्रसमावेशो न संभवति ॥ परस्परविरुद्धत्वात् ॥

* सद्रूपासे यत्तु षष्ठेत्यादिं सत्प्रतिष्ठत्वमस्तिइत्यतं भाग परिहरति ॥ किंच

---

* यत्तु षष्ठश्लोकव्याख्यायातट्टीकाकारेण सन्मूला सोम्येमा प्रजा सदायतना – सत्प्रतिष्ठा कथमसत सज्जायेत तत्सत्य यदिद किंचित्तत्सत्यमित्याचक्षते इत्यादिश्रुतीरुपन्यस्य असत्यत्वेन ज्ञानत्वात्पुराणामेव ॥ तथाचगीतायाम् ॥ असत्यमप्रतिष्ठन्ते जगदाहुरनीश्वरमित्युक्त ॥ तत्र सन्मूलाइत्यादे ततोजगद्भ्रमाधिष्ठानत्वेननानुपपत्ति ॥ प्रकृतिमानहेतुत्ववादेऽपितस्यभ्रमाऽधिष्ठानताऽऽश्रीयतएवेति नदोष ॥ कथमसत सज्जायेतेत्यस्यारतु सत्वेनाऽप्रतीयमानात्सत्त्वेनप्रतीयमानकथं जायेतेत्यर्थ ॥ अन्यथा वाचारम्भणविकारोनामधेयमितिविरुध्येत ॥ वस्तुतस्तु एकआहुरसदेवसोम्येदमग्रआसीत्ततोवैसदजायतेत्युपक्रम्यप्रवृत्तयेय श्रुतिरसद्धेतुकसत्कार्यवादखण्डयतीति भाति ॥ तथाचतद्वादप्राप्तसत्कार्यानुवादेनकारणासत्त्वनिराकरणेतस्यास्तात्पर्यान्नतद्विरोध. ॥ सदितित्वधिष्ठानाभेदमारोप्यस्याह ॥ जगत सद्विलक्षणत्वस्वीकारेप्यसद्विलक्षणत्वस्याऽपिस्वीकाराद्भगवद्वाक्यमसन्मतनिन्दापर किन्तुशून्यवादनिन्दापरम् ॥ अतएवाप्रतिष्ठमित्युक्तम् ॥ अस्मन्मतेतु जगत प्रतिष्ठत्वमस्ति ॥

सन्मूलाइत्यादिना परस्परविरुद्धत्वादित्यंतेन ॥ अयमर्थः ॥ छांदोग्यस्याष्टमा-
ध्यायेष्टमखंडे "सन्मूलाःसोम्येमाःसर्वाःप्रजा" इति वाक्यं पठ्यते ॥ सर्वाइतिपद-
रहितपाठोपन्यासस्तु बहुशुद्धपुस्तकोपलंभात् स्वयं च गुरुमुखादधीतत्वाभावात् ॥
अतोपिसद्ब्रह्मैरप्रपंचस्यकारणं नतुत्वदभिमतमसत्सदसद्वा अज्ञानं ॥ यत्तु सन्मूलाइ-
त्यादेःसतोजगद्भ्रमाधिष्ठानत्वेन नानुपपत्तिरितितदकिंचित्करं ॥ अधिष्ठानेभ्रमविषयस्य
मूलत्वायतनत्वादेरभावात् ॥ शुक्त्यैवांतरातस्यकल्पनेन बुद्धेरेवतन्मूलत्वात् ॥ शुक्ते-
रजतायतनत्वेएकेनयदातत्ररजतंकल्प्यते तदासर्वोपितत्ररजतमेवनियमेन पश्येत् नतु
पश्यन्ति अतोन सा तदायतनं ॥ रजतंकल्पयित्वाकार्यांतरपरतंत्रत्वात्स्पर्शाद्यकृत्वा
गतस्याधिष्ठानासंनिधानेपि रजतबुद्ध्यनिवृत्तेश्च ॥ अतएवनतद्रजतं शुक्तौ लीयते शुक्ति-
नाशोत्तरमपि यदाकस्यचिदाप्तस्यमुखात्त्वयासाशुक्तिरेव दृष्टा नरजतमितिशृणोति तदैव-
तन्निवृत्तेः ॥ तस्माद्बुद्धिरेवरजतस्यमूलादिकं ॥ शुक्तेस्तु सादृश्यद्वारासंस्कारोद्बोधक-
तयैवोपयोग ॥ किंच तत्र एकविज्ञानेन सर्वविज्ञानप्रतिज्ञाश्रूयते ॥ नहिसाऽधिष्ठानत्वे
उपपद्यते ॥ रज्जुविज्ञानेन तदधिष्ठानकानां सर्वेषां यष्टिमालाव्यालादीनां विज्ञानस्याद-
र्शनात् ॥ प्रत्युत तद्विज्ञानेन यष्ट्यादिविज्ञानस्य नाशएव दृश्यते ॥ तथाऽत्र सद्विज्ञानेन
सर्वविज्ञानं नश्येन्नतु सर्वविज्ञातं स्यात् ॥ अपिच तत्र "यथासोम्यैकेनमृत्पिंडेनसर्वं-
मृण्मयंविज्ञातंस्यात् ॥ यथा सोम्यैकेनलोहमणिनासर्वंलोहमयंविज्ञातंस्यात्" इत्यादिना
घटकटकादिकंप्रति परिणाम्युपादानमेव मृत्सुवर्णादिकं दृष्टांतीक्रियते ॥ अतो ब्रह्मणोपि
परिणाम्युपादानत्वमेव सन्मूलाइत्यादिनोच्यतइति निश्चीयते ॥ अन्यथा रज्जुभुजगादेव
दृष्टांतीक्रियेत ॥ अन्यच्च भुजंगादिकं प्रति तज्जातीयशुक्रशोणितादेरेवोपादानत्वादधिष्ठा-
नस्योपादानत्वमेव नसंभवति ॥ अन्यथा घटादिर्निर्मातुकामेन मृदादिकमिव रजतादि-
कामेन शुक्त्याद्येवोपादीयेत नतु तत्त्वन्याद्यन्विष्येत ॥ नापिभुजंगादेःपूर्वकाले
रज्ज्वादावभेदेन स्थितिःसंभवति ॥ अतस्तथासति तत्र "सदेवसोम्येदमग्रआसीत्"
इति न वदेत् ॥ अथभ्रमात्पूर्वंरज्जुरेवासीन्न भुजंगम इति चेत्तर्हि सदेवसोम्याग्र-
आसीदित्येव वदेत् ॥ अपरं च तत्र (खंड ८) "यत्रैतत्पुरुषोशिशिषतिनाम"
इत्युपक्रम्येदं पठ्यते "तत्रैतच्छुंगमुत्पतितंसोम्यविजानीहिनेदममूलंभविष्यतीति ॥ ३ ॥
तस्यक्वमूलंस्यादन्यत्राद्भ्यादेवमेवखलुसोम्यान्नेन शुंगेनापोमूलमन्विच्छद्भिःसोम्यशुंगेन-
तेजोमूलमन्विच्छतेजसासोम्यशुंगेनसन्मूलमन्विच्छ सन्मूलाःसोम्येमाः सर्वाःप्रजाःसदा-
यतनाःसत्प्रतिष्ठाः" इति ॥ अर्थस्तु एवच्छरीरशुंगवत्कणिकायाअंकुरइव कार्यमुद्भूतं ॥
इदं शरीररूपंकार्यं न अमूलं निष्कारणं स्यात् ॥ तर्हि तस्यक्वमूलमितिप्रश्ने
अन्नादन्यत्रक्वमूलंस्यात्किंतु अन्नमेवास्यमूलं ॥ एवमेवान्नरूपेण शुंगेनकार्येण
अब्रूपंमूलंकारणं अन्विच्छ ॥ अब्रूपेणकार्येण तेजोरूपंकारणं तेजोरूपेणचकार्येण
सद्रूपं कारणमिति ॥ अत्र च शरीरान्नजलानामन्नजलतेजांसिपरिणामिकारणान्येव
नत्वधिष्ठानानि ॥ अतोब्रह्मापि तादृशकारणमेववक्तव्यम् ॥ नच तेषामप्यधिष्ठानत्वं
वाच्यं ॥ प्रत्यक्षविरोधात् ॥ अन्नादिज्ञाने शरीरादिनाशप्रसंगात् ॥ अधिष्ठाने कल्पितंवस्तु

इतरकल्पनस्याधिष्ठानं तदपीतरकल्पनस्याधिष्ठानमितिकल्पनायाः सुतरामशक्यत्वाच्च ॥ नहिरज्जौकल्पितेभुजंगे यष्टे·कल्पना तस्यांच मालाया·सेतिपरंपरा क्वापिदृष्टचरी ॥ सन्मूलाइत्यत्रमूलशब्दस्याधिष्ठानपरत्वादेतुपूर्वमपि तत्परत्वं स्यात् ॥ तत्रपरिणामिपरत्वेऽत्रापितथात्वमेवसिध्येत् ॥ शुंगंच बीजस्योपादेयमेव नतुविवर्तः ॥ अतः शुंगत्वकथनादपि त्वदभिमतार्थस्यबाधः ॥ अन्यथाक्लिष्टकल्पनापेक्षया माया मूला इत्याद्येव स्पष्टंभूयात् ॥ मूलेरज्जवच्छिन्नचैतन्यमित्यादितु तन्मतमनुरुध्यतंप्रत्युक्तम् ॥ यच्च "कथमसतःसज्जायेते" तिश्रुते·सत्वेनाप्रतीयमानात्सत्वेनप्रतीयमानंकथंजायेतेत्यर्थउक्तः ॥ सोऽशक्य एव ॥ तथासति "सदेवसोम्ये" त्यत्रापिसच्छब्दः तादृशार्थकः कुतोनस्यात् ॥ नचेष्टापत्तिः ॥ स्वभाष्यविरोधात् ॥ ॐतत्सदितिनिर्देशइतिगीताविरोधाच्च ॥ किंच मायायाः सत्वासत्वाभ्यामुभयथापि प्रतीतेर्जगतोपि तथाप्रतीतेश्चत्वयावाच्यतया त्वन्मते सत्वेनाप्रतीयमानात्सत्वेनप्रतीयमानं सत्वेनप्रतीयमानात्सत्वेनाप्रतीयमानंच जायतएवेति कथंजायेतेत्याक्षेपोऽसंगतः ॥ अत्रत्यमेव सच्छब्दमाश्रित्य सूत्रकृता (अ० २ पा० १ सू० १३) "सत्वाच्चावरस्य" इतिप्रपंचस्य सत्वमेव निर्णीतम् ॥ अन्यथा सत्वेन प्रतीयमानत्वादित्येवासंदिग्धं सूत्रयेत् ॥ सूत्रस्यसंदेहवारणार्थत्वात् ॥ सर्वत्रतथार्थंदुराग्रहे "सदेवे" त्यादावपि बलात्तत्प्रसक्तिः ॥ अतःशब्दार्थस्याबाधात्सूत्रादिना तथैवतात्पर्यस्य निश्चयाच्च निर्मूललक्षणा नादरणीया ॥ नाशोत्पत्तिप्रत्यक्षंत्वाविर्भावतिरोभावविषयं ॥ श्रौतदर्शनेश्रुते प्रत्यक्षादिवोबलीयस्त्वात् ॥ अन्यथाऽर्धवैनाशिकप्रक्रियाऽऽपद्येत नतु त्वदभिमतसिद्धिः ॥ वाचारंभणश्रुतिविरोधस्तु तवैव नतु ममेत्यनुपदंस्फुटीभविष्यति ॥ यच्च वस्तुतस्त्वेकइत्याहुरित्यादि तदसत् ॥ तत्र (अ० ८ ख० २) "सदेवसोम्येदमग्रआसीदेकमेवाद्वितीयम् ॥ तद्धैकआहुरसदेवेदमग्रआसीदेकमेवाद्वितीय ॥ तस्मादसतः सज्जायत ॥ कुतस्तुखलुसोम्येवँस्यादितिहोवाच कथमसतः सज्जायेतेति ॥ सत्त्वेवसोम्येदमग्रआसीत्" इति पठ्यते ॥ संक्षेपतोऽर्थस्तु ॥ इदंपरिदृश्यमानंजगत् अग्रे सृष्टे·पूर्वं सदेव आसीत् ॥ एवकारोसत्वादिपक्षव्यवच्छेदार्थं ॥ एकमेवाद्वितीयं ॥ सजातीयादिभेदशून्यं ॥ तत् ह तस्मिन् कारणरूपेवस्तुनिविषये एकेअन्ये आसुराः आहु· ॥ इदंप्रतीयमानमग्रे असदेव आसीत् ॥ तस्मादसद्रूपाद्वस्तुन सत् जगदजायत अडभावश्छांदसः ॥ तन्मतं खण्डयति ॥ तत्रासत्पदेनाभावमात्रंविवक्ष्यते ॥ सत्वेन प्रतीयमानमसद्वस्तु वा ॥ आद्य ॥ तथासति कुतस्तुखलुसोम्येवं स्यात् ॥ एवंविचित्रजगत् कुतउत्पद्येत ॥ अभावस्यैकत्वात् ॥ अभावमात्रस्यकारणत्वायोगाच्च ॥ निरधिकरणकाभावाप्रसिद्धेश्च ॥ नद्वितीयः ॥ तथासति कथमसतः सज्जायेत ॥ असद्वस्तुत वास्तवं सत् कथंजायेत नहिस्वाप्निकमृदः पारमार्थिकघटोभवति ॥ तस्मात्सत्त्वेवसोम्येदमग्रआसीदेकमेवाद्वितीयम् ॥ तुशब्द पूर्वपक्षव्यावर्तक· ॥ इदमग्रे सदेवासीदितिनिश्चय ॥ यदिकार्यस्य सत्वमेवेतिनाभिप्रेयात् किंतु कारणस्यासत्वनिराकरणमेवाभिप्रेयात् ॥ तदा सदेव सोम्येदं सत्वेवसोम्येदमितिपुन पुनरिदपदंनवदेत् ॥ किंचान्यपरमतानुवादेपि एकमेवाद्वितीयमितिसत्यादिनिर्दिश्यते ॥ अत्यंतासति च तन्निर्देशोनघटते अतस्तन्निर्देशाद्भासीतिकंसत्वमस-

दित्युक्त्याऽसत्त्वं च स्पष्टमवगम्यत एवेति त्वदभिमतं सत्त्वासत्त्वाभ्यामनिर्वचनीयं कारण-मप्यनूद्यात्र निरस्तं भवति ॥ नत्वत्यंतासदेव कारणम् ॥ किंच कारणासत्त्वे विवक्षितेपि कंठरवेणैव कार्यसत्त्वं श्रुत्यभिप्रेतं न वा ॥ नद्वितीयः सत्पदोपादानानर्थक्यप्रसंगात् ॥ उपात्तस्यापि परित्यागे हेतोरभावात् ॥ नचारोप्यस्याधिष्ठानामेदं सदिति पदमाहेति वाच्यम् ॥ तथासति सदेवेत्यादावपि तथार्थमाश्रित्य मायैव गृह्यताम् तन्न गृह्यते चेत्प्रकरणे-क्यात्तात्पर्यग्राहकाभावाच्चात्रापि न गृह्यताम् ॥ किंच कार्यस्य मायिकत्वे तेजःप्रभृतीनामी-क्षणमपि न संगच्छेत ॥ श्रूयते तु तत्रतत् ॥ "तत्तेज ऐक्षत ता आप ऐक्षंत" इति ॥ नहि रज्जौ कल्पितः सर्पोऽहं दशेयमित्यादीक्षते ॥ ब्रह्मणस्तत्तद्रूपेण परिणतस्य त्वीक्षणं संभवति ॥ नचेदमीक्षणं गौणं कल्प्यम् ॥ तदैक्षतेत्यत्रापि गौणतापत्तेः ॥ नचेष्टापत्तिः ॥ ईक्षत्यधि-करणविरोधात् ॥ गौणश्चेन्नेत्यादिगुणसूत्रैस्तस्याः प्रतिषेधाच्च ॥ "ऐतदात्म्यमिदं सर्वं तत्स-त्य" मिति कार्यसत्ता तत्राभ्यस्यत इति न सत्पदार्थः क्लेशादन्यथा कल्प्यः ॥ एतत्सकलानुरो-धादाद्यश्चेद्दुर्जिह्वका ॥ एवम मायिकत्वे सत्येवाभ्रांतेश्वरेक्षणीयत्वम् ॥ तत्प्रवेष्टव्यत्वं च तेजःप्रभृतीनां संगच्छेत ॥ नहि गंधर्वनगरं कश्चिदपि प्रवेष्टुमीष्टे प्रविश्य च किंचित्कर्तुम् ॥ श्रूयते तु तत्तत्र ॥ "सेयं देवतैक्षत हंताहमिमास्तिस्रो देवता अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणीति ॥ तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति" इत्यादि ॥ किंच जग-द्ब्रह्मणोर्जडचेतनतया विलक्षणत्वात् कार्यकारणभावानुपपत्तिमाशंक्य सूत्रकारो द्वितीयस्य प्रथमे (सू० ६) "दृश्यते" त्विति समाधत्ते ॥ यदि सदसत्त्वाभ्यामनिर्वचनीया माया कारणं तादृशं जगच्च कार्यं स्यात्तर्हि व्यर्थे एव शंकासमाधाने स्याताम् ॥ अग्रे च (सू० ७) "असदिति चेन्न प्रतिषेधमात्रत्वात्" इति कारणस्यासत्त्वं निराकरोति ॥ असदेवेद-मित्यनुवादस्य प्रतिषेधार्थतामेव वक्ति ॥ यदि मायाकारणं स्यात्तर्हि व्यर्थोऽयं निरासप्रयासः ॥ नच तस्याः सदसत्त्वाच्च व्यर्थ इति वाच्यम् ॥ अनुवादे एकत्वसंख्यादियोगिन एवासतः ॥ कारणताबोधनेन सत्त्वेन प्रतीयमानमसदिति सुखेन लाभात् ॥ वस्तुतस्तु जगतो मायिक-त्वम् तस्याः सदसद्रूपत्वम् कार्यस्य च तथात्वं क्वापि सूत्रकृता नोक्तम् प्रत्युतासत्त्वं निरा-कृतमेव ॥ सत्त्वमेव च समर्थितम् ॥ अतो निर्मूलं तत्कल्पनम् ॥ यदि तथा स्यात्सर्वसंदेह-वारणायैव प्रवृत्त आचार्यः कथं स्पष्टं न ब्रूयात् ॥ असत्यमप्रतिष्ठं त इति भगवद्वाक्यं त्वसत्यं वदत-स्तत्रापि निंदां करोत्येव ॥ नचासत्यपदमत्यंतासत्परम् ॥ मया तु प्रातीतिकसत्ताया अंगीकाराच्च-न्मतस्य निंदापरं तत् किंतु बाह्यमतस्यैवेति वाच्यम् ॥ प्रतीतेः स्वीकारेण प्रातीतिकसत्ता-या बाह्यमतेप्यनपायात् ॥ किंचैवं सति यत्र पुराणेषु वैराग्यार्थं पुरुदुःखदुःखत्वादिकथन-पुरःसरमिदं जगदसत्स्वरूपमित्युच्यते ॥ तत्राप्यसत्पदस्य तथात्वमाश्रित्य बाह्यमतस्य पुराणसंमतत्वं कुतो न ब्रूषे ॥ केवलमसदिति कथनेपि स्वाभिमतार्थपरतां च कुतः कल्पयसि ॥ यदि च तादृशपुराणस्थलेष्वसदसत्यादिपदानां त्वदभिमतार्थकता स्वीक्रियते तर्ह्यत्रापि स्वीक्रियताम् ॥ नचाप्रतिष्ठत्वस्यास्वीकारादत्र च तथाकथनान्नेदं मन्मतपरमिति वाच्यम् ॥ तत्र ते आसुराः जगदसत्यमाहुः ॥ अप्रतिष्ठमाहुः ॥ अनीश्वरमाहुरिति योजनायाः प्रती-

स्याऽन्यथासमाप्तपुनरात्तिप्रसक्तया च अन्यतमकथनेप्यासुरत्वस्य सिद्धेः ॥ अन्यथाकार्य-दशायां तत्सत्तांगीकारेण देहादेरसद्विलक्षणत्वं भूतचतुष्टयस्य नित्यत्वं तत्र देहादेः प्रतिष्ठां च स्वीकृत्य अनीश्वरत्वमात्रं वदंतश्चार्वाकाः कथंचित्सत्तादिकं वदंतो बौद्धभेदाश्च नासुरा स्युः ॥ किंच न सत्प्रतिष्ठत्वमपि त्वन्मते शक्यवचनम् ॥ बौद्धरजतादेः शुक्त्यादौ त्वयस्य प्राङ्निराकृतत्वात् ॥ एवमसत्याप्रतिष्ठपदयोरिदानीं त्वयोच्यमानार्थकताया असंभवादेव शंकराचार्यैः "असत्यंयथावयमनृतप्रायास्तथाइदंजगत् सर्वं असत्यं अप्रतिष्ठंच॥ नास्तिधर्माधर्मौप्रतिष्ठा॥ अतः अप्रतिष्ठ" मितिव्याख्यातम् ॥ मधुसूदनसरस्वती-श्रीधरस्वामिप्रभृतिभिश्च असत्यपदं नास्ति सत्य वेदादिकं प्रमाणमत्रेति विवृतम् ॥ अप्रतिष्ठपदं च तथैव व्याख्यातम् ॥ अतस्त्वदुक्तिर्भाष्यादिस्वग्रंथविरुद्धा ॥ वस्तुतस्तु तथार्थोपि न संभवति ॥ तथासत्यप्रमाणमधर्ममिति अवेदमनदृष्टंतइतिवा स्पष्टं वदेत् ॥ सत्यशब्दस्य वेदादौ प्रतिष्ठा शब्दस्य धर्माधर्मयोश्च नियतशक्तेरभावान्न तथाव्याख्यानं सर्वैरादर्तुं शक्यम् ॥ यथा श्रुतार्थेपि त्वन्मते सर्वप्रपंचस्य मिथ्यात्वे तदन्तर्गतवेदधर्माधर्माणामपि मिथ्यात्वस्य स्वतः प्राप्तेश्च ॥ अतएव तथावादिनस्तव तथार्थेप्यनिस्तारः ॥ ईश्वरस्यापि मायिकत्वांगीकाराच्च ॥ किंच वाक्यस्य स्वमतपरतावारणाय कल्प्यमान जगतः सद्विलक्षणत्वे सत्यसद्विलक्षणत्वमपि न शक्य वक्तुम् । असच्छब्दप्रवृत्तेः स्वप्नविवर्तादिषु प्रसिद्धत्वेन विवर्ततयाऽभिमते जगत्यसद्विलक्षणतायाअशक्यवचनत्वात् । प्रतियोगिता-वच्छेदकानुयोगितावच्छेदकयोरैक्यानुपपत्त्या सद्भेदासद्भेदयोरेकत्र समावेशायोगाच्च ॥

नचजगतःसत्यत्वे "वाचारंभणंविकारोनामधेय" मित्यादिश्रुतिविरोधः तस्य जगन्मिथ्यात्वप्रतिपादनपरत्वात् । विकारो-घटादिर्वागालंबनमात्रंयतोनामधेयं विकारः नतुनामातिरेकेण विकारोस्तीतिसृत्तिकैव सत्य घटादिर्मिथ्यैवेति यथा तथापरम कारणं ब्रह्मेव सत्यं तद्भिन्नंकार्यजातं मिथ्यैवेत्यभिप्रायादितिवाच्यम् ॥ जगतोमिथ्यात्वे एकविज्ञानेन सर्वविज्ञानं यत्प्रतिज्ञातं तन्नसिद्ध्येत् सत्यज्ञानेन मिथ्याज्ञानस्यासंभवात् ॥ अपिच कारणत्वबोधकश्रुतीनांसर्वस्यात्मत्वब्रह्मत्वबोधकश्रुतीनां चानुरोधेन कार्यस्य कारणानन्यत्वेसिद्धे "ऐतदात्म्यमिदंसर्वंतत्सत्य"-मित्यत्राप्यणिमपरिचायनार्थस्यसर्वस्यैव सन्निहिततयातत्पदेन परामर्शात्तस्यैव सत्यत्वं विधीयते ॥ सर्वंगतमेवचैकत्वमनूद्यत-इतिमंतव्यम् ॥ अन्यथा सआत्मासत्यमित्येवं पठेत् ॥ (नच नानात्वदर्शननिंदया तस्य मिथ्यात्वसिद्धिरितिवाच्यम्) तस्याश्च-क्षुषश्चक्षुरित्यादिनाब्रह्मस्वरूपमुपक्रम्य पठितत्वेन ब्रह्मस्वरूपइंद्रियादिमत्तया जीवदेहवन्नानात्वस्यैव मिथ्यात्वं सिध्यति ॥ नकार्य-नानात्वस्येति ॥ नचानादिकालप्रवृत्ताऽविद्यावशाद्भेदप्रतिभास इति वाच्यम् ॥ अस्यभेदस्य ब्रह्मेच्छया प्रतिभाससंभवेऽविद्या-

कल्पितत्वकल्पने प्रमाणाभावात् ॥ तादृशभेदस्याप्यविद्याकल्पितत्वे ब्रह्मणोपि जीवतौल्यापत्तेः ॥ तस्माद्वाचारंभणश्रुतीनां न जगन्मिथ्यात्वप्रतिपादनपरत्वम् ॥ यत्तु ननु योविकारः पृथुबुध्नोदरादिः सवाचारंभणः वाचिकक्रियात्मकोनतुकारणाद्व्यक्तिभेदापादकः यथा सुप्तउत्थिते उपविष्टे च पुरुषे इत्यादिनाऽस्मन्मतमनूद्य ननु कारणादित्यर्थस्य लक्षणां विनावाचारंभणशब्देनाबोधात् नामधेयपदस्य कारणस्यैव नामधेयमित्यर्थोपि नाध्याहारमंतरासंगतइत्यादिदोषापादानं तदपि परमतस्वमताज्ञानपूर्वकमेव ॥ वाचारंभणमित्यस्यास्मन्मतेऽयमर्थः योविकारः सवाचारंभणं यदारभ्यते तदारंभणं कृत्यल्युटोबहुलमिति कर्मणिल्युट् वागारब्धमित्यर्थः ॥ नामधेयं कारणस्यैव नामधेयम् ॥ इदंत्वर्थलब्धम् ॥ कारणस्यैव तत्रैकेन मृत्पिंडेनेत्यादिना प्रकृतत्वात्कारणमेव तत्तदर्थक्रियासिद्ध्यर्थंतेनतेन नाम्ना व्यवह्रियतइतिकारणादभिन्नं कार्यं ननु स्वेनरूपेण कारणाद्भिन्नं तदाह मृत्तिकेत्येव सत्यमिति ॥ अत्र कारणादभिन्नमित्यादिना त्वभिप्रायवर्णनं नतु पदार्थवर्णनम् ॥ येनलक्षणांविनेत्यादिदोषः स्यात्तादृशार्थोपिलक्षणांविना नसंभवतीति यद्युच्यते तदाभवन्मतेपि तदनन्यत्वमारंभणशब्दादिभ्यइति सूत्रभाष्ये “यथासोम्येकेनमृत्पिंडेनसर्वंमृण्मयंविज्ञातंस्याद्वाचारंभणंविकारोनामधेयंमृत्तिकेत्येवसत्य” मित्यस्यव्याख्याने “यतोवाचारंभणंविकारोनामधेयं वाचैवकेवलमस्तीत्यारभ्यते विकारोघटः शरावउदंचनं चेति ॥ ननु वस्तुवृत्ते न विकारोनाम कश्चिदस्ति नामधेयमात्रंह्येतदनृत”मिति व्याख्यानेपि वाचैव केवलमारभ्यत इत्यर्थस्य वाचारंभणमित्यत्रैवकाराभावेन लक्षणामध्याहारं वा विना असंभवात् ॥ एवं ननु वस्तुवृत्ते न विकारोनामकश्चिदस्तीत्यर्थोपिलक्षणादिकं विना न संभवतीति ॥ तत्र तात्पर्यवर्णनंचेत्तुल्यमत्रापि ॥ यच्च (कारणमेवहीत्यादित्वसंगतमेव मृदोघटइतिकथनेनजलाहरणासिद्धे) रित्युक्तम् तदभिप्रायाज्ञानात् ॥ तत्र कारणमेवहि तत्तदर्थक्रियानिष्पत्त्यर्थं घटशरावादिनाम्ना व्यवह्रियतइत्युक्तम् ॥ एवंच प्रामाणिकैः केवलेमृत्पिंडे घटइति व्यवहारोनक्रियते ॥ येन जलाहरणसिद्धिः स्यात् दोषदूषितस्य कस्य चिद्व्यवहारस्तु नार्थक्रियाकारकः शुक्तौ रजतव्यवहारवत् ॥ प्रामाणिकानां व्यवहारस्त्ववस्थाविशेषएव भवति तदार्थक्रियापि भवत्येवेति न कोपि दोषः ॥ अवस्थाविशेषस्यैवकार्यत्वात् अन्य-

तरस्यान्यतरं प्रति हेतुत्वकथनमप्यसंगतमेव ॥ कार्यस्य मिथ्यात्वेनामधेयपदेतिपदयोर्वैयर्थ्यं दुरुद्धरमेव ॥ वाचारंभणंविकारो-मृत्तिकैवसत्यमित्यनेनैवार्थसिद्धेः ॥ यदप्यनन्यत्वशब्दार्थस्तु अन्यत्वाभावोनतुतादात्म्यम् ॥ प्रमाणाभावादित्याद्युक्तं तदप्यनन्यत्वशब्दार्थाज्ञानात् ॥ अन्यत्वंहिभेदः सच तादात्म्यावच्छिन्नप्रतियोगिताकाभावस्तदभावश्चतादात्म्यरूपएव भेदाभावस्य प्रतियोगितावच्छेदकरूपत्वात् ॥ अत्यंताभावाभावस्यच प्रतियोगिरूपत्वात् अतएवसंयोगिभेदाभावः संयोगस्वरूपएवेतिकथनमपि तार्किकाणां संगच्छते संगच्छते च प्रतियोगितावच्छेदकेनान्योन्याभावस्य प्रतियोगिना सह चात्यंताभावस्य विरोधः ॥ इदं च सिद्धांतलक्षणेभेदाव्याप्यवृत्तित्वप्रसंगे "तद्धर्मावच्छिन्नभिन्नभेदस्य तद्धर्ममात्रपर्यवसायितया कपिसंयोगिभिन्नभेदात्मनः कपिसंयोगस्य मूलवृत्तित्वविरोधः नहि घटभिन्नभेदोघटत्वादतिरिच्यते अवश्यक्लृप्तघटत्वेनैवोपपत्तावतिरिक्तकल्पनायां प्रमाणाभावात् ॥ अन्यथा सर्वत्राभावस्याभावोतिरिक्तएवकल्प्येते" त्यादिना दीधितिकारैःस्पष्टमेवोक्तम् ॥ नच तैस्तद्धर्मावच्छिन्ने भिन्नभेदएव तद्धर्मस्वरूपउक्तोनतु तद्धर्मावच्छिन्नभेदात्यंताभावइति कथं तादात्म्यावच्छिन्नभेदात्यंताभावस्य तादात्म्यरूपत्वमिति वाच्यं धर्मिभेदस्य धर्मात्यंताभावानतिरिक्तत्वात्समनियताभावानामैक्यात्तादात्म्यावच्छिन्नभिन्नभेदस्तादात्म्यावच्छिन्नभेदात्यंताभावएव सच तादात्म्यरूपएवेत्यवश्यक्लृप्तेन तेनैवोपपत्तावतिरिक्तकल्पने गौरवस्यैव बाधकत्वादिति (नतुतादात्म्यं प्रमाणाभावा)दित्यसंगतमेव लाघवरूपप्रमाणस्यसत्वात् (सचकार्यस्यमिथ्यात्वा) दित्यप्यसंगतम् ॥ कार्यस्य मिथ्यात्वे तत्र सदन्यत्वाभावोनसंभवति ॥ मिथ्यासदित्यप्रतीतेः ॥ मिथ्या सच्चेतिप्रतीतेश्च ॥ मिथ्यात्वे तु कार्यस्य सदन्यत्वमेव नत्वन्यत्वाभाव इति तदनन्यत्वमारंभणशब्दादिभ्यइति सूत्रविरोधो दुरुद्धरएव ॥ तस्मात्कार्यस्य सत्यत्वमेव ॥ भेदादीनामप्यस्मन्मतेनासत्वमिति (कार्यस्यासत्वेपि कारणस्य सत्वं तु त्वन्मते भेदादेरसत्वेपितत्कारणस्य यथा सत्वं तथा बोध्य) मिति दृष्टांतप्रदर्शनमप्यसंगतमेव ॥ यश्च (किंचस्वानन्यावयवविन्यासान्यतद्विन्यासांतरानन्यस्ये) त्यादि प्रलापः सत्वसन्मताज्ञानकृतत्वादुपेक्ष्यतः तादृग्विन्यासानां कल्पितत्वेः प्रमाणाभावाच्च ।

सहस्राक्षे * तद्वाक्यस्येत्यादिं भेदाभावइतिबोध्यमित्यंतं भागं निराकुर्वंति ॥ न च जगतइत्यादिना ॥ प्रमाणाभावाच्चेत्यतेन ॥ जगतोमिथ्यात्वइत्यादि ॥ अयं भावः ॥ तन्मिथ्यात्वे वाचारंभणश्रुतेस्तात्पर्यमित्यदानयकल्पनम् ॥ तथासति उपक्रमे "उततमादेशमप्राक्षो येनाश्रुतंश्रुतंभवत्यमतंमतमविज्ञातंविज्ञातमिति" इति एकश्रवणमननविज्ञानैः सर्वस्य श्रवणमननविज्ञानानि सिध्यंतीति प्रतिज्ञा विरुध्येत ॥ सत्यवस्तुज्ञानेन मिथ्यावस्तुज्ञानस्यायोगात् ॥ नहि रज्जुज्ञाने सर्पमालादयः सर्वे ज्ञाता भवंति ॥ प्रत्युत तज्ज्ञाने सर्पादिज्ञानं नश्यत्येवेति विवर्तवादे एकविज्ञानेन सर्वस्याप्यविज्ञानमेवापद्यते ॥ ब्रह्मज्ञानोत्तरं त्वन्मते प्रपंचस्य विलयात् ॥ तदाप्यविलये कदापि न विलयः स्यात् ॥ यदा च सर्वं ज्ञायते तदा नैकज्ञानम् ॥ अतः प्रतिज्ञाविरोधस्त्वन्मते सुस्थः ॥ अपिच "तस्माद्वाएतस्मादात्मन आकाशः संभूतः ॥ यतोवाइमानि भूतानि" इत्यादिकारणत्वबोधकश्रुतीना "मिदंसर्वंयदयमात्मा ॥ सर्वंतंपरादाद्योन्यत्राऽऽत्म-

---

* तद्वाक्यस्यजगत्सत्यत्वपरत्वेतु वाचारम्भणश्रुतिविरोधः ॥ ननु योविकारः पृथुबुध्नोदरादिःसवाचारंभणःवाचिकक्रियात्मकोनतुकारणाद्व्यक्तिभेदापादकः ॥ यथासुप्तउत्थित उपविष्टेच पुरुषेऽवयवविन्यासभेदेनपुरुषभेदोऽतोनामधेयं कारणस्यैवनामधेयं कारणमेवहितत्तदर्थक्रियानिष्पत्त्यर्थं घटशरावादिनाम्नाऽऽहूयतइतिकारणादभिन्नंकार्यंतदा मृत्तिकेत्येवसत्यम् ॥ अन्यथा कार्याभावेन ब्रह्म कस्य कारणंस्यात् ॥ कारणत्वाभावेकारणत्ववादिकायतोवाइत्यादिकाःश्रुतयोविरुध्येरन् ॥ यदिविकारेवाङ्मात्रतामभिप्रेयाद्वाचारम्भणं विकारोमृत्तिकैवसत्यमितिवदेत् ॥ तावतैवकार्यस्यमिथ्यात्वसिद्धेः ॥ वदतितु नामधेयपदेतिपदाभ्यांघटितम् ॥ तेनकारणादभिन्नकार्यमितितात्पर्यादुक्तएवार्थः ॥ किञ्च वाचारम्भणमितिवाक्यमुपक्रम्याऽग्रे कथमसतःसज्जायेतेतिसदेवसौम्येदमग्रआसीदिति पठितम् ॥ अतएव सूत्रकारइमामेवश्रुतिं विपर्यीकृत्य तदनन्यत्वमारम्भणशब्दादिभ्यइत्यवदत् ॥ अर्थस्तुवाचारम्भणमित्यादिशब्देभ्यस्तदनन्यत्वंकारणानन्यत्वंकारणादभिन्नत्वंबोध्यतइति ॥ अनादिपदेनेतिपदं नामधेयपद सदेवेत्यादिवाक्यानि गृह्यन्तेइतिचेन्न ॥ नतुकारणादित्यर्थस्य लक्षणांविनावाचारम्भणशब्देनाऽबोधात् ॥ नामधेयपदस्यकारणस्यैवनामधेयमित्यर्थोऽपिनाऽध्याहारमन्तराऽसंगतः ॥ कारणमेवहीत्यादिचसंगतमेव मृदोघटइतिकथनेनजलाहरणासिद्धेः ॥ तस्माद्वाचारम्भणंविकारइत्यत्रान्यतरस्यान्यतरंप्रतिहेतुत्वम् ॥ इतिशब्दस्यपूर्वेणान्वयेनइतिमृत्तिकेत्येतिव्याख्येयम् ॥ अतोनपदद्वयवैयर्थ्यम् ॥ सूत्रआदिपदेनैतदात्म्यमिदंसर्वमित्यादिकारणाभेदबोधकं नेहनानास्तीत्यादिचगृह्यते ॥ अनन्यत्वशब्दार्थस्तुअन्यत्वाभावोनतुतादात्म्यम् ॥ प्रमाणाभावात् ॥ सचकार्यस्य मिथ्यात्वात् ॥ अतएवारम्भणशब्दादिभ्यइत्युक्तं नतुसच्छब्दादिभ्यइति ॥ कार्यस्याऽसत्त्वेऽपि कारणस्य सत्त्वंतुत्वन्मतेभेदादेरसत्त्वेपितत्कारणस्ययथासत्त्वंतथाबोध्यम् ॥ किञ्चस्वानन्यावयवविन्यासान्यतद्विन्यासान्तरानन्यस्यस्वतोऽनन्यतायाअयुक्तत्वेनावयवविन्यासभेदोनपुरुषभेदइत्यप्यसंगतम् ॥ अतस्तत्रापितादृग्विन्यासानांकल्पितत्वेनैवपुरुषभेदाभाव इतिबोध्यम् ॥

नःसर्वंवेद ॥ सर्वंखल्विदम्ब्रह्मतज्जलान् ॥ तदात्मानँ स्वयमकुरुत" इत्यादीनामात्मस्वमसत्यबोधकश्रुतीनां चानुरोधेन कार्यस्यकारणानन्यत्वमेव सिध्यति ॥ मिथ्यात्वे तु ता पीड्येरन् ॥ मिथ्यासत्यवस्तुनोरैक्यायोगात् ॥ किंच तत्रैव "सयएषोणिमैतदात्म्यमिदँ सर्वंतत्सत्य" मितिसन्निहितंकार्यं स्वच्छन्देन परामृश्य तस्यसत्यत्वमसंदिग्धं श्राव्यते ॥ वाचारभणवाक्यार्थस्त्वनुपदं वक्ष्यते ॥ बृहदारण्यके नानात्वदर्शनस्यनिंदातु जीवब्रह्मणिदेहेंद्रियादिविभागदर्शनस्यैव नतु कार्यदर्शनस्य ॥ वामदेवादीनांब्रह्मविदां कार्यदर्शनश्रवणात् ॥ मिथ्यात्वे च ब्रह्मण कारणत्वमपि न स्यात् ॥ ब्रह्मणा अविद्ययैव कार्यंकल्पितमिति कथने तु जीवत्वौल्यमज्ञत्वापादक प्रसज्येत ॥ विस्तरेण चेद सर्वमुपादयिष्यते ॥ यच्च (श्लो० ४१) पूर्वावस्था तुमृद्रूपाघटावस्थाततोऽभवत् ॥ घटोपिमृत्तिकारूपोलयेपश्चाच्चमृत्तिकेतिमार्तंडकारिकाटीकास्थ लेखं यथाकथंचिद्वनुयोविकारइत्यादिनाऽनूद्य नतुकारणादित्यादिपदद्वयवैयर्थ्यमित्यन्त प्रकृतश्रुतिवाक्यार्थविषयकमुक्तं तदसत् ॥ तत्रहि एकविज्ञानेनसर्वविज्ञानप्रतिज्ञोत्तर "कथंनुभगव सआदेशोभवती" तिश्वेतकेतुनापृष्टे "यथासौम्यैकनमृत्पिडेनसर्वं मृण्मयंविज्ञातंस्याद्वाचारभणंविकारोनामधेयंमृत्तिकेत्येवसत्यम् ॥ यथासोम्यैकेनलोहमणिनासर्वंलोहमयविज्ञातँस्याद्वाचारभणविकारोनामधेयलोहमित्येवसत्यम् ॥ यथासोम्यैकेननखनिकृन्तनेन सर्वंकार्ष्णायसविज्ञातँस्याद्वाचारभणविकारोनामधेयंकृष्णायसमित्येवसत्यं एवँ सोम्यसआदेशोभवतीति" इत्युद्दालकआह ॥ अत्रएकविज्ञानेनसर्वविज्ञानं कथंस्यादिति शङ्कावारणाय दृष्टांतमुखेन प्रवृत्तेनिरूपणे जगन्मिथ्यात्वं विवर्तवादश्च नैव घटते ॥ उक्तदिशाप्रत्युतप्रतिज्ञायाभंगप्रसंगात् ॥ विवर्तदृष्टांतानामस्पर्शात् ॥ परिणामिदृष्टांतानामेवोपादानाच्च ॥ अत्र च कारणस्य साकारत्वद्योतनायैव पिंडमण्यादिशब्दग्रहणम् ॥ अन्यथा एकयामृदेत्यादेव वदेत् ॥ तथाचायवाक्यार्थ हेसोम्य यथा एकेनकेवलेनमृत्पिण्डेन अर्थाद्विज्ञातेनसता सर्वमशेष मृण्मयं मृत्कार्यं विज्ञातं स्यात् ॥ घटाद्यवस्थायां मृत्पिण्डविशेषस्यानपायात् ॥ तदेवोपपादयति ॥ वाचारभणमिति ॥ आरभ्यत इत्यारभणं मुखनासिकावचनइत्यादिवद्बाहुलकात्कर्मणिल्युट् ॥ यो विकार कार्यावस्थाया पृथुबुध्नोदरत्वादिदर्शनमूलककारणत्वप्रतिषेधरूप स्वरूपच्याव: सवाचारभणं वाचैवारभ्यते नतु वस्तुत ॥ तद्यथा शुद्धिकामेनमृदमानयेत्युक्ते नियोज्येन घटादावानीते घटोयं नमृत्तिकेति प्रतिषिध्यते ॥ सप्रतिषेधोवाङ्मात्रारब्धोन वास्तव: ॥ तथात्र घटोय नब्रह्मेति लौकिकार्थकामकृत प्रतिषेधोपि ॥ नचात्रविकारशब्देनकार्यं शक्यम् ॥ तस्य त्वन्मते नामरूपमात्रस्वरूपत्वात् ॥ विकारशब्देनैवोभयोर्लाभे नामधेयपदवैयर्थ्यप्रसंगात् ॥ कार्यस्य वाङ्मात्रारब्धत्वे मृदिघटइत्यादिप्रयोगमात्रेण घटादिदर्शनं जलानयनादिसिद्धिश्चापद्येत ॥ अथ कस्यायंविकारोवागारब्धइत्याकांक्षायां मृत्पिण्डेति पूर्वोक्तस्य कारणस्यैवेत्येव निश्चीयते नतु वस्त्वंतरस्येति ॥ एवं चविकारपदइव नामधेयपदेपि तस्यैव सबधितयाऽन्वयोऽर्थादेव प्रतीयतेऽतोनाध्याहारादिक्लेश ॥ नच-

नामधेयमपि वाचारंभणमित्यर्थः संभवति ॥ वाचोनामधेयानतिरिक्तत्वात् ॥ तस्मात्तेन-तेन नियतविन्यासविशेषेण स्थितस्य मृत्पिण्डस्यैव घटशरावादिनामधेयमित्यर्थः ॥ तथाहि मृत्पिंडे सर्वाकृतिसमावेशः ॥ काष्ठपाषाणादिवत् ॥ इदं चतुर्थश्लोक-खंडन उपपादयिष्यामः ॥ पृथुबुध्नोदरादियत्तद्विन्यासविशेषेण स्थितावपितस्य मृत्पि-ण्डत्वं नैवापैति । अन्यथा शरीरादिषु पिंडव्यवहारानुपपत्तेः ॥ तथाच रूपनाम-व्याकरणावसरे येनयेन विन्यासेन स्थितःपिंडस्तत्तदर्थक्रियासिद्ध्यर्थं तेनतेन नाम्ना व्यवह्रियतइतिकारणादभिन्नमेव कार्यं नतु स्वेन रूपेण कारणाद्भिन्नं तदाह मृत्तिकेत्येव सत्यमिति ॥ अत्र सत्यमिति न मृत्तिकाया विशेषणमितिशब्देनव्यवधानात् क्लीबनिर्देशाच्च ॥ किंतु सर्वं मृण्मयमितिपूर्वोक्तस्यैवविशेषणम् ॥ अन्यथा मृत्तिकेव सत्येत्येव वदेत् ॥ इतिशब्दोत्र हेतौप्रकारे वा ॥ तथाच सर्वंमृत्तिकामृदभिन्नमितिहेतोरेव सत्यं ॥ कारणरूपेणैव सत्यमितियावार्थः ॥ नतु मिथ्या ॥ वाचारंभणत्वेन खपुष्पतुल्यतया सर्वथा कार्यस्याभावे ब्रह्म कस्य कारणं भवेत् ॥ तदभावेच यतोवेत्यादिबहुश्रुतिव्या-कोपः ॥ भाष्ये " नतुकारणाद्व्यक्तिभेदापादक " इत्यादि कथनं तु तात्पर्यवर्णनमेव ॥ अतोनलक्षणादिप्रसंगः ॥ अन्यथा तदनन्यत्वसूत्रभाष्यस्थत्वत्संमतव्याख्यानेपि मूलोक्त-दिशा तत्प्रसंगः ॥ " नामधेयमात्रंह्येतदनृतं " इत्यादेर्मात्रपदाद्यध्याहारमनृतादौ नाम-धेयादिपदस्यलक्षणांचांतरेणाश्रयितुमशक्यत्वात् ॥ यत्तु मृदोघटइतिकथनेन जलाहरणा-सिद्धेरित्युक्तं तत्तु स्वपादेकुठारपातनम् ॥ त्वद्व्याख्याने कार्यमात्रस्य वाचैवारभ्यमाणतया तवैवतद्दोषप्रसक्तेः ॥ मम तु रूपनामव्याकरणानुरोधेन व्यवहारस्यांगीकाराददोषः प्राग्द-र्शितः ॥ यथा सुप्तउत्थितउपविष्टेवापुरुषे तथातथाप्रतीतावपि न पुरुषभेदः ॥ परं सुप्ता-दिशब्दैर्व्यवहारस्तु यदा तादृशावयवविन्यासस्तदैव ॥ तथात्र मृदोभेदाभावेपि तत्र घटादिशब्दप्रयोगस्तत्तद्विन्यासोपलंभनकालएव ॥ अन्यथा व्याकरणबाधापत्तेः ॥ नाप्य-न्यतरस्यान्यतरंप्रति हेतुत्वं संगच्छते ॥ मानाभावात् ॥ वाचारंभणत्वोक्त्यैव नामधेयमात्र-तायाः सिद्ध्या पुनस्तत्पदवैयर्थ्यानुच्छेदात् ॥ नापीतिशब्दस्य पूर्वयोजना श्रुत्यभिप्रेता ॥ तथासतीतिमृत्तिकेत्येवसत्यमितिपठेत् ॥ पठतित्वेवम् ॥ अतउक्तएवार्थः ॥ प्रसह्य योजने पिबदुग्धंविषंहित्येत्यादावपि विषंपिबेत्यर्थोनशक्योवारयितुम् ॥ किंच तथाकल्पनेपि नामधे-येतिपदयोर्वैयर्थ्यं दुरुद्धरमेव ॥ वाचारंभणंविकारोमृत्तिकेत्व सत्यमित्येतावतैव ब्रह्मसत्यं जगन्मिथ्येतिबोधसंभवात् ॥ एकादशस्कंधेपि एतच्छ्रुत्यर्थोजगतःकालत्रयेपि ब्रह्माभेदरू-पोदर्शितः ॥ यस्तुयस्यादिरंतश्चसवैमध्यंचतस्यसन् ॥ विकारो व्यवहारार्थं यथातैजसपार्थि-वा इति ॥ नहियौद्धसर्पस्यमध्ये प्रतीतिसमये आद्यंतयोर्वा रज्जुभेदः संभवति ॥ अतो विकारोन्यथाव्यपदेशोविविधव्यवहारप्रयोजनकएव ॥ अत्रच पार्थिवपदेन मृत्पिंडस्य तैजसपदेन लोहमणिनखनिकृंतनयोश्च समर्पणेन प्रकृतश्रुत्यर्थनिरूपणं निर्णीयते ॥ अष्टम-स्कंधेपि (अ० ६ श्लो० १०) त्वय्यग्र आसीत्त्वयि मध्यमासीत्त्वय्यंतआसीदिदमात्मतंत्रे ॥ त्वमादिरंतोजगतोऽस्यमध्यघटस्यमृत्स्नेवपरःपरस्मादिति ॥ प्रकृतश्रुत्यभिप्रायकथने काल-

त्रयेऽप्ययमाध्यायारंभकारणाभेदश्चोक्तः ॥ अथकार्यक्रियाणामपिकारणाधीनतयानिमित्ततामपितस्यैव दर्शयितुंच नतसनिहूंहनवाक्यं ॥ लोहशब्दश्चात्रसुवर्णादिपरः ॥ सर्वंचतैजसं लोहमित्यमरोक्तेः ॥ शैलीदारुमयी लौहीत्यादौ तथाप्रयोगाच्च ॥ लोहशब्दस्यार्थश्चैकादशेस्कंधेदर्शितः ॥ (अ० २८ श्लो० १९) यथासुवर्णंसुकृतंपुरस्तात्पश्चाच्चसर्वस्यहिरण्मयस्य ॥ मध्येतदेवव्यवहार्यमाणंनानापदेशैरहमस्यतद्वत् ॥ द्वादशेपि (अ० ४ श्लो० ३०) यथाहिरण्यंबहुधासमीयतेनृभिः क्रियाभिर्व्यवहारवर्त्मसु ॥ एवंवचोभिर्भगवानधोक्षजो व्याख्यायतेलौकिकवैदिकैर्जनैः ॥ एवमुपबृंहणेनापि कारणस्यैव तत्तन्नामधेयमित्यर्थोद्रढितोवेदितव्यः ॥ तस्मादस्य वाक्यस्य जगतोब्रह्मानन्यत्वएव तात्पर्यं नतुमिथ्यात्वे ॥ अतएव निर्णीतवान् सूत्रकार. (अ. २ पा. १ सू १४) "तदनन्यत्वमारंभणशब्दादिभ्य." इत्यादिना ॥ अर्थस्तु । कारणानन्यत्वम् ॥ नतुमिथ्यात्वमारंभणशब्दादिभ्य प्रतीयते ॥ अत्रादिपदेन नामधेयपदमितिशब्द. सदेवेत्यादिवाक्यानि च गृह्यंते ॥ एकप्रकरणस्थत्वात् ॥ तेनैतदात्म्यवाक्यस्य संग्रहः संमतएव ॥ नेहनानेत्यादेस्तु न संग्रहः ॥ शाखांतरस्थत्वेनात्र तदुपस्थापकाभावात् ॥ हेतुसाध्ययोर्वैयधिकरण्यप्रसंगाच्च ॥ इदं चाधिकरण "प्रकृतिश्च" इत्यधिकरणोक्तं समर्थयितुं प्रवृत्तम् ॥ तत्र प्रतिज्ञादृष्टांतबलादभिन्ननिमित्तोपादानत्वं साधितम् ॥ दृष्टांतवाक्यदोषेच मिथ्यात्वप्रतीतौ तत्प्रसिध्येतद.श्रुतिविप्रतिषेधं विपर्यीकृत्य सोस्तीतिपूर्वपक्षे नास्तीत्यनेन साध्यते ॥ तत्रारंभणशब्दादिभ्यइत्येव वक्तुमुचितम् ॥ नतु सच्छब्दादिभ्यइति ॥ प्रथमोपस्थितत्वात् ॥ विकारस्य वाचारंभणतायास्ततएवसिद्ध्यातेन कार्ये कारणानन्यतायानिश्चयाच्च ॥ अन्यत्तत्प्रकरणस्थंत्वादिपदेन संगृहीतम् ॥ कंठरवेणच सच्छब्दो हेतूकृतः ॥ "सत्वाच्चावरस्य" इति ॥ एतेन (अतएवारंभणशब्दादिभ्यइत्युक्तं नतुसच्छब्दादिभ्यइति) इति प्रत्युक्तम् ॥ यत्तु (अनन्यत्वशब्दार्थंस्तुअन्यत्वाभावोनतुतादात्म्यम् ॥ प्रमाणाभावात् ॥ सचकार्यस्यमिथ्यात्वात्) इति तदुपहसनीयम् ॥ ऐतदात्म्यमिदंसर्वमिति तादात्म्यग्राहकप्रमाणस्य स्वयमेवादिपदेन संग्रहात् ॥ मिथ्यात्वसाधनाय सौत्रशब्दोभेदाभावपरः साधनीयस्तत्र मिथ्यात्वस्यैव हेतुतयोक्तिः कौशलव्यापिका ॥ नचानन्यत्वशब्दार्थः सशक्यवचनः ॥ (सू० १५। १६) "भावेचोपलब्धेः ॥ सत्वाच्चावरस्य" इत्यग्रिमसूत्रद्वयविरोधात् ॥ तादात्म्यएव तौहेतू संगच्छेते नतुकारणमात्रसत्यत्वे ॥ अत्रचावरस्य कार्यस्य सत्त्व कंठरवेणोच्यते ॥ कारणस्यैवसत्यत्वे तत्पीड्येत ॥ तथाऽभिप्रायेसतिच मिथ्यात्वमारभणशब्दादिभ्यइत्येव सूत्र्येत ॥ विकारशब्दस्यकार्यपरतावरात् ॥ नचतर्हिसत्यत्वमारभणशब्दादिभ्य इत्यपिकुतोनसूत्रितमितिशंक्यम् ॥ सिद्धांतरीत्यास्वरूपप्रच्युतिरूपविकारस्यवागारब्धतया कार्यस्य कारणानन्यत्वएवारभणशब्दस्य हेतुत्वौचित्यात् ॥ अग्रेकंठरवेणावरस्य सत्त्वकथनाच्च ॥ एतेनैव तदनन्यत्वसूत्रे (भेदव्यासेधएव क्रियते नत्वभेदोबोध्यत) इतिभामतीकाराद्युक्तिः प्रत्युक्ता श्रौतप्रतिज्ञादृष्टांतयोरुपरोधात् ॥ प्रतिषिद्धेभेदेऽभेदएवपर्यव-

सानाच ॥ राहोःशिरइत्यादौ यन्नामधेयमात्रत्वमुक्तं तत्राप्यभेद एव सिध्यति ॥ अभिलापमात्रत्वेतत्पुरुषवत्कदापिराहुर्नोपलभ्येत ॥ रज्जुसर्पमृगतृष्णादौव्यासेधमात्रं तुलस्यावस्तुत्वात् ॥ उत्तरक्षणे बाधात् ॥ नचात्रतथा ॥ बाधाभावात् ॥ ब्रह्मविदाम-पिशुकवामदेवादीनांप्रपंचप्रतीतेः ॥ "तद्धैतत्पश्यन्नृषिर्वामदेवःप्रतिपेदेऽहंमनुरभवंसूर्य-श्चेति" इति ॥ मिथ्यात्वेतुमन्वादिप्रतीतिस्तस्यनस्यात् ॥ सूत्रभाष्यादिशब्दपरिगृहीत-वाक्येभ्योपि तादात्म्यस्यैव सिद्धिर्दर्श्यते ॥ तथाहि तत्र प्रतिज्ञानिर्वाहाय दृष्टांत-त्रयमुक्त्वा "एवंसोम्यसआदेशोभवति" इत्युक्तेऽपि दृष्टांते कार्यकारणयोः प्रत्य-क्षत्वाद्दार्ष्टांतिके कारणस्यकारणताप्रकारस्यचाप्रत्यक्षत्वात् ॥ "भगवांस्त्वेवमेत्र-वीतु" इतिश्वेतकेतुनापृष्टे उद्दालकः "तथासौम्य" इतितत्कथनं प्रतिज्ञाय "सदेव-सोम्येदमग्र आसीत्" इत्यादिना निरूपितवान् ॥ तत्र "सज्जायते" तिस्पष्टतया कार्यस्यसत्यत्वंवक्ति ॥ मिथ्यात्वेत्विदंशब्दसच्छब्दावपीड्येयाताम् ॥ भ्रमवादनिरास-प्रयासश्च वृथास्यात् ॥ मिथ्यासत्ययोरैक्यानुपपत्त्या "बहुस्यांप्रजायेये"तीक्षण-मपि न घटेत ॥ तेजःप्रभृतिसृष्टिरपि न संगच्छेत ॥ नहि द्रष्टा स्थाणुत्वेन गृही-तोवा पुरुषः स्थाणुरहंभवेयमितीक्ष्यातथाभवति स्थाणुंसृजतिवा ॥ भ्रमे च तेज-सोऽपामन्नस्याऽन्नस्य च संभवे "शोचतिस्वेदतेवापुरुषः" इत्यादिना युक्तिरुच्यते ॥ नह्यश्रुप्रस्वेदौवा तेजसोविवर्तः ॥ अन्नंवा वृष्ट्यादिजलस्य ॥ अन्यथाऽधिष्ठानज्ञाने बाध्येत "सेयंदेवतैक्षत" इत्यादिनोक्तमीक्षणमनुप्रवेशोव्याकरणंचनघटेताभ्रांत-त्वात् ॥ गंधर्वनगरादौप्रवेशायोगात् ॥ त्रिवृत्करणमपि तथा ॥ नहि रज्जौकल्पितः सर्पस्त्रिवृत्कर्तुंशक्यः ॥ यदपि "यदग्नेरोहितंरूपंतेजसस्तद्रूपंयच्छुक्लंतदपांयत्कृष्णं तदन्नस्यापागादग्नेरग्नित्वंवाचारंभणंविकारोनामधेयंत्रीणिरूपाणीत्येवसत्यं" इत्यादि तस्यायमर्थः ॥ लौकिकबुद्ध्याह्यग्निरग्नित्वेनरूपेण स्वतंत्रएव प्रतीयते ॥ नतु तेजोऽन्न-चतादात्म्येन ॥ तार्किकादयश्च लौकिकाः पृथिव्यप्तेजःप्रभृतीनि स्वतंत्रद्रव्याण्ये-वाभिमन्यंते तद्वारणायेदमुच्यते ॥ तत्रयदग्नेः कार्यविशेषस्य संबंधिरोहितं रूपं तत्तेजसएव रूपं नतु कारणगुणारब्धंरूपांतरमधिष्ठानेकल्पितंवाकार्यनिष्ठम् ॥ यच्छुक्लं रूपं तदप्यपामेव ॥ यत्कृष्णं रूपं तदपि पृथिव्याएव ॥ एवंसत्यग्नेः सकाशा-दग्नित्वं लौकिकबुद्ध्या निश्चितं परिच्छिन्नत्वं स्वतंत्रद्रव्यत्वमपागात् ॥ वाचारंभणं-विकारोऽग्निरयंनतेजोऽबन्नमितिस्वरूपमप्यावोवाङ्मात्रारब्धः ॥ वस्तुतः पूर्वोक्तते-जोऽबन्नात्मैव ॥ अग्निरूपमुक्तंदीपइत्यादिनामधेयं नत्वतिरिक्तमग्न्यादिकम् ॥ तदाह-त्रीणि रूपाणीत्येवसत्यमिति ॥ इतिहेतोस्तैजोऽबन्नत्वेन प्रकारेण वाऽग्न्यादिकं सत्यं नतु स्वतंत्रद्रव्यत्वेनेत्यर्थः ॥ सत्यमितितु न रूपाणां विशेषणम् ॥ वचनविरोधात् ॥ नामरूपमात्रे मिथ्यात्वमभिमन्यमानस्य तव तु रूपाणामपि सत्यत्वं बाधकमेव ॥ अने-नादित्यचंद्रसोविद्युद्वाक्यानिव्याख्यातानि ॥ एवं "अन्नमशितंत्रेधाविधीयते" इत्यादिना तेजोबन्नेष्वेकैकस्य शरीरे त्रेधा विभागोमध्यमादधिरसूक्ष्मांशस्योर्ध्वगमनं तस्य मन-

नीतयद्वागादिभावश्च कथ्यमानः परिणामवादमेव स्फुटयति नतु विवर्तवादम् ॥ नहिपुरीषमांसादिकमप्यन्नादेर्विवर्तं ॥ अग्रेऽद्भिः प्राणशक्तेर्वर्धनमन्नेन मनःशक्तेर्वर्धनं तथा ऋग्वेदादेः प्रतिभानं तदुपक्षये तदप्रतिभानं तथाग्न्यंगारदृष्टांतश्च सर्वस्य विवर्तवादे नोपपद्येत ॥ अग्रे च नवकृत्वउपदेशो "अशनापिपासेमेसोम्यविजानीहि" इत्यादिना ते निरूपिते ॥ अत्र क्षुत्पिपासयोर्जलतेज कार्यत्वेऽपि गोनायादिदृष्टांतेनाशितनेतृत्वादपामेव नामाशनायेति ॥ उदकनेतृत्वात्तेजसएव नाम उदन्येतीरयुक्तम् "यत्रैतत्पुरुषोऽशिशिषतिनामापएवतदशितंनयतेतद्यथागोनायोऽश्वनायः पुरुषनायइत्येवंतदपआचक्षतेऽशनायेति" ॥ तथा "यत्रैतत्पुरुषःपिपासतिनामतेजएवतत्पीतंनयतेतद्यथागोनायोऽश्वनाय पुरुषनायइत्येतत्तेजआचष्टउदन्येति" इति ॥ एतेनापि कारणस्यैव तत्तन्नामधेयमिति स्फुटं दर्शितम् ॥ "तत्रैतच्छुंगमुत्पतितंसोम्यविजानीहिनेदममूलंभविष्यतीति" इति शुंगमूलभावः सन्मूलकत्वादिकं च विवर्तवादबाधकमेवेत्युक्तं प्राक् ॥ "वाङ्मनसिसंपद्यते" इत्यादिक्रमेण प्रतिमक्रमोप्यविकृतपरिणामएव संगच्छते ॥ 'सयएषोऽणिमैतदात्म्यमिदꣳसर्वंतत्सत्य" इत्यत्रापीदमानिर्दिष्टस्य परिदृश्यमानस्य सर्वस्य जगतोब्रह्मात्मकत्वमुक्तम् ॥ नह्यलीकस्य तत्तादात्म्यं संभवति ॥ सत्पदेनापि अणिमपरिचायनार्थस्य सर्वस्यैव सन्निहितततया परामर्शात्तस्यैव सत्यत्वं विधीयते ॥ सर्वगतमेव चैकत्वमनूद्यते ॥ अन्यथा सआत्मा ससत्यइत्येव पठेत् ॥ अग्रेपि मधुनदीवृक्षन्यग्रोधाणुधानादिदृष्टांताः सत्कार्यवादं परिणामवादं चैवावगमयंति नमिथ्यावादमितिविस्तरभयाद्विरम्यते ॥ नापि "नेहनानास्तिकिंचन" इतिवाक्यं जगन्मिथ्यात्वं साधयितुमीष्टे ॥ अत्र इहेत्यनेन जगत्परामृश्यते ब्रह्म वा ॥ आद्ये जगति नानात्वस्यैव निषेधः सिद्धोनतुजगतः ॥ नहिभूतलेघटोनास्तीत्युक्तेभूतलस्याप्यभावोगम्यते ॥ द्वितीयेतुपुरुषादिषु देहेंद्रियादिनानात्वमिव "यदेकमव्यक्तमनंतरूप"मित्यनंतरूपे विश्वतश्चक्षुरुतविश्वतोमुखत्वादिमत्यपिब्रह्मणिननानात्वमित्येवार्थः ॥ इदंचवाक्यं कठवल्ल्यां बृहदारण्यकेचपठ्यते ॥ तत्रप्रकरणविचारेह्ययमेवार्थइति तृतीयस्य द्वितीयेस्पष्टमाकरे ॥ सूत्रे अनन्यत्वशब्देन तादात्म्यस्यैव परिग्रहेशिरोमणिभट्टाचार्यादिताकिंकोक्ता युक्तिमप्याहुः ॥ तदप्यनन्यत्वेत्यादिना ॥ तदनन्यत्वसूत्रे भेदव्यासेधएव क्रियतइतिवाचस्पत्यादीनां व्याख्यानं तत्रत्यभाष्यप्रकाशशास्त्रार्थविवरणभंगयोरपि विस्तरेण निराकृतम् ॥ लाघवरूपेति ॥ इदं युक्तिरूपम् ॥ "तदात्मानꣳस्वयमकुरुत ॥ ऐतदात्म्यमिदꣳ सर्वम्" ॥ इत्यादिश्रुतिरूपमपि तादात्म्ये प्रमाणं बोध्यम् ॥ अतोऽन्यत्वाभावपक्षएव प्रमाणाभावोज्ञेयः ॥ यत्त्वेतदाशंकावारणाय (सत्त्वकार्यस्यमिथ्यात्वात्) इत्युक्तम् ॥ तत्र "सदेवसोम्य" इत्यादितत्सूत्रविषयवाक्यविरोधस्सारयंति ॥ कार्यस्यमिथ्यात्वइत्यादिना ॥ अतोमिथ्यात्वएव मानाभावान्मानविरोधाच्च ॥ तेन हेतुनाऽन्यत्वाभावे प्रमाणाभावोवा न वक्तुं शक्यः ॥ मिथ्यात्वसिद्धौ सौत्रानन्यत्वशब्दस्यार्थनिश्चयस्तन्निश्चये च सूत्रप्रामाण्याच्छ्रुतौ कार्यमिथ्यात्वस्य सिद्धिरितीतरेतराश्र-

याच ॥ किंचेह भवद्भाष्यस्थे" तस्मात्कारणात्परमार्थतोऽनन्यत्वं व्यतिरेकेणाभावः कार्यस्यगम्यते " इतिव्याख्यानेपि व्यतिरेकेणाभावोत्तया तादात्म्यमेवापतति । अन्यथा खपुष्पादेरिवाभावमात्रं वक्तव्यम् ॥ एवं " तयोःकार्यकारणयोरनन्यत्वमवगम्यते " इतिव्याख्यानेपि तयोरिति सप्तमी षष्ठी वा आद्ये खपुष्पसगंधस्याधिकरणत्वानुपपत्त्या द्विवचनानुपपत्त्याच कार्यस्यापि सत्त्वमापद्यते ॥ द्वितीये शुद्धाद्वैतपदे षष्ठीतत्पुरुषपक्षे स्याश्रिताशेषदोषप्रसंगादन्यत्वाभावासिद्धिर्द्विवचनान्यथानुपपत्त्यादिना सुतरां तादात्म्यसिद्धिश्च ॥ अतस्तथाशयेकार्यं मिथ्यात्वमारंभणशब्दादिभ्यइत्येव कारणमात्रसत्त्वं तेभ्यइत्येव वा वदेत् ॥ एवमुक्तया तु तादात्म्यमेव फलति ॥ भावेचेत्यादिपुरस्त्यसूत्राणामपि तथैवसति संगतेश्चेतिदिक् ॥ यत्तु (अतएवारम्भणशब्दादिभ्यइत्युक्तंनतु सच्छब्दादिभ्यइति) इत्यवादि तच्छ्रुतौ पौर्वापर्याननुसंधानात् ॥ तत्रारंभणवाक्यमेव सदेवेत्यादिवाक्यतः प्रथममितिप्रथमत्यागानौचित्यात् दृष्टांततः प्रतिज्ञातोपपादकतयाऽऽवश्यकत्वाच्च युक्तं तद्ग्रहणन्न ॥ आदिशब्देनच सदेवेत्यादिकमपि संगृहीतमेव ॥ अग्रिमसूत्रेषु भावेसत्युपलब्धिमवरस्य सत्त्वंच कंठरवेण वदता तानि वाक्यानि स्मारितानीतिविभाव्यं ईक्षितेन ॥ भेदादीनामिति ॥ अयंभावः ॥ यच्च कार्यस्यासत्त्वे इत्यादितदप्यभिप्रायाज्ञानात् ॥ सर्वस्यैव कार्यस्य वाङ्मात्रारब्धत्वे कार्यात्यंताभावाद्ब्रह्म कस्य कारणं भवेदित्यस्याकमाक्षेपः ॥ तत्र कारणत्वनिर्वाहककार्यसत्त्वस्वीकारिणोऽस्मान्प्रति भेदादिदृष्टांतेन तत्साधनमयुक्तमेव ॥ बहुत्वरूपभेदस्यास्मन्मते जतुघृतयोर्द्रवत्ववद्ब्रह्मणोधर्मत्वान्नतस्यासत्त्वम् ॥ अथ ब्रह्मप्रतियोगिभेदः संसारादिश्चात्रगृह्यतइतिचेन्मायिकाम्रादिवत्तस्यासत्त्वेपि ऐन्द्रजालिकशक्तिवन्मायाया सत्यत्वाद् ब्रह्मणश्च कर्तृत्वात्तेन तया तस्य प्रदर्शनं संभवति न तथात्वन्मते ॥ किंच त्वत्प्रतिब्रह्मणोनिमित्तमात्रत्वं जगत्प्रतितूपादानत्वमपि ॥ अतो "यतोवाइमानि ॥ तदात्मानं ॥ प्रकृतिश्च" इत्यादीनां न मन्मते व्याकोपः तव तु सर्वस्यासत्त्वात्तद्व्याकोपोदुरुद्धरः ॥ स्वानन्येत्यादि तु प्रलापमात्रम् ॥ शरीरे स्वानन्यकरभिन्नचरणाभेदस्य समुद्राभिन्नैकतरंगतोऽन्यस्मिन्नपि तरंगे समुद्राभेदस्यच दर्शनेन परस्परभिन्नयोरपि विन्यासयोः पुरुषाभिन्नतायाः पुरुषभेदानाधायकतायाश्च सुयुक्तत्वात् ॥ अतएवपरमाचार्यस्याऽहिकुंडलादिदृष्टांताः संगच्छंते ॥ अन्यथा ते बाध्येरन् ॥ विन्यासानां कल्पितत्वं तु सत्यविन्यासांतराभावसादृश्याभावादिभिरशक्यवचनम् ॥ किंच विजनेसुपुप्तिंगतस्यपुंसोविन्यासस्यकः कल्पकः ॥ स्वस्य निद्रापराभूतत्वादितरस्याभावात् ॥ तदा विन्यासस्याभावे तु निद्राकालिकस्यतस्यानुमितिरबाधिता नोपपद्येत ॥ उत्तरकालेऽनुमितिस्तु परिम्लानपीनस्तनजघनसंगादुभयस्तनोर्मध्यस्यातः परिमिलनमप्यसरसम् ॥ इदंव्यस्तन्यासंशिथिलितभुजाक्षेपवशतः कृशांग्याः संतापंवदतिनलिनीपत्रशयनमिति रत्नावल्यादिषु वर्णिता लोके च प्रसिद्धा ॥

किंच जगतोमायिकत्वे मायिकस्वप्नवैधर्म्यप्रतिपादकस्य "वैधर्म्याच्चनस्वप्नादिव"दितिसूत्रस्य विरोधः ॥ ननु "नाभावउपलब्धे"रि-

त्यनेनसर्वथा बाह्यार्थासत्वमभ्युपगच्छतो विज्ञानवादिनोमतस्य-
खण्डनमुपक्रम्य स्वप्नादिप्र्त्ययंतरेणाप्यर्थं वासनानिमित्तस्य वैचित्र्यस्य
यथाभ्युपगमस्तथाजागरेपि वासनानिमित्तमेववैचित्र्यंनत्वर्थनि-
मित्तमित्यभावोबाह्यार्थस्येतितदभ्युपगतंस्वप्नेसर्वथार्थशून्यत्वमभ्युप-
गम्यजागरितप्रत्ययेषु तदभावं वैधर्म्यादित्यादिनावैधर्म्यंचजागरिते
बाधाभावः स्वप्नेबाधः एवंच स्वप्ने यथाऽर्थशून्यत्वमाश्रीयतेतथा-
जागरितेनाश्रयितुंशक्यमितिसूत्रकारेण विज्ञानवादिनोबौद्धमतस्यैव
खंडनं कृतं नास्मन्मतस्यास्मन्मते तु स्वप्नस्याविद्यादशायामेव बाधो
जगतस्त्वविद्यादशायां बाधइति वैधर्म्यसत्वात्सूत्रविरोधइति
चेन्न॥ विज्ञानवादिमताद्भवन्मते विशेषाभावात् तन्मते विरोधसत्वे
भवन्मते विरोधोनेतिवक्तुं नशक्यते॥ यथा विज्ञानवादिभिः सर्वस्य
विज्ञानस्वरूपत्वं बाह्यार्थाभावः स्वीक्रियते तदुक्तेः॥ बुद्धिस्वरूपमेकं
हिवस्त्वस्तिपरमार्थतः॥ प्रतिभासस्यनानात्वान्नचैकत्वंविहन्यते॥ परि-
व्राट्कामुकशुनामेकस्यांप्रमदातनौ॥ कुणपःकामिनीभक्ष्यमितितिस्रोविकल्पना॥
तथाप्येकैवसा बालाबुद्धितत्वंपरंहिन इति॥ एवमेव
भवद्भिरपिदृष्टिसृष्टिवादिभिर्दृष्टिपदप्रतिपाद्यविज्ञानव्यतिरिक्तासृष्टि
र्नस्वीक्रियते॥ यथातैःस्वप्नदृष्टांतेनबाह्यार्थासत्वंप्रतिपाद्यतेतथा
चानुमानंतन्मते॥ स्तंभादिप्रत्ययाः स्वात्मांशमेव बाह्यतयाऽध्यव-
स्यंतोमिथ्याभूताः प्रत्ययत्वात् स्वप्नप्रत्ययवत् शुक्तिरजतप्रत्ययवच्च॥
स्वप्ने यथा बाह्यार्थाभावादेशांतरवर्तिनां स्वशिरश्छेदादीनां च दर्श-
नादवश्यं विज्ञानमेव तत्तदाकारेण भासते॥ तथा जाग्रज्ज्ञानानामपि
विज्ञानग्राहित्वं मिथ्यात्वं चेति॥ तथैव भवन्मते स्वप्नदृष्टांतेन
जाग्रत्पदार्थानां मिथ्यात्वं साध्यते उक्तंच गौडपादैः॥ यथास्वप्नेद्व-
याभासंस्पंदतेमाययामनः॥ तथाजाग्रद्द्वयाभासंस्पंदतेमायया मनः॥
अद्वयंच द्वयाभासंमनःस्वप्नेनसंशयः॥ अद्वयंचद्वयाभासंतथाजाग्र-
न्नसंशयइति॥ एवंच स्वप्नसाधर्म्येणसर्वप्रपंच मिथ्यात्वमभ्युपग-
च्छतां भवतांमतेपिप्रपंचे स्वप्नवैधर्म्याभावाद् "वैधर्म्याच्चनस्वप्ना-
दिव" दितिसूत्रविरोध कथं न स्यात्॥ नचाविद्यादशायामेव स्वप्न
स्यबाधोस्माभिः स्वीक्रियते प्रपंचस्य तु ज्ञानेनाविद्यानिवृतावेवेतिवैध-
र्म्यसत्वात्कुतोऽस्मन्मते सूत्रविरोधइतिवाच्यम्॥ स्वप्नदृष्टांतेन
स्वप्नसाधर्म्यात्प्रपंचस्यासत्वमभ्युपगच्छतांमतखंडनायेदं सूत्रं प्रवृत्त
तत्र सूत्रकारस्यायमाशयः यादृशसाधर्म्येण ज्ञाननिवर्त्यत्वबाधित-
त्वमायाकार्यत्वादिना प्रपंचस्यासत्वं साध्यतेतत्साधर्म्यं न प्रपंचस्य॥

किंतु वैधर्म्यमेव प्रपंचे ज्ञानानिवर्त्यत्वसत्यत्वाऽमायिकत्वादीनां सत्वात्॥ तादृशवैधर्म्यस्य चत्वयाऽनभ्युपगमात्कथं न विरोधः॥ अविद्यादशायामबाधमात्रेण वैधर्म्यं न संभवति॥ अन्यथा त्वन्मतसिद्धषोडशावस्थांतर्गतस्वप्नस्वप्नावस्थादृष्टगजादीनां स्वप्नजाग्रदवस्थायां बाधात्तदवस्थादृष्टानां चाबाधात्तत्रापि वैधर्म्यसत्वात्तेषामपि मिथ्यात्वं न स्यात् किंच नस्वप्नादिवदित्यंशेन यथा स्वप्नस्य मिथ्यात्वमसत्यत्वं वा तथा प्रपंचस्य नेत्युच्यते त्वन्मते च प्रपंचस्य मिथ्यात्वात्तादृशांशविरोधोपि॥ नचाविद्यादशायां सत्वान्न तादृशांशविरोधः॥ अविद्यादशायां सत्वाभ्युपगमे त्रैकालिकनिषेधप्रतियोगित्वं स्वाश्रयत्वेनाभिमतनिष्ठात्यंताभावप्रतियोगित्वमित्यादीनां त्वयाऽभ्युपगतानां तत्रासत्वेन मिथ्यात्वानुपपत्तेः॥ अंशिनः स्वांशगात्यंताभावस्य प्रतियोगिनः॥ अंशित्वादितरांशीवदित्येवगुणादिष्विति चित्सुखोक्तिविरोधश्च॥ किंच मिथ्यात्वासत्वयोर्वास्तवभेदाभावान्नामांतरस्य च भेदासाधकत्वात्त्वाप्यसद्वादित्वमेव दृष्टिसृष्टिवादित्वेन विज्ञानवादित्वमपि॥ नचात्यंतासत्वे प्रतीत्यनुपपत्तिरितिवाच्यं॥ असद्वादिभिरत्यंतासतामेव स्वाप्नपदार्थानां तत्साधर्म्येण जाग्रत्पदार्थानां च प्रतीतेरभ्युपगमात् यत्तु (स्वाप्नप्रत्ययैः सर्वथा सादृश्यस्यानिषेधात् अन्यथा सर्वस्य कथंचित्सर्वसदृशत्वेहंतादिप्रपंचस्य भेदादेरासुरव्यामोहायासत्यस्यैव प्रतीयमानतयाऽभ्युपगतस्य प्रभासलीलादेश्च त्वन्मतेपिमायिकत्वेन च तथापि तद्विरोधोदुर्वारःस्या) दित्याद्युक्तं तदपि न सम्यक्॥ स्वाप्नपदार्थैः सर्वथासादृश्यस्यानिषेधेपि मिथ्यात्वमायिकत्वादीनां जाग्रत्प्रपंचे त्वयाङ्गीकृतानां निषेधेन सूत्रविरोधस्यानुद्धारात्॥ यत्किंचिद्वैधर्म्यमादाय सादृश्यनिषेधे चंद्रसदृशेपि मुखे तेजसत्वकलंकित्वादिवैधर्म्याच्चंद्रवदित्यादिव्यवहारापत्तेः॥ अस्मन्मते च प्रपंचस्य सत्यत्वेन मिथ्यात्वमायिकत्वादीनामनभ्युपगमेन स्वप्नतुल्यत्वाभावान्न सूत्रविरोधः॥ अहंतादिप्रपंचस्य आसुरव्यामोहनादिलीलानांच मायिकत्वेऽपि तेषां सूत्रस्थादिपदेन संगृहीतानां स्वप्नतुल्यानांप्रपंचे वैधर्म्यसंभवेन नकोपि दोषः पदमादधाति॥ अन्यथाऽऽदिपदस्य वैयर्थ्यापत्तेः॥ त्वन्मतेपि शुक्तिरजतादीनामादिपदेन ग्रहणमवश्यंकर्त्तव्यम् अन्यथातेष्वविद्यादशायां बाधितेषु स्वप्नवैधर्म्यासत्वेनाविद्यादशायामित्याद्युक्तावपि सूत्रविरोधोद्धारो न स्यात्॥ किंच प्रपंचस्य मायिकत्वे मोक्षसाधनेषु श्रवणमननादिषु प्रवृत्तिर्नस्यात् एकजीववादस्यैव तत्सिद्धांतसंमततया तद्भिन्नानां स्वप्नजीववज्जीवाभासत्वेन वामदेवशुकादीनामपिस्वप्नदृ-

प्रमुक्ततुल्यत्वेन गुरुशिष्यशास्त्रादीनामपि स्वप्नतुल्यत्वात्कस्यचिदपि पुरुषस्य मम मुक्तिर्भविष्यतीतिविश्वासासंभवश्च स्यादित्ययमेवार्थः सूत्रस्थचकारेण व्यासैर्दर्शितः ॥ अतोविज्ञानवादिनस्तत्तुल्यस्य तव च मतखंडनायेदं सूत्रं प्रवृत्तं ॥ एतेन (उक्ताशयेन विज्ञानवादिनं प्रति सूत्रस्य प्रवृत्तत्वा) दिति प्रयुक्तं ॥

सहस्राक्षे यच्च मायिकृतयोभयसंमतेत्यादि सूत्रस्यप्रवृत्तत्वादित्यंतं भागं परिहरंति ॥ किंचजगतामायिकत्वइत्यादिना ॥ प्रवृत्तत्वादिति प्रत्युक्तमित्यंतेन ॥ विज्ञानवादमायावादयोः कथमविशेषइत्यतस्तमुपपादयति ॥ यथाविज्ञानवादिभिरित्यादिना ॥ अत्रप्राच्च ॥ शमथविपश्यनायुगनद्धवाहीमार्गोयोग इतितेषांयोगलक्षणंशमथःसमाधिरुच्यते ॥ विपश्यनासम्यग्दर्शनम् ॥ यथायुगनद्धौवलीवर्दौवहतस्तथायोमार्गः सम्यग्दर्शनवाहीसयोगस्तेनाचरतीतियोगाचारउच्यते ॥ इतितेषांसम्यग्दर्शनंचसर्वंबाह्यार्थशून्यंविज्ञानं सर्वंक्षणिकं सर्वंनिरात्मकमिति ॥ एतच्चभास्करभाष्येपिस्फुटम् ॥ अत्रसर्वंक्षणिकत्वंविज्ञानस्कंधस्यक्षणिकत्वात् ॥ निरात्मकत्वमालयविज्ञानातिरिक्तात्माभावात् ॥ बाह्यार्थशून्यत्वंतु विज्ञानस्यैवसाकारत्वात् ॥ प्रत्यक्षत्वाच्च ॥ तथाहि सर्वंविज्ञानमेव ॥ यत्साकारयत्प्रत्यक्षंतद्विज्ञानमेव ॥ नीलंपीतमित्याद्याकारकहि विज्ञानमेवप्रकाशते ॥ दृष्टिप्रत्यक्षंचतत् प्रदीपवत् प्रकाशकत्वात् ॥ यन्मते ज्ञानमप्रत्यक्षंतस्यस्वपरोत्पन्नज्ञानयोरविशेषआपद्येत ॥ अस्तितुविशेष ॥ स्वोत्पन्नज्ञानेनप्रवृत्तिर्निवृत्तिर्वाभवतीति ॥ अतएकमेवविज्ञानंग्राह्यग्राहकसंवित्तिभेदेनप्रत्यक्षंप्रकाशते ॥ यथोक्तंचिप्रभिक्षुणा ॥ अप्रत्यक्षोपलंभस्यनार्थदृष्टि प्रसिद्ध्यति ॥ अविभागोपिबुद्ध्यात्माविपर्यासितदर्शनैः ॥ ग्राह्यग्राहकसंवित्तिभेदवा-

---

यच्च मायिकृतयोभयसमतस्वप्नवैधर्म्यप्रतिपादकस्य वैधर्म्याच्चिनस्वप्नादिवदितिसूत्रस्यविरोधमुक्तवांस्तच्चनसम्यक् । तथाहि नाभावउपलब्धेरित्यनेनसर्वथाबाह्यार्थासत्त्वमभ्युपगच्छतोविज्ञानवादिनोमतस्य खण्डनमुपक्रम्य स्वप्नादिष्वन्तरेणाऽप्यर्थंवासनानिमित्तस्यवैचित्र्यस्योभाभ्यामभ्युपगम्यमानत्वात् ॥ अन्तरेणतुवासनामर्थंनिमित्तस्यज्ञानवैचित्र्यस्य मयाऽनभ्युपगतत्वात् ॥ अभावोबाह्यार्थस्येतितदभ्युपगतस्वप्नेसर्वथार्थशून्यत्वमभ्युपगम्य जागरितप्रत्ययेषुतदभाववैधर्म्याच्चेत्यनेनाह ॥ एवच यथास्वप्नेऽर्थशून्यत्वमाश्रीयते तथाजागरितेनाश्रयितुंशक्यम् ॥ वैधर्म्यात् ॥ वैधर्म्यंचजागरितेबाधाभाव स्वप्नेबाध ॥ अस्माद्रीत्यातु अविद्यादशायामेवस्वप्नस्यबाधइतरस्यतुनेतिबोध्यम् ॥ एवञ्च कथतद्विरोध ॥ स्वाप्नप्रत्यये सर्वथासादृश्यस्याऽनिषेधात् ॥ अन्यथा सर्वस्यकथंचित्सर्वसदृशत्वेनअहतादिप्रपञ्चस्यभेदादेरासुरव्यामोहायासत्यस्यैवप्रतीयमानतयाऽभ्युपगतस्वप्नभासलीलादेश्च त्वन्मतेपिमायिकत्वेनच तवापितद्विरोधोदुर्वार स्यात् ॥ अर्हत्वादिष्वव्यभिचारेणसूत्रासंगतिश्च ॥ एतेन मोक्षसाधनेप्रवृत्त्यनुपपत्तेश्चेतितत्सूत्रस्थचकारस्यतात्पर्यवर्णयतष्टीकाकारस्योक्तिःप्रत्युक्ता ॥ उक्ताशयेनविज्ञानवादिनप्रतिसूत्रस्यप्रवृत्तत्वात् ।

निरस्यते इति ॥ सर्पादिः प्रवृत्तिनिवृत्तिलक्षणव्यवहारः बुद्धिरेवाग्राह्यविभागाद्विलोपि-
भ्रान्तदर्शनैर्द्वैतुमिर्माद्यारिभेदवानिवभासत इत्यर्थः ॥ तत्र ग्राह्यकारः प्रमेयं ग्राहकाकारः प्र-
माणं स्वसंवित्तिःफलं इतिमयमेकस्मिन्नेव विज्ञानेऽधकल्पते ॥ गर्भत्रिभागकल्पनेपि-
नानात्वं प्रसङ्गात्तनुपपत्तेः ॥ किंच सहोपलंभनियमादभेदोनीलतद्धियोः ॥ यद्वेदनील-
ज्ञानं तद्वेदनीयमुपलभ्यतेतस्मादभिन्नमित्यर्थः ॥ इत्यनुमानाद्वाह्यार्थाभावः ॥ बाह्य-
प्रत्ययोमिथ्या ॥ प्रत्ययत्वात् स्वप्नप्रत्ययवदिति ॥ इत्याहुः ॥ तदेतत्संगृह्णातान्यदरू-
पमाहुः ॥ बुद्धिस्वरूपमिति सर्वमनुपरमार्थतः बुद्धिस्वरूपं विज्ञानात्मकं अतएवैकं
नचान्यत्प्रत्यनागाद्यादेकस्यविधातः ॥ यथाएकस्मिन्पिण्डीभूतेविरमनोऽय इति कामु-
कानां कामिनीति भारिमांसाशिनां भक्ष्यमिति तृणमितिकल्पनाः ॥ एवंविकल्पनानानात्वेपि-
यथा सा बाला सैकैव तथाऽस्माकंबुद्धिरिति तदाशयः ॥ एवमेवेत्यादि ॥ दृष्टिसृष्टि-
वादोभवतामद्वैतसिद्धयादिषुप्रपंचितः ॥ तत्रदृष्टिश्चज्ञानमेव ॥ नबुधाद्यपज्ञानमानम् ॥
"स्वप्नादिपुरूषोनाक्षो घन" इत्यादौपश्यतेर्ज्ञानसामान्यार्थकतायामपि सिद्धेः ॥ अन्यथा
दृष्टिसृष्टिवादे बाधोः अर्थैरधकारामिभूतैश्चद्दुल्पपरामर्शादिनैवोपलभ्यमानयस्तुत्वोपसिप्पा-
स्यंतस्यात् ॥ तस्माद्विज्ञानमेवबाह्यार्थोदृष्टिरेव बाह्यार्थइत्यनयोःतरम् ॥ ज्ञानस्वस्वरूपे-
बाहुर्नोगदेतन्मनीषिणः ॥ अर्थस्वरूपंभाम्यंतःपश्यंत्यन्येदुदृष्टयइत्याबुदाहरन्तोज्ञानातिरि-
क्तबाह्यार्थाभावमेवाद्वैतवादिनोऽपि मन्यन्ते ॥ ज्ञानस्यैवचबाह्यादिविभिन्नरूपभेदवत्त्वमिवेति ॥
स्तंभादिप्रत्ययाइति ॥ जागरितप्रत्ययादृतिभावः ॥ अग्रेदंयोज्यम् ॥ स्वाप्नप्रत्ययादि-
त्वन्मते आलयविज्ञानस्यस्वाल्मनएव अंशान्बाह्यार्थतयाऽध्यवस्यंति इदंगृहमयंगजइति ॥
नहितदानींपारमार्थिकाबाह्यार्थाःसंति अतिदूरवर्तिदेशांतरवर्तिनामप्यनुभवात् ॥ कदाचि-
दप्यननुभूतानांस्वशिरश्छेदमनुष्योष्ट्रादीनांचानुभवात् ॥ अतोविज्ञान स्यैवतत्तदाकार-
स्यतद्बाह्यार्थतयाऽध्यवसायात्तेप्रत्ययामिथ्याभूताएव ॥ अतस्तेषुप्रत्ययत्वेनस्वाभासानां-
बाह्यार्थतयाऽध्यवसायिमिथ्याभूतत्वेन च व्याप्तिमादायजागरितप्रत्ययेष्वपिप्रत्ययत्वेन
हेतुना तथात्वं साध्यते ॥ तन्मतखंडनेतु (अ० २ पा० २ सू० २८) "नाभावउपलब्धे"
इत्यधिकरणेद्रष्टव्यम् ॥ तद्वत्स्वप्नादिदृष्टांतेनैव भवन्मतेपिमिथ्यात्वं साधितमित्यत्रशंकरा-
चार्यपरमगुरुसंमतिमाहुः ॥ उक्तंचेति ॥ मांडूक्योपरिगौडपादीयेऽद्वैतप्रकरणे (कारि-
का २९।३०) उक्तमित्यर्थः ॥ यथास्वप्नइति ॥ एतदर्थंतुतद्भाष्येशंकराचार्याः ॥ "कथं-
पुनः सतोमाययैव जन्मेत्युच्यते ॥ यथा रज्ज्वां विकल्पितः सर्पोरज्जुरूपेणावेक्ष्यमाणः सन्
एवं मन.परमार्थविज्ञप्त्यात्मरूपेणावेक्ष्यमाणं सत् ग्राह्यग्राहकरूपेण द्वयाभास स्पंदते
स्वप्ने मायया रज्ज्वामिव सर्पः तथा तद्वदेव जाग्रज्जागरिते स्पंदतेमाययामनः स्पंदतइत्ये-
त्यर्थः" इति व्याचक्षते ॥ तत्रैतदग्रे (कारिका ३१) मनोदृश्यमिदंद्वैतंयत्किंचित्सचरा-
चरम् ॥ मनसोह्यमनीभावेद्वैतंनैवोपलभ्यतइति दृष्टिसृष्टिवादः तथा (का० ३३) अकल्प-
कमजंज्ञानंज्ञेयाभिन्नंप्रचक्षतइत्यात्मनोज्ञानमात्ररूपत्वं चोक्तम् ॥ अथापि शंकराचार्याः
"रज्जुसर्पवद्विकल्पनारूपंद्वैतरूपेणमनएवयुक्तम् ॥ तत्रकिंप्रमाणमित्यन्वयव्यतिरेकलक्षण-

मनुमानमाह ॥ कथंतेनहिमनसाविकल्प्यमानेनदृश्यंमनोदृश्यमिदंद्वैतंसर्वंमनइति-प्रतिज्ञा ॥ तद्भावेभावात्तदभावेऽभावात् ॥ मनसोह्यमनीभावेनिरुद्धेविवेकदर्शनाभ्यास-वैराग्याभ्यांरज्ज्वामिवसर्पेलयंगतेवासुषुप्तेद्वैतंनैवोपलभ्यतइत्यभावात्सिद्धंद्वैतस्यासत्यमि-त्यर्थः" इत्याहुः ॥ अतस्तत्रापि मते सूत्रविरोधस्तदवस्थः ॥ उभयसंमतोवासनासन्ज्ञा-नोपि (अ०२पा०२सू०३०) "नभावोऽनुपलब्धेः" इतिसूत्रेण निराकृतइति किं प्रासंगिकेन ज्ञाननिवर्त्यत्वेत्यादि ॥ अत्रज्ञाननिवर्त्यत्वंसौत्रादिपदपरिगृहीतशुक्तिरज-तादौ स्पष्टं स्वप्ने कदाचित्स्वप्नोयमिति ज्ञानेपि कंचित्कालं तदनिवृत्तिदर्शनात् ॥ बाधितत्वं तु स्वप्नेपि जागरणोत्तरं स्वाप्नगजाद्यनुपलंभात् ॥ मायिकत्वं तु विवर्त्ते स्वप्ने ऐन्द्रजालिक-वस्तुनि च तुल्यं सूत्रआदिपदेन विवर्त्तैन्द्रजालिकादीनां संग्रहः ॥ ज्ञानानिवर्त्यत्वेत्यादि ॥ "तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदे ॥ तस्यसर्वेषुलोकेषुकामचारोभवति ॥ कामान्नी-कामरूप्यनुसंचरन्एतत्सामगायन्नास्ते ॥ हावु ३ अहमन्न ३ ॥ यस्तुसर्वाणिभूतान्या-त्मन्येवानुपश्यति ॥ सर्वभूतेषुचात्मानंततोनविजुगुप्सते ॥ यस्मिन्सर्वाणिभूतान्यात्मै-वाभूद्विजानतः ॥ तत्रकोमोहः कःशोकएकत्वमनुपश्यतः" इतिबृहदारण्यकच्छां-दोग्यतैत्तिरीयेशावास्यादिषु ज्ञानिनामपि प्रपंचदर्शितायाः श्रावणाज्ज्ञानानिवर्त्यत्वं ॥ प्रपंचस्य ज्ञाननिवर्त्यत्वे ज्ञानिनः शिष्याद्यनुपलब्ध्या प्रवचनासंभवात् अज्ञानि-नश्चानुपसत्तव्यत्वात् मुंडकादिषु ब्रह्मनिष्ठस्यैव तद्विज्ञानार्थमभिगम्यत्वश्रावणाच्च मोक्ष-मार्गोच्छेदः ॥ तस्य सत्यत्वंतु "यदिदंकिंच तत्सत्यमित्याचक्षते" इत्यादिश्रुतिभ्यः ॥ ततएवामायिकत्वं ॥ "तदात्मानꣳस्वयमकुरुत ॥ सहैतावानास ॥ सर्वंखल्विदं-ब्रह्म ॥ पुरुषएवेदंसर्वं ॥ इदंसर्वंयदयमात्मा" इत्यादिश्रुतिभ्यश्च ॥ आदिपदेनोभयत्र यथायथंनिरुपादानकत्वब्रह्मोपादानकत्वादयः ॥ एवं चाविद्यानाशोत्तरमपि प्रपंचस्याबा-धात्तत्कल्पना प्रत्युक्ता ज्ञेया ॥ षोडशावस्थेत्यादि ॥ अद्यत्वेविद्यमानावेदांतादर्शकाराद-यस्तुतिस्रएवपरस्परमिश्रणान्नवावस्थासप्तचाज्ञानभूमिकाइतिवदंतः संकलनयाषोडशताः दर्शयंतियथाहुः ॥ (श्लो० ९५।९६।९७) जाग्रज्जाग्रत्तथाजाग्रत्स्वप्नजाग्रत्सुषुप्तिके । एवंत्रैविध्यमापन्नं जाग्रदुक्तंमनीषिभिः ॥ स्वप्नजाग्रत्तथास्वप्नस्वप्नस्वप्नसुषुप्तिके । स्वप्न-त्रयंसमाख्यातमेवंवेदांतपारगैः सुप्तिजाग्रत्तथासुप्तिःसुप्तिसुप्तिसुषुप्तिके । त्रैविध्यंहिग-तेत्येवं भेदात्सुप्तिस्तथैवचेति ॥ तथा (श्लोकः १८९) बीजजाग्रत्तथाजाग्रन्महाजाग्र-त्तथैवच ॥ जाग्रत्स्वप्नस्तथास्वप्नः स्वप्नजाग्रत्सुषुप्तिके ॥ एवंभेदात्समाख्याताः सप्ताऽ-ज्ञानस्यभूमयति ॥ व्याचक्षतेचतएव "प्रमाज्ञानं जाग्रज्जाग्रत् शुक्तिरजतादिभ्रमो जाग्रत्स्वप्नः । जाग्रदवस्थायां श्रमादिनास्तब्धीभावः जाग्रत्सुषुप्तिः । स्वप्नमित्रा-दिप्राप्तिः स्वप्नजाग्रत् । स्वप्नेपि स्वप्नो मया दृष्ट इतिबुद्धिः स्वप्नस्वप्नः । जाग्र-द्दशायां वक्तुमशक्यं यत्किंचित्स्वप्नेनुभूयतेतत्स्वप्नसुषुप्तिः । सुषुप्त्यवस्थायां सात्त्विकीया-सुखाकारावृत्तिः (यदनंतरंप्रबुद्धस्य सुखमहमस्वाप्समितिपरामर्शः) सासुषुप्ति-जाग्रत् तत्रैवयाराजसीवृत्तिः (यदनन्तरन्दुःखमहमस्वाप्समिति प्रबुद्धस्यपरामर्शः

सासुषुप्तिस्वप्नः । तत्रैवयातामसीवृत्तिः) यदनंतरंगाढं मूढोहमस्वाप्समिति परामर्शः सासुषुप्तिसुषुप्ति" रिति ॥ प्राग्वस्तुस्वप्नेस्वप्नांतरं स्वप्नस्वप्नः । स्वप्नएवस्वप्नाज्जागरणंस्व-प्नजाग्रत् "स्वप्नेजागरणेयथे"त्यादिपुराणप्रसिद्धे रितियास्तांविवर्णयेति बीजजाग्रदा-दयश्चेत्थमन्यत्रलक्षिताः कुसूलेसंस्थितंबीजं तत्रसर्वोयथाद्रुमः । तथायत्रस्थितंविश्वंनतु व्यक्तिमुपागतम् । बीजरूपंस्थितं जाग्रद्बीजजाग्रत्तदुच्यते ॥ संसारप्रथमावस्थामहा-मोहःसएवहि । तदेवाज्ञानमित्युक्तंपरस्यबोधेननश्यते । कुसूलेसंस्थितंबीजं क्षेत्रेनिक्षि प्यतेयदा अंकुरोन्मुखतांयातिसावस्थाजाग्रदुच्यते । इदमेनमहत्तत्त्वमितिसांख्यैर्निरूप्यते ईक्षणंचेतिवेदान्तैः सामान्याहंकृतिस्तथा । आनंदमयकोशश्चतत्साक्षीत्वीश्वरःस्मृतः । विशेषाहंकृतिः सूक्ष्मांकुरवद्ध्यानहारिणी । महाजाग्रद्बुधैः प्रोक्ता स्पष्टयवस्थाग्रयेतुसा । जाग्रत्स्वप्नसुषुप्त्याख्येवस्थाजाग्रदितिस्मृता । जाग्रदेवयदाजीवो मनोराज्यंकरोतिहि । जाग्रतः स्वप्नद्वयस्स जाग्रत्स्वप्नउच्यते । लोकप्रसिद्धोयः स्वप्नः सस्वप्नइतिकथ्यते जातेपि-जागरेजंतोः स्वप्नदृष्टार्थभासनम् । प्रत्यक्षमिवसंस्कारात्स्वप्नजाग्रत्तदुच्यते । षड्वस्था-परित्यागेसुषुप्तिःसप्तमीमतेति । केनचित्प्रकारभेदेन विलक्षणाअप्यवस्थाविशेषाः विद्या-रण्यचित्सुखादिभिर्दर्शितास्तुप्रकृतेतत्तद्ग्रंथेभ्यएवावगंतव्याइति प्रासंगिकवस्तुविस्तराद्वि-रम्यते ॥ स्वप्नेपि स्वप्नांतरं स्वप्नस्वप्नः तादृशस्वप्नविरामे पूर्वस्वप्नएव जागरणं स्वप्नजाग्र-दवस्था ॥ तदवस्थेति ॥ स्वप्नजाग्रदवस्था ॥ तथाच भवन्मते स्वप्नजाग्रदवस्था-स्थपदार्थानां यथा स्वप्नस्वप्नापेक्षया चिराद्बाधस्तथा प्रपंचस्य सर्वस्वप्नापेक्षयाऽतिचि-रादपि सदिति साधर्म्यस्यसिद्ध्या चिरकालावस्थानोत्तरमपि बाधोजगतोन स्वप्नादि-तोवैधर्म्याऽपादकः ॥ देवालयादौद्वारस्तंभादिजटितशुक्तिशकलेषु कस्यचिद्बहुदिना-वधिरजतबुद्धेरनुवर्तनेऽपि उत्तरक्षण एव बाधितरजताद्वैधर्म्यं चिरकालानुवृत्तमिथ्यारजते न शक्यं वक्तुम् ॥ यथा कथंचिद्वैधर्म्यस्य तु सर्वत्रैव संभवेन तत्रापि वैधर्म्याग्रहे सति साधर्म्यव्यवहार एवोच्छिद्येत ॥ तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वस्यैव सादृश्यपदार्थ-त्वात् ॥ भूयःपदेन यत्किंचिद्वैधर्म्यंसर्वत्र सुलभं मूलेऽपिविवक्ष्यते ॥ अतोज्ञाननिवर्त्यत्व-बाध्यत्वमायिकत्वादिभूयोधर्माणां प्रपंचे स्वप्नादौ चांगीकारात्साधर्म्यस्यैव सिध्यासून-विरोधस्तदवस्थः ॥ किंच न स्वप्नेत्यादिमिथ्यात्वम् ॥ सदसत्वाभ्यामनिर्वचनीय-त्वम् । असत्यत्वं ॥ सन्मात्रभिन्नत्वं ॥ इदं तन्मतमेवानुसृत्योक्तम् ॥ वस्तुतस्त्व-सत्यंमिथ्येत्यर्थांतरम् ॥ त्रैकालिकनिषेधप्रतियोगित्वमिति मिथ्यालक्षणमद्वैत-सिद्ध्यादिपुस्पष्टं ॥ स्वाश्रयत्वेनेत्यादि ॥ इदमपिलक्षणंचित्सुखेन (परिच्छेद १ कारिका ११) सर्वेषामपिभावानांस्वाश्रयत्वेनसम्मते ॥ प्रतियोगित्वमत्यन्ताभावंप्रति-मृषात्मतेनीति सगृहीतं ॥ तत्रैव "घटपटादीनांभावानांस्वाश्रयत्वेनाभिमताम्तंत्वादयोयेत-त्रिष्ठात्यन्ताभावप्रतियोगितैवतेषांमिथ्यात्वं नहितेषामन्यत्रसत्तासंभवति तत्रापिचेत्सा नस्यात् तदागत्वेपाटुकन्यायेनमृषात्वमेवपर्यवस्येत्" इतिव्याख्यातमपि ॥ तत्रासत्वेनेति

प्रापंचिकघटादिषुप्रागुक्तलक्षणासत्वेन ॥ अविद्यादशायांतेषां सत्वांगीकारेवर्तमानकालिक-प्रतिषेधाप्रतियोगित्वस्यापत्त्याश्रयभूताविद्यानिष्ठात्यन्ताभावाप्रतियोगित्वस्यापत्याच तेषुलक्षणासत्वमितिभावः ॥ अशिनइति ॥ चित्सुखकृतप्रत्यक्तत्वप्रदीपिकायां प्रथम-परिच्छेदेप्रागुक्ताप्रिमेय (१२) कारिका ॥ विवृताचतत्रैव "विमतंपटःएतत्तन्तुनिष्ठात्य-न्ताभावप्रतियोगीअवयविरवात् पटान्तरवत् एवमेवतद्गुणकर्मजात्यादयोऽपि एतत्तन्तुनि-ष्ठाभावप्रतियोगिनः तद्रूपत्वात् इतरतत्तद्रूपवदिति एवमादिप्रयोगास्सर्वत्रोहनीयाः" इति ॥ एवंधाशिनः पटादयः स्वांशा.तंरवादयः एतत्तन्तुषुपटोनास्तीति प्रतीतिसाक्षिका-त्यन्ताभावस्यपटादयः प्रतियोगिनइत्यर्थः॥ अविद्यादशायांसत्वांगीकारेतद्विरोध स्पष्टएव॥ एतदनुरोधेनप्रतीतिकालेपिपदार्थात्यन्ताभावस्वीकारेतुसाधर्म्यंगलेपादुकावदापतितं ॥ वस्तुतस्तुतवतूलाविद्याकार्यस्यस्वप्नादेस्तन्निवृत्त्यानिवृत्तिर्मूलाविद्याकार्यस्य प्रपञ्चस्य च तन्निवृत्त्यानिवृत्तिरिति स्वप्नादिजाग्रत्प्रपंचयोः स्वसाक्षात्कारणाविद्यास्थित्यधीनस्थिति-कत्वेनतन्निवृत्तिनिवर्त्यत्वेनचसाधर्म्यमयाधमत सुस्थः सूत्रविरोध यत्किंचिद्वैधर्म्यं तुसर्वथासजायतीयेऽपि घटादिषुप्रतिव्यक्ति शक्यवक्तुमिति किन्तेन॥ नामांतरस्येति॥ घट. कुम्भइत्यादिपर्यायरूपस्य ॥ नहि घटात्कुंभोभिन्नोभवति ॥ निषेधेनेति सूत्रकृ-तानिषेधेन ॥ अनुद्धारादिति ॥ त्वन्मतइतिशेषः ॥ अहंतादेरिति ॥ इद-मत्रहृदयम् ॥ सहसाहं अहंतादेरपि प्रपंचत्वमस्मत्संमतमिव दर्शयित्वासूत्र-विरोधोदत्त. ॥ वयं तु मिथ्यापदार्थानां प्रपचत्वमेव न वदाम ॥ नहि जाग्रद्व-स्थायामनुभवमात्रेण प्रपंचत्वं शक्यं वकुम् ॥ शुक्तिरजतगंधर्वनगरेंद्रजालिकादिषु तथ्रसगात् ॥ नचेष्टापत्तिः सूत्र आदिपदेन परिगृहीतेभ्यस्तेभ्योपि वैधर्म्यस्य प्रपंचे बोधनात् ॥ तेषांप्रपचांत पातित्वे तदनुपपत्ते ॥ आदिपदेन तेषां संग्रहस्तु तवापि संमतः॥ शंकराचार्यैः "एवंमायादिष्वपियथायथंबाधः" इति व्याख्यानात् ॥ अत. शुक्तिरजतादिवत्ससारप्रभासलीलादेरपि सूत्रआदिपदेन सग्रह ॥ मिथ्यात्वाविशे-षात् ॥ तेन संसारादिवैधर्म्यमपि प्रपचेऽभीष्टमेवास्माक ॥ अतोन सूत्रविरोध ॥ नापि सूत्रासगतिः अहंतादौ स्वप्नसाधर्म्यस्येष्टत्वात् ॥ एतेनैव (अहतादिषु व्यभिचारेण सूत्रासगतिश्च) स्यादितदुक्तिरपास्तेत्याहुः॥ नकोपीति ॥ पदमादधातीति ॥ अस-न्मते चरणमादधाति ॥ लेशतोपि नापद्यतइत्यर्थः ॥ अन्यथेति ॥ जाग्रदवस्थायामनुभू-यमानानां शुक्तिरजतससारादीनाप्रपचत्व स्वीकृत्य अत्रापरिग्रहे ॥ सूत्रस्थचकारपरिगृही-तंस्वस्य मोक्षे प्रवृत्तिव्याघातइत्यर्थ समर्थयितुमाहुः ॥ किंचप्रपंचस्येत्यादि ॥ मत-द्वयेऽपि बाह्यप्रपचस्य मिथ्यात्वाद्विज्ञानवादिनोमायावादिनश्च मोक्षसाधनेषु प्रवृत्तिर्न स्यात् ॥ प्रवृत्तेर्गुरुशास्त्राद्विबाह्यार्थंतंत्रत्वात् ॥ बाह्यार्थानां चासत्वादितिभाव. ॥

एवं च सर्वप्रपंच.कारणात्मना सत्यएवेतिसिद्धम् ॥ किंच अस्ति-भातिप्रियंरूपंनामचेत्यंशपंचकंआद्यत्रयंब्रह्मरूपंमायारूपंद्वयंपरमिति यन्नामरूपयोर्मायिकत्वमुक्तं तदसंगतं ॥ अस्तिभातिप्रियरूपाणां

ब्रह्मत्वेन कथितानामपि मायिकत्वापत्तेः ॥ नामरूपयोर्यथा कल्पित-सामानाधिकरण्येन प्रतीतिः घटादिसत्वे सत्वं तदभावेऽभावस्तथै-वास्तिभात्यादीनामपि सामानाधिकरण्येन भानात्तेषां मायिकत्वं नास्तीति वक्तुमशक्यत्वात् ॥ नच तेषां ब्रह्मस्वरूपत्वान्नमायिकत्व-मिति वाच्यं ॥ " तदात्मानँस्वयमकुरुत ॥ बहुस्यांप्रजायेय नामरूपे-व्याकरवाणी " त्यादिश्रुत्यानामरूपयोरपि ब्रह्मस्वरूपत्वात् तस्माद-स्तिभातिप्रियंरूपंनामचेत्यंशपंचकमित्याद्यसंगतमेव ॥ नामरूपयो-र्मायिकत्वे प्रमाणाभावात् ॥ पंचानामपि ब्रह्मरूपत्वात् ॥ " नाम-रूपाद्विमुक्त " इत्यादिश्रुतिस्तु विदुषोब्रह्मणि लयावस्थायां पृथङ्-नामरूपाभावं प्रतिपादयति नतु नामरूपयोर्मिथ्यात्वम् ॥

सहस्रासे एवंचेत्यादि श्रुतिः संगतेत्यंतं भागं दूषयंति ॥ पचंचसर्वइत्यादिना ॥ ननु-नामरूपयोर्मिथ्यात्वमित्यंतेन ॥ सत्यएवेतिसिद्धमिति ॥ " एतदात्म्यमिदँ सर्वंतत्सत्यं " इत्यादिश्रुतिभिः (अ०२ पा० १ सू० १६) " सत्वाच्चावरस्य " (सू० १८) "युक्तेः शब्दांतराच्च " इत्यादिसूत्रैश्च सिद्धं ॥ यदि सूत्रकारोऽस्य मायामात्रतामभि-प्रैष्यत्तर्हि मायामात्रं स्वित्यनेन संध्यसृष्टेरिव अस्यापि तथात्वं स्पष्टमेवाऽसाधयिष्यत् ॥ साधयति तु अस्य तदनन्यत्वं सर्वं असद्व्यपदेशस्य चाव्याकृतत्वपरत्वं स्वप्नसृष्टेरेव च मायामात्रत्वं ॥ अतः सत्कार्यवादएव सूत्रकाराभिप्रेतः ॥ अत्र " असदकरणादुपादान-ग्रहणात्सर्वसंभवाच्छक्तस्य शक्यकरणात्कारणभावाच्च सत्कार्यं" इत्यादयः सांख्याद्युक्ता-युक्तयोऽप्यनुसंधेयाः । किंचास्तिभातीत्याहि ॥ अयंभावः ॥ यत्तु (एतयोर्मायारूप-त्वस्य दर्शितत्वा) दित्युक्तं तत्तु पूर्वंनामरूपयोर्मायिकत्वस्य क्वापितेनोपपादनस्यादर्शनादनु-क्तम् ॥ किंच तयोर्मायिकत्वं युक्तिसिद्धमित्युच्यते श्रुतिसिद्धमिति वा ॥ नाद्यः या या युक्तिर्घटनिष्ठनामरूपयोस्तथात्वसाधिकोच्येत सा सा तन्निष्ठास्तित्वादीनामपि तथात्वं साधयेदेवेति " आद्यंत्रयंब्रह्मरूपं " इत्यभ्युपगमविरोधः ॥ तयोरप्यस्तित्वादिकं प्रतीय-तइति तयोरप्यंशत्रयं सत्यमंशद्वयं मिथ्येतिस्वीकारेऽनवस्था ॥ " नामैवैनंनजहाति ॥ यदेजतिजगतियच्चचेष्टतिनाम्नोभागोऽयं " इत्यादिकंश्रौतमानमप्यत्रानुसंधेयम् ॥ युक्त्य-नुकूलत्वात् युधिष्ठिरादिनामभिरद्यापि व्यवहारात् ॥ सर्वथामिथ्यात्वे तन्नामोच्चार-

---

एवंच सर्वंनामरूपात्मकंजगन्मायिकमितिसिद्धम् ॥ एतेन अस्तिभातिप्रियंरूपंनामचेत्यं-शपंचकम् ॥ आद्यंत्रयंब्रह्मरूपंमायारूपंद्वयंपरमिति यन्नामरूपयोर्मायिकत्वमुक्तं तदसहमाने न जगद्रूपं द्वयं परमिति पाठस्य कथंचित्स्वसंमतत्वप्रतिपादनायनामरूपविभेदेजगत्क्रीडतियो-यतइति स्वगुरुसंमतिमुपन्यस्येश्वरस्य नामरूपयोः प्रकाशकत्वे कर्तृत्वान्नामरूपयोरीश्वररूपत्वं यदुक्तं तदपि निरस्तम् ॥ एतयोर्मायारूपत्वस्य दर्शितत्वात् ॥ अन्यथा पंचानामपि ब्रह्मरू-पत्वेन त्रयाणां विशिष्य तद्रूपत्वकथनं न संगच्छेत ॥ अतएव विद्वान्नामरूपाद्विमुक्तइ-तिश्रुतिः संगता ॥

तद्व्याकरणस्य फलं ॥ व्याकरणप्रकारस्तूच्यते ॥ तत्र वस्तुतः स्वाभाविकसर्वाकारसर्वरूपः सः ॥ "यदेकमव्यक्तमनंतरूपं विश्वं पुराणं तमसः परस्तात् ॥ विश्वतश्चक्षुरुतविश्वतोमुखः ॥ सहस्रशीर्षापुरुषः ॥ समोमशकेन समोनागेन ॥ सर्वतः पाणिपादांतं" इत्यादिश्रुतिस्मृतिभ्यः ॥ क्वचिद्रूपस्य निषेधस्तु लोकइव व्याकरणात्परिच्छिन्नमात्रस्यैव "नसंदृशेतिष्ठतिरूपमस्ये"तिमहानारायणश्रुतेः ॥ अतएव अनंतरूपस्य तमसः परस्तादिति प्रकृतितः परत्वमुक्तं ॥ अधिकं च साकारवादे वक्ष्यते एवं नामानि सर्वाण्यपि तस्यैव वाचकानि ॥ "ॐमित्येतदक्षरमिदंसर्वं तस्योपव्याख्यानं नामानिसर्वाणियमाविशंति" इत्यादि श्रुतिभ्यः ॥ सर्वेषां तदधीनत्वात्तच्छब्दाभिधेयता ॥ अन्येषां व्यवहारार्थमिष्यते व्यवहर्तृभिरित्यादि महाकौर्मादि स्मृतिभ्यश्च ॥ "अनामाऽगोत्रः" इत्यादौ क्वचिन्निषेधस्तु लोकइव व्याकृतस्य परिच्छिन्नमात्रस्य नाम्नएव गोत्रादिसाहचर्यात् ॥ एवं "स सर्वनामास च सर्वरूपः" इत्यादीनि श्रीभागवतवाक्यान्यप्यनुसंधेयानि ॥ नमोस्त्वनंताय सहस्रमूर्तये सहस्रनाम्ने पुरुषायशाश्वते इत्यादीनिच ॥ अत्र सहस्रशब्दोऽसंख्यपरः एवं स्वयमेव वस्तुतः सर्वरूपः सर्वनामा सन्नपि यदा क्रीडार्थमात्मनइद जगत् सिसृक्षति तदा नामरूपविभागमंतरा घटोऽयं पटोऽयमित्यादिनानाव्यवहाराणामसंभवात् ॥ सदंशादाविष्कृतपंचमहाभूतांशेभ्यस्तत्तदेकैकं स्वीयं रूपं पृथक्पृथगाविष्कृत्य तत्र तत्रस्वनामसमुदायात्तत्तन्नामानि वेदाख्यस्वस्वरूपानुरोधेन नियमयति ॥ अतएवेदानीं नामरूपयोः परिच्छेदोदृश्यते ॥ कंबुग्रीवादिमदेव घटस्य रूपं घटः कलशइत्यादीनि परिगणितान्येव नामानि इति ॥ इदमेव नामरूपयोर्व्याकरणं ॥ अतएव च श्वेतकेतुविद्यायां "सेयदेवतैक्षत" इत्यादिना "नामरूपेव्याकरवाणि" इतीच्छा ततः "नामरूपेव्याकरोत्" इतिव्याकरणं चाम्नायते ॥ यदि नामरूपे विवर्तात्मके स्याताम् तर्ह्यभ्रांतस्येश्वरस्येक्षणगोचरौ न भवेताम् नचात्र "अनेनजीवेनात्मनानुप्रविश्ये"तिश्रवणान्नामरूपेजीवकल्पिते एवेतिशंक्यं इमामेवाशंकामपाकर्तुंमप्रवृत्ते (अ०२ पा०४ सू०२०) "संज्ञामूर्तिक्लृप्तिस्तुत्रिवृत्कुर्वतउपदेशात्" इत्यधिकरणेपरमात्मनैवतेव्याकृते इतिसूत्रकृताव्यवस्थापनात सूत्रार्थस्तुसंज्ञामूर्त्योः नामरूपयोः क्लृप्तिः निर्माणंत्रिवृत्कुर्वतः तेजोबन्नानिप्रविश्यैकैकमितरसंगतंकुर्वतः परमात्मनएव ॥ नतुजीवस्यत्रिवृत्करणात्पूर्वं शरीराद्यनिष्पत्त्यातत्प्रवृत्तेरेवायोगादित्याशयः ॥ कुतएतत् उपदेशात् उपसमीपेतस्मिन्नेववाक्ये त्रिवृत्करणस्यनिरूपणादितिज्ञेयः ॥ तुर्जीवकर्तृकत्वशंकानिरासार्थः ॥ भवद्भाष्येपीदं सूत्रमेवंपरमेव ॥ यदितुनामरूपेजीवाविद्याकल्पितेअभविष्यतांनतर्हिसूत्रकार एवंव्यवस्थापयिष्यत् ॥ अतोनतयोर्मिथ्यात्वंश्रुत्यादिसम्मतं ॥ व्याकरणप्रकारश्च बृहदारण्यके तृतीयेऽध्याये पुरुषविधब्राह्मणाख्ये चतुर्थब्राह्मणे (खंड ७) "तद्धेदंतर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यामेवव्याक्रियतासौ नामायमिदंरूप इति तदिदमप्येतर्हिनामरूपाभ्यामेवव्याक्रियतेऽसौ नामायमिदं रूपइतिसएषइहप्रविष्टः" इत्यादिषु श्रूयते ॥ एवं छांदोग्यबृहदारण्यकादिषु नामरूपव्याकरणं सृष्ट्यारंभे परमात्मनैव

णपूर्वकश्राद्धादिव्यवहारोच्छेदप्रसंगाच्च ॥ न द्वितीयः ॥ तयोः सत्यतायाएव श्रुतिसिद्धत्वात् ॥ बृहदारण्यके तृतीयाध्यायेऽस्यब्राह्मणे " त्रयंवाइदंनामरूपकर्मतेषांनाम्नांवागित्येतदेषामुक्थमतोहिसर्वाणिनामान्युत्तिष्ठंत्येतदेषा ँ सामैतद्धिसर्वैर्नामभिः सममेतदेषांब्रह्मैतद्धिसर्वाणिनामानिबिभर्त्ति ॥ अथरूपाणांचक्षुरित्येतदेषामुक्थमतोहिसर्वाणिरूपाण्युत्तिष्ठंत्येतदेषा ँ सामैतद्धिसर्वैरूपैःसममेतदेषांब्रह्मैतद्धिसर्वाणिरूपाणिबिभर्त्ति ॥ अथकर्मणामात्मेत्येतदेषामुक्थमतोहिसर्वाणिकर्माण्युत्तिष्ठंत्येतदेषा ँ सामैतद्धिसर्वैःकर्मभिःसममेतदेषां ब्रह्मैतद्धिसर्वाणिकर्माणिबिभर्त्ति ॥ तदेतत्त्रयं सदेकमयमात्मात्मोएकः सन्नेतत्त्रयं तदेतदमृतं सत्येनच्छन्नं प्राणोवाअमृतं नामरूपेसत्यंताभ्यामयंप्राणश्छन्न " इति श्रूयते ॥ अर्थस्तुतत्रैवाध्याये चतुर्थब्राह्मणेपूर्वं " आत्मैवेद मग्रआसीत् " इति सर्वस्यात्मरूपत्वं प्रतिज्ञाय अग्रे सृष्टेः पूर्वमव्याकृतस्य जगतोनामरूपाभ्यां व्याकरणमुक्तं तदेतत्प्रपंचयितुमिदमुच्यते ॥ तत्र इदं परिदृश्यमानं वैनिश्चयेन त्रयमेव किं तत् त्रयं तदाह नाम रूपं कर्म इति ॥ तेषां नामादीनां मध्ये नाम्नां व्याकृतानां घटपटादिशब्दानां वागित्येतत् वागिंद्रियं समष्टिरूपा भगवतोवाग्वा एषां उक्थमुपादानकारणं हि यतः अतोवाचः सकाशादेव सर्वाणि नामानि उत्तिष्ठंति अनुभवयोग्यानि भवंति ॥ एतत् वागित्येतत् एषां विशेषभूतानां नाम्नां साम समत्वात्सर्वेषां सामान्यं ॥ तदेव विवृणोति ॥ हि यतः एतत् सर्वैर्नामभिः समं मृदिव घटादिभिः ॥ एतत् एषां नाम्नां ब्रह्म आधारभूतं ॥ तदेवाह एतत् हि यतः सर्वाणि नामानि बिभर्ति धारयति पुष्णाति च ॥ अथ रूपाणां रोहितपीतादीनां व्याकृतानां चक्षुरित्येतत् चक्षुरिंद्रियं तत्समष्टिभूतं त्वष्ट्राख्यं भगवच्चक्षुर्वा उक्थं उपादानकारणं इत्यादिपूर्ववत् ॥ "त्वष्टारँ रूपाणिविकुर्वंतं विपश्चिं ॥ त्वष्टारूपाणामधिपतिः " इत्यादिश्रुत्यंतरात् ॥ अथ कर्मणां नानाचेष्टारूपाणां आत्मेत्येतत् शरीरं समष्टिभूतं विराट्स्वरूपंवा ॥ उक्थं उपादानकारणमित्यादिपूर्ववत् ॥ तदेतत् पूर्वोक्तं नामरूप कर्मेति त्रयं त्रिधादृश्यमानं सत् एकं ब्रह्मरूपत्वात् घटकुंडिकाशरावा मृदिव ॥ तदेवाह ॥ अयमात्मेति ॥ नामरूपकर्माण्यात्मा ब्रह्मैव ॥ आत्मशब्दः परब्रह्मपरः ॥ एतेन " आत्मैवेदमग्रआसीत् " इति दृढीकृतं ॥ ननु वागाद्युपादानकानामेषां कथमात्मत्वमतआह ॥ आत्मा उ एकः सन् पूर्वोक्तरमणेच्छया एतत्त्रयं वागादित्रयरूपोपिसएव ॥ अगृह्यत्वादसधिः ॥ त्रिधाकरणस्य फलमाह ॥ तदेतदमृतंसत्येनछन्न ॥ अमृतं अखंडमानदरूपं स्वस्वरूप सत्येन अमिथ्याभूतेन कार्येणाच्छादितं ॥ तदेतत्स्फुटीकरोति ॥ " प्राणोवाअमृतं नामरूपे सत्यं " इतिप्राणः सर्वक्रियाशक्तिः सर्वजीवनहेतुः परमात्मा अनुगमाद्यधिकरणबोधितः ॥ ताभ्यामयं प्राणश्छन्नः ॥ ताभ्यां व्याकृताभ्यां नामरूपाभ्यां अयं प्राणः परमात्मा पिहितः ॥ सर्वनामासर्वरूपः सर्वात्मकः सन्नपि क्रीडेच्छया तत्तद्रूपे तत्तन्नाम नियमनाद्रूपाणां नाम्नां च भेदादिदानीं परस्परानतिप्रसक्तपरिच्छिन्नतत्तन्नामरूपाः पृथक्पृथक्पदार्थाएवानुभूयते न तु सर्वरूपः परमात्मा ॥ अतः स्वव्याकृतसत्यनामरूपाभ्यामेवायं पिहितः ॥ अतएव नानाव्यवहाराः ॥ एतदेव

इतिवेदरूपशब्दस्य महाभिसत्यबोधकानि श्रीभागवतादिवाक्यानि (अंश. १ अ. २२) काव्यालापाश्चये केचिद्गीतकान्यखिलानिच ॥ शब्दमूर्तिधरस्यैतेविष्णोरंशामहात्मनइत्यादीनि लौकिकशब्दानामपि तद्रूपत्वप्रतिपादकानि विष्णुपुराणप्रथमांशादिवचनानि चानुकूलानि ॥ रूपनित्यत्वं चाधिकं साधयिष्यते ॥ एवं नाम्नः अमायिकत्वान्नित्यत्वाद्भगवद्रूपत्वादेव नारायणप्रपाठके " यदेजतिजगतियच्चचेष्टतिनाम्नोभागोऽय नाम्नेस्वाहा" इति श्रूयते ॥ तस्मान्नामरूपयोर्मायिकत्वकल्पनं नामरूपे सत्यमिति पूर्वोक्तादिश्रुतिशतबाधितमेव ॥ यच्च (पंचानामपि ब्रह्मरूपत्वेने) त्यादि तदकिंचित्करम् ॥ अस्माकं तद्वचनस्वीकारे निर्बंधाभावात् ॥ जगद्रूपेण परिणतस्य सच्चिदानंदरूपस्यैवास्तिभातिप्रियात्मनाप्रतीतिर्नामरूपयोस्तु परिच्छेदमात्रेण कार्यत्वमिति त्रयाणां निक्षिप्य तद्रूपत्वकथनस्यापि कथंचित्संभवाच्च ॥ याऽपि "विद्वान्नामरूपाद्विमुक्तः" इति श्रुतिर्दर्शिता । साऽपि न तयोर्मिथ्यात्वदर्शिका ॥ इदं हि वाक्यं तृतीयमुंडके द्वितीयखंडे पठ्यते "यथानद्यः स्यंदमानाः समुद्रेऽस्तंगच्छन्तिनामरूपे विहाय ॥ तथाविद्वान्नामरूपाद्विमुक्तः परात्परंपुरुषमुपैतिदिव्यम् " इति ॥ अत्रोक्तरीतिकव्याकरणदशापरिच्छिन्नादमुक्तदशायां स्वदेहमात्रनियतात् नामरूपाद् विमुक्तइति तत्रार्थः अतएव नामरूपादित्येकवचनं ॥ नामविशेषविशिष्टाद्रूपाच्छरीरादिति वा समुद्रेप्रविष्टायानद्यानहि रूपं नश्यति ॥ किंतु समुद्रएवांतर्भवति आधारस्य तत्रैवास्तंगतत्वात् ॥ अंतर्भूतत्वादेव पृथक्रूपानुपलब्ध्यातेन नाम्ना तदा व्यवहारः ॥ किंतु समुद्रइत्येव सः ॥ एवमत्रापि ब्रह्मभूतस्य स्वदेहमात्र नियतपरिच्छिन्ननामरूपत्यागात्सर्वरूपत्व सर्वनामत्व च सिध्यति ॥ अतएव तत्र "निरंजनः परमसाम्यमुपैति " इति पूर्वमुक्त ॥ नत्वनया श्रुत्या तयोर्मिथ्यात्वं बोध्यते ॥ मिथ्यात्वे ततोविमुक्तिरपि न वक्तु युक्ता ॥ नहि शशशृंगाद्वंध्यैनगराद्वा कोऽपि मुच्यते ॥

यत्तु (अत्रोद्देश्यतावच्छेदककालावच्छिन्नत्वस्यौत्सर्गिकस्य विधेये भाननिर्वाहाय ज्ञानसमकालमेव मुक्ति) रित्युक्तं तन्न साधीयः ॥ यथा द्रव्यं गुणवदित्यादौ द्रव्यत्वसमकालिकत्वं गुणे भासते तथाऽत्र भानासंभवात् ॥ तथाहि ज्ञानपदेन ब्रह्मात्मकं ज्ञानं विवक्षितमखंडाकारवृत्तिरूपं वा ॥ नाद्यः तादृशज्ञानस्याधुनापि सत्वेन मुक्तेश्चासत्वेन ज्ञानसमकालत्वस्य मुक्तावसंभवात् ॥ तादृशज्ञानस्य नित्यत्वाच्छ्रवणाद्यसाध्यत्वेन तदर्थं प्रवृत्त्यनुपपत्तेश्च ॥ न द्वितीयः अखंडाकारवृत्तेः स्वल्पकालावस्थायित्वेन मुक्तेश्च स्वरूपावाप्तिरूपायानित्यत्वेन ज्ञानोत्तरयावत्कालावस्थायित्वेन वा तत्समकालत्वासंभवात् किंच ज्ञानसमकालमेव मोक्षस्वीकारे जीवन्मुक्त्यभावः स्यात् अज्ञानस्य ज्ञानेन नाशे उपादाननाशाद्देहादीनामपि नाशात् नचापरोक्षज्ञानकल्पपरोक्षज्ञानवत्येव जीवन्मुक्तिव्यवहारइति वाच्यं तत्प्रतिपादकश्रुत्याद्यभावेन तादृशज्ञानसत्वे प्रमाणाभा-

वात् अपरोक्षकल्पमित्यनेनापरोक्षन्यूनत्वविवक्षणे शास्त्राच्छाब्दज्ञानवतामपि तादृशज्ञानसत्त्वेन जीवन्मुक्तिप्रसंगः एतेनाज्ञानसंबंधिन्या आवरणशक्तेरेव विद्ययाविरोधइत्यादिकमप्यपास्तं ज्ञानस्याज्ञानविरोधित्वेन तन्नाशे तदीयशक्तेः सत्वस्य वक्तुमशक्यत्वात् नहि वह्निनाशे वह्निशक्तिरस्तीति कस्यापि संमतं वस्तुतस्तु पारिभाषिकतादृशाज्ञानस्यैव मानाभावेन तस्यशक्तिद्वयकल्पनं तेन जीवन्मुक्तिव्यवस्थापनं च दूरापास्तं ॥ त्वदुक्तपक्षाणां " तस्यतावदेवचिरं यावन्नविमोक्ष्येऽथसंपत्स्ये ॥ अनारब्धकार्येएवतुपूर्वेतदवधेः ॥ भोगेनत्वितरेक्षपयित्वासंपद्यतेइत्यादिश्रुतिसूत्राभ्यामप्रतीतेः इत्यादिश्रुतिसूत्रादिसिद्धा) इतिकथनमसंगत ॥ नहि तादृशश्रुतौविक्षेपावरणयोः प्रतिपादकं पदमस्ति येन तादृशश्रुतिसिद्धत्वं तस्य स्यात् ॥ सूत्रयोस्त्वयमर्थः ॥ ननुदेहस्य कर्मजन्यत्वात्तन्नाशे तन्नाशस्यावश्यकत्वाद्ब्रह्मविदः प्रवचनानुपपत्तिरेवंसति ब्रह्मजिज्ञासोर्गुरूपसत्यादिसाधनासंभव " आचार्यवान्पुरुषोवेद " तिश्रुतेस्तदभावेनज्ञानमार्गोच्छेदेन मुक्त्युच्छेदप्रसंगइत्याशंक्य समाधत्ते ॥ " अनारब्धकार्येएवतुपूर्वेतदवधे " पूर्वे पूर्वसूत्राभ्यांज्ञाननाश्यत्वेन ये प्रोक्ते पापपुण्येते नाशेपेकिंत्वनारब्धं भोगायतनरूपं कार्यं याभ्या ते एवेत्यर्थः ॥ नन्वितरनिरपेक्षं ज्ञानं स्वशक्त्यैवाग्निरेधइव कर्माणि दहतीति पूर्वमुक्तं तथा सत्यशेषमेव तद्दहतीति वक्तुं युक्तं ॥ ननु सशेषं शक्तेरविशिष्टत्वात् ॥ नच कर्मनाशेऽपि संस्कारवशात्कुलालचक्रभ्रमिवत्तद्वासनावशाद्देहादिसत्तया प्रवचनाद्युपपत्तिरिति वाच्यं ॥ ज्ञानस्य सर्वतोबलवत्त्वात्सवासनस्य तस्य नाशनात् ॥ नहि महाशिलानिपाते चक्रभ्रमिरनुवर्त्तितुंशक्नोतीत्याशंक्यारब्धकार्याऽदहने हेतुमाह ॥ तदवधेः ॥ तज्ज्ञानेनारब्धकार्यादहनं यत् तदखिलकारणकारणत्वेनाखिलस्य पूर्वावधिरूपभगवदिच्छालक्षणाद्धेतोरित्यर्थः यत्र तस्यापि दहनेच्छा तत्र तथैवेति निगूढाशयः ॥ अतएवाग्रेतथावक्ष्यते ॥ " अतोन्यापिह्येकेषामुभयो " रितिसूत्रेण तस्यार्थस्तु एकेषां पुष्टिमार्गीयाणा भक्तानामुभयोः प्रारब्धाप्रारब्धयोर्भोग विनैव नाशोभवति ॥ कुतएतत्तत्राह ॥ अत श्रुते कर्मणोज्ञाननाश्यत्वनिरूपिकाया ब्रह्मविदएवप्रवचनादिनिरूपणेनतदनाश्यप्रारब्धाख्यकर्माक्षेपकश्रुतेश्चान्यपि श्रुतिः पठ्यते ॥ " तस्यपुत्रादायमुपयन्तिसुहृदः । साधुकृत्यांद्विषन्त पापकृत्या- " मिति ॥ ज्ञानभोगाभ्यां कर्मनाशनिरूपकश्रुत्यास्याःश्रुतेर्विरोधपरिहारायावश्यविषयभेदोवाच्यः सच मर्यादापुष्टिभेदरूपएवेति ॥ मर्या-

द्यमार्गे तु मणिमंत्रादिप्रतिबद्धशक्तेरग्नेरिव ज्ञानस्याप्यदाहकत्वे न काचिद्धानिरिति सर्वमनवद्यम् ॥ अत एव श्रीभागवते "मृगदारकाभासेनस्वारब्धकर्मणा योगारंभणतो विभ्रंशित" इति "उपभोगेनकर्मारब्धंव्यपनयन्नि"ति च भरतं प्रति वचनं गीयते इति संक्षेपः ॥ द्वितीयसूत्रं "भोगेनत्वितरेक्षपयित्वासंपद्यते इति अस्यार्थः ॥ इतरे अग्ने प्राप्यालौकिकदेहाद्भिन्ने स्थूललिंगशरीरे क्षपयित्वा दूरीकृत्य अथ भगवल्लीलोपयोगिदेहप्राप्त्यनंतरं भोगेन संपद्यते "सोश्नुतेसर्वान्कामान्सह ब्रह्मणाविपश्चिते"ति श्रुत्युक्तेन भोगेन संपद्यतेइत्यर्थः ॥ श्रुत्यर्थस्त्वानंदमयाधिकरणे निरूपितः ॥ अलौकिकत्वं विनोक्तदेहं विनाचोक्तफलप्राप्तेर्व्यवच्छेदकस्तुशब्दः ॥ एवं च तादृशश्रुतिसूत्राभ्यामविद्यायास्तच्छक्त्योरावरणविक्षेपरूपयोरप्रतीतेस्तद्दिर्थाज्ञानमूलकएव (इत्यादिपक्षाश्रुतिसूत्रादिसिद्धा) इत्यादिकः प्रलापः ॥ यदपि यथा कश्चित् क्षत्रियादिरित्यादिदृष्टांतेन (ज्ञानिनोऽदृष्टाभावेपि स्वादृष्टैरेव जीवन्मुक्तशरीरस्थितिः शिष्यादिभिरेव कल्प्यते) स्याद्युक्तं तदपि दृष्टांतवैषम्यान्न संभवति क्षत्रियस्य काश्यां मरणं लोकैर्दृष्टं लोकांतरे च विमानादिवत्पत्यादिदेहोऽपि पत्यनुगमनफलप्रतिपादकैस्तत्तत्स्मृतिवाक्यैरभ्युपगंतव्यः ॥ अत्र तु ॥ गुरोर्मरणस्यादृष्टत्वाच्छिष्यस्य तादृशफलोत्पादकादृष्टजनककर्मबोधकस्मृत्याद्यभावाद्वैषम्यं किंच गुरोः शिष्यादृष्टेनैव यदि शरीरादिकं स्यात्तदा पत्या पुण्यक्षये पत्यादीनामिव शिष्यनाशे गुरोरपि नाशापत्तिः यदि च शिष्यकल्पितगुर्वादीनां नाशस्वीकारादिष्टापत्तिरित्युच्यते तदा दृष्टिसृष्टिवादएवाभ्युपगतः स च पूर्वमेव खण्डितइति काशीमृतस्यादृष्टाद्यभावे काशीमरणान्मुक्तिरित्यादिका श्रुतिरेव प्रमाणं जीवन्मुक्तादृष्टाभावे तु न किमपि प्रमाणं प्रत्युत भवन्मतएव "तस्यतावदेवचिर" मित्यादिका प्रारब्धकर्मसत्त्वप्रतिपादिका श्रुतिर्विरुध्यते तस्मादन्येत्वित्यादिकोग्रंथोसंगतएव अधिकं तूत्तरभागे पष्ठखंडखंडनाभासखंडने वक्ष्यते ॥

सहस्राक्षे अत्रचोद्देश्यतेत्यादि खंडनेवक्ष्यतइत्यंतं भागं परिहरंति । यत्तु अत्रचोद्देश्यतेत्यादिना ॥ खंडनेवक्ष्यतइत्यंतेन ॥ "तथाविद्वान्नामरूपाद्विमुक्तः" इत्यत्रविद्वानित्युद्दिश्य विमुक्तिर्विधेयाइति तस्याशयः । तत्रविद्वत्पदोक्तोद्देश्यतावच्छेदकं ज्ञानम् ॥ तदेतद्विकल्प्य दूषितं ॥ तथाहीत्यादिना ॥ साधनानर्थक्याभावायाहुः ॥ ज्ञानोत्तरेति वस्तुतस्तु तत्र ब्रह्मविदः अक्षरप्रवेशेन स्वदेहवर्तिपरिच्छिन्ननामरूपाद्विमुक्तस्याक्षरपरदिव्यपुरुषोपायनमेव विधीयते ॥ ननु विमुक्तपदं विधायकं वाक्यभेदप्रसंगात् ॥ देहादीनामपीति ॥ आदिशब्दात्प्राणेंद्रियांतःकरणानि ॥ अपिशब्दाज्जीवस्यापि नाशः ॥ तन्मतेहि अविद्या-

वच्छिन्नं अविद्यायां प्रतिबिंबितं वा चैतन्यं जीवः ॥ ज्ञानेनाविद्यानाशे तन्नाशएव ॥ नहि घटनाशे घटाकाशपदार्थोदर्पणनाशे तदधिकरणकप्रतिबिंबो वाऽवतिष्ठते ॥ जीवनाशे च देहादेः स्पंदनमपि न स्यात् अविद्यानाशे तदेकमूलकदेहादिकमपि नश्येत् ॥ तथाच जीवन्मुक्तिः सुतरां नोपपद्येत ॥ तत्प्रतिपादकेत्यादि ॥ श्रुतिषु हि "ब्रह्मवेदब्रह्मैवभवति" इत्यवधारणपूर्वकंब्रह्मज्ञस्य सर्वथाब्रह्मभावउच्यते ॥ इदं ज्ञानमपरोक्षकल्पमपरोक्षंवा नाद्यः तेनैवसर्वथाब्रह्मभावेऽन्यस्य वैयर्थ्यापत्तेः ॥ नद्वितीयः जीवन्मुक्ते तदभावेन तस्य ब्रह्मभावानुपपत्तेः ॥ तथाच वक्ष्यमाणश्रुतीनां ब्रह्मभूतः प्रसन्नात्मेत्यादिस्मृतीनां जड-भरतादिषु साक्षाद्ब्रह्मभूतत्वं वदतां पुराणानां च विरोधः ॥ किंच "नतस्यदेवाश्चनाभूत्या-ईशते" इत्यादिकं जीवन्मुक्तपरं परंमुक्तपरं वा नाद्यः तस्यापरोक्षज्ञानाभावेन ब्रह्मभावा-लब्ध्या "आत्माह्येषां[1] संभवति" इति सर्वेषामात्मत्वस्यतत्रासंगतेः तद्विनाऽभूत्यभावस्या संभवात् ॥ नद्वितीयः देवादिभिस्तस्यविघातानामसंभवेन निषेधवैयर्थ्यप्रसंगात् ॥ एवं स्मृतावपि न शोचति न कांक्षतीत्यादिकं जीवन्मुक्तिलिंगं ॥ अत इदं जीवन्मुक्तपरमेव अतएव तत्र वामदेवनामग्रहणम् ॥ नच सर्वेषामनात्मन्यपि स्वस्मिन्सर्वात्मत्वग्रह एव शास्त्रदृष्टिरितिवाच्यं ॥ भ्रांतत्वेन मुक्तत्वानुपपत्तेः आवरणशक्तेरप्यापत्तेश्च ॥ एवं "तमेवं विद्वानमृतइह भवति" इत्यपि जीवन्मुक्तपरं इह पदस्वारस्यात् ॥ वद्वेदनस्यापरोक्षत्वाभावे नान्यः पंथाइत्यपरोक्षस्य मोक्षहेतुताप्रतिषेधप्रसंगः ॥ नापि जीवन्मुक्तस्यापरोक्षकल्पमेव ज्ञानमितिबोधिका काचित् श्रुतिःस्मृतिर्वाऽस्ति यद्बलात्तथाङ्गियते ॥ किंच किंचेदमपरोक्ष-कल्पत्वं नाम ईषत्तन्न्यूनत्वमितिचेत् सांसारिकवदेव सर्वमपि मायिकं जगत्पश्यतस्तद्वदेव कर्माणि लोकसंग्रहार्थमप्यनुतिष्ठतो गार्हस्थ्यव्यवहारानपि सतिसंभवे समाचरतस्तस्य ज्ञानमपरोक्षात्कथमीषदेव न्यूनं ॥ अतिन्यूनमपीषन्न्यूनतया विवक्ष्यतइतिचेच्छास्त्रीय

---

[1]अत्रचोद्देश्यतावच्छेदककालावच्छिन्नत्वस्यौत्सर्गिकस्य विधेये भाननिर्वाहाय ज्ञानसमका-लमेव मुक्तिरिति केचित् ॥ एतेन प्रपञ्चस्याऽज्ञानकार्यत्वे ज्ञानेनाऽज्ञाननाशे तत्कार्यस्य देहादेर-स्थित्या जीवन्मुक्त्यनुपपत्तिरित्यपास्तम् ॥ अपरोक्षकल्पपरोक्षज्ञानमङ्गेव जीवन्मुक्तव्यवहारस्य शास्त्रीयस्योपपत्तेः ॥ अज्ञानसंबन्धिन्या आवरणशक्तेरेव विद्याविरोधः ॥ विक्षेपशक्तेस्तु प्रारब्धनाशसहकृतया तया ॥ आवरणनाशाच्चजीवन्मुक्तइत्यादयोऽपिपक्षास्तस्यतावदेवचिरं-यावन्नविमोक्ष्येऽथसंपत्स्ये अनारब्धकार्येएवतुपूर्वेतदवधेः भोगेनत्वितरेक्षपयित्वाऽथसंपद्यते इत्यादिश्रुतिसूत्रादिसिद्धाः सिद्धान्तलेशादिषु सोपपत्तिकादर्शितास्ते तु विस्तरदिदृक्षुभिस्तत्तएव द्रष्टव्याः । अन्येतु ज्ञानिनोऽदृष्टाभावेऽपि स्वादृष्टैरेव जीवन्मुक्तशरीरादिस्थितिः शिष्यादिभि-रेवकल्पिता यथाकश्चित्क्षत्रियादिः काश्यां मृतस्तत्पत्नीतु ग्रामान्तरे तत्पादुकादिकमादाया-ऽनुगमनं कृतवती तत्र तस्यायथाशास्त्रं फलोपभोगार्थंस्वादृष्टेनैव पतिदेहादिकल्पना पत्युरत्व-दृष्टंनास्त्येवमुक्तत्वात् अत्रहि जन्तोः प्राणेषूत्क्रममाणेषु रुद्रस्तारकं ब्रह्म व्याचष्टे येनाऽसाव-मृतीभूत्वा मोक्षीभवतीतिश्रुतेः ॥ एवंजीवन्मुक्ताऽदृष्टाऽभावेऽपि परेषामदृष्टैरेव तद्देहादि-कल्पनेत्याहुः ॥ अधिकमुत्तरभागे षष्ठखण्डखण्डने वक्ष्यते ॥

शाब्दज्ञानवत्त्वापि जीवन्मुक्तताप्रसंगः ॥ किंच ज्ञानस्याज्ञानविरुद्धत्वात्तन्निवर्तकत्वाच्च जीवन्मुक्तस्यापि ब्रह्मज्ञानं स्वविरुद्धाज्ञानं निवर्तयेदेव ॥ नहि तेजस्युद्भूते तत्रैव तमः स्थातुमीष्टे ॥ अतएवाभियुक्तोक्तिः सामानाधिकरण्यं दिनेशतिमिरयोः कुतइति ॥ नच तमसस्तेजोऽभावरूपत्वादज्ञानस्य च भावरूपत्वांगीकारेण ज्ञानाभावरूपत्वाभावाद्दृष्टांतवैषम्यमितिशंक्यं व्यवहारे भट्टनयमेवानुसरद्भिः शंकराचार्यैस्तमसि तन्मतरीत्यापत्युत्वस्वीकारेण तद्वैषम्याभावात् ॥ नन्वपरोक्षमेव तन्निवर्तकं सत्त्वपरोक्षकल्पमिति न विरोधइतिचेन्न तत्र मानाभावस्योक्तत्वेन अपरोक्षकल्पस्य कल्पनासंभवात् ॥ किंच किं तत्र तज्ज्ञाने साक्षादपरोक्षतासिद्धिप्रतिबंधकं येन तत्कल्पत्वं ॥ अविद्यैव तयेतिचेत्तत्र तत्साहचर्यानुपपत्तिरुक्ता ॥ कंचित्कालं ब्रह्मज्ञानेन सहाविद्यायाः स्थित्यंगीकारे कदापि तत्साहचर्यं न निवर्तेत निवर्तकसाधनाभावात् ॥ जीवन्मुक्तस्यापि साधनांगीकारे सुष्ठुसमर्थितं तस्य मुक्तत्वं ॥ किंच जीवन्मुक्त्यनंतरमपि कस्यचिद्विद्याचिरकालं कस्यचिदल्पकालं च नियामकमंतरापि स्थित्वा ततः साधनंविनैव स्वयं निवर्ततइत्यसंगततरं ॥ सद्भिरपि साधनैः संपूर्णैरप्यविद्याअनिवृत्ता विनैव तैरनियतकाले तन्निवृत्त्या च तेषामसाधनत्वापातात् श्रवणादेरपूर्वद्वारा फलजनकत्वस्यानंगीकारात् मुक्त्यासहापूर्वस्थितेरशक्यवचनत्वाच्च ॥ नच प्रारब्धं तस्याबद्धस्वल्पकालस्थितिनियामकं कल्प्यं तस्याप्यविद्याकार्यत्वेनान्योन्याश्रयात् ॥ एतेन विक्षेपशक्तिमात्रमवशिष्यतइत्यपि निरस्तं ॥ अविद्यावश्यनाशकं ज्ञानं तत्कार्यप्रारब्धेन सह तद्विक्षेपशक्तिमपि तत्क्षणादेव नाशयेत् ॥ अन्यथा कदापि न नश्येतां ॥ आवरणशक्तिसहितं तिमिरं स्वावश्यनाश्यं नाशयन्प्रकाशस्तदुपादानककार्यांतरं तच्छक्त्यंतरं वा नैवावशेषयति ॥ विवर्तरूपायाविक्षेपशक्तेः प्रारब्धस्य च ब्रह्मज्ञानोत्तरं स्थितिर्न तव सुवचा रज्जुज्ञाने सर्पज्ञानस्येव ॥ वस्तुतस्तु त्वत्संमतपारिभाषिकाज्ञानकल्पनमेव निर्मूलं ॥ क तर्हि शक्तेस्तस्याः शतयंतरद्वयादिसंभवः ॥ "तस्यतावदेवचिर" मितिवाक्यं तु छांदोग्येऽष्टमे (खंड १४) "यथासोम्यपुरुषं गंधारेभ्योऽभिनद्धाक्षमानीयतंततोऽतिजने विसृजेत्सयथा तत्रप्राङ्वा उदङ्वाऽधराङ्वा प्रध्मायीताभिनद्धाक्ष आनीतोऽभिनद्धाक्षोविसृष्टः ॥ १ ॥ तस्ययथाभिनहन प्रमुच्यप्रब्रूयादेतांदिशं गन्धारा एतां दिशं व्रजेतिसग्रामाद्ग्रामंपृच्छन्पंडितोमेधावीगंधारानेवोपसंपद्येतैवमेवेहाचार्यवान्पुरुषोवेद तस्यतावदेवचिरंयावन्नविमोक्ष्येऽथसंपत्स्यइति" इति पठ्यते ॥ अत्र आचार्यवान्पुरुषइहवेदेतिइहशब्दस्वारस्याज्जीवन्मुक्तिस्तत्रापि समता ॥ साचाभिनद्धनस्थानीयाविद्यानाशादेवेति सिध्यति ॥ नन्वविद्यायाः शक्तिद्वयं तत्रावरणशक्तिमात्रनाशात्स्यादि ॥ अन्यथा तस्य तावदेव चिरं यावद्विक्षेपशक्तिरित्येव वदेत् ॥ अतस्त्वदुक्तव्यवस्थायां नेयं श्रुतिः प्रमाणम् ॥ किंतु प्रारब्धभोगायतननाशोत्तरं तस्य परमुक्त्यवश्यंभावमात्रे ॥ किंच "यावच्छरीराग्नविमोक्ष्यते तावदेवतस्यचिरं अथसंपत्स्यत एवे" ति तावकोपनिषद्भाष्यादिसंमतेऽर्थेपुरुषस्यत्वयाध्यापनम्, इतिशब्दवैयर्थ्यं च ॥ गंधारपुरुषदृष्टांते च वर्द्धशालाभादृष्टांतकथनोत्तरमसुपदमेवं कथनासंगतिश्च ॥ वस्तुतस्तु तस्य जीवन्मुक्तस्य तावदेव चिरं तावानेव विलंबः यावत् इति न भवति अहं संघाताद्वि-

मोक्ष्ये यथा पुनर्नापद्येय तथा मोक्ष्ये अथ प्राकृतसंघातविमोचनानंतरं च ब्रह्मसंपत्स्ये ॥ यदैवमिच्छेत्तदैव परमुक्तिं लभेत इत्यक्लिष्टस्तदर्थः प्रतिभाति ॥ तादृशस्य लोकानुग्रहार्थं स्वेच्छातंत्रं शरीरधारणमिति भावः ॥ उत्तमपुरुषेतिशब्दद्वावप्येमेव न पीड्येताम् ॥ अत्र चाचार्यवतोयेदनं ब्रह्मभावसंपादकमपरोक्षं गंधारसमोपसंपत्तिसमं पूर्वशब्देन तस्याः ॥ परामर्शात् ॥ अग्रे संपत्तिस्तु प्रवेशरूपा "ब्रह्मैवसन् ब्रह्माप्येती" तिश्रवणात् ब्रह्मभूतं प्रकृत्य विशते तदनंतरमितिस्मरणाच्च ॥ अतो दृष्टांतेऽपि स्वमूलदेशसमीपं गतस्य तत्र प्रवेशः स्वेच्छाधीनः ॥ सद्बाह्यभूमिका यावदिदृक्षेत तावदिस्थित्वा प्रविशेत् ॥ तथाऽत्र वैमानिकभूमिकादिदृक्षायामपि तावत्संघातस्यात्यागइतिदृष्टांतस्यापि संगतिः ॥ तदेतत्सर्वमनुसंधायाहुः ॥ नहितादृशश्रुताविति ॥ एवमेतेन सूत्रद्वयमुपन्यस्तं तदर्थोमूले विशदीकृत सूत्रयोस्त्वयमर्थइत्यादिना ॥ अत्र ननुदेहस्येत्यादिः अग्रेतथावक्ष्यतइत्यंत अनारब्धेति प्रकृतसूत्रभाष्यस्थएव ग्रंथः व्याख्यायमानार्थे प्रामाणिकतानिश्चायनायाक्षरशोऽनूदितः ॥ एवंएकेषांपुष्टिमार्गीयाणामित्यादिः विषयभेदो वाच्यइत्यंतो ग्रंथोपि (अ० ४ पा० १ सू० १७) "अतोऽन्यापिह्येकेषामुभयोः" इतिसूत्रस्य भाष्यादेव सगृहीतः मणिमंत्रेत्यादिकंवचनंगीयतइत्यंतंतुपुनरनारब्धसूत्रभाष्यात्प्रकृतानुकूलं संगृहीतम् ॥ अत्रतन्नाशइत्यादिवितंतुनाशे पटनाशवद्रारंभककर्मणामपि नाशे देहनाशस्येत्यर्थः ॥ एवंसतीति ॥ ब्रह्मनिष्ठस्य देहाभावे सति तद्विज्ञानार्थमित्यादिविहितसाधनासंभवः ॥ तदभावेनेति ॥ अब्रह्मनिष्ठस्याचार्यत्वायोगादाचार्याभावेन ॥ पूर्वसूत्राभ्यामिति ॥ तदधिगमसूत्रेण इतरस्येत्यतिदेशसूत्रेणच नाशे इति ॥ प्रारब्धादिभेदेनत्रिविधे अपि नेत्यर्थः ॥ तेपूर्वेति ॥ संचितक्रियमाणे एव नश्यतः ॥ सौत्रंहेतुमवतारयंति ॥ नन्विति *भग्रेतथेति ॥ उत्तराधिकरणे अन्ये तु सौत्रहेतुं प्रारब्धस्यशरीरपाताबधित्वश्रुतेरिति* व्याचक्षते ॥ तैरपि प्रारब्धमात्रानाशे हेतुर्भगवदिच्छैववाच्याऽत्त सैषाऽत्र दर्शिता ॥ एकेषामित्यादि ॥ एकेमुख्यान्यकेवलाइतिकोशान्मुख्यानां निरूपिकायाइति ॥ "क्षीयंतेचास्यकर्माणो" त्यादिरूपायामुंडकादिश्रुतेरित्यर्थः ॥ तन्नाश्येति ॥ भोगानाश्येत्यर्थः ॥ ज्ञानानाश्येतिवा श्रुतेश्चेति ॥ "प्रोवाचतातत्त्वतोब्रह्मविद्या" मित्यादेः पूर्वश्रुतिरियंचेति भेदप्रतियोगिन्यौ ॥ तस्यपुत्राइति ॥इयंश्रुति.शाट्यायनिनामस्ति ॥ अत्र सूत्रेऽन्येउभयोरित्यनेन जैमिनिव्यासयोरिति अन्येनिपदेन काम्यसाधुकृत्येति च व्याचक्षते ॥ तत्र जैमिनेः पूर्वकाप्यनुक्त्वादाचार्यद्वयपरामर्शः ॥ "यदासर्वेप्रमुच्यंत" इतिकामक्षयएव ज्ञानोदयश्रवणात् नशोचतिनकांक्षतीतिस्मरणाच्च ब्रह्मविदोपि लौकिककामानंगीकारश्चिंत्यः ॥ मृगदारकाभासेनेत्यादि ॥ इदं पंचमस्कंधेऽष्टमाध्यायेत्रयोविंशंगद्यम् ॥ उपभोगेनेत्यादि ॥ इदं तत्रदशमाध्यायेचतुर्दशं गद्यम् ॥ उपभोगस्तु राजयानवहनादि. ॥ भरतंप्रतीति ॥ भरतंलक्षीकृत्य ॥ इतरेइत्यादिस्तु शब्द इत्यंतो ग्रंथोपि (अ० ४ पा० १ सू० १९) "भोगेनत्वितरे" इतिसूत्रभाष्यस्थएव ॥ एवंप्रतिपादनंतु ब्रह्मवल्ल्यां "उताविद्वानमुंलोकंप्रेत्य" इत्यादिनाऽनुप्रश्नोपन्यासपूर्वकं "अस्माल्लोकात्प्रेत्य" इत्यादिनादेहद्वयक्षपणोत्तरमेवानंदमयोपसंक्रांतिः ॥ "यतोवाच" इत्यादिना "आत्मानं"

स्पृणुत" इत्यंतेन भोगस्य च श्रावणादितिध्येयम् ॥ ६६ "इतरेभारब्धकार्ये पुण्यपापे उपभोगेन क्षपयित्वा ब्रह्मसंपद्यते" इति परेषां व्याख्यानमपि मर्णकभेदादस्माकं संमतमेव ॥ स्पष्टंचेदं प्रकाशे ॥ किंच जीवन्मुक्तस्याप्यग्निहोत्रादिकं नित्यं कर्मेव (अ० ४ पा० १ सू० १६) "अग्निहोत्रादितुतत्कार्यायैवतद्दर्शनात्" इतिसूत्रे निर्णीयते ॥ लोकप्रवर्तनार्थं तस्यकर्मकरणबोधकानि च वाक्यानि संति शतशः ॥ अतइमान्येव श्रुतिस्मृतिसूत्राणि जीवन्मुक्तस्यापि वास्तवप्रारब्धभोगं तदेकाधीनां शरीरस्थितिं कर्मानुष्ठानं च माहयंति ॥ "तस्मैसविद्वानुपसन्नायसम्यक्" इत्यादिमुंडकादिवाक्यानिवादमास्त्रप्रवचनंविदधानानि च प्रपंचस्यामायिकत्वमेव गमयंति ॥ यदि प्रारब्धशरीरशिष्यादिकं मायिकं स्यात् तर्हि जीवन्मुक्तस्य तत्संबंधस्तत्प्रतीतिश्च श्रुतिसूत्रादिभिर्निर्णीता न घटेत इत्यनुकूलतर्कात् ॥ तस्मादस्माकमेव तान्यनुगुणानि यत्तु अन्ये तु ज्ञानिनोऽदृष्टाभावेऽपीत्याद्युक्तं तदपि न युक्तं उदासीनानां तच्छरीरदर्शनाद्यभावप्रसक्तेः ॥ तेषां दर्शनाद्यदृष्टवशात्तयेतिचेन्न परादृष्टमात्रेण परशरीरोत्पत्तौ शुक्रशोणितादिनियतकारणजन्यत्वव्यभिचारः विज्ञानवादापत्तिः शून्यवादांतरापत्तिः कथंचित्समाधाने शून्यवादेऽपि तत्सिध्या (अ० २ पा० २ सू० २७) "उदासीनानामपिचैवंसिद्धि" रित्यादि सूत्रबाधः कृषीवलकुलालतंतुवायाद्यदृष्टमात्रेण धान्यघटपटादीनां तत्राप्युक्ता प्रतीतिः परकल्पितनिरात्मकशरीरैः सर्वव्यापाराणामनुष्ठानेऽमुक्तदशायामपि शरीरातिरिक्तात्मसाधनप्रयासवैयर्थ्यं शिष्याद्यदृष्टकल्पितस्य शुकादिशरीरस्य परीक्षिदादि मरणक्षणएव नाशदर्शनप्रसंगश्च स्यात् ॥ श्रूयते तु तदुत्तरमपि तच्छरीरस्य प्रवचनादिरहितस्यापि स्थितिः ॥ किंच वसिष्ठजनकादीनाममुक्तदशायां स्वाविद्याकल्पितं शरीरंतु ज्ञानसमकालमेव नष्टं शिष्याद्यदृष्टकल्पितं तु शरीरांतरमेवेति मंतव्यं ॥ नहि रज्जौ देवदत्तेन यः सर्पः कल्पितः सएव यज्ञदत्तेनापि कल्प्यतइति शक्यवचनं ॥ तथासति पतिव्रताग्रगण्यानामरुंधत्यादीनां स्वपरिणेत्रतिरिक्तजीवशून्यशरीरसंगे पातिव्रत्यहानिर्महानेवानर्थः स्यात् ॥ तत्पातिव्रत्यबोधकः श्रुतिपुराणादिविरोधश्च ॥ क्षत्रियादेश्चजीवन्मुक्तस्य प्रवचनानुपयोगाच्छरीरं नैवावतिष्ठेत ॥ एवंचजनकादीतिहासबाधः ॥ अरुन्धत्याः पातिव्रत्याभावे स्वाहायास्तदनुकरणाशक्तिबोधिकेतिहासबाधश्च ॥ जीवन्मुक्तस्त्रीणां परिणेतृदेहमरणेन सौभाग्यचिह्नत्यागापत्तिश्च ॥ किञ्चकाश्यां मृतस्यपूर्वदेहनाशो बहुलोकप्रत्यक्षनिश्चितः ॥ न तथाजीवन्मुक्तस्य पूर्वदेहनाशेऽबाधितप्रत्यक्षादिकमस्ति ॥ एवमनुगतायाः परलोकेपत्यासह भोगाभावेऽन्यथा (स्कन्ध० ७ अ० ११ श्लो० २९) पत्याश्रीरिवमोदतइत्यादि स्मृतिव्याकोपश्चथान्न जीवन्मुक्तशरीरानुपलब्धेन कस्यापि वचनस्यव्याकोपोऽक्षिमद् बलात्तथाक्षिप्येत ॥ अतोमहदेवदृष्टान्तदार्ष्टांतिकयोर्वैषम्यं ॥ दार्ष्टान्तिके परकल्पितत्वादरे प्रत्युतपूर्वोक्तादिश्रुतिसूत्राणां व्याकोपः ॥ तदेतदखिलमुरसिकृत्याहुः । दृष्टांतवैषम्यात्रसंभवतीत्यादि ॥ वस्तुतस्तु काश्यांमृतस्यापि त्वरितमेव न मोक्षः ॥ तत्र मरणान्मोक्षप्रतिपादकेष्वेव पुराणभागेषु पापिनां पापानुरूपजन्मांतराणि त्रिंशद्वर्षसहस्रांताकालभैरवयातनाकाम्यपुण्यवतांतदनुगुणभवांतरजननं तत्फलभोगोमुक्तावपि पूर्वंशिवलोकप्राप्तिः शिवसा-

विचरंतिमर्त्याः । मंडूककूर्माःकृमयोपिकाश्यांत्यक्त्वाशरीरंशिवमाप्नुवंति । अनेनैवविशेषेणतांप्रशंसंतितात्त्विकाः साक्षाद्वाराणसीमुक्त्यैविष्णुभक्तिस्तथाविधेति ॥ काशीखंडे ब्राह्मणाः क्षत्रियावैश्या शूद्रायेवर्णसंस्थिताः । स्त्रियोम्लेच्छाश्चयेचान्येसंकीर्णाःपापयोनयः । कीटाः पिपीलकाश्चैवयेचान्येमृगपक्षिणः । कालेननिधनंप्राप्ताअविमुक्तेवरानने । चंद्रार्धमौलयस्त्र्यक्षामहावृषभवाहनाः । शैवेममपुरेदेविजायंतेतत्रमानवाः । येभक्तावरदंदेवमविमुक्तं परंपदं ॥ तेविशंतिमहादेवमाज्याहुतिरिवानलं । अकामोवासकामोवातिर्यग्योनिगतोपिवा । अविमुक्तेत्यजन्प्राणान्ममलोकेमहीयते । गृहस्थाश्चैवयतयस्तापसिनोर्थ उपासकाः ॥ एकदंडास्त्रिदंडाश्चहंसव्रतधराश्चये । कर्मभेदेनतेषांतुसर्वेषामास्थितोह्यहं । विभजामिमहास्थानंयत्तन्मोक्षप्रदंशुभमिति ॥ तत्रैव दंडपाणिंप्रति शिवः अमर्त्यभूपंकुरु काशिवासिनंगलेसुनीलंभुजगेंद्रभूषणं । भालेसुनेत्रंकटिकृत्तिवाससंवामेक्षणालक्षितवामभागं । मौलौलसत्पिंगकपर्दभारंविभूतिसंक्षालितपुण्यविग्रहं । अहोहिमांशोकलया लसच्छिरयंवृषेंद्रलीलांचितमंदगामिनं । आनीयभक्तान्क्षणतोपिदूरतोमञ्चमुक्तिः पतिवागलेते ॥ इति ॥ मात्स्येपि नतेषांपुनरावृत्तिःकल्पकोटिशतैरपि । अविमुक्तेनगृह्यंतेभवेनविभुनाक्षयं । तथाच सयातिपरमस्थानंयद्गत्वानशोचति । जन्ममुक्तंजरामुक्तंपरंयाति शिवालयं । अपुनर्मरणाहिंसागतिर्मोक्षस्यकांक्षिणामिति । वायुपुराणेपराच्छिवपरादूर्ध्वं श्रीकंठेननिरीक्षिताः । नाधोयांतिपुनर्देविसंसारेदुःखसंप्लवे ॥ इति ॥ एवंचैवमादिवचनेषु शिवलोकस्य सत्यलोकोपरितनपरशिवालयाख्यतल्लोकस्यवायथाधिकारंप्राप्तिस्त्रिस्थलीसेत्वादिभिर्निर्णीता ॥ एवंसति पतिलोकमवाप्नोतीत्यनुगतायाः पतिलोकप्राप्तिस्मरणात् (स्कं० ७ अ० ११ श्लो० २९) यापतिंहरिभावेनभजेच्छ्रीरिवतत्परा । हर्यात्मनाहरेर्लोकेपत्याश्रीरिवमोदतइत्यादिफलश्रवणेपि हरिहरयोरभेदेन मथुरादिस्मृतेन हर्यात्मना विष्णुलोके श्रीरिव काश्यादिस्मृतेन हरात्मनाशिवलोके गौरीव तेनैव स्वभर्त्रा सह मोदतइति युक्तमेव ॥ वामेक्षणालक्षितवामभागमित्यादि वचनानुग्रहात् बहुषु स्मृतिपुराणेषु धर्मविशेषतोपि विष्णुशिवलोकप्राप्तिस्मरणेन तत्रापि तत्संभवात् ॥ पतिव्रतायाविष्णुशिवलोकप्राप्तिबोधकवचसां धर्मशास्त्रेषु स्पष्टत्वाच्च ॥ अतोन तस्याअदृष्टमात्रेण निरात्मकपतिशरीरकल्पना कल्प्या ॥ केषांचिन्मते क्रमेलकशूद्रोपाख्यानाद्यवलंबाद्योनिजैः कालभैरवेच्छाजन्यशरीरैर्यातनाभोगवत्पुण्यभोगस्य संभवाच्च ॥ केचित्तु शिवलोकप्राप्तिरूपां मुक्तिमपि पापभोगादिव इहैव पुण्यभोगादप्यनंतरं मन्यंते ॥ काशीखंडादिषु स्वयंदेहविनाशस्यप्राप्तेकालेमहामतिः उत्तमानामुयाल्लोकान्नात्मघातीभवेत्क्वचिदित्यादिस्मरणात् ॥ ब्राह्मे तत्रस्थितस्यजंतोर्हिभोगमोक्षप्रदःशिवः ॥ अधितिष्ठतिजंतूनांमुक्तिक्षेत्रमिदं परमिति पूर्वं भोगप्रदानकथनात् पाद्मेपि मुनीन्प्रति भृगुणा तत्तद्भोगप्रापणायैवदेहाअयोनिजाभैरवेच्छाविधाना इति उभयभोगानुकूलशरीराणां निरूपणाच्च ॥ किंच त्वदुक्तदेशीयमप्युदाहरणं शिवपुराणे तद्यथा कस्यचिल्लुब्धकस्य काश्यामोंकारेश्वरसंनिधौ मरणोत्तरं तत्पत्न्यऽनुगमने कृते तादृशपुण्यविशेषात्तस्यैव सपत्नीकस्य राजजन्मततोमोक्षश्च निरूपित. ॥ मुनिरपि तं प्रति तत्पूर्वकथां वर्णयन्नाह कालेनगच्छताचैवंवाराणस्यांतटेशुभे ॥

पंचत्वंगतयोस्तत्रदेवदेवस्यसंनिधौ ॥ भार्याप्रविष्टामुख्योर्णाप्रतिगृह्यकलेवरं ॥ तेनधर्मेणराजेंद्र-द्वयंच्युद्दिरपागता ॥ भवान्वैलुब्धकोजातःसपत्नीकोनरेश्वर इत्यादि ॥ च्युद्दिरद्वयः लुब्धको-भवान् सपत्नीको नरेश्वरोजात इत्यन्वयः एवं च पत्युः काशीमरणेप्यनुगतायास्तत्पत्न्या-स्तेनैव स्वभर्त्रासह पुण्यफलभोगः कामनापुण्ययोस्तारतम्यादत्रलोके लोकांतरेवेत्येव त्रिस्थलीसेत्वादिषु सिध्यति ॥ ननु शिवपुराणे पत्न्याअनुगमनमपि काश्यामेव प्रतीयते-ऽतोमदुक्तोदाहरद्वैपम्यमिति च द्रुमयोस्तत्रमृतत्वेऽप्येवंव्यवस्थायाः प्रमाणसिद्धत्वे सति पतिमात्रस्य तत्र मरणे तादृशव्यवस्थांगीकारः वैमुतिकसिद्धः ॥ साक्षान्मोक्षविलंबस्या-विशेषात् ॥ किंच तत्र मृतस्य कैवल्यप्राप्त्यंगीकारेऽपि सालोक्याद्यनंतरमेवेति चिरात्सा-वर्ण्यंते यथापाद्मे चतुर्धावितते क्षेत्रेसर्वत्रभगवांच्छिवः । व्याचष्टेतारकंयावयंब्रह्मात्मैक्य-प्रबोधनं ॥ तथापितत्रसामर्थ्यात्तत्रतत्रमृतस्यहि ॥ भोगपूर्वापवर्गादिजीवन्मुक्तिदशेवसा ॥ अंतर्गेहेविपन्नस्तु साक्षाच्छिवमवाप्नुयात् । तथाचतुर्विधेपिक्षेत्रेस्मिन्प्रमीतोगर्भयातनाः ॥ नैवाप्नोतिमुनिश्रेष्ठाविशेषोयंब्रवीमिवः ॥ काश्यांमृतस्तुसालोक्यंसाक्षात्प्राप्नोतिसत्तमाः । ततःसरूपतां यातितत.सांनिध्यमश्नुते । ततोमहैकतांयातिनपरावर्ततेपुनः । वाराणस्यां-मृतोजंतुःसाक्षात्सारूप्यमश्नुते ॥ ततःसान्निध्यमायातिततोमहैकतामियात् ॥ अविमुक्ते-विपन्नस्तुसाक्षात्सान्निध्यमाप्नुयात् । ततश्चिदानंदमयेब्रह्मण्येवविलीयते । सलोकतांचसा-रूप्यं सांनिध्यंचातिसत्तमाः । कल्पंकल्पमवाप्नोतिततोब्रह्मात्मकोभवेत् । तथा आदेहपात-नाधेतु क्षेत्रंसेवंतिमानवाः । तेमृताहंसयानेनदिव्यंयांत्यकुतोभयमित्यादिवचांसि तु सालोक्यविषयाणि ॥ इमानि च सर्वाण्यपि वचांसि त्रिस्थलीसेतुमृतमुक्तिप्रकाशिकादिषु प्रसिद्धान्यत्रोदाहृतानि ॥ अत्रापि भोगपूर्वापवर्गादीत्युक्त्यासर्वेष्वपिपक्षेष्वपवर्गात्पूर्वं तादृशावश्यकभोगोस्त्येव ॥ ननुतत्रमरणदुत्तरमपि भोगसत्वे कोविशेषस्तस्येत्याशंक्याह ॥ जीवन्मुक्तिदशेवसेति । यथा जीवन्मुक्तस्य प्रारब्धभोगे सत्यपि परमुक्त्यावश्यंभावोस्ति तथाऽस्योक्तपरभोगेपि मुक्त्यवश्यंभावइत्येपविशेषइतिभावः ॥ एवंच तत्रमृतस्य लुब्धकवदिहलोके जन्मनि शिवसालोक्यादौवासिद्धेपि तेनैव पत्या सह स्वसाधुकृत्या-फलभोगः सत्याःसत्यामनुगमनमृत्यामिति तदुक्तमदृष्टमात्रेण बौद्धकल्पं निरात्मकशरीर-कल्पनं हेयमेव ॥ तदुदाहृतश्रुतिरपिप्रागुक्तव्यवस्थयाव्याख्याता ज्ञेया ॥ अमृतीभूत्वे-त्यनेन जीवन्मुक्तवत्तादृशभोगस्य सालोक्यादेर्वा संभवोत्तरमेव मोक्षीभवतीतिश्रवणात् ॥ अत्रामृतिशब्दस्य निश्चितमुक्तियोग्यपरत्वसिद्धेः ॥ अन्यथा पौनरुक्त्यापातात् ॥ एतद्विषयेधिकं स्वावरणभगविभागसंभवेतीर्थादावित्यत्र वक्ष्यामि ॥ इह मूलस्थगुत्तरंतु नस्वच्छेद्ये किं कुठारप्रहारेणेतिन्यायाद्बोध्यं ॥ अतोजगन्मायिकत्वे जीवन्मुक्तस्यशरीराद्य-भावप्रसक्त्यावद्बोधकशास्त्रव्याकोपात् प्रवचनाद्यनुपपत्त्यामोक्षसंप्रदायोच्छेदप्रसंगाच्च । प्रपंचस्यामायिकत्वमेवसिध्यति ॥ अधिकं तूत्तरभागे तावकपट्टखंडखंडनाभासखंडना-वसरे वक्ष्यामः ॥

किं च प्रपंचस्य मायिकत्वमभ्युपगच्छता त्वया शुक्तिरूप्यवदध्य-स्तत्वं वाच्यं तच्च यथा आपणस्थरजतं दृष्टवतस्तज्जन्यसंस्कारेण रजत-

गतचाकचक्यादिसाधारणधर्मस्य शुक्तौ दर्शनेन च शुक्त्यज्ञानसहकृतेन शुक्तौ रजताध्यास उत्पाद्यते ॥ तथाऽत्र प्रपंचस्य कुत्रचिदप्यदृष्टत्वात्तज्जन्यसंस्काराद्यभावादधिष्ठाने च ब्रह्मणि निर्धर्मके प्रपंचगतासाधारणधर्मादीनामभावादर्थात्पूर्वं कर्तुरप्यभावादध्यासोन संभवति ॥ किंचायमध्यासः कस्येति वक्तव्यं जीवस्य ब्रह्मणोवा नाद्यः जीवस्यापि त्वन्मतेऽध्यासमध्यपातित्वात् शुक्तिरजतद्रष्टृपुरुषवदध्यासात्पूर्वमसत्वात् नापि द्वितीयः ब्रह्मणो भ्रांतत्वापत्तेः ॥ किंच प्रपंचस्य मिथ्यात्वे किं प्रमाणं न तावत्प्रत्यक्षं नेदं रजतमितिवन्नायंप्रपंचइतिबाधस्याभावात् ननु प्रपचोमिथ्या दृश्यत्वाच्छुक्तिरूप्यवदित्यनुमान प्रमाणमितिचेन्न दृश्यत्वस्य ब्रह्मण्यपि सत्वेन तत्रमिथ्यात्वाभावेन हेतोरनैकांतिकत्वात् ब्रह्मणोऽदृश्यत्वे च "भिद्यते हृदयग्रंथिश्छिद्यंतेसर्वसंशयाः क्षीयंतेचास्यकर्माणितस्मिन्दृष्टेपरावरे यदापश्य पश्यतेरुक्मवर्ण" मित्यादिश्रुतिविरोध ॥ किंच विश्वं यदिकल्पितं स्यात्तदा साधिष्ठानं स्यान्नचैवं सामान्यतोज्ञातत्वेसत्यज्ञातविशेषवत्वस्याधिष्ठानत्वप्रयोजकस्य निर्विशेषे नि सामान्ये च ब्रह्मण्यसंभवात् ॥ न च कल्पितसामान्यविशेषवत्वस्य ब्रह्मण्यपि सत्वेन तस्याधिष्ठानत्वे बाधकाभाव इतिवाच्यं ॥ सामान्यविशेषकल्पनायाअपि साधिष्ठानत्वेन तत्रापि कल्पितसामान्यविशेषोपादानेऽनवस्थापत्तिरित्यलं विस्तरेण एतेन एवचेत्यादिकमपास्तं ॥ किंच शुक्तो रजतसादृश्यस्य रजते शुक्तिसादृश्यस्य च सत्वाद्रजतात्मना शुक्तिर्भासते ॥ एव ब्रह्मणोघटपटात्मनावभासेपि परस्परसादृश्यं स्वीक्रियते चेत्तदा ब्रह्मण्यपि साकारत्वं जडत्वं च स्यात् ॥ विजातीयेऽसदृशे च नाध्यास· ॥ अन्यथा शुक्तो घटस्य रज्जौ गजस्य चाध्यास· स्यात् ॥ नचाध्यासे सादृश्य साक्षान्न प्रयोजकं किंतु संस्कारोद्बोधकत्वेनैव ॥ संस्कारोद्बोधश्च सादृश्यादन्येनापि संभवतीति सादृश्याभावेपि न काचिदनुपपत्तिरिति वाच्यं अदृष्टादिनासंस्कारोद्बोधेऽपि भ्रमोविसदृशे न संभवति ॥ रज्ज्वादिषु घटादिभ्रमस्यादृष्टत्वात्सादृश्यज्ञानमधश्यक्लृप्तमेव सादृश्यं विनाऽदृष्टादिसत्वेपि भ्रमस्यासंभवात् ॥ स्वप्नस्मरणजनकसंस्कारोद्बोधस्यादृष्टादिना संभवेऽपि भ्रमजनकसंस्कारस्य सादृश्यज्ञानं विनाऽसंभवेनादृष्टेनदृष्टस्यान्यथासिद्धे· कर्तुमशक्यत्वात् ॥ अन्यथा कार्यमात्रस्यादृष्टेनैवोत्पत्तौदृष्टकारणानां दृडादी

नामन्यथासिद्धत्वं स्यात् कार्यमात्रेऽदृष्टस्य हेतुत्वात् ॥ ननु रज्जौ घटाश्वादीनामध्यासे तत्तत्संस्कारोद्बोधाभावादेव न संभवति सति तदध्यासे तत्सादृश्यज्ञानस्य हेतुत्वं न संभवतीतिचेन्न मंदांधकारे रज्जुज्ञाने घटाश्वादीनां संस्कारोद्बोधेऽपि तद्भ्रमस्यादृष्टत्वान्नसंस्कारोद्बोधमात्रं भ्रमे हेतुः ॥ किं तु सादृश्यसंदर्शनजन्यसंस्कारोद्बोधएवेतिकथं सादृश्यज्ञानस्य न हेतुत्वं ॥ नच सादृश्यज्ञानस्य भ्रमहेतुत्वे रज्जौ भुजंगदंडभूछिद्रमालाजलधाराद्यध्यासोयुगपदेव कथंन जायेत तत्तत्सादृश्यज्ञानस्य पृथक् तदध्यासानुरोधेन सत्वादिति वाच्यं ॥ पृथक् तत्तदध्यासे तत्तत्सादृश्यज्ञानसत्वेऽपि युगपत्सादृश्यज्ञानस्यासत्वात् ॥ नच तत्सादृश्यस्य सत्वमात्रं तत्तत्सादृश्यज्ञाने हेतुः किंतु तत्तत्सादृश्यप्रतियोग्युपस्थितिरपि तथाच यादृशप्रतियोग्युपस्थितिस्तत्प्रकारकोभ्रमउत्पद्यतेयुगपत्प्रतियोग्युपस्थितौ च सर्पत्वधारात्वमालात्वादीनामेकत्र ज्ञानं निश्चयरूपं न संभवति ॥ विरुद्धधर्माणामेकत्र सत्वे विरोधएव न स्यात् ॥ तस्मात्कथंचिद्युगपदुपस्थितावपि युगपत्तत्क्रमो नैवापद्यते भ्रमस्यनिश्चयरूपत्वात् ॥ अतस्तादृशज्ञानं संशयरूपमेव जायते तत्रेष्टापत्तिरेव ॥ अन्यथा संस्कारस्य हेतुत्वेन पृथक्तदध्यासानुरोधेनादृष्टस्योद्बोधकस्य सत्वेन युगपदध्याससत्वन्मतेऽपि कुतोन स्यात् संस्कारोद्बोधकस्य सत्वात् तस्माद्ब्रह्मणः साकारत्वापत्तिर्दुर्वारैव ॥ नच पूर्वपूर्वाध्यासजन्यसादृश्यस्य ब्रह्मण्यंगीकारे साकारतापत्तेरभावः श्रुतिविरुद्धतादृशकल्पनाया अप्रामाणिकत्वात् ॥

सहस्राक्षे एतेनैवमैक्षवमतमित्यादि साकारतापत्तेरभावाच्चेत्यंतं भागं निरस्यंति ॥ किंचप्रपंचस्येत्यादिना अप्रमाणिकत्वादित्यंतेन ॥ अयंभावः ॥ मार्तंडे मायोपाधिककर्तृत्वं भैक्षवे दृश्यतेतुयत् ॥ तन्मायिवादध्वंसेनध्वस्तप्रायविशेषतइतिकारिकायाः शकलंपाठभेदेनोपन्यस्यघत् तदेव ध्वस्तमित्युक्तं । तदप्येतावता ध्वस्तमेव ॥ यच्च (अध्यासितुर्वास्तवत्वमध्यास्यस्याऽन्यत्र वास्तवत्वं वा नाध्यासे प्रयोजकं प्रमाणाभावाद्गौरवाच्च) त्युक्तं । तत्प्रलापमात्रं ॥ प्रपंचे विवर्तत्वं साधयितुंत्वया शुक्तिरजतरज्जुभुजगादिकमेव लोकप्रसिद्धं विवर्तजातंदृष्टांतीक्रियते ॥ तत्र सर्वत्रायंनियमः रजतादिद्रष्टा तद्व्यतिरिक्तोदेवदत्तादिवद्वास्तवएवापेक्षितइति । क्वापि निर्द्रष्टृकभ्रमस्यादर्शनात् ॥ प्रकृते च द्रष्टुर्जीवस्यापि कल्पितत्वेन शुक्तिरजतसमानयोगक्षेमत्वात् अवास्तवस्य तस्य न भ्रमः संभवति ॥ नहि शुक्तिरजतमेव शुक्त्यात्मानं कल्पयति आत्माश्रयप्रसंगात् ॥ नापि स्थाणौ कल्पित पुरुषः क्वापि भ्राम्यति ॥ नच वास्तवस्य ब्रह्मणस्तद्द्रष्टृत्वं कल्प्यं भ्रांतत्वापत्तेः ज्ञानघनस्य च भ्रमायोगात् ॥ तस्य मायासंबंधतो भ्रम इतिचेत्, सापिकल्पिता न वा ॥ द्वितीये कदापि नोच्छिद्येत ॥ आद्ये

सा केन कल्पिता शुद्धब्रह्मणएव तत्कल्पकत्वे तत्संबंधे च सत्यऽनिर्मोक्षप्रसंगः । मोक्षोत्तरमपि तत्संभवे प्रतिबंधकाभावात् ॥ मायोपहितस्य कल्पकत्वेऽप्यात्माश्रयादयः ॥ अतोरजतादिभिन्नदेशदशादिवद्वास्तवस्यान्यस्याध्यासितुरभावान्न भ्रम उपपद्यते ॥ किंच हट्टादौ सत्यं रजतं नरेंद्रकरंडकादौ सत्यं भुजंगमं च दृष्ट्वा वृद्धव्यवहारात्तत्र तत्र तत्तच्छब्दसंकेतं गृहीतवंतः समुत्पन्नतत्तत्संस्कारापव शुक्तिरज्ज्वादौ तमसा तत्तत्कल्पयंति ॥ अनुत्पन्नसंस्कारा बालादयस्तु तिमिरभरे चरणेन रज्जुशतमतिक्रामंतोऽप्येकमहिमपि नहि कल्पयंति ॥ यथा प्रकृते परिदृश्यमानाद्व्यतिरिक्तं सत्यं जगत्क्वाप्यनुभूतं स्यात् तदा तज्जन्यसंस्कारादिदमनृतं कल्प्येत तदेव भातीति संस्काराभावान्न भ्रमः ॥ तदंगीकारे त्वंते रंडाविवाहइति न्यायादिदमेव सत्यं स्वीक्रियतां ॥ संस्काराभावेऽपि भ्रमस्य असतोपि संस्कारजनकतायावा असद्व स्वीकारे तु क्वचिदिदंशशश्रृंगमिदंखपुष्पमित्यादिभ्रमोऽप्यापद्येत ॥ किंच शुक्तौ रजतस्यैव रज्जौ भुजंगस्यैव भ्रमे विपर्ययाभावे च हेत्वपेक्षायां तत्तत्सादृश्यमेव तत्वेन सिध्यति ॥ तच्च भ्रमे साक्षादपि हेतुर्नेतु संस्कारोद्बोधनमात्रद्वारा ॥ अन्यथा शुक्तिदर्शनकालेबुद्धौ तमः संबंधे गजइतिशब्दादिना तत्संस्कारस्योद्बोधे च तत्र गजभ्रमोदुर्वारएव स्यात् ॥ प्रकृतेचजगद्ब्रह्मणोः सादृश्याभावान्न भ्रमः ॥ सादृश्ये तु ब्रह्मणि साकारत्वजडत्वाद्यापत्तिः योवा द्वयोः साधारणो धर्मः स परस्य निर्विशेषतां बाधेतैव ॥ एवं अध्यासितुर्वास्तवत्वमित्यादावादरे प्रमाणं सर्वत्र भ्रमस्थलेषु तत्तदन्वयव्यतिरेकदर्शनमेवातो न तदभावः ॥ प्रामाणिकं गौरवं च न दोषाय ॥ अन्यथा घटं प्रति कुलालादीनां बहूनां हेतुत्वं गौरवभयान्न स्वीकार्यं एतेनैव (एवं च जीवस्योपाधे) रित्यादिकं निरस्तं स तत्र प्रयोजक इति पुंस्त्वं तु चिंत्यं ॥ अत्राध्यासः सादृश्ये प्रयोजकोन विवक्षितः *किंतु तद्देव तत्र तथेतिश्च (संस्कारोद्बोधस्य तु न सादृश्यज्ञानमेव कारणं किंत्वदृष्टाद्यपी)* त्यादि वदतां प्रकृते सादृश्यभावेऽप्यदृष्टादिद्वारा संस्कारोद्बोधाद्भ्रम इति समाहितं तदसंगततरं रज्जुदर्शनकालेऽदृष्टद्वारा शब्दादिद्वारा वा संस्कारस्योद्बोधे प्रतिबंधकाभावेन तत्र हयाकाराभासस्य दुर्निरोधत्वात् ॥ किंच जगद्भ्रमसंस्कारोद्बोधकतयोच्यमानमदृष्टमपि

एतेनैव भैक्षवमतमुपन्यस्य यदुक्तं तन्मायावादिविध्वंसध्वस्तप्रायमिति तदेवध्वस्तम् ॥ मायाहेतुवादस्य निवारयितुमशक्यत्वात् ॥ अध्यासितुर्वास्तवत्वमध्यास्यस्याऽन्यत्रवास्तवत्वंवानाध्यासे प्रयोजकं प्रमाणाभावाद्गौरवाच्च ॥ एवञ्च जीवस्योपाधेरवास्तवत्वेऽपि संसारस्यान्यत्राऽवास्तवत्वेऽपिच माययाऽध्यस्तत्वरूपस्य मायिकत्वस्य नानुपपत्तिः ॥ नच ब्रह्मणो घटपटाद्यात्मना भासे ब्रह्मणस्तत्सदृशत्वापत्तौ साकारता स्यात् नहि रज्जौ हयाऽऽकाराऽऽभासः किंतु सर्पाऽऽकाराऽऽभासएवेतिवाच्यम् ॥ अध्यासे सादृश्यस्य साक्षादप्रयोजकत्वात् ॥ संस्कारोद्बोधद्वारा हि सतत्प्रयोजकः संस्कारोद्बोधस्य तु न सादृश्यज्ञानमेव कारणं किन्त्वदृष्टाद्यपि रज्जावश्वाऽध्यासाऽभावस्तु केनाऽपि हेतुना तत्संस्काराऽनुद्बोधात् ॥ अन्यथा भुजंगदण्डभूच्छिद्रमालाजलधाराद्यध्यासोयुगपद्रज्जौ स्यात् ॥ पृथक्तदध्यासदर्शनेन सादृश्यस्याऽप्रत्याख्येयत्वात् ॥ पूर्वपूर्वोऽध्यासजन्यसादृश्यस्य ब्रह्मण्यङ्गीकारे साकारतापत्तेरभावाच्च ॥

कल्पितं न वा आद्ये ब्रह्मणि विचित्रतत्तद्दृष्टसादृश्यस्य दृष्टेरितरसंस्काराणामदृष्टेतरतदुद्बोधकस्य चाभावाद्दोषस्तदवस्थः ॥ द्वितीये तु द्वैतापाताद्पसिद्धांतः इतरत्तु सर्वं मूलएव विशदीकृतमिति किमाम्रेडितेन ॥ बाधस्याभावादिति ॥ शुक्तौ रजतमिति ज्ञानं नेदं रजतं शुक्तिरियमित्यभ्रांतवचनश्रवणसमकालमेव निवर्तते प्रकृतेतुसर्वंखल्विदं ब्रह्म तत्वमस्यादिवाक्यश्रवणेऽपि प्रपंचप्रतीतिर्ननिवर्तते यदि भ्रमः स्यात्तर्हि पूर्ववन्निवर्तेत ॥ नचाविद्यासत्वं यावत्तावत्तन्निवृत्तिरुचितेति वाच्यं ॥ तस्याअपि कल्पितत्वेनाविद्यामृषेति श्रवणमात्रादेव तन्निवृत्तेरप्यावश्यकत्वात् ॥ साधनैरेव तन्निवृत्तौतान्यपि तत्समानयोगक्षेमाणि ॥ नचजीवन्मुक्तौ प्रपंचबाधःसंशयः तदानीमपि तस्य प्रपंचप्रतीतेरुक्तधरश्रुत्यादिभिर्बोधनात् उक्तदिशातद्दशायाएव तदासिद्धेश्च ॥ अतोबाधाभावान्न भ्रमत्वम् ॥ भिद्यतेहृदयग्रंथिरित्यादि इदं मुंडकवाक्यं यदापश्य इत्यपि तद्वाक्यं ॥ आदिपदेन "दृश्यतेत्वग्र्यया बुद्ध्या ॥ कश्चिद्धीरःप्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन् ॥ जुष्टंयदापश्यत्यन्यमीशं ॥ ज्ञानप्रसादेनविशुद्धसत्वस्ततस्तुतंपश्यतेनिष्कलंध्यायमानः" इत्यादीनि कठमुंडकादिवाक्यानि तलवकारोपनिषत्तृतीयखण्डादिकं नतुमांशक्यसेद्रष्टुमनेनैवस्वचक्षुषा ॥ दिव्यं ददामितेचक्षुः पश्यमेयोगमैश्वरम् ॥ ज्ञातुंद्रष्टुंचतत्वेन (अ० ३ पा० २ सू० २४) "अपिसंराधनेप्रत्यक्षानुमानाभ्यां" तृतीयस्कन्धेपश्यंतितेमेरुचिराण्यंबसंत इत्यादिस्मृतिसूत्रपुराणवाक्यानि च संगृह्यंते ॥ नचैषां ज्ञेयतापरत्वमेव नतु चाक्षुषादिपरत्वमिति वाच्यं ॥ आवृत्तचक्षुः दिव्यंददामितेचक्षुरित्यादिविरोधात् ज्ञातुंद्रष्टुमितिपृथङ्निर्देशात् तलवकारादौ स्पष्टं स्पर्शादेः श्रावणाच्च ॥ भ्रमस्यनिश्चयरूपत्वादिति ॥ एककोटिकज्ञानस्य निश्चयशब्दार्थत्वं तार्किकपरिभाषामाश्रित्येदमुक्तं तेषांभ्रमप्रमाभेदेन निश्चयस्य द्वैविध्यात् ॥ अतः संशयोऽथविपर्यासइत्यस्य न विरोधः ॥ नचपूर्वेत्यादि ॥ संस्काराणामपि कल्पितत्वेन तत्कल्पनहेतुः संस्कारांतरंब्रह्मणि तत्तत्सादृश्यं च नैवास्तीति तत्कल्पनस्यासंभवे कुतस्तरां ततः प्रपंचकल्पना नापि तादृशसंस्कारपरंपरावशादेव जीवेन ब्रह्मणा वा जगत्कल्पितमिति बोधिका काचिदपि श्रुतिरस्ति यद्बलात्तथाश्रीयेतेति समाधेरभावः (अ० २ पा० २ सू० ३०) "नभावोऽनुपलब्धेः" इत्यादिना सूत्रकृतोपपादितस्य वासनासंतानपक्षे दूषणभरस्यात्राप्यापत्त्या तथांऽगीकारे तत्सूत्रविरोधोवाह्यमतप्रवेशश्च स्यात् ॥ संस्कारपरंपराकल्पनानिर्वाहायापि ब्रह्मणि सादृश्यसाकारत्वाद्येरापत्त्या च भक्षितेऽपि लशुनेनशांतोव्याधिरित्यलम् ॥

नन्वविद्याया अनादित्वाद्ध्यासोऽप्यनादिरेव अविद्याया अनादित्वं च "नासदासीन्नोसदासीत्किंतुतम" इतिश्रुति सिद्धं लाघवादनादिसंसारकारणसिद्धावन्यकल्पनायायोगादितिचेन्न मायाया अनादित्वे "सदेवसोम्येदमग्रआसीदेकमेवाद्वितीयं आत्मावाइदमेकएवाग्रआसीन्नान्यत्किंचनमिष" दित्यादिश्रुतिविरोधः ॥ "नासदासी"-दित्यादिश्रुतेश्च स्थूलसूक्ष्माभावबोधकत्वं नत्वविद्याबोधकत्वं ॥ नच

श्रुत्यंतर्गततमः शब्देनाविद्याप्रतीयतइति वाच्यं ॥ तमःशब्दस्याप्य-भावबोधकत्वात् प्रकृष्टमहत्वोद्भूतानभिभूतरूपवत्तेजोऽभावएव तमः-शब्दोलोकेप्रसिद्धोनत्वविद्यायामपि ॥ वस्तुतोऽत्र प्रह्मैवतमः ॥ एतेन पूर्वपूर्ववासनानामुत्तरोत्तराध्यासं प्रतिहेतुत्वोक्तिः प्रत्युक्ता ॥ अध्यासस्यानादित्वे मानाभावात् ॥ बालस्यापि स्तन्यपाने प्रवृत्ति-र्नानाऽऽदिकर्मप्रवाहजन्या किंतु "परात्तुतच्छ्रुते" रितिसूत्रानुसा-रेणेश्वराधीनैव ॥ यथा जडस्य कर्मणः फलदातृत्वं न तथैव प्रवर्त्तकत्वमपि न संभवति ॥ प्रवर्त्तनं हि प्रेरणा सा च चेतन-धर्मएव नतु जडधर्मः ॥ एवं च (बालस्य स्तन्यपाने प्रवृत्तिदर्शनेन पूर्वसंस्कारसिद्धौ संस्कारप्रवाहस्यानादित्वेन संसारस्यानादित्व-सिद्धि) रित्यसंगतं ॥ संस्कारस्य स्मृतिं प्रति हेतुत्वेन प्रवृत्तौ संस्कारस्य कर्मणोवाहेतुत्वविवक्षणे च पूर्वोक्तएव दोषः ॥ किंच प्रवृत्तिं प्रति न संस्कारस्य नापि कर्मणोवा हेतुत्वं वैदिकानां मते ईश्वरस्य नैयायिकानां मते तु चिकीर्षादीनामेव हेतुत्वात् ॥ उक्तंच तैः चिकीर्षाकृतिसाध्येष्टसाधनत्वमतिस्तथा उपादानस्यचाऽध्यक्षंप्र-वृत्तौजनकंभवेत् ॥ तथाचाविद्यायाअनादित्वासिद्धौ बंधोऽस्याऽ-विद्ययाऽनादिरितिस्मृतिरपि बंधस्य चिरंतनत्वंबोधयति–"अक्षय्यं हवैचातुर्मास्ययाजिनःसुकृतंभवती"तिश्रुतिवत् ॥ किंच भवन्म-तेऽविद्ययेति तृतीया हेतौ करणे वा नाद्यः ॥ दंडेन घटइत्यत्र यथा दंडेघटोत्पादकत्वरूपं हेतुत्वं तथाऽत्रापि चेद्बंधस्यानादित्व-कथनं व्याहतं उत्पत्तिमतोऽनादित्वासंभवात् ॥ द्वितीयोपि न क्रियाभावात् कारकविभक्तीनां क्रियान्वयित्वनियमात् ॥ नहि क्रियाविनिर्मुक्तं वाक्यमस्तीति भाष्यप्रामाण्यात् ॥ गोपेन गावइत्या-दिवदुपपत्तेरितिसमाधानमप्यसंगतं तादृशवाक्यस्यैवाभावात् ॥ नच तिष्ठतीत्यध्याहारोपि संभवति स्थितेरप्यनादित्वात्तत्रापि तस्य करणत्वासंभवात् करणत्वस्य कारणत्वघटितत्वात् ॥ तस्माद्बंधस्या-नादित्वेऽविद्ययेतितृतीयान्वयोबाधितएवस्यादतस्तदन्वयानुपपत्ति-रूपबीजेन लक्षणा कर्तव्या ॥ सा च चिरकालिकत्वे एव तथाच (सादित्वं तु बंधस्य नांगीकर्तुं युक्तं अस्यां स्मृतावनादिशब्दार्थ-स्यागेबीजाभावादिति यदुक्तं तदसंगतं तत्रान्वयानुपपत्तिरूप-बीजस्य दर्शितत्वात् प्रवाहानादित्वेन संसारोनादिरितिप्रयो-गस्तुसंसारपदस्य प्रवाहे लक्षणां अनादिपदस्यापि स्वसजाती-यध्वंसव्याप्यप्रागभावप्रतियोगित्वे लक्षणां विना दुर्घटतया न शक्तिसाधकः ॥ तस्मादनादिशब्दोगौण एव देवेष्वमरशब्दवत् ॥ ननु

देवेष्वमरपदस्य मुख्यत्वे "तद्यथेहकर्मचितोलोकः क्षीयतएवमेवामुत्र पुण्यचितोलोकः क्षीयत" इत्यादिश्रुतिविरोधात्तस्यौपचारिकत्वमस्तुसंसारेऽनादिशब्दस्य मुख्यार्थत्वे तु न कश्चिद्विरोधइतिचेन्न तत्रापि "आत्मावाइदमेकएवाग्रआसीन्नान्यत्किंचनमिष" दित्यादिश्रुतिविरोधस्य सत्वात् ॥ नच संसारस्य सादित्वे "धातायथापूर्वमकल्पय" दितिश्रुतेः ऋषीणांनामधेयानियाश्चवेदेपुदृष्टयः शर्वर्य्यंते प्रसूतानांतान्येवैभ्योददात्यजइत्यादिस्मृतेश्च विरोधोदुर्वारइति वाच्यं ॥ तादृशवाक्यानांशर्वर्य्यंतधातृपदपर्य्यालोचनयादैनंदिनसृष्टिविषयकत्वेनानादित्वासाधकत्वात् नापि "समाननामरूपत्वाच्चावृत्तावप्यविरोधोदर्शनात्स्मृतेश्च" तिसूत्रविरोधः ॥ सच सृष्टिप्रलयास्वीकारएव संभवति ॥ नह्यस्मन्मते सृष्टिप्रलययोरस्वीकारः परंतु प्रथमतः सृष्टिरीश्वरस्य रमणेच्छयैव "लोकवत्तुलीलाकैवल्य"मितिन्यायात् ॥ सृष्टिप्रलयोत्वाविर्भावतिरोभावरूपौ ॥ सूत्रार्थस्तु ॥ नन्वस्य प्रपंचस्यानुकारित्वेन वाच्यत्वेन वा स्वीक्रियमाणत्वे सृष्टिप्रलययोर्विद्यमानत्वादनित्यसंयोगः प्राप्नोति तत्राह ॥ समाननामरूपत्वादावृत्तावपीति ॥ आवृत्तावपि समुद्रे जलप्रक्षेपवत् पुनरुपादाने तदेवेतिनिश्चयाभावेपि नामरूपयोस्तुल्यत्वादन्यस्य भेदकस्याभावान्नानित्यसंयोगः ॥ कुतः ॥ दर्शनात् ॥ दृश्यतेहि तथा वेदपितृमातृभ्रातृभर्तृशरीरगंगाप्रवाहादिषु ॥ तदेवेतिव्यवहारस्य सिद्धत्वादिति ॥ न च संसारस्य सादित्वे कृतनाशाकृताभ्यागमादिदोष इति वाच्यं ॥ ईश्वरेच्छयेश्वरसकाशात्प्युचरितैर्जीवैः कर्माणि क्रियंते तत्तत्कर्मफलमपीश्वरकृतमर्यादया तस्य तस्य जीवस्य भवत्येवेति दोषाभावः ॥ नहि जीवानामनित्यत्वं येन कृतनाशः स्यात् नहि कर्मणैव फलं किंत्वीश्वरेच्छयापि नातोऽकृताभ्यागमः फलाकांक्षित्वपर्य्यायः ॥ यस्तु तथाचेत्यादिना प्रेक्षावतोमोक्षार्थं प्रवृत्त्यभावापादनरूपोमोक्षमार्गोच्छेदरूपश्चदोषआपादितः सोऽपि त्वन्मत एव संभवति ॥ सर्वं स्वप्नतुल्यं स्वस्वरूपमपि स्वप्नकल्पितजीवसमं जानतः मोक्षं मोक्षसाधनं गुरुं वेदं च मिथ्यात्वेन जानतो वामदेवशुकादीनामपि मुक्तिर्न जातेति मम मुक्तिः कुतोभविष्यतीति मुक्तिप्रत्याशाशून्यस्य कथं मोक्षमार्गे प्रवृत्तिरिति मुक्तिमार्गोच्छेदस्त्वन्मते ॥ अस्मन्मते च यस्य बंधनसामर्थ्यं तस्यैव मोचनसामर्थ्यं दृष्टं च राजनि यथा राज्ञा बद्धोराजानमेवाश्रयते राजकृपया मुच्यतेच एवमेवेश्वरकृपया मुच्यते पुनश्च सुखी भवति "सोश्नुतेसर्वान्कामान्सह ब्रह्मणाविपश्चिते" तिश्रुतेरिति नमुक्ति-

मार्गोच्छेदः ॥ किंच संसारस्यानादित्वेत्वन्मते तस्यमिथ्यात्वंनस्यात् त्रैकालिकनिषेधप्रतियोगित्वाभावात् ॥ आदावंतेचयन्नास्तिवर्तमानेपितत्तथा वितथैः सदृशाह्येतेवितथाइवलक्षिताइतिगौडपादकारिकाविरोधश्च किंच त्वन्मते यद्गत्वाननिवर्तंतेतद्धामपरमंममेतिस्मृतेः अनावृत्तिःशब्दादितिसूत्रस्यच विरोधः स्यात् जीवस्य पारमर्थिकं स्वरूपं ब्रह्मैवेति तस्य गमनासंभवात् तस्य व्यापकत्वात् व्यावहारिकं त्वौपाधिकं तस्य चोपाधिनाशेन नाशात्प्राप्तिरेव न संभवति ॥ प्राप्तेरसंभवेन निवृत्तिशंकाया असंभवाद्संगतिः ॥ एवं सूत्रेपि संदेहासंभवादित्यलं ॥

सहस्राक्षे साचेयंमायेत्यादि उत्पन्नत्वादित्यलमित्यंतं भागं खंडयंति ॥ नन्वविद्याया इत्यादिना ॥ संदेहासंभवादित्यलमित्यंतेन ॥ अयमाशय ॥ यदिमायाऽपिब्रह्मवदनादि स्यात् तदा ऐतरेयोपनिषदि "आत्मावाइदमेकएवाग्रआसीन्नान्यत्किंचनमिषत्" तैत्तिरीये "नासदासीन्नोसदासी" दित्यादि । तथा "ब्रह्मव-

---

साचेय मायाऽनादि ॥ नासदासीन्नोसदासीत्किंतुतम इतिश्रुते ॥ लाघवाच्च अनादिससारकारणतासिद्धौ तस्या सादितायावत्कुमशक्यत्वाच्च ॥ पूर्वपूर्ववासनानामुत्तरोत्तराध्यासप्रति पूर्वपूर्वकर्मणामुत्तरोत्तरजन्म प्रतिच हेतुत्वात् बालस्य स्तन्यपाने प्रवृत्तिदर्शनेन पूर्वसस्कारसिद्धौ सस्कारप्रवाहस्य कल्पनीयत्वाच्च ससारस्याऽनादितासिद्धि ॥ अतएव बन्धोऽस्याऽविद्ययाऽनादिरितिस्मृति सगता ॥ नच बन्धस्याऽनादित्वेऽविद्ययेति तृतीयाऽनुपपत्तिरितिवाच्यम् ॥ गोपेन गावइत्यादिवदुपपत्ते ॥ नच तत्र जीवन्तीत्यादिपदाध्याहारइतिवाच्यम् ॥ इहाऽपि तिष्ठतीत्यध्याहारस्य सुलभत्वात् ॥ अतएव भागवते तृतीयस्कन्धे विश्वंवैब्रह्मतन्मानसस्थितविष्णुमायया इत्यत्र सस्थितमित्युक्तम् ॥ सादित्वतु बन्धस्य नाह्नीकर्तुंयुक्तम् ॥ अस्यां स्मृतौ अनादिशब्दार्थस्य त्यागे बीजाभावात् ॥ प्रवाहाऽनादौतु ससारोऽनादिरित्यादौ नैयायिकादीना सर्वेषां प्रचुर प्रयोग इति तत्राऽनादिशब्दस्य शक्तिरेव निरूढलक्षणावा ॥ देवेष्वमरशब्दस्य रूढिरेव ॥ योगासभवे तस्या सर्वसम्मतत्वात् ॥ तस्य देवेष्वौपचारिकत्वेपि यथा तत्र तद्यथेहकर्मचितोलोकःइत्यादिश्रुतिरनुग्राहिकाऽस्ति तथाऽत्र किञ्चिदनुग्राहक नोपलभ्यते इति नेहाऽऽमरशब्दवदुपचरितार्थता ॥ प्रत्युत तथात्वे धातायथापूर्वमकल्पयदितिश्रुते ऋषीणांनामधेयानिचवेदेषुदृष्टय शर्वर्यन्तेप्रसूतानातान्येवेभ्योददात्यज इत्यादिस्मृतीनां समाननामरूपत्वाच्चाऽऽवृत्तावविरोधोदर्शनात्स्मृतेश्चेतिसूत्रस्य च विरोध स्यात् ॥ सूत्रार्थादिकस्तु उत्तरभागे एकोनचत्वारिंशखण्डखण्डने स्फुटीभविष्यति ॥ बन्धस्य सादित्वेऽकृताऽभ्यागमादिदोषप्रसङ्गश्चस्यात् ॥ तथाच यथापूर्वं विनाकारणान्तरमीश्वरोमा ससारान्धकूपेऽक्षिपत्तथा पुनरपि क्षेप्स्यतीति विचारयन्नकोपि प्रेक्षावान्मोक्षार्थं यतेतेति मोक्षमार्गएवोच्छिद्येत ॥ ससाराऽनादित्वबोधकवाक्येष्विव नसपुनरावर्तते यद्गत्वाननिवर्तन्ते अनावृत्ति शब्दादित्यादिष्वपि कुतर्कप्रवृत्तेरप्रतिबन्धात् ॥ प्रत्युत मोक्षस्य नाशे जन्यस्य नाशइति नियमोऽनुकूल स्यात् लयरूपस्य तस्योत्पन्नत्वादित्यलम् ॥

नभस्स वृक्षआसीत्" इत्यादि ॥ पुरुषविधब्राह्मणे "आत्मैवेदमग्रआसीत्पुरुषविधः सोऽनुवीक्ष्यनान्यदात्मनोपश्यत् छांदोग्ये "सदेवसोम्येदमग्रआसीदेकमेवाद्वितीयं" गोपथब्राह्मणे "ब्रह्महवाइदमग्रआसीत् । स्वयंत्वेकमेवतदैक्षत महद्वैयक्षं तदेकमेवास्मि हंताहंमदेवमन्मात्रं द्वितीयंदेवनिर्ममइति" एवमाद्याऽऋग्यजुः सामाथर्वश्रुतयोबाध्येरन् ॥ तासु हि सृष्टेः प्राक् ब्रह्मणएव सत्ताऽवधार्यते । वस्त्वंतरसत्ता च निषिध्यते ॥ यदि च भावरूपा माया तदा स्यात्तर्हि सर्वज्ञोऽप्यात्माऽनुवीक्ष्यापि तां कुतोन पश्येत् ॥ एकमेवाद्वितीयमितित्रिविधभेदनिषेधश्च कथं संगच्छेत ॥ कथंच "एकमेवास्मिहंताहंम-देव मन्मात्रं" इति सर्वज्ञस्येक्षणं च घटेत ॥ एतेन ऐतरेयेमिषतोनिषेधादचेतनस्यान्यस्य स्थितिर्न विरुद्धेति द्वैतिनां कल्पनाऽप्यपास्ता ॥ वस्त्वंतरसत्वे पुरुषविधब्राह्मणादौ स्वान्याभावाद्भयाभावोरमणाभावोरमणार्थं द्वितीयेच्छा तस्यैवैतावद्रूपेण भवनं चाम्नाय-मानं तदानीं वस्त्वंतरसत्ये जगतस्तदुपादानकत्वे च विरुध्येतैव ॥ तेन यश्च "नासदा-सीन्नोसदासीत्किंतुतमः" इति विलक्षणएव श्रुतिपाठउपन्यस्तः । सचोपहासार्थं मूले पूर्वपक्षे तथैव संगृहीतः ॥ वस्तुतस्तु नासदासीदितिमंत्रद्वयार्थः प्रागेव समर्थितः ॥ तत्र च "किमावरीवः कुहकस्यशर्मन्" इत्यावरणशक्तिकमायादेस्तदा सत्ता स्पष्टमेव प्रति-षिद्धा ॥ स्वधयेति स्वेनैव जगतोधारणं तस्यैकत्वं चोक्त्वा "तस्माद्धान्यंनपरः किंचनास" इति स्पष्टमेव तदन्यस्य प्रतिषेधोदर्शितः ॥ अतः "तम आसीत्तमसागूढमग्रेप्रकेतं सलिलꣳसर्वमाइदं ॥ तुच्छेनाभ्वपिहितंयदासीत्तमसतस्तन्महिनाजायतैकं" इत्यग्रिम-मंत्रेऽपि तमःशब्देन न सा । पूर्वमेव प्रतिषिद्धत्वादन्यप्रतिषेधविरोधाच्च ॥ किंतु आनीदवातमित्यादिनातच्छब्देन यदुक्तं तत्स्वरूपमेवात्रोच्यते ॥ तत्र पूर्वं रात्रिदिवसप्रके-तसूर्यनक्षत्रादिनिषेधात्सर्वस्य सुप्तवत्तत्रैव लीनत्वात्सर्वाच्छादकत्वाच्चेह तमःशब्देन ब्रह्मैव ॥ इदं च द्वितीयस्कंधनवमाध्याये अहमेवासमेवाग्रइत्यत्र सुबोधिन्यां स्फुटं ॥ तमःशब्दस्य सांख्यपरिभाषया वस्त्वंतरपरत्वे (अ. २ पा. १ सूत्रं २) "इतरेषांचानु-पलब्धेः" इति सूत्रं विरुध्येत ॥ तथाच तदा तमः सर्वाच्छादकं ब्रह्मैवासीत् आसम-न्तात् इदं इदानीं नामरूपाभ्यां व्याकृतं जगत् अग्रे सृष्टेःपूर्वं अप्रकेतं अप्रज्ञायमानं सलिलं कारणेन अविभक्तं तमसा पूर्वोक्तरूपेण ब्रह्मणा गूढम् आच्छादितं तिरोभावितमितियावत् आसीदित्यर्थः ॥ "यथातम पदार्थानावृणोतीति एवं इदमपि ब्रह्म तत्त्वमावृणोतीतितम.शब्देन व्यवहारः" इतिविद्यारण्यस्वामिनाव्याख्यानेऽपि लक्षणयैव मायापरत्वं दर्शितं ॥ मम तु ब्रह्मणः सर्वशब्दवाच्यत्वान्नलक्षणापीति पूर्वापरानुरोधादिदमेवादरणीयं ॥ ननु पूर्वजगतोऽभावे ब्रह्मणा तस्य गहनं कथं संगच्छतइतिचेत्पूर्वसृष्टिप्रलयेतोदनेमसर्वं तिरोभावितमित्याशयेनाह ॥ तुच्छेनेत्यादि ॥ अत्र तुच्छशब्देन प्रलयकर्तृ ब्रह्म ॥ अतएव महोपनिषदि "एषह्येवशून्यएषह्येव-तुच्छएषह्येवाभावएषह्येवाव्यक्तोऽदृश्योऽचिन्त्योनिर्गुणश्चेति" ॥ महाकौर्मेपि ॥ शमूनं कुरुते विष्णुरदृश्यःसन्परःस्वयं । तस्माच्छून्यमितिप्रोक्तस्तोदनात्तुच्छमुच्यते । नैषभाव-विर्गुणोयःकेनचित्पुरुषोत्तमः । अतोऽभावंवदंत्येनंनाशयत्वाश्चाराइत्यपि । सर्वेषांतदधीन-

स्यात्तत्तच्छब्दाऽभिधेयता। अन्येर्षांऽप्यव्यवहारायेमिव्यतेव्यवहर्तृभिरिति ॥ तथाच आसमंताद्भवति उत्पद्यते इत्याभु जगत् तुच्छेन प्रलयस्पतोदनकृता पूर्वोक्ततमसा अपिहितं आच्छादितं तिरोभावित यत् आसीत् तत् तमस पूर्वोक्तात् ब्रह्मण सकाशादेव महिना महत्वेन पटवद्विस्तारेण अजायत प्रादुरभवत् तच्च नानादृश्यमानमपि वस्तुतोब्रह्मणएव तत्तद्रूपत्वादेकत्वमित्यर्थं ॥ यत्तु तत्त्वज्ञाननिवर्त्यत्वात्तुच्छशब्देन मायेति तद्व्याख्यान ॥ तन्न ॥ शुक्तिरजतवत्तुच्छेनाच्छादनस्यायोगात्। तादृशरजते भाजनभूषणादेरिव तस्यां जगतउपादानत्वस्यासम्भवेन तत्तोजननस्यायोगात् व्याख्याने मृद्घटबीजवृक्षदृष्टांत कथनपूर्वक स्वयमुक्तस्य सत्कार्यवादस्य बाधाच ॥ किंच साप्युपहितेन कल्पिता शुद्धेन वा आद्येन्योन्याश्रयोद्वितीये शुद्धस्वबाधइत्याद्युक्तवक्ष्यमाणदूषणप्रस्तरात्न तस्यास्तुच्छत्वं शक्यवचनं अग्रेऽपि "कामस्तदग्रेसमवर्तताधि" इत्यादिना इच्छापूर्वकसर्गादिकथनात्तम शब्दार्थोब्रह्मैव ॥ अन्यथाऽधीक्षत्याद्यधिकरणाना "कामाच्चनानुमानापेक्षा" इत्यादिगुणसूत्राणा च विरोध ॥ पुनरग्रेऽपि "कि ऍ स्विद्वन कउसवृक्षआसीत् यतोद्यावापृथिवीनिष्टतक्षु• ॥ मनीषिणोमनसापृच्छतेदुतत् यदध्यतिष्ठद्भुवनानिधारयन् ॥ ब्रह्मवन ब्रह्मसवृक्षआसीत् यतोद्यावापृथिवीनिष्टतक्षु ॥ मनीषिणोमनसाविब्रवीमिव ब्रह्माध्यतिष्ठद्भुवनानि धारयन्" इति पठ्यते ॥ अत्र यथाकाष्ठोपादानक जुहूस्रुवादिक यद्वृक्षसमुदायरूपवनस्यैकदेशवृक्षस्याशभूत तत्रैवस्थित तक्षणात्तत्तएवाभिव्यज्यते तथा इद जगदपि विभागादेवाविर्भूत वनसमपुरुषोत्तमैकाशस्याक्षरब्रह्मणोंऽशभूत तत्रैव स्थित तदिच्छयाऽभिव्यज्यतइति ज्ञापनायसृष्टिहेतुभूतवनादिक जगतोऽधिष्ठातार धारयितार च पृष्ट्वा ब्रह्मणएव वनत्व वृक्षत्व धारणपूर्वकमधिष्ठानृत्व चोत्तरित। यदि तम शब्देन ब्रह्मनाभिप्रैष्यत् किंतु मूलाज्ञानएव मृद्घटबीजवृक्षादिन्यायेन जगदवस्थानमभिप्रैष्यत् तदा ब्रह्मवनमित्यादिनैवावक्ष्यत् किंतु मायावन तमोवन तम सवृक्षआसीदित्याद्येवावदिष्यत् ॥ तस्मादपि तमोऽत्र ब्रह्मैव ॥ एतेनैव (अ० १ श्लो० ५) आसीदिदंतमोभूतमप्रज्ञातमलक्षणं ॥ अप्रतर्क्यमविज्ञेय प्रसुप्तमिवसर्वत इति मनुवचनमपि व्याख्यात अग्रे मनुपद्य (श्लो०६।७) तत स्वयम्भूर्भगवानव्यक्तोव्यञ्जयन्निद ॥ महाभूतादिवृत्तौजा प्रादुरासीत्तमोनुद ॥ योसावतीन्द्रियग्राह्य सूक्ष्मोऽव्यक्त सनातन ॥ सर्वभूतमयोऽचिंत्य सएवस्वयमुद्बभौ सोभिध्यायशरीरात्स्वात्सिसृक्षुर्विविधा प्रजाइति तस्यैव पूर्वमव्यक्तत्वस्य सूक्ष्मकारणत्वस्य सर्वव्यञ्जकत्वस्य सर्वभूतात्मकत्वस्य स्वयमेव जगद्रूपेण भवनस्य अभिध्यान पूर्वकं स्वरूपतएव विविधप्रजासर्जनस्य च कथनेन तत्रापि तथैव तम शब्दार्थस्य प्रतीते ॥ अन्यथा "आत्मैवेद सदेवसोम्येद" इत्यादिश्रुतिशतविरोधादप्रमाण स्यात् पूर्वतन्त्रे (अ० १ पा० ३ सू० ३) विरोधेत्वनपेक्षमिति न्यायात् ॥ तमोनुदइतितु स्वतेजसा भानुपुरापिवत्तमइति तत्तमस्कथाद्युक्त प्रलयान्धकारापनोदनमेव ॥ नचाय स्वयम्भूर्ब्रह्मा भवेय ॥ अग्रेऽण्डोत्पत्त्यनतर (श्लो० ९) तस्मिञ्जज्ञेस्वयब्रह्मासर्वलोकपितामहइति पृथक्कथनात् ॥ जीवकल्पितस्य तुच्छस्य तु ब्रह्मणा प्रेरणमप्यशक्यवचन ॥ एतदेवाभिप्रेत्य समाकर्षसूत्रभाष्ये "तमआसीदि"त्यनभिव्यक्त कर्मपक्षेऽपि ब्रह्मत्वमक्षत तत्पक्षस्य

गौणत्वशापनाय तत्र प्रकाशे कर्माप्युच्यतइत्यपि शब्दः प्रयुक्तः ॥ एवमेव सुबोधिनी-तत्त्वप्रकाशाभ्यामैकार्थ्यं पूर्वोक्तानादरे तमःशब्दस्यांधकार एव प्रसिद्धत्वात् लौकिकतर्कादि-दर्शनेषु तस्य तेजोऽभावरूपत्वांगीकारात् केवललोकानुरोधे तादृगभावएव तदा रात्रिदिनचिह्नसूर्यचंद्रादिविरहासिध्येश्च त्वदभीष्टमित्याशयेन वक्रोत्तरमुक्तं मूले ॥ अभावबोधकत्वादित्यादि अतएव लोकइत्युक्तं ॥ सिद्धांतस्तु प्रागुक्तएव तमेवाहुः ॥ वस्तुतोब्रह्मैव तमइति ॥ यच्च लाघवाच्चानादिसंसारकारणेत्यादि तदसंबद्धं संसारस्य कार्यत्वेऽनादित्वायोगात् कार्यनियतपूर्ववृत्तेरेव कारणत्वात् ॥ अविद्योत्तर-कालिकतया तत्कार्यं तस्मिन् चिरंतनत्वमेवानादित्वमितिचेदिदमसदृशीष्टम् ॥ नापि लाघवं श्रुतिप्रत्यक्षसृत्याइश्वरेच्छायाएव सर्वकारणत्वे संभवत्यविद्यारूपकारणांतर-स्वीकारे गौरवात् ॥ तस्याः सादित्वं तु मायया मेविनिर्मिते इति वचनबलाच्छ्वयमेव वक्तुमिति वक्ष्यते ॥ यच्च (पूर्वपूर्ववासनानामुत्तरोत्तराध्यासं प्रति पूर्वपूर्वकर्मणामुत्तरो-त्तरजन्म प्रति च हेतुत्वात् बालस्य स्तन्यपाने प्रवृत्तिदर्शनेन पूर्वसंस्कारसिद्धौ संस्कार-प्रवाहस्य कल्पनीयत्वाच्च संसारस्याऽनादितासिद्धिः) इत्युक्तं तदप्यसत् अध्यासरूपतया शुक्तौ रजतस्येवार्थानामभावे वासनानामेवासिद्ध्या ताभिरध्यासस्यासंभवात् ॥ अतएव सूत्रकारः (अ० २ पा० २ सू० ३०) "नभावोऽनुपलब्धे." इत्याह ॥ अत्रशंकराचार्याः "नभावोवासनानामुपपद्यते त्वत्पक्षेऽनुपलब्धेर्बाह्यानामर्थानां ॥ अर्थोपलब्धिनिमित्ताहि प्रत्यर्थं नानारूपावासनाभवंति" इत्यादि व्याचक्षते तत्र नानार्थाभावेवासनानां वैचित्र्याभावः ॥ अनादित्वेऽप्यंधपरंपरावदनवस्था ॥ वासनाभिर्विनाऽप्यर्थोपलब्धिरर्थंविना वासनानुत्पत्तिरित्यन्वयव्यतिरेकावर्थसद्भावमेव प्रतिष्ठापयतः ॥ किंच वासनाहि संस्कारविशेषा न निराश्रया अवतिष्ठंते नच शुद्धं ब्रह्म तदाश्रयः शुद्धत्वात् ॥ नाप्युपहितं घटादेरिवोपाधेरपि कल्पनं वासनयैव वक्तव्य-मिति तस्यास्तदाश्रयत्वेऽन्योन्याश्रयात् इत्यादि भास्करभाष्यकारोक्तदिशैव द्रष्टव्यं ॥ एवं तत्रैव पूर्ववैनाशिकमतेपूक्तानि दूषणांतराण्यनुसंधेयानि ॥ नापि पूर्वपूर्वकर्म-णामेवोत्तरोत्तरजन्म प्रति स्वातंत्र्येण हेतुत्वं । एष ह्येव । मत्तःसर्वंप्रवर्तते । भवंति-भावाभूतानांमत्तएवपृथग्विधाः । "परात्तुतच्छ्रुतेः । पूर्वंतुबादरायणोहेतुव्यपदेशात्" इत्यादिश्रुतिस्मृतिन्यायशतैः कर्माण्यपि प्रति उत्तरजन्मादिरूपतत्फलानि प्रति च तत्तदिच्छाविशिष्टब्रह्मणएव हेतुतायाबोधनात् ॥ अतएव कर्मणां तदिच्छयैव जन्मादि-करत्वं स्मर्यते (स्कं० १० अ० ४७ श्लो० ६८) कर्मभिर्भ्राम्यमाणानायत्रक्वापीश्वरे-च्छयेत्यादिषु ॥ किंचेदमपि हेतुत्वं सृष्ट्युत्तरमेवेति प्रपंचितं प्राक् । बालस्य स्तन्यपाने प्रवृत्तिः संस्कारादित्यपि सृष्ट्युत्तरमेव । नतु पूर्वसृष्टिसंस्कारात् ॥ अतएव चतुर्मुखस्य मरीचिसनकादितत्पुत्राणां च सृष्ट्यारंभो न स्तन्यपाने प्रवृत्तिः ॥ किंच सृष्ट्युत्तरमपि भगवदिच्छयैवतादृशसंस्कारोद्बोधात् प्रवृत्तिः । अन्यथा कायिकपापफलस्थावरजन्मसु कूर्मादिचरजन्मसु च स्तन्यपानाभावात्संस्कारनाशेऽनंतरं मनुष्यादि जन्मस्वपि तन्न स्यात् ॥ किंच संस्कारप्रवाहमनादिं ततः संसारं चानादिं वदन् पूर्वमीमांसकैकदे-

शिमततेव प्रविश । अलमध्यासादिकल्पनागौरवेण । तन्मतखंडनयुक्तिभिस्त्विदमपि
खंड्येत ॥ संस्कारप्रवाहश्च कस्येतिनिश्चेयं ॥ संसारानादित्वेसदेवेत्यादिव्याकोपः
सृष्टिप्रलयाभावात्तद्बोधकश्रुतिव्याकोपः प्रयोजनाभावान्निरीश्वरत्वापत्तिश्चेत्यादिध्येयं ॥
तदेतदनुसंधायाहुः एतेनेत्यादि ॥ उक्तंचतैरिति इयं कारिकाविश्वनाथपंचाननस्य
कारिकावल्यौ गुणव्यवस्थायां (श्लो० १५०) अस्ति ॥ इदंकृतिसाध्यमिष्टसाधनंचेतिज्ञा-
नंतथामतिः ॥ चकारोदंडादिनिमित्तसमुच्चायकः ॥ अध्यक्षं प्रत्यक्षं ॥ यदपि (अतएव
बंधोस्याविद्ययानादिरितिस्मृतिः सगतेत्युक्तं तदपि पूर्वापरानवलोकनात् ॥ यत्र
ह्येकादशस्कंधे एकादशाध्याये इदमस्ति तत्र (श्लो० ३) विद्याविद्येममतनूविद्ध्युद्धव-
शरीरिणां । बंधमोक्षकरीआद्ये माययामेविनिर्मितेइति विद्याविद्ययोः स्वशक्त्या विनि-
र्मितत्वं आदौ भवत्वं बंधादेस्तत्कृतत्वेन स्पष्टमेव सादित्वं चोक्त्वा उभयोरभयकारणत्वं
जडांतर्यामिणोर्बंधादिकं च निराकर्तुमुच्यते (श्लो० ४) एकस्यैव ममांशस्य जीवस्यैव
महामते । बंधोस्याविद्ययाऽनादिर्विद्ययाचतथेतरइति एवं च सत्यत्रानादिशब्दोऽनादिरय-
मस्माकं विवाहे वेणुपात्रोपवेशनव्यवहारइत्यादिवच्चिरंतनार्थकएव ॥ तदेतदाहुः ॥ तथा-
चेत्यादिना अक्षव्यमिति ॥ आत्मसुखातिरिक्तफलपरत्वपक्षे पराभिमतमनुरुध्येदमुक्तं ॥
हेतौकरणेचेति ॥ हेतुत्वं च कारणत्वं तच्च कार्यनियतपूर्ववृत्तित्वं तथा च बंधस्यसादित्व-
मयत्नलब्धं हेतौ द्रव्यादिसाधारणत्वं निर्व्यापारसाधारणत्वं च करणाद्भेदकमंगीकृत्य
क्रमेण तदुभयप्रदर्शनार्थं प्राचां दंडेन घटः पुण्येन दृष्टोहरिरित्याद्युदाहरणेषु दंडपुण्यादीनां
घटदर्शनादितः प्राक्कालिकत्वमस्त्येव ॥ तथात्र बंधस्याक्रियात्वे क्रियात्वे वाऽऽद्रियमाणेऽपि
तस्यास्ततः प्राक्तनत्वं स्यादेव ॥ करणत्वपक्षेऽपि कारणत्वानपायात् क्रियाया.फलनिष्पत्ति-
र्व्यापारादनंतरं । यदाविवक्ष्यतेयत्रतदातत्कारणंस्मृतमितिहर्युक्तेर्बाणेनहतइत्यादौ प्राण-
त्यागादेर्बाणादिव्यापारोत्तरकालिकत्ववदुत्तरकालिकत्वस्यानपायात्सादित्वं ॥ इतरत्तु मूले
विशदतया निराकृतं ॥ विश्वंहीतितृतीयस्कंधवाक्यंतु विश्वंब्रह्माभिन्नमेव तच्छक्त्या तत्रैव
सम्यक्स्थितं ब्रह्मरूपत्वादेव प्रलयेऽप्यबाधितं सत्यमित्यर्थकं यथेदानींतथाचाग्रेपश्चादप्ये-
तदीदृशमितिपुरस्तात्कथनात् ॥ अमरशब्दस्यौपचारिकत्वे "यथेहकर्मचित" इतिमुंडकादि-
वाक्यवत् "आत्मावाइदं सदेवे"त्यादिकमत्रानुग्राहकं ॥ किंच गीतायां सर्वस्यचाहं-
हृदिसन्निविष्टोमत्त स्मृतिर्ज्ञानमपोहनंचेतिज्ञानापोहनरूपस्य बन्धस्य स्वहेतुकत्वं सादित्वं
च दर्शितं ॥ सर्वभूतानुसमोहमोहसर्वैयांतिपरंतपेत्यादौ सर्गकालित्वं च स्फुटमुक्तं ॥
अतएव सूत्रकारोऽपि (अ० ३ पा० २ सू० ५) "पराभिध्यानात्तुतिरोहितंततोह्य-
स्यबंधविपर्ययौ" इतिपराभिध्याननिदानकमेव बंधमाहउत्तरसूत्रे देहयोगहेतुकंवा ।
नत्वविद्यामात्रं मूलकमनादितं ॥ अतएवसादित्वपष्टप्रमाणशतानुरोधादपि तत्रत्योऽनादि-
शब्दउक्तार्थकएव ज्ञेयः ॥ याचयातातथ्येतिश्रुति. ऋषीणामितिस्मृतिश्चोक्ता सातु सृष्ट्यु-
त्तरं ब्रह्मदिनरूपकल्पस्यांते प्रलये तावत्यां तद्रात्रौ व्यतीतायां द्वितीयकल्पादौ पुन सृष्टि-
विषयिका ॥ धातृपदस्वारस्यात् ॥ अतएव "दिवंचपृथिवींचांतरिक्षमथोसुव" रितित्रि-
लोकीसर्गएवोक्तः उक्तकल्पांते तन्मात्रलयात् ॥ स्मृतौ चातएव शर्वर्यंतइत्युक्तं ब्रह्मदेव-

पर्यायोऽजशब्दश्च ॥ महाप्रलयोत्तरमपि ब्रह्माभिन्नं ब्रह्मपरिणामत्वाद्ब्रह्मणि तिरोहितं तु जगन्नित्यं स्वीक्रियतएव तथात्वमपि स्वीकुर्याश्चेदिष्टमेव अविद्यायास्तत्कृतबंधस्य चानादित्वंतु नेमे श्रुतिस्मृती लेशतोऽपि बोधयतः ॥ सृष्टिप्रलयास्वीकारएवेति अविद्यां तत्कृतसंसारं चानादिं वदतस्त्वैव तद्विरोधः सृष्टिप्रलययोरसंभवात् अविद्योपहितेन किंचित्कालंसृष्टेः कल्पने प्रलयकाले साविद्यस्यापि तूष्णीमवस्थाने च हेतोरभावात् हेत्वंतराणामपि कल्पितत्वाविशेषेण तदकल्पने हेत्वभावादनवस्थानाच्च ॥ ननु ब्रह्मरूपस्यैवास्य तदिच्छया ततएव पुनः पुनराविर्भावतिरोभावरूपामावृत्तिं स्वीकुर्वतामस्माकं मते तद्विरोधः प्रत्युत शुक्तौ दशकृत्वोरजतभ्रमे तस्यैव रजतस्य मुहुरावृत्तिर्जातेत्यंगीकारस्यकेनाप्यकृत्वात् ॥

सत्सत्यस्यैवावृत्तिसंभवेन ह्यावृत्तिबोधकस्यास्य सूत्रस्य विवर्तवादबाधकतया तवैव सुतरांतद्विरोधइतिभावः ॥ न्यायादिति ॥ द्वितीयस्य प्रथमे प्रयोजनाभावाज्जगन्निर्माणाभावं भगवतआशंक्य समाहितं (सू० ३३) "लोकवत्तुलीलाकैवल्यमिति" यथा लोके प्रयोजनाभावेऽपि राजादीनां मृगयादिप्रवृत्तयोलीलारूपादृश्यंते तथेयमपीश्वरस्य ॥ सा च प्रयोजनांतरशून्यामोक्षदाचेतितदर्थः ॥ अधिकंतु नवमश्लोकखंडने वक्ष्यते ॥ अनुकारित्वेनेति (अ० १ पा० ३ सू० २८) "शब्दइतिचेन्नातःप्रभवात्" इत्यादिसूत्रद्वये वैदिकप्रपंचस्याधिदैविकतया कर्मणि लौकिकजुहूस्रुवादेष्वाविर्भावशालितया च भिन्नत्वं ततएव वेदस्य नित्यत्वं चोक्तं ॥ तत्र भिन्नत्वपक्षे लौकिकस्रुवादेर्वैदिकस्रुवाद्यनुकारित्वेन अस्यैव ब्रह्मरूपस्य वेदबोध्यत्वअंगीकारे वाच्यत्वेन वेत्यर्थः ॥ अनित्यसंयोगइति ॥ प्रतिपादकोवेदोनित्यः उक्तरीत्योभयथापि प्रतिपाद्यालौकिकाः पदार्थाअनित्यास्तैर्वेदस्य संयोगः ॥ जलप्रक्षेपवदिति ॥ सप्तम्यर्थे वतिः, अयमत्राशयः ॥ पूर्वसृष्टौयोब्रह्मा सएवोत्तरसृष्टौ ब्रह्मेति न नियमः स्वधर्मनिष्ठःशतजन्मभिःपुमान्विरिंचित्वमेतीत्यादितद्ब्रह्मप्राप्तिबोधकवचोव्याकोपात् ॥ एवमवांतरप्रलयोत्तरमपि ये पूर्वकल्पइंद्रास्तएव चतुर्दश जीवाःपुनरिंद्राभवंतीति न नियमः । तेषामश्वमेधशतपूर्वस्य भोगेनोपक्षयात् अन्यस्य तच्छतानुष्ठातुः फलालाभप्रसंगाच्च ॥ तेन सृष्टिभेदेन जीवांतरस्य ब्रह्मेंद्रादिभावेऽपि नामरूपयोः समानत्वाद्ब्रह्मेंद्रादिप्रतिपादकवेदवाक्येषु न कोपि विरोधः । समुद्रे तज्जलस्य प्रक्षेपोत्तरं पुनरुद्धरणे तस्यैव जलस्य जलांतरस्य वाऽऽगमनेपि समुद्रजलं भेदच्छेदकमित्यादिवाक्यस्य न विरोधः ॥ नन्वेवंसति नित्यत्वंगतमितिचेत्स । नहिपूर्वप्रक्षिप्तजलस्य नाशोजलांतरस्य तदोत्पत्तिश्च तत्रास्ति । तथात्रापि सर्वस्य ब्रह्मात्मकत्वेन सृष्टिभेदे तदिच्छया (अ० २ पा० १ सू० १३) भोक्त्रापत्तेरितिन्यायेन विपर्ययेऽपि नानित्यत्वं नापि द्वैतं ॥ यदि च वृक्षपक्षिप्रवेशनिर्गमन्यायेनैव सृष्टिप्रलयौस्वीक्रियेतां तर्हि वृक्षास्पक्षिणइव ब्रह्मणः पदार्थाभिन्नाएव वस्तुतः स्युरिति ॥ सूत्रे स्मृतिपदेन प्रजासृजयथापूर्वंयाश्चमय्यनुशेरतइत्यादिवाक्यानि ऋषीणांपूर्वचरितस्मरणंच गृह्यतइतिबोध्यं ॥ आस्तां चैतत् तथापि नानेनसूत्रेण बंधस्याविद्याया वा अनादित्वंसिध्यति नापि विवर्तभावः ॥ यच्च बंधस्यसादित्वेऽकृताभ्यागमादिदोषप्रसंगश्च स्यादित्याद्युक्तं तत्राहुः ॥ नचसादित्व इत्यादि ॥ त्वन्मतइत्यादिशुद्धमपि मामकारणादेवानादिरविद्या या बद्धवती सा अभेऽपि

कृतोन यबीयात् बंधनस्वभावत्वात् जीवांतराणांयस्वरयेन सर्वथातस्याशस्याभावात् मुक्त-जीवस्य प्रदेशविशेषरूपत्वाभावाचेत्यादिशंकयाऽपि त्वन्मतएव मोक्षोच्छेदः ॥ ईश्वरस्तु सत्यप्रतिज्ञः सत्यसंकल्पः श्रुतौ गीतादौ च मुक्तौ पुनःपाताभावं प्रतिज्ञातवानिति न पुनर्बंधशंका ॥ नहि लौकिकोपि राजादी राजधर्मनिष्ठः सत्यवादी स्वकृतनियमं स्ववाचं वाऽतिवर्तते । किंपुनःसत्यपेद्वावसत्यसंकल्पःसर्वशक्तिः कृपालुरीश्वरइत्यभिसंधिः ॥ आदावंतेचेति ॥ इयंगौडपादीयवैतथ्यप्रकरणस्था (६) कारिका ॥ यत् आदावंतेचनास्ति तदेव मध्येपि नास्तीति वितथं । संसारस्याविद्यायाश्च प्रह्वावदादौ सत्वे तु नवैतथ्यसि-द्धिरित्यनादित्वपक्षे तद्विरोधः ॥ अत्र तृतीयपादे ध्वंतेइत्यत्रसंतइतिक्वचित्पुस्तकेपाठः ॥ यश्च "नपुनरावर्तते" इत्यादौकुतर्कप्रवृत्तेरप्रतिबंधउक्तः स सर्वानादरणीयः उक्त-युक्तेः किंच तादृशश्रुतियुतथासंदेहवारणार्थमेव (अ० ४ पा० ४ सू० २२) "अना-वृत्तिः शब्दा" दितियथापरमाचार्यस्याधिकरणं । नहितथासंसारस्याविद्यायाश्चत्वन्मात्रो त्प्रेक्षितस्यानादित्वस्य कंठरवेण साधकमेकमप्यधिकरणमस्ति । येन तत्रप्रत्याख्यानेसद्व-दत्रापि कुतर्कः प्रवर्तेत ॥ वह्वर्थोपनिषदोऽनावृत्तिमभ्यस्यति वहूनां चानुग्रहएव न्याय्यः । न तथा तदनादित्वग्राहकं किंचिदपि श्रुतिवाक्यं ॥ यश्चजन्यस्यनाशइतिनियमः सोप्यनित्यवादिमात्राभ्युपगमरूपोनित्यवादिनंपीडयितुमीष्टे ॥ नापि मोक्षस्यजन्यत्वं आगं-तुकान्यथारूपत्यागपूर्वकस्वरूपव्यवस्थितिरूपत्वात् मुक्तिर्हित्वान्यथारूपंस्वरूपेणव्यवस्थि-तिरितितल्लक्षणात् । अन्यथा तवैवस्वपादे कुठारप्रहारआपद्येत ॥ किंचतवैवैतद्वाक्यवि-रोधोनत्वस्माकमित्याहुः ॥ किंचत्वन्मतइत्यादिना ॥ सिद्धांतेतु व्युच्चरितस्याणोस्त्वगति-गत्यागतिमतो जीवस्य प्राप्तिः संभवत्येवेतिकर्मिणोब्रह्मलोकतइव पुनरावृत्तिशंकायामना-वृत्तिनिश्चायकानीमानीतिनिरवद्यं ॥

यच्च मायायाः सांतत्वे श्रुतिस्मृतिप्रदर्शनंतदपि पारिभाषिकमा-यायास्तादृशश्रुत्यादिप्रतिपाद्यत्वएव संगच्छतेतदेव न संभवति ॥ तथाहि "विद्वान्नामरूपाद्विमुक्त" इतिश्रुतिर्विदुषोब्रह्मणि लीनस्य पृथक्तया नामरूपे नोपलभ्येते इति प्रतिपादयति नतु मायामपि "यथानद्यःस्यंदमानाः समुद्रेस्तंगच्छंतिनामरूपेविहाय"तिश्रुतेः ॥ तरत्यविद्यामित्यादिस्मृतिस्थमायापदं त्वीश्वरस्यव्यामोहिका या शक्तिस्तां प्रतिपादयतिसा च न सांता अतएव तरतीत्युक्तं नाशय-तीति नोक्तं ॥ सा शक्तिरीश्वरे हृदि निविष्टे तत्कृपया भक्तं न मोह-यतीति नदींतरतीत्यनेन नदींनाशयतीति बोधः कस्यापि न जायत इति कथं तादृशस्मृत्या मायायाः सांतत्वनिश्चयः ॥ विभेदजनकेऽज्ञा-नइत्यादिस्मृतिरपि "पराभिध्यानात्तुतिरोहितंततोह्यस्यबंधविपर्यया" वितिसूत्रेण यद्व्यासैः प्रदर्शितं जीवस्येश्वरविषयकज्ञानतिरोभा-वाद्देहादिष्वहंबुद्धिरूपमन्यदपि विपरीतज्ञानं तदेव वास्तवज्ञानाभावा-दज्ञानशब्देन प्रतिपादयति न तु मायारूपं ॥ मायायाएकत्वेन तस्या

अत्यंतनाशे एकमुक्तौ सर्वमुक्तिप्रसंगः ॥ किंच मायायाअनादित्वस्वीकारे तस्याः सांतत्वकथनमयुक्तं अनादेर्भावस्य नाशादर्शनात् ॥ नच भावत्वं निरूपयितुमशक्यमिति वाच्यं अस्तीतिप्रतीत्यर्हत्वरूपस्य निरूपणस्य संभवात् तत्रापि दोषोद्भावने सांतत्वस्यापि निरूपयितुमशक्यत्वात् अविद्यायाः सांतत्वमपि न स्यात् ॥ किं तावत्सांतत्वं ध्वंसप्रतियोगित्वमिति चेत् ध्वंसत्वं प्रागभावप्रतियोग्यभावत्वं प्रागभावत्वं च ध्वंसप्रतियोग्यभावत्वमित्यन्योन्याश्रयः ॥ एवमभावत्वप्रतियोगित्वादीनामप्यनिर्वचनीयत्वात्तद्धटितस्य सांतत्वस्य सुतरामनिर्वचनीयत्वंध्वंसत्वादीनामखंडोपाधिरूपता चेद्भावत्वेन किमपराद्धं ॥ तमसोभावरूपत्वेन दृष्टांतासिद्ध्या भावाऽभावातिगाऽविद्येत्याद्यसंगतं ॥ यदिचेत्यादिप्रलापस्त्वंप्रशततयोपेक्षणीयः मायानाशेऽपि तिरोभावानंगीकारादिति कथनमसंगतं नाशस्य तिरोभावानतिरेकात् ॥ नचसतोऽसत्वं नाशः सतः पूर्ववज्ज्ञानाभावस्तिरोभाव इति वाच्यं सतोऽसत्वासंभवात् । घटादीनां सत्वं त्वया न स्वीक्रियते । मायायास्त्वन्मते सद्विलक्षणत्वात्तस्यानाशानुपपत्तेः ॥ किंच घटोनश्यति ननाश नष्टः नंक्ष्यति इत्यत्राख्यातार्थवर्त्तमानत्वभूतत्वभविष्यत्वादीनामन्वयः । कुत्रेति वक्तव्यं । घटे वा ध्वंसे वा ध्वंसोत्पत्तौ वा? नाद्यः, घटस्यासत्वात्तत्र वर्त्तमानत्वादिकालान्वयासंभवात् । नापि द्वितीयः नाशस्य विद्यमानत्वेन नष्टः ननाशेत्यादिप्रयोगानुपपत्तेर्भूतत्वपरोक्षभूतत्वयोस्तत्राभावात् न तृतीयः घटोनष्टो नश्यतीत्यादावुत्पत्तिवाचकपदाभावात् समभिव्याहृतपदोपस्थापित एव पदार्थान्वयनियमेनान्वयासंभवात् ॥ तस्मान्नाशस्तिरोभाव एव सच घटस्य सत्वात्तत्र संभवत्येव ॥ किंच मायायाअनादित्वे "एकमेवाद्वितीयं ॥ आत्मावाइदमेकएवाग्रआसी"दितिश्रुतिविरोधः ॥ सादित्वेतुजन्यत्वं वाच्यं यज्जन्यं तत्सकारणकमितिव्याप्तेस्तत्कारणं ब्रह्मैव वक्तव्यं तच्च कारणत्वं ब्रह्मणि वास्तवमेवाभ्युपगंतव्यं न तु कल्पितं मायायाः पूर्वमभावेन मायिकत्वापरपर्यायकल्पितत्वस्यतत्र वक्तुमशक्यत्वात् ॥ तथाच ब्रह्मणि निर्द्धर्मकत्वमभ्युपगतं त्यक्तं स्यात् । संसारस्यानादित्वं च न स्यात् ॥ प्रागभावस्य त्वन्मते अभावाद्दृष्टांतासंभवेनानादिसांतत्वमपि कल्पयितुं न शक्यते ॥ तस्माज्जगत्कारणीभूतं पारिभाषिकं भावरूपमज्ञानं न संभवति श्रुतिन्यायविरोधोद्धारस्य कथमप्यसंभवात् ॥ मायापदवाच्याभगवच्छक्तिरेव

सा च भगवदभिन्ना शक्तिशक्तिमतोरभेदात् ॥ अयमेवार्थः शुद्धाद्वैतमार्तण्डकारैः ॥ किंच जन्यात्वजन्यावामायाद्योजनकोह्निकइत्यादिकारिकाभिः प्रदर्शितः ॥

सहस्राक्षे सान्ताचेयमित्यादि निरस्तत्वाचेत्यंत भागं परिहरति ॥ यच्चमायाया इत्यादिनाकारिकाभिःप्रदर्शितद्वत्यतेन ॥ अयमर्थं ॥ यानितत्सान्तत्वसाधनाय वाक्यान्युक्तानि तत्र तथाविद्वानिति मुंडकवाक्य यथानद्यइतिपूर्वार्द्धविशिष्टं व्याख्यात प्राक् ॥ नहि तत्र तदभिमताज्ञानस्य तत्सान्तत्वस्य वा गंधोऽप्यस्ति ॥ यच्चतरत्यविद्यांविततामिति वाक्यं । इदभीष्मस्तवराजस्थमितिकेचित् ॥ वस्तुवस्तु शांतिपर्वांतर्गतराजधर्मपर्वणि भीष्मस्तवराजाख्ये सप्तचत्वारिंशाध्याये इदं नोपलभ्यते ॥ सति समूलत्वे । तत्र अविद्यामायेतिपृथक्शब्दद्वयोपादानान्मलिनसत्वांशुद्धसत्वाचोभे अपिनाशयतीति त्वया वाच्य ॥ शुद्धसत्वायानाशेचहृदिनिवेशनस्याप्यसंभव कतकरेणुवत्सातायाविद्यायाश्च्य संभवइति वाक्यार्थस्य तव बाध अविद्याख्यातामिति व्याख्याय शुद्धसत्वायाअनाशस्य कथने तु मलिनसत्वायाएव सान्तत्वसिद्धि ॥ किंचाविद्याशब्दस्य तावकेष्वीशावास्यभाष्यादिषु कर्मपर्यायताकथनात् त्वयाप्युत्तरत्र कर्मपरतायावक्ष्यमाणत्वात्राप्यविद्या

सान्ताचेयमाया ॥ विद्वान्नामरूपाद्विमुक्तइतिश्रुते ॥ तरत्यविद्यांविततांहृदियस्मिन्निवेशिते ॥ योगीमायाममेयायतस्मैविद्यात्मनेनम ॥ मायामेतांतरन्तिते ॥ विभेदजनकेऽज्ञाने नाशमात्यन्तिकंगते इत्यादिस्मृतिभ्यश्च ॥ नचयदनादितदनन्तमितिव्याप्ति सङ्गता ॥ प्रागभावेव्यभिचारात् ॥ घटादेराविर्भावस्यैवस्वीकारेऽपि भेदस्योत्पत्तिस्वीकारेण तथाऽपि तत्प्रागभावप्रत्याख्यानस्याशक्यत्वात् ॥ नचानादिर्भावोऽनन्तइतिवाच्यम् ॥ भावत्वस्य निरूपयितुमशक्यत्वात् ॥ अस्तीतिप्रतीत्यर्हत्वस्याऽभावेऽपि सत्वात् ॥ अभावभिन्नोभावइतितु अन्योन्याश्रयग्रस्तम् ॥ अभावस्य भावनिरूपणाधीननिरूपणत्वात् ॥ अधिकन्तुखण्डनादिभ्यो ज्ञेयम् ॥ किञ्चाऽविद्याया अभाववैलक्षण्येनैव भावव्यवहारोऽस्माक नतु त्वदभिमतभावरूपत्वेन ॥ तदाहुर्भावाभावातिगाविद्यातच्चेदृष्टान्तिततमइत्यादि ॥ यदिचाऽनादिपदार्थानाम्भेदस्य सादिता नयुक्ता सादिषु नकोऽपिपदार्थ इत्युच्यते तर्हि सर्वमनन्तमित्येव त्वया वाच्य ॥ यत्तच्छब्दयोरव्यावर्तकत्वात् ॥ नचतयाऽपि वक्तु युक्तमुक्तश्रुत्यादिविरोधात् ॥ आविर्भावतिरोभावावेवाद्यन्ततयाविवक्षितावितिचेन्न ॥ मायायानाशेऽपि तिरोभावानङ्गीकारेण तन्नियमविरोधानवतारात् ॥ सत पूर्ववज्ज्ञानाऽभावस्यैव तिरोभावपदार्थत्वात् ॥ अन्यथा नाशत्वेनाऽभिमतोभेदोऽपि तिरोभवतीति त्वयोच्येत ॥ नैयायिकादैश्च कूर्मस्याङ्गानितिरोभवन्तीतिवद्घटादयस्तिरोभवन्तीतिप्रयुज्येत ॥ एतेन किञ्चजन्यात्वजन्यावामायाऽऽद्येजनकोह्निक ॥ अन्याभावात्तुब्रह्मेवसविशेषत्वमागतम् ॥ द्वितीयेत्वद्वैतभङ्ग कदाचित्सत्वसङ्गतम् ॥ आत्मैवेदमग्रआसीदित्यादि श्रुतिबाधत ॥ अनादित्वेतुसान्तत्वमितिपक्षोऽप्यसङ्गत ॥ अनादित्वमनन्तत्वमायायाइतिनिश्चय इतिप्रत्युक्तम् ॥ अनादिसान्तत्वपक्षे श्रुतिन्याययोर्विरोधस्योक्तत्वात् ॥ अनन्तत्वस्योक्तरीत्यनिरस्तत्वाच्च ॥

कर्माणितरतीतिकुतोन प्राप्नुयात् । कर्मभिस्त्यज्यतेयोगीत्यादिस्मरणांतराच्च ॥ तथाच भावरूपाज्ञानस्य नेदंसाधकतासमर्पकं ॥ सिद्धांते तु विद्यायाऽविद्यायांतत्त्याऽभाय-पाधनिषेवितमितिशास्त्रयोर्भेदनिर्देशात्छास्त्रार्थांतरणभगवेवनवृक्षात्स्समष्टिव्यष्टिरूपतया श्रु-त्यादिताभविद्यांगुणमयींमायां च हृदिभगवत्प्रियेशनेन तरति । विलक्षमानयायस्यस्यानु-मीक्षत्पश्येऽनुयेत्यायुक्तेः । आत्मभिदायाधात्मनेनमद्दत्यर्थं ॥ एतेनैव दैवीह्येषागुणम-यीममममायादुरत्यया ॥ मामेवयेप्रपद्यतेमायामेतांतरंतिते इतिगीतासप्तमाध्यायवाक्यमपि व्याख्यातं । यथा दुष्कृतिनोमायया ऽपहृतज्ञानाभवंति नतयाभगवन्मायाप्रपन्नादतिवदा-शपात् नदीतरणवत्तारासिद्धेः ॥ अन्यथादुष्कृतिनामपि ज्ञानंनापहरेत् नहि सा प्रति-जीवं भिन्ना शक्या वक्तुं तव जीवभावस्य वस्तुतत्वेन जीवस्य तद्भेदकत्वायोगात् ॥ विभेदजनकेऽज्ञानइतिवाक्येतु सत्यार्थत्वे (अ० ३ पा० २ सू० ५) "पराभिध्यानात्तु तिरोहितंततोह्यस्यबंधविपर्ययौ" वित्यत्र सूत्रकृताभगवतोभगशब्दवाच्यषड्गुणेष्वैश्वर्या-दीनां चतुर्णांतिरोभावाद्बंधोज्ञानवैराग्ययोस्तिरोभावाद्विपर्ययश्च दर्शित. ॥ तत्रापि ज्ञान-तिरोभावादहंत्वं वैराग्यतिरोभावान्ममत्वं च प्रतीयते ततएव च विशिष्टोभेदोनानात्वं प्रातीतिकं जन्यतेऽतोविभेदजनकाज्ञानपदेन बंधोविपर्ययोवोच्यते ॥ तदात्यंतिकनाशादेव च मुक्ति संभवति ॥ अतोऽविद्याया अनादित्वात्सत्व न श्रौतं नापिस्मार्तं त्वदभिमतरीतिक-भावरूपाज्ञानस्य कंठरवेण ग्राहकमेकमपि वचनंप्रस्थानत्रयेऽस्ति ॥ किंचानादिभावत्वे सांतत्वमपि न स्यादनादिभावस्यानंतत्वनियमात् ॥ वस्तुवस्तु भावपदमपि त्वादृशांतार्कि-काणां च तोषार्थं अस्मन्मतेऽभावानंगीकारेण ध्वानस्यैवाभावदनादि तदनंतमित्येव नियम. ॥ स्पष्टचेदंमार्तंडादिषु प्रागभावादयोनांगीकार्याभाव्यायत्तोखिलमित्यादौ ॥

तेनास्माकं न प्रागभावे व्यभिचार ॥ नच भेदप्रागभावस्त्वयापि वाच्यइति वाच्यं बहुत्वरूपभेदस्य जतुघृतद्रवत्ववद्गवद्धर्मत्वेन नित्यतया तस्य प्रागभावासंभवात् द्वैतस्य भ्रमत्वेन असतस्तस्योत्पत्त्यनंगीकारेण प्रागभावासंभवात् ॥ नहि रज्जौ सर्पस्याप्युत्पत्ति-रस्तिनियतकारणव्यभिचारापाताज्ञासतोविद्यतेभावइति वाक्यविरोधाच्च यच्चभावत्वंनि-रूपयितुमशक्यमित्युक्त तदप्यशक्यमेवेत्याहु ॥ अस्तीतीत्यादि ॥ अभावे स्वातंत्र्येणा-स्तित्वप्रतीतिस्तु भ्रम तस्याधिकरणानतिरिक्तत्वात् भूतलादेश्च भावत्वात् ॥ अतोस्तीति *प्रमितिविषयत्वंतत्वं स्यात् ॥ खंडनोक्तयुक्तिभिरभावस्यखंडनेऽभावप्रतियोगिकवैलक्षण्य*-स्यासंभवनिरूपणतया तत्राविद्यायां भावव्यवहारोऽप्यशक्य ॥ एवं भावत्वस्य तथात्वे भावातिगत्वमप्यशक्यमिति भवाभावातिगेत्यपि न वक्तुंशक्य ॥ तमसोभावरूपत्वे-नेति ॥ अत्रोभयथापि पदच्छेदोविवक्षित तथाच व्यवहारे भट्टनयानुसारिणस्तव तमस केवलभावत्वात्तार्किकादिमते केवलाभावत्वात्तदृष्टांतोऽसंगतः ॥ सिद्धांते तमसोमायिक-त्वेऽपि मायिकभावत्वं । तथाभ्युपगमे मन्मतप्रवेश । तेजसितमसइवब्रह्मण्यविद्यास्थिते विरोधश्चनच ॥ यदनादितदनंतमितिनियमोयत्तच्छब्दाव्याप्तत्वंकावितिशक्य । अनादि-शब्देन आविर्भूतत्वे सति पूर्वकालिकतिरोभावरहितस्य अनंतशब्देन तत्वेसत्युत्तरकालि-कतद्रहितस्य च विवक्षणात् भगतुच्छव्यावर्तनार्थं सत्यत तथाच पूर्वंतिरोहितस्येदानी-

माविर्हितस्यमेतिरोभाविनोघटादेर्घ्यावर्त्यत्वात् ॥ अतआहु. ॥ प्रलापस्त्विति तदेतत्क्षयंनित्यंजगन्मुनिवराखिलं ॥ आविर्भावतिरोभावजन्मनाशविकल्पवदित्यादिभिर्विष्णुपुराणप्रथमांशचरमाध्यायादिवचनैराविर्भावतिरोभावाभ्यांतादृशविकल्पवदित्याद्यर्थकैः जनीप्रादुर्भावेणअदर्शने इतिधात्वर्थविचारेण च यस्तुगत्याविर्भावतिरोभावावेव जन्मनाशावितिसाधयितुं तदुक्तं नाशतिरोभावभेदं परिहरति ॥ नाशस्येत्यादिना ॥ असत्वासंभवादिति ॥ नाभावोविद्यतेसतइतिवाक्यविरोधादितिभाव. ॥ नाशानुपपत्तेरिति ॥ मायाया सत्वासत्वाभ्यामनिर्वचनीयत्वस्वीकारादसत्येन नाशस्यसंभवद्ध्वसत्वेन तस्यानुपपत्तिः स्यादेव । नश्वरत्वनित्यत्वे उभे यायुगपध्यसज्येयातां इतिभावः ॥ यत्तु अन्यथा नाशत्वेनाभिमतोभेदइत्याद्युक्तं । तदसत् । द्वैतेप्रानीतिकत्वेनोत्पत्तेरिव नाशस्याप्युपचारात् प्रतियोगिनोसत्वात् सत्येनाशायोगात् ॥ उपनेत्रधारणेवर्णेषु स्थौल्यस्य प्रत्ययेतद्धारणेतेषु तदप्रत्येसत्यपि तद्धारणावसरे तेषु तदुत्पद्यते तत्परित्यागे नश्यतीति नहिकेनाप्यंगीक्रियते ॥ यच्च कूर्मस्यांगानीत्याद्युक्तं तन्निरासेतु घटादेर्नाशं व्यवहरतोऽपि गन्धपादुकान्यायेन तिरोभावं स्वीकारयंति ॥ किंचघटइत्यादिना ॥ भूतस्येति ॥ क्तप्रत्ययाद्यर्थोभूतत्व लिडर्थ परोक्षभूतत्वं ॥ नियमेनेति ॥ पतंजलिप्रभृतयो ह्युच्चारितएवशब्द प्रत्यायकोनानुच्चारितइति मन्यंतेऽतस्तथानियम. । कथमनुच्यमानंगंस्यतइत्युक्ते. ॥ स्मृतस्यचशाब्दबोधेभानाभाव सर्वसमतः । किंच तथासतिघटोनष्टइत्यादौ घटादेरभेदान्वयोपि न स्यात ॥ ध्वंसस्योत्पत्तिरपि प्रागभावध्वंसपरंपरयाऽनवस्थापादिका न शक्या वक्तुमितिदिग् ॥ किंच जन्यात्वजन्यावेत्यादिमार्तंडकारिकात्रयप्रमेयंसमर्थयते ॥ किंचमायायाइत्यादिना ॥ कारिकास्थमनादित्वमनंतत्वमितिद्रढयंति ॥ साचभगवदभिन्नेति तथाचभगवतोऽनतत्वात्साप्यनंतैव ॥ अतएव "पराऽस्यशक्तिर्विविधैवश्रूयते स्वाभाविकीज्ञानबलक्रियाच" इत्याद्या परत्वस्वाभाविकत्वादिनिरूपिका श्वेताश्वतरादिश्रुतयोऽनाकुला ॥ आत्मैवेदमित्यादिविरोधं तु पूर्वकाप्यनुद्धृत्य व्यामोहयितुं उद्धृतत्वंतस्योक्तवानितिसद्भिरनुपादेयवचन ॥

नतु मायायाभगवतोऽभिन्नत्वंनसंभवति विकल्पासहत्वात् ॥ किमिदमभिन्नत्वंतादात्म्यंभेदाभावोवा ॥ नाद्यः । आधाराधेयभावानुपपत्तेः ॥ सत्तादात्म्यनिषेधकनोसदासीदितिश्रुतिविरोधश्च । मायायाविनाशित्वेनब्रह्मणोविनाशित्वापत्तिश्च । मायायास्तिरोभावस्वीकारेचब्रह्मणोपितिरोभावप्रसंगः ॥ भेदाभावपक्षस्त्वसद्रीत्यासंभवति शुक्तिकायांकल्पितरजतभेदाभाववद्ब्रह्मणिमिथ्याभूतमायाभेदाभावस्योचितत्वादितिचेन्न ॥ मायाभगवदभिन्नैव । अभिन्नत्वंचभेदाभावः सोपिशक्तिशक्तिमतोर्भेदस्याद्दष्टत्वादात्मैवेदंसर्वमित्यादिश्रुत्याचनिश्चीयते नतुत्वदुक्तरीत्या दृष्टांतस्यैवासंभवात् कल्पितरजतभेदाभावंत्वंस्वीकुर्वताकल्पितेतिविशेषणंकुत्राभिमतं रजतेवातद्भेदेवा

आद्ये रजतस्य कल्पितत्वेपितद्भेदस्याकल्पितत्वाच्छुक्तौतदभावासत्वेनतत्सत्वकथनमसंगतं ॥ किंच शुक्तौरजतभेदासत्वेरजतस्येवशुक्तेरपिकल्पितत्वापत्त्याऽधिष्ठानज्ञानेनरजतस्येवशुक्तेरपिबाधः स्यात् ॥ नद्वितीयः । रजतवत्तद्भेदस्यापिकल्पितत्वे नेदंरजतमितिबाधस्यापिभ्रमत्वापत्तिः । अऽबाधितार्थविषयकत्वाद्रजताभिन्नाशुक्तिरितिप्रतीतेःप्रमात्वापत्तिश्च स्यात् ॥ तादात्म्यपक्षोपिनिर्दुष्टः तादात्म्यंचस्ववृत्त्यसाधारणोधर्मः सचमायाशक्तिरूपः ब्रह्मभिन्नेऽसत्वात् ॥ आधाराधेयभावस्त्वऽभावस्याधिकरणात्मकत्वेपिभवन्मतेयथासंभवतितथैवास्मन्मतेशक्तिशक्तिमतोरप्युपपद्यते ॥ द्वितीयदोषस्तु मायायाविनाशित्वानंगीकारेणैवनिरस्तः ॥ श्रुतिविरोधोपिनास्मन्मते भगवच्छक्तेरसत्वानंगीकारात् ॥ किंतुत्वन्मतएवविरोधः संभवति मायायाःसद्विलक्षणत्वस्वीकारेणासत्वस्यदुर्वारत्वात् ॥ मायायास्तिरोभावेपिब्रह्मणस्तिरोभावोनसंभवति घटतिरोभावेपिमृदस्तिरोभावासंभवात् ॥ अतएव शक्तिशक्तिमतोर्भेदाभेदोयःसनबाधकइत्यादिशुद्धाद्वैतमार्तंडोक्तमपिसंगच्छते ॥ अतएव "प्रकाशाश्रयवद्वातेजसत्वा" दितिसूत्रेअरूपवदेवहितत्प्रधानत्वा" दितिसूत्रेचब्रह्मधर्म्माणांब्रह्मत्वंप्रतिपादयताव्यासेन मायाया अपिब्रह्मत्वंप्रतिपादितं ॥ एतेन जडत्वे दृष्टापत्तिर्भेदाभेदस्याबाधकत्वायोगइत्याद्युद्भावनं निरस्तं ॥ यथाचैतत् तथैतयोःसूत्रयोर्व्याख्यानेस्फुटीभविष्यति ॥ तत्सर्वंचतुर्थश्लोकखंडनावसरेवक्ष्यते ॥

सहस्राक्षे यत्तु मायासंबंधेत्यादिं वर्णयिष्यामइत्यंतं भागंनिराकुर्वंति ॥ ननुमायायाइत्यादिना । खंडनावसरेवक्ष्यतइत्यंतेन ॥ अत्र पूर्वपक्षे कथंचित्तादात्म्यंसर्वंभावेतिविकल्पस्य निस्सारत्वाल्लोकेद्विविधतादात्म्यस्य क्वाप्यभ्युपगमाभावात् तादात्म्यंभेदाभावोवेत्येवविकल्पोऽनूदितः ॥ कथंचित्तादात्म्यं च नैवांगीक्रियतइति तत्र भेदो नचैवास्तीत्युक्तेर्नविरोधः ॥ समाधत्ते ॥ मायाभगवदभिन्नेत्यादिना ॥ अत्रभेदाभावपक्षोमुख्यः । तादात्म्यपक्षस्तु मध्यमाधिकारिबोधनाय । ततो मुख्यत्वाद्भेदाभावएवादावुच्यते ॥ शक्तिशक्तिमतोर्भेदोलोके न दृष्टः ॥ नहि वन्हेर्दाहकताशक्तिः पुरुषात्तद्वद्भिन्नवन्हितः

यत्तु मायासंबन्धरहितमितिश्लोकटीकायामस्याभगवतोऽभिन्नत्वमुक्तम् ॥ तन्नब्रूमः ॥ किमिदमभिन्नत्वं तादात्म्यं भेदाभावोवा ॥ आद्येऽपि कथंचित् सर्वथावा ॥ नतावदाद्यः ॥ तत्रभेदोनचैवेत्यादिवत्सिद्धान्तविरोधात् ॥ न द्वितीयः ॥ शक्तिः शक्तिमानिति व्यवहारलोपप्रसङ्गात् ॥ सत्तादात्म्यनिषेधकनोसदासीदितिश्रुतिविरोधाच्च ॥ मायायाविनाशित्वस्योक्तत्वेन तदभिन्नस्य ब्रह्मणोविनाशित्वापत्तेश्च विभेदजनकेज्ञानेनाशमात्यन्तिकंगते इत्यत्राऽऽत्यन्तना-

पृथक्कर्तुं शक्यते । नापि वह्निस्वरूपातिरिक्ततत्स्वरूपं किंचिदुपलभ्यतेयश्चोत्तेजकसमवधानमण्यादिसमवधानयोस्तदाविर्भावतिरोभावाभ्यां शक्तेर्भेदोदर्श्यते सोपि तत्तच्छक्तिपदाभिधेयं वन्ह्यादेर्दाहाद्यनुकूलस्वरूपविशेषं बोधयितुमेव नतु वह्नित्वाद्यवच्छिन्नप्रतियोगिताकभेदवत्पदार्थान्साधयितुं ॥ तार्किकास्तु शक्तिसादृश्यादेः पदार्थान्तरत्वमरोचयंतउत्तेजकाभावविशिष्टमण्यभावविशिष्टवन्ह्यादिकमेव दाहादिकं प्रति कारणं मन्यंते ।

शक्तिवादिनस्तु गौरवमनादृत्य पूर्वंबोधनायभेदमुपपाद्यवस्तुतस्तत्तत्कार्यानुकूलं तत्तत्स्वरूपविशेषमेव प्रदर्शयंति ॥ एवंवेदेऽपि "यःसर्वज्ञःसर्वशक्तिः ॥ पराऽस्यशक्तिः" इत्यादौभेदप्रदर्शनंजिज्ञासुबोधनायैव । वस्तुतस्तु राहोःशिरइत्यादिवदभेदः ॥ वह्नितस्तच्छक्तेर्भेदद्दुराग्रहे धर्माणामप्यत्यंतभेदाऽऽपत्यातार्किकनयवदात्मधर्मोज्ञानमानंदश्चात्मातिरिक्तएवेत्यापद्येत ॥ एतदेवानुसंधाय मार्तंडेभेदोयोबोधनायसइत्युक्तं ॥ ब्रह्मशक्तयस्तु वस्तुतःसर्वथाब्रह्माभिन्नाएव "इदंसर्वंयदयमात्मा पुरुषएवेदꣳसर्वं" इत्यादिश्रुतिभ्यः "मनसैवेदमाप्तव्यंनेहनानास्तिकिंचन" त्यादिश्रुतिभ्यश्च "सर्वकामःसर्वगंधइति ॥ सर्वशक्ति" रित्येवमादिषु ब्रह्मधर्माणांतच्छक्तीनांचभेदेनैवनिर्देशेऽपि इह ब्रह्मणि किंचन शक्तिधर्मादिकं नानाब्रह्मभिन्नं नास्तीतितदर्थः ॥ अग्रेच "मृत्योःसमृत्युंगच्छति यइहनानेवपश्यति" इतिब्रह्मणितच्छक्त्यादिकं ब्रह्मभिन्नंपश्यतोदुष्फलंश्रूयते ॥ अभिन्नत्वादेव बलंबलवतांचाहं धर्माविरुद्धोभूतेषुकामोस्मि पुण्योगंधःपृथिव्यांचेत्यादिभगवद्वाक्यंबलंचशक्तिः ॥ विशेषतस्त्वयमर्थश्चतुर्थश्लोकखंडने वक्ष्यते ॥ किंच पूर्वं त्वयाविशेषतआदृतेकौर्मे एव पूर्वखंडे द्वादशाध्याये सिद्धांतरीत्यैव सकलेशशक्तिस्वरूपं तस्याःशक्तिमदभेदादिकं च विस्तरेणप्रतिपाद्यते ॥ तद्यथा ॥ तत्रारंभएव शक्तिस्वरूपमुपक्रम्य शिवासर्वगतानंतागुणातीतातुनिष्कला एकानेकविभागस्था ज्ञानरूपातिलालसा एवंनानाविभागस्थेतिकथितत्वात्ः ॥ अनन्यानिष्कलेतत्त्वेसंस्थितातस्यतेजसांस्वाभाविकीचतन्मूलाप्रभा भानोरिवामला एकामाहेश्वरीशक्तिरनेकोपाधियोगतः परावरेणरूपेण क्रीडते तस्य सन्निधौ सेयंकरोतिसकलंतस्याःकार्यमिदंजगत् नकार्यंनापिकरणमीश्वरस्येति सूरयः । चतस्रःशक्तयोदिव्याः स्वरूपत्वे न संस्थिता ।अधिष्ठानवशात्तस्याः शृणुध्वंमुनिपुंगवाः। शांतिर्विद्याप्रतिष्ठाचनि-

---

शेन तिरोभावग्रहणे प्रमाणाभावाच्च ॥ मायायान तिरोभावोक्तिसम्भवः किंत्वेवमप्यनिस्तारोब्रह्मणोऽपि तिरोभावप्रसङ्गात् ॥ भेदाभावपक्षस्त्विष्टएव ॥ शुक्तिकायां कल्पितरजतभेदाऽभावसत्त्वात् ब्रह्मणि मिथ्याभूतमायाभेदाऽभावस्योचितत्वात् ॥ एतेन शक्तिशक्तिमतोर्भेदाभेदोय सनबाधकः ॥ तथभेदोनचैवास्तिशक्तेर्ब्रह्मत्वनिश्चयात् ॥ भिन्नत्वेतुजडत्वंस्यादिति ॥ धर्मधर्मिविचारेऽपिज्ञेयमेवंविचक्षणैः ॥ प्रकाशाऽऽश्रयदृष्टान्तेऽप्यभेदोबोध्यते किल ॥ अरूपवत्सूत्रवाक्येधर्माणामपिब्रह्मता ॥ निरूपिताप्रभुवरैः श्रीविद्वन्मण्डनेस्फुटम् इति प्रत्युक्तम् ॥ भेदस्याप्रमतत्वे भेदाभेदस्यानाधकत्वायोगात् ॥ उत्तरार्द्धेनविरोधाच्च जडतायाइष्टत्वाच्च ॥ अतएव किन्तुतमइतिश्रुत्युक्तंसंगच्छते ॥ प्रकाशाश्रयवद्वाऽरूपवदेवेत्यनयोः सूत्रयोस्तु तात्पर्यं चतुर्थश्लोकव्याख्यायां वर्णयिष्यामः ॥

धृतिश्चेतिताःस्मृताः चतुर्व्यूहस्ततोदेवः प्रोच्यतेपरमेश्वरः अनया परयादेवः स्वात्मानंदं-समश्नुते चतुर्ध्वपिचवेदेषु चतुर्मूर्तिर्महेश्वरः अस्यास्त्वनादिसंसिद्धमैश्वर्यमतुलंमहदित्या-द्युक्त्वा (श्लो० १५) प्रोच्यतेभगवान्कालोहरिःप्राणोमहेश्वरः तत्रसर्वमिदंप्रोतमोतंचैवा-खिलंजगदित्यादिना एकस्यैव परमेश्वरस्यनानाशब्दवाच्यतां कालस्वरूपत्वं सर्वकारणतां च निर्णीय (श्लो० १९) तस्यसर्वजगत्सूतिः शक्तिमायेतिविश्रुता तयेदंभ्रामयेदीशोमाया-वीपुरुषोत्तमः सैषामायात्मिकाशक्तिः सर्वाकारासनातनी विश्वरूपंमहेशस्य सर्वदासंप्रकाश-येत् अन्याश्चशक्तयोमुख्यास्तस्यदेवस्यनिर्मिताः ज्ञानशक्तिःक्रियाशक्तिः प्राणशक्तिरितित्रयं सर्वासामेवशक्तीनां शक्तिमंतोविनिर्मिताः माययैवाथविप्रेंद्राः साचानादिरनश्वरा सर्वश-क्त्यात्मिकामायादुर्निवारादुरत्यया मायावीसर्वशक्तीशः कालः कालकरः प्रभुः करोतिकालः सकलं संहरेत् कालएवहि कालः स्थापयते विश्वंकालाधीनमिदंजगदित्यादि कथयित्वा (श्लो० २७) एकाशक्तिः शिवैकोपि शक्तिमानुच्यते शिवः शक्तयः शक्तिमंतोन्ये सर्वशक्तिसमुद्भवाः शक्तिशक्तिमतोर्भेदं वदंतिपरमार्थतः अभेदंचानुपश्यंति योगिनस्तत्त्व-चिंतकाः शक्तयोगिरिजादेवशक्ति मन्तोथशंकरः विशेषः कथ्यतेचायं पुराणेब्रह्मवादिभिः भोग्याविश्वेश्वरीदेवी महेश्वरपतिव्रता प्रोच्यते भगवान् भोक्ताकपर्दीनीललोहितः मंताविश्वेश्वरोदेवः शंकरोमन्मथांतकः प्रोच्यते मतिरीशानी मंतव्याचविचारतः इत्येतदखिलं विप्राः शक्तिशक्तसमुद्भवं प्रोच्यतेसर्ववेदेषु मुनिभिस्तत्त्वदर्शिभिरित्युक्तम् ॥ अत्र "परा-ऽस्यशक्तिर्विविधैवश्रूयते स्वाभाविकीज्ञान बलक्रियाच" इतिश्वेताश्वतरश्रुतेरर्थोविस्त-रेणोपबृंहितः ॥ "नतस्यकार्यंकरणं च विद्यते" इतितत्पूर्वार्द्धस्यार्थोपि न कार्यनापिकारण-मित्यादिनासारितः ॥ अग्रेचमायायाः स्वाभाविकत्वादकल्पितत्वं स्फुटतयाऽनाद्यनंतत्वा-त्सन्मात्ररूपत्वं च बोधयित्वा लोकेया याःशक्तयस्तास्ता.सर्वाअपिपरमेश्वरशक्त्यंशभूताः येयेचशक्तिमंतस्तेतेसर्वेपिपरमेश्वरांशभूताएव इतिदर्शयित्वा भानुतत्प्रभयोरिवाजस्त्वेनेव-शक्तिशक्तिमतोरभेदोवर्णितःशक्तिमतोर्भेदमित्यादिना ॥ अर्थस्तु शक्तिशक्तिमतोर्भेदं-वदंति वाग्व्यवहारएवैतयोर्भेदइतिभावः योगिनस्तु परमार्थतस्तयोरभेदमेवसिद्धमनुप-श्यंति चोऽवधारणे यतस्तेतत्त्वचिंतकाअभ्रांताः इतिज्ञेयः ॥ पुरतश्चाभेदेपि नित्यलीला-निर्वाहकं शक्तिशक्तिमतोर्भोग्यभोक्तृभावादिकं व्याख्यातं ॥ नचेदंशैवतत्त्वमेवेतिभ्रमितव्यं पुराणेपुतैस्तैर्विष्णुशिवादिशब्दैस्तैस्तैः स्वरूपैश्चपरमेश्वरएववर्णितइतिसिद्धांतात् ॥ "एकंस-द्विप्राबहुधावदंति" इत्यादिश्रुतिभ्यः । योयोयांयांतनुंभक्तः येप्यन्यदेवताभक्ताः इत्यादि-स्मृतिभ्यः ॥ सर्वदेवनमस्कारः त्वामेवान्येशिवोक्तेनमार्गेणशिवरूपिणमित्यादिपुराणवचो-भ्यश्च ॥ अतएवेह हरिः प्राणोमहेश्वरः मायावीपुरुषोत्तमइत्याद्युच्यते ॥ अग्रेपि (श्लोक ५८) मांविद्धिपरमांशक्तिंमहेश्वरसमाश्रयाम् अनन्यामव्ययामेकांयांपश्यंतिमुमुक्षवः अहंवैसर्वभूतानामात्मासर्वांतराशिवेत्यादिना तथैवशक्तिस्वरूपमभिहितं ॥ एकांशक्तिमद-भिन्नांपश्यंतीत्यर्थः ॥ हिमवदुक्तनामसहस्रेच तथैवतत्प्रपंचितं ॥ ततःपरमपि (श्लो० २०६) वदंतिकेचित्त्वामेवप्रकृतिंप्रकृतेः परामितिप्रकृतिरूपतां (श्लो० २०७) अविद्या नियतिर्माया कलाद्याःशतशोऽभवन्नितिनानारूपतांचोक्त्वा (श्लो० २०८) त्वंहिसा-

परमाशक्तिरनंतापरमेष्ठिनी सर्वभेदविनिर्मुक्तासर्वभेदाश्रयाश्रया त्वामधिष्ठाययोगेशिमहादेवोमहेश्वरः प्रधानाद्यंजगत्सर्वंकरोतिविकरोति च त्वामेवसंगतोदेवः स्वात्मानंदं समश्नुते त्वमेवपरमानंदस्त्वमेवानंददायिनी त्वमक्षरंपरंव्योममहज्ज्योतिर्निरंजनं शिवंसर्वगतंसूक्ष्मं परंब्रह्मसनातनमित्यादिना तदेवसिद्धांतितम् ॥ अत्रापि सर्वभेदविनिर्मुक्तेत्यभेदः सर्वभेदाश्रयाश्रयेतिघटादिषुभूगंधस्येवभेदाश्रयेषुकार्येषु परशक्तेरेवांशतोऽनुवर्तनंचनिर्णीयते ॥ एवं श्रुतिस्मृतिपुराणेषुतयोरभेदादिकंसिद्धमेव ॥ वचनांतराणिचातिविस्तरभयान्नलिख्यंते तदेतत्सर्वमनुसंधायोक्तकारिकासुतत्रभेदोनचवास्तीति ॥ तत्र ब्रह्मणिभेदः स्वशक्तिधर्मादिप्रतियोगिकइत्यर्थः ॥ एवं स्वाभिमतंभेदाभावं साधयित्वा तदभिमतं तं दूषयंति ॥ नतुत्वदुक्तेति ॥ अत्रभेदाभावेस्वीक्रियमाणे तदनन्यत्वसूत्रविवेचनावसरे दर्शितचरदिशा तयोरभेदएव सिध्यतीति ब्रह्माभिन्नायास्तस्याः कल्पितत्वमशक्यकल्पनं ॥ दृष्टांत उक्तदूषणानि च दार्ष्टांतिके ज्ञेयानि ॥ तद्यथा कल्पितमायाभेदाभावो ब्रह्मणीति चेत्कल्पितत्वं मायाया विशेषणं तद्भेदस्य वा ॥ आद्येभेदस्याकल्पितस्य ब्रह्मणिसत्वात्तदभावकथनव्याघातः कल्पितमायाभेदाभावे च ब्रह्मणोऽपि कल्पितत्वप्रसंगो जडत्वप्रसंगश्च तथाच ज्ञानेन माययासह ब्रह्मणोऽपिबाध. ॥ द्वितीयेब्रह्म न जडमायेतिमायाबाधग्रहस्य रजततुल्यभेदावगाहितयाभ्रमत्वमापद्येत जडमायाऽभिन्नं ब्रह्मेतिज्ञानस्याबाधितार्थविषयत्वात्प्रमात्वं च प्रसज्येत तथाच सतिश्रुतिस्मृतिसूत्रपुराणसंमतं ब्रह्मतच्छक्त्यभेदमेव प्रमितंस्वीकुरु ॥ किंच मायायाः कल्पितत्वे पूर्वोक्तमनादित्वं न घटेतयत्कल्पितं तत्सादीति व्याप्तेःशुक्तिरजतादौ गृहीतत्वात् ॥ किंचकल्पितत्वे कल्पनसाधनमिंद्रियादिकं बुद्धिमात्रं वापेक्षितं ॥ विपर्यासस्यबुद्धिवृत्तित्वात् ॥ संशयोथविपर्यासइति तृतीयस्कंधवाक्यात् ॥ तच्चत्वन्मते मायिकमित्यन्योन्याश्रयः ॥ नापिकल्पकः कश्चिदुपपद्यते ॥ ब्रह्मणस्तत्वेभ्रांतत्वस्य जीवस्यतत्वन्योन्याश्रयस्य चापत्तेःप्रागुक्तत्वात् ॥ मध्यमाधिकारिबोधार्थकं तादात्म्यपक्षमपि साधयंतस्तदुक्तदोषानुद्धरंति ॥ तादात्म्यपक्षइति ॥ असत्त्वादित्यसाधारणधर्मत्वेहेतुः ॥ अभावस्याधिकरणात्मकत्वेपि तव मायाभेदाभाववद्ब्रह्म प्रपंचभेदाभावाद्ब्रह्मेत्यादिव्यवहारवत्शक्तिःशक्तिमानिति व्यवहारस्तद्वदेवाधाराधेयभावव्यवहारश्चतादात्म्येपि न विलुप्येत ॥ अभावस्य भिन्नत्वेतु नित्यद्वैतापत्तिः पूर्वमविद्यायाअनंतरंतद्ध्वंसस्य च सत्वात् ॥ एतेन शक्तिःशक्तिमानितिव्यवहारलोपप्रसंगादिति प्रत्युक्तम् ॥ किंतु तवैव तल्लोपप्रसंगः ॥ तत्रकल्पितायास्तच्छक्तिरनायोगात् ॥ नहिवह्नौदाहशक्तिरारोप्यते ॥ रज्जौसर्पकल्पनेपिनदंशशक्तेरज्जुशक्तित्वंविद्भिःस्वीक्रियते ॥ ब्रह्मशक्तित्वमपिकल्पितमितिचेद्वस्तुतःकस्यशक्तिः सा मायाब्रह्मशक्तितया कल्प्यतइति निर्धार्यताम् ॥ यच्च (सत्तादात्म्यनिषेधकनोसदासीदितिश्रुतिविरोधा) दित्युक्तं तत्रासमस्तपदांतरव्यवहितनिषेधकपदस्यसमासोऽसंभवः ॥ श्रुतिस्तु सृष्टेःप्राक्स्थूलसूक्ष्मयोर्ब्रह्मातिरिक्ततयासत्तामेवानिषेधति ननुमायायाःसत्तादात्म्यमसत्तादात्म्यंवा ॥ तस्यामृचिमायायाश्चपदाभावात् ॥ त्वदुदाहृतविलक्षणपाठेपि किंतुना व्यवहितस्यतमसःपूर्वापरयेऽन्वयासंभवात् ॥ किंच तत्रसत्पदेन ब्रह्मणःपरिग्रहेतदाब्रह्मणोप्यभावप्रसंगः ॥ अपरिग्रहेशक्तेर्ब्रह्मतादात्म्येस्वीक्रियमाणेऽस्याः

श्रुते.र्काप्रसक्तिः ॥ यच्च मायायाविनाशि त्वस्येत्यादि तन्नु भगवच्छक्तेर्विनाशानंगीकारादेवनिरस्तंअन्यथा "अनुच्छित्तिधर्मा" स्यादिश्रुतीनांसाचानादिरनश्वरेत्यादिस्फुटतरकौर्मादिस्मृतीनांचविरोधापातात् ॥ विभेदजनकइतिवाक्यंतु व्याख्यातम् ॥ यच्च ब्रह्मणोपितिरोभावप्रसंगादितितन्नभगवच्छक्त्याप्रत्यायितस्याद्वैतममतारूपसंसारस्यैव निवृत्तिर्भगवच्छक्तेस्तुननाशोनापितिरोभावइतिसिद्धांतात् ॥ यथैंद्रजालिकेप्रसन्नेतद्दर्शितोभयजनकःसिंहसमुद्रादिरेवनिवर्तते नतुतस्यशक्तिः ॥ अथतिरोभावस्वीकारेपिनदोषः ॥ मृद्घटयोस्तादात्म्येपि घटतिरोभावेमृदस्तिरोभावात् ॥ नाप्यूर्मिकूर्मचरणादितिरोभावेऊर्मिमालिकूर्मादिस्तिरोधत्ते ॥ तनभामत्यागुणानांद्रव्यात्मकत्वप्रपंचनेऽपितत्तद्गुणनांनाशेतिरोभावेवानतद्द्रव्यंनश्यतितिरोभवतिवा ॥ अधिकंतुचतुर्थश्लोकखंडनादौप्रत्याश्नसरं ॥ तदेतदखिलमभिसंधायाहुः ॥ आधाराधेयभावस्त्वित्यादिना ॥ एतेन शक्तिशक्तिमतोरित्यादिमार्तंडकारिकाःसमर्थिताः । यत्तभेदस्यासंमतत्वइत्यादितन्नु तदर्थानवबोधात् ॥ तथाहिभेदाभेदपक्षोमतभेदेनद्विविधः ॥ भेदोवास्तवः अभेदस्त्वारोपितइत्येकः । यथानिंबार्कानां ॥ भेदआरोपितोऽभेदस्तुवास्तवएवेतीतरः ॥ तत्रप्रकृते द्वितीयभेदाभेदस्यैवशुद्धाद्वैताबाधकत्वमिष्यतेभेदस्यारोपितत्वात् अभेदस्यैववास्तवत्वाच्च ॥ तदेवोपपादयितुंकारिकासूच्यते तत्रभेदइत्यादि ॥ ब्रह्मणिस्वशक्तिधर्मादिप्रतियोगिकभेदोनैवास्तिसर्वधर्माश्रयत्वप्रतिपादकाद्वैतप्रतिपादकश्रुत्योस्तथैवाविरोधसिद्धेः ॥ उक्तादिप्रमाणैर्ब्रह्मशक्तेर्ब्रह्मत्वस्य निश्चयाच्च ॥ अतएवपराशेपरिदृश्यस्यशक्तिर्विविधैवेत्यत्रपरत्वमुच्यते शक्तिरित्येकत्वंप्रदर्श्यतस्याएववैविध्यंचावधार्यते ब्रह्मणएकत्वात् ॥ लोकदृष्ट्यातुशक्तय.परस्परभिन्नाइवभवेयुः ॥ यदिचब्रह्मशक्तिस्ततोभिन्नास्यात्तर्हिजडत्वंतस्याआपद्येत तथाचाक्रूरादीनांचेतनमूर्तिमच्छक्त्यादिनिषेवितभगवद्दर्शनेनोपपद्येत श्रौतंपरत्वंचबाध्येत ॥ नचजीवशक्तित उत्कृष्टत्वमेवपरत्वमिहकल्प्यं अश्रौतत्वात् श्रुतिषुब्रह्मविदाप्नोतिपरमित्यादौ परशब्दस्यब्रह्मणिसुप्रसिद्धत्वात् जीवेनैवकल्पितत्वयाऽभिप्रेयमाणायांतस्यांजीवशक्तितउत्कर्षस्यवक्तुमशक्यत्वाच्च ॥ श्रौतंस्वाभाविकीतिकथनंतुपीड्येतैव ॥ अतउक्तंभिन्नत्वेतुजडत्वंस्यादिति ॥

एतेनजडतायाइष्टत्वाश्चेविप्रयुक्तंउक्तचरकौर्मादिविरोधाच्च ॥ यच्चपराऽस्येत्यादौभेद.स्वबोधनाय ॥ लोकानुरोधिनोजिज्ञासोर्बोधसौकर्यार्थं राहोःशिरः आनंदंब्रह्मणः यस्यज्ञानमयंतपइत्यादिवदारोपितएवेत्यर्थः ॥ एवं अनेनप्रकारेण धर्मिधर्मविचारेऽपिज्ञेयं ॥ ब्रह्मणितद्धर्मभेदोनैवास्ति नेहनानास्तीत्यादिनातेषांब्रह्मत्वनिश्चयात् भिन्नत्वेतु तज्ज्ञानादीनांजडत्वापातोनित्यत्वादद्वैतश्रुतिव्याघातश्च तस्यभासेत्यादौभेदस्तुसूर्यादिदृष्टांतेन बोधनायैवेतिभावः ॥ अतोवास्तवभेदस्यासंमतत्वेऽपिभेदाभेदस्याबाधकत्वमबाधितं नाप्युत्तरार्द्धविरोधः ॥ किंतुतमइत्यादिकल्पनंतुप्रत्युक्तंप्राक्भेदाभेदांगीकारप्रयोजनंतु मध्यमाधिकारिबोधरूपंतत्रैव तत्रोत्तमामध्यमाश्चकनिष्ठाद्यधिकारिणःतेषांप्रतीतिप्रथमस्कंधेतुश्रीहुताशनैः इदंहिविश्वमित्यत्रसुबोधिन्यांनिरूपितेत्यादिना प्रतीतित्रयंनिरूप्य अतोहिमध्यमःपक्ष.शुद्धाद्वैतानुरोधतः बोधायबहुसदर्मेगोस्वामिपुरुषोत्तमैः श्रीमदाचार्यचरणैर्यत्रक्वापिदर्शितइत्युक्तमेवेतिसकलमनाकुलं प्रकाशाश्रयसूत्रमरूपयत्सूत्रंचपुरस्ताद्व्याख्यास्यामः ॥

यस्तु मायाचाविद्याचस्वयमेवभवतीत्यादिनामायाविद्ययोरभेदउक्तः सोपि नसंभवति मायाया भगवच्छक्तिरूपत्वात् ॥ अविद्याचजीवनिष्ठादेहादावहंबुद्धिहेतुर्ज्ञानशक्तितिरोभावरूपा ॥ (इयंचमायाविद्याशब्देनव्यवह्रियत) इतिवदताचमायाविद्याशब्दयोःपर्य्यायत्वमुक्तं तच्चत्वन्मतेपिनसंभवति जीवेश्वरयोस्त्वन्मतउपाधिकृतएवभेदःसचोपाध्यैक्ये न संभवति मायाविद्ययोरैक्येजीवस्यसर्वेशत्वमीश्वरस्याल्पज्ञत्वमपिस्यात् ॥ एवंचमायायाअसिद्धौजगतोमायिकत्वंनसंभवति । किंतुवास्तवत्वमेव ॥ तत्कारणत्वमपिब्रह्मणिनास्तिमायिकंकिंतुवास्तवं अतएवोक्तं उत्पत्तिस्थितिनाशानांजगतःकर्तृवैबृहत् वेदेनबोधितंतद्धिनान्यथाभवितुंक्षमं नहिश्रुतिविरोधोस्तिकल्पोपिन विरुध्यते सर्वभावसमर्थत्वादचिंत्यैश्वर्यवद्बृहत् ॥ जगत्कर्तृत्वमीश्वरस्यवेदेनबोध्यते ॥ नचतदारोपितमितिशक्यवचनं निरंकुशस्यतस्यान्यत्रासिद्धतायास्स्वयमेववक्ष्यमाणत्वात् किंचवेदःपरमाप्तः अक्षरमात्रमपिमिथ्यानवदति ॥ यदिकापिवदेत् स्वर्गकामोयजेतेत्यादिविध्यंशेस्वरूपलक्षणाद्यंशेचाविश्वसनीयः स्यात् । ततश्चसन्मार्गमात्रमुच्छिद्येत ॥ अतोयद्यथावदतितत्तथेतिमंतव्यं । तेनकर्तृत्वंवेदोक्तत्वाद्वास्तवमेव सिध्यति ॥ नचकर्तृत्वांगीकारेस्वरूपलक्षणविरोधोयेनतदनुरोधादवास्तवंकल्प्येत । तस्मादुक्तसत्वादिधर्मवत्कर्तृत्वस्याप्युपपत्तिः ॥ नचब्रह्मयावद्धर्मरहितमितिवक्तुंशक्यं । स्वरूपलक्षणविरोधात् ॥ तत्रब्रह्मणिसत्यत्वादीनांस्वीकृतत्वात् ॥ नच तेषामसत्यजडसांतत्वव्यावृत्त्यर्थत्वमेवेतिवाच्यं सत्यत्वादिनाब्रह्मणोऽप्रतीत्यापत्तेः तत्तद्भेदधर्मित्वसिद्ध्याचघटकुटीप्रभातन्यायआपद्येत ॥ ननुलक्षणद्वयस्यैकपरत्वे सर्वासुश्रुतिष्वेकमेवब्रह्मप्रतिपाद्यंतदा अस्थूलादिवाक्येष्वर्पितदेवनिरूप्यतइतिनिर्गुणत्वंबलादापतितमितिचेन्न ॥ नह्यस्थूलादिवाक्यैरलौकिकधर्माःप्रतिषिध्यंते किंतुलोकप्रतीताएवं प्रतीतमेवप्रतिषिध्यतेनाप्रतीतं प्रसंजयितुमशक्यत्वेन प्रतिषेधानर्हत्वात् ॥ नापिश्रुतिप्रतीताःतुल्यबलत्वात् ॥ यद्युक्तासत्यत्वादयोपिधर्मालौकिकत्वेनाद्दतास्तदालौकिकश्रुतिप्रतीतसाधारण्येनसर्वैनिषेधेब्रह्मा ज्ञानमेवप्रसज्येत तथाचस्वरूपलक्षणमपिव्यर्थंस्यात् ॥ यदिचलौकिकत्वेपिश्रौतत्वेन कारणगतंसत्यत्वंप्रतिषिध्यतइत्युच्यते तदाधर्मसंकोचस्यावश्यकत्वेन कर्तृत्वमपितथास्तुतस्यापिश्रौतत्वात् ॥ ननुसत्यस्यलौकिकत्वेपिव्यावहारिकस्यैवतस्य लौकिकत्वं पारमार्थिकंत्वलौकिकमेवेतितन्ननिषिध्यत

इति चेत् कर्तृत्वमपिलौकिकमेवनिषिध्यते अनेकभूतभौतिकदेवतिर्यङ्मनुष्यानेकलोकाद्भुतरचनायुक्तब्रह्मांडकोटिरूपस्यप्रपंचस्यमनसाप्याकलयितुमशक्यरचनस्यानायासेनोत्पत्तिस्थितिभंगकरणंनलौकिकमतस्तदपिननिषिध्यतइत्येवांगीकरणीयं ॥ नचाऽगत्यासत्यत्वंतथास्तुकर्तृत्वंत्वारोपितमेवेतिवाच्यं तस्याप्यारोपितस्यवक्तुंशक्यत्वेनागतेरभावात्तस्माद्ब्रह्मणिवेदबोधितंकर्तृत्वंवास्तवमेव ॥ ब्रह्मणःसकलविरुद्धधर्माश्रयत्वस्यवेदबोधितत्वात्कर्तृत्वेनिर्विकारत्वंसंभवत्येव ॥ वास्तवकर्तृत्वमपियत्रननिर्विकारत्वासंगत्वयोर्हानिकरं मायिकंतत्करिष्यतिशंकादूरतएवापास्ता ॥ अतएव तदुत्तरंयदुक्तंमाययासिंहादिभूतस्यैंद्रजालिकस्येत्यादि तदप्यसदसंमतत्वादुपेक्ष्यं ॥ मायायाएवासंभवेनसंसारस्यमायिकत्वाऽसंभवात्किंनपश्यसि संसारमित्याद्यसंगतमेव ॥

सहस्राक्षे इयंचमायेत्यादिंपरस्यलक्षणमिदमितीत्यंतं भागं निरस्यंति यत्तु मायाचाविद्येत्यादिना सारमित्याद्यसंगतमेवेत्यंतेन ॥ अत्रेदंज्ञेयं–यत्तु"मायाचाविद्याचस्वयमेवभवती" तिनृसिंहोत्तरतापनीयनवमखंडवाक्यमुक्तं तत्तुब्रह्मैवस्वयमितरानपेक्षगुणमयमायारूपंचाविद्यारूपंचभवतीत्यर्थकं ॥ अतइदमपि मायायाब्रह्माभिन्नत्वेप्रमाणं मायैवाविद्याभवतीत्यर्थेतु चकारद्वयवैयर्थ्यंस्यात् ॥ अतएव तत्रोपसंहारे "कैषानुहेति एषएवात्मेतिहोवाच" इतितस्याअप्यात्मरूपत्वमेव श्रावितम् ॥ कैषेतिपाठेविष्णुर्द्ववशरीरिणां बन्धमोक्षकरीआद्येमायायामेविनिर्मिते इत्येकादशेमायायाकार्यद्वयस्मरणान्मायैवाविद्याभवतीत्यर्थोद्देरेऽपि मायायाभगवद्रूपत्वंनिर्बाधमेवोक्तश्रुतेस्तसैमायात्मनेनमइतिस्मृतेश्च प्रकाशाश्रयन्यायेनशक्तिशक्तिमतोरभेदाच्च ॥ शक्तितातु "देवात्मशक्तिंस्वगुणैर्निगूढां" इत्यादि बहुतरश्वेताश्वतरप्रभृतिश्रुतिपुप्रकृवतापनीयखंडेचाम्नातैव मुंडके "कर्तारमीशंपुरुषंब्रह्मयोनिं" एकादशस्यचतुर्विंशाध्यायेद्विधासमभवद्बृहत् एवमादिश्रुतिपुराणेषुचगुणमयमायायाः स्पष्टंब्रह्मपरिणामताबोध्यते ॥ सामायायाःकार्यरूपाऽविद्याचजीवस्यैवोपाधिर्नतुब्रह्मणितत्संबंधः शरीरिणांबंधमोक्षकरी इति स्मरणात् तत्रैवएकस्यैवममांशस्यजीवस्यैवमहाते बंधोस्याऽविद्ययाऽनादिरित्यवधारणस्मरणाच्च ॥ प्रकृतेऽपि "नाविद्यानुभवात्मनिस्वप्रकाशेसर्वसाक्षिण्यविक्रियेऽद्वये" इतिब्रह्मणिसाप्रतिषिध्यते ॥ पूर्वमपि तत्र "अभव्यंजिकानित्यनिवृत्ते" तिपरमात्मनः सकाशात्तस्यानित्यमेवनिवृत्तत्वंश्राव्यते ॥ स्मृतावपिप्रथमएवकारोअवांतर्यामिरूपांशान्तरयोर्द्वितीयोब्रह्मणश्चतद्योगंव्यवच्छिनत्ति ॥ तेन (अविद्याख्यमायावशाद्विच्छेदवोहेतुकत्वंयोध) इत्युक्तिःप्रयुक्ता ॥ तत्रहिखंडे विषयतारूपस्यांतरासर्गस्यवाविद्याहेतुकत्वं बोध्यते, नतुभगवत्परिणामस्यवास्तवप्रपंचस्य ॥ तस्मात्तुप्रस्तुतभगवद्योनिकत्वं सत्यत्वंचतत्रापिनिरूप्यतएव ॥ वास्तवप्रपंचाद्विषयतारूपजगतोऽन्यत्वंमायिकत्वंचश्रीमदाचार्यचरणैःसुबोधिन्यां कृतेथंयदप्रतीयेत अनुमितमंतराल-

यिविभातिमृपैकरसे इत्यादिस्थलेपुप्रपंचितं । प्रकृतसंदेहारंभेजीवस्यैवोंकारवाच्यात्मत्वेनो-
पदेशेदेवैःप्रार्थित प्रजापतिस्तथेतिस्वीकृत्य "उपद्रष्टानुमंतैपआत्मासिंहश्चिद्रूपएव"त्यहं-
प्रत्ययवेद्यस्यात्मन.परमात्वंचिद्रूपत्वंचप्रतिज्ञायक्रमादुभयत्राविकारत्वंसर्वत्रोपलब्धृत्वंच-
हेतुतयोक्त्वा "नह्यस्तिद्वैतसिद्धिरात्मैवसिद्धोऽद्वितीयोमायायात्वन्यदिव" इति अंतरास-
गरूपंद्वैतमेवप्रतिपिध्यतस्यैवमायाहेतुकत्वंचाभिधायकथमेतदित्याकांक्षायामात्मन परत्वं-
द्वैतस्यसर्वस्याविद्यारूपत्वंचप्रतिज्ञायतत्साधयितुं "तथाहियान्इतिसुपुप्तिकालेसकलद्वैत-
विलयंबोधयित्वा "सैपाविद्याजगत्सर्वं" मित्यादिना "चैतन्यदीप्ते" त्यंतेनसुपुप्त्यादौबाधा-
द्भमनशीलस्यसर्वस्यभेदप्रपंचस्याविद्यात्वमुपपादितवान् ॥ सुपुप्तौहिबुद्धिपरिकल्पितोभेद-
प्रत्ययएवलीयते नतुघटादय प्रापंचिका पदार्थाः । उत्थानोत्तरंतथैवगृहादे प्रतीयमानत्वात्
नचस्वापकालेनष्टाउत्थानकालेपुनरुत्पन्नास्तइतिवाच्यं प्रत्यभिज्ञाविरोधात् तस्या साजात्य-
निबंधनत्वकल्पनेमानाभावोऽनंतवस्तुकल्पनागौरवंच ॥ विजनकुड्यादौसुप्तेनस्वापात्पूर्वं-
स्थापितदीपपात्रैतैलवर्त्यादिक्षयस्यस्वापविरामोत्तरमनुभवात्पूर्वं प्रवर्तितघटिकायंत्रादौ
यथोचितंलोहकंटकपरिभ्रमघंटाभिघातादेः स्वापविरामोत्तरमनुभवाच्चतएव पदार्थानतुते-
सुपुप्तौनष्टाइति निश्चीयते ॥ उत्पादकाभावाच्चगृहादेः पुनरुत्पत्तिरशक्यवचना ॥ बुद्ध्यै-
वोत्पत्तिसंभवेप्रथमनिर्माणेऽपिनकोपि कार्यादीनपेक्षेत ॥ किंचैवंसति सुपुप्तावप्रत्ययादुत्था-
नानंतरेशरीरमप्यन्यदेव बुद्ध्याकल्प्यत इति वाच्यं । तथाच दांपत्यपितृपुत्रभावादिहान्याम-
हानेवोपप्लवएवं सतिबौद्धमतप्रवेशश्चेत्यलम् ॥ अतोय. सुपुप्तौभेदप्रत्ययोलीयतेतस्यैवा-
विद्यकत्वमिहोच्यत इति सिद्धम् ॥ अतएवतत्राग्रेऽनुपदं "तस्मादात्मनएवत्रैविध्यं सर्व-
त्रयोनित्वमपी" त्यादिनाब्रह्मणएवतत्तद्रूपत्वं योनिपदेनसर्वोपादानत्वं च श्राव्यते ॥ ननु-
वास्तवप्रपंचात्कोतिरिक्तोसौ विपयतासर्गइतिचेदुच्यते घटोहिब्रह्मरूपत्वाद्वस्तुत सर्व-
धर्माश्रयएव तथापि तत्रयस्तावन्मात्राकारतावन्मात्रधर्मकत्वरूप परिच्छेदोद्वैतापरपर्यायो

इयचमायाऽविद्याशब्देनाऽपिव्यवह्रियते मायाचाविद्याचस्वयमेवभवति तत्त्वविद्यावित-
सोह्यदियस्मिन्निवेशिते इत्यादिस्मृतिभ्यस्तदेतदाहाविद्याख्यमायेति ॥ एव सर्वस्य नामरूपात्म-
कस्यजगतोमायिकत्वसिद्ध्या तदन्त पातितद्धेतुत्वस्य च तथात्वमित्याह ॥ हेतुत्वचेति ॥ ननु
ब्रह्मणोमाययाऽपि हेतुत्वेनिर्विकारत्वाऽसङ्गत्वयोर्हानिरितिचेन्न ॥ मायया सिंहादिभूतस्यैन्द्र-
जालिकस्य विकाराद्यनुपलब्धे ॥ ऐंद्रजालिकोवस्तुतोविकारादिमानितिचेदास्ताम् ॥ एतावता-
हि न विकारित्वादि तत्प्रयोजक गौरवान्मानाभावाच्च ॥ सिंहादिप्रकारकभानमत्रेति-
चेन्न वयं ब्रह्मणोवस्तुनस्तथाभावं स्वीकुर्म किन्तु तथाप्रतीतिमात्र विवर्त्तवादाङ्गीकारात् ॥
अतएव मायया बहुरूपज्ञानमेव श्रुतिराह इन्द्रोमायाभि पुरुरूपईयतइति ॥ कारकस्य क्रियाऽ-
न्वयनियमात् ॥ कारकविभक्तेरितरविभक्तितउचितत्वाच्च ॥ तस्मात्प्रातीतिकस्य जगतइव तद्धे-
तुत्वस्याऽपि मायिकस्य तत्सम्भवाच्छङ्काप्यनुपपत्ति ॥ अतएवाऽक्षमाभवत केयंसाधवत्वप्र-
कल्पने ॥ किंनपश्यसिसंसारतत्रैवाऽज्ञानकल्पितमित्यमियुक्तोक्तं सगच्छते ॥ एवंच ब्रह्मण-
स्तटस्थलक्षणं सिद्धमित्याह ॥ परस्यलक्षणमिदमिति ॥

ऽनुभूयते सजीवगताविद्ययैव द्रष्टुर्विषयस्यचांतरान्यते ॥ सएवमिथ्या ॥ पौराणानि-मिथ्यात्ववचांस्यपितद्विषयाण्येवेतिसंक्षेपः ॥ एवं च जडजीवरूपस्य कार्यजातसामायिकत्वबोधनायैव "सर्वंसर्वमयंसर्वेजीवाःसर्वमयाः सर्वावस्थासुतथाप्यल्पाः" इत्याम्नायते ॥ अल्पाअणुत्वात् अग्रेच "समाप्यभूतानींद्रियाणि" इत्यादिनानाजडप्रपंचस्यसृष्टिं तन्नप्रवेशं चोक्त्वामृदवव्ययहरणमेव मायामात्रहेतुकमुक्तं मायिकत्वे चात्मनः सृष्टिप्रवेशौनघटेयातां ॥ सर्वस्यब्रह्मात्मकत्वादेव "तस्माद्द्वयणवायमात्मे" निप्रतिज्ञायसन्मात्रत्वादीनि द्वादशस्वरूपलक्षणानि तस्याभिधाय "सत्तामात्रंहीदंसर्वं सदेवपुरस्तात् ॥ सिद्धंहिमध्यनह्यत्रकिंचनानुभूयते" इतिसर्वस्यकंठरवेणसत्यत्वं ब्रह्मरूपत्वं मुक्तिदशायांतद्व्यतिरिक्तस्याकस्यचिदपि अनुभवाभावं च निरूप्यतदानींपूर्ववत्परिच्छेदानुभवः कुतोनेत्याकांक्षायां हेतुभूताऽविद्याऽभावादित्याशयेन "नाविद्यानुभावात्मनी" त्याद्युक्त्वासर्वभूतेषुचात्मानं सर्वभूतानिचात्मनि ईक्षतेयोगयुक्तात्मेतिदर्शयितुं "पश्यतेहापिसन्मात्रमसदन्यत्सत्यं-हीत्थं पुरस्तात्" इत्याद्याम्नातम् ॥ अर्थस्तु मद्भावेसति इहनारीरेपिसन्मात्रंसर्वंघटादि-प्रपंचंपश्यत यच्च असत् अविद्याहेतुकमसत्यंप्रागुक्तं तत्सन्मात्रप्रपंचादन्यदेवान्तरासर्गरूप-मित्यादिर्ज्ञेयः ॥ अग्रेच सृष्टिकालेचिदानंदतिरोभावात्सन्मात्रस्यापि जडप्रपंचस्यतदानी-मानंदचिद्घनत्वं इदानींतिरोहितानंदतयास्यचिन्मात्रस्यापिजीवस्यतदातद्वाविर्भावात्सुख-रूपत्वं चेत्यादिकंविस्तरेणनिरूपितमितितत्सर्वंतत्रएवावधेयम् ॥ तथा "नहीदंसर्वं-कदाचित्" इति इदंकार्यजातंसर्वंकदाचिन्नअपितु सर्वदेत्यप्युक्तम् ॥ यत्तुसहस्राक्ष-कृतावाक्यमुपन्यस्तंतत्तु "सैषावटबीजसामान्यवदनेकवटशक्तिरेकैव तद्यथा वटबीज-सामान्यमेकमनेकान्स्वाव्यतिरिक्तान्वटान् स्वबीजानुत्पाद्यतत्रतत्रचसम्पूर्णंसंतिष्ठति एव-मेवैषामायास्वाव्यतिरिक्तानिपरिपूर्णानिक्षेत्राणिदर्शयित्वाजीवेशावाभासेनकरोति माया चाविद्याचस्वयमेवभवती" तिश्रूयते ॥ अर्थस्तु—सर्वोपादानत्वादत्रवटबीजस्थाना-पन्नंब्रह्मैव बीजंमांसर्वभूतानांविद्धिपार्थसनातनमितिस्मरणात् ॥ छांदोग्याष्टमाध्याये "न्यग्रोधफलमदआहरे" तिखंडेवटधानाणिमदृष्टांतेनब्रह्मणोवटदृष्टांतेनप्रपंचस्यचस्पष्ट-तयानिरूपणात् ॥ तथाच वटबीजसामान्यंयथावटबीजस्यासाधारणधर्मस्तदेकवृत्ति ॥ तथा मायाब्रह्मणःस्वाभाविकीशक्तिस्तन्मात्रवृत्तिः ॥ यथाचकार्येषुवटेष्वनेकेष्वनुवर्त-मानमपिबीजसामान्यंवस्तुतएकमेव तथेयंक्षेत्रेष्वनुस्यूतअविद्यात्मनानानारूपाप्येकैव ॥ तदेतदुक्तमेकैवेत्यंतेन ॥ दार्ष्टांतिकेवटशब्दोदेहादिरूपक्षेत्रपरः तद्वत्प्रसृमरत्वादल्प-फलत्वादुभयसुपर्णाश्रयस्याधारत्वाच्च ॥ दृष्टांतेदुरूहांशंस्पष्टीकृत्यविवक्षितांशेनदार्ष्टांति-केयोजयति तद्यथेति अव्यतिरेकोऽविनाभावएवनत्वभेदः वटेषुकेवलसामान्यरूपत्वाभा-भावात् ॥ एकस्मादपिबीजात्साक्षात्परंपराभ्यामनेकेवटाउत्पद्यंतएवेतिनानेकत्वोक्ति-विरोधः ॥ क्षेत्रशब्दश्चेहदेहेंद्रियप्राणांतःकरणपरः गीतात्रयोदशाध्यायेतथानिरूपणात् ॥ ननुशरीरमात्रपरः अतएवदृष्टांतेऽनेकत्ववद्दार्ष्टांतिकेपरिपूर्णत्वमुक्तं तत्तदध्यासरूपेणसर्वत्रा-विद्यासंबंधात्क्षेत्रेष्वस्याअव्यतिरेकः ॥ उत्पादनस्थानापन्नंचात्रतथाप्रदर्शनं अध्यासानाम-वास्तवत्वात् ॥ जीवेशौचेहकार्यरूपौ करोतीत्युक्तेः ॥ तत्रजीवाः "अयःप्रजापत्याः त्रिवि-

धाजीवसंगास्तु" इतिबृहदारण्यकपंचरात्रादिश्रुतिस्मृत्युक्ता.सत्याद्युपहिताभगवदंशाः ॥
ईशाख्यांतर्यामिणः ॥ जीववत्क्लेशांतःस्वरवप्रतीतेः ॥ जात्यभिप्रायमुभयोरेकत्वं ॥ द्वावीशा-
नीशावजौ" इत्यादिश्रुत्यंतरप्रसिद्धाविमौअत्रापि "अभिमंताजीवोनियंतेश्वरः" इत्युक्तौ ॥
दृष्टांतेसपूर्णसंस्थिते.स्थानपदंजीवांतर्यामिणोराभासेनकरणंस्वस्याद्विधाभवनंच ॥ यथाजल-
स्मिन्प्रविष्टचंद्रतेजोंशमेवचंद्राभासंकरोतितथेयमपिस्थानिनाभूतक्षेत्रेषुगुणेषुचप्रविष्टंमहांतं-
ब्रह्माभासंकरोति ॥ आभासद्वैविध्यसिध्यर्थंचस्वयंद्विधाभवतितत्र "तदेवानुप्राविशत्
गामाविश्यचभूतानि" इत्यादिष्वंतर्यामिब्राह्मणेचप्रसिद्धेसमष्टिरूपेमायाख्यासा । नाहं-
प्रकाशः सर्वस्ययोगमायासमावृतः मायाजवनिकाछन्नमित्याद्युक्तेः ॥ व्यष्टिरूपेनियंतरीश्वरे-
तर्यामिण्यपिसा ईश्वरः सर्वभूतानांहृद्देशेऽर्जुनतिष्ठति भ्रामयन्सर्वभूतानियंत्रारूढानिमायये-
तिमायावत्वस्मरणात् ॥ ब्रह्मांडशरीरेसमष्टिरूपे हिरण्यगर्भेत्वविद्या तत्रैव "सर्वाहंमानी-
हिरण्यगर्भे" इत्यभिमानश्रावणात् ॥ व्यष्टिरूपेऽभिमंतारि सात्विकादिभेदभिन्नेकार्यंजीवे-
पिपंचपर्वासा कठमुंडकादिषु "अविद्यायामंतरेवर्तमानाः ॥ अनीशयाशोचतिमुह्यमानः"
इत्यादिश्रावणात् ॥ इत्थमत्रतस्याद्विधाभावकथनस्याशय.प्रतिभाति ॥ एवमस्याद्वि-
धाभूत्वाव्यष्टिसमष्टिक्षेत्रेषुसर्वत्रावस्थानाद्दृष्टांतउक्तात्रतत्रसंपूर्णतयासस्थिति संगच्छते ॥
मायायाअपिव्यष्टिसमष्टिभावादेव "स्वयंगुणाभिन्नांकुरेष्वपिगुणभिन्नासर्वत्र" त्युक्तम्
गुणैर्भेदवतीत्यर्थः ॥ यथाचव्यष्टिरूपाणांजीवानांसात्विकत्वादिनात्रैविध्यं तथा समष्टिरूप-
स्याप्येकैकगुणाभिमानिब्रह्माद्यात्मनात्रैविध्यम् अतएव "हिरण्यगर्भस्त्रिरूपईश्वरवत् व्यक्त-
चैतन्य.सर्वगोह्यी" त्यभिहितम् ॥ तत्रमायागुणानामात्मकत्वमात्रमभिप्रेत्य "ब्रह्मविष्णु-
शिवरूपिणाचैतन्यदीप्ता" इत्युच्यते रूपाणितु ब्रह्मादयस्त्रिविधजीवादिकंचवस्तुत परमा-
त्मनएवेत्यत: पठ्यते "तस्मादात्मनएवत्रैविध्यंसर्वत्रयोनित्वमपी" तिवद्विष्णुरीशानोब्रह्मा-
न्यदपिसर्वंसर्वगंसर्वं" मितिच इत्थंब्रह्मरूपत्वेसत्यपि प्रपंचे यज्जडत्वंमोहात्मकत्वं सत्या-
कृतमानंत्वंमिथ्यात्वं च प्रतीयते तदस्या सर्वत्राऽविनाभावादेव ॥ अतएव "तदेतज्जड-
मोहात्मकमनंततुच्छमिदंरूपमस्ये" तिविपयतासर्गस्यपृथग्रूपंनिरूप्यंते "अस्यव्यंजिके"
त्यादिनाजडत्वादे: प्रत्यायिकाचसैवोच्यते जडत्वादिप्रत्यायनसामर्थ्यं हेतवश्चक्रमेण "सैषा
चित्रासुदृढाबह्वंकुरास्वयंगुणभिन्ने" तिविशेषणैर्ज्ञाप्यंते ॥ "क्षेत्राणिदर्शयित्वाजावेशारा-
भासेनकरोती" त्युक्त्याजलदर्पणादिवदाभासाधारत्वं क्षेत्राणामेवायाति ननु पराभिमत-
रीत्याकेवलमायाऽविद्ययोः ॥ "भूतेभूतेव्यवस्थित.। देव.क्षेत्रेष्वेवमजोयमात्मा" इति-
प्रतिबिंबताबोधकश्रुत्यंतरेपितथैवसिध्यति ॥ पराभिप्रेतप्रतिबिंबवादस्त्वष्टमश्लोकखंडनाव-
सरेविस्तरेणनिराकरिष्यते॥ क्षेत्राणिदर्शयित्वाऽऽभासकरणस्यकथनेनजीवेशभावप्राक्कालिके-
ऽस्मिन्दर्शनेद्रष्टृत्वंपरस्यैवशुद्धस्यासिध्यति तच्चक्षेत्राणाममायिकत्वएवघटते। तेषांविवर्तरूप-
त्वेत्वभ्रांतेश्वरदर्शनगोचरतानस्यात ॥ तस्माद्ब्रह्मकार्यंजडजीवयोर्ब्रह्मात्मकत्वमेवाभिप्रेत्यतत्र
"तदेतत्सत्यमात्माब्रह्मैवब्रह्मात्मैव अत्रह्येवनविचिकित्स्यामित्यों सत्यम्" इत्यादिबहुतर-
माम्नातम् ॥ साकल्येनैतत्खंडस्यार्थस्तुश्रीपुरुषोत्तमचरणैर्नृसिंहोत्तरतापनीयदीपिकायां
(अ० २ पा० १ सू० ६) "दृश्यतेत्वि" तिसूत्रे भाष्यप्रकाशे कृतइतिततोज्ञेयः ॥

मयाप्यस्मत्संमतशास्त्रतद्व्याख्यानद्वारेणोपाधिकंयत्कल्प्यंतद्दीपिकाप्रकारेणवक्ष्यते ॥ तस्मादि-
दमपिवाक्यंनत्वदिष्टव्यवस्थासाधकम् ॥ मायाविद्याशब्दयोःपरस्परपर्यायत्वेतुजीवेशयो-
रुपाधेर्भेदस्यासिध्याजीवेशविभागासिद्धिस्तथाचजीवेशावाभासेनेत्यव्यवहितपूर्वोक्तिनिरो-
धोजीवईशोविशुद्धाचिदितिसिद्धांतभङ्गश्च ॥ अविद्याख्यमायावशादितिपञ्चम्यंतंचइच्छो-
क्त्व इत्यत्रहेतुत्वंचेत्यत्रचहेतुबोधकमुपन्यस्तमिति ईश्वरोपाधेरप्यविद्यात्वंवदतस्तवाल्पज्ञ-
त्वसर्वज्ञत्वयोर्विपर्ययश्चदुर्वारःस्यात् ॥ यच्च सत्यविद्यामितिवाक्यं तत्तुसतिसमूलत्वे
प्रागुक्तार्थकमेव ॥ अत्रेश्वरोपाधेस्तरणेतद्दीत्याहृदिनिवेशनमप्यशक्यंध्यानविषयस्वरूप-
स्यापिमायिकत्वांगीकारात् ॥ यच्च (एवसर्वस्यानामरूपात्मकस्यजगतोमायिकत्व-
सिध्यातदन्तःपातितद्धेतुत्वस्यचतथात्वमित्याहहेतुत्वंचेति) युक्तम् । तत्तुप्रपंचस्यामा-
यिकतायाब्रह्मरूपतायाश्चसमर्थिततयानास्तवत्वेनतदंतःपातितद्धेतुत्वमपिवास्तवमेवसिध्यति
नतुमायिकमित्युपेक्ष्यम् ॥ वस्तुतस्तुप्रपंचहेतुत्वस्यब्रह्मधर्मत्वात्तदतिरिक्तेतदभावा-
च्चतस्यप्रपंचान्तःपातित्वोक्तिरपिदुर्बलच्छलस्फलिकैव ॥ तदाहुः—एवंच मायाया
इत्यादिना ॥ अथ जन्माद्यधिकरणभाष्येप्रपंचितं जगत्कर्तृत्वरूपब्रह्मलक्षणस्यवास्तवत्वं
मायिकत्वनिरासं च दिङ्मात्रेणदर्शयितुं तत्रोक्तयुक्तीरनुवदंति ॥ अतएवोक्तमित्या-
दिना ॥ इदंकारिकाद्वयमपितत्रत्यम् ॥ अत्रजन्मादिसूत्रे अस्येतिपदस्यार्थोजगतइति ॥
जन्मादिपदस्यार्थउत्पत्त्यादिः ॥ यतइति पंचम्याअर्थः कर्त्रिति ॥ तत्रयच्छब्दाक्षिप्तस्यत-
दित्यस्यविशेष्यंब्रह्मेत्येव पूर्वसूत्रबलात्सिध्यतीति तत्रानुपज्यमानब्रह्मपदस्यार्थोब्रह्मदिति ॥
शास्त्रयोनित्वादित्यंशस्यार्थमाहुः ॥ वेदेनेति ॥ हि यतः तत् कर्तृत्वं वेदेन बोधितं
अतः अन्यथा औपचारिकं भवितुंनक्षमं तस्यजातमत्वेसत्यवयतोवाइत्यादितद्बोधकश्रुतीनां
विरोधोनस्यात् कर्ताकारयिताहरिरित्यादिकल्पस्मृतिविरोधोपिनस्यात् ॥ किंच स्वरूप-
लक्षणकार्यलक्षणश्रुत्योस्तदनुकूलस्मृत्योश्चविरोधलेशोपिनास्तियेनैकत्रोपचारःकल्प्येतेतिव-
क्ष्यते ॥ अविरोधेहेतुः यतोब्रह्मसर्वभवनसमर्थत्वादचिन्त्यशक्तिकमिति ॥ अतोऽकर्त्रपि-
कर्त्रे ॥ एतदेवयथाभाष्ये प्रकाशेचयथाविभक्ततथाअनुवदंति जगत्कर्तृत्वमित्यादिना वेदेनेति
"यतो वाइमानिभूतानिजायंते ॥ तस्माद्वाएतस्मादात्मनआकाशः संभूतः ॥ इदंसर्वमसृजत-
सईक्षतलोकान्नुसृजाइतिसइमांल्लोकानसृजत ॥ तत्तेजोऽसृजत ॥ कर्तारमीशंपुरुषंब्रह्म-
योनिं" इत्यादिभृगुवल्लिब्रह्मवल्ल्यैतरेयच्छांदोग्यमुंडकादिवाक्यरूपेण ॥ नचेत्यादि ॥
एकत्रसदेवान्यत्रारोप्यते ॥ यथा चंद्रसिंहादौवस्तुतः सदेवचंद्रत्वसिंहत्वादिकं मुखमाणव-
कादौ नहिधाप्यसतआरोपः संभवति । अन्यथाखपुष्पाद्यपिक्वचिदारोप्येत ॥ प्रकृताधिकरणे
च निरंकुशजगत्कर्तृत्वेन शास्त्रप्रतिपाद्यत्वं ब्रह्मणोलक्षणं दर्शितम् । तत्र धर्मादावतिप्रसंग-
वारणायतृतीयांतं । प्रकृत्यादौ तद्वारणायोत्तरदलं "प्रजापतिरकामयतप्रजाःसृजेयेति"
इत्यादिशास्त्रप्रतिपादितकर्तृत्वकप्राजापत्यादौतद्वारणाय निरंकुशेति । तेषामवांतरकर्तृत्वात्
"हिरण्यगर्भः समवर्तताग्रे ॥ योब्रह्माणंविदधातिपूर्वं" इतिअन्यत्वश्रवणात् ॥ अतइदं
ब्रह्मातिरिक्ते क्वाप्यसिद्धंब्रह्मण्यारोपितमिति कथं शक्यंवक्तुम् ॥ स्वयमेवेति ॥ ईक्षत्यधि-
करणादौ शंकराचार्यैरपीत्यर्थः ॥ अत्रापिकिंचिद्वक्ष्यते ॥ सन्मार्गमात्रमिति ॥ पूर्वकांडार्थे-

चोदनाप्रमाणकेधर्मे उत्तरकांडार्थेज्ञाने चाविश्वासापत्त्याकांडद्वयसिद्धा.सर्वेपिमार्गांडच्छिद्येरन् ॥ अवास्तवमिति ॥ कर्तृत्वमितिशेषः ॥ तत्रेतिस्वरूपलक्षणे ॥ तेषामिति ॥ सत्यंज्ञानमनंतंब्रह्मेत्युक्तानाम् ॥ सत्यत्वादिनेति ॥ ब्रह्मणिसत्यत्वाद्यप्रत्यये ॥ "असन्नेवसभवतिइत्यसत्वापत्तिः ॥ तत्तद्भेदेति ॥ असत्यजडसांतप्रतियोगिकैर्भेदैर्धर्मैस्त्वसिध्या ॥ प्रागुक्तेशिरोमणिसिद्धांतलक्षणग्रंथेतद्धर्मावच्छिन्नभिन्नभेदस्यतद्धर्मतायाः कथनादपिसत्यादिभिन्नभेदाः सत्यत्वादिरूपाएवफलंतीतितद्रीत्यापिघट्टकुटीप्रभातं ॥ एषन्यायस्तु यथा कस्यचित् व्यापारिणोराजभाव्यांशमदित्समानस्यतद्ग्रहणार्थंघट्टेस्थापितकुटीस्थान्राजपुरुषान्वंचयित्वारात्रावेवमार्गांतरेणजिगमिषतोमार्गभ्रमात् बहुपर्यट्य पुनस्तत्रैवागतस्यप्रभातंभवेदिति ॥ तथात्रापिसधर्मत्वापत्तिभियाव्यावृत्तिपरत्वादरणेपिपुनस्तदेवापन्नम् ॥ यथाकथंचिद्भेदस्यैकैवसिद्ध्यापदद्वयोपादानेव्यर्थंपौनरुक्त्यमपि ध्येयम् ॥ कर्तृत्वमपिलौकिकमिति ॥ कुलालादौदृष्टमुपादानकारणकालादिपरतंकर्तृत्वंलौकिकम् ॥ किंच यथाकारणगतमेवसत्यत्वादिकंकार्ये अस्तिभातिप्रियात्मनासमन्वयात्सिद्धांतेपि प्रतीयते तथाकर्तृत्वमपिब्रह्मगतमेवांशतोलोकेऽनुवर्तते । वन्ह्यादिगतमौष्ण्यंविस्फुलिंगादाविव ॥ अतएव "कर्ताशास्त्रार्थवत्वा" दित्यादिनाजीवस्यकर्तृत्वंसाधयित्वा "परात्तुतच्छ्रुते" रितिसिद्धांतितंव्यासपादैरित्यन्यत्रविस्तरः ॥ अनेनेत्यादि ॥ तैत्तिरीये "आकाशः सम्भूत" इत्यादिर्भूतसृष्टिः । औषध्यादिर्भौतिकसृष्टिः । छांदोग्ये "इमास्तिस्रोदेवता" इतिकथनाद्देवसृष्टिः ॥ बृहदारण्यभाववृत्तसूक्तादौ "सब्रह्मसशिव सहरि.सेंद्रः ॥ अर्वाग्देवाअस्यविसर्जनाय" इत्यादावपिसा ॥ पुरुषविधब्राह्मणेऐतरेयेचतिर्यङ्मनुष्यादिसृष्टिः ॥ तत्रांभ प्रभृतिलोकसृष्टिः ॥ जन्मादिसूत्रस्थस्यअस्येतिपदस्यार्थोयं एतादृशकर्तृत्वबोधनायैवाचार्येणास्येत्युक्तं ॥ मनसेत्यादि भाववृत्तसूक्ते "कोअद्धावेदकइहप्रवोचत्कुतआजाताकुतइयंविसृष्टिः." इतिश्रावणात्तथेत्यर्थ ॥ अनायासेनेति पुरुषविधब्राह्मणे रमणार्थताकथनात् प्रथमस्कंधाद्यावपि सविश्वंलीलयैवेदं सृजत्यवतिहंत्यज इत्यादिकथनाच्च तथा उत्पत्तीति जन्मादिपदस्यार्थोयं कारणमिति सुपंचस्या·फलितार्थ । तत्रापिमूलं "यतोवाइमानि" इत्यादिकंस्पष्टमेव ॥ वस्तुंशब्दयत्वेनेति ॥ अन्यत्रवास्तवस्यतादृशकर्तृत्वस्याभावात् जडायांप्रकृतौपरतंत्रेषुजीवेषुजगत्कारणत्वासंभवस्यतत्रतत्राधिकरणेषुसूत्रकृतैवदर्शितत्वाच्चकर्तृत्वमध्यगत्या वास्तवंमंतव्यं । यदित्वन्यत्राविद्यमानमपिब्रह्मणितदारोपितमिति प्रसह्योच्येत तर्हितव्रसत्यत्वादिकमपिअसद्वैलक्षण्यादिकमपिचारोपितमेवतद्वदितिवक्तुंशक्यमतस्तत्रापिनाऽगतिरितिभाव· ॥ वेदबोधितत्वादिति "अपाणिपादोजवनोग्रहीता ॥ अणोरणीयान्महतोमहीयान् ॥ आसीनोदूरंव्रजतिशयानोयातिसर्वत । अनेजदेकंमनसोजवीयः । तदेजतितन्नेजतितद्दूरेतद्वंतिके अन्यदेवतद्विदितादथोअविदितादधि" इत्यादिश्वेताश्वतरतैत्तिरीयकठशाखास्यतलवकारादिश्रुतिभिर्बोधितत्वात् ॥ निरविकारत्वमिति ॥ (अ० ३ पा० २ सू०२७) "उभयव्यपदेशात्वहिकुण्डलवत्" इत्यादिन्यायानुरोधात्तथा ॥ अहिस्वंकुंडलाकारकुर्वन्नपिदर्वीकरोविकारीतिव्यपदिश्यते ॥ अपास्तेति ॥ तदुक्तरीतिकपूर्वपक्षस्यायुक्तत्वमुक्तं किंतुशुद्धस्यैवाविद्यासंबंधेनजीवाभावाविद्याख्यमायाकल्पकत्वा-

चाधिकारित्वदुद्धरमेव ॥ यच्चोक्तं (माययासिंहादिभूतस्येत्यादि) तदप्यसत् ऐंद्रजालिकोहिस्वनिष्ठयाशक्त्यमाययासिंहादिभानंदर्शयति नतुद्रष्टृगतोपाधिवशात्तया दृश्यते, अन्यथा तैरन्येपिसिंहादयएवदृश्येरन् ॥ तत्रापिनात्मनाभ्यांतस्यतथाप्रदर्शनेच्छाप्रयत्नाभ्यामेवतथा अन्यथासर्वदासतथैवप्रतीयेत ॥ यास्तत्रतदुपायज्ञानेच्छाप्रयत्नवत्त्वादेवतत्रकर्तृत्वं युक्तं ॥ साकारस्यैवचतस्यासिंहादिसाकारपपदार्थांतरभावः ॥ तथा प्रकृतेब्रह्मणिशक्त्यामायाशक्तेरभावात् तस्याद्रष्टृमात्रकल्पितत्वात् तस्यनात्मवेच्छाप्रयत्नत्वात् सर्वथानिर्विशेषत्वाच्च नतद्वत्कर्तृत्वस्योपपत्तिः ॥ एतेनमानाभावादिकंनिरस्तंतादृशप्रत्यक्षस्यैवमानत्वात् ॥ यच्च (सिंहादिप्रकारक) मित्यादि तत्तु कर्तृत्वादिबोधकश्रुतिशतविरोधकमेव ॥ नहिशुक्तौकस्यचिद्रजतप्रत्ययेतदाशुक्तेः रजतकर्तृत्वशक्यवचन अन्यस्यतत्रतद्प्रतीतेः देवदत्तनाहंरजततयाप्रतीयेयेतीच्छाया शुक्तावसम्भवाच्च इंद्रोमायाभिरितिवाक्यंतु व्याख्यातंप्राक् ॥ कारकस्येत्यादिकथनंतत्त्वसन्मतप्रवेशरूपमेव कर्तृत्वस्यनात्वधत्वादेवयतोवाइत्यादिकार्यलक्षणंब्रह्मण ॥ आरोपितत्वेतटस्थलक्षणमपितन्नासिध्येत् नहिरजतत्वशुक्तेर्लक्षणभवितुमर्हतितिदेतत्सर्वंसुगममित्युपेक्षते ॥ अत एवतदुत्तरमित्यादिना ॥

यत्तुशुद्धेउपादानत्वंनास्तिकिंतर्हिशबलेशबलगतंचोपादानत्वंतदनुगतस्यशुद्धस्यलक्षणंशाखेवचंद्रस्यमायैवचोपादानंतद्गतंचोपादानत्वंतदधिष्ठानस्यलक्षणमितितदसत् ॥ शुद्धब्रह्मणएवउपादानत्वंव्यासैस्तत्तुसमन्वयादितिसूत्रेणवर्णितं ॥ तत्रयस्यब्रह्मणोजिज्ञासाप्रतिपादितातत्किंसमवायि निमित्तं कर्तृवाकथमेवंसंदेहः यावतायतोवाइमानिभूतानिजायतइत्यादिनानिःसंदेहंश्रूयते ॥ एवंहिसः ॥ ननुतत्रपंचमीश्रूयतेयतइतिपंचम्यास्तस्मिंपंचमीच हेतौहेतुत्वंनिमित्तएवदंडादौप्रायःप्रसिद्धं॥अतोनिमित्तमात्रब्रह्मउपादानवाचकपदाभावात्कल्पनायांप्रमाणाभावात्एवंप्राप्तआह "तत्तुसमन्वया" दिति ॥ तुशब्दःपूर्वपक्षव्यावृत्यर्थः तत्ब्रह्मैवसमवायिकारणं कुतःसमन्वयात् सम्यगनुवृत्तत्वात् ॥ अस्तिभातिप्रियत्वेनसच्चिदानंदरूपेणान्वयात्जडजीवांतर्यामिष्वेकैकांशस्यप्राकट्यं ॥ अन्यांशस्यतिरोभावःभगवदिच्छायाएवसर्वेचनियामकत्वात् ॥ अलीकत्वप्रतीतेःसर्वत्रासत्वात्नालीकत्वंघटादिष्वनुगतमतोनमायायाउपादानत्वसंभवा ब्रह्मणः समवायित्वे "तदात्मानंस्वयमकुरुत" इत्यादिश्रुतिरनुगृहीताभवति नच शाखाचंद्रन्यायोप्यत्रसंभवति ॥ यथाचंद्रंदिदर्शयिषुःशाखांदर्शयित्वापुनस्तांत्याजयित्वातद्ग्रस्थचंद्रंपश्येतिवदति तथानापिभृगुपित्रायदियतोवाइमानिभूतानीत्यादिनाजगत्कारणंजिज्ञास्यमुक्त्वापुनरन्यदुक्तंस्यात्तदात्वदुक्तन्यायोत्रप्रवर्त्तेत ॥ तस्माज्जगत्कारणं-

शुद्धमेवजिज्ञास्यं नतुशबलंपारिभाषिकं ॥ एवंशाखाचंद्रन्यायस्याप्यसंभवात्त्वन्मतेनिर्गुणब्रह्मजिज्ञासांप्रतिज्ञायसगुणब्रह्मणोमायायालक्षणकथनेव्यासस्यप्रतिज्ञाहान्युपक्रमविरोधरूपदोषौस्यातामेव ॥ तस्माज्जन्माद्यस्ययतइतिसूत्रं निर्गुणब्रह्मणःकारणत्वंवदतीतित्वयापिस्वीकरणीयं ॥ शुद्धस्यकारणत्वेचतदैक्षत बहुस्यांप्रजायेयेतिश्रुतौतत्पदेनशुद्धस्यैवपरामर्शोकर्त्तव्यस्तस्यबहुभावउत्पत्तिश्च यदिस्वीक्रियते तदाशुद्धत्वहानिरित्युभयतःपाशारज्जुस्तवस्यात् ॥ नचमाययाबहुभावः । तस्मिन्प्रपाठके मायावाचकपदाभावात् ऐंद्रजालिकदृष्टांतस्यापितत्राभावात् ॥ किंतुमृत्सुवर्णादिदृष्टांतएवतत्रश्रुतः ॥ सचशुद्धस्यकारणस्यकार्य्यरूपत्वस्वीकारएवानुकूलः ॥ नहिमृत्सुवर्णादीनांमाययाघटकुंडलादिरूपता येनब्रह्मणोमाययाजगद्रूपतायांदृष्टांततास्यात् ॥ एतेनअत्रेत्यादिकंसर्वमपास्तं ॥ तच्छब्देनसत्पदार्थस्यशुद्धस्यपरामर्शईक्षणंमुख्यमेवेतितुनसंभवति शुद्धईक्षणकर्तृत्वस्यत्वयानंगीकृतत्वात् ॥ नह्यैंद्रजालिकवच्छुद्धेप्यंतःकरणादिपरिस्तियेनतद्वदत्रापीक्षणंमुख्यंस्यात् ॥ किंतुतदप्यौपचारिकमेव तथाच "सेयंदेवतैक्षतहताहमिमास्तिस्रोदेवता अनेनजीवेनात्मनानुप्रविश्यनामरूपेव्याकरवाणी" तिवाक्येपि (सेयंदेवतैक्षताहंआत्मनाइतिशब्दार्थामुख्यावे) त्यसंगतं ॥ किंचशबलस्यजगत्कारणत्वेतस्यमुख्यत्वाभावाद्गौणस्यैवजगत्कारणत्वमुक्तंस्यात्तथाच "गौणश्चेन्नात्मशब्दा" दितिसूत्रविरोधः ॥ तस्यार्थस्तु ईक्षत्यादिगुणयुक्तःपरमात्मामायासंबंधयुक्तोगौणोजगत्कारणमितिचेन्नतथात्वंवक्तुंशक्यते ॥ कुतःआत्मशब्दात् "आत्मावाइदमेकएवाग्रआसी" दित्युपक्रम्य "सऐक्षत" इत्युक्तेः ॥ आत्मशब्दःपुनःसर्वेषुवेदांतेषुनिर्गुणब्रह्मवाचकत्वेनैवसिद्धः तस्यैवजगत्कर्तृत्वंश्रुतिराह स्वातंत्र्याभावेनसगुणस्यकर्तृत्वमेवनसंभवतिवेदाश्चप्रमाणभूतास्ततः सर्वभवनसामर्थ्यमेवश्रुतिबललभ्यमंगीकर्त्तव्यं ॥ अस्तिभातिप्रियत्वादयोधर्मायथाब्रह्मगतास्तथाकर्तृत्वमपिलोकेप्रतीयते ॥ तस्मादात्मशब्दप्रयोगाद्गुणातीतमेवकर्तृ ॥ किंचसोकामयतेत्युपक्रम्यतदात्मानंस्वयमकुरुतयदाह्येवैषएतस्मिन्नदृश्येऽनिरुक्तेनिलयनेऽभयंप्रतिष्ठांविंदते अथसोभयंगतोभवतीतिप्रापंचिकधर्मरहितेब्रह्मणिएतस्मिञ्जगत्कर्तरिपरिनिष्ठितोमुक्तोभवतीत्यर्थः ॥ तत्रयदिजत्कर्तागौणःस्यात्तदातन्निष्ठस्यसंसारएवस्यात्नमोक्षः ॥ अतस्तन्निष्ठस्यमोक्षोपदेशा" दितिसूत्रविरोधस्त्वन्मतेस्यात् ॥ किंचयदिशाखाचंद्रन्यायेनगौणंकर्तृत्वादिधर्मविशिष्टंप्रदर्श्यित्वावेदांतैर्नि-

र्गुणब्रह्मबोधनीयंस्यात्तदाजगत्कर्त्ताहेयत्वेनोपदिश्येत ॥ सच हेय-
त्वेननोपदिश्यतेऽतोनिर्गुणएवजगत्कर्त्ता ॥ एवंचमायोपहितस्यकार
णत्वेसूत्रत्रयविरोधःस्यात् ॥ नचतादृशसूत्रत्रयंप्रकृतेःकारणत्ववादि-
नांसांख्यानामेवखंडनपरं नास्मन्मतखंडनपरमितिवाच्यंमायिकस्य-
कारणत्वंवदतस्तवमतेऽपि औपाधिकधर्माणामुपाधिवृत्तित्वनियमेन
मायायाःकारणत्वंपर्य्यवस्यतीतितत्खंडने नास्माकं विरोधइत्यस्य-
वक्तुमशक्यत्वात् मायाप्रकृतिशब्दानांपरस्परपर्य्यायत्वात् यत्तु-
मायाकारणत्वबोधिकानांबलेनकेवलेश्वरकारणत्वबोधिकानांश्रुतीनां
जन्मादिसूत्रस्यचौपचारिकत्वं ॥ यथात्वन्मतेऽक्षरब्रह्मणःकारण-
त्वेनपुरुषोत्तममुपक्रम्यकारणत्ववादिनीनांतत्रौपचारिकत्वंपुरुषोत्तम
जिज्ञासांप्रतिज्ञाय पठितस्यजन्माद्यस्ययतइतिसूत्रस्यापितथात्वमि-
त्युक्तंतत्तुच्छं ॥ ईश्वरकारणत्वबोधकश्रुतीनामुपक्रमोपसंहारादिष-
ड्विधतात्पर्य्यनिश्चायकलिंगसहकृतानामौपचारिकत्वकल्पनापेक्षयामा-
याकारणत्वबोधिकायाःकस्याश्चिच्छ्रुतेरौपचारिकत्वकल्पनेलाघवात् ॥
यथात्वन्मतइत्यादिनादृष्टांतस्त्वसन्मतानभिज्ञतांद्योतयतिधृष्टत्वंच ॥
नह्यस्मन्मतेनिर्गुणस्यपुरुषोत्तमस्याकारणत्वंनिर्द्धर्मिकत्वंवाकुत्रचिदपि
सिद्धांतितंनापिजन्मादिसूत्रस्यश्रुतीनांवाऔपचारिकत्वं ॥ तस्मा-
त्परमतमज्ञात्वाखंडनंकुर्वन्प्रतारकएवासि अग्रेचयत्तुटीकायां
(प्रकृतिगतंकर्तृत्व) मित्यारभ्यतत्रसम्यगित्यंतेनशुद्धाद्वैतमा-
र्त्तंडटीकाकृदुक्तं किंचिदनूद्यतथाव्याख्यानेहिजगज्जन्माद्याश्रयस्यशा-
स्त्रोक्तकारणत्वेनहेतुनाकर्तृत्वमनेनसूत्रेणसाध्यते तथाचपूर्वपक्षिणा-
भृगुर्वैवारुणिरित्यत्रापिब्रह्मणिप्रकृतिस्थंगौणमेवकर्तृत्वमनूद्यतइतिचे-
दुक्तंतर्हिजगज्जन्मादिकंप्रकृतेरन्यत्रस्थापयित्वा प्रवृत्तेनानेनसूत्रेणप्र-
कृतिगतमेव कर्तृत्वंसाध्यतइत्यापततिजीवेशावाभासेनकरोतिमायांतु-
प्रकृतिंविद्यादित्यादिशास्त्रैःप्रकृतौकारणत्वस्योक्तत्वात्प्रकृतिनिष्ठकर्तृत्व
स्यबोधनेचजीवेशावितिश्रुतिरुपष्टंभिकास्यात् सिद्धसाधनंचैवंव्या-
ख्यानेस्यात्प्रकृतिगतकर्तृत्वस्यपूर्वपक्षिणास्वीकृतत्वात् तथाचसुव्या-
ख्याताब्रह्मजिज्ञासाप्रतिज्ञोपपत्तिरित्यादिनाहालः कृतः सोप्यस्म-
त्सिद्धांतानभिज्ञतयैव ॥ पूर्वाधिकरणेवेदार्थभूतब्रह्मणोजिज्ञासाधिकृते
तिकथंजिज्ञास्यमिति प्रकारविशेषाकांक्षायांसमन्वयाविरोधाभ्यांतद्व-
क्तव्यं तद्बोधकमग्रिमंसूत्रं ॥ तत्रकिंलक्षणंकिंप्रमाणकंब्रह्मेतिजिज्ञासा-
यांलक्षणप्रमाणात्मकंप्रकारद्वयमाह"जन्माद्यस्ययतःशास्त्रयोनित्वा"-

दिति ॥ तत्रजन्माद्यस्ययतइत्यंशेनलक्षणं शास्त्रयोनित्वादित्यंशेन-प्रमाणं ॥ अत्रसर्वेपियोगविभागेन शास्त्रयोनित्वादितिसूत्रंभिन्नमभ्युपगच्छंति तन्नयुक्तं ॥ अग्रिमसूत्रेपुतत्तुसमन्वयादीक्षतेर्नाशब्दमित्यादिपुसाध्यहेतुनिर्देशपूर्वकमेवाधिकरणरचनस्यदर्शनेनात्रापितथैवयुक्तत्वात् ॥ येतुजन्माद्यधिकरणंशास्त्रयोनित्वाधिकरणंचभिन्नमिच्छंतितेषांमतेप्रथमस्यहेतुशून्यत्वाद्द्वितीयस्यचसाध्यशून्यत्वात्साकांक्षतयातिक्लिष्टत्वेनतद्विवक्षितप्रमेयासाधकत्वंबोध्यं तत्र "सत्यंज्ञानमनंतंब्रह्म ॥ निष्कलंनिष्क्रियशांतंनिरवद्यंनिरंजन"मित्यादिश्रुत्या ब्रह्मणः सर्वधर्मराहित्यप्रतिपादनात्कर्तृत्वस्याप्यभावःप्रतीयतेयतोवाइमानिभूतानीत्यादिश्रुत्याकर्तृत्वंप्रतिपाद्यते ॥ तत्रसंदेहः ब्रह्मकर्तृआहोस्विदकर्तृ इतितत्रायंपूर्वपक्षः ॥ "शेषलक्षणेकर्मफलार्थत्वा"दित्यनेनोपलक्षणविधयाज्ञानस्यापिफलशेषत्वेसिद्धेप्राधान्यंफलस्यैवेतितत्संबंधाद्ब्रह्मविदाप्नोतिपरमितिवाक्यमेवप्रधानं नतुकार्य्यलक्षणंतथा ॥ अतएवतत्त्रचापिविवृतं यदितस्यप्राधान्यंनस्यात्किमितिविवृणुयात्तथासतिज्ञानंफलार्थं फलंचफलवाक्योक्तपरत्वज्ञानादतःपरत्वज्ञानार्थकर्तृत्वंपरविवरणतयोक्तं ॥ स्वरूपलक्षणेप्रापंचिकधर्मराहित्यप्रतीतेर्ब्रह्मणिकर्तृत्वस्याशक्यवचनत्वात् तस्माद्वाएतस्मादित्यादिनायत्कर्तृत्वमुक्तंतज्ज्ञेयात्फलरूपंपरंपृथक्कृत्यतंविवरीतुमुक्तं ॥ तत्स्वरूपजिज्ञासायांसर्वांतरत्वकथनपूर्वकमानंदइतिस्वरूपमुक्तं ॥ अन्यथातन्निरूपणमसंगतस्यात् ॥ सर्वांतरत्वंचतस्यपरत्वनिर्वाहकतयोक्तं ॥ "सर्ववैतेऽन्नमाप्नुवंतियेन्नंब्रह्मोपासत" इत्यादिनाअन्नब्रह्माद्युपासनाफलं "अस्तिब्रह्मेतिचेद्वेदसंतमेनंततोविदुरित्यादिनानुवाकचतुष्टयेनकथितस्यसर्वभयाभावरूपप्रधानफलस्यशेषतयासर्वोत्कृष्टत्वज्ञापनायोक्तमितिकर्तृत्वंपरत्वसिद्ध्यर्थमपिसिध्यति तथापिस्वरूपलक्षणविरोधात्पूर्वकांडोक्तप्रजापतिगतस्यप्रकृतिगतस्यवाकर्तृत्वस्यारोपेणानुवादोपिसंभवतीतिभृगुप्रपाठकेपिफलाश्रवणेनामुख्यस्यात्तत्राप्येवंनेतव्यंतथाचनकर्तृत्वंब्रह्मलक्षणमिति ॥ सिद्धांतस्तुस्यादन्यगतकर्तृत्वारोपानुवादःकार्य्यलक्षणे यदिस्वरूपलक्षणंविरुध्येत तदेवतुन ॥ विवरणार्हपरस्यतृतीयांतेनब्रह्मपदेनैवविवृतत्वात् ॥ नचतत्रवेदहिरण्यगर्भब्राह्मणजातिजीवाअर्थत्वेनग्रहीतुंशक्याः ॥ परपदविवरणत्वात्सांतत्वादिनाब्रह्मापेक्षयोत्कर्षस्यतेष्वशक्यवचनत्वात् ॥ परशब्दस्यान्यार्थकत्वोपगमेपिविवरणोक्तब्रह्मशब्दानुरोधादेतएवपरत्वेनग्राह्यास्तत्प्राप्तिस्तुकर्मणापीतिसाधनांतरेणज्ञानेनकोवाविशेषःस्यात् ॥ अतउत्कृष्ट-

र्थकत्वमादरणीयं ॥ उत्कर्षंचकिमित्यपेक्षायां विवरणानुरोधाद्ब्रह्मांतरंकल्प्यं तच्चाप्रसिद्धं स्वरूपलक्षणहीनंच ॥ नचप्रकृतिः सांख्यमतेपिज्ञानात्मकपुरुषापेक्षयातस्याहीनत्वात्परार्थत्वाच्च अश्रौतत्वस्यवक्ष्यमाणत्वाच्च अतोब्रह्मापेक्षयान्यपरत्वेनवक्तुमशक्यत्वादुक्तलक्षणविशिष्टस्यैवब्रह्मणःकर्तृत्वंवेदेनबोध्यते ॥ नचतदारोपितमितिशक्यंवक्तुं ॥ निरंकुशस्यतस्यान्यत्रासिद्धतायाअनुपदमेववक्ष्यमाणत्वात् ॥ ननुलक्षणद्वयस्यैकपरत्वेसर्वासुश्रुतिष्वेकमेवब्रह्मप्रतिपाद्यंतदा अस्थूलादिवाक्येष्वपितदेवनिरूप्यतइतितन्निर्द्धर्मकत्वसिद्धौकर्तृत्वस्यापिनिषेधइतिचेन्न ॥ अस्थूलादिवाक्येलोकप्रतीताएवप्रतिषिध्यंतेनाप्रतीताःनापिश्रुतिप्रतीताः तस्माल्लौकिककर्तृत्वनिषेधेपिजगत्कर्तृत्वस्य निषेधोनसंभवत्येवश्रुतिप्रतिपादितत्वात् तस्माद्ब्रह्मणएवकर्तृत्वमितिसिद्धांतः ॥ तत्रप्रमाणमाह शास्त्रयोनित्वादित्यंशेन ॥ शास्त्रेयोनिःशास्त्रयोनिःअत्रसप्तम्यावैषयिकमधिकरणत्वंबोध्यते विषयत्वंचप्रतिपाद्यत्वं एवंचशास्त्रप्रतिपाद्यकारणत्वादित्यर्थः ॥ एतेन (किंचोक्तशब्दाध्याहारेऽसामर्थ्यप्रसंगाच्छास्त्रशब्दस्यतदुक्तेर्लक्षणावाच्या तथाचविग्रहोऽनुपपन्न)इतिप्रलपितमपास्तं ॥ शास्तिराजवदाज्ञापयति एवंचतद्विरोधेऽपराधोपिबोधितः ॥ नन्वत्रोत्तरकांडार्थएवविचार्य्यतइति शास्त्रशब्दस्यकुतःप्रयोगइतिचेन्न ॥ पूर्वकांडस्थवाक्यानामपिब्रह्मपरत्वेत्यभिप्रायेणशास्त्रशब्दप्रयोगः ॥ ननुजन्मादिसूत्रस्थेनयतइतिपदेनैवविस्तरणात्शास्त्रप्रमाणकत्वसिद्धौशास्त्रयोनित्वांशोव्यर्थइतिचेन्नयतइत्यस्यहेतुकोटिप्रवेशेजन्माद्यस्येतिभागस्यप्रपंचवृत्तांतपरतयाब्रह्मलक्षणत्वायोगेनासंगतिप्रसंगात् ॥ नचलक्षणेप्रविष्टस्यैवयतःशब्दस्यतच्छ्रुतिसारकत्वमितिवाच्यं ॥ श्रुतिस्थितस्यभूतानीतिपदस्यबहुवचनांतत्वेनतद्विरुद्धतापत्तेर्वाक्यांतरासंग्रहापत्तेश्चेति तस्माच्छास्त्रयोनित्वादितिवक्तव्यमेव ॥ मतांतरवज्जन्मनोनविकारत्वं किंत्वाविर्भावतिरोभावावेव नचप्रकृतिगतकर्तृत्वानुवादोपिसंभवति पूर्वपक्षिमतसिद्धस्यप्रधानस्यशास्त्राप्रतिपाद्यत्वेनतत्कर्तृत्वस्यदूरपराहतत्वात् ॥ तस्माच्छास्त्रोक्तकर्तृत्वंब्रह्मणोन्यत्रनसंभवति अतएव सिद्धसाधनादिवदस्मनभिज्ञएव यदपि (शौण्डादिषुयोनिशब्दस्यपाठाभावेन सप्तमीतियोगविभागस्यभाष्यानारूढत्वेनशास्त्रेयोनिरितिविग्रहेसहसुपेतिसमासोवाच्यः सचागतिकगति) रितितन्न ॥ यदिशौण्डादिगणपठितशब्दैरेवसप्तमीसमासः सर्वप्रस्यास्तदायंदोषः ॥ इत्य-

तेत्वन्यशब्दैरपि अतएव तुल्यास्यप्रयत्नंसवर्णमितिसूत्रभाष्ये "अथवापूर्वस्तत्पुरुषस्ततोबहुव्रीहिः तुल्य आस्ये तुल्यास्यः तुल्यास्यः प्रयत्न एषामिति अथवापरस्तत्पुरुषस्ततोबहुव्रीहिः आस्येप्रयत्नआस्यप्रयत्नः तुल्यआस्यप्रयत्नएषामित्युक्तं ॥ एवंचतुल्यप्रयत्नादिशब्दानांशौंडादिषुपाठाभावात्ससमीति योगविभागेनैवसमासस्तत्रभाष्यकाराभिप्रेतइतिगम्यते एवमत्रापिसमासो भाष्यविरोधाभावात् ॥ किंचत्वन्मतेजन्मादिसूत्रस्य भिन्नत्वेनहेतुशून्यत्वंशास्त्रयोनित्वादित्यस्यचसाध्यशून्यत्वेनातिक्लिष्टतयाऽभिमतासाधकत्वं ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैरितिभगवद्वाक्यात्सूत्रेषुहेतुमत्वस्यावश्यमपेक्षितत्वेजगन्माद्यस्येतिसूत्रेतदभावेभगवद्वाक्यविरोधश्चस्यात् ॥ ननु "उत्क्रांतिगत्यागतीना" मितिसूत्रेहेत्वदर्शनेनसूत्रेषुहेतुबोधकपदघटितत्वमेवेतिनियमोनसंभवतिब्रह्मसूत्रपदैश्चैवेतिभगवद्वाक्ये हेतुपदंकारणपरंप्रयोजनपरंवासूत्राणांकारणानितुविषयवाक्यानिसंत्येवेतिचेन्न" "उत्क्रांतिगत्यागतीना" मितिसूत्रेहेतुवाचकपदाभावेपि "श्रोतएवेति" पूर्वस्मिन्सूत्रेअतएवेतिपदसत्वात्तस्मादतएवेतिहेतुवाचकपदमनुवर्त्यतेऽन्यथासूत्रस्यैकषष्ठ्यंतपदरूपत्वात्तस्यसंबंधस्यकाप्यप्रतीतेरनन्वय एवस्यात् ॥ तथाचअतःश्रुतितएवोत्क्रांतिगत्यागतीनांजीवेश्रवणाद्यथायोग्यंजीवस्यपरिमाणमंगीकर्त्तव्यमित्यर्थः ॥ सूत्रयोजनातुजीवात्मा उत्क्रांतिगत्यागतिसंबंधी ॥ अतएवतद्बोधकश्रुतितएव श्रुतिस्तु "स यदास्माच्छरीरादुत्क्रामतिसहैवैते" सर्वैरुत्क्रामतिये केचास्माल्लोकात्प्रयांतिचंद्रमसमेवतेसर्वेगच्छंति ॥ तस्माल्लोकात्पुनरेत्यस्मैलोकायकर्मण" इति ॥ तादृशसूत्राणांहेतुरहितत्वंहेतुपदस्यचकारणपरत्वंयदुक्तं तदपिनसंगच्छते ॥ हेतुमच्छब्दस्यसकारणकत्वार्थकतयाजन्यैरितिलभ्यते ॥ सूत्राणांजन्यत्वस्यब्रह्मनिश्चयेऽहेतुत्वात्तादृशविशेषणस्यवैयर्थ्यापत्तेः ॥ नहिजन्येनैवनिश्चयोननित्येनेतिनियमोस्ति येनजन्यपदंनित्यव्यावृत्त्यर्थत्वेनसार्थकंस्यात् ॥ जन्यशब्दस्वीकर्तॄनयेब्रह्मसूत्रपदैरित्यनेनैवजन्यत्वलाभेसुतरांतन्निरर्थकमिति ॥ अस्मन्मतेहेतुपदंहेतुत्वप्रतिपादकपंचम्यंतपरंहेतुत्वंचज्ञापकज्ञानविषयत्वं ज्ञापकत्वंनिश्चयजनकत्वं तथाचनिश्चयजनकज्ञानविषयप्रतिपादकपदघटितैर्ब्रह्मसूत्रैरित्यर्थोलभ्यते ॥ एवंचनिश्चायकपदघटितत्वस्यनिश्चयजनकत्वार्थमुपयोगात्तद्विशेषणसार्थक्यं एतेनहेतुमद्भिरित्येतस्येत्यादिकं सर्वमपास्तं ॥ तस्माज्जन्माद्यस्ययतइतिनपृथक्सूत्रं किंतुजन्माद्यस्ययतःशास्त्रयोनित्वादित्येकमेव ॥ नचोक्तापदाध्याहारकल्पनेगौरव-

मेतिवाच्यं समन्यायविषयत्वार्थकत्वेनपरिहृतत्वात् ॥ यदपि (तत्तुसमन्वयादित्यत्रान्वयादित्यस्यसम्यगनुवृत्तत्वादनारोपितागन्तुकरूपेणान्वयादितितद्व्याख्यानेतादृगर्थेलक्षणामानमन्वेष्य) मित्युक्तंतदपिसमन्वयशब्दस्यसम्यगन्वयबोधकत्वंनसंभवतीत्यभिप्रायेणवा? नाद्यः उपसर्गसमभिव्याहृतधातोरनेकार्थबोधकत्वस्यासर्वसंमतत्वात् ॥ अतएवोक्तं उपसर्गेणधात्वर्थोबलादन्यत्रनीयतइत्यादि ॥ नापिद्वितीयः सम्यक्त्वविवरणरूपत्वात् ॥ अन्यथात्वन्मतेपिसर्वेषांवेदांतवाक्यानांतात्पर्येणास्मिन्नर्थेऽन्वयादिति व्याख्यानमपिमानाभावान्नस्यात् ॥ किंचत्वन्मतेशास्त्रयोनित्वपूर्वपक्षनिरासार्थंतत्तुसमन्वयादितिसूत्रंतच्चनसंभवति ॥ सर्वस्यवेदस्यब्रह्मण्यन्वयासंभवात् पूर्वकांडस्यक्रियार्थत्वादेकशास्त्रानुरोधादुत्तरकांडस्यपूर्वशेषताकुतोनस्यात् ॥ नचवैपरीत्यंशंकनीयं ॥ सिद्धेब्रह्मणिसाध्यार्थानांवाक्यानामन्वयायोगात् ॥ नचप्रापकत्वेनान्वयः तत्तद्वाक्यगतफलोक्तिबाधाप्रसंगात् अस्तुवाकथंचित्समन्वयस्तथापिप्रतिपादनीयत्वेसाध्यःसः नहिसंदिग्धस्यहेतुत्वंसंभवतिसिद्धस्यैवहेतुत्वात् ॥ किंचसमन्वयस्यासिद्धत्वेग्रिमसूत्राणांवैयर्थ्यंस्यात् ॥ तस्मात्त्वन्मतेतादृशसूत्रमसंगतमेव ॥

सहस्राक्षे प्रकारांतरमाहेत्यादिप्रसंगागतेनेत्यंतंभागंदूषयंतियत्तुशुद्धेउपादानत्वमित्यादिनासूत्रमसंगतमेवेत्यंतेन ॥ अयंभावःयत्तुशुद्धेउपादानत्वंनास्तिकिंतर्हिशबलेइत्याद्युक्तंतत्तुप्रसिद्धासुशंकराचार्यैरपिव्याख्यातास्वीशावास्यादिदशोपनिषत्सुभगवद्गीतायांसमग्रायांचतुर्लक्षण्यांचैकत्रापिशबलब्रह्मणोकथनात्तत्परशबलशब्दस्याप्यनुच्चारणाच्चतस्यैवनिर्मूलत्वपासकलंनिर्मूलं ॥ यदिचतत्रतत्स्यात्तर्ह्येकामपितदर्थकशबलशब्दघटितांत्वदाचार्यादिव्याख्यातप्रसिद्धोपनिषत्स्थांश्रुतिंभगवद्वाक्यंवाप्रदर्शय ॥ यदिचव्यासस्यतथासिद्धांतःस्यात्तर्हिसर्वसंदेहवारणायप्रवृत्तोभगवान्कथंनैकमपितद्बोधकंसूत्रंप्रणयेत ॥ तस्मात्त्वेवलकपोलकल्पितएवायंशबलवादः ॥ किंचशबलेऽपित्वद्रीत्याब्रह्मांशस्योपादानत्वायोगात्उपाधावेवांततस्तद्वाच्यमतएवमायैववोपादानमितित्वयैवावधारितं ॥ तथाचतदेवस्पष्टमुच्यतां ॥ अद्यमसंदिग्धब्रह्मकारणताबोधकश्रुतिषुश्रद्धानत्तांप्रतारणायशबलाख्यब्रह्मविशेषस्योपादानत्वमितिप्रवादेन ॥ नापिशुद्धस्यतत्रानुगतत्वंसंभवति उपाधेस्तुच्छत्वात् ॥ नहिकल्पित-

---

प्रकारान्तरमाह ॥ शाखेन्दुवदिति ॥ शुद्धे उपादानत्वं नास्ति किंतर्हि शबलेशबलगतं चोपादानत्वंतदनुगतस्य शुद्धस्य लक्षणं शाखेव चन्द्रस्य ॥ मायैववोपादानं तद्गतं चोपादानत्वं तदधिष्ठानस्य लक्षणम् ॥ एतेन निर्गुणब्रह्मजिज्ञासां प्रतिज्ञाय सगुणब्रह्मणोमायायावा लक्षणकथने व्यासस्य प्रतिज्ञाहान्युपक्रमविरोधौ स्यातामिति जन्माद्यस्येतिसूत्रंनिर्गुणलक्षणपरतया व्याख्येयं तथा च तद्विरोधदलमपास्तं ॥ शाखाचन्द्रवन्निर्गुणतटस्थलक्षणताया एवस्वीकारात् ॥ अत्र शुद्धकारणत्वपक्षे तदैक्षतबहुस्यांप्रजायेयेत्यत्र प्रकृतः सत्पदार्थः परामृश्यते तस्य बहु-

भावोमायया नहि मायारूपसहकारिसमवधानऐन्द्रजालिकस्य तथाभावोगौणोद्वैतापादकोवा ॥ शबलकारणत्वपक्षेऽपि ऐन्द्रजालिकपरतच्छब्दघटिते सऐक्षतसिंहोभवेयमिति वाक्यइव तच्छब्देन सत्पदार्थस्यैव परामर्शईक्षणंच मुख्यमेव नतु ताआपऐक्षन्तेतिवद्गौणं ॥ एवं-मायामात्रहेतुत्वपक्षेऽपि सत्पदार्थस्यैव तच्छब्दवाच्यत्वमीक्षणच तेचमुख्ये एव परन्तु सेना-ऽभिप्रायेण यथा राज्ञोयोहस्ये इतिवाक्यमौपचारिकंतथामायाभिप्रायेणबहुस्यामित्यौपचा-रिकम् ॥ सेयंदेवितैक्षतहन्ताहमिमास्तिस्रोदेवताअनेनजीवेनात्मनानुप्रविश्यनामरूपेव्याकर-वाणीतिवाक्येऽपि सेयंदेवतैक्षताहंआत्मनाशब्दार्थामुख्याएव ॥ जीवाऽभेदोऽपि मुख्यः नामरूपव्याकरणमेवशुद्धऔपचारिकमिति गौणश्चेन्नात्मशब्दात् तन्निष्ठस्यमोक्षोपदेशात् हेय-त्वावचनाच्चेतिसूत्रत्रयस्य विरोधोनास्माकं किन्तुसाङ्ख्यमतखण्डनपरमेवतत् ॥ तन्मतईश्वरा-भावेनोक्तरीत्या योजनायाअसम्भवात् ॥ मायाकारणत्वपरबहुवाक्यबलेनेश्वरहेतुत्ववादिनीना श्रुतीना जन्मादिसूत्रस्यच केवलमौपचारिकत्वम् ॥ यथात्वन्मतेअक्षरब्रह्मणोहेतुत्वेन पुरुषोत्त-ममुपक्रम्य कारणत्ववादिनीना तत्रौपचारिकत्वमिति पुरुषोत्तमजिज्ञासा प्रतिज्ञाय पठितस्य जन्माद्यस्ययतइत्यस्याऽपि तथात्वम् ॥ ॥ १२ ॥ यत्तु टीकाया प्रकृतिगतं कर्तृत्वं ब्रह्मण्या-रोप्यते ॥ एष भृगुर्वैवारुणिरित्यत्राऽपि गौणमेवकर्तृत्वमनूद्यतइति पूर्वपक्षेऽस्माकंमत न्यस्य जन्माद्यस्ययत शास्त्रयोनित्वात् इतिसूत्रमेकं कृत्वावतारितं ॥ अस्य प्रत्यक्षस्य जगतोजन्मा-दिजन्मस्थितिलया यतस्तत्कर्तृ कुत. शास्त्रयोनित्वात् शास्त्रं योनि· शास्त्रयोनिस्तस्य भावः शास्त्रयोनित्व तस्माच्छास्त्रोक्तकारणत्वादित्यर्थइतिव्याचख्यौ—तन्नसम्यक्; तथाव्याख्याने हि जगज्जन्माद्याश्रयस्य शास्त्रोक्तकारणत्वेन हेतुनाकर्तृत्वमात्रमनेन सूत्रेण साध्यते ॥ तथाच पूर्वपक्षिणा भृगुर्वैवारुणिरित्यत्राऽपि ब्रह्मणि प्रकृतिस्थं गौणमेव कर्तृत्वमनूद्यतेइतिचेदुक्तं तर्हि-जगज्जन्मादिक प्रकृतेरन्यत्रास्थापयित्वा प्रवृत्तेनाऽनेन सूत्रेण प्रकृतावेवकर्तृत्वमपि साध्यते इत्यापतति ॥ जीवेशावाभासेनकरोति मायातुप्रकृतिंविद्यादिन्द्रोमायाभि पुरुरूपईयतइत्यादि-शास्त्रै प्रकृतौ कारणत्वस्योक्तत्वात् प्रकृतिनिष्ठकर्तृत्वस्य बोधने च जीवेशावितिश्रुतिरूपष्टंभि कारणात् ॥ सिद्धसाधन चैवंव्याख्याने स्यात्कर्तृत्वस्यपूर्वपक्षिणा स्वीकृतत्वात् ॥ तथाच सुव्याख्याता ब्रह्मजिज्ञासाप्रतिज्ञोपपत्ति ॥ तस्माद्ब्रह्मजिज्ञासा प्रतिज्ञाय ब्रह्मलक्षणमात्रमने-नोक्तवान् इतियुक्तं ॥ यथा पूर्वकाण्डेऽथातोधर्मजिज्ञासेतिधर्मजिज्ञासा प्रतिज्ञाय चोदनाल-क्षणोऽर्थोधर्मइत्यनेन धर्मलक्षणमात्रमुक्तं तद्वत् ॥ ब्रह्मपदस्य तत्रविशेषणत्वेऽपि पटोलपत्रं-पित्तघ्नंमूलंतस्यविरेचनमित्यादिष्विव मुख्यासन्निकृष्टत्वाद्यच्छब्दापेक्षिततच्छब्देन युक्तः परामर्शः ॥ कर्तृपदाध्याहारस्त्वत्यन्तासन्निकर्षाद्युक्त ॥ किञ्च शौण्डादिषु योनिशब्दस्य पाठा-वेन सप्तमीतियोगविभागस्य भाष्यानारूढत्वेन शास्त्रयोनिरिति विग्रहे सहसुपेतिसमासोवाच्य· सचागतिकगति. ॥ किञ्चोक्तशब्दाऽध्याहारेऽसामर्थ्यप्रसङ्गाच्छास्त्रशब्दस्य तदुक्ते लक्षणा वाच्या तथाच विग्रहोऽनुपपन्नः ॥ उत्क्रान्तिगत्यागतीनामित्यादिषु हेत्वदर्शनेन सूत्रेषु हेतु-बोधिपदघटितत्वनियमोनयुक्तः ॥ ब्रह्मसूत्रपदैर्श्चैव हेतुमद्भिरित्यत्र हेतुपदं कारणपरं प्रयोजन-परंवा ॥ सूत्राणां कारणानितु विषयवाक्यानि ॥ किञ्चात्र हेतुमद्भिरित्येतद्ब्रह्मसूत्रपदैरित्यस्य

रजतेशुक्तिरनुगताभवति ॥ अन्यथाताऽऽद्वाच्छन्नतयासर्वस्तत्रजतप्रत्ययावश्यंभावापाता- त् ॥ नापिगंधर्वनगरंकोपिप्रवेष्टुमीष्टे ॥ अतोऽननुगततयाशुद्धस्यवत्तदस्यलक्षणंभवितुंनार्हे तिशाखाचन्द्रदृष्टांतस्तुनिराकरिष्यते ॥ यच्चमायैवनोपादानमित्यादितत्तुच्छंसाजगदुपादान मितिबोधिकायाएकस्याअपिप्रसिद्धोपनिषच्छ्रुतेर्भगवद्वाक्यस्मृतेश्चानुपलंभात्भगवतासूत्र कृताचैतावत्स्वधिकरणेपुनैकमपितत् *मायायाजगदुपादानत्वसाधकमाणायि ॥ यदितथासो-* भिप्रैष्यत्कथंनप्राणेप्यजीवेचराचरभावभावित्वात्सम्पदेशस्यैवभाक्तत्वंचब्रह्मण्युपादानत्वा- द्भिन्यपदेशास्यकंठरवेणकथंनावक्ष्यत् ॥ वस्तुितत्रतत्रमायाया कारणत्वादिनिषेधमेव ॥ तद्यथा त्वद्वीत्याप्रथमस्यप्रथमेसू. ५ "ईक्षतेर्नाशब्द" मितिप्रकृते. कारणत्वंनिरस्तं । आनंदमयाधिकरणेपि *"कामाच्चनानुमानापेक्षे"* तिजडायास्तस्या *कामासंभवात्तन्निरस्तं ॥* तेन "सोकामयत ॥ आनंदाद्ध्येव" इत्यादौब्रह्मणएवकारणता ॥ यच्चमुंडके "तथाऽक्षरा" दित्याद्युक्तं तत्रापिब्रह्मण एवकारणतेतितत्स्यद्वितीये सू० २२ "विशेषणभेदव्यपदेशाभ्यां- चनेतरौ" इतितस्यास्तदपास्त ॥ यदिचमासनोपादानस्यात् ॥ द्युभ्वाद्यायतनत्वं तस्याएव- स्यात् । यस्तुतस्तुतृतीयेब्रह्मणएवतथात्वंसाधयित्वा सू० ३ "नानुमानमतच्छब्दात्" इत्यादिनाप्रकृतेस्तन्निराकृतं ॥ यच्चसर्वसूत्राधाश्रयोक्षरवेदेपुतत्रतत्रपठ्यते तदपिसाचेत्स्या- स्स्यात्तस्यास्तत्वं । तदपिवारयितुमाकाशांतधारणमेवहेतूकृत्य ब्रह्मैवाक्षरमितिसमर्थितं सू० १० "अक्षरमंबरांतधृते" इत्यादिना ॥ यदिचतथाभिप्रेतंस्यात्तर्हितत्साधकानीवप्रतीयमा- नान्यक्षरवाक्यानिनैवंनिर्णीयेरन् तदनुगतब्रह्मसंबंधादुपचारव प्रशासनस्याप्युपपत्ते. निर्वि- शेषवादिनात्वयाततोप्युपचारस्यैववाच्यत्वात् ॥ दहराधिकरणेचासकृत्त्वाद्दहादोप्यपाकृत ॥ अव्यक्तकारणताबोधकवाक्यानामपिमायापरतानिरासायकठवाक्येष्वव्यक्तमपिब्रह्मैवेतितुरी- यआनुमानिकाधिकरणेस्थापयित्वा "अजामेका लोहितशुक्लकृष्णा" इतितत्साधकाभास- स्याप्यन्यथानिर्णय. सू० ८ "चमसवदविशेषा" दित्यादिनाप्रदर्शितइतिदिक् ॥ एवमप्रेपित- त्रतत्रस्पष्टमेवेदमित्यलंसकलब्रह्ममीमांसाविलेखनप्रयासेन ॥ किंतुश्रुतिषुतत्रतत्रशुद्धब्रह्मण एवोपादानत्वमाम्नायते "सहैतावानास ॥ तदात्मानँ स्वयमकुरुत" ॥ इत्यादौ ॥ नतत्र- शबलस्यमायायावानामाप्यस्ति ॥ स्मृतिषुचअहंसर्वस्यप्रभव ॥ वासुदेव सर्वमिति । एकां- शेनस्थितोजगत् । *अव्यक्ताद्व्यक्तय सर्वा । कूटस्थोक्षरउच्यते । एवमादिषुतदेवोच्यते ।* मायायास्तुव्यामोहकत्वमात्रंतत्र नतुजगदुपादानत्वादि ॥ सूत्रेष्वप्यारभएवजिज्ञास्यंब्रह्म-

---

पदान्तप्रकृतिकसुबन्तस्य विशेषणमिति प्रतिपद हेतो पञ्चम्यन्तस्य कल्पनाया प्रयासस्तस्या- श्रवसा सम्भवति अस्माकतु नकाप्यनुपपत्ति ॥ यद्धेतुकत्व वाक्यस्य तद्धेतुक्तायाः पदेपि सत्वात् ॥ एतेन हेतुरहितत्वाज्जन्मादस्यथत इति न पृथक्सूत्र किन्तु शास्त्रयोनित्वादित्य- नेन मिलितमेवंच तत्राऽपि साध्यलाभइत्यपास्तम् ॥ एवंच शास्त्रयोनित्वादितिसूत्रमपि साध्या- ध्याहारेण योज्यम् ॥ एवं तत्तुसमन्वयादित्यत्र समन्वयादित्यस्य सम्यगनुवृत्तत्वात् ॥ अनारोपिताऽनागन्तुकरूपेणाऽन्वयादिति तद्व्याख्याने तादृगर्थे लक्षणायां मानमन्वेष्यम् ॥ इत्यलम्प्रसङ्गागतेन ॥ १३ ॥

किंलक्षणकंकिंप्रमाणकंचेत्याकांक्षायां "जन्माद्यस्ययतःशास्त्रयोनित्वात्" इत्युक्त्वाकिंजगतोनिमित्तमात्रंतदुतोपादानमपितदेवेतिसंशयेनिमित्तमात्रमितिपूर्वपक्षउपादानमपितदेवेतिसमर्थयितुमुक्तं "तत्तुसमन्वयात्" इति ॥ अधिकरणांतराण्यपिवक्ष्यामःकिंचकल्पितायामायायाउपादानत्वमप्यशक्यं ॥ नहिकल्पितरजतंभूषणभाजनाद्युपादानंभवति ॥ ब्रह्मभिन्नकल्पकस्यसंस्कारसादृश्ययोश्चाभावात्तत्कल्पनस्यैवासिध्याब्रह्मणोधिष्ठानत्वमप्यशक्यं वक्तुं सर्वथानिर्विशेषत्वाच्च ॥ नापिरज्जावविद्यमानंकल्पितभुजंगएवभासमानंतीव्रविषत्वमंत्रनियम्यत्वादिकंतदधिष्ठानस्यरज्जोःकथंचिदपिलक्षणंभवतियावल्लक्षणज्ञानंलक्ष्यस्याधिष्ठानस्याज्ञानात् अधिष्ठानज्ञानेसतिलक्षणस्यैवनाशाच्च ॥ एतेनब्रह्मत्वंचोपादानत्वंतदधिष्ठानस्यलक्षणमितिनिरस्तं ॥ तदेतदभिसंधायाहुः तदसदित्यादिनाशुद्धेति सूत्रयोःशबलपरतायाः सूत्राक्षरैरलाभात्शबलबोधकपदाभावात्शंकराचार्यैःश्रुतत्वाच्चेत्यंतैकादशसूत्र्याः निर्गुणब्रह्मपरत्वंततउत्तरस्यग्रंथस्य सगुणपरत्वमितिस्वयमेव भाष्येविभागाच्चशुद्धस्यैवतादिति । सिध्यति विभागानंगीकारेपिजिज्ञासितस्यशुद्धस्यैवउपास्यत्वंतत्वंचस्यात् ॥ श्रूयतइति असंकुचितंकारणत्वमितिशेषः ॥ तेनसमवाय्यादिविविधमपितदेवास्त्वितिभावः ॥ यतइतीति इदं तस्माद्वाएतस्मादात्मनइत्यादेरुपलक्षणं ॥ हेताविति भावभाषागुणेऽस्त्रिया" मित्यत्रविभाषेतियोविभागादगुणेपिहेतौ पंचमी ॥ उपादानवाचकेति यतोवाइत्यादिवाक्येष्वितिशेषः ॥ तद्ब्रह्मेवेति तत्प्रसिद्धं अनुभूतंवासमवायिकारणं ब्रह्मैवेत्यन्वयः ॥ सम्यगन्वयरूपहेतुबलात् ॥ तच्छब्दस्योक्तएवार्थः प्रतीयते ॥ किंचपूर्वसूत्रेजन्मादिहेतुत्वमुक्तं तत्रादिपदोपात्तस्थितिप्रलयाभिसंवेशानां केवलनिमित्तत्वेसत्यसंभवः कुलालदंडादौ तथाऽदर्शनात् अतः पूर्वसूत्रएवासंकुचितकारणत्वं विवक्षितमतोपिसएवतच्छब्दार्थः नचैवंपूर्वेणगतार्थताशंक्या भाष्यस्यपूर्वपक्षउक्तदोषाणामानपायेनघटादौ मृदाद्यन्वयस्यैव जगतिब्रह्मान्वयस्याऽननुभवे स्थित्यादिवाक्यउपचारशंकाऽनपगमेन च सामान्यविशेषभावसंगत्यापुनः समवायित्वदृढीकरणस्यावश्यकत्वात् ॥ सम्यगनुवृत्तत्वादित्यादि इमांभाष्यपंक्तिप्रकाशकाराः "ननुसम्यगनुवृत्तत्वमनारोपितानागंतुकरूपेणसर्वैर्लक्षीकृत्यवर्तमानत्वं तज्जगतिब्रह्मणःकथं नहिजगतिब्रह्मणोऽनारोपिताऽनागंतुकेनब्रह्मत्वेनरूपेणान्वयोवगम्यते। यथापटेतंतोर्घटेमृदइत्याकांक्षायां तदाहुः। अस्तीत्यादि ॥ तेषुतेषुवस्तुषुतत्तद्रूपप्रतीतिविषयेणास्तित्वादिधर्मेणाऽवगम्यमानात्सदादिरूपेणान्वयात् । योहियदन्वितः सस्वस्मिंस्तद्विषयांप्रतीतिमाधत्ते यथाघटादिः पृथिवीत्यादिप्रतीतिः तथाऽसर्वमस्तीत्यादिप्रतीतिजनकत्वात्सदाद्यन्वितं ततश्चसदाद्यात्मकं ॥ सच्चिदानंदात्मकंचब्रह्मेतितेनरूपेणब्रह्मान्वयोवगम्यतएवेत्यर्थः" इतिव्याचक्षते ॥ ब्रह्मत्वंच "सत्यंज्ञानमनंतंब्रह्मसत्यं विज्ञानमानंदंब्रह्म सच्चिदानंदरूपाय कृष्णायाक्लिष्टकर्मणे" इत्यादिश्रुतिभ्यः सच्चिदानंदत्वमेव ॥ अतस्तेनरूपेणान्वयसिद्धात्तदेवसमवायिकारणंसिद्धं ॥ सूत्रेऽयमेव समन्वयशब्दार्थोव्यासाभिप्रेतइति ज्ञायतेतेनैवजन्माद्यस्ययतोन्वयादितरतश्चार्थेष्वभिज्ञः स्वराडितिश्रीभागवतारंभश्लोकेस्वद्वितीयसूत्रांशमनूद्य अन्वयादितिस्पष्टं समवायिकारणताबोधनात् तत्रैवाग्रे अन्वयव्यतिरेकाभ्यत्यस्यात्सर्वंयत्सर्वंदत्यादावसकृदन्वयस्यापिकथनात् समन्वयेनव्यतिरेकतश्चेतिस्फुटमुक्तार्थ-

कसमन्वयशब्दस्यस्वयमुपादानाच्च ॥ अतस्तस्यसूत्रेपिसएवार्थः व्यतिरेकोपिसूत्रेदनीक्षत्यानं-दमयाद्यधिकरणेपुतन्निष्ठमोक्षोपदेशात्तद्धेतुव्यपदेशादिना इतरस्यतन्निषेधेनचसिद्धएव ॥ जडेत्यादिजडेसदंशस्य जीवेचिदंशस्य अन्तर्यामिण्यानंदांशस्य च प्राकट्यंप्राधान्येनानुभवः ॥ वस्तुतस्तुसर्वत्रत्रयाणामप्यंशानांतारतम्येनान्वयः ॥ अत्रविस्तरस्तुभाष्यनिबंधतत्त्वव्याख्यानादिषुध्येयः ॥ सुगमप्रक्रियातुशुद्धाद्वैतमार्तंडेमदीयवेदांतचिंतामणेस्तृतीयप्रकरणे चज्ञेया ॥ तत्तदंशमात्रस्यतत्रप्राकट्येमानंतुनृसिंहोत्तरतापनीयनत्रमरंत्रादावधेयम् ॥ अत्रापि तत्किंसमवायिनिमित्तं कर्तृवेत्यारभ्यएतदवधि समन्वयसूत्रभाष्यमेवकिंचिदक्षरशोर्थतश्चानूदितम् ॥ एवमग्रेप्यस्मिन्खंडेजन्मादिसूत्रभाष्यंतत्रत्यप्रकाशश्चयथोचितमेकीकृत्याक्षरशोर्थतश्चाऽनुवदिष्यतेऽतःसर्वमस्माकमाकरसिद्धमेवोच्यते नतुसहस्राक्षकारवत् स्वभाष्याद्युल्लंघ्यस्वकपोलकल्पितमितिध्येयम् ॥ किंचयदिमायैवजगदुपादानंस्यात्तर्हि सर्वत्रमायात्वमलीकत्वनियमेनप्रतीयेत ॥ नत्वेवंप्रतीयतेनापिप्रमाविषयेपुप्रापंचिकघटादिषुत्वदतिरिक्तास्तार्किकादयोप्यलीकत्वंमन्यंते ॥ अतोनसातथेत्याहुः—अलीकत्वेति ॥ सूत्रकृतातत्रतत्रनिराकृतत्वादपिनतथा ॥ निराकरणंतुदिङ्मात्रेणदर्शितम् ॥ नचेदंसर्वसांख्यमात्रपरमितिवाच्यं तुल्ययुक्त्यातत्रापिनिरासस्यानपायात् ॥ तर्कपादेप्यर्द्धवैनाशिकयोःप्रक्रियानिराकरणेन आधुनिकविलक्षणार्धवैनाशिकानांजैन्याद्यर्वाचीनवैनाशिकानांचतुल्ययुक्त्यानिराकरणंयथासर्वसमतंतथात्रापि ॥ मायांतुप्रकृतिंविद्यादित्यादिवाक्यैःप्रकृतिमायाशब्दयोःपर्यायत्वाच्च ॥ अन्यथासांख्यंनिराकृत्यब्रह्मणएवकारणतांन स्थापयेत् अग्रेचत्वत्संमतस्वरूपांमायांस्फुटमुपपाद्यतस्यास्तथात्वंसाधयेत् ॥ नत्वेवंदृश्यते । अतस्तत्रापितत्तदधिकरणतोनिरासोनवारयितुंशक्यः ॥ किंचतथासिद्धांतेसतिप्रकृतिकारणवादवारणेकोऽयंभगवतोनिर्बंधः ॥ किंतुपुरुषानेकत्वमात्रनिराकार्यंप्रकृतेश्चालीकत्वमेवसाधनीयम् ॥ प्रकृतेरेवोपादानत्वमनादेरपितस्यामुक्तपुरुषेसंसर्गाभावःपुरुषस्यप्रकृतिविकृतिभिन्नत्वंनिर्लेपत्वंचेत्यादिकंतुप्रायेणतुल्यमेव ॥ स्थापयतितुतत्रतत्रप्रकृतिंनिरस्यपरस्यैव सर्वविधकारणतांमायायाश्चनामापिप्रपंचोत्पत्तिविचारे नोच्चारयति ततोनिश्चीयते नमायावादगंधोऽपिश्रीव्यासाशयगोचरइति ॥ तदात्मानमिति ॥ ब्रह्मवल्ल्यां "तदात्मानँ स्वयमकुरुततस्मात्तत्सुकृतमुच्यतइति" इतिपठ्यते ॥ आदिपदात् "सद्वितीयमैच्छत्सहैतानानास । ससर्वमभवत् ॥ सच्चत्यच्चाभवत् ॥ सर्वंखल्विदंब्रह्मतज्जलान्" इत्याद्याःश्रुतयोज्ञेयाः ॥ अतोब्रह्मैवोपादनं नतुमाया एषुक्वाप्यनुल्लेखात् ॥ एवंसूत्रेषु (अ० १ पा० ४ सू० २३) "प्रकृतिश्चप्रतिज्ञादृष्टांतानुपरोधात् ।" (अ० २ पा० १ सू० २३) "अश्मादिवच्चतदनुपपत्तिः" इत्यादीनिद्रष्टव्यानि ॥ विस्तरभयादिह नप्रपंच्यंते ॥ तदुक्तंशाखाचंद्रदृष्टांतंदूषयंति—नचशाखेत्यादिना । अयंभावः—एकत्रवास्तवमेवपरत्रावास्तवमपिलक्षणंभवति ॥ शाखाहिवृक्षस्यवास्तवंज्ञापकंसाचंद्रमसआगंतुकंतद्भवति ॥ कारणत्वंतुक्वापिनवास्तवमितिब्रह्मणआरोपितलक्षणमपिशाखावत्कथंस्यात् ॥ किंचचंद्रंदिदृक्षमाणंप्रति स्वयंचन्द्रंदृष्टवतापूर्वंचंद्रएवांगुल्यानिर्दिश्यते ॥ ततोप्यदर्शने शाखाप्रदर्श्यते नतुचंद्रदर्शनार्थंनियमेनशाखाप्रदर्शनमावश्यकमितिसिद्ध्यति ॥ अत्रतु

यतोवाइतिलक्षणशाखास्थानीयं ॥ तत्र "भृगुर्वैवारुणि । वरुणपितरमुपससार ॥
अधीहिभगवोब्रह्मेति" इतिभृगुणाब्रह्मस्वरूपेपृष्टेतदपित्रावरुणेन "यतोवाइमानिभूतानि-
जायते । येनजातानिजीवन्तियत्प्रयंत्यभिसंविशन्तितद्विजिज्ञासस्वतद्ब्रह्मेति" इत्येवोक्त
नतुप्रथमतोब्रह्मस्वरूपत्वद्वीत्यायास्तवकिंचिदुक्त ॥ एवंसर्ववेदान्तनिर्णयार्थप्रवृत्तेनसूत्रकारे-
णापिब्रह्मजिज्ञासाप्रतिज्ञायजन्माद्यस्ययतइत्येवासंदिग्धमुक्तं ॥ नाप्यग्रेगत्वावत्यक्त ॥
किंतुयत्रयत्रश्रुतिषुतत्तत्संदिग्धतत्तभागनिर्णीयतत्सुदृढीकृत ॥ नहिकर्तृत्वादिनिषेधकमेकम-
प्यधिकरणमस्ति ॥ शाखात्वमग्रेगत्वाल्याज्यतएव ॥ प्रदर्शयंतेचशुद्धचन्द्र ॥ भृगुपित्रेत्यादि ॥
अत्रतुवरुणेनउपसन्नस्यपुत्रप्रतियतोवाइत्येवोक्त ॥ तेनचान्नादिषुलौकिकेषुविभूतिरूपेषुवा-
ब्रह्मत्वेनज्ञातेषुभूयोभूय पित्रातपएवोपदिष्ट ॥ उत्तमाधिकारिणस्तस्यापरितोषात्पुन पुन-
रुपसत्तिश्चदर्शिता ॥ सिद्धेतप परिपाके "आनंदोब्रह्मेतिव्यजानात् । आनंदाद्ध्येव-
खल्विमानिभूतानिजायते" इत्यादिनातल्लक्षणकएवानंदरूपेब्रह्मणिज्ञातेतत्त्ववत परितोषात्न
पुनरुपसत्ति ॥ अप्रतारकेणवरुणेनचनकिंचिदन्यदुपदिष्ट ॥ किंतुवेदेन "सैषाभार्गवी
वारुणीविद्यापरमेव्योमन्प्रतिष्ठिता" इत्यादिनाविद्याया उपसंहार ब्रह्मधामस्थत्वतत्फलानि-
चदर्शितानि ॥ यदिचंद्रवदन्यत्स्यात् इदंचशाखावद्ध्येयतर्हिपरमोत्तमस्य भृगोर्नैतन्मात्र
लक्षणकब्रह्मज्ञानमुपपद्येत ॥ तदनुपदेशेवरुणस्यप्रतारकत्वंचस्यात् । उपसंहारश्चनघटेत
विद्यात्वपरमव्योमप्रतिष्ठितत्वंचतादृशसंवादस्यनसंगच्छेत ॥ एवमुद्दकश्वेतकेतुविद्यादिषु-
विद्यांतरेष्वपिज्ञेयं ॥ शाखावत् अग्रेगत्वापिकर्तृत्वस्यहेयत्वाभावादेव सूत्रकारस्तस्य वेदेष्वपि
हेयत्वस्यानाम्नानवक्ति "हेयत्ववचनाच्चेति" अतोनकर्तृत्वेकथंचिदपिशाखाचंद्रन्याया-
वतार ॥ अतएवत्वन्मते व्यासस्यप्रतिज्ञाहान्युपक्रमविरोधावपिसुस्थौ । तथाहि अथातो-
ब्रह्मजिज्ञासेत्यत्रकिंसगुणस्यजिज्ञासाप्रतिज्ञायतआहोस्विन्निर्गुणस्य ? नाद्य । निर्गुणस्यतत्त्व-
सूत्रासमतत्त्वापत्त्याऽनादरणीयत्वप्रसंगात् ब्रह्मणोज्ञातुमिच्छाकर्तव्येतित्वन्मतेर्थांगीका-
रेण सगुणपरत्वेसर्ववेदतत्त्वनिर्णयार्थंप्रवृत्तस्य सर्ववेदव्यासकर्तुर्वेदव्यासस्यापिनिर्गुणज्ञान
मनिष्टमित्यवैदिकनिर्मूलस्यात् ॥ अग्रेत्वदभिमतेनिर्गुणनिरूपणे अप्रतिज्ञातनिरूपणंचाऽप
द्येत ॥ द्वितीयश्चन्निर्गुणजिज्ञासाप्रतिज्ञायमायायाव्यवहितसगुणलक्षणमेववदतस्तस्यप्रतिज्ञा
हान्युपक्रमविरोधौस्यातामेव ॥ नचशाखाचंद्रवन्निर्गुणतटस्थलक्षणताऽस्यस्वीकर्तुंशक्या ॥
तच्छायनिरासात् तथाव्यासाशयेगमकाभावात् अनुपदकथनेनसाक्षाल्लक्षणतायाएवप्रतीते ॥
अन्यथापूर्वतंत्रे "चोदनालक्षणोर्थोधर्म" इतिलक्षणमपि शाखाचंद्रवदारोपितमिति
शक्येतवक्तुम् ॥ नहीदकस्यापिसमतमतस्तद्वदिदमपि अनारोपितलक्षणमेवसिद्ध्यति ॥
किंचतथासतिब्रह्मजिज्ञासाप्रतिज्ञायव्यास –द्वेब्रह्मणीसगुणनिर्गुणंच तत्रजन्माद्यस्यतत्सस-
गुणमायैवचा तदधिष्ठानतु निर्गुण पूर्वपरस्यतटस्थलक्षण शाखाचन्द्रवत् इत्येवक्रमेणासूत्र-
यत् ॥ नचकिंचिदपितथावदत्यतस्तादृशप्रक्रियाकल्पन सर्वथाव्यासानभिमतनिर्मूलमेव ॥
शुद्धत्वहानिरिति ॥ त्वदभिमतशुद्धत्वस्यसेत्यर्थं ॥ श्रुतइति ॥ "यथासोम्यैकेनमृत्पिंडेन
एकेनलोहमणिना" इत्यादिनाश्रुत ॥ सर्वमपास्तमिति ॥ किंच ऐंद्रजालिकस्य सिंहादिभाव
केवलमायिकोनतुस्वरूपतोमृदादिवत्सिंहादिभावोऽतोगौणतातत्रास्त्येवयद्वदृष्टीनां तथा

प्रतीतेरेवस्वीकारात् ॥ एतेनसहकारित्वकथनमप्यपास्तं ॥ द्वैतापत्तिरपितत्रास्त्येव ऐंद्रजालिकस्यमायायांतस्यशक्तित्वेंगीक्रियमाणेऽपिशक्तिशक्तिमतोर्भेदस्यत्वयोक्तत्वात् ॥ पदार्थांतरत्वेसुतरांसा ॥ तद्दर्शितवस्तूनांमिथ्यात्वेऽपितस्यानास्तवत्वात् ॥ शबलकारणत्व-पक्षेतस्यैवपरामर्शोयोग्यः । अन्यथातस्मिन्कारणताकथनस्यैवव्याघातापातात् ॥ "ताआप-ऐक्षंत" इत्यादावपितद्रूपेणपरिणतस्यब्रह्मणएवेक्षणमतोनगौणं । प्रथमस्यतेजोवाक्यस्या-प्यानुपादानेबीजंचिंत्यं ॥ यच्च मायामात्रेत्यादि । तदत्यंततुच्छं ईक्षणंब्रह्मकर्तृकंमुख्यंचेति स्वीकारेमात्रपदविरोधात् ॥ शुद्धस्यसविशेषत्वापत्तेश्च ॥ एवंसत्तच्छब्दवाच्यत्वेपिमुख्ये तदापत्तिः केवललक्ष्यत्वभंगस्त्वद्रीत्यायतोवाचइत्यादिविरोधश्चद्रष्टव्यः ॥ सेनाभिप्रायेण राज्ञोयोत्स्यइतिवाक्यंतु गौणमेव । किंतुस्वयंयुद्धाभिप्रायेणवाक्यमेव मुख्यमतस्तदृष्टांतेने-क्षणेपुनरुपचारदार्ढ्यादिदत्कुटीप्रभातं । ईक्षणाकारेउत्तमपुरुषप्रयोगस्यगौणत्वेईक्षणस्यसु-तरांतत्सिद्धेः शुद्धेंतःकरणादेरभावाच्च ॥ तदाहुः-नसंभवतीत्यादिना ॥ सेयंदेवतेत्यत्र-तेषांशब्दानांमुख्यत्वेमायांविनाजीवमात्रः कार्यतयापरिणामश्चास्मदिष्टःसिध्येदित्याशूद्यं ॥ नामरूपव्याकरणंचनगौणमन्यथानेकश्रुतीनां (अ० २ पा० ४ सू० २०) संज्ञामूर्ति-क्लृप्तिस्त्रिवृत्कुर्वतइत्यधिकरणस्यचव्याकोपादित्युक्तंप्राक् ॥ श्रुतिपुस्तुल्यतयाश्रावणेपिस्वेच्छयाकस्य-चिदंशस्यमुख्यत्वंकस्यचिद्गौणत्वमितिकल्पनंतुश्रुतिविप्लावनमेव ॥ परेणविपर्ययस्यापाद-यितुंविनिगमनाविरहाच्छक्यः ॥ अतोवेदेयथाश्रूयते तथैवसर्वंमुख्यंमन्तव्यं ॥ तन्मते (अ० १ पा० १ सू० ५) गौणश्चेन्नेत्यादिसूत्रत्रयविरोधंपुनरापादयितुमाहुः । किंचशबलस्येत्यादि । शबलपदंकेवलमायायाअप्युपलक्षणं ॥ (अ० १ पा० १ सू० ६) "तन्निष्ठस्यमोक्षोपदेशा" दितिसूत्रस्यार्थमाहुः-किंचसोकामयतेत्यादिना ॥ यदाह्येवैषएत-स्मिन्नित्यानन्दवल्लीश्रुतौसस्म्यंतेनैतदापूर्वोक्तोबहुभवनप्रकृष्टजननकामनापूर्वकस्तपःशब्दवाच्यपर्या-लोचनपूर्वकसर्वसृष्टिकर्तैवपरामृश्यतेसान्निध्यात् ॥ एतस्मिञ्जगत्कर्तरिअदृश्येलौकिकें-द्रियागोचरेअनात्म्ये आत्मभिन्नशरीररहितेअनिरुक्तेतत्सृष्टैरस्माभिर्निर्वक्तुमशक्ये अनिल-यनेनिरधिष्ठानेयोभयाभावंप्रकृष्टस्थितिंनित्यनिराबाधतारूपांविंदते अथतन्निष्ठतासिध्यनं-तरमेवससाधकः अभयंमोक्षंगतोभवतीतितदर्थः ॥ अत्रादृश्यादिपदैर्जगत्कर्तुरेवप्रापंचि-कधर्मराहित्यंनिरधिष्ठानत्वादविपर्ययत्वंचोक्तं-संसारएवेति ॥ यदिमायासंवलितनि-ष्ठस्यापिमोक्षःस्यात्तर्हिस्त्रीपुत्रादिनिष्ठस्यापिसस्यादेवेत्यलंसाधनैरितिभावः । जगत्कर्तृनिष्ठ-स्यमोक्षोपदेशात्तुन स मायासंवलितोगौणः किंतुशुद्धएवानौपचारिकइतिनिष्कर्षः ॥ (अ० १ पा० १ सू० ८) "हेयत्वावचनाच्चे" तिसूत्रस्यार्थमाहुः-किंचशास्त्रेत्यादिना ॥ उपदिश्येतेति पुत्रेषणादिवदितिभावः । अन्यत्सर्वंप्रायेणोत्तानार्थं ॥ भाष्याद्यनुवाद-रूपंच ॥ यत्तुतन्मतईश्वराभावेनेत्यादि, तत्प्रकृतानुपयोगि । त्वद्योजनयापिसूत्रविरोधा-नपायात् । एकेश्वरसाधनार्थेमेपुसूत्रेषुतुल्यवत्पुरुषवादेदूषणानामनुपन्यासात् । द्वितीयस्य-तृतीयपादसमाप्तावेवतन्निरासाच्च ॥ औपाधिकेत्यादि ॥ घटगतमुत्क्षेपणापक्षेपणादिकंपरि-च्छेदादिकंचघटस्यैव नत्वाकाशवर्तीतिभावः ॥ पर्यायरत्वादिति ॥ "मायांतुप्रकृतिंविद्या"-

दितिश्रुतेरित्याशयः ॥ शब्दानामितिबहुवचनंतुप्रधानादिशब्दांतरसंग्रहाय ॥ मायावाचकानांप्रकृतिवाचकानांचतेषांशक्ततावच्छेदकभेदेपिशक्यतावच्छेदकैक्यंध्येयं उक्तश्रुतेः ॥ षड्विधेति ॥ तानितु उपक्रमोपसंहारावभ्यासोपूर्वताफलं ॥ अर्थवादोपपत्तीचलिंगंतात्पर्यनिर्णयइत्युक्तानि ॥ लिंगंज्ञापकं ॥ कस्माश्चिदिति ॥ इंद्रोमायाभिरित्याद्यामाया कारणतावाक्याभासाद्भिन्नाएव ॥ ईश्वरकारणतावाक्यानितु तत्रतत्रवेदेशतशएवसंतीतिलिंगाभावेपिबहूनामनुग्रहस्यैवन्याय्यत्वाद्भिन्नेष्वेवोपचारकल्पनालघीयसी किंपुनस्तेषांलिंगादिसहकृतत्वेवक्तव्यं ॥ वाक्याभासाश्चोपक्रमादिप्रदर्शनपुरःसरंव्याख्याताःप्राक् ॥ यच्च जन्मादिसूत्रस्यौपचारिकत्वकथनं तत्तु शास्त्रविप्लावनमेव ॥ श्रुतिषूपचारानुपचारनिर्णयार्थंहिसूत्रप्रादुर्भावनं ॥ तत्रापिव्याख्यातृभिःस्वेच्छयोपचारानुपचारयोःकल्पनत्वे कृतंवृथाकंठगडुभूतैःसूत्रैः ॥ असंदिग्धानवद्येस्यानवद्यमेवचसूत्रकारःकुतोनसूत्रितवान् अल्पाक्षरमसंदिग्धंसारवद्विश्वतोमुखं ॥ अस्तोभमनवद्यंचसूत्रंसूत्रविदोविदुरितितल्लक्षणात् ॥ तथाकल्पनेतुतत्रतत्रसूत्रत्वमेवव्याहन्येत ॥ नह्यस्मन्मतइत्यादि ॥ अयमाशयः–जिज्ञासासूत्रपुरुषोत्तमविचारारंभएवप्रतिज्ञातः ॥ पुरुषोत्तमस्यापिलीलासर्गप्रतिसाक्षात्कारणता । निबंधादिषुएवंकदाचिद्भगवान्साक्षात्सर्वंकरोत्यजइतिसृष्ट्युपक्रमे कदाचित्सर्वमात्मैवेत्यादिस्थलेस्वीकृता ॥ दहरविद्याबृहदारण्यकादिसिद्धाचसा ॥ यद्यपिक्षरसृष्टिंप्रति अक्षरस्यकारणता "तथाक्षरात्संभवतीहविश्व" मित्यादिमुंडकादिश्रुतिभिः अव्यक्तादीनिभूतानि ॥ "अव्यक्ताद्व्यक्तय सर्वाः, कूटस्थोक्षरउच्यते" इत्यादिस्मृतिभिश्चसिद्ध्यति तथापि 'ब्रह्मपुच्छंप्रतिष्ठे' त्यादिश्रुतिभिः त्वमक्षरंपरमंवेदितव्यंत्वमक्षरसदसत्तत्परंयत् । इत्यादिस्मृतिभिश्चाक्षरस्यपुरुषोत्तमांशत्वात्पृथिव्यंशमृद्राशिमृत्पिंडादिहेतुकघटादिकंप्रति पृथिव्याइवक्षरंप्रत्यपिपुरुषोत्तमस्यकारणतानापैति ॥ अतोजन्माद्यस्ययतइत्यपिपुरुषोत्तमस्यैवानौपचारिकंलक्षणं ॥ अतएवभगवंतोभाष्यकारास्तत्रसूत्रेसमासभेदेनपुष्ट्यादिसर्वसृष्टिप्रकारान्संगृह्णंति ॥ अतएवच सूत्रकारोक्षरशब्दस्यापितत्रैवप्रवृत्तिंप्रथमस्यतृतीये ॥ सू० १० "अक्षरमंबरान्तधृतेः" इत्यधिकरणे साधयति ॥ अक्षरस्यांशत्वादेव (अ० ३ पा० ३ सू० ३३) "अक्षरधियांत्वि" त्यादौनिरूपणेऽपि नाप्रविज्ञातनिरूपणं ॥ नहिश्रीरामवर्णनार्थप्रवृत्तेरामायणे तच्चरणादिवर्णनेपि तत्राप्यप्रतिज्ञातनिरूपणंकोपिमनुते । तस्मादस्माकंसूत्रेपुन प्रतिज्ञाहान्युपक्रमविरोधदोषगंधोपि ॥ नापिपुरुषोत्तमकारणतावाक्येषूपचारलेशोपि ॥ नहिवदनेनवदतिकराभ्यामाचरतिचरणाभ्यांचरतिपुरुषे एककांडएवसाक्रियेति तत्र वदत्याचरतिचरतिप्रयोगाऔपचारिका कस्याप्यभिमताः ॥ यस्तु जन्माद्यस्येत्यादिसूत्रैर्व्यासपादैर्निरूपितमिति मार्तंडकारिकाव्याख्यास्थं सूत्रार्थमनूद्यतत्रसम्पगित्यादिरत्यन्तासंनिकर्षादयुक्तइत्यंतप्रलाप कृतः सोप्यस्मन्मताज्ञानादकांडतांडवरूपः, नहिजगज्जन्माद्याश्रयस्यशास्त्रोक्तकारणत्वहेतुनाकर्तृत्वमात्रमत्रसाध्यतइत्यस्माकमभिप्रायः ॥ नापिकर्तृपदाध्याहारोविवक्षितःकिंतुजन्माद्यस्ययतइतिसूत्रांशस्यैवफलितार्थकथनं कर्तृ इतिभाष्यादौ ॥ ब्रह्मणिजगज्जन्मादिकारणत्वमनेनसाध्यते ॥ सूत्रे अस्येत्यनेनजगतइति लभ्यतेजनिकर्तुः प्रकृतिरित्य-

पादानतामाश्रित्यप्रवृत्तयोः श्रुतिसूत्रयोर्यतइति पंचम्याधकारणत्वं ॥ जन्मादिपदंतुसौन-मेनातोनासौग्रमत्रकिंचित् ॥ तच्चकारणत्वं सांख्यैः कार्येश्वरवादिभिः सेश्वरैश्चपातंजलैस्त-त्रनांगीक्रियते किंतुप्रकृतावेवतदुच्यते ब्रह्मकारणताबोधकश्रुतिषुचोपचारः कल्प्यतेऽतस्त-न्मतानुरोधाद्ब्रह्मनजगज्जन्मादिकारणं वाक्यानितु गौणकर्तृत्वाभिप्रायाणीतिपूर्वः पक्षः तेनतदंशेप्रायेणसमानयोगक्षेमत्वात्तन्मतमप्यर्थादेवसंगृहीतंभवति ॥ सूत्रकृता तु ब्रह्मण्येवनिरंकुशकारणतासिद्धांतयतासांख्यादिभिः सहतदपिप्रयत्नादपाकृतं ॥ यत्तु (तर्हिजगज्जन्मादिकंप्रकृतेरन्यत्रास्थापयित्वाप्रवृत्तेनानेनसूत्रेणप्रकृतावेवकर्तृत्वमपिसाध्यते-इत्यापतती) तितन्न सकलवाक्यसमन्वयप्रतिपादकेसमग्रेध्यायेणकत्रापिमायापदस्ततद्वाच-कपदांतरस्यवागंधस्याप्यभावेनप्रकृतौकर्तृत्वसाधनस्यकथंचिदपिवक्तुमशक्यत्वात् ॥ अन्य-थाजन्माद्यस्यतःसाप्रकृतिरितिवदेत् ॥ परामृश्यतेतु यच्छब्देनोपस्थापिततच्छब्देनपूर्वसूत्रो-क्तंब्रह्मैव ॥ इष्टंचेदंतत्रापीत्थमेव ॥ निरुपचारबहुतरशास्त्रेषुतथाकथनात् ब्रह्मण्येवनिरं-कुशकारणत्वेस्थापितेशास्त्रविरोधादेवप्रकृतौ तन्निरासस्यार्थिकत्वाच्च ॥ "जीवेशावाभासे-नकरोति" इतिवाक्याभासस्तु पूर्वपक्षोपष्टंभकोभविष्यत्येव ॥ त्रयोपिवाक्याभासाः प्राग्व्याख्याताः व्याख्यास्यतेचयथोपयोगं चतुर्थाष्टमश्लोकखंडनादौ ॥ नचात्रसूत्रेते विषय-वाक्यतयासूत्रयितुरभिप्रेताः तत्रतद्गमकाभावात् ॥ ब्रह्मणएवतदापरामर्शोद्विपक्षउक्तदो-षाच्च ॥ किंतु यतोवाइत्यादीनिब्रह्ममात्रकारणतावाक्यान्येव ॥ अतएवश्रुतिघटकंयतइतिपदं-तदुपस्थापनायोपात्तं ॥ तत्रजायंतइतिजनिधातुप्रयोगादत्रापितद्धातुनिष्पन्नंजन्मपदंचोक्तं ॥ तेनादिपदेनश्रुत्युक्तजीवनादिकमेवसगृह्यते ॥ अस्येत्येकवचनंतु "इदं सर्वमसृजत ॥ सदेवसोम्येदमग्रआसीत् आत्मावाइदमेकएवाग्रआसीत् ॥ सर्वंखल्विदंब्रह्म ॥ पुरुषएवेदं सर्वं ॥ यस्मिन्निदं संचविचैतिसर्वं ॥ सलिलं सर्वमाइदं ॥ योअस्याध्यक्षः ॥" इत्यादे-रेकवचनांतेदमाजगन्निर्दिशतः श्रुतिशतस्यसंग्रहाय ॥ शास्त्रयोनित्वादितिसामान्यतः शास्त्रपदंद्वयोरपिकांडयोः संग्रहाय ॥ तेननासदासीदित्यादीनांप्रजापतिरकामयतेत्यादीनांच-साक्षात्परंपरयावायथायथंतत्रैवसमन्वयोदर्शितः ॥ योनिपदंतु "कर्तारमीशंपुरुषंब्रह्म-योनिं ॥ ममयोनिरप्स्वंतः समुद्रे" इत्यादिवाक्यांतरस्मारणाय ॥ अत्रप्रकृतेरपियोनि.सत्त्-वेतिकथनाद्यतोस्यजन्मादितद्ब्रह्मैव नतुसेतिप्रकृतेः कर्तृत्वादिकमनेनैवनिरस्तंभवति ॥ अयं-चास्माकंपूर्वोत्तरपक्षयोर्विशेषः पूर्वपक्षेप्रकृतिपदाभिधेयमायायामेवमुख्यंकर्तृत्वादिकं ॥ ब्रह्म-णित्वारोपितमात्रंतत् ॥ अतो "भुवःप्रभवः" इतिवाविभाषेतियोगविभागाद्वापंचमी ॥ सिद्धांतेतु ब्रह्मण्येवमुख्यंनिरंकुशंतत् नतुप्रकृतौ ॥ नापिश्रुतिषूपचारगंधः अतउक्तशास्त्रा-स्पंचमी ॥ तत्रशास्त्रयोनित्वमपिगमकं समन्वयसूत्रंच ॥ अतोनासिद्धसाधनं नाप्युपहासा-वकाशः ॥ ब्रह्मविचारप्रतिज्ञोत्तरंलक्षणप्रमाणबोधकमिदमधिकरणमिति तु वयमेववदामः ॥ पूर्वतंत्रतौल्यंत्वस्मन्मतएव नतुत्वन्मतइतिवक्ष्यते ॥ पूर्वसमस्तपदेपिब्रह्मणएवपरामर्शस्तुप-टोलपत्रमिश्रितवदशौतेराजमातंगाश्वस्यैवामीतुरंगमाइत्यादिवच्चयुक्तएव ॥ यतोस्यजन्मादितदि-त्यंशस्यैवफलितार्थोभाष्यादौकर्तृइतिप्रागुक्तंअतोनास्माकमत्रकर्तृपदाध्याहारः ॥ किंतुत्वै-वशास्त्रयोनित्वादितिपृथगधिकरणेसुतरांसंगतः सः ॥ तत्रत्वन्मतेशास्त्रयोनित्वादित्यत्र ।

न्कर्तृब्रह्मवेदस्यकिंवाकर्तृनकर्तृतत् । धीरूपनित्ययावाचेत्येवंनित्यत्वकीर्तनात् । कर्तृनिःश्वसि-
ताद्युक्तेनित्यत्वंपूर्वसाम्यतः । सर्वांचभासिवेदस्यकर्तृत्वात्सर्वविद्भवेदितिव्याख्यानात् ॥ किंच-
ब्रह्मणोऽकर्तृत्वे आचार्यस्याभिप्रेतेजन्माद्यस्ययतइत्यनुक्त्वा अकर्तृतादिति अधिष्ठानंतदि-
त्येववालक्षयेत् नतुयथाश्रुतं ॥ तदेतत्सर्वमनुसंधायाहुः सोप्यसदित्यादिना ॥ वेदार्थभू-
तेति । अथातोब्रह्मजिज्ञासेत्यत्र वेदस्तत्वंतपोब्रह्मेतिकोशाद्ब्रह्मपदंवेदोपस्थापकंपरमात्मप-
रंच ॥ जिज्ञासापदंविचारपरं ॥ अजिज्ञासितमद्धर्मौगुरुंमुनिमुपाव्रजेदित्येकादशस्कंधादौ-
तथाप्रयोगदर्शनात् शास्त्रेऽस्मिन्मीमांसेतिप्रसिद्धेश्च ॥ मीमांसतिश्चविचारेप्रसिद्धः मानेर्जि-
ज्ञासायामितिहिसन्नूतत्रापिजिज्ञासाविचारएवज्ञानेच्छापरत्वेमानेर्ज्ञानार्थकत्वमेवसिद्धौमान-
वधदानूशान्भ्यइतिसनोविधानमेवव्यर्थंस्यात् (स्कंध ७) मीमांसमानस्यसमुत्थितोग्रतइ-
त्यादिपुमीमांसतेः प्रचुरतरप्रयोगेप्त्वपिविचारएवार्थः संगच्छतेनतुज्ञानेच्छेत्यलंप्रासंगिकेन ॥
अथशब्दश्चारंभार्थकःयोगसूत्रव्यासभाष्यमहाभाष्यादिषु "अथयोगानुशासनं, अथश-
ब्दानुशासनं" इत्यादौतथादर्शनात् ॥ अधिकारआरंभइत्यनर्थांतरं ॥ अतःशब्दोहेत्वर्थः ॥
यस्मात्कर्मादिभ्यो ब्रह्मज्ञानमेवपुरुषार्थसाधकमतस्तज्ज्ञानायवेदार्थब्रह्मणोवेदानुकूलोविचा-
रोऽधिक्रियतइतिसूत्रार्थः । सचविचारःप्रथमेऽध्यायेसर्वेषांवेदांतवाक्यानांब्रह्मण्येवसमन्व-
यस्यद्वितीयस्मिन्नध्यायेबाह्यस्मृतिनिरासपूर्वकंश्रुतीनांपरस्परविरोधस्यतृतीयस्मिन्साधनानां
तुरीयेफलानांचप्रतिपादनेनदर्शितः ॥ अयंचसर्वोपिविचारःपूर्वलक्षणप्रमाणज्ञानमंतरानश-
क्यइतिब्रह्मणोलक्षणप्रमाणबोधकंद्वितीयाधिकरणं ॥ प्रमाणमिति ॥ सूत्रेशास्त्रीतिशास्त्रंवेद
इतिव्याख्यानादशेषोवेदएवब्रह्मणिप्रमाणमितिभावः ॥ तथाच यथापूर्वतंत्रे अथातोधर्मजि-
ज्ञासेतिधर्मविचारंप्रतिज्ञाय मानाधीनामेयसिद्धिर्मानसिद्धिश्चलक्षणादित्युक्त्या धर्मस्यलक्ष-
णप्रमाणाकांक्षायां चोदनालक्षणोर्थोधर्मइतिद्वितीयाधिकरणंप्रणीतं ॥ तेनविधिगम्यार्थत्वं
लक्षणंचोदनैवमानंचेत्येकेनैवाधिकरणेनसिध्यति तथात्राप्यस्मन्मते ॥ येषां तु भिन्नंशास्त्र-
योनित्वाधिकरणं तेषांनैतत्तौल्यं ॥ किंचनेदमितरलक्षणंधर्मआरोप्यते नापीदंसूत्रमौप-
चारिकं एवमेवोत्तरतंत्रेप्यस्तु ॥ येषांतु शबलगतंमायागतंवालक्षणंपरस्मिन्नारोप्यतइति
सूत्रंचौपचारिकमितिमतंतेषांनतत्तौल्यगंधोपि ॥ अत्रप्रकाशस्थंप्रायेणानुवदंति ॥ अत्रस-
र्वेपियोगविभागेनेत्यादिना ॥ योग.सूत्रंतद्विभागेत्यर्थः शेषलक्षणइति पूर्वतंत्रतृतीयाध्याये
(पा० १ सू० १) "अथातःशेषलक्षणं" इतितत्कथनंप्रतिज्ञाय (सू० २) "शेषःप-
रार्थत्वात्" इतियोत्यंतंपरार्थःसशेषइतिलक्षयित्वा (सू० ३) "द्रव्यगुणसंस्कारेषुबा-
दरिः" इतिद्रव्यादीनामेवशेषत्वं नयागफलपुरुषाणामितिबादरिमतमुक्त्वा (सू० ४।
५६) "कर्माण्यपिजैमिनिः फलार्थत्वात् फलंचपुरुषार्थत्वात् पुरुषश्चकर्मार्थत्वात्"
इतियागादीनामपितत्वंसमर्थितं ॥ अत्रकर्माणीतिज्ञानस्याप्युपलक्षणं कांडार्थत्वाविशेषात्
अपिनावातत्संग्रहः ॥ अतोज्ञानस्यापिफलशेषत्वंफलस्यचप्राधान्यं ॥ तदेतदार्थिकमाहुः
कर्मेत्यादिना ॥ तत्संबंधादित्यादि ॥ अयमत्रनिष्कर्षः–ब्रह्मविदाप्नोतिपरमितिवाक्यं
ब्रह्मविदक्षरवित्परं अक्षरादुत्तमं पुरुषोत्तममाप्नोतीत्यर्थकं परमाप्तिलक्षणप्रधानफलसंब-
न्धात्प्रधानंतस्माद्वाएतस्मादात्मनइतिकार्यलक्षणंतुफलसंबंधाभावादप्रधानं ॥ यत्तुप्रोक्त-

वाक्यं प्रधानमतएव फलंकथंभावाकांक्षोपशमनायसत्यंज्ञानमित्युपाविवृतं ॥ अन्यथात-
न्मात्रस्यविवरणमप्रयोजनकंस्यात् । परप्राप्तिरूपंफलंचपरापरभावपुरस्सराक्षरपुरुषोत्तम-
ज्ञानादेव ॥ अतआवश्यकपरत्वज्ञानार्थंतस्माद्वाइत्यादिनासर्वभूतभौतिककर्तृतयापरत्वंवि-
वृतं ॥ अनिरूपणेसत्यंज्ञानमित्यप्रपञ्चविलक्षणधर्माणामेवप्रतीत्याब्रह्मणिकर्तृत्वंनप्रतीयेत
अत "आकाशःसंभूत" इत्यादिनायत्कर्तृत्वमुक्तंतत् विवरणंचकर्मार्थकब्रह्मपदनिर्दिष्टा-
ज्ज्ञेयादक्षरात्परपदाभिधेयंलीलाभोक्तारंपुरुषोत्तमंतृतीयान्तब्रह्मपदनिर्दिष्टंपृथक्त्यतस्यपर-
त्वंविवेक्तुमुक्तं भूतभौतिकसर्गरूपकार्यनिर्देशेऽपिपरस्यस्वरूपजिज्ञासायां अन्नमयादिभ्य-
स्सर्वेभ्यः आन्तरत्वकथनपूर्वकंआनन्दाकारलक्षणंतदुक्तमिति । अन्यथेति ॥ आनंदमयस्य
परत्वाभावेतस्यसर्वोत्तेनिरूपणंकर्तृत्वादिनानिरूपणं चासंगतंस्यात् ॥ सर्ववत्तेऽन्नमित्यादि ॥
अन्नब्रह्मोपासनेसर्वान्नप्राप्तिःफलं ॥ प्राणब्रह्मोपासनेसंपूर्णायुःप्राप्तिः ॥ मनोब्रह्मोपासनेका॰
ऽकुतभयाभावः ॥ विज्ञानब्रह्मोपासनेशरीरएवपाप्महानपूर्वकंसर्वकामाशनेच्छेयं ॥ सत्ये-
त्यादि ॥ ब्रह्मास्तित्वज्ञानेमसद्भावः "रसँ ह्येवायंलब्ध्वानंदीभवती" त्यादिना "अथसोभ-
यंगतोभवति" इत्यादिनाच "आनंदंब्रह्मणोविद्वान्नबिभेतिकुतश्चनेति" इत्यंतेनतच्चफ-
लंचप्रधानम् ॥ तेषांचशेषभूतानिपूर्वोक्तफलानि ॥ शिष्टंस्पष्टं । भृगुप्रपाठकइति इदमत्रह-
दयं प्रकृताधिकरणस्ययतोवाइमानीतिमुख्यं विषयवाक्यं सौत्रेणयतःपदेनजन्मादिपदेन
चतस्यैवोपस्थापनात् भृगुवल्ल्यांविस्पष्टतयासंशयपूर्वपक्षयोरुत्थानाभावेऽपितस्या ब्रह्म-
वल्ल्यार्थैकविषयकत्वस्यासन्दिग्धतयादर्शितचरदिशा ब्रह्मवल्ल्यामुत्तिष्ठमानं संशयादिकंत-
त्रापि प्रसज्यत एवेतिब्रह्मवल्लीमवलंब्यविस्पष्टतयातस्योत्थापनं ॥ भूतभौतिककर्तृत्वमा-
रोप्यमाणमपि पराभिमतरीत्यापरिचायकंभविष्यतिशाखाचन्द्रवदितिपूर्वपक्षाशयः ॥
सिद्धान्तेतुमुख्यंनिरंकुशंकर्तृत्वंसेत्स्यतावितदुक्तसिद्धसाधनादेः प्रसंगः ॥ तदेवतुनेति ॥
नहिसत्यंज्ञानमित्यत्रकर्तृत्वंनिषिध्यते येनविरोधःस्यात् ॥ नचतत्रानुक्तत्वादेवलक्ष्यतद्-
भावःशंक्यः । आनंदस्यापिस्पष्टंकथनाभावेनतस्याप्यभावप्रसंगात् ॥ अथाग्रिमवाक्यांत-
रैकवाक्यतयाऽऽनंदस्यलाभइतिचेत्कर्तृत्वस्याप्यस्तु ॥ किंच विवरणर्चिप्रत्युतपरस्यतृतीयां-
तब्रह्मपदेनविवृतस्यकर्तृत्वंकामाशनेसहभावश्रावणात्प्रत्याय्यते ॥ तत्रेति ॥ तृतीयांतब्रह्म-
पदे ॥ ब्रह्मापेक्षयेति ॥ वेद्यब्रह्मापेक्षया नचप्रकृतिरिति तृतीयांतब्रह्मपदेनसापिनग्रहीतुं
शक्या वक्ष्यमाणत्वाच्चेति ॥ अग्रिमसूत्रेपुसूत्रकृतेविभावः । तत्रप्रमाणमित्यादीति ॥ यत्तु
(किंचशौंडेत्यादि अनुपपन्न) इत्यंतं तदसत् ॥ नह्युक्तशब्दस्याध्याहारोऽस्माकंसंभवोये-
नासामर्थ्येनापिलक्षणा । यतोविग्रहानुपपत्तिःस्यात् ॥ किंतुविषयत्वं शास्त्रइति सप्तम्यर्थः
शास्त्रविषययोर्योनिरित्यर्थः विषयत्वंचेहप्रतिपाद्यत्वंव्यापकादिभेदेनाधिकरणत्रैविध्यंचसंहि-
तायामितिसूत्रेमहाभाष्ये "अधिकरणंनामत्रिप्रकारं व्यापकमौपश्लेषिकंवैषयिकमिति"
इतिदर्शितम् ॥ शास्त्रस्यचार्थेप्रतिपाद्यतासंबंधएवयुक्तः तथाच "वेदेधर्मःस्मृतौधर्म"
इत्यादिवत्प्रकृतेऽप्ययंबोध्यः ॥ "वेदधर्ममनुव्रताः स्मृतिधर्मैकनिष्ठानां" इत्यादि-
वचसमासः ॥ नचयोनेरक्रियात्वादधिकरणतानुपपत्तिःशंक्या गुरुर्वचस्यर्जुनोऽयंकीर्तौ-
भीष्मःशरासने ॥ अक्रूशंकुचयोःक्रूशंवलभेगतौगजोबलेसिंहः इत्यादिप्रयोगदर्शनात्

अतईदृशस्थले "परंपरासंबंधस्यापिक्रियान्वयित्वरूपकारकत्वघटकताशास्त्रप्रामाण्यात्" इतिवदंतिभूषणव्याख्याकारादयः ॥ अन्यथा अक्षशौंडइत्यादिकमप्यसामर्थ्यान्नोपपद्येत शौंडादेरक्रियात्वात् ॥ अक्षेष्वित्यादिकमपिवैषयिकमेवाधिकरणं व्याप्यपश्लेषयोरसंभवात् ॥ कैयटस्तूक्तसूत्रे "खेशकुनयः गुरौवसति" इत्यपिवैषयिकाधिकरणमुदाहरति ॥ आस्तामेतत् ॥ प्रकृतेशास्त्रस्यविषयतानिरूपकाधारत्वमेवसंभवति इतरयोरयोगात् ॥ तेनवेदधर्मेइत्यादिवद्विवक्षितार्थसिद्धिर्निर्बाधा तदेतदनुसंधायप्रकाशकारैरुक्तमाहुः—अत्रसप्तम्येत्यादिना ॥ समासदोषंतुपरिहरिष्यंति ॥ वक्तव्यमेवेति ॥ यतइतिनिर्देशस्यश्रुतिस्मारकत्वेपि उच्चारितएवशब्दः प्रत्यायकोनानुच्चारितइतिन्यायेन वाक्यार्थबोधेस्मृतमात्रस्यहेतुत्वासंभवात्सर्वविधसृष्टिबोधकवाक्यराशेरसंग्रहप्रसंगाच्चवक्तव्यमेव ॥ एवमकथनेलक्षणमात्राकांक्षोपशमइतिपूर्वतंत्रवल्लक्षणप्रमाणोभयाकांक्षायाअप्रशमाच्च तथावक्तव्यमेव ॥ समासदोषंपरिहरंति—यदिशौंडादिगणेति ॥ अतोयोगविभागोनसंमतइतिनव्यानामेवाग्रहः प्राचीनग्रंथेषुतुबहुस्थलेषुतदादरोदृश्यते ॥ यथास्वरप्रक्रियायां (अ० ६ पा० २ सू० १६२) "बहुव्रीहाविदमेतत्तद्भ्यः प्रथमपूरणयोःक्रियागणने" इतिसूत्रे इदंप्रथमंयस्यसइदंप्रथमइत्याद्युदाहृत्य "बहुव्रीहौकिम् अनेनप्रथमः इदंप्रथम.तृतीयेतियोगविभागात्समासः" इत्युक्तम् ॥ सूत्रेबहुव्रीहिपदमपियोगविभागाज्ज्ञापयतिअसतिबाधकेप्रमाणानांसामान्येपक्षपातात् एवमुत्तरत्रापितत्तत्पदंज्ञापकंज्ञेयं ॥ आत्मनेपदंपरस्मैपदमित्यादावपियोगविभागादेवसमासः । अलुक्प्रकरणे (अ० ६ पा० ३ सू० ७) "वैयाकरणाख्यायांचतुर्थ्याः" इतिसूत्रे आत्मनेपदं आत्मनेभाषेत्युदाहृत्यचतुर्थीतियोगविभागात्समासउक्तः ॥ एवंतत्रैवप्रकरणे आत्मनापंचमइत्यत्रतृतीयासमासः अविकटोरण इतिसप्तमीसमासश्चस्पष्टंयोगविभागादेवदितस्तद्व्याख्यातृभिः ॥ किंचतत्रप्रकरणेसूत्रवार्तिककृद्भ्याम् (अ० ६ पा० ३ सू० ११) "मध्याद्गुरौ" "मध्येगुरुः" "गुरावन्ताच्च" अंतेगुरुः (अ० ३ पा० ६ सू० १८) "शयवासवासिष्वकालात्" खेशयः खशयः ग्रामेवासः ग्रामवासः ग्रामेवासी ग्रामवासी "हलदन्ताधिकारेगोरुपसंख्यानम्" गविष्ठिरः एवमादिष्वलुग्विधीयते ॥ नहिगुर्वादयः शब्दाः शौंडादिषुपठ्यंते ॥ एवमादिष्वलुग्विधानाद्योगविभागः सूत्रकाराद्यभिमतोज्ञायते ॥ किंचात्रैवप्रकरणे (अ० ६ पा० ३ सू० १०) "कारनाम्निप्राचांहलादौ" इतिसूत्रेभाष्ये "अविकटेउरणोदातव्यः अविकटोरण" इतिप्रत्युदाहृतम् ॥ अवीनांसंघातोऽविकटः संघातेकटच् ॥ एकैकस्मिन्संघाते मेषएकैकोराशिकरत्वेनदेयः सोऽविकटोरणः करविशेषः ॥ "हलदन्तात्सप्तम्याः संज्ञायाम्" इतिपूर्वसूत्रादिहसंज्ञापदमननुवर्त्यप्राप्तविभाषापक्षे यद्यप्राप्ते समासोविधेयः प्राप्तेपुन.सतिसंज्ञायामित्येवसमासः सिद्धः । नैषदोषः, एतदेवज्ञापयति भवत्यत्रसमासइति यदयंकारनाम्नःसप्तम्याअलुकंशास्ति" इतिभाष्यकृतायोगविभागानुमितिर्बोधिता ॥ अत्रकैयटोपि "एतदेवेति समासमंतरेणलुक्प्रसंगाभावादलुग्विधानादत्रसमासोऽनुमीयतइत्यर्थः ॥ अत्रहलादिग्रहणादजादिनिवृत्त्यर्थादजादावपिसमासानुमानम्" इत्याह ॥ इहपुनः प्राप्तविभाषास्थापनेप्यनयादिशोत्तरत्रयोगविभागादेवसमासः ॥ नहिमध्येगुरुस-

शयग्रामवासादयोपिसंज्ञाः ॥ नचसूत्रोद्दिष्टशब्दैरेवसमासइतिवाच्यम् ॥ कारनाशीत्यापुत्तयाऽन्यैः सहापिसमासस्यज्ञापनात् । अन्यथानद्व्यावर्त्यंकंस्यात् । अकालतनेषुकालनान्नइति कालशब्दोप्यशौंडादिरेव तेनापि योगविभागादेव समासः ॥ नचालुक्प्यत्रपर्यैतेसमासाः शंक्याः ॥ अकालादिस्युत्तयाऽन्यत्रापिवसंतवासः शरद्वासीत्यादिसमाससिद्धेः ॥ "अपोयोनियन्मतिषुचोपसंख्यानम्" इतिभाष्यस्थंवार्तिकंचापः सप्तम्यायोनिशब्देमतिशब्देचालुकंविदधदन्यैरपिसप्तम्यन्तैस्तयोः समासमसंदिग्धंज्ञापयति असतिबाधकेप्रमाणानांसामान्येपक्षपातात् ॥ तेनशास्त्रयोनिः शास्त्रयोनिरित्यादिसिद्धम् ॥ मतुप्वितिपाठमतेपिपूर्वमक्षतम् प्रतिपाद्यत्वंचात्रार्थलभ्यम् आत्मनापंचमइत्यादौकृतत्वादिवत् (अ० ६ पा० ३ सू० ६) "आत्मनश्च" तिसूत्रेभाष्यम् "अथवायुक्तएवात्रतृतीयार्थः आत्मनाकृतंतस्यतद्येनासौपंचमः" इति ॥ अत्रकैयटोपि "आत्मनाकृतमिति। वृत्तिविषयेप्रतीयमानाकरोतिक्रियाकारकत्वनिमित्तंभवति। हेतौवातृतीयाकार्या। अथवादध्योदनादौउपसेकादिवत्। करोतिक्रियायाअंतर्भावात् करोतेरप्रयोगः। आत्मनापंचमइत्युक्तेआत्मनाऽस्यकृतंपंचमत्वमितिसंप्रत्ययात्" इत्याह ॥ एवमिहापिशास्त्रयोनिरितिविग्रहवाक्येप्रतिपादितइतिगम्यतएव ॥ यदितु पात्रेसमितादेराकृतिगणत्वात्तत्रास्यपाठः स्वीक्रियेत तदातु (अ० २ पा० १ सू० ४८) "पात्रे समितादयश्च" त्येवसमासः सिद्धः तेषु कूपकच्छपः उदपानमंडूक इत्यादिवत् ॥ तत्रस्थितिक्रियेवात्र प्रतिपादनक्रियाऽऽप्यार्थिकीवृत्तिगम्यास्यादितिदिक् ॥ एतेन किञ्चोक्तशब्देत्यादि अनुपपन्नइत्यंतमपिनिरस्तम् ॥ इहशास्त्रयोनिरित्येवार्थेव्यासस्यतात्पर्यंनिर्णायकंतुजन्माद्यधिकरणस्यप्रपंचनरूपेचरमेप्रकृतिश्चेत्यधिकरणे (अ० १ पा० ४ सू० २७) "योनिश्चहिगीयते" इतितदीयमेवसूत्रम् ॥ तेनाध्यायस्योपक्रमोपसंहारयोरैकार्थ्यंसिद्धमित्यपिध्येयम् ॥ तदेतत्सर्वमनुसंधायाहुः—दृश्यतेत्वित्यादि ॥ योगविभागेभाष्यसंमतिमनुमापयितुमाहुः—अतएवेति ॥ इहभाष्योक्तसमासद्वयेयद्यपितुल्यआस्येतुल्यास्यइतिप्रथमसमासस्तुकैयटेन "मयूरव्यंसकादित्वात्सप्तम्यन्तोत्तरपदस्तत्पुरुषः" इतिव्याख्यातस्तथापि आस्येप्रयत्नइतिसमासस्तुशौंडादिषु प्रयत्नशब्दस्यापाठात्सप्तमीतियोगविभागैकशरणइतियोगविभागो भाष्यसंमतएव ननुतदनारूढइतिभावः ॥ यत्तुउत्क्रांतीत्यादियोज्यमित्यंतंतदप्यबोधविलसितं ॥ ऋषिभिर्बहुधागीतंछंदोभिर्विविधैःपृथक्। ब्रह्मसूत्रपदैश्चैवहेतुमद्भिर्विनिश्चितैः इतिभगवद्वाक्यात्ब्रह्मसूत्राधिकरणानांहेतुमत्तानियमेनजन्माद्यधिकरणस्यापिशास्त्रयोनित्वरूपहेतुमत्तएवादरणीयत्वात् अन्यथाभगवद्वाक्यविरोधापातात् ॥ नचोत्क्रांत्यादिसूत्रेष्वव्यभिचारः शंक्यः श्रोतएवेतिपूर्वसूत्रादतएवेत्यस्यश्रुतिभ्यएवेत्यर्थकस्यतत्रानुवृत्त्यातदभावात् अन्यथापृथ्वैकपदमात्रस्यसूत्रस्याबोधकत्वप्रसंगात् त्वद्व्याख्येपि "उत्क्रांतिगत्यागतीनांश्रवणात्" इतिव्याख्यानस्य अनुवृत्त्यैवोपपत्तेश्च ॥ अतःशब्दस्यश्रुतिभ्यइत्यर्थस्तु "नात्माऽश्रुतेर्नित्यत्वाच्चताभ्य" इतिपूर्वसूत्रानुरोधात् ॥ वस्तुतस्तु "मांत्रवर्णिकमेवचगीयते। अस्मिन्नस्यचतद्योगंशास्ति" इत्यादीनिप्रथमतराणिस्वयंहेतुरूपाणिस्ववाक्यार्थसाधकहेत्वंतरशून्यानिविहाय उत्क्रांतिसूत्रपर्यंतमनुधावनं ब्रह्ममीमांसासांप्रदायिकाभ्यासाभावात् ॥ ननुतर्हि-

तत्रापिव्यभिचारस्तदवस्थइतिचेन्न गुणसूत्राणांतेषामेवाधिकरणत्वस्याभावात् ॥ भगवद्वाक्येहिपदशब्दोऽधिकरणपरः वाक्यपर्यायत्वात्स्थानपर्यायत्वाद्वा । पदंशब्देचवाक्येचव्यवसायापदेशयोः पादपचिह्नयोःस्थानत्राणयोरंकवस्तुनोरितिविश्वोक्तेः । पद्यतेज्ञायतेतत्त्वमेभिरितिव्युत्पत्तेर्वा ॥ सिद्धांतस्तुविषयादिपंचांगैरधिकरणैरेवज्ञातुंशक्यः ॥ अतोमांत्रवर्णिकादिसूत्राणियद्घटकानितेषामानंदमयाद्यधिकरणानांबहुहेतुघटितत्वान्नव्यभिचारः ॥ एवमुत्क्रांत्यद्यधिकरणमपिदशसूत्रंजीवाणुत्वप्रतिपादकंबहुहेतुघटितनेव ॥ एतेन (प्रतिपदंहेतोः पंचम्यंतस्यकल्पनाया) मित्यादिनिरस्तं ॥ सूत्रघटकसुप्सिडंतान्यतरपदानांतु विषयवाक्यवत्वादसंभवाधिकरणानामेवतथात्वात्तवैवप्रयासः (यद्धेतुकत्वंवाक्यस्यतद्धेतुकतायाःपदेपिसत्व) मितितुदूष्यपक्षेपिशक्यवचनं ॥ किंचहेतुपदंकारणपरंप्रयोजनपरंवेतिव्याख्यानेभगवद्वाक्येहेतुमत्पदंव्यर्थंस्यात् ॥ प्रयोजनमनुद्दिश्येतिन्यायेनप्रयोजनवत्तायाः स्वतोलाभात् । अन्यथाविनिश्चितत्वव्याघातापातात् विषयवाक्येपुकारणत्वव्यवहारस्यक्वाप्यदर्शनाच्च ॥ अतएवशंकराचार्यमधुसूदनसरस्वत्यादिभिरिहहेतुपदंतथानव्याख्यातंकिंतुयुक्तिपरमेव ॥ किंचशंकराचार्यैरत्रसूत्रपदेनसूचकानिपदपदेनज्ञानसाधनानिचवेदवाक्यान्येव गृह्यंतइतिस्वग्रंथानद्वैवसम्यग्व्याख्यानकौशलं स्वप्रथमश्लोकोक्तादिशास्वस्मिन्शसत्वापादकं प्रकाशयतिभवान् ॥ युक्तंतुप्रागुक्तमेव व्याख्यानं नतुतावककृतं क्लिष्टत्वाच्छीघ्रोपस्थितिकत्वाभावात् । द्वंद्वप्रयोगेप्रयोजनाभावाच्च ॥ अतोहेतुरहितत्वाज्जन्मादिसूत्रं नपृथगितियुक्तमेव नतुभगवद्वाक्यविरोधेपिपृथक्सूत्रं कृत्वासाध्याध्याहारक्लेशः ॥ नच जन्मादिसूत्रेपिजिज्ञासासूत्रादतइत्यनुवर्तनाददोषःशंक्यः अव्याख्यानात् यादृशार्थकोसिशब्दस्तत्रत्यभाष्यादौव्याख्यातस्तादृशार्थकस्यात्रासंगतेश्च ॥ तदेतदनुसंधायाहुः-किंचत्वन्मतइत्यादिना ॥ उत्क्रांतिसूत्रार्थादिकंतुसप्तमश्लोकखंडनेप्रपंचयिष्यामः ॥ श्रुतिस्त्वितिजात्यभिप्रायमेकवचनंतथाचनिश्चयेतिभगवद्वाक्येविनिश्चितपदंसूत्रपदानांविशेषणंछंदसांविशेषणंवा ॥ तथाच "वेदांतविज्ञानसुनिश्चितार्थाः" इतिश्रुत्यावेदार्थनिश्चयंप्रतिवेदांतविज्ञानस्यकारणतायाबोधनात् ब्रह्मसूत्रपदैःकरणैर्विशेषतोनिश्चितैश्छंदोभिरितितत्रार्थः ॥ आद्यपक्षेपिविनिश्चितत्वमसंदिग्धत्वंनिश्चयजनकत्वमितियावत् ॥ अतएवतत्रशंकराचार्यैरपि "विनिश्चितैःनसंशयरूपैःनिश्चितप्रत्ययोत्पादकैरित्यर्थः" इतिव्याख्यातंतत्साध्वुक्तमुक्तंमूले ॥ यच्च (एवंतर्हिसमन्वयादिस्तादिश्वनैष्य) मित्यंतमुक्तंतदप्यविचारात् ॥ नह्यस्माभिस्तत्रलक्षणांगीक्रियते ॥ तादृशार्थेव्यासस्यैवसमन्वयशब्दप्रयोगस्तुसमन्वयेनव्यतिरेकतश्चेत्यादौदृश्यतएव ॥ सन्नमानंच अन्वयादितरतइत्यादिप्रागुक्तं अतश्चाप्तव्यवहारात्समन्वयशब्दस्यतादृशार्थे शक्तिरेव ॥ अन्वयशब्दोपितादृशार्थेपंचभूतपरान्वयादिप्रतिपादनस्थलेपुबहुवारंव्यासपादैःप्रयुज्यतएव ॥ एतदुरसिकृत्यत्वदुक्तविकल्पदूषयंतितदपिसमन्वयेत्यादिना ॥ शास्त्रयोनित्वपूर्वपक्षेति ॥ अत्रपूर्वपक्षसिद्धांतयोर्द्वयोरसंगतिर्भाव्येप्रकाशादिपुचक्षुरुत्पादिवत् ॥ सर्वस्येत्यादि ॥ इदमत्रज्ञेयं-वेदेक्रियाशक्तिः क्रियारूपोभगवान्पूर्वकांडार्थोज्ञानशक्तिशक्तिज्ञानरूपःसउत्तरकांडार्थइतिसर्वस्यापिवेदस्यवस्तुतोब्रह्मण्येवसमन्वयस्तयोःपरस्परोपकारकभावश्चेष्ट एव तथापितैः सर्ववेदस्यक्रियापरत्वं ब्रह्मणोप्युपासनाविधिशेषत्वमित्यादिपूर्वपक्ष-

मुपन्यस्य सिद्धांतेब्रह्मणिसमन्वयस्तस्यविधिशेषत्वाभाव.पूर्वकांडार्थस्यकथंचिदुत्तरांगत्वंच-दर्शितं ॥ अत्रपरोक्तरीत्याउत्तरस्यैवपूर्वांगत्वंकुतोनस्यात् इत्याशयेनाथंदोषः ॥ ऐक-शास्त्येति ॥ "सहतमेतच्छारीरकंजैमिनीयेनषोडशलक्षणेन" इतिबौधायनोक्तेः पूर्वोत्तर-मीमांसयोरैकशास्त्र्यं तेनतद्विषययोः कांडयोरपिएकवेदस्यविभागत्वात्तदितिभावः ॥ प्राप-कत्वेनेति ॥ तत्तत्कर्मफलदातृत्वेनतथाचयेषांफलसमर्पकंब्रह्म तादृशकर्मप्रतिपादकत्वात्पूर्व-कांडस्यब्रह्मण्यन्वयः ॥ तत्तद्वाक्येति ॥ "सएवैनंभूतिंगमयति" इत्यादौवाय्वादितत्प्रवृत-त्तत्फलाप्तिकथनात्तद्बाधप्रसंगइतिभाव. ॥ अथ प्रापकत्वेनेति कर्मणांचित्तशुद्धिद्वाराब्रह्म-प्रापकत्वेन तथाचब्रह्मफलककर्मप्रतिपादकत्वात्तस्यतत्रान्वयः ॥ तत्तद्वाक्येति वायव्यश्वेता-लभनादेर्भूत्यादिकमेवफलंसन्निहितवाक्यादवगम्यते नतुचित्तशुद्धिर्ब्रह्मप्राप्तिर्वा ॥ ननूक्त-दुक्तपूर्वपक्षसिद्धांतयोरसंगतावपिप्रकारांतरेणतत्रसर्वसमन्वयस्यसंमतत्वात्सूत्रेसोयंः कुतो नादियतइत्यतआहुः–वस्तुवेति ॥ अप्रिमेति ॥ समग्रप्रथमाध्यायस्येतिभावः नचप्रथमा-ध्यायस्यसमन्वयार्थकत्वात्तस्यतदर्थकताबोधकस्तथासूत्रार्थंआवश्यकइतिवाच्यं । द्वितीया-द्यध्यायेषुआरंभेअविरोधसाधनादिपदघटितस्यतत्तदर्थकताबोधकसूत्रस्याभावेन अत्रैवता-दृशसूत्रावश्यकतायावक्तुमशक्यत्वात् तेष्वविरोधादिप्रतिपादनादेवतदर्थकताया सुखेन सिद्धेः ॥ तत्समतत्वसंमतसूत्रार्थयोरधिकंदूषणंभूषणंचभाष्यादेरेवात्रगंतव्यं ॥

मूलेप्यत्रद्वितीयतृतीयाधिकरणयोर्भाष्यंतत्प्रकाशंचैकीकृत्यतत्पंक्तयः प्रायोऽक्षरशः काश्चिदर्थतश्चानूदिताइतिध्येयम् ॥

इयंचमायेत्यादिकःप्रलापस्तुमायानिरासेनैवनिरस्तः सतिकुड्येचित्रमितिन्यायात्तथापिकिंचिदुच्यतेयक्षानुरोधीहिबलिरितिन्यायात् ॥ शुद्धचैतन्येमायातिष्ठतीतिपक्षस्तुनसंभवति मायायास्तमोरूपत्वेन चैतन्यस्यप्रकाशरूपत्वेनतमःप्रकाशयोर्विरुद्धस्वभावत्वेनाऽऽधाराधेयभावासंभवात् ॥ नहिसूर्य्यांधकारयोर्वह्निशैत्ययोर्वाऽऽधाराधेयभावः संभवति ॥ किंचअविद्याश्रयत्वेब्रह्मणोल्पज्ञत्वापत्तिः ॥ नचाविद्यायास्तमोरूपत्वेनतमसः स्वाश्रयविषयकज्ञानप्रतिबंधकत्वेपितन्निष्ठज्ञानप्रतिबंधकत्वादर्शनेन नाज्ञत्वसंपादकत्व (मतएवतमःस्थाजनाःप्रकाशस्थान्पश्यंती) तिवाच्यं ॥ यथातमसिस्थितःपुरुषस्तमसिस्थितान्घटपटादीन्नपश्यतितथाऽविद्यावद्ब्रह्मविद्याकार्यंजगन्नजानीयादेवनहिजगत्प्रकाशस्थंयेनाविद्याश्रयेण ब्रह्मणाज्ञातंभवेत् ॥ तथाचब्रह्मण्यज्ञत्वंदुर्वारमेव अस्मन्मतेच मायाभिधाब्रह्मणःशक्तिरेवेतिनकोपिदोषःयेचत्वन्मतपक्षपातिनोऽविद्यायाब्रह्मनिष्ठत्वस्वीकारेऽल्पज्ञत्वादीन्दोषान्पश्यंतोजीवेतांस्वीकुर्वंति ॥ तन्मतेतुपरास्यशक्तिर्विविधैवश्रूयते ॥ मायांतुप्रकृतिंविद्यान्मायिनंतुमहेश्वरमित्यादिवाक्यविरोधः ॥ किंचतमसःस्वाश्रयावरकत्वदर्शनेनाऽविद्यायाजीवावरक-

त्वाज्जीवज्ञानं ब्रह्मणोनस्यादितिब्रह्मणोज्ञत्वापत्तिः तमःस्थेनप्रकाशस्थस्यज्ञानाज्जीवस्यब्रह्मवित्त्वंस्यात्तथासतितस्यैवानायासेनमोक्षसिद्धौ साधनवैयर्थ्यंस्यात् ॥ किंचजीवाश्रिताऽविद्येतिस्वीकुर्तनयेजीवत्वमविद्यारूपोपाधिकृतस्वतःसिद्धंवा ? ॥ आद्ये या उपाधिरूपाऽविद्या साविशेषणीभूताऽविद्यातोऽभिन्नाभिन्नावा ? ॥ आद्ये आत्माश्रयः स्वावच्छिन्नेस्वस्यवृत्तित्वात् द्वितीयेसापिजीवेवकव्याऽजीवत्वंचोपाधिकृतं सचविशेषणीभूताविद्याचेदन्योन्याश्रयः अन्याचेचक्रकानवस्थेस्यातां ॥ स्वत सिद्धत्वस्वीकारेत्वपसिद्धांत·द्वैतापत्तिश्चेत्यलमप्रकृतविचारेण ॥

सहस्राक्षेइयचमायेत्यादिअज्ञानेपिब्रह्मणोनाज्ञत्वमित्यतभागदूषयति ॥ इयचमायेत्यादिकइत्यादिना ॥ अप्रकृतविचारेणेत्येतेनमायानिरासेनेति तदभिमतरीतिकतन्निरासेन ॥ तन्निष्ठेति ॥ स्वाश्रयमनुष्यादिनिष्ठेत्यर्थं ॥ घटपटादीनिति ॥ नहितम स्थ स्वशरीरमपि पश्यत्यतइदमात्मनोप्युपलक्षण ॥ अविद्यावदिति ॥ तद्विशिष्टतदाश्रयइतियावत् प्रकाशस्थमिति ॥ मायोपादानकत्वात्प्रकाशस्थानीयविशुद्धचित्स्थनभवतीत्याशय ॥ तथाचतम स्थदेवदत्तेनतरस्थघटादिरिवस्वशरीरमिवचप्रपचआत्माविद्याश्रयब्राह्मणानैवज्ञायतेतिनिगर्वं दुर्वारमिति ॥ मायायास्तुच्छत्वागीकारात् ब्रह्मातिरिक्तचेतनानगीकाराच्च ब्रह्मणैव स्वस्मिन्नजतादिवन्माथाध्यस्तेत्यपत्त्यापिसुतरादुर्वार । ननुत्वन्मतेप्यविद्याश्रयत्वेनब्रह्मणोऽज्ञत्वप्रसगइतिचेन्नाविद्ययाऽविद्याशत्त्यामायचानिषेवितमित्यादिवचनैस्तस्यास्तच्छक्तित्वेनतदिच्छयापरेषामेवाज्ञतायास्तयासपादनस्य औचित्यात् ॥ परेचस्वेच्छयाभेदप्रापिताश्चणवोशाएवनहिवह्निशक्तिर्वह्निमेवदहति हिमशक्तिर्हिममेववाजाड्येन पीडयति अतएवोक्त नाग्नेर्हितापोनहिमस्य तत्स्यादिति ॥ क्वचिज्जीवेकथञ्चित्व्यभिचारेपिसर्वज्ञेसर्वशक्तौस्वतन्त्रे ज्ञानघनेब्रह्मणिनस्वशत्त्याऽज्ञत्वसभव ॥ अतएवोक्त एकस्यैवममाशस्येतिनमेमोक्षोनबधनमितिच ॥ नचतवापिशक्तित्वागीकारान्निस्तार सविशेषत्वभयाच्छक्तितायाअशक्यवचनत्वात् ॥ तदेतदाहु नकोपिदोषइति ॥ यत्तु (अविद्यायालौकिकाज्ञानवैलक्षण्ये

इयच माया शुद्धचैतन्ये तिष्ठतीतिवद्दव ॥ नचाऽविद्याश्रयत्वेऽज्ञत्वापत्तिरितिवाच्यम् ॥ अविद्यायास्तम रादृशत्वेन तमस स्वाश्रयविषयकज्ञानप्रतिबन्धकत्वेऽपि तन्निष्ठज्ञानप्रतिबन्धकत्वस्याऽदर्शनेन मायायामपि तथाकल्पनात् ॥ अतएव तम स्थाजना प्रकाशस्थान्पश्यन्ति ॥ अन्यथा त्वन्मतेऽप्यविद्याश्रयत्वेन ब्रह्मणोऽज्ञत्वप्रसङ्गात् ॥ तस्याअविद्यायालौकिकाऽज्ञानवैलक्षण्ये तु अविद्यापदस्य तनपरिभाषात्वमेवस्यात् ॥ अविद्या जीवे तिष्ठतीत्येके ॥ यत्तुजीवोऽज्ञानस्वरूपत्वान्नाज्ञानाश्रयइत्याह ॥ नत्वनङ्गीकारपराहतम् ॥ अस्मिन्पक्षेऽज्ञानस्य तिमिराख्यरोगवत्स्वाश्रयमात्रदोषत्व नतु विषयावरकत्वम् ॥ अतोब्रह्मणोनाज्ञत्वम् । अभेदस्य वास्तवत्वेऽप्यवास्तवभेदस्याऽपि सत्वेन जीवस्याऽज्ञानेऽपि ब्रह्मणोनाज्ञत्वम् ॥

स्वविद्यापदस्यतत्रपरिभाषात्यमेवेति) तत्र तस्याःशक्तितयालौकिकाज्ञानस्यतत्कार्यत्वाच तस्यांतद्वैलक्षण्यस्यावश्याभ्युपेयत्वात् ॥ अन्यथानाशनादिशक्तिःशस्त्रादिपुनष्टंशस्त्रमित्यादिव्यवहारोदुर्वारःस्यात् ॥ अतस्तस्यामेवाज्ञानत्वकल्पनानिर्मूलैव ॥ येचेत्यादि ॥ अविद्यावच्छिन्नंचैतन्यंजीवः तत्रावच्छेदकतयाविशेषणीभूताऽविद्या आधेयाऽविद्यैवचेदात्माश्रयः भिन्नाचेत्साशुद्धचैतन्यएवस्थितेत्युक्तदोषाः साप्यविद्योपहितएवस्थितेतिचेदुपाधिभूता प्रथमाचेत्तर्ह्यन्योन्याश्रयः भिन्नाचेत्तत्राप्युक्तविकल्पः । आद्येचक्रकापत्तिर्द्वितीयेऽनवस्था । किंच विशुद्धचितोजीवत्वानंगीकाराज्जीवभावस्यैनाविद्याजन्यत्वांगीकाराच्चांततोजीवस्याज्ञानरूपत्वमेवापद्यते । अतएवमुक्तौ जीवभावस्यनिवृत्तिः । एतेनयत्तुजीवइत्यादिनिरस्तं ॥ यत्तुअभेदस्येत्यादितत्रविस्फुलिंगपदुच्चरणेनैच्छिकभेदांगीकारएव विस्फुलिंगस्यजलेनिर्वापणेवह्नेरनिर्वापणवच्चक्षुरादेरस्यतिमिरादिसंबंधेपिसूर्यादेस्तदसंबंधवच्चपरमेश्वरस्याज्ञत्वंनापद्येत । स्वन्मतेतुशुद्धस्यैवाविद्यासंबंधेन जीवभावात्तदापत्तिर्दुर्वारा । अत्रात्मभेदस्याज्ञानमूलकस्यसत्यमपिब्रह्मण्येववाच्यं तथाचापत्तमेवतत्राज्ञानं ॥ यद्यवात्मभेदोत्तरमज्ञानसंबंधः स्यात्तदातदापत्तिर्नस्यात् ॥ अज्ञानकृतमवात्मभेदं वदतस्तत्वतुनिस्तारः ॥

मायागतत्वमाम्नां परस्यसर्गेऽभिधाश्रुतेर्नाऽस्मिन् ॥ क्षणकारणमखिलमिदं वदतो बौद्धप्रपंचउचितस्ते ॥ इतितृतीयश्लोकखंडनं ॥

अग्रेचइदानींसाकारस्वैशक्त्यैकंसर्वेशं सर्वेकर्तृचसच्चिदानंदरूपं हिब्रह्मतस्मादिदंजगदितिशुद्धाद्वैतमार्तंडस्यश्लोके तट्टीकायांचलोपोद्भावनंतेनकृतंतदपिपरमताज्ञानमूलकं ॥ ब्रह्मणःसाकारत्वस्यआनंदमात्रकरपादमुखोदरादिरितिपंचरात्रे परमात्मानंपरमानंदविग्रहमितियाज्ञवल्क्यस्मृतौ सहस्रशीर्षापुरुषःसहस्राक्षःसहस्रपादित्यादि श्रुतिपुचप्रसिद्धत्वात् ॥ नच "नतस्यकार्यंकरणंचविद्यते" इति श्रुतिविरोधइतिवाच्यं तस्येतिषष्ठ्याभेदोनिरूप्यते तथाचजीववत्स्वरूपातिरिक्तंतत्संबंधिज्ञानक्रियादिपुकरणमिन्द्रियंनास्ति ॥ अथवानित्यत्वादाकारस्यतद्धेतुभूतंकरणंक्रियासापिनास्ति ॥ अतएव "नतत्समश्चाभ्यधिक" इति ॥ एतेनैव "अप्राणोह्यमनाःशुभ्र" इत्यस्यापि विरोधःपरिहृतः ॥ तथाच ब्रह्मप्रकरणेनिरूपितआकारोब्रह्माभिन्न एव ॥ नचाकारनिरूपकाणांब्रह्मपरिचायनार्थत्वात्तेषांब्रह्मभिन्नकराद्याकारनिरूपकत्वाभावप्राधान्येनब्रह्मप्रतिपादकत्वमितिविरोधइतिवाच्यं ॥ "सयथासैंधवघनोऽनंतरोऽवाह्यःकृत्स्नोरसघनएवैवंवाअरेयमात्माऽनंतरोऽवाह्यःकृत्स्नःप्रज्ञानघनएवे" तिश्रुतौवाह्याभ्यंतरभेदराहित्यबोधनेनज्ञानाकारत्वस्यैवप्रसिद्धत्वात् ॥ आकारभूतकरादिराहित्येनकेवलज्ञानात्मकतायांवाह्याभ्यंतरप्रतीतिराहित्येनतन्निषेधानुपपत्तिः

अकृत्स्नादिराहित्येनकृत्स्नघनपदयोर्वैयर्थ्यापत्तिश्च ॥ अतःकेवलसच्चिदानंदात्मकब्रह्माभिन्नकरचरणाद्याकारांगीकारे नकस्यापिविरोधः ॥ एवंचाकारस्यमायिकत्वंवदन्ननभिज्ञ एव ॥ जगद्धेतुत्वस्यवास्तवस्यपूर्वंप्रतिपादितत्वाद्यथाजगद्धेतुत्वमिति दृष्टांतोसिद्धः ॥ नचाकारस्यसत्यत्वेमायाह्येषामयासृष्टायन्मांपश्यसि नारद । सर्वभूतगुणैर्युक्तनैवमांज्ञातुमर्हसीति स्मृतिविरोधइतिवाच्यं ॥ तस्याअयमर्थः—यन्मांसर्वभूतगुणैर्युक्तंपश्यसिएषामायामयासृष्टामांचिदानंद एवंनज्ञातुंद्रष्टुमर्हसि तस्यकृपैकवेद्यत्वात् ॥ "यमेवैषवृणुतेतेनलभ्यस्तस्यैषआत्मावृणुतेतनूंस्वा" मितिवरणहेतुकतनूविवरणस्य श्रुत्यतरेश्रावणात् ॥ अतएव "अविज्ञातंविजानतांविज्ञातमविजानता" मित्यप्युक्त करचरणादिविशिष्टतयाजानतां अविज्ञातं तदभिन्नतयाजानताविज्ञातमित्यर्थः ॥

अथपरोक्तएवमायिकमितिचतुर्थश्लोक इदानींसाकारमित्यादिना ज्ञेयब्रह्मणितत्सक्तिरित्यतेनव्याख्यानेनसहित अग्रेइदानींसाकारमित्यादिनातदुक्तमितिसूत्रव्यासपादैरितीत्यतेनपरिहरिष्यत प्रथम इदानीमित्यादिक स्मृतेश्चेत्यर्थइत्यत भागनिराकुर्वंति । अग्रेचेत्यादिना जानता विज्ञातमित्यर्थं इत्यतेन ॥ अत्रेदबोध्य—साकारत्वसाधिकास्तत्रस्मृतिश्रुतयइहारोहक्रमेणदर्शिता ॥ तत्रपञ्चरात्रेनिर्दोषपूर्णगुणविग्रहआत्मतन्त्रोनिश्चेतनात्मकशरीरगुणैश्चहीन। आनंदमात्रकरपादमुखोदरादि सर्वत्रचस्वगतभेदविवर्जितात्मेतिवा-

---

एवमायिकमस्य पादकरकवात्म्यात्मकमानत्वगीरानन्दस्य कृचेर्यंतोनहि सुख सम्थानवद्दृस्यते ॥ अगाभात्रगिर सुवर्णवदयस्यात्ते विशारी मते धेनुर्न प्रकृतिर्मेतान्नरपरे सूने निपातादित ॥ ४ ॥ इदानीं साकारसर्वशक्त्येकसर्वज्ञमर्वंकर्तृंच ॥ सच्चिदानन्दरूपहिब्रह्म तस्मादिदजगदिति श्लोकोक्तमाकारासहितस्य सच्चिदानन्दरूपत्व तथा तट्टीकोक्त विश्वतश्चक्षुरुतविश्वतोमुखोविश्वतोबाहुरुतविश्वतस्पात् ॥ सबाहुभ्यांधमतिसपतत्रैर्द्यावाभूमीजनयन्देवएक इत्यादिश्रुतिभि साकार ब्रह्मप्रतिपाद्यते ॥ श्रुतस्यचक्षुरादिवमिन्द्रियान्तरस्योपलक्षण ॥ बाहुभ्यामितिद्विवचनेन ब्रह्मणोद्विभुजत्व श्रुतिसिद्ध चतुर्भुजत्व तु स्मृतिप्रसिद्धम् ॥ सर्वकाम-सर्वगन्ध सर्वगन्ध सर्वरस इतिछान्दोग्ये रसोवैसइति तैत्तिरीये सहस्रशीर्षापुरुष सहस्राक्ष सहस्रपात् इतिपुरुषसूक्ते साकारत्वमुक्तम् ॥ अग्रेततोविराडजायतेतिकथनात्प्राय विराट्पुरुष ॥ सर्वत पाणिपादन्तत् सर्वतोऽक्षिशिरोमुखमिति गीतायाम् ॥ आनन्दमात्रकरपादमुखोदरादीति नारदपञ्चरात्रे अथवापरमात्मानपरमानन्दंविग्रहमिति याज्ञवल्क्यस्मृतौ इति निरस्यति ॥ एवमायिकमिति ॥ यथा जगद्धेतुत्व तथेत्यर्थ ॥ कशिर पादकरकमित्याकारमात्रस्योपलक्षणम् ॥ वाक्यादिति ॥ इन्द्रोमायाभिरितिश्रुते मायाह्येषामयासृष्टायन्मांपश्यसि नारद । सर्वभूतगुणैर्युक्तनैवमांज्ञातुमर्हसि इतिस्मृतेश्चेत्यर्थ ॥

क्येस्पष्टमेवतत्समर्थितं ॥ तत्रलोकरहोपरहिता·पूर्णा·साम्यातिशयरहिताः ॥ अर्थादलौकिकाःगुणाःशांतिज्ञानादयएवविग्रहःस्वरूपं यस्य ॥ एतेनगुणगुणिनोरभेदः ॥ विग्रहपदात् "तदेजतितन्नैजती" त्याद्युक्तलद्धर्मेपुलोकदृष्ट्याविरोधोभातीत्यपिदर्शितं ॥ गुणानधीनत्वायाह–आत्मतंत्रइति ॥ लोकवत्स्वभिन्नजडशरीरेंद्रियव्यापारतंनाधाऽह–निश्चेतनेति ॥ निश्चेतनाप्रकृतिः प्राकृतैःशरीरैः गुणैरिंद्रियैश्चात्तद्धर्मैश्चहीनःतर्हिकीदृशआकारइत्याकांक्षायामाह–आनंदमात्रेति । यद्यपिसच्चिदानंदविग्रहस्तथाप्याकारसमर्पकोग्रहणवादेआनंदएवेति मात्रपदं ॥ तेनसुवर्णप्रतिमावत्करचरणादानविशेषः ॥ आदिपदंचक्षुरादिसर्वसग्राहकं करचरणादिविभागात्प्राप्तंस्वगतभेदंवारयति-सर्वत्रचेति सर्वत्रसर्वेपुप्रदेशे ॥ तथाचैकैकावयवेसर्वावयवरूपतासर्वत्रश्रवणदर्शनादिकार्यंचसिध्यति ॥ त्रिविधभेदविवर्जितात्मेतिपाठेसर्वं द्वैतंनिवृत्तंतत्रेदमप्यक्षतं ॥ याज्ञवल्क्यवाक्यंतुयाज्ञवल्क्यगीतेतिप्रसिद्धेगार्गीप्रतियाज्ञवल्क्येनोक्तेद्वादशाध्यायसंमितेयोगशास्त्रेनवमेऽध्यायेऽस्ति तत्रध्यानमुपक्रम्य (श्लो॰ २) ध्यानमात्मस्वरूपस्यवेदनंमनसासत्वित्यादिनातल्लक्षणादिकमुक्त्वा (श्लो॰ ५) एकंज्योतिर्मयंशुद्धंसर्वगंव्योमवद्दृढम् । अव्यक्तमचलंनित्यमित्यादिना (श्लो॰ ९) ब्रह्मनह्ममयोहंस्यामितितद्वेदनंभवेदित्यंतेनाक्षरध्यानपक्षमुक्त्वापुरुपोत्तमध्यानपक्षमाह अथवापरमात्मानंपरमानंदविग्रहं । गुरूपदेशाद्विज्ञायपुरुपंकृष्णपिंगलं । ब्रह्मब्रह्मपुरेचास्मिन्दहराख्येसमध्यमे । अभ्यासात्सप्रपश्यंतिसत्त·संसारभेपजमित्यादिना (श्लो॰ १७) प्रभाभिर्भासमद्रूपंपरितः पुरुपोत्तममित्यतेन ॥ एवंचात्रपरमानंदविग्रहपदस्यपरम·अगणितःआनंदःविग्रहःस्वरूपंयस्येत्येवार्थः ॥ एतेनतत्रैवाष्टमाध्यायस्थं (श्लो॰ २८) प्रणवस्यतुनादांतेपरमानंदविग्रहमितिवाक्यमपिव्याख्यातप्रायम् सहस्रशीर्षेतिपुरुपसूक्तवाक्येसहस्रशब्दोऽसंख्यपरः ॥ ब्रह्मण साकारताबोधकवाक्यानि ऋग्यजुःसामाथर्वसु "इदंविष्णुर्विचक्रमेत्रेधानिदधेपदं ॥ विष्णोःकर्माणिपश्यत ॥ विश्वतश्चक्षुरुतविश्वतोमुखोविश्वतोबाहुरुतविश्वतस्पात् ॥ संबाहुभ्यांधमतिसंपतत्रैर्द्यावाभूमीजनयन्देवएकः ॥ विश्वतोहस्तः सबाहुभ्यांनमति द्यावापृथिवीइतितैत्तिरीयाः ॥ सहस्रशीर्षंदेवंविश्वाक्षंविश्वशंभुवं । विश्वंनारायणंदेवमक्षरपरमंपदं विश्वतःपरमांनित्यंविश्वंनारायणं हरिं । नसंदृशेतिष्ठतिरूपमस्य ॥ सर्वाननशिरोग्रीवंतलवकारोपनिपदस्तृतीयखंडेब्रह्मणोहविजयेदेवमहीयंतेत्यादिः आनंदरूपममृतंयद्विभाति । अग्निर्मूर्द्धाचक्षुषीचंद्रसूर्यौ" इत्यादीनिसहस्रश उपलभ्यंतएवेतिकिंबहुना ॥ विशेपतश्चायमर्थं उत्तरभागेसेत्स्यति ॥ नतस्येति ॥ "नतस्यकार्यंकरणंचविद्यते नतत्समश्चाभ्यधिकश्चदृश्यते ॥ परास्यशक्तिर्विविधैवश्रूयतेस्वाभाविकीज्ञानबलक्रियाच" इतिश्वेताश्वतरवाक्यं ॥ अत्रकरणनिपेधोमूलोक्तरीतिकः एवंकार्यनिपेधोपितस्येतिपष्ठ्याकुलालवन्निजकार्यपरः अथवाण्यतआवश्यकार्यकर्त्रांगीकाराज्जीववत्फलोद्देश्यककर्तव्यपरः नमेपार्थास्तिकर्तव्यमितिस्मरणात् ॥ ननुतत्रापिसर्वथाकार्याभावः वलेएवचकर्मणीत्युक्तेः ॥ तथापिनसर्वथातदभावः बहुश्रुतिविरोधात् उत्तरार्धेऽत्रैवक्रियोक्तेश्च ॥ ज्ञानबलक्रियाशक्तिमत्वादेवननिर्धर्मकत्वं ॥ जीववदिति ॥ यथाजीवस्याणुमात्रस्वरूपादतिरिक्तानींद्रियाणि तथात्रनास्ति स्वस्यपराविविधशक्त्यैवज्ञानक्रियादेः कथनात् ॥ अप्राणइति "दिव्योह्यमूर्तः पुरुषः सबाह्याभ्यंतरोह्यजः ।

अकृत्स्नादिराहित्येनकृत्स्नघनपदयोर्वैयर्थ्यापत्तिश्च ॥ अतःकेवल-
सच्चिदानंदात्मकब्रह्माभिन्नकरचरणाद्याकारांगीकारे नकस्यापिवि-
रोधः ॥ एवंचाकारस्यमायिकत्वंवदन्ननभिज्ञ एव ॥ जगद्धेतुत्व-
स्यवास्तवस्यपूर्वंप्रतिपादितत्वाद्यथाजगद्धेतुत्वमिति दृष्टांतोसिद्धः ॥
नचाकारस्यसत्यत्वेमायाह्येपामयासृष्टायन्मांपश्यसि नारद । सर्व-
भूतगुणैर्युक्तंनैवमांज्ञातुमर्हसीति स्मृतिविरोधइतिवाच्यं ॥ तस्याअय-
मर्थः-यन्मांसर्वभूतगुणैर्युक्तंपश्यसिएपामायामयासृष्टामांचिदानंदं
एवंनज्ञातुंद्रष्टुमर्हसि तस्यकृपैकवेद्यत्वात् ॥ "यमेवैपवृणुतेतेनलभ्य-
स्तस्यैपआत्मावृणुतेतनूंस्वा" मितिवरणहेतुकतनूविवरणस्य श्रुत्यंत-
रेश्रावणात् ॥ अतएव "अविज्ञातंविजानतांविज्ञातमविजानता"
मित्यप्युक्तं करचरणादिविशिष्टतयाजानतां अविज्ञातं तदभिन्नतया-
जानतांविज्ञातमित्यर्थः ॥

अथपरोक्तंएवंमायिकमितिचतुर्थश्लोक इदानींसाकारमित्यादिना ज्ञेयब्रह्मणितत्प्र-
सक्तिरित्यंतेनव्याख्यानेनसहितं अग्रेइदानींसाकारमित्यादिनातदुक्तमितिसूत्रेव्यासपादै-
रितीत्यंतेनपरिहरिष्यंत प्रथमं इदानीमित्यादिकं स्मृतेश्चेत्यर्थइत्यंतं भागंनिराकुर्वंति ।
अग्रेचेत्यादिना जानता विज्ञातमित्यर्थ इत्यंतेन ॥ अत्रेदंबोध्यं—साकारत्वसाधिकास्तत्रस्थ-
तिश्रुतयइहारोहक्रमेणदर्शिताः ॥ तत्रपंचरात्रेनिर्दोषपूर्णगुणविग्रहआत्मतंत्रोनिश्चेतनात्म-
कशरीरगुणैश्चहीन। आनंदमात्रकरपादमुखोदरादिः सर्वत्रचस्वगतभेदविवर्जितात्मेतिवा-

---

एवंमायिकमस्य पादकरकंत्राद्यात्मकमाभत्वगीरानन्दस्य कृतेर्यतोनहि सुख सस्थान-
वद्दृश्यते ॥ अणाभावगिर सुवर्णवद्यंस्याते विकारी मते धेनुर्न प्रकृतिर्मतान्नरपरे सूत्रे
निपातादित ॥ ४ ॥ इदानीं साकारसर्वशक्त्येनसर्वज्ञमर्वकर्तृच ॥ सच्चिदानन्दरूपहिब्रह्म
तस्मादिदंजगदिति श्लोकोकमाकारासहितस्य सच्चिदानन्दरूपत्व तथा तट्टीकोक्तं विश्वतश्चक्षु-
रुतविश्वतोमुखोविश्वतोबाहुरुतविश्वतस्पात् ॥ सबाहुभ्यांधमतिसंपतत्रैर्द्यावाभूमीजनयन्देवएकः
इत्यादिश्रुतिभि साकार ब्रह्मप्रतिपाद्यते ॥ श्रुतस्यचक्षुरादिरमिन्द्रियान्तरस्योपलक्षण ॥ बाहु-
भ्यामितिद्विवचनेन ब्रह्मणोद्विभुजत्व श्रुतिसिद्धं चतुर्भुजत्वं तु स्मृतिप्रसिद्धम् ॥ सर्वकाम-
सर्वगन्ध सर्वगन्ध सर्वरस इतिछान्दोग्ये रसोवैसइति तैत्तिरीये सहस्रशीर्षापुरुष सहस्राक्षः
सहस्रपात् इतिपुरुषसूक्ते साकारत्वमुक्तम् ॥ अग्रेततोविराडजायतेतिकथनान्नायं विराट्पुरुष ॥
सर्वत पाणिपादन्तत् सर्वतोऽक्षिशिरोमुखमिति गीतायाम् ॥ आनन्दमात्रकरपादमुखोदरा-
दीति नारदपञ्चरात्रे अथनापरमात्मानंपरमानन्दविग्रहमिति याज्ञवल्क्यस्मृतौ इति निर-
स्यति ॥ एवमायिकमिति ॥ यथा जगद्धेतुत्व तथेत्यर्थ ॥ पशिर पादकरकमित्याकारमा-
त्रस्योपलक्षणम् ॥ वाक्यादिति ॥ इन्द्रोमायाभिरितिश्रुतेः मायाह्येपामयासृष्टायन्मांपश्यसि
नारद । सर्वभूतगुणैर्युक्तंनैवमांज्ञातुमर्हसि इतिस्मृतेश्चेत्यर्थ ॥

क्येस्पष्टमेवतत्समर्थितं ॥ तत्रलोकवद्दोपरहिता.पूर्णाःसाम्यातिशयरहिताः ॥ अयांदर्लौ-किकाःगुणाःशांतिज्ञानादयएवविग्रहःस्वरूपं यस्य ॥ एतेनगुणगुणिनोरभेदः ॥ विग्रहपदात् "तदेजतितन्नेजती" त्याद्युक्ततद्धर्मेपुलोकदृष्ट्यानिरोधोभातीत्यपिदर्शितं ॥ गुणानधी-नत्वायाह-आत्मतंत्रइति ॥ लोकवत्स्वभिन्नजडशरीरेंद्रियव्यावर्तनायाऽह-निश्चेतनेति ॥ निश्चेतनाप्रकृतिः प्राकृतैःशरीरैः गुणैरिंद्रियैश्चातद्धर्मैश्चहीनःतर्हिपनिराकारइत्याकांक्षा-यामाह-आनंदमात्रेति। यद्यपिसच्चिदानंदविग्रहस्तथाप्याकारसमर्पकोग्रहणयादेवानंदएवेति मात्रपदं ॥ तेनसुवर्णप्रतिमावत्करचरणादावविशेषः ॥ आदिपदंचक्षुरादिसर्वसंग्राहकं करचरणादिविभागात्प्राप्तंस्वगतभेदंवारयति-सर्वत्रचेति सर्वत्रसर्वेषुप्रदेशे॥ तथाचैकैकावय-वेसर्वांगपरूपतासर्वत्रश्रवणदर्शनादिकार्यंचसिध्यति ॥ त्रिविधभेदविवर्जितात्मेतिपाठेसर्वं द्वैतंनिवृत्तंतत्रेदमप्यक्षतं ॥ याज्ञवल्क्यवाक्यंतुयाज्ञवल्क्यगीतेतिप्रसिद्धेगार्गीप्रतियाज्ञव-ल्क्येनोक्तेद्वादशाध्यायसंमितेयोगशास्त्रेनवमेऽध्यायेऽस्ति तत्रध्यानमुपक्रम्य (श्लो०२) ध्यानमात्मस्वरूपस्यवेदनंमनसाप्स्वित्यादिनातल्लक्षणादिकमुक्त्वा (श्लो० ५) एकं ज्योतिर्मयंशुद्धंसर्वगंव्योमवद्धृडम्। अव्यक्तमचलंनित्यमित्यादिना (श्लो० ९) ब्रह्मब्रह्म-मयोहंस्यामितितद्वेदनंस्वर्वेदित्यंतेनाक्षरध्यानपक्षमुक्त्वापुरुषोत्तमध्यानपक्षमाह अथवाप रमात्मानंपरमानंदविग्रहं। गुरूपदेशाद्विज्ञायपुरपंकृष्णपिंगलं। ब्रह्मब्रह्मपुरेचास्मिन्दहराल्ये स्वमध्यमे। अभ्यासात्संप्रपश्यंतिसंत.संसारभेषजमित्यादिना (श्लो० १७) प्रभाभिर्भास-यद्रूपंपरितः पुरुषोत्तममित्यतेन ॥ एवंचात्रपरमानंदविग्रहपदस्यपरमःअगणितःआनंदःवि-ग्रह.स्वरूपंयस्येत्येवार्थः ॥ एतेनतत्रैवाष्टमाध्यायस्थं (श्लो० २८) प्रणवस्यतुनादांतेपरमा नंदविग्रहमितिवाक्यमपिव्याख्यातप्रायम् सहस्रशीर्षेतिपुरुषसूक्तवाक्येसहस्रशब्दोऽसंख्य-परः ॥ ब्रह्मण साकारताबोधकवाक्यानि ऋग्यजुःसामाथर्वसु "इदंविष्णुर्विचक्रमेत्रेधानिद-धेपदं ॥ विष्णोःकर्माणिपश्यत ॥ विश्वतश्चक्षुरुतविश्वतोमुखोविश्वतोबाहुरुतविश्वतस्पात् ॥ संबाहुभ्यांधमतिसंपतत्रैर्द्यावाभूमीजनयन्देवएकः ॥ विश्वतोहस्तः संबाहुभ्यांनमति द्यावा-पृथिवीइतितैत्तिरीयाः ॥ सहस्रशीर्षंदेवंविश्वाक्षंविश्वशंभुवं। विश्वंनारायणंदेवमक्षरंपरमंपदं विश्वत.परमांनित्यंविश्वंनारायणं हरिं। नसंदृशेतिष्ठतिरूपमस्य ॥ सर्वाननशिरोग्रीवंतलवका-रोपनिषदस्तृतीयखंडेब्रह्मणोहविजयेदेवमहीयंतेत्यादिः आनंदरूपममृतंयद्विभाति। अग्नि-र्मूर्द्धाचक्षुपीचंद्रसूर्यौ" इत्यादीनिसहस्रशउपलभ्यंतएवेतिकिंबहुना ॥ विशेषतश्चायमर्थं उत्तरभागेसेत्स्यति॥ नतस्येति॥ "नतस्यकार्यंकरणंचविद्यते नतत्समश्चाभ्यधिकश्चदृश्यते ॥ परास्यशक्तिर्विविधैवश्रूयतेस्वाभाविकीज्ञानबलक्रियाच" इतिश्वेताश्वतरवाक्यं॥ अत्रकरण-निषेधोमूलोक्तरीतिकः एवंकार्यनिषेधोपितस्येतिपश्चात्कुलालवद्विघ्नकार्यपरः अथवाण्यत-आवश्यकार्यकरणांगीकाराज्जीववत्फलोद्देश्यककर्तव्यपरः नमेपार्थास्तिकर्तव्यमितिस्मरणात्॥ नतुतत्रापिसर्वथाकार्याभावः वर्तएवचकर्मणीत्युक्तेः ॥ तथापिनसर्वथातदभावः बहुश्रुति-विरोधात् उत्तरार्धेऽप्यैवक्रियोक्तेश्च ॥ ज्ञानबलक्रियाशक्तिमत्त्वादेवननिर्धर्मकत्वं ॥ जीववद्-दिति ॥ यथाजीवस्याणुमात्रस्वरूपादतिरिक्तानींद्रियाणि तथात्रनास्ति स्वस्यपरविविधश-क्त्यैवज्ञानक्रियादेः कथनात् ॥ अप्राणइति "दिव्योह्यमूर्तः पुरुषः सबाह्याभ्यंतरोह्यजः।

अप्राणोह्यमना शुभ्रोह्यक्षरात्परतः परः" इतिमुंडकवाक्ये अतिरिक्तप्राणमनसोर्निषेधः "मनसोमनोयत् ॥ सउप्राणस्यप्राणः ॥ प्राणश्चैवप्राणोभवति ॥ मनसोरेतः प्रथमयदासीत् ॥ चंद्रमामनसोजातः" इतितलवकारबृहदारण्यकभागवृत्तसूक्तपुरुषसूक्तादिश्रुतिभ्यः अमूर्तइत्यपिपरिच्छिन्नमूर्तेः सः दिव्यपुरुषत्वोक्तेः । बाह्याभ्यंतरत्वस्यतत्साहित्यस्वाकथनाच्च ॥ अतएवनिर्धर्मकत्वं अक्षरात्परत्वशुभ्रत्वयोः श्रवणाच्च ॥ सयथेत्यादि अत्रघनपदात्सघातः तेनसाकारत्वं अनंतरायाद्यकृत्स्नत्वकथनाच्च ॥ इदंबृहदारण्यकेपष्ठाध्यायेपुनःपठ्यमानेमैत्रेयीब्राह्मणेऽस्ति ॥ संढ्यमानश्लोके एवंपदं अतीतश्लोकेयथातस्यहेतुत्वंमायिकंसाधितं तथेदमपीत्यर्थकं व्यर्थमित्याहुः-जगद्धेतुत्वस्येति ॥ इंद्रोमायाभिरितितुप्राग्व्याख्यातं ॥ मायाश्चतत्रभेदज्ञानएवकरणतयाऽनुयंति नतुरूपेषुहेतुत्वयाकारकस्यक्रियान्वयौचित्यात् ॥ त्वदभिमतामायैकैवेतिबहुवचनविरोधश्च ॥ मायाह्येषेति इदंमहाभारतेशांतिपर्वणिमोक्षधर्मेपुचत्वारिंशदधिकत्रिशततमाध्याय (श्लोकः ४५) नारदंप्रतिनारायणस्यवाक्यमस्ति अस्यार्थंतृतीयाध्यायद्वितीयपादप्रकाशानरणभंगप्रहस्तादिपुश्रीपुरुषोत्तमपादैर्दर्शितंसंगृह्णंति-यदिति ॥ भूतगुणैः शब्दादिभिराकाशादिगुणैः ॥ सर्वेमेस्वाभाविकाएवगुणाइतिभावः ॥ अथवाभूतैः शरीरघटकैराकाशादिभिः गुणैरिंद्रियैश्च ॥ स्वरूपानतिरिक्तमेवममशरीरेंद्रियादिकमितिभावः । निश्चेतनात्मकशरीरगुणहीनत्वोक्तेः ॥ अतश्चक्षुःसामर्थ्यात्सर्वैर्भूतैरिंद्रियैश्चयुक्ततयादर्शनंमायिकमेव ॥ यास्तवदर्शनंतदिच्छयैव "तमक्रतुपश्यतिवीतशोकोधातुः प्रसादान्महिमानमीशं" इतिनारायणश्रुतेः ॥ अत्रमानांतरमाहुः-यमेवैषइति ॥ कठमुंडकयोः "नायमात्माप्रवचनेनलभ्योनमेधयानबहुनाश्रुतेन" इति साधनांतरलभ्यत्वंनिषिध्य येजीवं एषपरमात्मावृणुते स्वीयत्वेनांगीकरोति तेनजीवेनलभ्यः तस्यजीवस्यैवएषपरमात्मास्वांतनूंवृणुते आनंदमात्रकरपादमुखोदरादिस्वरूपंसाक्षात्कारविषयीकरोतीतिकथ्यते ॥ तनूपदात्साकारता ॥ अविज्ञातमिति ॥ इदंकेनोपनिषद्द्वितीयखंडस्थंवाक्यं ॥ करेत्यादि ॥ एवंविधसाकारत्वंतत्रैव तलवकारोपनिषदध्याये तृतीयतुरीयखंडयोः पर्यालोचनेस्फुटीभवति ॥ अतोवाक्ये विजानतां ध्यानेप्रादुर्भावेवादृश्यमानपरिच्छिन्नतयैवप्राकृतवत्करादिविशिष्टतयैवचानुभवतांब्रह्मस्वरूपंतावन्मात्रत्वाभावादविज्ञातं उक्तरीतिकमविजानतांतुविज्ञातमित्यर्थः। एतस्यैवफलितार्थं. तदभिसतयेत्यादि. ॥ अथमायाह्येषेतिवाक्यस्यप्रकरणपर्यालोचनेप्यस्मत्संमतएवार्थः सिध्यति नतु पराभिप्रेतइति निश्चायनायतत्पूर्वापरसंदर्भश्चिन्त्यते शान्तिपर्वणिमोक्षधर्मेषु एकोनचत्वारिंशदधिकत्रिशततमाध्यायारंभे (श्लो० १) प्राप्यश्वेतंमहाद्वीपं नारदोभगवानृषिरित्यादिनानारदस्य तत्रगमनंतत्रत्यभगवद्भक्तानां दर्शनपूजने भगवदीक्षातत्रतपःपूर्वकजपप्रारंभश्च (श्लो. ३) सोत्रंजगौसविश्वायनिर्गुणायगुणात्मनइत्यतेननिरूप्यते अत्रपृथिव्यादितत्त्वातिरिक्तगंधादिगुणराहित्यं । स्वगुणाभिन्नत्वंचपदद्वयेनोक्तमितितादृशस्यैवद्रष्टव्यतास्तुतिश्चसिध्यति ॥ अग्रे "नमस्तेदेवदेवेश निष्क्रिय निर्गुणे" त्यादि "भक्तोऽहंत्वादिदृक्षुरेकांतदर्शनायनमोनम" इत्यंतंकिञ्चिदनून द्विशतनामघटितम् नारदकृतंस्तोत्रमनूदितं ॥ अत्राप्येकांतभक्तिर्दर्शनहेतु फलतिनतुमाया ॥ अतएवस्तोत्रान्तेभक्तवत्सले-

तिविशेषणम् ॥ उत्तराध्यायारंभेऽपि (अ० ३४० श्लो. १) एवंस्तुतः सभगवान् गुह्यैस्त-थ्यैश्चनामभिः । तं मुनिंदर्शयामासनारदंविश्वरूपधृगित्यत्रस्तुतिजन्यप्रसादप्रयदर्शनहेतु-स्सिध्यति । नाम्नांतथ्यत्वंत्वनारोपितानागंतुकार्थप्रतिपादकत्वं । नहिरज्जौभुजंगोयमिति जपारुणेस्फटिकेप्यारुणोयमित्यभिलापस्तथ्योभवति । स्तोत्रेच (अध्याय ३३९ नाम ११ । १२ । १८ ।) "त्रिगुणप्रधानसदसद्व्यक्ताव्यक्ते" तिपरस्यैवत्रिगुणप्रकृतिरूपेण-सर्वप्रपंचरूपेणचपरिणतत्वंदर्शितं । अतएव (नाम ३५ । ३६) "पूर्वनिवास-गुह्ये" तिमहाप्रलयेपिजगदाधारत्वज्ञेयकत्वंचोक्त्वा (नाम ४६) "संज्ञासंज्ञे" ति नामरूपव्याकर्तृत्वं (ना० ५२) "वशवर्तिन्" इतिसर्ववशित्वं (ना० ५४) "अपरिमित" इत्यादिना (ना ६७) "पाञ्चरात्रिक" इत्यंतेनानंतरूपत्वं शासनीयत्वं शासितृत्वं सर्वकर्मतत्साधनवेदकालकर्त्रादित्वं तद्वोक्तृत्वं नारदपंचरात्रप्रतिपाद्यत्वं च संगृहीतं (ना० ७० । ७१) "मानसिकनामनामिक" इतिशुद्धमनसासेव्यत्वं "समानसीनआत्माजनाना" मित्यादिश्रुतिभ्यः नाम्निनाम्निविदितत्वं "नामानिसर्वाणि-यमाविशंती" तिमुण्डकश्रुतेः । अग्रे (ना० ७२) "परस्वामिन्" इत्यादिभिस्स-र्वस्वामित्वसर्वशास्त्रवेद्यत्वतत्तच्छास्त्रधर्मादिरूपत्वसर्वरूपत्वाग्निवेदसामगानादिरूपत्वसर्व-कर्तृत्वसर्वभोक्तृत्वमाहात्म्यरूपशरीरत्वादयोबहवोभगवधर्मानिरूपितास्तथ्यास्तेनमायिका-भवितुमर्हन्तिमध्ये (नाम० १८४) "महामायाधरे" तितुमायाशक्तिकत्वंनतु-कल्पितमायोपाधिकत्वंकल्पितायाअज्ञाते न धारणस्यायोगात् । उत्तराध्याये (श्लो० २) किंचिचंद्राद्विशुद्धात्मेत्यादिनाचिनिधालौकिकरूपाश्रयत्वं (श्लो० ६) एतान् बहुविधान् वर्णान् रूपैर्बिभ्रत्सनातनः । सहस्रनयनःश्रीमाञ्छतशीर्षः सहस्रपादिति सर्वरूपविशिष्टस्यसनातनत्वञ्चोक्तं (श्लो० ११) देवानामादिरव्ययइतिस्वरूपस्याव्ययत्वं ततोनारदंप्रतिभगवद्वचनेषु च (श्लो० १२) एकतश्चद्वितश्चैवत्रितश्चैवमहर्षयः । इमंदेशमनुप्राप्ताममदर्शनलालसाः ॥ नचमांतेददृशिरेनचद्रक्ष्यतिकश्चन । ऋतेह्यैकांतिक श्रेष्ठत्वंचैवैकांतिकोत्तम ॥ इतितपस्विनामपिरूपादर्शनमेकांतभक्तानामेवतद्दर्शनं चवदति । नचैतन्मायिकंसंभवतितस्यसर्वसुलभतयातपस्विनामदर्शनायोगात् एकांतभक्तेर्भ्रमविशेष-फलकत्वाभावाच्च तथा (श्लो० १५) प्रसन्नोहंतवाद्येहविश्वमूर्तिरिहाव्ययइत्यादि स्वरूप-स्यामायिकत्वमेवोक्तंतथात्वेतद्दर्शनस्यसर्ववरापेक्षयोत्तमफलत्वंनोपपद्येत इत्यतेतुवरंवृणी-ष्वेत्याज्ञप्तस्यनारदस्य (श्लो० १६ । १७) अद्यमेतपसोदेवयमस्यनियमस्यच । सद्यः फलमवाप्तंवैदृष्टोयद्भगवान्मया ॥ वरएषममात्यंतंदृष्टस्त्वंयत्सनातनः । भगवन्विश्वदृ-सिंहस्सर्वमूर्तिर्महान्प्रभुरितिवचनेतस्यतथात्वं ॥ अग्रे (श्लो० १९) इमेह्यनींद्रियाहा-रामद्भक्ताश्चंद्रवर्चस इत्यादिनाश्वेतद्वीपस्थैकतांभक्तानांनिरंतरंतादृशस्वरूपभजनंतत्रैवांतेप्र-वेशश्चोक्तस्तदपिवास्तवत्वेसत्येवसंगच्छते । अग्रे (श्लो० २१) नदृश्यश्चक्षुषायोसौनस्पृश्यः स्पर्शनेनचेत्यादिनेंद्रियसामर्थ्येणाग्राह्यत्वंनिर्गुणनिष्कलत्वादिकंचपरस्योक्त्वातस्यैवज्ञान-मात्रेणदृश्यत्वंतस्मिन्नेवस्वरूपेमुक्तानांप्रवेशश्चाभिधीयते (श्लो० २४ । २५) द्विर्द्वादशे-भ्यस्तत्वेभ्य.ख्यातोयः पंचविंशकः । पुरुषोनिष्क्रियश्चैवज्ञानदृश्यश्चकथ्यते ॥ यंप्रविश्यभवं-

तोहमुक्तावैद्विजसत्तमाः। सवासुदेवोविज्ञेयःपरमात्मासनातनइति अतोनमायिकत्वं॥ तत-स्तस्यमाहात्म्यंगुणभोक्तृक्षेत्रज्ञाख्यसंकर्षणस्वरूपं मनोरूपप्रद्युम्नस्वरूपमहंकाराख्यानिरुद्ध-स्वरूपंचनिरूप्योच्यते(श्लो.४२) मत्तःसर्वंसंभवतिजगत्स्थावरजंगमं। अक्षरंचाक्षरंचत्सच्चा-सच्चैवनारद (४३) मांप्रविश्यभवन्तीहमुक्ताभक्तास्तुयेमम। अहंहिपुरुषोज्ञेयोनिष्क्रियः पंचविंशकः (४४) निर्गुणोनिष्कलश्चैवनिर्द्वंद्वोनिष्परिग्रहः। एतत्त्वयानविज्ञेयं रूपवानिति दृश्यते (४५) इच्छन्मुहूर्तान्नश्येयमीशोहंजगतोगुरुः। मायाह्येषमयासृष्टायन्मांपश्य-सिनारद (४६) सर्वभूतगुणैर्युक्तंनैवंमांज्ञातुमर्हसि। मयैतत्कथितंसम्यक्तवमूर्तिचतुष्टयं (४७) अहंहिजीवसंज्ञावोमयिजीवस्समाहितः। नैवंतेबुद्धिरत्राभूद्दृष्टोजीवोमयेतिवै (४८) अहं सर्वत्रगोब्रह्मन् भूतग्रामान्तरात्मकः। भूतग्रामशरीरेषुनश्यत्सुननशाम्यहं। सिद्धाहिते-महाभागा नराह्येकांतिनोऽभवन्॥ तमोरजोभ्यांनिर्मुक्ताः प्रवेक्ष्यंतिचमांमुनेइति॥ अत्र-क्षराक्षरयोः स्थूलसूक्ष्मयोश्चदर्शितस्वरूपोपादेयत्वंतस्मिन्रूपेप्रवेशएवमोक्षः सचप्रवेशो भक्तिसाध्यःतस्यैवरूपस्यनिर्गुणत्वादिकंचबोध्यते-एतत्त्वयेत्यादि॥ रूपवतोदर्शननियमा-दयंविग्रहो रूपवानितिहेतोरेवदृश्यतइत्येतत्त्वयानज्ञेयं किंतुस्वेच्छयैवाहंदर्शनविषयीभ-वामि। अतएव यदैवाहंदर्शनाभावमिच्छेयंतदैवादर्शनंगच्छेयं यतोहंसर्वेश्वरइत्यर्थः॥ ब्रह्म-रूपरूपंनतुरूपवदित्यरूपवत्सूत्रेविस्तरः॥ ननुभौतिकतुल्यंविग्रहंतत्रशब्दस्पर्शरूपादीन् भूतगुणांश्चप्रत्यक्षीकुर्वन्नहंकथमभौतिकत्वमवधारयेयमितिचेत्तत्राह-मायेति॥ हेनारदयन्मां भूतगुणैः शब्दादिभिर्युक्तंभूतैः पृथिव्यादिभिर्गुणैरिंद्रियैर्वायुक्तंजीववत्सेंद्रियभौतिकविग्रहं पश्यसि एषाहिनिश्चयेनमयासृष्टामाया। वस्तुतस्तु मांएवंजीववत्स्वातिरिक्तभौतिकशरीरेंद्रि-यादियुक्तंज्ञातुंनार्हसिमयिजीववदतिरिक्तभौतिकविग्रहादिज्ञानमेवमायिकमानंदमात्रकरपा-दमुखोदरादित्वादितिभावः॥ स्वातिरिक्तशरीरन्तुजीवस्यैवभवतितच्चभौतिकमेव अतएव प्राक् (श्लो० ३३) पृथिवीवायुराकाशइत्यादि (श्लो० ३५) उत्पन्नएवभवतिशरीरं चेष्टयन्प्रभुः। नविनाधातुसघातंशरीरंभवतिकचित्। नचजीवंविनाब्रह्मन्वायवश्चेष्टयंत्युते-त्यंतमवादि। किंचपरमतेजीवकल्पितामाया, अभ्रान्तेनेश्वरेणतुविपरीतरूपासानशक्यास्र-ष्टुमित्यन्यत्रविस्तरः। जीवजडादिसर्वप्रपंचस्यचतुर्मूर्तिमदेकोपादेयताप्रागेवनिर्णीतेति-सर्वोपादानेमत्स्वरूपेभौतिकत्वादिप्रतीतिरेवाप्रमेत्याशयेनप्रागुक्तंस्मारयति-मयैतदिति॥ एवंदर्शितस्वरूपेजडत्वशंकांनिरस्यतर्हिदेहदेहिविभागाभावात्समष्टिजीवरूपमेवसकलंयोग-बलेनदर्शितंस्यादित्याशंकांनिरस्यति-अहंहीति॥ ममैवांशरूपेणजीवभूततयाजीवत्वेन सम्यग्ज्ञानतोजीवइतिसज्ञावानप्यहमेव॥ जीवसंघातइतिपाठेजीवोपयोगीसंघातइदानीं दृश्यमानविग्रहकरणादिरूपोऽहमेव नतुजीवस्येवस्वादतिरिक्तमधर्मममविग्रहादिकमिति-भावः। किंचजीवपदार्थोमयिसम्यगाहितस्तेषामपिमयिसैंधवखिल्योदकन्यायेनलयात् मैत्रे-यीब्राह्मणादौतथाश्रावणात् "तत्रचैवापियंती"तिमुंडकश्रुतेश्च॥ अथवाजीवोमयिसमाधि-मान् भवति। अनेकसाधनसिद्धस्यदुर्लभसमाधिमात्रपात्रमदीयमद्रूपंकथमेवभौतिकंमायिकं याभवेदितिभावः॥ नापितज्जीवमात्रंभवितुमर्हतिकर्मकर्तृभावविरोधात्॥ ह्रियतएवमतो नैवमिति॥ भद्रार्थः। क्वचिन्नैवमितिपाठः॥ एतस्मिन्रूपेयद्यभिमंतव्यंचेष्टाद्याश्रयभूतं

विग्रहादिकमभिमंतामेरकश्चातिरिक्तोनस्यात्तर्हिकेवलस्समष्टिजीवएवमयादृष्टःस्यादित्येवं बुद्धिरत्रसंप्रतिदृश्यमानमत्स्वरूपेतवमाभूत् ॥ किन्तुसच्चिदानंदविग्रहात्मकएवाहमिति जानीहीतिभावः ॥ माभूदित्यनेनभगवत्स्वरूपेकदाचिदपितथाबुद्धेरुदयाभावरूपो-परोप्येकांतभक्तायदत्तोज्ञेयःइहनीलकंठचतुर्धरस्यव्याख्यानमपिप्रायेणसर्वमनुकूलंनः ॥ स्वरूपस्यजडजीवरूपत्वाभावस्यस्वात्सर्वस्योत्पत्त्यादिकं हेतुमुक्त्वाजगत्स्थितिकालेपि स्वस्यसर्वजडजीवेषु स्थितत्वंसर्वान्तर्यामित्वं च हेत्वंतरमाह-अहंसर्वत्रगइति ॥ भूतग्रामां-तरात्मकः भूतानिपृथिव्यादीनिजीवाश्च । उभयत्रभूतशब्दप्रवृत्तेरुपनिषत्सुपुराणभागे-षुचदर्शनात् । एषांग्रामस्यसमूहस्यान्तर्यामीसर्वत्रगः । तत्तत्कार्यनिर्वाहायतत्रतत्रसर्वत्र-स्थितः । काण्वानांबृहदारण्यके पंचमाध्यायेसप्तमब्राह्मणे "यःपृथिव्यांतिष्ठन् । पृथिव्या-अंतरोऽयं पृथिवीनवेद यस्यपृथिवीशरीरंयः पृथिवीमंतरोयमयत्येषतआत्मान्तर्याम्य-मृतः । योऽप्सुतिष्ठन्नद्भ्योन्तर" इत्यादिनापृथिव्यबग्निवाय्वाकाशादिजडेषु काण्वपाठे "योविज्ञानेतिष्ठन् । विज्ञानादंतर"इतिमाध्यंदिनपाठे "य आत्मनितिष्ठन्नात्मनोन्तर" इतिजीवेषुचसर्वत्रस्थितेरंतरत्वस्यनियमनस्यचश्रवणात् ॥ "येनैषभूतस्तिष्ठत्यंतरात्मा ॥ गामाविश्यचभूतानि ॥ योलोकत्रयमाविश्ये"त्यादिश्रुतिस्मृतिषुचस्फुटमेतत् ॥ अनेनश्लोकार्धेनांतर्यामिब्राह्मणार्थः संगृहीतः । तथाच सृष्टिदशायां जडाजडेषुसर्वत्र-स्थितस्यतत्स्पर्शरहितस्यतन्नियामकस्यस्वरूपस्यभौतिकत्वादिशंकादुरापास्ता । ब्रह्मन्निति संबोधनं वेदार्थस्मारणार्थं । प्रलयकालेपिविशेषं पूर्वत्रहेतुमाह-भूतग्रामेति ॥ "यस्य-पृथिवीशरीरं । यस्यापःशरीरं । यस्यविज्ञानंशरीरं । यस्यात्माशरीर" मित्यादिश्रुतिभ्योजड जीवसमूहरूपाणियानिशरीराणि शरणधर्माण्यायतनानितेषुकालपारवश्यात्रश्यत्सुतिरो-भवत्स्वप्यहंत्वयादृश्यमानःकालतंत्रतिरोभावभाङ्नभवामीत्यर्थः । एवं सतिदृश्यमान-रूपस्यकभौतिकत्वादिशंकावकाशः मोक्षाधारत्वादपिनमद्रूपस्यभौतिकत्वादिकं शक्यंवक्तु-मित्यभिप्रेत्याऽह-सिद्धाइति ॥ अस्यैवरूपस्यानन्यभक्त्यासिद्धत्वादिकमंते दृश्यमानरूप एवप्रवेशलक्षणोमोक्षश्चभवति । अतोप्यत्रभौतिकत्वादिदर्शनमेव मायिकं, विग्रहस्तुशुद्ध-सच्चिदानंदलक्षणएवोपपद्यतइतिभावः । एतेन "यतोवाइमानिभूतानी" तिश्रुत्युक्तजन्म-स्थितिप्रलयाभिनिवेशैर्भगवद्विग्रहस्यालौकिकममायिकत्वं च साधितंज्ञेयं ॥ अग्रेचभक्ति-सिध्यर्थं स्वरूपस्यैवबहुतरं माहात्म्यमुच्यते विग्रहं विनाललाटपार्श्वाद्यनुपपत्तेः ॥ तत्रलला-टाद्रुद्रोद्भवादिकं स्वरूपएवसर्वेषां देवानां साधनानांफलानांनिरतिशयाष्टविधैश्वर्यादीनांचा-चस्थानंस्वस्यैवब्रह्मादिसर्वपितृत्वंतन्मर्यादाकरत्वंनिवृत्तिप्रियत्वंसांख्ययोगप्रतिपाद्यत्वं स्वत एवमुहुःसर्गप्रलयौतयोः सूर्योदयास्तमयवदाविर्भावतिरोभावरूपत्वंस्वस्यवराहाद्यवतारा नितरच्चबहुतरंनिरूपयन्नवतारसामग्रिकवपुषामपिपंचभूतजन्यत्वादिकंनिवार्य नित्यतामेव बोधयितुंप्रादुर्भाववत्तांमुहुराह (श्लो०६५) प्रादुर्भावगतश्चाहंसुरकार्येपुनित्यदेति । तथा (श्लो० ९०) प्रादुर्भावः कंसहेतोर्मथुरायांभविष्यतीतितथा (श्लो० १०६) अति-क्रांताः पुराणेषुश्रुतास्तेयद्विवाक्वचित् । अतिक्रांतादिवहवःप्रादुर्भावाममोत्तमाः । लोक-कार्याणिकृत्वाचपुनस्स्वांप्रकृतिंगताः ॥ इतिस्वांप्रकृतिंदृश्यमानंमूलरूपं ॥ अंते (श्लो०

१०७) नह्येतद्ब्रह्मणाप्राप्तमीदृशंममदर्शनं ॥ यत्त्वयाप्राप्तमद्येहएकान्तगतबुद्धिनेत्युपसंहारवाक्येपिविशेषानुग्रहलभ्यदर्शनममायिकमेवनिश्चीयते । एकांतभक्तस्यमोहनायोगात् ॥ अमायिकत्वादेवभीष्मोपितद्रूपस्यान्तर्धानमेवाह (श्लो० ११०) एतावदुक्त्वावचनंततैवान्तर्दधेपुन नारदोपिमहातेजा प्राप्यानुग्रहमीप्सितं ॥ नरनारायणौद्रष्टुंबदर्याश्रममाद्रवदिति ॥ मायिकत्वेत्वदर्शनकालेरूपमेवनावतिष्ठतेतिधतस्यान्तर्धानकथा ॥ तस्मान्मायाह्येषेतिवाक्यस्यार्थं प्रकाशाद्युक्तएवसदर्भप्रकाशाद्युक्तइत्यलंप्रसक्तानुप्रसक्तया ॥

वेदेलक्षणाया अयुक्तत्वादानंदरूपमित्यस्यानंदजनकत्वकथनमसंगतं ॥ आनंदमात्रकरपादमितिपंचरात्रस्थमात्रपदस्यपूर्वोपस्थितावधारणार्थत्यागेस्वार्थाद्यर्थकल्पनेमानाभावात् ॥ कोशस्योभयत्रतुल्यत्वात्पूर्वोपस्थितत्यागेचकपालाधिकरणविरोधः ॥ यत्तुविग्रह संग्रामेप्रविभागेचदेहविस्तारयोरपीतित्रिकांडशेषात्परमानंदस्यप्रविभागोविस्तारो वायस्मादितियाज्ञवल्क्यवाक्यार्थइति तन्न समानविभक्तिकप्रथमांतपदयोःकर्मधारयसंभवेव्यधिकरणबहुव्रीहिकल्पनस्यान्याय्यत्वात् ॥ "अनेकमन्यपदार्थे" इतिसूत्रविरोधाच्च अनेकस्यप्रथमांतस्यान्यार्थेवर्त्तमानस्यतेनसमासविधानात् ॥ अन्यथाऽऽनंदस्वरूपत्वबोधकश्रुतीनामपिकल्पनयाऽन्यार्थत्वसंभवेनाऽऽनंदरूपताऽपित्वदभिमतानसिद्ध्येदिति ॥ अतएवानंदमयोभ्यासादितिसूत्रेव्यासैरप्यानंदविग्रहएवदर्शितोऽन्यथा आनंदोभ्यासादित्येवकुतस्तैर्नोक्तसूत्रार्थस्त्वणुभाष्येविस्तरेणोक्तस्ततोऽवगंतव्यः ॥ ग्रंथगौरवभयान्नोपन्यस्तः ॥ विग्रहपदेनाननशरीरं किंत्वाकारएवतेनपरमानंदविग्रहमित्यस्यपरमानंदाकारमित्यर्थः ॥ ननुविग्रहपदस्यशरीरार्थकतया शरीरमेवब्रह्मणःकुतोनांगीक्रियतइतिचेत्सत्यं ॥ यच्छरीरमुच्यतेतन्नित्यमनित्यंवा? ॥ नाद्य , अद्वैतश्रुतिविरोधात् ॥ किंचपुरुषविधब्राह्मणोक्तायाः "सोनुवीक्ष्यनान्यदात्मनोऽपश्यत्" दित्यनुवीक्षाया विरोधः स्यात् । द्वितीयेतच्छुद्धसत्त्वात्मकंवा प्राकृतंवा मायिकंवाऽङ्गीकार्य्यम् ॥ तत्रकर्त्रपेक्षायांब्रह्मणएवकर्तृत्वंवाच्य ॥ तत्रानपेक्षया सर्वकर्तुर्ब्रह्मणःकावाऽनुपपत्तिर्येनस्वस्यापिशरीरंकल्पयेत् ॥ अतो मूलभूतस्यनशरीरं ॥ किंतुस्वरूपमेवतदाकार ॥ "प्राणन्नेवप्राणोवदन्नेववाग्" तिवच्छरीरकार्यंकुर्वन् लीलयाव्यामोहनार्थंशरीरवद्भासयेत् ॥ नटवत् अतोयादृशंवेदेन प्रतिपादितंतादृशंब्रह्मैव ॥ येषांपुनर्मोक्षानधिकारस्तेषातच्छरीरवद्भासतइतिनिश्चयः ॥

सहस्रास्ये आनंदरूपेत्यादि नोपन्यस्तइत्यतभागंपरिहरति—वेदेलक्षणायाइत्यादिना ॥ इति निश्चय इत्यन्तेन। अयमाव —यत्तु (तत्कारादित्वानंदरूपतोक्तिरानंदजनकत्वादौपचारिकी)

र्युक्तं—तन्न; तथासत्यप्यानंदमात्रत्वगिरोऽनुपपत्तेः ॥ किंचवेदस्य तात्पर्यानुपपत्तेःकल्पने-मानाभावात् प्रत्युत तत्रैवतात्पर्यस्यतृतीयद्वितीयपादविचारितरीत्यानिश्चयात् सर्वशक्ति-मत्यलौकिकेब्रह्मणिशक्यार्थबाधस्याप्यभानात् लक्षणाबीजाभावेन वेदेतत्कल्पनमनुचितं ॥ नचसुखस्यसंस्थानवत्त्वादर्शनात्प्रत्यक्षविरोधस्तद्बीजंशंक्यं लौकिकप्रत्यक्षेणश्रुतेःप्रामाण्यस्य-बाधितुमशक्यत्वात् ॥ अन्यथातार्किकादिदर्शितदिशाज्ञानंसुखंचलोकेऽन्यस्यधर्मरूपमेवदृष्टं; नतुस्वतंत्रमितिब्रह्मणोप्यन्यधर्मरूपत्वापत्त्यास्वातंत्र्येणज्ञानानंदरूपत्वंनसिध्येत् ॥ "सत्यं-विज्ञानमानंदंब्रह्म ॥ प्रज्ञानंब्रह्म ॥ योवैभूमातत्सुखं" इत्यादिकंचज्ञानसुखजनकत्वादौ-पचारिकमेव स्वीकुरु ॥ लोकेज्ञानसुखयोरुत्पत्तिविनाशशालितायादृष्टतयाब्रह्मणस्तदात्म-कत्वेतत्रापितथात्वापातात् ॥ अथश्रुतिसिद्धं सत्यज्ञानानंदानंतत्वंब्रह्मणिनबाधितुंशक्यम् । अलौकिकत्वाद्यनन्तकल्पनावसरइतिचेदानंदमूर्तित्वमपिप्रमाणसिद्धंयथाश्रुतमेवमंतव्यम् ॥ तथाहि छांदोग्येनवमप्रपाठके "योवैभूमातत्सुख" मितिब्रह्मण सुखात्मकत्वमुक्त्वानुपदं-दशमेपूर्वंदहरविद्यायांइंद्रप्रजापतिसंवादेच "एषआत्माऽपहतपाप्मा विजरोविमृत्युर्वि-शोकोविजिघत्सोऽपिपास.सत्यकाम.सत्यसंकल्प" इतिवाक्येजरामृत्युशोकजिघत्सापिपा-सानांशरीरधर्मत्वेनप्रसिद्धानांनिषेधेनतद्रहितशरीरंसिध्यति। मुंडकेच द्वितीयमुंडकद्वितीय-खंडे "तद्विज्ञानेनपरिपश्यंतिधीराआनंदरूपममृतंयद्विभाति" इतिश्रावणात् नृसिंहोत्तर-तापनीयेच "आनंदरूप-सर्वाधिष्ठानः सन्मात्र" इतिकथनादप्यानंदाकारस्यैवसिद्धिः ॥ अत्ररूपशब्दोमूर्तिपरएव "नसंदृशेतिष्ठतिरूपमस्य ॥ तस्यैषआत्माविवृणुतेतनूंस्वां" इत्यादिश्रुत्यंतरात् ॥ इहअस्यपरमात्मनोरूपंसंदृशेनतिष्ठतिलौकिकप्रत्यक्षविषयोनभवतीति-लौकिकचाक्षुषविषयतायाएवनिषेधोनतुरूपस्य ॥ प्रत्युततद्विषयरूपस्यसिद्धिः । अतएव-चक्षुर्बलेनादृश्यत्वंतत्रैवाग्रेस्फुटीकृतं "नचक्षुषापश्यतिकश्चिदेनं" इति ॥ भगवद्रूपाणां-लौकिकचक्षुरविषयत्वंतत्कृपयालब्धदिव्यचक्षुर्विषयत्वंचगीतायामेकादशाध्यायेस्पष्टं ॥ ब्रह्मणोरूपबहुत्वंतु "यदेकमव्यक्तमनंतरूपं" इत्यादिश्रुतिषुप्रसिद्धं ॥ आनंदरूप-श्रुत्युपबृंहणं तुपुराणेषुतत्रतत्रानंदमूर्तित्वादिकथनात्स्फुटं ॥ यथाषष्ठस्कंधेषोडशाध्या-येचित्रकेतुंप्रति नारदोक्तविद्यायां (श्लोक. १९) नमोविज्ञानमात्रायपरमानंदमूर्तये । आत्मारामायशांतायनिवृत्तद्वैतदृष्टये ॥ दशमेपिब्रह्मस्तुतौ (अ० १३ श्लो० ५४)

आनन्दरूपतोक्तानन्दजननादौपचारिकीत्याहाऽऽनन्दस्येति ॥ इदमुलक्षणम् । रज्जु-मानेसर्पइतिवदधिष्ठानाऽभेदेनाऽपि तथाव्यपदेशोपपत्तेः ॥ किंचमात्रंत्वमवधृतौस्वार्थेमात्रास्त्र्यै-मात्रापरिच्छेदेअक्षरावयवेद्रव्येमानेऽल्पेकर्णभूषणे कालेवृत्तेचेति हेमचन्द्रोक्त्या आनन्दोमात्रं स्वार्थोयस्या मात्राऽल्पोयस्येतिवानारदपञ्चरात्रवाक्यार्थ. ॥ अथविग्रह. संग्रामेप्रविभागेचदेह-विस्तारयोरपीति त्रिकाण्डशेषात्परमानन्दस्य विग्रह'प्रविभागोविस्तारोवा यस्मादिति याज्ञ-वल्क्यवाक्यार्थः ॥ एतेन आनन्दमयोऽभ्यासादितिसूत्रमानन्दमयं इस्तादिक ब्रह्मणआहेति तट्टीकाकारभ्रम. प्रत्युक्तः हस्तादिपदानुपादानात् । सूत्रार्थस्तु आनन्दमयपर्याये पठ्यमान-ब्रह्मशब्दोब्रह्मबोधीत्यादिर्भाष्यादितोज्ञेयोवादिविवादेन शास्त्रार्थविस्तरादिहनोपन्यस्तः ।

सत्यज्ञानानंतानंदमात्रैकरसमूर्तयः इतिभगवद्रूपाणांबहुत्वमानंदमात्राकारत्वमेकरसत्वादुत्तमाधमभावराहित्यंचेतिदिक् ॥ किंच करादीनांमायिकत्वे आनंदजनकत्वमपिनसंभवति मायाया आनंदरूपत्वाभावात् । अन्यथाहेयत्वानुपपत्तेः ॥ तज्जनकत्वेतद्रूपत्वमप्यर्थसिद्धं । यत् यज्जनकं तत् तद्गुणकमिति, यत् तद्गुणकं तत् तद्रूपमिति च व्याप्तेः ॥ इमेचव्याप्तीसांख्यादिग्रंथेषुसम्यगुपपादिते ॥ अतएवसांख्याः "यथैकारूपयौवनलावण्यादिसंपन्नास्त्रीस्वभर्तुः सुखदासपत्नीनां दुःखदापुरुषांतरस्यमोहदे" त्यादिप्रदर्श्यसर्वस्यापिपरिदृश्यमानप्रपंचस्यसुखदुःखमोहस्वभावत्वात्त्रिगुणात्मकत्वंसाधयंति यच्चित्तात्मकैरपितदवलंब्यते तस्माल्लक्षणयापीष्टसिद्धिः ॥ यातु (रज्जुमात्रेसर्पइतिवदधिष्ठानाऽभेदेनाऽपितथाव्यपदेशोपपत्ति) रुक्ता—साप्यसंगता; ब्रह्मणोऽप्रत्यक्षत्वेन शास्त्रकरपादादीनांचाप्युपलंभाभावेनचतत्रतदारोपस्यैवासंभवात् ॥ नापिसर्पमिवब्रह्मण.पाणिपादादिकंकोपिलौकिकश्चक्षुरादिनानुभवतियेनमायिकं तत्स्यात् किंतुशब्दैकगम्यंतत् केवलशब्देनचारोप्याापवादःप्रक्षालनाद्धीतिन्यायादयुक्तः ॥ अधिकंतुवक्ष्यते यश्चआनंदोमात्रंस्वार्थोयस्य मात्राऽल्पोयस्येतिवा नारदपंचरात्रवाक्यार्थ उक्तः ॥ सोपिमात्रंरवधृतावितिप्रथमोपस्थितस्यशीघ्रोपस्थितिकस्यावधारणस्यत्यागेमानाभावात् उक्तश्रुत्यादिबलेनतस्यैवादरणीयत्वसिद्धेश्चासंगत. ॥ तत्यागेतुकपालाधिकरणविरोधोमूलउक्तः । कपालाधिकरणंतुप्रथमस्यतुरीयेपादे (सू० १७) "पूर्ववन्तोऽविधानार्थास्तत्सामर्थ्यंसमाम्नाये" इत्यादिपदसूत्रात्मकंद्वादशमधिकरणमस्ति तत्र (तै० सं० कां० २ प्रपा० २ अनु० ५) वैश्वानरंद्वादशकपालंनिर्वपेत्पुत्रेजाते यदष्टाकपालोभवतिगायत्र्यैवैनंब्रह्मवर्चसेनपुनाति यन्नवकपालस्त्रिवृतैवास्मिंस्तेजोदधातिइतिश्रूयते अत्राष्टाकपालादिद्रव्यरूपागुणाविधीयंते तेचब्रह्मवर्चसादिफलविशेषकामनयाद्वादशकपालेनसहविकल्प्यंतेइतिपूर्वपक्षंकृत्वा "वैश्वानरंद्वादशकपालंनिर्वपेत्" इत्युत्पत्तिशिष्टत्वात्प्रथमोपस्थितस्यद्वादशकपालस्यैवानुष्ठेयता सिद्धांतिता अष्टादिसंख्यानांद्वादशसंख्यायामंतर्भावादंशस्तुत्यांशिनोद्वादशकपालस्यैवस्तुतिर्नतूत्पन्नशिष्टानामष्टाकपालादीनामुत्पत्तिशिष्टेनसहविकल्पइति ॥ तथात्रप्रथमोपस्थितमवधारणमेवादरणीयमितिमूलाशयः । यद्दशकपालोविराजैवास्मिन्नन्नाद्यंदधातियदेकादशकपालस्त्रिष्टुभैवास्मिन्निन्द्रियंदधातियद्द्वादशकपालोजगत्यैवास्मिन्पशून्दधातियस्मिन्जातएतामिष्टिंनिर्वपतिपूतएवतेजस्व्यन्नादइन्द्रियावीपशुमान्भवति किंचमात्रशब्दस्यावधारणार्थत्वंनामयच्छब्दोत्तरंमात्रशब्द पठ्यते तदर्थोवधारितोभवतियथादुग्धमात्रमयमुपभुंक्त इत्यादावन्नादिकंव्यावर्त्यते ननु अमुष्यावधारणंक्रियतामित्यर्थे अमुष्यमात्रंक्रियतामिति कश्चित्प्रयुंक्तेतथा तस्यस्वार्थार्थकत्वंनामचिदेवचिन्मात्रमित्यादौय· केवलचित्शब्दार्थ स एवचिन्मात्रशब्दार्थइत्येवतेनात्रस्वार्थपरत्वादेरप्यानंदशब्दार्थएवानंदमात्रशब्दार्थःस्यादतः करादावानंदाभेद सुस्थः ॥ नतुत्वत्समतविग्रहः ॥ एवंआनंदोमात्रायस्येतिविग्रहेप्यानंदपदेनब्रह्मानंदोलौकिकोवा ? आद्येबहुशास्त्रविप्लवः मायिककरादौब्रह्मानंदापेक्षयाधिकानंदवत्तापत्तेः ॥ द्वितीयश्चेत्करादेःसुतरामानदात्मकतासिद्ध्यामदिष्टसिद्धिरक्षतैवब्रह्माभिन्नस्यानंदात्मकस्यतत्करादेरल्पोंशएवमानुषादिलौकिकानंदइतिसिद्धांतात् "एतस्यैवानंदस्या-

न्यानिभूतानिमात्रामुपजीवंति" इतिबृहदारण्यशेषेश्रावणात् ॥ यच्चपरमानंदस्यविग्रहः प्रविभागोविस्तारोवायस्मादितियाज्ञवल्क्यवाक्यार्थः कल्पित सोप्यसंबद्धः ॥ विग्रहशब्दस्य मूर्तिपरत्वत्यागेमानाभावात् । परमानंदमूर्तपइत्यादिवाक्यैकवाक्यतयामूर्तिपरतायाएव सिद्धेः संभवतिसामानाधिकरण्येवैयधिकरण्यस्यान्याय्यतयान्यधिकरणबहुव्रीहेरिहसतिस-मानाधिकरणत्वसंभवेऽनौचित्यादनेकमन्यपदार्थइतिशास्त्रविरोधात्तस्यसप्तमीविशेषणेबहु-व्रीहाविति सप्तमीग्रहणमात्रज्ञापितत्वात् ॥ वस्तुतश्चतत्रैवयाज्ञवल्क्यगीतायां (अ० ९ श्लो० १४) चतुर्भुजमुदारांगंशंखचक्रगदाधरमित्यादिना (श्लो० १६ । १७) पमच्छ विपदद्वंद्वंपरमात्मानमव्ययं । प्रभाभिर्भासयद्रूपंपरितःपुरुषोत्तमामित्यंतेनस्पष्टतयामूर्तिरेव विग्रहशब्दार्थोयाज्ञवल्क्येनदर्शितः। किंच कोशेप्रविभागशब्दः समस्तपदानामर्थबोधकंत-दवयवशब्दविभागमेवाभिधत्तेमनोरमादिषुविग्रहस्तुहलोंत्यमित्येवेत्यादौवाक्यार्थएवविग्रह-शब्दव्यवहारदर्शनात् ॥ अन्यथाकोशेतदसंग्रहप्रसंगाच्च ॥ अतोनरवदिष्टसिद्धिः मायिक-करादिहेतुकपरमानंदकर्मैकविभजनस्यश्रुत्यादौवाप्यनुपलंभाच्च ॥ विस्तारपरत्वे आनंदस्य परमत्वंनोपपद्येत निरतिशयविस्तीर्णस्यैवस्वरसत.परमत्वात् ॥ अपिच तद्विस्तारकत्वेकरा-देःसुतरामानंदात्मतासिध्येत् । अन्यथातद्विस्तारकत्वायोगात्श्रुतौ "रसोवैस" इत्यादिना "एपह्येवानंदयाति" इत्यंतेनआनंदरूपस्यैवानंदहेतुताकथनात् सूत्रकृतापि (अ० १ पा० १ सू० १३ या० १४) तद्धेतुव्यपदेशाच्चेत्यत्रतथासमर्थनात् ॥ यच्चएतेनेत्यादिनो-पन्यस्तइत्यंतंवस्तुविषयवाक्याननुसंधानात्सूत्रार्थभ्रमाच्च॥ तत्रहि "तस्माद्वाएतस्माद्विज्ञान-मयात् अन्योंतरआत्मानंदमय"इत्यानंदमयमुक्त्वातस्यस्वरूपं तस्यप्रियमेवशिरः मोदो दक्षिण.पक्षः प्रमोदउत्तरः पक्षः आनंदआत्मा ब्रह्मपुच्छं प्रतिष्ठा" इत्युक्तं। अत्रशिर.प्रभृ-तीनां प्रियमोदाद्यात्मकत्वकथनादानंदमयएवाकारःसिध्यति ॥ दक्षिणोत्तरपक्षावपिपूर्वं "अयंदक्षिणः पक्षः अयमुत्तरः पक्षः" इत्युत्तरप्रहस्तरूपौशंकराचार्यैर्व्याख्यातौतेनात्रापि तावेवादर्तव्यौ ॥ आनंदआत्मेत्यात्मशब्दोहस्तद्वयादिमध्यवर्तिनंकटिमारभ्यकंठपर्यंतंभागं अभिधत्ते "मध्येह्येपामंगानामात्मा" इतिश्रुत्यंतरात् ॥ पुच्छप्रतिष्ठाशब्दावपिकट्यादि-चरणांतभागपरौ अत्रचअन्नमयादीनांचतुर्णांकार्यरूपाणांविभूतिरूपाणांवाआम्नायपाठादानंद-मयोपितथेतिपूर्वपक्षे आनंदमयोभ्यासादितिसूत्रितं ॥ अर्थस्तु आनंदमयः परमात्मैव नतुकार्यादिरूपः। कुतः अभ्यासात् ॥ रसोवैसइत्यादिनापुनःपुनः कथनात्। तेनपूर्वंतआधि-क्यसिद्धेरिति ॥ अभ्यासस्यभेदकत्वं तु पूर्वतंत्रेद्वितीयस्यद्वितीयपादे (सू० २) "एक-स्यैवंपुनः श्रुतिरविशेषादनर्थकंहिस्यात्" इत्यधिकरणेसिद्धं ॥ अतो विषयवाक्येप्रियशिर-स्त्वादिनावर्णितमानंदमयपरमात्मानमेवसमर्थयदिदंसूत्रं परमात्मनआनंदाकारतामेव सिद्धांतयतीति मार्तंडटीकाकृत्तान्भ्रमलेशः केवलानंदस्यब्रह्मत्वेसिसाधयिषितेपि स्पष्टतया-नंदाकारवस्तुबोधकं मयड्घटितमानंदमयपदं सूत्रेनब्रूयात् नचविषयवाक्यानुरोधात्तथा सूत्रमितिवाच्यं ॥ आनंदोऽभ्यासादितिसूत्रेपिभृगुवल्ल्यनुरोधसिद्धेः ॥ यथाश्रुतसूत्रे ऐकार्थ्येनभृगुवल्ल्याइवतथासूत्रेपि ब्रह्मवल्ल्या विषयवाक्यत्वलाभात् ॥ तस्मादानंदाकारा-भिप्रायमेव यथाश्रुतंसूत्रं तदुक्तसूत्रार्थस्तु न सूत्रकारसमतः। तथा सति ब्रह्माभ्यासादित्ये-

वसूत्रयेत । नतुयथाश्रुत । आनंदमयेकस्यचिदपिविधेयस्याभावात् यथाश्रुतपाठे आनंदमयस्यपुच्छत्वेनोक्तं ब्रह्मपरमात्मैवेत्यर्थस्यकथंचिदप्युपस्थितेरभावाच ॥ विस्तरस्तुभाष्यतत्प्रकाशादावनुधेय. ॥ अतोयाज्ञवल्क्यवाक्येविग्रहशब्दोदेहपरोपिब्रह्मणोजीववत्स्वातिरिक्तशरीराभावाद्वाकारमात्रेपर्यवस्यतिसुवर्णस्यमूर्तिरित्यादिवत ॥ परमानंदोविग्रहोयस्येतिसमासस्तुराह्वो शिर. "आनंदंब्रह्मण " इत्यादिवद्भेदोपचारात ॥ निर्दोषपूर्णगुणविग्रह इत्यादौनिबधादिष्वपितथैवसमास. ॥ तदेतदभिप्रेत्याहु –विग्रहपदेननशरीरमित्यादि ॥ स्वातिरिक्तशरीरनेत्यर्थं । यदिब्रह्मातिरिक्तंतस्यतत्स्वीक्रियेततर्हितन्नित्यमनित्यवेतिविकल्प ॥ शिष्टंस्पष्ट ॥

अतएवआहचतन्मात्रमितिसूत्रेलौकिकेंद्रियाद्यभावःप्रतिपादित. ॥ सूत्रार्थस्तु आहच श्रुतिः स्वयमेवतन्मात्रंप्रज्ञानघनमात्रं "सयथासैंधवघनोनंतरोऽवाह्यःकृत्स्नोरसघनएवैवंवाअरेयमात्माऽनंतरोऽवाह्यः कृत्स्न. प्रज्ञानघनएवे" तिस्वरूपातिरिक्तानामिंद्रियाणामभावात् अतोनेंद्रियाणांकल्पनाकिंतुसर्वाकारस्वरूपवस्त्वेवतादृशमितिमंतव्य कृत्स्नवचनात् ॥ चकारात्सर्वेंद्रियविवर्जितमितिस्मृतिरपि तस्मान्नेंद्रियकल्पनयाविरोधः ॥ यत्तुरूपादिरहितमात्रं आहेत्यर्थः अरूपवदेवेतिव्यवहितसूत्रे अरूपवद्ब्रह्मेत्युक्तत्वात्तर्हिसाकारत्वश्रुतीनांवैयर्थ्यमित्याशंक्य प्रकाशवच्चावैयर्थ्यमित्यनेन यथाप्रकाशः सौरश्चांद्रमसोवा वियद्व्याप्यावतिष्ठमानोऽगुल्यादिसंबंधात्तेपुनऋजुवक्रादिभावंप्रतिपद्यमानेपुतद्भावमिवप्रतिपद्यते एवंब्रह्माऽपिपृथिव्याद्युपाधिसंबधात्तदाकारतामिवप्रतिपद्यतेइत्याद्युक्त्वा अतएवोत्तरत्र "दर्शयतिचाथोअपिस्मर्यते" इतिनिर्विशेषमेवब्रह्मोक्तवान् नतु आनंदमात्रहस्तादिकं ॥ अर्थस्तुदर्शयतिश्रुति.परप्रतिषेधेन ब्रह्मअन्यदेवतद्विदितादथोऽविदितादधि इत्याद्युक्तं तदपितत्तत्सूत्रभावानवबोधविजृंभितमेव । नह्यरूपवत्सूत्रेणब्रह्मण्यरूपवत्त्वंप्रतिपादितं प्रकरणविरोधात् वक्ष्यमाणदोषाच्च ॥ तथाहि "पूर्वनस्थानतोपिपरस्योभयलिंगंसर्वत्रहि" इतिसूत्रतोब्रह्मस्वरूपविचारआरब्ध. ॥ ननुब्रह्मस्वरूपनिर्णय.प्रथमाध्यायेकृतएवेतिकिंपुनस्तन्निर्णयेनेतिचेत्सत्यं पूर्वंतुसर्ववेदांतेष्वेकमेवब्रह्मप्रतिपाद्यतइतिविचारित नतुब्रह्मधर्मविरोधोपिपरिहृतः । सचावश्यंपरिहरणीयः । अन्यथावेदांतप्रतिपाद्यं ब्रह्मसधर्मकंनिर्धर्मकंवेतिसंदेहापरिहारात् अतस्तन्निवृत्त्यर्थमयविचारः ॥ तत्रवेदांतेषूभयविधवाक्यदर्शनात्संशय.किमुभयलिंगं ब्रह्मान्यतरलिंगंचेति तत्रधर्मविधायकवाक्यानामुपासनार्थतयौपचारिकत्वस्यापिवक्तुंशक्यतयानिषेधवाक्यानां प्रयोजनांतरशून्य-

तयातत्स्वरूपमात्रबोधकत्वान्निर्विशेषमेवब्रह्म यद्वायतोवाइमानिभूतानीत्यादिनासदेवेत्यादिवाक्यैश्च भगवतिजगदुपादानत्वस्यसिद्धत्वात्कारणस्यकार्येसत्त्वमविवादमेव तथाचयथाघटपटादिकारणीभूता-पृथिवीतत्तत्कार्येषुतत्तद्रूपाभवत्येवंब्रह्माप्यस्थूलेस्थूलंअनणौ अनणु उच्चावचफर्तरिउच्चावचकर्तृ पृथिव्यांसर्वगंधं जलादावगंधं एवंस्थान-तउभयलिंगंतत्तत्स्थानभेदादुपपद्यते। अत्रोत्तरमाह नस्थानतोपि अपिकारेणाचिंत्यसामर्थ्यवशादपिनोभयलिंगंब्रह्म सर्वत्रहितादृशंरूपंभगवतउपदिश्यते हि इत्यस्यायमभिप्रायःसर्वकर्मेत्यादिवाक्यानि भगवत्स्वरूपप्रतिपादकान्येवनत्वनुवादकानि। यदितेषामुपासनार्थं स्थानगतधर्मानुवादकत्वंस्यात्तदातैर्ब्रह्मज्ञानाभावात्तेषांवैयर्थ्यंस्यात्। नत्यौपाधिकानांधर्माणांतद्वत्तयाब्रह्मणोवाज्ञानंमुक्त्यर्थमिति वक्तुं-शक्यंतथासतिदर्शनांतरीयज्ञानादपिसाम्यात्ततश्चशास्त्रवैयर्थ्यंस्यात् किंचास्मिन्वाक्येनुवादकत्वमपिनसंभवति "ज्यायानाकाशा" दित्युक्तेः। नह्याकाशाज्ज्यायः किंचिल्लोकेप्रसिद्धमस्ति। येनतद्ब्रह्मणि अनूदितंस्यात्तस्मात्तद्वाक्यस्यधर्मविधायकत्वंनानुवादकत्वंनिरंकुशा नांतेषामन्यत्राभावात् एवंसामर्थ्यवशेनाप्युभयलिंगत्वंसामर्थ्यस्या-चिंत्यतयातद्वत्ताब्रह्मणोप्यज्ञानापत्तेः ततश्चतमेवविदित्वेतिश्रुत्युक्तस्य ज्ञानस्याभावान्मोक्षोपिनस्यादितितत्साम्यमतांतरोक्तरीत्याविरोधपरि-हारःसंभवति एवंचपूर्वोक्तसंशयस्तदवस्थएव। तत्रोत्तरमनेनसूत्रे-णाह अरूपवदेवहि तत्प्रधानत्वात्। अत्रसूत्रकारस्यायमभिप्रायः- उभयलिंगवाक्यश्रवणात्संदेहोवा उभयलिंगवतोऽभेदनिश्चयात् तत्र-द्वितीयोनसंभवति कार्यकारणांशकृतस्यभगवद्विहारार्थजातस्यभेदस्य सत्वात् तथाच सृष्टिदशायामभेदोवक्तुमशक्यइति आपाततएव-संदेहोवक्तव्यः उभयलिंगत्वस्यैकस्मिन्नसंभवाद्विरोधेनस्वरूपनिश्चया-भावेप्राप्तआह अरूपवदेव रूप्यतेनिरूप्यते रूपंसर्वव्यवहारविषयत्वं तद्युक्तंरूपवत् विश्वं ब्रह्मतुतद्विलक्षणं कार्यकारणयोरंशांशिनोर्वै-लक्षण्यस्ययुक्तत्वात् ॥ ननुकार्यकारणयोर्वैलक्षण्यमपिसंभवत्ये-वेत्यतआह-तत्प्रधानत्वात् तस्यब्रह्मणःप्रधानत्वात् मुख्यत्वात्। यत्रहियत्प्रतिपाद्यतेतत्रतन्मुख्यंब्रह्मप्रतिपादनेब्रह्मधर्माणामेवमुख्यत्वं नान्यधर्माणांमुख्यत्वं यथाप्रशासनस्य॥ हि "एतद्वैतदक्षर" मिति ब्रह्मैवोपक्रम्यप्रशासनस्योक्तत्वात्तस्यमुख्यत्वंसर्वकर्मेत्यस्यतुलौकिक-कर्मानुवादेनस्पष्टमेवामुख्यत्वं तत्रमनोमयःप्राणशरीरइतिशरीर-

विशिष्टमुपक्रम्यपठितत्वात् ॥ ननुसर्वकर्मत्वादयोपिनामुख्याअनुवादाभावात् किंतु लौकिकधर्मतुल्यधर्माब्रह्मणिविधीयंतइतिचेन्मास्तुसर्वकर्मादिशब्दानामनुवादकत्वं तथापि तेकेइत्यपेक्षायां येलोकप्रसिद्धास्तानेवसर्वपदेनानूद्यसर्वेषामियकर्माणियस्येति तत्तुल्यानामतिरिक्तानां वा विधानंसमासेंगीकार्य्यं । तथासति गौरवंस्यादतिरिक्तकल्पनामकृत्वा यथाकथंचित्तद्धर्मवत्वेनध्यानस्यैवोपासनायामुपयोगाल्लौकिकधर्मानेवानूद्योपचारेणशरीरंधर्मविशिष्टबोधनमेवयुक्तं ॥ ननुयदिसर्वव्यवहारातीततयाजगद्वैलक्षण्यंसूत्रकृतोऽभिप्रेतंस्यात्तदा अरूपमित्येववदेत्स्वरूपवदिति ॥ यद्यत्त्वेवमतोऽतिरिक्तधर्मकल्पनैवयुक्तेतिचेन्मैवं ॥ लोकवैलक्षण्येनलोकव्यवहाराऽतीतत्वमेवाभिप्रेतंनतुसर्वव्यवहारातीतत्वमस्थूलादिवाक्यएवप्रशासनश्रावणात्तथानिश्चीयते तस्माल्लोकव्यवहारातीतंब्रह्मस्वरूपंसूत्रेणप्रतिपाद्यतेनतुरूपरहितमात्रं पूर्वंब्रह्मणिरूपास्तित्वनास्तित्वयोर्विचारस्याप्रकृतत्वाचाद्दशव्याख्यानमयुक्तमेव तदुपष्टंभेन आह चतन्मात्रमित्यस्यापिरूपरहितमात्रमाहेति व्याख्यानमपितथैव ॥ किंच त्वदुक्तव्याख्यानेब्रह्मणिरूपाभावेऽपिसाकारत्वंकुतोनस्यात् नहिरूपाभावःसाकारत्वाभावव्याप्योयेनतन्निश्चायकःस्यात् वायौरूपाभावसत्वेऽपिसाकारत्वसत्वेनव्यभिचारात् तथाच साकारश्रुतीनांवैयर्थ्यशंकाया असंभवात् "प्रकाशवच्चावैयर्थ्या" दितिसूत्रंनिरर्थकमेवस्यात् ॥ अस्मन्मतेचब्रह्मणिलोकव्यवहारातीतत्वेपूर्वसूत्रेणसाधितेसर्वकर्मत्वादीनामोपचारिकत्वेप्रतिपादितेप्रशास्तृत्वादीनांचालौकिकत्वेनसम्यग्बुद्धावनारोहात्सर्वव्यवहारातीतत्वमेवस्यात् तथासति ब्रह्मणोज्ञेयत्वेनापिव्यवहारासंभवाज्ज्ञानार्थविचारशास्त्रस्यवैयर्थ्यमनसैवेदमाप्तव्यमितिश्रुतिविरोधश्चेतिपूर्वपक्षःस्यादेव । तत्समाधानार्थंप्रकाशवदितिसूत्रंप्रवर्तते । तदर्थश्च–यथासौरःप्रकाशोव्यवहार्योऽव्यवहार्यश्च नहिस्वतःसंपादयितुंशक्यतेस्थापयितुंवाउदितेतुसूर्येप्रतिबंधकाभावेसान्निध्यमात्रेणव्यवहारःकर्तुंशक्यस्तथालौकिकवाङ्मनोभिर्नशक्यतेव्यवहर्तुंईश्वरसन्निधानेतुशक्यते । सन्निधानंतुतत्कृपया अन्यथाशास्त्रंव्यर्थंस्यादतएवसूत्रेहेतुंपठति–अवैयर्थ्यादिति ॥ चकारेणतद्धर्माणामप्यलौकिकत्वमतएवनविरोधः । "अपाणिपादोजवनोग्रहीतापश्यत्यचक्षुःसशृणोत्यकर्णः" इत्यादिश्रुतिभ्योऽलौकिकाएवभगवद्धर्माउच्यंते । एवंचाव्यवहार्येऽप्यलौकिकधर्मबोधक-

स्वात्तशास्त्रवैफल्यं । अधिकंचभाष्यादिग्रंथेभ्योऽवसेयं, ग्रंथगौरवभयान्नेहोच्यते ॥ यत्तुऔपाधिका धर्मानवास्तवाइति प्रकाशवच्चावैयर्थ्यमित्यनेन प्रतिपाद्य दर्शयतिचाथोअपिस्मर्यतइतिनिर्विशेषमेवब्रह्मोक्तवाक्यत्वानंदमात्रहस्तादिकमित्याद्युक्तं तदपिनकिंचित् ॥ नहितेन सूत्रेणनिर्विशेषंब्रह्मप्रतिपाद्यते तस्यपूर्वमेवप्रत्युक्तत्वात् कस्तर्हिसूत्रार्थइतिचेच्छृणु पूर्वमरूपवत्सूत्रेणसर्वकर्मत्वादयोधर्माःकार्यनिष्ठाब्रह्मण्यारोप्यतइत्युक्तंतत्रब्रह्मणउपादानकारणत्वात्कारणस्यैवधर्माःकार्येभवंति कामादयोधर्माश्चश्रुतौविहितास्तेब्रह्मणएवभवितुंयुक्ताइत्याशंक्याह दर्शयतिचाथोअपिस्मर्यते दर्शयतिश्रुतिरेव जडजीवधर्माणां भगवत्यभावं "द्वेवावब्रह्मणोरूपे" इत्युपक्रम्यद्वेधापंचभूतान्युक्त्वा "अथातआदेशोनेतिनेती"त्याह तत्रद्वौनञौप्रकृतमर्थंगमयतइति द्वयोःस्थापनमात्रंक्रियते किंवावीप्सयापूर्वोक्तंसर्वंनिषेधति उत रूपद्वयमेवनिषेधति अथवा पूर्वंप्रतिषेधोभूतराशिंनिषेधति द्वितीयोवासनाराशिमित्यादिशंकायां श्रुतिःस्वयमेवविवृणोति–नह्येतस्मादिति-नेत्यन्यत्परमस्ती"ति । अथातआदेशइतिसमुदितवाक्यस्यार्थउच्यते श्रुतावपिअथशब्दःप्रक्रमभेदकः । अतइतिहेतौपंचमील्यब्लोपेवा । उक्तं रूपद्वयंहेतूकृत्यआदेशः ताभ्यांकार्याभ्यांरूपाभ्यांशाप्यस्यब्रह्मण उपदेशःनेतिनेतीतिपूर्वइतिशब्दःप्रकारवाची तथाचसमवायित्वाद्ब्रह्मपंचभूतात्मकंभवतिइतिनपंचभूतप्रकारकंब्रह्मनेतिप्रथमपदस्यार्थः । इममेवार्थंश्रुतिर्वदतिनह्येतस्मादित्यनेननभवत्येवब्रह्मतादृशंहियुक्तोऽयमर्थः–यतएतस्माज्जातंतत्नहिकार्यकारणयोरेकःप्रकारोभवतिएवंप्रथमस्यनेतीतिशब्दस्यव्याख्यानंकृत्वाद्वितीयंव्याचष्टे–अन्यत्परमस्तीति । नइतिसमवायित्वमात्रमेवन किंत्वन्यत्परमस्ति । तथाचनेतीत्यनेनैतावतानिषेधः तथाचनसर्वनिषेधोनापिभूतद्वयस्यवासनाभूतराश्योर्वा निषेधः किंतुप्रकारैतावत्तयोरेवनिषेधः एवंब्रह्मणो रूपंनिरूप्यनाम निरूपयति–सत्यस्यसत्यमिति । एवंचहियस्माद्धेतोर्नेतिनेतीतिवीप्सयामूर्तामूर्तंतद्वासनात्मिकाविद्यांतत्कार्यादिचनिषिध्यसर्वनिषेधावधित्वेनतत्साक्षित्वेनचब्रह्मैवनिर्दिष्टं इतिकृत्वाएतस्मात्परंउत्कृष्टंब्रह्मणोनिर्देशनमन्यत्नास्तिएतत्संदेहमपिनिराकर्तुंनामनिर्वक्ति "प्राणा वैसत्यंतेषामेषसत्य"मिति प्राणंतीतिप्राणाअपरब्रह्मरूपाःतत्कार्यत्वात् सत्यं नाविधका ब्रह्मविवर्तभूताः तत्रहेतुस्तेषांप्राणानां परमात्मैव सत्यंस्वरूपभूतइतितेनप्रपंचातिरिक्तस्यापिब्रह्मणोविद्यमानत्वात्प्रपंचधर्मवत्त्वंतस्मिन्नौपचारिकमेवयुक्तं श्रुत्यैवतथाप्रतिपादनात् । चकारः

पूर्वेयुक्त्यनुसंधानार्थः ॥ श्रुतेरन्यार्थतानिराकरणायाह–अपि स्मर्यते-अनादिमत्परंब्रह्मनसत्तन्नासदुच्यते । इतिसदसतोःक्षेत्रत्वात् ज्ञेयनिरूपणेनिषेधः प्रपंचधर्मावेदेभगवत्युच्यंते नतुतेतद्धर्माभवंतीति-ज्ञापयति तस्मात्सर्वकर्मेत्याद्योधर्माजडजीवयोरेवेतिसिद्धं ॥ मायाह्येपेत्यस्यार्थस्तु पूर्वमेवविवृतः उपासनार्थमायिकरूपादिकल्पना-इतित्वसंगतमेव मायाहिव्यामोहिकाभगवतःशक्तिः । नहि भगवता भक्तानांव्यामोहःकर्त्तव्यः किंत्वसुराणामेव ॥

सहस्राक्षे अनेनैवेत्यादिंकरादिकल्पनेत्यंतंभागंनिराकुर्वंति अतएवाहच–तन्मात्रमित्यादिनाकिंत्वसुराणामेवेत्यंतेन ॥सयथेत्यादि॥ अत्रमैत्रेयीब्राह्मणवाक्येकृत्स्नस्यप्रज्ञानघनत्वं बोध्यते ॥ अत्रकृत्स्नपदात्करचरणादिमत्त्वंलभ्यते अकृत्स्नत्वबुध्युत्पादकप्रकारसत्वएव-कृत्स्नपदसार्थक्यसिद्धेः ॥ अनंतरोऽबाह्यइतिविशेषणे अपि तथैवसतिसंगच्छेतां अन्यथाऽऽकाशतुल्यस्यबाह्यांतरविभागायोगात् ॥ घनपदादपिसाकारत्वमेवद्योत्यते अन्यथाप्रज्ञानमित्येववदेत् तेनविश्वतश्चक्षुरित्यादिश्रुत्यंतरशतप्रतिपादितस्यकृत्स्नस्यप्रज्ञानघनत्वमत्र बोध्यते ॥ प्रज्ञानशब्दश्च आनंदाभिन्नज्ञानपरः, अन्यथाप्रशब्दनैरर्थक्यात्केवलचित्परत्वे सूत्रेऽपिमात्रपदेनतपतिरिक्तव्यवच्छेदाद्योवैभूमातत्सुखमित्यादिव्याकोपस्त्वनापेयात् ॥ (अ० १ पा० २ सूत्र १५) "सुखविशिष्टाभिधानादेवचे" त्यादिसूत्रविरोधश्च ॥ तेन-स्वाभिन्नचिदानंदात्मकसर्वेंद्रियादिकमेवब्रह्मात्रसूत्रेतन्मात्रपदेनोच्यते अतोमार्तंडटीका-कारोक्तंनायुक्तं ॥ तादृशमिति ॥ चिदानंदघनं ॥ नेंद्रियेति ॥ पृथगिंद्रियाकल्पनाप्रयुक्तो विरोधोनेत्यर्थः ॥ यत्तुसूत्रेतन्मात्रचिन्मात्रं रूपादिरहितमात्रंचेति व्याख्यातंतत्रचिन्मात्र-मित्येवशंकराचार्या व्याचक्षते ॥ आहचश्रुतिः"चैतन्यमात्रंविलक्षणरूपांतररहितंनिर्विशेषं-ब्रह्म" इति ॥ पक्षांतरंतुकपोलकल्पितमयुक्तं अरूपवदेवेत्यनेनपौनरुक्त्यापत्तेः सूत्रेतच्छ-ब्दस्यरूपादिरहितपरामर्शकत्वे चित्परामर्शकतायाश्चित्परामर्शकत्वेतत्परामर्शकतायाश्चासंभवात् विषय-वाक्येरूपादिरहितकथनाभावाच्च ॥ अतस्तत्पक्षंदूषयंति यत्तुरूपादिरहितमात्र-मित्यादिनाअयंविचारइति (अ० ३ पा० २ सू० ११) न स्थानतोपिपरस्येत्यारभ्य (सू० ३०) प्रतिषेधाच्चेत्यंतसूत्रविंशत्याकृतस्तद्धर्मविचारः ॥ उभयविधेति सविशेषत्वबोधके-त्यर्थः ॥ एतत्सूत्रविंशत्यां "नस्थानतोपिपरस्योभयलिंगंसर्वत्रही" त्यादित्रिसूत्रंप्रथममधि-करणं तत्पूर्वपक्षंप्रकारद्वयेनाहुः–तत्रधर्मविधायकेत्यादिना सर्वकर्मेत्यादीति ॥ छांदोग्ये-पंचमप्रपाठके शांडिल्यविद्यायां "सर्वकर्मासर्वकामः सर्वगंध. सर्वरसः सर्वमिदमभ्यात्त" इत्यादीनि। तेषामिति सर्वकर्मत्वसर्वज्ञ्यायस्त्वादीनां तमेवेति "तमेवविदित्वाऽतिमृत्युमेति" इतिवाक्येभगवज्ज्ञानादेवमोक्षइतिभावः । एतत्सूत्रव्याख्यानस्य प्रयोजनमग्रेस्फुटीभ-विष्यति ॥ अस्मिन्नधिकरणेऽग्रिमसूत्रद्वयस्यप्रकृतखंडनेविशेषतः प्रयोजनाभावात्तदव्या-ख्यातं । अतः पर (सू० १४) अरूपवदेवेत्यादिपंचसूत्रमधिकरणमेकदेशिमतेन प्रागुक्त-संशयनिराकरणार्थं (सू० १९) "अंबुवदग्रहणात्तुनतथात्व" मित्यादिचतु सूत्रंसिद्धांत-मतेनतत्समाधानार्थं ॥ तत्रब्रह्मप्रथमतोनिर्द्धर्मकमेवतत्तद्धर्मरूपंभवतीत्येकदेशिमत-

निष्कर्षः ॥ ब्रह्मस्वाभिन्ननित्यसर्वधर्माश्रयः प्राकृतधर्मानाश्रय इति सिद्धांतसारः ॥ परेपांतु नस्थानतोपीत्याद्येकादशसूत्रंप्रकृतैतावत्त्वमित्यादिनवसूत्रंचेत्यधिकरणद्वयं तत्खण्डनमाकरेष्वध्येयं ॥ तत्रैकदेशिमतबोधकं अरूपवदधिकरणं संगृह्णंति-तद्योत्तरमनेनेत्यादिना ॥ कार्यकारणांशेति । भावप्रधानोनिर्देशः जडप्रपंचः कार्यंजीवांशः कारणमंशिचब्रह्मेतिभेदः संवैनैवरेमइत्यादिश्रुतिभ्योरमणार्थंकृतः । तत्रहीति ॥ बृहदारण्यकेपंचमाध्यायेगार्गीप्रश्नोत्तरबोधकेऽष्टमब्राह्मणे उक्तत्वादिति ॥ "एतस्यवाअक्षरस्यप्रशासनेगार्गिसूर्याचंद्रमसौविधृतौतिष्ठतः" इत्यादिनोक्तत्वात् ॥ तत्रेति ॥ सर्वकर्मेत्यादिबोधकशांडिल्यविद्यायां ॥ तत्रत्यं "मनोमयःप्राणशरीरोभारूप" इतिवाक्यं। वस्तुतस्तुज्ञानरूपस्वाभिन्नप्राणशरीरबोधकं ॥ तथाप्येकदेशिवैशिष्ट्यंतत्रमन्यते-तेकइति कर्मकामादयोधर्माःसर्वकर्मसर्वकामसर्वगंधादिशब्दोक्ताःकइत्यर्थः ॥ रूपरहितमात्रमिति ॥ एवंव्याख्यानमप्ययुक्तं किंपुनारूपादिरहितमात्रमित्यादिपदघटितं ॥ रूप्यतेऽनेनेतिव्युत्पत्तिव्याख्यानमनंगीकृत्यरूपशब्देन गुणविशेषस्यांगीकारेरूपमात्रस्यनिषिद्धतया आदिपदग्राह्यधर्मांतरप्रतिषेधासिद्धेः ॥ अन्यथा सूत्रएवादिपदंब्रूयात् अधर्मवदित्येव वा वदेत् ॥ सर्वथारूपस्याप्यभावेऽभिप्रेते अदृश्यत्वाधिकरणेरूपोपन्यासं न हेतूकुर्याच्चापितत्रतत्रतद्धर्मोपदेशविवक्षितगुणोपपत्तिसर्वधर्मोपपत्त्यादीन् विरुद्धत्वादित्यपिध्येयं। अतोरूपशब्दस्योक्तव्याख्यानमेवयुक्तं। वायावित्यादि॥ चक्रवातादौचक्राद्याकारकत्वंतृणपर्णादि परिभ्रमणेनतदोयमानधूलिपटलेतदाकारतादर्शनेनचनिश्चीयतइतिभावः ॥ एतेनप्रकाशवत्सूत्रस्यतदुक्तमवतरणंनिरस्तं ॥ यस्तु प्रकाशवच्चावैयर्थ्यमितिसूत्रेप्रथमांतपाठउपन्यस्तः, अवैयर्थ्यमुपपाद्यतत्प्रवृत्तेरित्युक्त्याचतथैवस्वी-

---

अनेनैवआहचतन्मात्रम् इत्यस्याऽप्यानन्दमात्रं तस्य करादिकमाहेत्यर्थः प्रत्युक्तः ॥ करादिशब्दाभावात् ॥ सूत्रार्थस्तु आहचश्रुतिः तन्मात्रम् चिन्मात्रम् रूपादिरहितमात्रं वा ब्रह्मेति ॥ अरूपवदेवेतिप्यवहितपूर्वसूत्रे अरूपवद्ब्रह्मोक्त्वा तर्हि साकारत्वश्रुतीनां वैयर्थ्यमित्याशंक्य प्रकाशवच्चावैयर्थ्यमित्यनेन यथा प्रकाशः सौरश्चान्द्रमसोवा वियद्व्याप्याऽवतिष्ठमानोऽङ्गुल्याद्युपाधिसंबन्धात्तेष्वृजुवक्रादिभावं प्रतियमानेषु तद्भावमिव प्रतिपद्यते एवं ब्रह्माऽपिपृथिव्याद्युपाधिसंबन्धात्तदाकारतामिव प्रतिपद्यते तदालम्बनोब्रह्मणआकारविशेषोपदेश उपासनार्थोन विरुध्यते एवमवैयर्थ्यमाकारवद्ब्रह्मविषयाणामपि वाक्यानां भविष्यति सौपाधिकाश्च धर्मानवास्तवाइति विरोधोनेत्यर्थकेनाऽवैयर्थ्यमुपपाद्य तत्प्रवृत्तेः ॥ अतएवचोत्तरत्र दर्शयति चाथोअपिचस्मर्यते इति निर्विशेषमेव ब्रह्मोक्तवान् नतुआनन्दमात्रहस्तादिकम् ॥ अर्थस्तु दर्शयतिचश्रुतिःपरप्रतिषेधेनैव ब्रह्म अन्यदेवतद्विदितादथोअविदितादधिइत्याद्या ॥ किञ्च बाष्कलिना पृष्टोबाध्वोऽवचनेनैवप्रोवाचेतिश्रूयते सहोवाचाधीहि भोइति सहतूष्णींबभूव तंहद्वितीयेतृतीयेवावचनउवाचब्रूमःखलुत्वंतुनविजानास्युपशान्तोयमात्मा इति ॥ तथा स्मृतिष्वपि परप्रतिषेधेनैवोपदिश्यते ज्ञेयंयत्तत्प्रवक्ष्यामियज्ज्ञात्वामृतमश्नुते ॥ अनादिमत्परंब्रह्मनसत्तन्नासदुच्यते ॥ इत्येवमाद्यासु ॥ तथा विश्वरूपधरोनारायणोनारदमुवाचेतिस्मर्यते मायाह्येषामयासृष्टेति तस्मादुपासनार्थमेव मायिककरादिकल्पना ॥

कृतः सतुब्रह्मसूत्राणांगुरुसन्निधावभ्यासाभावाद्भ्रममूलकः सूत्रेत्वैयर्थ्यादितिहेतुरेवो-च्यते वैयर्थ्यमाशंक्यावैयर्थ्यस्यात्रोपाद्यत्वेतुहेतुत्वानसंगच्छेत ॥ उपाधिसंबंधव्याख्यानंतु सुतरामसंगतं, सूत्रेपूर्वसूत्रेपुवातद्बोधकपदगंधस्याप्यभावात् ॥ अस्मत्संमतार्थस्तु पूर्वरूप-शब्दस्यव्यवहार्यपरत्वेप्रकाशवदित्युक्त्यैवलभ्यते ॥ यथाप्रकाशोऽरूपवान् येनप्रकारेणा-व्यवहार्यः तथाब्रह्मापि इति ॥ तेनव्यवहार्यत्वकोटिरर्थादेवसिद्ध्यति प्रकाशस्यतथात्वात् सौत्रहेतोरपितथैवसंगतेश्च ॥ नापिप्रकाशस्यांगुल्यादिसंबंधेनरूपंभिद्यते भास्वरशुक्लतयै-वप्रतीतेः ॥ ऋजुवक्रादिभानस्तु नरूपं ॥ किंच अंगुल्याद्युपाधिसंबंधात्तेऋजुवक्रादिभावं प्रतिपद्यमानेपुतद्भावमिव प्रतिपद्यतइत्येतावदध्याहारगर्भव्याख्यानएवसूत्रकाराभिप्रायः सूत्राक्षरतोननिश्चेतुंशक्यः ॥ यत्तु औपाधिकाश्चधर्मानवास्तवाइत्यादि तत्रपृच्छामः धर्माणां तूपाधिकृतत्वादवास्तवत्वंरूपे परमुपाधेः केनकृतत्वादवास्तवत्वं ब्रूयाः ॥ उपा-ध्यंतरेणेतिचेदनवस्था तस्मानौपाधिकत्वेतूपाधिसंबंधोवास्तवएवेतिसधर्मकत्वं तदवस्थं नहिप्रकाशस्यांगुल्यादिसंबंधोनवास्तवः ॥ तथासतिलाघवाद्धर्मानेववास्तवान्कुतोनब्रूषे ॥ परस्योपाधिसंबंधश्चभाष्यप्रकाशे नविलक्षणत्वादित्याद्यधिकरणेपुविस्तरेणनिराकृतः ॥ नच त्वद्रीत्याप्येकदेशिमतेपूर्वपक्षेतिकादाचित्कत्वाद्धर्माणामौपाधिकत्वमापततीतिशंक्यं घृत-द्रवत्वादौकादाचित्केप्यौपाधिकत्वाभावात् ॥ तर्हितवकथंपूर्वपक्षसिद्धांतावित्यतआहुः ॥ अस्मन्मतेचेत्यादिना ॥ श्रुतिविरोधइति ॥ अस्याःश्रुतेः "अप्राप्यमनसासहे" त्यनेन-विरोधः ॥ चकारात् "तंत्वौपनिषदं ॥ यतोवाचः ॥ प्रत्यगात्मानमैक्षत् ॥ नचक्षुषापश्य-तिकश्चनैनं" इत्यादीनांविरोधः ॥ स्थापयितुमिति ॥ यथानापयातितथानिरोद्धुं ॥ प्रति-बंधकाभावइति ॥ प्रतिःबंधकंतुमेघादिकंदार्ष्टांतिकेतत्स्थानेत्रिगुणमयीमाया, नाहंप्रकाशःसर्व स्ययोगमायासमावृत इतिवाक्यात् ॥ अत्रसूत्रार्थेघनोयथार्कप्रभवोऽर्कंदर्शितइत्याद्युपबृंह-णमप्यनुसंधेयं ॥ ईश्वरसन्निधानइति ॥ सन्निधानमाविर्भावः तत्रहेतुस्तु तत्रैवपादे (सू० २३) तदव्यक्तमित्यधिकरणे स्फुटः ॥ अलौकिकाएवेति ॥ पाणिपादादिनिरपेक्ष-मादानगमनादिकमलौकिकमेव ॥ अपाणिपादइतितुश्वेताश्वतरवाक्यं ॥ एवंक्रियादेरलौकि-कताबोधकानि "आसीनोदूरंव्रजतिशयानोयातिसर्वतः । कस्तंमदामदंदेवंमदन्योज्ञातुम-र्हति" इत्यादीनि कठादिवाक्यान्यपिस्मर्तव्यानि ॥ सन्निधानवत्यैवव्यवहार्यतयास्वान्यस्यज्ञा-नयोग्यतानिषेधःकठवाक्येयमेनदर्शितः ॥ श्वेताश्वतरवाक्येऽपि नचतस्यवेत्तेति लौकिक-विषयावेदननिषेधः ॥ इमेतस्यव्यवहार्यत्वाव्यवहार्यत्वेकेनोपनिषत्तृतीयखंडादौचस्फुटेस्वे-च्छयाब्रह्मणिप्रादुर्भूतएवाग्निवाय्वादिदेवानामपि दर्शनस्पर्शनव्यवहारस्तिरोधानेत्वव्यवहार इति ॥ अतएवचतुर्थखंडेविद्युतोविद्योतनंप्रकाशविशेषएवतत्रदृष्टांतितः ॥ तस्मात्प्रकाशव-त्सूत्रस्योक्तएवार्थः । नहित्वदभिमतदृष्टांतोवेदेधाप्यस्ति ॥ अथ (अ० ३ पा० २ सू० १७) "दर्शयतिचाथोअपिस्मर्यते" इतिसूत्रस्यपरोक्तार्थंदूषयंतः सिद्धांतेऽर्थमाहुः-यत्तु औपाधिकाइत्यादिना ॥ अस्मिन्सूत्रे सहस्राक्षे "अपिच स्मर्यते" इतिद्वितीयचकारपाठस्तु-प्रमादात् ॥ अत्रैवशांकरभाष्ये "अथातआदेशोनेतिनेति" इतिवाक्यंप्रथममुदाहृतं ॥ इहसहस्राक्षेत्स्वभाष्यस्थस्यसर्वस्यानुवादेपितदेवैकंनसंगृहीतं ॥ तत्रबीजंचित्यं ॥ परंतत्रा-

प्यउदाहृतत्वात्सिद्धांतेऽपिसूत्रे अथोभिन्नप्रक्रमेणदर्शयन्तीति कथनेनभिन्नप्रक्रमार्थकाथशब्दघटितानां "अथातः । विदितादथोऽअविदितात्" इत्यादीनांविषयवाक्यतयाऽभिप्रायाच्चायातद्वतिवाक्यमपिचिंत्यते-कारणस्यैवधर्मा इत्यादि ॥ यद्यपीदंसिद्धांतिसंमतं-तथाप्येकदेशिमतदृष्ट्याऽयंपूर्वपक्षः सूत्रेऽथोइत्यस्य ओदंतनिपातत्वेनप्रगृह्यत्वादसंधिः । जडजीवेति ॥ अधिदैवतप्रकारनिषेधाज्जडधर्माणामध्यात्मप्रकारनिषेधाज्जीवधर्माणांचाभावःप्रकृतवाक्ये ॥ तत्प्रकारवाक्येच विदिताज्जडात् अविदिताज्जीवाच्चतदन्यद्भिन्नप्रकारकमिति स्पष्टएवोभयधर्माभावः ॥ द्वेवावेति ॥ बृहदारण्यके तुर्याध्यायेमूर्तामूर्तब्राह्मणाख्येतृतीयब्राह्मणे "द्वेवावब्रह्मणोरूपे मूर्तंचैवामूर्तंच" इत्युपक्रम्य पृथिव्यादिभूतत्रयंमूर्तं वाय्वाकाशावमूर्तौ मूर्तस्य कारणं आदित्यगततयादृश्यमानंभगवत्तेजः अमूर्तस्यकारणंतत्रादृश्यमान.पुरुषइति अधिदैवतप्रकारेणपंचभूतान्युक्तानि । अथशरीरादिकंमूर्तं प्राणआंतराकाशश्चामूर्तं तत्कारणेचक्षुस्तदंतरपुरुषौचेत्यध्यात्मप्रकारेणतान्युक्तानि एवमधिदैवताध्यात्मभेदेनद्वेधासमष्टिव्यष्टिरूपाणिभूतान्युक्त्वा "अथातआदेशोनेतिनेति" इत्युच्यते एतद्वाक्यमग्रे तत्रोपनिषदैवानुपदंव्याख्यायते "नह्येतस्मादितिनेत्यन्यत्परमस्त्यथनामधेयꣳ सत्यस्यसत्यमिति प्राणावैसत्यंतेषामेषसत्यं" इति ॥ इह एतस्मादित्यत्र अस्मादितिपाठांतरं ॥ अथातआदेश इत्यत्राथशब्दोभिन्नप्रक्रमे पूर्वंकार्यं निरूपितं इदानींकारणंनिरूप्यत इति ॥ अत.पूर्वोक्तरूपद्वयाद्धेतोरूपद्वयं हेतूकृत्यवा आदेश कार्याभ्यांज्ञाप्यत्वब्रह्मणउपदेशः नेतिनेति ॥ अत्रपूर्वं वावशब्दस्यावधारणार्थतयापंचभूतात्मकेमूर्तामूर्तेद्वेएवब्रह्मणोरूपेइतिमिथ्यापंचभूतकारकत्वमेवब्रह्मण्यापततीति ॥ इसस्यकथनात्तस्मत्वायित्वेनतावन्मात्रत्वंचापततीति तादृशंक्रमात्नेतिशब्दद्वयेननिषिध्यते ॥ इतिएवंप्रकारकंब्रह्मन एतावन्मात्रंचब्रह्मनेत्यर्थः । ननुकथमेवंनिश्चीयतइत्याशंकावारणाय व्याख्यायते । तत्रप्रथमस्यनेतिशब्दस्यार्थमाह "नह्येतस्मादिति" इति ॥ न ब्रह्मपंचभूतप्रकारकंनभवतिहि । युक्तंचैतत् यतएतस्मात् एतद्धेतुकानितानि नहिकार्यकारणयोरेक.प्रकारोभवति तत्तदसाधारणधर्माणांभेदात् ॥ द्वितीयंनेतिशब्दंव्याचष्टे-"नेत्यन्यत्परमस्ति" इति । ब्रह्मएतावन्मात्रंभवति किंतु अन्यत् अधिकंपरंब्रह्मास्ति । तथाच कार्यासाधारणलौकिकधर्मविलक्षणधर्मकंसमवायित्वेऽपिकार्यादत्यधिकंचब्रह्मणोरूपंसिद्धं एवं रूपंनिरूप्यनामनिरूपयति-"सत्यस्यसत्यं" इति । व्याख्यानवाक्येप्यर्थांतरशंकावारणाय-नाम निर्वक्ति "प्राणावैसत्यंतेषामेषसत्यं" इति ॥ प्राणंतीतिप्राणाःपूर्वोक्तकार्याणि वैनिश्चयेन सत्यंनतुवितथरूपाः ॥ अथवातत्रपूर्वोक्तरीत्यासद्रूपत्वात्त्यद्रूपत्वाच्चप्राणा. सत्यं ॥ तेषांप्राणानामेषपरमात्मासत्यंस्वरूपभूतइत्यर्थः ॥ तदेतत्सर्वमुरसिकृत्य भाष्यंप्रकाशंचैकीकृत्यानुवदंतितत्रह्यैनमावित्यादिना ॥ श्रुत्वाविति ॥ अपिशब्दाद्ध्याख्येयसूत्रेचतथेतिद्योतितं ॥ हियस्मादित्यादि ॥ अयंप्रकृतवाक्यस्यपरै.सभावितोर्थोनूदितः । एतत्संदेहमिति । हियस्मादित्यादिनाऽन्यत्रास्तीत्यंतेनानूदितपरव्याख्यानरूपंसंदेहमित्यर्थः ॥ अत्रप्रकाशेपरेषांत्रिधाव्याख्यानानि अवतरणेसंगृह्यनामनिरूपणमवतारितंतेष्वेकंव्याख्यानमिहानूद्यतादृशसंदेहं निराकर्तुंनामनिर्वक्तीत्युक्तं-पूर्वयुक्तीति । पूर्वसूत्रोक्ततत्प्रधानत्वादियुक्तीनामित्यर्थः ॥ सर्वंतइति ॥

कृतः सतुब्रह्मसूत्राणांगुरुसन्निधावभ्यासाभावाद्भ्रममूलकः सूत्रेत्ववैयर्थ्यादितिहेतुरेवो-च्यते वैयर्थ्यमाशंक्यावैयर्थ्यस्यात्रोपाद्यत्वेतुहेतुतानसंगच्छेत ॥ उपाधिसंबंधव्याख्यानंतु सुतरामसंगतं, सूत्रेपूर्वसूत्रेषुवातद्बोधकपदगंधस्याप्यभावात् ॥ असत्संमतार्थस्तु पूर्वरूप-शब्दस्यव्यवहार्यपरत्वेप्रकाशवदित्युक्त्यैवलभ्यते ॥ यथाप्रकाशोऽरूपवान् येनप्रकारेणा-व्यवहार्यः तथाब्रह्मापि इति ॥ तेनव्यवहार्यत्वकोटिरर्थादेवसिद्ध्यति प्रकाशस्यतथात्वात् सौत्रहेतोरपितथैवसंगतेश्च ॥ नापिप्रकाशस्यांगुल्यादिसंबंधेनरूपंभिद्यते भास्वरशुक्लतयै-वप्रतीतेः ॥ ऋजुवक्रादिभावस्तु नरूपं ॥ किंच अंगुल्याद्युपाधिसंबंधात्तेष्वृजुवक्रादिभावं प्रतिपद्यमानेषुतद्भावमिव प्रतिपद्यतइत्येतावदध्याहारगर्भव्याख्यानएवसूत्रकाराभिप्रायः सूत्राक्षरतोननिश्चेतुंशक्यः ॥ यत्तु औपाधिकाश्चधर्मानवास्तवाइत्यादि तत्रपृच्छामः धर्माणां तूपाधिकृतत्वादवास्तवत्वंभूपे परस्तुपाधेः केनकृतत्वादवास्तवत्वं भ्रूयाः ॥ उपा-ध्यंतरेणेतिचेदनवस्था तस्यानौपाधिकत्वेतूपाधिसंबंधोवास्तवएवेतिसधर्मकत्वं तदवस्थं नहिप्रकाशस्यांगुल्यादिसंबंधोनवास्तवः ॥ तथासतिलाघवाद्धर्मानेववास्तवान्कुतोनभूपे ॥ परस्योपाधिसंबंधश्चभाष्यप्रकाशे नविलक्षणत्वादित्याद्यधिकरणेषुविस्तरेणनिराकृतः ॥ नच त्वद्रीत्याप्येकदेशिमतेपूर्ववद्वेतिकादाचित्कत्वाद्धर्माणामौपाधिकत्वमापततीतिशंक्यं घृत-द्रवत्वादौकादाचित्केष्यौपाधिकत्वाभावात् ॥ तर्हितवकथंपूर्वपक्षसिद्धांतावित्यतआहुः ॥ अस्मन्मतेचेत्यादिना ॥ श्रुतिविरोधइति ॥ अस्याःश्रुतेः "अप्राप्यमनसासहे" त्यनेन-विरोधः ॥ चकारात् "तंत्वौपनिषदं ॥ यतोवाचः ॥ प्रत्यगात्मानमैक्षत् ॥ नचक्षुपापश्य-तिकश्चनैनं" इत्यादीनांविरोधः ॥ स्थापयितुमिति ॥ यथानापयातितथानिरोद्धुं ॥ प्रति-बंधकाभावइति ॥ प्रतिःबंधकंतुमेघादिकंदार्ष्टांतिकेतत्स्थानेगुणमयीमाया, नाहंप्रकाशःसर्व स्ययोगमायासमावृत इतिवाक्यात् ॥ अत्रसूत्रार्थेघनोयथार्कप्रभवोऽर्कदर्शितइत्याद्युपबृंह-णमप्यनुसंधेयं ॥ ईश्वरसन्निधानइति ॥ सन्निधानमाविर्भावः तत्रहेतुस्तु तत्रैवपादे (सू० २३) तदव्यक्तमित्यधिकरणे स्फुटः ॥ अलौकिकाएवेति ॥ पाणिपादादिनिरपेक्ष-मादानगमनादिकमलौकिकमेव ॥ अपाणिपादइतितुश्वेताश्वतरवाक्यं ॥ एवंक्रियादेरलौकि-कत्वावोधकानि "आसीनोदूरंव्रजतिशयानोयातिसर्वतः । कस्तंमदामदंदेवंमदन्योज्ञातुम-र्हति" इत्यादीनि कठादिवाक्यान्यपिस्मर्तव्यानि ॥ सन्निधानवतैवव्यवहार्यतयास्वान्यस्यज्ञा-नयोग्यतानिषेधःकठवाक्येयमेनदर्शितः ॥ श्वेताश्वतरवाक्येऽपि नचतस्यवेत्तेति लौकिक-विषयावेदननिषेधः ॥ इमेतस्यव्यवहार्यत्वाव्यवहार्यत्वेकेनोपनिपत्तलीयखंडादौचस्फुटेस्वे-च्छयाब्रह्मणिप्रादुर्भूतएवाग्निवाय्वादिदेवानामपि दर्शनस्पर्शनव्यवहारस्तिरोधानेत्वव्यवहार इति ॥ अतएवचतुर्थखंडेविद्युतोविद्योतनंप्रकाशविशेषएवतत्रदृष्टांतितः ॥ तस्मात्प्रकाशव-त्सूत्रस्योक्तएवार्थः । नहित्वदभिमतदृष्टांतोवेदेक्वाप्यस्ति ॥ अथ (अ० ३ पा० २ सू० १७) "दर्शयतिचाथोअपिस्मर्यते" इतिसूत्रस्यपरोक्तार्थदूषयंतः सिद्धांतेऽर्थमाहुः–यत्तु औपाधिकाइत्यादिना ॥ अस्मिन्सूत्रे सहस्राक्षे "अपिच स्मर्यते" इतिद्वितीयचकारपाठस्तु-प्रमादात् ॥ अत्रैवशांकरभाष्ये "अथातआदेशोनेतिनेति" इतिवाक्यंप्रथममुदाहृतं ॥ इहसहस्राक्षेस्वभाष्यस्थस्यसर्वस्यानुवादेपितदेवैकंनसंगृहीतं ॥ तत्रबीजंचिंत्यं ॥ परंतद्ग-

गीतात्रयोदशाध्यायेस्मर्यते क्षेत्रत्वादित्यादि ॥ इदंतदध्यायपर्यालोचनेस्फुटमेवेतिनप्र
च्यते ॥ अस्यापिसूत्रस्यप्रकाशोभाष्यंचोपयुक्तमात्रमनूदितमितिध्येयं ॥ सिद्धमिति ॥
कारणेकार्यधर्माभावएवैकदेशिमतेऽपिसिद्धोनतुब्रह्मणोनिर्विशेषत्वमितिभावः । यत्तु दर्श
यतिचश्रुतिरित्यादिउपशांतोयमात्माइत्यंतं । तत्रविदिताविदितवाक्यंतु तदुभयभिन्नत्वमेव
वदतिनतुविशेषान्निषेधति अथान्यत्वादिकथनमुखेननिषेधतितदालौकिकानेवनिषेधति
तावतैवचारितार्थ्यात् नतुस्वरूपात्मकानपि ॥ तथाहि इदंहिवाक्यंकेनोपनिषत्स्थंतत्र
"केनेषितंपततिप्रेषितंमनः" इत्यादिना मन.प्राणवाक्चक्षुश्श्रोत्राणांप्रेरकःक इतिप्रश्नस्य
"श्रोत्रस्यश्रोत्रंमनसोमनोयत्" इत्यादिनासर्वेषांतेषांप्रेरकत्वंसर्वाधिदैविकत्वंचोक्त्वा
"नतत्रचक्षुर्गच्छतिनवाग्गच्छतिनोमनोनविद्मोनविजानीमोयथैतदनुशिष्यादन्यदेवतद्विदि-
तादथोअविदितादधिइतिशुश्रुमपूर्वेषांयेनस्तद्व्याचचक्षिरे" इतिपठ्यते ॥ अत्रपरांचिखानी-
त्यादिश्रुत्यापराचांचक्षुरादीनांतत्राप्रवृत्तिमुक्त्वा ततएवयथाशिष्याणामनुशासनंस्यात् ताद-
शवेदनविज्ञानयोरभावः प्रतिपाद्यते ॥ कथमेतदित्याकांक्षायां अन्यदेवेत्यनेनजडेभ्योजीवे-
भ्यश्चवैलक्षण्यंबोध्यते ॥ अधीत्यनेनअन्यत्वंचसर्वतआधिक्यरूपमितिदर्श्यते ॥ सर्वथा-
वागाद्यगोचरत्वेऽनुशासनाभावेशास्त्रानर्थक्यमनिर्मोक्षश्चापद्येतेति तद्वारणायब्रह्मविद्वागा-
दिविषयत्वं चोच्यतेइतिशुश्रुमेत्यनेन ॥ अग्रेच "यद्वाचानभ्युदितंयेनवागभ्युद्यते"
इत्यादिवाक्यपंचके प्रथमचरणेलोकविदितधर्मप्रतिषेधपुरःसरंद्वितीयचरणेलोकाप्रसिद्धा
कमनआदिभिरिदमित्थमितिनिर्णयस्याभावएवतत्तात्पर्यं ॥ द्वितीयखंडेच "त्वंवेत्थब्रह्मणोरूपं" इतिस्पष्टमेवरूपवत्त्वमुक्तंअतोलौकि-
नांभगवदनुग्रहेण तत्स्वरूपोपलंभादिकमुक्तं ॥ तृतीयतुर्यखंडयोश्चस्पष्टमेवदेवा-
सिध्यतिनतुनिर्विशेषत्वं तदीयभाष्यस्थं यतोवाचइति वाक्यमपिपूर्णमक्षरानंदस्याप्रजाप-
त्यानंदाच्छतगुणत्वमुक्त्वापरानंदस्यागणितत्वंबोधनायगणनासाधनवाङ्मनसयोरप्रवृत्तिंतत्र-
बोधयतीति लौकिकप्रमाणैरेवब्रह्मणइदमित्थतयानिर्णयाभावेपर्यवस्यतिनतुविशेषान्निषे-
धति ॥ अतोऽनिरुक्तवाक्यसमानार्थकं प्रवचनतः प्रवचनवाक्यमपिलौकिकप्रमाणैरिद-
मित्थमिति निर्णेतुमशक्यत्वाभिप्रायमेव लौकिकसर्वधर्मराहित्यादेवोपशांतत्वसिद्धेः ॥
किंचेदंशंकरभाष्ये "बाष्कलिनाचबाह्वः पृष्टः सन्नवचनेनैवब्रह्मप्रोवाचेतिश्रूयते । सहोवाचा-
धीहिभगवोब्रह्मेतिसतूष्णींबभूवतंहद्वितीयेवातृतीयेवावचनउवाचब्रूमः खलुत्वंतुनविजानासि
उपशांतोयमात्माइति" एवंपठ्यते अत्रतु बाह्वइत्यग्रेवाक्यं अधीहिभगवोब्रह्मेत्यत्र
अधीहिभोइत्यादिरूपेमहतिपाठभेदेमूलंचिंत्यं ॥ नसत्तन्नासदुच्यतइतिगीतावाक्यमपित्या-
दृतयोःस्थूलसूक्ष्मयोरेवनिषेधकमितिलौकिकनिषेधपरमेव ॥ सर्वतःपाणिपादंतमित्यादि-
नाहृदिसर्वस्याधिष्ठितमित्यंतेन अग्रिमवाक्यकदंबेन तथानिश्चयात् सर्वभृत्त्वगुणभोक्तृत्व-
भूतभर्तृत्वग्रसिष्णुत्वप्रभविष्णुत्वसर्वप्रकाशकत्वादिविशेषाणांस्पष्टतयाकथनात् ॥ लोकेवा-
पिकिमपिनहिसर्वतःपाणिपादादिकंभरत्वादिसमानाधिकरणपरत्वादिविशिष्टंदृष्टमतःस्पष्ट-
मेवतद्धर्माणामलौकिकत्वं ॥ मायाह्येषेतिवाक्यमपिमायामूलगुणयुक्तदर्शननिषेधाभिप्राय-
मितितत्रैवस्फुटंमीनिनसार्थात्म्यवाचकं ॥ किंचनिर्वेपायासुरीमता । मृत्वाजन्मनि जन्मनि ।

मायया ऽपहृतज्ञानाइत्यादिवाक्यैर्मायया न्यथाप्रतीतिरसुराणामेवोचितानतुनारदादीनांमहाभागवतानां मायामेतांतरंतितद्धरिवाक्यात् ॥ अतस्तादृशानामुपर्यनुग्रहंकृत्वापुनरधिकमाययान्यथाप्रदर्शनेनैनसंगच्छेत ॥ तस्माद्भूतैश्चगुणैश्चभूतगुणैः प्राकृतगुणैर्नायुक्ततयापूर्वदर्शनमेवमायिकं ॥ अतएवमामेवंभूतगुणयुक्ततयाज्ञातुंत्वंनार्हसिकिंत्वलौकिकस्वाभिन्नगुणकंज्ञातुमर्हसीत्युक्तं ॥ यत्तु उपासनार्थमेवमायिककरादिकल्पनेतितदप्येतेननिरस्तं, उपासकानांदेवानांतत्प्रतीत्यसंभवात् ॥ किंचासौग्रंथादपीदमनुपादेयं ॥ नह्यत्रैवसूत्रेषुग्राहकमेकमप्यधिकरणमस्ति ॥ यदिसूत्रकृत्तथाभिप्रेष्यत्तर्हिस्वमतस्पष्टावितत्करादौमायामात्रतामत्रस्फुटमेवावक्ष्यत् ॥ अधिकंप्रकाशमहस्तादाववधेयं ॥

एतेन यत्तुउपासनार्थमित्यस्यखंडनादिकमपास्तम्ः अप्रत्यक्षेऽप्याकाशेतलाद्यध्यासाच्चेत्यप्यसंगतं आकाशस्यप्रत्यक्षत्वात् ॥ अत्रावकाशोविद्यते अत्रस्थातव्यमिति लोकव्यवहारः । नचाकाशंसाक्षात्करोमीतिप्रतीत्यापत्तिरितिवाच्यं; अवकाशंसाक्षात्करोमीतिप्रत्यक्षस्येष्टत्वात् शाब्दानुमित्यादेरभावेऽपि अवकाशाभिलापस्तस्यप्रत्यक्षत्वंगमयति एतेन (अपरोक्षे अभिलापनियमेप्रमाणाभावात् स्वर्गाद्यभिलापाभावप्रसंगाच्चे) त्यादिकंप्रत्युक्तं ॥ तादृशानियमानंगीकारात्स्वर्गादौशब्दादिनाज्ञातेभिलापसंभवात् ॥ चाक्षुषमात्रउद्भूतरूपस्यहेतुत्वमितिनियमस्तु नसंभवति, अभावचाक्षुषेव्यभिचारात् । नचतत्रापिस्वाश्रयविशेषणतासंबंधेनरूपमस्त्येवेतिकुतोव्यभिचारइतिवाच्यं; विशेषणताया घटपटादिनिष्ठायाःकिंचित्संबंधावच्छिन्नायाएवदर्शनेननिरवच्छिन्नविशेषणतायांमानाभावात् अभावेसतिविशेषणतासंबंधस्वीकारेतदवच्छेदकसंबंधस्यान्यस्यवक्तव्यत्वापातात् किंचपरंपरयारूपस्यप्रत्यक्षहेतुत्वस्वीकारे अत्रापिप्रभादिनिष्ठरूपस्यस्वसमवायिसंयोगसंबंधेनसत्वात्तादृशनियमविरोधोद्भावनस्यासंगतत्वापत्तेः ॥ यदपि (यत्साक्षादपरोक्षाद्ब्रह्मसर्वप्रत्ययवेद्येऽस्मिन्ब्रह्मरूपेव्यवस्थितइत्यादिश्रुतिस्मृतिभिःब्रह्मणःप्रत्यक्षत्वनिश्चया) दितितदपिनप्रकृतोपयोगि नहिशाखावद्ब्रह्मप्रत्यक्षमित्याक्षेपे तादृशप्रत्यक्षत्वकथनंयोग्यंतस्यानुपयोगात् यदिशाखावद्ब्रह्मप्रत्यक्षमित्यभिप्रेतंतदाश्रवणादीनांव्यर्थतास्यात् शास्त्रवैफल्यंच "परांचिखानिव्यतृणत्स्वयंभू"रित्यादिश्रुतिविरोधश्च नचतादृशीश्रुतिर्निरुपाधिकब्रह्मज्ञानाऽभावंसंसारिणामाहेतिवाच्यं; निरुपाधिकब्रह्मण्येवारोपस्यत्वत्संमतत्वेनतादृशज्ञानाभाव आरोपासंभवात् । नहित्वन्मतेज्ञानिनामस्त्युपासनाधिकारः येनतेषांतज्ज्ञातमित्यारोपःसंभाव्येतकिंतुसंसारिणामेवतेषां-

चतदज्ञातमित्युपासनार्थंधर्मारोपइत्ययौक्तिकमेव (उपहितस्यत्या- ज्यत्वेइष्टापत्ति) रित्यप्यसंगतं त्वत्सिद्धांतउपहितस्यत्यागाभावात् महावाक्येपुभागत्यागलक्षणायाःसोयंदेवदत्तइत्यादिवत्सिद्धांतितत्वे- नोपाधिमात्रत्यागेतात्पर्यात् । नहिजहल्लक्षणास्वीक्रियते येनोपहित- त्यागइष्टःस्यात् अतएवशाखाचंद्रदृष्टांतोपिविषमः शाखावद्विशिष्टत्या- गासंभवात् । ननुउपास्यस्यत्याज्यत्वश्रुत्यैवोक्तं तथाचश्रुतिः यन्मनसा- नमनुतेयेनाहुर्मनोमतं । तदेवब्रह्मत्वंविद्धिनेदं यदिदमुपासतइतिचेन्न तादृशश्रुतिभिरुपास्यनिषेधाप्रतिपादनात् । पूर्वार्द्धेनयत्प्रतिपादितंम- नोवृत्त्यविषयः मनआदिप्रेरयितृ तदेवब्रह्मत्वंविद्धि नेदंप्रेर्यत्वेनावुभू- यमानंजीवात्मादिरूपंनविद्धि यत्प्रेरकतत्किमित्यतआह यदिदसच्चि- दानंदाकारंउपासतेवैदिकोपासकाइति । तदर्थः अनुपास्यत्वेऽभिमते- तुद्वितीयेदंकारंनवदेदेव नेदयदुपासतइत्येतावतैवचारितार्थ्यात् केव लमनसाऽलभ्यत्वान्मनसानमनुतइतिसंगतंकिंचउपास्यस्याब्रह्मत्वेत- ज्ज्ञानोपासनादिभिश्चित्तशुद्धिरपित्वदभिमतानस्यात् । नचचित्तशु द्धौशास्त्रेणतदर्थंतथाप्रतिपाद्यत्वंहेतुर्यथाप्रापंचिकचांद्रायणादिभिर्नि- ष्कामतयासंपादितैरपिचित्तशुद्धिरितिवाच्यं, शास्त्रंहिब्रह्मोपासनया- फलंप्रतिपादयति उपास्यस्याब्रह्मत्वेकथंतदुपासनाच्चित्तशुद्ध्यादिक स्यात् । नह्यचांद्रायणंचांद्रायणत्वेनाचरितंफलायालंभवति तस्मादु पास्यस्यब्रह्मत्वमेवश्रुतिसंमतमिति ॥

कर्मधारयपक्षेनयोधनेनषष्ठीतत्पुरुषसंभावनाप्यन्वयमेवाशाम्य ॥ यच्च (अप्रत्यक्षेऽप्यारोपो तलादावध्यासादे) ति—तन्न ; आकाशस्यमनोगोचरत्वेनप्रत्यक्षार्हत्वात् ॥ अन्यथानीलमिदंगगनमितिभ्रमोपिनस्यात् भ्रमस्याधिष्ठानसामान्यज्ञानस्यकारणत्वात् तादृशप्रत्यये गगनस्य विषयतयाऽवगाहनाच्च ॥ आरोपस्यप्रत्यक्षेगुणीत्वमित्येवमारोपेगगनस्तुनीलंगगनमिति ॥ इदंघगगनज्ञानंअनुमित्यादिरूपत्वाभावान्मानसप्रत्यक्षरूपमेवमंतव्यं ॥ विचारपरतारूपेणाप्यारोपोप्रत्यक्षं, अन्यथाऽवकाशोयमिलापभिन्नार्थोनभवेत् ॥ नह्यवकाशोमूर्तातिरेकाऽर्दाशांऽतर्भवितुमर्हतिनपदिश्यंतर्भावः कल्प्यः नीलत्वपाभपित्वाभवकाशात्मनाप्रत्यक्षांगीकारेऽतिरण्डाविवाहन्यायादाकाशस्यैवरर्दगीकियतां वस्तुतश्चाधिकावकाशमन्दिरमहीधरकंदरदरदुंदुभिवीणापणवाद्यवाद्यप्रभृतिषु महाप्रतिनादानुभवादवकाशतारतम्येन तत्तारतम्यानुभवाच्चावकाशआकाशरूपएवसिद्ध्यति नदीरूपः तस्याः शब्दगुणकत्वाभावात् "अनिपनिर्विषच्छन्द" इतितात्पर्यकरत्वंगीकाराच्च ॥ यत्तु (अपरोक्षेऽभिलापनियमेप्रमाणाभावात्स्वर्गाद्यभिलापाभावप्रसंगाच्चे) ति—तन्न ; ज्ञानेप्यभिलापनियमः स्वीक्रियतेनस्वपरोक्षमात्रे ॥ प्रकृतेअवकाशज्ञानंचनानुमितिः हेतोर्व्याप्तिज्ञानपक्षधर्मताज्ञानादेश्चाभावात् ॥ नापिशाब्दं श्रवणाजन्यत्वाच्चक्षुरादिजन्यत्वाच्च नाप्युपमित्यादिरूपं प्रमाणांतराणांप्रत्यक्षादिषुविष्वेतांतर्भावस्यसांख्यपातंजलकाणादादिबहुवादिसंमतत्वात् सादृश्यज्ञानाद्यऽजन्यत्वाच्च ॥ अतःपरिशेषात्प्रत्यक्षमेव ॥ तस्याप्यनंगीकारेतज्ज्ञानत्वादवकाशाद्यभिलापउच्छिद्येतैव ॥ स्वर्गादिकंतुशब्दादिप्रमाणांतरागतमितिनतत्राभिलापोच्छेदः ॥ अत्रसहस्राक्षेऽभिलाप-

---

यत्तु उपासनार्थं धर्मारोपऽप्रत्यौक्तिकम् नहिशालग्रामप्रत्यक्षं यस्मिन्नरूप्यतीधर्म आरोप्यते इत्युक्तम्—तन्न ; प्रत्यक्षारोपेऽधिष्ठानस्य प्रत्यक्षत्वापेक्षायामपि परोक्षारोपे तदभावात् ॥ आरोपस्य प्रत्यक्षत्वनियमे प्रमाणाभावाच्च ॥ अप्रत्यक्षेऽप्याकाशे तलाद्यध्यासाच्च ॥ यत्तु अवकाशरूपेण वस्तुसामर्थ्यादेवतस्य प्रत्यक्षत्वम् अन्यथाऽवकाशाद्यभिलापोच्छेदप्रसङ्गादिति—तन्न, अपरोक्षेऽभिलापनियमे प्रमाणाऽभावात्स्वर्गाद्यभिलापाऽभावप्रसङ्गाच्च ॥ आकाशं साक्षात्करोमीत्यप्रत्ययात् आकाशंनपश्यामीतिप्रत्ययाच्च नाप्युपमानउद्भूतरूपस्य हेतुत्वमितिनियमविरोधाच्च यत्साक्षादपरोक्षाद्ब्रह्म सर्वप्रत्ययवेद्येऽस्मिन्ब्रह्मरूपेण्यवस्थितऽत्यादिश्रुतिस्मृतिभि अस्तिघटः इत्यादिसत्तावगाहिप्रत्यक्षेणच ब्रह्मणः प्रत्यक्षत्वनिश्चयाच्च ॥ पराञ्चिखानिव्यतृणत्स्वयम्भूस्तस्मात् पराङ्पश्यतिनान्तरात्मन्निति निरुपाधिकब्रह्मज्ञानाऽभावंसंसारिणामाह अतएवोत्तरत्र—कश्चिद्धीर प्रत्यगात्मानमैक्षदिति । प्रत्यगात्मदर्शनमेवसाधन विशेषसाध्यमित्याह ॥ यत्तूपहितस्य त्याज्यत्वेन पुत्रादिवत्त्यागापत्तिरिति ॥ तत्तु इष्टापत्त्या परिह्रियते ॥ अतएव नेदंयदिदमुपासते इतिसङ्गतम् ॥ कथंतर्हि तज्ज्ञानेन चित्तशुद्धिरन्यथा प्रायश्चित्तज्ञानेनाऽपि चित्तशुद्धिःस्यादितिचेच्चित्तशुद्धौ भ्रेयस्योपहितत्वाभाव ; प्रयोजकतया स्वीक्रियते प्रमाणाभावात्, किन्तु शास्त्रेण तदर्थतया प्रतिपाद्यत्वं तच्चेदिहाऽस्तितर्हि धर्मेनचित्तशुद्धिः स्यात् शास्त्रप्रतिपाद्यमेवहिफलं कर्मणामुपासनादीनांवक्तुमुचितं नतुयौक्तिकम् ॥ अतएवच प्रायश्चित्तैश्चान्द्रायणादिभिर्निष्कामतया सम्पादितैरपि चित्तशुद्धिरिति सङ्क्षेपः ॥

इतिचकव्येऽभिलापइत्येवमुहुरुक्तिस्तुलेखादिप्रमादः ॥ यत्तु (आकाशंसाक्षात्करोमील्य-
प्रत्ययादि) त्यादितदपिरभसभरं अवकाशंसाक्षात्करोमीतिप्रत्ययात् ॥ अवकाशंनपश्यामी-
त्यप्रत्ययाच्च ॥ सचाकाशानतिरिक्तइत्युक्तंप्राक् ॥ किंच चंद्रिकानिर्मलितमाकाशंपश्यता-
दर्श पश्यामीत्यादिव्यवहारादाकाशप्रत्यक्षमसंदिग्धमेव ॥ अतएवश्रीभागवते (स्कं. १०
अ० १७ वा० २० श्लो० ४४) खं शोभेतनिर्मेघमित्यादौतचाक्षुषंवर्ण्यते शोभायाश्चक्षुर्ग्रा-
ह्यत्वात् । एवंअनार्षग्रंथेप्यपिरामिनजलंजलमिवखं इतिकुवलयानंदस्थोपमेयोपमोदाहरणे ॥
जलमिवाकाशनिर्मलंदृश्यतइतिवर्ण्यते ॥ कालिदासोऽपिरघुवंशे (स० ३ श्लो० १२)
पतिःप्रतीतःप्रसवोन्मुखींप्रियांददर्शकालेदिवमभ्रितामिवेतिगगनचाक्षुषंवर्णयति ॥ घटखर्प-
रोपिस्वखंडकाव्ये–मेघावृतं निशिनभातिनभोवितारं इतितदेवनिरूपयति ॥ मेघावृत-
त्वाद्रात्रौप्रत्यक्षंनभवतीत्युक्त्यातदनावरणेदिवाचप्रत्यक्षंभवतीतिलभ्यते ॥ एवमन्यत्रापि
प्रामाणिकप्रयोगाःप्रेक्षणीयाः ॥ यस्तुचाक्षुषमात्रउद्भूतरूपस्यहेतुत्वमितिनियमउक्तः सन-
संगच्छते; संयोगादिचाक्षुषेकर्मजातिचाक्षुषेचव्यभिचारात् । नचसमवायस्वसमवायिसम-
वायान्यतरसबंधेनरूपवत्त्वंनियामकमितिवाच्यं; समवायानभ्युपगमात् रूपचाक्षुषेव्यभि-
चारानपायाच्च ॥ नचद्रव्यचाक्षुषमात्रंप्रतिहेतुत्वंकल्प्यतइतिवाच्यं; चाक्षुषमात्रइतिस्वो-
क्तिबाधात् तार्किकसंमतद्रव्यव्यवस्थायास्त्वयानिरासाच्च ॥ धूलिपटलाकर्पिचक्रानिलाका-
शादिचाक्षुषेव्यभिचाराच्च ॥ भट्टानुयायिनात्वयातप्रसिद्धव्यतायाः स्वीकारेणतचाक्षुषे-
व्यभिचारोपिविचार्यः, तत्ररूपोद्भवानुद्भवयोर्निर्णयशरणत्वात् अतःपूर्वोक्तप्रतीतिबलेनां-
तरिक्षप्रत्यक्षस्यप्रत्याख्यातुमशक्यतयालाघवान्मूर्तचाक्षुषंप्रत्येवोद्भूतरूपस्यहेतुत्वमास्थीयतां
सामान्यतस्तदुक्तिनियमांगीकारेऽभावचाक्षुषेव्यभिचारोपिमूलेदर्शितः ॥ नचतत्रापिस्वा-
श्रयविशेषणतासबंधेनरूपमस्त्येवेतिवाच्यं; अलग्नचिह्नविशेषणतायाअसंभवात् । अंबरेसु-
दिराणांतिमिरादेश्चाभावचाक्षुषेतेनसबंधेनापिरूपस्याभावाच्च ॥ कथंचित्तत्ररूपसाधनेऽंत-
रिक्षचाक्षुषमप्यक्षुण्णं; अतिरिक्ताभाववादेप्यभावप्रत्यक्षस्याधिकरणप्रत्यक्षापेक्षत्वाच्च ॥
नचनियमशरीरेभावचाक्षुषमात्रइतिकल्प्यं; पूर्वोक्तदोषानपायात् भावनिर्वचनानुपपत्तेः
स्वयमेवतृतीयश्लोकविवरणेभवतावतारणाच्च । तस्मादाकाशंमानसचाक्षुषप्रत्यक्षविषयतायां-
अनपायात्तत्रास्तुमायिकनीलिमादिप्रतीतिर्नतुत्वदभिमतेसर्वथानिर्विशेषेब्रह्मणिविशेषारोपः
कथमप्युपपद्येत ॥ यत्तुयत्साक्षादित्यादिनिश्चयाच्चेत्यंतं तदपिनप्रकृतोपयोगि ॥ दृष्टांतेशा-
खारुंधत्योरुभयोस्तुल्यंप्रत्यक्षम् । किंतुशाखायामरुंधत्यवस्थानाभावेऽपितत्रसाऽऽरोप्यते ॥
प्रकृते चारुंधतीवद्धर्माएवोपासकानां प्रत्यक्षविषयानतुशाखावद्ब्रह्मेतिदोषआपादितेब्रह्मणो-
ज्ञानिप्रत्यक्षताबोधकश्रुत्यादेरनुपयोगःज्ञानिनामारोपकत्वाभावात् ॥ ईक्षणश्रुत्यादेरहमि-
त्यादिप्रत्ययपरत्वादेरपिनब्रह्मणश्चाक्षुषादिविषयतातत सिध्यति । धर्माणांतुतद्विषयत्वंसि-
द्धमतःशाखारुन्धतीवन्नारोपः संभवति ॥ आविर्भावतिरोभावानंतर्भाविनःपक्ष्मावविका-
रान्स्वतंत्रान्मन्यमानस्यतवमतेउत्पत्त्यनंतरंभवन्घटादावस्तीतिप्रत्ययोपिभावविकारतयानब्र-
ह्मप्रत्यक्षसाधकोभविष्यति ॥ यदिचशाखावदारोप्यमाणधर्मवद्वातस्यप्रत्यक्षत्वमेयोक्तश्रुत्या-
दिनाबोध्यत इतिस्रीकुर्यास्तर्ह्यारिमदर्शनस्यस्वतःसिद्धतयातदर्थश्रवणादिसाधनोच्छेदस्तद्वा-

हक्गुरुशास्त्रादीनांवैफल्यंचापद्येत ॥ तथाचायं शावरभाष्यादिप्रसिद्धआभाणकः ॥ अर्के
चेन्मधुविंदेतकिमर्थंपर्वतंव्रजेत् । इष्टस्यार्थस्यसंसिद्धौकोविद्वान्यत्नमाचरेदिति ॥ अर्कंचे-
दितिपाठेअर्कोग्रहकोणइतियदंति ॥ एवंचसाक्षात्कारफलकोपासनानामप्यनुपयोगात्कृतं-
तदर्थंधर्मारोपइतिकल्पनयाऽपि ॥ किंचब्रह्मणःसर्वप्रत्यक्षत्वेऽधोक्षजशब्दव्याकोपः "परा-
ञ्चिखानिव्यतृणत्स्वयंभूस्तस्मात्पराङ्पश्यतिनांतरात्मन्" इतिकठतुर्यवल्लीस्थवाक्यविरोध-
श्चस्यात् ॥ तदर्थस्तुखानींद्रियाणिपराञ्चिपराक्प्रत्यंचितिगच्छंतीतिपराञ्चि ॥ यतःस्वयंभूः
परमेश्वरः व्यतृणत् स्वसाक्षात्कारशक्तिहरणेनतानिहिंसितवान् ॥ तस्मात् पराङ्बहिःप्रापं-
चिकविशेषानेवजीवस्तैःपश्यति ॥ नअंतरात्मन् परमेश्वरेस्थितविशेषांस्तदभिन्नान्पश्यतिन
संदृशइत्यादिश्रुत्यंतरैस्तस्यादृश्यत्वात्॥ अंतरात्मन्परमात्मानमेवनपश्यतीत्यन्ये। एवंचतद्ध-
र्माणामारोपितत्वंतस्यनाशावत्प्रत्यक्षत्वंचेत्युभयमपिविरुद्धम् ॥ अतएव "कश्चिद्धीरःप्रत्य-
गात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्" इतितदुत्तरार्द्धेकश्चिद्दुर्लभःधीरःयोगादिसाधन-
दुःखंसोढानदीःप्रतिस्रोतोवाहयितुमिवेंद्रियाण्यंतर्मुखानिकर्तुंसमर्थःप्रत्यगात्मानंवल्लीत्रयो-
क्तंपरंब्रह्मऐक्षत् प्रागीक्षितवान् इदानींचेक्षते ॥ यआवृत्तचक्षुःपुनःप्राप्तभगवदनुभवशक्ति-
कत्वादलौकिकचक्षुष्कःभगवत्प्रवेशलक्षणमोक्षंचेच्छन् इतिसर्वप्रत्यक्षाविषयत्वमेवदृढी-
क्रियते ॥ अत्रप्रत्यगात्मपदस्यनिरुपाधिकब्रह्मपरत्वेत्वावृत्तचक्षुरीक्षणीयतयासविशेषत्वा-
पत्तिः, त्वन्मतेदर्शनातिरिक्तमोक्षाभावात्तदीक्षकस्यामृतत्वेच्छाविरोधश्चस्यात् । किंच-
शाखायामिवारोपोनिरुपाधिकब्रह्मण्येवोपाधिभूतधर्माणांत्वयावाच्योनतुसोपाधिके; अना-
रोपितोपाधेरेवासंभवात् । यदिचोपासनाधिकारिणांसंसारिणांनिरुपाधिकमप्रत्यक्षंतदोक्त-
दोषस्तदवस्थएव; 'मन्नर्तिंलभतेपरां आत्मारामाश्चमुनय'इत्यादिमानसिद्धायाज्ञानोत्तरपर-
भक्तेस्त्वयाऽनंगीकारेणतत्साक्षात्कारिणांज्ञानिनामुपासनानुपयोगात् उपासनापेक्षाणांसा-
क्षात्काराभावाच्च ॥ एवंचोपासनाएवनिर्विशेषवादे उच्छिद्येरन् । एतेनपरांचिखानीत्यादि-
साध्यमित्याहेत्यंतंनिरस्तं ॥ यच्चयत्तूपहितस्येत्यादि इति संगतमित्यंतंतदप्यसंगतं; तथा-
सतिपुत्रादिदिवेश्वरेपिवैराग्यमेवमुमुक्षोःकर्तव्यतयात्वन्मतउपदिश्येत, नतूपासनाध्याना-
दयः ॥ नचतत्त्वमस्यादिनातस्यहेयत्वसिद्धिःशंक्या; तत्रभागत्यागांगीकारादुपाधिमात्रस्य-
त्यागसिद्धेर्विशिष्टस्यत्यागासिद्धेश्च ॥ अतएवचंद्रवन्निर्गुणस्यज्ञानायशाखावदर्शितमुपहितं-
विशिष्टेनत्याज्यतइतितस्मिन्संशोदीयमानःशाखाचंद्रदृष्टांतोपिमहावाक्यविरुद्धः ॥ प्रसह्यत-
स्यहेयत्वांगीकारेहेयत्वावचनाच्चेतिसूत्रव्याकोपः ॥ नापिपुत्रैषणावित्तैषणादेरिवेश्वरैष-
णायाअपित्यागबोधकंकिंचिदपिवाक्यमस्ति ॥ यदिक्वापिवेदेएतादृशार्थकंवाक्यमभ-
विष्यत्तर्हिसर्ववेदज्ञआचार्यस्तथासूत्रयिष्यत् ॥ "तदेवब्रह्मत्वंविद्धिनेदंयदिदमुपासते"
इतितलवकारवाक्यस्यतुतत् निर्विशेषमेवब्रह्मत्वंजानीहि नेदं यत् उपासका उपासत
इत्यर्थोनभवति तच्छब्देननिर्विशेषपरामर्शायोगात् ॥ किंतु "यद्वाचानभ्युदितंयेन
वागभ्युद्यते" इत्यादौ "यत्प्राणेननप्राणितियेनप्राणःप्रणीयते" इत्यंतेपूर्वार्धपंचकेयच्छब्द-
द्वयेनोक्तमेवतदापरामृश्यते ॥ तच्चवागादींद्रियवलागम्यंवाङ्मनश्चक्षुःश्रोत्रप्राणानपेक्षतया-
ऽभिवादनमननदर्शनश्रवणप्राणनकर्तृ वाङ्मनआदिकर्मकाभिवदनमननादिकर्तृसर्वप्रेरकं

चसविशेषमेवपूर्वमुक्तं ॥ अतःप्रथमेदंशब्देनसंनिकृष्टस्यवागादेःप्रेर्यस्यैवपरामर्शउचितोन तुशबलस्य अप्रकृतत्वात् ॥ तावकार्येचद्वितीयमिदंशब्देनेत्यमूयादतोमूलोक्तएववास्यार्थः उपास्यस्याब्रह्मत्वेचतदुपासनध्यानादिनाचित्तशुद्धिर्नस्यात् उपहितत्वस्यमायिकत्वात् ॥ अथमायिकस्यापितस्योपहितत्वाभावश्चित्तशुद्धावप्रयोजकश्चेन्मायिकविशेषयुक्तपुत्राद्युपासनध्यानादिनापिसाकुतोनस्यात् अधिष्ठानस्यशुद्धस्योभयत्रतौल्यात् ॥ मायिकविशेषाणांमोहकत्वमितिचेत्तदप्युभयत्रतुल्यं ॥ अथाविशेषेपिशास्त्रबलात्तदुपासनादितः फलंचांद्रायणादितइवेतिचेच्चांद्रायणादिफलप्रदस्त्वीश्वरएवफलमतइतिन्यायात् ॥ नतुजडंचांद्रायणादिकं तद्विधायकशास्त्रंवास्वतःफलंसमर्पयति ॥ उपहितस्यापिमिथ्यात्वेतदुपासनादिफलंक.समर्पयेत् ? नतावदीश्वरः, अब्रह्मत्वात् ॥ नापिस्वयमेवोपासनादिकं, उक्ताधिकरणविरोधात् ॥ अतःकथंचित्तशुद्धिःस्यात् ॥ किंचशास्त्रंब्रह्मोपासनात्एवफलंबोधयति "तन्महइत्युपासीत महान्भवती" त्यादौनत्वब्रह्मोपासनया ॥ नह्यचांद्रायणंचांद्रायणतया आचरितंनिष्काममपिचित्तशुद्धिहेतुर्भवति । अस्माकंतुचांद्रायणादिकमपिब्रह्मरूपमेवनतुमायिकमितिनास्मान्प्रतितथावक्तव्यं, किंच "तंयथायथोपासतेतदेवभवति" इतिबृहदारण्यकादिषुब्रह्मणएवतत्तदुपास्यरूपभावःश्रूयतेऽतोप्युपास्यस्यनाब्रह्मत्वं ॥ एतेनकथंतर्हीत्यादिसक्षेपइत्यंतमपास्तम् ॥

यत्तुपाण्याद्यभावे आनंदमात्रपाण्याद्यभावःकैमुतिकन्यायसिद्धइत्यादिप्रलपितं, तत्तु पूर्वोक्तश्रुतिस्मृतिविरोधादुपेक्ष्यं; श्रुतेर्मायिककरादिप्रतिपादनपरत्वंतु पूर्वमेवनिरस्तं तस्मात्ताद्दशश्रुतिभिःसर्वविरुद्धधर्माश्रयत्वेनालौकिकत्वं ब्रह्मणिप्रतिपाद्यते । तथाचश्रुतयः– "अपाणिपादोजवनोग्रहीतापश्यत्यचक्षुःसशृणोत्यकर्णः।अशरीरंशरीरेष्वनवस्थेष्ववस्थितं । महांतंविभुमात्मानंमत्वाधीरोनशोचति ॥ अनेजदेकंमनसोजवीयोतद्धावतोऽन्यानत्येतितिष्ठत् इत्याद्याः ॥

सहस्राक्षे विपक्षेबाधकमित्यादिंनेतीत्यादिश्रुतिभ्यइत्यंतं भागंनिराकुर्वंति । यत्तु पाण्याद्यभावइत्यादिनातिष्ठदित्याद्यइत्यंतेन ॥ अयमर्थः–खंडयश्लोके यत् (नहिसुखं सस्थानवद्दृश्यते) इतिब्रह्मणआनंदाकारत्वेबाधकमुक्तं–तन्न; प्राक्समर्थितायाः श्रुत्यादिसमतायास्तस्यानंदमूर्तितायालौकिकप्रत्यक्षविरोधमात्रेणबाधस्यायोगात् ॥ अन्यथा लोकेनिर्विषयंनिष्कारणंनिरधिकरणंचज्ञानंनदृष्टमितिज्ञानरूपस्यब्रह्मणोऽपिसविषयत्वजन्यत्वस्वातिरिक्ताधिकरणवृत्तित्वादिकंदुर्वारंस्यात् ॥ किंच सुखमपिलोकेजडंस्वातिरिक्ताधिकरणकमंत करणेनोपलभ्यमानंचदृष्टमितिब्रह्मणिसुखरूपत्वांगीकारेतथात्वमनपनोद्यंभवेत्॥ शास्त्रसिद्धस्यनबाध.केवलयुक्त्याशक्यइतिचेत्तत्सिद्धाऽऽनंदाकारतापिनवारणीया ॥ किंच दशमस्कंधेअक्रूरस्तुतौ (अ० ४० श्लो० २९) नमोविज्ञानमात्रायसर्वप्रत्ययहेतवे । पुरुषेशप्रधानायब्रह्मणेऽनंतशक्तये ॥ इत्यत्र "विज्ञानमेवमात्रामूर्तिर्यस्यतस्मै अतएवसर्वप्रत्ययहेतवे समस्तज्ञानकारणाय" इतिव्याचक्षाणेन श्रीधरस्वामिनाप्यक्रूरदृष्टायामूर्तेर्ज्ञानात्मकत्वंव्यक्तमुक्तं॥ अलौकिकेब्रह्मणिज्ञानस्यसस्थानवत्त्वेसत्यानंदस्यापितत्कुतोनस्यात् ॥

अधिकंतु साधितमधस्तात्–यत्तुपाण्याद्यभावेइत्यादि बोधयंतीत्यंतं सदप्यविचारचारु ॥ अरंभाद्यजंतमप्यंगशब्दमंगीकृत्यान्वयिनोऽप्यभावंवदन् किं महाभावंवक्तुमुद्यतोसि ? ॥ अथभावप्रधानः सइतिचेदवयवाभावादेवतदभावः सिद्धेत् । अवयव्यभावबोधकस्तु शब्दोपिनस्तुतोनालीतिकस्ततः प्रस्तुतेऽर्थः ॥ यानिचनिषेधवाक्यानियान्युक्तानितेपुलौकिकानां पांचभौतिकानां स्वप्रेरकमिश्रानामेवतेषांप्रतिषेधः सामान्यतः पाणिपादशब्दोच्चारणे तेषामेवलोकदृष्टानामुपस्थितेः ॥ लौकिकानामेवनिषेधइति तुलवापिसंमतं ॥ स्वन्मतेतेषामलौकिकानामेवाभावात् ॥ विधीयमानानित्वलौकिकान्येव ॥ यन्नलोकेभवंननालोके दृष्टंतत्तदलौकिकं ॥ नहिलोकेक्वापिकोपिचेतनोविश्वतश्चक्षुर्विश्वतोमुखः सर्वतः पाणिपादांतो वाव्यालोकितः ॥ ननुतथापिसर्वथालोकविरुद्धं बुद्धिंकथंकारमारोहतु यद्ब्रह्मणः सर्वत्रैव पाणिपादादिसर्वाकारवैशिष्ट्यमितिचेदुच्यते ॥ व्यापकेब्रह्मणि शतेपंचाशदादिन्यायेनसर्वाकारशालितानविरुद्धा ॥ यथाशते तन्न्यूनानन्नवतिपर्यंताः सर्वाअपिसंख्यानिविशंते । तथा व्यापकेस्वाभाविकसर्वधर्माश्रयेब्रह्मणि सर्वाण्यपिपरिमाणानि तत्तत्परिमाणकाः सर्वेप्याकाराश्चस्वाभाविकाः समाविशंत्येव ॥ अतोयउपासकोयदा यामाकृतिभावयति तदातामेवाकृतिमभिव्यक्तीकृत्य तस्समीपंनयति; तंयथायथेतिश्रुतेः येयथामांप्रपद्यंतेतांस्तथैवभजाम्यहमितिभगवद्वाक्यात् ॥ (स्कंध ३ अ० ९ श्लोक ११) यद्यद्धियातउरगायविभावयंति तत्तद्वपुःप्रणयसेसदनुग्रहायेति तृतीयस्कंधनवमाध्यायेब्रह्मस्तुतौ कथनाच्च ॥ अतएवानंतरूपश्रुतिः ससर्वनामासचसर्वरूपः । अनंतरूपोनंतश्रीर्जितमन्युर्भयापहः । नमोस्त्वनंताय सहस्रमूर्तये इत्यादिकंचसंगच्छते ॥ दृश्यंतेचलोकेपिकतिचिद्वस्तूनिसर्वंत.सर्वाकाराणि महाशिलामहादारुप्रभृतीनि ॥ तद्यथा–महाशिलायांगवाश्वगजाद्य सर्वेऽप्याकाराःसर्वत्र सति ॥ अतएवयस्मात्तदंशाद्भवाकृतिकारुरुद्दिधीर्षति, तर्हिभागांतरापसारणेनतामेवततोऽभिव्यनक्ति ॥ यदिचाश्वाकृतिंयदिचगजाकृतिमितरांवायांयामुद्दिधीर्षतितांतामेवशक्नोतितत एवोद्धर्तुं ॥ एवंदारुविषाणादावप्यवधेयं ॥ नचकारुणानिर्मितासानतत्रपूर्वमासीदितिशंक्यं; धातुरसेनेवसजलमृदादिचूर्णेनेववातत्रगवाद्याकृतेर्निर्माणस्याभावात् ॥ किंतुशिलायाअंशांतरापसारणेनकारणेस्थितैवसाततोऽभिव्यक्तैवक्रियते अतोभिव्यंजनमात्रेतत्रपुरुषव्यापारोपसारणरूपोनतुनिर्माणम् ॥ तस्मात्संतिशिलादिषुसर्वत्रैवसर्वेऽप्याकारास्तदापरमेश्वरेकुतो-

---

विपक्षेबाधकमाह–यतोनहीति ॥ पाण्याद्यभावे आनन्दमात्रपाण्याद्यभाव· कैमुतिक· न्यायसिद्धइत्यभिप्रेत्याऽङ्गाऽभावमेवाहाङ्गाभावगिरइति ॥ शुद्धाऽङ्गशब्दस्याऽर्शआद्यजन्ताङ्गशब्देनैकशेषेऽभावशब्देनसमासः ॥ तेनावयवावयव्यभावबोधकशब्देभ्यइत्यर्थः ॥ तथाहि– अपाणिपादोजवनोग्रहीतापश्यत्यचक्षुःसशृणोत्यकर्णः । अचक्षुष्कमश्रोत्रमवाङ्मनोऽतेजस्कमप्राणम् अशरीरंशरीरेषु अप्राणोह्यमनाःशुभ्र नतस्यकार्यंकरणंचविद्यते इत्याद्या श्रुतयस्तदभावंबोधयन्ति ॥ अङ्गाऽभावः सर्वविशेषाभावोपलक्षकः ॥ निष्कलंनिष्क्रियंशान्तं नचक्षुषागृह्यतेनापिवाचा यन्मनसानमनुते अनेजदेकम् । नेहनानास्तिकिंचन नेतिनेतीत्यादिश्रुतिभ्यः ॥

चसविशेषमेवपूर्वमुक्तं ॥ अतःप्रथमेदंशब्देनसंनिकृष्टस्यनागादेःप्रमेयस्यैनपरामर्शोऽचितोन तुदायत्नस्य अप्रकृतत्वात् ॥ तात्कार्येचद्वितीयमिदंशब्देनब्रूयादतोमूलोक्तएवार्थः उपास्यस्याब्रह्मत्वेचतदुपासनध्यानादिनाचित्तशुद्धिर्नस्यात् उपहितस्यमायिकत्वात् ॥ अथमायिकस्यापितस्योपहितत्वाभावश्चित्तशुद्ध्यप्रयोजकश्चेन्मायिकविशेषयुक्तपुत्राद्युपासनध्यानादिनापिसाकुतोनस्यात् अधिष्ठानस्यशुद्धस्योभयप्रतीत्यात् ॥ मायिकविशेषाणांमोहकत्वमितिचेत्तदप्युभयत्रतुल्यं ॥ अथाविशेषेपिशास्त्रबलात्तदुपासनादितः फलंचांद्रायणादित इवेतिचेच्चांद्रायणादिफलप्रदस्त्वीश्वरएवफलमतइतिन्यायात् ॥ नतुजडंचांद्रायणादिकं तद्विधायकशास्त्रंवास्वतःफलंसमर्पयति ॥ उपहितस्यापिमिथ्यात्वेतदुपासनादिफलंकःसमर्पयेत् ? नतावदीश्वरः, अप्रकृतत्वात् ॥ नापिस्वयमेवोपासनादिकं, उक्ताधिकरणविरोधात् ॥ अतःकथंचित्तशुद्धिःस्यात् ॥ किंचशास्त्रंब्रह्मोपासनातएवफलंबोधयति "तन्महइत्युपासीत महान्भवती" त्यादीनत्वब्रह्मोपासनया ॥ नह्यचांद्रायणंचांद्रायणतया आचरितंनिष्काममपिचित्तशुद्धिहेतुर्भवति। अस्माकंतुचांद्रायणादिकमपिब्रह्मरूपमेवनतुमायिकमितिनास्मान्प्रतितथात्वकथ्यं, किंच "तंयथायथोपासतेतदेवभवति" इतिबृहदारण्यकादिषुब्रह्मणएवतत्तदुपास्यरूपभावःश्रूयतेऽतोप्युपास्यस्यनाब्रह्मत्वं ॥ एतेनकथंतर्हीत्यादिसंक्षेपइत्यंतमपास्तम् ॥

यत्तुपाण्याद्यभावे आनंदमात्रपाण्याद्यभावःकैमुतिकन्यायसिद्ध इत्यादिप्रलपितं, तत्तु पूर्वोक्तश्रुतिस्मृतिविरोधादुपेक्ष्यं; श्रुतेर्मायिककरादिप्रतिपादनपरत्वंतु पूर्वमेवनिरस्तं तस्मात्तादृशश्रुतिभिःसर्वविरुद्धधर्माश्रयत्वेनालौकिकत्वं ब्रह्मणिप्रतिपाद्यते। तथाचश्रुतयः– "अपाणिपादोजवनोग्रहीतापश्यत्यचक्षुःसशृणोत्यकर्णः।अशरीरंशरीरेष्वनवस्थेष्ववस्थितं । महांतंविभुमात्मानंमत्वाधीरोनशोचति ॥ अनेजदेकंमनसोजवीयोतद्धावतोऽन्यानत्येतितिष्ठत् इत्याद्याः ॥

सहस्राक्षे विपक्षेबाधकमित्यादिनेतीत्यादिश्रुतिभ्यइत्यंतं भागंनिराकुर्वंति । यत्तु पाण्याद्यभावइत्यादिनातिष्ठदित्याद्याइत्यंतेन ॥ अयमर्थः–एंकव्यश्लोके यत् (नहिसुखं संस्थानवदृश्यते) इतिब्रह्मणआनंदाकारत्वेबाधकमुक्तं–तन्न; प्राक्समर्थितायाः श्रुत्यादिसंमतायास्तस्यानंदमूर्तितायालौकिकप्रत्यक्षविरोधमात्रेणबाधस्यायोगात् ॥ अन्यथा लोकेनिर्विषयंनिष्कारणंनिरधिकरणंचज्ञानंनदृष्टमितिज्ञानरूपस्यब्रह्मणोऽपिसविषयत्वजन्यत्वस्वातिरिक्ताधिकरणवृत्तित्वादिकंदुर्वारंस्यात् ॥ किंच सुखमपिलोकेजडंस्वातिरिक्ताधिकरणकमंतःकरणेनोपलभ्यमानंचदृष्टमितिब्रह्मणिसुखरूपत्वांगीकारेतथात्वमनपनोद्यंभवेत्॥ शास्त्रसिद्धस्यनबाधःकेवलयुक्त्याशक्यइतिचेत्तत्सिद्धाऽऽनंदाकारतापिनवारणीया ॥ किंच दशमस्कंधेअक्रूरस्तुतौ (अ० ४० श्लो० २९) नमोविज्ञानमात्रायसर्वप्रत्ययहेतवे । पुरुषेशप्रधानायब्रह्मणेऽनंतशक्तये ॥ इत्यत्र "विज्ञानमेवमात्रामूर्तिर्यस्यतस्मै अतएवसर्वप्रत्ययहेतवे समस्तज्ञानकारणाय" इतिव्याचक्षाणेन श्रीधरस्वामिनाप्यक्रूरदृष्टायामूर्तेर्ज्ञानात्मकत्वंव्यक्तमुक्तं ॥ अलौकिकेब्रह्मणिज्ञानस्यसंस्थानवत्त्वेसत्यानंदस्यापितत्कुतोनस्यात् ॥

अधिकंतु साधितमधस्तात्—यत्तुपाण्याद्यभावेइत्यादि बोधयंतीत्यंतं तदप्यविचारचारु ॥ अर्शआद्यजंतमप्यंगशब्दमंगीकृत्यानयविनोऽप्यभावंवदन् किं ब्रह्माभावंकर्तुमुद्यतोसि ? ॥ अथभावप्रधानः सइतिचेदवयवाभावादेवतदभावः सिद्ध्येत् । अवयव्यभावबोधकस्तु शब्दोपिप्रस्तुतोनास्तीतिकस्ततः प्रस्तुतेऽर्थः ॥ यानिचनिषेधकानिवाक्यान्युक्तानितेषुलौकिकानां पांचभौतिकानां स्वप्रेरकभिन्नानामेवतेषांप्रतिषेधः सामान्यतः पाणिपादशब्दोच्चारणे तेषामेवलोकदृष्टानामुपस्थितेः ॥ लौकिकानामेवनिषेधइति तुतत्रापिसम्मतं ॥ स्वन्मतेतेषामलौकिकानामेवाभावात् ॥ विधीयमानानित्वलौकिकान्येव ॥ यन्नलोकेभवंनत्वालोके दृष्टंतदलौकिकं ॥ नहिलोकेथापिकोपिचेतनोविश्वतश्चक्षुर्विश्वतोमुखः सर्वतः पाणिपादांतो वाप्यालोकितः ॥ ननुतथापिसर्वथालोकविरुद्धं बुद्धिंकथंकारमारोहतु यद्ब्रह्मणः सर्वत्रैव पाणिपादादिसर्वाकारवैशिष्ट्यमितिचेदुच्यते ॥ व्यापकेब्रह्मणि शतेपंचाशदादिन्यायेनसर्वाकारशालितानविरुद्धा ॥ यथाशते तन्न्यूनानवनवतिपर्यंताः सर्वाअपिसंख्यानिविशंते । तथा व्यापकेस्वाभाविकसर्वधर्माश्रयेब्रह्मणि सर्वाण्यपिपरिमाणानि तत्तत्परिमाणकाः सर्वेप्याकाराश्चस्वाभाविकाः समाविशंत्येव ॥ अतोयउपासकोयदा यामाकृतिंभावयति तदातामेवाकृतिमभिव्यक्तीकृत्य तत्समीपंनयति; तंयथायथेतिश्रुतेः येयथामांप्रपद्यंतेतांस्तथैवभजाम्यहमितिभगवद्वाक्यात् ॥ (स्कंध ३ अ० ९ श्लोक ११) यद्यद्धियातउरुगायविभावयंति तत्तद्वपुःप्रणयसेसदनुग्रहायेति तृतीयस्कंधनवमाध्यायेब्रह्मस्तुतौ कथनाच्च ॥ अतएवानंतरूपश्रुतिः ससर्वनामासचसर्वरूपः । अनंतरूपोनंतश्रीर्जितमन्युर्भयापहः । नमोस्त्वनंताय सहस्रमूर्तये इत्यादिकंचसंगच्छते ॥ दृश्यंतेचलोकेपिकतिचिद्वस्तूनिसर्वत.सर्वाकाराणि महाशिलामहादारुप्रभृतीनि ॥ तद्यथा—महाशिलायांगवाश्वगजादय सर्वेऽप्याकाराःसर्वत्र संति ॥ अतएवयस्मात्तद्देशाद्गवाकृतिंकारुरुद्दिधीर्षति, तर्हिभागांतरापसारणेनतामेवततोऽभिव्यनक्ति ॥ यदिचाश्वाकृतिंयदिचगजाकृतिमितरांवायांयामुद्दिधीर्षतितांतामेवशक्नोतितत एवोद्धर्तुं ॥ एवंदारुविषाणादावप्यवधेयं ॥ नचकारुणानिर्मितासानतत्रपूर्वमासीदितिशंक्यं; धातुरसेनेवसजलमृदादिचूर्णेनेववातत्रगवाद्याकृतेर्निर्माणस्याभावात् ॥ किंतुशिलायाअंशांतरापसारणेनकारणेस्थितैवसातत्तोऽभिव्यक्तैवक्रियते अतोभिव्यंजनमात्रेतत्रपुरुषव्यापारोपसारणरूपोनतुनिर्माणम् ॥ तस्मात्संतिशिलादिषुसर्वत्रैवसर्वेऽप्याकारास्तदापरमेश्वरेकुतो-

---

विपक्षेबाधकमाह—यतोनहीति ॥ पाण्याद्यभावे आनन्दमात्रपाण्याद्यभाव कैमुतिकन्यायसिद्धइत्यभिप्रेत्याऽङ्गाऽभावमेवाहाङ्गाभावगिरइति ॥ शुद्धाऽङ्गशब्दस्याऽर्शआद्यजन्ताङ्गशब्देनैकशेषेऽभावशब्देनसमासः ॥ तेनावयवावयव्यभावबोधकशब्देभ्यइत्यर्थः ॥ तथाहि—अपाणिपादोजवनोग्रहीतापश्यत्यचक्षुःसशृणोत्यकर्णः । अचक्षुष्कमश्रोत्रमवाङ्मनोऽतेजस्कमप्राणम् अशरीरंशरीरेषु अप्राणोह्यमनाःशुभ्र नतस्यकार्यंकरणंचविद्यते इत्याद्या श्रुतयस्तदभावंबोधयन्ति ॥ अङ्गाऽभाव. सर्वविशेषाभावोपलक्षकः ॥ निष्कलंनिष्क्रियंशान्तं नचक्षुषागृह्यतेनापिवाचा यन्मनसानमनुते अनेजदेकम् । नेहनानास्तिकिञ्चन नेतिनेतीत्यादिश्रुतिभ्यः ॥

नतेस्यु ॥ इयांस्तुविशेष प्रस्तरादेर्जडस्यादित्वराभिव्यजकापेक्षा भगवांस्तुज्ञानघन सर्व-शक्तिरभिव्यनक्तिभक्तिमतामभिमतान्स्वयमेवतान्स्वाकारानिति ॥ भगवत सर्वत्र स्वाभाविकसर्वाकारताज्ञापनायैवनृसिंहावतारेर्भभादाविर्भावेयुगपदुभयाकारधारणच ॥ एतदेवाभिप्रेत्योक्तश्रीमत्सुधीमदाचार्यचरणै ॥ महानुभाव साकार सर्वाकारप्रमाण-भूरिति ॥ एवच स्वाभाविकसर्वाकारशालितया अपाणिपादइतिश्वेताश्वतरवाक्यस्याति-रिक्तपाणिपादादिराहित्येऽपितदनपेक्षसार्थक्रियाकगमनादानादिस्वाभाविकसर्वकर्मत्वबोधक ॥ अतएव सर्वकर्मेतिशाण्डिल्यविद्याश्रुति ॥ ननुनिर्विशेषतासाधयितुतदीष्टे जगनत्वादिविरो-धात् शबलपरत्वेपाण्यादिनिषेधायोगाच्च ॥ किंच निर्विशेषपरत्वे एतदुत्तरार्द्धे "सवेत्तिवेद्य" इतिबाध्येत, वेद्यस्यजगतोविवर्तरूपतयातस्य तज्ज्ञानायोगात् ॥ शबलपरत्वेतु "नचत-स्यवेत्ता" इतिपीड्येत, तस्याप्यवेदने उपासनाऽसभवापातात निर्विशेषेऽनेनपाण्यादेर्नि षेधस्यासिद्धेश्च अरूपवत्सूत्रविचारेप्रागुक्त सर्वकर्मेतिश्रुत्यर्थस्त्वेकदेशिवादर्यादुलोमिकाश-कृत्स्नादिसमतोनतुव्यासाभिप्रेत । सिद्धातेनुस्वभावत सर्वाणिकर्माणियत्रेत्यर्थस्तत्रैवाभि-माधिकरणेपुदर्शित ॥ यच्च बृहदारण्यकपचमाध्यायाष्टमब्राह्मणस्थमचक्षुष्कमश्रोत्रमित्या-दिवाक्यमुक्त तदपि लोकवदतिरिक्तभौतिकचक्षुरादिनिषेधक उक्तयुक्ते ॥ ननुनिर्विशेष तासाधक तत्रैवाग्रेसूर्यचद्राकाशभूमिसर्वकालनद्यादिप्रशासकत्वादीनलौकिकविशेषानुक्त्वा समासौ "तद्वाएतदक्षरगार्ग्यदृष्टद्रष्ट्रश्रुतश्रोत्रमतमतृ" इत्यादिनाऽतिरिक्तचक्षु-श्रोत्रादिनिरपेक्षद्रष्टृत्वश्रोतृत्वाद्यलौकिकधर्माणामाकाशोपादानतायाश्चकथनात् ॥ अस्थू लादिवाक्यमधिकरणप्रेचिंतयिष्याम ॥ कठद्वितीयवल्लीस्थ "अशरीरशरीरेष्वनवस्थेष्वव-स्थित। महातविभुमात्मान मत्वाधीरोनशोचति" इतिवाक्यमपिस्वातिरिक्तानवस्थभौतिक-शरीरमात्रनिषेधक नतुस्वाभिन्नाकाराभावसाधक अनन्तरूपश्रुते । छादोग्यतैत्तिरीयादिषु "मनोमय प्राणशरीरोभारूप सत्यसकल्पआकाशात्मा ॥ आकाशशरीरब्रह्म" इत्यादि-श्रवणाच्च ॥ नापिनिराकारत्वतत सिध्यति अशरीरवाक्यात्पूर्वं "अणोरणीयान्महतोम हीयान् ॥ आसीनोदूरव्रजति" इत्यादिश्रवणात् ॥ अव्यवहितोत्तरऋचि "तस्यैपआत्मा वृणुतेतनूस्वा" इतितनुमत्वश्रवणात् । अग्रेब्रह्मसूत्रभोगाम्नानाच्च ॥ "अप्राणो ह्यमना शुभ्रोह्यक्षरात्परत पर" इतिद्वितीयमुण्डकप्रथमखण्डवाक्यमपिजीववत्कार्यरूपप्राणमनआदि वैशिष्ट्यतस्यनिषेधति अव्यवहितोत्तरर्चि "एतस्माज्जायतेप्राणोमन सर्वेंद्रियाणिच" इति प्राणादीनातत्कार्यत्वकथनेनतस्यतादृशप्राणादिमत्तानुपपत्ते ॥ नतुसर्वथानिर्विशेषतापर पूर्वोत्तरमत्रयो कर्तृत्वादिश्रावणात् उत्तरमत्रादग्रिमएवमत्रे "अग्निमूर्द्धाचक्षुषीचद्रसूर्यौ दिश श्रोत्रेवाग्विवृताश्चवेदा । वायु प्राणोहृदयविश्वमस्यपद्भ्यापृथिवीह्येपसर्वभूतातरात्मा" इतिरूपोपन्यासाच्च ॥ नचारोपिततद्दितिवाच्य, औपचारिकस्यप्रकृत्यादावपिसभवेन अदृश्य त्वाधिकरणविरोधापातात ॥ नतस्यकार्यमितिश्वेताश्वतरवाक्यतु भिन्नकार्यस्यजीववत्कर्तव्य-स्यचतद्वदिंद्रियादेश्चनिवारकमितिनिर्णीतमाक् ॥ एतेनैव (अभाव सर्वविशेषाभावोप लक्षक) इत्यपास्त ॥ निष्कलनिष्क्रियमितिबृहदारण्यकवाक्यतु लोकवदिंद्रियादिपरतत्र-त्वाप्रतिषेधक निरवद्यत्वनिरजनत्वाभ्यात्तत्रैवसेतुत्वादिकथनाच्च ॥ निष्क्रियमितित्वशुद्ध ॥

"नचक्षुषागृह्यतेनापिवाचानान्यैर्देवैस्तपसाकर्मणावा" इतितृतीयमुंडकप्रथमखंडवाक्यमपितपःकर्मसाहचर्यादास्मदादिचक्षुरादियत्नेनाग्राह्यत्वपरं नतुनिर्विशेषतासाधकं ॥ तदुत्तरार्द्धएव "ज्ञानप्रसादेनविशुद्धसत्वस्ततस्तुतंपश्यतेनिष्कलंध्यायमानः" इतिज्ञानिनोध्येयत्वदृश्यत्वकथनात् तत्रपूर्वोत्तरभागेरुक्मवर्णत्वकर्तृत्वादिबहुलौकिकविशेषश्रवणाच्च ॥ यन्मनसेतितलवकारवाक्यंतु ब्रह्मकेवलमनोयत्नेनमंतुमशक्यं मननेजीववदतिरिक्तमनःसाहाय्यानपेक्षंवाब्रह्मेत्यर्थकमितिसूचितंप्राक् ॥ "अनेजदेकंमनसोजवीयोनैनद्देवाआप्नुवन्पूर्वमर्शत् । तद्धावतोऽन्यानत्येतितिष्ठत्तस्मिन्नपोमातरिश्वादधाति ॥ तदेजतितन्नैजतितद्दूरेतद्वन्तिके" इतीशावास्यवाक्यंब्रह्मणिसर्वविरुद्धमाश्रयताबोधकं अनेजनातिजवीयस्त्वादेरन्योन्यविरुद्धत्वात् ॥ नतुनिर्विशेषतापरंस्पष्टमलौकिकधर्माभिधानात् ॥ ननुधर्माणांविरुद्धत्वंहियुगपदेकाधिकरणावृत्तित्वं तथासति ब्रह्मणिकथंतत्सामानाधिकरण्यमिति चेत् लोकदृष्ट्यैवविरुद्धानांधर्माणामाश्रयःसइतिजानीहि ॥ दृश्यतेहिकार्येष्वितरेतरव्यधिकरणतयादृष्टानामपिधर्माणांकारणेसामानाधिकरण्यं । यथालवणसितापक्वापक्वकंदर्पिचुमंदफलादिषुक्षारमधुराम्लतिक्तादेरेकैकस्यैवसत्वेनपरस्परवैयधिकरण्येऽपि पृथिव्यांतेषांसर्वेषां कार्यदृष्ट्याविरुद्धानामपि युगपदेकाधिकरण्यं ॥ तथाजीवजडादिवृत्तेरन्योन्यविरुद्धस्याऽप्येजनानेजनादेर्ब्रह्मण्यविरोधमवधारयेतिसंक्षेपः कठवल्लीषुचतुर्थवल्लीस्थाया "यदेवेहतदमुत्रयदमुत्रतदन्विह । मृत्योःसमृत्युमाप्नोतियइहनानेवपश्यति । मनसैवेदमाप्तव्यं नेहनानास्तिकिंचन । मृत्योःसमृत्युंगच्छतियइहनानेवपश्यति" इतिश्रुतेस्त्वयमर्थः यदेवधर्मजातंइहप्रपंचेस्तितत्सर्वं अमुत्रब्रह्मण्यस्ति ॥ एवकारोऽयोगव्यवच्छेदकः साकल्ये पर्यवस्यति ॥ यत् अमुत्रब्रह्मणिधर्मजातमस्ति तदेवअनुपश्चादिहतत्कार्यप्रपंचेनुवृत्तमस्ति पृथ्वीगंधादिकमिवघटादौ ॥ मृत्योर्देवताविशेषान्मृत्युंमरणंस आप्नोति ॥ सकः यइहजगतिब्रह्मणिचनानेवद्वैतमिवपश्यति । ननु विरुद्धसर्वधर्माश्रयस्तत्कथंज्ञेयमित्यतआह मनसैवेति मननवताहृदैव इदंब्रह्मासन्यं ॥ सर्वधर्माश्रयेधर्मधर्मिभावात्प्रासंद्वैतंवारयतिनेहेति । इहब्रह्मणि किंचनापि नानानास्ति यइहब्रह्मणि तद्धर्मिणोर्द्वैतमिवपश्यति सोप्युक्तं दुष्फलमाप्नोतीतिनपौनरुक्त्यं ॥ एतेन तत्समानानुपूर्वीकंबृहदारण्यकवाक्यमपिव्याख्यातं ॥ अतएतदपिद्वैताभावमेवबोधयति नतुविशेषाभावं । पूर्वापरमंत्रेष्वलौकिकानां तेषांसिद्धेः ॥ नेतिनेतीतिमूर्तामूर्तब्राह्मणवाक्यंतु प्राग्व्याख्यातं ॥ तस्मादपाणिपादइत्यादिश्रुतिभिर्लौकदृष्ट्याविरुद्धानां सर्वेषांधर्माणामाश्रयत्वमेवतत्रबोध्यते ॥ मूलेआद्याइत्यनेन "आसीनोदूरंव्रजति ॥ अणोरणीयान्महतोमहीयान् ॥ अतः परंनान्यदणीयसँहिपरात्परंयन्महतोमहांतं ॥ दूरात्सुदूरेतदिहांतिकेच ॥ प्रादेशमात्रमभिविमानमात्मानं" इतिकठतैत्तिरीयतृतीयमुंडकवैश्वानरविद्यादिश्रुत्यंतराण्यनुसंधेयानीतिदिक् ॥

यदपिसुवर्णस्याविकारित्वंकामधेनोर्मणेरपीतिशुद्धाद्वैतमार्तंडोक्तमनूद्य (विविधकार्य्याकारतासद्भावेपिनिर्विकारित्वंयुक्त्याखंडयती) त्वाद्युक्तं तदपिनकिंचित् विविधकार्य्याकारत्वेपिविकारित्वंनसंभवतिसुवर्णादीनां ॥ विकारस्तुतात्त्विकोऽन्यथाभावः ॥ यथा-

दुग्धस्यदधिभावः अतएवदुग्धार्थिभिर्नदध्युपादीयतेऽतोदध्नोविकार-
त्वंदुग्धस्यचविकारित्वं अत्रतुसुवर्णार्थिभिःसुवर्णपरिणामःकुंडला-
दिरुपादीयते नतुत्यज्यते तस्मिन्तात्त्विकान्यथाभावाभावात् ॥
किंतुविकारोऽनवाचेवारभ्यते अतएव "वाचारंभणंविकारोनाम
धेय" मितिश्रुतिरपिसंगच्छते ॥ संगच्छतेचदधिदुग्धशुक्तिरजता-
दिदृष्टांतमप्रदर्श्यसुवर्णकटकादिदृष्टांतप्रदर्शनमतएवविवर्त्तवादादयो-
नश्रुतिसंमताइतिनिश्चीयते ॥ पूर्वाकारपरित्यागेनाकारांतरापत्तिस्त
त्रदृश्यतइतिनसंगतम्, पूर्वाकारत्यागाभावात् ॥ अन्यथासुवर्णव्यव-
हारोनस्यात् ॥ तस्मात्सुवर्णस्याविकारित्वमेव ॥ एवमेवब्रह्मणोप्य-
विकारित्वंश्रुतिसंमतं ॥ किंचसुवर्णस्यविकारित्वमेवत्वदभिमतंतदा-
ब्रह्मणोपिविकारित्वं त्वन्मतेपिकुतोनस्यात् । नचब्रह्मणिनविकारःकिं-
तुमाययैवप्रतीयते इतिवाच्यं. एवंसतिदृष्टांतवैषम्यंस्यात्, सुवर्णादी-
नांमायया‌ऽन्यथाभावस्याभावात् तत्रापिमाययैवचेद्रूपेतदासुवर्णस्या-
विकारित्वंबलादापतितं॥सुवर्णत्वेनज्ञाने नेदंकटकमितिप्रतीत्यापत्ति
श्च ॥ तस्माच्छुद्धस्यसुवर्णस्ययथाकटककुंडलादिभावस्तथैवब्रह्मणोऽ-
पिशुद्धस्यैवजगद्रूपतासिद्धौशुद्धाद्वैतमेवश्रुतिसंमतं । एतेनकिंचेत्या
दिकःप्रलापोऽपास्तः ॥ यच्चअहिकुंडलादिदृष्टांतेनेतरविकारिवैलक्ष-
ण्यसंपादनप्रकारःयथासर्पःस्वेच्छयाहिकुंडलाकारतांगतः नविकारी-
तथाब्रह्मव्याससूत्रैर्निरूपितम् इतित्वदुक्तोनसंगच्छेते)त्युक्तं-तत्र,
नहिविकारिवैलक्षण्यमात्रसंपादनार्थोऽयंप्रकारः किंतु भक्तसाक्षा-
त्कारस्योभयविधत्वादुभयविधंब्रह्मेतिनवक्तव्यं वस्तुशक्त्यैवनिर्णयः
कर्त्तव्यइतिपूर्वपक्षआह "उभयव्यपदेशात्त्वहिकुंडलवत्"। तुशब्दःपूर्व-
पक्षंव्यावर्त्तयति । नैवकेवललोकदृष्टांतेनयुक्त्यावाब्रह्मस्वरूपनिर्णयः-
कर्तुंशक्यते, तथासतिशास्त्रंव्यर्थमेवस्यात् । अत्रहिदर्शनांतरादयमेव-
विशेषोपच्छेदादेवब्रह्मस्वरूपज्ञानंप्रमितिरूपंनलौकिकप्रमाणैस्तन्न्यायैर्वा
उपचारनिवृत्त्यार्थौततात्पर्यज्ञापनार्थमेवास्यशास्त्रस्यप्रवृत्तेः तच्चजन्मा
धिकाद्यधिकरणएवशास्त्रयोनित्वादित्यनेननिर्णीतम्॥अतोवेदमतरेण-
स्वरूपस्यतच्छक्तेश्चानवगमात्कथंस्वरूपशक्त्यानिर्णयःस्यात् । वेदेतु
उभयव्यपदेशोस्तिउभयोर्विरुद्धधर्मयोर्व्यपदेशउभयव्यपदेशस्तस्मात्
यत्रैवास्थूलादिवाक्यैर्निर्गुणत्वेनव्यपदिश्यते तत्रैवाकाशओतश्चप्रो-
तश्च" तिकथनात्कार्यगुणजनकानंतगुणवत्ताऽपिबोध्यते तथायत्र-
शारीरेब्राह्मणे "सएषनेतिनेत्यात्माऽगृह्योनहिगृह्यते" इत्युच्यतेत-
त्रापि"सवाअयमात्मासर्वस्यवशीसर्वस्येशान" इत्यादिकंपूर्वमुच्यते॥

"सचाप्यमहानजआत्माअन्नादोवसुदान" इतिचतदनंतरं ॥ एवंयत्र "यदेकमव्यक्तमनंतरूप" मित्युच्यते तत्रैव "विश्वतश्चक्षुरुतविश्वतोमुख" इत्यादिचोक्तं धर्मविधिद्वारातन्निषेधद्वाराचनिरूपकाणां मध्यपकस्योपजीव्यत्वमंतरंगत्वमन्यस्योपजीवकत्वंबहिरंगत्वमिति निर्णेतुमशक्यत्वेनोभयवाक्ययोस्तुल्यबलत्वादुभयरूपमेवब्रह्मस्वरूपं यद्युभयलिंगंब्रह्मतदासंराधनसिद्धानांसर्वेषांतथैवप्रकाशेत नतुकंचित्प्रतिकथंचिदन्यंप्रत्यन्यथाअतएकंवस्तुकथमनेकधाभासतेतत्रहेतुर्वक्तव्यः; नोचेद्दर्शनस्याप्रामाण्यमितिशंकायांदृष्टांतेनसमाधिमाह—अहिकुंडलवदिति ॥ यथासर्पऋजुरनेकाकारकुंडलश्चभवति तथाब्रह्मस्वरूपंसर्वप्रकारंभक्तेच्छयातथातथास्फुरति यद्यपिसर्पःस्वेच्छयातथातथाभवतिब्रह्मतुसंराधकभक्तेच्छयेतिवैषम्यं तथापिसंराधकस्यतादृशेच्छोत्पत्तौतादृशतादृशफलदित्सैवप्रयोजिकेतिनवैषम्यं ॥ इयंयुक्तिःप्रमाणश्रुतदृष्टेविरुद्धशास्त्रसंभेदेनव्यामुग्धस्यसमाधानायव्यासपादैर्दर्शिता ॥ किंच यथाशरीरादीनांविषयभेदेनतथात्वं एवंब्रह्मणोपिभक्तभेदेनतथात्वं ब्रह्मणस्तत्तद्रूपभवनंतुतद्भक्तचक्षुर्मनोविषयेतद्रूपस्यप्रापणं नतुकरणं ॥ अतःसर्वविरुद्धधर्माश्रयोभगवानितिप्रतिपादितं नतुविकारित्वंप्रदर्शितं॥अतएव यथासर्पःस्वेच्छयाहिकुंडलाकारतांगतः नविकारस्तथाब्रह्मव्यासैः सूत्रेनिरूपितमितिकथनमपिसंगच्छते ॥ किंच यथाकामधेनोःसकाशादनेककार्योत्पत्तावपिनतस्याविकारित्वमत्वंचब्रह्मणोपिनविकारित्वं नचधेनोर्निमित्तत्वमेवनोपादानत्वमितिवाच्यं उपादानस्यान्यस्याभावात्तज्जन्यपदार्थानांतर्हिकिमुपादानंवक्तव्यं ॥ विनाप्युपादानं कार्योत्पत्तिश्चेद्घटाद्यर्थेनियमतोमृदाद्यानयनेप्रवृत्तिर्व्याहन्येतजगतोपिविनैवोपादनमुत्पत्तिसंभवेनब्रह्मणउपादानत्वेनश्रुतिसूत्रयोः प्रतिपादनप्रयासोविफलःस्यात् । तस्मादन्यस्योपादानस्याभावाद्धेतुरेवोपादानं निमित्तंच ॥ तथाप्यविकृतैव ॥ तथा ब्रह्मापीतिबोध्यं ॥ एतेन (धेनोर्निमित्ततयाऽप्रकृतित्वेने) त्यादिकंनिरस्तं ॥ एवंमणेरपियथाविविधाकारत्वेपिनविकारत्वं सामर्थ्यविशेषात्तथैवब्रह्मणोपिविविधाकारत्वं नचविकारित्वम् ॥

सहस्राक्षे इदानीं सुवर्णस्येत्यादिं तत्प्रत्युक्तमित्यंतं भागंदूषयंति–यदपिसुवर्णस्येत्यादिना नचविकारित्वमित्यंतेन ॥ अत्रेदंबोध्यम्–ब्रह्मपरिणामवादस्य "तदात्मानंस्वयमकुरुत" इत्यादिश्रुतिशततः (अ० १ पा० ४ सू० २४) "आत्मकृतेःपरिणामात्" इत्यादिसूत्रतश्च सिद्धतयाकेवलयुक्त्या विकारित्वापादनरूपयाखंडनमशक्यं;

"नैपातर्केणमतिरापनेये" तिकठश्रुतेः। सूत्रकृतापिद्वितीयस्यप्रथमेतर्काप्रतिष्ठानस्योक्तत्वात् महाभारतेचश्वनपर्वणितर्कोप्रतिष्ट स्मृतयोविभिन्नाइतिस्मरणात् भीष्मपर्वणि अचिन्त्याः खलुयेभावानतांस्तर्केणयोजयेदितिस्मरणाच्च ॥ अचिंत्या खल्वितिपाठांतरम् ॥ किंच यद्ग्राहकंयत्प्रमाणं तेन निश्चितेतस्मिन् केवलयुक्त्या तद्धर्मस्यतत्स्वरूपस्यवाबाधं कर्तुंमशक्यः ॥ यथारूपरहितेष्वाकाशादिषुस्पर्शाभावेस्पर्शवत्सुपृथिव्यादिषुरूपसत्वेन च वायौस्पर्शवत्त्वे रूपराहित्यंतद्वाहित्येस्पर्शवत्त्वंवानस्यादित्यशक्यशंकं। मतभेदात्प्रत्यक्षेणानुमानेनवातथ्रत्र-' थात्वस्यनिश्चयात् ॥ तथा "नगृह्यतेचक्षुषानापिवाचा ॥ अप्राप्यमनसासह" इतिप्रत्यक्षाद्यविषये "तंत्वौपनिषदंपुरुषंपृच्छामि" इतिबृहदारण्यकपंचमाध्यायस्यशाकल्यब्राह्मणश्रुत्या (अ० २ पा० १ सू० २७) "श्रुतेस्तुशब्दमूलत्वात्" इतिसूत्रतश्चवेदैकसमधिगम्येब्रह्मणि उक्तप्रभृतिश्रुतिसूत्रैः अहंसर्वस्यप्रभवः अव्यक्ताद्व्यक्तय सर्वाः घटस्यमृत्स्नेवपरः परस्मादित्यादिस्मृतिपुराणैश्चपरिणाम्युपादानतायाः "अविनाशीवाअरेयमात्मा" (अ० ४ पा० ४ सू० १९) "विकारावर्तिचतथाहिस्थितिमाह" आनदमात्रमविकारमनन्यदन्यत् सत्तामात्रंनिर्विकारनिरीहं इत्यादिश्रुतिन्यायपुराणैरविकारतायाश्च सिद्धत्वयानान्यतराश्रयेणेतरापरास्तुंशक्या ॥ एतेन ब्रह्मिलतयाहेम्नोविकारित्वादरेऽपिब्रह्मणिपरिणामित्वेनविकारित्वाशंकानिवारिता। वस्तुतस्तुसुवर्णमपिनैवविक्रियते ॥ विकारोहि तात्त्विकोऽन्यथाभावइतिसर्वसमतः ॥ अयतात्त्विकपदसुवर्णादे कटकरुचकादिभावेपिसुवर्णत्वानपगमेनतत्परिणामेऽतिप्रसंगवारणाय॥ अतोदुग्धादेर्दध्यादिरूपतयापरिणतिरेवविकारः तत्रदुग्धत्वाद्यपगमात् ॥ अतएव पयस्कामेनदधिनोरीक्रियते ॥ हेमकामेनतु कनककलकटकरुचकस्वस्तिकादिकंसकलमपिस्वीक्रियते ॥ तथाचायंमामकचिंतामणौसंग्रहः-

---

इदानीं सुवर्णस्याऽविकारित्वं कामधेनोर्मणेरपि इतिशुद्धाद्वैतोक्तेविविधकार्याकारितासद्भावेऽपिनिर्विकारत्वं युक्त्या खण्डयति–सुवर्णवदिति ॥ यत्तु वस्तुतोविविधाकारब्रह्मेति त्वन्मतं ॥ तस्मिंस्त्वन्मते सुवर्णवद्विकारि स्यात् ॥ नच परिणतेर्नविकारत्वमतः सुवर्णं नविकारीतिवाच्यम्, विकारोनामधेयमितिश्रौतव्यवहारविरोधात् । नच यस्मिन्विकारः सोऽविकारीत्युपपद्यते विरोधात् ॥ किञ्च पूर्वाकारपरित्यागेनाकारान्तरापत्तिस्तत्रदृश्यते तथापि चेदविकारित्वं स्वीक्रियते उत्पत्तिविनाशयो सतोरपिनित्यत्वस्वीक्रियेततस्मादर्थाङ्गीकारे शब्दापलापस्याप्युक्तत्वादीश्वरस्य विकारित्वस्यादेव ॥ एकरसतायानित्यतायाश्चाभाव स्यात् ॥ त्वन्मते रूपान्तरापत्तेरेवानित्यत्वव्याप्यत्वात् ॥ अन्यथा घटादेरप्याविर्भावतिरोभावयोरेव सत्त्वेन तार्किकसमतविकारितायास्त्वन्मते क्वाप्यभावेनेश्वरेऽहिकुण्डलादिदृष्टान्तेनेतरविकारिवैलक्षण्यसंपादनप्रकारः यथा सर्पः स्वेच्छयाऽहिकुण्डलाकारतागत नविकारी तथा ब्रह्मव्याससूत्रैर्निरूपितम् इतित्वदुक्तोनसंगच्छेत ॥ सर्वाणि तैजसान्यविकृतानीति स्वगुरूक्तिंतु भवानेव स्वीकुर्यान्नान्य उक्तविरोधात् ॥ धेनु कामधेनु ॥ एतेन कामधेनोरनेकवस्तूत्पत्तावपि यथा तस्यानविकृतिरेवमीश्वरस्याऽपीतिसुबोधिन्युक्त प्रत्युक्तम्, धेनोर्निमित्ततयाऽप्रकृतित्वेनेश्वरस्य प्रकृतित्वेन दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यात् ॥ धेनुर्मणेरप्युपलक्षिका । एतेन सुवर्णस्याऽविकारित्वकामधेनोर्मणेरपीति यद्विविधाकारसद्भावेऽपिनिर्विकारत्वमुक्तं तत्प्रत्युक्तम् ॥

विकृताविकृतत्वाभ्यांपरिणामोद्विधामतः । विकृतंसत्परिणमेत्कारणंकार्यरूपतः । नपुनःकारणात्मत्वंविकृतःसोभिधीयते । दुग्धाद्दधियथाजातंपुनर्दुग्धंनजायते । कार्यात्मनापरिणमेत् कारणंत्वविकारिसत् । पुनःकारणरूपत्वमेषोविकृतउच्यते । नानाभूपादिरूपेणरजतपरिणामिहिमध्येतदेवचांतेपितत्पुनःस्याद्विलापने । असौवेदांतसिद्धांत.शुद्धांतःकरणक्रियः परिणामोह्यविकृतःसाक्षाच्छुत्यादिसंमतइति कटकादीभेदव्यपदेशस्तुवाङ्मात्रारब्धः ॥ अतएव "वाचारंभणंविकारः" इतिसंगतं ॥ विशदीकृतंचप्राक् सुवर्णस्याविकारित्वादेवतत्रैव "यथासोम्यैकेनलोहमणिनासर्वंलोहमयंविज्ञातंस्याद्" इतिदृष्टांतः ॥ अन्यथात्वसंमतदृष्टांतानपहायविकारापादकंदृष्टांतंश्रुतिःकिमितिवदेत् ॥ वाक्यस्यपूर्वापरभागौचपरस्परंविरुध्येताम् किंच तत्रदृष्टांतीकृतंमृल्लोहादिकंपरिणाम्येवनतुशुक्त्यादिवन्मृन्मयलोहमयादेरधिष्ठानं ॥ अतोपिब्रह्मणःपरिणामित्वमेवश्रुतिसमतं नतुविवर्तवादः ॥ अन्यथानिःसंदिग्धंशुक्तिरजतादिकमेवदृष्टांतीकुर्यात् ॥ नतुसुतरांविरुद्धंमृदादिकम् ॥ दृष्टांतयतिश्रुतदेवनतुकापित्वदभिमतंकिंचित् सर्वत्रश्रुतिष्वेतादृशदृष्टांतानामेवसत्वेपिविवर्तवादएव तासांतात्पर्यमितिकल्पनातु वाक्यस्यगमकाभावान्निर्मूलैव ॥ परिणामित्वानादरेचअभिन्ननिमित्तोपादानवादोभज्येतैव । ततश्च अनेकश्रुतिविप्लवः ॥ नचाधिष्ठानोपादानतयातत्सिद्धिः, अधिष्ठानस्योपादानतायाएवमनोराज्यविजृंभितत्वात् ॥ शुक्त्यादौरजतादे.समवायेनविद्यमानत्वाभावात् ॥ समवायस्तुवैयासेऽस्मद्दर्शनेतादात्म्यमेवेत्यन्यत्रविस्तरः ॥ अनुपादानत्वादेवघटकटकादिकामेनमृत्तिकाकनकादिकमिवरजततैलधारादिकामेननहिशुक्तिरज्ज्वाद्युपादीयते ॥ नापिघटादौदर्शनमात्रेणमृदाद्युपादानकत्वमिवरजतादिदर्शनेनतत्र शुक्त्याद्युपादानकतावगम्यते नचप्रकृतेपिब्रह्मोपादानकत्वंकार्यदर्शनादनिर्णेयमितिशंक्यं ॥ अस्तिभातिप्रियैःसच्चिदानंदोपादानकतायानिर्णयात् ॥ किंचयद्यस्योपादानंनियमेनततएवतस्योद्भवोदृष्टः ॥ रजतादिकंतुशुक्त्यादिकमंतरेणोद्भवति ॥ तत्ख्यातिश्चत्रपुससीसकुरुविंदविशेषादात्रपिभवति ॥ नापिब्रह्मणोऽधिष्ठानताबोधकंकिंचिदपिश्रुतिवाक्यमुपलभ्यते ॥ उपलभ्यंतेतुपरिणामबोधकान्येव तानिचाधिकानिरक्ष्यंते ॥ एतेन यत्तुवस्तुतइत्यादिविरोधादित्यंतमपास्तं ॥ यदिचतात्विकपदमपहायान्यथाभावएवविकारइत्युच्यते तदापिसुवर्णस्यनविकारः कटकाकृतिमुपमृद्यरुचकाकृतेर्निर्माणेपिसुवर्णत्वस्योभयत्राप्यनपायात् ॥ नहि रुचकः कटकस्यकार्यमितिवदंतियेनविकार.स्यात् किंतुसुवर्णस्यकार्यं ॥ किंच तथासति तवब्रह्मणोविकारोदुर्वारः तत्रविवर्तरूपान्यथाभावसत्वात् ॥ नचप्रातीतिकःसद्व्यदोषः चेतनस्यब्रह्मणएवतथाप्रतीतिसत्वेनविकारानुपरमात् ॥ नचाविद्योपहितस्यैव तथाप्रतीत्यानदोषइतिवाच्यं उपहिततायाअप्यन्यथाभावरूपतयाविकारत्वात् । नचयस्मिन्विकारः सोविकारीत्युपपद्यते इतित्वयैवकथनात् ॥ नचोपहितत्वमपिनास्त्येवेतिवाच्यं; मोक्षसाधनानांतदुपदेशकशास्त्रगुर्वादेश्चानर्थक्यप्रसंगात् । एवंसति तावकानांकिमर्थो मतप्रवर्तनप्रयासः ॥ एतद्दयात्तात्विकपदनिवेशोसुवर्णादिकमविकारीति तद्वद्ब्रह्माप्यविकार्येव ॥ यत्तु (पूर्वाकारपरित्यागेन आकारांतरापत्तिस्तत्रदृश्यते) इत्यादि-तन्न; स्वापोत्तरमुपवेशनेपूर्वाकारपरित्यागेपिविकृतइदानीमयंपुमानित्यभिलापाभावात् ॥ अस्माकंतुकटकरुचकाद्या-

कारणां हिरण्यभाविर्भावनिरोभावाभ्यांवैवेनिनकोपिचोद्यावकाशः ॥ नचाकारागोंर्ध्वंसादिकं कल्प्यं, मुहुरनेकधाशयनोपवेशनोत्थानादावनंताकाराणामनंतप्रागभावध्वंसकल्पनेमहा-गौरवात् सएवायं शयनायाकारइति प्रत्यभिज्ञानाच्चेतिदिक् ॥ एतदेवाभिप्रेत्यमूले एवाकार-परित्यागमासाद्येत्युक्तं ॥ किंच कटकादिभावेपिसुवर्णपदार्थत्वमक्षतंव्यवह्रियते ॥ "जा-त्याकृतिव्यक्तयः पदार्थः" इतिचतल्लक्षणं इत्यप्येकायुक्तिरित्याशयेनोक्तं ॥ अन्ययेत्यादि एवंसुवर्णस्याविकारित्वमेव तत्तदाकाराणां तत्तद्व्यपदेशानां चकारणमतएवमेवाभिप्रेत्यप्रपूर्वः श्रीवसुवर्णदृष्टांतमर्थवोपबृंहणेपुरस्फुटीकृतः ॥ यथाएकादशस्कंधेऽष्टाविंशे (श्लो० १९) यथाहिरण्यंसुकृतं पुरस्तात्पश्चाच्चसर्वस्यहिरण्मयस्य ॥ तदेवमध्येव्यवह्रियमाणं नानापदेशैर-हमस्यतद्वत् इति ॥ द्वादशस्कंधे चतुर्थे (श्लोक० ३०) यथाहिरण्यंबहुधासमीयते नृभिः क्रियाभिर्व्यवहारवर्त्मसु । एवंवचोभिर्भगवानधोक्षजो व्याख्यायतेलौकिकवैदिकैर्जनैरिति । नत्वस्माभिः कपोलकल्पनयासुवर्णदृष्टांतीक्रियते ॥ अतोदृष्टांतस्यप्रमाणसिद्धत्वात्तस्यविका-रित्वेतद्वापिब्रह्मणितदापत्तिः ॥ मायाश्रयणेतुदृष्टांतासंगतिः ॥ तत्रापितदाश्रयणेसुवर्णस्या-विकारित्वसिद्धिः ॥ एवमपिनिर्विकारएवाविकारांगीकाराञ्चादोत्पत्तिमत्तेननित्यतांगीकृति-प्रसंगः ॥ एतावता किंचपूर्वस्यादित्यादेर्यदुक्तंतन्निरस्तं ॥ यच्चएकरसतयाइत्यादि ॥ व्याख्यत्वा-दित्युक्तं तदपिमदपिहितमतिमूलकं ॥ किमिदमेकरसत्वंनाम ॥ सार्वदिकं वस्तुनएकरूपत्व-मुतान्यथाप्रतीतेरप्यविषयत्वं ॥ नद्वितीयः ॥ प्रपंचप्रतीत्यातत्राप्येकरसताभंगप्रसंगात् ॥ आद्यश्चेत् मन्मतेवस्तुतः सर्वदासर्वप्रसर्वाकारमेव स्वाभिन्नस्वाभाविकसर्वधर्मविशिष्टमेव ब्रह्मास्तीति नैकरसत्वाभावः । कार्येष्वाकारादिपरिच्छेदस्तत्तन्मात्रधर्मकत्वाद्भिमलयस्तुवि-चित्रशक्तिकस्यभगवतइच्छयातत्रतत्रप्रतीयमानातिरिक्तसर्वाकारधर्माणांतिरोधानमूलकः ॥ अतएवब्रह्मविदांसदासर्वत्रताद्दशब्रह्मप्रतीतिःप्रमारूपोपपद्यते ॥ एतावतानित्यतापिनिरा-बाधा ॥ सर्वेषांरूपाणांब्रह्मण्येवसत्वेनतत्रतत्रतत्तन्मात्ररूपाविर्भावेनचरूपांतरापत्तेर-भावात् ॥ यदिपूर्वमविद्यमानंकार्यरूपंपश्चादापन्नमित्युच्येत तर्ह्यर्थवैनाशिकप्रक्रिया-पातादसत्कार्यवादः स्यात् ॥ नचसोस्मत्संमतः ॥ अतोनास्माकंतथा ॥ रूपांतरापत्तेरे-वानित्यत्वव्याप्यत्वमितितुनवयंवदाम ; नापितार्किकादयस्तथाव्याप्तिंवदंति ॥ पिलुपाक-पक्षेपार्थिवपार्थिवपरमाणूनां रूपांतरापत्तावपितेषामनित्यतानंगीकारेणव्यभिचारात् ॥ अतः कस्यसंमतेयंव्याप्तिः ॥ नन्वहमेववदामन्येकिमन्येषामपेक्षयेतिचेत् ॥ त्वन्मतेतुरूपमात्र-मनित्यत्वव्याप्यमितिमंतव्यं नतुरूपांतरापत्तेरेवतत्त्वम् । नित्यस्वरूपवत्तस्तत्वाप्रसिद्धत्वात् ॥ दृश्यंमिथ्येतिव्याप्तिस्वीकारात् ॥ यच्च अन्ययेत्यादिसंगच्छेतेत्युक्तं तत्तुपरमतपरमतत्वान-वबोधविलसितं । लोकेदुग्धादेर्दध्यादिभावेविकारस्याप्यस्मदनुमतत्वात् ॥ नचैवमविकृत-परिणामवादभंगःशंक्यः तदुग्धादेरेवविकृतपरिणामोजगदाविर्भावदशायां ॥ ब्रह्मणस्तुसर्व-मविकृत सएवेतिस्वीकारात् ॥ अतोलोकेदध्यादेरेवनपुनः प्रकृतिभावः सर्वस्यजगतस्तु वस्तुतो ब्रह्मभावः प्रतिसचरेसपद्यतएव "यत्प्रयंत्यभिसंविशंति ॥ पूर्णमेवावशिष्यते ॥ भवानेकः शिष्यतेशेषसंज्ञः ॥ (अ० २ पा० ३ सू० १४) "विपर्ययेणतुक्रमोऽतउप-पद्यते" इत्यादिश्रुतिस्मृतिन्यायैः ॥ अतोदुग्धादिन्यायेनसंभावितविकारवारणायापीश्वरे-

हिकुंडलदृष्टांतः सूत्रकृतोपन्यस्तः संगच्छतएव त्रिसूत्रेतत्राधिकरणे (अ० ३ पा० २ सू० २७) "उभयव्यपदेशात्त्वहिकुंडलवत्" इति सिद्धांतसूत्रस्य पूर्वोत्तराधिकरणसंबद्धोमुख्योद्देशस्तु संराधकानुभवगोचरानेकब्रह्माकाराणां चाम्नवतास्थापनलक्षणोमूले भाष्यंप्रकाशंच तत्त्वतः संगृह्णद्भिःसम्यगेवदर्शितः ॥ एतेनैवचप्रपंचरूपतयानानाकारैःपरिणतावप्यविकारितानिर्धारिताभवति ॥ एतदेवोरसिकृत्यमूले नहिविकारिवैलक्षण्यमात्रसंपादनार्थोऽयंप्रकार इतिमात्रपदमुपात्तं । युक्तंचैतत्; उभयोर्विरुद्धधर्मयोर्व्यपदेशाच्छ्रुतिषुनिर्गुणत्वेनानंतगुणत्वेन चपरिणामित्वेनाविकारित्वेनच एवंविधविरुद्धधर्मांतरैश्चकथनात्तत्रतत्रोक्तोभयलिंगब्रह्म एकस्याविकारितयाऽनेकाकारत्वेदृष्टांतस्त्वहिकुंडलवदितीतितत्सूत्राशयात् ॥ एतच्चमार्तंडटीकाविद्वन्मंडनादिषुस्फुटं ॥ अतएवसूत्रेसामान्यतउभयव्यपदेशोहेतूकृतः ॥ प्रकाशेप्यन्यतरवाक्यस्योपजीव्यत्वांतरंगत्वकल्पनस्याशक्यत्वकथनेन "एतेष्वेवंविधेष्वन्येष्वपिउभयरूपेणव्यपदेशात्" इतिव्याख्यानेनचपरिणामित्वाकारित्वादिबोधकवाक्यानामप्यत्रसंग्रहः स्फुटमेवबोधितः ॥ तस्माद्यथासर्पःस्वेच्छयेतिसृष्टिप्रकरणस्याऽपिमार्तंडकारिकानिरवद्यार्थेव ॥ अस्यांकारिकायांव्यासैःसूत्रेनिरूपितमितिपाठेपिव्याससूत्रैरितितस्यकपोलकल्पनाः प्रकृतसूत्रार्थकथने । युक्त्यावेति ॥ श्रुत्यननुकूलयाकेवललौकिकयुक्त्या ॥ यत्रैवास्थूलेति ॥ बृहदारण्यकपंचमाध्यायस्याष्टमब्राह्मणे ॥ यत्रशारीरेति । तत्षष्ठाध्यायस्यचतुर्थब्राह्मणे ॥ यद्यपि "सएषनेतिनेत्यात्मा" इतिवाक्यंतत्रैवाध्यायेद्वितीयब्राह्मणेपिपठ्यते ॥ अस्मिंश्चतत्रापिशारीरनिरूपणंतथाप्यत्रोदाजिहीर्षितः पूर्वापरवाक्यसंदर्भश्चतुर्थएवातोयत्रशारीरब्राह्मणइतिपदद्वयंप्रकाशकारैरुक्तमिहचानूदितम् । एवंयत्रेति ॥ तैत्तिरीयेनारायणप्रपाठके ॥ संराधकभक्तेच्छयेति ॥ इदं (अ० ३ पा० २ सू० २४) "अपिसंराधनेप्रत्यक्षानुमानाभ्यां" इतिपूर्वाधिकरणसिद्धांतसूत्रलभ्यं ॥ प्रमाणश्रुतदृष्टइति ॥ अव्यक्ताद्यधिकरणोक्तैःप्रमाणैःश्रुते ॥ साधनसिद्धैर्दिव्यचक्षुरादिप्रमाणैर्दृष्टेऽनुभूते ब्रह्मणीत्यर्थः ॥ शरीरादीनामिति ॥ अत्र "लोकेपिशरीरांतःकरणादीनांपरस्परविरुद्धदयामारकत्वादीनिविषयभेदेनैकस्मिन्नपिक्षणेप्रतीयंते" इतितत्सूत्रस्यभाष्येउक्तंब्रह्मणउभयलिंगत्वेदृष्टांतांतरंतत्रत्यप्रकाशाण्येवानुबवद्भिस्संगृहीतंज्ञेयं । "तत्तद्वपुःप्रणयसे" इतिगर्भस्तुतिवाक्येप्रणयनंतुप्रणीताप्रणयनादिवत्प्रापणमेव, नतुनिर्माणमित्याशयेनाहुः ॥ ब्रह्मणस्तत्तदित्यादि । यथा सर्पइति । यथासर्पः हि प्रसिद्धं स्वेच्छयाविविधकुंडलाकारतांप्राप्तोपि न विकारीभवति तथाब्रह्मस्वेच्छयासंराधकेच्छाविशेषजनकतत्तत्फलदित्सारूपयाबहुस्यामितिबहुभवनेच्छयात्ततदाकारप्रकाशयदपिनविकारिभवति ॥ इत्थंव्यासैःप्रकृतसूत्रेनिरूपितमितिमार्तंडकारिकार्थः ॥ पूर्वस्वर्णस्याविकारितयानिर्णयात् तद्वद्रजतादिष्वितरधातुष्वपिसासंभवत्येवेतिसर्वतैजसानामविकृतत्वंभाष्योक्तं सर्वैरेवविद्वद्भिराद्रियते ॥ एतेन सर्वाणीत्यादिविरोधादित्यंतमपिदत्तोत्तरं ॥ यत्तुधेनुरित्यादितत्रत्युक्तमित्यंतंतत्तुमूलएवविशदतयाप्रत्युक्तं; तेनजन्माद्यस्ययतोन्वयादितिश्लोकसुबोधिन्यां "यथाकामधेनोःकल्पवृक्षात् ॥ चिंतामणेर्मंत्रादेश्चजायमानाः पदार्थाद्वयंतेनहितेविकृताभवंति" इतिश्रीमदाचार्योक्तिरनादृतैव ॥ सहस्राक्षोत्प्रेक्षितातुनसुबोधिनी महाभारतेनवमस्कंधादिषुपुराणभागेषुचसहस्रार्जुनसत्का-

रावसरेजमदग्निधेनो सकाशात् विश्वामित्रसत्कारानसरेवसिष्ठधेनो सकाशाच्चविविधवस्तु-रूपादीवर्णित ॥ विश्वामित्रनीयमानायास्तस्याश्चरोमत शस्त्रपाणिम्लेच्छगणोत्पत्तिर्निरू-पिता ॥ तत्रचालौकिकप्रभावशालिन्याधेन्वाएवोपादानतासिद्ध्यति, ननुतत्रतेषामुपादाना-न्तरनिरूप्यते ॥ अतोधेनोरभिन्ननिमित्तोपादानत्वंयभारतादिसमता ॥ एवदेवतरुप्रभृ-तीनामपितथात्रपुराणतन्त्रादिषुद्रष्टव्यम् ॥ विस्तरभयाद्भारतादिवचनानितुनोदाहियते ॥ तस्मात् धेनुप्रभृतिवद्ब्रह्मण प्रकृतित्वमविकृतत्वचनिर्बाध ॥ तस्योपादानत्वाभावेभूयानु पनिषद्भागोबाधितार्थ स्यात् ॥ सयथा—बृहदारण्यकेमैत्रेयीब्राह्मणेआत्मज्ञानादिभि सर्वविदित'' इतिप्रतिज्ञायतज्ज्ञानकिंप्रकारकमित्याकाङ्क्षाया "ब्रह्मतपराऽदाद्योन्यत्रात्म नोब्रह्मवेद'' इत्यदिना "सर्वंतपराऽदाद्योन्यब्रह्मण सर्वं वेदे'' त्यतेनवाक्यसन्दर्भेन प्रपञ्चेआत्मभिन्नत्वमोक्षाभावरूपपराभवप्रदर्श्य "इदसर्वंयदयमात्मा'' इत्यतेनोपसहारे-ज्ञानप्रकारदर्शनेनसर्वस्यात्माभेदोदर्शित ॥ सचसर्वस्यात्मोपादानकत्वमेवगमयति ॥ तत्रैवपुरुषविधब्राह्मणे "आत्मैवेदमग्रआसीत्'' इत्युपक्रम्य "ससर्वंभवति'' इत्यतेन ब्रह्मणएवप्रपञ्चरूपेणभवनमाम्नात ॥ छान्दोग्येपञ्चमेप्रपाठके "सर्वंखल्विदब्रह्मतज्जलान्'' इतिसर्वस्यतदुपादेयत्वमेवोक्तंतत्रैवनवमेसनत्कुमारसवादे "आत्मैवेदसर्व'' इतितत्राप्य त्रेआत्मनएवप्राणाकाशादिभावआविर्भावतिरोभावौचश्राविते ॥ तत्राप्युपादानत्वमेव सिद्ध्यतिउपादानान्तराश्रवणात् ॥ एवतत्राष्टमेप्रपाठकेप्रतिज्ञादृष्टान्ता सदेवसोम्येदमि-त्यादिकचानुसधेय ॥ तैत्तिरीयेऽपि "आत्मनआकाश सभूत '' इत्याद्युक्त्वाकेवलनिमित्त ताभ्रमवारणाय "तदात्मानꣳ स्वयमकुरुततस्मात्तत्सुकृतमुच्यतइति'' इत्युच्यते ॥ एवसर्वास्वप्युपनिषत्सुसृष्टिनिरूपणस्थलेप्रायेणस्पष्टश्चिन्त्यमानचेदमस्त्येवेतिदिक् ॥ किंच ब्रह्मण प्रकृतित्वप्रतिषेद्धुमिच्छतिभवान् ॥ सूत्रकारस्तुकण्ठरवेणतदुक्त्वाबहुहेतून्न्या सेनसाधयतीतितन्मनोर्थोऽपार्थ ॥ तथाच प्रथमस्यचतुर्थेपचसूत्रमधिकरण (सू० २३) 'प्रकृतिश्चप्रतिज्ञादृष्टान्तानुपरोधात्'' इत्यादि ॥ तत्रमायापरपर्यायाया प्रकृतेरेवसमवायि त्वब्रह्मण केवलनिमित्तत्वमस्त्विवतिपूर्वपक्षेइदमुच्यतप्रकृति उपादाननिमित्तचकाराद्धारा दिकच यत्रयेनयतोयस्येत्यादावुक्तंब्रह्मैव ॥ कुत ? एवसत्येवप्रतिज्ञादृष्टान्तयोरनुपरो धात् ॥ छान्दोग्यबृहदारण्यकमुण्डकादिषु 'येनाश्रुतश्रुत इदसर्वंविदित ॥ विज्ञातेसर्व मिदविज्ञातभवति' इत्यादावेकविज्ञानेनसर्वविज्ञानप्रतिज्ञा "यथासोम्यैकनमृत्पिण्डेन'' इत्यादय 'सयथादुन्दुभेर्हन्यमानस्य'' इत्यादय "यथोर्णनाभि सृजतेगृह्णतेच' इत्या दयश्चदृष्टान्तास्तदवनोपरुद्ध्येरन् ॥ यदिब्रह्मणएवोपादानादिसर्वविधकारणतास्यादित्यर्थ ॥ प्रपञ्चितञ्चप्रागेवेद ॥ कार्यस्यविवर्तत्वब्रह्मणोविवर्तोपादानत्वचवारयितुतत्रैवहेत्वन्तरमाह (सू० २४) अभिध्योपदेशाच्च'' इति । "सोकामयतबहुस्याप्रजायेयेति'' इत्यादौ स्वस्यैवबहुभवनाभिध्यानेनबहुभावश्रवणात् ब्रह्मैवप्रकृति ॥ चकारात् "इदसर्वंयदय मात्मा'' इतिसर्वस्यात्मत्वश्रावणाच्च ॥ अथवा "सर्वंखल्विदब्रह्मतज्जलानितिशान्तउपा सीत' अत्रसर्वस्यब्रह्मत्वेततएवोत्पत्तिस्थितिलयात् हेतुत्वेनोक्त्वासर्वस्यब्रह्मतयाभिध्यान विधीयते ॥ चकारादेकत्वेनपृथक्त्वेनेत्यादिश्रुतावपितथा अतोब्रह्मैवप्रकृतिरित्यर्थ ॥

लिंगमुक्त्वाश्रुतिमाह (सू० २५) "साक्षाच्चोभयाम्नानात्" इति ॥ साक्षाच्छ्रुत्यास्मृत्या चतस्यप्रकृतित्वमुच्यते। कुतः ? उभयोः सृष्टिप्रलययोस्तत एवाम्नानात् ॥ शिलकप्रयाहणादिकथायां "आकाशादेवसमुत्पद्यंते आकाशंप्रत्यस्तंयंति" इत्यादौ 'अहंकृत्स्नस्यजगतः प्रभवः प्रलयस्तथे'त्यादौ चततएवोद्भवस्तत्रैवलयश्चश्रूयते ॥ इदंतत्परिणामत्वएवोपपद्यते ॥ सर्वत्र वाक्येपूपचारवारणायाह—"आत्मकृतेः परिणामात्" (सू० २६) इति "तदात्मानँ स्वयमकुरुत" इत्यत्रात्मनएवजगद्रूपेणकृतिः स्वस्यैवकर्मकर्तृभावश्चश्रूयते ॥ सा चप्रकृतिः परिणामात् ॥ अतः सुवर्णादिवद्ब्रह्मैवाविक्रियमाणंप्रकृतिः ॥ एतेनपरिणामवादएवसूत्रकाराभिप्रेतः सिध्यति ॥ परिणामशब्दस्यकंठरवेणोपादानात् भ्रमविवर्त्तादिशब्दानांसूत्रेषु क्काप्यकथनाच्च ॥ विवर्तवादस्तदभिप्रेत इति तु कल्पनामात्रं ॥ शुक्रशोणितसंनिपातजन्यशरीरवस्तुतस्यकारणत्वाभावमाशंक्य तेष्वपिमूलकारणत्वंतस्यैवाह— (सू० २७) "योनिश्चहिगीयते" इतियोनिश्चकारात्कर्ताचपरमात्मैव ॥ हियुक्तमिदं 'सदेवसोम्य, आकाशादेव, आनंदाद्ध्येव" इत्यादावन्यव्यावर्तनात् ॥ "कर्तारमीशंपुरुषंब्रह्मयोनिं, यद्भूतयोनिंपरिपश्यंतिधीराः" इतिमुंडकादिषुतथैवगीयते। तस्मात्तस्यैव परिणाम्युपादानत्वं निमित्तत्वमाधारत्वादिकंचेतिसिद्धं ॥ किंचद्वितीयस्यप्रथमपादेऽपि (सू० ४) नविलक्षणत्वादित्यादित्रिसूत्रेतृतीयस्मिन्नधिकरणेजगद्ब्रह्मणोर्वैलक्षण्येपि वृश्चिकगोमयादिवत्कार्यकारणभावंसमर्थ्य, (सू० ७) असदितिचेन्नेत्यादिपंचसूत्रेचतुर्थे असतः कारणतानिरासेनब्रह्मणएवतथात्वमुपपाद्य, काणादादिवादानामपरिग्रहमेकेनसूत्रेणोक्त्वा (सू० १३) भोक्त्रापत्तेरित्येकेन कटककुंडलादिपरिणामितौल्यं पुनर्द्रढयित्वात्रिसूत्रेतदनन्यत्वाधिकरणेकार्यस्यब्रह्मानन्यत्वं सत्यत्वंचसाधयित्वा, (सू० १७) असद्व्यपदेशादित्यादिचतुःसूत्रेकार्यस्यासत्यतानिरासपुरःसरंतदेवप्रतिपाद्य, (सू० २१) इतरव्यपदेशादित्यादित्रिसूत्रेचेतनस्यकारणत्वेप्राप्तान्हिताकरणादिदोषान् "पादोस्यविश्वाभूतानि" इत्यादौद्रष्टव्यादियाज्ञ्येपुचब्रह्मणः कार्यापेक्षयाधिक्यसिद्धेः वेदाप्रसाधननखनिकृंतनादिन्यायेनपरिहृत्यतत्रैवबदति—(सू० २३) "अश्मादिवच्चतदनुपपत्तिः" इति ॥ पार्थिवत्वाविशेषेपिहीरमाणिक्यसाधारणपाषाणानाम् । आदिपदात्पलाशचंपकचंदनादीनांचयथोच्चनीचत्वमेवंजीवस्यांशत्वाविशेषेपिब्रह्मादिस्थावरांतानामुच्चनीचत्वे ॥ अतोवाद्युक्तदोषानोपपन्नाइत्यर्थः ॥ एतावतापिब्रह्मपरिणामवादएवसिद्धः ॥ अग्रेचब्रह्मणएवसर्वविधकारणतयालोकेमृत्कुलालादिवदितरकारणापेक्षावारणाय (सू० २४) "उपसंहारदर्शनान्नेतिचेन्नक्षीरवद्धि" इत्यादिषट्सूत्रमधिकरणमारब्धं ॥ तत्राद्यसूत्रेयथाक्षीरंकारणांतरानपेक्षमेवदधिरूपेणपरिणमतितथाब्रह्मापि स्वयमकुरुतेत्यादिश्रावणादितिसाधितं इतरनिरपेक्षपरिणाममात्रेक्षीरदृष्टांतोनतुविकारित्वे ॥ सोपिप्रवचनसूत्रेक्षीरस्यदृष्टांतीकरणात्तत्संप्रतिपत्तिदर्शनायेहाप्युपात्तः श्रोतृबोधसौकर्योपयोगिनः श्रोतृवक्तृसंप्रतिपन्नार्थस्यैवदृष्टांतत्वात्॥ क्षीरवत्प्रातायाआतंचनाद्यपेक्षायाविकारस्यचवारणायाह—(सू० २५)— "देवादिवदपिलोके" इति ॥ यथादेवऋषिपितृप्रभृतयइतरनिरपेक्षाएवसृजंति स्वयंबहुरूपाश्चभवंतिनचतेविक्रियंतेतथाब्रह्मापिस्वेतरनिरपेक्षमविकृतंचेत्यर्थः ॥ अत्रादिपदात्चिंतामणिकामधेन्वादयोपि-

संगृह्यंते अतएवसमुच्चयार्थोपिशब्द.एतेनापिसहस्राक्षोक्तंसर्वंप्रत्युक्तं ॥ तत्रमन्नकृतीयेसूत्रे कृत्स्नप्रसक्त्यादिदोषमुद्भाव्य चतुर्थेश्रुतिबलात्तन्निरस्यपंचमेसर्वानुपपत्तिपरिहारायविचित्र-शक्तिकत्वंब्रह्मणिसाधयित्वाषष्ठेन्यथापरपक्षस्याप्यनुद्धरणीयादोषाःसूचिता.अतोब्रह्मणएव-निमित्तत्वमिवपरिणामित्वमपिसिद्धमेवेत्यलंप्रसक्तानुप्रसक्तया ॥ तदेतत्सकलमनुसंधा-योक्तंमूले–तथैवब्रह्मणोपिविविधाकारत्वंनचविकारित्वमिति । यदिचमक्षण शुक्तिमद-धिष्ठानत्वं सूत्रकृद्भिप्रेत्यनत्वर्हिक्षीरंदध्यादीन्नारदृष्टांततयानैव न्यरूपयिष्यन्तेषांपरिणामि-त्वात् दध्याद्यधिष्ठानत्वाभावात् ॥ किंतुशुक्त्यादिकमेवान्वक्ष्यत्अतोपिपरिणामवाद-एवतत्समतः सिध्यति ॥

किंच त्वन्मतेब्रह्मणोनिर्विशेषत्वस्वीकारात् "प्रकृतैतावत्त्वं हिप्रति-षेधति ततोब्रवीतिचभूयइतिसूत्रविरोधस्तत्रप्रकृतेगार्ग्युपक्रांतेप्रश्नेय-देतावत्परिदृश्यमाना यावंतःपदार्थालौकिकास्तेषामेवधर्मान्निषेधति प्रतीतस्यैवहिनिषेधात् अतो जगद्वैलक्षण्यमेवास्थूलादिवाक्यैःप्रति-पाद्यते ॥ ननुवेदोक्ताब्रह्मधर्मानिषेद्धुंशक्यंते,कुतएतदवगम्यते तत्राह–ततोब्रवीतिचभूयः यस्मिन्नेववाक्येपूर्वंनिषेधतितस्मिन्नेववाक्येपुनस्त-मेवविधत्ते "यतोवाचोनिवर्तंतेअप्राप्यमनसासह । आनंदंब्रह्मणोविद्वा-न्नबिभेतिकुतश्चन" इतिवाक्येज्ञानकारणाप्राप्तिकथनमुखेनपूर्वार्द्धेज्ञानं निषिध्योत्तरार्द्धे तद्विधत्ते एवमस्थूलवाक्येपि "अचागमनः असुख" मितिप्रशासनकारणनिषेधमुखेनप्रशासनंनिषिध्य एतस्यैवेत्यादिना तद्विधत्ते एवंसर्वंधर्मनिषेधमुखेनवेद्यत्वंनिषिध्य "एतद्विदित्वा" इत्यादिनातद्विधत्ते॥ तथा "नतदश्नोतिकंचने" तिव्याप्तिंनिषिध्य "काश ओतश्चप्रोतश्च" त्यनेन तांविधत्ते । तथाचकर्मणिव्यक्तिभेदेनषोडशिग्र-हणाग्रहणवन्नित्येप्येकस्मिन्ब्रह्मणिज्ञेयत्वाज्ञेयत्वप्रशासितृत्वाप्रशासि-तृत्वादीनांविकल्पस्याशक्यवचनत्वात् ॥ वाक्यस्याबोधकत्वापत्त्या त न्निवृत्त्यर्थंलौकिकंनिषेधति अलौकिकंतंधर्मंविधत्ते इतिव्यवस्थामंत व्याइत्यलौकिकधर्माश्रयत्वेऽपिनिर्विशेषत्वविरोधात्तादृशसूत्रविरोधो दुर्वारएव ॥ ननुमैवंपरत्रोक्तिमात्रस्यप्राबल्याप्रयोजकत्वेनश्रौतैतावत्त्व-स्यैवतत्रनिषेधादतएव "नतत्ररथारथयोगाःपंथानोभवंत्यथरथानथ-योगान्पथःसृजती" त्यत्रसृष्टेःपरत्रोपन्यासेऽपिनसत्यत्वमितिचेन्मैवं; नहिपरत्रोक्तिमात्रस्यप्राबल्यंवयंब्रूमः, किंतु परस्परविरुद्धवाक्यानां व्यवस्थामंतरेणाप्रामाण्यंस्यादतोब्रह्मण्येकरूपेतेषामेवधर्माणांनिषेधः सत्त्वंचानुपपन्नम्; अतोलौकिकालौकिकभेदेनव्यवस्थाभवद्भिरप्यव-श्यं कल्पनीया ॥ यदिब्रह्मधर्माणामपिस्वाप्नपदार्थवदसत्यत्वमेवस्यात्त-

हिंस्वाभपदार्थस्यैव "मायामात्रंतुकार्त्स्न्येनानभिव्यक्तस्वरूपत्वा"दिति सूत्रेणव्यासोनब्रूयात् तस्माद्ब्रह्मधर्माणांसत्यतयातादृशसूत्रविरोधस्त्वन्मतेदुर्वारएव किंच यतोवाचोनिवर्तंतइतिवाक्ये अस्थूलादिवाक्येच पूर्वंब्रह्मणएव "सत्यंज्ञानमनंतंब्रह्मे"त्युपक्रमे एतद्वैतदक्षरंगार्गीत्यत्रच प्रकृतत्वात्प्रकृतेब्रह्मणियदेतावत्त्वंप्रतिषेधतीत्युक्तमितिकथनमसंगतं ॥ द्वेवावब्रह्मणइत्यादिप्रलापस्त्वसदभिमतविषयवाक्याज्ञानमूलकत्वादुपेक्ष्यः ॥ (कस्तर्हिसूत्रार्थइतिचेत्) इत्युक्त्वायत्सूत्रव्याख्यानं प्रदर्शितं तत्तुदोषदूषितत्वादनुपादेयं ॥ केदोषाइतिचेच्छृणु ॥ त्वदुक्तव्याख्यानेमूर्तामूर्तप्रतिषेधस्यप्रकृतंप्रतिषेधतीत्येतावतैवसिद्धेरेतावत्त्वमित्यस्य एतावत्त्वपदाद्रेचप्रकृतपदस्यवैयर्थ्यप्रसक्तेर्दुर्वारत्वात् एतावत्त्वमितित्वप्रत्ययस्यभावेऽनुशिष्टत्वेन एतावतापरिच्छिन्नस्य मूर्तामूर्तलक्षणरूपद्वयस्यतेनपदेनालाभात् त्वप्रत्ययस्यषष्ठ्यंतादनुशिष्टत्वेनतृतीयांतादभवनेनापितथात्वाच्च ॥ अथतत्रविग्रहवाक्यंकिंत्वर्थमात्रकथनमित्युच्यतेतदापिरूपद्वयात्मकस्यसर्वस्यप्रपंचस्यपरिच्छिन्नांतर्निवेशादेतावतेत्यत्राभिप्रेतस्यपरिच्छेदकस्यालाभेनासंगतिः। नचलौकिकप्रमाणमेवतथेतिवाच्यं; जन्मादिसूत्रव्याख्यानेमनसाप्यचिंत्यरचनारूपस्येतिस्वोक्तस्यप्रपंचविशेषणस्यविरोधेनतथावक्तुमशक्यत्वात् ॥ किंचात्रमूर्तामूर्तरूपद्वयंयत्प्रकृतत्वेनत्वयाविवक्षितंतस्य प्राधान्यंकिंस्वेनरूपेणब्रह्मरूपत्वेनवा? नाद्यः, ब्रह्मणोरूपेइतिविशेषणवैयर्थ्यप्रसंगात्, द्वितीयेतुब्रह्मणएवप्राधान्यंब्रह्मपरिचायनार्थमेवरूपद्वयस्यकथनात् ब्रह्मणएवात्रोपदेश्यत्वाच्च ॥ नचसंबंधषष्ठ्यंतपदेनबोधनाद्ब्रह्मणोऽप्राधान्यमितियुक्तं; राहोःशिरइतिवदभेदेपिषष्ठीसंभवेन संबंधषष्ठ्यैवेत्यत्रनियामकाभावादानंदंब्रह्मणोविद्वानित्यत्रत्वयाप्यभेदे षष्ठ्याःस्वीकृतत्वात् कार्यकारणानन्यत्वस्यभगवतासूत्रकारेणोक्ततया द्वेवावब्रह्मणोरूपेइत्यत्र ब्रह्माभिन्नेरूपेइत्यर्थस्यवक्तुमुचितत्वाच्च ॥ अतोब्रह्मणःप्राधान्यस्याविघातात् "ब्रह्मतेब्रवाणी" तिवाक्योपन्यासेनस्वयमेवोपक्रांतत्वांगीकारादग्रे उपदेश्यत्वाच्च ॥ ब्रह्मणःप्रकृतत्वसिद्धौतस्मिन्नेतावत्त्वंपरिच्छिन्नत्वंप्रतिषेधतीत्येवंव्याख्यातव्यं; एतावच्छब्दस्यपरिच्छिन्नवाचकतायाः प्रसिद्धत्वात् ॥ तथाचमूर्तामूर्तमात्रत्वंब्रह्मणिनास्तीत्यर्थस्त्वन्मतेविषयवाक्याद्रेपिसिद्ध्यति नतुप्रकृतंयदेतावतापरिच्छिन्नमित्यर्थः सिध्यति, एवंचनेतिनेतीतिश्रुतिव्याख्यानेनञ्द्वयेन यथासंख्यंमूर्तामूर्तनिषेधवासनाशेषात्तद्विहायभूतराशिवा-

सनाराश्योर्निषेधांगीकारे परिगणितनिषेधेनयदिनेदंब्रह्मकिमन्यद्ब्रह्मे-तिशंकापत्तेस्तदपिविहायवीप्सयायावद्विषयजातनिषेधोयोऽगीकृतः-सोपितथा ॥ भूतराशिनिषेधेकेमुतिकादेववासनाराशिनिषेधसंभवेन-तदर्थंनिषेधापेक्षाभावात् सत्वेयथासंख्येवासनानिषेधावतारकप्रमा-णाभावात्वासनायाअनुक्तत्वेनतन्निषेधस्याप्ययुक्तत्वाच्च ॥ अत एव नयाचन्निषेधोपियुक्तः । यदपि "नह्येतस्मादितिनेत्यन्यत्परमस्ती" तियोजनाद्वयंतत्रप्रथमयोजनायांनिषेधवीप्सयाब्रह्मव्यतिरिक्ताभाव उच्यते । नपुनर्ब्रह्माभावस्तदेवदर्शयत्यन्यत्परमस्तीतिव्याख्यातंतदपि तथा ॥ ब्रह्मव्यतिरिक्तनिषेधोत्तरब्रह्मसत्ताप्रदर्शनस्य अन्यदस्तीत्येता-वतैवसिद्ध्यापरपदवैयर्थ्यापत्तेः अतोऽव्यतिरिक्तनिषेधेनाव्यतिरिक्तत्वं सर्वस्यस्वीकृत्यतावन्मात्रत्ववारणायपरब्रह्मान्यदस्तीत्यंगीकार्यमित्ये-वयुक्तं ॥ द्वितीययोजनायामपिपरपदवैयर्थ्यंपूर्ववदेव तदर्थपरपदमु-त्कृष्टार्थकतयाव्याख्येयं तत्रचाभावावसानएवनिषेध सिद्ध्यतीतिब्रह्म-सत्तासाधनायततोब्रवीतिचभूयइतिसूत्रांशनामधेयविषयत्वेनयोज-यित्वानामधेयेनतत्सत्तांसाधयित्वानिषेधस्यब्रह्मावसानत्वमुपपादितं तदपितथानामधेयांगीकारेतद्वत्तासिद्ध्यायावद्विशेषशून्यत्वप्रतिज्ञा-हानिप्रसंगात् नामधेयकथनमात्रेणैवतत्सत्तासिद्धेस्तन्निर्वचनश्रुति-वैयर्थ्यप्रसंगात् तदादरेचचक्षुषश्चक्षुरित्यादिधत्तन्नियामकत्वतन्मूल-रूपत्वयो सिद्ध्या प्रतिज्ञाहानितादवस्थ्याच्च ॥ एवमादयोऽन्येपि-दोषाः संति । ग्रंथगौरवभयान्नोच्यंते ॥

सहत्त्वास्ते नतुप्रकृतंतावत्त्वमित्यादिसूत्रप्रतिकूलमित्यतभागपरिहरति – किंचत्वन्मत इत्यादिनानोच्यतइत्यतेन ॥ इदमधिकरणतृतीयस्यद्वितीयपादे (सू० १९) "अंबुवद-ग्रहणा" दित्यादिचतु सूत्रसिद्धांतेवर्तते ॥ तत्रएकदेशिमतनिरूपणांतिमसूत्रेजलप्रतिबिंबि-तसूर्यादिवदौपाधिकधर्मोपपत्तिर्दर्शितेतिसाऽत्र "अंबुवदग्रहणात्तुनतथात्व" इतिप्रथम सूत्रेणप्रतिबिंबनिरासान्निरस्ता ॥ ततउभयधर्मविरोधतादवस्थ्यात्सिद्धांतेतन्निरासायाह (सू० २०) "वृद्धिह्रासभाक्त्वमतर्भावादुभयसामंजस्यादेव" । अर्थस्तु–महानवका शोऽल्पोवकाशइतिलौकिकव्यवहारात् "यथावकाशदशचमसान्" चयनेष्टकोपधानेपरित चिति सृगित्यादिवत्तद्धोतृमन्त्ररुपधानोत्तर "यथावकाशग्रहान्यथावकाशप्रतिग्रहान्" एव मादिवैदिकव्यवहाराच्चविभोरप्याकाशस्यशतेपचाशदितिन्यायेनसर्वपरिमाणाश्रयतयादरी-करकाद्यतर्भावात्प्रतीयमानयथावृद्धिह्रासभाक्त्वतथाब्रह्मणोपिसर्वधर्माश्रयस्यपृथ्वीजलादि कार्यान्तर्भावात्प्रतीयमानसर्वगधत्वाऽगधत्वादिकतत्तदुपासकहृदयावौस्फुरद्वृद्धिह्रासभा-क्त्वच ॥ तथासत्येवश्रुतिर्त्वाविशिष्टद्विविधवाक्यानांतदुक्तोभयधर्माणांचसामंजस्यात्

ब्रह्माप्येवमिति ॥ अत्रबीजंविषयवाक्येशांडिल्यविद्यायामाकाशात्मेत्युक्तिश्छिक्षोपनिषदादौ "आकाशशरीरंब्रह्म" इत्याद्युक्तिश्चेतिज्ञेयं ॥ संरोधनवृष्ट्यादिचतत्रतत्र "सक्रतुंकुर्वीत ॥ इतिप्राचीनयोग्योपास्व" इत्याद्युक्त्यावोध्यं ॥ आकाशएवावकाशादइतितु निर्णीतं प्राक् ॥ केचित्स्वदेहांतर्हृदयाकाशेत्यादिस्मृतिषुचप्रसिद्धंतेनप्रथमस्याद्वितीये (सू० ७) अर्भकौकस्त्वसूत्रेदर्शितमिहप्रयोजनविशेषायविशङ्कितंनचसर्वगंधरत्वादिकं पृथिव्यादिस्थानगतमेवांतर्भावात्तत्रोपचर्यतइतिवाच्यंतत्रैवपादे (सू० ११) नस्थानतोपिपरस्येत्यादिनातन्निषेधात् ॥ जलादौसर्वत्रप्रतिबिंबस्यतौल्यात्तद्वृध्यादिपरमितरव्याख्यानं तूपेक्ष्यमित्यन्यत्र विस्तरः ॥ जलगतमपिसूर्यप्रतिबिंबंनहिजलवृद्धौवर्धते जलह्रासेवाह्रसति । दृष्टांतेप्रद्विलतयावृध्यादेरागंतुकत्वंमन्यमानंप्रतिहेत्वंतरमाह–(सू० २१) "दर्शनाच" उभयसामंजस्यादेवमित्यनुवर्तते ॥ तथाच "प्रादेशमात्रमभिविमानं ॥ यदेकव्यक्तमनंतरूपं" इत्यादिश्रुतत्रसर्वविरुद्धधर्माणांदर्शनात् चकाराद्वत्तारदशायामुलूखलबंधनमृत्साभक्षणव्याद्दानमिथिलाप्रवेशादौतथाप्रत्यक्षाच्चवस्तुस्वभावत उभयसामंजस्याद्ब्रह्मैवमुभयलिंगमित्यर्थः ॥ एवंसाधितेपिवस्तुस्वभावंमन्यमानंबोधयितुंधर्मविधिनिषेधवाक्यविषयव्यवस्थारूपायुक्तिः प्रकृतैतावत्सूत्रेणोच्यते ॥ इयंचसर्वोपनिषत्साधारणी ॥ तेनयत्रयत्रवेदेब्रह्मणोधर्माणांनिषेधोविधिर्वातानिसर्वाण्यपि "यतोवाचः, अस्थूलमनणु, अपाणिपादः" इत्यादीनि "आनंदंब्रह्मणः, एतस्यवाअक्षरस्य, जवनः" इत्यादीनिचसर्वाण्यस्यविषयवाक्यानि ॥ नतुमूर्तामूर्तब्राह्मणमात्रंसूत्रेतदुप-

---

नतु प्रकृतैतावत्त्वंहिप्रतिषेधतिततोब्रवीतिचभूयइति सूत्रविरोधः ॥ अपाणिपादोजवनइतिलौकिकैतावत्त्वं निषेध्य जवनोमहीतेत्याह ॥ एवमस्थूलमनणुइतिनिषेध्यैतस्यैवाऽक्षरस्य प्रशासनेगार्गीत्याहेतिचेन्न ॥ परत्रोक्तिमात्रस्य प्राबल्याप्रयोजकत्वेन श्रौतैतावत्त्वस्यैव तत्रनिषेधादतएव नतत्ररथारथयोगाः पन्थानोभवंत्यथरथान् रथयोगान्पथःसृजतीत्यत्र सृष्टेः परत्रोपन्यासेऽपि नसत्यत्वमिति मायामात्रंतुकार्त्स्न्येनेतिसूत्रेण स्वप्नस्य मायामात्रत्वं व्यास ऊचे ॥ किञ्च प्रकृतशब्दस्योपक्रान्तार्थतायाः प्रसिद्धत्वेन लौकिकेतिव्याख्यानंनयुक्तम् ॥ एवं प्रकृते ब्रह्मणि यदेतावत्त्वं तत्प्रतिषेधतीत्यप्ययुक्तम्; रूपद्वयस्यैव प्रकृतत्वात् ॥ द्वेवाव ब्रह्मणोरूपेमूर्तंचामूर्तंचेत्युपक्रम्य भूतपञ्चकस्य राशिद्वयेनाऽभिवर्णितत्वात् ॥ ब्रह्मणः षष्ठ्यन्ततया निर्दिष्टस्य तद्विशेषत्वेनाऽप्रकृतत्वात् ॥ एतेन प्रकृते ब्रह्मणि प्रकृतस्य ब्रह्मणइति व्याख्याद्वये ततोब्रवीतीत्याद्यनर्थकमापद्यते ॥ प्रकृतशब्देन ब्रह्मणः सत्त्वस्य सिद्धत्वात् इति विद्वन्मण्डनटीकोक्तं निरवकाशमस्माभिस्तादृशव्याख्यानस्यानादृतत्वात् ॥ कस्तर्हि सूत्रार्थ इतिचेत् प्रकृतं एतावत्त्वं वस्तुपरिच्छिन्नत्वं मूर्तामूर्तरूपत्वं प्रतिषेधति–अथातआदेशोनेतीति । ततो निषेधतदनंतरंभूयश्च ब्रवीति–अन्यत्परमस्तीति । सूत्रार्थइति गृहाण ॥ नच प्रकृतेतावत्पदयोरन्यतरस्य वैयर्थ्यमितिवाच्यम् ॥ अवैदिकस्य निषेधकमिति त्वादृशवासनावासिताशयनिवारणाय प्रकृतपदस्य प्रकृतपदार्थस्वरूपप्रदर्शनायैतावत्पदस्यचसार्थक्योपपत्तेः ॥ नहिशब्दाधिक्यमात्रेणाऽर्थाधिक्यं युक्तमतिप्रसंगात् ॥ तस्मात्तवैवेदं सूत्रं प्रतिकूलम् ॥

स्यापकस्यतथासर्वसंमतेश्चाभावात् ॥ अन्यथामूर्तामूर्तेहिप्रतिषेधतीत्येनवदेत् ॥ तथा-पियथावृद्धिऱ्हाससूत्रेप्रतिबिंबप्रतिपादकानिदर्शनसूत्रउपाधिप्रवेशप्रतिपादकानिचसर्वाणि विषयगानयानितत्तथात्रापिएकस्यैवनिषेधकानिविधायकानिचसर्वाणिविषयवाक्यानिमंतु ॥ तत्रलौकिकानामेवनिषेधात्भाष्यप्रकाशेसोत्रप्रकृतपदस्यार्थः "गार्ग्युपक्रांतेप्रपंचे" इति व्याख्यातः ॥ तत्रगार्गीप्रश्नेयेतितूपलक्षणं ॥ भाष्यंप्रकाशंचतत्रत्यमेकीकृत्ययथोपयोग-मनुवदंत.सूत्रार्थादिकमाहुः–तत्रप्रकृतइत्यादिना परिदृश्यमानाइति । गार्गीप्रश्नेहि "यदूर्ध्वंयाज्ञवल्क्यदिवोयदवाक्पृथिव्याः" इत्यादौद्यावापृथिवी भूतं भवत्भविष्यच्चे-त्याकाशांता.प्रापंचिकसर्वपदार्थाः संग्रहेणपरिदर्शिताः संति ॥ अतोगार्गीप्रश्नेतयाप्रकृते-प्रपंचेयेपदार्थाः परिदृश्यंतेलौकिकास्ते सूत्रएतावत्पदेनोच्यते ॥ समीपतरवर्तिपरि-मितिकत्वात् ॥ एतद्.समीपतरवत्यर्थकत्वात् तन्निष्ठा.स्थूलत्वाणुत्वादयोधर्माश्चत्व-प्रत्ययेन ॥ प्रतीतस्यैवेति । सौत्रहिशब्दस्यार्थोयं ॥ हियुक्तमिदंअस्थूलमित्यादिप्रतिषेध-श्रवणेलोकेविदितानांपरस्परव्यधिकरणानांस्थूलत्वाणुत्वादीनामेवोपस्थितेः अप्रतीतानांस-मानाधिकरणानामलौकिकानतेषामनुपस्थितेश्च ॥ तेनधर्मनिषेधकवाक्यानांलौकिकधर्मा एवविषयाइतिसूत्रांशेननिर्णीतं । सिद्धमाहुः–अतइति ॥ अस्थूलमनण्वितिनिषेधेउभय धर्मवत्वमेवसिध्यतिनसुचिवधप्रसंगेनऽत्रुपकेणनचार्द्रेणेत्युभयधर्मनिषेधेपेनस्योभयात्मक-त्ववत् ॥ तेनजगद्वैलक्षण्यमेवसिध्यतिनतुनिर्विशेषत्वं ॥ नापिवेदोक्ताभगवत्प्रसाद-पात्रैर्वीतशोकैर्मुक्तैर्दृश्याअणोरणीयस्त्वंमहतोमहीयस्त्वमित्यादयोब्रह्मधर्माअस्थूलादिवाक्यै र्निषेद्धुंशक्यंते अनुपस्थितेःतुल्यबलत्वाच्च ॥ नन्वध्यारोपापवादाश्रयणेशक्यंतइत्याशयेन-शंकतेकुतइतिसूत्रांशेन समादधते–ततइत्यादि ॥ ततःप्रतिषिध्यमानाल्लोकविदितधर्माद्भू-यःअधिकंअलौकिकमितियावत्धर्मान्तरंप्रतिषेधानंतरंपुनर्वेदोब्रवीत्येव ॥ चोऽवधारणार्थः-सर्वत्रेमंनियमंबोधयत्स्वधिकरणसमाप्तिंचद्योतयति ॥ एतदेवाहुः–यस्मिन्नेवेति । यदितथा-वेदो भिप्रेयात्तर्हिपूर्वमेवाध्यारोप्यततोपवदेत् ॥ वदतितुविपरीतं ॥ नचापवादोत्तरमध्या-रोपेप्रयोजनमस्तिप्रक्षालनोत्तरमिवपुनःपंकलापनेयेनार्थकसोप्याश्रीयेत किंचयत्रनिषेधति तत्रसामान्यतएवत्वाक्चक्षुरादिकंनिषेधति ॥ विधत्तेतुलोकेष्वाप्यसभावितसूर्यचंद्ररोदसी सर्वकालप्रशासकत्वविश्वतश्चक्षुष्ट्वादिकं ॥ अतस्तुल्यत्वाद्विधायकवाक्यानामलौकिकधर्मा एवविषयाइतिसूत्रांशांतरेणनिर्णीतं ॥ तेनसर्वकामत्वादयः श्रुत्यंतरोक्ताअप्यलौकिका-एवज्ञेयाः; लोकएकस्मिन्सर्वकामत्वादेरसंभवात् ॥ यत्राप्यलौकिकत्वं नस्पष्टंतत्रापि तदुन्नेयं; ब्रह्मधर्मत्वात् धर्मिणोऽलौकिकत्वादनुच्छित्तिधर्मत्वाच्च ॥ एवं चविधिनिषेध-वाक्यानांव्यवस्थितविषयभेदेनपरस्परविरोधाभावात् ॥ श्रुतित्वादिनातुल्यबलत्वाच्च नैकतरबाधः कल्प्यः ॥ दिग्प्रदर्शनायोदाहरणमाहुः–यतोवाचइत्यादि ॥ इदंब्रह्मवल्लीस्थं ॥ वाक्विशेषतः परस्यज्ञानकारणं, मनस्तुविशेषतः स्वस्य ॥ ज्ञानं ब्रह्मकर्मकम् ॥ विधत्ते विद्वानित्युक्त्येतिभावः ॥ अस्थूलादीति । इदंबृहदारण्यकपंचमाध्यायाऽष्टमब्राह्मणस्थं ॥ प्रशासनंहिवागादिभिरेवभवति ॥ अमुख्यपदस्यच्यवहितत्वबोधनायासंधिः ॥ इत्यादि-नेति ॥ "एतस्यवाअक्षरस्य शासनेगार्गिसूर्याचंद्रमसौविधृतौतिष्ठतः" इत्यादिकाण्वाः ।

"एतस्यवाअक्षरस्यप्रशासनेगार्गिद्यावापृथिवीविधृतेतिष्ठत" इत्यादिमाध्यंदिनाः ॥ अत्रवै-शब्दोऽवधारणार्थः । अतः फलितार्थकथनं एतस्यैवाक्षरस्येति तथापाठांतरंवा ॥ व्याप्तिमिति । अश्नोतीतिमाध्यंदिनपाठे अशूभोजनइत्यस्यैवविकरणव्यत्ययेनरूपमित्येकं-व्याख्यानं, अशूव्याप्तावित्यस्यश्वादेरूपमित्यपरं तत्रद्वितीयमादायैवमुक्तिः ॥ व्यक्ति-भेदेनेति एकस्यामतिरात्रव्यक्तौ षोडशिग्रहस्यग्रहणमपरस्यामग्रहणमितिकर्मणिअभि-व्यज्यमानेनशक्तिभेदेन "अतिरात्रेषोडशिनं गृह्णातिनातिरात्रेषोडशिनंगृह्णाति" इति विधिनिषेधयोर्विकल्पोयथाशक्यवचनस्तथानब्रह्मणि तस्यैकत्वात्सिद्धत्वाच्च ॥ अबोध-करेति । परस्परविरोधपराहतत्वात्तयेतिभावः । इदंदिग्दर्शनायोदाहरणद्वयं, एवमन्यत्रा-पियोध्यं । यथाईशावास्यभागे "अनेजदेकंमनसोजवीयः" इत्यादिनाविधिनिषेधयोर्योग-पद्यं ॥ केनोपनिषदि "नतत्रचक्षुर्गच्छतिनवाग्गच्छति" इत्युपदेश्यत्वंनिषिध्य "इति शुश्रुमपूर्वेषां" इतिब्रह्मविदुपदेश्यत्वं वाक्यपंचके । "यद्वाचानभ्युदितं" मित्याद्युक्त्वा "येनवागभ्युद्यते" इत्यादिकंद्वितीयखंडेवेत्तुमशक्यत्वमुक्त्वा तृतीयखंडादौतदिच्छया-साक्षात्कारश्चोच्यते ॥ कठवल्लीषु "अशरीरं शरीरेषु" इत्युक्त्वा "वृणुतेतनुंस्वां" इतिपराञ्चिखानीत्युक्त्वाकश्चिद्धीरइत्यादिपद्यरो ॥ प्रश्नोपनिषदि (प्रश्न ४) "तद-च्छायमशरीरमलोहितं" इतिधर्मान् निषिध्य "शुभ्रमक्षरंवेदयतेयस्तु सौम्यससर्वज्ञः सर्वोभवति" इतितद्वेत्तुःसर्वज्ञसर्वभावकथनेन तस्यसर्वाश्रयत्वसर्वरूपत्वे बोधयति ॥ मुंडके "यत्तदद्रेश्यमग्राह्यं" इत्याद्युक्त्वा "यद्भूतयोनिंपरिपश्यंतिधीराः" इत्याद्याम्नायते तैत्तिरीये "अदृश्येऽनात्म्येऽनिरुक्तेऽनिलयने" इत्युक्त्वाअदृश्यत्वविरुद्धमभयप्रतिष्ठाविंदतं अशरीरत्वविरुद्धभीषास्मादितिप्रशासनेऽनिरुक्तत्वविरुद्धाऽऽनंदमीमांसाअनिलयनत्वविरु-द्धावुरुषादित्यपोः स्थितिरपसंक्रांतिश्चश्राव्यत ॥ बृहदारण्यके "नैनमूर्ध्वंनसंदृशे" इत्या-द्युक्त्वा "एषोहिदेवःप्रदिशोनुसर्वाः ॥ विश्वतश्चक्षुः" इत्याद्युक्तं श्वेताश्वतरे "अपाणि-पादोजवनोग्रहीता" इत्यादिएवमन्यत्रापिशतशोवाक्यानिद्रष्टव्यानि ॥ तेनक्वचिदेवतद-स्फुटत्वेपितथोक्तेयं ॥ यत्तुनन्वित्यादिव्यासऊचइत्यंतं तदयुक्तं ॥ तथाहि—पूर्वपक्षेनिषेध्ये-तिप्रयोगोऽनुचितः ॥ स्वप्नश्रुतानपपाठस्तुवेदाभ्यासगंधाभावात् ॥ पाठस्तुबृहदारण्यके षष्ठाध्यायेज्योतिर्ब्राह्मणे (पृ० ७५७) "नतत्ररथानरथयोगानपंथानोभवंत्यथरथान् रथयोगान्पथःसृजते" इतिप्रत्येकंनकारयुक्तआत्मनेपदयुक्तश्चदृश्यते ॥ तन्मौर्ख्यबोधनाय मूलेतदुक्तिस्त्थैवानूदिता । वस्तुतःस्वप्नश्रुतावपिलोकेपरिदृश्यमानावास्तवारथाश्वमार्गप्रभृ-तयएवनिषेधविषयाअवास्तवास्तेच सृष्टिवाक्यविषयाइतिनपूर्णेननिषेधवाक्येनतत्रापिपरस्य बाधः ॥ मायिकानामपिनिषेधांगीकारेनते स्वप्नउपलभ्येरन् ॥ वास्तवानांसृष्ट्यंगीकारे सूत्रंकुप्येत् ॥ तेषांमायिकत्वंतुशरीरे वास्तवरथादिभानासंभवनियततत्तदुपादानाभावादि-भ्योऽवगम्यमानात् कार्त्स्न्येनानभिव्यक्तस्वरूपत्वादेवनतुनिषेधबलात् ॥ अन्यथामाया-मात्रंतुप्रतिषेधादित्येवसूत्रयेत् ॥ पूर्वमभावेप्यनंतरंवास्तवानेवसृजतीतिव्याख्यानसंभवेन निषेधफलोपक्षयाच्च ॥ त्वदाचार्यैरपिनिषेधोन्नबाह्यानामेवोरीकृतइतितत्रापिवाक्ययोर्भिन्न-विषयत्वात्तद्वदत्रापिभिन्नविषयत्वमेव सिद्ध्येत्तुल्यत्वादिष्टसिद्धिः ॥ तथापिनहिकेवलं

परत्रोक्तिमेवसाधकतयाऽयंमूमः किंतुनिषिध्यमानानांसाधारणतयालोकेदृष्टत्वंविधीयमानानां सूर्यचंद्रप्रकाशकत्वंविश्वतश्चक्षुष्ट्वादीनांलोकाप्रसिद्धत्वं सर्वत्रैव परत्रोक्तिंचतथा‑मूमोऽपवादोत्तरमध्यारोपस्यायोग्यत्वात् ॥ तस्मादुक्तव्यवस्थयैवाविरोधस्तुल्यप्रमाणभावयोरुचितइत्याशयेनाहुः—नहिपरत्रेत्यादि ॥ किंचनस्याप्रसृष्टिवद्ब्रह्मधर्मामायिकाः ॥ अन्यथा तस्यास्तथात्वे विस्तरेणसाधयन्सूत्रधारस्तेषामपिमायामात्रत्वं स्पष्टंकुतोनब्रूयात् ॥ तदेवदाहुः—यदीत्यादि ॥ यत्तुकिंचेत्यादिनयुक्तमित्यंतं तत्प्रागेवापास्तम् ॥ गार्गीप्रश्नादौपूर्वप्रपंचस्यप्रकृततायादर्शितत्वात् ॥ तत्रतदभावे (अ० १ पा० ३ सू० १२) "अन्यभावव्यावृत्तेश्च" इत्यादिकमसंगतंस्यात् ॥ यद्यप्येवंप्रकृतइत्यादि अप्रकृतत्वादित्यंतं तदप्यसत् ॥ अस्मत्संमतेषु "यतोवाचः ॥ अस्थूलमनणु" इत्यादिविषयवाक्येषु "ब्रह्मविदाप्नोतिपरं, सत्यंज्ञानं, एतद्वैतदक्षरंगार्गिब्राह्मणाअभिवदंति" इत्यादिनाब्रह्मणःप्रकृततायाःस्फुटत्वात् ॥ "मूर्तंचैवामूर्तंच" इतिपाठसत्वेप्येवकाररहितश्रुतिपाठोपन्यासस्त्वनभ्यासात् ॥ किंचतस्मिन्विषयवाक्येपिपष्ठीनिर्देशमात्रेणब्रह्मणोनाप्रकृतत्वंशक्यंवक्तुं; बुबोधयिषिततयाऽर्थतस्तस्यमुख्यत्वात् ॥ अन्यथाब्रह्मजिज्ञासासूत्रेब्रह्मणोविशेषणतयावैयासदर्शनेपितस्याप्राधान्यमप्रकृतत्वंचस्यात् ॥ तथाचशास्त्रस्याब्रह्मविषयत्वंतत्तदधिकरणेषुब्रह्मपरमात्मेत्यादिपदाननुषंगश्चापद्येत ॥ किंचेदंचतुर्थाध्यायेदृप्तबालाक्यजातशत्रुसंवादेवर्ततेतत्राध्यायारंभे "दृप्तबालाकिर्हानूचानोगार्ग्यआससहोवाचाजातशत्रुंकाश्यंब्रह्मतेब्रवाणीति" इतिब्रह्मैव प्रकृतं ॥ किंतुरूपद्वयमेवतत्परिचायनार्थंतयाप्रासंगिकं ॥ (ब्रह्मण.पष्ठ्यंततया) इत्युक्तिरपिशब्दार्थभेदात्कथंचिद्योज्याएतेनैवप्रकृतंयदेतावत्त्वंमूर्तामूर्तत्वलक्षणमित्यादिव्याख्यानस्यासंगतत्वसिद्धाऽयदिसप्तम्यापष्ठ्यावासमासंकदाचिदाश्रयेस्तदासूत्रेभिन्नांशवैयर्थ्यमित्यमिप्रेत्यविद्वन्मंडनटीकायामुक्तंयुक्तमेवेतिसिद्धं ॥ यस्तुकस्तर्हीत्यादिना गृहाणेत्यंतेनसूत्रार्थस्तेनदर्शितस्तंदूपयंति—तत्तुदोषेत्यादिना ॥ अत्रमूर्तामूर्तप्रतिषेधस्येत्यारभ्य प्रतिज्ञाहानितादवस्थ्याचेत्यंतः सर्वोपिभाष्यप्रकाशलेखएवसुखेनबोधार्थंक्वचित्कंचिदेवपाठंभित्त्वाऽनूदितः स्वमतस्थानांविशेषतःप्रामाण्यग्रहसिद्धये ॥ अत्रसहस्राक्षे (प्रकृतंएतावत्त्वंवस्तुपरिछिन्नत्वंमूर्तामूर्तरूपत्वं) इत्युक्तिस्तु "प्रकृतंयदेतावत्त्वंएतावतापरिच्छिन्नंमूर्तामूर्तलक्षणं ब्रह्मणोरूपं" इतिस्वभाष्यफलितार्थकथनरूपा ॥ तत्रएतावतापरिच्छिन्नमित्यस्यैवार्थोवस्तुपरिच्छिन्नमिति ॥ अत्रानूदितःप्रकाशग्रंथस्तुप्रकृतसूत्रस्यशारीरकभाष्यमेवलक्ष्यीकृत्यप्रवृत्त इतितत्पर्यालोचनेनसम्यगवगंस्यते ॥ दुर्वारत्वादिति । यत्तु अवैदिकस्यनिषेधकमित्यादितदबोधात् ॥ तत्रहिलोकप्रसिद्धान्येवपंचभूतानिराशिद्वयेनमूर्तामूर्तरूपतयोक्तानि नतुवेदैकगम्यविश्वतश्चक्षुष्ट्वादिकं येनवैदिकधर्मजातस्यनिषेध.स्यात् ॥ अतएवप्रकृतसूत्रभाष्ये शंकराचार्यैः "नेदंशास्त्रंप्रतिपादयत्वेनब्रह्मणोरूपद्वयंनिर्दिशतिलोकसिद्धंत्विदंरूपद्वयंब्रह्मणिकल्पितंपरामृशतिप्रतिषेध्यत्वाय" इतिलौकिकस्यैवाऽत्रप्रतिषेधंमन्यंते ॥ अतःप्रकृतपदस्यवैदिकपरताकल्पनयासार्थकतामनोरथोव्यर्थः ॥ तथासतिलौकिकस्यब्रह्मण्यप्रतिषेधसिद्धेश्च ॥ नापिप्रकृतपदार्थस्वरूपप्रदर्शनायैतावत्पदस्यसार्थक्यमुपपद्यते । पष्ठीनिर्दिष्टस्याप्राधान्यंप्रथमानिर्दिष्टरूपद्वयस्यैवतदेतित्वन्मतरीत्याप्रकृतपदादेवासंदिग्धतरस्व‑

रूपलाभात् तेनालाभेएतावत्त्वपदतोपिमूर्तामूर्तरूपलाभस्याशक्यत्वात् ॥ अतोदुर्वारत्वं
युक्तमेव ॥ अनुशिष्टत्वेनेति ॥ "तस्यभावस्त्वतलौ" इतिशास्त्रेणानुशिष्टत्वेनतथात्वा-
दितिएतावत्तापरिच्छिन्नमित्यर्थलाभएतावत्त्वपदाल्लभ्यनीतिभावः ॥ तथेतीति । एतावतेति
पदस्यार्थइत्यर्थः । प्रसिद्धत्वादिति "यत्तदेतेभ्यः परिमाणेवतुप्" इत्यनुशासनेनतथा-
त्वात् ॥ अनुक्तत्वेनेति मूर्तामूर्तयाह्मणेनाम्नातगंधस्याप्यकथनेन ॥ अनुक्तस्यापिनिषेधां-
गीकारेसूत्रेप्रकृतपदस्यहिशब्दस्यचसुतरांविरोधइतिभावः ॥ प्रथमयोजनायामिति । तद्
भाष्ये"तत्रैपाक्षरयोजनानेतिनेतीतिब्रह्मादिश्यतमेवादेशंपुनर्निर्वक्ति–नेतिनेतीत्यस्यकोर्थः?
नह्येतस्माद्ब्रह्मणोव्यतिरिक्तमस्तीतिअतोनेतिनेनीत्युच्यतेनपुनःस्वयमेवनास्तिइत्यर्थः । तच्च
दर्शयतिअन्यदतःपरमप्रतिषिद्धंब्रह्मास्तिइति" इतिदर्शितायाम् ॥ युक्तमिति ॥ श्रुता-
वुक्तपदार्थकपरपदस्यसार्थक्यंतथाव्याख्यानएव (अ० २ पा० १ सू० २२) अधिकंतु
भेदनिर्देशात्" इत्यधिकरणसिद्धांतितरीत्यासिध्यतीत्यतोयुक्तं ॥ द्वितीययोजनायामिति ।
तत्रैव "यद्वापुनरेवमक्षराणियोज्यं तेनह्येतस्मादितिनेतिनेतिप्रपंचप्रतिषेधरूपादादेशनाद-
न्यत्परमादेशनंनब्रह्मणोस्तिइतितदातत्तोप्यनीतिचभूय इत्येतन्नामधेयविषयंयोजयितव्यं"
इत्यादिव्याख्याने तद्वत्तेति वाच्यत्वरूपविशेषवत्तेत्यर्थः ॥ तत्सत्तेति ब्रह्मसत्तेत्यर्थः ॥
तन्नियामकत्वेति । "प्राणावैसत्य"मित्याद्यग्रिमवाक्योक्तं प्राणानांनियामकत्वं मूलरूपत्वं
चब्रह्मणिसिध्येत ॥ "सउप्राणस्यप्राण." इतितलवकारश्रुतेरितिभावः ॥ एवमादयइति ।
तथार्थेसतिसूत्रेभूयः स्थानेपरपदंवदेत । विषयवाक्यस्वारस्यादिष्टसिद्धेश्च ॥ प्रतिषेध-
मात्रोक्तावपिआधारंविनाप्रतिषेधासंभवेन तदाधारब्रह्मसत्तायाअर्थलतः सिद्धासूत्रेग्रिमांश-
वैयर्थ्यंलौकिकंभूतराशिंमूर्तामूर्तपदाभिधेयंप्रतिषिध्यतदधिकब्रह्मसाधनेऽप्यलौकिकस्वाभि-
मतविशेषाप्रतिषेधादसदिष्टव्यवस्थासिद्धिः सूत्रेग्रिमांशस्याधिकंत्वित्यधिकरणेनगतार्थता ॥
किंचाग्रिमसूत्रेतत्पदनैवंसति पूर्वसूत्रोक्तंनिर्विशेषमेवपरामृश्यतइति तस्यैवप्रत्यक्षत्वासंराध-
नेसिद्धांतितास्यात् तथाचनिर्विशेषताभंगस्तदवस्थः ॥ शबलपरामर्शस्त्वशक्यः, असंनिधा-
नात् ॥ पूर्वत्रब्रह्मणएवप्रयीतिकर्मत्वेऽत्रतत्पदमंतरेवार्थसिद्धातस्यवैयर्थ्यंच ॥ सिद्धांतेतु
भूयसोऽप्राकृतस्यैतावत्त्वस्य तत्कर्मत्वात्तस्येहोपस्थितिवारणायतत्पदंसार्थकं ॥ अलौकिक-
मात्रविशेषवतश्चक्षुरादिगम्यतानौचित्यादव्यक्तत्वमाशंक्यसराधनेस्वच्छयाभिव्यक्तिरुक्त-
व्यवस्थानिर्वाहिकासिद्धांतिता ॥ तस्मादसदुक्तएवसूत्रार्थः ॥ एवमादयोदोषा श्रुति-
सूत्रार्थमार्मिकैरूह्याः ॥ यच्च (नहिशब्दाधिक्यमात्रेणार्थाधिक्यंयुक्तं) इत्युक्तं–तत्तुश्रुति-
सूत्रादौभाय सर्वत्रपदकृत्यंचिंतयतांसर्वेषांप्राचां दृष्टप्रयोजनरहितंपदंसूत्रेवाप्रत्याचक्षाणानां-
महाभाष्यकृतांचोन्मत्ततांस्वयमाक्षिपत्प्रेक्षावतामुपेक्षार्हं थ्यर्थशब्दाधिक्येसूत्रलक्षण-
बाधाच्च ॥ तेनसूत्रार्थातिरिक्तेसाधारण्ग्रंथेक्वचिदतिप्रसंगोप्यकिंचित्करः ॥ तस्मादस्मत्क-
मेवेदमनुकूलम् ॥

अतोब्रह्मणःकर्तृत्वस्यवेदोक्तत्वात्तन्निषेधस्यचानुक्तत्वात्तदंगीक्रिय-
तेकार्यत्वंब्रह्मणःकुत्रापिनप्रतिपादितंयेनप्रतिवंदीस्यात् तथाच यत्तु
इत्यादिनायदुक्तं तदसंगतमेव, नतस्येत्यर्थस्तुप्रागेवविवृतः ॥

सहस्रासे यत्तुस्वरूपलक्षणेत्यादिंनिषेधाच्चेत्यंतंभागंपरिहरंति–अतोब्रह्मणःइत्यादिनाविवृताहत्यंतेन ॥ अतः प्रकृतसूत्रस्यतादर्थ्यार्थकत्वात् ॥ चेदोक्तत्वादिति । "मुंडकमहावल्ल्यादिषु "कर्तारमीशं, तदात्मानंऽस्वयमकुरुत" इत्यादावुक्तत्वात् ॥ तन्निषेधस्येति नह्यलौकिकंनिरंकुशजगत्कर्तृत्वंब्रह्ममात्रनिष्ठंवेदेक्वापिनिषिद्धं ॥ कार्यत्वमितिहेतरनिरूपितकार्यत्वंतुब्रह्मणिश्रुत्यादिनाक्वापिनोक्तं ॥ प्रत्युत (अ० २ पा० ३ सू० १७) "नात्माऽश्रुते" रित्यादौतत्प्रतिषेधःसिद्धः ॥ अग्रेदंज्ञेयं–यदिशुद्धस्वरूपेकर्तृत्वंवेदान्तमिप्रेतंस्यात्तर्हिस्वरूपलक्षणवाक्यशेषेतत्प्रतिषिद्धंस्यात् ॥ नचैवंकार्यत्वस्याप्यापत्तिःशंक्या । नहि कर्तृत्वस्यतत्राप्रतिषेधमात्रंकिंत्वशनक्रियायांब्रह्मणःसहभावकथनेनप्रत्युतनद्बोधितं कार्यत्वंतुतुच्छजडजीवव्यावर्तकैःसत्यज्ञानानंतपदैः स्वरूपलक्षणवाक्येपिनिवारितम्; अतस्तदनापत्तेः ॥ नचतत्रसहशब्दोयुगपदर्थःतस्यसर्वकामशब्दस्यचशक्तिंविहायलक्षणादरेमानाभावात् आत्ममिथुनादिश्रुत्यासहनिकर्तुःब्रह्मणेतितृतीयायानिर्देशेनचसहभावार्थकत्वस्यैवौचित्यात् नचानंतपदात्कर्तृत्वनिषेधशंक्यः; अपरिच्छिन्नेपितस्याविरोधात् ॥ कालेपिजन्यानांजनकत्वादर्शनात् विभुजीवत्वादेर्जीवेपितदंगीकारात् ॥ पृथिव्यादौरूपस्पर्शयोरिवकुलालादौपरिच्छेदकर्तृत्वयोःसहचारदर्शनेपिप्रत्यक्षबलाद्वायौनीरूपेस्पर्शवदपरिच्छिन्नेपिपरमात्मनिश्रुतिबलात्तत्स्वीकार्यं ॥ नतस्येतिवाक्यंतुस्वभिन्नकार्यस्यजीववत्सुकृताद्यपेक्षायाश्चनिषेधकमित्युक्तंप्राक् ॥

तस्माद्यथावेदेब्रह्मप्रतिपादितंतथैवोपगंतव्यं वेदेतुनिर्गुणत्वेनानंतगुणत्वेनोभयरूपेणैवब्रह्मप्रतिपादितं अतएवोभयव्यपदेशात्त्वहिकुंडलवत् प्रकाशाश्रयवद्वातेजस्त्वादितिसूत्रद्वयेनायमेवार्थोव्यासैर्दर्शितः ॥ सूत्रार्थस्तु पूर्वमुक्तएव ॥ यत्तुमतांतरपरेसूत्रेइतिस्वकल्पितश्लोकव्याख्याने अपिसंराधनेप्रत्यक्षानुमानाभ्यां १ प्रकाशादिवच्चावैशेष्यंप्रकाशश्चकर्मण्यभ्यासात् २ अतोनंतेनतथाहिलिंगं ३ उभयव्यपदेशात्त्वहिकुंडलवत् ४ प्रकाशाश्रयवद्वातेजस्त्वात् ५ पूर्ववद्वा ६ इतिसूत्रषट्कस्यार्थवर्णनंस्वमतानुसारेणकृतं,–तन्नसत् ॥ तत्रप्रथममपिसंराधनसूत्रेणकश्चिन्निर्णयोनसिद्धः प्रत्युत ब्रह्मणोदृश्यत्वबोधनेनजीवब्रह्मणोःसंराधकसंराध्यभावाद्भेदबोधनेनचसंशयस्यैवोत्पत्तिरिति॥ तदुत्तरंचप्रकाशादिवत्सूत्रेजीवब्रह्मणोरभेदंयुक्त्याव्याख्यायतत्रप्रमाणापेक्षायांवेदांतेषुजीवप्राज्ञयोरभेदप्रतिपादनाभ्यासोहेतुत्वेनव्याख्यातःसोपिशिथिलः; सौत्रस्याभ्यासपदोक्तस्यहेतोरवैशेष्येकर्मणिप्रका-

---

यत्तु स्वरूपलक्षणवाक्यशेषेकर्तृत्वस्यानिषेधाद्ब्रह्मणःकर्तृत्वमित्याह,–तन्न; कार्यत्वस्याऽनिषेधात्तत्वस्याऽप्यापत्तेः ॥ परिच्छेदमात्रनिषेधकानन्तपदेन कर्तृत्वनिषेधस्य सिद्धत्वाच्च ॥ नतस्यकार्यमितिवाक्यान्तरे कार्यस्य निषेधेन तन्निरूपितकारणत्वस्याऽर्थान्निषेधाच्च ॥

शेचसाधारण्येनोक्ततयाजीवब्रह्माभेदाभ्यासएवनियमनेप्रमाणानुपलंभात् वेदांतेषुतयोरभेदस्येवभेदस्याप्यभ्यासदर्शनाच्च॥ यदप्युभयव्यपदेशादिसूत्रद्वयमेकदेशिमतीयत्वेनव्याख्यायपूर्ववद्वेतिसूत्रव्याख्यानेतद्दूषणमुक्तंजीवात्मनःपरमात्मसंस्थानभूतत्वेएकदेशभूतत्वेवांगीक्रियमाणेबंधस्यपारमार्थिकत्वेनातिरस्कार्यत्वापत्त्यामोक्षशास्त्रवैयर्थ्यमितितदपितथा॥ बहुस्यांप्रजायेयेतीच्छाभ्यांभेदस्यागंतुकत्वावगमाद्बंधस्यपारमार्थिकत्वेपितथात्वात्वस्त्रप्रक्षालनेनतन्मालिन्यस्येवशास्त्रीयसाधनैरीश्वरकृतमर्यादारूपैस्तन्नाशसंभवेनशास्त्रवैयर्थ्याभावात्॥ अतएव "पराभिध्यानात्तुतिरोहितंततोह्यस्यबंधविपर्ययाविति" सूत्रमपिसंगच्छते। अहिकुंडलसूत्रे तुशब्दस्तुपूर्वपक्षव्युदासार्थः। पूर्ववद्वेतिसूत्रे वाशब्दोपि अथवेत्यर्थकः, अथवा अरूपवदेवहीत्यादिपंचसूत्र्यायःसिद्धांतःकथितःप्रपंचविलक्षणंतत्समवायित्वेपिनतत्प्रकारकं, नापिसमवायिमात्रं। किंतु ततोप्यतिरिक्तंकश्चिन्मात्रस्वरूपंयदाविर्भवति तदाव्यवहार्यंभवति। तत्रजडजीवधर्माऔपचारिकाइत्येवंरूपः तादृशंकारणरूपंब्रह्मप्रतिपत्तव्यमित्यर्थः। अयमाशयः-वेदस्थापनार्थंहिप्रवृत्तिःतत्रयथाक्षरमात्रस्यापिबाधोनभवतितथावक्तव्यं; एतदर्थमेवोभयरूपतांगीकृतातत्रधर्माणांस्वरूपनिर्वाहार्थमवश्यंब्रह्मवैलक्षण्यमंगीकर्तव्यं तथासतिएकमेवाद्वितीयमितिश्रुतिविरोधःस्यात्तथाचतत्रकथंविचारः कर्तव्यइत्याकांक्षायांकारणविचारेश्रुतायेकविज्ञानेनसर्वविज्ञानस्यप्रतिज्ञातत्वाद्धर्माणामपिब्रह्मरूपत्वंवक्तव्यं तदैवैतदुपपद्यते। नतुधर्माणांनित्यभिन्नत्वेआविद्यकत्वेवा आद्येभिन्नत्वे न द्वितीयेमिथ्यात्वे नतत्प्रतिबंधादित्यभिप्रायः। एतेनधर्माणांमिथ्यात्वेनाभेदबोधनेपूर्ववद्वेतिसूत्रमुपष्टंभकतयावदंतःपरास्ताः॥

सहस्राक्षे यत्तुउभयेत्यादिसूत्रंचसंगतमित्यंतं भागंनिरस्यंति-तस्माद्यथावेदइत्यादिनापरास्ताइत्यंतेन॥ वेदेष्वित्यादि॥ यथाश्वेताश्वतरे "साक्षीचेताकेवलोनिर्गुणश्चे" त्युक्त्वा "एकोवशीनिष्क्रियाणांबहूनामेकंबीजंबहुधायः करोती"त्यादि तथातत्रैव "ततोयदुत्तरतरंतद्रूपमनामय" मित्येतदग्रे "सर्वाननशिरोग्रीवःसर्वभूतगुहाशय" इति। एवंतैत्तिरीयेपि "यदेकमव्यक्तमनंतरूप" मिति। इत्थंभाष्यप्रकाशादिदर्शितदिशातत्रतत्रोभयव्यपदेशाद्रष्टव्याः॥ यत्तुमतांतरेत्यादि। यद्यपिअपिसंराधनसूत्रंसहस्राक्षेनोपन्यस्तंतथापिप्रकाशादिवत्सूत्रावतरणेतदर्थोपिसूचितः। अतोमूलेसूत्रपक्षस्येत्युक्तिर्नायुक्ता॥ तद्दूषणायभाष्यप्रकाशमेवसुखेनबोधार्थंकिंचिद्भिन्नपाठमनुवदंति-अपिसंराधनेत्यादिना॥ तत्संमतेप्रकाशादिवत्सूत्रस्यार्थेनीरूपमाकाशंविहायदृश्यस्यप्रकाशस्यैवसूत्रेकंठरवेणोपादानेबीजंमृग्यं॥ प्रकाशश्चेत्यंशस्यार्थश्चकोव्याख्यातइतिचिंत्यं; व्यवहितस्यकर्मणीत्यस्यपूर्वत्रान्वयेविवक्षितेपरत्रसदु-

धारणे वीजतयाभ्यर्थं तथाचेति अभिन्नस्य कर्मशब्दस्यानुल्याधर्मत्वे भावनयासत्येऽप्यन्य च नातकर्मशब्दस्यैवप्रयोगेजीवचान्वेष्य अभ्यासपदस्यार्थान्वययोरनिर्णयस्तुमूलएवदर्शित । एवमतोनतेनेतिसूत्रेऽप्यतदशब्दार्थतरममतेमानमृग्य मत्रवदभावात् ॥ तृतीयातमात्रश्रवणे भविद्याविधूयेत्यादेर्गच्छतीत्यतस्य पदस्याध्याहारे सूत्रकाराभिप्रेततायागमक चिन्त्य । वस्तुतस्तु सूत्रद्वयमिदं पूर्वपक्षयोपरं ॥ अतएवोभयव्यपदेशसूत्रे तुशब्द पूर्वपक्षव्यावर्तक प्रयुक्त ॥ सहि (अ २ पाद १ सू० ६) "दृश्यतेतु" (अ ३ पा० २ सू० २२) "सामान्यात्तु" इत्यादावेिव पूर्वसूत्रयोक्तदोषनिरस्ततामेवगमयति ॥ मतान्तरपरत्वेतुवत्रतुशब्द नैवभूयात् सिद्धान्तसूत्राविरिक्तस्थापितस्य प्रयोगादर्शनात् ॥ किंतुसूत्रद्वयएववविकल्पार्थक वाशब्दपूर्वंनतसूत्रएवपक्षव्यावर्तक तुशब्दमभूयात ॥ यदतिरेव-अत प्रकाशादिवदित्यादित्रिसूत्रमेकमधिकरणवत स्वसमतस्यैकदेशिमतस्यच पक्षान्तरस्यबोधक वाशब्दघटित सूत्रद्वयमितिसमञ्जस ॥ नचोत्तरत्रवाशब्दात्पूर्वसूत्रोक्तस्यबाध शक्य, पूर्वत्रापरत्रैवचवाशब्दप्रयुञ्जीत उभयत्रतत्प्रयोगेणतु एकोदेव केशवोवाशिवोवेत्यादिवत् द्वेअपिस्वपक्षेमतेइति बोध्यते। मतीपरत्वेनेति। गदादिपुपाठविवक्षयाल्ल। तदपितयेति। शिथिलमित्यर्थ। इच्छाभ्या

यत्तु उभयव्यपदेशात्त्वहिकुण्डलवत् प्रकाशाश्रयवद्वातेजस्त्वादिति सूत्रे स्वमतोपष्टम्भकतयोपन्यस्ते तत्राह—मतान्तरपरेसूत्रेइति ॥ तथाहि साध्यसाधकभावे सति परेतरात्मनोरन्यत्व स्यादित्याशङ्क्य प्रकाशादिवच्चावैशेष्य प्रकाशश्चकर्मण्यभ्यासात् यथा प्रकाशाकाशसवितृप्रभृतयोऽङ्गुल्यिकरकोदकप्रभृतिषु कर्मसु उपाधिषु सविशेषाइवाऽवभासन्ते। नच तत्र स्वाभाविकीमविशेषात्मता जहति एवमुपाधिनिमित्तएवायमात्मभेद स्वतस्त्वैकात्म्यमेव ॥ तथाहि वेदान्तेषु अभ्यासेनाऽसकृज्जीवब्रह्मणोरभेद प्रतिपाद्यते, अतोऽनन्तेन तथाहिलिङ्गम्। अत स्वाभाविकत्वादभेदस्याऽविद्याकृतत्वाद्भेदस्यविद्ययाविद्यां विधूय जीव परेणानन्तेन प्राज्ञेनात्मना एकतां गच्छति तथाहिलिङ्गम् सयोहवैपरमंब्रह्मवेदब्रह्मैवभवति ब्रह्मैवसन्ब्रह्माप्येति इतिसूत्रद्वयेनाऽभेदमुक्त्वा उभयव्यपदेशात्त्वहिकुण्डलवत् प्रकाशाश्रयवद्वातेजस्त्वात् इति मतद्वयमुपन्यस्त ॥ स्वमतविशुद्धये भेदाभेदयोर्व्यपदेशादहिकुण्डलवदत्र तत्त्व भवितुमर्हति, यथाऽहिरित्यभेद कुण्डलाभोगप्रांशुत्वादीनीतिभेद एवमिहापीति ॥ अथवा प्रकाशाश्रयवदेतत्प्रतिपत्तव्यम् यथा प्रकाश सावित्र तदाश्रयश्च सविता नात्यन्तभिन्नावुभयोरपि तेजस्त्वाविशेषादथच भेदव्यपदेशभाजौ भवतएवमिहापीति ॥ एव मतान्तरमुपन्यस्य पूर्ववद्वाइत्युक्तम् ॥ यथावा पूर्वमुपन्यस्त प्रकाशादिवच्चावैशेष्य तथैतद्भवितुमर्हति तथाह्यविद्याकृतत्वाद्बन्धस्य विद्यया मोक्षउपपद्यते ॥ यदिपुन परमार्थत सस्थानभूतोऽहिकुण्डलवदेकदेशभूतोवा प्रकाशाश्रयवदऽभ्युपगम्येत तत पारमार्थिकस्य बन्धस्य तिरस्कर्तुमशक्यत्वा मोक्षशास्त्रवैयर्थ्यं प्रसज्यते ॥ नचाऽत्रोभौ भेदाभेदौ श्रुतिस्तुल्यवद्व्यपदिशति। अभेदमेवहि प्रतिपाद्यत्वेन निर्दिशति–भेदतु पूर्वप्रसिद्धमेवाऽनुवदति, अर्थान्तरविवक्षयाप्राप्तत्वेन शास्त्राप्रतिपाद्यत्वात् ॥ अतएवाहिकुण्डलसूत्रेतुशब्द उत्तरसूत्रेवाशब्द पूर्ववद्वेतिसूत्रच सगतम् ॥

मिति ॥ यद्बहुभवनेच्छयाप्रकृष्टभवनेच्छयाच ॥ "इंततिरोभानि" इत्यादीच्छाप्यत्रानुसंधेया ॥ तयेच्छयानंदांशतिरोभावादात्मन्मतेजीवभावः ॥ अतएव (अ० १ पा० १ सू० १५-१६) "नेतरोनुपपत्तेः" इत्यानंदमयतानिषेधः ॥ नत्वविद्याकृतोयेनाज्ञानालयः स्यात् ॥ अतोभेदोप्यतन्तुद्भवत्स्वदागंतुकऐच्छिकत्वात् ॥ तेनभेदोत्तरमेनसंभवन्नविद्यासंबंधरूपोबंधोप्यागंतुकः नतुभ्रमरूपोवस्त्रादिमालिन्यवत् ॥ तत्संबंधस्यमिथ्यात्वेसंसारोपिनस्यात् ॥ असंबद्धयापितयातत्संभवेमुक्तेष्वपिसभवेत् ॥ तस्मादविद्यायाज्ञानत्वात्तत्संबंधोनमिथ्याभूतः स्फटिकेजपाकुसुमसंबंधवत् ॥ किंतुस्फटिकेतज्जन्यलौहित्यप्रत्ययवदविद्याबंधजन्योहंताममतारूपसंसारएवमिथ्या ॥ तस्यामिथ्यात्वंतु (श्लो० २७) एतद्वारोहिससारोगुणकर्मनिबंधनः । अज्ञानमूलोपार्थोपिपुंसःस्वप्नइवेयतेइतिसप्तमस्कंधसप्तमाध्यायादिषु सर्वत्र स्फुटंदर्शितं ॥ तस्यैवमिथ्यात्वंचनिबंधप्रपंचोभगवत्कार्यंइत्यत्रनिर्णीतं ॥ बंधजन्यत्वंचतत्रैव पंचपर्वात्वविद्येयंयद्बन्धोयातिसंसृतिमित्यत्रचस्फुटमुक्तं जपाकुसुमापसारणेलौहित्यप्रत्ययवदविद्यापगमेनिवर्तेत ॥ तदेतदाहुः-भेदस्येत्यादिना । बंधनाशेतद्योग्यतापादकस्तिरोभावमूलकोजीवभावोप्यानंदांशस्यैश्वर्यादिभगवद्धर्माणांचपुनराविर्भावेनावतिष्ठेत ॥ अतएव (अ० ३ पा० २ सू० ५) पराभिध्यानात्त्वितिसूत्रपरस्यभगवतइच्छयाभगवद्धर्मतिरोभावस्ततएवजीवस्यबंधोविपर्ययश्चोक्तःसंगतः ॥ भेदस्यतिरोभावमूलकत्वादेवपुनरानंदाद्यभिव्यक्तावैक्यंमोक्षश्चनानुपपन्नः ॥ अतएवद्वितीयस्यतृतीयस्मिन् (सू० ३०) यावदात्मभावित्वाच्चेत्यादिसूत्रत्रयेणआनंदस्यैश्वर्यादेश्चब्रह्मगुणस्यमुक्तावात्मानमनतिक्रम्यवर्तनशीलतयापुनरतिरोभावं बाल्येसेकादिसामर्थ्यलक्षणपुंस्त्वस्यैवपूर्वसतएवानंदादेर्मुक्तावभिव्यक्तिं एवमनंगीकारेजीवेसच्चिदानंदानां सदोपलब्धेः सदानुपलब्धेः प्रसंगादिदोषंच निर्णीतवान्सूत्रकारः ॥ अतोनशास्त्रवैयर्थ्यं ॥ एवंप्रकाशमनूद्यस्वयमाहुः—अतएव पराभीत्यादि ॥ पूर्वपक्षेति ॥ सूत्रद्वयोक्तपूर्वपक्षेत्यर्थः ॥ उभयव्यपदेशसूत्रार्थस्तुदर्शितचरः ॥ यस्तुभेदाभेदयोरित्यादिरिहापीत्यंतस्तदर्थउक्तः सनसंमतः । तथासति कुंडलादिवदिति वदेत् उभयव्यपदेशइतिप्रथमांतमेवोच्चारयेत् ॥ वक्तितुहेतुं अतोविरुद्धोभयधर्मव्यपदेशाद्ब्रह्मसरलाहिवत्तत्कुंडलवच्चोभयरूपमित्येवार्थः ब्रह्मेतिसर्वत्रानुषंगात् ॥ एतदग्रे (सू०२८) "प्रकाशाश्रयवद्वातेजस्त्वात्" इतिसूत्रितं ॥ तत्रयथापटरूपंपटकार्यंतथाब्रह्मधर्माब्रह्मकार्यभूताअतस्तद्भिन्नाएवेतिप्राप्तेइदमुच्यते ॥ यथाआतपज्योत्स्नादयः प्रकाशास्तदाश्रयाः सूर्यचंद्रादयश्चतेजस्त्वेननभिन्नाः प्रभायारूपविशेषत्वाद्द्वादशस्कंधचतुर्थाध्याये (श्लो० २३) दीपश्चक्षुश्चरूपंचज्योतिषोनपृथग्भवेदित्युक्तेः । तथाब्रह्मापिब्रह्मतयानात्मधर्मातिरिक्तंतेजः शब्दवाच्यत्वात् ॥ मुंडकछान्दोग्यकठतैत्तरीयादिषु "तच्छुभ्रंज्योतिषां ज्योतिः ॥ अथयदतः परोदिवोज्योतिर्दीप्यते ॥ परंज्योतिरुपसंपद्य ॥ भारूपः तस्यभासा सर्वमिदंविभाति छायातपौब्रह्मविदोवदंति शुक्रेणज्योतींषिसमनुप्रविष्टः" स्मृतिष्वपि "यत्तेजोविद्धिमामकं ब्रह्मज्योतिर्निर्गुणा ब्रह्मज्योतिः सनातनं" इत्यादौब्रह्मतद्धर्मयोस्तद्वाच्यत्वंप्रसिद्धं ॥ एतेन "प्राणन्नेवप्राणोभवतिवदन्वाक् ॥ नेहनानास्तिकिंचन" इत्यादिवाक्यजातंतदभेदबोधकंसगतार्थं ॥ ब्रह्महिसर्वधर्माश्रयः ॥ तेचधर्माब्रह्माभिन्नाएव-

तत्कार्यप्रपंचेतदिच्छानुरोधात्केचित्क्वचित्केचिदनुवृत्ताभुग्नगंधद्रवपुष्पादौक्षारमाधुर्यादिक- मिवस्त्रणशर्करादाविति प्रपंचगतान्यपितेब्रह्माभिन्नाएव किंपुनः कारणावस्थायांतन्निष्ठाः ॥ अतएवभगवता रसोहमप्सुकौंतेयप्रभास्मिशशिसूर्ययोरित्यादौ यदादित्यगतंतेजइत्यादौ- चधर्माणांस्वाभिन्नत्वैवदर्शिता ॥ धर्माणामब्रह्मत्वेइमानिनामरूपाणिनसमगच्छेरन् ॥ अतः प्रकाशाश्रयवदभेदंसिद्धान्तसमतंप्रतिपाद्यएकदेशिमतस्यापिसर्वथाहेयत्वंवारयितुंतमपिप- क्षमाह (सू० २९) "पूर्ववद्वा" इति ॥ एतदर्थंस्फुटीकर्तुमन्नत्यंभाष्यंप्रकारांचेकी- कृत्यप्रायेणाक्षरशोनुवदंति–अथवाअरूपवदित्यादिना ॥ अत्रप्रपंचविलक्षणमित्यादिररूप- वत्सूत्रस्यार्थः किंत्वित्यादिराहचेतिसूत्रस्ययदाविर्भवतीत्यादि-प्रकाशवत्सूत्रस्य तत्रजडेत्या- दिरग्रिमसूत्रयोरितिध्येयम् ॥ अस्मिन्पक्षेनिर्धर्मकमेवब्रह्मपूर्वंधर्मरूपंभवतितत प्रपंच- रूपं ॥ तस्यधर्मरूपतयाभवनंतु "कामस्तदग्रेसमवर्तताधि" इत्यादौतद्ब्रह्मैवअग्रेपूर्वंकामः समवर्ततइच्छारूपमभवदित्याद्यर्थप्रतिपादनेप्रसिद्धं ॥ पूर्वंचनासदासीदित्यादिप्रतिषेधो- ध्येकदेशिमतेप्राङ्निर्धर्मकताभिप्रायः ॥ अतएवप्रतिषेधाच्चइत्यग्रिमसूत्र अन्यारसर्वैनिगद- व्याख्यातं ॥ तत्प्रतिबंधादितिएकविज्ञानेनसर्वविज्ञानस्यप्रतिबंधात् एवंदंतोभाष्यतत्प्र- काशयोरनुवाद-नचपरत्रोक्त्याऽस्यपक्षस्य प्राबल्यंशंक्यं; परत्रोक्तिमात्रस्यप्राबल्यजनक- ताया पूर्वतंत्रे (अ० ५ पा० १ सू० २) "अर्थाच्च"त्यधिकरणसिद्धयवागूपाकन्या- यादिबाधितत्वात् पूर्वत्रयुक्तिप्राबल्यात् सर्वश्रुत्यनुग्रहप्राबल्याच्च ॥ त्वयातुनैतदाशंकितु- मपिशक्यं, "नतत्रस्था" इत्यत्रस्वोक्तिविरोधात् सूत्रेपुसर्वत्रअरमपादोक्तमुक्तौस- गुणत्वरूपापकर्षस्यतान्नकै कल्पनाच्च ॥ अनयोश्चपक्षयोः प्रथमउत्तमाधिकारिणामर्थेद्विती- योमध्यमाधिकारिणामितिद्वितीयस्कंधे नात्मकर्माणिजन्मादौपरस्यानुविधीयतइत्यादिना- व्यासपादैरेवदर्शितं ॥ अधिकंतुसकलमाकरेभ्योवगंतव्य ॥ (अहिकुंडलसूत्रेतुशब्द) इत्यादिकंतुप्रागेवापास्तं ॥

यदपि (अतएवचस्थानतोपिपरस्योभयलिंगंसर्वत्रहिअरूपवदेव हितत्प्रधानत्वादितिसूत्रेचसंगच्छेते) इत्यादिनास्वमतोपष्टंभकत्वेन सूत्रद्वयमुपन्यस्यतयोरर्थवर्णनंसूत्रार्थस्त्वित्यादिनाकृतं ॥ तदपिनस- म्यक्, तादृशव्याख्यानस्यायुक्तत्वात् सर्वत्रहीतिहेतुबोधकेपदेनिर्वि- शेषस्यैवोपदेशादित्यस्यार्थस्यासौत्रत्वेनतृतीयाध्यायेयाशास्त्रेवाईद- शस्यशब्दस्यार्थस्यत्वकाप्यनुक्ततयाऽनुवृत्तेरपिकर्तुमशक्यत्वेनाभ्यु- पगमैककारणत्वात् अशब्दमस्पर्शमितिविषयवाक्योत्तरार्धेऽपि अना- द्यनंतंमहतःपरंध्रुवंनिचाय्यतमित्यनेनमहतःपरमित्यादिनापूर्वोक्तस्य ध्रुवस्यपुरुषस्यपरामर्शेनप्राप्तायाःसविशेषतायाअनादरेणतद्विरुद्धत्वा- त्निर्विशेषमेवब्रह्मेतिसिद्धांतस्यात्रैवसिद्धावग्रिमस्यारूपवत्सूत्रस्यवैय- र्थ्यप्रसक्तेः तत्रसाध्यमानस्यात्रसिद्धावत्रिदंशांगीकारइत्यस्याप्ययुक्त-

त्वाच्च । तथा अरूपवत्सूत्रेतत्प्रधानत्वादित्यस्यनिर्विशेषब्रह्मप्रधानत्वा-
दितिव्याख्यानमप्ययुक्तंतदुपन्यस्तानांविषयवाक्यानामुपक्रमादिवि-
चारेतथात्वस्यालाभात्तथाहिप्रथमंतत्रास्थूलवाक्यंतच्च "कस्मिन्वाआ-
काशओतश्च" तिगार्गीप्रश्नात्प्रवृत्तंस्थूलत्वादीन् लौकिकान्धर्मान्निषे-
धत्प्रशासितृत्वांबरांतधारकत्वद्रष्टृत्वादीनाकाशोपादानत्वांतानलौकि
कान्दर्शयति अशब्दवाक्यंतुभाग्याख्यातंआकाशवाक्येचनामरूप-
निर्वाहकत्वं "दिव्योह्यमूर्त" इतिवाक्यंचेयत्तापरिच्छिन्नपरिमाणंनिषे-
धत्पुरुषत्वंबाह्याभ्यंतरसाहित्यंबाह्याभ्यंतररूपत्वंचादर्शयदक्षरात्पर-
त्वमग्रेश्रावयति "तदेतद्ब्रह्म" तिमधुविद्योपसंहारस्थमपिमधुविद्या-
याउपक्रमे "अयमेवसयोयमात्मेदममृतमिदंब्रह्मेदंसर्वं" मित्येवंचतु-
र्दशपर्यायैरभ्यस्तंसर्वत्वंमध्यउक्तंसर्वभूतपतित्वादिकं "अयंवैहरयोयं-
वैदशचसहस्राणिबहूनिचानंतानि" चेत्यनंतरूपतांश्रावयतीतिनिर्विशे-
षब्रह्मप्रधानतायावक्तुमशक्यत्वात्नचतदेतद्ब्रह्मेतिभिन्नंवाक्यंपूर्वेभ्य-
इतिवाच्यं; तच्छब्दात्पूर्वपरामर्शाद्विभागेसाकांक्षत्वेनैकवाक्यतयात-
दभावात् । उक्तंच अर्थैक्यादेकंवाक्यंसाकांक्षंचेद्विभागेस्यादिति । नचे-
दंतच्छब्देनपूर्वोक्तरूपत्वंपरामृशदप्यपूर्वमित्यनेनतन्निषेधतीतिनदोष-
इतिवाच्यं । एवंतर्ह्यनपरमित्यनेनानंतरत्वादीनग्रिमानपिनिषेधच्छू-
न्यवादमेवप्रसंजयेत् । अतोत्रपूर्वत्वादीनांधर्माणामेवनिषेधइत्येवांगी-
कार्यं; तथासति नशुष्केणनचार्द्रेणजहारनमुचेःशिर इत्यत्रयथोभया-
त्मकस्यफेनस्याशुष्कत्वमनार्द्रत्वमेवमन्याप्येकैकतन्निषेधेनसर्वात्मकमे-
वबोध्यतेइत्येवयुक्तं ॥ अतएवगजेंद्रस्तुतौ "सवैनदेवासुरमर्त्यतिर्यङ्-
स्त्रीनपंढोनपुमान्नजंतुः। नायंगुणःकर्मनसन्नचासन्निषेधशेषोजयताद्-
शेष" इत्यशेषत्वमुक्तं तथा शुकैरपि "एवंगजेंद्रमुपवर्णितनिर्विशेषंब्रह्मा-
दयोविविधलिंगभिदाभिमानाः ॥ नैतेयदोपससृपुर्निखिलात्मकत्वात्त-
त्राखिलामरमयोहरिराविरासीत्" इतिनिर्विशेषस्यनिखिलात्मकत्वंबो-
धितं,तथात्राप्यंतेसर्वानुभूरितिश्राव्यते सर्वसत्वेएवसर्वानुभवितृत्व-
संभवादिति । नचेदंप्रलयेनसंभवतीतिवाच्यं । कोनामप्रलयः? ध्वंसो
वाप्रतिसंचरोवा? ॥ नाद्यः;असत्कार्यवादप्रसंगात् । द्वितीयश्चेदसदा-
द्यगोचरत्वेपिसर्वंब्रह्मगोचरोस्त्येवेतिनासंभवः । वस्तुतस्त्वखंडब्रह्म-
वादेअसदाद्यगोचरत्वमेवप्रलयःक्रमेणचायुगपद्वातद्गोचरत्वमेवसृष्टि
रितीच्छयासमर्थनान्नकश्चिद्दोषः एवमेवास्थूलादिवाक्योक्तनिषेधस्य-
लेपियोध्यम् इति यच्चयत्त्वित्यादिनाऽस्मन्मतमनूद्यतन्नेत्युक्त्वा (यतो

व्यवहारविषयोव्यवह्रियते नतुव्यवहारविषयत्व) मित्युक्तं,–तत्तुच्छं;
व्यवहारविषयत्वस्यापिव्यवहाराविषयत्वादन्यथाव्यवहारविषयत्व-
स्याव्यवहार्यत्वापत्तेः ॥ नहितद्व्यवहाराविषयइतिशक्यतेवक्तुंप्रमेये-
प्रमेयत्वेचप्रमेयत्ववद्वाच्यत्वेवाच्येचवाच्यत्ववद्व्यवहारविषयेतद्विष-
यत्वेपिव्यवहारविषयत्वेसत्वेबाधकाभावात् ॥ एवंतत्प्रधानत्वादिति
सूत्रांशस्यव्याख्यायामपि (प्रधानपदस्वारस्यभंगात् अरूपवदेवहि-
तत्परत्वादितिब्रह्मैवहितत्परत्वादितिवावक्तुमुचितत्वात्) इत्यादिय-
दुक्तं तदपिपूर्वापरसूत्रार्थानालोचनस्यमतदोपानवबोधाभ्यामेवोक्तं
नस्यानतोपीत्यादिपूर्वसूत्रैर्ब्रह्मस्वरूपविचारआरब्धः। तत्रजडजीवधर्मा
ब्रह्मणिकचिद्विधीयंतेकचिन्निषिध्यंते तथाचब्रह्मजडजीवधर्मवन्नवेति
संदेहेरूपवत्सूत्रंप्रवर्ततेब्रह्मैवेत्युक्तेतादृशसंदेहानिवृत्तेः सूत्रंव्यर्थमेव
स्यात् ॥ एवंतत्प्रधानत्वादित्युक्तौसर्वेषुवेदेषुब्रह्मणःप्रधानत्वात्
"सर्वेवेदायत्पदमामनंति वेदैश्चसर्वैरहमेववेद्य" इत्याद्यपिसंगच्छते।
तत्परत्वादितियद्युच्यतेतदा "ज्योतिष्टोमेनस्वर्गकामोयजेते" त्यादि-
वाक्यानांकर्मपरत्वाद्ब्रह्मपरत्वाभावाद्व्यासंगतिःस्यात् ॥ तन्निवेशेच
तेषांवाक्यानांब्रह्मप्रधानत्वमस्त्येव ॥ कथमितिचेदुच्यते–सर्वस्यैव-
पूर्वकांडस्य "तमेतंवेदानुवचनेनब्राह्मणाविविदिषंतियज्ञेनदानेनतप-
साऽनाशकेन" इत्यादिनाब्रह्मज्ञानांगत्वबोधनादंगिनएवप्राधान्यंनत्वं-
गस्य। त्वन्मतेतुयथाऽस्थूलादिवाक्यानिनिराकारब्रह्मतत्वप्रधानानि
तथा सहस्रशीर्षेत्यादिवाक्यानिसाकारब्रह्मप्रधानानियथाऽस्थूलादि
वाक्याच्चिराकारंब्रह्मप्रतिपत्तव्यं तथासाकारमपिप्रतिपत्तव्यंस्यात् ॥
तस्मात्त्वन्मतएवप्रधानपदस्वारस्यभंगः।अधिकंतुभाष्यादितोऽवसेयं॥
"नतत्ररथानरथयोगाः पृथगात्मानं प्रेरितारंचमत्वा" इत्यादिवेदस्य-
यदिभेदप्रतिपादकत्वंतवाभिमतंतदाऽद्वैतप्रतिपादनार्थंतवापिप्रयासो-
व्यर्थएव। यदितत्र लोकसिद्धएवभेदोनूद्यतेतर्हिकरादीनामभेदप्रति-
पादनाग्रहोनिर्मूल इतिकथनमसंगतस्यात् ॥ एतेननतत्ररथाइत्यादि-
कःप्रलापोनिरस्तः। एवं सर्वेवेदायत्पदमामनंतीत्यत्रपद्यतेऽनेनेतिपदं
प्राप्त्युपायमित्यर्थस्य प्रतीतिसंभवेलक्षणायांमानाभावाल्लक्षणयात्व-
याप्यर्थोवाच्य) इति कथनमसंगतमेव। एवंगीतावाक्येपिलक्षणायां-
मानाभावेनविद्वन्मंडनाद्युक्तोविरोधोदुरुद्धरएवेति (विद्वन्मंडनाद्युक्त-
स्तद्विरोधोपिपरिहृत) इत्यसंगतम् ॥

सहस्रासे अतएवनस्थानतइत्यादिंविरोधोपिपरिहृतद्वत्यंतं भागमपाकुर्वंति-यदपि-अतएवेत्यादिनापरिहृतइत्यसंगतमित्यंतेन । अत्रापिभाष्यप्रकाशमेवाक्षरशोऽनुवदंति-सर्वग्रहीतिहेतुबोधकइत्यादिनाअसौत्रत्वेनेति ॥ नहिसूत्रेनिर्विशेषोपदेशादितिपदमस्ति ॥ अध्याहारेतुविनिगमनाविरह इतिभावः ॥ अशब्दमित्यादि ॥ इदंकठवल्लीषुतृतीयवल्लीस्थं ॥ पूर्वोक्तस्येति ॥ तत्रैव "अव्यक्तात्पुरुषःपरः" ॥ इत्यादिनोक्तस्यकिंचोभयलिंगनिषेधेनिर्विशेषतायाअप्यस्थूलादिवाक्यसिद्धायानिषेधसिध्यातत्रैव निर्विशेषोपदेशस्यहेतुत्वासंगतिःस्वमतस्यापित्यागःशून्यवादप्रसंगश्चेत्यादिकमपितन्मतेद्रष्टव्यं ॥ अरूपवत्सूत्रेपिरूपपदमात्रोच्चारणेआदिपदानुपादानेचसत्यपिरूपाद्याकाररहितमित्यर्थःकथंनिर्णतव्यः ? ॥ तदुपन्यस्तानामिति ॥ तद्वाक्ये "अस्थूलमनण्वह्रस्वमदीर्घं अशब्दमस्पर्शमरूपमव्ययं आकाशोवैनामनामरूपयोर्निर्वहितातेयदन्तरातद्ब्रह्म दिव्योह्यमूर्तःपुरुषःसबाह्याभ्यंतरोह्यजः । तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्माब्रह्मसर्वानुभूः" इत्येवंविषयवाक्यानिदर्शितानि ॥ प्रशासितृत्वेत्यादि । "एतस्यवाअक्षरस्यप्रशासने" इतिप्रशासनं ॥ अंबरांतशब्दोपादानंतुप्रथमस्यतृतीयपादस्याक्षराधिकरणानुरोधात् ॥ तद्धारकत्वंतु "सूर्याचंद्रमसौविधृतौतिष्ठतः ॥ द्यावापृथिव्यौविधृतेतिष्ठतः" इत्यादिश्रावणात् ॥ द्रष्टृत्वादिकंतु "तद्वाएतदक्षरंगार्ग्यदृष्टंद्रष्टृश्रुतंश्रोत्रमतंमंत्रविज्ञातंविज्ञातृनान्यदतोस्तिद्रष्टृ" इत्यादिनोक्तं ॥ समासौ आकाशोपादानत्वंच "एतस्मिन् खल्वक्षरेगार्ग्याकाशओतश्चप्रोतश्चेति" इतिस्पष्टं ॥ अशब्दवाक्यंतुअव्ययत्वंवदत्पंचभूतगुणान् क्रमेणनिषेधत्तथातेनभूतेषु दृष्टप्रकारेणेत्यर्थकंतथापदंचसर्वत्रान्वयाय देहलीदीपमिवमध्यउपाददव्ययशाल्यनित्यपांचभौतिकाकारमेवनिषेधति ॥

अतएव नस्थानतोपिपरस्योभयलिङ्गंसर्वंनहि अरूपवदेवहितत्प्रधानत्वादिति सूत्रेच संगच्छेते ॥ तदेतदाह-निपातादितइति ॥ निपातौ तुवाशब्दौ आदिनासूत्राणि तद्विषयवाक्यानि नस्सामान्येत्यादिनावक्ष्यमाणयुक्तयश्चगृह्यंते ॥ १८ ॥ सूत्रार्थस्तु स्थानतः भूम्यादिरूपात् स्थानात् उपाधितइतियावत् अपिशब्देन स्वतस्तुनसंभवत्येव विरोधादित्यर्थः संगृह्यते ॥ परस्य ब्रह्मणः उभयलिङ्गम् उभेलिङ्गेयस्यतत् सविशेषत्वनिर्विशेषत्वसहितं हि यस्मात् सर्वत्रब्रह्मस्वरूपप्रतिपादनपरेषु वाक्येषु अशब्दमस्पर्शमित्यादिष्वित्यर्थ. ॥ नह्युपाधियोगादप्यन्यादृशस्य वस्तुनोऽन्यादृशः स्वभावः संभवति ॥ नहि स्वच्छः सन्स्फटिकोऽलक्तकादियोगादस्वच्छोभवति भ्रममात्रत्वादस्वच्छत्वाभिनिवेशस्य ॥ यत्तु विरुद्धरूपता ब्रह्मणोलक्षणमिति तत्प्रतिवक्ष्यामः ॥ अरूपवदेव आकाररहितमेव हि प्रसिद्धं ब्रह्म तत्प्रधानत्वात् ॥ अस्थूलमनणुअह्रस्वमित्येवमादीनि वाक्यानि निष्प्रपञ्चब्रह्मात्मतत्त्वप्रधानानि नार्थान्तरप्रधानानि इत्येवंजातीयकेषु वाक्येषु यथाश्रुतं निराकारमेव ब्रह्म प्रतिपत्तव्यम् ॥ यत्तुन रूप्यतेव्यवह्रियते इतिरूपं सर्वव्यवहारविषयत्वंतद्विश्वंतद्विलक्षणं ब्रह्मेत्यादिव्याचक्षते,-तत्तुनयुक्तं; यतोव्यवहारविषयोव्यवह्रियते नतुव्यवहारविषयत्वम् ॥ एवंतत्प्रधानत्वात् इत्यस्य सर्वेषां वेदान्तानां ब्रह्मैव प्रतिपाद्यम् ॥ यत. करादीनामपि ब्रह्मत्वेनैव निरूपणम् ॥ अन्यथा तेषामब्रह्मत्वे सर्वेवेदायत्पदमामनन्ति वेदैश्चसर्वैरिति नियमव्याहतिः-

व्यवहारविषयोन्यवह्रियते नतुव्यवहारविषयस्य) मित्युक्तं,-तत्तुच्छं; व्यवहारविषयत्वस्यापिव्यवहाराविषयत्वादन्यथाव्यवहारविषयत्वस्याव्यवहार्यत्वापत्तेः ॥ नहितद्व्यवहाराविषयइतिशक्यतेवक्तुंप्रमेये-प्रमेयत्वेचप्रमेयत्ववद्वाच्यत्वेवाच्येचवाच्यत्ववद्व्यवहारविषयेतद्विषयत्वेपिव्यवहारविषयत्वेसत्वेबाधकाभावात् ॥ एवंतत्प्रधानत्वादितिसूत्रांशस्यव्याख्यायामपि (प्रधानपदस्वारस्यभंगात् अरूपवदेवहितत्परत्वादितिब्रह्मैवहितत्परत्वादितिवावक्तुमुचितत्वात्) इत्यादियदुक्तं तदपिपूर्वापरसूत्रार्थानालोचनस्वमतदोषानवयोधाभ्यामेवोक्तं नस्थानतोपीत्यादिपूर्वसूत्रैर्ब्रह्मस्वरूपविचारआरब्धः। तत्रजडजीवधर्मा ब्रह्मणिकाश्चिद्विधीयंतेकाश्चिन्निषिध्यंते तथाचब्रह्मजडजीवधर्मवन्नवेति संदेहेरूपवत्सूत्रंप्रवर्ततेब्रह्मैवेत्युक्तेतादृशसंदेहानिवृत्तेः सूत्रंव्यर्थमेव स्यात् ॥ एवंतत्प्रधानत्वादित्युक्तौसर्वेषुवेदेषुब्रह्मणःप्रधानत्वात् "सर्वेवेदायत्पदमामनंति वेदैश्चसर्वैरहमेववेद्य" इत्याद्यपिसंगच्छते। तत्परत्वादितियद्युच्यतेतदा "ज्योतिष्टोमेनस्वर्गकामोयजेत" इत्यादिवाक्यानांकर्मपरत्वाद्ब्रह्मपरत्वाभावाद्व्यासंगतिःस्यात् ॥ तन्निवेशेच तेषांवाक्यानांब्रह्मप्रधानत्वमस्त्येव ॥ कथमितिचेदुच्यते-सर्वस्यैवपूर्वकांडस्य "तमेतंवेदानुवचनेनब्राह्मणाविविदिषंतियज्ञेनदानेनतपसाऽनाशकेन" इत्यादिनाब्रह्मज्ञानांगत्वबोधनादंगिनएवप्राधान्यंनत्वंगस्य। त्वन्मतेतुयथाऽस्थूलादिवाक्यानिनिराकारब्रह्मतत्वप्रधानानि तथा सहस्रशीर्षेत्यादिवाक्यानिसाकारब्रह्मप्रधानानियथाऽस्थूलादिवाक्यान्निराकारंब्रह्मप्रतिपत्तव्यं तथासाकारमपिप्रतिपत्तव्यंस्यात् ॥ तस्मात्त्वन्मतएवप्रधानपदस्वारस्यभंगः। अधिकंतुभाष्यादितोऽवसेय ॥ "नतत्ररथानरथयोगाः पृथगात्मानं प्रेरितारंचमत्वा" इत्यादिवेदस्ययदिभेदप्रतिपादकत्वंतवाभिमतंतदाऽद्वैतप्रतिपादनार्थंतवापिप्रयासोव्यर्थएव। यदितत्र लोकसिद्धएवभेदोनूद्यतेतर्हिकरादीनामभेदप्रतिपादनाग्रहोनिर्मूल इतिकथनमसंगतस्यात् ॥ एतेननतत्ररथाइत्यादिकःप्रलापोनिरस्तः। एवं सर्वेवेदायत्पदमामनंतीत्यत्रपद्यतेऽनेनेतिपदंप्राप्त्युपायमित्यर्थस्य प्रतीतिसंभवेलक्षणायांमानाभावाल्लक्षणयात्वयाप्यर्थोवाच्य) इति कथनमसंगतमेव। एवंगीतावाक्येपिलक्षणायांमानाभावेनविद्वन्मंडनाद्युक्तोविरोधोदुरुद्धरएवेति (विद्वन्मंडनाद्युक्तस्तद्विरोधोपिपरिहृत) इत्यसंगतम् ॥

ह्लेशलभ्यः ॥ वास्तवपाठेनुमर्श्चैनेतिपक्षोन्यव्रमायःसर्वत्राधिकरणेष्वियसुलभः ब्रह्मविचारा-
दिहाधिकाराऽनुवृत्तस्तत्परस्येत्यस्यप्रथमांततया विपरिणामाद्वा ॥ अतोयथान्यासमेवास्तु ॥
अथेदंशेयं-भकृतसूत्रंहिद्विधाव्याख्यायतेभाष्यविद्भिर्मंडनयोः ॥ तत्रहैकदेशिमतप्रदर्शि-
कापंचसूत्री ॥ यत्रजडजीवधर्माब्रह्मणिसंतीतिपूर्वपक्षेइदमुच्यते ॥ अरूपवत्प्रधान्यव्यवहार-
विषयोनभवति । कुतः? वेदांतेषुतस्यैवप्राधान्यात् ॥ इत्येकोऽर्थः ॥ अत्रबहुव्रीहिमाश्रित्य-
तत्परत्वादितिपाठेतुविरुद्धोहेतुः स्यात् ॥ शब्दगम्यत्वेअन्यपरहार्यत्वासंभवात् ॥ पूर्वकांड-
स्यान्यपरत्वाभ्युपगमात्वाऽनैकांतिकश्चतदेतदाहुः-एवंतत्प्रधानत्वादित्यादि ॥ अथचअरूपवत्
रूप्यतेव्यवह्रियतेऽनेनेतिरूपंकरादिकंतद्विशिष्टंब्रह्मनभवति किंत्वरूपरूपं ॥ अस्मिन्पक्षे-
पिहेतुस्तुल्यः सर्वेषुवेदेषुतस्यैवप्रतिपाद्यत्वप्राधान्यत्वादितितदर्थः ॥ "सर्वेवेदाः, वेदै-
श्चसर्वैः" इत्यादिश्रुतिस्मृतिभ्यः यदिब्रह्मण करादिकमनन्यभूतं मिथ्यास्यात्तर्हिप्रत्यक्षा-
दिमानांवरागम्येतत् वेदःकिमर्थंप्रतिपादयेत् ? ॥ प्रतिपादनेतुसर्वेवेदाइत्यादिविरोधः ॥
तत् अद्वितीयब्रह्मप्रधानंप्रतिपाद्यतयामुख्यंयेषामितिबहुव्रीह्यादेरपिसमानं ॥ स्वमस्त्वनु-
भवसिद्धःस्वयंज्योतिष्ट्वसाधनायोक्तः तस्यनिर्मातृत्वायच नहिब्रह्मण करादिकंब्रह्मनिर्मि-
तंलोकेऽनुभवसिद्धंच ॥ येनतदनुवदेत् ॥ तत्परत्वादित्युक्तौतुमुख्यत्वालाभात् कथंचिद्-
पितत्परत्वस्यसंभवाच्च विवक्षितंनासिध्येत् ॥ यत्तुनतत्रवधाइत्यादितत्र ॥ सदसच्चाहमर्जुने-
तिस्मृतेः । यदस्तियन्नास्तिचविश्ववर्येतिविष्णुपुराणवाक्याच्चकथंचित्स्वमोपितदेवेतिरेचित् ॥
"यत्तोनिन्युः" धर्मोयस्यांमदात्मकइत्यादिश्रुतिस्मृतिभिर्ज्योतिष्टोमादिपराअपिसाक्षा
त्तत्परा एव ॥ मूलेतेषामब्रह्मपरत्वंतु "पिशाच पिशाचभाषयाबोधनीय"इतिन्यायानुरो-
धादुक्तं ॥ द्विधासमभवद्ब्रह्म प्रकृतिश्चप्रात्तेत्यादिस्मृतिसूत्रैः प्रकृतेरपिब्रह्मत्वमेव
तेनाज्ञानिरूपणादेरपिनाब्रह्मपरत्वं ॥ यत्तुश्वेताश्वतरप्रथमाध्यायवाक्यं (ऋक् ६) "पृथ-
गात्मानंप्रेरितारंचमत्वाजुष्टस्ततस्तेनामृतत्वमेति" इतिअंशांशिभावमूलकंप्रेर्यप्रेरकयोर्भे-
दंविचार्ययोयदंशः सतंभजेदितिन्यायेनप्रीतिसेवनयुक्तः ॥ तेनभगवताऽमृतंप्राप्नोतीत्यर्थ-
कमुक्तं ॥ यच्चतत्रैवचतुर्थाध्यायस्थजहात्येनामितिवाक्यंजीवानां परस्परप्रतियोगिकभेद-
बोधकमुक्तं तत्रोभयत्रापिभेदएेच्छिकोपृतजतुद्रववत्वब्रह्मधर्मएवेत्युक्तंप्राक् किंच लोकसि-
द्धस्वभादिकंभेदश्चक्वचिदेवानूद्यते ननुब्रह्मविशेषाणामितस्यप्रतिपादकानिशतशोवाक्यानि-
संति विशेषाणामब्रह्मत्वेभूयांसएववेदभागाअब्रह्मपरा स्युः ॥ भेदादेश्चानुवादोपिनि-
षेधार्थं, अन्यथानिषेधायोगात् ॥ तथात्रापिनिषेधस्थलेलोकसिद्धमेवपाणिपादादिकमनूद्य-
निषिध्यते ॥ निषेधवाक्यस्यानुवादमात्रेणनिषेधसिध्यातत्तः पृथग्भूतानाविशेषबोधकवा-
क्यसहस्राणामनुवादकत्वमशक्यवचनं प्रयोजनाभावात् ॥ तात्रद्विभांगे प्रतिपादनमंतरा-
निषेधस्याशक्यत्वाङ्गीकारेभेदप्रतिपादकान्यपिशतश सहस्रशोवाक्यानिभवेयुः; अन्यथानि-
षेधासंभवेनाद्वैतासिद्धेः ॥ नह्येकमपिपृथग्भूतंसिद्धवस्त्कारेणभेदबोधकंवाक्यमस्तियथासा-
कारवाक्यानि ॥ भेदस्वप्नादेरिवविधतश्चशुद्धादेर्जीवसिद्धत्वाभावादपिनानुवादोवक्तुं-
शक्यः ॥ तदेतदाहुः-यदिवत्रेत्यादि ॥ श्रुतपपाठस्तुतल्लोपेक्ष्याः ॥ यच्चएवंचेत्यादिपरि-
हृतइत्यंतंवस्तुस्वमवस्थाप्यपरिहारात् ॥ तत्रसर्वैर्वेदाइतिकठवाक्येषदितिपदामितिचपृथक्पदेएव

नतुयस्यपदमितिसमासोयरूमात्तवलक्षणाक्लेशः ॥ अर्थस्तु यत्पद्यतइतिपदंप्राप्यंसर्वेऽशेषा-वेदाआमनंतीति ॥ अतएवतद्भाष्येशंकराचार्याअपि "सर्वेवेदायत्पदंपदनीयमविभागेनाम-नंति" इत्याहुः। गीतावाक्येपिसर्वैरशेषैर्वेदैश्चात्तदनुकूलस्मृतिभिश्चाहमेववेदनीयइत्यर्थः ॥ एवकारोऽन्ययोगव्यवच्छेदकः ॥ अतएवैकादशस्कंधे मांविधत्तेभिधत्तेमामित्यादिनाभ-गवतास्वस्यैवधर्मरूपेणविधेयत्वंवेदैरभिधयाप्रतिपाद्यत्वंविकल्प्यत्वापोह्यत्वादिकंचस्वस्यैव-दर्शितम्॥ कौर्मेपिपूर्वखंडेद्वादशाध्याये नहिवेदादृतेकिंचिच्छास्त्रंब्रह्माभिधायकमित्यभिध-याब्रह्मण्वयेवेदप्रवृत्तिर्बोधिता ॥ अतोनवेदशब्दोऽत्रलाक्षणिकः; अन्यथाधर्मैश्चसर्वेपीत्येव-वदेत् ॥ शंकराचार्यैरप्यत्र "वेदैश्चसर्वैरहमेवचपरमात्मावेद्यःवेदितव्यः" इतिव्याख्यातं ॥ धर्मेत्रलक्षणातुतावकेनापिनकेनापिव्याख्याता ॥ अतोविद्वन्मंडनाद्युक्तंयुक्तमेव ॥

अग्रेच (ननुस्थाप्रस्थादिकंब्रह्मणोऽभिन्नमेव, परंतुतदक्षरब्रह्मणोऽ-भिन्नंकरादिलुपुरुषोत्तमाद्भिन्न) मित्यादिनास्वयमेवपूर्वपक्षमुद्भाव्य (तयोरभेदेऽक्षराद्भिन्नमिदंपुरुषोत्तमाद्भिन्नमिदमितिनिर्णयस्या-वास्तवत्वापत्तेः) इतियद्दोषोद्भावनंकृतं तत्राक्षरब्रह्मणःपुरुषोत्तमा-दभेदस्यास्मत्संमतत्वेपिस्थाप्रस्थादिनामक्षरब्रह्माभेदस्यभाष्यादिष्व-दृष्टत्वेनतादृशपूर्वपक्षतत्खंडनयोः परप्रज्ञाकल्पितत्वादुपेक्षणीयत्व-मेव ॥ अक्षरंतुपुरुषोत्तमस्यैवरूपांतरं ॥ अतएवगीतायांभगवताप्युक्तं यस्मात्क्षरमतीतोहमक्षरादपिचोत्तमः।अतोस्मिलोकेवेदेचप्रथितःपुरु-षोत्तमइति ॥ ननु (उक्तभगवद्वचनेऽक्षरशब्देनब्रह्मनोच्यते ॥ एक-स्मिन्परापरभावस्यविरुद्धत्वात्, किंतु जडमेवेतिभातितच्चमायैव ॥ अतएवाक्षरंस्यादपवर्गेपरमब्रह्मवर्णयोः गगनेधर्मतपसोरध्वरेमूलका-रणेइतिपरमब्रह्मणोमूलकारणंपृथग् वदन्हेमचंद्रकोशःसंगतः ॥ अत एव तस्मिन्नेवप्रकरणेकूटस्थोक्षरउच्यते इत्युक्तंभगवता।तथाचकूट-मित्युपक्रम्य सीरांगेनृततुच्छयोरितिहेमचंद्रोक्त्याकूटमनृतं तुच्छं वायथास्यात्तथातिष्ठतीतिकूटस्थोमाया ॥ तस्माद्गीतासु अक्षरपदेन जडस्यग्रहणादक्षराख्यब्रह्मांतरासिद्ध्याऽक्षरब्रह्मणोऽभिन्नंजगदित्या-दिनिर्मूलमेव) इतिचेन्न॥ "एतद्वैतदक्षरंगार्गिब्राह्मणाअभिवदंत्यस्थूल-मनण्वह्रस्वं ॥ एतस्यवाअक्षरस्यप्रशासनेगार्गिसूर्याचंद्रमसौविधृतौ तिष्ठतः" इत्यादिश्रुतिविरोधात् ॥ नचतादृशश्रुतिष्वपिअक्षरशब्देन प्रकृतिरेवोच्यतेपूर्वोक्तकोशप्रामाण्यादितिवाच्यं अक्षरमंबरांतधृतेरि-तिसूत्रस्यतत्सूत्रव्याख्यानरूपस्यश्रीशंकरकृतभाष्यस्यचविरोधापत्तेः॥ तथाचभाष्यं "परएवात्माऽक्षरशब्दवाच्यः। कस्मात्? अंबरांतधृ-तेः। पृथिव्यादेराकाशांतस्यविकारजातस्यधारणात् तथाचोपसंहृत-

मेतस्मिन्नुखल्वक्षरेगार्ग्याकाशओतश्चप्रोतश्चेति ॥ नचेयमंबरांतधृतिब्रह्मणोन्यत्रसंभवति” इति ॥ प्रकृतेश्चाक्षरपदवाच्यत्वंनास्तीतिद्योतनाय “कार्यस्यचेत्कारणाधीनत्वमबरांधृतिरभ्युपगम्यतेप्रधानकारणवादिनोपीयमुपपद्यते, कथमंबरांतधृतेर्ब्रह्मत्वप्रतिपत्तिरिति” पूर्वपक्षं कृत्वाऽतउत्तरंपठतीतिसाचप्रशासनादितिसूत्रमवतारितं तत्रापि “साचांबरांतधृतिःपरमेश्वरस्यैवकर्म ॥ कस्मात् ? प्रशासनात् ॥ प्रशासनंहीहश्रूयते“एतस्यवाऽक्षरस्यप्रशासनेगार्गिसूर्य्याचंद्रमसौविधृतौतिष्ठत” इत्यादि ॥ प्रशासनंचपारमेश्वरंकर्मनाचेतनस्यप्रशासनंसंभवति ॥ नह्यचेतनानांघटादिकारणानांमृदादीनांघटादिविषयंप्रशासनमस्ति” इतिप्रतिपादितं ॥ तथाचतन्मतमवुद्ध्वानेकार्थकोशवलेनाक्षरपदवाच्यामायैवेतिवदतास्वयमेवशंकरसिद्धांतानभिज्ञत्वंप्रकटीकृतं ॥ किंचसांख्यमतेप्रकृतेर्नित्यत्वात् ॥ तन्मतेऽक्षरशब्दस्यकथंचिदवयवार्थसंभवेपितवन्मतेमायायाअनित्यत्वस्वीकारेण नक्षरतीत्यक्षरमितियोगार्थस्यकथमप्यसंभवादक्षरशब्देनमायायाउपादानंनसंभवतीति । एवंहेमचंद्रोक्तिवलात्कूटस्थपदेनमायायाउपादानमपि ॥ कूटस्थोब्रह्मजीवेशावित्येवंचिच्चतुर्विधा । कूटस्थब्रह्मणोर्भेदोनाममात्रादृतेनहि कूटस्थभासितोदेहोधीस्थजीवेनभास्यते । स्वयंकूटस्यरूपेणदीव्यतेसौनिरंतरमित्यादिविद्यारण्यवचनविरुद्धं, कूटस्थोक्षर उच्यतइत्यादिभगवद्वचनविरुद्धंच ॥ तथाचश्रुतिसूत्रप्रामाण्यात्पूर्वोक्तभगवद्वाक्येऽक्षरपदेनब्रह्मैवोच्यतेनतुजडंतस्यापियस्मात्क्षरमतीतोहमित्यत्रकार्यपरेणाक्षरपदेनैवोक्तत्वात् ॥ एवंच जडस्याक्षरत्वेनाक्षरपदेनग्रहणासिद्ध्याऽक्षरब्रह्मणोऽभिन्नंजगदितिसिद्धं ॥ किंच अलौकिकाकारसिद्धौप्रवेशोहरिणोदितः “अव्यक्तोक्षरइत्युक्तस्तमाहुःपरमांगतिं । यंप्राप्यननिवर्त्तंतेतद्धामपरमंमम” इत्याद्यपिसंगच्छते । अक्षरशब्देनमायायाउपादाने तस्याः परमगतिरूपत्वाभावेनतदसंगतमेव स्यात् तच्चाक्षरब्रह्मपुरुषोत्तमाभिव्यक्तिस्थानत्वाद्भगवद्गृहंतद्धाम परमंममइतिभगवतावर्णितं॥अतएव ‘पुरुषःसपरःपार्थभक्त्यालभ्यस्त्वनन्यये” त्यादिनागेहार्थोंशोनिरूपितःभक्तिश्चगुरुसेवयाभवति ॥ अतएवोक्तं “भक्त्यालाभोहिनिर्दिष्टोभक्तिश्चाचार्य्यसंश्रयात्”श्रीमदाचार्य्यचरणभजनादेवनान्यथा । ननुपुरुषोत्तमाक्षरयोर्भक्तमुक्तप्राप्यत्वेआधाराधेयभावेचकिंमानं ? । नचपूर्वोक्तभगवद्वचनमेवप्रमाणमितिवाच्यं धामशब्दस्यनानार्थत्वात्पतत्यधोधामविसारिसर्वतइतिकाव्येधामशब्दस्य

तेजोवाचकतायाद्दष्टत्वात् तेजस्यपिधामस्यादित्यनेकार्थंपुहलायुध-कोशाच्चकथंनतेजोवाचकत्वंकथंचगेहवाचकत्वमेवकथंच परमगति-शब्देनोक्तात् 'ज्ञानीत्वात्मैवमेमतं, नहिज्ञानेनसदृशंपवित्रमिहविद्यत' इत्यादिनासंस्तुतेनज्ञानेनसाध्यान्मोक्षान्नेदंयदिदमुपासते' इत्यादिना-ऽब्रह्मत्वेनोक्तविषयकोपासनेनपुरुषोत्तमप्राप्तेः श्रेष्ठत्वमुच्यते इतिचेन्न; पुरुषोत्तमाक्षरयोः परापरभावादिपुश्रुत्यादेरेवप्रमाणं। नहि वैदिकानां श्रुतेरन्यत्प्रमाणमधिकमस्ति, तच्च "ब्रह्मविदाप्नोतिपर"मितिश्रुत्याप्रति-पादितं अक्षरब्रह्मवित्परंब्रह्माप्नोतीतितदर्थः ॥ अत्रपरशब्दस्यपूर्वपर-त्वेतदित्येववदेत् पूर्वंब्रह्मोक्त्वा अग्रेयत्परमित्याहतेनसांनिध्यात्ततएव परंपुरुषोत्तमरूपमेवात्राभिप्रेतमितिज्ञायते ॥ किंच प्रतिवादिनात-दाक्षिर्शनात्मिकैववाच्या, तथासति ब्रह्मप्राप्तोब्रह्मप्राप्नोतीत्यर्थःस्यात्स चासंगतः साधनसाध्यभावव्याहतिश्च ॥ अतः परंविशेषतस्तद्विवक्ष-माणानुभवैकगम्यंतत्स्वरूपंनान्यमानगम्यमिति ज्ञापयितुमन्यमुखे-नाह-"तदेपाभ्युक्ते" ति ॥ अन्यथासर्वार्थत्वप्रतिपादिका श्रुतिरेवं कथवदेत्? तदित्यव्ययं, तथाचतत्पूर्वोक्तंब्रह्मविदःपरप्राप्तिलक्षणमर्थं-विशदतयाप्रतिपाद्यत्वेनाभिमुखीकृत्योपगृह्यऋगेपाविदितपरब्रह्मकै-रुक्ता ॥ पूर्ववाक्योक्तार्थस्यवैशद्यमनयाक्रियतइत्यर्थः संपद्यते ॥ तामे-वाह "सत्यज्ञानमनंत, ब्रह्मयोवेदनिहितंगुहायांपरमेव्योमन्, सोश्नु-तेसर्वान्कामान्सह, ब्रह्मणाविपश्चिते" तितत्रब्रह्मण सच्चिदानंदात्म-कत्वेपिफलस्यानंदात्मकस्यपुरुषोत्तमस्याग्रेफलनिरूपणावसरेनिरूप-णीयतयाप्रथमतः साधनमेवनिरूपणीयमित्यभिप्रायेणसत्यज्ञान-पदाभ्यांसच्चिदंशावनंतपदेनदेशकालापरिच्छिन्नत्वचज्ञेयस्यब्रह्मणः-साधनविशेषत्वायोक्तवतीश्रुतिः। तेनब्रह्मत्वेतुल्येपिक्षरस्यदेशकाला-परिच्छिन्नत्वाभावान्नविवक्षितफलसाधनशेपत्वं। अक्षरस्य तु तदपरि-च्छिन्नत्वात्तादृशसाधनशेपत्वमितिबीजंअत्रयोवेदेतियजुर्विवेदनप्रा-प्यत्वमुक्तं मुडकेचनायमात्माप्रवचनेनलभ्योनमेधयानबहुनाश्रुतेन। 'यमेवैपवृणुतेतेनलभ्यस्तस्यैपआत्मावृणुतेतनूंस्वामिति श्रुत्यावरणेतर-साधनाप्राप्यत्वमुच्यते। एवंसति श्रुतिद्वयविरोधपरिहारायाक्षरब्रह्म-ज्ञानेनाविद्यानिवृत्त्याप्राकृतधर्मराहित्येनशुद्धत्वसंपादनेन पुरुषोत्तम-प्राप्तोस्वरूपयोग्यतासंपाद्यते। तादृशजीवेस्वीयत्वेनवरणेभक्तिभावा-त्सहकारियोग्यतासंपत्त्यापुरुषोत्तमप्राप्तिर्भवतीतिनिर्णीयते। तथाच-वरणाभावेज्ञानमार्गेण ज्ञानप्रधानतयाब्रह्मज्ञान। वरणेतुभक्तिमार्गेरी-

स्यानंदप्रधानतयाब्रह्मज्ञानं येनपरप्राप्तिरितिवेद्यस्यद्विधाविर्भावः सत्य-
ज्ञानानंतरूपाक्षरंयोवेदतस्यगुहायांपरमव्योमाविर्भावः परोमीयतेदृ-
श्यतेअनेनेतितथा ॥ ज्ञानमार्गीयजीवज्ञेयप्रकारकाद्धेशिष्ट्येनापितथा-
परमव्योम्नोऽस्यलौकिकत्वज्ञापनायालौकिकप्रयोगःकृतः ॥ भक्त्याहमे-
कयाग्राह्यःमुक्तानामपिसिद्धानांनारायणपरायणः । सुदुर्लभःप्रशांता-
त्माकोटिष्वपिमहामुने । तस्मान्मद्भक्तियुक्तस्ययोगिनोवैमदात्मनः ।
नज्ञानंनचवैराग्यंप्रायःश्रेयोभवेदिहेत्यादिवाक्यैर्यमेवेत्यादिश्रुतिपठि-
तस्यवरणस्यांगीकारार्थकत्वेनगुहायांहृदयाकाशेयदाविर्भूतपरमव्यो-
माक्षरात्मकंव्यापि वैकुंठंतस्यपुरुषोत्तमगृहरूपत्वात्तत्रनिहितं स्थापि-
तमिवप्रत्तंमानंयोवेदसभक्तो ब्रह्मणानित्याविकृतरूपेणविपश्चिताविवि-
धंपश्यच्चित्तंहिविपश्चितत्त्वं पृषोदरादित्वात्पश्यच्छब्दावयवस्यय-
च्छब्दस्यलोपंकृत्वाव्युत्पादितोविपश्चिच्छब्दस्तेनविविधभोगचतुरेण-
सहसर्वान्कामानश्नुतेइत्यर्थः । एतेनपरप्राप्तिपदार्थउक्तोभवति । शुद्ध-
पुष्टिमार्गीयत्वाद्स्यभक्तस्यस्वातंत्र्यंभोगउच्यते । सहभावोस्याब्रह्म-
णोगौणत्वंभतएवभक्ताधीनत्वंभगवत स्मृतिपूज्यते अहंभक्तपराधी-
नोवशेकुर्वंतिमांभक्त्येत्यादिवाक्यैः यद्यप्यशभोजनेइतिधातोरश्नाती-
त्येवरूपंभवत्यशूङ्व्याप्ताविितिधातोर्भवत्यश्नुत इति रूपंविकरण-
भेदात्पदभेदाच्चतथाप्यत्राशभोजनइतिधातोरेवप्रयोग इति ज्ञायते ।
तथाहि अत्राशनक्रियायांब्रह्मणःसहभाव उच्यते । तथा च व्याप्त्यर्थ-
कत्वेब्रह्मणासह कामान्व्याप्नोतीत्यर्थोभवत्यथवा ब्रह्मणासहभूतः
सजीवः कामान् व्याप्नोतीत्यर्थः स्यात् । एतोत्वर्थावनुपपन्नौ, नहिका-
मवज्जीवकर्तृकव्यापनक्रियाकर्मत्वं ब्रह्मणि संभवति अतिमहत्वात् ॥
व्यापनंचात्रस्वाधीनीकरणमेववाच्यं । नहिकामानांतथात्वंस्वतः-
पुरुषार्थरूपंभोगशेषत्वात्तेषांपूर्वोक्तपरप्राप्तिव्याकृतिरूपत्वाच्चास्यत-
थार्थोनुपपन्नः ॥ एतेनैवब्रह्मणाकरणभूतेनसर्वान्कामान्सहाश्नुतेयु-
गपद्भुंक्ते इतियोजनासिद्धोर्थोपिनिरस्तोबोध्यः । भोगगम्यसुखसा-
क्षात्कारातिरिक्तोदासीनज्ञानात्मकोर्थस्तुपूर्वमेवनिरस्त-सचासंगतइ-
त्यादिना तेनाशभोजनइतिधातोरेवायंप्रयोगोऽर्थस्यालौकिकत्वज्ञाप-
नायालौकिकःप्रयोगः कृतः । व्यत्ययोबहुलमितिसूत्रेण छंदसितद्विधा-
नात् श्नाप्रत्ययपरस्मैपदयोर्व्यत्ययेनश्नुप्रत्ययात्मनेपदेजातेइतिभोगा-
र्थकएवायधातुःएवमेव "नतदश्नोतिकचननतदश्नोतिकश्चने" त्यत्रप्र-
त्ययमात्रव्यत्ययेनप्रयोगःशधातोरेवेतिज्ञेयं ॥ ननुसकामोऽत्रोपासकस्त-

दुपास्यंचसगुणंब्रह्मद्वयोरपिकामोपभोगश्रवणात् "यत्रहिद्वैतमिवभवतितदितरइतरंपश्यती" त्युपक्रम्य "यत्रत्वस्यसर्वमात्मैवाभूत्तत्केनकंपश्ये" दित्यादिनाऽन्यदर्शनादिनिषेधाद्ब्रह्मविदःकामोपभोगासंभवश्चेतिचेन्मैवं; ब्रह्मविदाप्नोतिपरमित्युक्त्वातदेषाभ्युक्तेतिवाक्येनपूर्ववाक्योक्तार्थनिरूपिकेयमृगित्युच्यते। तत्रप्राकृतगुणसंबंधेब्रह्मवित्प्राप्यत्वंपरत्वंचनस्यात् सकामप्राप्यत्वेपरत्वंनस्यात्। यद्विपश्यंतिमुनयोगुणापायेसमाहिताइतिभागवतवाक्येनगुणातीतानांवैकुंठदर्शनाधिकारदर्शनेनसकानांपरदर्शनंदूरापास्तं यत्रत्वस्येत्यादिकाश्रुतिस्त्वखंडब्रह्माद्वैतभानेब्रह्मविदःप्रापंचिकभेदादर्शनंवदति, नतुप्रपंचातीतार्थदर्शनंबोधयतिनिषेधतिवापुरुषोत्तमस्वरूपंतुयावत्स्वधर्मविशिष्टंप्रपंचातीतमेवेतितद्दर्शनादौकिंबाधकम् ? ॥ एवंसतिब्रह्मविदःपरप्राप्तेःपूर्वदशातत्केनकंपश्येदित्यादिनोच्यउत्तरदशातुसोऽश्नुतइत्यनेनोच्यतइति सर्वंसुस्थं। एवंचऋचिपरमेव्योमन्निति सप्तम्यंतपदेनाधाराधेयभावः ब्रह्मविदाप्नोतिपरमितिवाक्येनाक्षरपुरुषोत्तमयोःपरापरभावश्चोक्तः भगवद्वाक्यधामशब्दस्यगृहवाचकत्वेपिनिहितंगुहायांपरमेव्योमन्नितिवाक्यंविनिगमकंकिंचप्राप्तिनिवृत्त्योर्गृहादावाधारएवदृष्टत्वाद्यंप्राप्यननिवर्तंतइतिप्राप्तिनिवृत्तिबोधकपदसमभिव्याहारोपिधामशब्दस्य गृहवाचकत्वेप्रमाणंअक्षरपुरुषोत्तमयोरभेदेपि "सभगवःकस्मिन्प्रतिष्ठितइतिस्वेमहम्नि" ॥ इति वाक्यादाधाराधेयभावोपिस्वीक्रियते ॥

सहस्राक्षे नतुस्वाभरथेत्यादिवृत्यपिप्रत्यक्तमित्यंतंभागंखंडयंति—अग्रेचनन्वित्यादिनाआधाराधेयभावोपिस्वीक्रियतइत्यंतेन ॥ अयमाशयः—स्वामरथादिकमक्षरब्रह्माभिन्नमित्यादिपूर्वपक्षःकेवलंकपोलकल्पितः स्वामिकेष्वक्षररूपतायाअस्मदनभिप्रेतत्वात् "यदाह्येवैषएतस्मिन्नुदरं" इतितैत्तिरीयश्रुतिसत्वेपियउदरमितिलेखस्तुस्वप्नेपिगुरुमुखतोवेदभ्याससंबंधस्याभावात् ॥ स्वयंकल्पितेदचोदोपोप्युपेक्ष्यः ॥ पुरुषोत्तमस्यैवरूपांतरमिति ॥ अत्रमदीयेवेदांतचिंतामणौ (प्रक० १३ श्लो० ६२) आम्नायतेतैत्तिरीयेप्रश्नेनारायणाभिधे ॥ सब्रह्मसशिवः सहरिःसेंद्रसोऽक्षरः परमःस्वराट् ॥ गीतायां (अ० १० श्लो० १) परंब्रह्मपरंधामपवित्रंपरमंभवान् ॥ पुरुषंशाश्वतंदिव्यमादिदेवमजंविभुं ॥ आहुस्त्वामृषयः सर्वेदेवर्षिर्नारदस्तथा ॥ (अ० ११ श्लो० १८) त्वमक्षरंपरमंवेदितव्यंत्वमस्यविश्वस्यपरंनिधानं ॥ त्वमव्ययः शाश्वतधर्मगोप्तासनातनस्त्वंपुरुषोमतोमे तथा (श्लो० ३७) त्वमक्षरंसदसत्तत्परंयत् ॥ एवंचेदंरभेदोस्यशुद्धःकृष्णेनकथ्यते ॥ सएवाक्षरसंज्ञोतएकांशेप्रतिपादितः इतिसंप्रदायोद्रष्टव्यः अत्रतैत्तिरीयवाक्ये "सहस्रशीर्षंदेवं" इतिपूर्वोक्तस्यपरस्यैवमहाविष्ण्वादिरूपत्वमक्षररूपत्वंचोक्तं ॥ गीतावाक्येषुधामपुरुषपदाभ्यामक्षरपुरुष-

पदाभ्यामक्षरतत्परपदाभ्यांचशब्दांतराभ्यांनिर्देशपूर्वकमभेदोभ्यस्तः ॥ अतोयुक्तरूपां-परत्वं ॥ यत्तुएकस्मिन्परापरभावस्यविरुद्धत्वमुक्तंतत्तुवह्माहकश्रुत्याद्यनवबोधात् ॥ तथाहि-मुंडके "तदक्षरमधिगम्यतेयत्तदद्रेश्यं" इत्यादिनाऽक्षरंनिरूप्य "तथाक्षरात्संभवतीह-विश्वं" इतिततोविश्वोत्पत्तिमुक्त्वाद्वितीयमुंडके "तथाऽक्षराद्विविधाः" इतितत एवप्रजन-नाभ्ययौजीवानांनिरूप्यानुपदमग्रे "दिव्योह्यमूर्तः पुरुषः" इतिगीतादिवत्पुरुषपदेनोक्त-पुरुषोत्तमस्य "अक्षरात्परतःपरः" इतिततःपरत्वमाम्नातंनचात्राप्यक्षरपदंमायापरंसांख्यं-परतइतिविशेषणेनव्यावर्तनात् (अ० १ पा० २ सू० २१) "अदृश्यत्वादिगुण-

---

ननु स्वाप्नरथादिकमपि ब्रह्मणोऽभिन्नमेव, परन्तु तदक्षरब्रह्मणोऽभिन्नं करादितुपुरु-षोत्तमादभिन्नम् ॥ नचैवं ब्रह्मभेदवादापत्तिः । साच यउदरमन्तरंकुरुतेअथतस्यभयभवति द्वितीयाद्वैभयंभवति भयंद्वितीयाभिनिवेशतःस्यादित्यादिश्रुतिस्मृतिविरुद्धा ॥ जीवस्यापि परेण भेदस्य निन्दितत्वेन परस्परेण भेदस्य सुतरां निन्दितत्वादितिवाच्यम् ॥ अक्षरपुरुषो-त्तमयोर्वस्तुतोभेदास्वीकारात् ॥ पुरुषोत्तमस्यैवहिअक्षरंब्रह्मरूपान्तरं ज्ञानिभिरपीदमक्षरंब्रह्मे-त्यवगम्यते पुरुषोत्तमस्तुभक्तैः ॥ पुरुषोत्तमस्याऽक्षरात्परत्वंतु यस्मात्क्षरमतीतोहमक्षरादपिचो-त्तमः ॥ अतोऽस्मिलोकेवेदेचप्रथितःपुरुषोत्तमः इतिगीतायामुक्तम् इतिचेन्न ॥ तयोरभेदेऽ-क्षरादभिन्नमिदं पुरुषोत्तमादभिन्नमिदमिति निर्णयस्यावास्तवत्वापत्ते ॥ परापरभावस्याचानु-पपत्तेः ॥ किंचोक्तभगवद्वचनेऽक्षरशब्देन ब्रह्म नोच्यते ॥ एकस्मिन्परापरभावस्य विरुद्ध-त्वात् किन्तु जडमेवेतिभाति तच्चमायैव । अतएव अक्षरस्यादपवर्गेपरमब्रह्मवर्णयोः ॥ गगने-धर्मेतपसोरध्वरेमूलकारणे इति परमब्रह्मणोमूलकारणं पृथग्वदन्हेमचन्द्रकोशः संगतः ॥ अतएव तस्मिन्नेव प्रकरणे कूटस्थोऽक्षरउच्यते इत्युक्तं भगवता तथाच कूटमित्युपक्रम्यसीरा-ङ्गानृततुच्छयोरिति हेमचन्द्रोक्त्या कूटमनृतं तुच्छं वा यथास्यात्तथातिष्ठतीति कूटस्थोमाया ॥ अतएव द्वाविमौपुरुषौलोकइति उभयोरपि भगवता लौकिकत्वमुक्तम् ॥ अव्यक्तोऽक्षरइत्युक्त-इतितु प्रकरणान्तरस्थमिति नेह्रोपयुज्यते ॥ किंचव्यक्तम्प्रकृतावात्मनीति हेमचन्द्रकोशात् अव्यक्तशब्दस्याऽपि प्रकृतिवाचित्वमेव ॥ किंचाऽव्यक्तोऽस्फुटमूर्खयोरिति हेमचन्द्रकोशाद-स्फुटःलौकिकैरगृह्यमाणोक्षरोऽपवर्गरूप इत्यपिव्याख्यायुक्ता ॥ तस्माद्गीतासु अक्षरपदेन जडस्य ग्रहणादक्षराख्यब्रह्मान्तराऽसिध्याऽक्षरब्रह्मणोऽभिन्नं जगदित्यादिनिर्मूलमेव ॥ एतेन अलौकिकाकारसिद्धौप्रवेशोहरिणोदित ॥ अव्यक्तोऽक्षरइत्युक्तस्तमाहु परमांगतिम् ॥ यंप्राप्य ननिवर्तन्तेतद्धामपरममम ॥ इतिवाक्येनभगवद्रूपंब्रह्मप्रकीर्तितम् ॥ पुरुषःसपर पार्थभक्त्या-लभ्यस्त्वनन्यया ॥ इत्यग्रिमेणवाक्येनगेहाधीशोनिरूपितः ॥ भक्त्यालाभोहिनिर्दिष्टोभक्तिश्चा-चार्यसंश्रयात् ॥ श्रीमदाचार्यचरणभजनादेवनान्यथा इति अक्षरपुरुषोत्तमशब्दाभ्यां गृहत-दधीशयोर्मुक्तभक्तप्राप्ययोर्वर्णनमपि मत्युक्तम् ॥ किंच सर्वंखल्विदं यतोवा इत्यादौ यदि अक्षरं ब्रह्मवर्ण्येत तर्हि पुरुषोत्तमोऽश्रौतः स्याद्गीतावाक्यस्योक्तविधयोपपत्त्याऽलीकं स्यात् ॥ यदिपुरुषोत्तमउच्येत तर्हिअक्षरस्यजगदभेदवर्णनंव्याकुप्येत इत्यनया दिशा जीवाभेदप्रकरणा-दिष्वप्यूह्यम् । किंच धामशब्दस्य नानार्थत्वाद्धामप्रसारिसर्वंतदित्यादौ तेजोवाचकताया दृष्ट-

क्षोधर्मोक्तेः" इत्यधिकरणविरोधाच्चब्रह्मण्येवतत्राक्षरशब्दोभ्यस्तोनतुमायायानामाप्युक्त-मतोनैतस्याग्रहणमशक्यंकठवल्लीष्वपि "महत.परमव्यक्तमव्यक्तात्पुरुषःपरः। पुरुषान्नपरं-किंचित्साकाष्ठासापरागतिः" इति अत्राव्यक्तमक्षरं अव्यक्तोक्षरइत्युक्तइतिभगवतात्रशक्तेश्चोहितत्वात् ॥ किंचपुरुषस्यांशोऽक्षरेकथमव्यक्तत्वमित्याकांक्षायांतत्रैवाग्रेश्राविंतं "एषसर्वेषुभूतेषुगूढोत्मानप्रकाशते। दृश्यतेत्वग्र्ययाबुद्ध्यासूक्ष्मयासूक्ष्मदर्शिभिः" इति ॥ सूक्ष्मदर्शिभिरक्षरंपश्यद्भिः ब्रह्मविदः परप्राप्तिकथनात् ॥ अतएवसूत्रकृता (अ० १ पा० ४ सू० २) आनुमानिकाधिकरणे "सूक्ष्मंतुतदर्हत्वात्" इति तत्राव्यक्तशब्देनाक्षर-रूपंब्रह्मैवेतिनिर्णीय अभेदेकथंपरापरभावइत्याशंका (सू० ३) "तदधीनत्वादर्थवत्" इत्यनेननिराकृता ॥ तथाचचरणादेःस्वांशस्यपुरुषादभिन्नत्वेपितदधीनत्वात्पुरुषस्ययथाततःपरत्वंतथाऽत्रापि ॥ अतएवानंदमयस्यपुरुषोत्तमस्यनिरूपणे "ब्रह्मपुच्छंप्रतिष्ठा" इत्यक्षर-स्यपुच्छरूपताऽऽम्नाता ॥ प्रतिष्ठापदंचरणपरंधामपरंवा "गृहाहिपशूनांप्रतिष्ठे"तिवत् अत्रसंग्रहोमर्मचिंतामणौ (प्रकरण १३) (श्लो० २१। २२। २३। २४। २५)

ब्रह्मपुच्छंप्रतिष्ठेतिपुच्छंतत्राक्षरंश्रुतं नपुच्छंपक्षितोऽभिन्नंनाक्षरंपुरुषोत्तमात् ॥ सर्वावय-वान्पक्षीस्वतंत्र पुच्छतोधिकः ॥ पुच्छंत्ववयवत्वेनन्यूनंभेदोनवस्तुतः। अल्पधर्मकमेकांश-भूतंन्यूनंतथाक्षरम् ॥ सर्वधर्माश्रय सोऽस्मादवभूतोधिकःश्रुतः ॥ नभेदोभगवत्सच्चि-दानंदात्माऽक्षरोऽपियत् ॥ पुच्छंपक्षिपदार्थाद्वाविभक्तमिहतत्तथा ॥ अतोऽक्षरस्यचरणत्वम-पिक्वचिदुच्यते ॥ प्रतिष्ठेतिपदात्तस्यप्रोक्तैवोत्तमधामताइति ॥ अक्षरपुरुषोत्तमयोर्भेदाभेदौ अक्षरस्याव्यक्तादिशब्दवाच्यताचगीताद्वादशाध्यायेऽपिस्पष्टा ॥ उक्तसूत्रयोर्भूतसूक्ष्मपरता-यानिरासस्तुप्रकाशादवधेयः ॥ यत्तु किंतुजडमेवेत्यादितत्तु (अ० १ पा० ३ सू० १०) "अक्षरमंबरांतधृतेः" इत्यधिकरणतस्तद्विषयवाक्यतश्चविरुद्धं ॥ गीतावाक्यार्थ-निश्चायकानिबहुन्यसंदिग्धानिश्रुतिसूत्राणिविहायतन्निश्चयायहेमचंद्रोक्तौनिर्भरस्त्वास्तिकै-रुपहसनीय ॥ हैमकोशे अक्षरंस्यादपामार्गे इतिबहुपुस्तकेषुपाठेप्यपवर्गेइतिछंदोविरुद्ध-स्वमात्रकल्पितपाठोक्तिर्धौर्त्यादर्थांतरकरणायेत्यनादरणीया ॥ वस्तुतश्चपुरुषोत्तमःपरमब्रह्म मूलकारणंचाक्षरब्रह्ममुंडकादिषु "यद्भूतयोनिपरिपश्यंतिधीरा तथाऽक्षरात्संभवति ॥ तथा-क्षराद्विविधा सोम्यभावा." इत्यादिश्रावणात् तृतीयस्कंधैकादशाध्यायादिषु तदाहुरक्षरं-ब्रह्मसर्वकारणकारणमित्यादिस्मरणाच्च ॥ अत कोशोऽप्यस्मन्मतेसुसंगत.किंचतन्त्रक्लीबमे-

---

त्वात्तेजस्यपिधामस्यादित्यनेकोशेषु हलायुधकोशाच्च कथंनतेजोवाचकत्वं कथंचगेहवाचकत्वमेव कथंचपरमगतिशब्देनोक्ताज्ज्ञानी त्वात्मैवमेमतम्, समहात्मासुदुर्लभः, नहिज्ञानेनसदृशंपवित्र-मिहविद्यते इत्येवंसद्भुतेन ज्ञानेन साध्यान्मोक्षाद्यद्वाचानभ्युदितं येनवागभ्युद्यतेतदेवब्रह्म-त्वंविद्धिनेदंयदिदमुपासते इत्यादिनाऽभ्यासेनाब्रह्मत्वेनयदुक्त तद्विषयकेनोपासनेन तमेव-विदित्वाऽतिमृत्युमेतिनान्यःपंथाविद्यतेऽयनायेत्यादिश्रुतिविरुद्धाया पुरुषोत्तमप्राप्तेः श्रेष्ठत्व-मुच्यते ॥ एतेन येतुज्ञानंकर्मनिष्ठास्तेषांतुल्यएवहि ॥ भक्तानामेवभवतिलीलास्वादोऽति-दुर्लभः इत्यपिप्रत्युक्तम् ॥

वाक्षरंतद्वाचकमुक्तं अयन्तुक्षरश्चाक्षरएवचेत्यादिनापुमानेवाभ्युपगतइतिनानतत्योदाप्रसक्तिः गीतायांजडपरत्वेजडेमुक्तजीवत्वयादेरयोगात् यदक्षरंवेदविदोवदंतिविशंतियद्यतयोवीतरागा इत्यादितद्वाक्यंविरुध्येत मायायामक्षरशब्दस्ययोगोपिनसंगच्छेत ॥ सचमहाभाष्येप्रत्याहाराह्निकेसमाप्तौ "अथकिमिदमक्षरमिति, अक्षरंनक्षरंविद्यात्, नक्षीयतेनक्षरतीतिवाक्षरमिति । अश्नोतेर्वासरोऽक्षरम् ॥ अश्नोतेर्वापुनरयमौणादिक सरन्प्रत्ययः । अश्नुतइत्यक्षरम्" इति ॥ नचेदंवर्णप्रस्तावाद्ब्रह्मविषयकमितिभ्रमितव्यम् ॥ तत्रैवकैयटेन "क्रियाशब्दोऽयंनित्यस्यार्थस्यावाचकइतिदर्शयति ॥ तत्रक्षिय क्षरतेर्वाविनाशार्थस्यनञ्पूर्वस्यरूपंतच्चब्रह्मतत्त्वंपरमार्थतोनित्यं,व्यवहारनित्यतयातुवर्णपदवाक्यस्फोटानांनित्यत्वं" इतिकथनात् तत्रैवविवरणकारेणाप्यक्षरशब्दस्यमुख्यतयाब्रह्मपरतायास्तत्सादृश्याद्वर्णादिषुतदुपचारस्यचस्पष्टमुक्तत्वात् ॥ अश्नोतेर्नेतिपक्षेमश्नोतिपरत्वेपढोरितिकत्वेश्चादेशप्रत्यययोरितिपत्वंमितिसिद्धम् ॥ मायायाएकदेशवर्तित्वस्वीकारादयमप्यर्थोब्रह्मण्येवपरमार्थतः सगच्छते । तैत्तिरीये "विश्वंनारायणंदेवमक्षरंपरमंपद"मित्याद्युक्त्वा "अंतर्बहिश्चतत्सर्वंव्याप्यनारायणः स्थित" इतिश्रावणेनमुंडकादिष्वक्षरमुपक्रम्य नित्यंविभुसर्वगतंसुसूक्ष्म" मित्यादिश्रावणेनचनिरस्तविभुतायास्तत्रैवसिद्धेः । यस्तुकूटस्थोक्षरउच्यतइतिवाक्ये (कूटमनृतंतुच्छंमाययास्यत्तथातिष्ठतीतिकूटस्थोमाया) इत्यर्थोहिमचंद्रचरणमात्राश्रयेणदर्शितः ॥ सतुच्छ पुंस्त्वविरोधात् केवलयोगादरूढीत्यौचित्यात् कूटस्थशब्दस्यपुल्लिंगस्यैवतत्ररूढेर्ग्राहकाभावाच ॥ किंच विद्यारण्येनपंचदश्यां (प्रकरण ६ श्लो० १८) कूटस्थोब्रह्मजीवेशावित्येवंचिच्चतुर्विधेत्यादिनाब्रह्मस्वरूपविशेषएवकूटस्थपदार्थश्चित्रदीपेकूटस्थदीपादौचप्रपंचित ॥ विशुद्धचिदभेदोपितस्यचित्रदीपे (श्लो० २३७) कूटस्थब्रह्मणोर्भेदोनाममात्रादृतेनहीतिदर्शितः ॥ अतस्तदुक्तिविरुद्धइहकूटस्थपदस्यार्थस्तवनस्तवनविषय ॥ शंकराचार्यैरपिद्वादशेऽध्यायेकूटस्थमचलंध्रुवमित्यत्रपंचदशेचप्रकृतवाक्ये "कूटोराशिरिवस्थितः" इत्याद्येवव्याख्यातंनतु त्वदुक्तं ॥ वस्तुवस्तुमहाभाष्येपस्पशाह्निके "नित्यपर्यायवाचीसिद्धशब्द कथंज्ञायते? यत् कूटस्थेष्वविचालिषुभावेषुवर्तते" एवमादौनित्यार्थपरएवकूटस्थशब्द प्रयुज्यते ॥ अत्रैवविवरणे "कूटमयोघनस्तद्वत्तिष्ठंति येतेषु ससर्गिनाशेऽपिस्वयमनष्टेष्वित्यर्थः" इतिविव्रियते एवंप्रत्याहाराह्निकादिष्वपिवत्रतत्र "नित्येषुचशब्देषुकूटस्थैरविचालिभिर्वर्णैर्भवितव्य" मित्यादिप्रयोगाद्दृष्ट्या ॥ तद्व्याख्यातार्थकस्तुकूटस्थशब्दोनक्वापिशिष्टग्रंथेषुदृश्यते अतो भाष्यादिषुयोदर्शित सएवार्थोआदर्तव्य. । कालव्यापीसकूटस्थइत्यमरोक्तिरप्यत्रानुकूला ॥ किंचायंशब्दोमूलपुरुषेसुप्रसिद्ध अक्षरब्रह्मचजगतोमूलकारणमित्युक्तंप्रागतः सोप्यत्रार्थः सगच्छते यच्चद्वाविमावित्यादिलौकिकत्वमुक्त मित्यंतंतदज्ञानाव, तत्रलोकशब्द शास्त्रपरः । दृश्यतेचतर्कन्यायपातंजलादिशास्त्राणांकथंचिदक्षरमात्रेपर्यवसानं ॥ किंचाक्षरस्यलौकिकत्वमात्रेतत्रैवस्वपादेकुठारप्रहारः मायावादस्यावैदिकत्वसिद्धेः ॥ "अक्षरात्परत ॥ मायांतुप्रकृति" इत्यादिषुस्वाभिमतमायापरतायाबाधात् आनुमानिकाधिकरणस्यस्वभाष्यविरोधाच्च यत्तु (अव्यक्तोक्षरइत्युक्तइतितुप्रकरणांतरस्थमितिनेहोपयुज्यते) इतिजल्पितं–तन्न; पंचदशाध्यायइवाष्टमाध्यायेऽपि अव्यक्ताध्यक्तयःसर्वाइत्याविना येनसर्वमिदंततमित्यंतेन

क्षराक्षरपुरुषोत्तमाःक्रमेणैवनिरूपिताइतिप्रकरणतौल्यात् ॥ नापिकोशाश्रयादव्यक्तमित्यप्रकृतिरेवेतिवाच्यं ततएवकोशादारमार्थकत्वस्यसंभवात् प्रकृतिवधूवोत्पत्तिप्रलययोरंगीकारे सर्वश्रुतिसूत्रव्याकोपाच्च ॥ अन्यथा अव्यक्तोयमचिंत्योयमित्यत्रापिसैवास्तु ॥ यातुपुनःकोशाश्रयात् अव्यक्तः अस्फुटः अक्षरोऽपवर्गरूपइत्यपिव्याख्यादर्शितासाप्यसंगतैव; शंकराचार्यैरव्याख्यानात् ॥ रम्यागमेसर्वेषांमोक्षेप्रलयस्याहरागमेवतः प्रभवस्यचासंभवात् । उक्तकोशे अक्षरंस्यादपामार्गेइत्येवपाठस्यसत्वेनाक्षरशब्दस्यापवर्गार्थकत्वाभावाच्च ॥ अक्षरं तुमोक्षेपीत्यमरोक्त्यातत्रवधापाठादेरपिप्रकृतवाक्येतथाव्याख्यानंस्वाचार्यगीताभाष्यविरुद्धंतवस्वप्रथमश्लोकोक्तरीत्याशततापादकं । अक्षरइतिपुल्लिंगविरोधात् अपवर्गरूपइतिनिष्कारणलक्षणाक्लेशप्रसंगात् तद्धामपरमंममेत्यस्यापिस्वरसतोऽन्वयानुपपत्तेः परस्तस्मात्वितिपूर्वश्लोकविरोधाद्बहुतरोपक्रमोपप्लवाच्चाशक्यंतत् ॥ तथाच यस्मात्क्षरमतीतोहमित्यत्राक्षरशब्देनजडस्यापिसंग्रहादक्षरशब्दोनतत्परः क्षरशब्दस्यजडजीवरूपप्रपंचपरत्वात्, क्षरःसर्वाणिभूतानीत्यत्रभूतशब्दस्यजीवमहाभूतोभयार्थकत्वात् ॥ तस्माद्गीतासुविंशतियदित्यादिव्याकोपतोजडस्यग्रहीतुमशक्यतया जरामरणमोक्षायमामाश्रित्ययतंतिये । तेब्रह्मतद्विदुः कृत्स्नमित्यादिश्रुत्यार्कितब्रह्मेत्यादौपृष्टे अक्षरंब्रह्मपरममितिकथनात् अधियज्ञोहमेवात्रेतिपृथक्कथनाच्च ॥ उपासनफलभेदपरापरभावादिवचनाच्चपररूपांतरस्याक्षरब्रह्मणःसुखेनसिद्ध्याच्च अक्षरब्रह्मणः अभिन्नंजगदित्यादिसमूलमेव तदुपादानकत्वात् उक्तश्रुतिस्मृतिभिः "एतद्वै तदक्षरंगार्गी"त्युपक्रमे"आकाशओतश्चप्रोतश्च" "अव्यक्ताद्व्यक्तयःसर्वाः" "अव्यक्तादीनि भूतानी" त्यादिश्रुतिस्मृत्यंतरैश्चजगतस्ततएवप्रभवस्यतत्रैवप्रलयस्यचदर्शितत्वात् मृद्घटादिवत्तदभेदस्यौचित्यात् ॥ एतेन अलौकिकाकारासिद्धावित्याद्याः भजनादेवनान्यथेत्यंताः मार्तंडकारिका.समर्थितान्ज्ञेयाः ॥ भक्तिश्चाचार्यसंश्रयादितितु छांदोग्ये (अ० ८) "आचार्यवान्पुरुषोवेद" "तद्विद्धिप्रणिपातेन" "आचार्योपासनंशौचं"(स्कंध० ११ अ० ३ श्लो० ४८) "लब्धानुग्रहआचार्यात्तेनसंदर्शितागम"इत्यादिश्रुतिस्मृतिपुराणवच.प्रचयान्निश्चेयम् ॥ यत्तु किंचसर्वंखल्वित्यादि ऊह्यमित्यंतं तदप्यापातरम्यं "अव्यक्तात्पुरुषःपरः ॥ दिव्योह्यमूर्तःपुरुषः ॥ अन्योंऽतरआत्मानंदमय." इत्यादिश्रुतिशतैरसंदिग्धैरभ्यस्ततयाअनाकुलीकृतगीतादिसिद्धतयाचपुरुषोत्तमोनाश्रौतोनाप्यलीकः ॥ यतोवाइत्यादिसामान्यवाक्येष्वपि प्रायेणसएवोच्यते ॥ यत्रत्वक्षरत्वगमकंकिंचित्तत्रसः नचाक्षरस्यकारणत्वेयतोवाइत्यादौपरस्यतत्वानुपपत्ति.शंक्या; महाहेमराश्येकांशहेमपिंडनिर्मितकुंडलादिकंप्रतिहेमराशेरिवशिलाभवमूर्त्यंमत्रादिकंतांतवपटादिकंचप्रतिपृथिव्याइवस्वांशाक्षरोपादानकप्रपंचंप्रतिपरस्योपादानतयाविवादाविषयत्वात् ॥ एतेनजगत्यक्षराभेदस्तद्द्वारापराभेदएवंजीवेपितदभेदोनवधएवेतिनकोपिदुरूहस्यप्ररोहः ॥ यच्च किंचधामशब्दस्येत्यादि वाचकत्वमेवेत्यंतं तत्रब्रूम.- निर्विशेषस्यकथंतेजोरूपोविशेषः ? मायिक सइतिचेत्कथंतत्प्राप्तावनावृत्तिस्तस्यपरमगतित्वं च ? ॥ नाप्यक्षरोव्यक्तइतिशब्दाभ्यांवेदादौक्वापितेजडक्तमस्ति ॥ अत्रधामशब्दोगृहपरएवेतिनिश्चायकास्तुबहुश्रुतिस्मृतिष्वक्षरस्यधामपदपरमस्थानादिशब्दैर्निर्देशाइतिजानीहि ॥ नहिपदादिशब्दाअपितेज पर्यायाः सर्वत्रैकार्थ्यसंभवेतत्रतत्रनानार्थकोशाश्रयात् पृथ-

धपृथगर्थानामनेकेपांव्याख्यानंतन्निर्णयप्रसंगादेकवाक्यताबाधाचसद्भिर्नादरणीयं ॥ निर्देशास्तुयथाद्वितीयस्कंधे (अ० ४ श्लो० १४) निरस्तसाम्यातिशयेनराधसास्वधामनि ब्रह्मणिरंस्यतेनमः तृतीयस्कंधे (अ० ११ श्लो० ४१) तदाहुरक्षरंब्रह्मसर्वकारणकारणं विष्णोर्धामपरंसाक्षात्पुरुषस्यमहात्मनइतिकठवल्लीपुद्वितीयवल्ल्यां "सर्वेवेदायत्पदमामनंतितपांसिसर्वाणिचयद्वदंति । यदिच्छंतोब्रह्मचर्यंचरंतितत्तेपदंसंग्रहेणब्रवीम्योमित्येतत्" अत्रद्वितीयपदशब्देनस्थानमेवगम्यते ॥ एतदग्रेऽनुपदं "एतद्ध्येवाक्षरंब्रह्मएतदेवाक्षरंपरं" इति तस्याक्षरत्वं "एतदालंबनंश्रेष्ठमेतदालंबनंपरं" इतिधामत्वंचस्पष्टमेवाम्नातं । एतदेव गीतायामपि यदक्षरंवेदविदोवदंतिविशंतियद्यतयोवीतरागाः ॥ यदिच्छंतोब्रह्मचर्यंचरंति तत्तेपदं संग्रहेणप्रवक्ष्ये इतिस्पष्टमेवानूदितं ॥ पुनस्तत्रतृतीयवल्ल्यां "य.सेतुरीजानानामक्षरं ब्रह्मयत्परं अभयंतितीर्षतांपारंनाचिकेतँशकेमहि" इत्युपक्रम्य "नसतत्पदमाप्नोतिससारं चाधिगच्छति ॥ सतुतत्पदमाप्नोतियस्माद्भूयोनजायते ॥ सोध्वनःपारमाप्नोतितद्विष्णो.परमंपदं" इति तदाप्रागुक्तमक्षरंपरामृश्यतस्यपदत्वमभ्यस्तं ॥ मुंडकेष्वपि "ययातदक्षरमधिगम्यते" इत्यादिबहुतरमुक्त्वाद्वितीयमुंडकद्वितीयखंडे "आविःसन्निहितंगुहाचरन्नाममहत्पदमत्रैतत्समर्पितं" इतिधामत्वंनिरूप्याऽसंदेहायपुनः "तदेतदक्षरंब्रह्म" इत्याद्युक्तं ॥ जडस्यजीवानांचाक्षराभेदस्तत्रदर्शितः एवंतेयांतिपरमंस्थानमित्यादीनि सहस्रशोवचांस्यनुसंधेयानिमायकाव्याद्यसर्गेपतत्यधोधामविसारिसर्वंतइतिपाठेपिधामप्रसारीत्यनुवादस्तुछंदोमगणसंजकःप्रमादमूलकउपेक्ष्यः । यदपि कथंचपरमेत्यादिउच्यतइत्यंतंतच्छ्रुत्यादिसाराविचारात् यानिवचांस्युक्तानितानिसर्वाण्यस्मत्संमतव्यवस्थासाधकान्येव ॥ व्यवस्थातुज्ञानमात्रनिष्ठानांब्रह्मभावादक्षरेलयः भक्तिमतांतुसाधनभक्त्याश्रवणादिभिरविद्याबंधनिवृत्तौब्रह्मभूतानांफलरूपपरभक्तिलाभ·पुरुषोत्तमप्राप्तिश्चेति ॥ तत्राद्यानांलयेमानंतु "ब्रह्मैवसन्ब्रह्माप्येति" विशंतियद्यतयः इत्यादिश्रुतिस्मृतय. ॥ यद्यपिभक्तानामपिब्रह्मभूतत्वाविशेषात्पांचभौतिकपिंडत्यागोत्तरमक्षरेलयोभवत्येव ॥ "ब्रह्माप्येतिसयथासैंधवखिल्यउदकेप्रास्तउदकमेवानुविलीयेत" इत्यादीनामुभयत्रतौल्यात् तथापिचरणरुत्पुरुषोत्तम.सकृदक्षरांशेमज्जयित्वास्वलाभार्थंपुनस्तानुद्धरतीतितुरीयस्यतुरीयपादेसपद्याविर्भावाधिकरणेसिद्धमित्यन्यदेतत् ॥ केवलज्ञानिनांतुविशंतियद्यतयइत्याद्युक्तस्तत्रलयएवभवतीतिसूत्रकृतातृतीयस्यतृतीये (सू० ३३) अक्षरधियांत्ववरोधएवनिर्णीतः भक्तिरहितानांतेपांपरप्राप्त्यभावादेवब्रह्मस्तुतौज्ञानेप्रयासमुदपास्येतिश्रेयःस्रुतिभक्तिमुदस्यतेविभो क्लिश्यंतियेकेवलबोधलब्धयेइत्यादि प्रथमस्कंधादौनैष्कर्म्यमप्यच्युतभाववर्जितंनशोभतेज्ञानमलंनिरंजनमित्यादिचोक्तं ॥ दशमेच (अ० ९ श्लो० २१) नायंसुखापोभगवान्देहिनांगोपिकासुतः ज्ञानिनांचात्मभूतानांयथाभक्तिमतामिहेत्युक्तं । परस्यभक्त्यैकलभ्यत्वंतुगीतायां अक्षरप्रविष्टानामनिवृत्तिमुक्त्वापुरुषःसपर.पार्थभक्त्यालभ्यस्त्वनन्ययेतीतरव्यावर्तकतुशब्दकथनपूर्वकमुक्तं तत्रपरमगतिशब्देनतुमुक्तलयस्थानत्वादक्षरमेवोक्तं नतुमोक्षः ॥ एकादशाध्यायेपिभक्त्यात्वनन्ययाशक्यइतिभक्त्यैवपरस्यापरोक्षज्ञानदर्शनप्रवेशाउक्ताः ॥ परनिष्ठानांज्ञानोत्तरमपिभक्तिरितितुभजंत्यनन्यमनसोज्ञात्वाभूतादिमव्ययं इतिमत्वाभजंतेमांबुधाभावसमन्विताः

इत्यादावभ्यस्तं ॥ ज्ञानीत्वात्मैवेतिवाक्यंतु ज्ञानिभक्तपरमेव चतुर्विधाभजंतेमामित्युपक्रम्य तेषुज्ञानिभक्तस्य तेषांज्ञानीनित्ययुक्तएकभक्तिर्विशिष्यतइत्यनन्यभक्तिमत्तयोत्कर्षमुक्त्वा-त्रिभ्योऽधिकोत्कर्षबोधनायतथाकथनात् ॥ तस्यपरमागतिरक्षरोनभवतीतिज्ञापनायमा-मेवानुत्तमांगतिमितिचोक्तं ॥ बहूनांजन्मनामितितदग्रिमेबहुजन्मांतेज्ञानंप्राप्तस्यवासुदेवः सर्वमितिपरप्रतिपत्तिमतःसुष्ठुदौर्लभ्यमुक्तंनतुकेवलज्ञानिनोजीवन्मुक्तस्य एतत्समानार्थक-मेवषष्ठस्कंधे (अ० १४–श्लो० ५) मुक्तानामपिसिद्धानांनारायणपरायणः । सुदुर्लभःप्रशां-तात्माकोटिष्वपिमहामुने इतिवाक्यं ॥ नहिज्ञानेनसदृशंपवित्रमिहविद्यते । तत्स्वयंयोगसं-सिद्धःकालेनात्मनिविंदतीतिवाक्यंतुसर्वकर्मनाशकत्वाज्ज्ञानस्येहातिपावित्र्यंवक्ति ॥ तद-स्माकमिष्टमेव ॥ नहीदंभक्तस्यैवपरप्राप्तिरित्यस्यबाधकं ॥ किंचयोगसंसिद्धस्यस्वयंज्ञानप्राप्ति-रुक्ता । षष्ठाध्यायेचतपस्विभ्योधिकोयोयोगीदिनातंप्रशंस्ययोगिनामपिसर्वेषामित्यादिनायो-गसंसिद्धस्यापिभक्तिस्तुकस्यचिदेवेति तस्याअत्युत्कर्षोबोधितः ॥ तेनज्ञानचान्युक्ततरः पर-भक्तोयुक्ततमइतिविवेकः । श्रद्धाचेतिश्रुतिस्तुनोपास्यस्यामहात्वबोधिकेतिप्राङ्निर्णीतंनिर्णे-ष्यतेच । "तमेवविदित्वा, नान्यःपथाः" इत्यादिकंतुज्ञानादेवब्रह्मभावलक्षणमुक्तिंवक्ति नतु-भक्तितःपरप्राप्तिंवारयतीतिनतद्विरोधः ब्रह्मभावस्यपरभक्तिपूर्वदशारूपत्वात् ॥ अतएवाष्टा-दशाध्यायेज्ञानस्यपरांनिष्ठांसमासेनकथयन् ब्रह्मभूयायकल्पतइत्यहंकारममकाररूपसंसार-निवारणोत्तरंब्रह्मभावमुक्त्वानंदाविर्भावात्प्रसन्नात्मनोब्रह्मभूतस्यपरभक्तिलाभमाह ब्रह्म-भूतःप्रसन्नात्मेत्यादिना ॥ तयापुरुषोत्तमसाक्षात्कारस्तस्मिन्प्रवेशश्चतत्रैवानुपदमुक्तः ॥ पर-प्राप्तेःश्रेष्ठत्वंतु मामुपेत्यपुनर्जन्म मामुपेत्यतुकौंतेयसर्गेपिनोपजायंतेइत्यादिनासम्यगभ्यस्तं ॥ द्वादशाध्यायेपिपुरुषोत्तमभक्तानामक्षरोपासकानांचोत्कर्षतारतम्येपृष्टेभगवता मय्या-वेश्यमनोयेमामित्यादिनास्वप्राप्तियोग्यभक्तानामत्युत्कर्षोऽक्षरोपासकानांक्लेशाधिक्यादिना-ऽपकर्षो यावदध्यायसमाप्तिपुनर्भक्तोत्कर्षश्चदर्शितः ॥ भक्त्यापरसाक्षात्कारतत्प्राप्तिलक्ष-णामृतत्वबोधिकाःश्रुतयस्तुकैवल्योपनिषदि "श्रद्धाभक्तिध्यानयोगादवेहि" छांदोग्ये "ब्रह्मसंस्थोऽमृतत्वमेति" आथर्वणे "परमहंसनद्योधारयतिरसतिभजतिध्यायते" इत्यादु-क्त्याऽऽम्नायते "सोऽमृतोभवतिसोऽमृतोभवति" एवमाद्याआकरेषुज्ञेयाः । अत्रछांदोग्य-वाक्यंभक्तिपरतयाभक्तिमीमांसायां (सू० ३) "तत्संस्थस्यामृतत्वोपदेशात्" इतिसूत्रेनि-र्णीतं ॥ एतदर्थबोधिकास्स्मृतयश्च मयिभक्तिर्हिभूतानामसृतत्वायकल्पतइत्याद्याभागवतीय-कुरुक्षेत्रसूर्योपरागप्रसंगस्थभगवद्वाक्यादिरूपा अनुसंधेयाः विस्तरभयाद्विरम्यते ॥ एतेनये-तुज्ञानैकसंनिष्ठाइतिमार्तंडकारिकाऽसम्यक्त्वसमर्थिताज्ञेया ॥ तदेतत्सर्वंसुरसिकृत्याहुः—परापर-भावादिसुश्रुतिरेवप्रमाणमिति ॥ तथेति ॥ परापरभावादिकं ॥ अत्र आनंदमयोभ्यासादिति सूत्रेप्रभुचरणैः प्रणीते द्वितीयवर्णके स्थितंभाष्यभागं मध्येमध्येप्रकाशभागसहितंबोध-सौलभ्यायकचिदापूरितपदांतरैश्चकैश्चिदुक्तं प्रकृतानुपयोगिभागत्यागपुरःसरंप्रायोऽक्षर-शोऽनुवदंति ॥ अक्षरमहाविल्परमहाप्नोतीत्यादिना सर्वंसुस्थमित्यंतेन असंगतइति ॥ पौनरुक्त्याशंका–अव्ययमिति ॥ पंचम्यर्थकं अर्धविशेषणंवा ॥ शतयक्षणइत्यादि ॥ अत्र किंचिदार्थिकं किंचित्प्रकाशस्थं ॥ महत्त्व इति क्षराक्षरयोस्तथात्वे ॥ नायमात्मेति इह

प्रकाशकाराः प्रवचनादिपदत्रयेण केवलयज्ञादीनांपुरुषनिष्ठानां स्वाभाविकसाधनानामाग-
न्तुकसाधनानांचोपलक्षणेनग्रंथांतरसाधनाप्राप्यत्वं स्पष्टयंति ॥ सहकारियोग्यतेतिसहकारि-
योग्यतयोः संपत्त्या ॥ तथाचश्रवणेत्यादि ॥ अयंप्रकाशानुवादआविर्भावइत्यंतः सत्यज्ञाने-
त्याद्यार्थिकं ॥ गुहायामित्यादिपुनर्भाष्यं ॥ अलौकिकप्रयोगइति ॥ नङिसंबुद्ध्योरिति
निषेधतोनलोपाभावादवगम्यमानेन सुपांसुलुगितिच्छांदसङिलोपेनसाधुर्व्योमन्निति-
प्रयोगः ॥ अक्षरस्यैवपरमव्योमत्वंतु "ऋचोअक्षरेपरमेव्योमन् ॥ यदक्षरेपरमेव्योमन्"
इत्यादिश्रुतिभ्योऽसंदिग्धं ॥ भक्त्याहमित्यादिअत्रभाष्यांशपरित्यागोविस्तरभयाय ॥
स्वातंत्र्यमितिकृत्कर्तृतावोधनात्तथा ॥ ब्रह्मणस्तुसह्युक्तेप्रधानइतिशास्त्राद्गौणत्वं अहंभक्त्या-
दिङ्मानिनश्चस्कंधेदुर्वाससंप्रतिभगवद्वाक्यानि ॥ द्वितीयेदोषमाहु.व्यापनंचेतिव्याकृति-
रूपरयाद्यास्यैतिअस्ययजुषः ॥ आप्नोतिपरमितिव्याख्येयवाक्यानुरोधात् भगवल्लोकस्था.
कामाअपिब्रह्मणेसहभाविप्राप्यपुरुषोत्तमात्मकाएवेतिसिध्यति ॥ अत्रशंकराचार्यकृतोप-
निषद्भाष्यस्यार्थदूषणप्रकाशस्थमनुवदंतिएतेनैवेतिपुनर्भाष्येसिद्धमाहु.तेनाशभोजनइत्यादि-
नातदाप्नोतीतिमाध्यंदिनानां गार्गिब्राह्मणस्थमिदंतत्रद्विधाव्याख्यानंप्रागुक्तं भत अथूधातो-
रेवेत्येवकारोप्यर्थेतत्रेदंव्याख्यानंआभातीतिकाण्वपाठानुरोधान्मुख्यं ॥ यत्रहिद्वैतमिति-
इदंबृहदारण्यकचतुर्थाध्यायेमैत्रेयीब्राह्मणाख्यचतुर्थब्राह्मणेऽस्ति ॥ अत्र "यत्रत्वस्यसर्वं"
इतिमाध्यंदिनपाठोगृहीतः ॥ काण्वानांतु "यत्रवाअस्यसर्वं" इतिपाठःभाष्योक्तसमाधिस-
क्षिप्याहुःतत्रप्राकृतेत्यादिनायद्विपश्यंतीतिदशमस्कंधे (अ० २८ श्लो १४) दर्शयामास-
लोकंस्वगोपानांतमसःपरंसत्यंज्ञानमनंतयद्ब्रह्मज्योति सनातनंयद्विपश्यंतिमुनयोगुणापाये-
समाहिताइत्युच्यतेअत्रोपबृंहणेसत्यमित्यादीनांभगवल्लोकविशेषणत्वाल्लक्षणवाक्यस्याक्षरप
रत्वादरेपिवीजंस्मारितं ॥ यद्वीतिश्लोकाऽर्धोत्तरार्थे ' तद्विष्णो परमपदंसदापश्यतिसूरय."
इत्यादिश्रुतय परंपदंवैष्णवमामनंतितद्यन्नेतिनेतीत्येतदुत्सिसृक्षवः विसृज्यदौरात्म्यमनन्य-
सौहृदाहृदोपगुह्यावसितंसमाहितैरित्यादिभागवतवचनांतराणिचसार्थानि ॥ तेनऋचउ-
क्तरीतिकंव्याख्यानमप्युपष्टब्धंभवति एवस्वग्रंथस्याप्रामाणिकत्वबोधनायश्रीप्रभुचरणप्र-
णीतद्वितीयवर्णकस्थभागंसर्वंसुस्थमित्यंतं शब्दतोर्थतश्चानूद्य तत सिद्धंप्रकृतोपयोगंदर्श-
यंतिएवंचेत्यादिनासभगवइति ॥ छांदोग्येभूमविद्याख्यसप्तमाध्यायइदं ॥ उभयोर्विभुत्वे-
प्याधाराधेयभावस्तु "तिलेषुतैलंदधनीवसर्पि." इत्यादिश्रौतदृष्टांतानुरोधाज्ज्ञेय ॥

नेदंयदिदमुपासतेइतिश्रुतेरर्थस्तुपूर्वमेवप्रतिपादितः । यद्युपास्य-
स्याब्रह्मत्वमभिप्रेयात्तर्हिपुनरिदंकारंनब्रूयात् । नेदंयद्यदुपासतइत्येता-
वतैवसिद्धेः।नच (नेदंत्वयोपधंभोज्यंयदिदंशूद्राभुंजतेइतिवदुभयत्र-
प्रसिद्धिसूचनायेदंकारद्वयस्यसत्वमितिवाच्यं; तादृशवाक्यस्योभया-
संमतत्वेनदृष्टांतत्वासंभवात् यच्छूद्राभुंजतइत्येतावतैवसामंजस्ये
इदंकारस्यव्यर्थत्वात् नचान्यतरोपादानेनिषेधउपासनायांचप्रसिद्धेर-
भावइतिवाच्यं; नेदमित्यनेनप्रतियोगिनएवप्रसिद्धिःप्रतीयते, नतुनि-

पेधस्य ॥ यदिदमित्यनेनापिप्रतियोगिनउपासनस्यप्रसिद्धिः प्रतिपा-
द्यतेचेदेकेनैवतत्संभवेद्वितीयेदंपदस्यवैयर्थ्यंदुर्वारमेव ॥ तृतीयचरणे
ब्रह्मणउक्तत्वेननेदंशब्दंपुनर्ब्रूयात्तदव्यवहितंवाब्रूयात्) इत्यादिदोषा-
णामापादनंतुस्वव्याख्यामनवेक्ष्यैव ॥ तत्रापियद्यदुपासतेतन्नयदुपास
तेनेदमित्यादिकुतोनोक्तमितिपर्यनुयोगसंभवात् निषेधस्यप्रतियोगि-
सापेक्षत्वात्प्रतियोगिनएवप्रथमंवक्तुमुचितत्वात् नच (इदमःसन्निकृ-
ष्टपरामर्शकत्वेनवागादिसमुदायस्यासन्निकृष्टतयातेनपरामर्शो युक्त
इतिवाच्यं, इदंशब्दस्ययदित्वयासंनिकृष्टवाचकत्वमेवविवक्षितंतदा
(प्रसिद्धिसूचनायेदंकारद्वयस्यसत्वात् । अन्यतरोपादानेहि उपासना-
यांनिषेधेचप्रसिद्धिर्नस्या) दित्यादिकस्तवप्रलापोऽसंगतःस्यात् ॥ किंच
सन्निकृष्टपदेनसमीपपठितत्वमुच्यतेचेत् तच्चवागादीनामप्यस्तियद्य-
व्यवहितपूर्वंपठितत्वमेवविवक्ष्यतेतदा उपास्यस्याप्यव्यवहितपूर्वंनप-
ठितत्वान्निषेधानुपपत्तिः । ननुवागादीनांब्रह्मत्वंनप्रसक्तंप्रसक्तंहिप्रति-
षिध्यते नह्यप्रसक्तं ममतूपासनाप्रकरणानुरोधेनोपास्यस्यब्रह्मत्वंप्रस-
क्तंतदनेनप्रतिषिध्यते । निषेधस्तुनसर्वथा किंतु ज्ञेयत्वाभावबोध-
नाय ॥ अतएव विद्धीत्युक्तमितिचेन्मैवं; वागादीनामपिप्रकाशकत्वे-
नकैश्चिदात्मत्वंस्वीक्रियतेतन्मतनिराकरणायप्रतिषेधःक्रियते । उपास-
नाप्रकरणानुरोधादुपास्यस्यब्रह्मत्वंतुनसंभवति, किंतूपासनांगत्वमे-
वातएवोक्तं अंगत्वबोधकानिप्रमाणानिषट्श्रुतिलिंगवाक्यप्रकरणस्था-
नसमाख्यारूपाणि तथाच यथादर्शपौर्णमासाभ्यांस्वर्गकामोयजेतेति
दर्शपौर्णमासप्रकरणपठितानां पंचप्रयाजानांदर्शपौर्णमासांगत्वंतथो-
पासनाप्रकरणपठितस्योपासनांगत्वमेवयुक्तं नब्रह्मत्वं ॥ वस्तुतस्तु-
केनोपनिषद्भाष्यपर्यालोचनयातत्ज्ञानप्रकरणं नोपासनाप्रकरणं अत
एवतदारंभे "केनेषितमित्याद्योपनिषत्परब्रह्मविषयावक्तव्येति"
इत्याद्युक्त्वा "तस्मादृष्टादृष्टेभ्योबाह्यसाधनसाध्येभ्योविरक्तस्यप्रत्य-
गात्मविषयाब्रह्मजिज्ञासेयंकेनेषितमित्यादिश्रुत्याप्रदर्श्यते ॥ शिष्या-
चार्यप्रश्नप्रतिवचनरूपेणकथनंतुसूक्ष्मवस्तुविषयत्वात्सुखप्रतिपत्ति-
कारणंभवती"त्युक्तंश्रीशंकराचार्यैः एवंचतन्मताज्ञानमूलकएवायं
प्रलापस्तन्मतानभिज्ञत्वंव्यनक्ति । यच्च (तस्मादुपासकानामुपास्यब्रह्म-
प्राप्तिर्यांभवतिसाज्ञानमुख्यब्रह्मप्राप्तिरित्याद्युक्तं तदपिभक्त्याहमेकयाग्रा-
ह्यः, न ज्ञानंनचवैराग्यं प्रायश्रेयोभवेदिह, ब्रह्मभूतःप्रसन्नात्मानशो-
चति नकांक्षति, समःसर्वेषुभूतेषुमद्भक्तिं लभंतेपरामित्यादिवाक्य-
रोधाविदुपेक्ष्यं, यदिज्ञानिप्राप्यम्यमुख्यत्वंस्यात्तदा "ब्रह्मविद्ब्रह्मैव-

भवती" तिश्रुतिप्रतिपादितब्रह्मभावानंतरंभक्तिलाभकथनंविरुद्धंस्या-त्तत्प्राप्यस्यामुख्यत्वात्तस्माद्ब्रह्मभावानंतरमेवभगवद्भावसंभवात्तेनपु-रुषोत्तमेप्रवेशात्तत्रपरंपरयोपयोगोब्रह्मज्ञानस्येतिपुरुषोत्तमप्राप्तिरेव-परमामुक्तिः, अधिकंतुभाष्यादितोवसेयं । उक्तश्चायमर्थोऽक्षरधि-यांत्ववरोधः सामान्यतद्भावाभ्यामौपसदवत्तदुक्तमितिसूत्रेव्यास-पादैरिति ॥

सहस्राक्षे यत्तुयद्वाचेत्यादि तत्प्रसक्तिरित्यंतं भागं व्युदस्यंति–नेदंयदिदमित्या-दिनाव्यासपादैरितीत्यंतेन ॥ उभयासंमतत्वेनेत्यादिश्रोतृसंप्रतिपन्नप्रयार्थोदृष्टांतोभवति, नतुबुद्धिसाम्याभावेसः । अतएव गौतमपंचलक्षण्यां (अ० १ आह्निक १ सू० २५), "लौकिकपरीक्षकाणांयस्मिन्नर्थेबुद्धिसाम्यंसदृष्टांतः" इति तल्लक्षणमुक्तं । इह लौकिकानां परीक्षकाणांचेत्यर्थोवात्स्यायनभाष्येसिध्यति ॥ अतोदृष्टांतत्वाभावः किंचनेदमौषध-मितिकल्पितवाक्येपिप्रथमइदंशब्दःश्रोत्रनुभूयमानामौषधव्यक्तिंवक्ति ॥ द्वितीयश्चत-ज्जातिं ॥ प्रकृतेतुश्रावणकालेश्रोतुरुपास्यव्यक्तिप्रत्यक्षाभावात्तद्दृष्टांतासंगतिः; पूर्वमुपास्य-स्याप्रक्रांततयानैवलेनेदमापरामर्शासंभवाच्च ॥ औषधपारोक्ष्येप्रक्रमस्याप्यभावेचसति तुनकोपिप्रयोगकुशलस्तथाप्रयुंजीत ॥ यत् उपासते इदं प्रसिद्धंब्रह्मनेत्यर्थव्यत्तयाएके-नैवोभयत्रप्रसिद्धेःसंभवात् । अन्यतरोपादानेहीत्यादिकमसंगतं ॥ उपासनाविषयस्यैव प्रतियोगितयाविवक्षणात् । वस्तुतोनिषेधप्रतियोगितायाःलोकेप्रसिद्धभावेनप्रथमेदङ्कार-स्यैवैयध्यानपायाच्च ॥ यच्चकिंचत्वदुक्तेत्यादि उत्थानादित्यंत–तन्न; अत्रपूर्वार्धे यच्छब्दद्वयेननिर्दिष्टं तृतीयचरणेतदापरामृश्य एवकारेणावधार्यते तत्रप्रथमचरणस्थ-यच्छब्दविचारे वाचायत् अनभ्युदितं तदेवेत्येवकारव्यावर्त्यमुत्थिताकांक्षत्वात्प्रथममाह नेदमितिवागादिभिरनभ्युदितादिकमेवब्रह्मविद्धि इदंसन्निकृष्टंवागादिकंतुब्रह्मनविद्धीत्यर्थः । ब्रह्मत्वप्रसक्तिस्तु "वाग्वैब्रह्म ॥ प्राणोब्रह्मेति ॥ मनोब्रह्मेति" इत्यादिवाक्यांतरैः ॥ कौशीतकिब्राह्मणादिषु "नवाचंविजिज्ञासीतवक्तारंविद्यात्" इत्यादिश्रावणादप्यवेद्यत्वं ॥ अथद्वितीयेचरणेवागभिवदनादेःकरणंकर्तृवायदुक्तं तद्ब्रह्मकार्यमात्रेणकथंवेद्यमित्याकांक्षो-त्थानात्स्वरूपमाह–यदिदमुपासतइति ॥ अतश्चतुर्थचरणेपूर्वार्धपादद्वयार्थः क्रमेणैव निर्मलीक्रियते ॥ तत्रनिषेधविषयस्यप्रसिद्धत्वेपुनराकांक्षोत्थानमसंगतं ॥ अप्रसिद्धत्वे इदंशब्दविरोध तच्छब्दस्यैवतत्रौचित्यात् ॥ यच्छब्दबलात्तच्छब्दाध्याहारस्त्वावश्यकः, तथासतिप्रथममिदंपदंतत्रासंगतार्थं ॥ यच्चकिंचेदम इत्यादिनिषिध्यतइत्यंतं तत्रोच्यते– यद्वाचेत्यादिवाक्यपंचकेद्वितीयचरणेषु । येनेति करणेहेतौवातृतीयेत्येकपक्षः, कर्तरीत्यपरः, तत्राद्येयेनसाधनेनयद्ब्रलाद्वाअर्थाज्जीवेनकर्त्रावागभ्युद्यतइत्याद्यर्थः संपद्यते । तथासति नेद-मित्यत्रेदंशब्देनभगवत्प्रेयं अभिवदनादिकर्तृजीवस्तूच्यते ॥ अयंपक्षः ईक्षत्यधिकरणा-वसानेभाष्यप्रकारेबोधितः ॥ अस्मिन्पक्षेक्लीबनिर्देशो नवापिदोषः ॥ कर्तरितृतीयेति-मुख्यपक्षेतुनेदमित्यत्रेदमावागादिकमेवप्रत्येकंपरामृश्यते । तत्रापिवाक्प्राणयोः क्लीब-निर्देशः; शरदःकृतार्थतेत्यादिवत्सामान्येनपुंसकमित्यभिप्रायात् ॥ एवमेतत्कठवल्लीपुपष्ट-

वल्ल्यां "एतद्वैतत्" इतिप्रवाहे "याप्राणेनसंभवत्यदितिर्देवतामयी" इतिश्रीधान्योत्तरमपितथैवोच्यते एतत् अदितिपदवाच्यभूमिरूपंवस्तुवैनिश्चयेनतद्ब्रह्मेतितदर्थः "सआत्मातत्त्वमसि" इत्याद्यप्येवमेवसंगच्छते ॥ अन्यथासत्त्वमित्यादिवाच्यं स्यात् ॥ वागादेर्ब्रह्मत्वप्रसक्तिस्तुदर्शिता ॥ यच्च ममतुसविशेषस्योपासनाप्रकरणानुरोधेनब्रह्मत्वं प्राप्तंतन्निषिध्यते ॥ इति,–तदकिंचित्करं; केनेषितमित्यादेस्तलवकारब्राह्मणषष्ठाध्यायस्योपासनाप्रकरणत्वाभावात् तत्रशंकराचार्यैरपिज्ञानप्रकरणतायाएवांगीकारात् नचान्यत्रोपासनाप्रकरणसिद्धस्यसविशेषस्याब्रह्मत्वमिहबोध्यतइतिवाच्यं यदुपासतेतन्नब्रह्मेति व्याख्यानेपिउपासनागंधविधुरेषुबहुष्वेवोपनिषद्भागेषुप्रतिपादितेसविशेषब्रह्मतानिषेधस्येतोऽसिद्धेः ॥ द्वितीयचरणेपुवागभिवदनादेर्हेतुतया कर्तृतयावास्पष्टंकथनेनात्रापिवेद्यसविशेषतायाअनपायाच्च ॥ किंच इत्यादिदंशब्दवैयर्थ्यानंगीकारेपिवागाद्युपासनाविधायकवाक्यानांसत्त्वात् यद्वागादिकंतत्तत्फलकामाउपासतेतदिदंवागादिकंब्रह्मनेत्येवार्थः सिध्येत्तुल्ययुक्तः ॥ किंच "ऊर्ध्वंप्राणमुन्नयत्यपानंप्रत्यगस्यति मध्येवामनमासीनंविश्वेदेवाउपासते" इतिकठश्रुत्यावागादयोयदुपासतेतद्ब्रह्मेत्यप्यर्थः प्रतिभाति । एवं त्वदुक्तार्थनिरासात् "इति प्राचीनयोग्योपास्व ॥ परंब्रह्मैतद्योधारयतिरसतिभजति ॥ भक्तिरस्यभजनं" इत्यादिश्रुत्युक्तभक्तिविषयस्यहरब्रह्मत्वंनिर्बाधं ॥ परत्वोक्तिसमंजस्याच्च ॥ यत्तुनिषेधश्रुत्यादितावदित्युक्तं तच्चिन्त्यमसत्पक्षेपि ॥ वागादिषुसर्वथाब्रह्मत्वाभावस्यासदसंमतत्वात् उक्तकौषीतकिश्रुत्यामुक्त्यर्थंमज्ञेयतामात्रविनक्षणात् तस्मादुपासकानामित्यादितुभक्त्याहमेकमेत्यादिवाक्यविरोधपराहतं ॥ उपास्यब्रह्मणइत्यादिकंचउक्तदिशाज्ञेयोपास्ययोरभेदसमर्थनेनैवनिरस्तं ॥ तत्प्राप्यस्यामुख्यत्वादिति ॥ भक्तिप्राप्यस्यज्ञेयब्रह्मापेक्षयागौणतायास्त्वप्यस्वीकारादित्यर्थ. ॥ अक्षरधियांत्विति ॥ तृतीयस्यतृतीये पादे (सू० ३३-३४)

यत्तु यद्वाचाइत्यस्यायमर्थ –यद्वागाद्यगम्यं तत्प्रेरयितृ ब्रह्म विद्धि नेदं वागादि ॥ कथंतर्हि तस्य ज्ञानं तत्राह–यदिदं श्रुतिप्रसिद्धमुपासने वैदिकाइतिशेष ॥ यद्युपास्यस्याब्रह्मत्वमभिप्रेयात्तर्हि पुनरिदंकारं नब्रूयात् नेदंयदुपासतइत्येतावतैवसिद्धेरिति–तन्न; नेदं त्वयौषधभोज्यं यदिदंशूद्राभुञ्जतेइतिवदुभयत्र प्रसिद्धिसूचनायेदंकारद्वयस्य सत्त्वात् ॥ अन्यतरोपादानेहि उपासनायां निषेधेचप्रसिद्धिर्नस्यात् ॥ किञ्च त्वदुक्तव्याख्यायां तृतीयचरणेब्रह्मणउक्तत्वेन नेदंशब्दम्पुनर्ब्रूयात् तदव्यवहितं वाब्रूयादुत्थिताकाङ्क्षान्तरतुनिषेधाव्यवहितम् ॥ अनुत्थिताकाङ्क्षत्वात् ॥ ततोऽत्रेमुवत्प्रतियोगिन समर्पयतीतिभाति ॥ आकांक्षायाउत्थानात् ॥ किंचेदम. सन्निकृष्टपरामर्शकत्वेन वागादिसमुदायस्याऽसन्निकृष्टतया तेन परामर्शोऽयुक्तइति प्रत्येकमेव सवाच्य । तथाच वाक्प्राणयोरनपुंसकत्वेन तत्र नपुंसकनिर्देशोऽप्यसंगत स्यात् ॥ किञ्च वागादेर्ब्रह्मत्वं कथं प्रसक्त यत्तेनेननिषिध्यते ममतुसविशेषस्योपासनाप्रकरणानुरोधेन ब्रह्मत्व प्राप्तं तन्निषिध्यते ॥ निषेधश्च न सर्वथा तदभावबोधनाय किन्तु ज्ञेयस्वरूपत्वाभावबोधनाय ॥ अतएव विद्धीत्युक्तमित्यास्तातावत् ॥ तस्मादुपासकानामुपास्यब्रह्मप्राप्तिर्या भवति सा न मुख्यब्रह्मप्राप्ति ॥ उपास्यब्रह्मण करादिकमास्ता मतावता ज्ञेयब्रह्मणि तत्प्रसक्ति ॥ ४ ॥ २१ ॥

द्विसूत्रमधिकरणम् ॥ आथर्वणे "परमक्षैतद्योधारयति" इत्यादौपरभक्तेर्मुक्तिकारणत्वं "तमेवविदित्वा ॥ तमेवंविद्वान्" इत्यादौज्ञानस्यैवतथात्वं चश्रूयतेऽतः कस्यकारणत्वमितिसंशयेऽक्षरज्ञानस्यैवतथात्वमिति पूर्वपक्षे परप्राप्तिलक्षणमुक्तौ स्वरूपयोग्यतासंपादनमात्रमक्षरज्ञानेनसंपाद्यते । सातुभक्त्यैवेत्याशयेनेदमुच्यते ॥ अर्थस्तु—तुः पूर्वपक्षनिरासे, अक्षरधियां अक्षरविषयकज्ञानानां अवरोधो मुक्तिसाधनतयायत्परिगणनं तत्सामान्यतद्भावाभ्याम् ॥ भगवत्सच्चिदानंदात्मकस्याक्षरस्य धामतयाविभूतितया चरणतयाचपरेणसमानत्वं कथंचिदस्तीति पुरुषोत्तमसंबंधिसंबंधेऽपिमुक्तिः ॥ अतस्तत्सामान्यादवरोधः ॥ किंच तद्भावात् ब्रह्मभावात् ब्रह्मभूतःप्रसन्नात्मेत्यत्र पुनरानंदांशाविर्भावात्प्रसन्नात्मनो ब्रह्मभावोत्तरं परभक्तेर्लाभस्तयाऽभिज्ञानपूर्वकं परस्मिन्प्रवेशश्चोच्यते ॥ अतोब्रह्मभावलक्षणास्वरूपयोग्यताऽक्षरज्ञानात्संपद्यते इतितज्ज्ञानस्यावरोधः ॥ अक्षरधियातद्भावस्तु "ब्रह्मवेदब्रह्मैवभवती" त्यादौसुप्रसिद्धः ॥ भक्तिरहितानामक्षरमात्रज्ञानवतांतुतत्रैवलयः "ब्रह्मैवसन्ब्रह्माप्येती" त्यादौस्फुटः ॥ अथज्ञानस्याविशेषेपिकेषांचिद्ब्रह्मभावोत्तरंभक्तिः केषांचित्तत्रैवलयइतिफलतारतम्ये भगवदिच्छारूपंहेतुं दृष्टांतमुखेनाह–औपसदवदिति ॥ ज्योतिष्टोमादौउपसदाख्येष्टिविशेषेषु "तानूनप्त्रस्पर्शाख्यमौपसदं कर्मास्तितत्रातिथ्याया ध्रौव्यात्स्रुचिचमसेवायदाज्यं चतुरवत्तं पंचावत्तं वासमवद्यति तत्तानूनप्त्रमित्युच्यते ॥ अनाधृष्टमसीतिमंत्रेणषोडशाप्यृत्विजोयजमानेन सह तानूनप्त्रंसमवमृशंत्यनुमेदीक्षामितिमंत्रेणयजमानस्ततसमवमृशन्यमृत्विजं कामयेतायंयज्ञयशासमृच्छेदितितंप्रथमसवमर्शयेदितिश्रूयतेश्रुतौकल्पेच ॥ अत्रसर्वेषामृत्विजांतानूनप्त्रत्वाविशेषेपियस्मिन्स्नेहातिशयेनतथेच्छातत्रैवतथाकृतिर्नेतरेषु ॥ नहितत्राविशिष्टेषुकथमेवंकृतिरिति पर्यनुयोगः संभवत्येवमिहापी" तिव्याख्यातम् ॥ अत्रसंमतिमाह–तदुक्तमिति । गीताष्टमाध्यायेभगवतेविभारः ॥ तत्रयदक्षरंवेदविदोवदंतीत्यादिनासयातिपरमांगतिमित्यंतेनाक्षरविदांयतीनांतत्रैवप्रवेशमुक्त्वा अनन्यचेताः सततमित्यादिना स्वप्राप्त्युपायःपृथगुक्तः ॥ स्वस्यभक्त्यैकलभ्यत्वं क्षराक्षरातीतत्वं चयकुं सहस्रयुगेत्यादिश्लोकत्रयेणक्षरस्वरूपमाविर्भावितिरोभावाभ्यां मुहुरावर्तमानत्वलक्षणमुक्त्वा परस्तस्मात्तुभावोन्यइतिश्लोकद्वयेनाक्षरस्वरूपंतस्यक्षरणाभावं धामत्वंचाह ॥ तुशब्दसमभिव्याहृतेनतस्मादित्यनेन क्षरमात्रंपरास्तइयते यंप्राप्यननिवर्तंतइत्युक्त्या ज्ञानिनांतत्रैवलयः तमाहुः परमांगतिमितिशक्तिग्राहकवाक्यात्सयातिपरमांगतिमित्यत्रापिसएवेति ज्ञेयम् ॥ एतदग्रेऽनुपदं । पुरुषःसपर.पार्थभक्त्या लभ्यस्त्वनन्ययेति क्षराक्षराभ्यां परःपुरुषोत्तमस्तस्यचभक्त्यैवलाभउक्तः ॥ तुशब्दस्तदितरव्यावर्तकः ॥ एवमक्षरपुरुषोत्तमोपासनाफलतारतम्यं पार्थप्रश्नोत्तरंद्वादशाध्यायेपिस्पष्टमेवनिर्दिष्टम् ॥ एतदुत्तरसूत्रेपि (सू० ३४) "इयदामननात्" इति ॥ तैत्तिरीये आनंदमीमांसायांगणनाश्रवणादक्षरमियद्गणितानंदं तेनैव यतोवाचइतिश्लोकगणनाकारणयोर्वाङ्मनसयोः प्रतिषेधादानंदमयः पुरुषोत्तमः पूर्णानंद इत्यपिबोधितमिति संक्षेपः ॥ अत.परमार्थतऐक्येप्यैच्छिकमक्षरपुरुषोत्तमयोस्तारतम्यं उपास्यपुरुषोत्तमप्राप्तेः सर्वोत्तमफलत्वं तदुपासकानाम-

चिरान्मृत्युससाराकूपारात्समुद्धाराविकंचगीतादिषुप्रसिद्धमेवेत्याशाकंसकलमनाकुलमेव ॥ (गीति) निर्द्धंसैताभिलापाद्यासामयिकीसदाऽऽकृति सहजा ॥ सामायिकीतिवदुता॰ वृथैवमवतावताद्दवागुरुता ॥ १ ॥

इतिचतुर्थश्लोकखंडनम् ॥

यत्तुअत्रैवशांकरा॰प्राहुर्मायिकंनश्वरंजगदितिशुद्धाद्वैतमार्तंडश्लोक॰ व्याख्योक्तास्थूलादिवाक्यानांलौकिकस्थूलत्वकलादिनिषेधकत्वेन्या॰ यविरोधमाह नञ्सामान्यनिषेधकृद्यदुदितानोर्वीसकुंभाघटेत्यादि॰ श्लोकेन तदप्यविचारितरमणीयं ॥ तथाहिनञ्सामान्यनिषेधकृदि॰ त्यस्यनञः सामान्याभावबोधकत्वमित्यर्थोवाच्य॰। तत्रसामान्यभावो यावद्वस्त्वभाव॰समभिव्याहृतयावद्वस्त्वभावोवा ? ॥ नाद्यः, घटोना॰ स्तिघटोनपटइत्यादौयावदभावाप्रतीतेः तादृशप्रत्ययानांयावदभाव॰ विषयकत्वेघटवतितादृशप्रत्ययोनस्यात् घटभेदस्यचासत्वेनघटोन पटइतिप्रतीतिश्चनस्यात् नचस्वान्वयितावच्छेदकधर्मावच्छिन्नात्यंता॰ भाववत्तादृशान्योन्याभावश्चनञावोध्यतइतिवाच्यं भूतलेघटोना॰ स्तीत्यत्रघटस्येवभूतलस्यापिनञर्थाभावान्वयितयाघटत्वावच्छिन्न॰ प्रतियोगिताकाभाववद्भूतलत्वावच्छिन्नप्रतियोगिताकाभावस्यापिप्र॰ तीत्यापत्तेःकिंतुस्वप्रतियोगितावच्छेदकीभूतधर्मावच्छिन्नस्यैवाभावो नञाप्रत्याय्यते सोपिकुत्रचिन्नप्रतीयते यथा अहिंसासत्यमक्रोधमि॰ त्यनहिंसासामान्याभावस्यधर्मत्वेयज्ञानांहिंसासाध्यानांधर्मत्वानुप॰ पत्यातन्नहिंसापदंविहितहिंसातिरिक्तहिंसापरंवाच्यं ॥ तथाच हिंसा॰ पदेनाविहितहिंसात्वावच्छिन्नाभावएवप्रतीयते, नतु हिंसात्वावच्छि॰ न्नप्रतियोगिताकात्यंताभावः ॥ एवंचतवापिन्यायविरोधस्तुल्यएव यदिच तत्र "स्थूलपृषतीमाग्निवारुणीमनड्वाहीमालभेतेति" वाक्य॰ पर्यालोचनयाहिंसासामान्याभावबोधकस्यापिनञोहिंसाविशेषाभा॰ वउपसंहार॰क्रियते ॥ उपसंहार॰सामान्यतः प्राप्तस्यविशेषेसंको॰ चनं ॥ यथा "पुरोडाशंचतुर्द्धाकरोती" तिपुरोडाशसामान्येप्राप्तंच॰ तुर्द्धाकरण "माग्नेयंचतुर्धाकरोती" तिवाक्यबलादाग्नेयेसंकोच्यते ॥ एवमत्रापिसंकोचेन न्यायविरोधः। यदिच तादृशन्यायस्याविशेषवि॰ धायकवाक्यासमवधानकालिकनञ्विषयकत्वमित्युच्यतेतदाऽत्रापि "एतस्यैवानंदस्यान्यानिभूतानिमात्रामुपजीवंती" त्यलौकिककलावि॰ धायकवाक्यस्य "आसीनोदूरंव्रजती" त्यलौकिकक्रियाबोधकस्य "एको देव॰सर्वभूतेषुगूढ" इत्यलौकिकगुणविधायकवाक्यस्य "अणोरणी॰ यान्महतोमहीया" नित्यणोरणुत्वमहत्त्वादिबोधकवाक्यस्यचसम ॰

यथाना "दस्थूलमनण्वह्रस्वे" त्यादिवाक्यस्थस्य "निष्कलंनिष्क्रिय" मित्यादिवाक्यस्थस्यचनिषेधस्यलौकिकस्थौल्यलौकिकाणुत्वलौकिक-फलाक्रियादिरूपविशेषेसंकोचेकथंन्यायविरोधः? ॥ नचैतस्यैवानंदस्ये-तिवाक्यस्यलौकिकानंदबोधकत्वमितिवाच्यं ॥ तादृशानंदस्यलोके-ऽप्रसिद्धेः एवंतत्तच्छ्रुतिप्रतिपाद्यक्रियादीनामपिलोकेप्रसिध्यभावाद-लौकिकत्वंबोध्यं ॥ नहिलोकेकश्चिदासीनएवदूरंगच्छतिसर्वाणुभ्यःस र्वाणुतरःसर्वेभ्योमहद्भ्योमहत्तरश्चप्रसिद्धोयेनतेषांलौकिकत्वंस्यात् ॥ तस्मात्तादृशवाक्यबलादस्थूलादिवाक्यैर्लौकिकस्थूलादिगुणस्यैवनि-षेधःक्रियतइत्येवयुज्यते। एतेन (अस्थूलादिवाक्यैःप्रतिपाद्यस्यनिषेध-स्यकीदृशेनापिवाक्येनलौकिकस्थौल्यादिनिषेधबोधकत्वेसंकोचेक्लेश एवे) तिपरास्तं ॥ सत्यपिविशेषवाक्येयद्युपसंहारेक्लेशःस्यात्तर्हिन हिंस्यात्सर्वाभूतानीत्यत्रापिसकथंनस्याद्वैवकथंस्यादित्यपिविवेचनी-यं ॥ नचाऽस्थूलत्वादिकंनिष्क्रियत्वादिकंचामायिकं ॥ महीयस्त्वदूर-गमनादिकंचमायिकमितिवाच्यम्; लौकिकालौकिकविषयभेदेनैवनिषे-धानांविधीनांचव्यवस्थोपपत्तौमायिकत्वकल्पनेमानाभावात् ॥ ननु-निषेधबोधकैर्वाक्यैस्तत्तद्धर्माणामभावनिश्चयेपुनस्तत्तद्धर्माणांविधाने-तत्तद्धर्माणांमायिकत्वरूपंमिथ्यात्वमेवपर्यवस्यति ॥ स्वात्यंताभावाधि-करणवृत्तेरेवमिथ्यात्वादितिचेन्न ॥ स्वात्यंताभावसामानाधिकरण्य-स्यमिथ्यात्वरूपतास्वीकारेतस्यैवमतंमिथ्या दृश्यत्वादित्यनुमानेन त्वयासाधनीयत्वेनस्वात्यंताभावसमानाधिकरणेषुसंयोगादिषुसम-वायसंबंधावच्छिन्नप्रतियोगिताकस्वाभावाधिकरणवृत्तिषुवन्ह्यादिषु चसिद्धसाधनतापत्तेः ॥ नचस्वाभावाधिकरणवृत्तित्वमित्यस्यस्वाधि-करणनिष्ठाभावप्रतियोगित्वमेवपर्यवसितोर्थः, तच्च येनसंबंधेनयेन रूपेणयद्यस्याधिकरणंतेनसंबंधेनतेनरूपेणतन्निष्ठाभावप्रतियोगित्वं विवक्षितं रूपंचावच्छेदकविशेषः तथाच येनसंबंधविशेषेणयेनचा-वच्छेदकविशेषेणयदधिकरणताप्रतीतिर्यत्रभवितुमर्हतितेनैवसंबंध-विशेषेणतेनैवावच्छेदकविशेषेणतदधिकरणकात्यंताभावप्रतियोगित्वं तस्यमिथ्यात्वं नहिसंबंधविशेषमंतरेणपर्वतेवह्न्यधिकरणताप्रतीयते अवच्छेदकविशेषमंतरेणवृक्षेकपिसंयोगाधिकरणताचाप्रतीयतइतिन वह्निकपिसंयोगादौसिद्धसाधनमितिवाच्यं ॥ तादृशाभावस्यपारमार्थि-कत्वंप्रातिभासिकत्वंव्यावहारिकत्वंवाविवक्षितं ॥ नाद्य ; ब्रह्मभिन्न सर्वंमिथ्येतिप्रतिज्ञाहान्यापत्ते। नद्वितीयः, सिद्धसाधनतापत्तेः सर्व-

स्वस्वाश्रयनिष्ठभ्रमविषयाभावप्रतियोगित्वात् ॥ नतृतीयः; व्यावहारिकात्यंताभावप्रतियोगित्वेऽपिपारमार्थिकसत्वेविरोधाभावादर्थांतरतायादुर्वारत्वात् । नचाभवस्यतात्विकत्वेप्यभावस्यास्मन्मतेऽधिकरणात्मकतयाब्रह्मभिन्नत्वाभावात्कथंब्रह्मेतरन्मिथ्येतिप्रतिज्ञाहानिरितिवाच्यं ॥ तात्विकाभावप्रतियोगिनोत्रमिथ्यात्वासंभवेनतात्विकत्वापत्तेः ॥ ननुव्यावहारिकएवास्तुनिषेधः व्यावहारिकस्यज्ञानबाध्यत्वेपिनप्रतियोगिनःपारमार्थिकसत्वापादकत्वं यत्राभावबाधेपिप्रतियोगिनःसत्वंतत्रैवतादृशाभावप्रतियोगिनःपारमार्थिकत्वं। अत्रतूभयोः समसत्ताकत्वंस्वाप्ननिषेधप्रतियोगिस्वाप्नरजतादेरिवतत्रमिथ्यात्वमव्याहतमेव नापिनिषेधस्यनिषेधेप्रतियोगिसत्यमितिशंकनीयं ॥ प्रतियोगिनिषेधयोरुभयोरेवबाध्यत्वात् ॥ अन्यथाप्रागभावाभावरूपस्य घटादेर्ध्वंसेप्रागभावस्यसत्वापत्तेरितिचेन्न ॥ श्रुतिप्रतिपादितस्यार्थक्रियाकारिणःस्वरूपेणनिषेधासंभवात् ॥ नचपारमार्थिकत्वाकारेणापिनिषेधइतिवाच्यं ॥ अबाध्यत्वरूपस्यपारमार्थिकत्वस्याभावज्ञानस्यप्रतियोगिज्ञानाधीनत्वेनबाध्यत्वरूपमिथ्यात्वज्ञानसापेक्षत्वेनान्योन्याश्रयतापत्तेः ॥ किंचपारमार्थिकत्वस्यपारमार्थिकत्वेऽद्वैतहानिरतस्तस्यापिबाध्यत्वंस्वीकरणीयं, तस्यपारमार्थिकत्वेननिषेधेतस्मिन्नपिपारमार्थिकत्वेपुनःपर्यनुयोगेऽनवस्थापत्तिः ॥ किंचपारमार्थिकत्वेनघटपटादिप्रपंचस्याभावंस्वीकुर्वताव्यधिकरणधर्मावच्छिन्नाभावएवस्वीकृतस्तादृशाभावप्रतियोगित्वस्यसर्वत्रसौंदडमतानुयायिभिःस्वीकृतत्वात्सिद्धसाधनतापत्तिर्नापितादृशाभावाःस्वीकर्तुंशक्यंते ॥ प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानस्याभावप्रत्ययहेतुत्वादत्रपारमार्थिकत्वविशिष्टप्रपंचस्यत्वन्मतेऽसत्वेनतादृशाभावासंभवात् ॥ विशेष्येविशेषणमितिरीत्यास्यभावप्रतीतिर्नसंभवति तत्प्रत्ययस्यविशिष्टवैशिष्ट्यावगाहित्वादतएव "अभावप्रत्ययोहिविशिष्टवैशिष्ट्यमर्यादानातिशेत" इतिदीधितिकारैरप्युक्तं "तत्प्रतियोग्यवृत्तिश्चधर्मोनप्रतियोगितावच्छेदक" इतिचिंतामणिकारैरुक्तमित्यलमप्रस्तुतविचारेण ॥

अथ नञ्सामान्येति सहस्राक्षस्यपंचमश्लोकं इदानीं अग्रैवनांकराइत्यादिना क्रियेतेत्यरमित्यंतेनव्याख्यानेनसहितं यत्तुअग्रैवेत्यादिना सूयंविरुद्धंस्यादित्यंतेन संदयिष्यंतः प्रथमं इदानीमित्यादि अन्यत्रविस्तरइत्यंतं भागं निराकुर्वंति ॥ यत्तु अग्रैवेत्यादिना अप्रस्तुतविचारेणेत्यंतेन ॥ अयंभावः—मार्तंडटीकायां (कारिका २२) अग्रैवनांकरा प्रादुरिनिकारिकाविवरणे "निष्कलमित्यादिश्रुतौ शैरिकरूपक्रियासत्वादिगुणजन्यशरीरविकारीन्द्रियजन्यधर्मनिषेधपरत्वेनकथनात् ॥ सामान्यनिषेधेषु "एतस्मै-

थानंदस्यान्यानिभूतानिमात्रामुपजीवती" तिकल्पाया ॥ "आसीनोदूरंव्रजती" त्यादौ क्रियाया । "एकोदेव सर्वभूतेषुगूढ" इत्यादिभिर्गुणाना । "अपाणिपादोजवनोग्रहीते" ति । "उतामृतत्वस्येशान" इत्युक्त्वा सर्वत्र पाणिपादादिकथनादन्यशरीरस्याविकारीन्द्रियाणा । "अणोरणीयान्महतोमहीया" नित्यादावणुत्वादिधर्माणाचश्रवणेनतत्तद्बोधकानाविरोधापत्ते ॥ "अथातइत्यग्रेतिशब्द प्रकारवाचीतेनलौकिकप्रकारकनभवतीत्यर्थ" इत्यादि महत्प्रथमभागस्थग्रन्थएवकाचिदानुपूर्वीभिरत्राऽनूद्यते ॥ तत्रन्यायविरोधमापादयितुयत् (यद्यसात्कारणात्सकुम्भा पृथिवी अघटा नोच्यते अतोनञ्सामान्यनिषेधात्)

नञ्सामान्यनिषेधकृद्यदुदितानोर्वी सकुम्भाऽघटा
सकोच्योविहितौ विशेषउपसहारानपेक्षोबलात् ॥
तुल्ये सापिविधेर्विशेषविषया विध्यादिना न्यायत
सकोच सफल प्रपञ्चरचन मिथ्याह्यभावि स्थित ॥ ५ ॥

इदानीम्–अनेन शाङ्करा प्राहुर्मायिकनश्वरजगदिति श्लोकटीकायामस्थूलमनणु निष्कलंनिष्क्रियशान्तनिरवद्यनिरञ्जनमित्यादिश्रुतीरुपन्यस्य तासामेतस्यैवानन्दस्यान्यानिभूतानिमात्रामुपजीवन्ति आसीनोदूरंव्रजति इत्यादिश्रुत्यनुरोधेन यज्जीवादिगतलौकिकत्वादिनिषेधपरत्वमुक्त तत्रैवचार्थे प्रकृतैतावत्त्वहिप्रतिषेधतीति सूत्रमुपष्टम्भकतयोपन्यस्त तन्न्यायविरुद्धमित्याह–नञ्सामान्येति ॥ यद्यस्मात्कारणात्सकुम्भा पृथिवी अघटा नोच्यते, अतोनञ्सामान्यनिषेधकृत्व स्वान्वयितावच्छेदकधर्मावच्छिन्नात्यन्ताभावबोधकइत्यर्थ ॥ नञित्युपलक्षण निषेधार्थकपदान्तरस्यापि ॥ यतस्तादृशी भूमिर्निष्कुम्भापिनोच्यते तस्मान्निषेधवाक्येषु संकोचे न्यायविरोधइति ॥ यत्र विशेषेविहिति विशेषविषयक विधानमस्ति तत्र न्यायविरोधेऽपि तादृशवचनबलादेव सामान्यनिषेधकोऽपि नञ्विशेषेसकोच्यस्तद्बलादेव सक्लेश सह्य इति यावत् ॥ यथा नहिंस्यात्सर्वा इतिश्रुतिस्थस्य नञोऽग्नीषोमीयपशुमालभेतेति विधिबलात् ॥ तथाच तत्र सर्वशब्दस्योक्तन्यायाविरोधाय विशेषेलक्षणा ॥ यत सउपसहाराऽनपेक्ष । यथाहि विधिवाक्येन सामान्यार्थबोधे सामान्यस्य विशेषमन्तरा पर्यवसानाभावाद्विधिवाक्यस्य तदपेक्षत्व तथा निषेधवाक्यस्यनास्ति उक्तविधाभावस्यैव तेन बोधात् ॥ तुल्ये निषेधशास्त्रादन्यूनानतिरिक्तेविधाने सापि विहितिरपि वचनबलादेव सकोच्या ॥ यथाऽतिरात्रेषोडशिन गृह्णाति नातिरात्रेषोडशिनगृह्णातीत्यत्र ॥ पक्षान्तरांशेऽनुत्थिताकाङ्क्षत्वेन तत्सङ्कोचस्य न्यायेनालाभात् निषेधेनावसरावशेषणाच्च । तथाचोभयत्र गौरव सह्यम् विधे सामान्यविधे पुरोडाशचतुर्धाकरोतीत्यस्य सस्यमिवमर्त्य पच्यते सस्यमिवजायतेपुन ध्रुवजन्ममृतस्यचेत्यस्यच विशेषविषये आग्नेयादिविषय विधिना आग्नेयचतुर्धाकरोतीत्यनेन आदिपदेन निषेधो ग्राह्यस्तेन नसपुनरावर्तते इत्यनेन न्यायत उपसहारापेक्षत्वादितिभाव ॥ एवञ्चास्थूलादिवाक्यप्रतिपाद्यस्य निषेधस्य कीदृशेनापिवाक्येन लौकिकस्थौल्यादिनिषेधबोधकत्वे सकोचेक्लेशएव ॥ नातिरात्रेइतिश्रुतिवन्नहिंस्यादितिश्रुतिस्थसर्वशब्दवद्वा तस्य दुर्वारत्वात् ॥ एतस्यैवान दस्येत्यादिवाक्यप्रतिपाद्यस्य तु समानविषयकनिषेधेन सकोचएवक्लेश ॥ इत्रोभाया-

स्वस्वाश्रयनिष्ठभ्रमविषयाभावप्रतियोगित्वात् ॥ नतृतीयः; व्यावहारिकात्यंताभावप्रतियोगित्वेऽपिपारमार्थिकसत्वेविरोधाभावादर्थांतरतायादुर्वारत्वात् । नचाभवस्यतात्विकत्वेप्यभावस्यास्मन्मतेऽधिकरणात्मकतयाब्रह्मभिन्नत्वाभावात्कथंब्रह्मेतरन्मिथ्येतिप्रतिज्ञाहानिरितिवाच्यं ॥ तात्विकाभावप्रतियोगिनोत्रमिथ्यात्वासंभवेनतात्विकत्वापत्तेः ॥ ननुव्यावहारिकएवास्तुनिषेधः व्यावहारिकस्यज्ञानबाध्यत्वेपिनप्रतियोगिनःपारमार्थिकसत्वापादकत्वं यत्राभावाबाधेपिप्रतियोगिनःसत्वंतत्रैवतादृशाभावप्रतियोगिनःपारमार्थिकत्वं।अत्रतूभयोः समसत्ताकत्वंस्वाप्ननिषेधप्रतियोगिस्वाप्नरजतादेरिवतत्रमिथ्यात्वमव्याहतमेव नापिनिषेधस्यनिषेधेप्रतियोगिसत्वमितिशंकनीयं ॥ प्रतियोगिनिषेधयोरुभयोरेवबाध्यत्वात् ॥ अन्यथाप्रागभावाभावरूपस्य घटादेर्ध्वंसेप्रागभावस्यसत्वापत्तेरितिचेन्न ॥ श्रुतिप्रतिपादितस्यार्थक्रियाकारिणःस्वरूपेणनिषेधासंभवात् ॥ नचपारमार्थिकत्वाकारेणापिनिषेधइतिवाच्यं ॥ अबाध्यत्वरूपस्यपारमार्थिकत्वस्याभावज्ञानस्यप्रतियोगिज्ञानाधीनत्वेनबाध्यत्वरूपमिथ्यात्वज्ञानसापेक्षत्वेनान्योन्याश्रयतापत्तेः ॥ किंचपारमार्थिकत्वस्यपारमार्थिकत्वेऽद्वैतहानिरतस्तस्यापिबाध्यत्वंस्वीकरणीयं, तस्यपारमार्थिकत्वेननिषेधेतन्निष्ठपारमार्थिकत्वेपुनःपर्यनुयोगेऽनवस्थापत्तिः ॥ किंचपारमार्थिकत्वेनघटपटादिप्रपंचस्याभावंस्वीकुर्वताव्यधिकरणधर्मावच्छिन्नाभावएवस्वीकृतस्तादृशाभावप्रतियोगित्वस्यसर्वत्रसौंदडमतानुयायिभिःस्वीकृतत्वात्सिद्धसाधनतापत्तिर्नापितादृशाभावाःस्वीकर्तुंशक्यंते ॥ प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानस्याभावप्रत्ययहेतुत्वादत्रपारमार्थिकत्वविशिष्टप्रपंचस्यत्वन्मतेऽसत्वेनतादृशाभावासंभवात् ॥ विशेष्येविशेषणमितिरीत्यात्यभावप्रतीतिर्नसंभवति तत्प्रत्ययस्यविशिष्टवैशिष्ट्यावगाहित्वात्तएव "अभावप्रत्ययोहिविशिष्टवैशिष्ट्यमर्यादानातिशेत" इतिदीधितिकारैरप्युक्तं "तत्प्रतियोग्यवृत्तिश्चधर्मोनप्रतियोगितावच्छेदक" इतिचिंतामणिकारैरुक्तमित्यलमप्रस्तुतविचारेण ॥

अथ नन्मामात्मेति सहस्राक्षस्यपंचमश्लोकं इदानीं अग्रेयशांकरादृत्यादिना क्रियेतेत्यलमित्यंतेनव्याख्यानेनसहितं यत्तुअग्रेयेत्यादिना सूत्रविरुद्धंस्यादित्यंतेन खंडयिष्यंतः प्रथमं इदानीमित्यादि अन्यत्रविमिरदृत्यंतं भागं निराकुर्वंति ॥ यत्तु अग्रेयेत्यादिना अप्रस्तुतविचारेणेत्यंतेन ॥ अयंभावः—मार्तंडटीकायां (कारिका २२) अग्रेयशांकरा प्रादुरितिकारिकाविवरणे "निष्कलमित्यादिश्रुतौ लौकिककलानिपासत्वादिगुणमन्यनाशविकारेन्द्रियजडधर्मनिषेधपरत्वेनकथनात् ॥ सामान्यनिषेधेतु "एतस्मै-

वानंदस्यान्यानिभूतानिमात्रामुपजीवंती" तिकलायाः ॥ "आसीनोदूरंव्रजती" त्यादौ क्रियायाः । "एकोदेवःसर्वभूतेषुगूढ" इत्यादिभिर्गुणानां । "अपाणिपादोजवनोग्रहीते" ति । "उतामृतत्वस्येशान" इत्युक्त्या सर्वतःपाणिपादादिकथनादनन्यशरीरस्याविकारीन्द्रियाणां । "अणोरणीयान्महतोमहीया" नित्यादावणुत्वादिधर्माणांचश्रावणेनतत्तद्बोधकानांविरोधापत्तेः ॥ "अथातइत्यग्रेतिशब्दःप्रकारवाचीतेनलौकिकप्रकारकंनभवतीत्यर्थ" इत्यादिः प्रकृतप्रथमभागस्थग्रंथएवकांचिदानुपूर्वीभित्वाऽनूद्यते ॥ तत्रन्यायविरोधमापादयितुंयत् (यद्यस्मात्कारणात्सकुंभा पृथिवी अघटा नोच्यते अतोनञ्सामान्यनिषेधात्)

नञ्सामान्यनिषेधकृद्यदुदितानोर्वी सकुम्भाऽघटा
संकोच्योविहितो विशेषउपसंहारानपेक्षोबलात् ॥
तुल्ये सापिविधेर्विशेषविषया विध्यादिना न्यायतः
संकोचःसफलं प्रपञ्चवचनं मिथ्याह्यभावि स्थितः ॥ ५ ॥

इदानीम्—अनेवशाङ्कराःप्राहुर्मायिकंनश्वरंजगदिति श्लोकटीकायामस्थूलमनणु निष्कलंनिष्क्रियंशान्तंनिरवद्यंनिरञ्जनमित्यादिश्रुतीरुपन्यस्य तासामेतस्यैवानन्दस्यान्यानिभूतानिमात्रामुपजीवन्ति आसीनोदूरंव्रजति इत्यादिश्रुत्यनुरोधेन यञ्जीवादिगतलौकिकत्वादिनिषेधपरत्वमुक्तं तन्नैवचार्थे प्रकृतैतावत्त्वंहिप्रतिषेधतीति सूत्रमुपष्टम्भकतयोपन्यस्तं तन्न्यायविरुद्धमित्याह—नञ्सामान्येति ॥ यद्यस्मात्कारणात्सकुम्भा पृथिवी अघटा नोच्यते, अतोनञ्सामान्यनिषेधकृत् स्वान्वयितावच्छेदकधर्मावच्छिन्नात्यन्ताभावबोधकइत्यर्थः ॥ नञित्युपलक्षणं निषेधार्थकपदान्तरस्यापि ॥ यतस्तादृशी भूमिर्निष्कुम्भापिनोच्यते तस्मान्निषेधवाक्येषु संकोचे न्यायविरोधइति ॥ यत्र विशेषे विहितिः विशेषविषयकं विधानमस्ति तत्र न्यायविरोधेऽपि तादृशवचनबलादेव सामान्यनिषेधकोऽपि नञ् विशेषेसंकोच्यस्तद्बलादेव सक्लेशः सह्य इति यावत् ॥ यथा नहिंस्यात्सर्वा इतिश्रुतिस्थस्य नञोऽग्नीषोमीयंपशुमालभेतेति विधिबलात् ॥ तथाच तत्र सर्वशब्दस्योक्तन्यायाविरोधाय विशेषेलक्षणा ॥ यतः सउपसंहाराऽनपेक्षः । यथाहि विधिवाक्येन सामान्यार्थबोधे सामान्यस्य विशेषमन्तरा पर्यवसानाभावाद्विधिवाक्यस्य तदपेक्षत्वं तथा निषेधवाक्यस्यनास्ति; उक्तविधाभावस्यैव तेन बोधात् ॥ तुल्ये निषेधशास्त्रादन्यूनानतिरिक्तेविधाने सापि विहितिरपि वचनबलादेव संकोच्या ॥ यथाऽतिरात्रेषोडशिनं गृह्णाति नातिरात्रेषोडशिनंगृह्णातीत्यत्र ॥ पक्षान्तरांशेऽनुत्थिताकाङ्क्षत्वेन तत्रसंकोचस्य न्यायेनालाभात् निषेधेनावसरावशेषणाच्च । तथाचोभयत्र गौरवं सह्यम् विधेःसामान्यविधेः पुरोडाशंचतुर्धाकरोतीत्यस्य सस्यमिवमर्त्यःपच्यते सस्यमिवजायतेपुनः ध्रुवंजन्ममृतस्यचेत्यस्यच विशेषविषये आग्नेयादिविषये विधिना आग्नेयंचतुर्धाकरोतीत्यनेन आदिपदेन निषेधो ग्राह्यस्तेन नसपुनरावर्तते इत्यनेन न्यायत उपसंहारापेक्षत्वादितिभावः ॥ एवञ्चास्थूलादिवाक्यप्रतिपाद्यस्य निषेधस्य कीदृशेनापिवाक्येन लौकिकस्थौल्यादिनिषेधबोधकत्वे संकोचेक्लेशएव ॥ नातिरात्रेइतिश्रुतिवन्नहिंस्यादितिश्रुतिस्थसर्वशब्दवद्वा तस्य दुर्वारत्वात् ॥ एतस्यैवानन्दस्येत्यादिवाक्यप्रतिपाद्यस्य तु समानविषयकनिषेधेन संकोचएवक्लेश- ॥ इन्द्रोमाया-

इत्याद्युक्तम् ॥ तत्र सर्वत्रसामान्यनिषेधनियमस्यवक्तुमशक्यत्वात् ॥ बहुजनावमोचनादि- स्थानेषु स्वीयघटविशेषमुपलभ्यतदन्वेषणाययतमानप्रतिकिमर्थंभ्राम्यसि नास्त्यत्रघटइत्या दिकघटान्तरसत्त्वेपिविवक्षितघटविशेषाभावाभिप्रायकमुच्यतएव ॥ अमराइत्यत्रत्वरितभा विनोमरणस्य "अपशवोवाअन्ये" इत्यादौप्रशस्तपशुत्वादे अनुदरेत्यादौबृहदुदरादे अज्ञइत्यादौविशिष्टज्ञानादेश्चनिषेधोदृश्यतएवेतिस्वान्वयितावच्छेदकधर्मावच्छिन्नात्यन्ताभा वोधकत्वनियमेननञोऽशक्यत्वचन ॥ तथानिष्कलमस्थूलमित्यादौश्रोत्रनुभवगोचरलौकि ककलास्थौल्यादेरेवनिषेधोऽभिप्रेतइत्युभयविधवाक्यैकवाक्यतयाऽवसीयते ॥ किंचप्राञ्च शाब्दिकाआरोपितत्वमभाववानर्थंमन्यते ॥ यथाहु -नञ्समासेचापरस्यप्राधान्यात्स र्वनामता ॥ आरोपितत्वनञ्द्योत्यनह्यसोप्यतिसर्ववत् ॥ १ ॥ अभवोवातदर्थोस्तुभाष्यस्य हिवदाशयात् ॥ विशेषणविशेष्योवान्यायतस्त्ववधार्यतामिति ॥ तत्रप्रथमपक्षेनञ्समासे प्युत्तरपदार्थस्यप्राधान्यादेवसर्वनामतासिध्यति ॥ प्राधान्यंचासर्वइत्यादावारोपित सर्वइ- त्याद्यर्थस्वीकारएव ॥ नञोभेदार्थत्वेतत्रप्रतियोगितयासर्वशब्दार्थस्यान्वयादुपसर्जनत याऽतिसर्वइत्यादाविवसर्वनामतानस्यात् सञ्ज्ञोपसर्जनीभूतास्तुनसर्वादयइतिसिद्धान्तात् एवं चासर्वस्मै इत्यादिनस्यात् ॥ नचेष्टापत्तिः ॥ एतत्तदो सुलोपोकोरनञ्समासइतिपर्युदास वैयर्थ्यप्रसङ्गात् । नञस्थलेत्यदाद्यत्वादेरतर्गणकार्यस्याप्यभावेनासइत्यादिरूपासिद्ध्यानञ् समासइत्यस्यानुपयोगात् ॥ नचभेदप्रतियोगी सर्वइत्यर्थाङ्गीकाराल्लाप्राधान्यमितिवाच्यम् ॥ घटोनास्तीत्यादावभावविषयकबोधेतस्यविशेष्यतायाएवदर्शनेन अन्योन्याभावेविशेषण तायाअङ्गीकर्तुमशक्यत्वात् ॥ अघट पटइत्यादौघटभिन्नइत्यादिबोधस्त्वार्थोमानसएव ॥ नञ्द्योत्यमित्युक्तिः निपातानाद्योतकत्वाभिप्राया ॥ आरोपितत्वंचात्रारोपविषयत्ववाचक त्वपक्षेप्यनन्यलभ्यमारोपमात्रंनञर्थः नत्वारोपविषयत्वगौरवात् विषयत्वंतुसंसर्गमर्यादयै वलभ्यते ॥ एवंचास्थूलमित्यादौआरोपितलौकिकस्थौल्यादिशालिब्रह्मेतिप्रथमपक्षेऽर्थः ॥ क्वाप्यसिद्धस्यारोपासम्भवात्स्थौल्यादिकलौकभत्रमेवगृह्यते ॥ घटोनास्तीत्यादौव्यस्तस्थल इव अब्राह्मणइत्यादिसमस्तस्थलेप्यारोपाथकत्वस्यानुभवात्पक्षान्तरमाह- अभावोवेति । तदर्थ नञोवाच्योद्योत्योवाऽर्थः ॥ तत्राप्यसतिबाधकेवाचकत्वमेव सतितु बाधकेद्योतकता पीतिज्ञेयम् ॥ (अ० २ पा० २ सू० ६) नञसूत्रेभाष्ये 'क पुनरसौ । निवृत्तपदार्थक" इत्युक्तम् ॥ असौनञर्थइत्यर्थः । तच्च "निवृत्तपदार्थोयस्यनपुंसकेभावे क्तःइतिक्तः अभावार्थ कइत्यर्थः । इतिभूषणसारेव्याख्यातम् ॥ यद्यप्यग्रिमभाष्यग्रन्थपर्यालोचनेइह कैयटकृत

भिर्मायातुप्रकृतिभिशाद्युपसहारा अशरीरशरीरेष्वित्यादयो ज्ञेयस्याकारनिषेधाच्च तामान विषयत्वानघटयेवतितै सकोचे नास्ति क्लेश ॥ एतस्यैवान दस्य आसीनोदूरमित्यादिजन्य मानागमनादिसामान्यनिय किंचप्रादिपदय मानादिर्मायिकत्वता मवदमायिकइति निमयज्ञेय स्योनाज्ञेयस्येतिच विशेषानाक्षु वात् ॥ २२ ॥ स्वमते विशेषानुवादफलमाह ॥ सफलमिति ॥ हि यस्मात् अभाविभि त ममान्यताभावाधिकरणस्यो मिथ्येत्युच्यते तस्मात्तद्बोधनाय प्रपञ्च वचन सफलमित्यनविस्तर ॥

ष्याख्यांतरंसाधुभाति ॥ तथाप्यत्यंतासदृशत्वादारोपायोग्यस्थलेप्यघट.पटइत्यादिप्रयोग-
दर्शनात्तद्वाप्यमन्यथा नेयमितिनञर्थमभावंमन्यमानानामाशयः । सचाभावउत्तरपदार्थ-
प्रतियोगिनिविशेषणमित्येकः पक्षः तथाचाब्राह्मणइत्यादौभेदप्रतियोगीब्राह्मणइत्यादिरर्थः ॥
एवंचासर्वइत्यादौतदंतविधिनासर्वनामसंज्ञा ॥ अनेकमन्यपदार्थे ॥ सेव्यतेऽनेकयासक्तता-
पांगयेत्यादौएकपदार्थप्राधान्यादेकवचनोपपत्तिः ॥ अन्यथैकभिन्नस्यद्वित्वंबहुत्वंवायुक्तमि-
त्येकवचनंनसंगच्छेत । अत्वंभवसिअनहंभवामिअयुवांभवथः इत्यादौपुरुषवचनव्यवस्था-
चविशेष्यत्वांगीकारेनस्यात् । एतन्मतेतुभेदप्रतियोगि यदभिन्नाश्रयिकाभवनक्रियेत्यर्थः ।
अथनञर्थस्यविशेषणत्वे अघटमानयेत्यादौपटाद्यनुयोगिभेदप्रतियोगिघटमित्यर्थस्यतस्याप-
त्याघटादेरप्यानयनंप्रसज्येत । विशेष्यत्वेतुघटभिन्नपटादेरेवतदित्यतोविशेष्योवेतिद्वितीयः-
पक्षएवंचाब्राह्मणइत्यादौउत्तरपदार्थस्यप्रतियोगितयाभेदेन्वयःतेनब्राह्मणप्रतियोकभेदवानि-
त्यादिरर्थः । ननुप्रागुक्तदूषणप्रसङ्गइतिचेन्न ॥ असर्वइत्यादौगौणत्वेपिसर्वनामता अनञ्समा-
सइति ज्ञापकात् ॥ असःशिवइत्यत्रसुलोपवारणायहितद्ग्रहणं ॥ समासेसतितुगौणत्वादतदि-
त्येव रूपंस्यान्नत्वसइत्यतस्तद्व्यर्थंसत्गौणत्वेपिसर्वनामतांज्ञापयति ॥ (अ० २पा२सू० २२)
"अनेकमन्यपदार्थे" इत्यत्रैकवचनंतु (अ० २ पा० १ सू० २) "सुबामंत्रिते" इत्यतोनु-
वर्तमानस्यसुबित्येकवचनांतविशेष्यस्यानुरोधात् असतिविशेषानुशासनेविशेषणविशेष्ययोः
समानवचनकत्वस्यापिनियतत्वात् ॥ अन्यथानीलघट.नीलौघटइत्याद्यपिप्रयुज्येत ॥ किंचानेक-
शब्दाद्द्विवचनस्योपादानेमधुरकोमलकांतपदावलिमित्यादौबहूनांच हुवचनस्योपादानेपरिण
द्धकंधरइत्यादौद्वयोश्चबहुव्रीहिर्नस्यादतोजात्यभिप्रायमौत्सर्गिकंचैकवचनम् ॥ सेव्यतेऽनेक-
येतिमावप्रयोगेपियोषयेतिविशेष्यानुरोधात्प्रत्येकंसेवनान्वयाभिप्रायाच्चतत् नतूत्तरपदार्थ-
प्राधान्यात् ॥ "तेनपतंत्यनेकेजलधेरिवोर्मय"इत्यादिकमनवद्यम् ॥ एकशेषस्त्वगतिकगतिः॥
अत्वंभवसीत्यादौतुयुष्मदस्मदोस्तद्भिन्नेलक्षणा तद्द्योतकोनञ् अतोयुष्मदाद्यर्थसामानाधि-
करण्यात्पुरुषव्यवस्था ॥ त्वद्भिन्नाऽभिन्नाश्रयिकाभवनक्रियेत्यादिःशाब्दबोधः ॥ अयंचा-
भावोऽन्योन्याभावतयाऽत्यंताभावतयाच नञःशक्यार्थः । तथाचपर्युदासस्थले भेदस्तदर्थ-
प्रसज्यप्रतिषेधस्थले त्वत्यंताभावइतिबोध्यम् ॥ असमस्तस्थलेदेवदत्तोनब्राह्मणइत्यादौपर्यु-
दासः घटोनास्तीत्यादौप्रसज्यप्रतिषेधइत्युभौ यथायथंदृश्येते । समस्तस्थलेतुप्रायेणपर्युदासः
अभयमित्यादावन्योपि नञ्बहुव्रीहावन्यएवेतिविवेकोभाति ॥ एवंचास्थूलमित्यादौ नास्ति
स्थूलोयत्रेत्यादि प्रसज्यप्रतिषेधाश्रयणेपिप्रसिद्धमेवप्रतियोगिनंधीराक्षिपतीति लोकभवाना-
मेवस्थूलादिगुणानामभाव सिध्यति । दांतमलस्याधापणेदंतोनास्तीत्युक्तेदंतावलदंतस्येव
नत्वणोरणीयस्त्वमित्यादिश्रौतानां । अनुपस्थितेर्विधानापार्थक्यप्रसङ्गात्तुल्यबलतयाबाधा-
योगाच्च ॥ लाघवात्पर्युदासाश्रयणेतुस्थूलादिभिन्नंतत्सदृशंचब्रह्मेतिफलति । तत्र "नायंनरो-
नापिमृग" इत्यादिवत्तत्तन्मात्रधर्मकत्वाभावाद्भेदः उभयधर्मवत्त्वादुभयसादृश्यं च "समो
मशकेनसमोनागेने" त्यादाविवेतिज्ञेयम् ॥ यत्त्वस्मिन्पक्षे तत्सादृश्यमभावश्चेत्यादिपठनम-
ब्राह्मणइत्यादौ भेदप्रतियोगित्वप्रकारकब्राह्मणादिबोधानंतरभाविमानसबोधविषयत्वमा-
दृश्यादेरित्यभिप्रेत्येत्युक्तम् । तदादरेऽप्युभयधर्मवत्त्वबोधपाश्चात्योमानसोस्तु ॥ वस्तु-

तत्तु—सादृश्यादिरप्यर्थः तादृशबोधेशाब्दबोधत्वानुभवात् "नासौलोष्टमानायक्षतीभवती" तिमहाभाष्यानुग्रहाच्चेत्यन्ये । अधिकंतुतुर्यश्लोकखंडनेऽभिहितमभिधास्यतेचकिंचित्पुरस्तात् ॥ नव्यास्तुसमस्तनञ्स्थले आरोपविषयत्वमेवनञर्थंमन्यंते यथामंजूषायां । "घटो नास्तीत्यादावभावस्यविशेष्यतयाबोधान्नञोवाचकत्वम् । नानूयाजेष्वित्यादौसप्तम्याः साधुत्वार्थंद्योतकत्वमपि । आरोपितानूयाजेषुयजतिष्विततदर्थः भेदेप्रतियोगित्वेनान्वयेनानूयाजभिन्नेष्वित्यर्थेसप्तम्यनुपपत्तिः । आरोपविषयत्वतत्रनञ्द्योत्यमतएवाघट इत्यादिवदुत्तरपदार्थप्राधान्यं । अनुदराकन्येत्यादावप्यल्पत्वादिनोदराभावमारोप्यनञ्समभिव्याहारे आरोपितोदरबुद्धातन्मूलाल्पत्वादौविश्रमः । अद्विज इत्यादौच तद्भेदमूलकमारोपित प्रवृत्तिनिमित्तकत्वमितिभेदेविश्रांतिः । असंदेहइत्यादौचारोपितःसंदेहइतिबोधः । भेदसंबंधेनारोपितत्वज्ञानाच्चतदत्यंताभावप्रतीतिः । असमस्तेत्वभावोनञर्थः । सद्विधा—अत्यंताभावोभेदश्च । तत्रतादात्म्येतरसंबंधाभावआद्यः । तादात्म्याभावोऽन्यः । तादात्म्यमतिरिक्तंतद्वृत्त्यसाधारणधर्मरूपंचेत्यन्यत् । समनियताभावस्थलेएकस्यानेकप्रतियोगित्ववदनयोर्घटादिप्रतियोगिकत्वमपि । तत्राद्यस्तिङंतार्थक्रियान्वय्येव । असमस्तनञर्थात्यंताभावविशेष्यकबोधेतिङ्समभिव्याहृतधातुजन्योपस्थितेर्हेतुत्वात् अतएवत्वंनासिघटौ नस्तइत्यादौपुरुषादिव्यवस्था ॥ तिङन्तसमभिव्याहृतनञोत्यंताभावार्थकत्वमेव । अयमेव प्रसज्यप्रतिषेधइत्युच्यते । प्रसज्यविधायविहितस्यप्रतिषेधइतितदर्थः । नञ्सूत्रेभाष्येतुप्रसज्यक्रियागुणौततःपश्चान्निवृत्तिंकरोतीत्युक्तम् । तेनगुणाभावबोधेपिप्रसज्यप्रतिषेधइति लभ्यते । नास्माकमेकंप्रियमित्युदाहरणम् । अत्रहिएकप्रियप्रतिषेधेबहुप्रियप्रतीतिः नसंदेह इत्यादौचसंदेहाभावप्रतीतिः संदेहस्यगुणत्वात् । सर्वत्रक्रियाप्रतिषेधेहिगुणपदोपादानंभाष्येऽनर्थकंस्यात् । प्रसज्यप्रतिषेधोसौक्रिययासहयत्रनञित्यत्रक्रियाग्रहणंगुणस्याप्युपलक्षणमिति बहवः ॥ अन्योघटःपटोनेत्यादौ ॥ अत्रारोपितपटाभिन्नोघटइतिबोधः । नञ्द्योतकएव । एवंचसमानविभक्तिकत्वंसिद्धम् । घटभेदबोधस्त्वार्थः । तत्समनियतत्वात् । घटत्वाभावबोधोपितत्राऽर्थः ॥ क.पुनरसौनञर्थविशिष्टइतिप्रश्ने "निवृत्तपदार्थक" इतिभाष्ये उक्तम् ॥ "निवृत्त.पदार्थोमुख्यब्राह्मण्यंयस्मिन्सक्षत्रियादिरित्यर्थः । सादृश्यादिनाऽध्यारोपितब्राह्मण्योनञ्द्योतिततदवस्थइत्यर्थं" इतिकैयटः ॥ प्राचीनोक्तमर्थांतरंतुभ्रांत्यैवेतिस्पष्टं भाष्यविदां ॥ किंच "प्रतियोग्यभावौतुल्ययोगक्षेमा" वितिताच्छिकोक्तेर्नञ्वाच्यभेदस्य विशेषणतानयुक्ता । यत्रप्रतियोगिनःप्रकारतातत्रैवतदभावस्यापिसा यत्रतस्यविशेष्यतातत्रैवतदभावस्यापिसेतितदर्थः । बाधबुद्धिप्रतिबंधकतापियथानुभवंकल्प्येतिन तदनुरोधेन ऋप्यनुभवसिद्धबोधान्यथाभाव उचितोऽनेनैव न्यायेनप्रतियोग्यधिकरणमेवाभावाधिकरणमिति बोध्यमितिदिक् ॥ तत्रप्रतिषेधेद्वयीगतिः—प्रतिषेधंदृष्ट्वापश्चादुत्सर्गस्यतद्विषयत्वाभावज्ञानेप्रामाण्यग्रहइत्येका । एवमुत्सर्गापवादस्थलेपि ॥ तदुक्तंहरिणा—ब्राह्मणानांश्रुतिर्दधिप्रक्रांतामाठरंविना ॥ माठरत्वस्यसंबंधात्तत्राचष्टेयथार्थतामिति ॥ दधिब्राह्मणेभ्यइत्यादौ माठरवर्जमेवदधिदानमुपक्रांतम् ॥ उत्तरकालंतत्रंमाठरायेत्येतत्तस्ययथार्थत्वं गमयतीतिभिन्नवाक्यतायाममास्यनुमानंबाधइति पुञ्जराजः ॥ उत्सर्गस्यापवादनियम-

निषेधानामेकवाक्यतेत्यपरा । यदुक्तम्-अनेकाख्यातयोगेपिवाक्यंन्यायव्यापवादयोः । एकमेवेष्यतेकैश्चिद्भिन्नरूपमिवस्थितम् । नियम प्रतिषेधश्चविधिविशेषस्तथासतीति । न्याय उत्सर्गः ॥ आपाततोभिन्नवाक्यत्वावभासेपिसर्वस्याप्युत्सर्गस्य विशेषविधिनियमनिषेधविष्याकांक्षानियमेन तल्लाभेनान्यैकवाक्यतातयो. । तल्लाभेतुस्वार्थएवपर्यवसानम् । एकवाक्यताचेत्थम्-यतोमाठरायत्तक्रमतम्नदतिरिक्तेभ्योदधीत्येवेतीत्यलम्" एवमादिदर्शितम् ॥ इत्थंचैतन्मतानुरोधेन विचारेप्यनुदरेत्यादावनल्पत्वादाविवस्थूलादिवाक्येपूभयधर्माश्रयत्वेन स्थौल्याद्यभावमारोप्यनञ प्रयोगे आरोपितस्थौल्यादिबोधेन केवलस्थौल्याद्यभावेविश्रमः ॥ अद्विजइत्यादिवदभाकृतस्थूलादिवस्तुभेदेवैषः ॥ किंच प्रतियोग्यभावयो.समानयोगक्षेमतायास्तांत्रिकैः कथनात्प्रतियोग्यधिकरणमेवाभावाधिकरणमितिस्वीकारेण ब्रह्मणिस्थौल्याद्यधिकरणताप्यापतति ॥ ननु वायौरूपाभावव्यवहारान्नैवमितिचेन्न । वस्तुतोहि "सर्वंसर्वमयं" इतिनृसिंहोत्तरतापनीयादिश्रुत्या वायौसतोरूपस्य तिरोभावस्यैवतत्ररूपाभावपदाभिलप्यत्वात् ॥ अन्यथातत्कार्ये तेजस्यपितन्नोद्भवेत् । अतोबीजावस्थायांफलपुष्पादेरननुभवेपिवृक्षावस्थायां तदनुभववत्तेजोवस्थायां रूपानुभवइतिवायौप्रतियोग्यधिकरणतानानुपपन्ना ॥ अपिच तार्किकचरणशरणीतरणेप्यन्यत्रसतएवरूपस्यवायावभावात् अत्यन्तासतोऽभावस्याप्यस्वीकारात्काणादसूत्रेगेहेसतएवघटादेः प्रतिषेधार्हताकथनाच्चान्यत्रसतएवस्थौल्यादेरत्रप्रतिषेधोवाच्य । तच्चसर्वात्मनात्वासंभवि ॥ किंचब्रह्मणिविशेषणतयाविशेष्यतयावाऽभावस्थितिः प्रतियोगिनिष्ठाधेयतावच्छेदकसंबंधसत्वंचापद्यतएवेति सविशेषतानपायाच्छ्रौतधर्मैरेवतासुररीकुरु ॥ अथमीमांसकपदावलंबादभावस्याधिकरणात्मकत्वमितिचेत्तथापि सतएवनिषेधः सविशेषताचाशक्याऽपाकर्तुम् ॥ तत्प्रतियोगिकत्वस्याधिकरणतावच्छेदकसंबंधविशेषावेश्यब्रह्मणिसत्वस्यावश्यवाच्यत्वात् ॥ केवलाभावस्वरूपत्वेशून्यवादोदुष्परिहरः ॥ किंचप्रतिषेधेद्वयीगतिर्दर्शिता । तत्राद्यपक्षे "अस्थूलमनणु अचक्षु इत्यादौ महतोमहीयस्त्वमणोरणीयस्त्वंविश्वतश्चक्षुष्ट्व"मित्यादिकमलौकिकंनप्रतिषिध्यते किंतु लोकप्रसिद्धमेवस्थौल्यादिकमपि ॥ श्रौतालौकिकधर्मेपुनिषेधाविषयत्वनिश्चयात्प्रामाण्यग्रह ॥ बहुसमतेमुख्येद्वितीयपक्षेतुयतउक्तरीतिकविधीयतेतोऽणुत्वादिव्यधिकरणस्थौल्यादेरेकदेशिचक्षुरादेश्चैवप्रतिषेधइत्येकवाक्यता ॥ नियम प्रतिषेधश्चविधिविशेषस्तथा सतीतिहर्युक्त्यानिषेधस्योपसंहारानपेक्षत्वोक्तिर्निरस्ता ॥ (नञित्युपलक्षणंनिषेधार्थकपदान्तरस्यापि) इतितुल्ययैवकथनादस्थूलादिवाक्यविचारेण "निष्कलंनिष्क्रिय" मित्यादिकमपि "आनंदस्यान्यानिभूतानिमात्रामुपजीवंति ॥ ममैवांश." इत्यादिभि "आसीनोदूरंव्रजति । भूतभर्तृचतज्ज्ञेयंग्रसिष्णुप्रभविष्णुच" भीष्मपर्वाण्यमाध्याये (श्लो० १७) सप्रभु सर्वभूतानांविभुश्चभरतर्षभ ॥ संक्षेपोविस्तरश्चैवकर्ताकारयिता हरिरित्यादिभिश्चसहैकवाक्यतयालोकवत्पूर्णत्वविभुत्वविरोधिविभागपरिच्छिन्नक्रियादिप्रतिषेधपरतयाव्यवस्थापितवेदितव्यम् । भीष्मपर्ववचनेकर्ताकारयितातथेत्यपिक्वचित्पाठ यच्च (नञसामान्यनिषेधकृत् स्वान्वयिताऽवच्छेदकधर्मावच्छिन्नात्यंताभावबोधक) इत्युक्त

तस्तु–सादृश्यादिरप्यर्थः तादृशबोधेशाब्दबोधत्वानुभवात् "नासौलोष्टमानायकृतीभवती" तिमहाभाष्यानुग्रहाच्चेत्यन्ये । अधिकंतुतुर्यश्लोकखंडनेऽभिहितमभिधास्यतेचकिंचित्पुरस्तात् ॥ नव्यास्तुसमस्तनञ्स्थले आरोपविषयत्वमेवनञर्थंमन्यंते यथामंजूषायां । "घटो नास्तीत्यादावभावस्यविशेष्यतयाबोधान्नञोवाचकत्वम् । नानूयाजेष्वित्यादौसप्तम्याः साधुत्वार्थंद्योतकत्वमपि । आरोपितानूयाजेषुयजतिष्वितितदर्थः भेदेप्रतियोगित्वेनान्वयेनानूयाजभिन्नेष्वित्यर्थेसप्तम्यनुपपत्तिः । आरोपविषयत्वतत्रनञ्द्योत्यमतएवाघट इत्यादिवदुत्तरपदार्थप्राधान्यं । अनुदराकन्येत्यादावप्यल्पत्वादिनोदराभावमारोप्यनञ्समभिव्याहारे आरोपितोदरत्वुआतन्मूलाल्पत्वादौविश्रमः । अद्विज इत्यादौच तद्भेदमूलकमारोपित प्रवृत्तिनिमित्तकत्वमितिभेदेविश्रांतिः । असंदेहइत्यादौचारोपितःसंदेहइतिबोधः । भेदसंबंधेनारोपितत्वज्ञानाच्चतदत्यंताभावप्रतीतिः । असमस्तेत्वभावोनञर्थः । सद्विधा–अत्यंताभावोभेदश्च । तत्रतादात्म्येतरसंबंधाभावआद्यः । तादात्म्याभावोऽन्त्यः । तादात्म्यमतिरिक्तंतद्वृत्त्यसाधारणधर्मरूपंवेत्यन्यत् । समनियताभावस्थलेएकस्यानेकप्रतियोगित्ववदनयोर्घटादिप्रतियोगिकत्वमपि । तत्राद्यस्तिङंतार्थक्रियान्वय्येव । असमस्तनञर्थात्यंताभावविशेष्यकबोधेतिङ्समभिव्याहृतधातुजन्योपस्थितेर्हेतुत्वात् अतएवत्वंनासिघटो नस्त्वइत्यादौपुरुषादिव्यवस्था ॥ तिङन्तसमभिव्याहृतनञोत्यंताभावार्थकत्वमेव । अयमेव प्रसज्यप्रतिषेधइत्युच्यते । प्रसज्यविधायविहितस्यप्रतिषेधइतितदर्थः । नञ्सूत्रेभाष्येतुप्रसज्यक्रियागुणौततःपश्चान्निवृत्तिंकरोतीत्युक्तम् । तेनगुणाभावबोधेपिप्रसज्यप्रतिषेधइति लभ्यते । नास्माकमेकंप्रियमित्युदाहरणम् । अत्रहिएकप्रियप्रतिषेधेबहुप्रियप्रतीतिः नसंदेह इत्यादौचसंदेहाभावप्रतीतिः संदेहस्यगुणत्वात् । सर्वत्रक्रियाप्रतिषेधेहिगुणपदोपादानंभाष्येऽनर्थकंस्यात् । प्रसज्यप्रतिषेधोसौक्रिययासहयत्रनञित्यत्रक्रियाग्रहणंगुणस्याप्युपलक्षणमिति बहवः ॥ अन्त्योघट.पटोनेत्यादौ ॥ अत्रारोपितपटाभिन्नोघटइतिबोधः । नञ्द्योतकएव । एवंचसमानविभक्तिकत्वंसिद्धम् । घटभेदबोधस्त्वार्थः । तत्समनियतत्वात् । घटत्वाभावबोधोपितत्राऽर्थः ॥ कःपुनरसौनञर्थविशिष्टइतिप्रश्ने "निवृत्तपदार्थक" इतिभाष्ये उक्तम् ॥ "निवृत्त.पदार्थोमुख्यब्राह्मण्यंयस्मिन्सक्षत्रियादिरित्यर्थः । सादृश्यादिनाऽध्यारोपितब्राह्मण्योनञ्द्योतिततदवस्थइत्यर्थं" इतिकैयटः ॥ प्राचीनोक्तमर्थांतरंतुभ्रांत्यैवेतिस्पष्टं भाष्यविदां ॥ किंच "प्रतियोग्यभावौतुल्ययोगक्षेमा" वितितात्रिकोक्तेनञ्वाच्यभेदस्य विशेषणतानयुक्ता । यत्रप्रतियोगिनःप्रकारतातत्रैवतदभावस्यापिसा यत्रतस्यविशेष्यतातत्रैवतदभावस्यापिसेतितदर्थः । बाधबुद्धिप्रतिबंधकतापियथानुभवंकल्प्येतिन तदनुरोधेन ऋष्यनुभवसिद्धबोधान्यथाभाव उचितोऽनेनैव न्यायेनप्रतियोग्यधिकरणभेदाभावाधिकरणमिति बोध्यमितिदिक् ॥ तत्रप्रतिषेधद्वयीगतिः–प्रतिषेधंदृष्ट्वापश्चादुत्सर्गस्यतद्विषयत्वाभावज्ञानेप्रामाण्यग्रहइत्येका । एवमुत्सर्गापवादस्थलेपि ॥ तदुक्तंहरिणा–ब्राह्मणांश्रुतिर्दधिप्रक्रांतामाठरंविना ॥ माठरस्तक्रसंबंधात्तत्राचष्टेयथार्थताम् इति ॥ दधिब्राह्मणेभ्यइत्यादौ माठरवर्जमेवदधिदानमुपक्रांतम् ॥ उत्तरकालंतक्रंमाठरायेत्येतत्तस्ययथार्थत्वं गमयतीतिभिन्नवाक्यतायामप्यनुमानंबाधइति पुञ्जराजः ॥ उत्सर्गस्यापवादनियम-

मिहापास्तम् ॥ मंजूषाकारोपि" अज्ञानशब्देऽधर्मशब्दइवविरोध्यर्थकोनञ्, तेनभावपदार्थएवससविषयइत्यन्यत्रविस्तरः । अभावपदेचविरोध्यर्थकएवसः । भावविरोधीत्यर्थः । एवंचाभावस्यभावप्रतियोगिकत्वमेव इत्याह ॥ तावकन्यायात्तुमित्रत्वानवच्छिन्नाचभावएववुध्येतेति "नामित्रोमित्राभावोनमित्रमात्रंकिंतुतद्विरुद्ध.सपत्नः" इत्यादिव्यासभाष्यविरोध.स्पष्टएव ॥ किंचयेननाभासे नाविष्णुःपृथिवीपतिरित्यादौनञ्द्वयसमभिव्याहारेभकृतार्थदार्ढ्यस्यैवसर्वसंमतत्वात्तत्रापितानकव्युत्पत्तेर्व्यभिचारः । उक्तंच (अ० ५-पा० २ सू० २७) "विनञ्भ्यांनानाञौनसहे" तिसूत्रेमहाभाष्ये "द्वौहिप्रतिषेधौप्रकृतमर्थंगमयतः । ननसहद्दवेति" इति ॥ एतदेवाभिलसमंजूषायाम् "अभावाभावइत्यादिव्यवहारोवर्वराणामप्रामाणिकएव ॥ घटाभावोनास्तीत्यादौतत्कर्तृकसत्तायाएवाभावप्रतियोगित्वम् । एवमेवनासहस्तदत्तत्रास्तेइत्यादावपिबोध्यं" इत्याद्यभिहितम् ॥ एवं "मध्नामिकौरवशतंसमरेनकोपादुःशासनस्यरुधिरंनपिवाम्युरस्तः । संचूर्णयामिगदयानसुयोधनोरू" इतिवेणीसंहारस्थभीमवाक्यादिषुकाकुसहकारेणनञामथनादिगतंनिश्चितत्वंद्योत्यतेइत्यप्युक्तम् । तत्रापि तद्व्यभिचार.स्फुटः ॥ इत्थं (अ० ८ पा० १ सूत्र० १०) "आबाधेचे" तिसूत्रेमहाभाष्ये "ननसुसु" इतिप्रयोगे "ननकरोतिसुसुजाजागर्तीत्येवमादिवाक्यैकदेशः" इति कैयटः ॥ एवमादौकाकभावेपितद्व्यभिचारः ॥ मंजूषाकारस्तुअब्राह्मणोनास्तीत्यादावसमासस्थलेप्यभावार्थकतांनञोनिराचष्टे । यथाह–"आरोपितत्वमेवनञर्थइतियुक्तम् । अत्रब्राह्मणोनास्तीत्यादावपि एतद्देशाधिकरणिकारोपिताब्राह्मणकर्तृकासत्तेत्येवबोधः ॥ आर्थस्तुतदभावबोधः । अतएव तत्सदृशेतरसत्ताप्रतीतिः" इत्यादि ॥ सर्वत्रतादृशार्थस्तुतदभावबोधः । अतएव तत्सदृशेवरसत्ताप्रतीति." इत्यादि ॥ सर्वत्रतादृशाभावमात्रबोधकत्वनियमेऽब्राह्मणइत्यादौसादृश्यावगमोऽपिनस्यात् नचतत्र तत्प्रत्ययआर्थ-इतिवाच्यम् । नञ्सूत्रादिभाष्यविरोधात् तत्रतादृशस्थलेपुतथार्थकतायाएवसिद्धेः ॥ किंच (अ० २ पा० २ सू० ६) "नञ्सूत्रएवभाष्ये" भवतिचैवंजातीयकानामप्येकस्यप्रतिषेधेनबहूनांसंप्रत्ययः तद्यथा ननएकंप्रियं ननएकं सुखमिति" इत्युक्तम् ॥ व्यस्तस्थलेनञ.क्रियायामेवान्वयादरेऽस्तिक्रियामात्रस्यप्रियादेर्वाप्रतीयेताभावमात्रम् नतुबहुत्वादिकम् ॥ इत्थंचास्थूलादिवाक्येष्वस्थूलादिपदानां "अच्छायं अवायु अचक्षुष्कं" इतिबहुव्रीह्यंतपदप्रायपाठात् नास्तिस्थूलोयत्रेत्यादिरर्थोनिश्चीयतेऽतोऽब्राह्मणो नास्तीत्यादौ ब्राह्मणादिनिषेधात्तदितरसत्तेव लोकदृष्टस्थौल्यादीनां निषेधाद लौकिकगुणगणसत्तातत्रसिध्यति ॥ नञोविरोधार्थताऽऽदरेस्वज्ञानमित्यत्रयथार्थज्ञानविरुद्धज्ञानांतरमिव लोकदृष्टस्थूलादिवस्तुविरुद्धधर्मकंतदलौकिकत्वादुभयधर्माश्रयत्वाश्चेतितादृशवाक्यार्थोनिरवद्यः ॥ अणुर्बृहत्कृशःस्थूलोगुणभृन्निर्गुणोमहानित्यादिभारतीयविष्णुसहस्रनामवाक्यादिरूपास्मृतिरप्येवमर्थेऽनुग्राहकावेदितव्या । नैयायिकास्तु भूतले घटइत्यत्रभूतलवृत्तिर्घटाभाव इतिबोधेभूतलनिरूपितस्य सप्तम्यर्थवृत्तित्वस्य स्वनिष्ठ्याप्रतियोगितानिरूपकतयाऽन्विते नञर्थेघटाभावेऽन्वयः ॥ तादृशवाक्येभ्योभूतलनिवृत्तिर्घटाभाव इत्यादिघटाद्यभावधर्मिकभूतलादिवृत्तित्वप्रकारकशाब्दानुभव इवतात्पर्यरूपकारणवशाद्घटोभूतलवृत्तिरत्यभावनानित्यादिर्घटादिविशेष्यकभूतलादिवृत्तित्वप्रकारकबोधोपि;

तद्व्युत्पत्तिविजृंभितम् । यतएवमुक्त्यातादृशाभावोनञ्वृत्तिप्रतिपाद्यइतिलभ्यते ॥ तदसंगतम् ॥ स्वान्वयितावच्छेदकधर्मावच्छिन्नप्रतियोगिताकत्वस्याभावेव्युत्पत्तिवल-लभ्यत्वात् ॥ एवंचासमस्तनञ्स्थलेक्वचिदियंव्युत्पत्तिर्विशेषज्ञानेसतिसामान्याभावज्ञानस-तदभावव्याप्यवत्तामुद्रयाप्रतिबंधेनानुद्रयादंगीकृता ॥ अतएवनीलघटवदित्यत्रघटोनास्ती-तिनव्यवहारः पीतघटोनास्तीतिव्यवहारोभवत्येव ॥ अन्वयितावच्छेदकस्यपीतरूपस्य तत्राभावात् ॥ अत्रान्वयितावच्छेदकस्याप्यभावएवप्रतियोगितयाऽन्वयः ॥ स्पष्टी-कृतं चैतन्मंजूषायाम्–"अन्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वंचाभावेव्युत्पत्तिवल-लभ्यम् ॥ नीलघटवदित्यत्रघटोनास्तीत्यव्यवहारात् ॥ पीतघटोनास्तीतिव्यवहाराच्च ॥ "ग्रनित्तचेदंविरामोऽवसानमित्यत्रभाष्ये ॥ अतएववायौरूपंनास्तीतिप्रतीत्यासामान्यभाव-सिद्धि ॥ विशेषाभावकूटस्यततोबोधासंभवात् ॥ अन्वयितावच्छेदकशब्देनतत्रार्थान्व-यिविशेषणमुच्यते ॥ यथापीतघटइत्यत्रपीतरूपं ॥ प्रतियोगितावच्छेदकं चतत्रापि घटत्वमेव ॥ विशिष्टबोधेविशेष्यवृत्तिधर्मस्यैवप्रतियोगित्वादावच्छेदकत्वात् ॥ तदव-च्छिन्नप्रतियोगिताचपीतेत्यादिविशेषणबलात्पीतघटव्यक्तिनिष्ठैव ॥ विशिष्टंचप्रधानान्नात्यं-तमतिरिक्तम् ॥ सर्वथातिरिक्तत्वेतुवैशेषिकाणांपदार्थविभागन्यूनतापत्तिः ॥ अतएवा-भियुक्तैरन्वयितावच्छेदकेत्युक्तम् । नतुप्रतियोगितावच्छेदकेति ॥ यथाघटादिपदानांघटत्वा-दिनाशक्तावपिप्रकरणादिनाकासांचिदेवव्यक्तीनांबोधस्तथाप्रकृतेविशेषणबला" दितिमंथेन ॥ एवंच घटा सतीत्यादौयावद्घटासत्वेऽपिकासांचिदेवव्यक्तीनांयथासत्वंप्रकरणादिनाऽव-गम्यते तथाघटानसतीत्यादौतासामेवाभावस्तेन ॥ एवंचास्थूलमित्यादौप्रकरणादिना लोकदृष्टानामेवप्रतिषेध ॥ प्रकरणादिनिर्णयस्तुतृतीयस्यद्वितीयेनस्थानतोपीतिविंशतिसूत्र्या सम्यग्दर्शित परमाचार्यपादै ॥ पीतघटोनास्तीत्यादौपीतत्वादिकमिव "निश्चेतनात्मकं-शरीरगुणैश्चहीन" इत्यादौगुनिश्चेतनात्मकत्वमेवान्वयितावच्छेदकंस्पष्टमेव ॥ समस्ता-समस्तासर्वस्थलेप्ययमेवन्यायइतिहठेतु अज्ञोजीवइत्यादिकंनप्रयोक्तुंशक्येत । ज्ञानसामान्या-भावस्तत्राशक्यवचनत्वात् । इष्टापत्तौच "द्वावीशानीशौज्ञाज्ञौ" इत्यादेर्व्याकोपः ॥ एवं "अपशवोवाअन्ये" इत्यादिकमपिबाधितं स्यात् ॥ गवाश्वेतरखरकासरकरभादिपुप-शुत्वस्यप्रत्यक्षसिद्धतयासामान्यनिषेधस्याशक्यत्वात् ॥ इत्थममरादिशब्देष्वपिद्रष्टव्यम् ॥ किंच सार्वत्रिकत्वदुराग्रहेसतिव्युत्पत्तिशरीरघटकाभावपदेर्विबोधकोनञ् । सकिंभावत्वा-वच्छिन्नप्रतियोगिताकाभावमेवबोधयतिभावविरोधिंवा ? ॥ आद्ये आत्माश्रयानवस्थादय । भेदात्यन्ताभावरूपार्थयोरबोधश्च ॥ अभावपदेविरोधार्थस्वबहुग्रंथेपुस्वीकृतत्वाद्द्वितीय-श्चेद्व्युत्पत्तिशरीरएवव्युत्पत्तिभंग ॥ अज्ञानमविद्येत्यत्रचज्ञानत्वावच्छिन्नप्रतियोगिताका-भावएवतावतान्यायात्सिद्धेस्तुभावरूपमज्ञानम् ॥ तथाचापसिद्धांतः । एतेनाधर्मा-मित्रासितादिशब्देष्वप्यर्थासंगतिर्ज्ञेया ॥ तादृशस्थलेपुनञोविरोधबोधकत्वमेवेति सुदर्शितं–व्यासपादैर्योगसूत्रभाष्येद्वितीयपादे (सू० ५) "अनित्याशुचिदु खानात्म-सुनित्यशुचिसुखात्मख्यातिरविद्या" तिसूत्रव्याख्याने "अविद्यानप्रमाणनप्रमाणाभाव किंतुविद्याविपरीतंज्ञानांतरमविद्येति" इतिज्ञानांतरमित्युक्तयाभा सामन्यनिषेधकत्व-

मिहापास्तम् ॥ मंजूषाकारोपि" अज्ञानशब्देऽधर्मशब्दद्वयविरोध्यर्थकोनञ्, तेनभाव-
पदार्थएवतस्यविषयइत्यन्यत्रविस्तरः । अभावपदेचविरोध्यर्थकएवसः । भावविरोधी-
त्यर्थः । एवंचाभावस्यभावप्रतियोगिकत्वमेव इत्याह ॥ तावकन्यायात्तुमित्रत्वावच्छिन्नाभ-
भावएवबुध्येतेति "नामित्रोमित्राभावोनमित्रमात्रंकिंतुतद्विरुद्धःसपत्नः" इत्यादिन्यास-
भाष्यविरोधःस्पष्टएव ॥ किंचयेननामाप्ते नाविष्णुःपृथिवीपतिरित्यादौनञ्द्वयसमभिव्या-
हारेप्रकृतार्थदार्ढ्यस्यैवसर्वसंमतत्वात्तत्रापितावकव्युत्पत्तेर्व्यभिचारः । उक्तंच (अ० ५-
पा० २ सू० २७) "विनञ्भ्यांनानाञौनसहे" तिसूत्रेमहाभाष्ये "द्वौहिप्रतिषेधौप्रकृत-
मर्थंगमयतः । ननसहद्वेवेति" इति ॥ एतदेवाश्रित्यमंजूषायाम् "अभावाभावइत्यादिव्य-
वहारोवर्वराणामप्रामाणिकएव ॥ घटाभावोनास्तीत्यादौतत्कर्तृकसत्तायाएवाभावप्रतियोगि-
त्वम् । एवमेवनासहस्रदस्तत्रास्तेइत्यादावपिबोध्यं" इत्याद्यभिहितम् ॥ एवं "मथ्नामिकौरव-
शतंसमरेनकोपाद्दुःशासनस्यरुधिरंनपिबाम्युरस्तः । सचूर्णयामिगदयानसुयोधनोरू" इति-
वेणीसंहारस्थभीमवाक्यादिषुकाकुसहकारेणनञामथनादिगतंनिश्चितत्वंद्योत्यतेइत्यप्युक्तम् ।
तत्रापि तद्व्यभिचारःस्फुटः ॥ इत्थं (अ० ८ पा० १ सूत्र० १०) "आबाधेचे" तिसूत्रे-
महाभाष्ये "ननसुसु" इतिप्रयोगे "ननकरोतिसुसुजाजागर्तीत्येवमादिवाक्यैकदेशः" इति
कैयटः ॥ एवमादौकाकभावेपितद्व्यभिचारः ॥ मंजूषाकारस्तुअत्रब्राह्मणोनास्तीत्यादाव-
समासस्थलेप्यभावार्थकतांनञोनिराचष्टे । यथाह—"आरोपितत्वमेवनञर्थइतियुक्तम् ।
अत्रब्राह्मणोनास्तीत्यादावपि एतद्देशाधिकरणिकारोपिताब्राह्मणकर्तृकासत्तेत्येवबोधः ॥
भार्थस्तुतदभावबोधः । अतएव तत्सदृशेतरसत्ताप्रतीतिः" इत्यादि ॥ सर्वत्रतादृशा-
भावमात्रबोधकत्वनियमेऽब्राह्मणइत्यादौसादृश्यावगमोऽपिनस्यात् नचतत्र तत्प्रत्ययआर्थ-
इतिवाच्यम् । नञ्सूत्रादिभाष्यविरोधात् तत्रतादृशस्थलेषुतथार्थकतायाएवसिद्धेः ॥
किंच (अ० २ पा० २ सू० ६) "नञ्सूत्रएवभाष्ये" भवतिचैवंजातीयकानामप्ये-
कस्यप्रतिषेधेनबहूनांसंप्रत्ययः तद्यथा ननएकंप्रियं ननएकं सुखमिति" इत्युक्तम् ॥
व्यस्तस्थलेनञःक्रियायामेवान्वयादरेऽस्तिक्रियामात्रस्यप्रियादेर्वाप्रतीयेताभावमात्रम्
नतुबहुत्वादिकम् ॥ इत्थंचास्थूलादिवाक्येष्वस्थूलादिपदानां "अच्छायं अवायु
अचक्षुष्कं" इतिबहुव्रीहिंतपदप्रायपाठात् नास्तिस्थूलोयत्रेत्यादिरर्थोनिश्चीयतेऽतोऽत्र-
ब्राह्मणो नास्तीत्यादौ ब्राह्मणादिनिषेधात्तदितरसत्तेव लोकदृष्टस्थौल्यादीनां निषेधाद
लौकिकगुणगणसत्तातत्रासिध्यति ॥ नञोविरोधार्थताऽऽदरेत्वज्ञानमित्यत्रयथार्थज्ञान-
विरुद्धज्ञानांतरमिव लोकदृष्टस्थूलादिवस्तुविरुद्धधर्मकंतदलौकिकत्वादुभयधर्माश्रयत्वा-
च्चेतितादृशवाक्यार्थोनिरवद्यः ॥ अणुर्बृहत्कृशःस्थूलोगुणभृन्निर्गुणोमहानित्यादिभारतीय-
विष्णुसहस्रनामवाक्यादिरूपास्मृतिरप्येयमर्थेऽनुग्राहकावेदितव्या । नैयायिकास्तु भूतले-
घटइत्यत्रभूतलवृत्तिर्घटाभाव इतिबोधेभूतलनिरूपितस्य सप्तम्यर्थवृत्तित्वस्य स्वनिष्ठया
प्रतियोगितानिरूपकतयाऽन्विते नञर्थेघटाभावेऽन्वयः ॥ तादृशवाक्येभ्योभूतलनिवृत्तिर्घ-
टाभाव इत्यादिघटाद्यभावधर्मिकभूतलादिवृत्तित्वप्रकारकशाब्दानुभव इवतात्पर्यरूपकार-
णवशाद्घटोभूतलवृत्तिरत्राभाववानित्यादिर्घटादिविशेष्यकभूतलादिवृत्तित्वप्रकारकबोधोपि;

भवत्येव ॥ भूतलादिवृत्तित्वंचवस्त्वंतरादौप्रसिद्धम् ॥ ईदृशबोधानङ्गीकारेभूतलेनघटइत्यादिवाक्यजन्यस्याप्रामाण्यज्ञानानास्कंदितबोधस्यभूतलेघटइत्यादिवाक्यजन्यघटादिविशेष्यकभूतलाधेयत्वप्रकारकबाधविरोधितासर्वानुभवसिद्धानोपपद्येत ॥ नहिघटाभावधर्मिकभूतलवृत्तित्वप्रकारकंज्ञानंघटधर्मिकंभूतलवृत्तित्वप्रकारकज्ञानंविरुणद्धि; ग्राह्याभावानवगाहित्वात् किंतुघटोभूतलवृत्तिरितिज्ञानस्यघटोनभूतलवृत्तिरित्येवज्ञानंप्रतिबंधकंग्राह्यभूतलवृत्तित्वाभावावगाहित्वात् ॥ तादृशबोधानंगीकारे "प्रतियोग्यभावान्वयौतुल्ययोगक्षेमा" विति-नियमानुरोधी "नञ्पदंविनायत्रधर्मिणियस्यविशेषणतयाभानयादृशंसमभिव्याहाराद्भवति तादृशसमभिव्याहारस्थलेनञ्सत्वेतत्रधर्मिणितदभावःप्रतीयत" इत्यनुभवोऽपलप्येत ॥ एवंचनञर्थाभावेऽनुयोगितयाघटाद्यन्वयबोधोपपत्तयेनामार्थयोरभेदान्वयव्युत्पत्तिशरीरे-निपातातिरिक्तेतिनामविशेषणमावश्यकम् ॥ एवंनपचतिचैत्रइत्यादौचैत्रादिपुनञर्थपाककृत्याद्यभावस्य चैत्रस्यनधनमित्यादौधनादिपुनञर्थचैत्रस्वत्वाद्यभावस्यचानुयोगितयाऽन्वयार्थं घटोनपटइत्यत्रनञर्थभेदस्यघटादावनयोगितयापटादौप्रतियोगितयाऽन्वयार्थं चतत्रतदावश्यकम् । एवंक्रियानामार्थयोरपिविभक्त्यर्थमंतराकृत्वैवान्वयबोधः अतएवराजापुरुषः-भूतलंघटइत्यादौपुरुषाद्यंशेराजभूतलादेः स्वत्वाधेयतासबंधेनतंडुल.पचति चैत्र.पच्यत-इत्यादौचकर्मत्वकर्तृत्वादिसबंधेन तंडुलचैत्रादौपाकादेः स्वकर्मत्वस्वकर्तृकत्वादिसबंधे-नपाकाद्यंशेप्रातंडुलचैत्रादेरन्वयबोध. ॥ निपातातिरिक्तत्वादिविशेषणादेव भूतलेनघटः-घटोनपटइत्यादौघटादेर्नञर्थाभावेन मुखंचद्रइवेत्यादौ मुखचंद्रादीनामिवार्थसादृश्यादिनाऽन्वयबोधोभवत्येव ॥ एवं "नकलंजंभक्षयेदि"त्यादौनैयायिकमतेनञुपस्थाप्येन-बलवदनिष्टाननुबंधित्वविशिष्टेष्टसाधनत्वादिरूपविध्यर्थाभावेन धात्वर्थभक्षणादेरनुयोगितया गुरुमतेतुविध्यर्थापूर्वांशे विशेषणतयाऽनुमितेन नञुपस्थाप्याभावेन धात्वर्थभक्षणादेः प्रतियोगितयाऽन्वयोबोध्यः" ॥ विशेषणविभक्तेरभेदार्थकत्वे घटोननील-इत्यादौनञानीलाद्यभेदाभावएवप्रत्याययिष्यते नतुनीलादिभेदः यादृशसमभिव्याहार-स्थले येनसबंधेनयद्धर्मिणियेनरूपेणयद्वत्त्वं नञसत्वे प्रतीयतेतादृशस्थले नञातद्धर्मिणि तादृशसंबंधावच्छिन्नतादृशधर्मावच्छिन्नप्रतियोगिताकतदभावबोधस्य व्युत्पत्तिसिद्धत्वात् प्रतियोग्यभावान्वयौचेत्यादेरप्ययमेवार्थ. ॥ एवंचनञोभेदबोधकत्वं नकुत्रापि संभवति । अनीलंघटमानयेत्यादौघटपदसामानाधिकरण्यानुरोधेनानीलपदस्य नीलभिन्नपरतया नञोभेदवत्त्वैलक्षणायाऽउपगंतव्यत्वात्" नीलोघटइत्यादावभेदस्यप्रकारतावादिमतेघटरूपेधर्मिणिस्वरूपसंबंधेन नीलाभेदत्वेनरूपेणनीलाद्यभेदोभासते ॥ तत्रनञ्समभिव्याहारे घटेस्वरूपसंबंधावच्छिन्ननीलाभेदत्वावच्छिन्नप्रतियोगिताकाभावोभासते ॥ घट पटइत्यादौत्वयोग्यत्वादेवनान्वयः ॥ संसर्गतामते नीलोघटइत्यादावभेदसंबंधावच्छिन्ननीलत्वावच्छिन्नप्रकारता निरूपितघटत्वावच्छिन्नविशेष्यताशालीबोधोभवति ॥ तत्रनञ्समभिव्याहारेऽभेदसंबंधावच्छिन्ननीलत्वावच्छिन्नप्रतियोगिताकाभावोघटेनञाबोध्यते ॥ यत्रचायोग्यत्वादिनाघट पट इत्यादावभेदोनसंभवति तत्रनञ्समभिव्याहारेघटत्वावच्छिन्नप्रतियोगिताकाभाव स्वरूपेणैवनञाबोध्यते । अनीलमित्या-

दिसमासस्थलेपूर्ववदेवलक्षणाबोध्या ॥ भूतलेघटइत्यादौस्वरूपसंबंधावच्छिन्नवृत्तित्वत्वाव-
च्छिन्नप्रकारतानिरूपितविशेष्यताघटेभासतेतत्रनञ्समभिव्याहारेस्वरूपसंबंधावच्छिन्नवृ-
त्तित्वत्वावच्छिन्नप्रतियोगिताकाभावोघटेभासतइतिमन्यंते ॥ स्पष्टंचैतत्सर्वंव्युत्पत्तिवादा-
दिषुइत्थंकारमेतन्नयेपिप्राचित्कएवंतावकन्यायः । अभावस्यक्वचिदनुयोगितयाक्वचित्प्रति-
योगितयाचान्वयस्वीकारात् ॥ स्वान्वयितावच्छेदकेत्यादिनियमस्यसार्वत्रिकत्वेतु भूत-
लेनघटः घटोनपटः चैत्रस्यनधनमित्यादौभूतलघटधनादेरनुयोगितयाऽन्वयिनोऽप्यभावो-
ऽवगम्येत ॥ अतोघटोनेत्यादिकेवलप्रतियोगिघटितवाक्येष्वेवत्सइतिरमणीयम् ॥ अस्थू-
लादिवाक्यानितु एतद्वैतदक्षरमित्याद्यनुयोगिबोधकपदघटितानीतिनतत्रतदवकाश.सोन्द-
ह्लादयस्तुवह्नित्वेनघटोनास्तीत्यादिव्यधिकरणधर्मावच्छिन्नाभावमप्युरीकुर्वंति तन्मतेक्वास्य-
न्यायस्यैकांतिकत्वावसरः । अथप्रागुक्तरीतिकातिप्रसंगवारणायान्वयिपदंप्रतियोगिमात्र-
परमितिचेत्प्रतियोगितावच्छेदकधर्मावच्छिन्नप्रतियोगिताकाभावबोधकइत्यापत्याऽऽत्माश्र-
यादिर्दुर्निवारइतिदिक् ॥ मीमांसकमतेऽपिनायंन्याय.सार्वत्रिक शक्योवक्तुं ॥ बहुश्रुति-
सूत्रासामंजस्यप्रसंगात् ॥ तद्यथा "तस्माद्धूमएवाग्नेर्दिवाददृशे, नार्चिः तस्मादर्चिरेवाग्नेर्न-
क्तंददृशे, नधूम." इत्यत्र दिवानक्तमर्चिर्धूमयोर्दर्शनसामान्यस्याभावेत्वदुक्तरीत्या वक्त-
व्येपि दूरदर्शनदूरदर्शभूयोयोरेवाभावस्तत्रसिद्धांतित प्रथमस्यद्वितीयेपादेऽर्थवादाधिकरणे
(सू० १२) "दूरभूयस्त्वात्" इतिसूत्रेजैमिनिना ॥ तथा "नचैतद्विद्मोवयंब्राह्मणा-
वास.अब्राह्मणावा" इत्यत्रतद्यज्ञानसामान्याभावप्रसंगेपिनिश्चयरूपस्यज्ञानविशेषस्यैवा-
भावोगम्यते । नतुसंदायरूपस्य अन्यथाप्रवरानुमंत्रणापार्थ्यापातात् ॥ संशयबीजंचतत्रैव-
(सू० १३) "स्म्यपराधात्कर्तुश्च पुत्रदर्शनम्" इतिदर्शितम् ॥ नचविदिर्यथार्थ-
ज्ञानार्थ एवेतिभ्रमितव्यम् "अविदितपरमानंदो वेत्तिनरो विषयमेवरमणीय" मित्यादाव-
यथार्थज्ञानेपितस्य शंकराचार्यादिभि प्रयोगेण मीमसेनोक्ते ज्ञानसामान्यएव तच्छक्तेर्निर्धा-
रात् ॥ एवं "देवावैदेवयजनमध्यवसायदिशोनप्राजानन्" इतिदिक्प्रज्ञाननिषेधः शबरा-
दिभिः (सू० १०) "गुणवादस्तु" इतिसूत्रंगौणीसाधकंमन्वानैर्गौण स्वीक्रियते । यथोक्तं
तद्भाष्ये "कथमसति दिङ्मोहेदिङ्मोहशब्द ? इति । उच्यते—अप्राकृतस्य बहो.कर्मसमूह-
स्योपस्थितत्वाद्गौणो मोहशब्दोऽवधारणाप्रकाशदानादिभिर्दीपयतीतिगौणता" इति ॥
सद्व्युत्पत्त्यातुदिक्प्रज्ञानस्यैवाभाव सर्वात्मनावाच्य ॥ यद्यपीहसिद्धांतेत्राऽन्यएवपंथाल-
थापिशबरादीनामयमत्राशयइत्यनूद्यते ॥ इत्थं दशमस्याष्टमेपादेऽपि बहूनिनिषेध-
वाक्यानिविचारितानि तत्रापि "दीक्षितो नददातिनजुहोती" त्यादौ दानहोमादेरव-
च्छेदकावच्छेदेनाकरणनिराकरणपुर सरपर्युदासमाश्रित्यतद्विशेषविषयतयानिषेधो निर्धा-
रितइति संक्षेपः ॥ एवकारममीषांमतरीत्याप्यस्थूलादिवाक्येषुलाघवात्पर्युदासमाश्रित्य
"नानूयाजेषु" इत्यादाविव लोकप्रसिद्धस्थूलादिवस्तुभेद "अपशवोवा अन्येगोअश्वेभ्य "
इत्यत्रनञन्वयितया सामान्यत पशुशब्दस्योपादानेपि प्रशस्तपशुत्वंप्रतिषेधइवकार्यभाव-
निर्वाहकाणां नियताणुत्वादिवैयधिकरण्यकरथौल्यादीनां प्रतिषेधोवासिद्धोदितिप्रियमेवन ॥
ननु प्रबलप्रत्यक्षविरोधादेवतत्रपशुत्वसामान्याभावोऽशक्याश्रयणइतिचेत्तत्रापिश्रुत्येक-

समधिगम्येब्रह्मणि "अणोरणीयान्महतोमहीयान्" इत्याद्यलौकिकधर्मवत्त्वावोधकस्वबोधिकस्वतःप्रमाणप्रत्यक्षनिरवकाशश्रुतिशतविरोधात्तथास्त्विति गुडजिह्विका ॥ एतच्चसर्वतत्त्वनयानुसारेणवाक्यार्थविचारेप्यास्माकोब्रह्माप्राकृतनिखिलधर्मरूपतावादःसुस्थएवेत्यभिप्रेत्यदर्शितम् ॥ वस्तुतस्तुतत्तन्मतेसिद्धांतविरुद्धःकश्चिदंश.सूक्ष्मेक्षिकयाहेयएव ॥ अथकस्तर्हिसिद्धांतेनञर्थइतिचेद्व्यासेसमासेचसर्वत्रानुगतोलाघवात्तिरोभावएवनञर्थोव्याख्येयइतिप्रतिभाति ॥ द्वितीयस्कंधनवमाध्याये (श्लोक ३२) अहमेवासमेवाग्रइत्यत्रसुबोधिन्यांसर्वेषामभावानांतिरोभावानतिरिक्तताया स्वमतेकथनात् सर्वार्थनिर्णयनिर्बंधावरणभंगादिपुतत्रैवतेषामंतर्भावसाधनाच्च ॥ एवंच पुरुषसूक्तशांडिल्यविद्यावृहदारण्यकनृसिंहोत्तरतापनीयादिषु पुरुषएवेदंसर्वंयद्भूतंयच्चभव्यम् ॥ सर्वंखल्विदंब्रह्मतज्जलान् ॥ इदंसर्वंयदयमात्मा ॥ सर्वंसर्वमयंसर्वेजीवाःसर्वमया," "सर्वभूतेषुचात्मानंसर्वभूतानिचात्मनि । ईक्षतेयोगयुक्तात्मासर्वत्रसमदर्शन. ॥ योमांपश्यतिसर्वत्रसर्वंचमयिपश्यति ॥ अनागतमतीतंचवर्तमानमतींद्रियम् ॥ विप्रकृष्टंव्यवहितंसम्यक्पश्यंतियोगिनः ॥" एवमादिश्रुतिस्मृतिपुराणैर्ब्रह्मरूपतयासर्वस्यसार्वात्म्येसर्वत्रसर्वसत्त्वेचवस्तुत सत्यपियत्रयत्रयस्ययस्यद्रव्यस्ययद्यत्क्रियागुणयोर्वायदातिरोभावस्तदातत्रतत्रवत्तद्द्रव्यंसासक्रियासगुणश्चनेत्युच्यते ॥ अतएवामदशायांघटेरागतिरोभावादरक्तइतिव्यवहारः पाकेननैल्यतिरोभावेतुनील इति ॥ पाकानुकूलक्रियातिरोभावेतु नपचतिचैत्रइति ॥ बीजदशायांतरोस्तिरोहितत्वान्नास्त्यधुनाऽत्रवृक्षइतिच ॥ नचवृक्षादेरसत्त्वमलकएवतदानींव्यवहारइतिशक्यं असतउत्पत्त्ययोगात् । अन्यथाशशविषाणादेरपिकदाचिदुत्पादापातात् । उपादाननिरपेक्षतयैवोत्पादनस्यशक्यत्वप्रसंगात् । असताकार्येणकारणस्यसंबंधाभावापत्तेः संबंधस्यद्विनिष्ठत्वात् असंबद्धस्योत्पत्तिस्वीकारेवटबीजादेवपिचुमंदकुंदचंदनादेरुद्भवप्रसक्तेश्च ॥ अतोऽभिव्यंजनार्थमेवपुरुषादिप्रयत्नइत्यन्यत्रविस्तरः ॥ इदंचसकलंनकेवलमस्मद्ग्रंथेष्वेनापितुसांख्यादिग्रंथेष्वपि "असदकरणादुपादानग्रहणात्सर्वसंभवाभावात् । शक्तस्यशक्यकरणात्कारणभावाच्चसत्कार्यं" मित्यादिस्थलेवाचस्पतिमिश्रादिभिरपिप्रपंचितमितितत्प्रतितंत्रार्थोप्यनुकूलोनः ॥ तिरोभावश्चविद्यमानवस्तुनिष्ठजीवानुभवयोग्यताविरोधीधर्मः ॥ अतएवतिरोभावकालेलौकिकप्रमाणैर्नानुभवः ॥ तिरोभावस्यैवनञर्थतामभिप्रेत्य (अ० २ पा० २ सू० ६) "नञि" तिसूत्रेमहाभाष्ये "अथवापुनरस्तूत्तरपदार्थप्रधान. । ननुचोक्तमब्राह्मणमानयेत्युक्तेब्राह्मणमात्रस्यानयनंप्राप्नोतीति नैषदोष.; इदंतावदयंप्रष्टव्यः—अथेहराजपुरुषमानयेत्युक्तेपुरुषमात्रस्यानयनंकस्मान्नभवति । अस्त्यत्रविशेषः—राजाविशेषक प्रयुज्यतेतेनैवंविशिष्टस्यानयनंभवति । इहापितर्हिनञ्विशेषक प्रयुज्यतेतेननञ्विशिष्टस्यानयनंभविष्यति । कःपुनरसौनिवृत्तपदार्थकः । यदापुनरस्यार्थोनिवर्त्तते किंस्वाभाविकीनिवृत्तिराहोस्विद्वाचनिकी । किंचातः यदिस्वाभाविकी किंनञ्प्रयुज्यमानः करोतिअथवाचनिकी तद्वक्तव्यम् नञ्प्रयुज्यमान पदार्थंनिवर्त्तयतीति ॥ एवंतर्हिस्वाभाविकीनिवृत्तिः ॥ ननुचोक्तं किंनञ्प्रयुज्यमान करोतीति । नञ्प्रयुज्यमानःपदार्थंनिवर्त्तयति ,॥ कथम् ? कीलप्रतिकीलवत् । तद्यथा—कीलआहन्यमान प्रति-

फीलंनिर्हन्ति । यद्येतत्तथोमाहात्म्यंस्यान्नजातुचिद्राजानोहस्त्यश्वंविभृयुनैरयेवराजानोभूयुः । एवंतर्हिस्वाभाविकीनिवृत्तिः ॥ न चोक्तं किंनञ्प्रयुज्यमानःकरोतीतिनञ्निमित्तात्त्वपलब्धिः । तद्यथा=समंधकारेद्रव्याणां समवस्थितानांप्रदीपनिमित्तंदर्शनंनचतेषांप्रदीपोनिर्वर्तकोभवति । यदिपुनरयंनिवृत्तपदार्थकःकिमर्थंब्राह्मणशब्दः प्रयुज्यते एवंयथाविज्ञायेतास्यपदार्थोनिवर्ततइति । नेतिह्युक्तेसंदेहःस्यात् कस्यपदार्थोनिवर्ततइति । तत्रासंदेहार्थं ब्राह्मणशब्दःप्रयुज्यते । एवंचैतत्" इत्याद्युक्तम् ॥ अत्रनिवृत्तपदंभावक्तान्तम् ॥ निवृत्तिःपदार्थोयस्येतिभूषणादिसंमतव्याख्यानस्यादरेपिनिवृत्तिस्तिरोभावः ॥ अभावकल्पनेऽपिसनतिरोभावातिरिक्तोऽस्मन्मते ॥ वस्तुतस्तुनतद्व्याख्यानंभाष्यकाराभिप्रेतम् । तच्छैलीविरोधात् । "प्रतीतपदार्थकोलोकेध्वनिःशब्दउच्यते" इत्यादिपुपस्पशादिस्थलांतरेपुभावेक्तस्याव्याख्यानात् अन्यथाज्ञानपर्यायेप्वशब्दत्वमित्यापातात् अत्रामेऽनुपदं "अस्यार्थोनिवर्तते । अस्यपदार्थोनिवर्तते" इत्याद्युक्त्या कर्तरिक्तस्यैवनिश्चयसिद्धेश्च ॥ तथाचायं भाष्यार्थः ॥ नञर्थनिर्धारणायशंकते—नन्विति । ब्राह्मणमात्रस्येति । अभावे भेदेवानञर्थे वस्तुविशेषानुयोगिकस्याभावस्यभेदस्यवाप्रतियोगीब्राह्मण इत्यत्रब्राह्मणशब्दार्थःस्यादतएवमितिविशंकाशयः ॥ मात्रशब्देनच क्षत्रियादेर्ब्रह्मबंधोश्चानयनं नस्यादितिभावः ॥ नञ्विशिष्टस्येति । यथाराजशब्दार्थसंबद्धस्यानयनं तथानञर्थतिरोभावविशिष्टस्य तिरोहितब्राह्मण्यस्य क्षत्रियादेर्ब्रह्मबंधोश्चेत्यर्थः ॥ नञर्थमेवस्पष्टयितुंपृच्छति । कःपुनरसाविति । असौ नञर्थविशिष्टप्रमितोत्तरपदार्थव्यतिरिक्त कः समासार्थइत्यर्थः ॥ अभावएवनञोऽर्थःप्रसिद्धोऽतउत्तरपदार्थस्यब्राह्मण्यादेर्भावस्यतदभावस्यच विरोधान्नञर्थविशिष्टउत्तरपदार्थःकथंस्यादितिभावः ॥ उत्तरयति—निवृत्तपदार्थकइति ॥ पस्पशाह्निके "अथसिद्धशब्दस्यकःपदार्थः" इत्यादिस्थलइवात्रपदार्थशब्दोऽर्थमात्रेरूढ निवृत्तस्तिरोहितः पदार्थउत्तरपदबोध्योर्थोयस्मिन्सइत्यर्थः ॥ अयंभावः—शब्दाहितिरोहितआविर्हितेचार्थेतुल्यंतथाप्रवर्तते ॥ अन्यथानलोभूद्युधिष्ठिरोभूदित्यादिनव्यवह्रियेत । सर्वथोत्तरपदार्थाभावेचतस्यप्राधान्यमपिनस्यात् । नञ्वाचकस्यविशेषणंस्यात् ॥ अतोनञ्समासस्थलउत्तरपदंतिरोहितत्रार्थबोधकम् । तस्यतथात्वद्योतकश्चनञ् ॥ इत्थंनञर्थविशिष्टस्यनिवृत्तपदार्थनिर्णीते निवृत्तिरेवनञर्थइत्यर्थात्फलति निवृत्तिश्चतिरोभावः । पूर्वंतत्रसतितदानीमप्यन्यत्रविद्यमानेनिवृत्तिव्यवहारात् ॥ तद्यथा—निवृत्तकृपीवलोऽयंग्रामः, निवृत्तविद्योदेवदत्तइति ॥ अयंचतिरोभावोवस्तुनानात्वनिर्वाहायभगवदिच्छाकृतोवस्तुस्वभावसिद्धएवनभाष्योक्तंनतुपारिभाषिकोवचनबलात्क्रियतइतिसाधयितुंपृच्छति । यदापुनरिति । किंचयंतिरोहितस्यब्राह्मणपदार्थस्यनञातिरोभावोद्योत्यते । अथस्थितस्यैवब्राह्मण्यस्यनञानिवृत्तिःक्रियते मंत्रेणेवविषादिसामर्थ्यस्येतिप्रश्नः ॥ किंनञ्प्रयुज्यमानइति । एकएवाच्छन्नोदूरादूरार्थाविवतिरोहितातिरोहितयोस्तुल्योब्राह्मणशब्दएवातिरोहितब्राह्मण्यं प्रक्षवर्णंतिरोहितब्राह्मण्यंक्षत्रियादिकंच वक्ष्यति ॥ प्रकरणादिकंचतत्रतत्रार्थेतात्पर्यग्राहकंभविष्यतीतिनास्तिनञोव्यापारइत्यर्थः ॥ नञ्प्रयुज्यमानःपदार्थंनिवर्तयतीति । ब्राह्मणादिपदार्थंतिरोहितंगमयतीत्यर्थः ॥ केवलोब्राह्मणशब्दोहिप्रयुज्यमानःप्रसिद्धिवशादतिरोहित-

ब्राह्मण्यकमेवप्रत्याययति । नञ्समभिव्याहृतस्तुतिरोहितब्राह्मण्यकम् ॥ यथाप्रतिष्ठत इत्यत्रतिष्ठतिरेवगत्यर्थकस्तथापिसकेवलः प्रयुक्तोगतिविराममेवबोधयेदतः प्रस्थानबोधनायतत्रप्रशब्दउपयुज्यते। तथोत्तरपदस्यतिरोहितार्थकताबोधनायनञ्। केचित्तु भाष्ये शब्दस्यपदार्थप्रत्ययपरतालक्षणयाऽऽश्रित्यनञ्पदार्थप्रत्ययंनिवर्तयतीतिव्याचक्षते । तथाव्याख्यानेऽपिप्रत्ययस्यैवकेवलब्राह्मणादिशब्दप्रयोगेभावोनञ्प्रयोगेचाभावोगम्यते नतुपदार्थस्येविनञ्समासेउत्तरपदार्थस्याप्रतीतिरूपस्तिरोभावएवफलति ॥ यदिचसर्वथोत्तरपदस्यार्थप्रत्ययंनञ्निवर्तयेत्तदास्वयमपिकस्यविशेषणंस्यात् । अब्राह्मणोऽयमित्यादौचाविशेषोऽर्थस्यस्यादतस्तिरोहितार्थपरतैवयुक्ता ॥ ननुशब्दाआविर्भूतार्थमेवस्वभावाद्बोधयंति । केवलब्राह्मणशब्दप्रयोगेप्रकटब्राह्मण्यकएवार्थोगम्यते; अत.स्वभावसिद्धामाविर्भूतार्थपरतामुत्तरपदस्यनञ्निवर्तयेदित्याशंकांदृष्टांतेनपरिहरति–कीलप्रतिकीलवदिति ॥ एकस्मिन्नेवकाष्ठे । पूर्वकीलविशेषवैशिष्ट्येसत्यपितत्राहन्यमानः प्रतिकीलः पूर्वकीलमुत्सारयन्स्ववैशिष्ट्यंयथातत्र प्रत्याययतितथाचकेवलब्राह्मणादिशब्दानामाविर्भूतार्थपरत्वेपितेषुसबध्यमानोनञ्प्रादुर्भावांशमपहृत्यस्वार्थतिरोभाववैशिष्ट्यंतदर्थेप्रत्याययति ॥ काष्ठस्थानमुत्तरपदार्थः पूर्वकीलस्थानआविर्भावः प्रतिकीलस्थानेतिरोभावइतिभावः ॥ अथपदार्थंनिवर्तयतीत्यस्य तिरोहितं बोधयतीत्यर्थमयुक्त्वा पदार्थमेवतिरोभावयतीति विपरीतार्थंचगृहीत्वाशंकते–यद्येतदिति । नकारप्रयोगेणैवशत्रुबलतिरोभावसम्भवात् किंद्रव्यव्ययपरिश्रमसाध्ययासेनयेतिभावः ॥ नञ्समासस्थलेनञोद्योतकत्वेतिस्पष्टयितुमेतत्प्रश्नोपन्यासः ॥ तदेवस्पष्टयन्समाधत्ते–एवंतर्हीति । स्वाभाविकीनिवृत्तिः । तत्रतत्रतत्तत्तिरोभावोभगवत्क्रीडेच्छाकृतवस्तूनांस्वभावहेतुकः । यथाक्षत्रियादौब्राह्मण्यादितिरोभावःक्षत्रियादिवस्तुस्वभावात्पतितादौतत्तिरोभावश्चपातकादितिवस्तुस्वभावादितिभावः ॥ नञ्निमित्तात्उपलब्धिः ॥ शब्दानांतिरोहितातिरोहितार्थयोरुभयत्रप्रवृत्तावपितिरोहितब्राह्मणाद्यर्थकोऽयंब्राह्मणादिशब्दइत्युपलब्धिनिर्णयोनञाज्ञायतइत्यर्थः ॥ तिरोहितश्चपदार्थोन्धकारगतद्रव्यवद्वस्तुत सन्नप्यनुभवागोचरोभवति । प्रदीपश्चयथातद्द्रव्यंयथास्थितमेवदर्शयति । तथानञपिशब्दद्वारासंबद्धस्तिरोभावविशिष्टतदर्थस्वरूपं यथास्थितमेवशाब्दज्ञानेविषयीकारयतीतितद्यथासंधकार इत्यादिग्रंथस्याशयः ॥ एतेन "तत्तदर्थकाःशब्दाभिन्नाएवनञ्समभिव्याहारेतुतदर्थकोयमितिज्ञायते इदमेवनञोद्योतकत्वंनञ्निमित्तात्उपलब्धिरिति भाष्यस्यतत्समभिव्याहारे मुख्यब्राह्मणार्थकोनायं किंत्वारोपिततदर्थकोऽयमित्युपलब्धिर्निर्णयइत्यर्थः" इत्यादिविवरणं प्रत्युक्तम्; एकस्यापिब्राह्मणादिशब्दस्यनानात्वकल्पनेवृथागौरवात् नब्राह्मणइत्यादिविग्रहवाक्येतस्यमुख्यब्राह्मणाद्यर्थतयासमासविग्रहवाक्ययोस्तुल्यार्थताभंगप्रसंगाच्च ॥ नचतत्रापि नञ्समभिव्याहारादारोपितार्थ सइतिवाच्यं प्रथमतः पदपदार्थज्ञानेनञोनेनपदेनसंबंध इतिबोधस्यपश्चादुदयात् । समासस्योच्चारणमात्रेणारोपितार्थतालाभेनब्राह्मणोमूर्खइत्यादावारोपितदर्थकःस्यात् ॥ मन्मतेत्वाविर्भूतार्थबोधेपिनञाकीलप्रतिकीलन्यायेनविग्रहवाक्येप्याविर्भावांशस्योद्वापइतितुल्यार्थता ॥ यत्तुनामरूपव्याकरणकृतशक्तिसंकोचात्तत्तद्धार्थएवनतत्तच्छब्दस्यब्रह्मणिवृत्तिः । वस्तुतस्तुसर्वेसर्वार्थवाचकाइतिन्यायेनसर्वार्थसर्वशब्दा-

नामप्रसिद्धासाऽतः क्षत्रियादिषुब्राह्मणादिशब्दाअप्रसिद्धिशक्तिका नञाद्योत्यंतद्दत्युच्येत
तदातिरोहितब्राह्मण्याद्यर्थकान्नइतिमन्मतएवप्रवेशः ॥ एवमन्यदप्यूह्यम् ॥ यदिपुनरिति ।
अर्थबोधनायैवहिःशब्दःप्रयुज्यते सचेत्तिरोहितः किमर्थमसौब्राह्मणादिशब्दःप्रयुज्यत-
इत्यर्थः ॥ एवंयथेति । अस्यपदस्याभिधेयंतिरोहितमितियथाविज्ञायेततान्निरोभावविषय-
मदर्शनार्थंतत्प्रयोगः ॥ केवलेनञिप्रयुक्तेसतितत्तस्तिरोभावस्यबोधेपिकस्यपदस्याभिधेयं
तिरोहितमितिनिर्णयोनस्यात् केवलाद्ब्राह्मणादिशब्दाचतिरोहितब्राह्मण्यादिरर्थोन निर्णी-
येत; अतोऽसंदेहेनतिरोहितब्राह्मण्यइत्याद्यर्थबोधनार्थंनञ्विशिष्टोब्राह्मणादिशब्दःप्रयुज्यते
एवंचैतत् एवमेवैतदित्यर्थः ॥ एवंच नञर्थतिरोभावविशिष्टब्राह्मणस्यबोधादुत्तरपदार्थप्राधा-
न्येपिब्राह्मणमात्रस्यानयनंनप्राप्नोति आविर्भूतब्राह्मण्यकस्य त्यात्रतैनायैनञ्प्रयोगादिति
भावः । तस्माद्ब्राह्मणइत्यादौतिरोहितोब्राह्मणइत्यादिरर्थः ॥ अतएवपूर्वंब्राह्मणतया
व्यवह्रियमाणेपिसुरापानादिनापतितेपश्चादब्राह्मणइति व्यवहारः ब्राह्मण्याख्यदेवताया-
स्तत्रतिरोधानात् ॥ आरोपवादिनापिकिंब्राह्मण्यंतत्रतिरोहितमित्यवश्यंवक्तव्यम् । सतित-
स्मिन्नारोपायोगात् ॥ तथासतितेनैवनिर्वाहे कृतमधिकयाऽऽरोपितत्वकल्पनया ॥ क्षत्रि-
यादिशरीरेचब्राह्मण्यदेवतातिरोभावःस्वाभाविकइतितत्रापितथाप्रयोगः ॥ अतएवयत्रवि-
श्वामित्रऋषभदेवपुत्रादिशरीरेकारणविशेषवशात्तस्या आविर्भावस्तत्रब्राह्मणोयमित्येवव्यव-
हारो नत्वब्राह्मणोयमिति तिरोभावेसत्येवनञ्प्रयोक्तुं शक्यत्वात् ॥ आधुनिकेष्वपि
क्षत्रियादिषुयत्रदीक्षाकालावच्छेदेनतदाविर्भावस्तत्र "दीक्षितोयंब्राह्मण" इत्येवाश्वलायनादि-
भिःप्रयुज्यते नत्वब्राह्मणइति ॥ अतएवव्रतस्थक्षत्रविड्वधेब्रह्महत्याप्रायश्चित्तंस्मरंतियाज्ञ-
वल्क्यादयः ॥ अतोदीक्षातिरिक्तकाले तेषुप्रयुज्यमानाब्राह्मणपदस्यापितिरोहितोब्राह्मण
इत्यर्थः ॥ आरोपवादिनापिदीक्षाकालेतदाविर्भावस्ततएव पूर्वंतत्तिरोभावश्चवक्तव्यएवेति
लाघवान्मन्मतमेवाद्रियताम् ॥ ब्राह्मणक्षत्रियादीनां भगवन्मुखाद्यवयवसंभवब्रह्मक्षत्रादि-
पदवाच्यदेवताविशेषरूपत्वम् "ब्रह्मणेब्राह्मणमालभेतक्षत्रायराजन्य" मित्याद्यनेकश्रुति-
सिद्धंद्वितीयस्कंधे (अ० १ श्लो० ३७) ब्रह्माननंक्षत्रभुजोमहात्मेत्यत्रसुबोधिन्यांश्री-
मदाचार्यचरणैरवतारवादावल्यांब्राह्मणत्वादिदेवतावादेदशमेश्रीपुरुषोत्तमचरणैश्चपुरस्तरप्र-
माणयुक्तिपुरःसरंनिर्णीतमितिततोऽवधेयम् ॥ ननुतदाविर्भावकगर्भाधानादिसंस्कारशालिनि
कुलशुद्धसर्वथातत्तिरोधायकसुरापानादिरहितेपितपःश्रुताद्यनुपलंभादब्राह्मणोयमितिप्रयु-
ज्यते । नहितत्रतत्तिरोभावःशक्यवचनः तत्रापितिरोभावांगीकारेब्राह्मणपदार्थस्यैवानुपलं-
भःप्रसज्येत अतोऽतिरोभावेपिकथंतत्रतथाप्रयोगइतिचेदेकदेशतिरोभावादितिजानीहि ॥
तथाहि यत्रसंपूर्णस्तदाविर्भावस्तत्राशेषतद्गुणानुभवः ॥ आविर्भावतारतम्याच्चगुणता-
रतम्यं ॥ अतोशेषगुणसमुदायेशक्तोब्राह्मणशब्दःस्वशक्यसमुदायैकदेशेपिवर्तते ।
पूर्वेपंचालाउत्तरकोसलाइत्यादौपांचालादिशब्दइव ॥ अतोगुणसमुदायैकदेशस्ययस्य-
यत्रतिरोभावस्तत्रतत्तिरोभावमादायैवाब्राह्मणादिप्रयोगोऽतोनास्मत्संमतनञर्थव्यभिचारः॥
एतदेवतत्रैवसूत्रेभाष्यकृताऽग्रेऽनुपदम् "अथवासर्वएतेशब्दागुणसमुदायेषुवर्तन्ते"
इत्यादिनास्पष्टीकृतम् ॥ यद्यपिशरीरेतत्तद्देवतासन्निधानमेवब्राह्मणादिशब्दप्रवृत्ति-

निमित्तं तथापिसन्निधानस्याप्रत्यक्षत्वात्तत्कार्यतपःश्रुतादिगुणैरेवानुमेयत्वात्सन्निधानतारतम्यस्यापिगुणतारतम्यानुमेयत्वाच्चगुणसमुदायेषुवर्ततइत्युक्तम् ॥ अतस्तिष्ठन्मूत्रणाद्यनाचारवतिशुच्याचारतारूपस्यतस्यैकदेशस्यतिरोभावबोधकस्तथाप्रयोगोनतुलाक्षणिकः ॥ अतएवतत्र "एवमयंसमुदायेब्राह्मणशब्दःप्रवृत्तोऽवयवेष्वपिवर्तते । जातिहीनेगुणहीनेच । गुणहीनेतावत् । अब्राह्मणोऽयम् यस्तिष्ठन्मूत्रयति । अब्राह्मणोऽयं यस्तिष्ठन् भक्षयति । जातिहीनेसन्देहाद्दुरुपदेशाच्चब्राह्मणशब्दोवर्तते" इत्याद्युदाहृतम् ॥ अत्रकैयटोपि "सर्वइति । तत्रयस्यैवगुणस्याभावस्तेनैवनिवृत्तिस्तस्यैवासौनञाद्योत्यते । अवशिष्टानांतुगुणानामर्थात्सद्भावोगम्यते । गुणशब्देनचात्रधर्ममात्रंपराश्रयमुच्यते ॥ यस्तिष्ठन्निति । तपःश्रुतयोरभावान्निंद्यात्राब्राह्मणशब्दप्रयोगस्तत्रजातिमात्रेऽवयवेसमुदायरूपारोपाद्ब्राह्मणशब्दप्रयोगोनञातुस्वाभाविकौतपःश्रुतनिवृत्तिर्द्योत्यते । नचभिन्नविषयत्वंपूर्वपदोत्तरपदयोराशंकनीयम् । द्वयोरपिसमुदायविषयत्वात्तदेकदेशनिवृत्तिसद्भावप्रतिपादनद्वारेण" त्याद्याह ॥ आरोपाग्रहेतुलक्षणयैवनिर्वाहादेतत्कल्प्यंनात्यंतमुपयुज्येत ॥ उत्तरपदार्थैकदेशतिरोभावेपिनञ्प्रयोगस्यभाष्यकृतास्वीकारात्स्वान्वयितावच्छेदकेत्यादिनियमस्यव्यभिचारः सुतरामापन्नः । तादृशेसर्वथाब्राह्मण्याभावस्याशक्यवचनत्वात् ॥ केचित्त्वारोपितत्वमेवनञर्थमूरीकुर्वंति ॥ अपरेपुनरन्योन्याभावात्यंताभावभेदभिन्नमभावं ॥ तत्रनाद्यः भाष्याक्षरालभ्यत्वात् ॥ भाष्येतुनञ्विशिष्टस्यनिवृत्तपदार्थकत्वस्थापनान्निवृत्तिरेवनञर्थः सिद्ध्यति ॥ आरोपस्तुननिवृत्तिपदस्यार्थः । आरोपितमितिवक्तव्येमाणवकेसिंहत्वंनिवृत्तम् शुक्तौरजतंनिवृत्तम् शक्यतावच्छेदकनिवृत्तिर्लक्षणेत्याद्यभिलापस्यापातात् ॥ किंचतद्वादिनाविवरणकृता "लक्षणाप्यसन्नयेद्यमेवयत् आरोपितप्रवृत्तिनिमित्तकस्यबोधः तत्रनञ्समभिव्याहारेनिवृत्तमुख्यब्राह्मण्यकोब्राह्मणशब्दार्थइतिबुद्धेआरोपितत्कार्यकत्वंफलतीतिबोध्यम्" इत्युच्यते ॥ तथासतिभाष्यएवतथास्पष्टंकुतोनब्रूयात् ॥ किंच नञंविनापिसिंहोमाणवकइत्यादाविवब्राह्मणादिशब्देभ्योप्यारोपितब्राह्मण्यइत्यादिबोधस्यप्रकरणादिनासुखेनसंभवात्तद्द्योतनार्थंनञोऽनुपयोगाज्जगतिनञ्प्रयोगएवोच्छिद्येत ॥ लाक्षणिकप्रयोगेच्छायामसिंहमध्यापयाऽगंगायांघोषइत्यादिप्रयोगश्चापद्येत ॥ एवमन्यदप्यूह्यम् ॥ तत्रैवाग्रे "जातिहीनेसन्देहाद्दुरुपदेशाच्चब्राह्मणशब्दोवर्तते" इत्यादिभाष्यपर्यालोचनेनतुनञ्प्रयोगात्पूर्वंशुच्याचारतादिसमानधर्मदर्शनाद्भ्रमजनकदुरुपदेशाद्वाभ्रमाद्ब्राह्मणमारोपितस्यब्राह्मण्यस्यनिवृत्तौसत्यामेवतद्बोधनायप्रयुतनञ्प्रयोगोनतुनञ्विशिष्टप्रयोगकालेतथारोपप्रतीतिर्गौधोपीदृयेनसिद्ध्यति ॥ अथैवंतर्हिनिवृत्तिपदलभ्यत्वाद्द्वितीयः पक्षोस्त्विंतिचेन्नैवम्; अभावस्योत्तरपदार्थेविशेषणतयान्वयेऽब्राह्मणमित्यादौप्रागुक्तदिशाब्राह्मणमात्रस्यानयनं प्रसज्येत ॥ ननोऽनर्थकत्वेब्राह्मणाब्राह्मणशब्दयोः पर्यायताऽन्वयस्यानाच्चसाधुत्वमितियथाप्रसज्यते तथा विशेषणतयाऽन्वयेऽपिभेदवान्ब्राह्मणइत्येवबोधात्पर्यायतेत्स्यात् ॥ विशेष्यतयाऽन्वयेत्तूत्तरपदार्थप्राधान्यंनस्यात् । तथाचमहाभाष्यविरोधः ॥ अत्रार्थः हेमन्तइत्यादौच हेमंतादिगतलिंगवचनेप्रसज्येयाताम् ॥ नानूयाजेष्वित्यनूयाजानांप्रत्यासन्नत्वात् भेदेऽनूयाजताद्धर्म्यप्रतियोगितयाऽन्वयात् ॥

अनेकमित्यत्रैकवचनंचनोपपद्येत एकमिवानुक्त्वायोगात् ॥ साधितंत्वेतदुत्तरपदार्थप्रा-
धान्यात्तत्रैवभाष्ये ॥ अत्रंभवसिभयुवां भवथइत्यादौचपुरपरवचनव्यवस्थानस्यात् ॥ पूर्व-
पदार्थप्राधान्येचाव्ययत्वमापद्येत ॥ तुल्यार्थतयाव्ययीभावोवाऽनेनबाध्येतेत्यमक्षिकमि-
त्याद्यसिद्धिः । निर्मक्षिकमित्याद्यव्ययीभावस्यावकाशात् ॥ एतेन विशेषणविशेष्योवा
न्यायतस्त्ववधार्यतामितितिनिरस्तम् । विशेषतस्तद्दूषणंचविवरणमंजूषादितोऽवसेयम् अतः
पक्षद्वयापेक्षयातिरोभावोनञर्थइत्येवरम्यम् ॥ अभावधीस्तुलौकिकानांतत्वाज्ञानमूलिका ।
वस्तुतः सर्वेषामभावानांतिरोभावानतिरिक्तत्वात् ॥ अतस्तादात्म्यतिरोभावेभेदव्यवहारः
संसर्गतिरोभावेऽत्यंताभावव्यवहारो लौकिकानामितिविवेकः ॥ घटोनास्त्यब्राह्मणइत्या-
दावारोपबोधस्तुसर्वानुभवविरुद्धः ॥ अत्यंतासदृशे तदारोपासंभवेन तत्रनञआरोपार्थ-
कत्वासंभवादघटः पटइतिनोपपद्येत ॥ तादृशेप्यारोपस्यांगीकारे तु लोष्टेप्यब्राह्मणशब्दः
प्रयुज्येतेतिसुडनपुंसकस्येत्यादिसूत्रभाष्यव्याकोपः ॥ तिरोभावस्यैवलौकिकैरभावत्वेन-
ग्रहणात् "प्रतियोग्यभावौ समानयोगक्षेमा"विति तांत्रिकोक्तेर्नीलोघट इत्यत्रनीलप-
दार्थस्य तादात्म्येनघटेभानादनीलोघट इत्यत्रघटेतादात्म्यसंबंधावच्छिन्ननीलतिरोभावभा-
नमनुभवसिद्धमारोपवादेनसंगच्छेत ॥ नेदंरजतमिदंरजतमितिज्ञानयोस्तुल्यविषयकत-
याऽविरोधात्परस्परप्रतिबंधकत्वमपिनघटेतेतिदिक् ॥ नञोद्योतकत्ववाचकत्वयोरन्यत-
रपरिग्रहेतुनास्माकंनिर्बंधः ॥ वाचकत्वपक्षेप्युक्तादिग्रंथस्यकैश्चिद्योज्यमानत्वात् ॥ एवंचा-
व्ययीभावेपूर्वपदार्थप्राधान्यान्नञर्थतिरोभावस्यविशेष्यतया भानम् ॥ अमक्षिकमहिममि-
त्यादौमक्षिकाणामत्रतिरोभावोहिमस्यसर्वथातिरोभावइत्यादिर्बोधः ॥ अन्यत्रोपलंभेपि
स्थलविशेषेतिरोभावोऽर्थाभावः । लौकिकप्रत्यक्षानर्हतासाधकस्तिरोभावोत्ययः । कालवि-
शेषमात्रोपलभ्यस्तिरोभावोऽसंप्रतिशब्दार्थइत्याद्यूह्यम् ॥ ननुसूत्रविहितसमासस्तूत्तरप-
दार्थप्रधानएव एतत्तदोरित्यत्रानञ्समासग्रहणाज्ज्ञापकात् । असतिबाधकेप्रमाणानांसा-
मान्येपक्षपातौचित्यात्तेनानेषोददात्यसः शिवइत्यादौचस्वाद्यादिरूपंतत् ॥ बोधस्तुति-
रोहितैतत्त्ववानित्यादिः । एषकिंपचोनददातितिरोहितकैर्पच्यस्तुददातीत्यादिबोधेबाधका-
भावात् ॥ अनेकमन्यपदार्थइत्यत्रानेकंतिरोहितमेकमित्यर्थः ॥ एकत्वतिरोभाववदितिन-
ञर्थविशेष्यकोबोधस्तुपाश्चात्योमानसः ॥ उत्तरपदार्थप्राधान्यादेकवचनम् ॥ द्वयोर्बहुषुच
तिरोहितैकरूपत्वमस्त्येव ॥ द्वयोर्निर्देशेबहूनांबहुनिर्देशेद्वयोश्चसमासाभावापत्तेरनुगतेन-
तिरोहितैकत्वेनरूपेणनिर्देशः ॥ एतेन "अनेकस्मिष्ठति" सर्वनामकार्यम् । असर्वस्मा इत्यादौ
इति नञ्सूत्रेभाष्येप्रयोग' "सेव्यतेनेकयासन्नतापांगये"त्यादयोमाघादिप्रयोगाश्चस-
माहिताः ॥ क्वचिदनेकेतिष्ठतीतिपाठः ॥ पतंत्यनेकेजलधेरिवोर्मयइत्यादौत्वेकशेषाद्बहुत्वं ॥
अथवाऽनेकशब्देनास्त्येक.संख्याविशेषोऽत्रेतिबहुव्रीहिः ॥ तिरोहितकसंख्याकमित्यर्थ. ॥
तेनानेकमनेकयेत्यादावेकवचनंसुवितियोषयेत्यादिविशेष्यानुरोधहेतुकं कश्चिज्जात्यभिप्राय-
मौत्सर्गिकंवा ॥ अनेक स्तिष्ठतीत्यादौजनइत्यादिःशेषः ॥ अनेकोजनाइतिमंजूषाद्दत्तरनसाध्वेव
भाति ॥ अनेकेइत्यादौतुसंख्येयवाच्येकशब्दैकशेषस्ततोनञ् अतोनसर्वनामकार्यानुप-
पत्तिः ॥ मतिव्यक्तिस्थितापेक्षसंख्यायथानानुभूयतेतथासमुद्रतरंगततिवत्पतंतीत्यति-

प्राहुर्त्यंबोधयितुंतथाप्रयोगः ॥ एवंचनञ्सूत्रविहितसमासेतूत्तरपदार्थस्यैवप्राधान्यंस्वी-
क्रियतइतिनभाष्यविरोधः ॥ अस्मिन्समासेनञ्द्योतकएव भाष्यानुरोधात् ॥ समासां-
तरेत्वनियम. ॥ इत्थंचात्रपक्षेमत. अघट पटइत्यादौतिरोहितवर्णोऽभिन्नस्तिरोहितघटभिन्न
इत्यादिर्बोधः । वर्णांतरतिरोभाववानित्यादिस्त्वार्थोमानसोबोधः ॥ अघटभूतलमित्यादौ
तिरोहितघटकमित्यादि स. । घटतिरोभाववदितितुफलितं । शब्दमहिम्नाऽऽरोपस्यतथा-
प्रतीतेरारोपितघटकमित्यादिस्तुनार्थः ॥ केनचिद्रूमात्तत्रघटादावारोपितेतन्निषेधार्थमेव
तथाकथनव्यवहारात् । एवमघट.पटइत्यादावप्यूह्यम् ॥ व्यासस्थलेतुनञर्थस्यविशेष्यता
विशेषणतावायथासमंबंद्रष्टव्यातेनभूतलेनघटइत्यादौतात्पर्यविशेषरूपकारणवशाद्यथायथं-
सबंधविशेषावच्छिन्नघटनिरूपिताधिकरणतातिरोभावइतिवा । संबंधविशेषावच्छिन्नभूतल-
निरूपिताधेयतातिरोभाववान्घटइतिवाबोधः ॥ पटो नघटइत्यादौचतिरोहितघटाभिन्न-
इत्यादिरेवशाब्दः । घटत्वतिरोभाववानित्यादिस्तुपाश्चात्यः । तेनघटादिपदात्प्रथमायानानु-
पपत्तिः चैत्रस्यनधनमित्यादौ चैत्रस्वत्वतिरोभाववद्धनमित्यादिर्घटोनास्तित्वंनपचसीत्यादौ
घटकर्तृकसत्तातिरोहितात्वत्कर्तृकपचनक्रियातिरोहितेत्यादिश्चयथायथंबोधः । तादृशस्थले-
नञ क्रिययाऽन्वयात् ॥ येषामभाववादस्तेषामप्यत्यंताभावान्योन्याभावावेवनञर्थौनत्व-
परौ ॥ तेनाभावत्वनशक्यतावच्छेदकं किंतूक्तान्यतरत्वमितिगौरवं । मन्मतेतुतिरोभावत्व-
मेवतदितिलाघवं ॥ तत्रासमस्तस्थलेयत्रतादात्म्येतरसबंधतिरोभावस्तत्रात्यन्ताभावइति
यत्रचतादात्म्यतिरोभावस्तत्रान्योन्याभावइतितेषांप्रत्ययइतिविवेकः । सबंधतिरोधाने
चकचित्तत्प्रतियोगिनोऽपितिरोभाव.फलति । घटोनासीत्यत्रघटसत्तातिरोभावबोधेतत्सम-
नियततयाघटतिरोभावबोधस्यार्थिकत्वात् ॥ अत्रासमस्तस्थलेऽत्यंताभावरूप सत्तिङत-
धात्वर्थक्रियायामेवान्वेति नतु तिङर्थकर्तृत्वादौ ॥ अतएव "असमस्तनञर्थात्यंताभाव-
विशेष्यकबोधेतिङ्समभिव्याहृतधातुजन्योपस्थितेर्हेतुत्वम्" इतिमंजूषायांस्थित ॥ अत
एवचत्वंनासिघटोनस्तइत्यादौपुरुषवचननियम । त्वत्तिरोभावोस्तीत्यादिबोधेसनस्यात् ।
तस्माद्धात्वर्थसत्तायाएवतत्रतिरोभाव.तेनतिरोहितसत्ताश्रयस्त्वं तिरोहितात्वत्कर्तृकासत्ते-
तिवाएवमादिर्यथायथं बोध घटोनास्तीत्यादौतात्पर्यरूपकारणविशेषवशात्कदाचिद्भूतले
तिरोहिताघटसत्तेतिकदाचिद्घटेभूतलाधिकरणकसत्तातिरोहितेतिचबोधइत्याद्यूह्यम् । भूत-
लवृत्तिर्घटाभावइत्याद्यभीकारेत्वधिकरणकारकंदुर्घटं । कर्तृकर्मान्यतरद्वाराक्रियान्वयेतस्य-
साधुतयाऽभावेतस्यान्वयदौर्लभ्यादितिदिक् ॥ तस्मात्तिङंतसमभिव्याहृतनञोत्यंताभाव-
तयाप्रसिद्धतिरोभावएवार्थः । अयमेवप्रसज्यप्रतिषेधइतिव्यपदिश्यते ॥ प्रसज्यविधायविहि-
तस्यप्रतिषेधइतितदर्थः ॥ नञ्सूत्रेभाष्येतुप्रसज्यक्रियागुणोतत पश्चान्निवृत्तिंकरोतीत्युक्तं ।
तेनगुणाभावबोधेपिप्रसज्यप्रतिषेधइतिलभ्यतेइत्यन्यत्रविस्तर. ॥ तेनप्रसज्यप्रतिषेधोसौ-
क्रिययासहयत्रनञिस्यत्रक्रियाशब्दगुणस्याप्युपलक्षकंचद्रंति ॥ घट पटोनेत्यादौत्वन्योन्या-
भावतयाप्रसिद्धस्तिरोभावोनञोर्थः ॥ तिरोहितपटाभिन्नोघटइत्यादिस्तत्रबोध. ॥ स्वसम-
भिव्याहृतपदार्थतिरोहितत्वद्योतकत्वमत्रनञ् ॥ एवचनब्राह्मणैरेतैरभुक्तमित्यादौतिरोहित-
ब्राह्मणाभिन्नैरित्यर्थात्समानविभक्तिकत्वम् ॥ यावत्प्रभेदोनञर्थस्यप्रतियोगितासंबंधेन

पदस्यान्यपदस्यादिमतं ॥ तत्रभेदाश्रयभेदप्रतियोगिनोःसमानविभक्तिकत्वमसंभवि ॥ एवंभेदवाचकनञर्थइतिमतेपिबोध्यम् ॥ घटाभिन्नःपटइतियद्वाक्यपटइतिप्रयोगाऽऽपत्त्यादिकमपितत्रोह्यम् ॥ तिरोहितपटाभिन्नइत्यादिबोधादेवसमासवाक्ययोस्तुल्यार्थकत्वमुपपन्नम् ॥ अब्राह्मणोयमपटोघटइत्यादौतथैवबोधात् । येननाप्रासइत्यादौनञ्द्वयस्यप्रकृतार्थदार्ढ्यद्योतकत्वंरित्यर्थम् । तिरोभावस्यतिरोभावआविर्भावत्वरूपएवसचप्रासादिपदमात्रोपायापिलभ्यस्तथापिनाप्रासइत्यादिकथनंव्यर्थंगौरवमापद्यमानंसत् तद्दार्ढ्यपर्यवस्यति ॥ एतदेवाभिप्रेत्य (अ० ५ पा० २ सू० २७) "विनञ्भ्या" मितिसूत्रभाष्ये "द्वौप्रतिषेधौप्रकृतमर्थंगमयतः" इत्युक्तम् ॥ (स्कं० २ अ० २ श्लो० ५) चीराणिकिंपथिनसंतिदिशंतिभिक्षांनैवांघ्रिपाइत्यादौतुकाकुसहकारात्प्रकृतार्थदार्ढ्यबोधः । काको.स्वाधिकरणशब्दार्थगततिरोभावद्योतकतयातत्रापिनञ्द्वयप्रयोगतौल्यात् ॥ क्वाचास्तथात्वादेवस्त्वागुहाइत्यत्रनरद्धा इत्यर्थबोधः एवमन्यदपितत्रतत्रस्वयमूह्यम् । यच्चारोपंनञर्थंसाधयितु "प्रतियोग्यारोपस्यान्वयव्यतिरेकाभ्यांस्पष्टमेवाभावज्ञानेकारणतोक्ता । एतदेवाभिप्रेत्यारोपितरजतत्वायामेवशुक्तौनेदंरजतमितिप्रतीतिरितिलीलावत्युपायेउक्त" मितिवदंति तन्न ॥ रजतारोपाभावेनेदमित्यप्रयोगेणारोपापगमोत्तरमेवतथाप्रयोगेणचप्रत्युतारोपस्याऽनञर्थतायास्ततःसिद्धेः ॥ किंचतन्मते "असदेहइत्यादौचारोपित सदेहइतिबोधः भेदसंबंधेनारोपितत्वज्ञानाचतदसंताभावप्रतीति" रितिक्लेश.॥ ममतुतिरोहित सदेहइतिबोध.। सदेहइतिरोभावइत्यार्थम् ॥ एवंपटोनघटइत्यादिव्यस्तस्थलेपितेषामेवक्लेश. ॥ स्वीकृतश्चसमंजूषायाम् ॥ "घटभेदबोधस्तार्थः । तत्समनियतत्वात ॥ घटत्वाभावबोधोपितत्रार्थ." इति ॥ ममतूक्तदिशानक्लेशलेशोपि ॥ तस्मात्तिरोभावस्यैवनञ्शब्दप्रयोगकारणत्वाद्घोद्धुरपितदातिरोभावविषयस्यैवप्रतीतेस्तिरोहितत्वमेवनञर्थइतियुक्तम् इत्थंचयत्रवादात्म्यतिरोभावस्तत्रतिरोहितत्वनामार्थगतं । यत्रससर्गतिरोभावस्तत्रक्रियागुणगतंतदितिव्यवस्था ॥ युक्तंचैतत् ॥ अन्यथा "नकलंजंभक्षये" दित्यादिनोपपद्येत । यदि कलंजभक्षणाभावः प्रेरणाविषयइतिबोधः स्वीक्रियेततदाप्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तिर्भज्येत । तस्माद्व्यानांतत्रारोपितंकलंजभक्षणमिववस्तुतस्तिरोहितंकलंजभक्षणप्रेरणाविषयइतिबोधः ॥ मीमांसकरीत्याविचारेतुतिङर्थक्रियायामेवव्यस्तस्थलेनञोऽन्वयइत्ययंननियमः । तेनरागप्राप्तंभक्षणमनूद्यतत्प्रतिषेधोविधीयते । प्रतिषेधश्चतिरोभाव ॥ एवंच "नकलंजंभक्षयेन्नलशुनंनगृंजन" मित्यनारभ्याधीतवाक्ये तत्तद्भक्षणतिरोभावोविधीयतइतिपूर्वतंत्रेपष्ठस्यद्वितीयेपादे (सू० १९) "प्रतिषेधेष्वकर्मत्वा" दित्यादिद्विसूत्रेपंचमाधिकरणेपूर्वसूत्रेणाभक्षणविधानपूर्वपक्षीकृत्य (सूत्र २०) "शास्त्राणांत्वर्थवत्त्वेन" त्यादिद्वितीयसूत्रेसिद्धांतितम् ॥ एवसति तिरोहिताभावनेतिवात्रबोधोस्तु । तथापिनञस्तिरोभावार्थकत्वमक्षतं । तिरोभावार्थकत्वेसत्येवलोकेनञ्प्रयोग. सूपपाद. । तत्समभिव्याहृतपदार्थस्यासत्वेनप्रतिषेधस्यनिर्विषयत्वानापातात् । तिरोभावबोधनायनञ्प्रयोगस्य सार्थक्याच्च ॥ मतांतरेतुसदुरुपपाद. सत्सु अभावस्यारोपितत्वस्यचासंभवात् । असत्सुनञ्प्रवृत्तौतदर्थस्य निर्विषयत्वापाताच्च ॥ अतएवोक्तमभियुक्तैः—सताचननिषेधोस्तिसोसत्सुचनविद्यते ।

जगत्यनेनन्यायेन नञर्थः प्रत्ययंगतः ॥ इति अतएव काणादसूत्रेपिनवमाध्याये (आ० १ सू० १०) "नास्तिघटोगेहइतिसतोघटस्य गेहसंसर्गप्रतिषेध" इतिसूत्रेसतएवसंसर्गप्रतिषेधउक्तः ॥ अग्रेच (सू० १२) "तथाद्रव्यांतरेषुप्रत्यक्षम्" इत्यादिसूत्रचतुष्टयेन युक्तानां युंजानानां चयोगिनांसार्वज्ञ्यसिद्धये क्रमेणध्याननिरपेक्षंतत्सापेक्षंचातीतानागतादिसर्वद्रव्यप्रत्यक्षंसर्वगुणप्रत्यक्षंचासंदिग्धमेवदर्शितमतस्तत्राह्निकेप्रागुक्तंकार्याणामसत्त्वं केवललौकिकदृष्ट्यैवेतिबलादापतत्यतस्तत्रापितिरोभावएवनञर्थः स्वतः फलति ॥ नचवर्तमानमात्रद्रव्यादिगतंतेषांतदितिवाच्यम् ॥ सार्वज्ञ्यभंगप्रसंगात् । लोकाप्रसिद्धचिरंतनातीतवृत्तांतकथनस्यभाविवृत्तांतकथनस्यचयथार्थस्य तत्कर्तृकस्यानुपपादापाताच्च ॥ वैयासदर्शनानुगानामौपनिषदानामस्माकं कथंचित्तद्विरोधोप्यकिंचित्करएव ॥ तिरोभावस्यैवननर्थतामभिप्रेत्य हरिणाप्युक्तं–तिरोभावाभ्युपगमेभावानांसैवनास्तिता लब्धक्रमेतिरोभावेनश्यतीतिप्रतीयतइति भूषणकृताऽपिसुबर्थनिर्णयेऽतीतानागतकर्मणां धात्वर्थफलाश्रयत्वंसत्कार्यवादात्साधयितुमिदमुदाहारि ॥ सत्कार्यवादश्चवाक्यपदीयेऽनेकत्रस्फुटः सिध्यति ॥ एतेनापिनञ्सूत्रभाष्येनिवृत्तिपदं प्रागुक्तार्थकं नत्वभावार्थकमारोपार्थकंवेतिसिद्धम् ॥ तत्सादृश्यमभावश्चतदन्यत्वंतदल्पता अप्राशस्त्यंविरोधश्चनञर्थाः षट्प्रकीर्तिताइत्यभियुक्तोक्तौ तुव्युत्पादनार्थस्तिरोभावस्यैवप्रपंचः । तथाहि अत्यंताभावोभेदश्चतिरोभावएवेत्युक्तंप्राक् तद्वत्सभूयोधर्माविर्भावेसति तादात्म्यतिरोभावः सादृश्यम् ॥ घटरासभयोः सादृश्याव्यवहारात्सत्यंतम् । घटोघटइवेत्यव्यवहाराद्भिदोप्यदलं ॥ नञ्समभिव्याहृतपदार्थगतबाहुल्यरूपैकदेशतिरोभावोऽल्पत्वम् । वद्धतोत्कर्षरूपैकदेशतिरोभावोऽप्राशस्त्यम् ॥ एकदेशानिवृत्तावपिनञ्प्रयोगोनञ्सूत्रेभाष्ये "अब्राह्मणोऽयं यस्तिष्ठन्मूत्रयति अब्राह्मणोयं यस्तिष्ठन्भक्षयति" इत्यादिनास्पष्टएवनिर्दिष्टः ॥ नियततद्वृत्तिताकधर्माविर्भावसमानाधिकरणतादात्म्यतिरोभावोविरोधइतिसंक्षेपः ॥ एतेनसादृश्यादीनांषण्णामार्थिकार्थत्वमेवेतिवदंतोमंजूषादयः प्रत्युक्ताः ॥ तथाचसामान्यविशेषभावाद्भेदः सादृश्यंविरोधइतित्रिधान्योन्याभावरूपः अत्यंताभावोल्पत्वमप्राशस्त्यंचेतित्रिधात्यंताभावरूपश्चतिरोभावएवनञर्थइतिरमणीयम् ॥ यद्यप्यत्रनञर्थविषयेबहुतरंवक्तव्यंशक्यरचनंच तथाप्यत्यंतविस्तरभियाविरम्यते ॥ प्रसक्तानुप्रसक्तयाचेहकिंचिद्गौरवंसंपन्नमेव । तथापिसिद्धांतग्रंथेषुवैशद्येननञर्थनिर्णयलक्षणाप्यनुपलंभात्तन्निर्णयार्थमत्रकृतंतद्गुणैकलुब्धैः सुधीभिः क्षंस्यते ॥ एवंचस्वान्वयितावच्छेदकेत्यादिकथनस्यद्यावसरः ॥ यदितुतत्राभावपदंतिरोभावविशेषपरमूरीक्रियेततदायन्नतादृशव्युत्पत्तिसंगतिमत्रसासंगच्छतां नाम नतन्नः कोपिविद्वेषः ॥ तथाचास्थूलादिवाक्येषु लाघवात्पर्युदासादेरकार्यदशायां प्रतीयमानस्थौल्याद्येकैकधर्मककार्यप्रतियोगिकोभेदोग्रहणिसर्वधर्माश्रयेकारणत्वनिर्गोहायास्तांनाम ॥ अचक्षुष्कमित्यादिप्रायपाठादहुमीत्वादरेतु बीजेतरुगतच्छायामौरभादीनामिवरायंधर्माणांस्थौल्यादीनांसर्वकारणेप्रह्मणितिरोभावः सिध्यतीति प्राकृतप्रपंचवैलक्षण्यमेवतादृशवाक्येषुतस्यबोध्यते नतुनिर्विशेषत्वं । पाषाणादौगंधादितिरोभावेपिनिर्गंधतायाम्नप्राशस्त्यवचनत्वादितिदिक् ॥ एवंसतितत्सामान्यनिषेधपरत्वेपिनत्वुपसंहारोप्ययुक्तः ॥ प्रदर्शितन्यायस्यात्रापिसिद्धत्वात् ।

यद्यपितत्रविशेषेविहितिरित्याद्युक्तंतत्रोच्यते ॥ यत्रविशेषविषयकंविधानमस्तितत्रवचन-
बलात्तस्योविशेषेसंकोच्यतातद्बलादेवन्यायविरोधरूपक्लेशसहनंचतत्स्वकल्पनायामेवापतति ॥
अस्माकंतन्यायविषयाभावादेवसक्लेशः श्रुतिस्थस्नजइतिनलेखेषष्ठीस्थानेप्रथमापाठ्या ।
अन्यथा संकोचइत्यप्रसक्तपदाध्याहारक्लेशापत्तिः ॥ यदप्यत्रनहिंस्यादित्याद्युदाहृत्यसर्व-
शब्दस्यविशेषेलक्षणेत्युक्तंतदपिनयुक्तम् ॥ उक्तरीत्यान्यायविरोधस्याभावेनसर्वशब्देल-
क्षणायाःप्रयोजनाभावात् ॥ नचैनमग्नीषोमीयपश्वाद्यालंभस्यापिपापजनकत्वापत्तिरिति-
वाच्यं ॥ सांख्यादिदर्शनरीत्येष्टापत्तेः यथोक्तंसांख्यकौमुद्यांवाचस्पतिमिश्रैः (आर्या
२) "दृष्टवदानुश्रविकः सह्यविशुद्धिक्षयातिशययुक्त" इत्यार्याव्याख्यायां ॥ "अवि-
शुद्धिर्हियागस्यपशुबीजादिवधसाधनता ॥ यथाहस्मात्रभवान्पंचशिखाचार्यः ॥ स्वल्पः-
संकरसपरिहारःसप्रत्यवमर्शइति ॥ स्वल्पःसंकरोज्योतिष्टोमादिजन्मनः प्रधानापूर्वस्य-
पशुहिंसादिजन्मनानर्थहेतुनाऽपूर्वेणसपरिहारः कियताऽपिप्रायश्चित्तेन परिहर्तुंशक्यः ॥
अथप्रमादतः प्रायश्चित्तमपिनाचरितंप्रधानकर्मविपाकसमयेचपच्यतेतथापियावदसाव-
नर्थंप्रसूतेतावत्सप्रत्यवमर्शः ॥ मृष्यंतेहिपुण्यसंभारोपनीतसुखसुधामहाह्रदावगाहिनः-
कुशलाःपापमात्रोपपादितांदुःखवह्निकणिकां ॥ नच "नहिंस्यात्सर्वाभूतानी"ति सामान्य-
शास्त्रविशेषशास्त्रेण "अग्नीषोमीयंपशुमालभते" त्यनेनबाध्यतइतियुक्तम् ॥ विरोधा-
भावात् । विरोधेहिबलीयसादुर्बलंबाध्यते ॥ नचकश्चिदस्तिविरोधोभिन्नविषयत्वात् ॥
नहिंस्यादितिनिषेधेनहिंसायाअनर्थहेतुभावोज्ञाप्यतेक्रत्वर्थत्वमपि ॥ नचानर्थहेतुत्वक्रतूप-
कारकत्वयोःकश्चिद्विरोधः ॥ हिंसाहिपुरुषदोषमारक्ष्यतिक्रतोश्चोपकरिष्यती"ति ॥
प्राचीनबर्हिःप्रभृत्युपाख्यानेष्वपिपुराणेष्वित्थं प्रतीयते। अथमीमांसकरीत्योच्यतेचेत्तत्रापि-
तत्तदपूर्वयोर्विरोधाभावेऽपिसामान्यशास्त्रविशेषशास्त्रेणबाध्यतइतिशास्त्रमर्यादया हिंसा-
दिस्यनेनवैधेतरहिंसायाएवनिषेधः ॥ (अ० ५ श्लो० ३२) देवान्पितृंश्चार्चयित्वाखादन्मां-
सनदुष्यति । नाद्यादविधिनामांसविधिज्ञोनापदिद्विजः ॥ जग्ध्वाह्यविधिनामांसप्रेत्यतैर-
द्यतेऽवशः । नतादृशंभवत्येनोमृगहंतुर्धनार्थिनः ॥ यादृशंभवतिप्रेत्यवृथामांसानिखादतः ।
नियुक्तस्तुयथान्यायंयोमांसनात्तिमानवः ॥ सप्रेत्यपशुतांयातिसंभवानेकविंशतिम् ।
असंस्कृतान्पशून्मंत्रैर्नाद्याद्विप्रः कदाचन ॥ मंत्रैस्तुसंस्कृतानद्याच्छाश्वतंविधिमास्थितः ।
कुर्याद्घृतपशुंसंगेकुर्यात्पिष्टपशुंतथा । नत्वेवतुवृथाहंतुंपशुमिच्छेत्कदाचन ॥ यावंति-
पशुरोमाणितावत्कृत्वोहमारणम् । वृथापशुघ्नःप्राप्नोतिप्रेत्यजन्मनिजन्मनि ॥ यज्ञार्थं-
पशवःसृष्टाःस्वयमेवस्वयंभुवा । यज्ञस्यभूत्यैसर्वस्यतस्माद्यज्ञेवधोऽवधः ॥ ओषध्य पशवो-
वृक्षास्तिर्यंच्च पक्षिणस्तथा । यज्ञार्थंनिधनंप्राप्ताः प्राप्नुवंत्युत्सृतीः ॥ पुनः उत्सृतीःउत्कृष्ट-
जन्मानिमधुपर्केचयज्ञे चपितृदैवतकर्मणि । अत्रैवपशवोहिंस्यानान्यत्रेत्यब्रवीन्मनुः ।
एष्वर्थेषुपशून्हिंसन्वेदतत्त्वार्थविद्द्विजः । आत्मानंचपशुंचैवगमयत्युत्तमांगतिम् । गृहे-
गुरावरण्येवानिवसन्नात्मवान्द्विजः । नावेदविहितांहिंसामापद्यपिसमाचरेत् यावेदविहिता-
हिंसानियतास्मिंश्चराचरे । अहिंसामेवतांविद्याद्वेदाद्धर्मोहिनिर्बभावित्यादिभिर्वचनैः सर्व-
वेदतात्पर्यंप्रकटयद्भिर्मन्वादिभिर्वैधहिंसायांपापजनकत्वाभावस्यबोधनाच्च ॥ एवंचसर्वा-

भूतानीतिसर्वपदेनभूतपदेनच यागीयपश्वितरजीवानांग्रहणमित्यर्थोत्सिद्धम् नतुसर्वशब्दस्यविशेषेलक्षणा ॥ अपवादविषयपरिहारेणोत्सर्गविधिवाक्यार्थज्ञानेजायमानेऽन्वयानुपपत्तितात्पर्यानुपपत्त्यादिलक्षणाबीजाभावेनतस्याअत्रासंभवात् ॥ वृत्तिसंकोचेतुलक्षणाध्याभावात् ॥ सर्वान्भोजयघटानानयेत्यादौविवक्षितानांकेषांचिदेवभोजनआनयनेसत्यपि तत्रसर्वघटादिपदेपुलाक्षणिकत्वस्यास्वीकाराच्च ॥ नचनिषेधस्यविधिरूपताशास्त्रकारैरस्वीकृतेतिवाच्यम् ॥ निषेधस्यापूर्वविधित्वस्य नियमविधिरूपस्य चापिशास्त्रकारैरंगीकारात् ॥ तथाच विधिरसायनेपरिसंख्यालक्षणकथनावसरेऽप्पैयादीक्षितैरुक्तम् "ननुतत्रचान्यत्रचप्राप्तइत्यत्रैकरूपसंबंधेनप्राप्तिर्विवक्षिता ॥ अस्तिचप्रागुदाहृतेषुसर्वेषु परिसंख्योदाहरणेषुशेषत्वेनशेषित्वेनाश्रयत्वेननिमित्तत्वेनवायेनकेनचिदेकरूपेणैव संबंधेनोभयोःप्राप्तिः ॥ तथाच दीक्षितोनजुहोतीत्यत्रापूर्वविधौनातिव्याप्तिः ॥ दीक्षामध्येक्रत्वर्थहोमानांक्रतुशेषत्वेनप्राप्तिः ॥ पुरुषार्थहोमानांकालैक्येनेतिसंबंधभेदात् ॥ नतौपशौकरोतिनातिरात्रइतिनिषेधयोरुक्तलक्षणानुसारेणपरिसंख्यात्वमेवास्तु ॥ नचैवमपि "नहिंस्या" दितिनियमविधावतिव्याप्तिः ॥ पुरुषंप्रतिदोषत्वेनैवभोजादीनांहिंसादीनांचप्राप्तिसत्वादितिवाच्यम्॥ अत्यंताप्राप्तिनिवृत्तिफलकत्वस्यलक्षणेविवक्षितत्वादितिचेन्नैवम् ॥ दृष्टार्थानांकंडूयनादीनामदृष्टार्थानांचहरिस्मरणादीनांपुरुषार्थहोमैः सहकृतौकालैक्यसंबंधेन प्राप्तिसत्वेन "दीक्षितोनजुहोती"त्यपूर्वविधावुक्तविवक्षयाऽप्यतिव्याप्त्यनिरासात् ॥ निवृत्तात्यंताप्राप्तत्वविशेषणविवक्षायांशशादिपंचकव्यतिरिक्तपंचनखभक्षणा निवृत्तेरत्यंताप्राप्तत्वाभावेनपंचपंचनखाभक्ष्याइतिपरिसंख्यायामव्याप्तिप्रसक्त्यातस्य विशेषणस्याविवक्षणीयतया "नहिंस्या" दितिनियमविध्यतिव्याप्त्यनिरासाच्चे"ति ॥ एवंच नहिंस्यादित्यस्य नियमविधित्वंस्पष्टमेवोक्तं ॥ बलवदनिष्टाननुबंधित्वविशिष्टेष्टसाधनत्वज्ञानंकृतिसाध्यत्वज्ञानंचलिङर्थइतितार्किकादिमतेऽपिनत्वदिष्टसिद्धिः ॥ तैर्हिविधिविचारादिग्रंथेषु—"नकलंजंभक्षये" दित्यादौ "कृतिसाध्यत्वान्वितकलंजभक्षणेबलवदनिष्टाननुबंधित्वविशिष्टेष्टसाधनत्वाभावान्वये नकश्चिद्विरोधः ॥ कृतिसाध्यत्वस्यानिष्टजनकतावच्छेदकाघटकत्वेऽपि तद्विशिष्टविशिष्टाभावबोधात् ॥ यदिच विशेषणाभावस्यानुयोगितावच्छेदकमेवान्यत्तदेव तत्प्रयुक्तविशिष्टाभावस्यानुयोगितावच्छेदकम् ॥ एवंच बलवदनिष्टजनकत्वरूपविशेषणाभावस्यकृतिसाध्यत्वघटितधर्मोनानुयोगितावच्छेदकः ॥ जनकताया अवच्छेदकस्यैवतदनुयोगिताया अप्यवच्छेदकत्वादिति तादृशधर्मतद्विशिष्टाभावयोरेकत्र द्वयमितिरीत्यैवकलंजभक्षणेऽन्वयबोधः ॥ अत्रच नकाचिदनुपपत्तिः ॥ एवंबलवदनिष्टाननुबंधित्वविशिष्टेष्टसाधनत्वेविधिशक्त्युपगमे इष्टसाधनत्वविशिष्टस्यबलवदनिष्टाननुबंधित्वस्याशक्यत्वमादायविनिगमनाविरहस्यदुरपह्नवतयापृथगेवतयोः शक्तिरितिमतेऽपिबलवदनिष्टाननुबंधित्वाभावस्यतादृशानिष्टजनकत्वस्वरूपस्यकृतिसाध्यत्वेष्टसाधनत्वोभयविशिष्टेतदेवसरविशिष्टेवाकलंजभक्षणेनान्वयोयेन तादृशधर्मयोः प्रत्यवायजनकतावच्छेदकत्वस्यनिविष्टत्वपात्रायआपाद्येत ॥ किंतु एवमद्वयमितिरीत्यैवतदन्वयउपेयते ॥ विशिष्टानुयोगिकवैशिष्ट्यबोधतात्पर्यस्यौत्सर्गिकत्वेऽपि अत्रागत्यातत्परित्यागात् ॥ "वाजपेयेनयजेते-"

स्यादौ प्रकारांतरसंभवात्तथाजपेयसाध्यत्वेष्टसाधनत्वयोः केवलमेकत्रद्वयमितितिरीत्यायागेऽन्वयबोधःस्वीक्रियते ॥ माभूद्वाकृतिसाध्यत्वस्यतन्मतेधात्वर्थेऽन्वयस्तथापितत्रान्वितधात्वर्थेभक्षणस्याख्यातसामान्यार्थकृतौविशेषणतयाबाधदशब्दुत्पत्तेरपरित्यागइतिचेत् प्रत्ययानांसाक्षात्प्रकृत्यर्थान्वितस्वार्थबोधकत्वनियमस्यप्रामाणिकत्वेममापिकृतिसाध्यत्वाविषयकः कलंजभक्षणाभावइष्टसाधनमित्याकारकएवबोधउपगंतव्यः ॥ एवंचबलवदनिष्टासाधनतयाविध्यर्थत्वेयागपाकादिजन्यनांतरीयकश्रमस्यापिकदाचित्कस्यचिद्बलवद्द्वेषविषयत्वयाबलवद्द्वेषविषयदुःखजनकत्वस्ययागपाकादौबाधात् यजेतपचेतेत्यादौविधेरप्रामाण्यप्रसंगः ॥ यदायस्यपाकादिगोचरप्रवृत्तिर्जायतेतदातत्कालीनतत्पुरुषीयबलवद्द्वेषविषयासाधनत्वस्यनविध्यर्थतासंभवः; अननुगमात् । यदाकलंजभक्षणादौयः पुमान् रागौत्कंठ्येन प्रवर्ततेतदाकलंजभक्षणादेरपितत्कालीनतत्पुरुषीयबलवद्द्वेषविषय दुःखासाधनत्वात्तदभावबोधकस्य "नकलंजंभक्षयेत्" दितिनिषेधविधेरप्रमाण्यप्रसंगाद्वेत्यनुपपत्तिरपिसमाहिता ॥ बलवदनिष्टाननुबंधित्वस्यविध्यर्थतायाएवानुपगमात् ॥ अस्तुवापापाजनकत्वंविध्यर्थस्तदभावएवनिषेधस्थलेननाबोध्यते ॥ तथाच "नकलंजंभक्षयेत्"दित्यादौपापाजनकत्वाभाववत्कलंजभक्षणकृतिमान्द्विजइत्यन्वयबोधः प्रथमांतपदार्थविशेष्यकः ॥ एतेन बलवदनिष्टाननुबंधित्वस्यविध्यर्थत्वानुपगमे "अग्नीषोमीयंपशुमालभेत" त्यादौविध्यर्थबाधभयेन "नहिंस्यात्सर्वाभूतानी"त्यादिनिषेधविधेर्वैधहिंसेतरहिंसापरत्वं कल्प्यतइतिसिद्धांतविरोधः ॥ वैधहिंसायानरकाजनकत्वेऽपि अग्नीषोमदेवताकपश्वालंभनादौविध्यर्थस्यकृतिसाध्यत्वस्येष्टसाधनत्वस्यबाधादित्यपिसमाहितम् ॥ पापाजनकत्वरूपविध्यर्थभयेनतादृशनिषेधविधौसंकोचस्यावश्यकत्वात् ॥ श्येनयागादेः पापसाधनत्वेऽपि "श्येनेनाभिचरन् यजेत" त्यादौपापासाधनत्वरूपेऽर्थेतात्पर्यानभ्युपगमान्नबाधः ॥ लौकिकविध्यविषयत्वथाविधकृतिसाध्यत्वेष्टसाधनत्वयोरेवान्वयाभ्युपगमात् ॥ विशेष्यविशेषणभावेविनिगमनाविरहेणकृतिसाध्यत्वेष्टसाधनत्वपापाजनकत्वेषुशक्तित्रयकल्पने यत्रयदन्वययोग्यतातत्रेतरांशंपरित्यज्यतस्यैवान्वयोपगमेबाधकाभावात् ॥ नच यागीयपशुघातवच्छ्येनादेरपिवैध हिंसात्वेन "नहिंस्या" दित्यादिनिषेधविध्यविषयतयापापसाधनताविरहेणपापासाधनत्वरूपविध्यर्थोऽपितत्राबाधितइतिकथंश्येनविधौतदन्वयोनोपेयत इति वाच्यं; श्येनस्यवैधहिंसात्वेनतादृशनिषेधविध्यविषयत्वेऽप्यभिचारतयादुरदृष्टजनकत्वस्यसर्वसंमतत्वादुपपातकगणनेऽभिचारोहीनकर्मचेतिमनुनापरिगणितत्वात् ॥ सर्वेषामभिचाराणांवैधत्वेन "न हिंस्या" दित्यत्रवैधेतरहिंसापरत्ववदत्रवैधेतराभिचारपरत्वासंभवात् ॥ अतएव मरणोद्देशेनकृतोऽदृष्टद्वारकमरणानुकूलव्यापारोहिंसेतिहिंसालक्षणस्यदुरदृष्टद्वारा मरणसाधनीभूतश्येनादिष्वायुक्ततयानतस्यपापसाधनता अपितु तज्जन्यमरणानुकूलव्यापारांतरस्येतिनिरस्तं अतएव श्येनजन्यपापेबलवद्द्वेषादपेक्षितवैरिवधसाधनत्वेऽपिन तत्रशिष्टानांप्रवृत्तिः ॥ यत्तुश्येनाद्यधोवधाच्चपापमितिपापप्रयोजकताज्ञानान्नतत्रप्रवृत्तिरिति तदसत्; तथासति पापाप्रयोजकत्वस्यैवविध्यर्थतायावाच्यतयाविध्यर्थबाधस्यावश्यकत्वात् ॥ अथायोग्यतयाश्येनेपापाजनकत्वान्वयानुपगमे "अग्नीषोमीयंपशुमालभेत" त्यादावप्ययोग्यतयातदन्वया-

स्वीकारेणैवोपपत्तौ "नहिंस्या" दित्यादिनिषेधविधे संकोचकल्पनमयुक्तमितिचेन्न; पापाजनकत्वेवैदिकविधितात्पर्यस्यौत्सर्गिकत्वात् ॥ गत्यंतरविरहएवतत्परित्यागात् ॥ अत्रनिषेधसंकोचेनैवोपपत्तौतस्यापरित्यागात् ॥ नचमुख्यार्थेऽपितात्पर्यस्यौत्सर्गिकत्वेना "ग्नीषोमीयंपशुमालभेते" त्यादिविधे पापाजनकत्वपरतानुरोधेन "नहिंस्या" दित्यादौहिंसासामान्यरूपमुख्यार्थत्वंत्यज्यतेनहिंस्यादित्यादेस्ताद्दशार्थपरत्वानुरोधेनहिंसाविधेर्वापापाजनकत्वंपरित्यज्यतइत्यत्रविनिगमनाविरहइतिवाच्यम् ॥ वैधहिंसाजन्यानंतपापाकल्पनप्रयुक्तलाघवस्यैवनिषेधविधिसंकोचकल्पनेविनिगमकत्वात् ॥ आततायिहिंसायादुरदृष्टाजनकतयासंकोचस्यावश्यकत्वा "दित्यादिप्रतिपादितम् ॥ एवंचसामान्येनिषेधवाक्येऽपिविशेषविधिनासंकोचःशास्त्रकारैरंगीक्रियतइतिस्पष्टमेव । मंजूषायामपि "लिङस्तुविध्यादयोऽर्थाः ॥ तत्रविधि प्रेरणायथानिकृष्टस्यभृत्यादे प्रभुणास्वाभिलषितेप्रेरणं ॥ इयमेवाज्ञा ॥ अप्रवृत्तप्रयोज्यस्यतदभिलषितात्ज्ञातोपायप्रवर्त्तनोपदेश. ॥ "यथास्वर्गकामोयजेते" त्यादिरित्युक्त्वा "नकलंजंभक्षये" दित्यादावानिष्टसाधनत्वंविध्यर्थोऽत्रैवनञ्तात्पर्यग्राहकइतितन्न, चिकीर्षायेष्टसाधनत्वस्याप्यन्यथासिद्धे. ॥ अमुकफलसाधनमिदंकृतिसाध्यंभवत्वितीच्छायाएवचिकीर्षात्वात् ॥ एवहिप्रवृत्तौफलविषयतानियमस्याप्युपपत्तिः ॥ उपायेच्छयापितदन्यथासिद्धेश्च ॥ साचामुकसाधनंपाकोजायतामित्याकारैव ॥ इच्छाया.स्वजनकज्ञानप्रकारकत्वनियमात् ॥ नचद्वारेणद्वारिणोनान्यथासिद्धि ॥ यस्यद्वारिणोमानांतरेणतत्कारणतासिद्धायथायागपरश्वोस्तदन्यथाऽनुपपत्त्याचद्वारस्यापूर्वादे कल्पनंतद्विषयेतदभावेऽपि अन्यत्रतदभावेमानाभावात् ॥ येषामपिचिकीर्षाव्यापारेच्छैवव्यापारेकृतेरपिनिवेशात्कृतीच्छापिसातेषामपिव्यापारविषये इष्टसाधनत्वकृतिसाध्यत्वज्ञानोत्तरमेवसेतितेअन्यथासिद्धेएव ॥ किंचेदंतेइष्टसाधनकृतिसाध्यंचनाप्यत्रदु.खंतस्मात्वंकुर्वितिस्वारसिकलोकव्यवहारसत्त्वेनतस्यविध्यर्थंतावत्कुमशक्या, पौनरुक्त्यापत्तेः ॥ नचेदंपौनरुक्त्यंसर्वथेष्टसाधनत्वबोधनाय, तस्मादित्यस्यानन्वयापत्ते· ॥ अपिचराज्ञाप्रवर्तितोऽहमित्यादिव्यवहाराप्रवर्त्तनाप्रवर्तकपुरुषनिष्ठासालिङ्शक्येति सूत्रभाष्यादिसमतं ॥ नचेष्टसाधनत्वंतद्बोधोवानस्मिष्टस्तज्ज्ञापनस्यतस्मिएवेपिनतदिष्टसाधनत्वं ॥ नापितच्छस्यत्वेनतत्रसमतं ॥ तज्ज्ञानानुकूलव्यापारस्यमदुक्तातिरिक्तस्याभावाच्च ॥ किंचेष्टसाधनताज्ञानादिवसाध्येष्टकत्वज्ञानादपिप्रवृत्त्यनुभवेनविनिगमनाविरहादुभयोः शक्यत्वे गौरवं ॥ साधनत्वमित्योगक्षेमसाधारण साध्यत्वमप्यखंडमिति नतत्पक्षेऽपिकारणतावच्छेदकगौरवम् ॥ एवंकृतिसाध्यत्वज्ञानादिवमत्कृतिसाधनक पाकइतिज्ञानादपिचिकीर्षाप्रवृत्त्योर्दर्शनात्तच्छक्तावपिविनिगमनाविरह" इतिदिक् ॥ "नकलंजंभक्षये" दित्यादावारोपितंकलंजभक्षणं प्रेरणाविषयइतिवाक्योऽर्थस्तदभाव. प्रेरणाविषयइतित्यार्थोनञ्शाब्द. ॥ नन्वादोक्तरीत्यानञर्थेवाच्यवृत्त्या विभक्त्यर्थान्वयाभावात् ॥ तेनचप्रतियोगिन्यनिष्टसाधनत्वंबोध्यते ॥ यदभावत्वेनयदभावः प्रेरणाविषयस्तयाबोध्यतेसत्प्रतियोगीकृतेष्टाधिकानिष्टसाधनमितिव्याप्तेः तदक्षगेमायश्चित्तविधयश्चतत्रतथात्वकल्पनेतात्पर्यग्राहकाइत्युक्तं ॥ एवंचैतन्मतेऽपि "नहिंस्या" दित्यादौरवद्युत्पत्तिरलक्षप्रचारस्यपरिशिरनिर्भिमदुना सिद्धांते-

तुतिरोहितंकलंजभक्षणंतिरोहिता सर्वभूतहिंसाप्रेरणाविषयइत्यादिर्विशेषः प्रागेवसिद्धः ॥
एतेन (यतः सउपसंहाराऽनपेक्षः यथाहिविधिवाक्येन सामान्यार्थबोधे सामान्यस्यवि-
शेषमंतरापर्यवसानाभावाद्विधिवाक्यस्य तदपेक्षत्वं तथा निषेधवाक्यस्य नास्ति उक्तविधा-
भावस्यैव तेनबोधात्) इतितत्कथनमपास्तम्; सर्वत्रनञोक्तविधाभावस्यैवबोधनेप्रमा-
णाभावाच्च ॥ बहुत्रैवतन्नियमव्यभिचारस्यप्रागदर्शितत्वात् ॥ शास्त्रांतरेऽपि "समास-
प्रत्ययविधौप्रतिषेध" इत्यादिनिषेधानां "उगिद्वर्णग्रहणवर्जे" मित्यादिप्रतिप्रसवविधायक-
वाक्यार्थमंतरापर्यवसानाभावेनतादृशविधिवाक्यसापेक्षतयातद्विषयव्यतिरिक्तविषयेषूपसं-
हारांगीकाराच्च ॥ पूर्वतंत्रे "यदाहवनीयेजुहोतितेनसोऽस्याभीष्टःप्रीतोभवति" इतिसामा-
न्यवाक्यमनारभ्यश्रूयते। ज्योतिष्टोमेश्रूयते "पदेजुहोति वर्त्मनिजुहोती"ति। राजसूये
श्रूयते "वल्मीकवपायामुत्सृज्यजुहोती" तितथाऽन्यत्रश्रूयतेगार्हपत्ये "पत्नीसंयाजाञ्जु-
होती"ति। एवमादिविशेषशास्त्रविहितैःपदादिभिःसामान्यशास्त्रविहिताहवनीयस्यबाधो
यथा दशमस्याष्टमेपादे (सू० १६) "अविशेषेणयच्छास्त्रमन्याय्यत्वाद्विकल्पस्ततसं-
दिग्धमाराद्विशेषशिष्टंस्यात्" इत्येकसूत्रेऽष्टमाधिकरणेसिद्धांतितस्तथातत्रैवपादेबहूनांनि-
षेधवाक्यानामपितत्तद्विधिवाक्यैकवाक्यतयानानाव्यवस्थाराद्धांतितेव ॥ यथा अग्निहोत्रे-
श्रूयते "अथोखल्वाहुरनाहुतिर्वैजर्तिलाश्चगवेधुकाश्चपयसाऽग्निहोत्रं जुहुया" दिति ॥
अत्रानाहुतिस्तिरोहितं हव्यमित्यर्थः॥ महाभाष्यसंमतोत्तरपदार्थप्राधान्यादेकवचनोपपत्तिः
अभावेभेदेवानञर्थेतु पूर्वपदार्थप्राधान्यंस्यात्। तत्राप्यभावेऽर्थेजर्तिलैरभेदान्वयोऽसंगतः॥
भेदेऽर्थेतुविशेष्यवचनानुरोधाद्बहुवचनंस्यात् ॥ जर्तिलगवेधुकावारण्यौतिलगोधूमौ ॥
आस्तामेतत् ॥ एषोऽनाहुतिरितिनिषेधः पयोविधिबलात्पयस्तावकोऽर्थवादइति तत्रैवपादे
(सू० ७) "नचेदन्यंप्रकल्पयेत्प्रक्लृप्तावर्थवादःस्यादानर्थक्यात्परसामर्थ्याच्चे" त्येकसूत्रे
चतुर्थाधिकरणेव्यवस्थापितं ॥ अन्यथाविहितप्रतिषिद्धत्वात्तृतीयाधिकरणरीत्याषोडशि-
ग्रहणवद्विकल्पआपद्येत ॥ चातुर्मास्येषुत्र्यम्बकनामकानेककपालान्पुरोडाशान्प्रकृत्यश्रूयते
"अभिघार्यानाभिघार्याइतिमीमांसतेब्रह्मवादिन" इत्यादि ॥ अत्रेतिशब्देनमीमांसाप्रकार-
बोधकेनाभिघारणनिषेधस्याप्यर्थवादत्वं।" "अभिघार्याएवतूष्णीमेवहोतव्य"मितिविधि-
बलात्तत्रैव (सू० ८) "पूर्वैश्चतुल्यकालत्वा"दित्येकसूत्रेपंचमाधिकरणेनिर्णीतम् ॥
तथा आधानेश्रूयते तत्रेदमप्याम्नायते "यएवंविद्वान्वारवंतीयंगायति यएवंविद्वान्यज्ञाय-
ज्ञीयंगायति यएवंविद्वान्वामदेव्यंगायति" इति ॥ तत्रेदमाम्नायते "उपवीतावाएतस्या-
ग्नयोभवंति यस्याग्न्याधेयेब्रह्मसामानिगायति" इति॥ उपशब्दोऽत्रसामीप्यार्थः, उपसमी-
पेविगताःकालविलंबमंतरेणपरैस्त्यक्ताइत्यर्थः ॥ अनयानिंदयाब्रह्मणःसामगाननिषेधःफलति
अयंचब्रह्मणोनिषेधः पूर्वाधिकरणेऽप्यर्थवाद उद्गातुर्विहितसामगानस्तावको भविष्यतीति
प्राप्ते तत्र (सू० ९) "उपवादश्चतद्वत्" इत्यादित्रिसूत्रंषष्ठाधिकरणंप्रवृत्तम्। नब्रह्मण
उपवादः। कस्यचिदर्थवाद.संभवति। वामदेव्यादिविधीनां बहुत्वात्स्वसन्निहितार्थवाद-
स्तुततयानिराकांक्षत्वाच्च ॥ तस्मादयमुपवादोऽपि तद्वत् तृतीयाधिकरणोक्तषोडशिग्रह-
वद्विकल्पार्थः ॥ ब्रह्मण.सामगानस्यकथमपिप्राप्त्यभावात्तन्निषेधोऽसंगतोऽतोब्रह्मशब्दो-

ऽन्नयाह्मणवादुद्गातृपरः ॥ अतोविहितप्रतिषिद्धत्वाद्विकल्पः ॥ अग्रे (सू० १०) "प्रतिषेधादकर्मत्वे"दिति द्वितीयसूत्रे निषेधादुद्गातुरपिसामगानं तन्नाकर्तव्यमिति शंकामनूद्य तृतीयेसमाद्धे (सूत्र ११) "न शब्दपूर्वत्वात्" इति ॥ गानस्यापिवेदवाक्यमूलकत्वादित्यर्थः. विधिनिषेधवाक्ययोर्वेदत्वाविशेषादुभयसामंजस्यार्थविकल्पइतिभावः ॥ अत्र शबरस्वाम्यपि "अनुष्ठातुंविधिः वर्जयितुमुपवादः" इत्याह ॥ इहनिषेधवाक्यंविधिबलादुद्गातृपरतया पाक्षिकार्थपरतयाचोपसंहृतम् ॥ "नशब्दपूर्वत्वा" दित्यनेनविधेरबाध्यत्वं चोक्तम् ॥ एवंप्रकृतेऽपि गुणक्रियादिग्राहकवाक्यानामबाधएवोचितः ॥ तत्र गत्यंतराभावाद्विकल्पादुभयसामंजस्यम् ॥ अत्रतुव्यासाद्युक्तविषयभेदादित्येवविशेषः ॥ किंच-ज्योतिष्टोमेश्रूयते "दीक्षितोन ददाति नजुहोति नपचति" इति ॥ इमेनिषेधास्तत्र सप्तमाधिकरणेचतुःसूत्रे ॥ तत्रसंशयः-किमयं सर्वदानहोमपाकानां प्रतिषेधः उत अक्रतुयुक्तानां अथवा क्रतुयुक्तानामपि चोदकप्राप्तानांप्रतिषेधः अथवापर्युदासइति ॥ तत्रसूत्रत्रयेणप्रथमं पक्षत्रयं पूर्वपक्षतयोक्तम्; यथा (सू० १२) "दीक्षितस्यदानहोमपाकप्रतिषेधोऽविशेषात्सर्वदानहोमपाकप्रतिषेध स्या" दिति ॥ नञ्सामान्यनिषेधकृदस्तु ॥ अतोदानत्वाद्यविशेषात्पुरुषार्थं यत्क्रत्वर्थं यच्चातिदेशाल्लभ्यं तेषांसर्वेषांदानादीनां प्रतिषेधइत्यर्थः ॥ (सू० १३) "अक्रतुयुक्तानांवाधर्मः स्यात्क्रतोःप्रत्यक्षशिष्टत्वा" दिति ॥ वाशब्दः पक्षंव्यावर्तयति ॥ नसर्वदानादीनांप्रतिषेधः; कुत ? क्रतोःप्रत्यक्षशिष्टत्वात् । प्रत्यक्षंहिश्रुतौदानादीनांशासनमस्ति तस्मात्प्रत्यक्षंवर्जयित्वा प्रतिषेध स्यात् ॥ क्रतोरितिपदंमध्यमणिवदुभयत्रान्वेति क्रतोर्धर्मःक्रत्वर्थमुपदिष्टंदानादिकं कर्तव्यं किंतु पुरुषार्थमतिदिष्टंचैतेनप्रतिषिध्यतइत्यर्थः ॥ (सू० १४) "तस्य वाप्यानुमानिकमविशेषात्" इति ॥ अपिवा तस्यक्रतोर्यत् आनुमानिकंचोदकप्राप्तं तत् प्रतिषिध्यते । आनुमानिकंहि तत्रप्रत्यक्षं प्रत्यक्षश्रुतश्चप्रतिषेधः ॥ एवंप्राप्ते सिद्धांतमाह-(सू० १५) "अपितुवाक्यशेषत्वादितरपर्युदासः स्यात्प्रतिषेधेविकल्पःस्या"दिति ॥ तुशब्दः पूर्वपक्षं निरस्याऽवधारणार्थः ॥ वाक्यशेषः स्यात्प्रतिषेध. । अहरहर्दद्यादित्यस्य शेषोनदीक्षितइति ॥ एवंहोमपाकवाक्ययोरपि ॥ असतिपर्युदासेप्रतिषेधेविकल्प स्यात् सचान्याय्यइत्युक्तम् । तस्मात्पर्युदासइति ॥ एवमिदंशावरभाष्यादिषुव्याख्यातम् ॥ अत्र न्यायमालायांमाधवः "नित्याग्निहोत्रदानादिकंपुरुषार्थत्वेनयत्प्रत्यक्षश्रुतावुपदिष्टं ज्योतिष्टोमकालेऽपिप्राप्तं यच्चातिदिष्टंदानादिकं तयोरुभयोर्मध्ये प्रत्यक्षोपदिष्टनिषेधस्योपदिष्टमेव सन्निहितमितिपुमर्थस्यैवात्रनिषेधः ॥ नच नित्याग्निहोत्रदानादौविधिनिषेधयो.प्रवृत्त्याविकल्पः शंक्य । भिन्नविषयत्वात्क्रत्वर्थोनिषेध. क्रतुकालेतदनुष्ठानंवारयति । पुरुषार्थस्तु विधि.कालांतरेतदनुष्ठापयति । तस्मात्पुमर्थस्यनिषेध. ॥ यदिप्रतिषेधपक्षेवाक्यभेद.शंक्येत तर्हि पुमर्थदानादिव्यतिरिक्तक्रतुकालेऽनुष्ठेयमिति पर्युदासोऽस्तु" । इत्याह ॥ अतो नददातीत्यादिसामान्यनिषेधेऽपि दानादिविशेषाणामेव यथातत्रनिषेध सिद्धांतः सूत्रकृताच सएव निर्णीतस्तथाऽस्थूलादिवाक्ये सामान्यतोनिषेधेऽपि लौकिकानामेव सत्त्वेद्धांतितः सूत्रकृताच प्रकृतैतावत्त्वादि सूत्रे सएव निर्णीतइति शुभम् ॥ स्यान्नवितारस्पेदवेत्स्या-

दित्युक्तनियमस्यभंसत्वसर्वत्रैवांगीकारेत्वेवमाद्यधिकरणानिबाध्येरन् ॥ तस्मान्निषेधाना-
मपिसंकोचादिरूपात्तथातथोपसंहाराभवंत्येव ॥ तैत्तिरीयसंहितायां द्वितीयकांडे (प्र० ५
अ० १) "तृतीयंब्रह्महत्यायैप्रत्यगृह्णन्तसनिर्यासोऽभवत्तस्मान्निर्यासस्यनाद्य"मितिपूर्वं
सामान्यतयानिर्यासमात्रस्याशनप्रतिषेधोयद्यपिप्रसज्यते तथापि "ब्रह्महत्यायैह्येषवर्णो-
ऽथोखलुयएवलोहितोयोवाव्रश्चनान्निर्येपतितस्यनाद्यं । काममन्यस्य" त्यग्रिमवाक्येन
लोहितवर्णोयाव्रश्चनाच्चनिर्गच्छति तस्यैवनिर्यासस्याशनप्रतिषेधस्तेनान्यस्यहिंगुकर्पूरादेर्यथे-
च्छमशनाभ्यनुज्ञानंचबोध्यतइतिस्पष्टएवनिषेधस्योपसंहारः स्वान्वयितावच्छेदयेत्यादिनिय-
मभंगश्च ॥ अतएवात्र सायनमाधवीयभाष्येऽपि "वृक्षान्निर्गत्यघनीभूतोरसोनिर्यासः ।
ब्रह्महत्यायाः स्वरूपत्वान्निर्यासस्यस्वरूपंनभोज्यंभवति । अपिचपक्षांतरमस्ति । नसर्वोपि
निर्यासोनिषिद्धः किंतु लोहितवर्णः यश्चच्छिन्नवृक्षप्रदेशान्निर्गतस्तदेवोभयनिषिद्धम् ॥
अन्यस्यतुनिर्यासस्यस्वरूपंकाममाद्यमिच्छायांसत्यामशितुंयोग्य"मिति व्याख्यातम् ॥
ननु नञोऽशनक्रियायामन्वयोनतु निर्यासेऽतोन स्वान्वयितावच्छेदकेत्यादिनियमव्यभिचार
इतिचेत्तर्हि "नहिंस्या" दित्यत्रापि हिंसायामेव तस्यान्वयो नतुसर्वादिपदार्थेऽतस्तत्रन्याय-
व्यभिचारंस्वीकृत्य तत्समाधानायलक्षणाप्रतिपादनादिरूपस्त्वद्ग्रंथोव्याहन्येत ॥ अथहिंसा-
कर्मत्वादस्तित्वत्राप्यन्वय इति चेदत्रापिनिर्यासे सोऽस्त्विति सुस्थोनियमभंगः ॥ एवं निषे-
धोदाहरणांतरेष्वपिद्रष्टव्यम् ॥ यच्च तुल्यइत्यादि गौरवंसह्यमित्यंतमुक्तं तत्रोदाहृतवाक्य-
मपि पूर्वतंत्रेप्रागुक्तपादएवतृतीयाधिकरणे (सू० ६) "शिष्टात्तुप्रतिषेधःस्या" दित्येक-
सूत्रेविचारितम् ॥ अत्र शबरमाधवादयः । प्रथमेऽधिकरणेनशब्द.पर्युदासार्थः ॥ द्विती-
यंतु अर्थवादार्थं; अथकिंलक्षणकःप्रतिषेधः इति लक्षणमुच्यते "शिष्टात्तुप्रतिषेधःस्यात्"
यथा ज्योतिष्टोमे तस्यसंस्थाविशेषेश्रूयते "अतिरात्रेषोडशिनंगृह्णाति नातिरात्रेषोडशिनं
गृह्णाती" ति ॥ तत्रनानूयाजेष्वित्यत्रेव पर्युदासोऽशक्यवचनः ॥ अतिरात्रातिरिक्तानि-
रात्रइत्यन्वयायोगात् । विधेर्निर्विषयत्वापाताच्च ॥ तर्हि "नतौपशौकरोती" त्यत्रनसो-
महतिवदर्थवादोऽस्त्विति चेन्न; स्तुत्यस्तावकयोर्विधिनिषेधयोरेकविषयत्वेनव्याहतत्वाद-
वस्थ्यात् ॥ "अपशवोवान्येगोअश्वेभ्य" इत्यत्रपश्वंतरनिषेधेन गोऽश्वविधे.स्तुतिर्दृष्टा ॥
इहतु षोडशिनिषेधेनषोडशिनएवस्तुतौस्पष्टोव्याघातस्तस्मात्प्रतिषेध इति तृतीयःपक्षोऽस्तु
गृह्णातीत्यत्रसंबंधः ननुपरस्परंविरुद्धौविधिप्रतिषेधौनसंभवतः उच्यते "वचनप्रामाण्या-
त्प्रतिषेधोविधिंबाधित्वाभविष्यति विधिरपिप्रतिषेधंनान्यागतिरस्ती" ति ॥ अतोव्रीहि-
यववद्विकल्पोवचनप्रामाण्यात् ॥ तत्प्रामाण्यादेवान्यतरकल्पमादायप्रयोग इति व्याच-
क्षते ॥ एवंसति शिष्टाविधेर्विषयमवशेष्यैवप्रतिषेधः प्रवर्ततेतिसूत्रार्थःसिद्ध्यति तेनधर्म-
निरूपकवाक्यानां विषयमवशेष्यैवाऽस्थूलादिवाक्यानांप्रवृत्तिरुचिता ॥ पूर्वेषांसर्वथाबाधे
निर्विषयत्वादप्रामाण्यंस्यात्तच्चायुक्तं ॥ वेदत्वाविशेषात् ॥ अथापोद्यविषयसमर्पकत्वान्ना-
नर्थक्यंतेषामिति चेदतिरात्रवाक्यस्यापि तथात्वादेव सार्थक्यंस्यादिति माऽस्तुविकल्पः ॥
यदिच नातिरात्रवाक्यादेवापोद्यविषयबोधपूर्वकं तत्प्रतिषेधागमोऽतोऽतिरात्रवाक्यस्य
विषयसमर्पणात्र नोपयोगइत्युच्येत तर्ह्यस्थूलादिवाक्यैरपि निराकांक्षबोधस्य संभवादध्या-

यच्च (स्वात्यन्ताभावाधिकरणस्थोमिथ्ये) त्युक्त,—तदेतत्पिशाच पिशाचभाषयेतिन्यायेनतदीयानद्वैतसिद्धिगौडब्रह्मानन्दपृततच्चन्द्रिकादिग्रन्थान् पाश्चिस्तार्किकग्रन्थाश्चानुसत्यनिराकुर्वंति—ननुनिषेधबोधकैरित्यादिना ॥ सिद्धसाधनतामाहेतुमाह —सर्वस्येति ॥ गन्धवत्यपिपाषाणादौगन्धाभावभ्रमसंभवात् सर्वस्यगन्धादे स्वाश्रयपृथिव्यादिनिष्ठोभ्रमविषयोयोभावस्तत्प्रतियोगित्वमस्त्येव ॥ अर्थान्तरतायाइति ॥ गौतमप्रणीतलक्षण्यप्रथमाध्यायद्वितीयाह्निकोक्तेषु प्रतिज्ञाहान्यादिचतुर्विंशतिनिग्रहस्थानेष्वर्थान्तरनामपञ्चनिग्रहस्थान ॥ लक्षणनुनैव (अ० ५ आ० २ सू० ७) "प्रकृतादर्थादप्रतिसंबद्धार्थमर्थान्तर"मिति ॥ उदाहृतचात्रभाष्येवात्स्यायनेन "नित्य शब्दोऽस्पर्शत्वादितिहेतु । हेतुर्नाम हिनोतेर्धातोस्तुतिप्रत्ययेकृदन्तपद पदचनामाख्यातोपसर्गनिपाता " इत्यादितदनापारमार्थिकत्वरूपमिथ्यात्वसाधनेप्रकृतेव्यावहारिकाभावप्रतियोगित्वकथनमर्थान्तरम् ॥ श्रुतिप्रतिपादितस्येति ॥ स्वप्नादेर्व्यावर्तनार्थोर्थक्रियेति ॥ महतोमहीयस्त्वादिकहि ब्रह्मण श्रुतिप्रतिपादितम् ॥ "अत समुद्रागिरयश्चसर्वे" 'गामाविश्यचभूतानी"त्यादिश्रुतिस्मृत्युक्त सर्वेनियमनधारणाद्यर्थक्रियाकारित्वंच प्रसिद्धमेव । तस्यास्थूलादिवाक्यैर्निषेधोऽसंभवी ॥ अर्थक्रियाश्चात्रजाग्रदवस्थाऽनुभूता सत्यत्वनिर्वाहिका यावदर्थक्रिया ज्ञेया ॥ तेन असतोऽप्यर्थकारिणइतिवाक्यात्प्रतिविवादीना यथाकथचिदर्थक्रिंचिदर्थक्रियाकारित्वेऽपिनक्षति , मायामानसूत्रेप्रकाशेऽप्येवमेवस्वीकृतम् ॥ एवचजगतोऽपिश्रुतिप्रतिपाद्यत्वमर्थक्रियाकारित्वचानुसधेय ॥ अबाध्यत्वरूपस्येत्यादि ॥ जगत्पारमार्थिकनभवतीतिबाध्यत्वरूपमिथ्यात्वज्ञान पारमार्थिकत्वज्ञानमतरानसभवति ॥ अबाध्यत्वरूपपारमार्थिकत्वस्य ज्ञान च बाध्यत्वज्ञानमतरानभवतीत्यन्योन्याश्रय ॥ विशेष्येविशेषणमिति ॥ अन्नायसार —(स्वात्यन्ताभावाधिकरणस्थोमिथ्ये) तिस्वीकारेसोऽभाव किंप्रमाविषयोभ्रमविषयोवा ? ॥ आद्येऽभावस्यवास्तवत्वान्मिथ्यासत्ययोरेकाधिकरणवृत्तित्वमनुपपन्नमितिव्याघात ॥ सत्याभावप्रतियोगिनोऽपिस्थलादेरसत्वापात सर्वमिथ्येतिप्रतिज्ञाहानिश्च ॥ नचरज्जौसर्पतदभावयो सामानाधिकरण्यदर्शनात्तत्रानुपपन्नमितिशक्यम् रज्जौसर्पाभावाधिकरणत्वेऽपिसर्पनिरूपिताधिकरणतायास्तत्रवक्तुमशक्यत्वात् ॥ केवलायादुष्टबुद्धावेवकल्पितसर्पादे सत्वात् ॥ रज्जौतत्सत्वेतुभ्रान्ताभ्रान्ते सर्वैरेवसप्रतीयेत ॥ एकस्यैवाधेयतावच्छेदकसबधादेरेशक्यनिरूपणतयापि तयो सामानाधिकरण्यमशक्यवचनम् ॥ द्वितीयेप्रतियोगिन सत्त्वप्रसक्ति पुन सामानाधिकरण्यानुपपत्त्याव्याहतिश्च ॥ शर्करायाकेनचित्क्रमान्माधुर्याभावेगृह्यमाणेऽपितस्यामाधुर्यस्यैवसत्वात् ॥ तदभावोऽपितस्याचेत्सर्वै सोऽनुभूयेत ॥ अथ प्रतियोगिनो मिथ्यात्वादेवाभावस्यापि मिथ्यात्वमितिचेद्वस्तुनो मिथ्यात्वज्ञानमभावज्ञानाधीन अभावस्य तथात्वज्ञान चवस्तुमिथ्यात्वज्ञानाधीनमित्यप्यन्योन्याश्रय ॥ एतच्चमूलएवसम्यक्प्रपचेननिराकृत प्रागुक्तग्रन्थविरोधश्चात्राधिक दर्शितचरदिशासुखेनशक्योहमितिकिंबहुना ॥ वस्तुतस्तुभावस्तिरोभावानतिरिक्त इति शिलाबीजादौ स्वतिरोभावसमानाधिकरणस्यापिगन्धादेकहापिमिथ्यात्वाभावात्कल्पनमसिद्धनिर्मूल, तथापिपिशाच पिशाचभाषयेतिन्यायेनभाववादमभ्युपेत्यमूलेसमाहित ॥

किंचवेदेप्रपंचोमिथ्येतिकुत्रापिनोक्तं किंतु ब्रह्मैवेदंसर्वंआत्मैवेदं
सर्वं" मित्यादिनाब्रह्मरूपतैवसर्वस्यप्रदर्शिता साचशुद्धाद्वैतस्वी-
कारएवसंगच्छते नमिथ्यात्वस्वीकारइति ॥ यत्तु (विशेषानुवाद-
स्याभावेवायौरूपस्यनिषेधेपितस्याश्यादाविवब्रह्मणि विशेषाणांनिषेधे-
पिप्रधानादौतेषांसिद्ध्यामिथ्यात्वाऽसिद्धेस्तदनुवादोयुक्त) इत्युक्तं,-
तन्मंदं; विशेषानुवादस्योपसंहारार्थत्वसंभवेनमिथ्यात्वसाधकत्वा-
संभवात् ईक्षत्यधिकरणंतुनप्रधानस्यकर्तृत्वाभावबोधकं तत्रप्रधान-
वाचकपदाभावात् किंतु ब्रह्मणःसर्वप्रमाणाविषयत्वस्ययतोवाचोनि-
वर्ततइत्यादिश्रुतिप्रतिपादितत्वाद्विचारःकर्तुंनशक्यतइत्याक्षेपआह-
"ईक्षतेर्नाशब्द"मिति। नविद्यतेशब्दोयत्रेत्यशब्दंवेदांताप्रतिपाद्यंब्रह्मे-
तिनवक्तव्यं; कुतः? ईक्षतेः; 'तदैक्षतबहुस्यांप्रजायेये'त्यादिवाक्यादी-
क्षाप्रतीयते साचसर्वव्यवहारातीतोपिसृष्टिद्वाराव्यवहार्योभविष्या-
मीति ॥ एवंसति इच्छयाव्यवहार्योपिभवतीत्यादिकंभाष्यादौविस्त-
रेणप्रपंचितं ॥ तथाचेक्षत्यधिकरणमपीत्यादिकमसंगतं ॥ किंचत्व-
न्मतेविशेषनिरूपणस्यकुत्रचिन्मिथ्यात्वसाधकत्वंकुत्रचिद्बुद्धिसौक-
र्यार्थत्वंकुत्रचिल्लक्ष्यज्ञानसौकर्यार्थत्वंक्वचिदुपासनार्थत्वमित्यतीव
गौरवंस्यात् ॥ प्रत्यासन्नप्रतियोगिनंविहायाप्रत्यासन्नप्रतियोगिनिषे-
धोनसंभवतीतिन्यायविरोधस्तु "नहिंस्यात्सर्वाभूतानी"त्यत्रव्यभि-
चरितत्वेनतादृशन्यायएवमानाभावान्नसंभवति ॥ अप्रामाणिकन्याय-
विरोधस्याकिंचित्करत्वात् ॥ अन्यथाप्रधानस्याप्रत्यासन्नत्वेनतत्कार-
णत्वस्याप्यप्रत्यासन्नत्वात्तन्निषेधमीक्षतेर्नाशब्दमित्यधिकरणेस्वीकु-
र्वतस्तवैवन्यायविरोधःकथंनस्यात् ? ॥ अन्यथेत्यादिनानतत्ररथाइति
लौकिकरथादीनांनिषेधःस्यादथ रथानित्यादिनापारमार्थिकरथादीनां
विधानंस्यादितियदुक्तंतत्रब्रूमः-यदिश्रुतिर्लौकिकानामिवस्वाप्नानामपि
रथादीनांसत्यत्वंप्रतिपादयेत् "यथैतदात्म्यमिदंसर्वंतत्सत्यं आत्मा
स्वयमकुरुततत्सत्यमित्याचक्षत" इत्यादिनातेषांसत्यत्वंप्रतिपादयति
तदापारमार्थिकत्वंस्यात् ॥ नत्वेवंप्रतिपादयति किंतु सृष्टिमात्रं
"अविद्यया मन्यत"इतिवचनाच्चमायिकत्वमेवनपारमार्थिकत्वं ॥
अतएव"मायामात्रंतुकार्त्स्न्येनानभिव्यक्तस्वरूपत्वा"दितिसूत्रंसंग-
च्छते ॥ त्वन्मतेचसर्वस्यैवप्रपंचस्यमायिकत्वेनस्वाप्नमात्रस्यमायिक-
त्वाभिधायकंमायामात्रमितिसूत्रंविरुद्धंस्यात् ॥

रोपार्थं धर्मनिरूपकाणांनोपयोगः ॥ अतः प्रमाणत्वाविशेषादुभयसामंजस्यं विषयभेदात्कल्प्यम् ॥ ग्रहण प्रयोगासंभवेन प्रकृतवद्विकल्पस्य वक्तुमशक्यत्वात् ॥ वस्तुस्वरूपे विकल्पानुपपत्तेः ॥ तस्मात्तदपि तथैवप्रतिकूलम् ॥ यच्च (विधेःसामान्यविधेरित्यादि उपसंहारापेक्षत्वादितिभाव) इत्युक्तमगादि,-तदप्येतावतैवदत्तोत्तरम् ॥ विधेरिवनिषेधस्याप्युपसंहाराणामसमूलत्वानांदर्शितत्वात् ॥ किंच सामान्यविधेरित्यादिनोक्तविषयोऽपिननियतः ॥ अन्यथाऽनारभ्यश्रुतस्य "वषट्कारेणवा स्वाहाकारेणवादेवेभ्योऽन्नंप्रदीयत" इति सामान्यविधेः दर्विहोमे "पृथिव्यैस्वाहा अंतरिक्षायस्वाहा वायवे स्वाहा" इतिश्रवणात्तत्परतयोपसंहारेहोमांतरेषु स्वाहाकारोनस्यात् अतःपृथिव्यैस्वाहेत्यादेर्विधित्वपक्षेऽपितथोपसंहाराभावस्तत्रैवपादे दशमाधिकरणे (सू० २०-२१-२२) त्रिसूत्रैराद्धांतितः ॥ तस्माज्जैमिनिव्यासोक्तन्यायैरेवसर्ववैदिकवाक्यानांव्यवस्थोपपत्स्यते नतुभवादृशस्ययथार्थशास्त्रार्थापरिज्ञानप्रयुक्तैकदेशिद्विव्रवचनमात्रतः ॥ एतेनैव एवंचास्थूलेत्यादिकंनिरस्तं ॥ दीक्षितोनददातीत्यादाविवप्रमाणतः संकोचेक्लेशत्वस्याशक्यवचनत्वात् ॥ अन्यथाशास्त्रसिद्धः प्रतिप्रसवघंटापथएवलुप्येत ॥ नातिरात्रादिवास्यार्थेप्यपिनक्लेशलेशोऽन्यथासूत्रकारस्तथानसिद्धांतयेत् । वैदिकवाक्यानामदृष्टवास्तवार्थप्रकाशनायैव तत्प्रवृत्तेः ॥ निष्कलमितितु निषेधएवसामान्यः ॥ लोकेतादृशमात्रादेरदर्शनादलौकिकमात्राबोधकस्यै "तस्यैवानंदस्ये" त्यादेर्विशेषवाक्यत्वात्तेनैवनिष्कलादिवाक्यानांसंकोचउचितः ॥ सामान्यविशेषभावस्यस्फुटतयासमानविषयतायावक्तुमशक्यत्वात् ॥ "इंद्रोमायाभिः अशरीर" इत्यादिवाक्यानितुप्रागेवसम्यग्विचारितानीतिनकिंचिदेतत् ॥ आकारबोधकानांवाक्यसहस्राणामिंद्रोमायाभिरित्येकेनैवान्यथानयनस्याऽसंभवात् व्याख्यातरीत्यातस्यापित्वदभिप्रेतार्थासमर्थकत्वाच्च ॥ विग्रहमायिकतायास्ततोनिश्चयेप्रत्युताशरीरमित्यादयोनिषेधामायिकशरीरादिकमेवनिषेधति नतु वास्तवमलौकिकमित्युपसंहियताम् ॥ ज्ञेयाज्ञेयविभागेमनसैवपरिकल्प्यतत्तद्वाक्यकदंबस्यतत्तत्परत्वकल्पनेमानाभावे "इंद्रोमायाभिः अशरीर" मित्यादेः समानविषयतायाः एवदुर्वचत्वात् ॥ वस्तुतस्तु इंद्रोमायाभिरितिवाक्येभेदप्रतीतेरेवमायाहेतुकत्वबोधयति । मायात्वितिवाक्यंचप्रकृतिरूपमायाशक्तिकत्वं परस्यबोधयति । तत्रैव "देवात्मशक्तिं" "पराऽस्यशक्तिः" इत्याद्यभ्यासात् ॥ अशरीरमितिकठवाक्यंचपाचभौतिकशरीरप्रतिषेधकम् । तत्रैवानुपदं "तस्यैष आत्माविवृणुतेतनूंस्वा" मिति स्वाभाविकालौकिकतनुबोधनादित्यादि सर्वंशुद्धंसिद्धंप्राक् ॥ एतस्यैवेत्यत्र मात्रायाजन्यत्वं नश्रूयते आसीन इत्यादौ गमनादेर्मायिकत्वंच नैवोपतिष्ठत इतित्वदुक्तविशेषाकांक्षत्वमसंभवि । सध्यसृष्टेरिवगमनादेर्मायामात्रत्वबोधकाधिकरणाभावात् । ज्ञेयाज्ञेयस्वरूपविभागस्यकेवलनिर्मूलतायाः पुरैवदर्शितत्वाच्चेतिदिक् ॥ अधिकोऽस्थूलादिवाक्यविचारः प्रहस्तवादादिषुद्रष्टव्य ॥ अत्रप्रहस्तवादस्थंकिंचिदनूद्यते ॥ यथातत्र "कश्चित्तु अस्थूलादिवाक्ये नञ क्रियान्वयाभावात्पर्युदासएवेति तेनसदृशग्रहणात्समोऽपतकस्समोनागेनेतिश्रुत्यतराच्चात्रापिसर्वाकारतैवफलतीतिपृथैवेयंविरोधाभावचिंतेत्याह- अन्यस्तु नात्रपर्युदासः शक्यवचन ॥ असंगमित्यत्रानन्वयात् । अचक्षुष्कमितिकप्रत्य-

सहस्राक्षे यत्तुप्रत्यक्षमित्यादि क्रियेतेत्यलमित्यंतं भागंपरिहरंति-किंचवेदेप्रपंच इत्यादिना सूत्रविरुद्धंस्यादित्यंतेन ॥ अयंभावः-ऋग्वेदस्याश्वलायनसांख्यायनभेदाद्वे । इदानींकृष्णशुक्लयोरुच्यमानयजुषोस्तैत्तिरीमैत्रायणीमानवीकाण्वीमाध्यंदिनीतिभेदात्पञ्च । सामवेदस्यराणायनीकौथुमीतिद्वे । अथर्ववेदस्यपैप्पलादीशौनकीतिद्वे । इत्येवंसर्ववेदानां संकलनयैकादशैवशाखा.सांप्रतंप्रचलंति । तासुवाप्येकमपिकंठरवेणजगन्मिथ्यात्वप्रत्यक्षं वाक्यंनोपलभ्यते । इदंचशास्त्रार्थनिबंधे (कारिका ८८) नास्तिश्रुतिषुतद्वार्ता दृश्यमाना सुकुत्रचिदित्यत्रस्फुटम् ॥ अत.शंकराचार्यैर्व्याख्यातास्वीशाद्यासूपनिषत्सुसर्वेष्टिसंमतत्वादसंदिग्धप्रमाणभावासुतुकुतस्तादृशस्पष्टवाक्योपलंभसंभावनाऽपि ॥ यदिचकापि तरसात्तर्हिसूत्रतात्कभाष्यादौमिथ्यात्वसाधनावसरेऽवश्यमुदाह्रियेत । तस्माच्छाखांतरीयमपिमिथ्यात्ववाक्यंसमूलंनास्त्येव ॥ यत्तुसहस्राक्षे तदनेनेत्यादि उत्तरवादित्यंतमुक्तंतत्तु पूर्वखंडएवापास्तम् ॥ अविप्रतिपन्नरूपेणेत्युक्तिरप्यज्ञानात् । अभावस्यतिरोभावत्वात्गादे कारणादौस्वतिरोभावसमानाधिकरणस्यकार्यादेर्मिथ्यात्वानंगीकारात् । किंचस्यादप्येवं यदिकंठरवेणसत्यत्वबोधकानिप्रागुक्तादीनिबहूनिवाक्यानिवेदेपुनस्युः किंच "पुरुषएवेदंसर्वं" इत्यादीनिपरःसहस्रंवाक्यानिसर्वस्यब्रह्माभिन्नत्वंप्रतिपाद्यित्वाऽद्वैतंसाधयंतिनतुमिथ्यात्वं बोधयित्वा ॥ मिथ्यासत्ययोश्चाभेदोऽशक्यएववक्तुम् ॥ अतोपिसत्यत्वएवश्रुतितात्पर्यंनिर्णीयते ॥ किंचप्रतियोगिज्ञानानालिंगिताऽभावबुद्धिर्नैवोज्जृंभतइतिमहताप्रबंधेनमंजूषाकारादिभिर्बहुभिरेवव्यवस्थापितं ॥ एवंचत्वन्मतेस्थौल्यादिविशेषाणांवास्तवानांब्रह्मण्यसत्वात्खपुष्पादिवत्तदारोपस्याप्यसंभवादस्थूलादिवाक्यैस्तेषांनिषेधोप्यशक्यवचनः ॥ शृंगादिकं चान्यत्रसदेवशशीयत्वादिनाकल्प्यते । अतएवशशशृंगंनास्तीत्यादौबोद्धार्थस्याभावोमंजूषादौस्वीकृत ॥ रूपंचतेजोऽवयवेभ्याविर्भूतमेववायौप्रतिषिध्यते तेषुरूपस्येवप्रधानादौ-

---

यत्तु प्रत्यक्षं क्वापि वेदे मिथ्यात्वकथनं नास्तीत्युक्तं तदनेनैवनिरस्तम् ॥ अधिष्ठाननिष्ठात्यन्ताभावप्रतियोगित्वस्यैव मिथ्यात्वपदार्थत्वेन मिथ्यापदेनानुक्तावपि अविप्रतिपन्नरूपेण मिथ्यात्वस्योक्तत्वात् ॥ एवंच विशेषानुवादस्याभावे वायौ रूपस्य निषेधेपि तस्याग्न्यादाविव ब्रह्मणि विशेषाणां निषेधेपि प्रधानादौ तेषां सिद्ध्या मिथ्यात्वाऽसिद्धेस्तदनुवादोयुक्तः ॥ ईक्षत्यधिकरणमपि ब्रह्मणि विशेषाधारत्वे सत्येव प्रधानादौ तदभावं बोधयितुमीष्टे-तदाहुरध्यारोपापवादाभ्यांनिष्प्रपञ्चंप्रपञ्च्यते इति ॥ ब्रह्मनिरूपकमहावाक्यप्रकरणे विशेषनिरूपणं बुद्धिसौकर्यार्थं ॥ क्वचित्तु शब्दवाक्यप्रदर्शनपरं लक्ष्यज्ञानसौकर्यार्थम् ॥ उपासनाया प्रकरणेतु तदर्थमिति किंच श्रुतिषु विशेषनिरूपणाभावे निर्विशेषवाक्यानां लौकिकविशेषनिषेधपरत्वं स्यादपि सतिलौकिकविशेषद्वयस्यसमूलत्वे ॥ सतितु श्रुतिषु तन्निरूपणे नैवंभवितुंशक्यं ॥ प्रत्यासन्नप्रतियोगिनं विहायाऽप्रत्यासन्नप्रतियोगिनिषेधे न्यायविरोधात् ॥ अन्यथा नतत्ररथा इत्यनेनापि लौकिकरथादेरेवनिषेध स्यादथरथानित्यादिनातु पारमार्थिकरथादिप्रतिपाद्येत ॥ 'मायामात्रंत्वि'ति सूत्र श्रुतिविरुद्धंस्यात् ॥ तादृशसूत्रबलेन कथंचित्, श्रुत्यर्थस्यान्यथाकरणेतु इहापि प्रकृतैतावत्त्वमितिसूत्रबलेन श्रुत्यर्थोऽन्यथाक्रियेतेत्यलम् ॥

विशेषाणाममिथ्यात्वेत्वद्वैतहानिरपसिद्धांतश्च ॥ अंतेरंडाविवाहन्यायाद्ब्रह्मण्येवयास्तवत्स्वीकारेसर्ववान्यसामंजस्यं ॥ प्रधानादिकार्यगतविशेषाणामेवब्रह्मण्यस्थूलादिवाक्यैःप्रतिषेध इतितुयुक्तं ॥ एवंचप्रधानाद्यवृत्तिविशेषानुवादकानि "आसीनोदूरंव्रजती" त्यादीनिनिषेध विषयातिरिक्तविषयकाणितत्तदलौकिकविशेषानेवपरस्मिन्नुपसंहरन्तीतिनिरपराधानिबहूनितानिन्नूथानविप्लावनीयानि ॥ ईक्षत्यधिकरणंत्वशब्दशब्देनप्रधानपरिग्रहे "तदैक्षत, सईक्षत, सईक्षांचक्रे" इत्यादिश्रुत्युक्तमीक्षणंप्रधानेप्रधानगुणोपहितगौणेचप्रमाणपुरःसरंप्रतिषिध्यब्रह्मण्येवतत्सिद्धांतयतीतिचेतनस्यब्रह्मणएवतादृशश्रौतविशेषाःस्वाभाविकाइति सत्रासिद्ध्यति, नतुनिर्विशेषत्वं । तथासत्यन्यत्रसशिरसनपुरःसरंपरस्मिन्नेवतत्स्थापनेप्रक्षालनाद्धीतिन्यायेनानौचित्यस्यानपायात् ॥ ईक्षतिसूत्रेसोऽप्ययर्थोब्रह्मभाष्यसंमतइतिशास्त्रार्थनिबंधादितोऽवसीयते ॥ अणुभाष्यस्थंमुख्यव्याख्यानमनुसृत्य वाहुमूले-ईक्षत्यधिकरणंतिवत्यादि ॥ एतेनएवंचेत्यादिप्रपंच्यत इतीत्यंतमपास्तं ॥ यच्च (ब्रह्मणिविशेषाधारत्वे सत्येवप्रधानादौतदभावंबोधयितुमीष्ट इत्युक्तं,-तत्तु युक्तम् । परंतुब्रह्मण्यपिविशेषाणां मिथ्यात्वकल्पनेतन्नसंगच्छते; एकत्रारोपितविशेषाणांसत्त्वेततोन्यत्रतेषांनिषेद्धुमशक्यत्वात् ॥ आरोपाधारत्वस्यप्रधानादौयत्रकुत्रापियथाकथंचित्संभवात् । ईक्षितृत्वादीनांप्रधानादौ निषेधेनब्रह्मण्यपिमिथ्यात्वेनवास्तवतयाक्वाप्यविद्यमानानामारोपायोगात् । अंततोगत्वा निरसनीयतयाप्रधानादौप्रतिषेधपूर्वकंब्रह्मण्येवतत्स्थापनार्थमधिकरणनिर्माणप्रयासेप्रयोजनाभावाच्च ॥ अध्यारोपापवादौतुप्रागेवव्युदस्तौ ॥ श्रुतिषुपूर्वंसामान्यतयाधर्मनिषेधस्यतत्तत्रैवानुपदं लोकाप्रसिद्धधर्मविशेषनिरूपणस्यचसर्वत्रोपनिषत्सुप्रायेणदर्शनेनसूत्रकृताऽपि प्रकृतैतात्त्वसूत्रेतथाकथनेचप्रागध्यारोपस्ततोऽपवादइतिपरपक्षस्यसुतरामसिद्धेरितिदिक् ॥ यच्चब्रह्मनिरूपकेत्यादितदर्थमित्यंतं,-तन्न; एकत्रैकस्यान्यत्रान्यस्यप्रयोजनस्यमनसैवकल्पनेऽप्रामाणिकगौरवानपायात् । तथाकल्पनानांप्रहस्तवादादिषुमुहुर्निराकृतत्वाच्च ॥ तथाहितत्रारंभएवसर्ववेदांतानांब्रह्मैकपरत्वंब्रह्मरूपस्यशब्दैकगम्यत्वचव्यासाभिप्रेतमुक्त्वोच्यते "एवं सत्युपाधिपक्षस्तदास्थायदिश्रुतिरुपोद्बलयेत् । तदेवतावदसंभवि । यस्माद्यतोवाचइतिश्रुतौ नवाड्मात्राप्राप्यत्वमुच्यते । किंतुलौकिकवागप्राप्यत्वं मनःसहभावोक्तेः । वेदस्यापौरुषेयत्वे ईश्वरनिःश्वासत्वेवामनःसहभावाभावात् । "दूतीरिवत्वंमनसोऽसी" तिश्रुत्यालौकिकवाच एवतथाकथनात् ॥ "अनृतंवैवाचावदति । अनृतंमनसाध्यायती" त्यादावपि तथादर्शनात् अनिरुक्तश्रुतिविरोधाच्च ॥ इदमित्थंतयाकथितस्यनिरुक्तपदार्थत्वेन तद्भिन्नस्यानिरुक्तत्वात्सर्वथाऽनुक्तत्वस्यतेनैवनिरासात् ॥ अतोनवाड्निवृत्तिश्रुत्यातदुपोद्बलनम् ॥ किंच लौकिकवाचोऽप्राप्यैवनिवर्ततेश्रुतयोऽपिस्वशक्त्यनुसारेणैववदंतीत्यौपनिषदत्वमेवसंगतंभवति, नतु तथा; अब्रह्मपरत्वापादकत्वात् ॥ उक्तश्रुत्योर्विवादकवलितत्वेनबाधकयुक्त्यंतरंविनातदर्थानिश्चयेताभ्यामन्यासांश्रुतीनांतात्पर्यावरस्याशक्यवचनत्वात् ॥ नचतौल्यमितिवाच्यं, एवंचवृत्तेद्वैगुण्यात् । नचसर्वेषांवैदिकशब्दानांब्रह्मवाचकत्वाभावात् वाक्यैकशक्तेरनंगीकाराच्च नवृत्तेर्द्वैगुण्यमितिशंक्यं; अग्रेऽथर्वशिखाविचारे उपपादयिष्यमाणत्वात् ॥ वाक्यैकशक्तेर्वैयाकरणसिद्धांतसिद्धत्वाच्च ॥ एवंसर्वश्रुत्यविरोधाच्च ॥ अतएवसत्यंज्ञानमित्यत्रलक्षणाप्य-

नुपपन्नैव; प्रमाणाभावात् । वाक्येनयावद्ब्रह्मत्वज्ञानाभावात्तद्व्यावृत्तब्रह्मणोपिज्ञानाभावे
वाक्यस्याबोधकताप्रसक्तेश्च ॥ लक्ष्यत्वस्यवाच्यत्वव्याप्तत्वेनप्रत्युतवाच्यत्वस्यापरिहार्य-
त्वाच्च ॥ ननुलक्ष्यत्ववाच्यत्वयोर्नव्याप्तिः ॥ हेतोरुपहितत्वात् । लक्ष्यत्वेसधर्मकत्वस्यो-
पाधित्वादितिचेत्—न; तस्यतल्लक्षणानाक्रांतत्वेनप्रकृतेउपाधित्वस्याशक्यवचनत्वात् ॥
नच शुद्धेब्रह्मणिलक्ष्यत्वसधर्मकत्वयोः साहचर्याभावादस्त्युपाधिलक्षणाक्रांतत्वमितिवाच्यं;
साहचर्याभावस्याभ्युपगमैकशरणत्वेनप्रतिवाद्यनादरणीयत्वात् । अतस्तेनैवसधर्मकत्वस्या-
नुमानसंभवात् । ततःसिद्धेतस्मिंस्तेनचवाच्यत्वेसत्यज्ञानादिपदानांतात्पर्यानुपपत्त्यभावा-
ल्लक्षणायाबीजाभावेनाशक्यवचनत्वात् । लक्षणायावाशक्यसंबंधरूपत्वेनद्विनिष्ठत्वाद्धर्माप-
त्त्याघट्टकुट्यां प्रभाताच्च ॥ नचोक्तहेतोरप्रयोजकत्वंशंक्यं; व्याप्तेःसर्वजनीनत्वात् । यदपि
किंचश्रुतिविरोधादि न्यायविरोधादित्यंततदपितुच्छम् । विश्वतश्चक्षुरुतासीनदूरव्रजनादेर्लोका-
प्रसिद्धतयाविशेषद्वैविध्यसमूलतासंशयस्यानौचित्यात् । ततएवनिषेधेषुसामान्यनिषेधेन
विधिषुविशेषविधानेनचभिन्नविषयतया निषेधानांप्रसिद्धविषयनिषेधकतायाःप्रागेवव्यवस्था
पितत्वाच्च (प्रत्यासन्नप्रतियोगिनंविहायाऽप्रत्यासन्नप्रतियोगिनिषेधेन्यायविरोधा) दित्यु-
क्तिस्तुसुतरामसंगता ॥ तथासतिप्रधानस्यतत्कारणत्वादेश्चाश्रौततायाःकेवलानुमानिक-
तायाःस्मार्ततायाश्चानेकत्रसूत्रेषुकथनेनश्रुत्यर्थविचारशास्त्रेऽप्रत्यासन्नस्यतस्यनिषेधईक्षत्यादि-
ष्वुत्तराधिकरणेष्वसंगतःस्यात् ॥ किंतु श्रुत्युक्ततेजोऽबन्नलक्षणाऽजायाअन्यस्ययस्यकस्यचि-
द्वाश्रुत्युक्तस्यनिषेधस्तेषुकल्प्यतां प्रत्यासन्नत्वात् । किंच "नहिंस्यात्सर्वाभूतानि" त्यत्रा-
पिश्रुत्युक्ततयाप्रत्यासन्नस्याग्नीषोमीयादेरेवहननस्यनिषेधोवक्तव्यः । नतुलौकिकपशूनां
रागप्राप्तहननस्य; अप्रत्यासन्नत्वात् ॥ तर्ह्यस्तुमायिकत्वस्योपाधित्वमितिचेत्,–ओमिति
ब्रूमः ॥ परंसत्यज्ञानादिपदलक्ष्यत्वंकुतोऽवगतं ? ॥ नश्रुतेः; अप्रसिद्धत्वात् । नापिश्रुता-
र्थापत्तेः; परिहृतत्वात् । नाप्यन्यतः; लौकिकानांब्रह्मधर्मविचारेअप्रामाण्यात् अलौ-
किकानामभावाच्च ॥ अतउक्तवाक्येलक्षणानुपपन्नैवेतिदिक्" इत्यादि ॥ एवमुपासना-
प्रकरणेषुविशेषाणामुपासनाद्यर्थत्वेपितेषामयाथार्थ्यत्वंश्रुत्यनभिप्रेतमेवेति प्रहस्तवादभाष्य-
प्रकाशादिषुविस्तरेणनिर्णीतमस्माभिरपिदिङ्मात्रेणप्रागप्रदर्शितम् ॥ एवंचश्रौतपश्वालंभन-
मेवप्रतिषिध्यपयाकामंलौकिकपशुहननमभ्यनुज्ञातंमंतव्यंभवतीतिमहानेवोपप्लवः ॥ नच
विधिवाक्यवैयर्थ्यापातान्नैवमितिवाच्यम् ॥ तर्ह्यत्रापितद्वैयर्थ्यापातात्तथावक्तुमशक्यत्वमि-
त्यापत्तेः ॥ अत्रविधीनामध्यारोपार्थमनुवादकत्वेनत्वग्नीषोमीयालंभनादिविधयोपिनहिंस्या-
दित्यस्य प्रतिषेध्यविषयसमर्पकाःप्रसजनार्थमनुवादकाभविष्यंति । एवं "नब्राह्मणंहन्यात् ।
नसुरांपिबेत्" इत्यादावपि "ब्राह्मणोब्राह्मणमालभेत" इतिविहितहननस्यैवसौत्रामणीसुरा-
ग्रहादेरेवचनत्वापरत्यासन्नतिषेधमन्यतांभवान् ॥ लोकेविद्यमानानांब्राह्मणानांद्वेषादिनाह-
ननंलौकिकसुरापानंगतोयथाकामंनानेनभवानाच्छंधादभ्यनुजानातु ॥ अनयादिशाऽन्यदपि
दूषणसहस्रमूह्यम् ॥ यत्तुअन्ययानतत्रेत्यादिभन्यथाक्रियेतेत्यंतमुक्तं,–तत्तु श्रुतिसूत्रार्थाज्ञा-
नात् ॥ संदेवसत्सुन्दरयिदुंमायामात्रसूत्रमाभ्यस्यांशंकेचिददरनोऽर्थंतथानुवदंति तत्रमूल
इत्यादिना ॥ अयमाशयः–इदंहियाज्ञवल्क्यबृहदारण्यकेषष्ठाध्यायेज्योतिर्ब्राह्मणाख्यतृतीयब्राह्मणे

(पृष्ठ ७५०) "तस्यवाएतस्यपुरुषस्यद्वेएवस्थानेभवतइदंचपरलोकस्थानंचसंध्यंतृतीयं
स्वप्नस्थानंतस्मिन्संध्येस्थानेतिष्ठन्नेतेउभेस्थानेपश्यतीदंचपरलोकस्थानंचे" त्युपक्रम्य "नत-
त्ररथानरथयोगानपंथानोभवंत्यथरथान् रथयोगान्पथःसृजत" इत्यादिपठ्यते ॥ एतच्चतुरं-
क्षण्यां तृतीयस्यद्वितीयपादारंभेसूत्रे (१) "संध्येसृष्टिराहहि" इत्यादिचतुःसूत्र्याविचा-
रितं ॥ तत्रस्वप्नेपरलोकस्थानागेतल्लोकस्थानांचोभयेषांदर्शनसंभवात्संधौभवत्वेनसंध्य-
त्वम् ॥ तत्रसृष्टेर्वास्तवत्वंसूत्रद्वयेनपूर्वपक्षीकृत्यमायामात्रादिसूत्रद्वयेनतस्याःकेवलमायि-
कत्वमेवनिर्धारितं ॥ एवंसति अन्यथानतत्रेत्यादिना यदापादितं तदिष्टापत्तितया स्वीकि-
यते । नतत्ररथाइत्यादिनाहिलौकिकारास्तथा रथादयएवस्वप्नेप्रतिषिध्यंते तेषामेवतत्राप्रोप-
स्थितिकत्वात् ॥ नहितत्रेत्यनेनपरामृष्टेस्वप्नेस्वाप्निकानांनिषेधःशक्योवक्तुं । वदतोव्याघात
पातात् ॥ अतएवसंध्यासूत्रेश्रीमद्भाष्यकारचरणैः "नचेयमेवसृष्टिस्तत्रदृश्यते । नतत्ररथा-
इत्यादिनानिषेधात्" इतिस्पष्टमुक्तम् । अग्रेपिसर्वानुभाष्यानांनिषेधोव्याख्यासुदृश्यते ॥
तस्मादसन्मतमवुध्वोत्स्वप्नायितं ॥ ननुप्रत्यासन्नानांस्वाप्निकानांनिषेधेसत्येवतेषांमिथ्यात्वं
सिध्येत् । लौकिकानांनिषेधेतुसृज्यमानानांपारमार्थिकत्वंबाह्यसृष्टाविवतत्रापद्येत । मायि-
कत्वगमकाभावात् । तथाचसूत्रविरोधइतिचेन्मैवम् ॥ स्वाप्निकानांप्रतिषेधप्रतियोगित्वेत-
तएवतेषांमायिकत्वफलेनचसूत्रकाराभिप्रेतेसतिमायामात्रंतुनिषेधादित्येवसूत्रयेत् । लाघ-
वान्स्पष्टश्रुत्यनुमहाच्च ॥ ननुगुरुतराश्रुतहेत्वंतरपर्यंतमनुधावेत् ॥ हेतूकरोतितुनिषेधं
विहायकार्त्स्न्येनानभिव्यक्तस्वरूपत्वं, तस्मान्नतथा ॥ नन्वेवमपिश्रुतोसृष्टिकथनाद्विरो-
पाद्बाह्यप्रपंचवत्सत्यत्वंकुतोनापद्येतेतिचेन्न ॥ वैदिकैःश्रुत्यक्षरलभ्यस्यैवमुख्यतयामंतव्य-
त्वात् ॥ अत्रहिश्रुतौसृष्टिरेवकेवलोच्यते । नतुतेषां सत्यत्वंब्रह्मात्मकत्वंवा ॥ प्रपंचस्यतु
श्वेतकेतुविद्यायां "तत्तेजोऽसृजत" इत्यादिनास्पष्टंसृष्टिमुक्त्वा "ऐतदात्म्यमिदंसर्वंतत्सत्यं"
इति तैत्तिरीयब्रह्मवल्ल्याम् "इदंसर्वमसृजत" इतिसृष्टिमुक्त्वा "तदात्मानꣳ स्वयम-
कुरुत । यदिदंकिंचतत्सत्यमित्याचक्षते" इति । एवमादिषुब्रह्मात्मकत्वंसत्यत्वंचानुपद-
मुच्यते ॥ नत्वेवंप्रकृते । तस्मान्नतथा ॥ नचविहारान्यथानुपपत्त्यासत्यताशंक्याऐंद्रजालि-
कनटकल्पितै.सामाजिकानामिवमहामायाविस्वाद्भगवताकल्पितैर्मायिकैरेवजीवस्याविहारो-
पपत्तेः । तथाचायं (अ० ३ पा० सू० ३) "मायामात्रंतुकार्त्स्न्येनानभिव्यक्तस्वरू-
पत्वा" दितिसिद्धांतसूत्रस्यार्थः ॥ भगवतोव्यामोहिकाशक्तिर्मायाप्रथमस्कंधादिषुमायां
चतदुपाश्रयांयया संमोहितोजीवइत्याद्युक्तेः ॥ संध्येसृज्यमानंसर्वंमायामात्रंमायैकोपा-
दानकं तदात्मकं ॥ मात्रपदाद्रथादिनिर्माणेकाष्ठलोहादेस्तत्तन्नियतोपादानस्यव्यावृत्तिः ॥
अत्रहेतुः ॥ कार्त्स्न्येनानभिव्यक्तस्वरूपत्वादिति ॥ वास्तवप्रपंचवस्तूनांस्वरूपाभिव्यक्तौ
कार्त्स्न्यंहिदेशःकालोविषयसंनिधिरिंद्रियव्यापारोबाधाभावश्चेतिबोध्यम् । स्वाप्निकवस्तूनां
तुतयात्वाभावादित्यर्थः ॥ तथाहि नात्रदेशकालयोर्नियमः ॥ अल्पकालेबहुकालस्यदूर-
देशस्थस्यचानुभवात् ॥ ज्योतिःशास्त्रोक्ततत्तद्देशनियतदिनमानरात्रिमानाद्यभावात् ॥
नापिविषयसंनिधिः । अतिस्थूलानांकरिगिरिसरित्पतिप्रभृतीनांशरीरांतर्मानस्यानुपपत्तेः ॥
नापींद्रियव्यापारः, पंग्वंधबधिरादेरपिधावनदर्शनश्रवणाद्यनुभवात् ॥ जागरोत्तरंबाधश्च-

स्पष्टएवतत्रैव "सयत्तत्रकिंचित्पश्यत्यनन्वागतस्तेनभवती" तिश्रुतेश्च ॥ तस्मादैंद्रजालिक- सर्गादिवन्मायिकं ॥ ननुतथापिश्रुतेरत्रैवमेवाभिप्रायःकथंज्ञेयइतिचेत्,-उच्यते-तत्रैव "उतेव स्त्रीभि सहमोदमानोजक्षदुतेवापिभयानिपश्यन्" एवमादाविवशब्दभ्यासात्स्त्र्यादिवस्तूनां मोदजनक्षणादिक्रियाणांचप्रतीतिमात्रत्वमवास्तवत्वंचगम्यते ॥ इवशब्दोऽत्रसंभावनार्थः- जुगोपगोरूपधरामिवोर्वीम् । 'लिंपतीवतमोऽगानी'त्यादिवत् ॥ किंच "ताआस्यैताहिता- नामनाड्य" इतिनाडीविशेषानुपक्रम्यश्राव्यते ॥ "अथयत्रैनंघ्नंतीवजिनंतीवहस्तीवविच्छाय यतिगर्त्तमिवपतति ॥ यदेवजाग्रद्भयंपश्यतितदत्राविद्ययामन्यतेऽथयत्रदेवइवराजेवाहमे- वेदःँसर्वोस्मीतिमन्यते सोऽस्यपरमोलोक" इत्यादि ॥ अत्रभविद्ययामन्यतइतिमध्य- मणिवदुभयत्रस्वाप्निकस्यदु:खस्यसुखस्यचदर्शनेपूर्वापरवाक्योक्तेसंबध्यते तेनमायाहेतु- कत्वंप्रतीतिमात्रत्वंचस्फुटमेवसिद्धं ॥ परदेहलीदीपवदुभयत्रव्याख्याशरणः संदिग्धइतित- मनुक्त्वातस्यापिनिर्णायकत्कात्स्न्येंनानभिव्यक्तस्वरूपत्वमेवहेतुतयोक्तं ॥ देवताज्ञादिकंतु- तत्रापिसत्यमितितुमहाभारतादिप्रमाणपुरःसरंदर्शितंप्राक् ॥ तस्मान्नैतत्सूत्रबलाच्छ्रुतिरन्यथा नीयते किंतु श्रुतेर्गूढार्थएवसंदेहवारणायात्रसूत्रकृतोच्यते । तत्वतुसर्वमायिकं सूत्रकृतातु- स्वप्नस्यैवदतथात्वंसाध्यते ननुबाह्यप्रपंचस्यातत्त्वसूत्रविरोध.स्पष्टएव ॥ एवंसविशेषनि- र्विशेषश्रुतीनामपिगूढार्थे सर्वसंदेहापाकरणपूर्वकप्रकृतैतावत्त्वादिसूत्रैर्निर्णीतइतितत्रापिन- सूत्रबलाच्छ्रुतयोऽन्यथानीयंतेसूत्रार्थास्तुसंक्षेपत.प्रकाशिताः पुरैव ॥ तस्मादस्माकंनकोपि- श्रुतिस्मृतिन्यायविरोधगंधोत सकलंमंगलंनः ॥

इति पंचमः श्लोकः ॥

अग्रेच विष्णौजीवगकर्तृतादियद्निप्राप्तमित्यादिश्लोकेनजीवसंबं- धियत्कलादिकंतदेवनिष्कलमित्यादिवाक्यैर्निषिध्यतइतिहितदभ्यु- पगमस्तत्रतावत्सप्रष्टव्यःजीवमतंगंतृत्वादिकं ईश्वरे नप्राप्तं वा प्राप्तं ? ॥ नाद्यः; प्राप्तंहिप्रतिषिध्यतइतिन्यायात्प्रतिषेधएवनसंभवति ॥ यदि जीवस्य "सर्वंखल्विदंब्रह्म" त्यादिवाक्यैरभेदबोधनाज्जीवगतकर्तृत्वं प्राप्तंतदातस्यनिषेधोनुपपन्नः विशिष्टतद्वत्ताबुद्धेस्तदभावबत्ताबुद्धिप्र- यंधकत्वादित्यादिदोषाउद्भाविताः ॥ अत्रोच्यते-"एतस्यैवानंदस्यान्या- निभूतानिमात्रामुपजीवंति ॥ आसीनोदूरंब्रजती" तिवाक्यपर्यालो- चनया "निष्कल" मित्यादिनिषेधवाक्यानांसामान्याभावबोधका- नामप्युपसंहारेणविशेषाभावबोधकत्वमितिपूर्वमुक्तंतत्रविशेषाभाव- स्यापिविशेषनिषेधरूपस्यतत्प्राप्तिसापेक्षत्वाद्विशेषप्राप्तिरपेक्षितेतिचे- दित्थं कार्ययोकरणयोरभेदात्कार्ययोर्जडजीवयोर्धर्माअपिकारणेस्यु- रित्यापाततःकार्यधर्माणां लौकिकत्वादीनांकारणे प्राप्तानांप्रतिषेधः क्रियते ॥ नचकार्यकारणयोरभेदेकार्यगतधर्माणांकारणेसत्वात्तन्नि- षेधोनसंभवति पूर्वोक्तप्रतिबध्यप्रतिबंधकभावानुरोधादितिवाच्यं,

सत्यमस्त्यभेदस्तथापिकार्यकारणभावकृतोभेदोपिभगवद्विहारार्थंजातः स्वीक्रियते, अन्यथेदंकारणमिदंकार्यमितिव्यवहारोनस्यात् ॥ वैलक्षण्यंविनाताहशव्यवहारासंभवात् ॥ यथा घटगतकंबुग्रीवादिमत्त्वजलाहरणोपयोगित्वादीनां मृदिनिषेधस्तथालौकिकधर्माणांब्रह्मण्यपि निषेधे नकोपिविरोधः ॥ तद्वत्ताबुद्धेस्तदभाववत्ताबुद्धिप्रतिबंधकत्वं यदुक्तं तदपि नसंभवति ॥ भूतलादावेकत्रघटादिनिश्चयेऽपिवह्निमत्स्थलेतदभावबुद्धिर्जायतएव ॥ एवंपर्वतत्वसामानाधिकरण्येनवह्निमत्तानिश्चयसत्त्वेपि तत्सामानाधिकरण्येनतदभाववत्ताबुद्धेरुत्पादस्यदृष्टत्वान्नताहशप्रतिवध्यप्रतिबंधकभावःसंभवति किंतुतद्धर्मपर्याप्तावच्छेदकताकविशेष्यतानिरूपिततद्धर्मव्यापकप्रकारीभूतपदार्थप्रतियोगिकतत्संबंधावच्छिन्नतद्धर्मावच्छिन्नप्रकारताशालिनिश्चयस्तद्धर्मावच्छिन्नतत्संबंधावच्छिन्नप्रतियोगिताकाभावप्रकारतानिरूपिततद्धर्मावच्छिन्नविशेष्यताशालिबुद्धिंप्रति प्रतिबंधकः सचनप्रकृतेस्तीति ॥ केचित्तु प्रतियोगितावच्छेदकविशिष्टप्रतियोग्यारोपोभावप्रत्ययहेतुः ॥ अतएव संसर्गारोपजन्यप्रतीतिविषयाभावएव संसर्गाभावउच्यते । तथाच जीवब्रह्मणोरभेदेजीवगतधर्माणांब्रह्मणिप्राप्तिरूपआरोपोऽभावरूपनिषेधोपयोग्येवेतिनकाचिदनुपपत्तिरित्याहुः ॥ यत्तु (अन्यथानेतिनेतीतिवाक्यैर्लौकिकजगतस्तत्रनिषेधेयतोवाइत्यादिवाक्यैरानंदमयस्यजगत्स्वीकारस्तत्रत्वन्मतेस्या) दित्यादिप्रलपितं,–तदपिपरमताज्ञानमूलकत्वात्तुच्छं, नहिनेतिनेतीतिवाक्यैर्लौकिकजगतोनिषेधःपरैरभ्युपगतस्तथाहिबृहदारण्यकेमूर्तामूर्तब्राह्मणे "द्वेवावब्रह्मणोरूपे" इत्युपक्रम्याधिदैवताध्यात्मभेदेनद्वेधापंचभूतान्युक्त्वा "अथातआदेशोनेतिनेती" तिनिषेधमाह—तत्रकिंद्वौनञौप्रकृतमर्थंगमयतइतिस्थापनमात्रंद्वयोःक्रियते किंवा वीप्सयासर्वंपूर्वोक्तंनिषेधति उत रूपद्वयमेवनिषेधति अथवा पूर्वंप्रतिषेधोभूतराशिंनिषेधति द्वितीयोवासनाराशिम्इत्यादिशंकायांश्रुतिःस्वयमेवविवृणोति— "नह्येतस्मादितिनेत्यन्यत्परमस्ती"ति ॥ अत्रव्याख्येयेवाक्ये अथशब्दःप्रक्रमभेदकः । अतइतिहेतौपंचमील्यब्लोपेवा उक्तंरूपद्वयंहेतूकृत्यआदेशः ताभ्यांकार्याभ्यांरूपाभ्यांव्याप्यस्यब्रह्मणउपदेशः ॥ नेतिनेतीतिपूर्वइतिशब्दःप्रकारवाची । तथाचसमवायित्वाद्ब्रह्मपंचभूतानिभवति इतिनएवंप्रकारकनेत्यर्थः ॥ तदेतद्व्याख्यानेनसाधयतिनह्येतस्मादित्यनेननभवत्येनब्रह्मताहशं ॥ हियुक्तोयमर्थः । युक्तत्वेहेतुः-एतस्मादिति ।

यत एतस्माज्जातंतत् ॥ नहिकार्यकारणयोरेकःप्रकारःसंभवति अतो-व्याख्यानात्प्रथमेननेतीत्यनेनप्रकारनिषेधोपसंहारः ॥ द्वितीयंनेतीति-व्याख्याति— अन्यत्परमस्तीतिभिन्नप्रकारत्वेपिनतुसमवायित्वमात्रं किंत्वन्यत्परमस्ति ॥ तथाच द्वितीयेननेतीत्यनेन एतावत्तानिषेधोप-संहारः ॥ तथाचात्रनसर्वनिषेधोनापिरूपद्वयनिषेधः यदिसर्वस्यैव-जगतोनिषेधःस्यात्तदाव्युत्पादनपूर्वकंप्रतिपादनंव्यर्थंस्यात् ॥ अतः प्रकारैतावत्तयोरेवनिषेधः ॥ एवंचनेतिनेतीतिवाक्येजगतोनिषेधे यतो वाइत्यादिना आनंदमयस्यजगतःस्वीकारापत्तिरित्यादिप्रलापस्य कोऽवसरः ॥

सहस्राक्षेविष्णौजीवगकर्तृतादीतिषष्ठश्लोकमिदानीमुक्तन्यायमित्यादिनासर्वात्मेतीत्यं-तेनव्याख्यानेनसहितं ॥ अग्रेचविष्णावित्यादिना अवसरएवनास्तीत्यंतेन खंडयिष्यंतः प्रथमं इदानीमित्यादितव्यायावतारइत्यंतंभागंपरिहरति—अग्रेचेत्यादिनाकोवसरइत्यंतेन ॥ अत्रेदंज्ञेयं—प्रथममसदनुवादोऽसन्मताज्ञानात् अस्माभिर्जडसंबंधिकलायानिष्कलवाक्ये-नप्रतिषेधस्यांगीकारेपिजीवसबंधिगंतृत्वस्यासीनपदेन प्रतिषेधोनस्वीक्रियते ॥ किंत्वासन्-दूरव्रजनयोर्युगपदेकस्मिन्विरुद्धयोरपिविचित्रशक्तिमत्यलौकिकेब्रह्मणिसदासत्वमात्रंतेनक-ठवाक्येनबोध्यते ॥ जडसंबंधिकलातुस्वाधारैन्यूनत्वापादिका ॥ काष्ठपाषाणादेःकस्मि-श्चिदंशेपृथग्भूतेऽवयविनितावदंशन्यूनतादर्शनात् ॥ नतथाब्रह्मणिबह्वंशोद्गमेप्यन्योन्या-भावात् ॥ अतएवसूत्रकृताद्वितीयस्यप्रथमेकार्यकारणभावविचारे (सू. २६) "कृत्स्न-प्रसक्तिर्निरवयवत्वशब्दकोपोवा" इतिपरिणामवादे "निष्कलंनिष्क्रियं, दिव्योह्यमूर्तः" इत्यादिरूपस्यैवशब्दस्यकोपमप्याशंक्य (सू. २७।२८) "श्रुतेस्तुशब्दमूलत्वात् ॥ आत्मनिचैवंविचित्राश्चहि" इतिवेदैकवेद्यत्वाद्विचित्रशक्तिकत्वाच्चब्रह्मणःसमाहितं ॥ तेनशब्दबोधितविभागादिकंननिष्कलमित्यादिनिषेधस्यविषयः अपितु, लोकेजडादिषुदृष्टमेव तत्तस्यविषयइतिसिध्यति ॥ तस्मादस्माकमसमतमनूद्यते ॥ अतोजीववत्कर्तृत्वंपरस्यनिर-स्यतइत्यत्र "नतस्यकार्यं"मित्याद्युदाहार्यं ॥ यच्चतत्रतावदित्यादिनिषेधासंभवादित्यंतं,— तन्न' अप्राप्तस्यापितावत्प्रतिषेधादृश्यंते ॥ यथा "नपृथिव्यामग्निश्चेतव्योनांतरिक्षेनदिवि" इत्यादयः ॥ अतएवजैमिनिनाप्रथमस्यद्वितीये (सू ५) अभागिप्रतिषेधमुक्त्वा (सू. १८) "अंत्ययोर्यथोक्तं" इत्यप्रसक्तप्रतिषेधः स्वीकृतः ॥ अंत्ययोरभागिप्रतिषेधानित्य-संयोगयोरित्यर्थः ॥ स्पष्टंचेदंतत्रशावरभाष्ये—"असतिप्रसंगेप्रतिषेधोनित्यानुवादः" इति ॥ अथसिद्धांतरीत्यादेवादीनामपिव्यासेनकर्माधिकारस्य (अ० १ पा० ३ सू० २६) "तदु-पर्यपी"त्यादिनास्वीकारात् तेषांप्राप्तस्यचयनस्यायंप्रतिषेधइत्यस्मदाचार्यैरुक्तपूर्वमीमांसा-भाष्यानुरोधादुच्येत तदापिप्रकृतेनदोषः, प्राप्ते सत्यात् ॥ तथाहिलोकेऽवगतसामर्थ्यः शब्दोवेदेपिबोधकइतिभट्टवार्तिकानुसरणेलोकेगृहीतशक्तिकानामेवशब्दानांवेदेप्यर्थबोध-जनकत्वदर्शनेननिषेधाभावेसतिवेदेनबोध्यमानंपरस्यकर्तृत्वादिकमपिवस्त्वंतरसमवधान-

सापेक्षंपरिच्छिन्नमेवात्रधार्येत जीवेतथैवदर्शनात् ॥ अतःप्रासानामेवजडजीवधर्माणां-
लौकिकार्थेसंभवच्छक्तिकानेयशब्दानुच्चार्यप्रतिषेधः "अस्थूलमनणु नतस्यकार्यं" इत्यादि-
नाकृतः ॥ तेनालौकिकानामप्रतिषिध्यमानानांसर्वकर्तृत्वविश्वतश्चक्षुष्ट्वाल्पणीयस्त्वातिमही-
यस्त्वादीनांनहानिः ॥ प्रसक्तंहिप्रतिषिध्यतइतिन्यायेप्रसक्तंप्रसंजनार्हमिहमंजूषाकारादयो-
व्याचक्षते ॥ ननु सर्वंखल्विदमित्यादिवाक्यैरभेदस्यावबोधनेनजडजीवधर्माअपिब्रह्मधर्माब्रह्म-
रूपाएव ॥ अतोविशिष्टतद्वत्ताबुद्धेस्तदभानवत्ताबुद्धिप्रतिबंधकत्वात्कथंनिषेधइतिचेत्-
सत्यं; कार्यधर्माअपि ब्रह्मधर्माएवपुष्पादिगंधाइवभूगंधाः ॥ स्पष्टंचेदं (अ० २ पा० ३ सू०
४१) "परात्तुतच्छ्रुतेः" इत्यधिकरणेब्रह्मगतकर्तृत्वस्यांशएवजीवेऽनुवृत्तइति तथापिब्रह्मा-
साधारणधर्माअपरिच्छिन्नानिरस्तसाम्यातिशयाजडजीवयोर्नसंतीति तेषामसाधारण्यस्था-
पनायलौकिकानांप्रतिषेधःसंगतः ॥ सचब्रह्मधर्मेषुतावन्मात्रत्वंनिराकर्तुमेवप्रवृत्तोनतुकार्य-
धर्माणांसर्वथाब्रह्मावृत्तित्वंब्रह्मभिन्नत्वंवासाधयितुं ॥ यथासप्तमस्कंधाष्टमाध्याये (श्लो०
१८) 'अदृश्यतात्यद्भुतरूपमुद्वहन्मध्येसभायांनमृगंनमानुषम्' इतिमृगत्वमानुषत्वयोः
प्रतिषेधःअग्रे हिरण्यकशिपुनाकृतो (श्लो० १९, "नायंमृगोनापिनरः" इतितयोःप्रतिषेध-
श्चान्यतरमात्रत्वमपाकर्तुमेवनतुसर्वथातत्रतदभावंबोधयितुं ॥ विचित्रमहोकिमेतन्मृगेंद्र-
रूपमित्याद्यग्रिमग्रंथास्वरोधात् किंतुलोकेनियतव्यधिकरणतयाविरुद्धयोरपितयोस्तस्मिन्रूपे
समावेशोदर्शितः ॥ तद्वत्तंनशुष्केणनचार्द्रेणेत्यादिरचलोकेव्यधिकरणतयानिश्चितानामपि-
सर्वधर्माणांब्रह्मणिसामानाधिकरण्यमस्थूलमित्यादिनिषेधाशयगोचरः ॥ एतेनापितदीय-

विष्णौ जीवगकर्तृतादि यदि नप्राप्तं निषेध्य कथं
प्राप्तं चेत्प्रतिबन्धतोन तदसत्ताधीर्न योगान्तरैः ॥
सर्वैरेव हरौ यतस्तत्र जगद्योगैः समस्तात्मनि
आविर्भावनिषेधने क सनचेत्सर्गोरमसर्गाश्रये ॥ ६ ॥

इदानीमुक्तन्यायमनाश्रित्याऽपि निर्विशेषश्रुत्यादेर्युक्त्यन्तरेण तदुक्तार्थपरत्वं खण्ड-
यति-विष्णाविति ॥ जीवादिसंबन्धि यद्गन्तृत्ववक्त्रादिकं तदेवासीनोदूरंव्रजतिनिष्कलमित्याद्या-
वासीनादिपदैर्निषिध्यते इतिहि तदभ्युपगमस्तत्र तावत्सप्रष्टव्यः किमिदंजीवादिगतगन्तृत्वा-
दिकम्, ईश्वरे न प्राप्तम् उतप्राप्तं नाद्य इत्याह-यदिनप्राप्तमिति ॥ प्रसक्तंहिप्रतिषिध्यतेइति
न्यायादितिभावः ॥ जीवेत्युपलक्षणं जडस्यापि ॥ ननुसर्वंखल्विदंब्रह्मेत्यादिभिः सर्वाभेदबो-
धकैर्वाक्यैर्जगदिव तदन्त पातिजीवादिसंबन्धिगन्तृत्वादिकमपि प्राप्तमेचेतिकुतोनेत्युच्यते
इति द्वितीयपक्षमाशङ्क्याह-प्राप्तंचेदिति ॥ प्रतिबन्धतइति ॥ विशिष्टतद्वत्ताबुद्धेस्तदभाव-
वत्ताबुद्धिप्रतिबन्धकत्वात्सर्वंखल्विति सर्वशब्देन विशिष्य तत्तद्धर्मोपादानेनाऽभेदबोधने
तन्निषेधासम्भवात् ॥ अन्यथा नेतिनेतीतिवाक्यैर्लौकिकजगतस्तत्र निषेधे यतोवाइत्यादिवा-
क्यैरानन्दमयस्यजगतः स्वीकारस्तत्र त्वन्मते स्यात् ॥ द्विविधवाक्यबलेन गन्तृत्वादेरिव
जगतोऽपि द्वैविध्यसंभवात् ॥ ओमितिचेत् लौकिकजगतःकिमुपादानं ॥ ब्रह्मैवेतिचेत्तन्निषे-
धानुपपत्तिरतएवनजगद्विषयेद्वैविध्यकल्पनेति चेद्गन्तृत्वादिषुजीवधर्मेषुतन्न्यायावतारः ॥

पूर्वश्लोकोक्तंसर्वेत्रनञ स्वान्वयितावच्छेदकधर्मावच्छिन्नप्रतियोगिताकाभावबोधकत्वंपुनरपास्तंवेदितव्यं ॥ फेननृसिंहादावाद्रत्वशुष्कत्वनरत्वमृगत्वादेःसामान्याभावस्याशक्यवचनत्वात् ॥ अतएवगजेंद्रस्तथादौनस्त्रीनपंढइत्यादिनातत्तन्मात्रत्वंप्रतिषिध्यनिषेधशेषस्याशेषरूपत्वमुक्तमित्यादिप्रागेवप्रापंचि ॥ अत कार्यरूपैकांशावच्छेदेनकार्यधर्माणामपिब्रह्मण्येवसत्वेतेषामपिब्रह्मरूपत्वेचनकोपिशंकावकाशः ॥ नाप्युक्तप्रतिबंधतःप्रतिषेधासंभवः; अग्रावच्छेदेनकपिसंयोगवत्ताबुद्धेर्मूलावच्छेदेनतदभाववत्ताबुद्धिंप्रतिप्रतिबंधकत्वाभावात् । इमेपरमाणवोनशतंनसहस्रंकिंत्वसंख्याताइत्यादिप्रतिषेधदर्शनाच्च ॥ एवंसिद्धांतसंमतोवृद्धिह्रासभाक्त्वप्रकृतैतावत्त्वोभयव्यपदेशादिसूत्रसिद्धस्तदविरोधप्रकारउक्तः ॥ कार्यधर्माणांब्रह्म धर्मांशत्वादेवबृहदारण्यके (अ० ६ ब्रा० ३ पृ० ८१६) "एतस्यैवानंदस्यान्यानि भूतानिमात्रामुपजीवंति" इत्यादिश्रुतयःसंगच्छंते ॥ मूलेतुमध्यमाधिकारिबोधनायैकदेशिसमतंपंचसूत्रीसिद्धंजडजीवधर्मयो.सर्वथा ब्रह्मण्यसत्वपक्षमपि एकीकृत्यपरोक्तंपरिहरंति-इत्थमित्यादिना ॥ यथाघटगतेतितत्संस्थानविशिष्टायास्तदेवते धर्माइतिमृत्सामान्यसाधारणधर्मत्वाभावादेवमृदितन्निषेधइति भावः ॥ तद्धर्मपर्याप्तेत्यादि ॥ यथापृथिवीसमवायेनगंधवतीति निश्चय सासमवायेनगंधाभाववतीतिबुद्धेः प्रतिबंधकः ॥ अत्रपृथिवीत्वधर्मपर्याप्तावच्छेदकताका या पृथिवीनिष्ठाविशेष्यतातन्निरूपितापृथिवीत्वव्यापक.प्रकारीभूतोगंधपदार्थः प्रतियोगीयस्मिंस्तादृशेनसमवायसंबंधेनावच्छिन्ना या गंधत्वावच्छिन्नप्रकारतातच्छालीपृथ्वीसमवायेनगंधवतीति निश्चयउक्तनिधाभावप्रतिबंधकः । पदकृत्यंतुप्रासंगिकविस्तरभियानचिंत्यते ॥ केचिदित्विति । नव्यामंजूषाकारादयः ॥ अब्राह्मणइत्यादौयथाब्राह्मण्यारोपस्तदभावप्रत्ययहेतु ॥ नेदंरजतमित्यादौच रजतारोपस्तद्धेतुरित्याद्युदाहार्यम् ॥ यत्तु अन्यथेत्यादिन्यायावताइत्यंतं तदप्येतेनैवनिरस्तम् ॥ नेतिनेतीतिवाक्यस्यप्रागुक्तार्थपरतयाजगन्निषेधकत्वाभावेनलौकिकालौकिकाधर्मवत् जगतोद्वैविध्यंपतोचाइत्यादिवाक्यानिर्वाहार्थंनस्वीकार्यं ॥ धर्मभेदस्तु विधिनिषेधवाक्यसहस्राविरोधायसूत्रकृतैवप्रकृतैतावत्त्वमित्यादौसिद्धांतिनः अतोनतन्न्यायावतारःशक्यः ॥ किंच'कदाचित्सर्वमात्मेव भवतीहजनार्दन' इत्यादावानंदतिरोभावादिरहितोऽलौकिकोलीलासर्गोप्यस्माभिरङ्गीक्रियते परंलौकिकस्याप्युपादानंब्रह्मैव । निषेधोपपत्तिस्तूक्तदिशैव अतोऽस्मन्मतमज्ञात्वाऽनेकधोक्तिः प्रलापएव ॥ तदेतदाहु.-यत्तुअन्यथेत्यादिना ॥ अत्र (अ० ३ पा० २ सू० १७) "दर्शयतिचाथो अपिस्मर्यते" इतिसूत्रस्थंभाष्यंप्रकाशंचावलंब्याहु -बृहदारण्यकइत्यादि ॥ इदंचप्रायेणव्याख्यातचरम् ॥

यदपि (येनसंबंधेन हरौ जडजीवधर्मानिषिध्यंतेससंबंधश्चेद्धरौ नास्ति, तर्हिसर्वात्मत्वहानि) रित्यादिकमुक्तं,-तदपि नसाधीयः; कारणात्मकत्वेनकारणधर्माःकार्येभवंत्येव ॥ कारणस्यकार्यात्मकत्वं कार्यानुवृत्तत्वंचसर्वैःस्वीक्रियते ॥ नपुनःकार्यस्यकारणात्मत्वं तस्यव्यावृत्तत्वात् ॥ अतःकार्यधर्मानकारणआपादयितुंशक्याः ॥

अन्यथा यथा ब्रह्मसत्ताघटादिषुस्वीक्रियतएवंघटगतमिथ्यात्वमपि ब्रह्मणित्वन्मतेकथंन स्यात्? ॥ यदपि (नहिघटसंयोगवतिभूतले-संयोगेन घटोन भवति नवा तत्रसंयोगेन घटोनास्तीतिप्रमाभवति) इत्याद्युक्तं तदपि तदास्यात् ॥ यदि तत्संबंधवत्ताबुद्धेस्तत्संबंधावच्छि-न्नप्रतियोगिताकतदभाववत्ताबुद्धिविरोधित्वंनियमतःस्यात् ॥ तदेव नसंभवतिः आकाशसंयोगस्यभूतलादौसत्वेपितदभावस्यतत्रविद्यमा-नत्वादन्यथातस्यकेवलान्वयित्वंनस्यात् ॥ तथाच तत्संबंधवत्ताबुद्धि-सत्वेपितत्संबंधावच्छिन्नतदभाववत्ताबुद्ध्युत्पादेनतादृशनियमोप्रामा-णिकएवेत्यवधेयं ॥ (ननु जीवधर्माःसंत्येव हरौ तेषामाविर्भावस्तत्र निषिध्यत) इत्यादिकंत्वनभ्युपगमपरास्तं ॥ जीवधर्माब्रह्मण्यस्माभि-र्नाभ्युपगम्यंते मुख्यसिद्धांतरीत्यातत्रकार्यधर्माणामभ्युपगमेपितदुक्त-दोषस्यावसरएवनास्ति ॥

सहस्राक्षेननुजीवेत्यादिंसर्गोरमेनीत्यंतंभागंदूषयंति—यदपियेनेत्यादिनाअवसरएवना-
स्तीत्यंतेन । कारणात्मत्वमिति । निःशेषस्यकारणरूपत्वम् ॥ कारणाभेदस्तुतत्रास्त्येव ॥
तदभावस्येति ॥ संयोगसंबंधावच्छिन्नप्रतियोगिताकस्याकाशाभावस्य ॥ भूतलेघटादेरिवा-
काशस्यसंयोगेनसत्वंनप्रतीयतइतिभावः । अन्यथेति आकाशस्यभूतलादिनिरूपिताधेयत्वे ॥
तस्य आकाशस्य । इतरत्सुगमं ॥ एतत्सर्वंपंचसूत्रीदर्शितमतंभेदाभेदपक्षंचपुरस्कृत्ययक्ष-
बलिन्यायाभ्युपायादुक्तम् ॥ (अ० ३ पा० २ सू० १९) "अंबुव" दित्याद्यधिकर-
णसिद्धेमुख्यसिद्धांतेतुशंकैवानवकाशा ॥ तथाहिननुजीवेत्यादिकंनिषेधादित्यंतंतत्रसंगतंपदा-
द्युपादानस्यतंत्वादेर्धर्मित्वेपिपटादिसमवेतरूपनिष्ठधर्मतानिरूपितधर्मितायास्तत्राभानात्,
धर्मधर्मिभावेनपटरूपादेस्तंत्वादिषुनिषेधेपिपारंपरिकोपादानतायानिषेद्धुमशक्यत्वात् ॥
किंच, ननुजीवेत्यादिनोक्तमस्माभिस्तुनैवोच्यतइतिकिमनेन ॥ त्वयैवब्रह्मणिविशेषाणांधर्म-
धर्मिभावेननिषेधोविशेषनिरूपितमप्याधिष्ठानोपादानत्वंतत्रैवसमर्थनीयमितिचित्यतां ॥
ब्रह्मणिविशेषाणांनिषेधेपिकिमप्रासानामुतप्रासानां? आद्येत्वदुक्तदोषः । द्वितीयेनिषेधासंभव
इत्यादिरन्मतेप्यूह्यम् ॥ यश्चपरिहारःक्रियतेसोस्मन्मतेपिप्रायःसंगच्छेतेतियत्रोभयोःसमो
दोषइतिन्यायावतारः ॥ अथभवताकथमुच्यतइतिचेत्—इत्थं, ब्रह्मणएवेजनादयोजीवे
घनेजनादयोजडेपुचेतरधर्मतिरोभावपुरःसरमनुवृत्ताइतितत्तत्कार्येषुतत्तद्धर्ममात्रदर्शनात्
लोकेनियतान्य.धिकरणतयागृह्यमाणाभगवदिच्छयापरिच्छिन्नास्तेतेधर्मास्तत्तत्कार्यासाधारण-
धर्मतयाव्यवह्रियंते ॥ भगवतितुतएवापरिच्छिन्नाःस्वाभाविकावस्तुसामर्थ्यादविरोधेन

ननु जीवधर्मा उपादानोपादे भावेनेश्वरे सन्ति धर्मिधर्मभावेन तत्र निषिध्यन्ते ननु जीवधर्माउपादानोपादे भावेनेश्वरे सन्ति धर्मिधर्मभावेन तत्र निषिध्यन्ते उपादानतयाऽपि निषेधात् ॥ तत्राह—नयोगान्तरैरिति ॥ उपादानस्यापि धर्मित्वेन निषेधे उपादानतयाऽपि निषेधात् ॥ किञ्च येन सबन्धेन निषिध्यन्ते ससंबन्धश्चेद्धरौ नास्ति तर्हि सर्वात्मत्वहानिर्यद्यस्ति तर्हि तेन निषेधानुपपत्तिरन्ते संबन्धेन जगतस्तत्रसत्वात् ॥ नहि घटसंयोगवति भूतले संयोगेन

समानाधिकरणाः "तदेजतितन्नैजति । सर्वकाम.सर्वगंध.सर्वरस" इतिवेदादिवर्णिताःसंति ॥ एवदेवब्रह्मणोविरुद्धसर्वधर्माश्रयत्वंनाम ॥ अत कार्यधर्माअपिवस्तुतोनाब्रह्मधर्मोब्रह्मभिन्नाना ? ॥ तेषांप्रतिपेधस्तुकार्येष्विवतन्मात्रपरिच्छिन्नधर्मैकत्वंब्रह्मणिवारयितुमितिकार्यधर्माब्रह्मासाधारणधर्माभवंति ॥ तेननायंमृगोनापिनरोनशुन्येणनचार्द्रेणेत्यादिवत्सर्वधर्माश्रयत्वासिद्धिरित्युक्तंभाक् ॥ यथाच नेमेपंचाशन्नशतंकिंतुसहस्रमित्यादौपंचाशत्त्वादयः पंचाशदादिपुपर्याप्तिसंबंधेनविद्यमानास्तेनसंबंधेनसहस्रेप्रतिपिध्यंते ॥ तथाकार्यधर्माः कार्येषुब्रह्मांशभूतेपुपर्याप्तिसंबंधेनासाधारणधर्मतयाविद्यमानाब्रह्मणितेनैव संबंधेनतदसाधारणधर्मत्वेनचप्रतिपिध्यंतइतिनिगर्व.ससबंधोपिब्रह्मानतिरिक्तःपरंसंबंधत्वेनकार्येष्वेवानुभूयते उक्तदृष्टांतवत् ॥ अतोनसार्वात्म्यहानिः ॥ एतेनकिंचयेनेत्यादितत्रसत्वादित्यंतमपास्तं ॥ अग्रानच्छेदेनकपिसंयोगवत्यपिवृक्षेमूलानच्छेदेनसंयोगेनकपिर्नास्तीतिप्रमवातोनहिघटेत्यादिकमप्यकिंचित्करम् ॥ तार्किकवत्समवायंतुनवयंस्वीकुर्मः । तत.समवायांगीकर्तृमतइत्यादिप्रलापमात्रं, तच्छब्दद्वयाभावादर्थसंगत्यसंभवाच्च ॥ किंच कार्याविर्भावांगीकारात्कार्येषुकार्यासाधारणधर्माविर्भाव.शक्यवचनः ॥ तत्रैवासाधारणधर्मत्वेनतेषांप्रतीतेः ॥ यद्यपिसर्वाश्रयत्वात्तत्तद्धर्माविर्भावस्यापितत्तत्कार्यरूपोभगवानेवाश्रयस्तथापिकारणभूतेसकलेब्रह्मस्वरूपेतदनाविर्भावात्तस्मिँस्तद्धर्मनिपेधोनाघटीति ॥ नृसिंहेमृगत्वादेरसार्वत्रिकत्वेनतत्रनायंमृगइत्यादितन्निपेधवत् ॥ एतेननन्वित्यादिइतिभावइत्यंतंनिराकृतं ॥ किंचजीवगतयावद्धर्माणांब्रह्मनिष्ठत्वांगीकारेतद्गतव्यामोहादिकमभेदवादिनस्तवापिविशुद्धचिदात्म्येपरस्मिन्नापद्येत ॥ कथंचिदिदमंगीकृत्यासमाधानेस्मन्मतेपिसम.समाधिः ॥ वस्तुतस्तुचक्षुरादित्ययोरंशांशिभावेनाभेदेपिलोचनगोचरतिमिरकामलादिमलानामंशुमालिन्यऽमालिन्यजनकत्ववत्जीवगव्यामोहादीनांपरोपरोधासामर्थ्यंसभवत्येव ॥ अतएवसूर्योयथेत्याद्या कठादिश्रुतय. (अ० २ पा० ३ सू० ४६) "प्रकाशादिवन्नैवंपर " इत्यादीनिचसगच्छेरन्नितिपुरस्तात्प्रपंचयिष्याम' । तदेतदनुसंधायाहुः–मुख्यसिद्धांतेति । एतेनकिंचजीवइत्यादिसर्वदलोत्तरम् । अत्रश्लोके (समस्तात्मनिसर्वात्मसर्वाश्रये) इत्यादिपुनरुक्तिः (समस्तात्मनिआविर्भावे) त्यत्रश्लोकेचिद्वद्भिरनादृतोऽविवक्षयासध्यमावश्चिन्त्य जगद्योगेरित्यत्रजगद्योगइतियुक्तंभाति; अन्यथायतइतिकान्वियात्आस्तांवाजगादितिच्छेदेनसमाधि. ॥ एवमेतच्छ्लोकखंडनेनप्रागुक्ताविधिनिपेधव्याक्यव्यवस्थापुन समर्थिताज्ञेयाइतिपष्ठश्लोकखंडनम् ॥ ६ ॥

घटोन भवति नवा तत्रसंयोगेन घटोनास्तीति प्रमाभवतीत्याह–समस्तात्मनीति ॥ समवायाङ्गीकर्तृमतेतु येन सबन्धेनेत्यस्य स्थाने यन्निरूपितत्वविशिष्टेन येन सबन्धेनेतिनिवेश्यम् ॥ ननु जीवधर्मा सन्त्येव हरौ तेषामाविर्भावस्तत्रनिषिध्यते यतस्ते जीवे आविर्भूतास्तिष्ठन्ति तत्राह–आविर्भावेति ॥ एवआविर्भावः यदा सर्वस्य सएवाश्रयस्तदा तत्रासत्वे कसत्त्वंस्यात् ? ॥ तस्य सर्वाश्रयत्वेन आविर्भूतानामपि तत्र सत्त्वाभ्युपगमस्यावश्यकत्वमिति भावः ॥ किञ्च जीवे तत्सत्त्वे सुतरामीशे तत्सत्त्वं जीवस्येशादभिन्नत्वादित्याह–सर्वात्मेति ॥

अग्रेच नात्माणुश्रुतितइतिश्लोकेनात्मनोऽणुत्वंनसंभवतीत्युक्तं तत्रब्रूमः–आत्मनोऽणुत्वमेव "एषोणुरात्माचेतसावेदितव्यः, वालाग्रशतभागस्यशतधाकल्पितस्यच । भागोजीवःसविज्ञेयः सचानंत्याय कल्पते" इत्यादिश्रुतिभ्यस्तथैवावगमात् ॥ ननु "सवाएषमहानज आत्मायोऽयंविज्ञानमयःप्राणेषु" इत्यादिश्रुत्यामहत्त्वप्रतिपादनात्कथमणुत्वं? महत्त्वस्याणुत्वविरुद्धत्वादितिचेत्,–न; तच्छ्रुत्यंब्रह्मपरं नजीवपरं ॥ तत्रचप्रकरणंब्रह्मणः ॥ अतएव "तस्मादेवंविच्छांतोदांत" इत्यादिना "आत्मन्येवात्मानंपश्ये" दित्युपक्रम्य पठितं ॥ तदग्रेच "ब्रह्मेदंक्षत्र" मित्याद्युक्त्वा "इदंसर्वंयदयमात्मे" तिपठ्यतेतस्मात्तादृशवाक्यस्यान्यपरत्वान्नविरोधः ॥ ननुतादृशवाक्यस्यब्रह्मविषयत्वंनसंभवति ब्रह्मणिप्राणहृदयविज्ञानानामसंभवात् विज्ञानंहि बुद्धिः प्राणादिसहचारात् हृदयस्थानलिंगाच्च जीवविषयालिंगस्यप्रकरणापेक्षयाबलवत्त्वाच्च तेन ब्रह्मविषयत्वंव्यवस्थापयितुंशक्यतेऽतएवोक्तंपूर्वकांडे "श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यानांसमवाये पारदौर्बल्यमर्थविप्रकर्षा" दिति ॥ "आलोमभ्यआनखाग्रेभ्य" इतिश्रुतेश्चेतिचेत्–मैवं; "योऽयंविज्ञानमय" इतिश्रुतौविज्ञानमयशब्दोविज्ञानप्राचुर्यमाह ॥ तच्च ब्रह्मण्येवसंभवति नजीवे तस्याल्पविज्ञानाश्रयत्वात्ब्रह्मचप्रज्ञानघनत्वेन "यथासैंधव" इत्यादिश्रुतौश्रुतं । एवंप्राणेषुस्थितिरपिब्रह्मधर्मएव "यःप्राणेषुतिष्ठन्नि"त्यादिश्रुतेः ॥ हृदयस्थितिरपिन जीवस्यैवलिंगंब्रह्मणोहृदयावस्थःतस्यबहुधादर्शितत्वात् ॥ तस्माल्लिंगमपिब्रह्मविषयकमेव ॥ तच्चप्रकरणानुगृहीतंब्रह्मपरत्वमेव तादृशवाक्यस्यगमयति ॥ आलोमभ्यइत्यादिश्रुतिस्तुचैतन्याभिप्रायेण ॥ किंच "स्वयंविहत्यस्वयंनिर्मायस्वेनभासास्वेनज्योतिषाप्रस्वपिती" तिस्वशब्दोऽणुपरिमाणंजीवंबोधयति ॥ नह्यस्य व्यापकस्यवाशरीरपरिमाणस्यवाविहरणंसंभवति "आराग्रमात्रोह्यपरोपिदृष्ट" इतिश्रुतेश्चाणुत्वमेव नचालोमभ्यइत्यादिश्रुतिः स्वरूपेणात्मसत्त्वमेवबोधयति ॥ नचैतन्याभिप्रायेणतत्रचैतन्यसत्त्वेमानाभावादितिवाच्यं ॥ आङोमर्यादावाचित्वेननखाग्रसमीपभागेकेशमूलदेशेचैतन्योपलब्धेरेवमानत्वादन्यथास्वरूपतआत्मसत्त्वस्यघटादिसाधारण्येनआलोमभ्यइतिमर्यादायाअभिविधेर्वाप्रसंगः । नखशब्दस्यांगुलिसमनखपरत्वमग्रशब्दस्यतदधिकदेशनिःसृतनखपरत्वाद्वर्धितनखस्यापिनखाग्रत्वमेवेतिनतत्रदोषः ॥ गुहांप्रविष्टावितिश्रुतिप्रदर्श-

ननु "नित्यःसर्वगतःस्थाणु"रितिस्मृत्यंतर्गतसर्वगतस्यपदप्रतिपाद्यासर्वगतेनब्रह्मणासहयास्थितिःसाकुत्रेतिसंदेहेतन्निवृत्त्यर्थंगुहायांबुद्धौतयासहस्थितिरितिबोधनार्थंनत्वणुत्वप्रदर्शनार्थम् ॥ तस्मात्तादृशाभिप्रायमबुद्ध्वेश्वरस्यापितथात्वापत्तेरित्यादि दोषापादनंमौर्ख्यायैवेति गम्यते; गुहाप्रवेशस्याणुत्वासंपादकत्वात् आकाशस्यघटादिप्रवेशेप्यणुत्वाभावान्महत्त्वप्रतिपादकवाक्यविरोधेनतथापादयितुमशक्यत्वाच्चेति उपाधेर्मायायाःपूर्वमेवखंडितत्वेनौपाधिकतयाप्रवेशस्यवक्तुमशक्यत्वेनतद्दृष्टांतेनजीवऔपाधिकप्रवेशापादनमसंगतमेव ॥ जीवेचाणुत्वंनित्यःसर्वगतःस्थाणुरित्यादिस्मृत्यापिस्पष्टमेवप्रतिपादितं ॥ सर्वगतेनसहतिष्ठतीतिसर्वगतस्थः सर्वगतस्थश्चासावणुश्चेतिसर्वगतस्थाणुःयत्तु (सामानाधिकरण्येनस्थित्यातथाप्रयोगेरसस्यरूपेणसहस्थित्यारूपस्योरमइतिप्रयोगापत्तेःतस्मात्तत्रासामर्थ्यान्नोपपन्नःसमासः) इत्युक्तं,—तदपिनसाधीयः; प्रयोगस्यविवक्षाधीनतयातथाविवक्षायामिष्टत्वात् । असामर्थ्यंहियत्रपदानांसमासाघटकपदार्थान्वितस्वार्थबोधकत्वंभवतितत्रैवमहाभाष्यकारैर्दर्शितं । अतएवसमर्थःपदविधिरितिसूत्रे समर्थग्रहणंकिमर्थंपश्यदेवदत्तकष्टंश्रितोविष्णुमित्रोगुरुकुलंतृतीयातत्कृतार्थेनगुणवचनेनशंकुलाखंड·समर्थग्रहणंकिंतिष्ठत्वंशंकुलयाखंडो धावतिमुसलेनचतुर्थ्यापि हितंगोभ्यःसुखंदेवदत्तायेत्यादीनिप्रत्युदाहरणान्युक्तानिभाष्येप्रतिपादितानितत्रयथाकष्टशंकुलासुखादिपदानांसमासाघटकपदसापेक्षत्वेनसामर्थ्याभावस्तथाप्रकृतेनसंभवतीतिध्येयं । नचैवन्व्याख्यानेसर्वगतस्थपदस्यवैयर्थ्यंप्रकृतानुपयुक्तत्वादितिवाच्यं, त्वन्मतेऽपिस्थाणुपदेनैवनिष्क्रियत्वसिद्धावचलपदस्यनिरर्थकतैव ॥ ननुममतेस्थाणुपदस्यनिर्विकारार्थकत्वेनतत्राचलत्वस्यहेतुगर्भितविशेषणतयानवैयर्थ्यमितिचेदत्रापिभगवत्सामीप्यं भगवन्नियम्यत्वादिजीवधर्मबोधकतयानवैयर्थ्यमितिविभावय । नचतादृशधर्माणांप्रकृतानुपयुक्तत्वात्तद्बोधनंनिरर्थकमेवेतिवाच्यं; सर्वगतत्वस्य प्रकृतानुपयोगित्वेऽपितद्बोधनवदत्रापिक्षत्यभावात् । नचसर्वगतत्वस्य नित्यत्वव्याप्यतयातत्पुष्टिकरत्वेनप्रकृतोपयोगित्वमितिवाच्यं; सर्वगतस्याप्याकाशादेस्त्वन्मतेनित्यत्वाभावेनव्याप्तेरसंभवात् । तस्मात्स्वरूपमात्रबोधकतैवत्वयापिवाच्या । साचात्राप्यव्याहतैव किंचत्वयापि सर्वगतस्थाणुरचलइत्यादिपदानांजीवस्वरूपबोधकतयैवप्रकृतोपयोगोवक्तव्यस्तत्रजीवस्यप्रकृतत्वात् तदन्वयएवन·

संभवतिजीवस्यत्वन्मते कल्पितत्वेनतत्रनित्यत्वसर्वगतत्वादीनामसंभवात् । नचजीवब्रह्मणोरभेदाज्जीवेपिनित्यत्वादयःसंभवंत्येवेतिवाच्यं; कल्पितस्यमायिकस्यपारमार्थिकशुद्धब्रह्माभेदासंभवात्; अन्यथा-ब्रह्मणोपिमिथ्यात्वापत्तेरिति संक्षेपः । सविसर्गनिर्विसर्गपाठयोरुभयोःसंगतिरस्माकमित्यपिनसंभवति, संहितायांविसर्गलोपेपिविसर्गानुसंधानस्यावश्यकत्वेनसविसर्गपाठस्यैवत्वन्मतसंमतत्वात् । "एषोणुरात्माचेतसावेदितव्य" इत्यत्रपरस्यैवग्रहणंयुक्तमित्युक्त्वा-तत्रहेतुत्वेनचक्षुराद्यगम्यत्वस्यज्ञानप्रसादगम्यत्वस्यप्रदर्शनंयत्तदपि-जीवस्यापिचक्षुराद्यगम्यतयाज्ञानप्रसादगम्यतयाचतादृशहेतोर्व्यभिचारित्वेनतन्मात्रग्रहणानियामकतया नसाधीयः । वेदितव्यतापि-जीवस्वरूपेवर्ततेऽतस्तत्रापिपरएवेत्यवधारणंनसंभवति ॥

सहस्राक्षेजीवस्याणुत्वांशत्यादिकंश्रुतिसंमतमाक्षिपंतंतदीयंनात्माऽणुरिति सप्तमश्लोकं यत्तु त्रयश्चत्वारिंशच्छ्लोकव्याख्यायामित्यादिना वस्तुस्थितिस्तूक्तेत्यंतेन व्याख्यानेन सहितं अग्रे च नात्माणुरित्यादिना अंशाशिभावमनादृत्येत्यादिकमपास्तमित्येतेन निराकरिष्यंतः प्रथमं यत्तु त्रयश्चत्वारिंशेत्यादि पर एवात्मेत्यंतं भागं निरस्यंति–अग्रेचेत्यादिना अवधारणं नसंभवतीत्यंतेन ॥ एषोऽणुरिति मुंडकवाक्यं वालाग्र इतिश्वेताश्वतरस्थं आदिपदात् "अणुमेतमाप्य" इत्यादीनि कठादिवाक्यानि वक्ष्यामः ॥ स वा एष इति ॥ इदंवाक्यं शारीरकब्राह्मणेप्यस्ति तद्विचारयिष्यते ॥ किंच बृहदारण्यकषष्ठाध्याये चतुर्थब्राह्मणेऽपि "सवाएषमहानज आत्माऽन्नादोव सुदान" इतिपाठभेदेन पठ्यते ॥ अनयोर्वाक्ययोरानपूर्वीसाम्याद्र्थोपि समान उचित. । अत्र च ब्रह्मणः प्रकरणं लिंगं च स्पष्टमेवेति बोधयितुं नाणुरितिसूत्रप्रकाशस्थंकिंचित्प्रायोऽक्षरशोऽनुवदंति ॥ तत्रचेत्यादि ॥ पठ्यत-इत्यंतं पूर्वकांड इति ॥ पूर्वकांडविचारशास्त्रेपूर्वतंत्रेतृतीयस्यतृतीयेपादे (सू० १४) श्रुतिलिंगवाक्यप्रकरणे"

श्रुत्यादीनांसमवायेतेषु

वाक्यादीषतुष्ट्यादिनिपरस्परस्यदावल्यंसोदाहरणतत्रवज्ञेयं । ३५.सू

तोऽनूद्यसमादधते–योऽयंविज्ञानेत्यादि ॥ "स्वशब्दोजाभ्या"

स्यंति–स्वयंविहत्येत्यादि ॥ २ ३८६९ ४

नात्माऽणु' श्रुतितः स्मृतेरणुवचोगौणं परस्मि[illegible]

एवं बुद्धिगुणैर्विसर्पिगुणता युक्तेर्विरोधान्नतु ॥

अंशत्वघटखाम्बुचन्द्रवदजोजीवोऽत्र कस्याऽपरे

ज्ञानस्याऽपि तिरस्कृतिर्यदि तदा प्रीतिश्च भाव

यत्तु त्रयश्चत्वारिंशश्लोकव्याख्यायाम्

स्याऽणुत्वम् ॥ लिङ्गशरीराभिप्रायेणाणुत्वस्य गौणस्य वर्णनेतु

उपादानविकल्पः । शष्कुलाखण्डः । किरिकाणः । समर्थग्रहणंकिमर्थं ?। त्वंतिष्ठशष्कुल्या खण्डीधावतिमुसलेन । किंत्वंकरिष्यसिशष्कुल्याखण्डोविष्णुमित्रउपलेन । चतुर्थीतदर्थार्थबलिहितसुखरक्षितैः । गोहितं, वृषभहितं, गोहितमश्वहितं । समर्थग्रहणंकिमर्थं ?। सुखंगोभ्योहितंदेवदत्ताय । पञ्चमीभयेन । वृकभयं । दस्युभयं । चोरभयं । समर्थग्रहणं किमर्थं । गच्छत्वंमावृकेभ्योभयंदेवदत्ताद्यज्ञदत्तस्य" इत्यादिग्रंथोस्ति. । तन्नमूलोक्तरीतिकमेवासामर्थ्यंभाष्यकैयटादिपुक्तत्वात्सामर्थ्यविचारात्सिध्यति जीवस्याप्रकृतत्वादिति नित्यस्योक्तः शरीरिणइत्यादिनागीतायांप्रकृतत्वात् तदन्वयइति कल्पितस्वरूपेजीवेनित्यादिपदानामन्वयः । चक्षुराद्यगम्यतयेत्यादि "पराञ्चिखानि" इत्यादौअंतरात्मनिदर्शननिषेधात् शरीरतउत्क्रमणकालेपिदर्शनाद्यभावाद्गीतायां (अ० १५ श्लो. १०) "उत्क्रामंतंस्थितंवापी"त्यादिना'नैनंपश्यंत्यचेतस'इत्यंतेनतन्निषेधाच्चतदगम्यत्वं ज्ञानप्रसादवतायोगिनैवतदातस्य दर्शनात् 'पश्यंतिज्ञानचक्षुषः, यतंतोयोगिनश्चैनंपश्यंत्यात्मन्यवस्थित'मित्यादिस्मरणात् "आत्मन्येवात्मानं पश्ये" दित्यादिश्रुतिष्वपि शमदमादिमत्तयाज्ञानप्रसादवानेवजीवस्वरूपंसाक्षात्करोतीति तावकैरंगीकाराच्चजीवस्य ज्ञानप्रसादगम्यत्वं वर्ततइति "आत्मानं चेद्विजानीयात् विज्ञानंब्रह्मचेद्वेद" इत्यादिपुकाण्वतैत्तिरीयादिश्रुतिपुवर्ततेतत्रेति वेदनइत्यर्थः । इहायमाशयोबोद्धव्यः–सहस्राक्षस्येऽत्रानुवादे त्रिचत्वारिंशच्छ्लोकव्याख्यामितिन्यूनंदशश्लोकविवरणेपितत्सत्वात् यातुश्रुतिरुदाहृता "सवाएषमहानज आत्मायोऽयं विज्ञानमयः प्राणेषु हृद्यन्तयोति"रितिसा प्रमादात् नाणुरितिसूत्रविषयीभूतायाः बृहदारण्यकषष्ठाध्यायस्थशारीरकब्राह्मणाख्यतृतीयब्राह्मणस्याया अस्याहृद्यन्तर्ज्योतिरित्यानुपूर्वीघटितत्वाभावात् "कतमआत्मेति योयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुष" इति ज्योतिर्ब्राह्मणश्रुतेस्तदुक्तपूर्वभागाघटितत्वेन तदिष्टासाधकत्वात् । अतोनाणुरवस्थितिवैशेष्यादितिसूत्रद्वयस्य भाष्यदर्शनाद् भ्रान्तोसि । नचासन्नाप्यादाविव हृद्यन्तर्ज्योतिरिति श्रुत्यन्तरमेवैकदेशत्वेनोदाहरामीतिवाच्यं; विभुत्वबोधकपदाघटितत्वेन प्रकृतानुपयोगात् । प्राणहृदयविज्ञानानां परस्मिन्नसम्बन्धं प्राणादिसहचारात् विज्ञानशब्दार्थं हृदयस्थानलिङ्गं चयदत्तस्त्वैकश्रुतितायाः अभिप्रेतत्वाच्च । नाप्यसौ नपरविषयेतिवक्तुंशक्यं; नाणुरित्युक्तसूत्रविरोधात् (अ० १ पा. ३ सू. ४२) "सुषुप्त्युत्क्रान्त्योर्भेदेने" त्यत्रभाष्ये परविषयतायाः समक् व्युत्पादितत्वाच्च । ननु शारीरकब्राह्मणेऽपि "सवाएषमहानजआत्मा योयं विज्ञानमयः प्राणेषु यएषोन्तर्हृदय आकाशस्तस्मिँश्छेत" इति श्रूयमाणःप्राणहृदयसम्बन्धः परस्मिन्नसम्भवीति चेत्,–मैवं; "यःप्राणेतिष्ठन्प्राणादन्तरः ॥ सउप्राणस्य प्राण" इत्यन्तर्यामिब्राह्मणतलवकारादिश्रुतिभ्यः प्राणसम्बन्धस्य "एष मआत्मान्तर्हृदयेऽणीयान् व्रीहेः ॥ अन्तरात्मन्पुरुषो हिरण्मयः ॥ गुहांप्रविष्टौपरमेपरार्द्धे" इतिछन्दोगवाजसनेयिकठादिश्रुतिभ्यः । 'ईश्वरः सर्वभूतानां हृद्देशेर्ज्जुनतिष्ठति, गुहांप्रविष्टावात्मानौ हृदिधिष्ठितमात्मकल्पितानां'मित्यादि स्मृतिन्यायपुराणेभ्यश्च हृदयसम्बन्धस्य च परस्मिन् सिद्धत्वात् अन्तः शयानं च "परात्परंपुरिशयंपुरुषमीक्षत" इति प्रश्नादिश्रुतिसिद्धंपरस्य ॥ बोधितं चैतत् (अ० १ पा० ३ सू० १३) "ईक्षतिकर्मव्यपदेशात्स" इत्यधिकरणे एतेन

प्राणसहचाराव विज्ञानशब्दस्य बुद्धिपरत्वमप्यपास्तं अतो विज्ञानमयशब्दोपि "सत्यंविज्ञानमानन्दंब्रह्म" इत्यादिश्रुत्युक्तस्वरूपभूतविज्ञानात्मकत्वमेवात्राभिधत्त। इति न काप्यनुपपत्तिः। मयट् चेह स्वार्थे प्राचुर्येवेत्यन्यदेतत् यच्चावस्थितिवैशेष्यसूत्रोदाहरणाद्धृदयस्थितेर्जीवलिङ्गत्वमुक्तं तत्तुतन्मात्रस्थायित्वे स्वाभिमतविभुत्वबाधात्तत्सूत्रस्य स्वमते पूर्वपक्षस्थत्वाच्च गले पादुकापादकं यदि च पूर्वपक्षसूत्रोक्तमप्याद्रियते तर्हि नाणुरित्यादिसूत्रोक्तमप्याद्रियतां वस्तुतस्त्वकान्त्यादिसूत्रदशकं न पूर्वपक्षप्रतिपादकमिति समर्थयिष्यामः। यच्च प्रकरणंतु लिङ्गादिभ्यो दुर्बलमित्यवादि तदप्यकिञ्चित्करं उक्तरीत्यालिङ्गस्योभयसाधारणत्वाव उक्तश्रुतेरभेनुपदमेव "सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिःसनसाधुना कर्मणाभूयान्नोएवासाधुनाकनीयान् एष सर्वेश्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरण एषां लोकानामसम्भेदायतमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेनैतमेव विदित्वा मुनिर्भवती"त्यादिना प्रबलतराणि सर्ववशित्वादि ब्रह्मलिङ्गानि सर्वेश्वरत्वादिश्रुतयश्चात्रोपलभ्यन्त इति श्रुतिलिङ्गयोर्विचारेपि नजीवपरत्वं वाक्यस्य शक्यवचनं अत्राम्नातानि भूताधिपतित्वादीनि प्रतर्दनविद्यायामप्येवमेवाम्नातानि तानि च ब्रह्मण्येव समनुयन्ति नजीवादाविति सिद्धमनुगमाधिकरणे "एतमेवविदित्वा मुनिर्भवती" त्यस्य परविषयत्वं च अंशोनानेतिसूत्रे शङ्कराचार्यैरपि स्वीकृतं आलोमभ्य इतिश्रुतिस्त्वाणुत्वस्यैवसाधिका। तथाहि कौपीतकिब्राह्मणे चतुर्थाध्याये "हितानामपुरुषस्य नाड्योहृदयात्पुरीततमभिप्रतन्वन्ति तद्यथा सहस्रधा केशोविपाटितस्तावदण्व्यः पिङ्गलस्याणिम्नस्तिष्ठन्ति शुक्लस्य कृष्णस्य पीतस्य लोहितस्य च तासु तदा भवती" ति जीवस्य हृदयायतनत्वं तादृगित्यणुनाडीषु स्थित्याणुत्वं चोक्त्वा शरीरे गुणतोव्याप्तिं वक्तुमाम्नायते "एष प्रज्ञात्मेदं शरीरमात्मानमनुप्रविष्ट आलोमभ्य आनखाग्रेभ्य" इति अत्र प्रज्ञाशब्दश्चैतन्यगुणपरः। तथा च स्वचैतन्यगुणेनायं लोमनखाग्रपर्यन्तं सर्वशरीरमभिव्याप्य तिष्ठति एतदेव बोधयितुं दृष्टान्त उच्यते "तद्यथा क्षुरःक्षुरधानेऽवोपहितो विश्वंभरोवाविश्वम्भरकुलाय" इति ॥ बृहदारण्यकेपि तृतीयाध्यायेपुरुषविधब्राह्मणाख्येचतुर्थब्राह्मणे (मं० ७ पृ० १६८) इदं श्रूयते—न ह्ययं विभुत्वपक्षे सङ्गच्छते, यदि तु तथाभिप्रेयात्तर्ह्याकाशादिकमेवदृष्टान्तीकुर्यात्। अतः परमाचार्योपि गुणतः शरीरे व्याप्तिमुक्त्वा आलोमभ्य श्रुतिं विषयीकुर्वन्नसूत्रयत (अ. २ पा. ३ सू. २७) "तथा च दर्शयती"। ति अतः प्रकृतश्रुतौ शरीरे गुणतो व्याप्तिरुच्यते इत्यत्र मानं तु प्रज्ञात्मश्रुतिर्हृदयायतनत्वनाडिस्थितिदृष्टांतादयस्सूत्रंचेतिभूयएवास्त्यातोमानाभावोक्तिः श्रुत्याद्यदर्शनात्। आह्चेत् मर्यादार्थकइति लोमनखाग्रेषु चैतन्यानुपलब्धिः। अग्रशब्देन चेह अग्रमर्मचरंतीनां 'आदातुं सकृदीक्षितेपि कुसुमे हस्ताग्रमालोहितं'मित्यादौ चर्मणलोहित्यादियोग्यभागवदनुपलभ्यमानचैतन्योनिखिलएव नखाग्रिमभागो ग्राह्यो योग्यत्वात्। अतो वर्धितनखेप्यनुपलब्धिरदोषः। आनखेभ्य इतिकचित्पाठेऽपि "नखानि निकृंतत" इति दीक्षाश्रुतिवद्योग्यत्वाच्छ्यामलभाग एव नखशब्देनोपादेय इत्यनवद्यं। यच्चेह आङमभिविध्यर्थकं मूपात्तेनैव वर्धितात्रभितनखाग्रेषु लोमसु च चैत-

न्यानुपलब्धिदोषः समाधेयस्तत्रात्मसत्त्वात् । त्वन्मताचार्यशंकरानंदकृतकौषीतकिदीपिकायां "प्रवेशावधिमाह आलोमभ्य आनखेभ्यः लोमनखपर्यंतं नखाग्रशरीरबहिर्गतकेशान्मुक्त्वा समग्रे शरीर इत्यर्थः" इतिव्याख्यातमप्याटोमर्यादार्थकत्वं स्वयं शंकराचार्यैरप्युक्तस्थले बृहदारण्यकभाष्ये "आनखाग्रेभ्यो नखाग्रमर्यादमात्मनश्चैतन्यमुपलभ्यते तत्र कथमिवप्रविष्टइत्याह" इत्यादिनातिस्फुटमुक्तंतत् परमतखंडनाय दूषयन्स्वरूढशाखाच्छेदकवत्स्वमतदूषणं नानुसंधत्से । किंचजीवस्याणुत्वे सत्येव कठाद्याम्नातस्य गुहाप्रवेशः संगच्छेत विभोः प्रवेशायोगात् । ईश्वरस्य प्रवेशस्त्विहांतर्यामिरूपेणैवोच्यते । द्वासुपर्णेत्यादौ स्थितिवदतोनेश्वरस्याणुत्वापत्तिः । अंतर्यामिनामातिरोहितानंदाणुमात्रोभगवदंश इति तु सिद्धमाकरे । अंतर्यामिमानस्यच "यथाव्रीहिर्वे" त्यादिश्रुतिसिद्धत्वात्रौपाधिकत्वं कल्प्यं (तत्सहचारेण जीवेऽपि तथैव वक्तुमुचितत्वेन) इत्याद्युक्तिस्तु तवैव प्रतिकूला । नैयायिकादिवज्जीवात्मपरमात्मनोरत्यंतभेदस्य विभुत्वस्य चोरीकार एव उभयोः प्रवेशस्यौपाधिकतायाः शक्यवचनत्वान् ब्रह्मण एवौपाधिकं जीवभावंवदतात्वया त्वन्नाक्यं विभोरपि जीवस्य ब्रह्मणवदौपाधिकः प्रवेश इति वक्तुं ॥ स्मृतयोऽपि जीवस्याणुत्वमेव प्रतिपादयंति । यथा गीतायां-'ममैवांशोजीवलोके' इत्यंशत्वोक्तिरणुत्वमेव गमयति । सर्वथा विभोरंशत्वासंभवात् । मध्यमपरिमाणवादस्य च वेदविरुद्धत्वात् । तृतीयस्कंधेऽपि (अ० २५ श्लो० १७।१८) 'तदा पुरुष आत्मानं केवलं प्रकृतेः परं । निरंतरं स्वयंज्योतिरणिमानमखंडितं ॥ ज्ञानवैराग्ययुक्तेन भक्तियुक्तेन चात्मना । परिपश्यत्युदासीनं प्रकृतिं च हतौजस'मिति ॥ अत्राप्यणुत्वंजीवस्यापि ज्ञानप्रसाददृश्यत्वंचोक्तं ॥ एकादशेपि (अ० २७ श्लो० २३।२४) 'पिंडेवास्त्वग्निसंशुद्धे हृत्पद्मस्थां परां मम । अण्वीं जीवकलां ध्यायेन्नादांते सिद्धभाविताम् । तयात्मभूतया पिंडेव्याप्ते संपूज्य तन्मयः' इति व्याप्तिश्चेह दीपप्रभान्यायेनैव श्रीधरस्वाम्यादिभिरपि व्याख्याता । एतन्मूलभूताश्रुतिरपि "तस्य मध्ये वह्निशिखा अणीयोर्ध्वाव्यवस्थिते" 'त्यादिर्नारायणप्रपाठकस्था ध्येया । एवमितरत्रापिद्रष्टव्यं । यानु'नित्यः सर्वगतः स्थाणु'रितिस्मृतिरुपाहारिसाप्यंशत्वादिवाक्यैकवाक्यतया सर्वगतश्चासावणुश्चेत्यर्थपरापि शक्या व्याख्यातुं । नच तत्रासामर्थ्यान्मार्तंडटीकोक्तसमासस्यासंगतिः शंक्या । (अ० ३ पा० २ सू० ४) "सुपिस्थ" इत्यत्र सुपीति योगं विभज्य कच्छपोद्विप इत्यादौ तृतीयांतपदेनापि समासस्य स्वीकारात् । स्पष्टंचेदंतत्रैव महाभाष्ये "योगविभागः करिष्यते आतोनुपसर्गे को भवति । ततः सुपि सुपि चातःको भवति कच्छेन पिबति कच्छपः कटाहेन पिबति कटाहपः, द्वाभ्यां पिबति द्विपः, ततः स्थः स्थश्च को भवति सुपीति" इत्यादि । एवं कच्छेन पिबतीत्यादिवत् सर्वगतेन तिष्ठतीति व्युत्पत्तिरपि सुवचैव । कच्छशब्दार्थजलप्रायदेशस्य वस्तुतः पानक्रियाधारत्ववत् सर्वगतस्य ब्रह्मणः स्थितिक्रियायां सर्वगतस्य साधकतमत्वं च । 'द्वासुपर्णे'त्यादिश्रुत्युक्तनियतस्वसद्भावरूपमेवेत्यार्थिकः सद्भावोमार्तंडटीकाकारै.कंठरवेण स्पष्टप्रतिपत्तये दर्शितःसर्वगतत्वविशेषणं व्युच्चरणानंतरमपि सार्वदिकभगवत्संबंधेन जीवस्य शरीरच्छेदनदहनादिदुःखानुभवायोग्यत्वादिलक्षणोत्कर्षबोधनायावश्यकमिति न विफलं । स्थाणुरिति

च्छेदेऽचलशब्दस्य पौनरुक्त्यमभिप्रेत्य मार्तंडटीकायां तथाव्याख्यातं तत्परिहारायोच्यमानं स्थाणुपदस्य निर्विकारार्थत्वं तु लक्षणां विना दुर्वचं स्थिरेऽशक्तत्वात् । लक्षणाङ्गीकारप्रीतिम त्वात्तद्दूरीकारेतु अचलपदेऽपि सा किन्नस्यात् ? विनिगमनाविरहात् । स्थाणुपदार्थेऽचलप दार्थस्य हेतुत्वोपेक्षणमपि स्वाचार्यविरुद्धं शंकराचार्यैर्गीताभाष्ये "नित्यत्वात्सर्वगत सर्वगतत्वात्स्थाणुरित्येतत्स्थिरत्वादचलोयमात्मे" तिव्याकुर्वद्भि स्थिरपदार्थस्याचलपदार्थे हेतुत्वस्यांगीकारात् । अतो न त्वदुक्तप्रकारोऽन्यतरपदवैयर्थ्यपरिहारायप्रभवति । अस्ति चास्यां स्मृतौ निबंधादिषु सर्वगत इत्यपि च्छेद । तथापि "खर्परे शरि वा विसर्गलोपो वक्तव्य" इति तल्लोपादुभयथापि व्याख्यानमदुष्टं "विसर्जनीयस्य स" इति सत्वेन सकार-द्वयेऽपि न मार्तंडविवृतिबाध । एकपदपक्षेऽ"ऽन्यनचिचे"ति सद्वित्वसंभवात् । निबंध विद्वन्मंडनादिपुस्तकेषु चैकसकारो द्विसकारो वापाठो दृश्यत इति न पाठद्वयासंगति नाप्याचार्यविरोध । एकवाक्यस्योभयथा व्याख्यानं तु न दोषाय, अन्यथा शास्त्रयोनित्व-समन्वयाद्यधिकरणेषु वर्णकद्वयप्रतिपादकत्वद्वाव्यन्यायमालादिबाधप्रसंगात् । "सुमेधा अमृतोक्षित" इत्यादिश्रुतीनां पदभेदेन शंकराचार्यैरपि द्विधाव्याख्यातत्वाच्च । यच्चैषोणुरा-त्मेत्यस्य परविषयत्वं प्रकरणमाश्रित्योक्तवान् तत्र "एषोऽणुरात्मा चेतसावेदितव्यो यस्मि न्प्राण पंचधा संविवेशे" त्यनुपदप्राणसंबंधश्रावणात् । "स वा एष महानज" इति श्रुत्य-र्थसमर्थनावसरे स्वमुखोक्तप्राणसंबंधस्य जीवलिंगत्वं लिंगात्प्रकरणबाध च कुतो नानु-संधत्से । अतस्त्वयात्वुक्तविरोधान्नैव वक्तुं शक्यं । वस्तुतस्तु तद्गुणसारसूत्रस्थस्वभाष्य पंक्तिमेव परस्यैवेत्यादिं प्रकृतत्वादित्यतः किंचिद्वर्णभेदेनानुवदनस्वयप्रकरणादिकं नावलो-कितवानसि । इदं हि वाक्यं तृतीयमुंडकप्रथमखंडे पठ्यते । तत्रारंभ एव "द्वासुपर्णास-युजासखाया" इतिद्वावप्यात्मानौ प्रकृतौ "नचक्षुषे" तिवाक्ये च यथाज्ञानप्रसादद्दश्य त्वेन मन्त्रोक्त एव प्रसादवत्वद्रष्टृत्वादिना जीवोऽप्युक्तइति नप्रकरणमात्रान्निर्णय । प्रकृते च यस्मिन्यत्समीपे प्राण पंचधाभूत्वासंविवेश सोणुरात्मा जीवो मनसा ज्ञेय । अथवा-ऽणुमानोऽतींद्रियोप्ययं चेतसा चैतन्यगुणेन लिंगेन वेदितव्य । यस्मिन्सर्वशरीरविसर्पिणि चैतन्ये प्राण पंचधाभूत्वा देहे संविवेश चैतन्यसंबंधमंतरा जडस्य व्यापारायोगात् इत्य-र्थ चितिसंज्ञाने भ्वादि तत सर्वधातुभ्योऽसुन्नित्यसुनिचेत इति सिद्ध । अत इत्थं प्राण संबंधो जीवस्यैव लिंगं । य प्राणेतिष्ठन्नित्यादौतु प्राणांतस्थित्या नियम्यत्वेन प्राणसंबंध-परस्योच्यते । नत्वेवं पंचप्राणवत्वं ॥ इतएव 'महानज" इतिश्रुतावपि प्राणेष्विति सप्त म्याप्राणांतस्थत्वं बोध्यतइति नमदुक्तिविरोध । नापि वेदितव्यश्चपरएवात्मेति शक्यवचनं "आत्मानंचेद्विजानीयादयमस्मीतिपूरुष । किमिच्छन्कस्यकामायशरीरमनुसंज्वरेदि" तिबृहदारण्यकादिषु स्वस्वरूपस्यापि विज्ञेयत्वाम्नानात् ॥

यदपिकिंचेत्यादिना (यथाऽणोरणीयानित्यादिवाक्यं महतोमही यानितिवाक्यबलाद्दुर्ज्ञेयत्वपरमित्यंगीक्रियतेतथेहापिमहानज नित्य सर्वगतस्थाणुरित्यादिवाक्यबलाद्बालाग्रशतभागस्येत्यादिवाक्यतत्पर

स्वीक्रियतामित्युक्तंतदपिमंदतरमेव; दृष्टांतस्योभयवादिसंमतस्यैवसं-
भवेनस्वमतमात्रसिद्धस्यदृष्टांतत्वासंभवात् । नह्यस्मन्मतेऽणोरणीया-
नित्यादिवाक्यस्यदुर्ज्ञेयत्वपरत्वंस्वीक्रियते ॥ अस्माभिस्तथातदास्वीक्रि-
येतयदाभगवतोविरुद्धधर्माश्रयत्वंनस्यात् । अस्ति च "अपाणिपादोज-
वनोग्रहीतापश्यत्यचक्षुःसशृणोत्यकर्णः" इत्यादिवाक्यैःप्रतिपादितप-
रस्परविरुद्धधर्माश्रयत्वं ततश्चात्रापिमहत्वाणीयस्त्वादिविरुद्धधर्मा-
श्रयत्वस्यब्रह्मण्यलौकिकत्वप्रतिपादकत्वसंभवेदुर्ज्ञेयत्वेपरत्वकल्पनेमा-
नाभावः तस्माद्दृष्टांतासंभवात्तदनुरोधेनाणुत्वप्रतिपादकवाक्यैर्जीवदु-
र्ज्ञेयत्वंप्रतिपादयदनपेक्षणीयएव किंच "वालाग्रशतभागस्यशतधाकल्पि
तस्य च । भागोजीवःसविज्ञेयःसचानंत्यायकल्पते । आराग्रमात्रोह्यवरो-
पिदृष्टः" इत्यादिश्रुतीनांस्पष्टतयापरिमाणवोधिकानाकथंदुर्ज्ञेयत्वपरत्वं
स्वीयवाच्यार्थपरत्वेकस्यचिद्वाधकस्यप्रमाणांतरविरोधस्यचाभावेन
लक्षणयातादृशार्थबोधकत्वेप्रमाणाभावात्नचबुद्धिगुणैरेवाणुत्वव्य-
पदेशोस्तुतथाचश्रुतिः 'बुद्धेर्गुणेनात्मगुणेनचैवआराग्रमात्रोह्यवरोपि
दृष्टः' एवंचउत्क्रांतिगत्यागतयोपिसंगच्छंतइतिवाच्यं, जीवस्ययदि-
त्वन्मतइवौपाधिकत्वंस्यात्तदास्यादेवतथाव्यपदेशः नहिजीवस्यौपाधि-
कत्वंसंभवतितथासतिसउपाधिर्नित्योऽनित्योवेतिवक्तव्यंनाद्यःमोक्षा-
नुपपत्तेःतदुपाधिनाशंविनास्वस्वरूपेणावस्थानरूपोमोक्षःसंभवति ॥
नद्वितीयः; कृतहानाकृताभ्यागमप्रसक्तेः तदेतद्विस्तरेणाग्रेवक्ष्यतेएव-
मुत्क्रांतिगत्यागतीनामपिस्वेनरूपेणैवसंभवे बुद्ध्युपाधिकतयातत्कल्प-
नेमानाभावात् 'शरीरंयदवाप्नोतियच्चाप्युत्क्रामतीश्वर' इत्यादिभगवद्गी-
तावाक्येणुत्वेपिजीवस्यसर्वेंद्रियग्रहणपूर्वकगमनस्योपपत्तौनदनुरोधा-
दप्यौपाधिकत्वकल्पनंनसंभवति ॥ ननु "तद्गुणसारत्वात्तु तद्व्यपदेशः
प्राज्ञवद्" इतिसूत्रवलेनजीवस्यबुद्ध्युपाधिकत्वंस्वीक्रियते तत्रतुशब्दः
नाणुरतच्छ्रुतेरितिसूत्रोक्तपूर्वपक्षव्यावृत्त्यर्थःतस्याबुद्धेर्गुणास्तद्गुणास्ते
साराःप्रधानंयस्यात्मनःसंसारिभावेसंभवंतिकारणत्वात्सतद्गुणसार-
स्तस्यभावस्तत्वंतस्मात्तद्व्यपदेशअणुत्वोत्क्रांत्यादिव्यपदेशःप्राज्ञवत्यथा
प्राज्ञस्यपरमात्मनःसगुणेपूपासनेपुउपाधिगुणसारत्वादणीयस्त्वादि-
व्यपदेशो "अणीयान्वीहेर्वायवाद्वा" इत्येवंप्रकारस्तद्वत्जीवेप्यणुत्व-
व्यपदेशउपाधिकृतएवनतुवास्तवइतिचेन्नैवंसूत्रस्यत्वदुक्तार्थकत्वा-
भावाज्जीवेबुद्ध्युपाधिकृतोणुत्वव्यपदेशोनसंभवति ॥ तथाहिजीवेव-
स्तुतोणुत्वंतदास्याद्यदिजीवस्यब्रह्मणःसकाशाद्भेदःस्यात्सएवतुनसंभ-

पादेत्तस्तद्धर्माधिकरणे ॥ अत्रैषोभिप्रायोऽवसेयः—(किंच यथाणोरणीयानि) त्यादिलेख-
स्त्वसन्मताज्ञानात् । नह्यस्माभिर्महीस्त्वश्रुतिबलात्पूर्वत्रोपचारलभ्यदुर्ज्ञेयत्वं स्वीक्रियते ।
विनिगमनाविरहेणोत्तरत्रपूज्यतमपर्यायतोक्तेर्दुर्निरासत्वात् । किंत्वलौकिकसामर्थ्याद्विरुद्ध-
धर्माश्रयत्वमेव "तदेजति तन्नैजति आसीनोदूरंव्रजतिशयानोयातिसर्वत" इत्यादिश्रुत्यं-
तरेभ्यः । किंच वालाग्रश्रुतेर्महत्वश्रुत्याभक्तिमत्वउच्यमानेतद्बलान्महत्वश्रुतेरेव कुतो न
तदापाद्यतां श्रुतित्वाविशेषात् । वालाग्रवाक्ये जीवशब्दश्रुतिश्च सर्वतो बलीयस्यनुसंधे-
या । बहूनामनुग्रहोन्याय्यइति च । अणुत्वश्रुतीनां बहुत्वात् ॥ वस्तुतस्तुमहत्वश्रुतेर्वि-
षयभेदः सूत्रकृदभिहितः प्रागेवसमर्थित इति न तथाणुत्वश्रुतीनां बाधसंभावनापि ।
तस्मादेषोणुरात्मेत्यादौ शक्यार्थबाधाभावाल्लक्षणाप्रणयोनास्थेयः । सूक्ष्मेत्वणुशब्दः शक्तः,
'अणुर्व्रीह्यल्पयो'रितिहैमोक्तेः । 'अणुर्व्रीहिविशेषेस्यात्पुंसि सूक्ष्मेऽभिधेयव'दिति मेदिनीको-
शाच्च । यत्तुबुद्धिस्थगुणेऽणुत्वव्यपदेशवचनं तत्तुसंपूर्णवेदांतादर्शिनां मंदानां व्यामोहना-
यैव । इदंहि वाक्यं श्वेताश्वतरे पंचमाध्याये "अंगुष्ठमात्रोरवितुल्यरूपःसंकल्पाहंकारसम-
न्वितोयः । बुद्धेर्गुणेनात्मगुणेन चैवआराग्रमात्रोह्यपरोऽपिदृष्ट" इति पठ्यते । अत्रबुद्धेर्गु-
णेन परिमाणेनांगुष्ठमात्रः । आत्मनः स्वस्य परिमाणेनचाराग्रमात्रइत्यर्थः । एवमेवबुद्धेर्गुणेने-
त्येकवचनंस्वरसतःसंगच्छते ॥ त्वन्मतेचात्मगुणेनेतिआराग्रमात्रपदादन्यत्रचान्वियात्तत्रा-
न्वीयमानंचकथंसंगच्छेतत्वन्मतेबुद्धिगुणैरेवाराग्रमात्रत्वात् आत्मगुणेन तुविभुत्वात् । बुद्धे-
रंगुष्ठमात्रत्वंतु मनुष्यहृदयाकाशस्य तावन्मात्रत्वात् । स्पष्टं चेदं (अ० १ पा० ३ सू०
२५) "हृद्यपेक्षयातु मनुष्याधिकारत्वादि" तिसूत्रे । किंच बुद्धेराराग्रमात्रत्वेमानाभा-
वात् । तेनतद्गुणानांतावत्त्वे च सुतरां तदभावात् । नतुबुद्धिगुणैरणुत्वं सुवचं; तस्मादेवंश्रुत्ये-
कदेशमात्रमुदाहृत्य दुर्बलान्व्यामोहयंतः सद्भिरुपेक्ष्याः । अथवाऽदृष्टोपनिषत्कोऽयंस्वपरि-
शीलिततद्गुणसारसूत्रीयस्वभाष्ये उत्तरार्धमात्रमुपलभ्य तावदेवालिखदिति नायं वराको-
ऽपराध्यति । उत्क्रांत्यादयश्चन बुद्धिधर्माः श्रुतिसूत्रादिभिस्तेषां जीवधर्मत्वसिद्धेः । तथा
च सूत्रं (अ० २ पा० ३ सू० १९) "उत्क्रांतिगत्यागतीना"मिति इह "ज्ञोतएवे"
तिपूर्वसूत्रमनुवर्तते तथाच जीवउत्क्रांतिगत्यागतिसंबंधीतद्बोधकश्रुतिभ्य इत्यर्थः । उत्क्रां-
तिश्च कौषीतकिब्राह्मणे प्रतर्दनाख्यायिकायां । "सयदास्माच्छरीरादुत्क्रामतिसहैवैतैःसर्वै-

---

तथाच भगवद्गीतायां 'शरीरंयदवाप्नोतियच्चाप्युत्क्रामतीश्वरः ॥ गृहीत्वैतानिसंयातिवायुर्गन्धा-
निवाशयात् ॥ श्रोत्रंचक्षुः स्पर्शनंचरसनंघ्राणमेवच ॥ अधिष्ठायमनश्चायंविषयानुपसेवते' इत्यत्र
ग्रहणपूर्वकं गमनमुक्तम् ॥ तथाचसूत्रम् तद्गुणसारत्वात्तुतद्व्यपदेशःप्राज्ञवदिति ॥ तुशब्दः
पूर्वपक्षव्यावृत्त्यर्थः ॥ एतेन नाणुरतच्छ्रुतेरिति सूत्रविरोधः परिहृतस्तस्य पूर्वपक्षस्थत्वात् ॥
सूत्रार्थस्तु तस्याबुद्धेर्गुण स्तद्गुणास्ते सारः प्रधानंयस्यात्मनः यत्सारिभावे संभवन्ति कारणत्वात्
सतद्गुणसारस्तद्भावस्तद्गुणसारत्वं तस्मात् ॥ तद्व्यपदेशः अणुत्वोत्क्रान्त्यादिव्यपदेशोऽणीया-
न्व्रीहेर्वायवाद्वाइत्येवंप्रकारस्तद्वदिति ॥ यद्वा 'सारोबलेस्थिरांशेचे'तिमेदिनीकोशाद्बलवाची
सारशब्दः ॥ एतेन बुद्धिगुणानामनर्थरूपत्वात्त्वयं सारत्वमित्यपास्तं ॥ ससारित्वे सार-
त्वाच ॥ तदेतदाह—एवंबुद्धिगुणैरिति ॥

रुत्क्रामती'' ति। अत्र सइतिपूर्वोक्तजीवः परामृश्यते। एतच्छब्देन चपूर्वोक्तानि प्राणादि- भिर्नीतानि परामृश्यंते। मनःशब्दश्चेहांतःकरणचतुष्टयोपलक्षकः। अन्यथा पूर्वोक्तध्याना- सिद्धेः। तेन (प्राणादेरेवपश्चादुत्क्रमणंऽन तु बुद्धे) रितिनिरस्तं। अतोत्रोत्क्रांतिर्मुख्यतया जीवस्यैवोच्यते। बुध्यादेस्तु तेनसहोत्क्रमणं न च बुध्यादिनिष्ठासाजीवउपचर्यवद्दतिवाच्यं; सहेवैतैरिति प्रयोगानुपपत्तेः। नहि पुत्रस्यैव गमने पितुश्चागमपुत्रेण सह पिता गच्छ- तीति प्रयुज्यते। अतोजीवानुत्क्रांतिसाधनाय बुद्धेस्सहोक्तिप्रयासस्तदर्थं स्वविरुद्धगीतावा- क्योपन्यासश्चाविचारात्। तत्र हि ममैवांशइतिजीवस्य स्वांशत्वमुक्त्वाऽणुत्वं बोधयितुं शरीरं यदवाप्नोतीति शरीरांतरप्राप्तिः पूर्वशरीरादुत्क्रांतिश्च जीवस्यैवोच्येते सगृहीत्वेत्य- नेन च मनःप्रभृतेर्जीवसहभावः अतएवलिंगशरीरनिष्ठेतेतत्रोपचर्यंते इतिप्रत्युक्तं भवति। देवदत्तोवस्त्राभरणादिकं गृहीत्वा गच्छतीत्युक्ते वस्त्राभरणादिकमेवगच्छति तन्निष्ठंचगमनं देवदत्तउपचर्यते इति नहिकेनापिशक्यं व्याख्यातुं। वायुर्गंधानिविदृष्टांतेनापि जीवस्यैवते बोध्येते। न हि गंधमात्रं गच्छति तन्निष्ठा च गतिरगंतर्यपि वायावुपचर्यंत इति त्वयापि शक्यं वक्तुम्। ईश्वरशब्दश्च जीवपक्ष एव संगच्छते, स्वांशत्वात्; न तु बुद्धिपक्षे जडत्वात्। त्वन्मते मिथ्यात्वाच्च। तस्मादुत्क्रांतिर्जीवधर्मः तथालोकांतरगतिरपि तत्र तत्र श्रुतिपु तस्य श्रूयते। यथा कौषीतकिब्राह्मण एव (पृ० ७) गार्ग्यायनि श्वेतकेतुसंवादे "ये वै केचास्माल्लोकात्प्रयंतिचंद्रमसमेव ते सर्वे गच्छंति" इतितथालोकांतरात्तस्येहागतिरपि अनेकत्राम्नायते। यथा बृहदारण्यके (पृ० ८५६ अ० ६ ब्राह्मण ४ मं० ६) "तस्माल्लोकात्पुनरेत्यस्मै लोकाय कर्मणे" इति। अत्र कर्मणइत्युक्तयापि जीवस्यैव सा दृढीक्रियते जडस्य बुध्यादेस्तद्‌योगात्। जीवस्यैव सर्वकर्मकर्तृतायाः (अ० २ पा० ३ सू० ३३) कर्ताशास्त्रार्थवत्त्वादि" त्यधिकरणे सुनिर्धारितत्वाच्च। अग्रे तस्यैवागंतु- र्निष्कामत्वे मोक्षस्तत्रैवाम्नायते न सबुध्यादेः संभवति; किंच मनुनाऽपि षष्ठाध्याये (श्लो० ६३) 'देहादुत्क्रमणं चास्मात्पुनर्गर्भे च संभवं। योनिकोटिसहस्रेषु सृतीश्चास्यां- तरात्मन' इति स्मरता जीवस्योत्क्रांत्यादयः श्रुत्यभिप्रेततया दर्शिताः। स्मृत्यंतराणि तु विस्तरभयान्नोपन्यस्यंते। किंचैतासूत्क्रांत्यादिषु तु तस्या मनःप्रभृतिसहभावोप्यस्ति। सुषुप्त्यादिषु तु केवलस्यैव जीवस्य गत्यागती सिध्यतः, अतउक्तसूत्रात्पुरतएव सूच्यते (अ० २ पा० ३ सू० २०) "स्वात्मनाचोत्तरयोरि"ति। अयंस्तुजीवः स्वात्मना केवले- नाणुमात्रस्वस्वरूपेणोत्तरयोर्गत्यागत्योः संबंधीसुषुप्त्यादौ भवति। तथाचाथर्वणानां ब्रह्मोप- निषदि "ऊर्णनाभिर्यथातंतून् सृजते संचरत्यपि। जाग्रत्स्वप्नेतथाजीवोगच्छत्यागच्छतेपुनरि" ति अत्रोर्णनाभितौल्यं ब्रह्मणः ततो गत्यागती जीवस्य। स्पष्टं चेदं दृप्तबालाकिब्राह्मणा- दिष्वपीत्यलं प्रसंक्तानुप्रसक्त्या। किंच श्वेतकेतुविद्यायां "अनेन जीवेनात्मनानुप्रविश्ये" ति नामरूपव्याकरणादिसृष्टेः प्रागपि जीवरूपेण प्रवेश उच्यते। तथा "ब्रह्मैव सन् ब्रह्माप्येता" त्यादौ ब्रह्मभावोत्तरं सैंधवखिल्यन्यायेन ब्रह्मणयप्ययः श्रूयते; "यथासैंधव- खिल्यउदके प्रास्तउदकमेवानुविलीयेत" तिमैत्रेयीब्राह्मणश्रुतेः। न हि ब्रह्मभावोत्तरं बुध्यादिकं त्वयाशक्यं वक्तुं; बुद्ध्यादेर्ज्ञानावश्यकत्वात्। ज्ञानमंतरा ब्रह्मभावाभावात्

वति "ऐतदात्म्यमिदंसर्वंतत्सत्यंसआत्मातत्त्वमसिश्वेतकेतो" कौषीतकिब्राह्मणसमाप्तौच "इदंसर्वंयदयमात्मे" त्यभिधाय "सएवत्वमसी" त्यादिश्रावणेन "अहंब्रह्मास्मी" त्यहंग्रहश्रावणेनचपरमेवब्रह्मजीवइतिसिद्ध्यति "सत्यंज्ञानमनंतंब्रह्मे" त्यादिश्रुतिभिस्तस्यव्यापकत्वमपि सिद्धमेवकथमणुत्वंतस्येतीमामाशंकांसूत्रस्थस्तुशब्दोनि वारयति तस्यब्रह्मणोगुणास्तद्गुणाःप्रज्ञाद्रष्टृत्वादयः "प्रज्ञाचतस्मात्प्रसृतापुराणी एतदक्षरंगार्ग्यदृश्यंद्रष्टृ" इत्यादिश्रुतिसिद्धाः तएवात्रजीवेसाराइंद्रप्रतर्दनसंवादे "प्रज्ञयावाचंसमारुह्यवाचासर्वाणिकर्माणिनामान्याप्नोति" प्रश्नोपनिषदिच "एषहिद्रष्टास्प्रष्टाश्रोताघ्रातारसयितामंतावोद्धाकर्ता विज्ञानात्मापुरुष" इत्युक्तत्वात्साराःप्रधानाजडविलक्षणाइति यावत्; अन्यथापदार्थत्वब्रह्मांशत्वादीनांसर्वत्रतुल्यतयाकेनजडवैलक्षण्यमस्य भवेत्तस्मात्तद्व्यपदेशःजीवेभगवद्व्यपदेशःअमात्ये राजपदप्रयोगवत्। अयंचव्यपदेशोमैत्रेयीब्राह्मणेतत्र "नवाअरेपत्युःकामायपतिःप्रियो भवती" तिजीवमुपक्रम्याग्रेच तद्विज्ञानतःसर्वविज्ञानार्थंसर्वस्यतदात्मकत्वकथनेनवेदादीतन्निःश्वासत्वकथनेनब्रह्मधर्माणांतत्रबोधनाद्भगवत्त्वेनजीवउक्तंएवंतत्त्वमसीत्यादावर्पितद्व्यपदेशः। ननुमैत्रेयीब्राह्मणेन्यस्यान्यधर्मत्वेनकथनंनसंभवतिनिरूपणस्थलउपचारस्यासंभवादितितत्रैवोपाचाराभावात्तद्दृष्टांतेनतत्त्वमसीत्यादावप्युपचारोनसंभवतीतिचेत्तत्राहप्राज्ञवत्॥बृहदारण्यकेशारीरकब्राह्मणेजीवमुपक्रम्यतज्जाग्रत्स्वप्नावस्थेपूर्वमुक्त्वा "यत्रसुप्तोनकंचनकामंकामयतेनकंचनस्वप्नं पश्यती" तिसुषुप्तिंवदन्तत्सामयिकंजीवस्वरूपंनिरूप्य "तद्यथाप्रिययास्त्रियासंपरिष्वक्तोनबाह्यंकिंचनवेदनांतर" मितिजीवब्रह्मणोर्भेददृष्टांतनिरूपणावसरे "एवमेवायंप्राज्ञेनात्मनासंपरिष्वक्त" इत्यभिधायकः प्राज्ञइत्याकांक्षायांप्राज्ञस्वरूपमाहतत्र "अत्रपिताऽपिताभवती" त्यादिना अत्रअस्यरूपमित्यनेनपरमेश्वरस्यैवरूपांतरमुच्यतेनहिसुषुप्तिसाक्षिणःप्राज्ञस्यस्यतोऽपहतपाप्मत्वादिकंसंभवत्यपहतपाप्मत्वस्य ब्रह्मलिंगत्वात्तथा चयथाप्राज्ञस्यनिरूपणावसरएव "एषसर्वेश्वर एषसर्वज्ञएषोंतर्याम्येषयोनि" रित्यादिनाब्रह्मधर्मनिरूपणमेवंशारीरस्यापिब्रह्मधर्मबोधिकाः श्रुतयोजीवेगौण्याब्रह्मत्वंवदंतीति॥

सद्दशाक्षे मिच यथाणोरित्यादिफलंबुद्धिगणेरितीत्यंतं भागंनिरस्यंति—यदपि किंचे-
पदंडीनीत्यंतेन॥ तत्परमिति॥ जीवस्य दुर्ज्ञेयत्वप्रतिपादक उभयत्र-
दीनिन्यायपंचरत्नभण्यां (अ० १ भा० सू० २५) "लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धि-

साम्यं सदर्शांत'' इति गौतमोक्तेरिति भावः। अपाणिपादेति श्वेताश्वतरस्थं प्राग्व्याख्यातं। वालाग्र इत्यादि वाक्यद्वयमपि–श्वेताश्वतरस्थं अर्थस्तु व्याख्यास्यते। बुद्धेर्गुणेनेति। एतदपि श्वेताश्वतरवाक्यमग्रे व्याख्यास्यामः॥ साराः प्रधानमिति। सहस्राक्षे साराः इति बहुवचसा विग्रहादिहापि तथैवानूदितं। शांकरभाष्ये तु सार इत्येकवचनेनैव विग्रहःसारशब्दस्यैव चार्थः प्रधानमिति। अतः सहस्राक्षे तद्व्याख्यायांकेदोनुसंधेयः॥ कारणत्वादिति। कर्तृत्वभोक्तृत्वलक्षणं संसारं प्रति बुद्धेरेव कारणत्वात्॥ अणीयान्व्रीहेरिति। छांदोग्येपंचमप्रपाठके शांडिल्यविद्यायामिदं पठ्यते। तत्रच "इति शांत उपासीते"–त्युपक्रमादुपासनाप्रकरणं तत्। तत्रैव "सक्रतुं कुर्वीते" तिश्रावणाच्च॥ सौत्रतुशब्देननिराकरणीयं पूर्वपक्षमाहुः। जीवे वस्तुतइत्यादिना। अत्र तद्गुणसारसूत्रस्थभाष्यप्रकाशग्रंथमेव तत्रत्यभाष्यसहित केनचित्पाठभेदेन संक्षिप्य प्रायेणाक्षरशोऽनुवदंति–ऐतदात्म्यमित्यादिना। इदं छांदोग्येऽष्टमप्रपाठकेऽस्ति। अत्राऽपि जडस्य ब्रह्मात्मकत्वं सत्यत्वं चोक्त्वा ततः पृथक् जीवस्य शुद्धास्वरूपतोक्ता॥ प्रज्ञाचेति। इदं श्वेताश्वतरस्थं द्रष्टृत्ववाक्यं च बृहदारण्यकगार्गीब्राह्मणस्थं। इंद्रप्रतर्दनसंवादस्तु कौपीवकिब्राह्मणे तृतीयाध्यायेऽस्ति॥ प्रज्ञयावाचमिति॥ प्रज्ञया विसर्पिस्तत्रचैतन्यगुणेन वागिंद्रियं समारुह्येत्यर्थः। एवमिंद्रियांतरेष्वपि प्रज्ञयासमारोहणं तत्र "प्रज्ञया प्राणं समारुह्य प्राणेन सर्वान्गंधानाप्नोती" त्यादिना "प्रज्ञया मनः समारुह्य मनसा सर्वाणि ध्यानान्याप्नोती" त्यंतेन श्रावितं॥ प्रश्नोपनिषदीति। तत्र "अहैनं सौर्यायणीगार्ग्यः पप्रच्छ" इतिचतुर्थप्रश्ने इदमस्ति तत्र "तेन तर्ह्येष पुरुष" इत्यादिना प्रस्वापवर्णनात् स्वप्नवर्णनात् "सपरेऽक्षरेआत्मनि संप्रतिष्ठते" इत्यादिकथनाच्चजीवपरमेवैतत्॥ अन्यथेति। जीवेभगवद्गुणसारत्वस्याभावे॥ पदार्थत्वेति। पदार्थत्वमभिधेयत्वं॥ जीवमुपक्रम्येति बृहदारण्यके षष्ठाध्याये द्वितीयब्राह्मणे शारीरकत्वेन जीवमुपक्रम्य तृतीयब्राह्मणे तस्य जाग्रत्स्वमाद्यवस्थानिरूपिताः। "यत्र सुप्त" इत्यादिवाक्यान्यपि तृतीयब्राह्मणस्थानि॥ प्राज्ञस्वरूपमाहेति "तद्वाअस्यै तदतिछंदा" इतिवाक्यं तद्यथा प्रिययेत्यस्मादव्यवहितं पूर्वमस्ति। ततः पुरस्तादव्यवहितंच "तद्वा अस्यैतदाप्तकाममात्मकाममकामरूपं शोकांतरं अत्र पिताऽपिता भवति माताऽमाता" इत्यादिपठ्यते। तथापूर्वोत्तरवाक्ये उभेऽपि परमेश्वरस्य प्राज्ञाख्यं रूपविशेषं निरूपयत इतिभावः॥ ब्रह्मलिंगत्वादिति। स्पष्टं चेदं प्रथमस्य प्रथमे

किञ्च यथाऽणोरणीयानित्यादिवाक्यं महतोमहीयानितिवाक्यबलात् दुर्ज्ञेयत्वपरमित्यङ्गीक्रियते तथेहापि महानजः नित्यःसर्वगतःस्थाणुरित्यादिवाक्यबलाद्वालाग्रशतभागस्येत्यादिवाक्यं तत्परं स्वीक्रियतामित्याह–परस्मिन्यथेति॥ यथा दुर्ज्ञेयत्वाभिप्रायेण ब्रह्मण्यणुवचस्तथा जीवइत्यर्थः॥ किञ्च बुद्धिस्थगुणैरेवानतथा व्यपदेशोऽस्तु। तथाच श्रुतिर्बुद्धेर्गुणेनात्मगुणेनचैवआराग्रमात्रोह्यवरोपिदृष्टइति॥ एतेनोत्क्रान्त्यादयोऽपि व्याख्याताः तासामपि बुद्ध्युपाधिकत्वात्॥ तदुत्क्रामन्तं प्राणोनूत्क्रामतीत्यादौ प्राणादेरेव पश्चादुत्क्रमणमुक्तं नतु बुद्धेरिति तस्याः सदोत्क्रमणेऽपि नतद्विरोधः॥ अनोर्लक्षणार्थत्वेनापिविरोधाभावाच्च॥

"ब्रह्म वेद ब्रह्मैव भवति। नान्यः पंथा विद्यतेऽयनाये" त्यादिश्रुतिभ्यः। किंच भृगुवल्ल्यां "अस्माल्लोकात्प्रेत्ये" ति परममुक्त्यनंतरमपि "कामान्नीकामरूप्यसंचर" न्नित्यनुसंचरणं श्रूयते। छांदोग्येऽपि "तस्य सर्वेषु लोकेषु कामचारोभवती"ति। न हीदं विभोः संभवति, नापि परममुक्त्युत्तरमपि बुद्ध्यादिकमस्ति यद्गतं तदुपचर्येत अतोजीवस्यैवोत्क्रांतिगत्यागतीनां श्रुतिगीतासूत्रादिसिद्धत्वाद्विभुत्वेच तदसंभवात्सोऽणुरेव। यत्तूनोलक्षणार्थत्वं तमुत्क्रामंतमिति श्रुतावुक्तं,–तदसंगतं; तथासतिजपमनुमावर्षेदित्यादौ वृष्टेर्जपज्ञानजन्यज्ञानविषयत्ववत्प्राणोत्क्रान्तेर्जीवोत्क्रांतिज्ञानजन्यज्ञानविषयत्वं वाच्यं; तदेव न संभवति जीवोत्क्रांतेः सुतरां दुर्ज्ञेयत्वात्। लोके प्राणोत्क्रांतिज्ञानाज्जीवोत्क्रांतिनिश्चयदर्शनेन विपर्ययाच्च॥ किंचैतावतापि साक्षाज्जीवोत्क्रांतिः स्वमुखेन प्रतिपादितेति वृथाभ्रांतोसि॥ नन्वेवमपि श्रुतौ प्राणादेरनूत्क्रमणं गीतायां च सहोत्क्रमणंसिध्यतीति कथं तयोरविरोध इति चेदुच्यते–वल्शिष्टहयस्योत्क्रमणे हि पड्बंधनशंकूनामनूत्क्रमणं प्रसिद्धं, तत्राव्यवहितोत्तरक्षणएव शंकूत्क्रमणात् शंकुभिः सहोत्क्रांतो हय इत्यपि प्रयुज्यते। स्पष्टश्चायं दृष्टांतो बृहदारण्यकेछांदोग्ये च प्राणविवादे (अ० ७ पृ० २९९) "अथहप्राण उच्चिक्रमिष्यन् ससंयासुहय पड्वीशशंकून् संखिदेदेवमितरान्प्राणान्त्समखिदत्त ँ हाभिसमेत्योचुर्भगवन्नेधि त्वन्न श्रेष्ठोसि मोत्क्रमीरिती"ति। तस्मादनूत्क्रमणे वास्तवं स्वल्पकालांतरायंविवक्षित्वा बृहदारण्यकादिश्रुतिः प्रवृत्ता। तमविवक्षित्वा तु कौषीतक्यादिश्रुतिर्गीताचेत्यविरोधः। तद्गुणसारसूत्रस्य वास्तवार्थस्तूच्यते। तत्त्वमसीत्यादौ जीवस्यसाक्षाद्ब्रह्मत्वकथनाद्ब्रह्मणश्च "व्याप्यनारायण स्थित" इत्यादिश्रुतिभिर्व्यापकत्वश्रवणात् कथंजीवस्याणुत्वं संगच्छतामित्याशंकायामुच्यते (अ० २ पा० ३ सू० २९)–"तद्गुणसारत्वात्तुतद्व्यपदेश प्राज्ञवत्" इतितुशंकानिरासेतस्य ब्रह्मणो ये गुणाः प्रज्ञाद्रष्टृत्वादयःतएवसारा.प्रधानाः जडवैलक्षण्यबोधकायस्यतद्गुणसारःजीवस्यतद्गुणसारत्वादेवास्मि ँ स्तद्व्यपदेश तत्त्वमसीत्यादौसाक्षात्त्वव्यपदेश.राजज्येष्ठपुत्रे राजेतिव्यपदेशवत् तत्रश्रौतदृष्टांतः प्राज्ञवदिति "तत्रवस्येवे" तिसप्तम्यर्थे वतिः। प्राज्ञः सुषुप्तिसाक्षीशारीरकब्राह्मणादौ माध्यंदिनपाठे प्रियश्रीरसुषुप्तिकाले सत्परिष्वंगमभिधाय तस्य स्वरूपमुच्यते–"तद्वा अस्यैतदतिच्छंदोपहतपाप्माभय ँ रूपमशोकांतमि" तिमूलव्याख्यानावसरेत्वस्माभिः कण्वपाठउपन्यस्त.भाष्ये प्रकाशे चैतत्सूत्रे माध्यंदिनपाठस्यसप्तमाध्यायपाठ एवोदाहृतोज्ञेय। अतोत्र साक्षाद् ब्रह्मत्वाभावेपि यथातत्त्वव्यपदेशस्तद्वदित्यर्थः। यत्तु नाणुरितिसूत्रस्य पूर्वपक्षस्थत्वमुक्तं–तदसत्; उत्क्रांत्यादिवत्तस्यपूर्वपक्षरूपत्वेमानाभावात्। नच प्रकृतसूत्रस्थस्तुशब्द.पूर्वसूत्रेषु पूर्वपक्षत्वं बोधयतीतिवाच्यं, तुशब्दघटितसूत्रपूर्वसूत्राणां पूर्वपक्षरूपत्वनियमांगीकारे "तत्तुसमन्वयादि"त्यादितःपूर्वजिज्ञासाद्योनिरपादिसूत्राणामपित्वयात्वमसंगात्। किंच "ज्ञोतएवे" त्यंतानिसुसिद्धांतसूत्राण्येवेत्यत्रापि लिंगमकं लोके बुद्धिद्वारा ज्ञानदर्शनात् ज्ञातृत्वव्यपदेशोपि बुद्धिगुणसारत्वादेवेति तस्यापि पूर्वपक्षसूत्रत्वमापद्येत। तथा बुद्धिनित्यत्वादेव तस्य नित्यत्वमस्तिनति "नात्मश्रुतेरि" त्यस्यापि गतार्थत्वं; विनिगमकाभावात्। यदुश्रुतिस्फोरेप एवात्र गमक इति चेत्तत एवोत्क्रांत्यादिसूत्राणामपि पूर्वपक्षरूपत्वं स्यात्॥

बहुष्वेवश्रुतिष्वणुत्वोत्क्रांत्यादीनांश्रवणात् । किं च पूर्वं केवलजीवस्वरूपेण गत्यागती अणुत्वबोधकस्वशब्दादिकं विभुत्वबोधकश्रुतीनां परविषयत्वं चोक्तं तत्सर्वस्वव्याख्यातरीत्यापितद्गुणसारसूत्रेणनशक्यंसमाधातुं । तथाभिप्रायेसूत्रकारःपुनःसूत्रांतराणिकृत्वास्वरूपगत्यागतिःस्वशब्दादिकंचसमादध्यात् । महत्त्वश्रुतेश्चप्रकरणंबाधित्वाजीवविषयत्वंसाधयेत् । यच्चपूर्वंगुणविसर्पणेप्रभागंधादिकंदृष्टांतीकृतंतन्निरासायप्रभायाद्रव्यत्वंपुष्पादेरवयवोद्गमंचस्वयंब्रूयात् । याश्चांतिमसूत्रद्वयेनस्पष्टतराविसर्पिगुणत्वबोधिकाःश्रुतयोगृहीतास्ताअपिकथंचिद्योजयेत् । नहिभगवानसमर्थोयत्स्वयंपूर्वपक्षेबहुतरंबलीयोबाधकमुपपाद्यापिनसमादध्यात् । बुद्धिगुणसारत्वादणुत्वव्यपदेशइत्येतावन्मात्रोक्तयातु "प्रज्ञया शरीरंसमारुह्य" त्यादिस्पष्टविसर्पिगुणत्वबोधकश्रुत्यंतंसर्वंनैवसमाहितंभवतीत्यपाणिपिहितमेतत् । नापिन्यासातिरिक्तःकपिलकणादगौतमाद्यन्यतमःकोप्यणुत्वंनदति । यदनुवादत्वेनोत्थिताशंकारूपोतिविस्तीर्णएवंपूर्वपक्षःप्रवर्तेततद्बुद्धिगुणसारत्वादणुत्वादिव्यपदेशइत्येव सूत्रितेविभुत्वासिद्धेर्दशसूत्रीप्रणयनवैयर्थ्यंत्वकिंचपूर्वसूत्रेषुबुद्धेर्गंधोप्यभावात् । तच्छब्देनात्रबुद्धिरेवपरामृश्यतइतिकथंनिश्चीयतां । सर्वेनाम्नांपूर्वपरामर्शकत्वदर्शनेनतदसंभवात् । बुद्धेरेवसूत्रकर्तृबुद्धिस्थत्वकथनेमानाभावाच्च । तथासतिच 'अल्पाक्षरमसंदिग्ध'मितिसूत्रलक्षणंजानन् बुद्धिगुणसारत्वादित्येवसूत्रयेत् । श्रीमदाचार्योक्तार्थेतुब्रह्मणोधिकृतत्वात्परामर्शः संभवति । 'ॐ तत्सदितिनिर्देश'इतिगीतावाक्यंचात्रानुगुणं । सूत्रेब्रह्मवाचकतच्छब्देन तत्त्वमस्यादीनि तद्घटितविषयवाक्यान्यप्युपतिष्ठंते । "जन्माद्यस्य यतः ईक्षतेर्नाशब्दमि" त्यादौयतश्शब्दादिभिः "यतोवाइमानि सईक्षते" त्यादिवदितिसर्वंसमंजसं । किंच नैयायिकोपपादितगुणानां द्रव्यमात्रवृत्तित्वमिव गुणे गुणांतरासत्वमपि त्वयोरीकार्यं । तथासति बुद्धेर्गुणत्वेन तस्यागुणा एव नसंभवंति यच्चेह शारीरकभाष्ये "तस्याबुद्धेर्गुणास्तद्गुणा इच्छाद्वेषःसुखंदुःखंइत्येवमादय" इत्यभ्यधायि तदसंभवि बुद्धेर्जडत्वात् इच्छाया अजडधर्मत्वस्य स्वयमीक्षत्यधिकरणेंगीकारात् "एतस्यैवानंदस्यान्यानिभूतानि मात्रामुपजीवंती"त्यादिश्रुतिभिः सुखस्य ब्रह्मधर्मत्वात् । नैयायिकादरणेतुद्वेषदुःखयोरप्यात्मधर्मत्वापत्तेश्च ॥ बुद्धिगुणानामनर्थकत्वात्सारत्वं चासगतं नचसारशब्दोबलार्थइतिवाच्यं स्वभाष्यविरोधात् । यदि भाष्यकारस्तथाभिप्रैष्यत् तर्हि सारोबलमित्येवव्याख्यास्यत् । बलस्य प्राणधर्मत्वेन बुद्धेर्गुणप्राणधर्मोयस्येत्येतावतापि इष्टाऽसिद्धिरर्थासामंजस्यंच । नच सारोबलइतिकोशे बलशब्दस्यार्थांतरंकल्प्यं; कोशेष्वेवमदर्शनात् । अनिर्णयापत्तेश्च । अतोनबलार्थता । अपिच उपाधिगुणानां सारत्वोक्तौ सहचरितस्योपधेयस्यासारत्वमर्थादेवफलतः तस्मात्तदुक्तः सूत्रार्थएवनसंगच्छते । अधिकंतूत्तरभागे प्रकाशयिष्यते । एवंच जीवोणुरेवोत्क्रांत्यादयश्च तस्यैवधर्माइतिसिद्धम् ॥

ननुजीवस्याणुत्वेसकलशरीरव्यापिशैत्यस्यजलावगाहनादौनिदाघे चतादृशौष्ण्यस्याप्रतीतिप्रसंगादात्मनएकदेशस्थत्वादितिचेन्न; यथा-चंदनमेकदेशस्थमेवसामर्थ्यविशेषात्सकलशरीरेसुखंकरोत्येवमात्मापि सामर्थ्यविशेषात्सकलशरीरव्यापिशैत्याद्युपलब्धिजनयिष्यतीतिन

पूर्वोक्तदोषःकिंचयथावैद्यके 'ज्वरंहंतिशिरोवद्धासहदेवीजटायथा' इत्यादिना एकदेशस्थजटयासर्वेशरीरेसुखस्यजननंप्रभावविशेषात्त-थात्मनापीति । ननुचंदनदृष्टांतेनसामर्थ्यव्याप्तिसाधनमयुक्तंचंदने एकदेशस्थायित्वस्यप्रत्यक्षतोनिश्चयाज्जीवेतुशरीरैकदेशस्थायित्वस्य प्रत्यक्षेणानिश्चयाद्दृष्टांतवैषम्येनतादृशसामर्थ्यसिद्ध्यभावात्किंचचैत-न्यमात्मनोगुणःसचगुणिमात्रवृत्तीरूपरसादिषुतथैवदृष्टत्वात्तथाच चैतन्यस्यसर्वशरीरव्याप्त्यासर्वशरीरव्यापीजीवात्मामंतव्यःयदिसा-मर्थ्येनव्याप्नुयात्तदास्यगुणोनसर्वत्रानुभूयेतेतिचेन्मैवं, गुणोगुणिनंवि-नानसंभवतीतिव्याप्तेरसिद्धत्वात्रूपरसादिषुसत्वेपिमणिप्रवेकेव्यभि-चारात्विनापिमणिंतस्यसकलभवनव्याप्तिदर्शनादत्रापितद्वच्चैतन्यस्य सकलशरीरव्याप्तिकल्पनेविरोधाभावात् । ननुप्रभादृष्टांतोनसंभवति तस्यामणिजनितविरलसजातीयद्रव्यांतरत्वात्सूर्यादिप्रभावदितिचे-त्सूर्यादिप्रभायांस्पर्शोपलंभात्तत्रद्रव्यांतरत्वमपिसंदेग्धुंशक्यंमणेस्तु-पार्थिवत्वेनतत्रकिरणरूपद्रव्यांतरजननेमणितोबहिर्गतानामवयवान-विहिष्टत्वान्मणिपिधानकालेपितदनुभवापत्तिः मणिनाशेपिस्थित्याप-त्तिःनिमित्तकारणनाशस्यद्रव्यनाशाहेतुत्वात्वमणेर्विजातीयद्रव्यं प्रति समवायिकारणत्वासंभवात्यदिमणौस्वप्रभायाःसंकोचकत्वंप्रसारक-त्वंचस्वीक्रियतेतदामणेश्चेतनत्वापत्तिः । स्वतआकुंचनप्रसारणादि-कस्यजडेऽसंभावितत्वात्न चलज्जावत्याख्यओषधिविशेषेपुरुषच्छाय-यातेनाकुंचनस्यतदभावेचसरणस्यदृष्टत्वान्नोक्तापत्तिरितिवाच्यं; तस्या अपिजीवचत्त्वान्नाचेतनत्वमन्यथोत्पादितेपितथाभावप्रसंगादचेतनत्व साम्यात्तस्मान्मणिप्रभानद्रव्यांतरंकिंतुतस्यगुणएव । ननुयदिमणिप्र-भागुणएवेत्यंगीक्रियतेतदागुणस्यगुणिनंविनागमनायोगात्कथंमणिंवि-नाभित्त्यादिदेशव्यापित्वमन्यथारसादीनामपिस्वाश्रयद्रव्याधिकदेश-वृत्तित्वंस्यादितिचेन्न; प्रकृष्टगुणस्यगुण्याधिकदेशवृत्तित्वमपिकल्प्यतेप्र-तीतिबलात् । अपकृष्टगुणस्तुगुणिमात्रवृत्तिरितिनियमःतेननरसादिष्व-तिप्रसंगः । अयमेवार्थो"गुणाद्वा लोकवत्"दितिसूत्रेणव्यासेर्दर्शितःतथा-चजीवस्याणुत्वेपितच्चैतन्यस्यसकलदेहव्यापित्वान्नसर्वांगशैत्यौष्ण्या-द्यनुपलब्धिप्रसंगः । एतेनप्रदीपालोकस्यगुणत्वेप्रकाशवत्सूत्रविरोध) इत्यपास्तंदीपस्यतेजस्त्वात्तस्यस्वलोकरूपतेजोविशेषोपादानत्वस्यकथं-चित्संदेहेपिमणेःपार्थिवत्वात्तत्प्रभायांद्रव्यत्वेमानाभावात् किंच"प्र-काशवत्" दितिसूत्रेनप्रकाशस्यद्रव्यत्वंप्रतिपादयतियेनालोकस्यगुणत्वे तद्विरुद्धंस्यात्सूत्रार्थस्तुभाष्येस्पष्टःग्रंथगौरवभयादनतिप्रयोजनकत्वा-

ष्यात्रनोक्तः। यत्तु (ज्ञानस्यगुणत्वेतस्यपदार्थांतरेणसंयोगसमवाययोरसंभवेनसाक्षात्संबंधांतरस्यवक्तुमशक्यत्वेनासंबद्धस्यभानेऽतिप्रसंगो नचशैत्यादिभानानुपत्ति)रित्युक्तं,–तदपिनसम्यक्; ज्ञानस्यसाक्षात्संबंधाभावेप्यंतःकरणवृत्तिद्वारकसंबंधसत्वेबाधकाभावात् अन्यात्वन्मतेप्यात्मनोज्ञानस्वरूपत्वेनज्ञानस्यचगुणत्वेनविषयैःसहसाक्षात्संबंधासंभवात्तद्विषयभासकत्वंतस्यनस्यात् । वस्तुतस्तु द्रव्यगुणसंयोगसमवायादिपरिभाषायास्तार्किकसंमतत्वेप्यसदसम्मतत्वान्नासन्मतेतादृशगुणत्वादिकमादायदोष एव (मालोकस्यचाक्षुषसत्वेनगुणचाक्षुषेस्वसंयुक्तद्रव्यद्वाराचक्षुषोहेतुत्वंव्याकुप्यते)त्यादिदोषस्यापादनमप्यसन्मतमज्ञात्वैव तादृशकार्यकारणभावस्यतार्किकसंमतत्वेनासन्मतेतद्व्याकोपस्यदोषत्वासंभवात् यथामण्यादिमभायाःधर्मिणंविनैवमसरणं। नचगंधप्रत्यक्षेघ्राणसंयुक्तसमवायस्यहेतुत्वाद्द्रव्येणघ्राणस्या संयोगेगंधप्रत्यक्षानुपपत्तिरितिवाच्यं; तादृशकार्यकारणभावे मानाभावात्तवगंधाकारवृत्तिविशेषस्यैवगंधप्रत्यक्षहेतुत्वात् । यदिचस्वमतंविहायतार्किकमतमवलंब्यतादृशकार्यकारणभावानुरोधेनद्रव्यस्यैवदेशांतरगमनंस्वीक्रियतेतर्हिवक्तव्यंतद्द्रव्यंपरमाणुरूपद्व्यणुकरूपतद्भिन्नंत्रसरेण्वादिरूपंवा? नाद्यः; तन्मतेविषयतासंबंधेनपड्विधप्रत्यक्षत्वावच्छिन्नंप्रतिसमवायस्यसमवायिसमवेतत्वाद्यन्यतमसंबंधेनमहत्वस्यहेतुत्वोपगमात्परमाणौद्व्यणुकेचमहत्वाभावाद्गंधस्यप्रत्यक्षंनस्यात् तादृशकार्यकारणभावानुपगमे परमाणुतद्गतरूपादीनांप्रत्यक्षत्वापत्तिः; नापिद्वितीयः, यथागंधस्यप्रत्यक्षंतथातदाश्रयस्यापित्रसरेण्वादेःप्रत्यक्षं स्यात्तत्कारणीभूतमहत्वोद्भूतरूपादिकारणकलापसत्वात् । नचतेषुमहत्वस्यगंधप्रत्यक्षानुरोधेनकल्पनेपितत्प्रत्यक्षानुपलंभेनात्रानुद्भूतरूपव त्वकल्पनाद्यानुपपत्तिरितिवाच्यंचंपकाद्यवयवानामनुद्भूतरूपवत्वेचंपकादीनामप्यनुद्भूतरूपवत्वापत्त्याचक्षुरादिवत्प्रत्यक्षंतेषांनस्यात् अवयवरूपस्यावयविनिस्वसजातीयरूपारंभकत्वात्किंचद्रव्यस्यप्रसरणेऽवशिष्टद्रव्येन्यूनपरिमाणवत्त्वंस्यात्नचावयवानामतिसौक्ष्म्यात्तदपगमेपिनद्रव्यस्यलघुत्वादिमानमितिवाच्यं; तेषामतिसौक्ष्म्यकल्पनेगंधस्यप्रत्यक्षत्वानुपपत्तेरुक्तत्वात् । नचावयवांतरपूरणान्नाल्पपरिमाणवत्वंचंपकादीनामितिवाच्यंआगंतुकस्यावयवत्वेप्रमाणाभावात्किंचागंतुकस्यविजातीयगंधवत्वाच्चंपकादीनांन्यूनगंधवत्त्वंमिश्रितगंधवत्त्वंवास्यात्नचत्वन्मतेपिगंधस्यप्रसरणेचंपकादौन्यूनगंधवत्त्वंतत्परिहाराय

पार्थिवस्याकाशेउत्पत्त्यसंभवेनतस्यामसरणशीलत्वमंगीकर्तव्यमेवगंधस्यापितथात्वेनदोषःनैयायकीयश्चयणप्रक्रियातुअनेकशब्देतद्ध्वंसादिकल्पनयागुरुभूतेतिनचकस्यचिद्गंधस्यस्वल्पक्षालनेनिर्गमनंकस्यचिन्मुहुःप्रक्षालनादिनापगमइतितारतम्यदर्शनेनगंधस्यसावयवत्वापत्तिरितिवाच्यं; उत्कटत्वानुत्कटत्वयोरेवतद्धर्मयोरपगमानपगमनियामकत्वस्वीकारेणदोषाभावात् । वस्तुतस्तुसिद्धांतेगंधादीनांभूतसूक्ष्मरूपत्वेनसावयवत्वेपिनदोषःगंधेनैवचंदनस्पृष्टवायुसंपर्कशालिशाल्यंतरशैत्य निंवतरुविशेषसंपर्कशालिवातसंसर्गजमुखतिक्तत्वमपिव्याख्यातंज्ञेयं। अयमेवार्थो "गुणाद्वाऽऽलोकवत् व्यतिरेकोगंधवत् अविरोधश्चंदनवत् इतिसूत्रैर्व्यासैर्दर्शितः । नचतादृशसूत्राणिपूर्वपक्षपराणीतिवाच्यं; तेषांपूर्वपक्षपरत्वमानाभावात् । अतएव "तथाचदर्शयती" त्यनेनसूत्रेण जीवस्याणुत्वमेवदृढीकृतं । तदर्थस्तुजीवोणुरेवस्वस्वगुणेन चैतन्येन शरीरंव्याप्नोतीतिवेदोदर्शयति । तथाचकौशीतकिब्राह्मणे "तंहोवाचाजातशत्रुर्यत्रैपएतद्बालाकेपुरुषोशयिष्टयत्रैतद्भूद्यतएतदागा" दितिप्रतिज्ञाय "हितानामपुरुषस्यनाड्योहृदयात्पुरीततमभिप्रतन्वंतितद्यथे" त्याद्युक्त्वा "तासुतदाभवती" तिहृदयायतनत्वंतादृशनाडीपुस्थानेनाणुपरिमाणत्वंचाभिधायतस्यैवहृदयायतनस्याणोरात्मनः "सएषप्राणएवप्रज्ञात्मेदंशरीरमात्मानमनुप्रविष्टआलोमभ्यआनखाग्रेभ्य" इतिचैतन्येनगुणेनसमस्तशरीरव्याप्तिंदर्शयति। अन्यथाअणोर्व्याप्तिर्नोपपद्येतातोणुबोधनपूर्वकंव्याप्तिबोधनाच्चैतन्यंगुणएवेतिज्ञेयं प्रकाशाश्रयवद्वातेजस्त्वा" दितिसूत्रमत्रोपष्टंभकतयायदुक्तंतत्तदर्थापरिज्ञानात् । सूत्रार्थस्त्वणुभाष्यादितोऽवसेयः; विस्तरभयान्नेहलिख्यते, तथाचविसर्पिगुणचैतन्योऽणुर्जीवइतिसिद्धं॥

सहस्राक्षे किंचात्मनोऽणुत्वमित्यादि जीवइतिप्रत्युक्तमित्यंतंभागंखंडयंति-ननुजीवस्येत्यादिनाऽणुर्जीवइतिसिद्धमित्यंतेन (अ० २ पा० ३ सू० २३) "अविरोधश्चंदनवदि" तिसूत्रभाष्यप्रकाशस्थंचंदनदृष्टांतेनसहदेवीजवादृष्टांतेन वसामर्थ्यविशेषाद्व्याप्त्युपपादनमनुवदंतः समादधते-यथाचंदनमित्यादिना । (अ० २ पा० ३ सू० २४) अवस्थितिवैशेष्यसूत्रावतरणप्रकाशमनुसृत्याहु-ननुचंदनेत्यादि । अत्रांशे समाधानं तु चंदनस्यैकदेशे स्थितिः प्रत्यक्षतो यथातथा जीवस्य हृदयरूपैकदेशे स्थितिस्तत्सूत्रतत्तद्विषयश्रुतितश्च सिध्यतीति नदृष्टांतवैषम्यमिति ज्ञेयं । (अ० २ पा० ३ सू० २५) "गुणाद्वाऽऽलोकवत्" इतिसूत्रस्यावतरणं प्रकाशस्थं संक्षिप्यानुवदंति-किंचचैतन्यमित्यादिना । सत्वेऽपीति । व्याप्ति-सत्वे । वस्तुतस्त्विदमपि प्रायिकं । उत्कटस्योष्णस्पर्शस्यमेर्यादिगन्दस्य प्रभाख्यरूपस्य निंवतरुतिक्तत्वस्य गंधस्य चस्वाश्रयाधिकदेशवर्तितायाः सिद्धांते सूपपादत्वात् ।

इमामेवारुचिमपिशब्दो द्योतयति–मणिप्रवेकइति । तस्य प्रभात्यरूपविशेषेइतिभावः । मणिप्रवेकस्तु । मणिश्रेष्ठः 'क्लीबे प्रधानं प्रमुखप्रवेकानुत्तमोत्तमा' इत्यमरः । साधारणमणौ-तथा विसर्पिप्रभायाअभावात्प्रवेकपदोपादानंपूर्वोक्तसूत्रप्रकाशं प्रकृतोपयोगिपाठभेदसहित-मक्षरशोऽनुवदंति–ननु प्रभादृष्टांतइत्यादिना । अपिसंदेगुमितिअरुचिग्रस्तं संदेहमात्रं तत् । वस्तुतस्तु सूर्यादिप्रभापि गुणएव । औष्ण्योपलंभस्तूत्कटोष्णस्पर्शादेरपि प्रसरणादिति वक्ष्यामः, अतःसंदेहासंभवादरुचिद्योतकोऽपिशब्दः । मणेस्तुपार्थिवत्वेनेति पार्थिवस्याकि-रणजनकत्वं सुदुर्घटमितिभावः । अतएव कालिदासादयः कवयोऽपि लोकाद्यवेक्षणलब्ध-नैपुण्याभिज्ञानशाकुंतलादिषु 'नमभातरलंज्योतिरुदेति वसुधातलात्'इत्यादिवर्णयंति । जीववत्त्वादिति । चतुर्विधशरीरेषु वृक्षाणामुद्भिज्जं शरीरमितिश्रुत्यादिषु प्रसिद्धत्वात्का-यिकपापविशेषैर्वृक्षयोन्यापत्तेर्मन्वादिभिः स्मरणात् । पुराणेषु कुबेरपुत्रादीनां शापतः स्थावरतायाः कीर्तनाच्च तथेत्यर्थः । मणिस्तु न चतुर्विधशरीरेष्वंतर्भवितुमर्हति । रसादि-ष्विति । अवच्छेदकावच्छेदेननाधिकदेशवृत्तित्वमितिभावः । प्रकृष्टेपुतेष्वपि तदस्त्येवेति-दर्शयिष्यते–कथंचित्संदेह इति । वस्तुतस्तु दीपालोकोऽपि गुण एवप्रकष्टरूपं हिसः । रूपस्यापि तेजस्त्वं तु न विरुद्धं (स्कं. १२ अ. ४ श्लो. २३) 'दीपश्चक्षुःस्वरूपंचे'ति भागवतोक्तेरितिहृदयं ॥ प्रकाशवदितीति । (अ० २ पा० सू. १५) "प्रकाशवच्चा-वैयर्थ्या" दिति सूत्रमित्यर्थः ॥ (अ० २ पा० ३ सू. २६) "व्यतिरेकोगंध-वदि" तिसूत्रमनुसत्यगंधस्यविसर्पितांस्वतःसाधयंति–तथागंधस्यैवेत्यादिना नाद्य इति ।

किंचात्मनोऽणुत्वे निदाघे सकलदेहव्याप्यौष्ण्यं युगपन्नप्रतीयेत एवं गङ्गाह्रदनिमग्नस्य शैत्यम् ॥ नच यथा गुणिनोमण्यादेरेकदेशस्थत्वेऽपि तत्प्रभास्तद्गुणाअधिकं देशंव्याप्नुवन्ति एवं जीवस्याणोर्हृद्देशस्थस्यापिज्ञानं गुणःसर्वत्र देहे प्रसरति तेन तद्यापिशैत्यौष्ण्योपलब्धिरि-तिवाच्यम् ॥ प्रभाया विरलसंयोगवत्तेजोद्रव्यत्वेन गुणत्वे प्रमाणाभावात् ॥ यत्तु विद्वन्मण्डन-टीकायाम् आलोकस्य द्रव्यत्वे व्योम्नि वर्तमानस्य तस्य तदतिरेकेण तद्रूपग्रहणापत्ति-रित्युक्तं–तन्न; ज्वालादौ तददर्शनात् ॥ सच दीपजन्य इति दीपस्याऽऽलोक इत्युच्यते ॥ प्रदीपाद्यालोकस्य गुणत्वे प्रकाशवत्सूत्रविरोधः ॥ एवंच विशेषाभावान्मण्याद्यालोकोपि द्रव्यम् ॥ एवंच वस्तुतस्तु आलोकोऽत्र मणेरेव ग्राह्यइति कुशकाशावलम्बनमपि प्रत्युक्तम् ॥ ज्ञानस्य गुणत्वे पदार्थान्तरेण संयोगसमवाययोरसम्भवेन साक्षात्संबन्धान्तरस्य वक्तुम-शक्यत्वेनाऽसंबद्धस्य भानेऽतिप्रसङ्गेनच शैत्यादिभानानुपपत्तिः ॥ एवंप्रभायागुणत्वमित्या-दिनातस्याः संबन्धोदुर्वचः ॥ एवंच चक्षुषा भित्त्यादेर्ग्रहणमपिदुष्करं तेजःसंबन्धाभावात् ॥ तथाऽऽलोकस्य चाक्षुषत्वेन गुणचाक्षुषे स्वसंयुक्तद्रव्यद्वयद्वारात्त्वचोहेतुत्वं व्याहन्येत ॥ एतेन गन्धस्यापि निराश्रयस्य गमनं प्रत्याख्यातम् ॥ घ्राणेनासंबन्धेनाप्रत्यक्षत्वप्रसङ्गात् ॥ द्रव्यद्वारकस्य घ्राणहेतुत्वस्य भङ्गाच ॥ तस्माद्गन्धोऽप्यवयवैस्सहैव याति तेषां च यथाद्रव्य-स्वभावमेव प्रसरणंद्रव्यैश्चाकर्षणमिति नातिदूरे गन्धभानं, नवा द्रव्यस्य देशान्तरे गमनेऽ-वयवान्तरप्रसरणम् ॥ अतिसौक्ष्म्याच्च नतदपगमेऽपि द्रव्यस्य लघुत्वादिभानम् ॥ त्वयापि हि

परमाणुरूपं द्व्यणुकरूपं वा तद्द्रव्यमिति द्विकोटिकोऽप्याद्यपक्षो नेत्यर्थः। लौकिकप्रत्यक्षाविषयमूर्तद्रव्यतयोभयोः साम्यादेकदेशन्या प्रथमपक्षे समहः॥ समवायेत्यादि। घटादिद्रव्यप्रत्यक्षे समवायेन महत्त्वंहेतुः उद्भूतरूपरसगंधादिप्रत्यक्षेच स्वसंयुक्तसमवायेन तत्तथा। एवंरूपत्वादिजातिप्रत्यक्षे स्वसंयुक्तसमवेतसमवायेन महत्त्वंतथेत्याद्यूह्यं। नापि द्वितीय इति। लौकिकप्रत्यक्षविषयत्रसरेण्वादिरूपं तद्द्रव्यमिति पक्षोऽपि नेत्यर्थः। चंपकाद्यवयवानामित्यादि। वस्तुतश्चानुद्भूतरूपेषु रसादिवद्गंधस्याप्यनुद्भूतत्वनियमोऽस्त्येवेति चंपकाद्यवयवानामनुद्भूतरूपत्वेतद्गंधोऽपि नानुद्भूयेवानुद्भूतत्वाविशेषादित्यप्यत्र बोध्यं॥ चक्षुरादिवदिति। यथा चक्षुरादीन्द्रियस्यानुद्भूतरूपत्वात्न प्रत्यक्षंतथेत्यर्थः॥ अवयवरूपस्येति। महत्त्वाश्रयावयवरूपस्येत्यर्थः। तेन द्व्यणुकरूपस्य त्रसरेणुरूपारंभकत्वेऽपि नदोषः॥ न कोऽपि दोष इति। किंच द्रव्यस्य गुणंप्रति कारणत्वाद्गंधनाशाग्रहेपि तदाश्रयद्रव्यं सजातीयमेव गंधांतरमुत्पादयति। अतोपि न दोष इत्याद्यूह्यं॥

गुणभूतस्य गन्धस्यातिदूरगमनाभावाय न्यूनत्वाभावाय च तन्नितयं कल्पनीयमिति समं कल्पनागौरवम्॥ सूक्ष्मावयवान्तरपूरणंवा कल्प्यते तथापि न्यूनताभयाद्गन्धान्तरोत्पत्तिकल्पनीया॥ एवमनेकचर्मपुटवेष्टितमृगमदादिषु गन्धस्यावयवानामपगमापगमौ बोध्याविति साम्यम्॥ कर्पूरेऽवयवानागमान्धुर्वेव॥ गन्धमानापगमे सा कथं स्यादितिविचार्यम्॥ परिमाणमाम्येऽल्पगन्धत्वात्तु पूर्यमाणावयवानामल्पगन्धत्वेन वक्तुंशक्या॥ प्रसारितमुखस्य तद्रसानुपलंभस्तु रसनेन्द्रियस्याऽप्यवस्तुरसाग्राहकताया दृष्टत्वात्॥ अतएव कर्पूरसन्निधौ तद्गन्धज्ञानेऽपि नतद्रसज्ञानम्॥ नच सकृत् स्पृष्टस्यापि लशुनादेर्हस्तादीनां क्षालनेऽपि गन्धोनापैतीति गन्धमात्रस्य करादौ सगन्धोनावयवानां तेषां सकृत्स्पर्शेनागतानां सकृत्क्षालनेनापगमस्यौचित्यादितिवाच्य॥ सकृत्स्पर्शेनागतस्य गन्धस्याऽपि सकृत्क्षालनेनापगमौचित्यात् यदितु गन्धे तदर्थं सामर्थ्यं किञ्चित्कल्प्यते तर्हि तत्तदाश्रयएव कल्प्यताम्॥ यथावृक्षस्य सपुष्पितस्यदूराद्गन्धोवात्येवंपुण्यस्यकर्मणोदूराद्गन्धोवातीतिश्रुतौ गधशब्दोगन्धवद्द्रव्यपरोलेशपरोवा?॥ गन्धः प्रतिवेश्यामोदलेशसबन्धगन्धकेइतिमेदिनीकोशात्॥ दूरत्वंतु वृक्षापेक्षया तस्योपात्तत्वात् नंतु स्वाश्रयापेक्षया मानाभावात्॥ पृथिवी परित्यज्य गन्धस्थितेः सर्वथाऽयुक्तत्वात्॥ तथाचव्यास—उपलभ्याप्सुचचेद्गंधंकेचिद्ब्रूयुरनैपुणाः॥ पृथिव्यामेवतं विद्यादपोवायुंचसंश्रितमिति॥ यत्तु केचिच्छन्दवदनाश्रयस्य चैतन्यस्य गतिमाहुः—तन्न, श्रोत्रेन्द्रियस्य गत्वा ग्राहित्वेन शब्दस्य चलनाभावात्॥ यत्तु यथा चन्दनस्यैकदेशस्थस्य सर्वदेहव्यापिशैत्यसंपादकत्वमेवं जीवस्यापि हृद्देशस्थस्य सर्वदेहव्यापिज्ञानसंपादकत्वमिति,—तन्न; चन्दनस्य सावयवत्वेन सूक्ष्मतदवयवप्रसरणेन देहव्यापिशैत्यापादकत्वसम्भवात्॥ एतेनगुणाद्वालोकवत् व्यतिरेकोगन्धवत् अविरोधश्चन्दनवदितिसूत्राण्यपिसमाहितार्थानि॥ तेषांपूर्वपक्षपरत्वात्॥ कथमन्यथा प्रकाशाश्रयाद्वातेजस्त्वादित्यनेन विरुद्धं गुणाद्वालोकवदितिसूत्रकारोवदेत्? अधिकजिज्ञासुभिस्तु शारीरके द्रष्टव्यम्॥ तदेतदभिप्रेत्याह—विसर्पिगुणतामुक्तेर्विरोधान्नतुइति॥ एतेन विसर्पिगुणचैतन्योऽणुजीवइति प्रत्युक्तम्।

एवं स्वतः स्वमतसमर्थनपुरःसरं परमतं दूषयित्वोक्तसूत्रभाष्यप्रकाशग्रंथं तत्रानूदितविद्वन्मंडनभागं च कंचिदक्षरशः केनचित्पाठभेदेन चानुवदंति-एवमनेकचर्मपुटेत्यादिना ॥ विनश्यद्द्रव्यस्येति । पूर्वक्षणे घटादिद्रव्यं नश्यति, तदुत्तरक्षणे तद्गुणा इति हि तार्किका मन्यंते ॥ त्वयेति । नैयायिकेन । तन्मतमवलंब्यैवाकरेदूषणस्य प्रक्रमात् ॥ कुतो न स्यादिति । स्वाश्रयद्रव्याभावेऽपि तद्गुणस्थितेरेकत्रांगीकारेऽन्यत्रापि साम्यादेवेतिभावः । यथावृक्षस्येति । तैत्तिरीयबृहन्नारायणप्रपाठकस्थंवाक्यमिदं । निर्मूलेति । वाच्यार्थानुपपत्त्यादिक लक्षणायामूलं तद्रहितायाः ॥ संगच्छतइति । लेशास्तु स्थाणवापुष्पितवृक्षाणामपि धूल्यादीनामपि च वाय्वादिवशाद्दूरंगच्छंत्येवेति लेशादिपरत्वे संपुष्पितपदं दूरपदं च व्यर्थमेव स्यादिति भावः ॥ उक्तं व्यासैरिति । इदं प्रायेण भारतवचनं शारीरकभाष्यादिषूदाहृतं ॥ तावत्कौनवचनमिति । विद्यारण्यवचनं तत्कृतपंचदश्यां महाभूतविवेकाख्ये द्वितीयप्रकरणे "शब्द.स्पर्शोरूपरसा"वितिश्लोको द्वितीयः ॥ व्याख्यातंश्येयमिति । एतदंतोभाष्यप्रकाशोक्तार्थानुवादः स्वोक्तार्थे आकरसंमतिं दर्शयितुं कृतः ॥ तदेवध्वनयंति-अयमेवार्थइत्यादिना । अत्राक्रमेणसूत्रत्रयोपन्यासोवादिलेखानुरोधात् (अ० २ पा० ३ सू० २७) "तथा च दर्शयति" इतिसूत्रस्यभाष्यादितो निष्कृष्यार्थं स्वयमाहुः-तदर्थस्त्विति । सूत्रे चशब्दोऽवधारणार्थः । तथापदेनवाणुरतच्छ्रुतेरित्यादिपूर्वसूत्रोक्तप्रकारः परामृश्यते । एवं च जीवोणुपरिमाणकोनाडीषु स्वयंविहृतिमान् हृद्यवस्थितो देहे प्रभागंधवद्व्यतिरिच्यमानगुणश्चेतितैनैव प्रकारेण प्रागुक्तेन वेदोदर्शयतीति सूत्राक्षरार्थः उक्तसूत्रभाष्यप्रकाशमेव संक्षिप्याऽक्षरशोऽनुवदंति-कौशीतकिब्राह्मणइत्यादिचैतन्यगुणएवेत्यंतं ॥ इदं हि कौशीतकिब्राह्मणे चतुर्थोऽध्याये बालाक्यजातशत्रुसंवादेऽस्ति । तत्र गतगर्वेण बालाकिना ब्राह्मणेनापि ब्रह्मोपदेशार्थं प्रार्थित. क्षत्रमजातशत्रुर्नाहं गुरुत्वार्हः किंतु विज्ञापयिष्यामि त्वामितिप्रतिज्ञाय तं करग्रहपुर सर रहसि नीत्वा तत्र सुप्तं कंचित्पुरुषं प्रथमं शब्दैरनुत्थितं यष्टिप्रहारेण बोधयित्वा बालाकिमाह-"क्वैष एतत् बालाके पुरुषोऽशयिष्ट क्वैतदभूत्कुत एतदागात्" इति ॥ अर्थस्तु-क कुत्र एषः प्राणव्यतिरिक्त एतत् सर्ववृत्तिशून्यं यथास्यात् तथा हे बालाके पुरुषो जीवः अशयिष्ट अस्वाप्सीत् क कस्मिन्प्रदेशे एतत्पूर्वोक्तं शयनमभूत् एवं स्वापकाले जीवस्य शयनक्रियायाश्चाधार पृष्ट्वा जागरणाधारं पृच्छति-कुत इति । कुतः कस्मात्स्थानात् एतत् जागरणस्थानं आगात् पुनरागमत् इतिविशेषः । एतत्प्रश्नस्योत्तरमप्रतिपद्यमानं बालाकिं स स्वयमेव तदुत्तरमाह-यत्रैष इत्यादि । स्वापकाले यो जीवस्य शयनक्रियायाश्चाश्रयः पुनरागमनस्य चावधिभूतश्च वदामीति भावः ॥ तदेवाह-हिता इत्यादि । हिताः प्राणिनां हितकारितया हिताख्याः हृदयस्य हृत्पुंडरीकस्य संबंधिन्यस्ततो निर्गत्य पुरीततं आंतरं वेष्टनविशेषं अभिप्रतन्वंति सर्वतः प्रकर्षेण विस्तारयंति वेष्टयंति तद्यथा यावत्परिमाणमित्यर्थः ॥ इत्याद्युक्त्वेति । आदिपदात् "तद्यथासहस्रधा केशोविपाटितस्तावदण्व्य" इत्यादिमगृह्यते । विपाटितकेशसहस्रतमांशवदणुतमपरिमाणवत्यस्तावत्य इत्यर्थः । अग्रेच "तासुतदाभवति"

तास्वणुतमासु नाडीषु तदा शयनकाले जीवो भवतीति तादृशनाडीषु स्थितेरणुत्वं विनानुपपत्त्या जीवस्याणुत्वमुक्तं भवति । तदा शयनकाल एव तासु स्थित्युक्त्या जीवस्य सर्वदाहृदयएवावस्थानं सिध्यति । अतएव नाडीषु हृदयसंबंधस्य ततोनिर्गतत्वस्यच निरूपणं सार्थकं भवति । हृदयायतनः सतादृशीषु तासु तदा विहरतीति । अग्रेच यदा "सुप्त.स्वप्नं नकं चनपश्यती" त्यादिनासुषुप्तिं प्रबोधं चनिरूप्य "सएष प्राणएवप्रज्ञात्मेदंशरीरमात्मानमनुप्रविष्टआलोमभ्यआनखाग्रेभ्य" इत्यादिपठ्यते । अत्रप्राणनहेतुत्वात्प्राणोजीवएवप्रज्ञात्माविसर्पिस्वचैतन्यगुणरूपेणेदंशरीरमनुप्रविष्टोलोमानिनखाग्राणिचमर्यादीकृत्येत्यर्थः । नविसर्पिगुणतासिद्धा । तत्राग्रेक्षुराग्निदृष्टांतावपि तथैवगमयतः; अन्यथा मध्यमपरिमाणत्वमापद्येत । तत्राप्यग्निदृष्टांतऔष्ण्यवद्गुणविसर्पणबोधकः ॥ बृहदारण्यकादिषु चेदं विस्तरेणनिरूपितमेवेति प्रकाशादितो ज्ञेयं । मयापिकिंचित्पुनर्वक्ष्यते । प्रकाशाश्रयसूत्रार्थस्तुत्वदीयतुरीयश्लोकखंडनेनिर्मलोनिरणायि । तत्रापि प्रकाशस्य धर्मतेव प्रत्युतसिध्यति । नतु द्रव्यांतरत्वमितिविरुद्धइहतत्तदुपन्यासः ॥ विसर्पिगुणचैतन्यइति ॥ अत्रायमाशयोऽनुसंधेयः—यत्तु (निदाघगंगाह्रदनिमज्जनादिषुसर्वशरीरगतौष्ण्यशैत्याद्यनुभवानामसंभवः, अणोःसर्वत्रसंबंधायोगादि) त्यभिहितं (तन्न) तस्याणुत्वेपि तद्गुणस्य चैतन्यस्य सर्वशरीरे प्रसरणेनतदनुभवोपपत्तेः ॥ गुणस्य द्रव्याधिकदेशवृत्तित्वं तु प्रभादिवत् । दृश्यतेह्येकदेशवर्तिनामल्पानामपि मणिदीपकादीनां तदधिकदेशवर्तिनी प्रभा अतएव मैत्र्युपनिषदि "अनंतारश्मयस्तस्यदीपवद्यःस्थितोहृदी"ति सदृष्टांतं विसर्पिगुणत्वमुच्यते । गीतायामपि *'यथाप्रकाशयत्येकः कृत्स्नं लोकमिमंरविः । क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारते'ति* । एतत्सर्वमनुसंधाय भगवान्परमाचार्यःसूत्रयांबभूव "गुणाद्वालोकवदि" ति । अत्राविरोध इत्यनुवर्तते । वा शब्दश्चैवकारार्थः,तथाचालोकवद्गुणादेव सकलशरीरगतौष्ण्याद्यनुभवस्याविरोध इत्यर्थः ॥ औष्ण्याद्यनुभवस्य हेतुर्यदि विभुत्वेनात्मनः सकलशरीरेस्थितिरेवस्यात्तर्हि लोमनखाग्रादिष्वपि तत्सत्वेन तत्र जलार्ककिरणादिसंयोगे शैत्यौष्ण्याद्यनुभूयेत ॥ नत्वनुभूयतेतोनसविभुः ॥ मम "त्वालोमभ्यआनखाग्रेभ्य" इत्यादिश्रुतिभिरेव यथाप्रत्ययमिष्टसिद्धिः । एतावताऽऽलोकस्यगुणत्वे प्रमाणाभाव.प्रत्युक्तः । न च शाब्दमात्रोपन्यासस्यायमनवसर इति वाच्यं; प्रकाशवत्सूत्रविरोधस्याप्यनुपन्यसनीयत्वापत्तेः । अविरोधस्तु दर्शयिष्यते । यच्च साधकमानमनुदाहृत्यैव प्रकाशस्य द्रव्यत्वमुक्तं-तन्न युक्तिसहं : यथाहुः प्रकाशकारा "मणेःपार्थिवत्वेन तत्र किरणरूपद्रव्यजनकत्वस्य तत्प्रसारकत्वस्यैवांगीकारे बहुकल्पनापत्तिः, यदि जननं तदा पूर्वं मणितो बहिरागतानांबहिष्ठत्वात् मणिपिधानदशायामपि तदनुभवापत्तिर्मणिनाशेपि तत्स्थित्यापत्तिस्तदसमवायिनिमित्तयोरत्यंतापरिदृष्टयो, कल्पनापत्तिस्तन्निर्वचनाशक्तिश्च । यदिप्रसारणंतदामणेश्चेतनत्वापत्ति.स्वतआकुंचनप्रसारणक्रिययोश्चेतनएवदृष्टत्वात्" इत्यादि ॥ किंच प्रभायास्त्वपिद्रव्यत्वेतस्यांयत्परिमाणकंद्रव्यांतरंस्थाप्येततावत्या.प्रभायाअग्रिमप्रदेशेप्रसरणेनावश्यंभाव्यं आमुखंजलपूरितघटेवस्त्वंतरनिक्षेपेणतावज्जलनि.सरणस्यदर्शनात् । तावत्तन्नाशोत्पत्त्योः स्वीकारेऽत्यंतगौरवं । किंच नाशक्षणेत्तदारंभकावयवाः क्वनिविशेरन् ॥ मण्यादेस्तावयवानांप्रवेशस्यतत्एवोद्गमस्य-

घटध्वंसे प्रभानाशोत्पत्तिक्षणयोर्मण्यादेराधिक्यन्यूनत्वे गौरवलाघवे चापद्येताम् । किंच कोशकारा अपि प्रभाशब्दस्य कान्तिपर्यायत्वं दर्शयन्ति 'स्युः प्रभारुग्रुचिस्त्विड्भाभाश्छविद्युतिदीप्तयः' इत्यादौ एवमाद्यनेकदोषप्रसङ्गात्प्रभाया द्रव्यत्ववक्तव्यं न चैतस्मादत्युत्कटो रूपाख्यगुण एवासौ । द्रव्यत्वे तु ज्योतिःस्थिताया अस्या द्विप्रभाया शुद्धरूपव्यतिरिक्तं तदाश्रयभूतं किंचित्स्वरूपमुपलभ्येत तदनुपलम्भाच्च न द्रव्यमिति हरितोषिण्या विद्वन्मण्डनटीकाया आशयः । ज्वालाया तु ह्रस्वदीर्घपरिमाणस्य स्थूलसूक्ष्मत्वस्य सूक्ष्माग्रत्व दक्षिणावृत्तिरथाद्याकृतीनां च दर्शनेन रूपमात्रेत दसंभवेन च पृथग्द्रव्यत्वं निश्चीयत इति तस्याः शुक्लहरितलोहितादिविविधरूपाश्रयत्वं न तु रूपत्वं । अनेन (ज्वालादौ तद्दर्शनादि) ति निरस्तं । गुणगुणिभावे च सत्येवं मणेरालोकोऽदीपस्यालोक इति तत्सबधिरं युज्येत, जन्यत्वस्य निराकृतत्वात् । तथात्वे पितृनाशेऽपि पुत्रस्थितिवत्स्थितेर्दुर्वारत्वाच्च । न च नित्यसंयोगित्वादस्थित्युपपत्तिः प्रभाया घटादिसंयोगासंभवप्रसङ्गात् । सावयवत्वेन घटादिसंयुक्ततदवयवानां दीपादिसंयोगाभावात् । अल्पपरिमाणद्रव्ययोः संयोगे नित्यताया क्वचिदप्यदर्शनाच्च । नन्वन्यत्रादृष्टोऽप्यन्यथानुपपत्त्यात्र नित्यसंयोगः कल्प्यत इति चेदत्र गुण एव विसर्पित्ववत्तया कल्प्यतां, लाघवात् । धर्मिकल्पनातो धर्मकल्पनाया लाघवमप्यत्रानुसंधेयं । न च प्रभाया दीपसमवेतत्वेन समवायिनाशात्तन्नाशोपपत्तिरुच्याप्रभायाः । अधिकपरिमाणकृत्येनाल्पपरिमाणे एकस्मिन्दीपे तदारम्भकत्वासंभवात् । अन्यथा एकेन त्रसरेणुनाऽपि घटारम्भप्रसङ्गात् । आश्रयारम्भनानात्वं तदारम्भकत्वं तु प्रागेवापास्तं । एतत्पक्षेप्युक्तदोषः सुस्थ एव । वृक्षनाशेऽपि तदवयवारब्धपुष्पफलादिस्थिति दर्शनात् रूपस्य तु संयोगिद्रव्यत्वमेव स्वमुखेनोच्यते ऽतो न समवायोक्तिप्रसङ्गोपीति किंतेन "प्रकाशश्चाचैतन्यधर्मादि" ति सूत्रं तु यथा सौरश्चान्द्रमसो वा प्रकाशः स्वतो न व्यवहर्तुं शक्यः, स्वतः संपादयितुमकाले नुपयोगाय स्वनिकटे स्थापयितुं चाशक्यत्वात् । आगते तु सूर्यादौ भवति व्यवहार्यः तथा ब्रह्मधर्मोऽपि तदिच्छया व्यवहार्यो स्वतश्चाव्यवहार्यो इत्येव बोधयत् प्रकाशस्य धर्मत्वमेव साधयति न तु द्रव्यत्वं तस्माद्गुणत्वे तत्सूत्रविरोधोक्तिरभिलापमात्रं तद्वाप्यविरोधमभवे तु प्रयासेन परिहरणीयः । वस्तुतस्त्वत्र तत्त्ववाद्येऽपि प्रकाशस्याकाराणामौपाधिकत्वकथने न वास्तवनिराकारत्वबोधनात् रूपवद्द्रव्यत्वेन शास्त्राकृतिमत्त्वेन च लोकेऽर्च्यादि दर्शनात् तद्वैयेदसूत्रद्रव्यत्वबाधकमेव आकाराभावेन रूपिद्रव्यत्वाभावसिद्धे नीरूपतत्त्वेनाय्वादिवच्चाक्षुषाविषयत्वप्रसङ्गाच्च । अतस्तृतीयस्कन्धस्य षड्विंशे (श्लो० ४०) द्योतनपचनपानमिति प्रकाशस्य क्षुत्तृडादिवत्तेजोवृत्तित्वमुच्यते, न तु द्रव्यत्वं दीपादिप्रभाया द्रव्यत्वमसाधयित्वैव (अविशेषान्मण्यालोकोऽपि द्रव्य) मित्युक्तिस्तु वृथैव प्रभात्वाविशेषेण मणिसूर्यदीपज्यादिसर्वप्रभाणां गुणत्वोक्तेरेवौचित्याच्च अत एव श्रीपुरुषोत्तमोऽपि (अ० ७ श्लो० ८) "रसोऽहमप्सु कौन्तेय प्रभास्मि शशिसूर्ययोः । प्रणवः सर्ववेदेषु शब्दः खे पौरुषं नृषु" इति गुणेष्वेव प्रभां गणयति (स्क० १० अ० ८५ श्लो० ७) 'कान्तिस्तेजः प्रभा सत्ता चन्द्राग्न्यर्कर्क्षविद्युताम् । यत्स्थैर्यं भूभृतां भूमेर्वृत्तिर्गन्धोऽर्थतो भवानि'ति एवमादौ पुराणेष्वपि गन्धादिवत् गुणत्वमेव दर्शितं । रसशब्दादीनां गुणत्वं तु तवाप्यभिमतं प्राय पाठस्य च निर्णायकत्वमानदमयाधिकरणे शाबराचार्यैः स्वीकृतमेव । न च सिद्धान्तरीत्या तत्रैवानार्पितद्बाधः शक्यः, कर्मभेदाध्यायद्वितीयपादे

जैमिनिनोक्तेपुराब्दांतराभ्यासादिषुअन्यतमभेदकस्येहादर्शनात् । ननुवैश्वानरवासरकप्रभयोरुष्णिमानुभवात्गुणेगुणानंगीकाराद्द्रव्यत्वमेवभव्यमनयोरितिचेन्मैवं; तत्रमित्रयीतिहोत्रप्रभृतेः प्रकाशस्यौष्ण्यस्यापिप्रसरणांगीकरणात् अतएवान्यैःप्रकाशाप्रत्यक्षेप्यौष्ण्यमनुभूयतेअतएवचहेमन्तशिशिरयोर्मिहिरस्यदूरत्वेनाधिकोष्णिमानुभवः वन्हेरपिविप्रकर्षेरजनिदिनयदनयोरिनस्यचप्रकाशएवानुभूयतेनोष्णिमा ॥ प्रदीपस्यतुसमीपतमएवसमनुभूयत, औष्ण्यंप्रकाशस्तुममस्तेसद्मनि यदितुप्रभाद्रव्यमेवौष्ण्यंस्यात् प्रभामात्रंतर्हि कथानुभूयेतअनलकमवन्धुसम्बन्धीप्रकाशमात्रं यापात्रंस्यान्नियमेनोष्णिम्नः तपनातपउष्णइतितुयुगपदुभयोपलब्धिमूलकोभ्रमः तार्किकाणांक्षारंवारीत्यादिवत् औष्ण्यस्यविसर्पित्वमपिवक्ष्यते । एतेनजैवातृकज्योत्स्नाजाड्यमपिव्याख्यातम् ॥ वस्तुतः प्रभायांस्पर्शस्याभावादेवमण्यादिप्रभायांसनोपलभ्यते । रूपिद्रव्यत्वेतुतत्रापिसोनुभूयेतव्यापकत्वात् । यत्रयत्रतादात्म्यापरपर्यायसमवायेनरूपंतत्रतत्रपवनान्वयात्स्पर्शोपीतिव्याप्तिः ॥ यस्त्वंधेरौष्ण्यशैत्ययोरुपलंभोस्माभिस्तयोः प्रकाशावर्तित्वसाधकउक्तःसत्वाद्दशो गुणप्रत्यक्षेगुणिप्रत्यक्षंहेतुरित्यभिमानमभ्युपेत्य ॥ तपनातपतोयस्तोयतापः सोप्यौष्ण्यस्यविसर्पणएवोपपद्येतमतद्वयेपिप्रभायाःस्वाश्रयनित्यसंयोगितयाप्रभाविभागमागम्यपयः प्रविष्टेतिवक्तुमशक्यत्वात् प्रवेशेतुतिमिरेऽपितप्ततोयचाक्षुपमक्षुण्णमापद्येतालोकसंयोगात् ॥ अंतर्मग्नमीनादीनामालोकजालौकसिविमलसलिलआलोक्यमानतयाजलेजातपेद्घातकत्वमिवप्रकाशनाशकत्वंनेतिनिश्चीयतेतेनतिमिरैस्तोयेनतस्याभिभवोशक्यवचनः ॥ तस्माद्वायुवृहद्भानुप्रभृतेरौष्ण्यमेवजलानिलादौसंक्रामति । अनलानयनानांसंक्रमेजलानिलाभ्यांतेऽवश्यंनाश्येरन्विस्फुलिंगप्रदीपादिरिव ॥ अतएवश्रीभागवतादिषु (स्कं० ५ अ० १० श्लो० २२) "स्थाल्यग्नितापात्पयसोऽभिताप" इत्यादौ तापमात्रस्यसंक्रमोनिरूप्यते तत्रसंक्रांतमप्यौष्ण्यंतेजोधर्मतयाशश्वन्नावतिष्ठते । अभियुक्ताअपिऔष्ण्यसंक्रममेववर्णयंति (रघु० स० ५ श्लो० ५४) "उष्णत्वमग्न्यातपसंप्रयोगाच्छैत्यंहिसायत्प्रकृतिर्जलस्य" तितदेतत्सर्वमनुसंधाय "गुणाद्वालोकवद्भिन्नाभाव्यतेभाष्यकारचरणैः प्रभायागुणत्वमेवस्पर्शानुपलंभात्उदकगतौष्ण्यवत्इति" एवंचप्रभाकरप्रभापिवस्तुतोगुणएवतथापितत्रौष्ण्यप्रभयोरुभयोर्विभागउक्तचरसरणिकोपपादनसापेक्षइतिवां विहायोक्तसूत्रेभाष्यकारैर्मणिप्रयेककांतिरेवदृष्टांतिता । एतावता (एवंचवस्तुतस्तुआलोकोऽत्रमणेरेवप्राह्यइतिकुशकाशावलंबनमपिप्रत्युक्तं) इतितदुक्तिरेवकुशकाशावलंबनतामालंबते । यच्चोक्तंसूत्रेप्रकाशे "सूर्यादिप्रभायांस्पर्शोपलंभाद्द्रव्यांतरत्वमपिसंदेग्धुंशक्य" मित्युक्तंतस्यापि । वस्तुतस्तुसापिनद्रव्यमित्येवाशयः औपरिष्टिकदृष्टिमतां संदेहोद्भवस्यैवकंठरवेणकथनात् अपिनातत्पक्षेनादरबोधनाच्चवस्तुविवेकेतुविभावसुविभाया-अपिविभाव्यतेगुणत्वमेवातोगीतादिषुसापिजीवचैतन्यस्योपमानीक्रियते (अ० १३ श्लो० ३३) "यथाप्रकाशयत्येक" इत्यादौयत्तुज्ञानस्यगुणत्वइत्यादि,-नच,उक्तवक्ष्यमाणयुक्तिभिःप्रकाशगंधयोर्गुणत्वेसिद्धेप्रकाशवद्गृहंसुगंधवदुपवनमित्यादौसंयुक्तत्वव्यवहारादुत्कटगुणविशेषाणांस्वाश्रयद्रव्यातिरिक्तदेशसंयोगस्यदृष्टचरत्वेनज्ञानस्यापिसकलदेहसंयोगकथनेबाधकाभावात् ॥ नचसंयोगमात्रदर्शनातद्द्रव्यमितिभ्रमितव्यं । उक्तरीत्यावदसंभवातगुरुत्वाद्यनुपलंभा-

च । यद्यालोकोद्रव्यंस्यात्तर्हिप्रकाशतिमिरस्थितैकैकफलकायाउत्तम तुलायाःप्रकाशसंयोगिफलकंनमेत् केषांचिद्विद्वांनिनांमते तेजोद्रव्यस्यापिगुरुत्वनियमादस्माकंतुनायमाग्रहः। तत्रापिद्रव्यस्यपरान्वयात्स्वभावाद्वा स्पर्शवत्त्वनियमस्तुसर्वसंमतः मणिदीपादिसर्वप्रभासुतुनियमेनस्पर्शोपलंभाभावादिकमपि द्रव्यत्वाभावसाधकमनुसंधेयं । नचसंयोगस्य गुणत्वात्तद्वत्त्वंगुणांतरस्यदुर्वचंगुणेगुणानंगीकारादितिवाच्यं; गुणस्यापिबुद्धेरिच्छाद्वेषसुखदुःखादिगुणवत्तायास्तद्गुणसारसूत्रविवरणे शंकराचार्यैरंगीकृतत्वेनत्वयातथावक्तुमशक्यत्वात्। तदुपपत्तयेयदितार्किकसिद्धांतंतिरस्कृत्य 'एकंरूपंरसात्पृथगि'त्यादिप्रतीतेश्चप्रमात्वंस्वीकृत्यगुणेगुणांतरंस्वीक्रियेततदाप्रकृतेपितुल्यं । स्पर्शरहितेमणिप्रभादावत्यंतापरिदृष्टस्यतेजोद्रव्यत्वस्यस्वाश्रयमण्यादिनानित्यसंयोगस्यतदाच्छादनोद्घाटनाभ्यां मुहुर्नाशोत्पत्त्योः संकोचप्रसारयोर्वामण्याद्यवयवैस्तदारंभप्रभृतेश्चानेकदोषदुष्टस्यकल्पनमतिगुरुतमंविहायउत्कटगुणस्यस्वाश्रयाधिकदेशेसंयोगएवोरीकार्यः प्रत्यक्षसिद्धत्वेनकल्पनालेशस्याप्यभावात् (गीता अ० २ श्लोक १४) 'मात्रास्पर्शास्तुकौन्तेये'त्यादावनेकत्रशब्दादीनांसंयोगस्यकंठरवेणकथनाद्स्मत्तार्किकनियमविरोधोऽकिंचित्करः किंचशैत्यादिभानंप्रतिगन्धसंयोगस्यकारणत्वमस्ति न वा? नद्वितीयः; निद्राक्षणेऽपितूलिस्पर्शानुभवप्रसंगात् । (पृ० ९३) "अन्यत्रमेमनोऽभूदित्याह नाहमेतन्नाश्रौषमिति" एवमादिकौशीतकिब्राह्मणगतेंद्रप्रतर्दनसंवादस्थश्रुतिविरोधाच; आद्येतुमनसोऽणुत्वात्कथं सर्वशरीरगतस्यतस्ययुगपदुपलब्धिः? अथसूच्याशतपत्रभेदनकालवदत्यल्पकालेन सर्वत्रमनोभ्रमणाद्यौगपद्यभ्रमस्य इतिचेदणुजीवस्यापितथाभ्रमणेनसोऽस्तु एवमपिपादेमेवेदनाशिरसिमेसुखमित्याद्युपपद्येत । वस्तुतस्तु गुणप्रसरणादेवसर्वोपपत्तिः श्रुत्यादिसिद्धोक्ताप्राग्भित्त्यादिचाक्षुषेत्वालोकसंयोगएवतंत्रंनतुतेजोद्रव्यसंयोगः तमसिसुवर्णमात्रसंयोगेपिभित्त्यादेःप्रत्यक्षापातात् प्रौढप्रकाशवत्तेजःसंसर्गस्तंत्रमितिचेल्लाघवात्प्रौढप्रकाशसंसर्गएवतदास्तां न त्वधिकं वैयर्थ्यादसंभवाच्च । नहिसूर्यचंद्रादिनाभित्त्यादिकंसंयुज्यतेअपितुतत्प्रकाशेनैव । एवंगृहेघटादिकमपिदीपादेःप्रभयैवयुज्यते नतुतेन॥ ननुमन्मतेतत्स्वद्रव्यत्वाद्भित्तिघटादिस्तेजोद्रव्यससंसर्गोस्तीतिचेत्तर्हिप्रौढप्रकाशवदितित्यज्यतांप्रकाशे प्रकाशांतरवत्त्वासंभवात् । नत्यागेच हेममात्रसंसर्गे प्रत्यक्षापत्तिरत्यागेचासंभवइत्युभयत पाशारज्जुः पतत्तडिदशनिस्तनितवृहच्छतघ्नीमुक्तमहागुलिकादिशब्दैर्जीर्णभित्तिगुर्विणीगर्भादे पातनस्यानुभवादपिविसर्पिगुणानांवस्त्वंतरैः संयोगआस्थेयएवेतिप्रभायाअपिभित्त्यादिनासउपपन्नः चक्षुषः क्वचिदाश्रयासंयोगेऽपि आलोकप्रत्यक्षंतुनानुपपन्नं । अविसर्पिगुणचाक्षुष एव तथानियमसंभवात् । स्पर्शएव प्रत्यक्षविषयत्वस्य वायो चानुमेयत्तायां कैश्चिदंगीकारेणाकाशस्याप्रत्यक्षविषयत्वेपिशब्दप्रत्यक्षानुभवेनचगुणप्रत्यक्षेगुणिप्रत्यक्षमेवकारणमिति नियमव्याघातात्स्पर्शादिप्रत्यक्षवदुपपत्तेः । संयोगसंयुक्तसमवायादिसंबंधाश्चतार्किकाणामेवपारिभाषिकाः समवायादिकं दूषयद्भिरौपनिषदैर्नशक्या स्वीकर्तुमितिदिक् । एतेनगंधप्रत्यक्षमपिव्याख्यातं गुणगुणिप्रत्यक्षयोःकार्यकारणव्यभिचारप्रदर्शनेनत्वदभिमतव्याप्त्यसिद्धेः अवयवानांघ्राणेनयोगेतुचक्षुरादियोगाच्चाक्षुषंदुर्वारंस्यात् सूक्ष्मत्वादिंद्रिययोगित्वकल्पनेतुघ्राणेनापिसनस्यात् यथाद्रव्यंप्रसरणंतुबहूनाविभक्तानामिवैकस्य

संहृतसगंधस्यैवांगीकर्तव्यं लाघवात्प्रकाशस्यलेवत्सत्वाच्च । अवश्यंदीपकलिकाकरदीपिकावन्न्यादिप्रकाशतारतम्यस्यमणिविशेषप्रकाशानां तीव्रातीव्रत्वयोश्चोपपत्तयेतथांगीकर्तव्यं-अवयवानांतुवृक्षावयवपत्रपुष्पफलादिवदतिदूरगमनेप्रतिबंधकाभावात् अतिदूरेपिगंधप्रतीतिर्दुर्वारैवकिंचगुणत्वादेव गंधस्त्वयत्नानीयमानेनपुष्पादिना सहैवगच्छति दीपप्रकाशवत् । अवयवप्रसरणपक्षेतुतथानस्यात् नचलाकर्षणंकल्प्यं विभक्तावयवानांतदसंभवात् अन्यथा-पृथक्कृतानपिपत्रपुष्पादिस्वावयवान्वृक्षआकर्षेत; प्रतिक्षणंतत्तदवयवप्रसरणे द्रव्यनाशप्रसंगः अवयवांतरोत्पत्तिस्वीकारेत्वत्यंतगौरवंस्यात् किंचैवंसतियेनमार्गेणपुष्पादिकंनीयेतत्तस्मिन्सर्वस्मिन्नयनोत्तरमपितत्समीपप्रदेशइवगंधउपलभ्येत, तथापुष्पसमीपे सहसामुद्रितायांमंजूषायामवयवानांनिरुद्धत्वात् । स्थलांतरेतदुद्घाटनेऽपिगंधोनुभूयेत, गुणत्वेनप्रकाशवदाकर्षणोरीकारेतुसर्वमनवद्यं ॥ ननुलोहस्यचुंबकेनेव विभक्तावयवानामाकर्षणं स्वीक्रियते, फलादेरनाकर्षणेतुभारवत्त्वादितिचेत्तर्हि सर्षपद्वयसेनापिमृगमदकणेनहरिचंदनकृतेनवास्वावयवानामाकर्षणंस्यात् अतिमहताचंदनतरुणा तच्चूर्णसमुदायस्याप्यवश्यमेवाकर्षणंभाव्यं । नत्वेवंदृश्यते, किंचातिसूक्ष्माणामपिबहूनामेव सर्वेदोद्गमोगंधोपलंभात्ययथावाच्यः, तथासतिद्रव्यनाशस्तल्लाघवंचावश्यंभावि । मन्मतेतुतस्यैवगंधस्यरूपस्पर्शादिवन्मुहुरनुभवेऽपि न्यूनत्वमेवनप्रसज्यते; यच्चसमंकल्पनागौरवमिति–तन्न; अतिदूरगमनप्रतिबंधाकर्षणादेस्त्वन्मते कथमप्युपपत्तेरेवाभावात् । ममतूक्तरीत्यानिर्बाधासर्वसिद्धिः । किंचतत्प्रभास्थलेद्रव्यांतरं गंधस्थलेचावयवाः शब्दस्थलेचेंद्रियस्यगत्वाप्राहित्वमित्यादिनानाकल्पनंतत्तद्दोषपरिहारायतत्रतत्रप्रकारभेदेनोत्पत्तिनाशादिकल्पनंचेतिमहद्गौरवं ॥ ममतुप्रभादयोविसर्पिगुणाइत्येतावतैवनिर्वाहः; अवयवांतरपूरणपक्षेतुस्थितद्रव्यस्थिताभ्यागमाभ्यांक्लेशः । कर्पूरादावपिपूरणप्रसंगः; किंचद्रव्यमानप्रत्यक्षानुरोधात् यावत्तांगमनंतावतामेवोत्पत्तिरितिवाच्यं, तच्चहेतुदुर्वचः । अदृष्टमेवसइतिचेत्तर्हिमृगनाभिश्रीखंडखंडादेःकांश्चिदवयवान्सर्वतोपहृत्यायस्पेटिकादौचिरंस्थापने पुनस्तावदेवमानमुपलभ्येत, ततोऽवयवानां निर्गमाभावात् अदृष्टेनपूरणस्यतत्रापिसंभवात् मयातुनगंधोत्पत्तिःकल्प्येत्युक्तंप्राक् । इत्थंचस एवायंगंध इति प्रत्यभिज्ञाऽपिप्रमायोपपद्यते स्वसंसर्गिण.सौरभसंपादनेपिनकस्तूरिकादेस्तत्स्यापक्षय उदकादौष्ण्यसंपादनेऽपि वन्हिगतौष्ण्यस्येवेतिक्लृप्तमखिलं । नचांभस्यप्रिव्रसरेणुप्रवेशादौष्ण्योपलंभोवाच्यः; अधिकजलस्य वन्हिनाशकत्वनियमेन प्रवेशोत्तरक्षण एव नाशयोगात् । अंभसिभास्वररूपोपलंभप्रसंगश्च । अधिकंतुप्रस्थानरत्नाकरादिष्ववधेयं; तावकैरपिज्वलादौज्वलनौष्ण्यसैवसंक्रमोयद्दुश्रोच्यते । यथाविषयानंदाख्येपंचदशिचरमप्रकरणेविद्यारण्यः (श्लोक १०) 'यद्वापिनिर्मलेनीरेवन्हेरौष्ण्यस्यसंक्रमः ॥ नप्रकाशस्यतद्वत्स्याच्चिन्मात्रोद्गतिरेवच' इति-तथाऽपरोधकावरणसत्वेसूक्ष्मावयवानामप्यनिर्गमस्यानेकत्रावलोकितत्वाद्गुणस्यचकाचपात्रविशेषावृतदीपप्रकाशादेर्बहिर्निर्गमदर्शनादनेकचर्मपुटवेष्टित मृगमदस्यापिगुणस्यनिर्गमनमुचितम् । कर्पूरमात्रेतुलाघवदर्शनादवयवोद्गमोपिनिश्चीयते । नैवंसर्वत्रसंभवति; हेतोरदर्शनात् अवयवोद्गमेचसतिगंधद्रव्यतत्तद्द्रव्यसंबंधिनोरसरूपस्पर्शाअपिप्रसारिवास्येना-

नुपहतनेत्रत्वक्केनानद्यमनुभूयेरन्, आश्रयभूतावयवानामतिसौक्ष्म्यात् रसाद्यनुपलब्धिरिति चेत्तर्हि तन्निष्ठो गंधोऽपि नोपलभ्येत; गुणत्वतन्निष्ठत्वाभ्यामविशेषात्। तस्माद्यत्रावयवोद्गमः प्रत्यक्षादिना निश्चीयेत तत्राप्युद्गच्छदवयवनिष्ठगंधस्य विसर्पित्वमेव वाच्यं; अन्यथा तन्निष्ठरसादिवदननुभवप्रसंगात्। अतएव कर्पूरावयवानामतिसौक्ष्म्येऽपि गंधमात्रमनुभूयते विसर्पित्वात्, न तु रसादिकं तत्राभावात्। न चावयवस्याल्पत्वाद्विसर्पिणोऽपि गंधस्य तादग्बाहुल्यानुपपत्तिः शंक्या, भेरीदीपादिबहुत्वे शब्दप्रकाशादिबाहुल्येन तदुपपत्तेः। इत्थं च वन्हिविस्फुलिंगयोरुभयोरपि प्रकाशस्येव कर्पूराद्यवयवतदुद्गतावयवयोरुभयोरपि गंधस्य प्रसरणमुरीकरणीयं आपूर्यमाणावयवेष्वपि क्वचिदल्पगंधतायाः क्वचित्तुल्यगंधतायाश्च कल्पनात्यंतगुर्वीह्येव; अस्मदुक्तविधया क्लेशं विनैव सर्वसिद्धेः। द्रव्यसत्त्वेऽपि क्वचिद्गंधस्याल्पत्वाभावौ तु कालादिना प्रतिबंधात्संगच्छेते, चातुर्मास्यमण्यादिना सरटवर्णवन्ह्यौष्ण्यादिवत् कृतश्चायं गंधप्रतिबंधः परैरपि सुरभ्यसुरभिसंघट्टनादौ किंच गोघृतादिना कुंकुमादिगंधाभिव्यक्तिरनपनोद्गमपक्षेन संगच्छते; चिक्कणस्य तस्य योगे प्रत्यक्षसिद्धात्सूक्ष्मावयवपिंडीभावादुद्गमप्रतिबंधेन प्रत्युत गंधानुपलंभसंभवात्, एवं लशुनादिस्पर्शेऽपि तत्संक्रांतगंधेऽपि किंचित्कालस्थायित्वसामर्थ्यं कल्प्यं। उदकगतौष्ण्यवत्, न त्ववयवेषु सत्स्वप्रोंछनेऽप्यपगमसंभवेनानौचित्यात्। न हि जलादौष्ण्यं प्रोंछनादिना सद्योपयाति शीतलजलसमेलने तदपगमाद्यापि मृगमदादिस्पर्शे दुर्गंधापगमो दृश्यत इति सर्वं मनस्यं ॥ चूर्णस्पर्शात्सूक्ष्मावयवानामयोगे गंधकुसुमादिस्पर्शात् करादौ गंधस्यापि स्वातंत्र्येण संक्रमादेव शुद्धिप्रकरणस्थेषु 'गंधलेपक्षयकरं शौचमाहुर्मनीषिणः' इत्यादिष्वनेकस्मृतिवचस्सु लेपात् पृथग्गंधस्य ग्रहणं संगच्छते, अवयवमात्रग्रहणे तु लेपक्षयमेव वदेत् ॥ न चातिसूक्ष्मावयवानामदृश्यतया गंधोपलंभानुपलंभाभ्यामवयवागमस्थानापगमानुमानायैव पृथग्गंधग्रहणमिति वाच्यं ॥ तावतापि गंधप्रसरणसिद्धेः। प्रागतः किंचिद्दूरस्थे विकरे गंधानुभवात् करादिलिप्तावयवानामपि ततः प्रसरणांगीकारे मुहुः क्षालनादि प्रयासोऽपार्थः स्यात् ॥ अतएव "यथावृक्षस्य संपुष्पितस्य दूराद्गंधो वाती" त्युक्त्वा गंधस्य दूरगामित्वं बोध्यते। न च गंधशब्दस्य गंधाश्रयद्रव्यपरत्वं वाच्यं; लक्षणाप्रसंगात्। शक्यार्थाबाधस्यायोग्यत्वात्। नापि लेशपरत्वमेव वचनविरोधात्। तस्य जात्यभिप्रायत्वकल्पने स्वरसभंगापत्तेः शतपदे पुंगंधशब्देन लेशबोधस्य संभवेऽप्युक्तस्मृतावपि गंधपदस्यार्थद्वयाभावात् उक्तवक्ष्यमाणबहुस्मृत्येकवाक्यतालाभाद्प्यस्मत्संमत एव श्रुत्यर्थो निश्चीयते। रघुनाथेंद्रपंच [illegible] नारायणप्रसादकभाष्ये "लोके वृक्षस्योद्यानादौ [illegible] संपुष्पितस्य सम्यग्विकसितपुष्पोपेतस्य यो गंधः सुरभिरपि सोऽयं दूरादेशा [illegible]" इति व्याख्यानात् ॥ रघुनाथेंद्रस्तु [illegible] ॥ [illegible] गंधस्य [illegible] सुगंध इति [illegible] । गंध [illegible] कथं [illegible]

नानुसंधानात् ॥ वस्तुतस्तु वृक्षतो दूरगमनेन तद्वृत्तिपुष्परूपस्याश्रयतो दूरगमनं सिद्धमस्येव । यच्च भनिर्दिष्टाकरमपि तद्गुणमात्रमूलस्य भाष्ये दृष्टान्त्यामरचनमुक्तं, तत्तु वेचिदप्सु गंधमुपलभ्यापि ये पृथिव्यामेवतं नृ युक्तोऽनैपुणा इति योजयंति । वस्तुतस्तु येऽप्सु गंधमुपलभ्य अप्सु तं मृयुः पृथिव्या इव जलस्यापि गुणोऽयमिति तेऽनैपुणाः । यस्तु तस्य नं पृथिवीगुणमेव विद्यात् वायुजलयोश्च तं संक्रांतं विद्यात् न तु तयोर्गुणं भूतानामुत्तरोत्तरगुणाधिक्यक्रमभंगापत्तेरित्ययं नमर्यकेऽसत् ॥ तृतीयस्कंधे कोनत्रिंशे (श्लो० २०) 'यथा वातरथो घ्राणमावृंक्ते गंधमाशयात्' एवमादिपुष्पासवचरणैरेव तत्प्रसरणनिरूपणात् अतएव 'पृषदश्वो गंधवहो गंधवाहानिलाशुगाः' इति गंधवहशब्दयो वायुपर्यायाः । न चेह गंधशब्दं गंधाश्रयपरः, संज्ञायामुपचारायोगात् । गंधं वहतीति व्याख्या सुधा गुरुकुटादिकृता या एकवचनव्युत्पत्तेर्निरोधाच्च नापि लेशपरः, अव्याख्यानात् एकवचनविरोधात् लेशवहलक्षयाहादीनां पर्यायत्वापत्तेः दु.खलेशइत्यादौ गुणकर्मादिदोषिप्रयोगदर्शनेन संबंध्यनिर्देशेद्रव्यस्यैवेह लेशा इति वक्तुमशक्यत्वात् । सर्वथा दुराग्रहे त्वदुक्तव्यासवचनेऽपि पृथिव्यामेव गंधाश्रयकणाजलादिगुणगुणएव संक्रामतीत्यर्थसंभवेन त्वदिष्टासिद्धेश्च । इत्थं कारमस्य विसर्पिगुणत्वादेव सूत्रितं "व्यतिरेकोगंधवदि"ति । अर्थस्तु जीवसंबंधिनश्चैतन्यगुणस्य व्यतिरेकः स्वाश्रयद्रव्यादधिकदेशवर्तित्वं गंधस्येवेति । तथा शब्दोऽपि विसर्पिगुणएव भूतपंचके शब्दगुणत्वं वदतां वेदांतप्रभृतीनां भेर्यादिशब्दस्य दूरसुपलब्धिसिद्धये तथांगीकारस्यावश्यकत्वात्; श्रोत्रस्य गत्वा ग्राहित्वोक्तिस्तु प्रमादाद्घ्राणेऽपि तथात्वस्य सुवचत्वेन कृतपूर्वमहाप्रयासवैयर्थ्यापातात् किंच श्रोत्रेंद्रियं शब्द उत्पन्ने सति उत्पत्तिस्थलं गत्वा गृण्हाति आहोस्विदुत्पत्स्यमाने तस्मिन्पूर्वमेव गत्वावतिष्ठते ? नाद्यः; गोलकस्थितेन तेन दूरे तदुत्पत्तेर्ज्ञानस्याभावेन गमनासंगतेः उत्पत्तिप्रत्यक्षस्याश्रयप्रत्यक्षमंतरानुपपत्तेः उत्पत्तिप्रत्यक्षार्थं शब्दप्रत्यक्षेंऽगीकर्तव्ये संयोगादिसन्निकर्षमंतरा तदसंभवेन गलेपादुकान्यायेन शब्दे विसर्पितायाअंगीकरणीयत्वात् । न द्वितीयः; अनागतज्ञानानुपपत्तेः, परितः शब्दसंभवे सर्वत्र स्थित्ययोगाच्च । किंच शतघ्न्यादिमहाशब्दादुत्पत्तिकालोत्तरकालेषु क्रमेण दूरदूरदेशे श्रूयंत इति स्पष्टमेव तेषां विसर्पित्वं ॥ 'सघोषो धार्तराष्ट्राणां हृदयानि व्यदारयत्' 'तदैव तस्मिन्निनदोऽतिभीषणो बभूव येनांडकटाहमस्फुटत्' इत्यादिस्मृतिपुराणानि च शब्दस्य तथात्वं बोधयंति (स्कं० ३ अ० २५ श्लो० ३७) 'नेतृत्वं द्रव्यशब्दयो'रिति वाक्याश्रयेण शब्दस्य सुदूरगामित्वमुच्यते । आकाशमात्रे शब्दगुणकत्वं वदतां केषांचिद्वीचीतरंगन्यायेन कदंबमुकुलन्यायेन च शब्दांतरोत्पत्तिस्त्वनेकनाशोत्पत्तिकल्पनागौरवादिदोषैरन्यत्र दूषितेति कृतं प्रासंगिकेन अपि च हरिचंदनवज्जीवस्य सामर्थ्यादपि सर्वदेहचेतनोपपद्यते । तथा च सूत्रं "अविरोधश्चंदनव" दिति । अर्थस्तु देहस्यैकदेशस्थितेन हरिचंदनबिंदुना तस्य तैलपूर्णमार्क्दाहेनिक्षिप्तवच्छकलेनवायथा तत्सामर्थ्यात्सर्वत्र शैत्यं । तथा जीवस्य सामर्थ्यात्सकलशरीरे चेतनेति सार्वत्रिकानुभवस्याविरोध इति । माध्वस्तु 'अणुमात्रोऽप्ययं जीवः स्वदेहं व्याप्य तिष्ठति । यथा व्याप्य शरीराणि हरिचंदनविप्रुष' इति ब्रह्मांडवचनमप्युदाहरति ॥ न च सूक्ष्मतदवयवानां प्रसरणाच्छैत्यमिति वाच्यं ॥ तथा सति बिंदोर्क्षयप्रसंगात्: अत्यल्पसंख्यापरिमाणकानां तेषां सकल-

शरीरपिधाय'कत्वसंभवेन सार्वत्रिकशैत्यानुपपत्तेश्च । तैलशैत्येतु खंडस्याल्पमानत्व-लाघवयोरदर्शनात् नावयवगमनं शक्यवचनं, उत्क्रांत्यादिदशसूत्र्या पूर्वपक्षत्वं तुप्रा-गेवनिरस्तं प्रकाशाश्रयसूत्रे प्रभायास्तेजस्त्वोक्तिर्गुणत्वबाधिकेति तत्राभिमतंस्यात् । वस्तुतस्तु प्रकाशस्योत्कटरूपत्वात् (अ० ४ श्लो० २३) 'दीपश्चक्षुश्चरूपंचज्योति-षोनपृथग्भवेदि' तिद्वादशस्कंधवाक्याद्गुणस्यापितेजस्त्वमस्त्येवेतिनसूत्रयोर्विरोधः । पौराणमतेतु रूपतन्मात्रादेव तेजसउत्पत्तेश्च ॥ त्वंतु "गुणाद्वे" त्यस्यपूर्वपक्षस्थत्व-मिवप्रकाशाश्रयसूत्रस्यमतांतरपरत्वं स्वतुर्थश्लोकमुद्धृष्टवानसीतिद्वयोरपि व्यासानभिप्रेत-त्वात्तयोर्विरोधेपिकाक्षतिः, तथाचाणोरपिजीवस्यप्रभागंधादिवत् विसर्पिणोगुणस्यैवसंब-धात् तत्तदिंद्रियव्यापार श्रूयते कौशीतकिब्राह्मणइंद्रप्रतर्दनसंवादे "प्रज्ञयावाचंसस-मारुह्यवाचासर्वाणिनामान्याप्नोतिप्रज्ञयाप्राणंसमारुह्यप्राणेनसर्वान्गंधानाप्नोती" त्यादिना एतेनजीवस्यस्वरूपातिरिक्तचैतन्यगुणेस्पष्टतरंश्रौतमानमपिदर्शितं । सूत्रितंचभगवता (अ० २ पाद० ३ सू० २८) "पृथगुपदेशा" । दिति अर्थस्तुप्रज्ञयाशरीरंसमारुह्येति-करणत्वेनपृथक्तयोपदेशाच्चैतन्यंगुणइतिएवंविसर्पिगुणत्वं । "स्थूलानिसूक्ष्माणिबहूनिचैव रूपाणिदेहीस्वगुणैर्वृणोति । क्रियागुणैरात्मगुणैश्चतेषां संयोगहेतुरपरोऽपिदृष्ट." (पृ० ३५७) इतिश्वेताश्वतरादिपुश्रूयतएव । तत्रहिपंचमाध्यायेऽष्टमर्चिबुद्धिपरिमाणेनांगुष्ठमात्र-त्वंस्वपरिमाणेनाराग्रमात्रत्वंचोक्त्वा (ऋक् ९) "वालाग्रशतभागस्यशतधाकल्पितस्यच । भागोजीवस्सविज्ञेय" इति स्पष्टतयाणुत्वं "सचानंत्यायकल्पते" इतिसामर्थ्यार्थकधातु-प्रयोगाच्चंदनसहदेवोऽजटादिवत् सामर्थ्यादानंत्यमभिधायाणुमात्रेकथंतुस्त्रीपुरुषादिलिंगसं-भवइत्यशंकायांजीवस्यशरीरप्रयुक्तमेवस्त्रीत्वादिकंनतुस्वरूपतइति नैवस्त्रीनपुमानेषनचैवा-यंनपुंसका यद्यच्छरीरमादत्तेतेनतेनसरक्ष्यत" इतिदशमर्चिदर्शयित्वानानाविधदेहप्राप्तौकिं-निमित्तमित्याकांक्षायामेकादशर्चिसंकल्पादिप्रभवैःशुभाशुभकर्मभिरेवमनुष्यलोकदेवलो-कादिस्थानेपुनानाविधशरीरप्राप्तिंतस्यनिरूप्याणुमात्रस्यतस्यातिस्थूलेष्वतिसूक्ष्मेषुचशरीरेषु-कथंतुल्यसुखाद्यनुभवइत्याकांक्षायां (ऋ० १२) स्थूलानीत्याद्युच्यते । स्थूलानिपांच-भौतिकानिसूक्ष्माणिलिंगशरीराणिअथवास्थूलानिहस्त्यादीनांसूक्ष्माणिदंशमशकादीनां शरी-राणिदेहीजीव स्वगुणैश्चैतन्यप्रकाशैर्वृणोति । एवंचैकस्यैवदीपस्यस्थूलेषु गृहादिषुसूक्ष्मे-षुघटादिषुचयथायथाऽपरिमाणंप्रकाशप्रसरणवत् तत्तच्छरीरेषुतावत् स्वगुणप्रसरणादेवतस्य-तदनुभवइतिभाव. । ननुएकादशर्चि "स्थानेषुरूपाण्यभिसंप्रपद्यंते" इत्युक्त्याकर्मानु-सारिदेहप्राप्तौजीवस्यस्वातंत्र्येसतिशुभकर्मलभ्यानेवतान्प्रपद्येत । एवंस्वचैतन्येनदेहावरणे-ष्वपिस्वातंत्र्येसतिनिद्राकालेऽपिसर्वमनुभवेत् । नत्वेवंतत्कुतइत्याकांक्षायामुत्तरार्धंपठ्यते । क्रियागुणैरेति । क्रियागुणैर्नानाविधशुभाशुभक्रियाणांजीवमात्रनिष्ठत्वेपितज्जन्यैर्गुणै सुलो-चनांधत्वादिधर्मैस्तथाऽऽत्मगुणैर्जीवसंबंधिज्ञानप्रकाशैश्चसहतेषांशरीराणांसंयोगहेतुर्नकेवलं-जीवः किंत्वपर.परमेश्वरोपिदृष्टः । एवंचसंचितकर्मणांबहुत्वेपिप्रारब्धनिर्माणपरमेश्वराधीनं तथानिद्राकालेस्वप्रकाशादीविशेषेषुजीवस्यप्रवेशनंततोनिस्सारणंचतदधीनमतोनोक्त-दोषः । अतोलोमनखेषुचैतन्यस्याभावेपि तदिच्छैवनियामिकेतिसंक्षेप. । तथाचसिद्धं-

शरीरिगुणप्रसरणं । एवंअणुत्वमप्यनेकश्रुतिष्वभ्यस्यते यथाकठवल्लीपुप्रथमवल्ल्यां (ऋ० २१) "नहिसुविज्ञेयमणुरेषधर्मः" इति । एषजीवाख्योधर्मोनतुःपरमेश्वरस्याणुरित्यर्थः । दुर्ज्ञेयत्वपरत्वेतुनहिसुविज्ञेयमित्यनेनपौनरुक्त्यं । द्वितीयवल्ल्यां (ऋ० १३) "एतच्छ्रुत्वासंपरिगृह्यमर्त्यःप्रवृह्यधर्म्यमणुमेतमाप्य ॥ समोदतेमोदनीयंहिलब्ध्वा" इति । अयंस्तुजीवस्वरूपंगुरुतःश्रुत्वामननात्सम्यक्परितोयुक्तिभिर्गृहीत्वानिदिध्यासनात्प्रवृह्यउद्यम्यशरीरादिसद्पृथक्कृत्याणुपरिमाणकमेतमात्मानंस्वयमनुभूयानंदांशाविर्भावमात्मस्यतीतिशेषः । नचेदंवाक्यंब्रह्मपरंकल्प्यं; "येयंप्रेतेविचिकित्सामनुष्ये" इत्यादिनाजीवस्यैवप्रक्रांतत्वात् । अग्रे "अन्यत्रधर्मा" दित्यादिनापृथक्प्रश्नोत्तरंब्रह्मणोनिरूपणाच्च । स्पष्टीकृतंचेदंव्यासपादैरपिप्रथमस्यतुरीयेपादे (सूत्र ६) "त्रयाणामेवचैवमुपन्यासःप्रश्नश्च" इत्यत्र । किंचमैत्र्युपनिषदिद्वितीयप्रपाठके "इंद्रियेनाणिष्ठेनतद्विधमिदंचेतनवत्प्रतिष्ठापितं" इति । अणिष्टेनअणुतमेन । व्यापकस्यकथमणुभावः ? शरीरप्रतिष्ठापनार्थंइत्याशयेनबालखिल्यैःपृष्ट "इहैवावर्ततेंशेन" इत्यादिनांशत्वनिरूपणेनअंशिनईश्वरस्यविभुत्वेपितदंशस्याणिष्ठत्वं नेनशरीरनिष्ठापनंचनविरुद्धमितिबोधितं । अग्रेऽपि (ऋ० ५) "अनेनेंद्रियेनाणिष्ठेन" इत्यादि ॥ वचनांतराण्यपिबहुश्रुतिस्मृतिपर्यालोचनरसिकैःशतशस्सुखेनलभ्यानीत्यतिविस्तरभियाविरम्यते । किंच जीवस्य विभुत्वे जलाश्यादिषु सर्वत्र सत्त्वेन सर्वदासर्वेषां शैत्यौष्ण्याद्यनुभवःप्रसज्यते । नचमनःसंयोगस्यतत्रकारणत्वाददोषः, यावन्मूर्तद्रव्यसंयोगित्वस्यैव विभुलक्षणत्वेन स्वसंयुक्तेनमनस्यादिमनसातत्संभवात् । नचविलक्षणमनःसंयोग कारणंसर्वेषांजीवानांसर्वत्रविद्यमानत्वेन कस्यकिंमनइतिसंशयस्यापरिहारेणवैलक्षण्यस्यैवनिर्वक्तुमशक्यत्वात् । नचतत्रादृष्टंहेतुः, तस्यकर्मजन्यत्वेन तेषांच प्रयत्नजन्यत्वेन तस्यचमनःसंयोगजन्यत्वेनच सर्वेषां सर्वादृष्टत्वत्वोपपत्तेः । नच प्रदेशभेदः कल्प्यः; मनुष्यादीनां परिभ्रमणदर्शनेनतदनियमात् । पूर्वपूर्वशरीरत्यागोत्तरमनियतदेशविशेषस्थदेहांतरप्राप्तेर्ध्रौव्येणापितदनियमाच्च । अतो देवदत्तशरीरेणान्ने भुक्ते सर्वेषांतद्रसानुभवप्रसंगोदुर्निवारएव । एवमेव परमाचार्य. (अ० २ पा० ३ सू० ५१-५२-५३) "अदृष्टानियमादि" त्यादिभिस्त्रिभि सूत्रैर्जीवविभुत्वंदूषितवान् । नचैकजीववादःस्वीकार्यः; उक्तदोषानिस्तारात् "सर्वएवात्मान', तोयेनजीवान्व्यससर्ज । विविधाः सौम्यभावा" इत्यादितद्बहुत्वबोधकमाध्यंदिनतैत्तिरीयमुंडकाद्यनेकश्रुतिव्याकोपात् । पापपुण्यनरकस्वर्गादिव्यवस्थाभंगतद्बोधकशास्त्रोच्छेदाद्यनेकदोषैरन्यत्रदूषितत्वाच्च । बहुजीवविभुत्वेच "सर्वस्यवशीसर्वस्येशान" इत्याद्यनेकश्रुतिस्मृतिपुराणप्रभृतिसिद्धमीश्वरस्यशासकत्वमपिनघटेत । उक्तंचैतत् श्रीभागवतेवेदस्तुतौ (श्लो० ३०) 'अपरिमिताध्रुवास्तनुभृतोयदिसर्वगता' इत्यत्र । स्यादेवत् । नित्यभिन्नानां जीवानां स्वातंत्र्येणविभुत्वंतार्किकाद्यभिमतमेव सूत्रेषुप्रत्याख्यायते । ममतुमतेकदाचिदवच्छेदवादः कदाचित्प्रतिबिंबवादइत्यनेकवादसमृद्धे ब्रह्मणएवोपाधिवशाज्जीवभावोऽतोन विभुत्वबाधइतिचेन्मैवं; तथासति ब्रह्ममात्रेविभुत्वस्यजीवेषुचमध्यमपरिमाणताया.सिद्धेः । त्वन्मते उपाधिससर्गंविनाजीवशब्दवृत्त्ययोगाच्च । आकाशस्यविभुत्वेपिघटावच्छिन्नस्यदेकदेशस्यजलेनभ प्रतिबिंबत्वेनत्वयाभि-

मतस्यप्रभामंडलप्रतिबिंबस्यचनविभुत्वं शक्यवचनं । नचोपाधेर्ब्रह्मवद्विभुत्वात्तदुपपत्तिः; उपाधेर्ब्रह्मैकदेशवर्तितायाः पंचदश्यादिपुच्युत्पादितत्वात् । अन्यथा "अत्यतिष्ठद्दशांगुलंसर्वमावृत्यतिष्ठति । अधिकतुभेदनिर्देशा" दित्यादिश्रुतिस्मृतिन्यायव्याकोपात् किंच व्यापकस्योपाधेरेकतयैकजीवस्यैवसिद्ध्याप्रागुक्तादिदोषप्रसंग. । तेषामपि नानात्वेतूपाधिसांकर्याज्जीवानामपिसांकर्यमदृष्टानियमादिदोषानिस्तारश्चेतिदिक् ।

सचब्रह्मणोंश "अंशोनानाव्यपदेशादन्यथाचापिदाशकितवादित्वमधीयतएक" इतिसूत्रात् । ननु "अंशोनानाव्यपदेशा" दितिसूत्रेण नवास्तवमंशत्वमुच्यते, किंतुगौणंअंशइवअंशइतिनिरवयवस्यनिर्विकारस्यवास्तवांशासंभवात् । सचावच्छेदवादेनप्रतिबिंबवादेनवासंभवति । नचमुख्यार्थवाचकत्वेसंभवतिलाक्षणिकार्थकल्पनंनयुक्तमितिवाच्यं; हस्तमात्रेऽयंदेवदत्तइतिव्यपदेशस्यमुख्यत्वाभावेन विप्रहस्तछेदनाद्ब्रह्महत्यायाअसंभवेनचावयवेमुख्यभेदव्यपदेशाभावेनगौणाभेदव्यपदेशस्यावयवत्वव्याप्या तेनतत्साधनेतत्वापिमुख्यार्थस्यैकत्रत्याज्यत्वात्औपचारिकेप्यभेदांशेव्यभिचारात्सविशिष्यैवहेतुर्वाच्यः । सचदुर्वचइत्यवयवसदृशोंशशब्देग्राह्यस्तत्रचाभेदव्यपदेशोमुख्योभेदव्यपदेशस्तुगौणस्तथाचाद्वैतश्रुत्यनुरोधेनांशइवांशइत्येवव्याख्यानं सुवचं । एवंचविभुत्वप्रतिपादकश्रुतीनामपिसंगतिः 'ममैवांशोजीवलोकेजीवभूत' इतिगीतावाक्येप्यंशइवांशइत्येवव्याख्येयमितिचेन्नसत्यं; 'अंशोनानाव्यपदेशादि' तिसूत्रेणवास्तवमेवांशत्वंजीवस्यबोध्यते यतस्तत्सूत्रएव 'नाना व्यपदेशा' दितिहेतुर्दश्यते । तदर्थस्तु नानात्वेनव्यपदेशोनानाव्यपदेशस्तस्मात् श्रुतौबहुत्वसंख्याविशिष्टत्वेनकथनाद्विस्फुलिंगवद्व्युच्चरणकथनाच्चेति "सर्वएवात्मानोव्युच्चरंती" तिश्रुतिः । "यथासुदीप्तात्पावकाद्विस्फुलिंगाःसहस्रशःप्रभवंतेसरूपाः । तथाक्षराद्विविधाः सोम्यभावाःप्रजायंतेतत्रचैवापियंति" इतिश्रुतिश्चाग्नेस्सकाशाद्विस्फुलिंगवद्ब्रह्मणःसकाशाज्जीवस्यव्युच्चरणंप्रतिपादयंतीजीवस्यभगवदंशत्वमेवप्रतिपादयतिनतुप्रतिबिंबरूपमवच्छिन्नत्वरूपंगौणमंशत्वं येनांशइवांशइतिव्याख्यानं स्यात् । ननुब्रह्मणोनिरवयवत्वात्कथंजीवस्यांशत्वं ? सांशस्यसावयवत्वनियमादितिचेन्न; यदिब्रह्मनिरंशंसांशंवालोकप्रसिद्धंस्यात्तदायमाक्षेपोपिस्यात् । ब्रह्मतुवेदैकसमधिगम्यंसचययोपपद्येततथातदनुल्लंघनेनतज्ज्ञानार्थंयुक्तिर्वक्तव्या । सापिवैदिकीयथान्यप्रोधफलमाहरेति सानायगताचेत् "तपसाब्रह्मविजिज्ञासस्वे" तिश्रुतेस्तपोविधेयंगुरुशुश्रूषाप्यकर्त्तव्या "श्रोत्रियंब्रह्मनिष्ठ" मित्यादिश्रुतेः श्रौतस्यब्रह्मणःश्रौतेन-

प्रकारेणैवविचारःकर्त्तव्योनत्वेकदेशमादायसर्वविप्लवःकार्यः। सच-प्रकारःकीदृशइतिचेच्छृणु "अस्मादात्मनःसर्वेप्राणाःसर्वे लोकाःसर्वे-देवाःसर्वाणिभूतानी" त्युक्त्वा "सर्वएवात्मानोव्युच्चरंती" तिकथ-नात्तेपरस्परविलक्षणतयानिर्गता वैलक्षण्येक्रमेचविस्फुलिंगश्रुतिरेव-प्रमाणं; तत्रसदंशाज्जडानामुत्पत्तिःचिदंशाज्जीवानामेतदेवभाष्यकारै-रुक्तं॥ सदंशेनजडाःपूर्वंचिदंशेनेतरेअपि॥ 'अन्यधर्मतिरोभावामूले-च्छातोऽस्वतंत्रिण'इतिअन्यआनंदांशस्तस्यधर्मोविरुद्धधर्माश्रयत्वंत-स्यतिरोभावोयेषु तत्रहेतुर्मूलेच्छा "प्रजायेये"तीच्छा ततःस्वतंत्रो-ब्रह्मभावस्तद्वंतःस्वतंत्रिणस्तद्भिन्नाइत्यर्थः। तथाचनिरंशेपिब्रह्मणिलो-कविरुद्धस्य सांशत्वस्यव्युच्चरणश्रुतौप्रतिपादितत्वात्तद्बलेनतदप्यंगी-करणीयं, विरुद्धधर्माश्रयत्वंयुक्तिरितितयाश्रुतिमूलकयुक्त्याब्रह्मवादे-अंशपक्षएवाद्रियतेतंविहायकेवलंनिष्कलश्रुतिंपुरस्कृत्यौपचारिकांश-त्वकल्पनयासर्वश्रुतिविप्लवोनकर्त्तव्यः; ब्रह्मणोऽलौकिकत्वात्। ननु "ब्रह्मदाशाब्रह्मदासाब्रह्मेमेकितवाउते" त्यादिश्रुत्याब्रह्मभिन्नत्वंदाशा-दीनांप्रतिपादितंतत्रतरकार्य्यत्वमेवयुज्येतएवंचव्युच्चरणश्रुत्युक्तानां-प्राणलोकादीनामिवजीवानामपि कार्य्यत्वस्वीकारेऽपसिद्धांतःस्यादि-तिचेत्तत्राहसूत्रकारः "अन्यथाचापिदाशकितवादित्वमधीयतएके" इति॥ एकेशाखिनःप्रकारांतरेणापिदाशकितवादित्वमधीयतेतथा-चयद्दाशादीननूद्यब्रह्मत्वंविधीयेततदातेषांकार्य्यत्वंस्याद्विधीयते-तुविपरीतमतोब्रह्मणएवशरीरत्वंतत्रिविधत्वंच॥ इमइत्यनेनसजीवा-नामेवदेहानांपरामर्शात्तत्रिविधत्वंचांशद्वारैवसंभवति, यथावन्हेर-यःपिंडादिषु॥ अतएवएकेशाखिनोब्रह्मणोदाशकितवादित्वंशरीरत्वे-नअंशत्वेनचाधीयतेअतस्तादृशोद्देश्यविधेयभावान्यथानुपपत्त्याअंश-एवजीवःयदुक्तंहस्तमात्रेदेवदत्तइतिव्यपदेशोनमुख्योऽतएतन्मात्र-छेदने न ब्रह्महत्याप्रायश्चित्तोपदेशइतितदपिनसमीचीनंगोपुच्छंकन्या-हस्तंचगृहीत्वेमांगामिमांकन्यांतेददानीतिलोकप्रसिद्धव्यवहारस्यगौण-त्वकल्पनायानिर्युक्तिकत्वात् देवदत्तपदवाच्यतावच्छेदकधर्माव-च्छेदेनप्राणवियोगएवतद्वधप्रायश्चित्तनिमित्तमितिहस्तमात्रच्छेदनेन-देवदत्तवधप्रायश्चित्तमितितस्यापिगौणाभेदव्यपदेशसाधकत्वंनसंभ-वति, प्रतिबिंबवादावच्छेदवादादीनांचदूषणगणग्रस्तत्वेनासंभवेन-गौणांशत्वस्यप्रतिबिंबवादेनावच्छेदवादेनसमर्थनप्रत्याशायाअप्यसं-भवात्॥ दूषणानिचाग्रेवक्ष्यंते॥ किंचेत्यादिनोक्तानिदूषणानितुपूर्व-

मेवनिरस्तानिभगवतोनिर्विकारत्वात्सर्वभवनसमर्थत्वाच्च "परास्यशक्तिर्विविधैवश्रूयतेस्वाभाविकीज्ञानबलक्रियाचेत्या" दिश्रुतेः ॥ नचतादृशीश्रुतिर्मायाविषयेतिवक्तुंशक्यतेलोकेमणिमंत्रादिसामर्थ्यएवदुर्घटघटनापटीयस्त्वदर्शनेनतदतिरिक्तायांमायायांप्रमाणाभावात्मायायाः पूर्वंदूषितत्वाच्च ॥ तदेवसामर्थ्यंक्वचिदासुरव्यामोहादिलीलासुमायाशब्देनापिव्यवह्रियते ॥ क्वचिज्जीवेआनंदांशतिरोभावहेतुत्वेनाविद्याशब्देनापिव्यवह्रियतेअतएव "मायाचाविद्याचस्वयमेवभवती" त्यपिसंगच्छते। एवंचतादृशशक्त्यैवसर्वकार्यसंभवेतद्भिन्नभावरूपानिर्वचनीयाविद्याकल्पनेमानाभावः ॥ एतेनजीवानामीश्वरांशत्वेतस्यसावयवत्वंततोनिस्सरणेचतस्यसच्छिद्रत्वंस्यादित्यादिकमपास्तं । एतस्याक्षेपस्य "श्रुतेस्तुशब्दमूलत्वा"दित्यादिसूत्रैःपरिहृतत्वाच्च ॥ तस्मात्तादृशसूत्रार्थाज्ञानविजृंभितएवायंप्रलापः ॥

सहस्राक्षे यत्तु विसर्पिगुणेत्यादिं श्रुत्यंतरविरोधाच्चेत्यंतभागं निराकुर्वंति–सचब्रह्मणोंशइत्यादिनाऽयंप्रलापइत्यंतेन । सहस्राक्षोक्तार्थंपूर्वपक्षत्वेनसंगृण्हंति–ननुअंशोनानेत्यादिना । अत्रयत्रत्वव्याप्तेति । यत्रयत्रगौणाभेदव्यपदेशस्तत्रतत्रावयवत्वमितिभावः । तेनतत्साधनइति । गौणाभेदव्यपदेशेनांशत्वसाधने । प्रयोगस्तु जीवोब्रह्मणः साक्षादंशः गौणब्रह्माभेदव्यपदेशात् । देवदत्तोऽयमिति व्यपदिश्यमानतद्भ्रमत्वदितिज्ञेयः । एकत्रत्याज्यत्वादिति । अंशत्वबोधकवाक्यस्य मुख्यार्थपरताऽऽग्रहेत्वयाऽभेदबोधकवाक्यार्थे मुख्यार्थस्त्याज्यः । मयातुतत्रमुख्यार्थमादत्वांशत्वबोधके सत्यज्यतइत्यन्यतरत्र मुख्यार्थत्यागोद्वयोस्तुल्यइतिभावः । औपचारिकइत्यादि । मुखंचंद्रइत्यादौचंद्राद्यनवयवेऽपिमुखादौ गौणाभेदव्यपदेशदर्शनेन केवलस्तद्व्यपदेशोनावयवत्वव्याप्यइतिव्यभिचारात्तन्निवारकविशेषणदानपूर्वकमेवगौणाभेदव्यपदेशोहेतुर्वाच्य । विशेषणदुर्वचत्वात्सोपिदुर्वचइत्यर्थः । अवयवसदृशइति । अतएवविभिन्नांशयादिनस्तथामन्यंते । यथाचंद्रमंडलाच्छताशोगुरुमंडलमित्याद्युदाहरन् प्रकृतसूत्रादिकंतथैवव्याचष्टे । अथैतत्समाधातुं (अ० २ पा० ३ सू० ४३) "अंशोनाने" तिसूत्रस्थंभाष्यप्रकाशंभाष्यंचैकीकृत्यानुभाष्यानुयायीवनमालिदासः वदेति–नानात्वेनेत्यादिना । सर्वएवेति । माध्यंदिनानांबृहदारण्यकस्थेयं । यथासुदीप्तादिति । इयमाथर्वणानांद्वितीयमुंडकस्था । सचयथेति । वेदश्चेत्यर्थः । न्यग्रोधफलमिति । इयंयुक्तिश्छांदोग्येश्वेतकेतुविद्यायां (खंड १२) "न्यग्रोधफलमाहरेति" इत्यादिनानिरूपिता । अतआहरेकचित्पाठः । एवंलवणाचमनादिरूपाअपिताग्राह्या । तपसेति तैत्तिरीयाणांभृगुवल्लीस्थं । श्रोत्रियमिति । प्रथममुंडकसमाप्तौ "तद्विज्ञानार्थंसगुरुमेवाभिगच्छेत्समित्पाणिःश्रोत्रियंब्रह्मनिष्ठं" इतिवाक्यमस्ति । आदिपदात् "आश्चर्यवान्पुरुषोवेद" इत्यादीनिछांदोग्यादिवाक्यानि । एकदेशमिति पूर्वापरसंदर्भरहितंतत्वमसीत्यादिमात्रमादायांशत्वादिबोधकसर्वश्रुतीनांप्लवोनकार्यः सर्व-

चान्यैक्यान्यतापरेणसूत्रकृता तादृशैकदेशेपुकथंचिदुपचारस्यतद्गुणसारसूत्रेस्वीकारादित्य-भिसंधिः। एतेन (एकमस्यान्यतरा) विति तद्गुक्तिः प्रत्युक्तासूत्रकाराद्वत्येनातुल्यत्वात्। अंशत्वस्यौपचारिकत्वे तदभिप्रेतेनानाव्यपदेशमंत्रवर्णादीनुपचारविरुद्धान् प्रयत्नहेतूनुप-न्यस्यैवमधिकरणमेवनरचयेत्। एतत्पूर्वपक्षीकृत्यतदुक्तप्रकारंवास्पष्टंमूयात्। नत्वेवमतोंऽ-शत्वं नौपचारिकं। अस्मादात्मनइति। अग्रएतस्मादात्मनइतिकचित्पाठः। इदंहिवाक्यं-काण्वानांबृहदारण्यके चतुर्थाध्यायारंभेदप्तबालाख्यजातशत्रुसंवादरूपेप्रथमब्राह्मणे (पृ० २७२) "सयथोर्णनाभिस्तंतुनोच्चरेद्यथाग्नेः क्षुद्राविस्फुलिंगाव्युच्चरंत्येवमेवास्मादात्मनः सर्वेप्राणाः सर्वेलोकाःसर्वेदेवाः सर्वाणिभूतानिव्युच्चरंति" इतिश्रूयते। माध्यंदिनानांपाठेतु (पृ० १०६१) "सयथोर्णनाभि"रितिपाठः। सर्वाणिभूतानीत्यस्याग्रे "सर्वएतआत्मानो-व्युच्चरंति" इतिपठ्यते "सर्वएतआत्मान" इत्यपिपाठः। इहकाण्वपाठेभूतशब्दपूर्वजी-वपरः, तेषां मैत्रेयीब्राह्मणादिष्वनेकत्रतथादर्शनात्। माध्यंदिनपाठेतुभूतशब्दआकाशादि-परः। आत्मशब्देन जीवानांपृथगुपादानात्। नचस्वप्नसुषुप्तिनिरूपणादत्र पंचम्यंतात्मशब्दो जीवपर इतिभ्रमितव्यं; वाक्यार्थासंगतेः श्रुत्यंतरविरोधात्। "क्वैषतदाभूत् यएषविज्ञान-

---

यत्तु 'विसर्पिगुणचैतन्योऽणुर्जीवोंशोहरेः स्मृत'इति यच्च 'अभेदोवास्तवः स्वांशानीवा-इतिनिजेमते'इति च जीवस्य *ब्रह्मावयवत्वमुक्तम्*,-*तत्खण्डयति*–*अशत्वमित्यादिनातृतीय*-*चरणेन* ॥ 'अंशोनानाव्यपदेशा'दि'त्यत्रांशइवांशः सचावच्छेदवादेन प्रतिबिम्बवादेन वास-मर्थनीयः ॥ नच सूत्रे मुख्यांशपरित्यागे प्रमाणाभावइतिवाच्यम्; हस्तमात्रेऽयंदेवदत्तइति व्यपदेशस्य मुख्यत्वाभावेन च विप्रहस्तच्छेदनेब्रह्महत्याप्रायश्चित्तस्यधर्मशास्त्रैरनुपदेशेन च अवयवे मुख्याभेदव्यपदेशाभावेन गौणाभेदव्यपदेशस्यावयवत्वव्याप्त्या तेन तत्साधने तत्रापि मुख्यार्थस्यकृत्रत्याज्यत्वात् ॥ किञ्चौपचारिकोऽपि अभेदव्यपदेशोव्यभिचारवारणाय विशिष्यैवहेतुर्वाच्यः। सच दुर्वचइत्यवयवस्पर्शोंऽशशब्देन ग्राह्यः। तत्रच मुख्योऽभेदव्यप-देशः, भेदव्यपदेशस्तु गौणोव्याप्यः ॥ एवंचोक्तविधं विभुत्वमप्युपपन्नम् ॥ एवमेव 'ममैवांशो जीवलोके' इति गीतापिव्याख्येया ॥ सूत्रेस्वाक्यतालाभात् ॥ अतएव निष्कलमिति ब्रह्मणि *कलानिषेधश्रुतिःसगता ॥ तत्र न्यायोपबृंहितश्रुतौ संकोचापेक्षयाऽन्यत्रसंकोचएव युक्तः* ॥ नचावच्छेदवादेऽवयवसादृश्येऽपि प्रतिबिम्बवादे कथंतदितिवाच्यम्; परिच्छिन्नोपाधिप्रति-बिम्बस्योपाधिपरिच्छेदे न परिच्छिन्नतयाऽवयवसादृश्योपपत्तेः ॥ किञ्च त्वदुक्तरीत्या ईश-स्योपचयापचयाभ्यां विकारित्वापत्तिः ॥ जीवस्य तत्तद्देशगमनार्थं निस्सरणे हरेस्सच्छिद्रत्वा-पत्तिः॥ सन्निहितावयवान्तराणा तत्र प्रसर्पणेतु शैथिल्यापत्तिः॥ 'परास्यशक्तिर्विविधैवश्रूयते' इतिश्रुतिर्गाथाविपर्ययेव ॥ मायायामेवाघटितघटनापटीयसीत्वस्य लोके दृष्टत्वेन ततोऽतिरि-क्तायाः शक्तेः सत्त्वे तस्यां तादृशासामर्थ्यस्यच कल्पने च प्रमाणाभावादितीयमपि श्रुतिर्जीवे-शावाभासेनकरोति 'मायाचाविद्याच' 'स्वयमेवभवति' इत्यादिश्रुत्यन्तरोक्तमेवार्थं द्रढयति। नत्वेतया श्रुत्या जीवानां तदवयवत्वेपितस्य निरवयवकत्वम् ॥ तेषां ततोनिस्सरणेऽपि सच्छिद्रत्वाद्यभावं विचित्रशक्तिमत्त्वेनेशस्यबोधयितुं युक्तं ॥ लोकविरोधाच्छ्रुत्यंतरविरोधाच्च ॥

मय पुरुष एतदाभूत् कुत एतदागात् इतिसुषुप्तिकाले जीवस्याधारो जागरणेपुनरागमन-
स्यापादाननिमित्तचानुपृष्टमिति तदुत्तररूपेऽत्रब्रह्मण एवग्रहणमभनात् । इत पूर्ववाक्ये
"सयथाकुमारो वामहाराजो वामहाब्राह्मणोवातिघ्नीमानन्दस्यगत्वा शयीतैवमेवैषएतच्छेते"
इति ब्रह्मणएवानन्दात्मकस्यशयनाधारताबोधनात्। अतिशयेनदुःखहनीत्यतिघ्नी, आनन्दस्या
वस्थेति तत्रार्थसत्वात्। "यएषोन्तर्हृदयआकाशस्तस्मिञ्छेते" इतिपूर्ववाक्येप्याकाशशब्द
स्यब्रह्मपरत्वात्। स्वाप्ययादिसूत्रतद्विषयवाक्ययोरपितथैवसिद्धेः । शङ्कराचार्यैरप्युपनि
षद्भाष्यादिषु ब्रह्मणएवव्युच्चरणापादानतायाव्याख्यानाच्च। अन्यथा "ब्रह्मतेब्रवाणि" इत्यु
पक्रमादिकं बाध्येतेतिसंक्षेपः ॥ क्रमेचेति । "समिधोयजतितनूनपातंयजतीडोयजती"-
त्यादौपाठस्यापिक्रमनियामकताया पूर्वतन्त्रे पञ्चमस्यप्रथमेपादे (सू॰ ४।५) "क्रमेणवा-
नियम्येत, क्रत्वेकत्वेतद्गुणत्वात्॥ अशब्दइतिचेत् स्याद्वाक्यशब्दत्वात्" इत्यादिचतुस्सूत्रे
चतुर्थाधिकरणेसिद्धांतितत्वादिहापि "सर्वेप्राणा" इत्यादिनाप्राणलोकादीनांसर्वेषामन्दानाव्यु-
च्चरणमुक्त्वा जीवानांव्युच्चरणनिरूप्यतइतिक्रमेपीयमेवश्रुतिः प्रमाणमितिभावः । नचैकयो
भयस्यप्रमापणमशक्यमितिवाच्यं, प्रयाजानांभेदस्यचोक्तश्रुतितएवलाभस्यजैमिनिनादर्शित
त्वात्। परवैलक्षण्यसाधकस्तुभ्यासोऽत्रतुनामान्तरमित्यादिप्रकारभेदस्तुनदृष्टाततावाधकः ।
पाठस्यक्रमनियामकत्वन्यायमालायांमाधवोप्याह—'प्रयाजेपुक्रमोनास्तिविद्यतेवानविद्यते ।
श्रुत्यर्थाभावतोमैवक्रमःपाठान्नियम्यता मिति॥ पञ्चमस्थान्युदाहरणान्तराणिचद्रष्टव्यानीत्यल
मासङ्गिकेन ॥ ब्रह्मदाशाइति । आथर्वणानांब्रह्मसूक्तइदंवाक्यं । विधीयतेतुविपरीतमिति ।
मुहुर्ब्रह्मशब्दः प्रथममुक्त्वादाशाइत्यादिकथनात्तथेत्यर्थः । 'यद्वृत्तयोगः प्राथम्यमेतदुद्देश्यल-
क्षणं॥ तद्वृत्तयोगः पश्चात्त्वस्याद्विधेयस्यलक्षणं"मितिमञ्जूषादिप्रसिद्धाभियुक्तोक्तेरितिभावः ।
तत्रचब्रह्मैवप्रकृतं नतुदाशादयस्ततोऽपितदनूद्यतेषांविधानमेवयुक्तं । शरीरत्वमिति । दाशा
दिपदप्रवृत्तिनिमित्तयुक्ततत्तच्छरीरत्वं । परामर्शादिति । 'इदमस्तुसन्निकृष्टे" इत्युक्तया
प्रत्यक्षविषयास्तत्तद्देहाएव सनीवाइदमापरामृश्यते । श्रुतावुक्तशब्दश्चाप्यर्थे । तेनइमइत्य
स्यसर्वत्रसंबंधोद्योत्यते, केवलजीवपरत्वेदाशादिनानाशब्दोपादानबहुवचनेसंगच्छेत । दाश
त्वादेर्देहैकनिष्ठत्वात्। अंशद्वारैवेति । 'अनेनजीवेनात्मनानुप्रविश्ये तिच्छान्दोग्यादिषु
तथाश्रावणात्। मैत्र्युपनिषदि (प्रपा॰ २ पृ॰ २३) 'इहैवावर्ततेंऽशेने' तिस्पष्टत्वाच्चा
न्नाच्चतथेत्यर्थः । अतएवजीवइति । सोऽत्रनानाव्यपदेशशब्दव्याख्यामारभ्यतदनएकीकृत
योरंशोनानेतिसूत्रस्थभाष्यतत्प्रकाशयोरेव यथायथमक्षरशोऽर्थतश्चानुवादः । स्वोक्तावप्रा
माण्यपरिहारायकृतः । प्राणवियोगएवेति । यदितुहस्तमात्रच्छेदनाद्देवदत्तः प्राणैर्वियुज्येत
तदाप्रायश्चित्तभवत्येवेतिभावः । नसम्भवतीति । अन्यथाचाण्डालादिहस्तमात्रस्पर्शेस्नानादिन
प्रसुज्यात। तत्सर्वाङ्गस्पर्शस्यप्राय कदाचिदप्यसम्भवात् । काश्यादौ गङ्गैकदेशे स्नानेचतत्
स्नानफलंनस्यात् । हिमगिरिमारभ्यासागरसकलगङ्गायां स्नानानिष्पत्तेः । एवञ्चमुख्यगङ्गा
स्नानप्रयोगः कदाचिदपिनशक्येत । एवमधिकमप्यूह्यं । पूर्वमेवेति । तदीयतृतीयतुरीयश्लो-
कयोःखण्डने ॥ परास्येति । श्वताश्वतरस्थं प्राक् व्याख्यात ॥ मायायाइति । रदभिमताया
लक्ष्याइत्यर्थः । स्वाभाविकभगवत्सामर्थ्यरूपायाविष्टैवेतिभावः ॥ अथमत्ससदर्भस्याशयो

शेयः–जीवविभुत्वसाधनानिकानिचित् प्रागुक्तान्येव । किंच विभुत्वे तस्यतोंशत्वमपिनसंगच्छेत । नचेष्टापत्तिः; तद्बोधकश्रुतिस्मृतिन्यायपुराणविरुद्धत्वापत्तेः । तथाहि–पाशुपाणांमैत्र्युपनिषदि द्वितीयप्रपाठके (ऋक् ५) "अथयोहवाखल्वावैतस्यसोंऽशोयं यश्चेतनामात्रः प्रतिपुरुषः क्षेत्रज्ञः संकल्पाध्यवसायाभिमानलिंग" इत्यादि । गीतायां "ममैवांशोजीवलोके जीवभूतः सनातनः ।" सूत्राणिच "अंशो नानाव्यपदेशादि" त्यादीनि प्रसिद्धानि । श्रीभागवतेदशमे वेदस्तुतौ (श्लो० २०) "तवपुरुषंवदंत्यखिलशक्तिधृतोंशकृतं ।" एकादशे एकादशाध्याये (श्लो० ४) 'एकस्यैवममांशस्यजीवस्यैवमहामते' इति । चतुर्थस्कंधस्यचतुर्विंशे (श्लो० ६४) "सृष्टंस्वशक्त्येदमनुप्रविष्टश्चतुर्विधंपुरमात्मांशकेने"ति । षष्ठस्कंधषोडशाध्याये (श्लो० २४) 'देहेंद्रियप्राणमनोधियोमीयदंशाविद्धाःप्रचरंतिकर्मसु' इत्यादि; यत्तु अंशत्वेघटस्थांबुचंद्रवदि ति,–तन्न; यथासर्वाण्यणुमात्राणि चक्षुरिंद्रियाण्येकस्यसूर्यस्यांशभूतानि "आदित्यश्चक्षुर्भूत्वाक्षिणीप्राविश" दित्यैतरेयादिश्रुतिभ्यस्तथा 'सर्वेणुमात्राजीवाब्रह्मणोंशा' इतिव्यासाशयात् (अ० ४ श्लो० ३) 'यथाघनोर्कप्रभवोर्कदर्शितोह्यर्कांशभूतस्यच चक्षुषस्तमः । एवंत्वहंब्रह्मगुणस्तदीक्षितो ब्रह्मांशकस्यात्मनआत्मबंधन' इतिद्वादशस्कंधवाक्येनतथाध्यवसायात् । अत्रांशकेऽत्यल्पार्थेकन्इत्यन्यदेतत् । घटाकाशांबुचंद्रादिवज्जीवस्यांशत्वमितिक्वाप्यकथनाच्चनतथा । उक्तसूत्रस्यार्थस्तु–जीवोब्रह्मणोंशएवकुतः ? नानात्वेनव्यपदेशात् । "सर्वएतआत्मानोव्युच्चरंती" त्यादौ बहुत्वसंख्या विशिष्टत्वेनकथनाद्ब्रह्मणःसकाशाद्विस्फुलिंगवत् विभागकथनाच्चेति ॥ ननुब्रह्मणोनिरवयवत्वादंशासदृशःस्यात् । नानाव्यपदेशस्तुकथंचिदुपाधितोऽपियोजयिष्यतइत्याशंकां परिहर्तुंसूत्रद्वयमाह (अ० २ पा० ३ सू० ४४ । ४५)–"मंत्रवर्णात्, अपिचस्मर्यते" इति ॥ अर्थस्तु–"पुरुषएवेदंसर्वं" मित्युपक्रम्य "पादोस्यविश्वाभूतानी" तिमंत्रेभूतानांजीवानां पादत्वंवर्ण्यते पादोंशोऽवयवइतिचनार्थांतरं । श्वेताश्वतरेच (अ० ४ ऋ० ११) "तस्यावयवभूतैस्तुव्याप्तंसर्वमिदंजग" दितिस्पष्टमेवावयवत्वंश्राव्यते । मैत्रायणीयादिभिश्च स्फुटमंशत्वमाम्नायते । अतोननिष्कलश्रुत्यैतद्बाधःशक्यः; विपर्ययसंभवात् । किंतुविरुद्धधर्माश्रयत्वात् । उभयसामंजस्यंयुक्तमतोमंत्रवर्णाज्जीवोंशएवस्मर्यतेचास्यांशत्वं भगवता–ममैवांशइति । इहममैवेत्येवकारेणकेवलमीश्वरस्यांशोजीवोनतुस्वरूपनिर्वाहायोपाधिरपि तत्स्वरूपेऽतर्भवतीत्यन्ययोगोव्यवच्छिद्यते । असस्वच्छंदसांनिध्यस्वारस्यात् । तेननानाव्यपदेशोनान्यथयितुंशक्यः । सूत्रेऽपिशब्दउक्तविधशंकानिरासार्थः । किंचस्वांशत्वेसत्येवजीवदुःखादिनादुःखित्वादिकं ब्रह्मणिप्रसज्यतइतितद्वारणायानुपदे "प्रकाशादिवत्" इत्यादि सूत्रप्रणयनंसंगच्छते नतुप्रतिबिंबादिवादे । अंबुचंद्रेशस्त्रप्रहारेण चंद्रभंगायोगात् । किंचांशसूत्रेऽग्निविस्फुलिंगदृष्टांतः प्रकाशादिवत्सूत्रेचहृम्यादिदृष्टांतोस्मदभिमतएवत्वन्मतेप्युपात्तःनतुत्वदुक्तदृष्टांतावतःप्रकृतेतत्स्वभाष्यश्रुतहान्यश्रुताभ्यागमावपिप्राप्नुतः ॥ यत्तुसूत्रेशइवांशइतिव्याख्यायि–तन्न; उक्तश्रुत्यादिबाधात्अंशत्वनिषेधकभानाभावाच्च ॥ यदिसूत्रकारस्तथाभिप्रेयात्तर्ह्युक्तादिश्रुत्यर्थंपूर्वपक्षीकृत्यनांशोनिरवयवत्वादिति । अंशसमोनिरवयवत्वादितिवासूत्रयेत् । सर्ववाक्येषुसर्वंसदेहान्वारयितुमेवहिभगवान्प्रवृत्तोनतुताअनयितुं॥

अत.परमाचार्येण सप्रमाणविस्तरमंशत्वस्थापनात् हस्तोपचारादेरस्पष्टत्वाच्च ब्रह्मस्यांशत्वमेवजीवेतदभिप्रेतं ॥ अवच्छेदप्रतिबिंबवादौच सम्यङ्निराकरिष्येते मुख्यार्थत्यागेमानंदर्शयितुं हस्तमात्रेऽयमित्याद्युक्तिस्तुजलेमज्जतः शैवालावलंबनमनुकुरुते। मन्मते उपचारस्यापनस्य स्वाभीष्टे मानत्वायोगात्। वस्तुतस्तु हस्तोदेवदत्तोऽयमितिव्यपदेशएवत्वन्मतेऔपचारिकोवाच्यः। नतुतद्धस्तेतस्यहस्तोयमितिव्यपदेशस्तथा ॥ अत.श्वेताश्वतरादिभिर्ब्रह्मांशत्वेनबोधितेजीवे तदंशोयमिति ममास्मत्परमगुरूणांव्यासपादानांचोक्तौ नोपचारगंधोऽपि ॥ किंचलोकेहस्तेपादत्वस्यपादेचहस्तत्वस्याभावात् अवयवेष्ववयविव्यपदेशो गौणत्वमपि कथंचिदापद्येत। ब्रह्मणस्तु "सर्वकाम.सर्वगंधः" इत्यादिश्रुतिभिः सर्वधर्माश्रयस्यसर्वतःपाणिपादांतस्यसूक्ष्मेंशेपितत्वव्यपदेशोनभाक्तः। नहिशीकरोपिजलत्वंविस्फुलिंगोपिनाग्नित्वं व्यभिचरति ॥ इत्थंचतयोरग्निजलत्वादिव्यपदेशस्यतात्विकत्वात्। गौणाभेदव्यपदेशस्यावयवत्वव्याप्तिःप्रयुक्ता। अवयवेपुतद्व्यपदेशस्यसर्वत्रगौणत्वांगीकारेभार्यापरिग्रहेहस्तमात्रग्रहणात्हस्तमात्रेमुख्यंभार्यात्वम्। सकलशरीरेत्वौपचारिकमेवतत्स्यात्। तथाचमहान्धर्मशास्त्रविप्लवइत्याद्यूह्यं ॥ शिरोराहुत्वादिव्यपदेशानांमुख्यत्वेनव्यभिचारादिदोपोद्घाटनंतुविशेपानुपयोगात्परित्यज्यते ॥ ननुमास्त्वेवंव्याप्तिः, तथापिजीवआनंदांशस्यैश्वर्यादीनांचतिरोधानान्मुख्याभेदव्यपदेशोनशक्यइतिचेद्बंधदशायांतद्गुणसारसूत्रानुसारात्तत्वमसीत्यभेदोपदेशे कथंचिद्गौणत्वमपि; मुक्तिदशायांतुतदाविर्भावेन पूर्वंस्थितस्वरूपानाशेपिमुख्यएवस. ॥ एवमपिमन्मतेश्रुत्यंतरशतैकवाक्यतयातत्पदमात्रंतदंशपरं तत्वंतुतत्वंपदयोरुभयोरपिलक्षणा। अंशत्वबोधकश्रुतिस्मृतिसूत्रादिपुचसेतिनतौल्यं यच्च (तेनतत्साधन) इतितत्तुभवन्मतापर्यालोचनात् मयानानाव्यपदेशमंत्रवर्णादिसौत्रहेतुभिरेवांशत्वसाधनात् गौणाभेदव्यपदेशस्यतत्रहेतुत्वेनानुपादानात्। एतेनऔपचारिकोपीत्यादिदुर्वचइत्यंतंनिरस्तं। शंकराचार्यैरपिप्रकृतसूत्रे नानात्वव्यपदेशादिकमेवहेतुत्वेनव्याख्यायि। नत्ववारछेदादियुक्त्याभेदव्यपदेशस्तत्वेन ॥ अथत्वत्तोपाधजीवोब्रह्मांश अभेदव्यपदेशविषयत्वात्, यदेवंतदेवं, यथादेवदत्तंस्पृशामीत्यादि व्यपदेशविषयस्तद्धस्तादिकमित्यपिवदामः। गौणाभेदमादाय कथंचिद्व्यभिचारोक्तौतुतद्वारणायाभेदेतात्विकत्वविशेषणीयमितिसद्धेतुःसुरचएव। नचपूर्वोक्तिविरोध समुद्रेस्नातिपृथिव्यामग्निश्चेतव्यो भूमिमभिमन्येत्यादासमुद्रादिशब्दानामिवतत्त्वमसीत्यादौतच्छब्दस्यतदंशपरत्वेप्यभेदेतात्विकत्वानुच्छेदात्। नहिहस्तेऽपिशरीरत्वमौपचारिकं शक्यं वक्तुं; "यत्तुमुख्योऽभेदव्यपदेश" इतितत्तुतवदुर्वचं; तत्त्वंपदशब्दयोरैक्यासंभवेनस्वयमुपचारांगीकारात् ॥ यच्च (विभुत्वमप्युपपन्न) मितितदपिमनोरथमात्रंतथोक्तौब्रह्मणएवैवंभवसिद्धे.। उपहितचैतन्यस्यैवजीवशब्दार्थत्वेन तदवच्छेदकस्यप्रतिबिंबाश्रयस्य वोपाधेश्चपरिच्छेदेस्वयंस्वीकृतेसतिजीवेपरिच्छिन्नत्वस्यैवासिद्धेश्च॥ अतोमुख्यार्थत्यागेमानाभावात्तादृशसूत्रकरणस्यायोग्यतापातात्। अन्यथात्रासूत्रप्रणयनप्रसंगात्। यथाश्रुतपाठेसौत्रहेतूनांत्वदभिमतसाध्यासाधकत्वाच्चश्रुत्यादिपुमुख्यांशएवबोध्यः ॥ तथैवगीतावाक्येपि। श्रुत्याद्येकवाक्यतालाभात्। स्पष्टावयवत्वबोधकमंत्रवर्णंहेतूकृत्य "अपि स्मर्यते" इतिसूत्रयताव्यासेनममचेत्यस्यमुख्यांशबोधकतायाबोधितत्वाच्च ॥ एतेन

(सुगैकवाक्यतालाभा) दितिप्रत्युक्तं । असंगतंसूत्रार्थंमनसाकंचित्कल्पयित्वा स्वसंमत-
क्लिष्टार्थैकवाक्यतयागीतायाअन्यथैतुमशक्यत्वात् ॥ एतेनैव 'एकस्यैवममांशस्ये' त्यादीनि
श्रीभागवतादिवचांस्यपिव्याख्यातानि न्यायोपबृंहितानांबहूनामपिमैत्रायणीयादिश्रुतीनां-
तदनुपबृंहितैकनिष्कलश्रुत्यासंकोचस्वीकारे तुविपर्ययएवकिंनस्यात् । बहूनामनुमहस्य-
न्याय्यत्वाच्च ॥ कलानिषेधकस्यैकस्यापिन्यायस्याभावान्निष्कलश्रुतौ न्यायोपबृंहितत्वो-
क्तिस्तुदुर्बलच्छलनमात्रं ॥ वस्तुतस्तुश्रुतिस्वाविरोधाद्विरुद्धधर्माश्रयेब्रह्मण्युभयसामंजस्यं ।
तत्रनिष्कलश्रुत्याशरवादिसाध्यविभागोनिषिध्यते । श्रुत्यंतरैस्तुस्वेच्छयास्वांशानांव्युच्चारणंव-
न्हिस्फुलिंगन्यायेनबोध्यतइतिनविरोधः । उपाधिःपरिच्छेदोक्तिस्तुजीवविभुत्वयाधिका-
प्रतिबिंबवादश्चत्वदीयाष्टमश्लोकखंडनसमये सम्यक्खंडयिष्यते । किंचनहिमहासांशंनिरं-
शंवेतिलोकादवगम्यते; "तंत्वौपनिषद" मित्यादिबृहदारण्यकस्थशाकल्यब्राह्मणादिश्रुति-
भिस्तस्यवेदैकवेद्यत्वसिद्धेः । वेदेचनिष्कलत्वंतदंशोद्गमश्चाम्नायतइत्युभयमपिमंतव्यं ॥
अतएवव्यासोऽपि (अ० २ पा० १ सू० २६) "कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपोवे"
तिनिष्कलश्रुतिविरोधमाशंक्य (सू० २७) "श्रुतेस्तुशब्दमूलत्वा"दित्येवमेवसमादधे-
एतत्सूत्रयोःपूर्वोत्तरपक्षरूपत्वंतुशंकराचार्यादिभिरप्यभ्युपागामि । अतोमन्मते ईश्वरा-
द्बहुजीवोद्गमेपि नापचयः वन्हेः सकाशात्सहस्रशोविस्फुलिंगानांदीपसहस्राणांवाचद्गमेपि
वन्हेरपचयलेशस्याप्यदर्शनात् । तद्वदिहापिसामर्थ्यविशेषस्य परास्येत्यादिश्रुतिसिद्धत्वात्
अतएवोद्गमनिरूपणेमुंडकादिषु "यथासुदीप्तात्पावका" दितिसदृष्टांतीकृतः ॥ तथास-
र्वेषां प्रतिसंक्रमेऽपिनोपचयः । कल्पारंभात्प्रभृतिबहुमहानदीप्रवेशोपिसमुद्रस्येव । अतएव-
यथा "सर्वासामपांसमुद्रएकायन" "यथानदीनांबहवोंबुवेगाःसमुद्रमेवाभिमुखाद्रवंति ।
तथातवामीनरलोकवीराविशंतिवक्त्राण्यभिविज्वलंती"त्यादिश्रुतिस्मृतिभिःसदृष्टांतितः ।
विस्तरात्तुविकारप्रसक्तिःप्रागेवनिराकारि । एतेनच्छिद्रत्वोक्तिरप्यपास्ता । शैथिल्योक्तिस्तुप्र-
सर्पणानंगीकारपराहता । नचविस्फुलिंगवत्पतनाश्रयदेशाभावःशंक्यः "हंततिरोसानी" ति
काण्वश्रुत्युक्तेच्छयाआत्मन्येवकस्मिंश्चिद्देशेस्वांतर्धानेनसदंशकार्यस्याकाशस्यप्रथमतरमावि-
र्भावितत्वात् । स्पष्टंचेदंसर्वत पाणिपादांतमित्यत्रतत्वप्रकाशेशास्त्रार्थे ॥ आकाशोत्पत्ति-
श्चभगवतापरमाचार्येण (अ० २ पा० ३ सू० १) "नवियदश्रुते" रित्यधिकरणेमीमां-
स्यतइतितद्भाष्यप्रकाशादिभ्यएवदर्शनांतरानुसारिणो आकाशस्वतंत्रद्रव्यत्वाभिमान परिह-
रणीयः ॥ ब्रह्मणिस्वाभाविकविचित्रानंतशक्तिकत्वस्यश्रुतिसूत्रादिसिद्धत्वाच्चनकोपिविरोध-
गंधोपि ॥ दृश्यंतेहिमणिमंत्रौषधादीनामपिलोकेविचित्राःशक्तयः "परास्यशक्तिर्विविधैव-
श्रूयते स्वाभाविकीज्ञानबलक्रियाचे" ति श्वेताश्वतरश्रुतिस्तुनस्त्वदभिमतमायामात्रनिरू-
पिका । तस्याअसत्वेननित्यभिन्नत्वेनचतावकैरंगीकृततयास्वाभाविकीतिविशेषणायोगात् ।
अतोविविधपदस्वारस्याच्छक्तिरितिजात्यभिप्रायादेकवचनं । तत्रैवतृतीयाध्यायारंभे "यए-
कोजालवानीशतईशिनीभिः । सर्वांल्लोकानीशतईशिनीभिः यएवैकउद्भवेसंभवेचयएतद्विदुर-
मृतास्तेभवंती" ति शक्तिबहुत्वाम्नानात् ॥ "ईशिनीभिःस्वशक्तिभि" रितिव्याख्यानंतु-
शंकराचार्या अप्यभ्युपयंति । तथाश्रीभागवतेऽपि स्कं० (१० अ० ३९ श्लो० ५५)

'धियापुष्ट्यागिराकांत्ये'त्यादि (अ० ४० श्लो० २९) 'ब्रह्मणेनंतशक्तये' (अ० ३२ श्लो० १०) 'पुरुष.शक्तिभिर्यथा' (स्कद० ४ अ० ११ श्लो० २३) "अव्यक्तस्याप्रमेयस्य नाना-शक्त्युदयस्यच। नवैचिकीर्षितं तातकोवेदाथस्वसंभवं" (श्लो० ३०) त्वंप्रत्यगात्मनितदा-भगवत्यनंतआनंदमात्रउपपन्नसमस्तशक्तौ। दशमस्यैकोनषष्टितमे (श्लो० २८) "अजाय-जनयित्रेस्यब्रह्मणेऽनंतशक्तये। परावरात्मन्भूतात्मन् परमात्मन्नमोस्तुते" इति (स्कंध ६ अ० ४ श्लो० ३१) "यच्छक्तयोवदतांवादिनांवैविवादसंवादभुवोभवंती"ति। एवमादिषु अलौकिकशक्तिबाहुल्यंस्मर्यते भगवान्बादरायणोपिसर्वशक्तिसाहित्यंपरस्यबोधयति (अ० २ पा० १ सू० ३०) "सर्वोपेताचतद्दर्शनात्" इति। अत्रशंकराचार्यैरपि "एकस्यापि-ब्रह्मणोविचित्रशक्तियोगादुपपद्यतेविचित्रोविकारप्रपंच" इत्युक्तं। तत्पुनःकथमुपगम्यते-विचित्रशक्तियुक्तं परंब्रह्मेति ? तदुच्यते—सर्वोपेताचतद्दर्शनात्सर्वशक्तियुक्ताच परादेवतेत्य-वगंतव्यं। कुत.? तद्दर्शनात्,तथाहि दर्शयतिश्रुतिः "सर्वशक्तियोगंपरस्यादेवतायाः" इतिव्या-कुर्वद्भिश्चित्रानंताशक्तिकत्वमूरीचक्रे, अतोमायातिरिक्तशक्तिसत्वेप्रमाणाभावोक्तिरज्ञाना-देव (अ० २ पा० १ सू० २८) "आत्मनिचैवंविचित्राश्चही" ति सूत्रेणेश्वरशक्तिपुसाधा-रण्येनवैचित्र्यस्यसमर्पणात्सर्वत्राधाटत्तघटनापटीयस्त्वमपि स्फुटमसकृद्दादेव जीवेशावेति-श्रुतिस्तुप्राग्विस्तरेणव्याख्याताप्रतिबिंबवादनिराकरणावसरेचाग्रयव्याख्येयासेतितत्रापिवि-चरिष्यते। एवमलौकिकशक्तियोगादेवसर्वेविरोधा सुपरिहराइत्यभिप्रेत्यतत्पुरुषंवदत्य-खिलशक्तिधृतोंशकृतमिति जीवस्यांशत्ववदंत्य. श्रुतयोनुपदमेवाखिलशक्तिधृत्त्वेनभगवंत विशिंषंति॥ एतेनपरास्येत्यादियुक्तमित्यंतोग्रन्थोनिरस्त लोकादिविरोधश्चपुरैवनिराकृतः॥

यत्तुजीवस्याग्निविस्फुलिंगन्यायेनव्युच्चरणस्वीकारेतथैवप्राणानाम-पितच्छ्रुतावेवतस्मादेवनिःसरणस्योक्तत्वाद्यथातेषामनित्यत्वंतथाजी-वानामप्यनित्यत्वंस्यात्। तथाचतेषामनित्यत्वेकृतहान्यादिदोषाःप्रस-ज्येरन्अपिचतेषामनित्यत्वेमुक्तानामपिनाशःस्यात्यदिमुक्तिकालेना-शस्तदास्यात्मनाशएवमुक्तिःस्यादिति–तन्मंदं, जीवस्यप्राणादिवद्ब्रह्म-काशाद्व्युच्चरणेपितस्यव्युच्चरणंनोत्पत्तिःप्राणादिवन्नामरूपसंबंधाभा-वात्॥ नचजीवस्यदेवदत्तयज्ञदत्तचैत्रादिनामरूपसंबंधात्कथंनाम-रूपसंबंधाभावइतिवाच्यं; देवदत्तादिनामदेहस्यैवनात्मनः। तथैव-श्रुत्यापिप्रतिपादितं "अंगादंगात्संभवसिहृदयादधिजायसे। आत्मा-वैपुत्रनामासित्वंजीवशरदःशत" मितितत्रांगेभ्यउत्पत्तिर्देहस्यैवना-त्मनःसंभवति। अतएव "चराचरव्यपाश्रयस्तुस्यात्तद्व्यपदेशोभाक्त-स्तद्भावभावित्वा" दितिसूत्रमपिसंगच्छते॥ ननुदेवदत्तादिनामयदि-देहस्यैवतदादेहस्यदग्धत्वाद्देवदत्तादिनाम्नातदुद्देशेनगयाश्राद्धादि-करणानुपपत्तिस्ततोनामसंबंधो जीवस्यैववाच्यः। तथाचप्राणादि-तुल्यतयाकथंनतस्योत्पत्तिरितिचेत्—न; तत्रदेवदत्तादिनामसंबंधि-

देहोपलक्षितजीवाभिप्रायेणैवश्राद्धादिकमुपपद्यते,कथमन्यथाद्वितीयजन्मनिचैत्रादिनाश्राद्धादितस्यास्तजीवस्यनामसंबंधः ? किंचवेदवादिनांवेदएवमुख्यःतेनचजीवस्यनित्यत्वंप्रतिपाद्यते । तथाचश्रुतयः "अयमात्माऽजरोऽमरो नजायतेम्रियतेवाविपश्चित् ॥ नित्योनित्यानांचेतनश्चेतनानां अजोनित्यःशाश्वतोऽय" मित्याद्यानित्यत्वमेवज्ञापयंतितस्माद्व्युच्चरणंब्रह्मणस्सकाशाद्विभागएवनोपपत्तिरिति ॥ उपाध्युद्गमनेनैवजीवोद्गमनकथनंतुनसम्यक्; उपाधेःपूर्वंसत्त्वेद्वैतश्रुतिविरोधोऽसत्त्वेत्वनित्यत्वेनतदुपाधिकस्यजीवस्यानित्यत्वेन "नात्माश्रुतेर्नित्यत्वाच्चताभ्य" इतिसूत्रविरोधः ॥ नचजीवोब्रह्मव्यतिरिक्तोनस्वीक्रियतइतिवाच्यं; "नेतरोनुपपत्तेःभेदव्यपदेशाच्चान्य" इतिसूत्रविरोधापत्तेः ॥ किंचजीवस्यब्रह्मत्वंप्रतिपाद्यतेवाजीवत्वंनिराक्रियते ? आद्ये इष्टापत्तिः ॥ द्वितीये जीवस्याविद्यकत्वमेवकल्पनीयं; तथासतिमुक्तावविद्यानाशेजीवस्वरूपनाशप्रसक्त्यात्महानमपुरुषार्थस्त्वन्मतेस्यात् ॥ किंच "अनेनजीवेनात्मनानुप्रविश्यनामरूपेव्याकरवाणी" तिश्रुतिविरोधः । अब्रह्मनुप्रवेशेजीवस्याहित्यंतद्वारकनामरूपव्याकरणरूपंकार्यंचश्रूयते तद्वयमपिजीवस्यकल्पितत्वेबाध्येत ॥ नचानादिरयंजीवब्रह्मविभागोबुद्धिकृतइतिवाच्यं; प्रमाणाभावात् । नह्यनादित्वेबुद्धिकृतत्वेवाप्रमाणमस्तिजीवभावस्यकल्पितत्वेनतत्प्रत्यक्षस्यस्वाप्निकमायिकपुरुषप्रत्यक्षवत्प्रामाण्यायोगात् अतएवनानुमानादिरपि ॥ श्रुतयस्तुतेषांविस्फुलिंगवद्व्युच्चरणंब्रह्मण्यप्ययंचवदंत्यो जीवब्रह्मविभागस्यसादित्वमेववदंति ॥ न च "नकर्माविभागादितिचेन्नानादित्वा" दितिसूत्रेकर्मानादित्वबोधनेनसंसारस्यजीवब्रह्मविभागस्यचानादित्वमितिवाच्यं; तथासतीश्वरस्यानीशत्वं "सदेवसोम्येदमग्रआसीदेकमेवाद्वितीय" मितिश्रुतिविरोधश्चसंसारहेतूभूतकर्मणामविद्यायाजीवानांचतदानींसत्त्वात् ॥ तस्मात् "विस्फुलिंगाइवाग्नेर्हिजडजीवाविनिर्गताः । सर्वतःपाणिपादांतात्सर्वतोऽक्षिशिरोमुखात् ॥ निरिंद्रियात्स्वरूपेणतादृशादितिनिश्चयः ॥ जडेचिदानंदयोस्तुचित्यानंदस्यसर्वशः । तिरोधानंहरीच्छातोनिबंधादिषुवर्णितं ।" ननुयदिजडेचिदानंदयोस्तिरोधानंतदाघटोभातीतिप्रतीतिर्नस्याद्यदिजीवेआनंदांशस्यतिरोभावस्तर्हितत्रप्रीतिप्रतीतिःकथंस्यात् ? नहितिरस्कृतस्यभानंसंभवति; किंचचिदानंदौसतोभिन्नावभिन्नौवा ? आद्येऽपसिद्धांतःचिदानंदयोरसत्त्वापत्तिश्च । द्वितीयेतुलेपुतिरोभावातिरोभाव-

वैलक्षण्यानुपपत्तिरितिचेन्मैवं; जडेज्ञानसुखयोस्तिरोभावएवसन् घटइतिप्रतीतिवदिदानींघटःसुखंघटःजानातिघटःसुखीघटइत्यादिप्रतीतीनामभावात् ॥ ज्ञातेघट इतिप्रतीतिसत्वेपिनतस्याघटेचिदंशाविर्भावसाधकत्वं; ज्ञानविषयत्वस्यैवघटनिष्ठस्यतद्विषयत्वात्ज्ञानविषयत्वस्यचज्ञानत्वाव्याप्यत्वात् ॥ नचप्रियोघटइतिप्रतीतेरपिघटादावानंदांशाविर्भावसाधकत्वं यद्यानंदस्यैवप्रीतिविषयत्वंस्यात्तदातस्यापितत्साधकत्वंस्याद्यथानंदस्यप्रीतिविषयत्वंतथैवानंदसाधनस्यापिप्रीतिविषयत्वंदृश्यतेनतावतातेषामानंदरूपतैवकेनचित्स्वीक्रियते ॥ अतएवत्वन्मताभिज्ञैरपि 'सुखसाधनतोपाधेरन्नपानादयःक्रिया' इत्येवोक्तंनतुसुखत्वादित्युक्तं । जीवेतुनिरतिशयानंदस्यैवतिरस्कृतित्वानंदमात्रस्य तस्यापिविषयेंद्रियसंयोगादिरूपभगवदिच्छानियम्यकारणवशादेवाविर्भावोनसर्वदा अतएवाहं सुखीस्यामितितस्याभिलापःसंपद्यते, अन्यथा सिद्धेइच्छाविरहात्सनस्यात्निरतिशयानंदाविर्भावस्तुज्ञानभक्तिसमवधानकालिकभगवदिच्छयाकुत्रचित्केवलेच्छयैवेतिनकोपिदोषः ॥ चिदानंदौसतोभिन्नावभिन्नौवेत्यादिदूषणंतूभयमतएवतुल्यंतुल्यसमाधानंच ॥ त्वन्मतेपिब्रह्मणःसच्चिदानंदरूपत्वाद्घटादौसत्तैवव्यज्यते, नचिदानंदौव्यज्येते । अत्रकिंविनिगमकं तेषांभिन्नत्वेब्रह्मह्यरूपमपिभिद्येत? अभिन्नत्वेपरस्परं वैलक्षण्यानुपपत्तिः ॥ भगवदिच्छायास्तच्छक्तिविशेषस्यचानियामकत्वकल्पनेप्रकृतेपितेनैवसकलदोषतिरस्कारसंभव. किंवृथालापेन ? परंतु दोषवारणंनसंभवतित्वयाजडेजीवेचमाययैवानंदस्यतिरोभावोवाच्यः; तथासतिजीवेसच्चितोजडेसदंशस्यतिरोभावःकथंनेतिवक्तव्यं; मायायाअघटनघटनापटीयस्त्वाद्वैवमितिचेन्मुक्तानामपिपुनरुत्पत्तिःकथंनस्यात् ? वेदमार्गानुसरणेचवेदेभगवदिच्छायाएवजगत्कारणत्वमुक्तंनमायायाइति ॥ अपिचास्तिभातिप्रियमित्यनुभवानुसारेणजडेपिचिदानंदयोर्भानोपगमे 'सत्ताचितिःसुखंचेतिस्वभावाब्रह्मणस्त्रयः॥ मृच्छिलादिषुसत्तैवव्यज्यतेनेतरद्वय'मित्यादिवचनविरोधस्तवस्यात् । श्रुतौब्रह्ममात्रत.प्राणभूतजीवादीनांव्युच्चरणंयद्यपितुल्यतयैवप्रतिपादितंतथापि 'ममैवांशोजीवलोक' इतिभगवद्वाक्याज्जीवस्यैवांशत्वं, नान्येषांतत्साधकप्रमाणाभावात् ॥ एतेनश्रुतौतुअशांशिभावमनादृत्येत्यादिकमपास्तं ॥

सहस्रासे इदानीमग्नेरित्यादिवस्तुस्थितिस्तूक्त्वेत्यंतं भागं खंडयंति–यत्तुजीवस्याग्नी-त्यादिनाऽनादत्येत्यादिकमयान्मिस्यंतेन। (अ० २ पा० ३ सू० १५) "अंतराविज्ञान-मनसी" त्यादिसूत्रत्रयस्यभाष्यरत्नप्रकाशावर्कचिदंतमर्थंतोऽनुवदत.समादधते–जीवस्येत्या-दिना। नारदपंचरात्रे तदनुरोधेननिबंधभाष्यादिषुचानित्येजननमित्यादिनानिरूपितभावि-भावद्वैविध्यमभिप्रेत्याहुः–तस्यव्युच्चरणमिति ॥ नोत्पत्तिरिति। व्यावृत्तनामरूपसम्बंधा-त्मिका जननरूपोत्पत्तिर्नेत्यर्थः। समागमरूपातुसातस्याप्यस्त्येव। ब्रह्मण.सकाशाद्वि-भागस्याविशिष्टत्वात्। अंगादंगादिति। अयंमंत्रस्तैत्तिरीयाणांमंत्रप्रश्नाख्येप्रपाठकद्वयेप्रथ-ममध्येपठ्यमान.प्राय सर्वेषांजातकर्मणिसुप्रसिद्धः। सर्वांगेभ्योहृदयवधैकीभूतैरेतरूपाहितं-पुत्रशरीरतयापरिणमतीत्यत्रात्मशब्दोपिदेहादिपरएवफएति 'आत्मायत्नोधृतिर्बुद्धिःस्वभा-वोब्रह्मवर्मचे'त्यमरोक्तेः। चराचरेत्यादि। द्वितीयस्यतृतीयेपादे (सू० १६) एकसूत्रमि-दमधिकरणं। सूत्रार्थस्तु चरंजंगमं अचरंचस्थावरं शरीरं तादृशशरीरयोर्जीवस्य विशेषेणा-पाश्रयस्तत्तत्कर्मानुसारेणावस्थानंतुस्यादेव। तद्व्यपदेशःजन्ममरणादिशरीरधर्मैर्व्यपदेशः जीवेभाक्तोलाक्षणिकःकुतः? तद्भावभावित्वात्, तद्भावेनशरीरभावेनतदभिमानेनभवति-त्यात्तल्लिष्टति तादृशत्वादितिज्ञेयः। अन्यथेति। तदुपलक्षितजीवाभिप्रायेणश्राद्धादीत्यनं-गीकारे द्वितीयजन्मनिजाते सतिपूर्वनाम्नोःस्मरणात्तेनव्यवहाराभावाच्च तदानींप्राक्तनपुत्रा-दिनातन्नाम्नाक्रियमाणंश्राद्धादिकथमुपपद्येतेत्यर्थः ॥ नाम्नोजीवसंबंधित्वेतु सर्वजन्मसुचै-त्रेत्याहूतः सप्रतिपद्येत। तन्नाम्नासकलव्यवहारश्चापद्येतेतिभावः ॥ एतावता (अ० २ पा० ३ सू० १०) "नात्माश्रुतेर्नित्यत्वाच्चताभ्यः" इतिसूत्रस्यप्रथमांशआत्माजीवः नोत्पद्यते देहस्येवतस्यनामरूपसंबन्धात्मकोत्पत्तेरश्रवणादित्यर्थकंसंगृह्यतदुत्तरांशं भाष्या-द्यनुसारेणसंगृण्हंति–किंचयेदेत्यादिना ॥ अयमात्मेति। काण्वानांबृहदारण्यकेपष्ठाध्याये-

---

इदानीम् 'अग्नेर्यथाविस्फुलिङ्गास्तथाजीवोद्गमः स्मृत'इति तदुक्तजीवस्योद्गमनं खण्ड्यते ॥ अत्रोजीवइति ॥ प्राणवज्जीवस्य व्युच्चरणे समानश्रुत्या तद्वदेवोत्पत्तौ नाशोऽपि तस्यस्यात् ॥ उत्पन्नस्य नाशध्रौव्यात् ॥ जातस्यहिध्रुवोमृत्युरितिभगवदुक्तेः ॥ नन्वस्तु तथा येतु ज्ञानै-कसचिदात्मैपातुल्यएवहीत्यस्मदीयैर्मुक्तौ लयस्यैवोक्तत्वादिति चेत्सुव्याख्यातमात्मविनाशार्थं-यतामहेइतिवस्ता ॥ अधिकमुत्तरभागे वक्ष्यते ॥ तस्मादुपाध्युद्गमेनैव जीवोद्गमः ॥ अतएव काण्वानां सर्वएतआत्मानइति पाठोनास्ति उपाध्युद्गमेन तदुद्गमस्य सिद्धत्वात् ॥ माध्यं-दिनानान्तु उपाधिनिर्गमेनात्मनिर्गमइति स्पष्टप्रतिपत्त्यर्थं तथापाठः ॥ अतएव नात्माऽश्रुते-र्नित्यत्वाच्चताभ्यइतिसूत्रंसंगतं ॥ नजायतेम्रियतेवाविपश्चित्इतिश्रुतिर्नजायतेम्रियतेवाकदा-चिदितिस्मृतिश्चसंगता ॥ २७ ॥ इदानींजडेचिदानन्दयोस्तुतथाऽऽनन्दस्यसर्वशः तिरोधानं-हरीच्छातोनिबन्धादिषुवर्णितम् ॥ आविर्भावेतुसर्वंहिब्रह्मैवेतिनसंशयः इतिखण्डयति ॥ अन-वस्थेति ॥ अत्र जीवे कस्य सुखस्य तिरस्कृतिर्यदि तदा प्रीतिप्रतीति कथम्? अपरे जडे ज्ञान-सुखयोर्यदि सा तदा भानप्रीतिप्रतीती कथमित्यन्वयः ॥ नहितिरस्कृतस्य भानं सम्भवति ॥ यच्चाऽनुभवयोग्यत्वंवर्तमानत्ववस्तुतः आविर्भावःसहैवस्तिरोभावस्ततोऽन्यथा इति त्वदुक्ता

चतुर्थब्राह्मणे (५०–९१७) "स वा एष महानज आत्माऽजरोऽमरोऽमृतोऽभयो ब्रह्म" इति-श्रूयते ॥ माध्यंदिनानां (पृ० १०–९१) 'आत्माऽजरोऽमरोऽभयोऽमृतो ब्रह्म" इतिपदव्यत्ययघटितः पाठः ॥ अस्या श्रुतेरेवायमार्थिकोनुवादोभाष्यादाविति भाति । शङ्कराचार्यैरपि नात्माऽश्रुतेरितिसूत्रेउक्तचरकाण्वपाठस्यैवोपन्यस्तं । न जायतइति । इदं कठवल्लीषुद्वितीयवल्लीस्थं । अत्रो नित्यइतितु अस्यैवोत्तरार्धे प्रकाशानुवादबोधनाय पृथगनूदित स्पष्टतयानित्यपदघटितत्वेन सौत्रपदानुग्रहायच । नित्योनित्यानामिति । इदमपितत्रैवपंचमवल्ल्या (म० १३) "नित्योनित्यानाञ्चेतनश्चेतनानामेकोबहूनां योविद-धातिकामान्" । इति वाक्यं नित्यश्चेतनएकः परमेश्वरः नित्यानां चेतनानांबहूनां जीवानां जीवानां स्वधामादौ कामान्विदधातीत्यर्थकजीवनित्यतांगमयति–अद्वैतेति । "सदेवसोम्ये-दमग्रआसी" दित्यादिविरोध । सूत्रविरोधइति । सूत्रपदंतद्विषयश्रुतीनामप्युपलक्षणं । नेतरइति । प्रथमस्यप्रथमेपादे आनंदमयशब्दार्थः परमात्मैवेतिसाधयित्वा जीवस्यतत्वनिषे-धार्थमिदसूत्र (अ० १ पा० १ सू० १५ । १६) "भेदव्यपदेशाच्चे" तिसूत्रं चेतिद्वयं ॥ अंतस्तद्धर्माधिकरणे ॥ सूर्यमंडलांतर्वर्तिहिरण्मयः पुरुषः परमात्मैवेतिसाधयित्वा नतुस-जीवइतिनिर्णयार्थं (अ० १ पा० १ सु० २०) "भेदव्यपदेशाच्चान्य" इतिसूत्रं । प्राथमिकत्वादेतत्सूत्रद्वयमुक्त । एवमग्रेपितत्तदधिकरणेषु (अ० १ पा० १ सू० ३०) "जीवमुख्यप्राणलिंगान्नेतिचेन्न" (पा० २ सू०) "अनुपपत्तेस्तुनशारीरः" इत्यादीनि तत्तद्वाक्यस्यब्रह्ममात्रपरतासाधनाय जीवपरतानिवारकाणि सूत्रांतराण्यप्यनुसंधेयानि (अ० २ पा० १ सू० २२) "अधिकंतुभेदनिर्देशात्" इत्यत्रचेदमतिस्पष्टजीवस्या-णुत्वाशक्त्यादिधर्मैरस्यादेवपरस्य विभुत्वांशित्वादिनाधिक्यं । अंशांशिभावस्युवरणाद्यनं-गीकारेतुविभुजिवातिरिक्तब्रह्माभावाद्धिताकरणादिदोषप्रसक्तिर्दुर्वारैवस्यात् । साहित्यमिति । करणत्वेनसाहित्यं । प्रमाणाभावादिति । विभाजिकाबुद्धिर्जीवस्यब्रह्मणोवा? । आद्येआत्मा-श्रयादिक, द्वितीये निर्विशेषत्वभागादिक । किंच सापिकल्पिता नवा? । आद्येजीवकल्पित-त्वेऽन्योन्याश्रय. ब्रह्मकल्पितत्वेज्ञानघनताहानि । द्वितीयेत्वद्वैतश्रुतिसहस्रविरोधः इत्याद्यनेकयुक्तिविरुद्धेतत्पक्षेग्राहकश्रुत्यादिप्रमाणस्याभावात् ॥ नहीत्यादि । अनौपचारि-

---

भानायोग्यत्वस्यैव तिरस्कारपदार्थतया त्वया स्वीकारात् ॥ किंच चिदानन्दौ सतोभिन्नाव-भिन्नौ वा ? ॥ आद्येऽपसिद्धान्त ॥ चिदानन्दयोरसत्त्वापत्तिश्च ॥ द्वितीये तु तिषु तेषु तिरो-भावातिरोभाववैलक्षण्यानुपपत्ति ॥ किंच जीवजडयोर्ब्रह्मणाऽत्यन्ताभेदेन एतयोः सुखादिति-रोभावे ब्रह्मणोऽपि सस्यात् ॥ एतेन जीवस्यानन्दतिरोभावेन ब्रह्मणोभेदइत्यपि प्रत्युक्तम् ॥ पूर्वमभेदसत्त्वेनातिरोभावयोः समानयोगक्षेमत्वात् ॥ किंच व्युच्चरणसाम्ये प्राणादिजडे ज्ञानस्याऽपि तिरोभावे किं कारणम् ? ॥ ईश्वरेच्छा प्रति तु वक्ष्यते ॥ तर्कस्तु त्वया श्रौतेऽर्थे नाश्रीयते ॥ श्रुतौतुअंशांशिभावमनादृत्य ब्रह्मानतएव व्युच्चरणमुक्तम् ॥ तस्मात्सर्वत्रा-ऽस्मिभातिप्रियमितिप्रतीत्या ब्रह्मणः सर्वत्र सर्वदा सर्वैकरसत्वे समानैवोत्पत्तिर्वाच्या-वस्तुस्थितिरुक्ता ॥ २८ ॥ ७ ॥

कानादित्वकृतत्वयोः सामानाधिकरण्यासंभवादितिभावः ॥ अतएवेति । ब्रह्मणोनिर्विशेषत्वेनजीवस्यचांशत्वादिनातद्व्यतिरिक्तस्याभावेन प्रमातुरेवाभावादित्यर्थः ॥ प्रत्यक्षाभावाद्व्यतिरुजीवकानुमानादेरसंभवः ॥ श्रुतयस्त्विति । "प्रजायंतेतत्रचैवापियंति" इत्याद्यामुंडकादिस्थाः ॥ अनादित्वमिति । कर्मणेवसृष्टिप्रलयादिप्रवर्तकत्वाद्वस्तुंभावात् कर्मणोऽनादित्वात्किमीश्वरेणेतिभावः । एवंचानीश्वरवादापत्तिः । (अ० २ पा० १ सू० ३५) "नकर्मा वभागा" दितिसूत्रेतुकल्पबहुत्वात्तदनंतरसृष्टिप्रलयादिविषयावैदकृतयाप्रागुक्तवैषम्यनैर्घृण्यनिरासेनिर्णीतं । अन्यथामूलोक्तादिदूषणगणप्राप्तात् (अ० ३ पा० २ सू० ३८) "फलमत" इत्यादिबह्वधिकरणविरोधाच्च सर्वेषव्यासाभिप्रायत्वसायात् ॥ विस्फुलिंगाइवाग्नेरिति । इयंनिश्चयइत्यंतासार्धकारिकांशोमानेतिसूत्रभाष्यस्था । सर्वतःपाणिपादांतादित्यादि । श्वेताश्वतरादिबहुश्रुत्यर्थमंत्रहोऽयमितिमिगत्वशादिभ्योज्ञेयं ॥ जडेचिदानंदयोस्त्विति । इयंकारिकाशुद्धाद्वैतमार्तंडस्था तत्खंडनाभाससहस्राक्षखंडखंडनायेहोपन्यस्ता ॥ अर्थस्तु जडेद्वयोस्तिरोधानं चितिजीवेसर्थशआनंदस्य ब्रह्मनंदखंडानंदस्य तिरोधानंचशास्त्रार्थनिबंधाविरोधाध्यायभाष्यादिपुवर्णितमितिध्येयः ॥ सर्वंशःपदाद्ब्रह्मानंदमात्राभूतस्य परिच्छिन्नसातिशयलौकिकानंदस्य जीवेसत्वेऽप्यदोषोदर्शितोभवति । आनंदरूपतयेति । एवकारःसदादियोगव्यवच्छेदकः, वस्तुपुसत्ताया.प्रत्यक्षसिद्धतयातथास्वीकारोत्वश्यः । तेनसांख्यादिभि प्रमदादिवस्तुजातस्य सुखदु.खमोहात्मकतायाःस्वीकारेऽपिनक्षतिः । सुखसाधनतोपाधेरिति । विद्यारण्यस्वामिकृतपंचदशप्रकरण्यां आत्मानंदाख्येद्वादशेप्रकरणे (श्लो० २३) इदमस्ति । अन्यथेति । जीवेसर्वदानंदांशस्याविर्भावांगीकारे । भगवदिच्छयेति । "एषएवानंदयाति" इत्यादिश्रुतिभ्यो ज्ञानभक्तिकालेप्यानंदरूपफलदातासएवेतिभावः । कुत्रचिदिति । प्रलयकालजडेस्वाप्ययकाले जीवेचतथेत्याशय । उभयमतएवेति । उभयोर्मते । एवकारोऽप्यर्थे । विनिगमकमिति । नियामकमित्यर्थः । सत्ताचितिःसुखंचेति । विद्यारण्यपंचदशप्रकरण्याविषयानंदाख्येचरमप्रकरणे निशोऽयंश्लोकः । तत्रैव (श्लो० ९) 'घोरमूढासुमालिन्यात्सुखांशश्चतिरोहित' इतिजीवेष्वपि घोरमूढवृत्तिष्वानंदांशतिरोभावः स्वीकृतः । नान्येषामिति । जडानांजीवनत्स्वांशत्वंनेत्यर्थः । तेनांतर्यामिणांस्वांशत्वेप्यदोषः । अत्रायंसंदर्भाशयोऽनुसंधेयः— अंशत्वज्ञापकंव्युच्चरणंचानेकश्रुतिसिद्धं यथाबृहदारण्यकेदसवालाकिब्राह्मणे "यथोर्णनाभिस्तंतुनोच्चरेद्यथाग्ने क्षुद्राविस्फुलिंगाव्युच्चरंत्येवमेवास्मादात्मन.सर्वेप्राणा सर्वेलोकाःसर्वेदेवाः सर्वाणिभूतानिसर्वएत आत्मानोव्युच्चरंति", मुंडकोपनिषदिद्वितीयमुंडकारंभे "यथासुदीप्तात्पावकाद्विस्फुलिंगा सहस्रश.प्रभवंतेसरूपाः ॥ तथाऽक्षराद्विविधा.सोम्यभावा प्रजायंतेतत्रचैवापियंति", बृहदारण्यकोपनिषदि "यत प्रसूताजगत प्रसूती तोयेनजीवान्विससर्जभूम्यां", छांदोग्येश्वेतकेतुविद्यायां "सन्मूला सोम्येमाः सर्वा.प्रजाःसदायतना सत्प्रतिष्ठाः", भृगुप्रपाठके "यतोवाइमानिभूतानिजायंते", छांदोग्येशिलकशाल्यप्रवाहणकथायां "सर्वाणिहवाइमानिभूतान्याकाशादेवसमुत्पद्यंतेआकाशंप्रत्यस्तंयंति" इहप्रजाभूतशब्दाभ्यांप्राणादिविशिष्टा जीवाउच्यंते ॥ नचमुंडकश्रुतौ भावशब्दोजीवातिर-

रिकपरस्त्वयार्थकुंशक्यः; शंकराचार्यैरुपनिषद्भाष्ये "भावाजीवा" इत्येवव्याख्यानात् । यत्तुप्राणवज्जीवस्यव्युच्चरणेसमानश्रुत्या तद्वदेवोत्पत्तौनाशोपितस्यस्यात् इत्यभापि—तद् सत्; प्राणादेरप्याविर्भावतिरोभावौवदतामयाजीवस्यापितयो सुकथत्वात् । किञ्चव्युच्चरणं हिनोत्पत्ति किंतूद्गमएव, अतोव्युच्चरणेउत्पत्ताविल्युभयोक्तिरसंगतैव । किंचैककारण-जन्यत्वंयुगपदुत्पन्नत्वंवा ननाशादिसालक्षण्यप्रयोजकंभवति सोदरेषुयुगपदुत्पन्नघटादिषु-च्युगपन्नाशनियमादर्शनात् एकश्रुतिविषयेषुयुगपदुत्पद्यमानेषु दीक्षाऽऽधानादिधर्मेषु-केषांचिदवांतरेनिवृत्तेःकेषांचिदावदवभृथंस्थिते.केषांचिदायदाधानप्रयोगं केषांचिद्याव-ज्जन्मस्थायितायाश्चदर्शनात् ॥ तेनजीवानांमनःप्रभृतीनांचयावत्प्रलयंस्थितौदेहानांचविवि-धानांलब्धनेहसाविर्भावतिरोभावयोरपिनदोषः ॥ 'जातस्यही'तिवाक्यंतुनोत्पत्तिमतोनाश-नियामकं ध्वस्तस्यपुनर्जन्मजननानंगीकारेण 'ध्रुवंजन्ममृतस्य चे'त्यस्यासगतेःप्राणत्यागार्थक-मृङोनिष्पन्नस्यमृत्युशब्दस्यनाशपर्यायत्वाभावाच्च । अन्यथाघटोमृत पटो मृतइत्यादिप्रयो-गापत्ते. । पुनर्जन्मजननांगीकारेत्वाविर्भावतिरोभाववादएवप्रवेशः ॥ तस्माच्छरीरसंयोग-वियोगपरपरायाएवध्रौव्यबोधकमिदं । शंकराचार्यश्रीधरस्वाम्यादिभिरपि 'अथचैनम्' इतिश्लोकद्वयस्यतथाभिप्रायकतयाव्याख्यानेनत्वयापिनान्यथैतुंशक्यं ॥ एतेन ('जातस्यहि-ध्रुवोमृत्यु'रितिभगवदुक्ते) रितिप्रमाणोपन्यास प्रयुक्तः । ननुएवंसतिप्राणादितौल्यंतु-जीवस्यापद्यतएवेतिचेदत्रब्रूम —मन्मतेब्रह्मकार्यस्य सर्वस्यब्रह्मरूपतया वस्तुतोनित्यत्वेऽपि शास्त्रीयनित्यानित्यत्वव्यवहारबीजमस्त्याविर्भावस्यत्रैविध्यं । तच्चनारदपंचरात्रे 'अनित्येज-ननंनित्येपरिच्छिन्नेसमागमः ॥ नित्यापरिच्छिन्नतनौप्राकट्यंचेतिसात्रिधे'त्यादिनाप्रपंचितं । एकस्यामेवसृष्टौमुहुराविर्भावतिरोभावशालित्वादनित्यतयाव्यवह्रीयमाणे जडेजननरूपो-त्पत्ति । सृष्टेप्रभृत्याऽऽप्रलयमतिरोभाविन्यणुत्वात्परिच्छिन्नेजीवेसमागमरूपासा । नित्यविभुस्वरूपेपरात्मनितुप्राकट्यरूपासेत्यर्थः । जननंतुव्याकृतनामरूपसंबंधोनत्वसतः सद्भाव; 'नासतोविद्यत' इत्यादिविरोधादितिसमर्थितंप्राक् । तच्चनामरूपविशेषसंबंधरूपं-जननं जडएवसभवति, नजीवे; "अनेनजीवेनात्मनानुप्रविश्यनामरूपेव्याकरवाणि" इति-श्रुतौजीवस्यकरणतोक्त्याव्याकरणात्पूर्वमेवतत्स्वरूपसिद्धेः । अतएवद्वितीयस्यतृतीयेपादे (सू० १५) "अंतराविज्ञानमनसीक्रमेणतल्लिंगादितिचेन्नाविशेषा" दित्यधिकरणेतैत्ति-रीयादिषुविज्ञानमनोमयादिशब्दोक्तयोर्जीववेदयोर्जननमाशंक्य नामरूपविशेषाभावादेव-तत्परिहृतं । अतएवव्युच्चरणश्रुतौव्याकरणश्रुतौचात्मशब्द प्रयुक्त । व्याकृतनामरूप-साक्षात्संबंधादेवप्रश्नोपनिषदिषष्ठप्रश्ने "सप्राणमसृजत", द्वितीयमुंडकेप्रथमखंडे (क० ३) "एतस्माज्जायतेप्राणो मन सर्वेन्द्रियाणिच", ऐतरेये "सइमाँल्लोकानसृजत" एवमादौ प्राणादीनांजननमाम्नायते, किंच सूत्रकृता (अ० २ पा० ३ सू० १८) "ज्ञोतएवे" त्याद्यधिकरणैर्विस्तरेणापादपरिसमाप्ति जीवस्यगुणः स्वरूपंचनिर्णीतं, अतोन सर्वांशत प्राणादितौल्यशंकावकाशः । अधिकंप्रकाशादिभ्योज्ञेय । नन्वेवमपिव्युच्चरंतीति-समानश्रुतावपि केषांचिज्जननंकेषांचित्समागमइतिवैषम्यंतदवस्थमितिचेत्तर्हितथापि प्राणा-दीनामनौपचारिकंसाक्षाद्व्युच्चरणं जीवानामुपाधिद्वारौपचारिकत्वदितिवैषम्यंतदवस्थं । तद्वा-

रणायप्राणादीनामप्युपाध्यंतरद्वारकंतत्सर्वेषां शनौपाधिकंतत्स्वीकुरु । वस्तुतस्तुमन्मतेप्रा-णादेरपि व्युच्चरणोत्तरमेव नामादिसंबंधोऽतोव्युच्चरतीत्यत्रनवैषम्यगंधः, किंतुतवैववैषम्यं । प्रलयेतुजीवानांस्वकारणेऽप्ययोऽस्त्येव "तत्रचैवापियंति । यत्प्रयंति । आकाशंप्रत्यस्तंयंती" त्यादिश्रुतिभ्यः ॥ इदमपिविभुत्वावच्छेदप्रतिबिंबवादानामनादेरस्वांशत्वेचसत्येवानुपचा-रेणसंगच्छते; बिम्बादीनांप्रवेशासंभवात् । जलर्मीनादिवदनं शनिवेदोद्भूतानपायाच्च । तथा-मोक्षेपि "यत्प्रयंत्यभिसंविशंति । लक्ष्यंतदेवाक्षरंसोम्यविद्धीति" तैत्तिरीयमुंडकादिश्रुति-भिः "यदक्षरंवेदविदोवदंतिविशंतियद्यतयोवीतरागा" इतिस्मृत्याचप्रवेशः । "ब्रह्मैव-सन्ब्रह्माप्येति ॥ सयथासैंधवखिल्यउदकेप्रास्तउदकमेवानुविलीयेतनाहास्योद्ग्रहणायेवस्या" दित्यादितैत्तिरीयबृहदारण्यकादिश्रुतिभिरेकीभवरूपोलयश्चाम्नायतेसोपितथैवसंगच्छेत । अयंचलयोनध्वंसरूपः पूर्वस्थितयोःसचितोरनुच्छेदात् । प्रत्युताधिकानामानंदैश्वर्यादीना-माविर्भावेनाधिकंतत्रेतिन्यायावतारात्च ॥ अतोनास्मास्वात्मनाशदोषप्रसंगः ॥ मोक्ष-लयत्वव्यवहारस्तु "अप्येतिअनुविलीयेते" त्यादिश्रुतिभ्यः (अ० ४ श्लो० ३३) "तमाहुरात्यंतिकमंगसंप्लव"मितिद्वादशस्कंधादिवचनेभ्यश्च ॥ तस्माद्युक्त उक्तोज्ञानिनाम-क्षरेलयो "येतुज्ञानेकसन्निष्ठास्तेपांतुलयएवहि" इतिकारिकयामार्तंडकारैः ॥ येषांतुमत-उपाधौब्रह्मप्रतिबिंबएवजीवशब्दार्थः तदांमोक्षेउपाधिनाशादात्मनाशरूपत्वप्रसक्तिः दर्पण-नाशेप्रतिबिंबनाशस्य दृष्टत्वात् । तथाचतस्यापुरुषार्थता आत्महानमपुरुषार्थइत्युक्तेः ॥ एवमवच्छेदपक्षेऽपिद्रष्टव्यं । अवच्छेदस्यैवजीवस्वरूपघटकतयावच्छेदकनाशे जीवस्वरूपना-शावश्यंभावात् ॥ विस्तरात्तूत्तरभागेनिरूपयिष्यामः । एतेन नन्वस्तुतथेत्यादिवक्ष्यते इत्यंतं-दत्तोत्तरं ॥ यच्च (उपाध्युद्गमेनैवजीवोद्गम) इति–तन्निर्मूलं; तथाबोधकमानाभावात् । बहूपाधीनांपृथक् व्युच्चरणनिरूपणनैरर्थक्यापाताच्च ॥ काण्वपाठे अश्रवणमात्रंतुनमानं शाखांतरीयपाठस्यबाधायोगात् । अन्यथा "नैनमूर्ध्वंनतिर्यंच" मितिश्रुत्युत्तरार्धेतैत्ति-रीयाणां "नतस्यशोकश्चने" तिपाठेसर्वत्रप्रसिद्धेपि "नतस्यप्रतिमाअस्ती" तिश्वेताश्वतरादि-पाठस्यादरणं विष्णुनामसहस्रभाष्येशंकराचार्याणांनयुज्येत । तथाछंदोगानांपंचाग्निविद्यायां काण्वाद्युक्तश्रद्धाग्नेः प्राणविद्यायां पंचमस्थरेतसश्चोपसंहारोपिनसंगच्छेत । विद्यासाम्या-त्सइतिचेदत्रापितथास्तु । तस्मात्सामशाखीयाग्निहोत्रादिवच्छाखांतरश्रुतस्यात्मव्युच्चरणस्य-काण्वपाठे समुच्चयएवोचितः नतुमाध्यंदिनस्पष्टप्रतिपत्त्यर्थताउक्तहेतुद्वयात् ॥ मुंडकादौतु-नपाठभेदोप्यस्ति; किंच काण्वपाठेपि बृहदारण्यकभाष्ये "सर्वाणिभूतानि ब्रह्मादिस्तंबपर्यं-तानि प्राणिजातानी" तिव्याचक्षाणैः शंकराचार्यैर्भूतशब्देनजीवाः स्वीकृताः । भूतशब्दस्य तद्विषयत्वेच "अहिंसन् सर्वभूतान्यन्यत्रतीर्थेभ्य" इति प्रयोगोदर्शनानोव्यत्रमन्त्र-वर्णादिसूत्रैतैरंगीकृतं ॥ अत काण्वपाठेऽपिजीवव्युच्चरणंनिरवद्यं, माध्यंदिनपाठेतभूतशब्द आकाशादिवचनः आत्मशब्दोवांतर्यामिवचनः स्यात् । वस्तुतस्त्वाकाशादिवचनएवोभ-यत्रसइत्यन्यत्रविस्तरः । किंचमाध्यंदिनपाठेव्युच्चरंतीत्येकस्यैवपदस्यक्वचिदभिधया क्वचिदु-पचारेणप्रवृत्तिरशक्यावक्तुं; युगपद्वृत्तिद्वयायोगात् । अन्यथागंगायांघोषमीनावित्यादेरपि सुप्रयोगः स्यादितिदिक् । मन्मतेतुव्युच्चरणंविभागः, सचसर्वेषुशक्यः; तौल्यात् । विभागो-

त्तरं चूर्णनाभितंतुवत्स्वकारणकर्तृकक्रियाविषयाणां प्राणादीनां नामरूपविशेषसाक्षात्संबंधः । अग्निविस्फुलिंगवत्क्षुद्राणां स्वांशानां जीवानां तु न स इति विवेकः । एवमेव श्रुतौ दृष्टांतद्वयस्य सार्थक्यं; अन्यथैकमेव वदेदिति प्रकाशाद्याशयः । 'नात्माश्रुते'रितिसूत्रं तु देहवन्मुहुराविर्भावतिरोभावौ निषेधति । तथाहि—इतोऽव्यवहितपूर्वे (अ० २ पा० ३ सू० १६) "चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्तस्तद्भावभावित्वादि" तिसूत्रे चराचराणां स्थावरजंगमशरीराणां संबंधस्तु जीवस्य स्यात् । तद्व्यपदेशः शरीरनिष्ठजन्मादिव्यपदेशोऽस्य लाक्षणिकः; शरीरधर्माभिमानित्वात् । न तु जीवस्य प्रतिशरीरं वास्तवं जन्माद्यस्तीत्युक्तं । तत्र जातकर्मादीनां चेतनविषयकत्वात् जीवोऽप्युत्पद्यतां किमिति भाक्तत्वनिर्बंध इति शंकां वारयितुं सूत्रितवान् (अ० २ पा० ३ सू० १७) "नात्माश्रुतेर्नित्यत्वाच्च ताभ्य" इति । अर्थस्तु आत्मा जीवो नोत्पद्यते । कुतः? अश्रुतेः । तत्र तत्र देहस्येव तस्योत्पत्तेरश्रवणात् । ताभ्यः "अयमात्माऽजरोमरः । न जायते म्रियते वे" त्यादिश्रुतिभ्यः एव नित्यत्वाच्चेति । अतोऽनेन प्रतिशरीरं जन्माद्येव निषिध्यते न तु श्रुतिशतसिद्धं ब्रह्मणः सकाशाद्व्युच्चरणं ॥ यदि तथाभिप्रेप्यत् तर्हि विपर्ययेणेति सूत्रोत्तरमेवैतदपठिष्यत् । व्युच्चरणश्रुतीश्च त्वदुक्तविधसूत्रांतरेणायोजयिष्यत न त्वाहत्यैवाश्रुतेरित्यवक्ष्यत् प्रत्यक्षश्रुतिसत्वात् । "न जायते म्रियते" इति कठश्रुतिस्तु "अन्यत्र धर्मा" दिति प्रश्नोत्तरं "सर्वे वेदा यत्पद" मित्युपक्रांते ब्रह्मप्रकरणेस्तीति तस्यैव जननादिनिषेधिकास्पष्टीकृतश्चात्र भगवता सूत्रकृता प्रकरणविभाग आनुमानिकाधिकरणे ॥ अथ स्पष्टस्यैकवाक्यतया जीवपरत्वमप्यस्यास्त्विति चेत्तथापि देहसंबंधिजन्ममरणयोः प्रसक्तिं जीवे निषेधति प्राणत्यागार्थकम्रियतिप्रयोगात् उत्तरार्धे "न हन्यते हन्यमाने शरीरे" इति स्फुटतयैवोक्तेश्च ॥ एतेन गीतापि व्याख्याता, 'देहिनोऽस्मिन्यथा देहे कौमारं यौवनं जरा । तथा देहांतरप्राप्ति'रित्युपक्रांतानां 'य एनं वेत्ति हंतार'मित्यंतपूर्ववाक्यानां 'कं घातयति हंति कं' तथा 'शरीराणि विहाय जीर्णानि' 'नैनं छिन्दंति शस्त्राणी'त्यादिपरवाक्यानां च विचारेऽपि न जायत इतिवाक्यस्य दृश्यमाने मुहुर्जन्ममरणे देहस्येरयेवं बोधकतासिद्धा तत्राप्रसक्तस्य ब्रह्मतमद्गुद्गमादेः प्रतिषेधकतायास्तस्मिन् नवाक्यवचनत्वात् ॥ न चैवमप्यज इति समाख्याबलात् उद्गमाद्यभावः शंक्य ; स्पष्टतच्छ्रुत्यांशत्वलिंगेन च सिद्धस्य बाधने समाख्याया अप्रभुत्वात् श्रुतिलिंगाद्यपेक्षया समाख्यादौर्बल्यस्य पारदौर्बल्यसूत्रे जैमिनिना सिद्धांतितत्वात् । अतस्तदनुरोधेन मर्त्यवन्मरणाभावाभिप्रायममरत्वादिसमाख्यावत् व्युच्चरणोत्तरमाप्रलयस्थायिनो जीवस्य देहसदृशजन्माभावाभिप्रायिका सा ॥ रमेष्टिकामदेवयोरिव अकारो वासुदेवः स्यादित्येकाक्षरकोशाद्भगवतो जायत इत्यर्थ एवाज इत्येव मंतव्यं ॥ एतेन टीकायामनुक्तोपि (अजो जीव) इत्यजशब्दोपादानस्वरसोद्भूतोत्तरः ॥ यच्च (उपाध्युद्गमेनैव जीवोद्गम) इत्युक्तं—तदयुक्तिसहं; यतस्तदुपाध्युद्गमानधिरवेन किं महाविरक्ष्यते आहोस्विदुपाध्यंतरं ? नाद्यः; ब्रह्मणो विभुत्वादग्निविस्फुलिंगन्यायेन तत उद्गम्य पतनार्थस्थलालाभात् स्थलकल्पने च विभुत्वभंगप्रसंगात् । तिरोभावशक्तेरंगीकारेणोक्तरीतिः तिरोधानस्य स्थलसाधकस्य त्वयावक्तुमशक्यत्वात् । सदैतयाद्यांतराभावेनोद्गमप्रवेशयोरेव निर्णेतुमशक्यत्वात् । अथ प्राणादीनामपि तयोरौपचारिकत्वान्न देशाद्यपेक्षेति चेत्तर्हि प्राणादेरप्युपाध्यंतरं कल्पनीयं; यद्विद्गुद्गमनत्रोपचर्येत-

तथाचानवस्था ॥ सदभावायकचिद्ब्रह्मावधिकसाक्षादुद्गमांगीकारेतत्कदोपतादवस्थ्याद्घट्टकुटीप्रभातं । अनंगीकारेचोपचारस्याप्यसंभवः अन्यत्रस्थितधर्मस्यान्यत्रारोपस्यैवोपचारत्वात् ॥ उपाधिप्रदेशादिकल्पनेतूद्गमसिद्धिरुपाधितो वा उपाधिसिद्धिश्चोद्गमतश्चेत्यन्योन्याश्रयः अथानाद्यविद्ययोद्गमनिर्वाहायब्रह्मणिदेशादिकंकल्प्यतइतिचेन्न; तथाबोधकमानाभावात् निर्विशेषेब्रह्मणितत्संबंधरूपविशेषस्याशक्यवचनत्वेनतदुद्गमासिद्धेश्च तत्रतत्संबंधस्य जीवकल्पितत्वेतुचक्रकापत्तिः जीवोद्गमस्यप्राणाद्युद्गमापेक्षत्वात् तदुद्गमस्यचदेशाद्यपेक्षत्वात् तस्यचाविद्याब्रह्मसंबंधापेक्षत्वात् ॥ किंचानादिः सासत्यामिथ्यावा ? । नाद्यः; द्वैतापत्तेः, "सदेवसोम्येदमग्रआसीत् ॥ आत्मावाइदमेकएवाग्रआसी" दित्यादिश्रुतिसतन्याकोपाच्च ॥ नेतरः; मिथ्यारजतादिन्यायेनततः प्रदेशादिरूपकार्यासिद्धेः । किंचतथासति रज्ज्वहिस्वप्नादिवद्द्रष्ट्रधीनस्थितित्वंवक्तव्यं । सचद्रष्टानजीवः जीवभावस्यतत्साध्यत्वेनान्योन्याश्रयात् ॥ नापिशुद्धचित् ॥ नापीश्वरः; अन्योन्याश्रयात् । भ्रांतत्वापत्त्या "यःसर्वज्ञःसर्ववि" दित्यादिश्रुतिबाधाच्च ॥ नापितस्याः सदसद्विलक्षणत्वकल्प्यं; तथाग्राहकस्यप्रत्यक्षश्रुत्याद्यभावात् । नसत्तन्नासदुच्यते इतिलक्षणप्रवेशेन ब्रह्मानतिरेकसिद्धेश्च ॥ अपिचवैलक्षण्यग्रहणायसद्वस्तुकिंचिन्मंतव्यं । तच्च ब्रह्माप्यन्यद्वा ? आद्येतस्यसविशेषत्वं श्रौतसत्यादिपदवाच्यत्वंचापद्येत । द्वितीयस्मिन्द्वैतमपसिद्धांतश्च । अतःसद्वैलक्षण्यंदुर्वचं एवंप्रतियोग्यसिद्ध्यासत्प्रतियोगिकभेदवत्त्वमसत्त्वमपिनसिद्ध्यतीति तद्वैलक्षण्यमपितथा ॥ एवंकारंवदभिमतमविद्यास्वरूपंपरैवनिराकृतंनिराकरिष्यतेच ॥ किंच प्राणादीनां मिथ्यात्वादप्युद्गमोदुरुपपादः ॥ ख्यातिस्थलेशुक्त्यादितोरजताद्युद्गमस्यानंगीकारात् । तथासत्यभ्रांतस्यापितदानींरजतादिचाक्षुषप्रसंगात् । अथरजतादिवत्प्रतीतिरेवप्रकृतिश्रुतौव्युच्चरणत्वेनोपचर्यतइतिचेन्न; उपाध्युद्गमस्यजीवेउपचारइतिबोधकस्योक्तिविरोधात् । अपिविलिंगादिश्रौतदृष्टांतबाधात् उक्तरीत्यात्रयथार्थस्यनिर्बाधत्वेनउपचारक्लेशादरानौचित्याच्च । नद्वितीयः; उद्गमावधिभूतोपाध्युद्गतत्वेऽनवस्थादीनां अनुद्गतत्वेद्वैतप्रसंगादीनांच दोषाणांदुरुद्धरत्वात् । मिथ्यात्वेऽवधित्वस्यापिदुःकथत्वाच्च किंचतथांगीकारे ब्रह्मणोव्युच्चरणावधित्वबोधिकाः "तस्मादात्मनः । तथाक्षराद्विविधाः सोम्य भावा" इत्यादिश्रुतयः पीड्येरन् । अविद्यावधित्वबोधकश्रुत्यनुपलंभेनतासामकस्मादन्यथानयनमप्यरोचिष्णु श्रुतहान्यश्रुतकल्पनापत्तिश्च । अपिचतस्याः सावयवत्वात् प्राणादिप्रवेशोद्गमयोरुपचयापचयौसंच्छिद्रत्वापत्तिरवयवांतराणांतत्रसमर्पणंशैथिल्यापत्तिश्चेत्येवमुक्तदोषास्त्वन्मतएव प्रसज्येरन् शक्तावपिस्वमनसाविचित्रानंतशक्तिकत्वांगीकारात्तु "परास्यशक्ति" रित्यादिश्रुतिसिद्धोब्रह्मण्येवतदंगीकारोज्यायान् ॥ इतरच्च अविद्यायाउद्गमावधित्वमुच्यतउतपतनदेशत्वं ? उभयत्रान्यतरत्वंब्रह्मणएववाच्यमितिसविशेषत्वप्रसक्तिः । अविद्यायामेवोभयत्वकल्पनंतुदृष्टांतविरुद्धं । तस्यांविचित्रशक्तिकत्वानुमानेनतत्कल्पनेतुब्रह्मण्येवोभयरूपत्वंकल्प्यतांतस्यावधित्वविभुत्वाविर्भावतिरोभावाद्यनेकविचित्रशक्तिकत्वादीनांश्रुतत्वात् श्रुतानुमितयोः श्रुतस्यबलीयस्त्वात् ॥ तस्मात्त्वन्मतेप्राणाद्युपाध्युद्गमोशक्यवचनइतिनतेनजीवेउद्गमोपचारसिद्धिः । एतावता तस्मादुपाध्युद्गमनेत्यादिकंस्मृतिश्चसंगतेत्यंतं-

निराकृतं ॥ अत स्पष्टानेकश्रुतिसिद्धत्वात् प्रायपाठाच्चप्राणादिवज्जीवानामपि ब्रह्मतोऽव्युच्च-रणंवैदिकैरास्थेयं । इयान्परंविशेषः–जडेसदंशः प्रकटश्चिदानंदौतिरोहितौ प्रकटेसच्चितावेव जीवेंतस्येन्नयंस्फुटं ॥ तथाहिनृसिंहतापनीये उत्तरभागेनवमखंडे "तस्मादात्मनएवत्रैविध्यं-सर्वत्रयोनित्वमपि" इत्येकस्यैवब्रह्मणः कार्यभेदेनत्रैविध्यंसर्वत्रोपादानत्वंचोक्त्वा "सर्वं-सर्वमयंसर्वेजीवाः सर्वावस्थासुतथाप्यल्पा" इति । वस्तुतस्तुसर्वस्यापिब्रह्मरूपत्वाज्जडप्र-पंचस्यजीवानांच सर्वमयत्वंतथात्वेऽपिजीवानांस्वरूपतोऽणुत्वंचोक्त्वासर्वत्रसर्वमयत्वप्रत्यये कार्यवैचित्र्यानुभवोनस्यादिति तद्वैचित्र्यनिर्वाहकंतत्रतत्रतत्तदंशतिरोभावंदर्शयितुमुच्यते "सत्तामात्रंहीदंसर्वंसदेवपुरस्तात्सिद्धंहिब्रह्म" इति ॥ अत्रमात्रपदंचिदानंदव्यावर्तकंतेनज-डप्रपंचस्यसर्वस्येदानींसदंशमात्ररूपतापूर्वंब्रह्माभेदेनैवसत्ताचदर्शिता । अग्रेपि "पश्यतेहा-पिसन्मात्र" इत्यादिनातथैवनिर्णीतं । तत्र "पश्यतेहापिसन्मात्रंसदन्यत्सत्यंहीत्थंपुरस्ताद-योनि स्वात्मस्थमानंदचिद्घनंसिद्धंतद्विष्णुरीशानोब्रह्मान्यदपिसर्वंसर्वगंसर्वम् ॥" इत्यादिना-इहशारीरेपिपूर्वोक्तसन्मात्रसदंशमात्राविर्भावजगत् "सर्वभूतानिचात्मनी" तिस्मृत्याद्यनु-सारेणपश्यतसदन्यत्सदंशमात्रप्राकट्यादेवसतोब्रह्मणोऽन्यदिदंसृष्टिदशायांपश्यत । वस्तु-वस्तुसर्वंसत्यंहिनिश्चयेनइत्थंपूर्वोक्तप्रकारेण ॥ असदन्यदितिपाठस्त्वन्तरासर्गपरोदीपिका-यांव्याख्यातः पुरस्तात्सृष्टेः प्राक्अयोनिः घटादिस्वस्वकार्यानुत्पादकंस्वात्मस्थस्वमूलरूपेब्र-ह्मण्येवस्थितमितितदानींचिदानंदातिरो भावात्सत्तामात्रंकिंत्वानंदचिदेकरसंसिद्धंततुसा-ध्यंहियुक्तंततएवासिद्धंसर्वप्राणाविषयः । असिद्धपदार्थस्तात्रकभाष्येप्ययमेव । तदेवविष्णुः शिवोब्रह्माअन्यदपिप्रापंचिकंसर्वंतदेवपूर्वंप्रस्तुतंब्रह्मैव । अतोविविधाकारत्वेपिअहिकुंड-लन्यायेनसन्मात्रावगतिर्नविरुध्यतेअतएवसर्वगंसर्वं ॥ एतेन "योमांपश्यतिसर्वत्रसर्वंच-मयिपश्यती" त्यादिवाक्यानुसारेणब्रह्मदृष्टौसिद्धायामिदानीमपिसर्वत्रसच्चिदानंदानुभवो-बोधित. । एवमादिदर्शितंततोज्ञेयं ॥ अग्रेचप्रपंचस्यनिरात्मकत्वंनिराकृत्य "नहीदंसर्वंक-दाचित्" इत्यादिनानित्यत्वंनिर्णीय अंतरासर्गस्यैवविद्यकत्वंबोधितं ॥ अग्रेच "यूयमेवस्व-प्रकाशाः इदंहिसत्त्वचिन्मयत्वात्" इत्यादिनासच्चिदंशमात्रप्रचुरत्वंजीवानांदर्शयित्वाग्रे "ततोयूयमेवस्वप्रकाशाइतिहोवाचनचसत्त्वचिन्मयाः एतौहिपुरस्तात्सुविभातमव्ययमहार्य-मेवाद्वयं" इत्यादिनाब्रह्मात्मताभानेतुजीवानसच्चिन्मात्रप्रचुराः हियतएतौद्वावेवांशौपुरस्ता-त्जीवदशायामेवसत्यांभवतोब्रह्मभावेतुसच्चिदानंदरूपाएवतइत्यासमासिसिद्धांतितं ॥ अत-एवमध्ये "तद्वाएतद्ब्रह्माद्वयं" इत्युपक्रम्य "सदानंदचिन्मात्रमात्मैव" इत्याद्युक्तं ॥ एत-च्चदीपिकान्याख्यासभयेविस्तरात्तत्रैवक्ष्यामः ॥ एवंचसृष्टिदशायांव्यवहारसिद्ध्यर्थंजडेसदं-शस्यैवप्राकट्यंजीवेचसच्चितोरेवतत् ब्रह्मभावेतुसर्वमेवसच्चिदानंदपूर्णमितिश्रुतितःसिद्धं ॥ प्रतीतत्वादपितथैवसिध्यति ॥ तथाचेमेप्रयोगाः–विमतोघटः सदंशात्मकः अस्तीत्यबाधित-प्रत्ययगोचरत्वाद्यदेवंतदेवं पटवज्जीववद्वा यन्नैवं तन्नैवं यथातुच्छं अबाधितत्वंचेहभ्रम-रमप्रकारकप्रमात्मकानुव्यवसायविषयतानर्हत्वं तुच्छेऽस्तीतिप्रत्ययस्याधिष्ठानपरामर्शादिना-बाधदर्शनाद्व्यभिचारः घटादौतिरोभावोत्तरंनास्तीति प्रत्ययेऽपिनासीदितिप्रत्ययानुदया-त्पूर्वज्ञानस्यभ्रमत्वेनग्रहः तुच्छविषयकास्तित्वप्रत्ययस्य अप्रमात्वंप्रातिभासिकव्यावहारि-

कसत्ताभेदमूरीकुर्वतात्वयापि स्वीकार्यं ॥ विमतस्तिरोहितचिदंशकः ज्ञानानीच्छमीत्याद्य-बाधितप्रत्ययागोचरत्वात् ॥ हिताहितप्रवृत्त्यनुकूलचेष्टाप्रयत्नरहितत्वात् । यन्नैवंतन्नैवं, जीववत् । विमतस्तिरोहितानंदकः प्रीयतइतिप्रमित्यविषयत्वात् ब्रह्मात्रव्यतिरेकदृष्टान्तः ॥ तथाविमतोजीवः सच्चिद्रूपः अस्तिज्ञानानीत्याद्यबाधितप्रतीतिविषयत्वात् । योयत्प्रकारका-बाधितप्रतीतिविषयः सतत्प्रकारकः पृथ्वीत्वप्रकारकप्रमितिगोचरपृथ्वीरूपघटादिवत् ॥ विमतस्तिरोहितपरमानंदक सर्वदाप्रीयतइति प्रमित्यविषयत्वात् व्यतिरेकेब्रह्मवत् ॥ जडापेक्षयाकश्चिदानंदस्यांशांशोजीवेस्थापितोस्ति । अन्यथा आनंदवस्तुनएवयोधानुदयात् अयोधेचलिप्सानुदयेनमोक्षतच्छास्त्राद्युच्छेदः ॥ किंचसर्वथानंदाभावेजीवनानुपपत्तिः "कोह्येवान्यात्कः प्राण्यात् यदेषआकाशआनंदोनस्य" दितिश्रुतेः लौकिकानंदश्चनपरमानं-द दुःखसामानाधिकरण्यात्सगुणत्वात् सातिशयत्वात् असार्वदिकत्वात् सर्वत्रब्रह्मानंदो-व्यतिरेकदृष्टांतः तत्रसामानाधिकरण्यंपुत्रान्मेसुखंपशोर्मेदु खमित्याद्यनुभवसिद्धं । सगुण-त्वंचसुखंइतिदानींत्रिविधमित्यादिगीतायांस्फुटं सातिशयत्वासार्वदिकत्वेचवेदेप्यानंदमी-मांसादौ (छांदोग्यअ० ९) "सोहंभगवः शोचामी" त्यादौचप्रसिद्धे अंशांशत्व-येब्रह्मानदस्यैव काण्वानां बृहदारण्यकेषष्ठाध्यायेतृतीयब्राह्मणे (पृ० ८१६) "एषो-स्यपरमआनदएतस्यैवानदस्यान्यानिभूतानिमात्रामुपजीवंति" इतिश्रावणात् । एतदंशेचलु-ष्पदंमनुष्यानंदादीन्निरूप्य "अथयेशतंप्रजापतिलोकआनंदा सएकोब्रह्मलोकआनंदो यश्च-श्रोत्रियोऽवृजिनोकामहतोऽथैषएवपरमआनंदः" इतिब्रह्मानंदस्यैवपरमानदत्वमाम्नातं । तस्यतदंशत्वंचतात्रकाअपिमन्यंते । यथाहपंचदश्यांविषयानंदाख्यपंचदशप्रकरणारंभे विद्या-रण्यस्वामी (श्लो० १ । २) 'अथात्रविषयानंदोब्रह्मानंदांशरूपभाक् ॥ निरूप्यतेद्वार-भूतस्तदंशत्वंश्रुतिर्जगौ ॥ एषोऽस्यपरमानंदोयोऽखंडैकरसात्मकः ॥ अन्यानिभूतान्येतस्यमा-त्रामेवोपभुंजते' इति ॥ शंकराचार्याअपि "अविदितपरमानदोवेत्तिनरोविषयमेवरमणीयं" इत्याहुः । विद्यमानस्यानंदस्यचतिरोभावएव । एवंतिरोहितानंदत्वादेव परमाचार्येण परमा-त्मनआनंदमयत्वंनिर्णीय (अ० १ पा० १ सू० १५ । १६) "नेतरोनुपपत्तेः । भेदव्य-पदेशाच्च" तिसूत्रद्वयेनजीवस्यतत्त्वंप्रतिषिद्धम् । तथा "रसँ ह्येवायंलब्ध्वानंदीभवति । समोदतेमोदनीयं हिलब्ध्वे" त्यादयः साधनोत्तरमानंदाविर्भावबोधिकाः श्रुतयोऽप्येवमेव-संगच्छेरन् । साधनप्रतिपादिकाश्रुता एवंसत्येवसफलप्रयत्नोपदेशिकाभवेयुः । तथा (अ० ३ पा० २ सू० ५) "पराभिध्यानात्तु तिरोहितंततोह्यस्यबंधविपर्ययौ" वितिसूत्रेपरा-भिध्यानात् भगवदिच्छातोजीवेआनंदांशस्यैश्वर्यादेश्चतिरोभावएवबंधविपर्ययहेतुत्वेनो-च्यते । यदिसन्नस्यात्बंधाविरपिनस्यात् ॥ तथादहराधिकरणे (अ० १ पा० ३ सू० १९) "उत्तराचेदाविर्भूतस्वरूपस्तु" इतिसूत्रेअमृतादिशब्दाभिधेयस्याब्रह्मस्वरूपभूतानंदादेरा-विर्भावे जीवस्यसाक्षाद्ब्रह्मभावोबोध्यते । तिरोभावाभावेत्वाविर्भावस्याप्यशक्यवचनतया-सूत्रबाधः दहरविद्यायां जीवसमन्वितत्वप्रसक्तिश्च ॥ तथाउपकोसलविद्यायां "यएषोऽक्षि-णिपुरुषोदृश्यते" इतिश्रूयमाणस्यपुरुषस्यानंदवैशिष्ट्यमेव जीवजडत्वव्यावृत्तिपूर्वकब्रह्म-त्वागमकं (अ० १ पा० २ सू० १५) "सुखविशिष्टाभिधानादेवचे" तिसूत्रेऽभिं-

घीयते एवकारश्चास्यमुख्योपपत्तित्वबोधकः यदिजीवजडयोरप्याविर्हितएवानंदः स्यात्तर्हिप्र
सौत्रोहेतुर्नयुज्येतव्यभिचारात् ॥ नन्वेवंतत्तत्तिरोभावेसत्यस्तिभातिप्रियत्वप्रतीतिः कथमि-
तिचेत्–अस्यसच्चिदानंदरूपब्रह्मसमवायिकत्वादेवेतिजानीहि । स्पष्टंत्वेद (अ० १ पा० १
सू० ३) "तत्तुसमन्वया" दित्याद्यधिकरणेषुभाष्येतत्रजडेतिरोहितावपिचिदानंदौभान-
प्रियत्वेजनयतः दारुणितिरोहितोपिवह्निः तत्प्रविष्टक्रकचादेरतापमिव स्वरूपेणानुभवायो-
ग्यत्वात्तिरोहितत्वं अथचजडेलेशतश्चिदानदयोर्जीवेश्चानंदमात्रायाश्चाविर्भावेऽप्यपरिच्छि-
न्नयोस्तयोरनुपलब्ध्यातिरोभावोवाच्यएव । अतिरोभावेतुजीवेनसर्वदानिरवध्यानंदोनुभूये-
तदुःखंचनानुभूयेत ससृतिश्चनस्यान्नयंचनभवेत्; "आनंदंब्रह्मणोविद्वान्नबिभेतिकुतश्चन"
इतिमहानंदानुभवितुर्भयाभावश्रावणात् । इदानींतनप्रतीतिविषयप्रीतेरेवत्वदुच्यमानरी-
त्यापरमानंदत्वस्वीकारेतुअलंत्वदाचार्यादीनामपिसाधनोपदेशप्रयासैः कृतंचसन्यासादिना
अत प्रीत्यनुभवानुरोधादानंदमात्रायास्सत्त्वमिवदुःखाद्यनुभवानुरोधादपरिच्छिन्नत्तिरो-
भावोऽप्यंगीकर्तव्य. । नचतर्हिजीवेपरमानंदाभावएवास्तु, किंतिरोभावेनेतिवाच्यं; ब्रह्म-
स्वरूपभूतस्यतस्यध्वंसानुपपत्तेः (अ० २ पा० ३ सू० ३१) "पुंस्त्वादिवत्वस्यसतोभिव्यक्ति
योगा" दितिसूत्रविरोधाच्च । अत्रहिसत.पूर्वंविद्यमानस्यैवाभिव्यक्तिः साधनैरनुभवयोग्य-
ताभवतीत्युच्यते, अतोयच्चानुभवयोग्यत्वमित्युक्तलक्षणकावेवाविर्भावतिरोभावौप्रकृतेनि-
र्विचिकित्सौ ॥ तथाजडेजीववज्ज्ञानेच्छाद्यऽदर्शनात् तत्रचित्तिरोभावस्त्वयाप्यूरीकार्यः;
अन्यथातद्विभागासिद्धेः । नचेष्टापत्ति ; 'सत्यज्ञानमनंतंब्रह्मे'त्यादौतत्तद्वैलक्षण्यबोधकस-
त्यादिपदवैयर्थ्यप्रसंगादितिदिक् । एतावता (ब्रह्मस्यापरेज्ञानस्यापितिरस्कृतिर्यदितदाप्रीतिश्च
मानंकथ) मितिसव्याख्यंनिरस्तं । यत्तु (चिदानंदौसतोभिन्नावभिन्नौवे) त्यादितत्रेदंप्रत्य-
नुयुञ्ज्मः–अस्तिभातिप्रियाणातुब्रह्मरूपत्वंस्वीकुर्वाणस्यतवमते अस्तित्वाख्मानप्रियत्वेभिन्ने-
नवा ? आद्ये तयोरसत्त्वापत्त्याऽब्रह्मत्वापत्तिः, तथाचास्तिभातिप्रियंरूपंनामचेत्यर्थपंचकं
आद्यंत्रयंब्रह्मरूपमितिसिद्धांतबाधः नित्यद्वैतापत्त्यास्वमतभंगश्च ॥ स्वाभाविकनित्यविभाग-
विशेषवत्तयानिर्विशेषतालोपश्च अस्तित्वस्यजडदु.खरूपतापत्त्याब्रह्मणोपितथापत्तिरभानाप्रि-
यत्वेचस्यातां ॥ द्वितीयेतुनित्यत्वसत्त्याविरोध', तत्रतत्रशब्दत्रयोपादानवैयर्थ्यंच ॥ अथालौ-
किकेऽर्थेशुष्कतर्कानादरादिन्यायेनस्वमतंसमर्थयेस्तेनैवसमाधिनाअन्मतमपिसाध्ववगच्छ ॥
वस्तुवस्तुसदायेशानामन्योन्यातिरिक्तत्वेपिदीपचक्षूरूपेषुतेजस्त्वमविशिष्टं (अ० ३ पा०
२ सू० २८) "प्रकाशाश्रयवद्वातेजस्त्वा" दितिन्यायात् । अतोनकोऽपिशंकावकाशः ॥
"यजतेददातिजुहोती" त्यादावपिभेदंविनाशब्दत्रयवैयर्थ्यानपायात् । शब्दांतरस्यचभेदक-
त्वंस्पष्टीकृतं जैमिनिनाद्वितीयस्यद्वितीयेपादे (सू० १) "शब्दांतरेकर्मभेदः कृतानु-
बंधित्वा" दित्यधिकरणे ॥ यथासैंधवघनेतदीयरसघनत्वक्षारिमश्वेतिमादय. परस्परविल-
क्षणाअपिबाह्याभ्यंतरेकृत्स्नेसर्वत्रैवावतिष्ठंते धर्मधर्मिणोरभेदाच्चतेलवणाभिन्नाएव । एवं-
सन्मात्रेप्रज्ञानघनआनंदघनेब्रह्मणिपिसदादयः परस्परविलक्षणाअपिसर्वत्रैवसंति । प्रकाशाश्र-
याद्यधिकरणोक्तरीत्याचतेसर्वेब्रह्मैव । ब्रह्मत्वादेवघनकस्याप्यंशस्यासत्वजडत्वादिप्रसक्तिः ।
अथतेषांपरस्परभेदांगीकारादपसिद्धांत शंक्यः । तादृशभेदस्यापि "यदेकमव्यक्तमनंत-

रूपं, एकोनैकः सवःक किं" इत्यादिश्रुतिस्मृत्यनुरोधेनब्रह्मधर्मतयाऽप्रत्यमवश्यंस्वी-कार्यमितितावताशुद्धाद्वैतस्याबाधात् । तत्तदंशवैलक्षण्यस्याभिव्यक्तिस्तु जतुघृतगतद्रव-त्वस्यतेजःसंयोगेनेवतदिच्छाविशेषरूपनिमित्तेनेवेतिविस्तरात्पुरानिरणायि ॥ तेनसृष्टीच्छा-यांतत्तत्कार्याविर्भावायतत्तदंशान्पृथक्करोतीतिद्वितीयस्कंधसुबोधिन्यांस्फुटं ॥ अतस्तत्रतत्र-तत्ततिरोभावातिरोभाववैलक्षण्यंनिरवद्यं ॥ वन्हौसर्वत्रैवानस्थितास्वपिदाहप्रकाशादिश-क्तिषुदाहकत्वमात्रस्यमणिसमवधानेन तिरोधानेपियथातदितरधर्माणांनतिरोभावः। यथावा गंधोभूतसूक्ष्मरूपइतिपौराणमतेनगुणसमुदायोद्रव्यमितिमहाभाष्यादिमतेनच पृथिव्यभि-न्नस्यापिगंधस्यपाषाणादिरूपायांपृथिव्यांतिरोभावेऽपिनतत्रपार्थिवगुणांतरस्यतिरस्कारस्तथा-त्रेतिदिक् । यच्च (जीवजडयोर्ब्रह्मणात्यंताभेदेने) त्यादि—तन्न; 'सदेवसोम्ये'त्यादिश्रुतिभिः पूर्वमत्यंताभेदेपिसर्वशक्तिरीश्वरोव्युच्चारणेनजडादीन्स्वतः पृथक्कृत्य तत्रतत्रतंतमंशंतिरो-भावयतीतिनेश्वरेतत्संबंधः । महाग्निचयात्कांचिदग्न्यंशानपृथक्कृत्यमणिसन्निधापनेनतेषुदा-हशक्तौतिरोभावितायामपीतिनमहाग्निनिष्ठासातिरोधत्ते ॥ अंशमात्रधर्माणामंशिन्यसंबं-धश्चसूत्रकृता (अ० २ पा० ३ सू० ४६) "प्रकाशादिवन्नैवंपर" इत्यादिनासमर्थितः । अतएवचक्षुरिंद्रियाणांसूर्यांशत्वेपिश्रुतिस्मृत्यादिमानसिद्धेऽपितेषुकुत्रचित्काचपरोगादिना—दर्शनयोग्यतातिरोधानेपिनभानौसातिरोधत्ते ॥ अयमेवार्थः कठवल्ल्यादिषु "सूर्योयथा-सर्वलोकस्यचक्षुः" इत्यादिनातद्दृष्टांतपुरःसरंजीवगतनिरानंदत्वादेरंशिन्यसंबंधआम्नायते ॥ स्मृतिषुच—'तत्रयः परमात्माहिसनित्योनिर्गुणःस्मृतः । नलिप्यतेफलैश्चापिपद्मपत्रमिवां-भसा । कर्मात्मात्वपरोयोसौमोक्षबंधैः सयुज्यते । ससप्तदशकेनापिराशिनायुज्यतेपुनः ।' एवमादिषुक्षपरभावोत्तरसंसारसाधारणधर्माणामंशिन्यप्रसक्तिः स्मर्यते । एवमर्थपराः श्रुति-स्मृतयश्च सूत्रकृता (अ० २ पा० ३ सू० ४७) "स्मरंतिचे" तिसूत्रेविषयीकृताः ॥ तस्मादंशांशिभावमनादृत्य विभुंजीवंमन्यमानस्यत्वमते तस्यब्रह्मणात्यंताभेदात्तत्रोपाधि-संबंधेपरस्मिन्नुपाधेरौपाधिकधर्माणांचसंबंधोदुर्निवारः स्यात् । नतुव्युच्चरणमंशत्वंचमन्य-मानस्यममते तत्प्रसंगइत्यलं ॥ जीवस्यानंदतिरोभावादेवभेदइतितुनवदामः । व्युच्चरणो-त्तरमेव तत्रतत्रतत्तदंशतिरोभावांगीकारात् । स्पष्टंचेदमस्माकं निबंधादिषु (प्र० १ श्लो० ३१—३२) 'तदिच्छामात्रतस्तस्माद्ब्रह्मभूतांशचेतना. । सृष्ट्यादौनिर्गताः सर्वेनिराकारास्त-दिच्छया ॥ विस्फुलिंगाइवाग्नेस्तुसदंशेनजडाअपी'त्यादिस्थले ॥ जडादौन्यूनाधिकांशतिरो-धानेव्युच्चरणसाम्यमात्रंतुनप्रतिबंधकं युगपद्व्युच्चरितवस्त्वापिविस्फुलिंगेषुकेषांचिज्जलादि-योगात्तत्क्षणमेव निर्वाणतायाः केषांचिरक्षणमवस्थानस्य केषांचित्तृणकार्पासादियोगेनाधि-क्यस्यच दर्शनेनकार्याग्रिमव्यवस्थायांव्युच्चरणसाम्यस्याप्रयोजकत्वाध्यवसायात् ॥ तिरो-भावेहेतुस्त्वीश्वरेच्छैव । "हंततिरोसानि । पराभिध्यानात्तुतिरोहित" मित्यादिश्रुति-सूत्रैस्तथैवसिद्धेः ॥ यच्छ्रुतिसूत्राण्युल्लंघ्यतात्वयातांप्रतिवक्ष्यते तन्मया निराकरिष्यते ॥ उक्तरीत्यालौकिकालौकिकमानसिद्धतिरोभावस्यहेत्वंतरेणानिष्पादात् तद्धेतु सैववाच्या ॥ नचपराभिध्यानसूत्रीयस्वभाष्यानुरोधेनाविद्यायातिरोधायकत्वंमंतव्य, वास्तवयोर्ब्रह्मा-त्मकज्ञानानंदयोर्मिथ्याभूतयातयातिरोधानायोगात् तथात्वेपरस्यानीश्वरत्वपराभाव्य-

धीयते एवकारश्चास्यमुख्योपपत्तित्वबोधकः यदिजीवजडयोरप्याविर्हितएवानंदः स्यात्तर्हि सौप्तोहेतुर्नयुज्येतव्यभिचारात् ॥ नन्वेवंतत्रात्तिरोभावेसत्यस्तिभातिप्रियत्वप्रतीतिः कथमितिचेत्-अस्यसच्चिदानदरूपब्रह्मसमवायिकत्वादेवेतिजानीहि । स्पष्टंत्वेदं (अ० १ पा० १ सू० ३) "तत्तुसमन्वया" दित्याद्यधिकरणेपुभाष्येतत्रजडेतिरोहितावपिचिदानंदौभानप्रियत्वेजनयतः दारुणितिरोहितोपिवह्निः तत्प्रविष्टकचादेस्तापमिव स्वरूपेणानुभवायोग्यत्वात्तिरोहितत्वं अथचजडेस्तेशतश्चिदानंदयोर्जीवेआनंदमात्रायाश्चाविर्भावेऽप्यपरिच्छिन्नयोस्तयोरनुपलब्ध्यातिरोभावोवाच्यएव । अतिरोभावेतुजीवेनसर्वदानिरवध्यानंदोनुभूयेतदुःखंचनानुभूयेत ससृतिश्चनस्यात्क्रयंचनभवेत्; "आनंदंब्रह्मणोविद्वान्नबिभेतिकुतश्चन" इतिब्रह्मानंदानुभवितुर्भयाभावश्रावणात् । इदानींतनप्रतीतिविषयप्रीतेरेवत्वदुच्यमानरीत्यापरमानंदत्वस्वीकारेतुअलंत्वदाचार्यादीनामपिसाधनोपदेशप्रयासैः कृतंचसन्न्यासादिना अत प्रीत्यनुभवानुरोधादानंदमात्रायास्सत्वमिवदुःखाद्यनुभवानुरोधादपरिच्छिन्नतत्तिरोभावोऽप्यंगीकर्तव्यः । नचतर्हिजीवेपरमानंदाभावएवास्तु, किंतिरोभावेनेतिवाच्यं; ब्रह्मस्वरूपभूतस्यतस्यध्वंसानुपपत्तेः (अ० २ पा० ३ सू० ३१) "पुंस्त्वादिवत्त्वस्यसतोभिव्यक्तियोगा" दितिसूत्रविरोधाच्च । अत्रहिसत पूर्वंविद्यमानस्यैवाभिव्यक्तिः साधनैरनुभवयोग्यताभवतीत्युच्यते, अतोयच्चानुभवयोग्यत्वमित्युक्तलक्षणकावेवाविर्भावतिरोभावौप्रकृतेनिर्विचिकित्सौ ॥ तथाजडेजीववज्ज्ञानेच्छाद्यदर्शनात् तत्रचित्तिरोभावस्त्वयाप्यूरीकार्यः; अन्यथातद्विभागासिद्धेः । नचेष्टापत्ति ; 'सत्यज्ञानमनंतंब्रह्मे'त्यादौतत्तद्वैलक्षण्यबोधकसत्यादिपदवैयर्थ्यप्रसंगादितिदिक् । एतावता (ब्रह्मस्यापरेज्ञानस्यापितिरस्कृतिर्यदितदाप्रीतिश्चआनंदःकथ) मितिसम्भाव्यनिरस्तं । यत्तु (चिदानंदौसतोभिन्नावभिन्नौवे) त्यादितत्रेदंप्रत्युत्तुत्सुत्क्रमः-अस्तिभातिप्रियाणांतुब्रह्मरूपत्वंस्वीकुर्वाणस्यतवमते अस्तित्वभानप्रियत्वेमिथ्यानवा ? आद्ये तयोरसत्वापत्त्याऽब्रह्मत्वापत्तिः, तथाचास्तिभातिप्रियंरूपंनामचेत्यर्थपंचकंआद्यंत्रयंब्रह्मरूपमितिसिद्धांतबाधः नित्यद्वैतापत्त्यास्वमतभंगश्च ॥ स्वाभाविकनित्यविभागविशेषवत्तयानिर्विशेषतालोपश्च अस्तित्वस्यजडदुःखरूपतापत्त्याब्रह्मणोपितत्वापत्तिरभानाप्रियत्वेचस्यातां ॥ द्वितीयेतुत्रित्वसत्याविरोधः, तत्रतत्रशब्दत्रयोपादानवैयर्थ्यंच ॥ अथालौकिकेऽर्थेशुष्कतर्कोनादरादित्यायेनस्वमतंसमर्थयेत्तैनैवसमाधिनामन्मतमपिसाध्वसगच्छ ॥ वस्तुतस्तुसदाद्येशानामन्योन्यातिरिक्तत्वेपिदीपचक्षूरूपेषुतेजस्त्वमदिदिष्टं (अ० ३ पा० २ सू० २८) "प्रकाशाश्रयवद्वातेजस्त्वा" दितिन्यायात् । अतोनकोऽपिशंकावकाशः ॥ "यजतेददातिजुहोती" त्यादाविवभेदंविनाशब्दत्रयवैयर्थ्यानपायात् । शब्दांतरस्यचभेदकत्वंस्पष्टीकृतं जैमिनिनाद्वितीयस्यद्वितीयेपादे (सू० १) "शब्दांतरेकर्मभेदः कृतानुबंधित्वा" दित्यधिकरणे ॥ यथासैंधवघनेतदीयरसघनत्वक्षारिमश्वेतिमादयः परस्परविलक्षणाअपिबाह्याभ्यंतरेकृत्स्नेसर्वत्रैवावतिष्ठते धर्मधर्मिणोरभेदाच्चतेलवणाभिन्नाएव । एवंसन्मात्रेप्रज्ञानघनआनंदघनेब्रह्मणिसदादयः परस्परविलक्षणाअपिसर्वत्रैववसति । प्रकाशाश्रयाद्यधिकरणोक्तरीत्याचतेसर्वंब्रह्मैव । ब्रह्मत्वादेवचनकस्याप्यंशस्यासत्वजडत्वादिप्रसक्तिः । अपितेषांपरस्परभेदांगीकारादपसिद्धांत शंक्यः । तादृशभेदस्यापि "यदेकमव्यक्तमनंत-

रूपं, एकोनैकः सव.कःकिं" इत्यादिश्रुतिस्मृत्यनुरोधेनमप्रधर्मतयामपत्वमवदर्पस्वी-कार्यमितितावताशुद्धाद्वैतस्याबाधात् । तत्तदंशवैलक्षण्यस्याभिव्यक्तिस्तु जतुघृतगतद्रव-त्वस्यतेजःसंयोगेनेवतदिच्छाविशेषरूपनिमित्तेनैवेतिविस्तरात्पुरानिरणायि ॥ तेनसृष्टीच्छा-यांतत्तत्कार्याविर्भावायतत्तदंशान्पृथक्करोतीतिद्वितीयस्कंधसुबोधिन्यांस्फुटं ॥ अतस्तत्रतत्र-तत्तत्तिरोभावातिरोभाववैलक्षण्यंनिरवद्यं ॥ यन्द्वीसर्वत्रैवावस्थितास्वपिदाहप्रकाशादिश-क्तिपुदाहकत्वमात्रस्यमणिसमवधानेन तिरोधानेपियथातदितरधर्माणांनतिरोभावः। यथावा गंधोभूतसूक्ष्मरूपइतिपौराणमतेनगुणसमुदायोद्रव्यमितिमहाभाष्यादिमतेनच पृथिव्यभि-न्नस्यापिगंधस्यपाषाणादिरूपायांपृथिव्यांतिरोभावेऽपिनतत्रपार्थिवगुणांतरस्यतिरस्कारस्तथा-त्रेतिदिक् । यच्च (जीवजडयोर्ब्रह्मणात्यंताभेदेने) त्यादि—तन्न; 'सदेवसोम्ये'त्यादिश्रुतिभिः पूर्वमत्यंताभेदेपिसर्वशक्तिरीश्वरोव्युच्चारणेनजडादीन्स्वतः पृथक्कृत्य तत्रतत्रतंतमंशंतिरो-भावयतीतिनेश्वरेतरसबंधः । महाग्निचयात्कांश्चिदंशानपृथक्कृत्यमणिसन्निधापनेनतेपुदा-हकत्वौतिरोभावितायामपीतिनमहाग्निनिष्ठांसातिरोधत्ते ॥ अंशमात्रधर्माणामंशिन्यसंबं-धश्चसूत्रकृता (अ० २ पा० ३ सू० ४६) "प्रकाशादिवन्नैवंपर" इत्यादिनासमर्थितः । अतएवचक्षुरिंद्रियाणांसूर्यांशत्वेबहुश्रुतिस्मृत्यादिमानसिद्धेऽपितेपुकुत्रचित्काचपरोगादिना—दर्शनयोग्यतातिरोधानेपिनभानौसातिरोधत्ते ॥ अयमेवार्थः कठवल्ल्यादिपु "सूर्योयथा-सर्वलोकस्यचक्षुः" इत्यादिनातद्दृष्टांतपुरःसरंजीवगतनिरानंदत्वादेरंशिन्यसबंधआम्नायते ॥ स्मृतिपुच—'तत्रयः परमात्माहिसनित्योनिर्गुण स्मृतः । नलिप्यतेफलैश्चापिपद्मपत्रमिवां-भसा । कर्मात्मात्वपरोयोसौमोक्षबंधै. सयुज्यते । ससप्तदशकेनापिराशिनायुज्यतेपुनः ।' एवमादिपुअपरभावोत्तरमंशासाधारणधर्माणामंशिन्यप्रसक्तिः.स्मर्यते । एवमर्थपराः श्रुति-स्मृतयश्च सूत्रकृता (अ० २ पा० ३ सू० ४७) "स्मरंतिचे" तिसूत्रेविषयीकृताः ॥ तस्मादंशांशिभावमनादृत्य विभुंजीवंमन्यमानस्यतवमते तस्यब्रह्मणात्यंताभेदात्तत्रोपाधि-संबंधेपरस्मिन्नुपाधेरौपाधिकधर्माणांचसबंधोदुर्निवारः स्यात् । नतुव्युच्चरणमंशत्वंचमन्य-मानस्यममते तत्प्रसगइत्यलं ॥ जीवस्यानंदतिरोभावादेवभेदइतितुनरदामः । व्युच्चरणो-त्तरमेव तत्रतत्रतत्सदंशतिरोभावांगीकारात् । स्पष्टंचेदमस्माकं निबंधादिपु (प्र० १ श्लो० ३१–३२) 'तदिच्छामात्रतस्तस्माद्ब्रह्मभूतांशचेतनाः । सृष्ट्यादौनिर्गताः सर्वेनिराकारास्त-दिच्छया ॥ विस्फुलिंगाइवाग्नेस्तुसदंशेनजडाअपी'त्यादिस्थले ॥ जडादौन्यूनाधिकांशतिरो-धानेव्युच्चरणसाम्यमात्रंतुनप्रतिबंधकं युगपद्व्युच्चरितवस्त्वापिविस्फुलिंगेपुकेषांचिज्जलादि-योगात्तत्क्षणमेव निर्वाणतायाः केषांचित्क्षणमवस्थानस्य केषांचित्तृणकार्पासादियोगेनाधि-क्यस्यच दर्शनेनकार्योत्पिमव्यवस्थायांव्युच्चरणसाम्यस्याप्रयोजकत्वाध्यवसायात् ॥ तिरो-भावेहेतुस्त्वीश्वरेच्छैव । "हंततिरोसानि । पराभिध्यानात्तुतिरोहित" मित्यादिश्रुति-सूत्रैस्तथैवसिद्धेः ॥ यच्चश्रुतिसूत्राण्युल्लंघयतात्वयातांप्रतिवक्ष्यते तन्मया निराकरिष्यते ॥ उक्तरीत्यालौकिकालौकिकमानसिद्धतिरोभावस्यहेत्वंतरेणानिष्पादात् तद्धेतु सैववाच्या ॥ नचपराभिध्यानसूत्रीयस्वभाष्यानुरोधेनाविद्यायातिरोधायकत्वंमतव्यं; वास्तवयोर्भेक्षा-त्मकज्ञानानंदयोर्मिथ्याभूतयातयातिरोधानायोगात् तयात्वेपरस्यानीश्वरत्वपराभाव्य-

त्वादिप्रसङ्गाच्च ॥ किंच यानिष्कारणस्वसामर्थ्येन नित्यज्ञानादिकंतिरोभाव्यब्रह्मणाजीवत्व-मापादयेत् सातज्ज्ञानमात्रेणैवकथनश्येत ? । निखिलसृष्ट्युपमर्दीसृष्टेर्ब्रह्मोनहिसृष्ट्यज्ञानमात्रे-णाभिमन्तुंशक्यः । तथाचसति अनिर्मोक्षप्रसङ्गः "तमेवविदित्वातिमृत्युमेति । तमेव-विद्वानमृतइहभवति" त्यादिश्रुतिविरोधश्च ॥ किंचोपधित्यागेचैतन्यात्यताभेदस्यत्वदभि-मतत्वात्त्वदुक्तदोषास्त्वन्मतएवप्रसरति ॥ तत्रापिजीवविभुत्वनिर्वाहायकृत्स्नस्यब्रह्मणोवि-द्ययाज्ञानादितिरोभावितमितिवक्तव्यं तथाचसतिशुद्धब्रह्माभावप्रसक्तिः । ब्रह्मैकदेशतया तस्यतिरोधानाङ्गीकारेतुब्रह्मणः सांशत्वापत्तिर्जीवमध्यमपरिमाणत्वादापत्तिश्च ॥ (यस्तर्के-णानुसंधत्ते सधर्मं वेदनेतरः) इति तदज्ञानात् (अ० १२ श्लोक १०५–१०६) "प्रत्यक्षं चानुमानंचशास्त्रंचविविधागमम् ॥ त्रयंसुविदितंकार्यंधर्मशुद्धिमभीप्सता ॥ आर्षंधर्मोपदेशं चवेदशास्त्राविरोधिना । यस्तर्केणानुसंधत्तेसधर्मं वेदनेतरः" इत्यादिवचनानुसारेणश्रौतेर्थे श्रुत्यनुकूलतर्कस्यास्माभिरादियमाणत्वात् ॥ श्रुतौअंशांशिभावानादरोक्तिस्तूदाहृतचर-मे ऽप्युपनिषद्वाक्यदर्शनात् ॥ किंचविस्फुलिङ्गश्रुतावप्यग्निविस्फुलिङ्गदृष्टान्तदार्ष्टान्तिकेंशां-शिभावः समर्प्यते । अतएवांशोनानेत्यादिसूत्रव्याख्यानेऽस्माभ्येपिसएवश्रौतदृष्टान्तउपन्य-स्यते । यद्येतद्दृष्टान्तेनअंशांशिभावोनसिध्येत्तर्हितादृशस्थलेभाष्येतदुपन्यासोऽसङ्गतः स्यात् ॥ अथ (ब्रह्ममात्रतएवव्युच्चारण) मिनीतरव्यवच्छेदकमात्रपदंतुप्रियनः । षडनादित्वसिद्धा-न्तस्सदेवेत्यादिश्रुतिशतबाधितत्वेनकेवलब्रह्मणः सकाशादेवव्युच्चरणस्वीकारात् ॥ यैस्तु ब्रह्मणोऽनिर्विशेषत्वात्कर्तृत्वादिविशेषसमर्पकोपाधिसंबंधेन तस्यव्युच्चरणाधिष्ठत्वमुच्येत तेषामियंयुक्तिः स्वपादेकुठारप्रहारः ॥ तिरोभावेऽप्यस्तित्वादिप्रत्ययस्तुसमर्थितः । तत्र ब्रह्मधर्माणां तिरोभावोनामलौकिकानुभवायोग्यत्वमेव, नतुतत्तत्कार्यावच्छेदेनसर्वब्रह्म धर्मानन्वयस्ततस्तोयसर्वत्र । अतोब्रह्मणः सर्वत्र सर्वदैकविधत्वाच्चैकरसत्वव्याघातः ॥ त्वदभिमतवस्तुस्थितिश्चदूषितैव ॥ एतेनकिंचजीवजडयोरित्यादि स्थितिस्तूक्तेस्यत-परि-हृतवेदितव्यं ॥ एतावतायन्निष्कर्षेसिद्धं ॥ लक्षिन्मात्रश्चिरप्रधानोब्रह्मस्यांशोहृदिस्थितः । विसर्पिचैतन्यगुणोऽणुर्जीवः श्रुतितः स्मृतेः ॥ ॥ इति सप्तमश्लोकखंडनम् ॥

यत्तु (जीवस्यपरसमतमंशत्वनिराकृत्यस्वसंमतपथाननिष्कट-कचिकीर्षुः "यथाह्ययंज्योतिरात्माविवस्वानपोभिन्नायद्धैकोऽनु-गच्छन् । उपाधिनानियतेभेदरूपोदेवः क्षेत्रेष्वेवमजोऽयमात्मा ॥ रूपं-रूपंप्रतिरूपोवभूवएकधाबहुधाचैवदृश्यतेजलचन्द्रवत्" दित्यादिश्रुति समन 'आभासएवच अतएवचोपमासूर्यकादिवत्" दित्यादिसूत्र-समनचजीवस्यब्रह्मप्रतिबिंबत्वमाहे) त्यादिनास्वमतव्यवस्थापनकृतं तदपिनकिंचित् मायायाअभ्रवद्विस्तमस्तुल्यत्वाङ्गीकारेणतमसिप्रति-बिंबादर्शनेनमायायां प्रतिबिंबाङ्गीकारेमायाचेयंतमोरूपातापनीयेत-दीरणादितिकथनंविरुध्येत । नचमायायास्तमोरूपत्वमावरणत्वरूप-साधर्म्येणतच्चमायायामस्त्येवस्वच्छत्वस्याधिकस्यस्वीकारेपिनतावता-

सादृश्यहानिरन्यथामुखेपिचंद्रतुल्यत्वंनस्यात् । तत्रापिपार्थिवत्वस्यचंद्रावृत्तिधर्मस्यसत्वादितिवाच्यं; मायायाःस्वच्छत्वेब्रह्मावरकत्वानुपपत्तेः । नहिदर्पणादिस्वच्छद्रव्यंकस्याप्यावरकंभवति । नचरजतादिपात्रस्यावरकस्यापिप्रतिबिंबग्राहित्वं दृष्टमितिवाच्यं; रजतादिकंयस्यावरकंतस्यैवप्रतिबिंबंगृह्णातीत्यत्रमानाभावादन्यथातन्मध्यस्थितस्यापिप्रत्यक्षत्वापत्तिःकिंचप्रतिबिंबग्राहकत्वंसावयवपदार्थएवदृष्टंतथाचमायायांसावयवत्वाभावेनतत्रप्रतिबिंबग्राहकत्वंनसंभवतिप्रतिबिंबग्राहकत्वस्यसावयवत्वव्याप्यत्वेनव्यापकाभावस्यव्याप्याभावव्याप्यत्वात्तेनतस्यानुमितिसंभवात् । एवंरूपाभावेनापिप्रतिबिंबाभावानुमानंबोध्यं । एवंरूपिद्रव्यस्यसावयवस्यपरिच्छिन्नस्यैवप्रतिबिंबदर्शनेनात्मनोनीरूपस्यनिरवयवस्यापरिच्छिन्नस्यप्रतिबिंबंनसंभवतीत्यपिबोध्यं । यत्तुमायायाःसत्त्वरजस्तमोरूपगुणत्रयात्मकतया'सत्वात्संजायतेज्ञान'मितिभगवद्वाक्यात्सत्वस्यस्वच्छत्वेनमायायाःस्वच्छत्वमित्युक्तंतत्तुच्छं; तादृशवाक्यात्सत्वस्यज्ञानजनकतयाऽप्रकाशस्यप्रकाशेउपादानत्वासंभवेनप्रकाशत्वस्वीकारेपिज्ञानादिप्रकाशस्यप्रतिबिंबग्राहकत्वादर्शनेनप्रतिबिंबाधारत्वोपयोगिस्वच्छतायाःकल्पयितुमशक्यत्वात्सजलकज्जललिप्तपात्रेदीपप्रतिबिंबंजलएवेतिनतस्यदृष्टांतत्वसंभवःआकाशेप्रतिबिंबाभावेनतत्रप्रतिबिंबरूपफलेनस्वच्छत्वानुमानेस्वरूपासिद्धिःस्यात् । नचशब्दप्रतिबिंबंप्रतिध्वनिरूपंआकाशेदृश्यतएवेतिकथंस्वरूपासिद्धिरितिवाच्यं; भवन्मतेप्रतिध्वनेराकाशगुणत्वेनांगीकृतस्यशब्दप्रतिबिंबरूपत्वस्वीकारेऽपसिद्धांतापत्तेः 'प्रतिध्वनिर्बिंबच्छब्दोबायौवीसीतिशब्दन'मितिविद्यारण्योक्तिविरोधश्च ॥ नचैवमपिमायायास्त्रिगुणात्मकत्वेनसावयवत्वस्वीकारेणसावयवत्वाभावेनप्रतिबिंबग्राहकत्वाभावसाधनेस्वरूपासिद्धिरितिवाच्यं; मायायाःसावयवत्वस्वीकारेसावयवत्वस्यावयवसमवेतत्वरूपस्यावयवजन्यत्वरूपस्यैववक्तव्यतयातस्यचजन्यत्वव्याप्यत्वेनमायायाऽपिजन्यत्वापत्तिः तथाचानादित्वाभावेनापसिद्धांतःस्यात् ॥ संसारस्यापिसादित्वंस्यादितिवृद्धिमिच्छतोमूलमपिनष्टमितिमहत्कौतुकंगगनेप्रतिबिंबाभावस्यपूर्वमेवसाधितत्वेनतमादायव्यभिचारप्रदर्शनंतेनैवनिरस्तं । अतएवसावयवत्वपरिच्छिन्नत्वयोर्गगनेस्वीकारोपिनव्यभिचारः; मायायाः सावयवत्वेपरिच्छिन्नत्वेचतयोर्जन्यत्वाऽविनाभूतयोर्जन्यत्वानुमापकतयाऽनादित्वहानिरि-

तिस्वरूपासिद्धिंप्रदर्शयतोऽपसिद्धांतः । नन्वित्यादिनाप्रदर्शितेशंका-
समाधानेत्वसदसंमतेस्वकपोलकल्पितेचेत्युपेक्षिते ॥ स्वच्छत्वस्य-
प्रतिबिंबग्राहकत्वप्रयोजकत्वेप्रभादिगतस्वच्छत्वात्पृथिवीजलगतस्या-
न्यूनातिप्रसक्तस्यतस्यदुर्वचनतयाप्रभायामपिप्रतिबिंबापत्तिरात्म-
नोपिज्ञानस्वरूपत्वादज्ञानस्य पूर्वंस्वच्छत्वेनत्वयैवस्वीकृततयातस्मि-
न्नपिप्रतिबिंबंस्यादिति ॥ किंचकिंतत्स्वच्छत्वंयत्प्रतिबिंबग्राहकत्वे-
हेतुतयास्वीक्रियतेकिंजातिविशेषोवा, उपाधिर्वा? नाद्यः, संकर-
प्रसंगात् ॥ सचजातिविशिष्टत्वंजातिविशिष्टत्वंच समानाधिकरण-
त्वस्वाभावसामानाधिकरण्यस्ववृत्तित्वैतत्त्रितयसंबंधेन स्ववृत्तित्वं-
स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वसंबंधेनबोध्यं ।तथाच-
स्वच्छत्वस्यपृथिवीत्वसामानाधिकरण्यदर्पणाद्यवच्छेदेन पृथिवीत्वा-
भावसामानाधिकरण्यंचजलाद्यवच्छेदेनपृथिवीत्वाधिकरणघटादि-
निष्ठाभेदप्रतियोगितावच्छेदकत्वाच्चत्रितयसंबंधेनस्वच्छत्वेपृथिवी-
त्वस्यविद्यमानत्वात् ॥ अत्रद्रव्यत्वस्यापिस्वसामानाधिकरण्यस्वा-
भावसामानाधिकरण्योभयसंबंधेन पृथिवीत्वादिजातिविशिष्टत्वा-
त्तत्रापिजातित्वंनस्यादतःस्ववृत्तित्वनिवेशः ॥ पृथिवीत्वादीनामपि-
द्रव्यत्वसामानाधिकरण्यस्ववृत्तित्वोभयसंबंधेनद्रव्यत्वविशिष्टत्वा-
त्तद्वारणायस्वाभावसामानाधिकरण्यनिवेशः जलत्वस्यापिपृथिवीत्वा-
भाववद्वृत्तित्वतद्भिन्नभेदप्रतियोगितावच्छेदकत्वसंबंधावच्छिन्न-
स्ववृत्तित्वोभयसंबंधेनपृथिवीत्वविशिष्टत्वात्तद्वारणायस्वसमाना-
धिकरण्यनिवेशः ।तथाचस्वच्छत्वंनजातिः, नाप्युपाधिः, तस्यप्रति-
बिंबग्राहकत्वरूपत्वेचआत्माश्रयप्रसंगात् । नचप्रकाशकत्वंतदिति-
वाच्यं, जलादौप्रतिबिंबाभावप्रसंगात् तस्मात्स्वच्छत्वस्यनिर्वक्तुम-
शक्यत्वान्नतेनरूपेणप्रतिबिंबहेतुत्वसंभवः । नापि"आभासएवच
अतएवचोपमासूर्यकादिव" दितिसूत्रानुसारेणमायायांप्रतिबिंबोजी-
वइतिसंभवतितत्राप्यादृशार्थाप्रतीतेः ॥ तथाहि ननुसच्चिदानंदस्य
ब्रह्मणः सच्चिदानंदरूपत्वात् संभवतीतिकथतस्यप्रतिबिंबेशआनंदांश-
तिरोभावश्चेत्यतआह आभासएवचेतिआभासएवजीवः व्यापकत्व-
निरतिशयानंदादिरूपभगवद्धर्माभावात् यथाऽनाचारिब्राह्मणोब्रा-
ह्मणाभासः सूत्रधारकत्वेऽपिब्राह्मण्याख्यदेवतायास्तत्रतिरोभावात् ॥
ननु "एकएवहिभूतात्माभूतेभूतेव्यवस्थितः । एकधाबहुधाचैवदृश्य-
तेजलचंद्रवदि" तिश्रुत्यनुसारेणप्रतिबिंबमेवजीवइतिचेन्न, तादृश्य-

श्रुतेर्यथा चंद्रस्यांशुद्वारा जलप्रवेशेन नानात्वं तथा ब्रह्मणोप्यंशद्वारा तत्तदेहहृदयप्रवेशेन नानात्वमित्यर्थकत्वेन प्रतिबिंबमायासाधकत्वात् ॥ तत्र मुक्तियोग्यत्वाय ब्रह्मरूपतोच्यते; अहं ब्रह्मेत्युपासनायाः प्रकृतत्वात् ॥ बुद्ध्युपाधिको जीवभाव इति तु सर्वथैव न संभवति; मुक्तानामपि बुद्धिसंयोगसत्वेन जीवभावापत्तेः । न च मुक्त्यवस्थायां बुद्धेर्नष्टत्वात्कथं तत्संयोग इति वाच्यं; ब्रह्मणो बुद्धौ प्रतिबिंब एव जीवभावः, स चैकबुद्धिनाशेपि द्वितीयबुद्धौ पुनरपि स्यादेव । न च स द्वितीय एवेति वाच्यं; ब्रह्मण एकत्वे प्रतिबिंबस्य बिंबरूपत्वेन द्वितीयत्वायोगात् ॥ प्रतिबिंबस्योपाधिपक्षपातित्वेनोपाधिभेदेन भेदांगीकारेपि पुनस्तु एवेनांशेन मोक्षापत्तिः । न च तत्रोपाधेर्लय एव न विनाश इति वाच्यं; कार्यस्य कारणावस्थापत्तस्यापि यदि नाशो न स्वीक्रियते चेत्तदा घटस्य मुद्गरादिना चूर्णीकृतस्यापि लय एव स्यान्न नाशः; इष्टापत्तिरिति चेत्-मुक्तानामपि बुद्धेर्नाशो न स्यात्; तत्रापि लयस्यैव कुंठत्वात् । तथा च तेषां पुनरुत्पत्तिर्दुर्वारैवेति बोध्यं ॥ "अत एव चोपमा सूर्यकादिवत्" इति सूत्रमपि न जीवः प्रतिबिंबरूप इति प्रतिपादयति; किंतु जडजीवधर्मो ब्रह्मणि उपचारादुच्यंते न वस्तुतः; तत्र दृष्टांतप्रदर्शनपरं ॥ "न स्थानतोपी" ति सूत्रे तद्विचारस्यैव प्रकृतत्वात् ॥ सूत्रार्थस्तु यतो ब्रह्मणि प्रापंचिकधर्मा उपचारादुच्यंते अत एव "समः प्लुषिणा समो नागेन समो मशकेन समस्त्रिभिर्लोकैः समोऽनेन सर्वेणे" ति वेदोक्ता उपमापि उपचारादेव तत्तद्धर्मसंबंधात्; अन्यथा "न तत्समश्चाभ्यधिकश्च दृश्यते" इत्यादिना उपमानोपमेयभावराहित्येन प्रतिपादिते पुनरुपमानोपमेयत्वेन प्रतिपादनं विरुद्धं स्यात् तत्र दृष्टांतः सूर्यकादिवत् सूर्येण सहितं जलं सूर्यकं यथा किरणद्वारा जलादिसंश्लिष्टस्य सूर्यादेर्ब्रह्मोपमानत्वं "यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोनुगच्छन् । उपाधिना क्रियते भेदरूप" इति यथैतत्संश्लिष्टस्योपमानत्वं एवं "समः प्लुषिणे" त्यत्रापि तत्तत्संश्लिष्टस्योपमेयत्वमपीति न तत्सूत्रं जीवस्य प्रतिबिंबरूपतां प्रतिपादयति ॥ प्रतिध्वनेराकाशगुणत्वस्याद्वैतसिद्धांतविद्भिः स्वीकारेण तदनभिज्ञस्य स्वमतमेव खंडयतः आकाशे शब्दप्रतिबिंबदर्शनेनेत्यादिकः प्रलापः प्रकृतानुपयुक्तत्वादुपेक्षितः ॥

सहस्राक्षे जीवस्य प्रतिबिंबत्वसाधकं मायायां प्रतिबिंबते चितिरिति तदीयाष्टमश्लोकं एवं जीवस्य परसंमतमित्यादिना इह प्रतीयत इति दिगित्यंतेन व्याख्यानेन सहितं

यत्तुजीवस्येत्यादिना तत्पक्षाणामप्रतिपादनान्नक्रियतइत्यतेन निराकरिष्यत प्रथम एवं-जीवस्येत्यादि दर्शनेनव्यभिचारित्वाच्चेत्यत भागमुत्तरयति-यत्त्वित्यादिनाप्रकृतानुपयुक्तत्वादुपेक्षितइत्यतेन ॥ परोपन्यस्तश्रुतीनामर्थंतुतदुदाहृतसूत्रद्वयस्य सिद्धान्तभाष्याद्यनुवादद्वाराऽग्रेवक्ष्यति ॥ अत पूर्वंप्रतिबिंबत्वाभावसाधकानुमितिहेतुसत्सकेदोषभासानुद्धरिष्यंतोयुक्तयैवाहु -तदपिनकिंचिदित्यादि ॥ मायाचेयमिति । इदपञ्चदशप्रकरण्याचित्रदीपाख्येषष्ठप्रकरणे (श्लोक १२५) "मायाचेयतमोरूपातापनीयेतदीरणात् । अनुभूतितत्रमानप्रतिजज्ञेश्रुति स्वय"इतिपद्यमस्ति । तापनीयेत्तदीरणतु प्रागुक्तेनृसिंहोत्तरतापनीयनवमखडे "मायाचतमोरूपानुभूते"रितिकथन । एतेनतत्रप्रतिबिंबादरे एतच्छ्रुतिव्याकोपोऽपिध्वनित । सावयवत्वव्याप्यत्वेनेति । यद्यत्प्रतिबिंबग्राहकतत्तत्सावयव यथा-जलदर्पणादिक यत्रयत्रसावयवत्वाभाव तत्रतत्रप्रतिबिंबग्राहकत्वस्याप्यभाव एव यथा-काशकालदिगादिषु अतोव्यापकस्यसावयवत्वस्यभाव व्याप्यस्यतद्ग्राहकत्वस्यभावेन-

---

मायाया प्रतिबिम्बते चितिरसौ स्वच्छा हि सत्त्वेन सा
गाम्भीर्यस्य जले रवस्य गगने भानात्सम शब्दयो ॥
छाया तत्र परैस्तिरस्कृतिवशात्पङ्क्तीकृतौ चाम्बरे
रूप नोद्भवतीत्यतो नियमन सामान्यतो बाधितम् ॥ ८ ॥

एव जयस्य परसमतमशल्य निराकृत्य स्वसमत प्रधान निष्कण्टक चिकीर्षु यथाह्यय ज्योतिरात्मविवस्वानपोभिन्नाबहुधैकोनुगच्छन् उपाधिनाक्रियतेभेदरूपोदेव क्षेत्रेष्वेवमजोयमात्माजीवेशावाभासेनकरोतिविद्याचस्त्वमेवभवति छायातपौब्रह्मविद रूपरूपप्रतिरूपोबभूव'एकएवतुभूतात्माभूतेभूतेव्यवस्थित एकधाबहुधाचैवदृश्यतेजलच द्रवदि त्यादिश्रुतिसमतम् । आभासएवच अतएवचोपमासूर्यकादिवदित्यादिसूत्रसमत च जीवस्यब्रह्मप्रतिबिम्बत्वमाह-मायायामिति ॥ अत्र कश्चित्प्रत्यवतिष्ठते ॥ मायात्वेनाभिमता नप्रतिबिम्बभाक् अस्वच्छत्वात् १ दारुवत् ॥ निरवयवत्वात् २ रूपाभावात् ३ रूपवत् ॥ अपरिच्छिन्नत्वात् ४ आत्मवत् आकाशवद्वा ॥ एतेषु प्रतिबिम्बापत्तिरेवविपक्षेबाधकस्तर्क ॥ एवम् आत्मा न प्रतिबिम्बते अनवयवत्वात् ५ अपरिच्छिन्नत्वात् ६ आकाशवत् ॥ अरूपत्वात् ७ तद्वत् वायुवच्च ॥ एतयो प्रतिबिम्बापत्तिरेवविपक्षेबाधकस्तर्क ॥ एवच स्वच्छे सावयवे रूपवति परिच्छिन्नएवोपाधौ सावयवस्य रूपवत परिच्छिन्नस्य प्रतिबिम्बनियमेन तर्कपराहतत्वान्नेमानि वाक्यानि प्रतिबिम्बत्वपराणि किन्त्वशत्वप्रतिपादकवाक्यवदन्यथाव्याख्येयानि इति ॥ तन्न अजामेकां सत्त्वरजस्तमइति प्रकृतेरित्यादिवचनै ग्राह्यया प्रकृते सत्त्वगुणकत्वेन 'माय तुप्रकृति मितिश्रुत्या तस्याएव मायाशब्दवाच्यत्वेन विद्वद्भवदारात्सत्त्वात्सजायतेज्ञानमितीश्वरवाक्याच्च सत्त्वस्य स्वच्छत्वेन आत्मावरकतयाऽस्मदीयैस्तमस्त्वादस्यास्य तत्र स्वीकृत वेपि स्वपृष्ठगतघटावरकरजतादिपात्रप्रतिबिम्बग्रहप्रयोजकस्वच्छताया अप्रत्याख्याने प्रमाणाभावेन सजलकज्जलादिलिप्तपात्रादौ दीपादिप्रतिबिम्बदर्शनात्तदनुगतस्य मायाव्यावृत्तस्य स्वच्छत्वस्य वक्तुमशक्यत्वेनच प्रतिबिम्बग्रह-

व्याप्यः । तेनतस्येति । सावयवत्वाभावेन तद्ग्राहकत्वाभावस्य । अनुमितीति । माया-प्रतिबिंबग्राहकत्वाभाववती सावयवत्वाभावात्, आकाशादिवदित्यनुमितिसंभवादित्यर्थः । रूपाभावेनेति । यथापिवारत्वाकाशादयएवदृष्टांताः । तथाचमाया नप्रतिबिंबभाक् रूपाभावात् वायुवदित्यनुमितिः । अप्रकाशस्येत्यादि । एतेनयन्मिहदीपादेः प्रकाशरूपस्यैवप्रकाशगुणंप्रत्युपादानत्वमपीत्युक्तंभवति ॥ सत्वस्यतादृशत्वंतुसांख्यैर्यांघु "प्रीत्यप्रीतिविषादात्मकाःप्रकाशप्रवृत्तिनियमार्था" इति "सत्वंलघुप्रकाशक" मितिचोक्तमेव । एवंचप्रकाशात्मकत्वेऽपि दीपतत्प्रकाशादेःप्रतिबिंबाधारत्वादर्शनात् सत्वांशस्यापिनतदाधारत्वंसंभवति । जलएवेति । नतुमलिनेपङ्कलाद्यंशे ॥ स्वच्छसत्ववत्यांप्रतिबिंबमितिप्रसङ्गवादेऽपिसत्वांशमात्रे ब्रह्मप्रतिबिंबस्यान्ततुमायायां । अतोरजस्तमोभ्यां घोरमूढवृत्तिषु जीवोपलब्धिरेवनस्यादितिभावः । विद्यारण्योक्तिरिति । पंचदशीद्वितीयप्रकरणस्यतद्विरोधइत्यर्थः । नचैवमित्यादि । त्रिगुणात्मकत्वं सावयवत्वस्वीकारेहेतुः तत्स्वीकारश्चस्वरूपासिद्धौहेतुः । सावयवत्वाभावस्तु साधन एव हेतुरितिविवेकः । मत्यचेति । सावयवत्वस्य । यत्रयत्रसावयवत्वंतत्रतत्रजन्यत्वं यथापृथिव्यादिष्वितिव्याप्तिस्तन्मतसिद्धा । अतएवाजन्यस्यपरमात्मनस्तन्मतेनिरवयवत्वं । जन्यत्वापत्तिरिति । विमतामायाजन्या सावयवत्वाद्घटवदितिप्रयोगः । अपसिद्धांतः स्यादिति । एवस्माकमनादयइतिसिद्धांतभंगः । अस्वीकारेऽपीति । तार्किकादिदर्शनमनुसृत्याऽस्वीकारे । अपिशब्दो गौणताद्योतकः । वस्तुतःसिद्धांतेतुगगनेतयोःस्वीकारएव-

---

रूपफलकल्प्यास्वच्छतायाअदृश्यआकाशादाविव तत्र कल्पने बाधकाभावे नचायोहेतुःस्वरूपासिद्धइत्याह ॥ स्वच्छाहिसत्त्वेनेति ॥ २९ ॥ द्वितीयोपि मायायास्त्रिगुणत्वेन गुणानांसावयवत्वेनचस्वरूपासिद्धोहेतुरित्यपिअनेनैवसूचितम् ॥ सव्यभिचारश्चेत्याह ॥ रवस्यमगनेइति ॥ अतएवतृतीयचतुर्थावपिसव्यभिचारौ ॥ आकाशे सावयवत्वस्योत्पत्तिमत्त्वेन परिच्छिन्नत्वस्यचपादोस्यविश्वाभूतानि अत्यतिष्ठद्दशाङ्गुलम् एकांशेनस्थितोजगत् विकारावर्तिचेत्यादिवाक्यैः स्वीकारे तु उक्तरीत्या सावयवत्वस्यश्रुत्यादिभिरेव परिच्छिन्नत्वस्य च मायायामपि सत्त्वेन स्वरूपासिद्धिरेवद्वितीयचतुर्थयोर्बोद्धव्या ॥ ३० ॥ ननुस्वच्छत्वमात्रस्यैवोपाधौ प्रतिबिम्बग्रहप्रयोजकत्वस्वच्छरूपेऽपि प्रतिबिंम्बः स्यादितिचेत्--न; रूपस्य स्वच्छत्वे प्रमाणाभावात् ॥ अस्वच्छद्रव्यगतरूपस्य स्वच्छत्वाभावेन स्वच्छगतस्य तत्त्वेऽपि स्फाटिकपात्रस्थजलप्रतिबिम्बस्य तादृक्पात्रगतप्रतिबिम्बादपृथक्त्ववद्रूपप्रतिबिम्बस्य द्रव्यप्रतिबिम्बादपृथक्त्वात् ॥ अधाराधेयगतयोः प्रतिबिम्बयोरैकात् ॥ रूपस्य द्रव्यादपृथक्त्वाच्च ॥ एवं गुणान्तरे क्रियादिषुचसमाधेयम् ॥ अस्वच्छंदत्वादेव वायुकालदिशासु न प्रतिबिम्बाशङ्का ॥ आत्मनि प्रतिबिम्बाभावस्तुप्रभायामिव प्रतिबिम्बग्राहिविजातीयस्वच्छत्वाभावेन बोध्यः ॥ नचास्मन्मते जलशिलोरेव प्रतिबिम्बस्वीकारात्प्रभायां तदतिप्रसक्तेरभावेन तादृग्वैजात्यस्वीकारोव्यर्थइतिवाच्यम् ॥ ईदृशनियमस्वीकारस्य श्रुत्यादिप्रामाण्याकल्पनलाघवेनैव ततोलघुत्वात् आकाशे शब्दप्रतिबिम्बदर्शनेन व्यभिचारित्वाच्च ॥

"अत्यतिष्ठद्दशांगुल" मित्यादिशब्दानुरोधात् । स्पष्टश्चाकाशसावयवत्वादिस्वीकारो-वृद्धिह्रासभाक्सूत्रादौनिबंधेनच (प्र० १ श्लो० २८) 'आकाशवद्व्यापकंही'त्यादि । स्थलेऽत्र "लोकदृष्ट्यादृष्टांत" इतितत्त्वप्रकाशेकथनात्परिच्छिन्नत्वं । जन्यत्वाचेनेति । तन्मतमनुसृत्येदमुक्त–जन्यत्वानुमापकतयेति । विमतामायाजन्यापरिच्छिन्नत्वात्सावयवत्वात् । पटपरात्मानोअन्वयव्यतिरेकदृष्टांतौ इतिज्ञेयं, प्रभागतेत्यादि । प्रभायामपिस्वच्छत्वस्यप्रत्यक्षसिद्धत्वात्केवलभूमिजलयोरेवस्वच्छत्वमितिवक्तुमशक्यमितिभावः । ज्ञानस्वरूपत्वादिति । "सत्यंज्ञानमनंतंब्रह्म । भारूप सत्यसंकल्प." इत्यादितैत्तिरीयछांदोग्यादिश्रुतिभ्य.'ज्ञानंज्ञेयंज्ञानगम्य'मित्यादिस्मृतिभ्यश्चतथात्वात् । एवंचस्वच्छत्वेविजातीयत्वकल्पनंनिर्मूलं, किंचात्मनिताहशस्वच्छत्वस्यात्यंताभावे मायायामेवनियमेनतत्सत्वेच मायोपादानकेषु सर्वेष्वेवावश्यंतदनुवर्तेत; त्रिगुणात्मकत्ववत् ॥ तथाचसर्वत्रैवप्रतिबिंबप्रतीतिरशक्यवारणेतिमायिकतयाभिमतेषुवायुकालदिगादिषु तद्वारणप्रयासोव्यर्थः ॥ नाद्य इति । संकरस्यजातिबाधकत्वेनतत्प्रसंगेसति । जातिविशेषदर्शनशक्यंवक्तुमितिभावः ।

जातिबाधकसंग्रहंवृद्धाहरंतितार्किकाः–'व्यक्तेरभेदस्तुल्यत्वं संकरोऽथानवस्थितिः । रूपहानिरसंबंधो जातिबाधकसंग्रह'इति ॥ प्रकृतेसंकरस्फुटंदर्शयितुंतल्लक्षणपुरःसरमाहुः–सर्वेत्यादिना । संकरश्चेत्यर्थः । एतत्त्रितयसंबंधेनेति । स्वसामानाधिकरण्यं स्वाभावसामानाधिकरण्यं स्ववृत्तित्वंचेतिसंबंधत्रयरूपोय.संबंधविशेषस्तेनजातिविशिष्टत्वं संकरइति योजना ॥ अत्रसर्वत्रस्वंजातिरेव । इहविवक्षितंस्ववृत्तित्वं स्पष्टयंति–स्वसमानाधिकरणेनेति । यथाशरीरत्वंनजाति. उक्तत्रितयरूपसंबंधेन पृथ्वीत्वजलत्वादिजातिवैशिष्ट्यात् । तथाहि अस्मदादिशरीरेषुपृथिवीत्वजातिसामानाधिकरण्येनशरीरत्वस्य तद्वैशिष्ट्यं । नैयायिकरीत्यावरुणलोकस्थजलीयशरीरेषु पृथिवीत्वाभावसामानाधिकरण्येनतत्सत्वद्वैशिष्ट्यं । घटादिषुपृथिवीत्वसमानाधिकरणो जलीयादिशरीरनिरूपितोयोभेदस्तत्प्रतियोगितावच्छेदकत्वसंबंधेनपृथिवीत्ववृत्तित्वंच शरीरत्वेऽस्त्येवेतिप्रकृतसांकर्यांनजातित्वं ॥

एवंस्वच्छत्वेपिसमर्थयंति–तथाचेत्यादिना । विद्यमानत्वादिति । अयंसंकरप्रसंगादिति-पूर्वोक्तहेतौहेतुं । ननुत्रितयान्यतमसंबंधमात्रेणोभयरूपसंबंधमात्रेणवा जातिवैशिष्ट्यमस्तु, किंत्रितयरूपेण ? तेनेति चेत्स्वसामानाधिकरण्येनव्यापकजातिवैशिष्ट्यं व्याप्यजातिना । स्वाभावसामानाधिकरण्येन तद्वैशिष्ट्यमधिकरणजातीनां नियतव्यधिकरणजातिसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वंचवास्तमस्त्येवेत्यन्यतमसात्रोपादाने प्रामेयजातिमात्रोच्छेदप्रसंगादिदूषणंसुगममेवेति तदनुक्त्वोभयमात्रप्रसंगेदोषमाहु –अतद्रव्यत्वस्येत्यादिना । द्रव्यत्वं हिपृथिव्यापृथिवीत्वसामानाधिकरण्येनजलादिषुतदभावसामानाधिकरण्येनचवर्ततएव । पृथिवीत्वसमानाधिकरणभेदप्रतियोगितावच्छेदकंतुतन्नभवति, पृथिव्यांद्रव्यप्रतियोगिकभेदस्यासत्त्वादितिभावः ॥ पृथिवीत्वादीनामित्यादि । पृथिवीत्वंहिपृथिव्यांद्रव्यसमानाधिकरणंद्रव्यत्वव्यधिकरणजलादिनिष्ठभेदप्रतियोगितावच्छेदकंचास्त्येव । द्रव्यत्वाभावसामानाधिकरण्यंतुनैवभवितुमर्हतीतिभावः । एवंजलत्वादिष्वपियोज्यं । जलत्वस्येत्यादि । जलत्वंहिपृथिवीत्वाभावाधिकरणजलवृत्तिर्भवति । पृथिवीत्ववद्विशेषोक्त-

प्रतियोगिकोयोभेदःसप्रतियोगितावच्छेदकंचभवति । पृथ्वीत्वसमानाधिकरणंगुणत्वसर्वं स्थानमवितुमर्हतीतिभावः । एवंचनियतव्यधिकरणताकपृथ्वीत्वजलत्वादिजातिषु पृथ्वीत्वादिषुव्याप्यजातिषु द्रव्यत्वादिषुव्यापकजातिषुचक्रमेणजातित्वबाधवारणाय स्वसामानाधिकरण्यादित्रितयनिवेशइतिनिगर्वः । आत्माश्रयप्रसंगादितिप्रतिबिंबग्राहकत्वरूपमेव स्वच्छत्वं प्रतिबिंबग्रहेहेतुरित्यात्माश्रय उद्देश्यतावच्छेदकविधेयतावच्छेदकयोरैक्यात्स्फुट एव । प्रकाशकत्वमिति । मण्यादेस्तथादर्शनादितिभावः । प्रतिबिंबाभावप्रसंगादिति । इद्दीपादौ प्रतिबिंबापत्तिप्रसंगादित्यधिकमनुसंधेयं । ननुप्रागुक्तमंत्रतत्तद्विषयश्रुतितश्चप्रतिबिंबत्वंस्यादित्यतआहुः—नापीत्यादि । तत्रप्रथमं (अ० २ पा० ३ सू० ५०) "आभासएवचे" ति सूत्रस्यभाष्यात्तत्प्रकाशाच्चकंचिदंशमेकीकृत्यानुवदंति—ननुसच्चिदानंदस्येत्यादिना । "एकएवहिभूतात्मे" तिश्रुत्यर्थं निर्मलयितुं स्वयंशंकंते—नन्वेकइति । (अ० २ पा० ३ सू० ३०) "यावदात्मभावित्वाच्चनदोष" इतिसूत्रप्रकाशादिभ्यःकंचिदंशमर्थंत आनुपूर्वीतश्च यथोचितमनुवदंति—यथाचंद्रस्येत्यादिना । मुक्तानामित्यादि । अपिशब्दाद्ब्रह्मणोऽपि । तस्यवेशंचविमुक्तास्तवंबुद्धिसंयोगोऽवश्यवाच्यइतिप्रकाशाशयः । उपाधेर्नाशेनेति । छांदोग्याष्टमाध्यायबृहदारण्यकद्वितीयाध्यायाद्यब्राह्मणकौषीतकिब्राह्मणचतुर्थाध्यायादिषुसुषुप्तिकालेजीवस्य सकलतदुपाधीनांचब्रह्मणिप्रवेशस्याम्नानात् "सुषुप्तिकालेसकलेविलीने" इत्यादिश्रुत्यंतराच्चतथेतिभावः । नचबुद्ध्यतिरिक्तोपाधिनामेवतदाप्रवेशादिकंकल्प्यं । तथासति तत्रत्ये आत्मव्युच्चरणवाक्ये बुद्धिव्युच्चरणादात्मव्युच्चरणोपचारइति स्वव्याख्यातार्थव्याघातापातात् । एवमन्यदप्यूह्यं । तादृक्चारस्यैवेति । तृतीयस्यद्वितीयेपादे (सू० ११) "नस्थानतोऽपिपरस्योभयलिंगंसर्वत्रही" तिसूत्रमारभ्यब्रह्मधर्मविचारएवसविशेषनिर्विशेषश्रुतिवाक्यानिविषयीकृत्यप्रक्रांतो नतुजीवस्वरूपविचारस्यतत्रगंधोऽपि । परस्येत्यात्मश्रुत्तेर्दर्शितत्वात्द्वितीयस्यतृतीयेपादेजीवविचारस्यविस्तरेणकृतत्वाच्च । अतोब्रह्मणोधर्मविचारस्यैवात्रप्रकृतत्वमिति । नैतेनजीवस्यप्रतिबिंबताशक्यवचना । (अ० ३ पा० २ सू० १८) अतएवचोपमासूर्यकादिवदितिसूत्रस्यभाष्यात्तत्प्रकाशाच्चकंचिदंशमर्थंत आनुपूर्वीतश्चानुवदंति—सूत्रार्थस्त्वित्यादिना । समःप्लुषिणेति बृहदारण्यकतृतीयाध्यायेतृतीयब्राह्मणे (पृ० १११) "यद्वैवसमःप्लुषिणासमोमशकेनसमोनागेनसमएभिस्त्रिभिर्लोकैःसमोनेनसर्वेण" इतिकण्वैःपठ्यते ॥ माध्यन्दिनानामपि (पृ० १०४९) तुल्यःपाठः ॥ अर्थस्तुप्लुषिणाप्लुत्तिकादेहेनातिसूक्ष्मेणसमःइत्यादिस्तुत्यः ॥ मशकस्ततोऽधिकः नागःसर्पोदीर्घकुंडलाद्यनेकाकारोमध्यमःगजोवातिस्थूलः ततोधिकास्त्रयोलोकाःसर्वंसंपूर्णब्रह्मांडस्थंचराचरंतेनतेनतुल्यः ॥ वस्तुतस्त्वाकाशइवसर्वपरिमाणाश्रयइतिवृद्धिह्रासभाक्त्वीसूत्रेवक्ष्यते—उपचारादेवतत्तद्धर्मसंबंधादिति । उपचारोत्र प्रपंचधर्मसंबंधेहेतुर्नतुपूर्वत्र । नतत्समइति । श्वेताश्वतरवाक्यमिदं उपमानोपमेयत्वेनेति । उपमानैःप्लुष्यादिभिस्तथात्वेन । बालमिति । सौत्रकशब्दस्यार्थोऽयं । 'पुंसिकःकंशिरोंबुनो'रित्यमरोक्तेः । तत्तत्संश्लिष्टस्येति । प्लुष्यादिसर्वसंश्लिष्टस्य । अत्रैतावत्संदर्भाभिप्रायमनुसंधायकिंचिद्ब्रूमः तदीयसप्तमश्लोकस्यखंडन

परिपूर्णांनिक्षेत्राणिदर्शयित्वा जीवेशावाभासेनकरोतिमायाचाविद्याचस्वयमेवभवती"ति ॥ अत्रजीवशब्देनमनुष्यादयःकार्यंजीवाः 'जीवोजीवंविहायमां, जीवोजीवेननिर्मुक्त', अहस्तानिसहस्तानां अपदानिचतुष्पदां ॥ फल्गुनीतत्रमहतांजीवोजीवस्यजीवन मित्यादौप्रसिद्धाः । ईशशब्देनचब्रह्मादय. पृथगीशमानिनोलोके नियामकत्वेनप्रसिद्धाः । तथाचतत्ताऽविनाभूतानि नानाविधक्षेत्राणिप्रदर्श्य आभासेनदेहोहमितिमिथ्याज्ञानेन जीवेशौकरोति, अयंजीवोऽयमीश्वरइतिसंपादयति । करोतेरर्थश्चेदृशप्रायस्त्वयाऽपिवाच्यः; अन्यथाकार्यत्वापत्त्याजीवेश्वरयोः स्वातंत्र्येणानादित्ववादोभज्येत "अजोनित्य" इत्यादीनिचविरुध्येरन् ॥ अग्रेच "सर्वंसर्वमयंसर्वेजीवा सर्वमया सर्वावस्थासुतथाप्यल्पा" इतिवस्तुतोब्रह्मात्मकत्वेनसर्वस्यसर्वात्मकत्वजीवानांप्युश्वरणोत्तरमल्पत्वंचोच्यते । नहीदंप्रतिबिंबपक्षेपूर्वोत्तरंसंगच्छते ॥ अनुपदंचाग्रे "सवाएषभूतानींद्रियाणिविराजंदेवता-कोशांश्चसृष्ट्वाप्रविश्यामूढोमूढइवव्यवहरन्नास्तेमाययैवे" तिपरब्रह्मणएवभूतादिनिर्माणं "अनेनजीवेनात्मनानुप्रविश्ये" तिश्रुत्यंतराज्ञातस्याप्रवेशः लीलयाजीवस्यमोहोव्यवहरणं; अत्रसर्वत्रमायाएवकरणत्वंचश्राव्यतेअतोऽप्युक्तमेवयुक्तं । अग्रेच "तस्माद्द्वयएवायमात्मे" त्यादिनात्मस्वरूपंनिरूप्य "सत्तामात्रंहीदंसर्वंसदेवपुरस्तात्सिद्धं हिब्रह्म" तिजगतोऽप्याविद्यकत्वभ्रमंवारयति । विस्तरस्तु अविरोधाध्यायषष्ठसूत्रभाष्यप्रकाशेउपनिषद्भाष्येचश्रीपुरुषोत्तमचरणैर्निरूपितिनिखिलेयंश्रुतिरितिकिमिहबहुना । यत्तुएतत्स्थूलार्थंविद्वन्मंडनटीकोक्तमनूद्य (तत्रयुक्तंतादृशयोरपितिबिंबत्वेनियममात्रभंगापत्त्याऽतेरहाविवाहश्चेदादावेवचुतोनहीतिन्यायापातात् हिरण्यगर्भादेरीश्वरत्वेमानाभावाच्च ॥ जीवोजीवमित्यस्यत्वयमर्थः-जीव जीवात्माजीवंजीवनकारणं लिंगशरीरविहायमांसपद्यते तथाचयुतोजीवांतरस्यप्राप्तिमिति) रित्यग्रेवक्ष्यते,-तत्तुच्छं; उक्तरीतिकेआस्माकीनानांव्याख्यानेकार्यंजीवेश्वरयोरपिप्रतिबिंबत्वासिध्याराहाविवाहन्यायानवतारात् अत्रकार्यजीवस्याविकृतब्रह्मरूपतोक्ति. सत्वाश्रुतिश्च ॥ इहहि "क्षेत्राणिदर्शयित्वा" इतिपूर्वकालविहितक्त्वाप्रत्ययश्रुत्यामायाप्रयोजककर्तृकंक्षेत्रप्रदर्शनंजीवेशकरणात्प्राक्कालिकंनिश्चीयते । तस्यक साक्षात्कर्तास्यात् ? त्वन्मतेविवर्ततयोक्तानां क्षेत्राणादृष्टत्वस्य विशुद्धचित्यऽसंभवाज्जीवेश्वरयोश्चतदानीमनिष्पादात् । तस्माण्णिजर्थव्यापारेणाक्षिप्यमाणानांक्षेत्रद्रष्टॄणांचिदंशकाणुजीवानापूर्वमेवविद्यमानतायाअर्थापत्तिसिद्धत्वात् कृतिविषयौजीवेशावन्यावेववाच्यौ । अन्यथामायायाकार्यत्वापत्त्यातथानित्यत्वब्रह्माभेदादिबोधकानेकश्रुतिविप्लवः । कार्यत्वेनचतवानादिजीवेश्वरवादोपिभज्येत । एव हिरण्यगर्भादीनांकार्येश्वरत्वेमानं "योब्रह्माणविदधातिपूर्वं ॥ हिरण्यगर्भ समवर्तताग्रे, भूतस्यजात पतिरेकआसीत् ॥ ब्रह्मादेवानांप्रथम सबभूवविश्वस्यकर्ताभुवनस्यगोप्ता ॥ सर्वशरीरीप्रथमः" एवमादिश्रुतिवाक्येपुपरमात्मकार्यत्वस्यअवरनिरूपितेश्वरत्वस्यचश्रवणमनुसंधेयम् ॥ तेषांदेहाद्याभासश्चाष्टमदशमस्कंधादिपु (स्कंध ८ अ० ३ श्लो० ३०) ब्रह्मादयोविविधालिंगभिधाभिमानाः (स्कं० १० अ० १४ श्लो० १०) "अत क्षमस्वाच्युतमेरजोभुवोह्यजानतस्त्वत्पृथगीशमानिन"इतिस्पष्टं । 'जीवोजीव मित्यस्यव्याख्यानंतुजीवशब्दस्यार्थांतरेपिवृत्तिमेवसमर्थयतीतिनास्मत्प्रतिकूलांकिंचप्रहिलतयाजीवेशपदयोस्त्वदभिमतार्थकत्वादरणे-

पिनानेनतयोः प्रतिबिंबत्वंसिद्ध्यति, तृतीयानिर्दिष्टाभासपदार्थस्यजीवेनकरणतयाहेतुतया-
याऽन्वयस्यैवप्रतीत्यातयोराभासतायाऽलाभात् । अभेदेतृतीयादरेतुमूलविवरणावसरेव-
क्ष्यते। तथाप्याभासपदंब्रह्माभासादिवन्मुख्यब्रह्मधर्मतिरोभावाभिप्रायमेवसूत्रैकवाक्यता-
लाभादिति ॥ एकादशस्कंधपंचविंशाध्यायस्थस्य (श्लो० ३५) "संपद्यतेगुणैर्मुक्तोजीवो-
जीवंविहायमाम् ॥ जीवाजीवेननिर्मुक्तोगुणैश्चाशयसंभवैः ॥ मयैवब्रह्मणापूर्णोनबहिर्नांतर-
श्चरे"दितिवाक्यस्याप्यर्थंपुरतोमूलविवरणावसरेव्याख्यास्यामः ॥ अथतदुदाहृतं तृतीय-
वाक्यंकठवल्लीषु तृतीयवल्ल्यारंभे"ऋतंपिबंतौसुकृतस्यलोकेगुहांप्रविष्टौपरमेपरार्द्धे । छाया-
तपौब्रह्मविदोवदंति पंचाग्नयोयेचत्रिनाचिकेता" इतिपठ्यते । तदपिन प्रतिबिंबत्वसाधकं-
भवति; छायाप्रतिबिंबयोर्भेदात् । छायाहिपुरपादेर्यद्दिगवच्छेदेनसूर्यादिर्भवतितत्सम्मुख-
दिश्येवनियमेनभवति । प्रतिबिंबंतुसर्वत्र । साचसर्वत.प्रकाशेसतिनोत्पद्यते यथापरितः-
प्रदीपपंक्तिप्रभासितेसदने । साधारण्येनमलिनेनिर्मलेचाश्रयेश्यामरूपाप्रतीयतेतेजसः-
सान्निध्यविप्रकर्षप्रौढ्यऽप्रौढ्यादिनाह्रस्वदीर्घत्वेचापद्यते । महस्विनोमिहिरादेश्चसानेव-
भवति ॥ प्रतिबिंबंतु परितः प्रकाशेऽपि दृश्यते । निर्मलएवाश्रये बिंबसरूपमेवानुभूयते ।
नाप्युक्तहेतुभ्यो ह्रसतिदैर्घ्यंवाप्नोति । महस्विनोऽपितद्भवति । एवंछायाप्रतिबिंबयोर-
तिरेकादेव श्रीभागवते भगवान् भेदेननिर्दिशति (स्कं० ११ अ० २८ श्लो० ५).
'छायाप्रत्याह्वयाभासा'इति ॥ आभासशब्दसाजात्यात्प्रतिबिंबस्याप्युपलक्षकः । प्रतिबिंबत्वं
साधयितुं आभासएवचेतिसूत्रमाभासपदघटितश्रुतिंचोपन्यस्यताभवताप्याभासशब्दस्यैव-
प्रतिबिंबवाचकत्वंवाच्यं ॥ शब्दांतरादेर्भेदकत्वंतुपूर्वतंत्रे "शब्दांतरे कर्मभेद" इत्याद्य-
धिकरणेषुस्पष्टं ॥ अत प्रतिबिंबत्वसाधनाय छायात्वबोधकवाक्योपन्यासोधाष्ट्यार्त् ॥
किंचछायाहिसूर्यचंद्रादिपाद्यातपादेवभवति, अतः प्रकृतेपुरुषच्छाया तदाश्रयस्थानापन्न-
ब्रह्मजीवाविद्यातिरिक्तआतपस्थानीय कश्चिद्धेतुः स्वीकार्यः; सचाप्रसिद्धः, अपिचातपेपुरुषा-
देरेवछायाभवति; नतुकदाचिदप्यातपस्यातोब्रह्मणएवातपत्वोक्तया तस्यब्रह्मप्रतिबिंबत्व-
मपिमनोरथमात्रं किंच प्रतिबिंबत्वे 'ऋतंपिबंता'वितिपानमपिनोपपद्येत भुंजानपुरुषस्य-
प्रतिबिंबस्यभुंजानवत्प्रतीयमानत्वेपिवस्तुतः पुरुषएवभुंक्तेनतुतत् । तथाचब्रह्मण एवपाना-
दिक्रियावास्तवी नतुजीवस्येति महानेवापसिद्धांतः ॥ तथाद्वितीयपादोक्तो गुहाप्रवेशो-
पिनसंगच्छेत । इहगुहाशब्देनाविद्याति.करणं वावाच्यं, तयोर्जीवकल्पितत्वेन जीवोपजीव्य-
कत्वात्, जीवस्यचतदधिष्ठानकप्रतिबिंबत्वेनतदुपजीव्यकत्वादन्योन्याश्रयेनैकतरस्याप्य-
निष्पत्तेः । तथाजीवस्यछायाप्रतिबिंबान्यतरत्वेप्यलीकत्वाविशेषेणब्रह्मविदांतद्दर्शनायोगा-
द्ब्रह्मविदोवदंतीत्यंशोपिनार्थवत्तामुपेयात ॥ एवंएतद्वाक्यशेषे "आत्मानंरथिनंविद्धि"-
त्यादीना 'यच्छेद्वाङ्मनसीप्राज्ञ' इत्यंतोक्तरथित्ववश्यावश्येंद्रियत्वपरपदप्राप्तिप्रभृतयो-
धर्माः प्रतिबिंबत्वेसतिनोपपद्येरन् ।बिंबेतदभावात्उपाधे सर्वजीवेषुसाधारणत्वाच्च ।
अतोब्रजीवस्यानंदादितिरोभावेनापिहितप्रकाशस्याच्छायात्वमुच्यते ब्रह्मणस्तुतदभावादात-
पत्वं ॥ अथत्वदुक्तंतुर्यंवाक्यमपितत्रैवपंचमवल्ल्यां "अग्निर्यथैकोभुवनंप्रविष्टोरूपंरूपंप्रति-
रूपोबभूव । एकस्तथासर्वभूतांतरात्मारूपंरूपंप्रतिरूपोबहिश्च । वायुर्यथैकोभुवनंप्रविष्ट"

इति पादत्रयंतदेवएवंद्विकृत्वःपठ्यते । तदपिवाक्यार्थस्यपूर्वोक्तत्तरवाक्यानांचविचारेन जीवस्यप्रतिबिंबतासाधकंभवितुमर्हति । इहजीवस्यनाम्नोऽप्यनुच्चरणात् । प्रतिरूपशब्दस्य कथंचित्प्रतिबिंबार्थकत्वांगीकारेपिप्रत्युतब्रह्मणस्तथात्वापत्तेः मूलरूपार्थत्वेत्वत्रप्रतिबिंबवादगंधस्याप्यसिद्धेः । नचात्रवाक्येजीव. प्रतिरूपशब्दार्थइतिशंक्यं; एकस्यसर्वभूतांतरात्मत्वादिव्याकोपात् । "एषतआत्मांतर्याम्यमृतः । अंतस्तद्धर्मोपदेशादंतर्याम्यधिदैवादिष्व" त्यादिश्रुतिसूत्रानुरोधेनवाक्यस्य ब्रह्मपरतायाएवसिद्धेः शंकराचार्यैरपितथैवांगीकारेणत्वयान्यथयितुमशक्यत्वाच्च । तदेवशुक्रतद्ब्रह्मतदेवामृतमुच्यते । तस्मिँल्लोकाःश्रिताः सर्वेतदुनात्येतिकश्चने" तित्यवहितपूर्ववाक्येन "सूर्योयथे" त्यादिभिः "नयत्रसूर्योभाती" त्यंतैरुत्तरवाक्यैरपितथैवनिश्चयाच्च ॥ तथाचायंवाक्यार्थःयथा"एकोप्यग्निःभुवनंलोकंप्रविष्टः सन्रूपंरूपं" दार्वादितत्तदाश्रयवस्तुप्रतिसप्रतिरूपस्तत्तदनुरूपाकारेणनानाविधोभवति वस्तुतस्त्वग्निरेकएव तथापरमात्माएकोपि "तत्सृष्ट्वातदेवानुप्राविश" दितिश्रुत्यास्वरूपतः सृष्टेष्वपिसर्वभूतेषुतत्तत्कार्यनिर्वाहायानुप्रविष्टोनानारूपोभाति मूलरूपेणत्वेकएव । एतदेव (स्कं० १ अ० २ श्लो० ३२) 'यथाह्यवहितोवह्नि'रित्यादिश्रीभागवतादिवचनेषुस्फुटति ॥ यथाचएकोपिवायुर्देहंप्रविष्टःसन् "हृदिप्राणोगुदेपान" इतिनानाभावमापद्यते; तुल्यमन्यत् ॥ यदिश्रुतिः प्रतिबिंबमभिप्रेष्यत् नहितर्हिवायुर्दष्टांतत्वेनावक्ष्यत्; तस्यप्रतिबिंबाभावात् ॥ अतएवत्वदाचार्यैस्तुकठभाष्य "रूपंरूपंप्रतिदाह्यदिदाह्यभेदंप्रतीत्यर्थः प्रतिरूपस्तत्रतत्रप्रतिरूपवान्दाह्यभेदेनबहुविधोबभूवएकएवे" तिव्याख्यायि ॥ एतदपिपरोक्तमभ्युपेत्यब्रूमः । अस्मदीयास्तुरूपंरूपमितिणमुलंतमाश्रित्य रूपयित्वारूपयित्वाप्रतिपुस्तकन्यायेनमूलरूपोबभूवेत्यपिव्याचक्षते एवंसर्वोपाद्यात्वमदेवप्राप्तौ अंशागतदुःखादेःपरस्मिन्संबंधशंकां अव्यवहितोत्तरयासूर्योयथेति ऋचावारयित्वाप्रवेशव्यान्यपिसृष्टिकालएवततोभिन्नंतेवस्तुतस्तुतदभिन्नान्येवेतिबोधयितुंपठ्यते "एकोवशीसर्वभूतांतरात्माएकंरूपंबहुधायःकरोतितमात्मस्थंयेनुपश्यंतिधीरास्तेषांसुखंशाश्वतंनेतरेषा" मिति ॥ एतेनविद्वन्मंडनटीकोक्तमनूद्य (तत्रयुक्तरूढयथास्ववाक्यांतरस्वारस्यस्यभंगापत्तेः मूलरूपत्वोपपादमदुक्तार्थकत्वेऽपिसंभवाच्च) त्यादिवक्ष्यमाणग्रंथोऽपिनिरस्तोवेदितव्यः (स्कं ६ अ० १४ श्लो० ५४) यथात्मसृष्टप्रतिरूपमीदमेइत्यादिव्यवहारात् । सदृशाद्यर्थकप्रतिरूपशब्दस्यलक्षणादिनाप्रतिबिंबार्थकत्वकल्पनापेक्षयायौगिकार्थस्यज्यायस्त्वात् । तदर्थत्वेऽपिवाक्यार्थाभगतेः आचार्यैरनंगीकाराच्च ॥ यत्रयोगरूढःशब्दोरूढिमनादृत्यकेवलयौगिकार्थप्रयुज्येतयथापंकजादिशब्दः क्रीडाद्यभिप्रायेणविशेष्यभूतत्वेनरूढिभंगोदोषः । यस्तुशब्दोयौगिकः तत्रप्रयोगेकामचारः यथासंक्षपोमाल इत्यादिप्रयुज्यते । एवंग्रहणेरूपंरूपमित्यस्यणमुलंतत्वाश्रयणमप्यदुष्टं वाक्यान्तराणितुस्वरसतोव्याख्यातानिमूलरूपताचसर्वोपादानत्वलक्षणैवश्रुतेरभिमताः "एकंरूपंबहुधायः करोती" त्युक्तेः । ननुबिंबत्वस्वरूपा अनभिधानात् । तथासतिप्रतिबिंबगतकंपादेर्बिंबेप्रसंबंधमशंशाशिभावस्टीकरणपूर्वकतच्छंकावारकारिणः "सूर्योयथासर्वलोकस्यचक्षु" रित्यस्य । प्रतिबिंबत्वालोकत्वेनबिंबरूपत्वाभावात्तद्दृष्टयेपिबिंबैक्यानपायाच्च

ति "पूर्वरूपंबहुधे" त्यस । प्रतिबिंबेबिम्बस्थित्यस्ययोगेन 'समात्मस्थ' मित्यस्य साक्षाज्ज्ञानफलस्यचयाथप्रसंगाच्च ॥ ऋक्संहिताकाण्वब्राह्मणादिगतं 'रूपं रूप' मितिवाक्यमपितात्कतुरीयश्लोकखंडनावसरेविवृतंप्राक् । अथ (अ० २ पा० ३ सू० ५०) "आभासएवचेति" सूत्रंविचार्यते-तत्रजडजीवपादेजीवस्य देहादिवद्विरुत्वाभावं चिद्रूपत्वचिद्धर्मत्वे उत्क्रांत्यादिमत्वाणुत्वविसर्पिगुणकत्वानि आनंदाद्यभिव्यक्तौ ब्रह्माभेदव्यपदेशस्यानौपचारिकत्वं; तस्यैवविहितप्रतिषिद्धकर्तृत्वंनतुबुध्यादिरूपोपाधेरिति "नात्माश्रुते"रित्याद्यधिकरणपंचकेनक्रमादुपपाद्य "परात्तु" त्यधिकरणेनभगवदधीनक्रियत्वं समर्थ्य सांख्यनैयायिकादिवत्तस्यनित्यत्वेविभुत्वेचतात्विकाभेदोदुर्घटइतितन्निराकरणाय "अंशोनाने" त्यधिकरणं भगवानारब्धवान् ॥ तत्रसूत्रत्रयेण स्वांशत्वंनिर्धार्यतेनप्राप्तांतद्गतदुःखादे परस्मिन् संबंधशंकासूत्रद्वयेनच्युदस्यभगवदंशस्यकथमनुज्ञापरिहारविषयत्वमित्याशंकाय। चिताग्निहोत्रादिसंबंधात्तस्यताविति सूत्रद्वयेनसाधयित्वाभगवदंशस्यप्रथमतएवकथंदुःखपापादिप्रवाहेप्रवेशइत्याशंकायामुच्यते-"आभासएवचे" ति । यथाऽनाचारिब्राह्मण सूत्रधारणादिसाम्येऽपिब्राह्मणाभासएवब्राह्मण्यदेवतायास्तत्रतिरोहितत्वात्तद्विरुद्धमद्यादिसंबंधाच्च । तथाजीवश्चेतनत्वसाम्येपि ब्रह्माभासएव, आनंदैश्वर्यादितिरोधानात् तद्विरुद्धादध्यासलक्षणाद्देहसंबंधाच्च ॥ अत्रहिचकारेणदेहसंबंधादित्यनुवर्तते (अ० १ पा० ३ सू० ४) "प्राणभृच्चे" त्यादावतच्छब्दादित्यादिवत् । इदंचनिबंधे "सदंशस्फूर्त्याभासत्व" मित्यादिवद्भिराचार्यपादैरेतत्सूत्रव्याख्यानेतदेवचानुवदद्भिः प्रकाशकारचरणैश्च ध्वनितं । नचासततिसूत्रेणव्यवधानान्नानुवृत्तिरितिशंक्यं,तस्यानुज्ञापरिहारविषयकर्माव्यतिकरोपपादकत्वेन पूर्वसूत्रशेषतयासाक्षाज्जीवस्वरूपधर्मनिरूपकसूत्राणामर्थव्यवधानाभावात् । अन्यथापक्षवाचकमात्मपदमपिनानुवर्तेत, असततिसूत्रेणप्रकाशादिवन्नैवमित्यादिसूत्रैश्चव्यवधानात् । अतआनंदादितिरोभावाद्देहाध्यासाच्चाभासत्वनतुस्वरूपतया ॥ ततएवचद्वैतप्रत्ययोदुःखादिप्रवाहश्च "देव क्षेत्रेष्वेवमजोऽयमात्मा भूतेभूतेव्यवस्थित" इत्यादावपिदेहसंबंधादेवनानात्वप्रत्ययउच्यते ॥ विपर्यय प्रतितिरोभावस्यदेहसंबंधस्यचकारणत्व पराभिधानसूत्र (अ० ३ पा० २ सू० ६) "देहयोगाद्वासोऽपी" तिसूत्रेचस्पष्टं । यथाचब्राह्मण कर्मणानाब्राह्मणाभासतामापन्नोपि प्रायश्चित्तेनब्राह्मण्यविरुद्धदुरितक्षयात्पुन संस्कारादिना ब्राह्मण्यदेवताया आविर्भावाच्चभूयस्तथैव ब्राह्मण संपद्यते । तथाजीवउक्तहेतोराभासताप्राप्तोऽपि शास्त्रीयसाधनैरध्यासक्षयादानंदाद्याविर्भावाच्च पुनर्ब्रह्मभावमापद्यतइतिभाव ॥ श्रूयतेचेद "ब्रह्मवेदब्रह्मैवभवती" त्यादौ ॥ प्रतिबिंबपक्षेतूपाधिनाशेतन्नाशाध्रौव्यात्तस्यब्रह्मभावोदुर्घट तथाचानेकश्रुतिव्याकोप । अनेनसूत्रेणाभासत्वभ्रमजनकपुराणादिवचनान्यप्येवमाभासत्वबोधनपरतयाव्यवस्थापितानिवेदितव्यानि । किंचस्वरूपतआभासत्वांगीकारे "नात्माश्रुते" रित्यादिपूर्वसूत्रै समर्थितंसर्वमपिविरुध्यते,प्रतिबिंबस्यालीकत्वेननित्यत्वचिद्रूपत्वयोरयोगात् बिंबस्याक्रियात्वेनोपाधेर्जडत्वेनोभयोर्विभुत्वेनजीवस्यात्मनोत्क्रांत्यादेरणुत्वादेश्चासंभवात् । सत्यालीकयोर्भेदेनप्रतिबिंबेतद्गुणसारत्वस्य आनंदाद्यभिव्यक्तेस्तात्विकाभेदस्यचासंगते कर्तृत्वस्याप्यसिद्धे "परात्तुतच्छ्रुते"रितिबिंबस्य सक्रियत्वा-

पत्तेः, अनुपचारतोंऽशत्वानिष्पत्तेश्च ॥ नचकानिचिदणुत्वादिसूत्राण्यन्यथानीयंतइत्यदोषः शंक्यः; तद्व्याख्यानस्यसविस्तरंदूषितत्वात्, बहूनामनुग्रहस्यन्याय्यत्वात्। अनन्यथानीतविरोधतादवस्थ्याच्चयदिचसूत्रकारस्तथाभिप्रेयात्, प्रतिबिंबमेवचेत्येकमेवसूत्रमसंदिग्धशब्दघटितंवदेत् 'नात्माश्रुते'रित्यादीनिनैवसूत्रयेत्। नाणुरंशइत्याद्येववातदभिप्रेतहेतूक्तिपूर्वकं सूत्रयेत् ॥ किंचकायमाभासइतिसंदेहानपायान्मायाऽविद्यांत:करणादिष्वन्यतमंतदाधारमपिस्वयंनिर्धारयेत् येनभवादृशांनानाविकल्पानस्युः, संतिह्यधिष्ठानविषयेतन्मतप्रसिद्धाअनेकेपक्षाः तेचावरणभंगसुवर्णसूत्रादिषुसंगृहीतानिराकृताश्च। किंचाभासशब्दोनेत्रेऽङ्गुल्यादिसंपर्केणप्रतीयमानबहुचंद्रादिषुप्रसिद्धः। क्वचित्प्रतिबिंबेपिदृष्टः। खड्गाप्यादिषुचोभयविधमप्याभासत्वंतस्योच्यतइत्यनिर्णयः। तथासूत्रार्थारयंताभिनिवेशेऽवच्छेदवादोच्छेदश्चसूत्रानारूढत्वात्। कथंचित्तस्यापिप्रामाणिकत्वसाधनेतुवादानांपरस्परविरोधात् पराहतिजीवस्वरूपानिर्धारश्च ॥ (अ० ३ पा० २ सू० १८) "अतएवचोपमासूर्यकादिव" दितिसूत्रंतु (अ० २ पा० २ सू० ११) "नस्थानतोपिपरस्योभयलिंगंसर्वत्रही" तिपरस्यब्रह्मणः सविशेषत्वनिर्विशेषत्वविचारप्रक्रमेऽस्ति। त्वन्मतेतु "दर्शनाच्चे" त्यंतमेकादशसूत्रमेकमेवाधिकरणंअतस्तद्ब्रह्मणएवसूर्यकतौल्यंब्रूते, नतुजीवस्यपूर्वापरसूत्रेषु; तदुल्लेखाभावात् ॥ वस्तुतस्तु "अतएवचोपमे" त्येकदेशिमतंसिद्धांतवदन् स्वयमेवानुपदंसूत्रकारोनिराकरोति (अ० ३ पा० २ सू० १९) "अंबुवदग्रहणात्तुनतथात्व" मिति। अत्रविशेषस्त्वग्रेवक्ष्यते। इहपरेषांव्याख्याने वस्तुपमापदयोरन्यतरवैयर्थ्यंसूर्यकादियदित्युपमेतियोजनेपिवैयर्थ्यानपायः इतिशब्दाध्याहारक्लेशः श्रुतौतादृशानुपूर्व्यभावात्स्वरूपव्यवस्थापकेतिशब्दस्यासंगतिश्चेत्यादिध्येयं। अतोजीवप्रतिबिंबवादे नकाचिदपिश्रुतिःसूत्रंवामानमस्ति ॥ अथ (अत्रकश्चित्) इत्यादिप्रत्यवस्थानोल्लेखस्त्वविरुद्धप्रायः। इहद्वितीयहेतुभूतंनिरवयवत्वंतुस्वारंभकावयवशून्यत्वंविवक्षणीयं। तेजःसंयोगेजलनिष्ठशैत्यस्पर्शस्यक्रमिकतिरोधानदर्शनेन तन्मात्रा सावयवत्वनादेतुद्वितीयहेतावाकाशेदृष्टांतीकार्यः। निरवयवत्वपक्षेनिरवयवाण्यपिरूपादीनिप्रतिबिंबवइतिव्यभिचारवारणाय पंचमहेतौइतराश्रसमवेतत्वे इति गुणाक्रियाभेदेइति वा सत्यंतंदेयं, सप्तमेऽपितद्वारणायतद्देयं। चक्षुर्योग्यत्वंवारूपशब्दार्थोविवक्षणीयः। तथाचचक्षुरयोग्यत्वादित्येननिष्कृष्टोहेतुः। एवंचोपाधावव्ययवारब्धत्वंद्वितीयंविशेषणं। बिंबसप्रथमविशेषणे पूर्वोक्तसत्यंतार्थसामानाधिकरण्यंविशेषणं। तृतीयविशेषणंचचक्षुर्योग्यत्वमितिशेयं। यत्तुप्रत्यवस्थाने (अंशविशेषत्वप्रतिपादकवाक्यवदन्यथाव्याख्येयानी) ति,-तदसत्; युष्माकंतत्रअंशइवांशइत्युपचारादत्यंतक्लेशस्येयथाश्रयमित्यादिवाक्यव्याख्यानेऽस्माकंक्लेशलेशस्याप्यभावात्। तत्र "एकस्यनानारंदृष्टांतार्थं" इतिव्याख्यानस्य "भेदरूपःक्रियतेबहुधादृश्यत" इत्यादिश्रुत्यक्षरैरेवस्वरसतः सिद्धेः ॥ अथप्रकृतेस्त्रिगुणात्मकत्वसाधनायाजामितिवाक्योदाहरणंतुधार्ष्ट्यात्। इदंवाक्यंहिश्वेताश्वतरचतुर्थाध्याये तैत्तिरीयाणां नारायणोपनिषदिचशिंचित्पाठभेदेनदृश्यते। तत्र "लोहितशुक्लकृष्णा" मिति लोहितादिपदे रजःसत्वतमांसिदयाभिश्रेवानिरुः। यथाचसति सांप्यमतस्यापिवैदिकत्वमापद्येत ॥ वस्तुतस्त्वह-

लोहितादिपदैस्तेजोऽबन्नान्येवक्रमेणविवक्षितानि । अजाशब्देनचाप्यादित्यचंद्रविद्युद्रूपं ज्योतिरेवेतिसमर्थितंभगवता (अ० १ पा० ४ सू० ९) "ज्योतिरुपक्रमातुतथाह्यधीयतएके" इतिसूत्रे ॥ रोहितादिपदानां तत्तद्वर्णपरत्वंतुश्वेतकेतुविद्यायां "यथानुखलुसोम्येमास्तिस्रोदेवतास्त्रिवृत्त्रिवृदेकैकाभवतितन्मेविजानीहि" इतिप्रतिज्ञाय "यदग्नेरोहितंरूपंतेजसस्तद्रूपंयच्छुक्लं तदपांयत्कृष्णंतदन्नस्य" इत्यादिनास्पष्टंदर्शितं । तथाचास्यंशंकराचार्यैरपिलोहितादिपदानां गुणपरत्वंपूर्वपक्षीकृत्यतेजोबन्नपरतामेव सिद्धांतयद्भिःशारीरकभाष्ये श्वेताश्वतरभाष्ये चतथैवव्याख्यायतइतितानतिक्रम्यतद्वाक्येत्रिगुणात्मकत्वसाधकत्वस्योक्तिर्धाष्ट्यादेव । सत्वंरजइतिप्रथमस्कंधवाक्यात्वविशेषेणगुणत्रयं तस्याःसिद्ध्यतिनतुप्राधान्येनसत्वगुणकत्वं, अथ (तस्याःप्रकृतेरितिकथयतासृष्टिकालावच्छेदेन तथात्वंतस्याविवक्ष्यतइतिचेत्-न; (स्कं० १ अ० २ श्लो० २३) "सत्वंरजस्तम इतिप्रकृतेर्गुणास्तैर्युक्तःपरःपुरुषएक इहास्यधत्ते ॥ स्थित्यादयेहरिविरिंचिहरेतिसंज्ञा" इतिसत्वस्य स्थितिहेतुत्वकथनात् प्रत्युतरजउद्रेकात्सृष्टिकथनेन तस्यचास्वच्छत्वेतदाप्रतिबिंबासिद्ध्या सृष्टिकालेजीवानुद्भवप्रसंगाच्च । मायांतुविद्यादितिश्रुतिस्तु पूर्वोपक्रांतांदेवात्मशक्तिमेवमायात्वेननिरूपयति, नतुत्रिगुणां; अन्यथासांख्यमतस्यवैदिकत्वप्रसंगात् । शंकराचार्यैरपितथैवशारीरकभाष्यादौव्याख्यातं । वस्तुतस्तुविस्तरेणव्याख्यातामाक् ॥ सत्वेप्रतिबिंबग्रहानुकूलस्वच्छत्वंतुत्वन्मतानुगातिरिक्तविदुषांव्यवहारस्याविषयः ॥ गीतास्थमीश्वरवाक्यंच सत्वस्यज्ञानजनकत्वमात्रंभूतेनतुस्वच्छतां । नापितज्जनकत्वेनस्वच्छत्वेनच व्याप्तिरस्ति; यतोऽन्यथानुपपत्त्यातदनुमीयेत चक्षुःसंयोगादिसंनिकर्षद्वाराज्ञानजनकताया दार्वादिमलिनविषयेपितत्तज्ज्ञानकरणेषु दर्शनेनव्यभिचारात् । अतः 'तत्रसत्वंनिर्मलत्वा' दितीश्वरवाक्यमुदाहर । वस्तुतस्तुतत्रापिप्रकाशानुकूलनैर्मल्यमेवहेतुहेतुमद्भावनिर्देशाद्बोध्यते; ननुप्रतिबिंबौपयिकं मानाभावात् । प्रकाशानुकूलवैमल्यवत्सुनहिप्रदीपादिषु प्रतीच्छायायाअदर्शनाच्च ॥ नापिनिर्मलपदप्रवृत्तिमात्रेण प्रतिच्छायानुकूलस्वच्छतैवावगंतुंशक्या; सात्त्विकनिर्मलफलमित्यादौ सुखादिषुतत्पदप्रवृत्तिदर्शनेऽपिप्रतिबिंबाग्राहकत्वात् ॥ यच्चात्मावरकत्वंसत्वस्यस्वीकृत्य नेत्रात्मशब्देनजीवईश्वरोवा ? नान्त्यः; "अनश्नन्न्य" इत्यादिश्रुतीनांअनादित्वात्त्रिगुणत्वात्परमात्मेत्यादिगुणप्रकरणीयवचसांचविरोधेनतत्रसुखसंगज्ञानसंगादीनामशक्यत्वात् ॥ आद्यश्चेदावरणासंभवःप्रतिबिंबत्वासिद्धिर्वा; रजतपात्रादेः स्वगतप्रतिबिंबानावरकत्वात् । तदावरणीयघटादेश्चतद्गतप्रतिबिंबत्वाभावात् । तथाअविद्याप्रतिबिंबभाक्त्वमलिनत्वेपिवे नचिदंशेनशुद्धत्वात् सजलकज्जललिप्तपात्रादिवदित्यनुमानेऽपिदृश्यत्वस्योपाधित्वेनहेतोर्व्याप्यत्वासिद्धिः ॥ प्रतिध्वने.प्रतिबिंबत्वंतुनिराकरिष्यामः । तेनाकाशस्यप्रतिच्छायानाश्रयतयानोक्तोपाधेः साध्याव्यापकत्वं । वस्तुतस्तुतत्रापिजलमेवप्रतिच्छायाश्रयोनतुकज्जलादीतितत्रापिनमलिनेप्रतिबिंबं, तद्वदिहापिसत्वांशमात्रस्यतदाश्रयत्वेतुगुणांतरैस्तदुपमर्देजीवनाशप्रसंग ; आश्रयाभिभवेतदभिभवौचित्यात् ॥ गुणानामन्योन्याभिभावकत्वंतु 'रजस्तमश्चाभिभूय' इत्यादिस्मृतिसिद्धं । किंचसत्वमात्राधिष्ठानकस्य जीवस्य 'सत्वंसुखेसंजयती' तिवाक्यात्सुखमेवस्यान्नतुकर्मदुःखादिक प्रमाद-

मोहादिकंवा । तथा "गुणानेतानतीत्यत्रीन्, सगुणान्समतीत्यैतान्, ब्रह्मभूयायकल्पते, तंभजन्निर्गुणोभवेत् । नैर्गुण्यस्थारमंतेस्मगुणानुकथनेहरेः । यद्विपश्यंतिमुनयोगुणापायेसमाहिता" इत्यादीनिगुणत्रयापायोत्तरमपि जीवस्थितिबोधकानितादृशस्यब्रह्मसंपत्त्यादिबोधकानिच गीताभागवतादिवचांसिपीड्येरन्; उपाधिनाशेप्रतिबिंबस्थित्ययोगात् ॥ एवं "मायामेतांतरंति" इत्यादिविरोधोप्यनुसंधेयः किंचप्रहितत्वयातस्यांप्रतिच्छायौपयिकस्वच्छताभ्युपगमेसदंशभूतानां प्रतिबिंबार्हसर्वस्तूनां तत्रप्रतिबिंबोद्भवोदुर्निवारः । नहिदर्पणादिकंमनुष्यप्रतिच्छायाश्रयोभवतीतिगवाश्वादीनिप्राण्यंतराणिघटादयोजडाश्चतत्रनप्रतिबिंबंते । तथाचसतिसर्वस्यसर्वदाप्रत्यक्षापत्तिः; तस्याविर्भूतत्वात् अतिदवीयसिभागेप्रतिबिंबानंगीकारेपिघटनिकटदेशेपुपरितत्प्रतिबिंबोपलंभेबाधकाभावात् ॥ नचतस्याअदृश्यत्वमेवतद्गततत्प्रतिबिंबोपलंभेबाधकंशंक्यं; त्वन्मतेआकाशस्याप्रत्यक्षत्वेपि तत्रप्रतिच्छायातयातत्त्वाभिमतस्यप्रतिध्वनेरिवमायागतघटादिप्रतिबिंबानांप्रत्यक्षस्योपपत्तेः, शब्दवद्बिंबभूतस्यघटादेःप्रत्यक्षयोग्यत्वेनतत्प्रतिबिंबेपुतद्योग्यतावश्यंभावाच्च । नचाकाशस्यससाक्षिकप्रत्यक्षाविषयत्वात्तौल्यमितिशंक्यं; तथासति दर्पणप्रत्यक्षेतद्गतप्रतिबिंबप्रत्यक्षनियमवदाकाशस्यतादृशावसर एव प्रतिध्वनिप्रत्यक्षनियममापद्येतेतितमःस्तोमसमवरुद्धगिरिगुहाकूपादिपुप्रतिशब्दानुभवानुपपत्तिः ॥ कथंचित्ससाक्षिकप्रत्यक्षंचमायायामपिशक्यवचनं; एवंतत्रसर्वप्रतिबिंबावश्यंभावे सर्वेषां सर्वज्ञतास्यात् । यथाहुरावरणभंगकाराः—"अरूपस्याज्ञानस्यप्रतिबिंबोविद्याबुद्ध्योः शुद्धत्वांगीकारेणाभ्युपगतश्चेत्स्वरूपाणां सदंशानांबाह्यानांघटादीनामांतराणांशिरांत्रादीनांचतत्रतत्रप्रतिबिंबोनिर्बाधः । निर्बाधेचप्रतिबिंबेतत्समानाधिकरणानामविद्यायांप्रतिबिंबितानांव्यापकानां जीवानां सर्वेषां सर्वसंसर्गेद्विगुणीकृत्य जातेसर्वतादात्म्यापन्नस्यब्रह्मणइवैतेषामपिसर्वसंसृष्टत्वात्साक्षित्वाच्च वृत्तिंविनैवस्वरूपचैतन्येनसर्वावभासकतायाः शक्यवचनत्वेनब्रह्मवत्सर्वेषां सर्वज्ञतास्यात् । नचांतःकरणभेदेनप्रमातृभेदात्तदनापत्तिःव्यापकत्वेनसर्वेषांसर्वांतःकरणसंसृष्टतयाप्रमातृभेदस्याशक्यवचनत्वात्संसर्गतौल्येएकस्यैवांतःकरणवैशिष्ट्यं; नापरस्येत्यत्रहेतोरभावात् अदृष्टादीनांहेतुताकल्पनस्य पूर्वप्रकरणएवनिरस्तत्वात्" इत्यादि ॥ विस्तरस्तुतत्रैवावधेयः । एतावताप्रथमहेतोः स्वरूपासिद्धिः परिहृतावेदितव्या ॥ द्वितीयहेतुश्चस्वारंभकावयवशून्यत्वंविवक्ष्यते । स्वंचपक्षसपक्षौ । अतोमायायास्त्रिगुणत्वेऽपिब्रह्मवद्गगादेरप्यंगीकारेण दर्पणादिपुस्वावयवारब्धत्ववत्तस्यांगुणारब्धतायावक्तुमशक्यत्वात् तादृशहेतुसत्वंतस्यामस्त्येव तस्मादयमपिस्वरूपासिद्धः ॥ प्रतिध्वनेःप्रतिबिंबत्वाभावान्नद्वितीयतृतीयचतुर्थानसव्यभिचाराः । स्वारंभकावयववैशिष्ट्यरूपंविवक्षितं; सावयवत्वंतुमायाकाशयोर्नैवास्ति; वाय्वादिवत्तदारंभकपरमाण्वाद्यभावात् ॥ घटमठाद्युपाध्यवच्छेदेनआकाशांशानामनुभवात्स्वीक्रियमाणंतस्यसांशत्वंतु प्रतिबिंबग्रहेऽप्रयोजकं, "एकदेशस्थितोऽग्नेर्ज्योत्स्ना" इत्यादिभिर्ब्रह्मणोऽपितथात्वेनतत्रतत्प्रसङ्गात् । व्योम्न उत्पत्तिमर्थंतु (अ० २ पा० ३ सू० १) "नवियदश्रुते" रित्यधिकरणसिद्धत्वादिष्टमेव । तथाप्रकृतेरपि (स्कं० ११ अ० २४ श्लो० ३) "वाङ्मनोगोचरातीतंद्विधासमभवद्बृहत् । स्त्रीपुंरेकतरोह्यर्थः प्रकृतिःसोभयात्मिका ॥ ज्ञानंत्वन्यतमोभावः पुरुषः सोभिधीयते"

इतिश्रीभागवतैकादशस्कंधादिवचनानुरोधादुत्पत्तिरंगीकार्या । तथाचानादित्वयादभंगः ॥ तुरीयहेतुतयोक्तमपरिच्छिन्नत्वंचसकलमूर्तद्रव्यसंयोगित्वंवातद्वृत्तित्यंताभावाप्रतियोगित्वं इतिपराभिप्रेतमेवविनक्ष्यते, नतुदेशकालवस्त्वपरिच्छिन्नत्वलक्षणं । अतोमहदपेक्षया-व्याप्यत्वेपितयोरुक्तरीतिकापरिच्छिन्नतायाःसुस्थिरत्वाद्वितीयचतुर्थयोर्नस्वरूपासिद्धिरपि । यद्यपिविकारान्तर्तिसूत्रमन्यार्थकं तथापिरत्नप्रभाव्यानुसारेण तत्रतदुपन्यासोयोग्यइति-कृतंप्रासंगिकेन ॥ स्वच्छत्वस्यैवोपाधौप्रतिबिंबग्रहप्रयोजकत्वे स्वच्छरूपेपिप्रतिबिंबा-पत्तिर्दुर्निरासा ॥ मात्रपदैवकारयोरुभयोर्ग्रहणंपुनरुक्तिप्रासार्थिस्यं । तस्यस्वच्छत्वे प्रमाणंतु तद्विशेष्यकस्वच्छत्वप्रकारकानुभवएव । अन्यथामलिनत्वेऽपिकिंप्रमाणंस्यात् ? अतएवस्वच्छद्रव्यगतस्य तस्यतथात्वंस्वमुखेनांगीक्रियते । नचाधाराधेयगतयोः प्रतिबिंब-योरव्यतिरेकनियमः शंक्यः; महामुकुरस्यैकदेशेऽल्पदर्पणस्थापनेतत्रोभयत्रप्रतिबिंब-दर्शनात् । यावांस्त्वाधारमुकुरांशआधेयमुकुरांशेनाच्छाद्यतेतावत्येवनप्रतिबिंबं; एवंस्फ-टिकभाजनांतर्भागस्यांभसाच्छादनाज्जलमात्रे तत्रप्रतिबिंबं, नतथाद्रव्यरूपयोरन्यतरस्या-न्यतराच्छादकत्वंसंगच्छते; आच्छन्नस्याप्रत्यक्षप्रसंगात् । नचाच्छादकद्रव्यस्यस्वच्छतया-तदाच्छन्नरूपस्योपलब्धिर्जलपिहितपात्रतलस्येवस्यादितिवाच्यं; मलिनयोर्दार्वादितद्रूपयो-राच्छन्नान्यतराप्रत्यक्षप्रसंगस्यदुर्निवारत्वात् । मलिनयोस्तयोरनाच्छादकत्वंस्वच्छयोरेवाच्छा-दकत्वमितिनियमेमानाभावात् । अतःस्फाटिकपात्रभागरूपस्याच्छन्नत्वाभावात् । तत्रा-पिप्रतिच्छायाकिंनस्यात् ? रूपस्यद्रव्यादपृथक्त्वंतुनतत्रसुवचं; द्रव्यत्वेनगुणत्वेनचभेदात् । अन्यथात्वदिष्टाधाराधेयभावस्याप्यसिद्धेश्च प्रभादावधिकदेशवृत्तित्वस्यापिदर्शनाच्च । एतेनगुणांतरेक्रियादिषुचतदापत्तिर्दर्शिताज्ञेया ॥ अथस्वच्छत्वमात्रस्यप्रयोजकत्वमपहाय-गुणाश्रयनिष्ठस्यतस्यतथात्वंनतुगुणक्रियानिष्ठस्येतिवद । तेनगुणत्वादेवप्रभायांतदप्रसंगेप्र-भायामिवेतिदृष्टांतोऽकिंचित्करः; सत्वगुणेचप्रतिबिंबाप्रसक्तिर्गुणत्वाविशेषात् गुणाश्चतुर्विं-शतिरेवेतितार्किकोक्तपरिभाषायाद्रव्यत्वपरिभाषावत् त्वयानादरणीयत्वात् ॥ वायुकाल-दिशानांप्रत्यक्षाविषयत्वेनतत्रस्वच्छत्वास्वच्छत्वयोरेकतरस्याप्यनिर्णयात् । तत्रास्वच्छत्वो-क्तिर्निर्मूला । नचफलबलेन तत्कल्प्यं, नीरूपत्वादेव प्रतिबिंबाभावसिद्धेः प्रतिबिंबग्रहप्रयो-जकस्वच्छतायाआत्मन्यनंगीकारे तयान्यथानुपपत्त्याकल्प्यमानेनस्वाश्रयेणद्वैतापत्तिः । ननु-तस्याभ्रमकल्पितत्वान्नायंदोषइतिचेत्कस्यासौभ्रमः ? नताव्द्ब्रह्मणः; ज्ञानघनत्वात्, नापि-जीवस्य; स्वच्छतांविनाप्रतिबिंबरूपस्यतस्यासंभवेनतंविनाचतस्याअसंभवेनउभयासिद्धिप्र-सक्तेः । नापितद्व्यतिरिक्तस्य; अचेतनत्वान्मिथ्यात्वाभिमानाच्च ॥ जलक्षित्योरितिध्यंतस्य-पूर्वनिपाताभावोविचार्यः; पृथ्वीजलयोरेवतदाश्रयत्वमितिमतंतुप्रत्यक्षानुरोधात् नभःप्रभृ-तीनांप्रतिबिंबग्राहिताबोधकश्रुत्याद्यनुपलंभेनश्रुत्याद्यविरुद्धत्वाच्चत्वन्मतापेक्षयारमणीयमेव-वियदादिषुविजातीयास्वच्छता आत्मादिषुचतद्विजातीया सावायुकालदिगादिषुचनोभय-विधापिसेत्यादिर्निर्मूला, अनेकनियमक्लेशगौरवविरहात् ॥ प्रतिध्वनेःप्रतिबिंबत्वेमाना-भावान्नव्यभिचारः । नचसादृश्यानुभवएवमानमितिशंक्यं, गोगोगो इतिमुहुर्मुहुरुच्चारणे उत्तरोत्तरगोशब्दानांपूर्वपूर्वप्रतिबिंबत्वापत्तेः । तथाचसति (अ० १ पा० १ सू० २०)

"संख्याभावा" दित्यादिजैमिनिसूत्रादिविरोध ॥ किंचप्रतिबिंबेहियावद्बिंबसान्निध्यं दर्पणादौप्रतीयतेनतुतन्नाशोत्तरप्रतिध्वनिश्च शब्दस्थितिकालेनैव प्रतीयते तन्नाशोत्तरमेव-चप्रतीयतइति बिंबस्थित्यधीनस्थितिकत्वस्यप्रतिबिंबताविनिगमकस्याभावान्नास्यतथात्वं-शक्यं ॥ नचप्रतिशब्दकाले शब्दस्थितिमाख्या, त्रिक्षणावस्थायित्वाभिमानभंगात् शब्द-द्वयश्रवणप्रसंगाच्च ॥ नित्यत्ववादिनामपिशब्दतिरोधानेनतत्प्रतिबिंबानुपपत्ति किंचमृदं-गोदरपर्यास्फालनेतस्यात वीणादेस्परितनधातुतंतुवादने तद्दंडतुंबिफलादिध्वंतस्परितन-शब्दसजातीय कश्चिरकालस्थायीशब्दोनुभूयतेसप्रतिध्वनिर्नेया ? आद्येचर्मकाष्ठादिना व्यव-धानात्तदनुदयप्रसंगः, बिंबदर्पणयो कुड्यादिनाव्यवधानेतदसंभवनियमदर्शनात् तव-शब्दविसर्पित्वासहिष्णुतयातन्नतत्प्रवेशस्यवक्तुमशक्यत्वात् ॥ द्वितीयेतुतत्रसदृशतमशब्दां-तरवत्कूपादावपि सदृशतर शब्दांतरमेवोपपत्स्यते । नचसरूपोपाधिस्थलएवाव्यवधानं कारणमितिवाच्य, अप्रयोजकत्वात् द्वयोरेवोपाधित्ववादिना नीरूपेप्रकृतोपाधितया पुत्रानुभ्युपगमाच्च ॥ एवप्रतिबिंबत्वाभावादेवभगवान् (स्कं० ११ अ० २८ श्लो० ५) "छायाप्रत्याह्वयाभासा असतोऽप्यर्थकारिण" इतिप्रत्याह्वयप्रतिबिंबाच्छेदेन निर्दिशति ॥ तस्मान्मायिकशब्दांतरमेवप्रतिध्वनि, असत्वनिर्देशात्, 'ऋतेर्थेयत्प्रतीयेते' तिलक्षणानुम-तेश्च । नचशब्देमायिकत्वमदृष्टचर, नटकल्पितगारुत्मतादीनांपुराणवर्णिताऽसुरमायोत्पन्नरक्ष-सांस्त्रामिकगजादीनांच शब्दपुत्तथात्वनिश्चयात् अतएवसध्यसृष्टेर्मायामात्रत्वसिद्धांतितसूत्र-कृता । प्रतिध्वनिविषयेविस्तरस्तु साधनाध्यायप्रकाशसर्वार्थनिर्णयावरणभंगादिषुद्रष्टव्य ॥

किंचयदिप्रतिध्वनिराकाशेप्रतिबिंबएवेत्येवलत्वाग्रहस्तर्हिगगनेप्रति-बिंबग्रहोपयोगिस्वच्छत्वमपित्वयाऽवश्यमेवस्वीकरणीयं, तथाचघटा दीनामपिप्रतिबिंबंतत्रकुतोनस्यात् ? नहिदर्पणादिषुघटस्यैवप्रति-बिंबनपटस्येतिवक्तुशक्यते । यदिचाकाशेगुणग्रहोपयोगिस्वच्छत्वं-विजातीयमेवस्वीक्रियतेतदारूपादीनामपिप्रतिबिंबंतत्रकुतोनस्यात् ? नचतद्वृत्तिगुणस्यैवतत्रप्रतिबिंबमितिवाच्यं, यदिशब्दस्याकाशगुणत्वं स्वीकृतं तर्हितथैवप्रतिध्वनेरप्याकाशगुणत्वसंभवेप्रतिबिंबत्वस्वी-कारोनिरर्थक । नचप्रतिध्वनेर्वर्णस्यप्रतिबिंबत्वमंतरानुपपत्तिरिति-वाच्यं; तत्रापिध्वनेरेववर्णाभिव्यंजकतासंभवेप्रतिबिंबत्वस्वीकारो-निरर्थकः । "अष्टौस्थानानिवर्णाना" मितिपाणिनीयशिक्षाविरोध-इतिवाच्यं; तस्यप्रथमाभिव्यक्तिप्रतिपादनपरत्वात्तेषांचिरकालाव-स्थितोध्वनेरेवोपयोगात्यथानुभवस्यसंस्कारजनकत्वेपितस्यचिरका-लस्थितावभ्यासादीनामुपयोगः वागिंद्रियस्यशब्दनिमित्तत्वे नतू-पादानत्वं । एतेनवागिंद्रियस्यनिष्फलत्वापत्तिः प्रत्युक्ता । नचस्वसा-न्पूर्वतोमेघादिध्वनिसमुत्पत्तौनियमत-पश्चिमदेशप्रतिध्वनिःश्रूयते । तदुत्पत्तिपक्षेतत्प्रसंगच्छते । यदिप्रतिध्वनिरुत्पद्यतेतर्हिकिंचिद्देशाव-

च्छेदेनैवोत्पद्यतइतिवक्तव्यं तर्हितद्देशात्पश्चिमतःस्थितस्यपूर्वेतत्त-
त्प्रतीतिःस्यात् । न चैवमस्ति, प्रतिबिम्बपक्षेतुस्वव्यवहितदेशेतत्क-
ल्पनानुपपत्तिरितिवाच्यं; तादृशनियमेमानाभावात्, उत्पत्तिपक्षेपि-
कल्पनासंभवाद्दोषाभावः ॥ किंचप्रतिबिंबंव्यवधानेन जन्यतेइत्य-
त्रापियदिबिंबव्यवधानेजन्यतइत्युच्यतेतदाब्रह्मप्रतिबिंबंजीवइत्युक्ति-
रसंगता; ब्रह्मणोव्यापकत्वेनतद्व्यवहितस्य कस्याप्यभावात् अन्यस्य-
व्यवधानेजन्यतइतिचेत्कुड्यादिव्यवहितोपिदर्पणादौप्रतिबिंबापत्तिः।
एवंचगगनेशब्दप्रतिबिंबसंभवात् नीरूपस्यनिरवयवस्यप्रतिबिंबं न
संभवति ॥ नचनीरूपस्यापिरूपस्यप्रतिबिंबदर्शनान्नैवमितिवाच्यं;
रूपस्यद्रव्यानतिरेकात्केवलरूपस्यप्रतिबिंबाभावाद्रूपवद्द्रव्यस्यैवसर्वै-
प्रतिबिंबदर्शनात् ॥ तथाचरूपवद्द्रव्यत्वाभावादेवात्मानप्रति-
बिंबते । नचजलेआकाशस्यप्रतिबिंबदर्शनात्तादृशनियमोव्यभि-
चारीतिवाच्यं; प्रभामंडलस्यैवसकलगगनव्याप्तस्यरूपवतः प्रति-
बिंबसंभवेतत्राकाशप्रतिबिंबकल्पनायांमानाभावात् ॥ नचगांभी-
र्य्यप्रतीतिरेवमानमितिवाच्यं; प्रभायाअपिगगनव्याप्तायागंभीरत्वात्-
गांभीर्य्यविशिष्टप्रभामंडलप्रतिबिंबेनजलेपिगांभीर्य्यप्रतीतिसंभवात्।
अतएवकुड्यादिलग्नप्रभामंडलस्यजलेप्रतिबिंबेपिनगांभीर्य्यंप्रतीतिः,
किंतुगगनप्रसृतस्यैव कुड्यादिलग्नस्यागंभीरत्वादन्यस्यचगंभीरत्वा-
त्त्वन्मतेचाकाशप्रतिबिंबस्यतत्रापिसत्वेनकुतोनगाम्भीर्य्यंप्रतीयते ?
तथाचानयायुक्त्यापिनगगनस्यप्रतिबिंबसंभवः किंचात्मनोमाया-
रूपप्रतिबिंबोपाधेरंतर्बहिश्चसर्वत्रव्याप्तत्वान्मायायांतत्प्रतिबिंबंकथं-
स्यात् ? अन्यथाजलगर्भितसिकताराशेरपिस्वमध्यस्थितजलेप्रतिबिं-
बापत्तिः । तथाचायंप्रयोगः-आत्मा न प्रतिबिंबते, स्वव्याप्तप्रतिबिंबो-
पाधिकत्वात्, यद्यत्स्वव्याप्तप्रतिबिंबोपाधिकंभवति तत्तदुपाधौनप्रति-
बिंबते, यथाजलगर्भितसिकताराशिः, स्वव्याप्तमायारूपप्रतिबिंबो-
पाधिकंचब्रह्म तस्माद्ब्रह्मनप्रतिबिंबते, इत्यनुमानेनापिब्रह्मणःप्रतिबिंबा-
भावसिद्धिः ॥ एतेनदूरत्वादीनांप्रतिबिंबंप्रतिपादयन्नपास्तः; तत्रापि-
बहुतरमूर्त्तप्रत्यक्षाधीसंयोगवद्द्रव्यज्ञानकालिकद्रव्यस्यैव परत्वादि-
व्यवहारजनकत्वेन तादृशव्यवधायकमूर्त्तद्रव्यसहिततत्पदार्थप्रति-
बिंबेनैव दूरत्वादिव्यवहारोपपत्तौ तद्भिन्ने दूरत्वादिप्रतिबिंबे माना-
भावात् आकाशवदात्मनोप्यपरिच्छिन्नत्वादात्मनः प्रतिबिंबं न
युज्यते । नचाकाशस्यापि परिच्छिन्नत्वाद्दृष्टांते हेत्वभावात्साधन-
वैकल्यमिति वाच्यं; आकाशस्य परिच्छिन्नत्वे परिच्छेदत्रयवदान्यत्वेन

ब्रह्मणः प्रतिपादनं न संगच्छेत। तथाहि-यदि गगनमपरिच्छिन्नं तदादेशपरिच्छेदशून्यत्वप्रतिपादने यथा देशपरिच्छेदशून्यस्याकाशस्यानित्यत्वं तथैव ब्रह्मणोऽप्यनित्यत्वापत्तिरतःकालपरिच्छिन्नत्वमपि सार्थकं भवति। यदिच तस्य परिच्छिन्नत्वं स्वीकृतं तदा देशपरिच्छिन्नस्य कालपरिच्छिन्नस्य कस्यचिदप्यसंभवाद्दृष्टांतासिद्ध्या ब्रह्मणि कालपरिच्छिन्नत्वप्राप्त्यसंभवात्तन्निषेधोनिरर्थक एव स्यात्; प्राप्तं हि प्रतिषिध्यत इति न्यायात् ॥ किंच "आकाशवत्सर्वगतश्च नित्य" इति श्रुतिविरोधोऽप्याकाशस्य परिच्छिन्नत्वस्वीकारे स्यात्। तत्र सर्वपदसंकोचे प्रमाणाभावात् ॥ यत्तु आत्मा न प्रतिबिंबते, अपरिच्छिन्नत्वादित्यनुमानेस्वयमेवाकाशस्यप्रतिबिंबस्वीकृत्यव्यभिचारस्योद्भावनंतथैवाकाशपरिच्छिन्नत्वंस्वीकृत्यसाधारण्ययोरुद्भावनं तदपिकथकसंप्रदायविरुद्धं। नहिप्रतिवादिमतप्रसिद्धिमात्रेणहेत्वाभासोद्भावनेहेतोर्दुष्टतासंभवतिअन्यथात्वयामिथ्यात्वसिध्यर्थंप्रयुक्ते विमतंमिथ्यादृश्यत्वात्परिच्छिन्नत्वाद्वेत्यनुमाने परेणमिथ्यात्वाभाववत्वेननिश्चितेजगतिदृश्यत्वस्यसत्वेनसाधारण्यस्यअपरिच्छिन्नत्वेननिश्चितेगगनेपरिच्छिन्नत्वहेतोरभावेनचस्वरूपासिद्धेरुद्भावनेच तवापिमिथ्यात्वासाधनप्रत्याशाजगतिदत्ततिलांजलिःस्यात्।

सहस्राक्षे नचतन्मतइत्यादिं हेत्वभावोसाधारण्यंचेत्यंतंभागंनिरस्यंति-किंचयदिप्रतिध्वनिरित्यादिना तिलांजलिःस्यादित्यंतेन। अत्रप्रायेणसर्वंनिगदव्याख्यातं। विशेषंतुवक्ष्यामः—रूपवद्द्रव्यस्यैवेति ॥ वस्तुतस्तुचक्षुर्योग्यस्यैवप्रतिबिंबमितिवक्ष्यामः; तेनास्माकीनग्रंथकृतां रूपवदेवप्रतिबिंबते नीरूपंनप्रतिबिंबत इत्याद्युक्तौरूपवन्नीरूपशब्दौचक्षुर्योग्यतदयोग्यपरावेववेदितव्यौ। एवंसतिनैयायिकसंमतद्रव्यत्वपरिभाषानादरेऽपि रूपादेः प्रतिबिंबसत्वेऽपिचनक्षतिः। रूपवतइति। चक्षुर्योग्यस्यवस्तुतः प्रभायारूपाविशेषत्वात् ॥ तत्रापिबहुतरेत्यादि। जलादौप्रतिबिंबितप्रभामंडले दूरत्वप्रत्ययेसत्यपिदूरत्वंदैशिकपरत्वमेव ॥ स्वस्मिंस्तद्व्यवहारश्चबहुतरमूर्तविषयकप्रत्यक्षाधीनंयद्दूरत्वस्त्वनुयोगिकबहुतरमूर्तप्रतियोगिकसंयोगवत्तयातादृशद्रव्यस्यज्ञानं तज्ज्ञानकालिकद्रव्येणैवजन्यतइत्यर्थः। तत्पदार्थेति। प्रभामंडलादिपदार्थेत्यर्थः। तद्भिन्नइति। बहुतरमूर्तसंयोगितया प्रतीयमानप्रभामंडलप्रतिबिंबादतिरिक्तइत्यर्थः। आकाशस्यपरिच्छिन्नत्वइत्यादि। यद्यपिसिद्धांतेवस्तुतआकाशस्यपरिच्छिन्नत्वमेवनिर्णयधादिषु तथाचलोकदृष्ट्याप्रदृष्टांततयाकथनेनस्वीक्रियते, तथापि तन्मतेतदसंगतमितिप्रदर्शकएवायंग्रंथः। ब्रह्मणःप्रतिपादनमिति। "सत्यंज्ञानमनंतंब्रह्म" त्यादिस्थलेतैत्तिरीयकोपनिषदाद्यादिषुप्रतिपादनमित्यर्थः। अकालपरिच्छिन्नत्वमिति। अनंतपदादिनाब्रह्मणिकालपरिच्छेदस्यापि निषेधनमितिभावः। तस्यपरिच्छिन्नत्वमिति।

णाकाशस्यतदसद्दीत्यास्वीकृतंस्यादित्यर्थः । प्रासंहीत्यादि । अतएवजैमिनिनाऽर्थवादाद्यधिकरणेषु "नांतरिक्षेनदिवी" त्यादावभागिप्रतिषेधोदोषआक्षिप्यते । किंचेत्यादिनाश्रुतिविरोधोऽपियक्षवलिन्यायादेवोपन्यस्तः । वस्तुतस्तुलोकबोधनायतद्व्युत्पत्त्यनुसार्येवदृष्टांतः-श्रुत्योपात्तः । नन्वेवंसिद्धांते व्योम्न.परिच्छिन्नत्वे अपरिच्छिन्नत्वादितिपक्षहेतुदृष्टांताभावादसत्स्यादितिचेत्--न; कालस्यतत्रदृष्टांतासंभवात्, व्यतिरेकदृष्टांततोप्यसाधारणता-

---

नच त्वन्मते वाय्वादावपि शब्दस्य सत्वेन शब्दान्तरस्य वाय्वादिगुणत्वेन प्रतिध्वनेरेवाकाशगुणत्वं, तथाच तस्याकाशेएव समुत्पत्त्या कथं प्रतिबिम्बत्वमिति वाच्यम्; नैयायिकादिरीत्या अङ्गीकारे द्वितीयादिशब्दानांसामान्याकाशस्यतस्याअनंगीकारेवर्णात्मकशब्दानां वाय्वृपाकाशस्य गुणत्वात् ॥ दन्ताद्यभिघातजन्यशब्दानामनभिव्यक्तत्वेन वर्णानां दन्तादिजन्यत्वायोगात्, शास्त्रविरोधाच्च ॥ नच वागिन्द्रियं नाकाशः, किन्तु तद्विकार इतिवाच्यम्; प्रकृतिविकृत्योरभेदात् ॥ प्रतिबिम्बशब्दस्यैवाकाशगुणत्वस्वीकारे बाधकाभावाच्च ॥ नहि प्रतिबिम्बत्वप्रयोजकसामग्र्याजन्यत्वे तत्रोत्पत्तिमात्रेण तद्गुणत्वेनवा प्रतिबिम्बत्वाभावःशक्यनिश्चयः ॥ प्रतिवर्णस्य प्रतिबिम्बत्वमन्तराऽनुपपत्तेश्च ॥ नच वर्णाभिव्यञ्जकध्वनिनिमित्तकप्रतिध्वनेर्मूलध्वनिवदेव वर्णाभिव्यञ्जकत्वेन तदुपपत्तिरितिवाच्यम्; "अष्टौस्थानानिवर्णानां" मिति पाणिनीयशिक्षाविरोधात् ॥ तत्प्रामाण्येन तत्तत्स्थानेवाय्वाभिघातजन्यध्वनेरेव वागिन्द्रिये वर्णाभिव्यञ्जकत्वात् ॥ तन्निमित्तकध्वनेरपि व्यञ्जकत्वे प्रमाणाभावात् ॥ वागिन्द्रियस्य निष्फलत्वापत्तेश्च बहिराकाशवदन्तराकाशएव वर्णोत्पत्तिसंभवात् ॥ किञ्च स्वस्मात्पूर्वतोभेर्यादिध्वनिसमुत्पत्तौ नियमतः प्रतिध्वनिः पश्चिमतएवश्रूयते तदुत्पत्तिपक्षे नसंगच्छते ॥ तथाहि—यद्याकाशे प्रतिध्वनिरुत्पद्यते तर्हि किञ्चिद्देशावच्छेदेनैव तद्वाच्यं । तथाच तद्देशात्पश्चिमतः स्थितस्य पूर्वतस्तत्प्रतीतिः स्यात्; न चैवमस्ति । प्रतिबिम्बत्वे तु स्वव्यवहितदेशेएवतत्कल्पनान्नानुपपत्तिः ॥ किञ्च प्रतिबिम्बातिरिक्तं कार्यं मणिमन्त्रादिभिन्नसामग्र्या व्यवहितदेशे न जन्यतेइति कथंप्रतिध्वनिर्नशब्दस्यच्छाया? ॥ ३१ ॥ गगने शब्दप्रतिबिम्बदर्शनादेव पञ्चमोपिव्यभिचारी ॥ रूपादेःप्रतिबिम्बदर्शनाच्च ॥ नच द्रव्यत्वे सतीतिहेतोर्विशेषणान्नव्यभिचारइतिवाच्यम्; आत्मनोगुणाद्यभावेनद्रव्यत्वासिद्धौस्वरूपासिद्धेः ॥ द्रव्यत्वपरिभाषायानिर्मूलत्वेनशास्त्रार्थाव्यवस्थापकत्वाच्च ॥ जले आकाशप्रतिबिम्बदर्शनाद्दृष्टान्ते हेतोरसिद्धेश्च ॥ यत्तु तद्गतप्रभामण्डलस्य जले प्रतिबिम्बोनाकाशस्येति-तन्न; गाम्भीर्यबुद्ध्यभावप्रसङ्गात् ॥ नहि गाम्भीर्यमवकाशविशेषातिरिक्तं जानुदघ्ने जले वक्तुं शक्यते; प्रमाणाभावात् ॥ बहुदेशावच्छिन्नप्रभाप्रतिबिम्बेन गाम्भीर्यव्यवहारइतिचेत्,—न; देशस्योपलक्षणत्वे यत्रयत्र प्रभामण्डलप्रतिबिम्बस्तत्रतत्रगाम्भीर्यप्रतीत्यापत्तिः ॥ नचैवमस्ति ॥ ममतुयत्राकाशप्रतिबिम्बस्तत्र गाम्भीर्यमानं यत्रतु नतत्प्रतिबिम्बस्तत्र नतज्ज्ञानमितिनाव्यवस्था ॥ प्रतिबिम्बाभावप्रयोजकंतु स्वगतमुपाधिगतं वाकिञ्चिदुभाभ्याकल्पनीयम् ॥ देशस्य विशेषणत्वे घट्टकुटीप्रभातन्याय; देशस्याकाशानतिरिक्तत्वात् ॥ दिग्रूपत्वे तु तत्कुव्यन्तर-

वारणसम्भवाच्च । किंचलौकिकप्रत्यक्षदृष्ट्याऽपरिच्छिन्नोऽप्याकाशोयदिसर्वथानैवप्रतिबिंबते कथंतर्हितत्वतोऽपरिच्छिन्न ? परमात्माप्रतिबिंबेतेत्याशयादम्बुन्यंबरप्रतिबिंबमेवप्रत्यपेधन्प्र तिपेत्स्यतिच-परेणैवेति । वैशेषिकादिना ॥ शिष्टस्पष्ट ॥ अत्रापिमूलाशयप्रकाशनायकिं चित्स्वातन्त्र्येणोच्यते ॥ तत्रप्रतिध्वने प्रतिबिंबत्वेबाधकानिकानिचित्प्रागेवमयास्वतन्त्रतया पिदर्शितानि ॥ अथपरोक्तंविमृश्यते-तत्रत्वयापूर्वपक्षेरूप्यमाणप्रतिध्वनेर्याकाशशब्दत्व गुत्वदीयाएवासिद्धान्तयति-यथाहविद्यारण्य -"प्रतिध्वनिर्विंबच्छब्दोवायौबीसीतिशब्दन"-मित्यादि ॥ व्याचक्षतेच "आकाशेतावच्छब्दएवगुण सचप्रतिध्वनिरूप" इति अतस्तद्दूषण मस्माभिरवश्यसमाधेय, तथाप्ययुक्त निरस्यते-तत्रवीचितरङ्गन्यायेनकदम्बमुकुलन्यायेनच नैयायिकाभिमताशब्दान्तरोत्पत्तिस्तुनात्रयो समतेतिकृतप्रासगिकनिरासेन । वर्णात्मशब्दा नामप्याकाशगुणत्वोक्तिरसगता, तालुदन्तादिपुजायमानत्वेनतद्गुणत्वस्यशक्यवचनत्वात्, अन्यगुणस्यान्यत्रोत्पत्त्यसम्भवात् । तत्रभवत्त्वभावेदत्यतालव्यत्वादिव्यपदेशायोगात्, "शरीरावयवाच्च" दित्यस्यतदधिकारस्थत्वात् ॥ दन्ताद्यभिघातजन्यशब्दानान्तु "आत्मा बुद्ध्यासमेत्यार्थान्मनोयुङ्क्तेविवक्षया ॥ मन कायाग्निमाहन्तिसप्रेरयतिमारुतम् ॥ मारुतश्चो-रसिचरन्मन्द्रजनयतिस्वर" मितिपाणिनीयादिशिक्षोक्तवायुविशेषाभिघातजन्यत्वस्य तत्र वागिन्द्रियव्यापारस्यचाभावादव्यक्तस्त्व वर्णानादन्तादिपूत्पत्तिमरोचयन्स्वोक्तेपि "अष्टौस्था नानिवर्णाना" मितिशिक्षाविरोधकुतोनानुसधत्से ? तत्रानुत्पत्तौतेषा वर्णस्थानत्वासिद्धे । नचाकाशस्यविभुत्वाद्दन्तादिपुजायमानानामपिवर्णात्मकशब्दानामाकाशगुणत्ववक्तव्य, वा य्वादिशब्दतयाभिमतानाञ्चीसीभुगभुगबुलबुलादिशब्दानामपिनभोगुणत्वापत्ते । शास्त्र विरोधस्तु "तदेतद्वाचावदती" त्यादिश्रुतिमनुस्मृत्योक्त स्यात् । वस्तुतस्तुकरणत्वश्रुव णादशनाग्रदन्तादिपुवर्णानामभिव्यक्तौवाग्व्यापारनिमित्तकत्वमेवत्वोधयतीतिनतद्विरोध । आकाशविकारतयोक्तेपिश्रोत्रेशब्दगुणकत्वस्य वागादिकर्मेन्द्रियत्वत्वस्यपिवाय्वादिविकारत्वे नाभिमतेकरचरणगुदोपस्थे उद्भूताना स्पर्शादितत्तद्भूतगुणानाचादर्शनाद्वागिन्द्रियमात्र स्यशब्दगुणकत्वमसम्भवि । गोलकानातुपाञ्चभौतिकत्वेन तेपुशब्दस्पर्शाद्युपलब्धिरदोष, इन्द्रियाणागोलकेभ्य पृथक्त्वाणुस्वरूपत्वादिकतु (अ० २ पा० ४ सू० १) "तथाप्राणा" इतिपादेस्फुट । अथकथचिद्वर्णानावागिन्द्रियगुणत्वमनोरथेसत्यपिप्रकृतिविकृत्योरभेदमाश्रि त्यैवान्तरिक्षस्यशब्दवत्तासाधनमशक्य, पयोविकृतेर्दध्नोऽम्लत्वेऽपि पयसोऽम्लत्वाभावात् । तद्विकृतित्वेनोक्तस्यश्रोत्रस्य गन्धमाहित्यागीकारेण प्रकृतिभूतमहाकाशस्यापिचलत्वा

प्रगातन्याय ॥ राएववा ॥ दिशआकाशानतिरिक्तत्वात् ॥ एव दूरत्वधीरप्याकाशप्र तिबिम्बेनैव समर्पनीया ॥ तदेतदाह-गाम्भीर्येत्येति ॥ इद दूरत्वस्याप्युपलक्षणम् ॥ ३२ ॥ अतएव पष्ठोऽपिव्यभिचारी । नचोपध्यनन्तर्गतस्यैव प्रतिबिम्बइति कथ विभोराकाशस्या त्मनश्च प्रतिबिम्बइतिवाच्यम्, अप्रयोजकत्वादनन्तर्गतत्वस्य ॥ तद्विकारस्य न तत्र प्रति बिम्बइति नियमेनैव रेखा प्रतिबिम्बाऽनवकाशात् ॥ आकाशस्योक्तरीत्या परिच्छिन्नत्वे दृ दृष्टान्ते हेत्वभावोऽसाधारण्यच ॥

पाताच्च । यदि च तयोर्भेदमाश्रित्य विकृतेरेव चलत्वं न तु प्रकृतेरित्यभिधीयेत तर्हि वागिन्द्रियस्यैव शब्दवत्त्वं नत्वन्तरिक्षस्येत्यपि सुवचं । न चेष्टापत्तिः; तस्य शब्दगुणकत्वबोधकानामार्षवचसां स्वप्रधानां च व्याकोपात् । किंच "अग्निर्वाग्भूत्वा मुखं प्राविशत् ॥ अन्नमयं हि सोम्य मन आपोमयः प्राणस्तेजोमयी वागिति ॥ वाचां वह्निर्मुखं क्षेत्रं" मित्यादिश्रुतिस्मृतिभ्यो वाचस्तेजोमयत्वेन वर्णानां तद्गुणत्वकल्पनेऽपि तैजसशब्दत्वं स्यान्नत्वाकाशगुणत्वम् ॥ प्रतिबिंबशब्दस्यैवाकाशगुणत्वं तु न स्वीकर्तुं शक्यं; प्रातिभासिकस्य व्यावहारिकवस्तुगुणत्वायोगात् । नहि स्वच्छतयैकतया च निश्चिते मुकुरे प्रतिबिंबितानि नीलरक्तादिरूपाणि द्वित्वमित्त्वादिसंख्यादैशिकपरत्वापरत्वादीनि च मुकुरनिष्ठगुणा भवितुमर्हन्ति । नाप्यभास्वरशुक्लरूपशालितया तया गृहीते जलेऽसम्बन्धान्यरूपाणि प्रतिबिंबन्त इति तस्य सर्वविधरूपवत्ता सर्वविद्वत्संमता । प्रतिबिंबत्वात्प्रातिभासिकेनापि सुवचमनेन शब्दगुणकत्वसंभवे च रूपगुणकत्वमपि तस्योरीकार्यं; तत्र प्रातिभासिकनीलरूपप्रतीतेः सर्वजनीनत्वात् । प्रतिबिंबत्वप्रयोजकसामग्री तु नेह निर्णीता । तत्राविरुद्धसामग्री चास्माभिः पूर्वमेवोपपादितेति प्रतिबिंबत्वाभावस्तत्र निश्चीयत एव ॥ यच्च प्रतिवर्णस्य प्रतिबिंबत्वमुक्तं तन्न वदंति—"नापि वर्णरूपप्रतिशब्दस्य पूर्ववर्णप्रतिबिंबत्वं; व्यंजनाक्षराश्रवणात् । न च स्वराक्षरस्यैव प्रतिबिंब इति वाच्यं; नियामकस्याशक्यवचनत्वात्, युगपदुभयस्वरग्रहणाभावात् पूर्वध्वनिरद्वितीयस्य प्रतिध्वनेरपि पूर्ववर्णव्यंजकताया शक्यवचनत्वाच्चे" ति ॥ एवं प्रतिध्वनौ व्यंजनानामप्रत्ययादेव प्रतिबिंबत्वं अष्टौ स्थानानीति शिक्षाविरोधश्च परिहृतो ज्ञेयः । नियमेन तत्तत्स्थाने अन्तरवायुरभिघातेनाऽभिव्यक्तस्यैव विसर्पिध्वनेस्तत्वान्मते वागिन्द्रिये ह च बाह्याकाशेऽपि वर्णाभिव्यंजकतायाः संभवदुक्तिकत्वेन स्थानबोधकशिक्षावचसो बाधगन्धस्याप्यभावाच्च । अन्यथा वागिन्द्रिये वर्णाभिव्यक्तिवदतत्त्वापि तद्विरोधो दुष्परिहरः ॥ मायिकशब्दत्वपक्षे तु सुतरां न विरोधः । शिक्षायां त्वाम्नातानां नित्यानामेवाभिव्यक्तिस्थाननिरूपणात् स्वाप्निकेषु शरीरेषु घटपटादिषु च शुक्रशोणितसंनिपातजन्यतायां मृत्तत्वादिजन्यतायाश्चाभावेऽपि वास्तवेषु शरीरादिषु तत्तज्जन्यताया अव्यभिचारित्वेन तद्बोधकशास्त्रस्येव नित्यवर्णानां तत्तत्स्थानाभिव्यज्यमानताया नियतत्वेन स्थानबोधकशिक्षावचनस्य बाधायोगात् ॥ शिक्षाप्रामाण्येन तु दंतादिष्वेवाभिव्यक्तिः सिध्यति, न तु वागिन्द्रिये; अनभिधानात् । किंच "वाचा वदती" त्यादिषु सर्वत्र करणत्वमेवेंद्रियाणां श्रूयते, नत्वधिकरणत्वमतो वाचः शब्दाधिकरणत्वकल्पनं निर्मूलं । नहि दंडो घटाविर्भावस्याधिकरणं संभवति ॥ प्रतिवर्णस्थले वर्णाभिव्यंजकस्यैव ध्वनेर्वा तन्निमित्तकध्वनेर्वा व्यंजकत्वे प्रमाणं तु प्रतिवर्णेषु नियमेन वर्णाभिव्यक्तिकालोत्तरकालिकत्वानुभवादिकं शक्यवचनं । न च वागिन्द्रियस्य निष्फलत्वं शंक्यं; यावत्कारणसमवधाने सत्येव कार्यसंभवात् । तस्य च करणत्वेन दंडादिव्यापारमंतरा घटादेरिव तद्व्यापारमंतरेण वर्णानामभिव्यक्तेरयोगात्, क्रियायाः फलनिष्पत्तिर्यद्व्यापारादनंतरमिति वाक्यपदीये तल्लक्षणात् ध्वनिमात्रस्य कारणत्वेन वागिन्द्रियस्यान्यथासिद्धत्वांगीकारे मूकानामपि वर्णोच्चारणप्रसक्तेश्च । अभिव्यक्तिस्तु स्थानेष्वेव अतएव मुद्रितोष्ठपुटस्य पवर्गोच्चारणमशक्यं । न चैवं वृद्धानां सर्वथा तवर्गानुच्चारणप्रसंगः; शेखरकारादिभिर्दंतशब्देन तत्संनिहितप्रदेशानामादरणात् ॥ इत्थमांतराकाशमात्रस्य कारणतानूरीकारेणैव (बहिराकाशव-

दंतराकाशएववर्णोत्पत्तिसंभवा) दितिनिराकृतं । किंचास्यायमाशयःस्यात्–यदिबाह्या-
काशप्रतिवर्णोत्पत्तिर्वागिंद्रियनिरपेक्षांगीक्रियते तर्हिमुखस्यांतरपि तन्निरपेक्षावर्णोत्पत्ति-
रुच्यतां; तथाचतस्यवैफल्यमिति,–तन्न; साफल्यस्यदर्शितत्वात् बाह्याकाशेपित्वन्मते दूर-
स्थशब्दग्रहणार्थंश्रोत्रस्यैवदूरेप्रतिवर्णोत्पादनाय वागिंद्रियस्यापिगमनस्यशक्योक्तिकत्वात् ।
वस्तुतस्तुयथाआदानादिशक्तहस्तेंद्रियंस्वगोलकद्वारासाक्षाद्ग्रहणादिनिमित्तंभवति दीर्घसं-
दंशोपवेशादिनाविषधरांगारादेर्ग्रहणेपितदेवपरंपरयासाधकतमम् । तथासाक्षाद्वर्णोच्चार-
णोकरणंवागिंद्रियंतदभिव्यंजकविसर्पिध्वनिद्वाराबाह्याकाशेप्रत्यक्षरोत्पादेपितदेवपरंपरयानि-
मित्तमितिनि खिलंनिरवद्यं ॥ प्रतिबिंबत्वपक्षेच बाह्यवदांतरांतरिक्षेपिप्रत्यक्षरप्रत्यक्षप्रसंगः;
आकाशस्यैवोपाधित्वेनवर्णानांवस्त्वंतरांबरेपिप्रतिबिंबने प्रतिबंधकाभावात् ॥ यच्च किंच-
स्वस्मादित्यादि नानुपपत्तिरित्युक्तं,–तदरमणीयं, प्रतिबिंबपक्षेपिभेर्यादिसन्निहितनभोविभा-
गएव प्रतिबिंबौचित्येनभेर्यादिसमर्यादएवप्रतिस्वननिशमनप्रसक्त्यादोषस्यतौल्यात् । नहि-
दर्पणरचितधरणीचर पुरुषः स्वचरणसमभ्यर्णभागमतिहायदवीयसितत्तलविभागेप्रति-
फलति ॥ यदिचनेदीयसिनभसिप्रतिबिंबानुद्भवेदवीयसि तदुद्भवेचकिंचित्कारणंकल्प्येत
तदातदेवोत्पत्तावपिकल्प्यतां ॥ वस्तुतस्तुसर्वत्रवर्तमानः पवमानः पटहादिप्रकटध्वानतः
क्षुभ्यन्शब्दं क्षोभानुरूपंदूरंहरत्नन्यत्रप्रतिबध्यतेतत्रैव मायिकंशब्दांतरमुत्पद्यते, अतएव-
गिरिगह्वरकूपविवरसरःप्रवरशिखरवत्सुरनिलयप्रभृतिषुप्रतिशब्दा श्रूयंते । त्वत्पक्षेत्वंतरि-
क्षस्यविभुत्वेनाल्पस्यमहतश्चशब्दमात्रस्यानियमेन प्रतिस्वनेनभाव्यं, नतुतथानुभूयते ।
किंचपूर्वतोभेर्याघाते तत्पूर्वतोऽतिनेदिष्टगह्वरादिसत्त्वेभेर्यादित· पश्चिमस्थेनपुंसाशब्द-
प्रतिशब्दावुभावपिअनुभूयेते; अतोन त्वदभिप्रेत प्रतिध्वनेः शब्दसंमुखदिक्त्वनियमः
संगच्छते ॥ यदपि प्रतिबिंबातिरिक्तमित्यादि शब्दस्यच्छायेत्युक्तं,–तदप्यसत्; दर्पणादे-
भित्त्यादिना व्यवधाने प्रतिबिंबस्याप्यजननेनतौल्यात् मणिमंत्रभिषग्भ्यः सिद्धमित्रतीर्था-
दिभ्योव्यवहितेभ्योपिभयहर्षपुण्यादिजननाच्च यदिचतानिमणिमंत्रादित्यादिशब्देन संगृण्ही-
यास्तर्हि शब्दमपितेनसगृहाण। अपिचजलाशयतटाश्रयस्यपुंस·फूत्कुर्वतोजलोपरिभागेबुद्बु-
दोत्पादस्त्वंदश्यतेतत्रवायोर्द्वारत्वमितिचेत्–अत्रापिसमानं, एवंप्रतिध्वनेः प्रतिबिंबत्वनि-
रासेन पंचमस्यापिव्यभिचारित्वशंकापास्ता, सत्यंतनिवेशाच्चरूपादेः प्रतिबिंबसंभवेऽपि-
नव्यभिचारः । नचसत्यंतनिवेशे प्रकाशाश्रयन्यायेन पंचमेष्टरूपासिद्धिः शक्याः परैस्तथा-
नंगीकारात्, तन्मतरीत्यातदुक्तेरयुक्तत्वप्रख्यापनायैरपंचमसप्तमयोरुपन्यासात् ॥ यच्चनच
द्रव्यत्वहृत्यादिशाश्चार्याभ्यवस्थापकत्वाचेत्युक्तंतत्तुतादृशसत्यंतमनिवेशयद्भिःकणादोक्तरीति-
कद्रव्यपरिभाषामनाद्रियमाणैश्चास्माभिर्नैवोत्तरणीयं पंचमादिलिंगकानुमानेकालोदृष्टांती-
क्रियते, अतोनतत्रहेत्वसिद्धिः । नाप्याकाशेव्यभिचारः; तस्यसाध्यवतायास्त्वयोक्तत्वात् ॥
वस्तुतस्तुअप्रमामंडूकस्थेनसप्रतिविंबः गाम्भीर्यंदूरत्वबुद्धिस्तुप्रभायाबाहुल्यप्रातृमरस्कत्व-
मूलिका । नचगुणेषुबाहुल्याद्यनुपपत्तिः; छोटिकाशब्दोऽल्पोभेरीशब्दोमहानितिशब्द-
गंधादिषुविमर्पिभूतगुणेषुव्याप्तंतरेणाप्यल्पबहुत्वभावयोर्दर्शनात् । प्रभयादृश्याभिमानि-
नस्त्वात्मनात् प्रतिमुखतपरिमाणैर्वप्रतिबिंबमानेनगाम्भीर्यबुद्धिरितिसुवचं । आनुदर्शेपि-

जलेतिसन्निहिततरुपुरुषादेस्तीरस्थापितदीर्घयष्टिकादेश्चतावत्परिमाणकएवाधोग्रः प्रतिबिंबोनुभूयते, एवमेवार्धांगुलस्थूलिमत्यपिमुकुरभूमौ । अतोवस्तुस्वभावात्तावत्यप्यंगुलिप्रतिबिंबमानेमहत्तमंप्रभामंडलमेवतादृशाकाशभ्रमंजनयति । यत्रयत्रचयावतीप्रभाप्रतिबिंबते तत्रतत्रसर्वत्रसलिलमणिमुकुरादिषुतावद्गांभीर्यंप्रतीयतएवेतिकृतंतदापत्तिविभीषिकया यदिचोपाधिभेदाद्गांभीर्यप्रतीतेस्तारतम्यमनुभूयेत तत्रतत्प्रयोजकमुपाधिगतमेवावधेयं । एकस्यापिबिंबस्योपाधिवैलक्षण्येनप्रतिबिंबवैलक्षण्यदर्शनात् । आकाशस्यप्रतिबिंबार्हत्वेचक्वचित्तत्प्रतिबिंबंक्वचित्तदभावइतिकल्पनंनिर्मूलं; तदतिरिक्तस्यबिंबस्यतथादर्शनात् । यदिचदृष्टानुरोधादुभयोःकिंचित्कल्पनमावश्यकंस्यात्तदापिनभःप्रभामंडलयोरुभयोःप्रतिच्छायांस्वीकृत्यत्वयातत्कल्प्यं, मयातुद्वितीयस्यैव तांस्वीकृत्यतत्कल्प्यमितित्वाकाशप्रतिबिंबवादोन्यर्थगौरवग्रस्तः । देशानवच्छिन्नत्वंतुनवयंविशिंष्मइतिनघट्टकुटीप्रभातादिप्रसंगः । वस्तुतस्तु तथाविशेषणेपिनक्षतिः;प्रातर्मध्यंदिनादिकालावच्छिन्नविलक्षणसूर्यप्रभायाःप्रतिबिंबनेपितदवच्छेदककालस्य देवदत्तस्यप्रतिबिंबनेपिचक्षुरयोग्यस्यब्राह्मण्यपांडित्यादिरूपतद्विशेषणस्य समीरणाहिततृणपर्णादेःप्रतिबिंबनेपितदाधारस्यसमीरस्यचप्रतिबिंबानुदयात् अतोदेशस्यविशेषणत्वेपिचक्षुरयोग्यविशेषणस्यप्रतिबिंबादर्शनेनतद्वदेवाकाशरूपस्यादिमूर्तस्यदेशस्यप्रतिबिंबाभावःशक्यवचनः । अन्यथाबहुदेशावच्छिन्नाप्रभाचक्षुषागृह्यतइतिविशेषणस्याकाशस्यचाक्षुषमपिस्वीकार्यं । नचेष्टापत्तिः; तद्दृष्टान्तेनब्रह्मणोपितथात्वापत्त्या "नचक्षुषागृह्यते पराञ्चिखानि । नतत्रचक्षुर्गच्छति" इत्यादिमुंडककठतलवकारप्रभृतिश्रुतिप्रतिरोधात् शारीरकादौव्योम्न साक्षात्प्रत्यक्षाविषयत्वांगीकाराच्च तेनोक्तदोषद्वयप्रसरस्यसंभावनाप्यपास्ता ॥ दिशआकाशानातिरिक्तत्वोक्तिस्तुश्रुत्यादिविरुद्धा "नाभ्याऽआसीदंतरिक्षं । पद्भ्यांभूमिर्दिशः श्रोत्रात् । योन्तरिक्षेतिष्ठन् योदिक्षुतिष्ठन् द्यौःशीर्षमाशाश्रुतिरंघ्रिरुर्वीनभस्तलंनाभिसरोगृणंती"—त्यादिश्रुतिभिस्तयोर्भेदावगमात् एवंदूरत्वसामीप्यधीरप्युपाधिबिंबयोरांतरालिकप्रभायादीर्घादिप्रसारहेतुकाववगंतव्या । न त्वाकाशप्रतिबिंबतदितिभ्रमितव्यं निरवयवस्यनीरूपस्यापिप्रतिबिंबसंभवेकालादेर्वायोश्च कुतोनतत्स्यात् ? कालादिषुस्वच्छतायास्त्वयांगीकृतत्वेनतत्प्रतिबिंबावश्यंभावात् दार्वादेःप्रतिबिंबदर्शनात् । नापिस्वमतेस्वच्छतावदस्वच्छतायामपिविजातीयत्वंकल्प्यं; अप्रयोजकत्वात्, नीरूपत्वेनैवतत्सिद्धेः ॥ एवमंबरप्रतिबिंबप्रतिविधानेनपट्टस्यापिव्यभिचारःपरिहृतः ॥ उपाध्यंतरगतंनप्रतिबिंबतइतिदूषणंतुनिर्वर्णकाराद्यभिमतेबिंबेश्वरवादएवमुख्यतयादत्तमास्माकीनैरितिशुद्धचित्प्रतिबिंबवादेतदनुपाद्दोषौत्यात् । तथापिअनूदितत्वात् सर्वपक्षेप्येतच्छक्यमसरंसमर्थ्यते उपाध्यंतर्गतत्वादात्माकाशयोःप्रतिबिंबमशक्यवचनं; दर्पणेतद्गतरेखादेर्जलेतत्स्थमीनतन्निमग्नपुरुषादेश्चप्रतिबिंबादर्शनात् ॥ यत्तु (तद्विकारस्यनतत्रप्रतिबिंब) इति नियमादप्रयोजकत्वमुक्तं,—तदप्येतेननिरस्तं; अन्वयव्यतिरेकव्यभिचारग्रस्तत्वात्, मीनपुरुषादेर्वारिविकारत्वाभावात्, तद्विकारस्यापिहिमकरकादेःपृथग्भूतस्यतत्रप्रतिबिंबदर्शनाच्च ॥ एवमेकदर्पणमणिप्रणीतधरणीरुड्प्रतिकृतिप्रभृतिषुसंक्रमानांतद्विकाराणामपिफलप्रवालादी-

नांतदालयालादौप्रविफलनमपिनियमभञ्जकमनुसंधेयं ॥ व्याप्यवृत्तेरपिप्रतिबिंबांगीकारे-स्फटिकाद्यवच्छिन्नाकाशस्यदर्पणगतरूपादेश्चतत्रतत्रप्रतिबिंबापत्तिः । किंचजलाद्यवच्छिन्न एवाकाशस्तत्रप्रतिबिंबतइतिस्वीकारेतवगांभीर्यबुध्यनुदयप्रसंगः; तावदाकाशांशस्यतथात्वात् ॥ अथतत्रस्थितोंशोनप्रतिबिंबतेकिंतूपरितनएवमहांशइतिस्वीकारेतुतद्दृष्टांतेनआत्मनोप्यंशविभागापत्त्यानिरवयवत्वशब्दकोपोबिंबेश्वरवादस्यचमूलतएवोच्छेदः ॥ अस्माकंप्रभामंडलंतूपरिष्टमेवप्रतिबिंबेतनतुतत्रविष्टमित्यदोषः । यच्च (आकाशस्योक्तरीत्या-परिच्छिन्नत्वेतुदृष्टांतेहेत्वभानोऽसाधारण्यंचे)ति,–तदकिंचित्करं; पक्षेदृष्टांतेचानुगतस्यापरिच्छिन्नत्वस्यप्रागेवलक्षितत्वात् ॥

एवंचाकाशस्यप्रतिबिम्बासंभवेन (अत्राकाशस्यजलाधारत्वंतत्रप्रतिबिंबितत्वंचेत्यवच्छेदभेदेनद्विधाजलेस्थितिरितिब्रह्मजीवयोरप्येकत्रतथास्थितौनबाधक) मित्यादिनास्वमतमात्रप्रसिद्धंदृष्टांतंवदन्नुपेक्ष्यः, किंचातिसमीपदर्पणादिगतरेखादीनांदर्पणेप्रतिबिंबादर्शनेनजलनिमग्नमुखादीनांचजलेप्रतिबिंबादर्शनेनमायांतर्वर्तिब्रह्मणोमायायांप्रतिबिंबासंभवेन "द्वासुपर्णासयुजासखाया" इत्यादिश्रुतेः "गुहांप्रविष्टावात्मानौहितद्दर्शना" दितिसूत्रस्यचविरोधस्त्वन्मतेस्यात् ॥ गगनप्रतिबिंबासंभवस्यासकृत्प्रतिपादितत्वेन ("आकाशवदेवोपपत्तेः") इत्यादिनाविरोधंपरिहरन्नुपेक्षणीयः। यत्त्वित्यादिनाविद्वन्मंडनोक्तंकिंचिदनूद्य (तदपिनसम्यगित्याद्युक्त्वा) (विभ्वोरसंयोगेप्रमाणाभावा) दित्युक्तं,–तदपिनयुक्तिसहं। तथाहि–विभुद्वयसंयोगमंगीकुर्वतासंसंयोगःकीदृशइतिवक्तव्यं, अन्यतरकर्मज उभयकर्मजो वा संयोगजोवा ? नाद्यः, विभ्वोःकर्माभावात्। नह्याकाशेकालेवाकश्चित्कर्माभ्युपैति, अतएवद्वितीयोपिन। नापितृतीयः; सचयथाहस्ततरुसंयोगात्कायतरुसंयोग हस्तक्रिययातरणाहस्तसंयोगेजातेऽवयविनाकायस्यापिस्वावयवसंयोगजन्योभवतिः संयोगस्तथात्रापियदिकालस्याकाशस्यवासावयत्वंस्यात्तदातदवयवक्रियाजन्यस्तत्संयोगोपिस्यात्। नचत्वन्मतआकाशादीनांसावयवत्वंयेनतादृशसंयोगमंगीकुर्याः ॥ तथाचतदीयविशेषाभावकूटस्यतत्सामान्याभावव्याप्यतयातद्विशेषाभावकूटस्यैवविभुद्वयसंयोगसामान्याभावेमानस्यविद्यमानत्वेमानाभावकथनंसाहसमात्रमेवमायायाःपरिच्छिन्नत्वांगीकारेप्यसंयुक्तस्यैवप्रतिबिंबदर्शनेनब्रह्मणस्तत्रप्रतिबिम्बंसंभवति। नचसंयोगस्याव्याप्यवृत्तित्वादसंयुक्तत्वमप्यस्त्येवेतिवाच्यं; तथासत्यंतदर्पणसन्निकृष्टरेखादीनामपितत्रप्रतिबिंबापत्तिः आकाशप्रतिबिम्बस्यसर्वथैवासंभवेन (आकाशेव्यभिचारादेवनसत्तम.) इत्यसंगतं;

अतएव (प्रथमदृष्टांतेसाध्याप्रसिद्धेश्च) इत्यप्यसंगतं; प्रथमदृष्टांतस्योभयवादिसंमतत्वादितिसुवक्तव्यं । त्वन्मतेगगनप्रतिबिंबस्यस्वीकारात् किंचस्वमतानुसारेणव्यभिचाराद्युद्भावनेपरार्थानुमानमात्रोच्छेदः तवाभिमतस्याप्यसिद्धिश्चस्यात्; परेणस्वमतानुसारेणासिध्यादेरुद्भावयितुंशक्यत्वात् ॥

सहस्त्राक्षेअथाकाशस्येत्यादिसाध्याप्रसिद्धेश्चेत्यंतंभागंदूषयंति–एवंचाकाशस्येत्यादिना उद्भावयितुंशक्यत्वादित्यंतेन ॥ स्वमतमात्रप्रसिद्धमिति । उभयवादिसंमतिमंतरा तादृशस्यदृष्टांतत्वायोगात्तंमद्दूषेश्यएवेतियुक्तं । गौतमेन (अ० १ आ० १ सू० २५) "लौकिकपरीक्षकाणांयस्मिन्नर्थेबुद्धिसाम्यंसदृष्टांत" इतितल्लक्षणस्योक्तत्वात्बुद्धिसाम्यानधिकरणस्यदृष्टांतत्वंनैवयुज्येतेतिभावः ॥ द्वासुपर्णेति इदंतृतीयमुंडकवाक्यं । सूत्रंचेदंप्रथमस्यद्वितीयपादस्थं अत्रनिर्देपमग्रेवक्ष्यामः । कर्मोप्युपैतीति । संयोगजनकंनैयायिकपरिभाषाप्रसिद्धोत्क्षेपणाद्यन्यतमं तद्यत्कोपिस्वीकरोति । तेनानकाशत्वानादिमत्त्वचेष्टाहेतुत्वादेर्वियत्समयप्रभृतौ स्वीकारेपिनातिप्रसंगः । अतएवेति अन्यतरत्रापिकर्मणोसंभवेउभयत्रतदसंभवस्यकैमुतिकसिद्धत्वादेव । तदीयविशेषाभावेत्यादि । यत्रयत्रवायुतेजःप्रभृतौमधुरक्षारादिरसविशेषाणामभावकूटं तत्रतत्ररससामान्याभावोप्यस्त्येवेतिवयाप्तिःस्पष्टा । अत संयोगविशेषाणांत्रयाणामप्यभावकूटमेवविशुद्धसंयोगसामान्याभावेमानं ॥ अत्यंतदर्पणेत्यादि । दर्पणात्यंतसन्निकृष्टेत्यर्थः ॥ सुवक्तव्यमिति । अनयैवारुच्याप्रतिबिंबतादूपकानुमानप्रयोगेवायुवच्चेतिद्वितीयदृष्टांतोपादानं ॥ अत्रापीदमधिकमवधेयं–यच्च अत्राकाशस्येत्यादि उपपादितत्वादित्यंतंतदपि विहायस प्रतिच्छायाप्रतिषेधेनैवप्रतिहतंवेदितव्यं । "द्वासुपर्णौगुहांप्रविष्टावि"त्यादिश्रुतिसूत्रविरोधस्तुत्वदुष्परि-

---

अत्राकाशस्य जलाधारत्वे तत्र प्रतिबिम्बितत्वं चेत्यवच्छेदभेदेन द्विधा जलेस्थितिरिति ब्रह्मजीवयोरप्येकत्र तथास्थितौ नबाधकम् ॥ एतेन लोकेबिम्बप्रतिबिम्बयोरेकत्रस्थित्यदर्शनेन 'द्वासुपर्णा गुहांप्रविष्टौ' इत्यादिश्रुतेर्गुहांप्रविष्टावितिसूत्रस्य च विरोधइति आत्मनः सर्वगतस्य सर्वगतायां मायायां सत्वेन कथं प्रतिबिम्बः स्यादितिच विद्वन्मण्डनोक्तं प्रत्युक्तम्; आकाशवदेवोपपत्तेः, मायायाः परिच्छिन्नत्वस्योपपादितत्वात् ॥ यत्तु विद्वन्मण्डने 'नचसंयोगसंबन्धेन तत्र वर्तमानत्वमप्रतिबिम्बेप्रयोजकम्; एतयोश्च न संयोगोविभुत्वात् अतोनानुपपत्तिरितिवाच्यम्; संयुक्तस्याऽपि प्रभामण्डलस्य तथाप्रतीतेः ॥ नच यदंशे संयोगस्तदंशे न तथेतिवाच्यम्; विततिनीरूरमानान्तरिताङ्गुलीतलभागस्यप्रभाया अपि दर्पणे प्रतिबिम्बादित्युक्तं,–तदपि नसम्यक्; सभागस्याव्याप्यवृत्तितयाततोऽत्यान्तरितस्यायाथार्थाशकल्पनायाःसम्भवेन चासमाधानत्वात् ॥ बिम्बोरसंयोगे प्रमाणाभावान्मायायाः परिच्छिन्नत्वस्योक्तत्वात् पूर्वपक्षोऽप्यकिंचित्करः ॥ ३३ ॥ आकाशे व्यभिचारादेव न सत्तम. ॥ प्रथमदृष्टान्तेसाध्याप्रसिद्धेश्च ॥

हरः । तथाहि—प्रतिबिंबस्यालीकत्वेनद्वित्वसंख्यायाबाधः । इदानींबिंबतयातनदभिप्रेतायाः
शुद्धचितोनिराकारत्वेनसादृश्यनिर्वाहकधर्मराहित्येनचसुपर्णत्वसखित्वयोस्ततएवसायुज्य-
स्यचासंगतिः । बिंबप्रतिबिंबयोःसहयोगानिष्पत्तेश्चब्रह्मांडकारणमायाबहिर्भूतायाश्चित.स-
मानवृक्षपरिष्वंगासंभवः । "तयोरन्यःपिप्पलंस्वाद्वत्ती" तिप्रतिबिंबक्रियांविनाप्रतिबिं-
बेतददर्शनात् उपाधेर्जडत्वेनस्वादनाद्ययोगाच्चएवमेतदभिमर्शु "असमहिमान" मिति
श्रूयमाणंजीवस्यब्रह्मविभूतित्वंबिंबस्यचित.कर्तृत्वादिकंतत्साम्योपायनादिकं चविरुध्यते;
प्रतिबिंबस्याबिंबानंशत्वात्चितोनिर्विशेषत्वात् उपाधिनाशेप्रतिबिंबनाशनियमेननिरुपाधेः-
साम्योपायनाद्ययोगाच्च मायांतर्गतस्यैवबिंबत्वांगीकारेतुबिंबेश्वरवादापत्त्या आकाशदृष्टांत-
बाधएकत्रस्थित्याप्रतिबिंबत्वस्याप्यसिद्धिश्च । किंचाकाशतत्प्रतिबिंबयोरन्यतरोपिनजलं-
प्रविशति प्रकृतेच "गुहांप्रविष्टावात्मानौहितदर्शना" दित्यादिपुतयोरेकत्रसहप्रवेश-
उच्यते । नहिबिंबप्रतिबिंबयोरेकत्रसहप्रवेशादिदृष्टचरं । नचप्रतिबिंबस्योत्पत्तिरेव-
प्रवेशत्वेनोपचर्यंततिवाच्यं; तथाक्लेशमानाभावात्सूत्रेतथैवबहुभौचित्येनसंदेहवारकेपि-
तत्रप्रवेशत्वेशोपपादनस्यायोग्यतापत्तेः, "अनेनजीवेनात्मनानुप्रविश्ये" तिप्रवेशात्पूर्वं-
जीवसत्ताबोधकश्रुतिविरोधाच्च । मन्मतेतुद्वासुपर्णेत्यादिवाक्यानिभगवद्दंशयोर्जीवांतर्या-
मिणोःस्थितिप्रवेशादिनिरूपकाणि ॥ सर्वप्रपंचकारणत्वेनसर्वगतायांमायायांचविभु-
चित.प्रतिबिंबसुवरांदुर्वचं । बिंबस्यतस्याश्चैकत्वेनबहुप्रतिबिंबासिद्ध्याजीवानेकत्वबोधि-
कानां "सर्वेजीवा सर्वमयाः । तथाक्षराद्विविधा सोम्यभावाः । सर्वएवात्मानं"
इत्यादितापनीयमंडूकबृहदारण्यकादिश्रुतीनांव्याकोपात् पुण्यपापादिशास्त्रीयव्यवस्थाभं-
गात् । एकमुक्त्यासर्वमुक्तिप्रसगात् उपाधिबिंबयोर्विभुत्वेनस्वस्यापिविभुतया "शरीरं-
यदवाप्नोतियच्चाप्युत्क्रामती" त्यादीनामपिविरोधाच्च ॥ नचअन्तःकरणनानात्वे
नेष्टंसाधनीयं; जीवनैरर्थक्यप्रसक्तेः तदेवबद्धं, तदेवचसाधनैर्मुक्तमित्यापत्त्याशास्त्रस्यजीवा-
धिकारकत्वबाधाच्च । विस्तरस्त्वन्यत्रावधेयः । यच्च (यत्तुविद्वन्मंडन) इत्यादि
(अकिंचित्कर) इत्यंतं,-तद्भ्रमसात् । संयोगेऽव्याप्यवृत्तितासा मायिकत्वात् ।
परमाणूनांनिरवयवत्वेनतद्व्यसयोगेव्यभिचारात् घटादिष्वाकाशसंयोगस्यापिव्याप्यवृ-
त्तित्वात् । किंचसयोगस्याव्याप्यवृत्तित्वंसार्वत्रिकमभिप्रायन् अनुपदमेवविभ्वोर-
संयोगेप्रमाणाभावंचवदन्मतिमानसि विभ्वोःसंयोगांगीकारेतस्मिन्नव्याप्यवृत्तितायाअ-
शक्यवचनत्वात् अन्यथाविभुत्वाभावप्रसक्तेः । अतोत्यंतसूक्ष्मायांप्रभायामव्यस-
युक्तांशंपरिकल्प्य तावन्मात्रस्यप्रतिबिंबितत्वकल्पनेमानाभावः ॥ अत्रहिब्रह्मणोव्या-
प्यवृत्तित्वेनप्रतिबिंबानुदयापत्तिं पूर्वग्रंथप्राप्तामुद्धर्तुंप्रवृत्तस्य उपाधिबिंबसयोगस्यैवा-
प्रतिबिंबप्रयोजकत्वनियमेनप्रकृतेचसयोगाभावाददोषइतिपूर्वपक्षस्याशयः । सयुक्तस्यापि-
प्रतिबिंबप्रदर्शनेनतथानियमोऽशक्योऽसोव्याप्यवृत्तित्वतदंतस्थत्वेएवाप्रतिबिंबप्रयोजकेतत-
श्चप्रकृतेप्रतिबिंबानुपपत्तिर्दुरुद्धरेत्युत्तरपक्षाशयः । विभ्वोरसयोगेमानंतुकेषांचित्संयोगा-
व्याप्यवृत्तित्वाभिमानः परेषांकालाकाशादिषुपरस्परसयुक्तत्वव्यवहाराभावाच्च । सयुक्त-
व्यवहारहेतुगुणत्वस्यैवसयोगलक्षणत्वात् विभ्वोरसयोगस्यचबहुदर्शनसंसत्त्वात् तावके

कश्चिदविद्याब्रह्मणोःस्वरूपसंबंधस्यांगीकाराच्च तथापूर्वपक्षोपिनिरवद्यः ॥ (यत्तुमायायाःपरिच्छिन्नत्वस्योक्तत्वात्) इत्युक्तं, तस्यायमाशयःस्यात्-घटाकाशवदविद्याब्रह्मणोरपिसंयोगःसुवचइतिअत्रब्रूमः किंमायायायद्बहिर्भूतस्य "अत्यतिष्ठद्दशांगुल" मित्यादिश्रुतिवेद्यशुद्धब्रह्मणस्तयासहसंयोगमभिप्रैपि उततदंतर्गतस्यैव ? नाद्यः; निर्विशेषत्वभंगप्रसंगात् । द्वितीयश्चेद् घट्टकुटीप्रभातं मायासंयोगोत्तरंभनीतानांधर्माणांमायिकत्वकथनस्यकथंचित्संभवेपितत्संयोगस्यशुद्धनिष्ठतायाअवश्यवक्तव्यत्वात् संबंधमंतराव्च्छिन्नतानुपपत्तेः । किंचांतस्यमायातुल्यपरिमाणकत्वेनद्वयोस्तुल्यविभुत्वात् "सर्वगतब्रह्मणोऽविद्यायामपिसर्वगतायां" मितिग्रंथोक्तदोषस्तद्वस्थः । किंचतस्याःपरिच्छिन्नत्वेतत्रप्रतिबिंबस्यजीवस्यापिपरिच्छिन्नत्वात्इयंभावात्तद्विभुत्वासिद्धिः, अणुत्वंचनैवांगीक्रियतइतिमध्यमपरिमाणमुररीकुर्वन्नार्हतसोदरीभवसि ॥ अयंदोषोवच्छेदवादेपिसमानः । यच्च (आकाशेव्यभिचारादेवनसप्तम) इति तत्रकेचित्तावत्काशुवनीलंनभइतिप्रतीत्याआकाशस्यप्रातिभासिकरूपवत्वेनप्रतिबिंबः, ब्रह्मणस्तुसर्वथारूपाभावान्नसोऽतोवच्छेदवादएवश्रेयानितिवदंति । नचैवंप्रथमदृष्टांतेहेत्वसिद्धिः; पंचमाविलिंगकेनुमानत्रयेस्माभिः कालस्यदृष्टांतीकरणात् । नचब्रह्मणोप्यारोपितरूपवत्वएवप्रतिबिंबमितिवाच्यं; स्वोदाहृतशुद्धचित्प्रतिबिंबपक्षापक्षपातात् नीलिमवदारोपितानांजगत्कर्तृत्वनेशितृत्वसर्वज्ञत्वादीनाजीवेपिप्रतीतिप्रसक्तेः जीवेश्वरयोस्तुल्यविभुत्वेनैकत्रस्थितस्यकस्यापिनीलिम्नः प्रातिभासिकेपोपाच्च ॥ दोषाणांतुपपत्त्यादिप्रतिच्छायातुअनिर्वचनीयख्यातिस्वीकारेणतस्यमायिकरूपत्वेनयथायथंमतद्वितयेपिवस्तुस्वभावादुपपादितेवेतिकिंप्रासंगिकेन । वस्तुतस्त्वंबरप्रतिबिंबनिराकरणादेवनसप्तमोपिव्यभिचारी ॥

यत्त्वित्यादिनाशुद्धाद्वैतमार्तंडटीकाकृदुक्तं-किंचिदनूद्यतन्नेत्यादिना (सामग्र्याविशेषाभावेनैकत्रोद्भूतमन्यत्रानुद्भूतमित्यत्रगमकाभावा) दित्यादिदूषणोद्धारत्नंकृतं,-तदपिनसाधीयः; दूषणस्यतुल्यत्वात् ॥ त्वन्मतेपिपंचीकरणस्योक्तत्वेनवाय्वादौरूपवद्द्रव्यत्रयसंबंधस्यसत्वेनरूपोत्पत्तिःकथंनस्यात् ? नचांशांतरैःप्रतिबंधान्नरूपोत्पत्तिरितिवाच्यं; एवंसत्यंशद्वयेनप्रतिबंधात्तेजस्यपिरूपोत्पत्तिर्नस्यात् । नचांशत्रयस्यैवप्रतिबंधकत्वमितिवाच्यं; अंशत्रयस्यप्रतिबन्धकस्यसत्वाद्यथावायौरूपोत्पत्तिर्नभवतितथैववायोस्पर्शवदंशत्रयस्यसत्वेनस्पर्शोत्पत्तिरपिनस्यात्; विनिगमकस्याभावात् ॥ सामग्र्याअविशेषेपिस्वभावविशेषस्यैवविनिगमकत्वेनैकत्ररूपोत्पत्तिरन्यत्रनेतिव्यवस्थास्वीकारेतादृशस्वभावविशेषस्यवायावनुद्भूतरूपत्वस्यगगनेउद्भूतरूपवत्वस्यचप्रयोजकस्यापाकर्तुमशक्यत्वात् अतएव "अच्छंवियन्मरुत्कृष्णोरक्तोग्निर्विशदंपय" इतियोगशास्त्रसिद्धांतोपिसंगच्छते ॥ नचगगनउद्भूतरूपस्वीकारेप्रत्यक्षहेतूनामुद्भूतमहत्वालोकसंयोगचक्षुःसंयोगादीनांसत्वेनतच्चाक्षुषं-

स्यादितिवाच्यं; इष्टापत्तेः, अवकाशात्मनाकाशस्यप्रत्यक्षत्वात् अन्यथाऽत्रावकाशोस्त्यत्रस्यातव्यमितिव्यवहारस्यसार्वजनीनस्यविलोपापत्तिः । नचाकाशेरूपस्वीकारेसन्निहितावकाशेरूपप्रतीतिःस्यादितिवाच्यं; नीहाररूपवत्संनिधानेऽप्रत्यक्षेपिदूरेतस्यैवप्रत्यक्षसंभवात् । नचसाप्रतीतिर्भ्रमरूपैवेतिवाच्यं; तदुत्तरंकदापिबाधादर्शनेनभ्रमत्वस्यवक्तुमशक्यत्वात् । बाधबुद्धिंविनापिभ्रमत्वस्वीकारेसर्वबुद्धीनामप्रामाण्यज्ञानावस्कंदितत्वसंभवेनकुत्रापिविषयनिश्चयोनस्यात्; एवंच जलेगंधाभावस्यपृथिव्यांस्नेहाभावस्यचप्रतीतिसत्वेपितत्रगंधस्नेहयोः प्रतीत्यापत्तिर्भ्रमत्वज्ञानस्यसंशयनिश्चयसाधारणस्यैवोत्तेजकत्वेनाप्रामाण्यशंकास्कंदितस्यापितादृशनिश्चयस्यप्रतिबंधकत्वासंभवादनाहार्याप्रामाण्यज्ञानानास्कंदितविरोधिनिश्चयस्यैवप्रतिबंधकत्वादित्यलमप्रकृतविचारेण ॥ अथाकाशस्यरूपवत्वंप्रत्यक्षत्वंचयदास्वीक्रियेत तदातस्यप्रतिबिंबोपिकुतोनस्यात्? रूपवतः प्रतिबिंबनियमादितिचेत् मैवं; यथारूपवतः प्रतिबिम्बोभवत्येवेतिनियमस्तथारूपहीनस्यप्रतिबिम्बोनभवत्येवेतिनियमोऽपिस्वीकार्यःतादृशनियमविरोधेपियथाकाशप्रतिबिंबोभवद्भिःस्वीक्रियतेतथास्माभिस्तादृशनियममनादृत्यरूपवतापिप्रतिबिम्बस्यस्वीकारेपिकोविरोधः? तस्माद्यथाकाशस्यरूपवत्वंतथैवप्रतिबिम्बमपिनसंभवतीतिबोध्यं । वायोःप्रतिबिम्बंस्वीकुर्वताकालादीनामपिप्रतिबिम्बमंगीकर्त्तव्यं, तद्ग्रहस्तुकालादीनामतींद्रियत्वेनसमाधातुंशक्यः । यत्तु (सावयवेएवप्रतिबिंबइत्यादिरूपंनियमकरणंश्रुतियुक्तिभ्यांबाधित) मित्युक्तं,-तदपिनिरवयवस्यप्रतिबिम्बप्रतिपादकश्रुत्यदर्शनेनयुक्तेश्चखंडितत्वेनतद्विरोधशंकायाअप्यभावेनदूरतोनिरस्तं ॥ "अंबुवद्ग्रहणा" दित्यादिसूत्रंतुनपूर्वपक्षपरं, किंत्वेकदेशिनाप्रतिपादितस्यजडजीवधर्मसंबंधेनलर्पकर्मत्वादीनांब्रह्मण्युपचारस्यनिषेधपूर्वकस्वसिद्धांतव्यवस्थापनपरं । अतएवतादृशसिद्धांतव्यवस्थापनार्थमेकदेशिप्रतिपादिततादृगौपचारिकत्वनिराकरणस्तुशब्दःसूत्रेप्रयुक्तः । तुशब्देनोच्यतेएकदेशिप्रतिपादितेनसम्यक् । कुतः? अबुवद्ग्रहणात्, सर्वस्मात्परस्यब्रह्मणःप्रतिबिंबेसतिअधिकरणधर्मवत्वमेकदेशिनासिद्धांतितं । तत्रतन्मतेनिराकर्तव्येरूपरहितंतत्रविद्यमानेचनप्रतिबिंबतइतिदूषणंवक्तव्यं, ब्रह्मणोजगद्वैलक्षण्यंवदताएकदेशिनाब्रह्मणिनीरूपत्वस्यव्यापकत्वस्यचतत्रांगीकारात् । तथाप्येवमुक्तौ सिद्धांतिनमपिपर्यनुयुंजीत, सिद्धांतेपिविरुद्धधर्माश्रयत्वांगीकारेणतयोरंगीकारात् अतःस्वमतविरोधात् प्रतिबिंबाधिकरणविभावमादा-

यन्मतदूषकंहेतुमाह-सूत्रेअंबुवद्ग्रहणमिति । अंबुस्वच्छंतस्मादंशेन-
संश्लिष्टस्यसूर्य्यादेःप्रतिबिंबंगृण्हाते। नहितथाधर्माग्रहीतुंशक्नुवंतिय-
तोधर्मामनोभवादिशब्दैकदेशोक्तानिपृथिव्याघटादयइवब्रह्मणउपादे-
यानिमनःप्रभृतीनिकार्य्याणिअस्वच्छानि "जलादिवदंशेनसंश्लिष्टस्य-
ब्रह्मणः प्रतिबिंबग्रहीतुंनशक्नुवंति" । अस्वच्छेहिप्रतिबिंबंनसंभवति,
किंचसमवेतंहिकार्यंकारणस्यावस्थाविशेषरूपत्वात्तद्धर्मभूतंस्यात् ।
नहिसमवेतेकार्यंसमवायिनःप्रतिबिंबःक्वापिदृष्टचरोनाप्यस्वच्छेक-
स्यापि ॥ अतःसमवायिव्यतिरिक्तस्यसमवायिनश्चब्रह्मणोग्रहीतुम-
शक्यत्वबोधनायांबुवद्ग्रहणादित्युक्तं । ननुमास्तुधर्माणामुपाधि-
भूतानांप्रतिबिंबग्राहकत्वंब्रह्मणःसर्वाधारतयाब्रह्मण्येवमनःप्रभृतीनां-
मनोमयत्वादीनांचप्रतिबिंबोऽस्तु; तथासतितेषांधर्माणामौपचारिक-
त्वमेवसेत्स्यतीतिचेत्,-मैवं; रूपरहितस्यसर्वेद्रियाविषयस्यब्रह्मणःप्र-
तिबिंबग्राहकत्वेमानाभावात्। किंच तद्धर्माश्रयत्वमेवचेद्ब्रह्मणःस्वी-
कृतंतदाकथंतेषां तत्रप्रतिबिंबः? । नहिदर्पणगतरूपादेर्दर्पणेप्रतिबिंबं-
संभवति । ननुयदिद्वयोरयोग्यतैवतदातेश्रुतौजलचंद्रादिदृष्टांतासंग-
तिरितिचेत्-न; एकस्यैवोपाधिभेदेननानात्वबोधनार्थंतथाकथनात् ।
अतएव "एकधाबहुधाचैवदृश्यते" इत्युक्तं । तस्माद्ब्रह्मधर्माएव सर्व-
कामत्वादयोनतूपाधिसंबंधादौपचारिका इति सिद्धांतप्रतिपादकमेव
तत्सूत्रं न प्रतिबिम्बं प्रतिपादयति ॥ "आभासएवचे" तिसूत्रार्थ-
स्तुप्रागेवोक्तः । तेनचयदित्यादिकंनिरस्तं । "रूपंरूपंप्रतिरूपोब-
भूवे" त्यपिनप्रतिबिम्बप्रतिपादकं, किंतु "सूर्योयथासर्वलोकस्य-
चक्षु" रित्यादिदृष्टांतानुसारेणांशपक्षमेवप्रतिपादयतिप्रतिपुस्तकन्या-
यस्यविद्वन्मंडनटीकाकृदुक्तस्याप्यत्रैवतात्पर्य्यं । अस्यपुत्रोस्यप्रतिरूप-
इतिलोकव्यवहारदर्शनादुपप्रतिरूपशब्दयोर्बिम्बरूपार्थएवरूढिर्ना-
न्यत्रेत्यत्रापिविनिगमकाभावात् (रूढ्यर्थस्य) त्याद्यसंगतं, चंद्रमंड-
लस्यजलेप्रवेशाभावेपितत्किरणस्यापितदवयवत्वात्तत्प्रवेशेप्यंशत्वं-
संभवति ॥ तथाचजीवस्यांशत्वेपि "एकधाबहुधाचैवदृश्यतेजल-
चंद्रव" दितिदृष्टांतस्यसंगतत्वाद्यच्चेत्यादिकमपास्तं । यदपियच्चेत्या-
दिनाअसद्ग्रंथोक्तं "जीवेशावित्यत्रकार्यंजीवेशग्रहणहिरण्यगर्भादीनां-
कार्येश्वरत्वाज्जीवोजीवंविहायमामित्येकादशेकार्यंजीवस्याऽभिधा-
नाच्चे" त्यनूद्य (तन्न युक्तम्) इत्युक्त्वा (तादृशयोरपिप्रतिबिम्बत्वे-
नियममात्रभंगापत्त्या "अंतरंडाविशाहश्चेदादावेवकुतोनहि") त्यादि-
कुतर्काणामापादनं,-तदपिपराभिप्रायमबुध्वैव ॥ नहि "जीवेशावा-

भासेनकरोती" तिश्रुतेःप्रतिबिम्बरूपौजीवेशौकरोतीत्यर्थस्तेषांसंमतो-येनपश्चात्प्रतिबिम्बपक्षःस्वीकर्त्तव्यश्चेत्पूर्वमेवकथंनस्वीक्रियतइत्याक्षेपःस्यात् किंतुभगवच्छक्त्यायत्किंचित्तिरोहितानंदःसर्वलोकनियंतृत्वादीशोहिरण्यगर्भईशः । जीवश्चात्यंततिरोहितानंदस्तिरोहितज्ञानशक्तिश्च । अतएवआभासः हिरण्यगर्भोप्याभासएव, यथाराजभृत्योराजवत्प्रतीयमानोप्याभासः । एवंचमायाभगवतः साधर्म्यविशेषआभासेनेतितृतीयाःभेदबोधिका तथाचाभासरूपौजीवेशौकरोतीत्यर्थः । यथाऽनाचारीब्राह्मणोब्राह्मणाभासस्तद्वत् जीवंविहायेत्यत्रजीवपदमपिकार्य्यं हिरण्यगर्भरूपजीवपरमेवतत्र "सवैशरीरीप्रथम" इत्यादिवाक्येनतस्यैवमुख्यजीवत्वकल्पनात्जीवपदस्यजीवनकरणलिंगशरीरपरत्वेमानाभावात् (जीवोजीवात्मे) त्याद्यसंगतं । आभासाएवेत्यादिपाठस्तुसूत्रभाष्याद्यदृष्टःस्वकपोलकल्पितएव ॥

सहस्राक्षेयत्तुशुद्धाद्वैतमार्तंडेत्यादिविशृंखलत्वाद्वित्युपेक्ष्यइत्यंतंभागंपरिहरति यच्चित्यादिनेत्यादिनास्वकपोलकल्पितएवेत्यंतेन–वाय्वादावित्यादि । वायावाकाशेचापिरूपवतांपृथिव्यप्तेजसांसंबंध एकैकभूतस्यपंचभूतात्मकताकरणलक्षणेपंचीकरणेऽस्त्येवेतितयोरपिरूपोत्पत्ति स्यादेव । नचांशांतरैरित्यादि । एतत्सर्वंस्थूलमानेनपंचसुपंचानांसत्वमात्रमभिप्रेत्योच्यते । एवंघनीरूपयोर्द्विरंशात् रूपवत्त्वांत्रित्वाच्च तयोरपिरूपोत्पत्तिः स्यात् । अंशद्वयस्यापिप्रतिबंधकत्वादरेतेजस्यापितदुत्पत्तिर्नस्याद्वाय्वाकाशांशाभ्यांप्रतिबंधात् । अथतेज प्रभृत्यंशत्रयमेव वाय्वाकाशयोःस्थितंसत् तत्रस्वगुणोत्पत्तिंप्रतिबध्नातीत्युच्येत तदावायौस्पर्शोत्पत्तिमपितत्प्रतिबध्नीयात् । एतत्सर्वंस्थूलमानादुक्तं । वस्तुतस्तुतेषांपंचीकरणप्रकार.पंचदश्यादिषु (प्र० १ श्लो० २७) "द्विधाविधायचैकैकंचतुर्धाप्रथमंपुनः । स्वस्वेतरद्वितीयांशैर्योजनात्पंचपंचते" तिप्रसिद्ध॰ । एवंचाकाशादिषुपंचसुचत्वार.स्वस्वांशाःचत्वारश्चभूतांतरांशा इतिप्रतिभूतमष्टाष्टांशाभवंतीतिनभस्यन्नभसो.पंचनीरूपांशसत्वादधिकैस्तैर्न्यूनानां रूपवदंशानांत्रयाणामुपमर्द स्यात् । अतोनतयोरूपोत्पत्तिरितिचेत्,–नायंनियमोयदेकीभूतेभूतेऽधिकांशैर्न्यूनांशानांबाधएवेति । व्रीहिगोधूमचणकादिचूर्णपूर्णसिताघृतानेकपरिमलद्रव्यनेकमिश्रणप्रणीतपक्वान्नानांभक्षणेपृथक्तत्तद्रसानुभवात् शाकपाकविशेषेषुअत्यल्पानामपिदधिहिंगुमरीचलवणशर्करादीनांयथासंभवंरूपरसगंधाद्यनुभवाच्च ॥ अथतथैवेहपृथिव्यांचतुर्भि स्वांशैर्गंधस्योत्पत्तिवद्गंधैश्चतुर्भिरितरांशैस्तस्यप्रतिबंधोपिकुतोनस्यात्? एवंदेववस्मेनिचतुर्भि स्पर्शप्रतिबंधनत्स्पर्शवद्भिश्चतुर्भिरितरांशै स्पर्शोत्पत्तिरपिकुतो नस्यात्? अतः प्रागुक्तादिसर्वानुभवानिर्वाहायतत्रतत्रतत्तदुद्भवानुद्भवयोर्भगवदिच्छावस्तुस्वभावोवाहेतुरवश्यमभ्युपेय, क्वचिदपिकस्यचिदुद्भवानंगीकारेपंचीकरणस्वीकरणमप्यपार्थंतार्किकादिवत्स्वस्वगुणमात्रेणनिर्वाहेव्यर्थगौरवापातात् । तदेतदाहु –सामग्र्या अविशेषइत्यादिना ॥ तत्रालत्ररूपनिर्देपमभवादेवयोगशास्त्रस्वरोदयादिषु सत्स्वपितत्तद्वर्ण-

विशेषवर्णनसंगच्छतइत्याशयेनाहुः–अतएवेति । वृद्धिह्रासभाक्त्वसूत्रभाष्यतत्प्रकाशावनु-सृत्याहुः–अवकाशात्मनेत्यादि । किंचभट्टमतेप्याकाशस्यचाक्षुषविषयत्वंस्वीकृतमेवेति-व्यवहारेभट्टनयमेवानुसरवात्त्वयापितत्स्वीकार्यमेव । अतएवश्रीधरस्वामिनापिचतुर्थस्कंधे

यत्तु शुद्धाद्वैतमार्तण्डटीकाकृत्पञ्चीकरणेन तेजआदेरंशस्याऽऽकाशेऽपि सत्त्वेन रूपवत्त्वोपपत्त्या तत्र शब्दप्रतिबिम्बाङ्गीकारेऽपि रूपवत्त्वेव प्रतिबिम्बादृति नियमाव्यभिचारः ॥ वायौतु नातिप्रसङ्गोरूपस्याऽनुद्भूतत्वात् ॥ उद्भूतरूपवत्त्वेव प्रतिबिम्बनियमादित्याह–तत्र,–सामग्र्याविशेषाभावेनैकत्रोद्भूतमन्यत्राऽनुद्भूतमित्यत्र गमकाभावात्, आकाशस्य चाक्षुषत्वापत्तेश्च स्पर्शवत्त्वप्रसंगाच्च ॥ तस्मादद्भ्यस्य स्पर्शवत्त्वेऽपि स्पर्शानुत्पत्तिवद्वायावि-चाशनये रूपसत्त्वेऽपि अंशपञ्चके तदभावेतत्प्रतिबन्धात्स्थूलाकाशे न रूपोत्पत्तिरित्याह–परैरिति ॥ अंशान्तरैरित्यर्थः ॥ प्रतिबिम्बस्याऽज्ञातताखीकारे आस्तां वायोः प्रतिबिम्बस्य ग्रहस्तु त्वचः प्रतिबिम्बाग्राहकत्वादेवोपपद्यते ॥ चक्षुषा तु स न गृह्यते; वायोस्त-दयोग्यत्वात् ॥ नचैवमाकाशप्रतिबिम्बोपि तेन न गृह्येत; आकाशस्येन्द्रियागोचरत्वात् ॥ अतएवाप्रत्यक्षेऽपि ह्याकाशे बालास्तलमलिनताद्यध्यस्यन्तीतिभाष्यं संगच्छते इति वाच्यम्; आकाशे बलाकाउड्डीयंतइति प्रत्यक्षबलेनाकाशस्य साक्षिवेद्यतया तत्प्रतिबिम्बस्यापि साक्षि-वेद्यत्वाङ्गीकारात् ॥ तस्मादिन्द्रियान्तरस्य प्रतिबिम्बग्राहकत्वाऽदर्शनेनतत्सामर्थ्याभावा-द्बाह्येन्द्रियेषु चक्षुषः श्रोत्रस्य च तदस्तीति बोद्धव्यम् ॥ सर्वाचेयं कल्पनातत्तच्छ्रुत्याद्यनु-गृहीता । परोक्तातु तद्बाधिताइत्याह–इत्ततोनियमनमिति ॥ सावयवे एव प्रतिबिम्बत-इत्यादिरूपं नियमनं नियमकरणं श्रुतियुक्तिभ्यां बाधितमित्यर्थः ॥ एवञ्च अम्बुवदग्र-हणात्तुनतथात्वमिति पूर्वपक्षसूत्रमपि लब्धपथम् ॥ २४ ॥ यत्तु आभासएवचेत्यस्य यथाऽनाचारीब्राह्मणोब्राह्मणाभासस्तथा तिरोहितानन्दांशोब्रह्माभासइत्यर्थमाह–तत्तु जीवे-शावाभासेनकरोति इत्यादिश्रुतिहृदयमपर्यालोच्य ॥ यत्तु विद्वन्मण्डनटीकाया रूपंरूप-मित्यत्ररूपंरूपंरूपयित्वाप्रतिपुस्तकन्यायेनमूलरूपोबभूवेतिव्याख्यातं,–तन्नयुक्तं; रूढ्यर्थस्य वाक्यान्तरस्वारस्यस्यच भङ्गापत्तेः ॥ मूलरूपत्वोपपादनस्यास्मदुक्तार्थत्वेपि सम्भवाच्च ॥ यच्च तत्रैव एकधाबहुधेयत्रचन्द्रदृष्टान्तेनांशप्रवेशोविवक्षितइत्युक्तं,–तदपिनयुक्तं; चन्द्र-मण्डलांशस्य जले प्रवेशाभावात् ॥ यच्च तत्रैव 'जीवेशावित्यत्र कार्यजीवेशग्रहणं ॥ हिरण्यगर्भादीनां कार्येश्वरत्वाज्जीवोजीवंविहायमामित्यत्रादर्शेकार्यजीवस्याऽभिधानाच्चेत्युक्तं,–तन्नयुक्तं; तादृशयोरपि प्रतिबिम्बत्वे नियमस्यानभङ्गापत्त्याऽन्तेरण्डाविवाहश्चेदादावेवकु-तोनहीतिन्यायापातात् ॥ हिरण्यगर्भादेरीश्वरत्वे मानाभावाच्च ॥ जीवोजीवमित्यस्यत्वय-मर्थः–जीवः जीवात्मा जीव जीवनकरणंलिङ्गशरीरं विहाय मां सपद्यते ॥ तथाच कुतोजीवान्तरस्यप्रमितिः ? ॥ येतु आभासएवचेतिसूत्रस्थाने 'आभासा'इतिपाठं प्रकल्प्य-अभेदयुक्तयआभासाइत्याहुः,–तेतु सर्वं वक्तुं शक्नुवन्ति; सर्वत्रपाठमन्यथाकर्तुं समर्थ-त्वात् ॥ किंचानेकैनैवसूत्रेण स्वप्रतिकूलंसर्वमाभासयितुं शक्नुवन्ति ॥ अभेदबोधकवेदा-नामेव तथाकरणे इतरत्र तत्सम्पादने श्रमाभावात् ॥ किंचैत्रमन्योप्यनेनैवैतदुक्तस्यसर्वस्य आभासत्वं कुर्यादित्ययं पाठोऽसमर्थश्च विश्वासभञ्जकएवविरुद्धत्वादित्युपेक्ष्य. ॥

(अ० २३ श्लोक १७) "इंद्रियेपुनभूतानी"त्यत्र "भट्टादीनांमतेनभश्चाक्षुषं केषांचिन्मानसं आनुमानिकत्वमतेपीद्रियव्यापारोस्त्येव" इत्युक्तं, तत्र'इंद्रियेपुमन'इतिपाठस्तुपूर्वश्लोकक्रमविरुद्धोनभासोलयाभावापादकश्चेतिप्रामादिकोभानीत्यन्यदेतत् । एतेन (आकाशस्यचाक्षुषत्वापत्ते.) इत्यवक्तव्यमेव । साप्रतीतिरिति । नीहाररूपप्रतीतिः । बाधादर्शनेनेति । नेदंरजतमित्यादिवत् नेदनीहाररूपंनायमवकाशमाकाशोयेत्यादिबाधानुभवेन । अस्वीकारेऽपीति । अपिशब्दात् आकाशस्यातिकाशात्मनाचाक्षुषं तत्रवादृशोद्भूतरूपवत्वंचयदिरयाम्वीक्रियेत तर्ह्यात्मांतस्यतदात्मनाप्रतिबिंबमपिसहप्रभामंडलप्रतिबिंबेन । तारतापिरूपवतएवप्रतिबिंबमित्यैकांतनियमस्याव्याहतेः । स्वन्मतेपरमात्मनिरूपचाक्षुषत्वयोरभावेनतदेष्टस्यानिष्पत्तेश्चेतितत्स्वीकारपक्षेपिविरोधाभावोद्योत्यते । अस्वीकारपक्षेतुरूपवतएवप्रतिबिंबमितिनियमशरीरं नतुतद्भूतः प्रतिबिंबंभवत्येवेतितत् ॥ समाधातुंशक्यइति उपहासोयं । वस्तुतस्तुतत्सवैमानाभावः । इत्यादिसूत्रमिति । (अ० ३ पा. २ सु. १९) "अंबुवदग्रहणात्तुनतथात्व" मितिसूत्रं । एतदर्थं कंचिदग्रेविचारयिष्यामः ॥ अतएवेति । सूत्रस्यपूर्वपक्षपरत्वाभावादेव भाष्याद्याशयानवंवादाहुः-तादृशसिद्धांतेत्यादि । यदीदंसूत्रं पूर्वपक्षपरं सूत्रकारोऽभिप्रेप्यात् तर्ह्यत्रतुशब्दमनुवदनोत्तरसूत्रएवतन्निरासकेतमवक्ष्यत् । नत्वेवमतोनतथेत्याशय ॥ तत्सूत्रस्थंभाष्यप्रकाशमेवस्वोक्तिदार्ढ्यायाक्षरशः प्रकृतोपयोगिनाल्पेनानुपूर्वीभेदेनसंगृण्हंति-सर्वसारपरस्येत्यादिना । तयोरिति "अशब्दमस्पर्शमरूपमव्ययं । व्याप्यनायराण स्थित." इतिश्रुतिसिद्धयो. नीरूपत्वव्यापकत्वयो । मनोमयादीतिछांदोग्यपंचमप्रपाठकस्थशांडिल्यविद्यादिविचारस्यतत्रोपक्रांतत्वात्तत्र "मनोमय. प्राणशरीरः" इत्यादिशब्दलभ्यमन. प्राणशरीरादीनि । तान्येवेहप्रभृतिशब्देनसंगृह्यंते ॥ एकदेशिमतेप्रतिबिंबाधारतापि "देवःक्षेत्रेष्वेनसजोयमात्मा । भूतेभूतेष्यवस्थित." इतिश्रुत्यनुरोधात्तेषामेव । तेषुक्षेत्रादिशब्दप्रवृत्तेः भगवद्गीतादौस्मर्यमाणत्वात् (मायायांप्रतिबिंबतेचितिरसा) वित्यादिकल्पनं स्वश्रौतं नूतनचेति, तस्यसाक्षान्निरासोपिसूत्रादौदुर्लभः । तथापितुल्ययुक्त्यात्रसूत्रकृतातदपिनिरस्तंभवति । ब्रह्मणउपादेयानीति । "एतस्माज्जायतेप्राणोमन. सर्वेंद्रियाणिच । खंवायुर्ज्योतिरापः पृथिवीविश्वस्यधारिणी" त्यादिमुंडकादिश्रुतिभ्यस्तथा ॥ समवायिव्यतिरिक्तस्येति । "पादोस्यविश्वाभूतानि एकांशेनस्थितोजगत् । अधिकंतुभेदनिर्देशात्" इत्यादिश्रुतिस्मृतिन्यायेभ्योब्रह्मण समवायिव्यतिरिक्तत्वमेकांशेनसमवायित्वंचबोद्धव्यं । सेत्स्यतीति । स्फटिकेजपादिप्रतिफलनात्प्रतीयमानस्यलौहित्यादेरिवौपचारिकत्वंसेत्स्यति ॥ एतदंत. प्रायश प्रकाशग्रंथ । अग्रेच तदाद्याशयानल्पी स्वीकृत ॥ द्वयोरिति । प्रतिबिंबाधारस्यकार्यस्थबिंबस्यब्रह्मणश्चेतिद्वयो ॥ एवंप्रकाशमथंतोऽनूद्याते माध्यस्थं निष्कर्षमनुवदंति-तस्मादित्यादिना । सर्वकामत्वादयइति ॥ "सर्वकाम सर्वगंध सर्वरस." इतिशांडिल्याविद्यादिश्रुत्युक्ता ॥ विद्वन्मडनव्याख्यानसुवर्णसूत्रादिसमतयुक्तिभी "रूपंरूप" मितिवाक्यार्थादिक समादधते-रूपंरूपमित्यादिना । सूर्योयथेति ॥ इदंवाक्यद्वयमपिकठवल्लीस्थम् ॥चक्षुषिसूर्याशतायाऐतरेयादिबहुश्रुतिप्रभृतिसमतत्वात् ॥ स्वांशत्वमंत-

रातद्वत्दुःखादेरंशिनिप्रसक्तयपोगाच्चचक्षुर्दृष्टांतोपन्यासादिना जीवस्यांशत्वमेवात्रफलति ॥ अंशत्वेपीति । अपिरेवार्थः अंशत्वमेवेत्यर्थः । विशेषतुस्तु "रूपंरूपंप्रतिरूपः । एकधाबहुधे" त्यादिवाक्यार्थविचारः पुरैवप्राकाशि ॥ अस्मद्ग्रंथोक्तमिति । मार्तंडविद्वन्मंडनटीकादिषूक्तम् ॥ यत्किंचित्तिरोहितानंदइति । आनंदमीमांसादौ इंद्रप्रजापत्यादेरानंदाधिक्यश्रावणाद् ब्रह्मवदखंडानंदस्यतेष्वप्यभावाच्च तथेत्यर्थः ॥ जीवश्चेति ॥ कार्येश्वरहिरण्यगर्भादिभिन्नः साधारणः पराभिध्यानात्तथेतिभावः ॥ श्रुत्वानाभासेनेतितृतीयाहेतौकरणेवेतिप्राग्विवृतम् । प्रकृत्यादिरादभेदेपिनृतीयामाश्रित्यव्याचक्षते ॥ अत्तभासेनेतीत्यादिना ॥ अयमेवपक्षोद्वितीयाध्यायप्रकाशे (अ० २ पा० १ सु० ६) "दृश्यतेतु" इतिसूत्रे किंचक्षेत्रप्रदर्शनोत्तरंद्वयोराभासेन करणोक्त्याभासभूतयोर्जीवेशयोर्नेद्रष्टृत्व" मिति कथनेन तापनीयदीपिकायांच "तयास्वात्मक्षेत्रेदर्शने परमात्मनश्चंद्रस्येवतत्रात्मांशप्रवेशनेतस्यकार्यजीवकार्येश्वरभावोभवति" इतिकथनेनदर्शितः । अत्राप्याभासपदंब्राह्मणाभासादिवन्मुख्यब्रह्मधर्मतिरोभावाभिप्रायमेव सूत्रैकवाक्यतालाभादितिसारः ॥ यक्षबलिन्यायेन परोक्तेःकुंठीकरणायैवकिंचिदाहुः—जीवोजीवमित्यादि असंगतमित्यंतम् ॥ अस्मिन्पक्षेजीवो जीवं हिरण्यगर्भंविहाय मांसंपद्यतइत्यर्थः । ब्रह्मलोकांतवैभवेषुविरागात्परांतकाले ब्रह्मणा सहमोक्षाद्वातथेतिभावः ॥ वस्तुतो हिरण्यगर्भादयस्तु कार्येश्वरतयैवात्रश्रुतौ व्याख्यातृभिर्दर्शिताः कार्यजीवतयाचलौकिकाःशरीरविशेषाएवातोनायंसिद्धांत इत्याशयेनाहुः—अस्तुवेत्यादि ॥ तत्रजीवोजीवमितिवाक्ये प्रथमांतभिन्नजीवशब्दो वस्तुतोलिंगादिशरीरपरोऽस्तु ॥ आदिपदादिहस्थूलमपिगृह्यते ॥ एषचेतनयायुक्तोजीवइत्याद्युक्त्या लिंगशरीरे 'अहस्तानिसहस्ताना' मित्याद्युक्त्या स्थूलशरीरेच जीवशब्दस्यशक्तेर्मेहात् । तस्मात् (स्कं० ११ अ० २५ श्लो० ३५) "संपद्यतेगुणैर्मुक्तोजीवोजीवंविहायमाम् । जीवोजीवेननिर्मुक्तोगुणैश्चाशयसंभवैः ॥ मयैवब्रह्मणापूर्णोनबहिर्नांतरश्चरेदि"त्यत्रमुमुक्षुर्जीवः जीवं इंद्रियादिसमुदायरूपंसूक्ष्मं पांचभौतिकं स्थूलंचदेहंविहाय तत्कारणभूतैर्गुणैश्चमुक्तः सन्मांनिर्गुणं परमफलं संपद्यतइत्यर्थः । एवमुत्तरत्रापिज्ञेयम् ॥ इतःपूर्वं (श्लो० ३३ । ३४) "तस्माद्देहमिमंलब्ध्वाज्ञानविज्ञानसंभवम् । गुणसंगंविनिर्धूयमांभजंतुविचक्षणाः ॥ निःसंगोमांभजेद्विद्वानप्रमत्तोजितेंद्रिय" इत्युक्त्यापिदेहेंद्रियादिरूपएवदेहजीवपदार्थः सिध्यति ॥ सूत्रे "आभासाएवचे" तिपाठस्तु श्रीभाष्यादिसंमतोस्माकंतुसूत्रभाष्येतद्विवरणेषुचसनैवास्तीत्यस्मासुवादृशपाठकल्पकस्यारोपस्तत्कपोलकल्पितइत्यभिप्रेत्याहुः—आभासाइत्यादिना ॥ यच्चयत्तुशुद्धाद्वैतेत्यादि इत्यर्थइत्यन्तं, तदसत्; अस्मदुक्तचरयुक्तिभिः फलबलादेवैकत्रोद्भूतमन्यत्रानुद्भूतमितिकल्पनसंभवात् मार्तंडव्याख्यातृरामकृष्णभट्टानांत्वयमाशयः–भट्टादिमतेनभसश्चाक्षुषत्वात् शंकराचार्यैर्व्यवहारेभट्टनयस्यैवानुसरणात् तस्यचाक्षुषविषयत्वंत्वयाभ्युपगंतव्यं; सयोगसन्निकर्षजन्यचाक्षुषंचोद्भूतरूपनियतमिति तदर्थंतत्ररूपोद्भवोपिस्वीकार्यः । तथाचसतिप्रहितत्वयाचियत्प्रतिच्छायाभ्युपायेपिरूपवत्तएवप्रतिबिंबाद्व्यभिचारइति एतेन (आकाशस्यचाक्षुषत्वापत्तेः) इतिप्रत्युक्तं ॥ संगृहीतानिचाकाशविषयकमतानिचतुर्थस्कंधप्रयोविंशाध्यायव्याख्याने (श्लो० १७)

'इन्द्रियेषुमनस्तानी' त्यत्रश्रीधरस्वामिना ॥ नापिस्पर्शोनत्वप्रसङ्ग, स्पर्शशून्यायामपिमणि-दीपप्रभायांत्वन्मतेउद्भूतरूपत्ववन्नापित्वस्योपपत्ते । वस्तुतस्त्वप्रत्यक्षोऽप्यभ्युपेत्यवादएव । तत्वतुपूर्वमवोचाम । यच्चप्रतिबिंबस्यत्वात् । साक्षिवेद्यत्वागीकाराडित्यत,—तदप्यसमञ्जस, अस्माभि प्रत्यक्षानर्हप्रतिबिंबस्यानगीकारात् । नापिवायो प्रतिबिंब शब्दपरवचन तत्प्रत्यक्षस्यानिवार्यत्वात् तस्यचक्षुरयोग्यत्वेन चक्षुषातत्प्रतिबिंबस्याग्रहणेपिशब्दग्राहकश्रोत्रेण-तत्प्रतिबिंबतयात्वयाभिमतस्यप्रतिध्वनेरिव,नचावश्यतद्ग्रहसंभवात्, अग्रहणेहेत्वभावात् । अनुमेयत्वपक्षेपिबिंबस्यवप्रतिबिंबस्यापिगुणप्रत्यक्षेप्रतिबन्धकाभावात् सर्वथाप्रमितविषयत्वेतत्सत्वस्यैवनकुमशक्यत्वात् । नचवायु प्रतिबिंबते द्रव्यत्वात्पृथ्वीवदित्यनुमानेनतत्सिद्धि, चक्षुर्योग्यत्वस्योपाधित्वेनहेतोर्व्याप्यत्वासिद्धे । त्वन्मतेसूर्यप्रतिबिंबेतेजोंशप्रवेशानुपगमेनतत्प्रतिबिंबनिष्ठौष्ण्यस्यचत्वचाग्रहणानुभवेनतस्यासर्वथाप्रतिबिंबग्राहकतानवकुशक्या, किंचैनस्याकाशस्यापिप्रतिबिंबनचक्षुषागृह्येत, बिंबेनीरूपतायाअनुद्भूतरूपतायाश्चाविशेषात् । पूर्वपक्षेतस्येंद्रियागोचरत्वोक्तिरेवयुक्त, मानसित्वानुमानिकत्वमतयोरपितत्रेन्द्रियव्यापारविषयताकाभनपायात । नचाकाशेबलाकाउड्डीयतइतिप्रत्यक्षबलेनाकाशस्य-साक्षिवेद्यतयातत्प्रतिबिंबस्यापिसाक्षिवेद्यत्वमगीकार्यं, बलाकादिवस्तुभावेऽपिअभासिगभीरतानुद्भभानप्रसगात्, वायौतृणपर्णान्युड्डीयतइतिप्रत्यक्षबलेनसाक्षिवेद्यतायावायावपिसमानयोगक्षेमत्वाच्च । अतोदेशस्यविशेषणत्वेपिचक्षुरयोग्यविशेषणस्याप्रतिबिंबात्रानुपपत्ति काचित् ॥ यच्चतस्मादिंद्रियागोचरस्येत्यादि बाधितमित्यर्थइत्यत,—तदप्येतावतानिरस्त, त्वन्मतरीत्यात्वचोपितद्ग्राहकतायादर्शितत्वात् । वस्तुतस्तुबाह्येंद्रियेषुचक्षुष्एवतद्ग्राहकतायावक्तुयुक्तत्वात् । नहिनीरूपस्यापिशब्दाकाशादे प्रतिबिंबत्वबोधककिंचिच्छ्रुत्यादिकमस्ति "यथाह्ययज्योतिरात्मे' त्यादयस्तुसर्वंश्रुत्यकारस्यतयाअनुपचारेणव्याख्याता । अतस्त्वत्कल्पनैव अशब्दवसत्यत्वादिश्रुतिबाधितानियमननमव्याम्नायानुकूलयुक्तिभिर्निर्मलीकृतमेव ॥ यत्तु (एवच अंबुवदग्रहणात्तु नतथात्वमिति पूर्वपक्षसूत्रमपिलब्धपथ) मिति,—तत्रोच्यते—तृतीयस्यद्वितीयपाद ब्रह्मधर्मविचारे अरूपवदादिपचसूत्र ब्रह्मणिसर्वकामत्वादिधर्माणामौपचारिकत्वबोधकैकदेशिमताधिकरणमस्ति, तत्रेदचरमसूत्र (अ० ३ पा० २ सू० १८) "अतएवचोपमासूर्यकादिव" दिति अर्थस्तुअतइतिल्यबलोपेपचमीएतमेवनिर्णयमाश्रित्य (पृ० १११) 'सम प्लुषिणासमोमशकेनसमो नागेन" तिनिरूपणस्यापिभगवतोबृहदारण्यकतृतीयाध्यायतृतीयब्राह्मणादावुपमा । अत्रगमकश्रौतमुपमांतरमाह सूर्यकादिवदिति । जलप्रविष्टसूर्यचन्द्रादौ प्रतीयमानमपिकंपादिक वस्तुतोजलनिष्ठमेव, नतुतन्निष्ठ एवमेत्रादिपुप्रविष्टआत्मनिप्रतीयमाना सर्वेकर्मकामगंधरसादयो वस्तुतउपाधेरेवधमानत्वात्मनइत्याशयेन 'यथाह्ययज्योतिरात्माएकधाबहुधा' त्यादौश्रुत्यतरेयथाप्रमाणामौपचारिकत्वायसूर्यकाद्युपमोच्यततथेयमपीति ॥ एवसिद्धएकदेशिमतेस्वविरुद्धाशदूषयितुमुत्यसिद्धांतचनकु अंबुवदित्यादिचतु सूत्रमधिकरणांतरमारब्धवान् भगवान् । तत्रातएवेतिसूत्रोक्तदूषयति (अ० ३ पा० २ सू० १९) अम्बुवदग्रहणात्तुन तथात्व" मिति । तुशब्द पूर्वपक्षव्यावर्तयतितथात्वसूर्यादिदृष्टांतेन । असमवायिनोग्रहण

औपाधिकधर्मवत्वंच । कुतः? अंबुवदग्रहणात्, प्राच्यैकदेशिनासूर्यादिवद्रूपादेरनंगीकारेणउपाधीनांचास्वच्छत्वेनतैरंबुनेवग्रहणस्यासंभवादित्यर्थः । एवमेकदेशिमतेदूषितेर्थात्तानांविभुत्वांगुष्ठमात्रत्वश्रुपिनागादिसमत्वाकर्मत्वासंगत्वसर्वकर्मत्वसर्वकामत्वादीनांसिद्धांतेकथंविरोधपरिहारइत्यतोमेपठति-(अ० ३ पा० २ सू० २०) "वृद्धिन्हासभाक्त्वमंतर्भावादुभयसामंजस्यादेव" मिति । अयमर्थः-विरोधोहिलोकवेदाभ्यांपरिहरणीयः । तत्रविभोरपिशतेपंचाशदितिन्यायेनतत्तत्परिमाणाश्रयस्याकाशस्यतत्परिमाणेलोकेघटस्थांतर्भावादभिव्यज्यते । वेदेच आसादनविषये "यथादशवकाशेदशाचमसा" नित्यादिष्वेवंचयनेपि । "एतैरग्निंचिन्वीते" ति "चित्तिःस्रुक्" इत्यादिमंत्रैश्रयनंविधायप्रकारप्रदर्शनावसरेचतसृषुदिक्षुतत्तद्दांतृमंत्रैश्चयनं दर्शयित्वा "यथाकाशंमहान्यथाशकाशं प्रतिग्रहा" निति "वाचस्पतेविधे नाम" नित्यादिमंत्रोपधेयानांग्रहसंज्ञकानां "देवस्यत्वे" त्यादिमंत्रोपधेयानां प्रतिग्रहसंज्ञकानामिष्टकानांतद्दिक्ष्वधेयेयोमकाशस्तदविरोधेनोपधानमाह-अवकाशश्चाकाशएव । तत्रयथापदेनस्वल्पत्वमहत्वादिकंसूच्यतइतिव्याचक्षते । एवंब्रह्मणोपिवृद्धिन्हासभाक्त्वं; तत्तत्परिमाणकत्वं क्षुध्याद्यंतर्भावात् । कामगंधरसादिकंचजीवपृथ्वीजलांतर्भावात्स्फुटीभवति । वृद्धिन्हासपदाभ्यामुपलक्षणविधयातेतेविषयवाक्योक्ताधर्माःसंगृह्यंते । अनाम्नाता अपि तन्मतेचलनभेदनादयइव । एवंसतिउभयसामंजस्यात् विभुत्वाल्पत्वादीनामुभयविधश्रौतधर्माणामबाधात् । एवं यथाश्रवणंसर्वधर्माश्रयोब्रह्मेत्यर्थः । एवकारेण सर्वत्रहीतिपूर्वोक्तविषयवाक्योक्तं चपरामृश्यते । परंत्वत्रैचैतत् विषयवाक्ये "आकाशात्मे" तिकथनात् 'आकाशशरीरं ब्रह्म" तिश्रुत्यंतराचयुक्तं । तेनपूर्वमर्भकौकस्सूत्रे "व्योमवच्चे" त्युक्तमिहस्मारितं ॥ नचांबुवदितिपूर्वपक्षसूत्रं; तुशब्दघटितत्वात् ॥ नहि ब्रह्मसूत्रेष्वेकमपिपूर्वपक्षारंभसूत्रं तुशब्दघटितंदृश्यते । यावंतितद्घटितानिसूत्राणितत्तुसमन्वयादित्यादीनितानिसिद्धांतनिरूपकाण्येव ॥ नचाभिमानिव्यपदेशिसूत्रेव्यभिचारः; मुख्यपक्षेतस्यापिसिद्धांतसूत्रत्वात् । स्पष्टंचैतत्प्रकाशे प्रथमपक्षेप्यारंभसूत्रत्वाभावाच्च तत्साधितस्य "मृदब्रवी" दित्यादौदेवताव्यपदेशस्यवैदिकसर्वतंत्रसिद्धांतत्वेनप्रथमपक्षे अस्यपूर्वपक्षोपष्टंभकत्वेपिसिद्धांतबोधकतानपायाच्च अतएवोत्तरपक्षेवैलक्षण्यस्यैवाप्रयोजकत्वंस्थाप्यतेनतुतथाव्यपदेशोपिप्रतिविधीयते । नापिवृद्धिन्हासेतिसूत्रं पूर्वसूत्रखंडकंत्वपीत्यादितथात्वसूचकशब्दावघटितत्वात् यदिचसूत्रकृत्तथाभिप्रेयात् नांबुवदग्रहणादित्येवसूत्रयेत्; । तावतैवसिद्धेः "नप्रयोजनवत्वात् । नविलक्षणत्वादस्यतथात्वंचशब्दा" दित्यादिवत् ॥ यथान्यासमुक्तिस्तुपंचसूत्र्युक्तंपरामृश्यदूषणार्थैवेति ज्ञायते । उत्तरसूत्रएव च तुशब्दं वदेत, लोकवत्तुलीलाकैवल्यं दृश्यतेत्वि" त्यादिवत् नापिवृद्धिसूत्रार्थविचारेणाप्यंबुवत्सूत्रार्थोदूषितोभवति । तथाहि-शारीरकभाष्ये वृद्धिन्हाससूत्रे "युक्तएवत्वयंदृष्टांत"; विवक्षितांशसंभवात् । नहिदृष्टांतदार्ष्टांतिकयोःक्वचित्किंचिद्विवक्षितमंशं मुक्त्वासर्वसारूप्यं केनचिद्दर्शयितुंशक्यते, किंपुनरत्रविवक्षितंसारूप्यमितितदुच्यते-वृद्धिन्हासभाक्त्वमितिजलगतंहि सूर्यप्रतिबिंबजलवृद्धौवर्द्धते, जलन्हासेन्हसति, जलचलनेचलति, जलभेदेभिद्यते, इत्येवंजलधर्मानुविधायिभवति,

नतुपरमार्थतः । सूर्यस्यतथात्वमस्ति, एतंपरमार्थतोऽविकृतमेकरूपमपिसद्ब्रह्मदेहाद्युपाध्यं-तर्भावात् भजतद्गोपाधिधर्मान्वृद्धिह्रासादीन् एवमुभयोर्दृष्टांतदार्ष्टांतिकयोः सामंजस्यादविरोध"इतिव्याख्यातं; तन्नमहत्यपिजलाशयेसूर्यप्रतिबिंबस्तावत्तएवोपलभ्याजलवृद्ध्यातद्वृद्धिर्दृष्टा। नहितत्प्रतिबिंबंग्रीष्मेन्ह्रसति, वर्षासुचवर्धते, जलेतेजोंशप्रवेशानंगीकारिणाचत्वया विभोर्ब्रह्मणइवसूर्यादेरूपवृद्ध्यंतर्भावोशक्यवचनइतिदृष्टांतेहेत्वसिद्धिः। सूत्रस्यजीवेशारीरधर्मांपचारविबोधकत्वेतुप्रक्रमविरोधश्चरात्त्वरम्यपाश्रयसूत्रेणगतार्थताचउभयसामंजस्यादित्यत्रचदृष्टांतासामंजस्यादितिवाउभयसाम्यादित्येवचारक्तुमुचितं; किञ्चांबुवत्सूत्रेप्रतिबिंबबाधकतयास्वयंव्याख्यातमुपाधिविषयोरविप्रकृष्टत्वामूर्तत्वादिकंएतत्सूत्राक्षरैर्नप्रत्युच्यते किंतुसारूप्यैवविवक्षितः प्रकारविशेषएवबोध्यतइतिपूर्वसूत्रेणनिराकृतचरःप्रतिबिंबवादोनानेनसमर्थितोभवति। यदिचसूत्रकृतत्तथाभिप्रैष्यत् तर्हि (स्वच्छाहिसत्त्वे) त्यादिनात्वयोक्तप्रकारंस्वयमेवतत्रानुपदमवदिष्यत् तस्मादंबुवदितिसूत्रंनपूर्वपक्षरूपं, नापिलब्धपर्यनियमनस्यसमर्थितत्वात्। अथ यत्तुआभासएवेत्यादिः जीवांतरस्यप्रमितिरित्यंतो ग्रंथस्तुपुरैवप्रतिबिंबभ्रमजनकश्रुतिसूत्रव्याख्यानेनैनिरस्तः। आभासाएवचेतिपाठस्तुरामानुजभाष्यादावस्ति, नत्वास्माकीनग्रंथेष्वतोयेतुआभासएवचेति सूत्रस्थानेइत्यादिः उपेक्ष्यइत्यंतोग्रंथोनास्माभिरुत्तरणीयः॥ तथापाठोपि अदृष्टानियमादित्यग्रिमेसाध्यसमर्पकत्वाद्युक्तोभाति। विश्वासभंजकःपाठभेदस्तु "भावेचोपलब्धे" रित्यादौप्रसक्त "भावाच्चोपलब्धे" रित्यादिःस्वभाष्येद्रष्टव्यः।

यत्तु (प्रतिबिंबस्यचबिंबोत्पत्तिविनाशाभ्यामुत्पत्तिविनाशौउपाधिसमवधानेनप्रतिबिंबस्याविर्भावस्तत्रबिंबाभेदतिरोभावश्चजायते। तथाप्रतिबिंबत्वबिंबत्वयोरुत्पत्तिः। उपाधिसमवधाननाशेनच तादृगाविर्भावतिरोभावयोर्बिंबत्वप्रतिबिंबत्वयोश्चनाशोजायते) इत्याद्युक्तंतदप्ययुक्तं; बिंबोत्पत्तिविनाशाभ्यांप्रतिबिंबोत्पत्तिविनाशौस्वीकुर्वताप्रतिबिंबस्यबिंबाभेदोविवक्षितो बिंबोपादेयत्वंवा ? नाद्यः; प्रतिबिंबस्यबिंबाभेदेबिंबज्ञानकालेप्रतिबिम्बस्यापिज्ञानंस्यात्, प्रतिबिंबतिरोभावेबिंबस्यापितिरोभावःस्यात्, प्रतिबिंबचलनेबिम्बस्यापिचलनंचस्यात्। उपाधिसमवधानेप्रतिबिंबस्याविर्भावः, बिंबोत्पत्तिकालेप्रतिबिंबोत्पत्तिरित्यपित्वन्मतविरुद्धं; आविर्भावतिरोभावावुत्पत्तिप्रलयौमताविति त्वत्समतोक्तेः॥ उपाधिसमवधानेप्रतिबिंबत्वस्योत्पत्तिरित्यप्यसंगतं। नहिव्यक्त्युत्पत्तौसत्यामपितद्धर्मोनोत्पद्यते। व्यक्तिसत्त्वेपितद्धर्मोनश्यतीतिकस्यचिदपिसंमतंप्रमाणतोवगतंवा? नहिघटउत्पन्नेपिघटत्वंतत्रनास्तिचापश्चाद्भविष्यतीतिवक्तुंशक्यं; किंचप्रतिबिंबत्वंमुखउत्पद्यतेदर्पणसन्निधानेन वादर्पणएवोत्पद्यतइतिवक्तव्यं। आद्येव्यवहितस्यदर्पणस्यकार्योत्पादकत्वायोगः, उपाधिसन्निधान-

स्वधर्मोत्पत्तौहेतुत्वकल्पनेधर्मान्तरस्यधर्मेणधर्म्यनुगमाभावश्चधर्मस्यान-
नुगतत्वात्। द्वितीयेतुप्रतिबिंबत्वस्यव्यधिकरणत्वेन प्रतिबिंबधर्म-
तानस्यात्, उपाधिधर्मताचस्यात्। व्यधिकरणस्यधर्मत्वेघटत्वस्यपट-
धर्मतापत्तिः। नापिद्वितीयः; मुखस्यप्रतिबिंबोपादानत्वासंभवात्,
समानकालीनयोरुपादानोपादेयभावासंभवात्, उपादानस्योपादेय-
पूर्ववर्त्तित्वनियमात्, अनन्यथासिद्धनियतपूर्ववर्त्तित्वस्यकारणत्वात्।
उपाधिसमवधाननाशप्रतिबिंबाविर्भावतद्भेदतिरोभावयोर्बिंबत्वप्र-
तिबिंबत्वयोश्चनाशोजायतइत्यपिनकिंचित्। दर्पणसमवधानेप्रतिबिंब-
त्वंमुखउत्पद्यते, दर्पणेवा? प्रतिबिंबेवा? नाद्यः; मुखेप्रतिबिंबत्वस्वी-
कारेमुखंप्रतिबिंबमितिप्रतीत्यापत्तिः, किंचबिंबत्वमपितत्रैवोत्पद्यत-
इतिस्वीकरणीयं। तथाचबिंबत्वप्रतिबिंबत्वयोर्विरुद्धधर्मत्वंनस्यात्।
नचेष्टापत्तिः; तर्हिघटत्वकलशत्वयोरिवतुल्यव्यक्तिवृत्तिधर्मप्रतिपादक-
तयाबिम्बप्रतिबिंबशब्दयोःपर्य्यायतापत्तिः। द्वितीयेतुदर्पणस्यप्रतिबिंब-
त्वेन भानापत्तिः। दर्पणंप्रतिबिंबइतिप्रतीतेःप्रमात्वंचस्यात्, प्रतिबिंबे-
चेदुत्पद्यतेतदाप्रतिबिंबस्यत्वन्मतेमुखाभिन्नतयामुखएवोत्पद्यतइत्ये-
वायातं। तथाचमुखपक्षउद्भावितादोषाःप्रसज्येरन्। तस्माद्बिंबप्रति-
बिंबयोरभेदः;बिंबत्वप्रतिबिंबत्वयोरुत्पत्तिविनाशौचेतिकथनंसर्वथा-
नसंभवति। यस्तु (एवंचसत्कार्य्यवादेतंतुसंयोगस्योत्पत्तेःपूर्वं नाशा-
त्पश्चाच्चपटस्यतन्तुमात्रत्वव) दित्यादिनासत्कार्यवादद्दष्टांतो दर्शितः,-
सोपिविषमः; तत्रसंयोगोत्तरंपटस्तंतुष्वेवप्रतीयते, नत्वन्यत्रेतिपट-
स्यतंतुसंयोगोत्तरमप्रत्ययात्पूर्वोत्तरकालयोरपितंतुमात्रत्वंप्रतिबिंबो-
पियद्युपाधिसन्निधानेसतिमुखएवप्रतीयेततदातस्यापिमुखमात्रत्वं-
युक्तंस्यात्। प्रतीयतेतूपाधौ तस्मात्तत्रस्यमुखमात्रत्वंनसंभवति। एवं-
चअविद्यायांब्रह्मप्रतिबिंबोजीवइत्यसंगतमेव ॥ किंचाविद्यायांप्रति-
बिंबस्यजीवत्वेऽविद्यानाशएवमोक्षस्त्वयास्वीकर्त्तव्यस्तदाजीवस्वरूप-
नाशएवमोक्षःस्यात् । तथासतिपुरुषार्थतानस्यात्, प्रवृत्तिस्तत्रक-
स्यापिनस्यात्। नह्यात्मनाशार्थंकश्चिद्यतते, तस्यनिरतिशयप्रेमविषय-
त्वात्, उपाधिनाशेप्रतिबिंबविनाशस्यप्रत्यक्षसिद्धत्वादविद्यानाशेत-
त्प्रतिबिंबरूपजीवनाशस्यावर्जनीयत्वात् ॥ यत्तु (सतएवपदार्थस्या-
विर्भावसंभवाद्भेदाविर्भावस्योपाधिनास्वीकारेबिंबेप्रतिबिंबभेदःस्वी-
कृतःस्यात् । अभेदतिरोभावस्यैवतेनस्वीकार इत्यादिप्रलपितं,-
तदपितुच्छतरं; बिंबप्रतिबिंबयोर्भेदस्यप्रत्यक्षसिद्धस्यापलापेमाना-

भावादनुभवविरोधाच्च । "विभेदजनकेऽज्ञानेनाशमात्यंतिकंगत" इत्यादिवाक्यविरोधाच्च। तस्यलक्षणस्याऽन्यथार्थकल्पनेऽविश्वासः॥ किंचाभेदस्यतिरोभावेतत्प्रतीतिर्माभूत्, भेदप्रतीतिःकेनभवतीति· तन्नहेतोरनुक्तत्वात्साकस्मिन्येचस्यात्। उपाधिनाशेऽभेदतिरोभाव· नाशेपिभेदस्यानाशात्पूर्ववद्भेदप्रतीति·स्यात्।अभेदतिरोभावनाशाद· भेदप्रतीतिरपिस्यात्। "वृद्धिह्रासभाक्त्वमंतर्भावादुभयसामंजस्या· देव" मितिसूत्रमपिन (उपाधेर्जलस्यधर्मावृद्धिह्रासादयोयथा· प्रतिबिंबेऽध्यस्यन्तेतथाप्रकृतेपि) इतिप्रतिपादयति येनत्वदुक्तोप- ष्टंभसंगतिःस्यात्। किंतु "नस्थानतोपी" त्यादिसूत्रेणारब्धोयोब्रह्म- स्वरूपविचारस्तदुपयोगितयाक्रियमाणोयोब्रह्मणिवेदबोधितजडजीव· धर्माणांविधिनिषेधाभ्यांप्रतीयमानस्यविरोधस्यपरिहारःसएवानेन· सूत्रेणसिद्धांतिनाक्रियते पूर्वमेकदेशिकृतोविरोधपरिहारस्तु "अम्बु· वदग्रहणात्तुनतथात्व" मित्यनेनखंडितः। यथालोकेमहानवका· शोऽल्पोवकाशोवेदेपि "यथावकाशंदशचमासान् यथावकाशंग्रहा" नित्यादिनास्वल्पत्वमहत्वादिकमवकाशात्मकस्याकाशस्यसूच्यते । तत्रयथापदस्यमहत्वाल्पत्वबोधकत्वात् तत्राकाशस्यव्यापकत्वेनव्या· पकेचाल्पत्वमहत्वयोर्युगपत्समावेशासंभवाद्विरोधः॥ एवंचयथा- करकेप्रविष्टआकाशोऽल्पतया व्यपदिश्यते मठेप्रविष्टश्चमहत्वेन उपाध्यंतर्भावेनोपाधिवृद्धिह्रासाभ्यामाकाशेपिवृद्धिह्रासभाक्त्वमेवं· ब्रह्मणोप्युपाध्यंतर्भावात्तदभिव्यंग्यसर्वकामादिधर्मवत्त्वं।अत्रबीजंतु· विषयश्रुत्युक्तआकाशदृष्टांतस्तस्यप्रकृतश्रुत्यनुसारित्वेनतेनतत्तदुपाधि· प्रविष्टंब्रह्मापितत्तद्धर्मवद्वक्तव्यं, नत्वेकदेश्युक्तरीत्या। नन्वेवमपितेषां· धर्माणामौपाधिकत्वेनौपचारिकत्वमेवेतिचेत्,–न; स्यादौपचारिकत्वं· यदि जपाकुसुमलौहित्यवदन्यधर्मत्वंस्यादन्यानुविधायित्वेपिस्वध· र्मोपपत्तेः श्रुतिलिंगादिप्रमाणाभावेनान्यधर्मत्वस्यवक्तुमशक्यत्वात्। तथाचयथाकाशस्यवृद्धिह्रासभाक्त्वंकरकाद्यंतर्भावात्तथैवोभयसामं· जस्याद्ब्रह्मणोपीतिनकोपिविरोध·एतमादधातिजलवृद्धिह्रासाभ्यांप्र- तिबिंबवृद्धिह्रासकथनंतुनसत् भूयसिस्वल्पेपिजलेसूर्यादिप्रतिबिंब- स्यतुल्यतायाएवग्रहणात्॥ किंचलोकेपरिच्छिन्नस्यरूपवतउपाधि- निमग्नस्यप्रतिबिंबदर्शनादपिप्रतिबिंबपक्षोऽसंगतः॥ नचमाया· याअघटितघटनापटीयस्त्वाल्लोकेऽसंभावितमपितत्प्रभावेणभवती· तिवाच्यं; तर्हिमुक्तानामपिपुनरुत्पत्तिःस्यात्। मुक्तिनांनरकप्राप्तिश्च·

स्यात्; मायायादुर्घटघटनापटीयस्त्वात् ॥ एवंमायावच्छिन्नोजीव इत्यादिपक्षाअपिनसंभवंति; श्रुतियुक्तिविरुद्धत्वात् ॥ तत्खंडने-यत्नस्तुपरेणतत्तत्पक्षाणामप्रतिपादनान्नक्रियते ॥

सहस्राक्षे प्रतिबिंबस्यचबिंबोत्पत्त्यादिमिहप्रलायतइत्यंतं भागंनिरस्यति–यत्तु-प्रतिबिंबस्यचेत्यादिना नक्रियतइत्यंतेन ॥ बिंबत्वप्रतिबिंबत्वयोरिति ॥ बिंबेप्रतिबिंबेचय-थायथंतयोरुत्पत्तिरित्यर्थः ॥ तादृगिति ॥ प्रतिबिंबाविर्भावस्यबिंबाभेदतिरोभावस्यचे-त्यर्थः ॥ नाद्यइति ॥ बिंबाभेदपक्षोनेत्यर्थः । अयमेवतदाशयगोचरोमुख्यइतिप्रथममुप-न्यस्तः ॥ ज्ञानंस्यादिति । नचेष्टापत्तिः; 'प्रतिबिंबंपश्यामी'त्याद्यनुव्यवसायानुदयात् ॥ प्रतिबिंबतिरोभावइति । उपाधिसमवधाननाशाभ्ययास्वीकृतेतस्मिन् । नचाविर्भावनाशा-एवमयास्वीक्रियतेनतिरोभावइतिवाच्यम्; आविर्भावनाशोत्तरंप्रतिबिंबसत्त्वांगीकारेतस्य-दर्शनायोग्यतयातिरोभावस्यार्थादेवापत्तेः ॥ तदस्वीकारेतु तन्नाशएवस्वीक्रियतां, कृतंकंठगडुनातदाविर्भावनाशेन ॥ प्रतिबिंबचलनइति ॥ इदमुपलक्षणं; तेन प्रतिबिंब-भेदनादौबिंबेऽपितत्तदापत्तिर्ध्येया ॥ एतेन तदीयवृद्धिह्रासभाक्सूत्रभाष्यंसारितंज्ञेयं ॥ स्वन्मतविरुद्धमिति । सिद्धांतरत्नादिवद्धा उत्पत्तिनाशविलक्षणयोराविर्भावतिरो-भावयोरस्वीकारात् प्रत्युतोत्पत्त्याविर्भावादिशब्देषुपर्यायत्वांगीकाराच्च । एकदेशेऽप्या-विर्भावादिस्वीकारेऽपसिद्धांतस्यास्मन्मतप्रवेशस्यचतुल्यत्वात्सर्वत्रतौकुतो न स्वीक्रियेते इति भावः। विरोधंदर्शयितुंतन्मतग्रंथसंमतिमाहुः–आविर्भावेति । पंचदश्याश्चित्रदीपाख्ये षष्ठप्रकरणइयं (का० १८२) कारिकाऽस्ति ॥ समतोक्तेरिति । समानं मतंयस्यस-समतो विद्यारण्यः ॥ तद्धर्मइति । व्यावर्तकोऽसाधारणधर्मः ॥ दर्पणसंनिधानेनेति । अयंपूर्वग्रहेतुः ॥ आद्यइति । मुखएव प्रतिबिंबत्वमुत्पद्यतइतिपक्षे ॥ व्यवहितस्येति । अव्य-वहितस्यवालुकादेर्जलादौप्रतिबिंबादर्शनेनोपाधिबिंबयोर्व्यवधानेसत्येवप्रतिबिंबप्रतीतिनिय-मस्यप्रागुपपादितत्वात्तथेतिभावः ॥ स्यादेतत्व्यवहितस्यापि चुंबकस्यसंनिधानमात्रेणलोह-परिभ्रामकत्वमिवेत्यरुच्यादूषणांतरमाहुः–उपाधिसंनिधानस्येत्यादिना ॥ धर्मानंत्यमिति । एकदादर्पणसंनिधानेप्रतिबिंबत्वादिकमुत्पन्नंतत्संनिधाननाशेच नष्टमेवंमुहुर्मुहुःसंनिधानासं-

॥ ३५ ॥ *प्रतिबिम्बस्य च बिम्बोत्पत्तिविनाशाभ्यामुत्पत्तिविनाशौ* उपाधिसम-वधानेन प्रतिबिम्बस्याविर्भावस्तत्रबिम्बाभेदतिरोभावश्चजायते । तथा प्रतिबिम्बत्वबिम्ब-त्वयोरुत्पत्तिः उपाधिसमवधाननाशेनच ताभ्याविर्भावतिरोभावयोर्बिम्बत्वप्रतिबिंबत्वयो-श्चनाशोजायते ॥ प्रतिबिम्बस्यबिम्बस्वरूपेणस्थितिरितियावत ॥ बिम्बस्यच प्रतिबिम्बो-त्पत्तिनाशप्रयोजकोत्पत्तिनाशप्रतियोगित्वं नबिम्बत्वेन किन्तु स्वरूपेण ॥ उत्पत्तिरपि प्रति-*बिम्बस्य तादात्म्येन ॥ इदंच सादिबिम्बे ॥ बिम्बस्यानादित्वेतु तदुत्पत्तिविनाशयोरभावेन* प्रतिबिम्बोत्पत्तिविनाशयोरप्यभावः ॥ उपाध्यसन्निधानेऽसत्त्वपि प्रतिबिम्बोबिम्बरूपेणैव गृह्यते नतु प्रतिबिम्बरूपेण; तादृक्स्वरूपस्यानाविर्भावात् ॥ अभेदस्याऽतिरोभावाच्च ॥ बिम्बत्वादेरभावाद्बिम्बादिपदव्यवहारोऽपि न ॥ एवंचसत्कार्यवादे तंतुसयोगस्योत्पत्तेः पूर्व

न्निधानयोर्नवंनवमुत्पद्यते नश्यति चेत्येकस्मिन्नेवप्रतिबिंबेप्रतिबिंबत्वानामानंत्यम् । एवं-बिंबत्वेपिबिंबत्वानाम् ॥ अननुगतत्वादिति । स्वाश्रयेऽन्यूनानतिरिक्ततयास्थित्यभावात् ॥ द्वितीयेत्विति । दर्पणाद्युपाधावेव प्रतिबिंबत्वमुत्पद्यतइतिपक्षे ॥ नापिद्वितीयइति । प्रतिबिंबस्यविशेषोपादेयत्वमितिपक्षोऽपिनेत्यर्थः । नचतेनतयोरभेदस्यैवोक्तत्वात्कथमस्य-पक्षस्योत्थानमितिशंक्यम् । पूर्वं (उत्पत्तिरपि प्रतिबिंबस्यतादात्म्येन) इतितदुक्तिम-प्रेतदुक्तंतंतुपटदृष्टांतंचावलंब्यैवास्योत्थापनात् ॥ भानापत्तिरिति । यस्मिन्धर्मिणियोधर्म-उत्पद्यते तद्विशेषणतयैवतज्ज्ञानमुचितमितिभावः ॥ नचबालादेः कदाचित्तथाभानंजायत-एवेतिचेत्तादृग्भानंभ्रमएवातोऽकिंचित्करमित्याशयेनाऽऽपत्त्यंतरमाहुः-प्रमात्वंचस्यादिति ॥ संयोगप्रत्ययादिति । संयोगस्यापिपरमसिद्धांत आविर्भावांगीकारात्प्रत्ययपदम् । संयोग-स्यापिनित्यत्वंतु कार्यमात्रस्यब्रह्मरूपत्वात्सर्वरूपब्रह्मणोयावन्मूर्तद्रव्यादिरूपकार्येषुसंयोग-स्वतद्विभुत्वनिर्वाहायावश्यवाच्यत्वाचसिध्यतीत्यन्यत्रविस्तरः ॥ पूर्वोत्तरकालयोरपीति । अपिशब्दात्संयोगप्रतीतिकालेऽपिपटस्तंत्वभेदंनव्यभिचरतीतिद्योतितं, परं पूर्वोत्तरकालयोः कार्यस्यानाविर्भूतत्वात्परिणाहायामादिकार्यासाधारणधर्मानानुभूयंते ॥ एतेन सत्कार्यवादे-तंतुसंयोगस्योत्पत्तेः पूर्वं नाशात्पश्चाच्चपटस्यतंतुमात्रत्ववत्तंतुसंयोगकालेवाचारंभणपरिणा-

---

नाशात्पश्चाच पटस्य तन्तुमात्रत्ववत्तन्तुसंयोगकाले वाचारम्भणपरिणाहायामशालिद्रव्यस्वरू-पत्वंतन्तुभेदवत्त्ववच्च प्रतिबिम्बस्यापि उपाधेरसन्नधाने बिम्बमात्रत्वं तत्सन्नधाने तादृश-प्रतिबिम्बत्वबिम्बत्ववत्त्वं बिम्बभेदवत्त्वं च भवति ॥ आविर्भावकोपाधिकृता देशान्तरसब-न्धप्रतीतिः प्रतिबिम्बेपटादितोऽधिका ॥ एतेन अविद्यायाब्रह्मप्रतिबिम्बोजीवइतिमोक्षश्चावि-द्यानाशइति वदतस्तव मते जीवस्वरूपनाशएव मोक्षइतिसंपद्यते । तथाचात्महानमपुरु-षार्थइति मोक्षस्यापुरुषार्थत्वमापद्येत । जीवस्याऽलीकत्वं च स्यात्तथासति कोऽपि पार-लौकिकप्रयत्नं न कुर्यात् इति विद्वन्मण्डनोक्तं सर्वंप्रत्युक्तम्,—उपाधिनाशेन प्रतिबि-म्बस्यनाशात् ॥ अतएव पदार्थस्याविर्भावसम्भवाद्भेदाविर्भावस्योपाधिना स्वीकारे बिम्बे प्रतिबिम्बभेदः स्वीकृत स्यादिति अभेदतिरोभावस्यैव तेन स्वीकारइति तन्नाशेऽपि नभेदनाश किन्तु अभेदतिरोभावनाशएव ॥ विभेदजनकेऽज्ञानेइत्यादौ विभेदादिपदैर-भेदतिरोभावएवोच्यते इति नकश्चिद्विरोधः ॥ उपाधेर्जलस्यधर्मास्तु वृद्धिन्हासाद्या॰ प्रति-बिम्बेऽध्यस्यन्ते ॥ तथाच पारमर्षसूत्रम् ॥ वृद्धिन्हासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादे-वम् ॥ एवंचलौकिकप्रतिबिम्बविलक्षणं यदि किञ्चिज्जीवाख्ये प्रतिबिम्बे तवप्रतीयेत लोकेच तथास्वीकारआवश्यक स्यात्तर्हि अत्राऽघटितघटनापटीयस्यामायाया प्रभावेण तत् स्वीकार्य-यम् ॥ तादृशवैलक्षण्येऽपि प्रतिबिम्बत्वं नापन्हवनीयम्; यत्किञ्चिद्वैलक्षण्यस्यसर्वत्र सत्त्वेनानिवारणीयत्वात् ॥ यद्यपिचावच्छेदवादोपि भगवत्पादमुनेः सम्मतोस्ति पक्षान्त-राणिचभाष्यादिसम्मतानि तत्रप्रतीयन्ते तेषां च वस्तुतो नविरोधइति वार्त्तिककारपादैः सिद्धान्तलेशकृदादिभिश्चोपपादितम्, तथापि तत्रपरस्यातिप्रत्यवस्थानाभावात्तदस्माभिरिह प्रतायते इतिदिक् ॥ ८ ॥ ३६ ॥

हांयामर्शालिद्रव्यस्यस्वरूपत्वतंतुभेदवत्ववच्चप्रतिबिंबस्यापिउपाधेरसमवधानेबिंबमात्रत्वंत-स्समवधानेतादृशप्रतिबिंबत्वंबिंबभेदवत्वंचभवति) इत्यादिनिरस्तम् । संयोगस्याप्युत्पत्तिनाशयोः सत्कार्यवादेंऽगीकर्तुमशक्यत्वात् । तस्यापितयोरंगीकारेतुपटादेः कार्यस्यैवकुतोनोररीक्रियेताम् । पटप्रतीतिकालेऽपितस्यातंतुमात्रत्वं स्वीक्रियतेनतुपूर्वापरकालयोरेव । अतः परिणाहायामावस्थाविशेषोऽपितंतूनामेव । तादृशावस्थाविशेषविशिष्टास्तंत्वादयएवपटादिनामधेयैर्व्यवह्रियंते, नतुपटाद्याविर्भावकालेपितेपुतंत्वादिभेदोऽगीक्रियते । तंत्वाद्यतिरिक्तस्थलेपटादीनामप्रत्ययात् । तस्मात् (भेदवत्त्ववच) इत्यंतोदृष्टांतोऽस्मत्सिद्धांताज्ञानमूलकउभयवादिसंमतस्याभावादसंगतः ॥ तेनैवदार्ष्टांतिकमपिनिःशेषमपास्तम् । बिंबप्रतिबिंबयोस्तंतुपटादिवदुपादानोपादेयभावमस्वीकृत्य प्रतिबिंबस्योपाध्यसमवधाने बिंबमात्रत्वमित्यादेरशक्यवचनत्वात् ॥ (प्रतिबिंबस्योपाधिसमवधानेतादृशप्रतिबिंबत्वबिंबत्ववत्त्वंबिंबभेदवत्वंचभवति) इतिकथनंतुसुतरामसंगतम्; प्रतिबिंबेबिंबत्वोत्पत्तेः स्वयमप्यस्वीकारात् । बिंबएवतस्याःस्वीकारात् । अन्यथाप्रतिबिंबमेवप्रतिबिंबतयाप्रतीयेत मुखंबिंबमितिचनप्रतीयेत ॥ एवंस्वयमभेदतिरोभावस्यवांगीकारेणभेदमनंगीकृत्य "बिभेदजनकेज्ञान" इतिस्वसंमतवाक्यस्याप्यन्यथानयनेन चेदानींबिंबभेदवत्त्वमितिकथनेपूर्वापरस्वग्रंथविरोधः ॥ नचेहस्वोक्तावपिभेदपदमभेदतिरोभावपरतया व्याख्येयम् । तथासत्यग्रे (भेदाविर्भावस्ये) त्यादावपिभेदपदस्यतादृशतिरोभावपरत्वप्रसंगात् ॥ अन्यथात्वनिर्णयापातात् ॥ पुरुषार्थत्वानस्यादिति । "आत्महानमपुरुषार्थ" इत्यभियुक्तोक्तेरात्महानरूपस्यमोक्षस्यसानस्यादितिभावः ॥ तस्यनिरतिशयप्रेमविषयत्वादिति । बृहदारण्यके (अ० ४ ब्रा० ३ पृ० ४४७) "नवाअरेपत्युःकामाये" त्यारभ्य "आत्मनस्तुकामायसर्वंप्रियंभवती" त्यंतेनजीवस्यपरमप्रेमास्पदत्वंश्राव्यते ॥ एतदेवाभिप्रेत्यपंचदश्यांविद्यारण्योऽप्याह-(प्रकरण १ श्लो० ८ । ९) "इयमात्मापरानंदःपरप्रेमास्पदंयतः । मानभूवंहिभूयासमितिप्रेमात्मनीक्षते ॥ तत्प्रेमात्मार्थमन्यत्रनैवमन्यार्थमात्मनि । अतस्तत्परमंतेनपरमानंदताऽऽत्मन" इति ॥ प्रत्यक्षसिद्धत्वादिति । अनेकोत्पत्तिनाशाविर्भावतिरोभावकल्पनापेक्षयालाघवात्प्रत्यक्षानुरोधाच्चप्रतिबिंबस्यैवोत्पत्तिनाशौसुवचावितिभावः ॥ अविश्वासइति । भेदादिशब्दै र्यचिद्भेदएवब्रचिदभेदतिरोभावइत्यनिर्णयात्विभेदशब्दवद्वाक्यस्थशब्दांतराण्यपिकिंस्वार्थपराण्याहोस्विल्लक्षणादिनाऽर्थांतरपराणीतिसंशयाद्वाविश्वासइत्यर्थः तेनस्वोक्तोपष्टंभार्थंकृतंवृद्धिन्हाससूत्रोपन्यासंदूषयंति-वृद्धिन्हासभाक्त्वमित्यादिना ॥ वेदबोधितेति । विषयश्रुतौभारूपसर्वकामादिपदैर्जीवधर्माः सर्वगंधसर्वरसादिपदैश्चजडधर्माबोध्यंतइतिभावः ॥ प्रकृतसूत्रस्यभाष्यंप्रकारांचैकीकृत्यकंचित्तद्भागमर्थतः कंचिदक्षरशश्चसंगृह्णंति-यथालोकइत्यादिना ॥ अल्पत्वमहत्वयोरिति । अल्पत्वमात्रस्यमहत्त्वमात्रस्यचेत्यर्थः । तेनव्यापकेशतेपंचाशदितिन्यायात्स्यादियावत्परिमाणाश्रयत्वेऽप्यदोषः ॥ अल्पतयेति । करकप्रवेशाभिव्यक्तया स्वनिष्ठयैवतया । एवंमहत्त्वमपिमठादिप्रवेशाभिव्यक्तंज्ञेयम् ॥ वृद्धिन्हासभाक्त्वमिति । उपाध्यभिव्यंजितस्वनिष्ठतत्तत्परिमाणव्यपदेशाश्रयत्वं ॥ तदभिव्यंग्येति । वस्तुतोब्रह्मधर्माएवतेलौ-

किकैःपृथिव्याद्युपाधिभिर्लोकेऽभिव्यज्यंतइतिभावः ॥ विषयश्रुत्युक्तइति । चिंत्यमाने-
शांडिल्यविद्यावाक्ये "आकाशात्मा" इतिश्रावितइत्यर्थः ॥ प्रमाणाभावेनेति । अतद्धर्म-
बोधकवाक्येष्वौपाधिकधर्मपरत्वरूपतात्पर्यनिर्णायकानांजैमिनीयप्रसिद्धश्रुतिलिंगादिप्रमाणा
नामभावेनेत्यर्थः ॥ ग्रहणादिति । एतदंतेनप्रकृतसूत्रस्थभाष्यतत्प्रकाशयोराशयोऽर्थतः-
शब्दतश्चप्रायशोऽनूदितः ॥ अत.परंस्वातंत्र्येणवदति–किंचेत्यादिना । दर्शनादिति । अत्रा-
पिशब्दः प्रागुक्तानामुक्तदिशोह्येतुंशक्यानांचप्रतिबिंबत्वदूषकयुक्तीनांसमुच्चायकः ॥ मुक्ता-
नामित्यादि । ब्रह्मैकदेशेऽनादिमायाया.सत्वस्यस्वीकाराच्छ्रुतिसिद्धसृष्टिपौन.पुन्यनिर्वाहा-
न्यथानुपपत्त्याऽग्रेऽपिब्रह्मणिसर्वांशतोमायानिवृत्ते.कदाचिदपिवक्तुमशक्यत्वाच्च सर्वथा-
ब्रह्माभिन्नेषुमुक्तेषुविभाजकक्लेशस्याप्यभावेनतेषुविद्यमानासाशबलवदिच्छाप्रयत्नादिकंतद्द्वारा
पुनःसंसारावेशंचपुनःकुतोनसंपादयेदितिभावः । उत्पत्तिशब्दोऽत्रजननाद्यभिमानरूप-
संसारपरोविवक्षितः ॥ सुकृतिनामित्यादि । अमुक्तदशायांतस्या.सत्वस्यत्वशक्यवारण-
तयास्वभावानुरोधात्सासुकृतिदुष्कृतिनांनियतफलविपर्ययादिकंकुतोनजनयेत् ? । चका-
रोऽत्रविविधानांश्रुत्यादिसिद्धमर्यादाभंगानांसमुच्चयार्थः ॥ यदितुशास्त्रादिनियतमर्यादाति-
रिक्तस्थलएवाघटितघटनापटीयस्त्वंतस्याअभ्युपगम्येततर्हिप्रतिबिंबवस्तुमर्यादाऽपिनतया-
भङ्क्तुंशक्या ॥ अतोजीवस्यप्रतिबिंबत्वमाहत्यनापादयितुंशक्यं ॥ श्रुतियुक्तिति । श्रुत-
यश्चयुक्तयश्चेत्यर्थः । श्रुतिशास्त्रानुरोधितर्कोस्त्वप्रतिष्ठानाद्वेदांतेष्वनिर्णायकाइत्याशयेन-
श्रुतीनांप्रथमनिर्देशः ॥ परेणेति । खंडनीयसहस्राक्षकारेण । तेनाप्पय्यदीक्षितादिभिः-
प्रतिपादनेऽपिनविरोध. । तेषांखंडनंचश्रीपुरुषोत्तमचरणादिग्रंथेष्वस्त्येवातोऽत्रनक्रियत-
इत्याशय. ॥ अत्रायंसारोऽवगंतव्यः–यच्चप्रतिबिंबस्यचबिंबेत्यादिव्यवहारोपिनेत्यंतंतन्नि-
र्मूलं । नहिकाचिदपिप्रतिबिंबस्ययावद्बिंबसत्वंसत्तायाबोधिका तदाविर्भावादिबोधिकावा-
श्रुतिस्मृतिर्नोपलभ्यते यद्बलात्तथा कल्प्यं; नाप्यविप्रतिपन्नार्थविषयापिकाचित्तादृशी युक्ति-
रस्ति ययोपाधीनांसमवधानासमवधानयोःप्रतिबिंबस्योत्पत्तिनाशावकल्पयित्वान्यथैवंकंठ-
गड्डयमानौतस्यतद्विधाभेदस्यचाविर्भावतिरोभावौतेषांचोत्पत्तिनाशौबिंबप्रतिबिंबसाधारण-
धर्मयोश्चमुहुर्मुहुस्तोस्वीक्रियेतांनचोक्ताश्रुत्यादयएवात्रमूलं । तासुप्रतिबिंबस्यनाम्नोप्यनु-
च्चारणात् स्वरसतोध्याख्यातत्वाच्च । किंचप्रतिबिंबस्यालीकत्वंमायिकत्वंचैकादशस्कंधे
द्वितीयस्कंधेचाहश्रीपुरुषोत्तमः"च्छायाप्रत्याह्वयाभासाअसंतोप्यर्थकारिण"इति, "तद्वि-
द्यादात्मनोमायांयथाभासोयथातम"इतिच यिम्बभूतघटादीनांसत्यत्वंत्वनेकश्रुतिसूत्रादि-
सिद्धंप्रागेवदर्शितं, अतोपितयोरभेदोऽशक्यवचनः किंचोपाधिसमवधानेनतदाविर्भावनि-
यमेदर्पणस्यपृष्ठत स्थितस्यपुरस्तात्करणेसमवधानस्यजातत्वात्सपूर्णेनप्रतिबिम्बेनदृग्गो-
चरीभवितव्यंनतुकरमात्रस्यतेन । ननुयावतोवयवस्यतत्समवधानंतावानेवप्रतिबिम्बावयवो-
प्याविर्भवतिचेत्तस्यापिसावयवत्वात्स्थत्वाच्चबिम्बवत्तस्याप्युपादानंकिंचिद्वाच्यं; तत्रनपृथि-
व्यप्तेजांसितत्स्पर्शाभावात, अतएवनवायु; रूपोपलंभाच्च । अतएवनाकाशः; अशब्दगु-
णत्वाच्च नापिकालदिशानांनिरूपाद्युपलंभात् तेषामनारंभकत्वाच्चअत कारणाभावात्कार्य-
मप्यशक्यनिर्गमेनसहोत्पत्तिमितिवक्तुं किंचकिंचिदप्रतिबिम्बस्यनिमित्तंस्यात् दंडादिरेवेतिचेत्

घटाभावेप्युपाधिसमवहितेनतेन सशक्यतेोत्पादयितुं, घटस्यापितन्निमित्तत्वमितिचेत् समानोत्पत्तिकत्वायदीयतांतिलांजलिः; कारणस्यपूर्ववृत्तित्वनियमात् । निरुपादाननिमित्तकंच प्रातिभासिकमिवंजन्यमप्रसिद्धम् प्रातिभासिकस्याप्युपादानएवाविवाद.सन्निमित्तकत्वंतुतस्यापिबहुसर्वसंमतं किंचबिंबेनसहकतिप्रतिबिम्बान्युत्पद्यंते? एकमेवेतिचेत् अनेकदर्पणसमवधानेयुगपदनेकतत्प्रतीतिर्नोपपद्येत । बहुनीतिचेत्संख्याया अनियमोदोष.तस्मात्सावनाद्यसुयोग्यस्यसमवधानेनप्रत्युपाधितदुत्पत्तिस्वीकारएवश्रेयान् । किंचतदूनांतेषांबिंबेनसहोत्पन्नत्वे एकदर्पणसमवधानेपिसर्वेतआविर्भवेयुः । नचैकोपाधिसमवधानभेदस्यैवतस्याविर्भावनेशक्तमितिवाच्यं; गौरवाधिक्यात्, परस्पराभिमुखस्थितदर्पणद्वयेप्रतिबिम्बपरंपरानुभवानुपपत्तेः । एवंप्रतिबिम्बानामपिप्रतिबिम्बदर्शनात्, उत्तरोत्तरप्रतिबिम्बपरंपराया.स्वस्वबिम्बभूतप्रतिबिम्बैः सहोत्पत्त्यादिकमुपाधिसमवधानेचाभेदतिरोधानानितत्राशेचतत्तत्त्वा कल्प्याइतिमहत्येवाव्यवस्था; बिम्बेनसहप्रतिबिम्बोत्पत्त्यादिकल्पनमात्रेणनिर्वाहात् किंचप्रतिबिम्बाविर्भावोत्तरंशस्त्रादिनातच्छेदनादिशक्यतेकर्तुं । शारीरकभाष्येपितृतीयस्यद्वितीयेपादे (सू० २०) वृद्धिह्रासस्त्रेजलचलनेचलतिजलभेदेभिद्यतइत्यभिहितंतथाचजलेप्रतीयमाने प्रतिबिम्बेतरवार्यर्धप्रवेश्यबिम्बस्यापसारणेतत्क्षणमभेदतिरोभावनाशात् कृपाणच्छिन्नस्यैवप्रतिबिम्बस्यबिंबाभेदसिद्ध्याबिंबेच्छेदनादिकमनुभूयेत किंचप्रतिबिम्बस्यसर्वथाबिम्बाभिन्नत्वे आविर्भावेसत्यपि बिम्बभिन्नदिङ्मुखत्वेनसव्यासव्यविपर्ययेणचनभवितव्यं । दृश्यतेतुप्राङ्मुखस्यपुंस प्रत्यङ्मुख.प्रतिबिम्बःवामपाणिप्रणयिकंकणकिणगणाश्चदक्षिणापाणौप्रतिबिम्बस्य तथापूर्वंस्थितस्यप्रतिबिम्बआविर्भूतेपश्चादुपवेशनेहसनेहस्तादिचालनेचप्रतिबिम्बेतत्क्रिययानभाव्यं; तदाविर्भावोत्तरमभेदतिरोभावांगीकारात् । मन्मतेतुमायिकपदार्थांतरस्यांगीकारात् सर्वमुपपद्यते, किंच बिम्बसमानोत्पत्तिनाशमात्राभ्युपगमेननिर्वाह.; बाल्यप्रतिबिम्बेप्यिप्रोमेदस्थिनस्तस्मिन्स्थूलिम्नः पुनरपक्षीणस्यतस्मिन्नपक्षीणतायाश्चानुभवात् बिम्बस्यशरीरादेर्वृद्ध्यपक्षयौतुतत्तत्परमाणुप्रवेशनिर्गमाभ्यांभवत. । नहिपरमाणुप्रवेशनिर्गमौतावपांचभौतिकेप्रतिबिम्बेसगच्छेतेइतिबिम्बवृद्ध्यादिनाप्रतिबिम्बेतस्यानुपपत्तिः । एवंबिम्बस्यतरोः पांचभौतिकावयवच्छेदनेप्रतिबिम्बेतदवयवराहित्यानुभवोनस्यात् । नापिबिम्बस्यावयवाएव प्रतिबिम्बस्यापितइतिकुशकाशावलंबनंशक्यं; अदर्शनंस्वशिरस प्रतिरूपेपुसत्स्वपीत्यादिदशमस्कंधादिवचनोबिंबेऽवयवसत्त्वेपिक्वचित्प्रतिबिंबेतदनुपलब्धेः । एतेनप्रतिबिंबनाशस्यप्रयोजकताऽपास्ता; अनष्टेसमवहितेपिबिंबावयवेप्रतिबिंबावयवनाशात् । अनित्यत्ववादेवर्णध्वंसोत्तरमेवप्रतिध्वनिश्रवणेनाविवर्ध्वंसस्याप्रयोजकतापास्त्वयोरीकार्यत्वाच्च । अपिचप्रतिबिंबतदभेदयोराविर्भावतिरोभावौस्वीकृत्यतयोरुत्पत्तिनाशौयथान्यूपे तथातदुत्पत्तिनाशौस्वीकृत्यतयोरेवाविर्भावतिरोभावावपिमवदुक्तिकौ, निर्णायकविरहात्, कार्यसिद्धेरुत्पत्त्याविर्भावाद्युभयाभ्युपगमगौरवस्यचतौल्यात् । अत्र संशयएवपर्यवसानं वस्तुतस्तुतयोराविर्भावतिरोभावौनविकल्पसहौ; तथाहिप्रतिबिंबंकतिरोधत्ते? उपाधौबिंबेवा? नाद्य; उपाध्यंतरसमवधानेतत्तदनाविर्भावप्रसंगात् । नद्वितीयः; उपाधिंपरित्यज्यतस्यबिंबपर्यंतंगमनस्यादर्शनात्, तथा प्रतिबिंबं

श्चाविर्भवति ? नोपाधौ, अन्यत्रतिरोहितस्यतद्भिन्नस्यकारणमन्तरेणतत्राविर्भावायोगात् । नापिबिंबे, बिंबहित्वोपाधिंप्रतिप्रयाणस्याप्रेक्षणात् । नचतिरोहितस्यैवगमनागमनेवाच्ये, मानाभावात्, दृष्टानुसारिमतान्तरेणान्यथानुपपत्तिपरिहारात्, उपाधिबिंबान्तरालिक क्षणिकनिराश्रयतास्थित्यसंभवाच्च किंचाभेद किंप्रतिबिंबप्रादुर्भावात् प्रागेवतिरोधत्ते तदुत्तरवा ? नाद्य, अनाविर्भूतस्यतस्यतत्तिरोभानाधिकरणत्वायोगात् । नचबिंबमात्र- तदाश्रय, तद्द्वयप्रतीत्यापत्ते द्वितीयश्चेत्नियगमनादिप्रमतरातस्योपाधिदेशगमनादि- क्रमसंभवि अभेदस्यातिरोधानात् तिरोधानात्तरगमनचेद्दृश्येततथातत्तिरोभावनाश, प्रतिबिंबतिरोभावात् । पुरस्तात्भवतिपरस्ताद्वा ? नाद्य, क्षणिकत्वप्रधानभेदप्रत्यययोर योगात् । द्वितीयेतुतिरोभावोत्तरमदर्शनस्यप्रतिबिंबस्यक्षणभेदेनस्थितिमत्व सार्वदिवय- पिसा तथाजावटीतीरयुक्तरक्षणे अभेदस्यमुहुस्तत्तिरोभावतन्नाशयोश्चकल्पननिरर्थक, प्रतिबिंबतिरोधानक्षणावच्छेदेनाभेदतिरोभाव इतिचेत् ? उत्तरक्षणेवतन्नाशश्चाधिकरणा- भावावक्स्यात् ? एवमन्यदपिशक्यमूहितु । वस्तुतस्तुविवर्तवादिनस्नेमतउत्पत्याविर्भाव योर्वैलक्षण्यानुरीकाराभिमनिचिदेतत्, एवंबिंबप्रतिबिंबत्वयोरुत्पत्तिनाशावपिनयुक्तिसहौ । तथाहिप्रतिबिंबत्वप्रतिबिंबएवोत्पद्यते न्यत्रवा ? नान्त्य, अन्यत्रान्यधर्मोत्पत्त्यसंगते, यत्रोत्पद्येततस्यैवप्रतिबिंबतयाप्रत्ययापत्तेश्च । आद्यश्चेत्तदाविर्भावात् प्राक्पश्चादुत्पद्यतेऽन- न्तरवा ? नप्रथम, अधिकरणासिध्योत्पत्त्यसिद्धे । द्वितीयश्चेत्तादात्म्यापरपर्याये समवाय संबन्धावच्छिन्नतन्निरूपिताधिकरणतावच्छेदकतत्प्रतियोगिकप्रागभावाधिकरणतावच्छेदकंच किंस्यात् ? प्रतिबिंबत्वमेवेतिचेदात्माश्रय, नाप्यन्यदप्रसिद्धे । आविर्भावश्च केनरूपेण ? नप्रतिबिंबत्वेन, व्याघातात् । तथाभेदतिरोभावात्पूर्वंतदुत्पद्यत, तदुत्तरवा ? आद्ये बिंब त्वादंघटाद्यवतदधिकरणवाच्यमिनितत्रप्रतिबिंबत्वप्रतीते प्रतिबिंबेतदप्रतीतेश्चप्रसक्ति । द्वितीयेतिरोभावाधिकरणतावच्छेदकस्यानिर्णय तथाप्रतिबिंबतिरोभावात्पूर्वंतद्ध्वंसयतिप श्चाद्वा ? आद्यश्चतिरोभाव केनरूपेण ? द्वितीयेतिरोहितेपिप्रतिबिंबेकञ्चित्कालंतुप्रतिबिंबत्व तिष्ठत्येवेति । अप्रतन्नाशकल्पननिष्फल उभयत्रप्रतिबिंबत्वप्रतियोगिकध्वंसाधिकरणेनावच्छे- दकानिर्धारश्च एवमभेदतिरोभावाद प्राक्तन्नाशेतिरोभावध्वंसाधिकरणतावच्छेदकानिश्चय नागृहीतविशेषणेतिन्यायेनतद्रहितश्चप्रतिबिंबपदार्थएवबोद्धुमशक्य । तदनंतरतन्नाशेतुक्ष- णपरस्परनिरूपितबिंबत्वप्रतिबिंबत्वयो सामानाधिकरण्यापत्ति । संभवतिचसामानाधि करण्येसदैवतदास्तांप्रतिबिंबस्यापिप्रतिबिंबेसति प्रथमप्रतिबिंबेनिरूपकभेदादुभयो सामा नाधिकरण्यदृश्यते अत परस्परनिरूपितत्वविशेष्यते । एवंबिंबत्वोत्पत्त्यादावपिएतएवविक ल्पायथायथमूह्या । इतरश्च तिमिरस्यापिप्रतिबिंबतेतच्चप्रौढप्रकाशकतेजोऽभावएव, अभावे चधर्मान्तरोत्पत्तिध्वंसयोरप्रसिद्ध्यातत्रबिंबत्वस्यतावदशक्यत्वनौतत्प्रतिबिंबेचप्रतिबिंबत्व स्यतौअभावरूपेतत्प्रतिबिंबेस्यामत्वाद स्वप्रतियोगितेजकदयेप्रतीतश्चविरोध । यदितु "य थाभासोयथातम" इत्यादिप्रमाणसिद्धतस्यमायिकपदार्थान्तरत्वस्वीकृत्यसर्वंसाधयेस्तर्हिघट- कुटीप्रभात ततएवप्रतिबिंबस्यापितथात्वसिद्धे । एतेनअनादिबिंबेप्रतिबिंबस्यानादित्वमपिप्र त्युक्त । अवच्छेदकस्यमुहुरुत्पत्तिध्वंसाङ्गीकारे तदवच्छिन्नस्यनित्यत्वानिष्पत्ते । अत प्रतिबिं

चाविर्भावादीनांबहुनामुत्पत्तिनाम्युपगमक्लेशापेक्षयालाघवाद्दृष्टानुसारात् प्रमाणानुग्रहाच्च प्रतिबिंबमात्रस्यतौनकुंयुक्तौ ॥ एतावतैवप्रपंचसत्कार्येत्यादिः नकश्चिद्विरोधइत्यंतोग्रंथोपिनिराकृतोवेदितव्यः ॥ प्रतिबिंबस्याप्याविर्भावाद्यंगीकारे' अंतेरंडाविवाह' इतिन्यायेनसत्कार्यवादमेवस्वीकुरु ॥ सर्वकार्यंब्रह्माभिव्यंक्तस्थानादित्वादनादित्वंसृष्टिकालोपाधिसमवधानेतदाविर्भवनितद्भेदश्चतिरोधत्ते; तदतिक्रमेचसर्वंतिरोभवतीतिकथनेबाधकाभावात् । सत्कार्यवादिनश्चघटादिवत् पटत्वादिकमपिनित्यमन्यंतेऽवस्तत्रनोक्तदोषप्रसरः । विशेषस्तुसत्कार्यविवेचनस्थलेप्रागुक्तोद्रष्टव्यः । किंचैवंसत्ताश्रयमपिनस्वीकार्यं; रजतादीनिहिशुक्त्यादिनासहैवोदरचंते । तामसबुद्धिसमवधानेचतत आविर्भवंनीलादिकल्पनस्यत्वजल्पनससमानयोगक्षेमत्वयात्र तावकपर्यनुयोगायोगात् अतः प्रतिबिंबालीकतायाः प्रमाणसिद्धत्वात् युक्तिसिद्धत्वाच्च । उपाधेः प्रतिबिंबत्वस्यचनाशेप्रतिबिंबनाशावश्यंभावाच्च विद्वन्मंडनोदितंदूषणद्वितयमप्यशक्योद्धारं अभेदतिरोभावस्येदभेदस्यैवोत्पत्तिध्वंसांगीकारेणैवसर्वसिध्यतिनवेत्यपि विचारणीयं । तथासतिविभेदजनकइत्यपितदन्यमनुपचारादगृहीतंभवेत् । वृद्धिन्हासमसूचंतुपुरैवस्वारसिकविवरणधारिणाविभाविते । यच्चएवंचलोके त्यादिश्चनिवारणीयत्वादित्यंतमवादि, सोऽयमपूर्वोवाङ्स्वंभनमंत्रोऽभ्यूहितोभवता-यदघटितघटनापटीयस्त्वंमायाइति । अनेनैवसर्वसिद्धौ अस्वच्छत्वादिहेतुसमूहकनिरासप्रयासोप्यायुष्मतस्तोयताडनसगंधः । अथप्रतिबिंबत्वबाधकप्रामाणिकयुक्तीनामियन्मात्रेणाप्रतिविधानात्सार्थक्यमितिचेत्मंप्रत्युक्तप्रत्युक्तमेव बहूनिचप्रतिबिंबवादसाधकानिविद्वन्मण्डनव्याख्यायामुत्तरोत्तरकोव्यवतरणतयोपन्यस्तान्येवाशयप्रक्रदानयुक्तिलाभवान्सगूहः तदेतच्चौर्यंचातुर्यंसन्यास्यंतत्प्रक्षिप्तवद्भि: प्रेक्षावद्भिः स्वयमेवानगंस्यतइति कृतमतिशयेन । किंचमायायाविभुत्वेन तत्प्रतिबिंबस्यापिविभुत्वेतस्यचलनाद्यसम्भवात् (छांदोग्यअ० ६ खं० ११) "अस्ययदेकांशाखांजीवोजहात्यथसाशुष्यतिद्वितीयांजहात्यथसाशुष्यतितृतीयांजहात्यथसाशुष्यतिसर्वंजहातिसर्वः शुष्यती" त्यादिश्रुतयः पीड्येरन् । नचजलकंपेनतद्गतप्रतिबिंबकंपवन्मायापसरणेनतदपसरणंशंक्यं; आकाशादिसर्ववस्तूनांतद्व्याप्यत्वनियमेनतदपसरणायोगात्, जगतोमायिकत्वेनतदपसरणे शुष्कशाखादीनामप्यनुपलंभप्रसक्तेश्च । एवमुत्क्रांत्यादेरात्मनागत्यागत्योश्चविरोधोप्यनुसंधेयः । नचांत करणसंयोगवियोगाभ्यांहरिततत्वशोपगेकल्प्येअणुमात्रस्यतस्यव्याप्यवृत्तित्वाभ्यंमनेनतत्कर्तृकस्यसर्वशाखाजीवनस्यैकतरतत्त्यागस्यचाशक्यवचनत्वात्तस्मात्प्रदीपोदर्शयनीत्यादिवदव्याभिव्यविसर्पिचैतन्यद्वारामएवजीवइतिजहातिचेत्ययमुक्तं युक्तं; अन्यथा मध्यमपरिमाणापत्तेः । एतेनांत करणेब्रह्मप्रतिबिंब सद्गतिपक्षोप्यपास्तः । अतएव "संकल्पाहंकारसमन्वितोय" इत्यादयस्तत्संयोगबोधकश्रुतिस्मृतयः संगच्छंते । नहिदर्पणयुक्तः प्रतिबिंबइतिव्यवहरति, अस्मिन्पक्षेउपाधेरल्पतयाजीवस्यविभुत्वमपिनस्यात् । नचानियतविभुत्वेनतत्संभवः; आकाशस्यतथात्वेपितत्प्रतिबिंबतयाभिप्रेतप्रभाप्रचयप्रतिच्छायायाविभुत्वाभावात् । एतेनांत करणावच्छिन्नत्वपक्षोऽप्यापास्तः । वस्तुतस्तुमायाया अपिपरिच्छिन्नत्वेनतत्प्रतिबिंबत्वतदवच्छिन्नत्वपक्षयोरपिनतत्सिद्धिः । एकस्मिन्नुपाधौव्याप्यवृत्त्यनेकप्रतिबिंबानामप्यसंभवश्च आहत्यतथांगीकारेसां-

कथं सर्वैषामसार्वज्ञ्य (अध्या० २ पा० ३ सू० ५१) "अदृष्टानियमा" दित्यादिसूत्रोक्तदोषाश्चप्रसज्येरन्नित्युक्तप्राक् । किंचमायायांप्रतिबिंबोजीवश्चेदीश्वर श्चप्रतिबिंब ? तत्रैवेतिचेत्, न, उपाधिव्यापकानेकप्रतिबिंबानुपपत्ते । अपिचैवंसति बिंबस्यतेषांचव्यावर्तक ? बिंबस्योपाधेश्चाविशेषात् तत्रैवदेशभेदनेतिचेत् उभयोरपिविभुत्वनसिध्येत् शरीरादानीश्वरसत्वाचनस्यात् । तथाच "व्याप्यनारायण स्थित" इत्यादीनास्वमतरीत्या 'सवाएषमहानज' इत्यादीनाच याकोप । एवविधानुपपत्तिभयादेवत्वदीयमायायाब्रह्मप्रतिबिंबइश्वरोऽविद्यायाचसजीवइत्युपाधिभेदकल्पयति । यथोक्तम्—"जगतोयदुपादान मायामादायतामसीम् । निमित्तशुद्धसत्वातामुच्यतेब्रह्मतद्गिरा ' ॥ ४४ ॥ यदामलिनसत्वाताकामकर्मादिदूषिता । आदत्तेतत्परब्रह्मत्वपदनतदोच्यत ॥ ४५ ॥ इति ॥ "मायाऽविद्येविहायैवमुपाधीपरजीवयो ॥ अखडसच्चिदानदपरब्रह्मैवलक्ष्यत" इतिच ॥ इत्थचमायायप्रतिबिंबनचितिरसा नतकथनजीवोपाधीसत्वशुध्द्युपपादनचस्वग्रथविरुद्ध, वस्तुतस्तूपाधिभेदोऽप्यकिंचित्कर । यथाहु श्रीपुरुषोत्तमचरणा —उभयोर्मायाविद्ययोर्व्यापकत्वे रजस्तमोनभिभूतत्वाभिभूतत्वया सार्वत्रिकत्वेनमायाविद्याविषयकासभवात्प्रतिबिंबयोरप्यविवेकेन जीवश्वरविभागस्यदुरुपपादत्वम् ॥ अव्यापकत्वजीवश्वरयोर्व्यापकत्वाहानिप्रसगश्च । अथमायायाव्यापकत्वबहि सर्वत स्वच्छत्वमविद्यायाश्चतदत स्थायामलिनस्वच्छत्वमुपगम्यत, तदापिव्यापकप्रतिबिंबादर्शनादीश्वरोदुरुपपाद । बहिष्ठायाश्चितोमायाशरजस्तमोभ्यामविद्याव्यवधाने तत्प्रतिबिंबासभवाज्जीवोपितथानिकटचितस्तुनैकध्यादवतदसभव इति । तथा किंचिद्दूरत्वात्प्रकाशादिकल्पनेतुइश्वरस्यचितश्चप्रादेशिकत्वापत्तिर्व्यापकत्वहानिराकाशसभवश्रुतिविरोधश्चेत्यादि ॥ तस्मादात्मन प्रतिबिंबरूपत्वज्ञानमासुरविद्यायामेव । एतच्च छादोग्ये इद्रविरोचनप्रजापतिसवादस्फुटमितिदिक् । विशेषतश्चप्रतिबिंबत्वप्रतिविधायिका प्रमाणप्रकरप्रसूतायुक्तय प्राचामाचार्याणावाचामाचातास्मृताचाराणागोचराश्चिरादाचतएवैत्यलताभिरुक्ताभि किंचक्वचिल्लोचनागुलिसपर्केण प्रतीयमानद्विचद्रादिवदाभासोजीव क्वचिन्मायायाप्रतिबिंब स क्वचिच्चाविद्याय क्वचिच्चात करणच्चिच्चावरणशक्तिमद्भूतप्रकृतिभागेषुक्वचिच्चात करणावच्छिन्नेश्वरस्य अज्ञानेप्रतिबिंब स क्वचिच्चात करणावच्छिन्नचैतन्यमेवस क्वचिच्चाविद्यावच्छिन्नमित्यादयोबहवस्त्वन्मतप्रसिद्धा परस्परविरुद्धा पक्षा श्रीमदाचार्यचरणादिभिरनूद्यसुरेश्वराप्पय्यदीक्षिताद्युक्तोशेषयुक्तिपेषणपूर्वक सर्वेव्युदस्ताएव । तेनयदपिचात्वच्छेदवादइत्यादिइतिवगित्यत्तखंडितवदितव्यम् ॥ एवपराभिप्रेतेजीवस्वरूप निराकृत इत्यष्टमश्लोकखडनम् ॥

यदपि 'नन्नैकाकीनरमतेसद्वितीयमैच्छ' दितिश्रुत्याब्रह्मण क्रीडार्थं जगन्निर्माणमित्यादिनाशुद्धाद्वैतमार्तंडोक्तंकिंचिदनूद्यतत्रवैषम्यनैर्घृण्यरूपदोषापादनतदपिन, पूर्ववैषम्यनैर्घृण्यरूपाणादोषाणामुद्धृतत्वात्तन्मतएवतेषासभवस्याधस्तान्निरूपितत्वाच्च । ननु (लोके क्रीडा स्यानदफलादृष्टा । नचाप्तकामस्याविर्भूतनित्यानदस्वरूपस्यानदापेक्षा

स्ति। नहितदानंदोन्यूनोयतोधिकार्थंसास्यात्प्रलयेन्यूनानंदप्रसंगश्च) इतिचेत्,-मैवं; "लोकवत्तुलीलाकैवल्य" मितिसूत्रेणव्यासैरेवास्य पूर्वपक्षस्यपरिहृतत्वात् तत्र "नप्रयोजनवत्वा" दितिसूत्रेणनब्रह्मजगत्कारणंकुतः? प्रयोजनवत्वंनसंभावयितुमपिशक्यंआप्तकामश्रुतिविरोधादितिपूर्वपक्षेसमादधतेलोकवदित्यादितुशब्दःपूर्वपक्षंव्यावर्तयतिलोकवदेवलीला। नहिलीलायांकिंचित्प्रयोजनमस्ति, लीलायाएवप्रयोजनत्वात्यथा लोकेराजभिर्मृगयादिक्रियतेतत्रनमांसाद्याहरणमन्यद्वाप्रयोजनंभृत्यादिभिरपितत्संभवात् किंतुलीलैव। नहिराज्यसुखंमृगयासुखान्न्यूनंयेनाधिक्यात्तस्मिन्प्रवृत्तिःस्यात्। एवंलोकेपिप्रयोजनंविनैवईश्वरोपिलीलां करोतितथैववेदेनप्रतिपादनाच्चनात्रपर्यनुयोगावकाशईश्वरत्वादेवनलीलापर्यनुयोक्तुंशक्या; सालीलाकैवल्यंमोक्षः ईश्वरेच्छायांफलंचिंतयन् व्यासाभिप्रायानभिज्ञत्वादुपेक्षणीयः॥

अथश्रुत्यादिसिद्धेप्रपंचाविर्भावनस्यक्रीडार्थकत्वादौप्रलयस्थायिनंक्रीडायानफलमितितदीयंनवमश्लोकंसव्याख्यंयदपिनन्वेकाकीत्यादिनाब्रह्मविदोमतिरीत्याद्युक्तमित्यंतेनखडयिष्यंतः प्रथमंनन्वित्यादिईश्वरेच्छेत्यंतंभागंखंडयंते-यदपिनन्वित्यादिनाउपेक्षणीय इत्यंतेन (अ० २ पा० १ सू० ३२) "नप्रयोजनवत्वा" दितिपूर्वपक्षसूत्रस्यलोकवदितिसिद्धांतसूत्रस्यचभाष्येप्रकाशेस्थितमेकीकृत्यानुवदंत परोक्तंसमादधते-मैवमित्यादिनासालीलेत्यादि। मोक्षंप्रतिनियतकारणत्वान्मोक्षरूपेत्यर्थः॥ तस्यात्तथात्वं 'जन्मकर्मचमेदिव्य' मित्यादौस्पष्टं। अनादौसृष्टिप्रलयपरंपरायांप्रलयेस्वस्मिन्लीनानांजीवानांपुनः प्रपंचक्रीडामंतरास्वतोमोक्षस्यासंभवादपितथा॥ अत्रेदंबोध्यम्-प्रपञ्चनिर्माणस्यक्रीडार्थकत्वबोधिकाः श्रुतयःकाण्वानांबृहदारण्यके तृतीयाध्याये पुरुषविधब्राह्मणाख्यचतुर्थब्राह्मणे (पृ० १३७) "सवैनैवरेमेतस्मादेकाकीनरमतेसद्वितीयमैच्छत् सहैतावानास" इतिपठ्यते॥ माध्यंदिनानांत्विदं द्वितीयब्राह्मणं (पृ० १०५१) मंत्रपाठस्तुतुल्यः॥ याजुषाणांमैत्र्युपनिषदिद्वितीयप्रपाठके (पृ० २५०) "प्रजापतिर्वाएकोग्रेतिष्ठत्सनारमतैक सोत्मानमभिध्यायाद्बह्वी प्रजाअसृजत" इति॥ अग्रे प्राणजीवादिरूपेण प्रवेशकथनात् शांडिल्यविद्यासगादिधर्मांतरकथनाच्चेहप्रजापतिः परमात्मा॥ (अध्याय २ पाद १ सूत्र ३३) "लोकवत्तुलीलाकैवल्य" इति॥ श्रीभागवतेचप्रथमस्कंधेत्रयोदशाध्याये (श्लोक ४२) यथाक्रीडोपस्कराणांसंयोगविगमाविह॥ इच्छयाक्रीडितुःस्यातांतथैवेशेच्छयानृणाम्॥" चतुर्थस्कंधेसप्तमाध्याये (श्लो० ४३) "अंशांशास्तेदेवमरीच्यादयएतेब्रह्मेंद्राद्यादेवगणारुद्रपुरोगाः॥ क्रीडाभांडंविश्वमिदं यस्यविभूम तस्मै नित्यंनाथनमस्तेकरवाम॥" अष्टमस्कंधे (अ० २२ श्लो० २०) "क्रीडार्थमात्मनइदं त्रिजगत्कृतंतेस्वाम्यंतुतत्रकुधियोपरईशकुर्युः॥ कर्तुःप्रभोस्तवकिमस्यत आवहंतित्यक्तह्रिय-

स्तरदवरोपितकर्तृत्वात् ॥" एकादशे (अ० ९ श्लो० २१) "यथोर्णनाभिर्हृदयादूर्णां सन्तत्य वक्त्रतः ॥ तया विहृत्य भूयस्तां ग्रसत्येवं महेश्वर ॥" महेश्वर इत्यपि च क्वचित्पाठः ॥ एवं क्रीडार्थत्वं जगन्निर्माणस्य श्रुतिस्मृतिन्यायसिद्धं । यत्तु नन्वेकाकी स्यादित्याद्युक्तमिच्छाईश्वरेच्छेत्यत्र आगादि, तत्रोच्यते क्रीडार्थं जडादिषु चिदादितिरोधानमुक्तमेव, वैचित्र्यं विना तदनुपपत्तेः । अतएव "बहुस्यां प्रजायेय इति तिरोभावी" त्यादिश्रूयते चिदादितिरोभावस्य सप्तमश्लोकखण्डने समर्थितत्वेन निरस्तत्वादिति हेतुः प्रत्युक्तः । तृतीयश्लोकखण्डने सिद्धान्ते वैषम्याद्यप्रसक्तेस्तन्मत एव तत्प्रसक्तेश्च दर्शितत्वेन द्वितीयो हेतुः । तथा च इयं क्रीडा भगवद्धर्मत्वादलौकिकी 'जन्म कर्म च मे दिव्यमि' त्यलौकिकत्वस्मरणात् दिव्यो ह्यमूर्तः पुरुष इतिवत् अतएव नित्या भनुच्छित्तिधर्मेति काण्वश्रुतेः नित्या यत्र महागुणा इति प्रथमस्कन्धभूमिवाक्याच्च अतएव भगवदभिन्ना प्रकाशाश्रयन्यायात् । न च नित्यत्वे सति सर्वदा सृष्टिप्रसक्त्या प्रलयानुपपत्तिः शक्या, आत्मरतिबहीरतिभेदेन तस्या द्वैविध्यात् तत्रात्मरतौ प्रलयः बहीरतौ सृष्टिरिति व्यवस्था अतएव तृतीयस्कन्धाष्टमाध्याये (श्लो० १०) "उदाप्लुतं विश्वमिदं तदासीत् यन्निद्रयामीलितदृङ्न्यमीलयत् । अहीन्द्रतल्पेऽधिशयान एकः कृतक्षणः स्वात्मरतो निरीहः" इति । एतेनैव पुरुषविधब्राह्मणादिसिद्धा बहीरतिरपि व्याख्याता सर्वेनैवेति प्रसिद्धार्थकवैशसनापित्थानिश्चयात् यच्च क्रीडाफलमनुयुक्तं तत्राभ्युपेत्यापि ब्रूम —आनन्द एव तत्फलं । न च प्रत्येतव्यूनतापत्तिः तस्या नित्यत्वेन फलस्यापि नित्यत्वात् । अयं च धर्मभूत आनन्दः "आनन्दं ब्रह्मणो विद्वा" निति श्रुतेः । नचैवं फलाविशेषे बहीरतेः का किंप्रयोजनमित्यनुयोक्तव्यं, ईश्वरेच्छाया अपर्यनुयोज्यत्वात् तुल्यतावदिसर्गाभ्युदययोरप्युद्यानयोरन्यतरस्मिन् विजिहीर्षु राजादेर्लौकिकश्वरोऽपि न विहारातिरिक्तप्रयोजनो भवति । न चानन्दस्यैतत्प्रयोज्यत्वादनीश्वरत्वापत्तिर्वाच्या, उक्तन्यायेन तस्याः स्वाभिन्नत्वात् । अन्यथा ब्रह्मभूतस्यच्छान्दोग्य-दहरविद्यायां श्रूयमाणमात्मक्रीडत्वात्मानन्दत्वादिकमपि दोषं नातिवर्तेत । वस्तुतस्तु क्रीडैव फलरूपा न तु तस्या अपि फलान्तरमस्ति, अतएव भगवान्सूत्रकारो दोषसहस्रमप्युदासपुरः सर

क्रीडायानफलं ततोऽस्ति विफलाऽजेच्छा तथाऽहेतुका
श्रुत्यर्थो भवतोदितो न वदते किञ्च श्रुतौ तत्पदम् ॥
न ब्रह्माऽपि तु वक्ति तत्प्रकरणाज्जीव तथाऽऽत्माहरे
र्जीनाद्यो यदि कं ससर्ज नहि चेत्तत्रोऽभिदिष्टा न ते ॥ ९ ॥

नन्वेकाकी न रमते स द्वितीयमैच्छदिति श्रुत्या ब्रह्मणः क्रीडार्थं जगन्निर्माणमिति भाति ॥ क्रीडा च वैषम्यमन्तरा न घटत इत्यास्तामभेदेऽपि प्रयोजनानुसारेण चैतन्याद्यंशतिरोभावादिवैलक्षण्यमिति चेत्,—न, निरस्तत्वात् ॥ वैषम्यनैर्घृण्यापत्तेरुक्तत्वाच्च ॥ किञ्च लोके क्रीडा स्वानन्दफला दृष्टा ॥ न चाऽऽप्तकामस्याऽऽविर्भूतनित्याऽऽनन्दस्वरूपस्याऽऽनन्दापेक्षाऽस्ति ॥ नहि तदानन्दो न्यून यतोऽधिकार्थं सा स्यात् ॥ प्रत्यय न्यूनानन्दप्रसङ्गाच्चेत्याह ॥ क्रीडायानेति ॥ निरर्थकक्रीडाकल्पनं तु दृष्टविरुद्धमिति भावः ॥ एवं च क्रीडेच्छाया अपि फलं चिन्त्यमित्याह ततइति ॥ अजेच्छा ईश्वरेच्छा ॥

श्रुतिबलाद्ब्रह्मणएवजगदुपादानत्वंस्वेच्छयाकर्तृत्वंचराद्धांतयित्वापूर्वपक्षमाह–(अ० २ पा० १ सू० ३२) "नप्रयोजनवत्त्वा" दिति । अर्थस्तुब्रह्मनजगत्कारणंकार्यस्यप्रयोजनवत्त्वात्प्रयोजनमनुद्दिश्येतिन्यायात्ब्रह्मणस्तथात्वेऽनाप्तकामश्रुतिविरोध" इतिपूर्वप्राप्तेनिराकरोति (सू० ३३) "लोकवत्तुलीलाकैवल्य" मितितुशब्दः पूर्वपक्षंव्यावर्तयतिलीलैवप्रयोजनंनतुतस्याः प्रयोजनांतरं लोकेमहाराजादीनांमृगयादिलीलास्वयमेवप्रवृत्तेः प्रयोजनंमांसाहरणादेर्भृत्यद्वारापिसंभवात्प्राप्तकामानामपिलीलासुप्रवृत्तिः प्रयोजनानुद्देशेनदृश्यतेनहितेद्यूतकारादिवत्प्रयोजनमनुसंधायक्रीडासुप्रवर्तंते किंचक्रीडामात्रस्यानंदफलकत्वंननियतंद्यूतादिक्रीडायांद्रव्यलाभादिप्रयोजनकत्वदर्शनात् नापिसप्रयोजनकत्वं ॥ तथा ॥ दीपावल्यांशास्त्रसिद्धगोक्रीडनेक्रीडितुर्गोवर्गस्यप्रयोजनविशेषानुपलंभात्; प्रत्युत तस्यकोपनदर्शनात् । इत्थमध्वगकृतपरिश्रमादिक्रीडाअप्यनुसंधेया । नचविपश्चित्प्रवृत्तौप्रयोजनानुसंधानंनियामकं; निमेषोन्मेषणादिप्रवृत्तौव्यभिचारात् ॥ मैत्रेयीब्राह्मणादौब्रह्मणोऽपिनिःश्वसितन्यायेनसर्गविशेषस्यपुराणेषुसृष्ट्याश्रयेद्विपरार्धाख्यकालेउन्मेषणनिमेषणरूपतायाश्चकथनात् श्वासोच्छ्वासरूपमुक्तानामपिलोकेबालकरतक्रीडायाः पुराणेषुध्रुवोबालकरतक्रीडेदित्यादौप्रसिद्धेश्च । नहितेषांक्रीडयानंदाधिक्यंसुवचं । एतेननिरर्थकक्रीडाकल्पनंदुष्टविरुद्धमितिकथनंपरास्तं; लोकवदिति सूत्रकारोक्तिप्रतिकूलत्वात् । ननुराजक्रीडायामपिसुखंफलमस्त्येवेतिचेन्न; प्रियत्वप्रकारकप्रत्ययविषयत्वेनतस्याएवसुखरूपत्वनिश्चयात्त्वयाघटादौतथैवानंदरूपतायाः स्वीकारात्प्रत्यग्जनकत्वात्तद्गुणकंतत्तदात्मकमितिव्याहृयोः सांख्यादितंत्रांतरेसाधितत्वात्एतदाश्रित्यैववाचस्पतिमिश्रःसांख्यतत्त्वकौमुद्यांयथैकास्त्रीरूपयौवनशीलसंपन्नापत्युः सुखदासपत्नीनांदुःखदापुरुषांतरस्यमोहदेतिप्रदर्शनेनवस्तूनांत्रिगुणात्मकत्वंसाधयतितस्माल्लौकिकक्रीडानामप्यंशतःसुखरूपत्वंतारतम्यानुभवात्सुखरूपत्वाच्चास्याः प्रयोजनांतरंमृग्यं; अन्येच्छाविषयत्वस्यैवसुखलक्षणत्वात् भगवल्लीलायांतुतदभिन्नत्वादानंदात्मकत्वमसंदिग्धंअभेदाश्रितत्वाच्चनाप्तकामश्रुतिविरोधः । नापिप्रयोजनांतरापेक्षा; अन्यथालोकेसुखस्यापिप्रयोजनमनुयुज्येतअतईश्वरस्वभावरूपेयंनित्यधर्मभूतातदभिन्नाक्रीडेतिनपर्यनुयोगार्हा ॥ अतएवशंकराचार्यपरमगुरुभिर्गौडपादाचार्यैरपिसृष्टिविचिंतने (कारि० ७) "इच्छामात्रंप्रभोः सृष्टिरितिसृष्टौविनिश्चिता" इति (कारि० ९) "देवस्यैषस्वभावोऽयमाप्तकामस्यकास्पृहा" इत्युक्तंक्रीडार्थमितिचापर इतितुकेवलनिमित्तत्ववादिनामनुवादः; अन्यथासूत्रविरोधात् ॥ यदिचक्रीडायाअपिकिंचित्प्रयोजनंस्यात्तर्हिसर्वदर्शीनिष्प्रयोजनपूर्वपक्षंसमादधानः शेषाम्नायचतुष्टयीदैशिकोब्रह्मभूतशिरोमणिर्भगवानाचार्योऽवश्यंतद्ब्रूयात्लीलावादंवानाभ्युपेयात्प्रत्युतदूषयित्वाप्रकृतसूत्रविषयवाक्यानित्वन्यथानयेत् । नचसूत्रमन्यथाव्याख्येयंस्वभाष्यविरोधापातात्यथैतद्व्याख्यानेशंकराचार्याः–"यथालोकेकस्यचिदाप्तैषणस्यराज्ञोराजामात्यस्यव्यतिरिक्तंकिंचित् प्रयोजनमनभिसन्धायकेवलंलीलारूपा प्रवृत्तयःक्रीडाविहारेषुभवंतियथाचोच्छ्वासप्रश्वासादयोऽनभिसन्धायबाह्यंकिंचित्प्रयोजनान्तरंस्वभावादेवभवन्तिएवमीश्वरस्याप्यनपेक्ष्यकिंचित् प्रयोजनान्तरंस्वभावादेवकेवलंलीलारूपाप्रवृत्तिर्भविष्यति । नहीश्वरस्यप्रयोजनांतर-

निरूप्यमाणंन्यायतः श्रुतितोवासंभवति । नचस्वभावःपर्यनुयोक्तुंशक्यतइति ॥ यदिनाम लोकेलीलास्वपिकिंचित्सूक्ष्मंप्रयोजनंतूत्प्रेक्षेततथापिनैवात्रकिंचित्प्रयोजनमुत्प्रेक्षितुंशक्यते; आप्तकामश्रुतेः, नाप्यप्रवृत्तिः उन्मत्तप्रवृत्तिर्वासृष्टिश्रुतेः सर्वज्ञश्रुतेश्चेतिचाहुः । नामरूपसृष्टेराविद्यकत्वंतुनैतत्सूत्रांतरलभ्यं; नाप्यस्याः स्वप्नवन्मायामात्रत्वबोधकंकिंचिदधिकरणमस्त्यतन्नथात्वोक्तिरुपेक्ष्यैव । तथाचप्रहिलतयासुखरूपत्वमनादृत्यक्रीडायास्तत्फलकल्पनेप्यस्तुतिरोहितपरमानंदानांक्रीडास्वेवसनियम आनंदरूपस्यक्रीडायांतुस्वतः फलत्वमेवोचितं ननुश्रुतिस्मृतिसिद्धासाप्रतिषेद्धुंशक्या; नचक्रीडात्वानुपपत्तिः आयासानाधायककृतित्वेनतथात्वस्यसौस्थ्यात् एवमनूरीकारेतुजन्माद्यधिकरणसाधितस्यजगन्निर्माणस्यलीलातिरिक्तंप्रयोजनमुपपादयन्त्वायुष्मान् किमीश्वरस्यतत्स्वार्थंपरार्थंवा ? नाद्यः; नित्यतृप्तिविरोधात् तस्यापिप्रयोजनप्रश्नेसुखएवविश्रांतिसंभवेनस्वोक्तदोषनिरासाच्च । नद्वितीयः; पाचकादिवदनीश्वरत्वापत्तेः। किंचांतत-स्वार्थमंतरापरार्थव्यापारेपिस्वीकारमात्रशरणः ऋत्विगादिव्यापारेपुदक्षिणालाभादिस्वार्थपर्यवसायित्वदर्शनात् । नचकारुणिककृतौव्यभिचारः तस्यामपीतरदुःखासहनात्मकमानसभीतिनिवृत्तिरूपस्वार्थफलत्वात् नप्रयोजनत्वादितिसूत्रेरत्नप्रभाकारोप्येतदेवाह । नचैवंसर्वत्रस्वात्मगामित्वेस्वरितञितांपरस्मैपदोच्छेदप्रसंगःशंक्यः; फलव्यापारयोर्धातुरित्युक्तयायजत्यादिप्रकृत्तधात्वर्थस्यमुख्यफलस्यपरगामित्वेतदुपपत्तेः । एतदर्थमेवसूत्रेप्रोपसर्गस्यक्रियाशब्दस्यचग्रहणात् स्पष्टंचैतत्स्वरितञितइतिसूत्रेमहाभाष्येअतःपरार्थपक्षेपिप्रवृत्त्युपपत्तयेऋत्विगादिवदीश्वरस्यकश्चित्स्वार्थोवक्तव्य.तस्यापिप्रयोजनविचारेपरंपरयानंदफलकःस्यादितित्वन्मतेत्वदुक्तदोषस्तदवस्थः; किंच सृष्टेःप्राक्परंवस्त्वेवाद्वैवादेदुर्वचमितिकुत्र परार्थः ? इत्थंकालोद्बोधितकर्मफलदानार्थंसृष्टिरितिकल्पनेप्याप्तकामस्यफलदानेप्रयोजनमन्वेष्टव्यंतस्मात्सृष्ट्याप्तकामत्वरमणादिबोधकसर्वश्रुतिस्मृतिसामंजस्यात्सूत्रकारोक्तंसिद्धांतएववैदिकैरादरणीयः । एवंक्रीडायाःस्वाभाविकत्वस्वतःफलरूपत्वसमर्थनेनतदिच्छायाःसफलत्वमपिव्याख्यातम् ॥

ईश्वरेच्छायानित्यत्वात्तत्रकारणापेक्षैवनास्ति । एतेन (कारणमंतरायार्थानुद्भवात्स्वयाऽदृष्टस्यानंगीकारात्कथंक्रीडेच्छा ?) इत्यादिकमपास्तं । "सनैवरेमेतस्मादेकाकीनरमतेसद्वितीयमैच्छदि" तिश्रुतौक्रीडार्थंजगन्निर्माणमित्यर्थबोधकपदाभावात्कथंक्रीडार्थमसृजदित्युच्यते ? नान्यार्थमितिचेत्-नः यथाकेनचिदुच्यतेदंडंविनानघट उत्पद्यतेऽतोदंडमानयतंश्रुत्वा प्रयोज्योवदति-घटोत्पत्त्यर्थमयंदंडमिच्छतितिप्रतादृशार्थबोधकपदाभावेपितादृशवाक्यार्थोयथानुभवसिद्धएवमत्रापिबाधकाभावात्द्वितीयपदस्यजगज्ज्ञानित्यंचलक्षणयायाथार्थ्यं । नचद्वितीयेनैवक्रीडायाःसंभवेनतादृशलक्षणायांमानाभावइतिवाच्यं, धर्मान्यार्थंस्मृत्युक्त्यैवनिर्णेतव्यत्वात् । श्रुतौतु "तदात्मानंस्वयमकुरुत ॥ सच्चत्यच्चाभवत् निरुक्तंचानिरुक्तंच निलयनंचानिलयनंच ॥ तस्माद्

एतस्मादात्मन आकाशः संभूत" इत्यादिनासर्वसृष्टिरेवोक्तानतुद्वितीयमात्रसृष्टिरितितादृशश्रुतिप्रामाण्यादेवलक्षणावास्वीकार्याप्रामाणिकगौरवस्यादोषत्वात् । एतेनकिंचेत्यादिकमपास्तं । यत्तु (तदानीमिच्छादेःसद्भावात्कथमेकाकित्वम् ?) इत्युक्तं,-तत्तुतुच्छतरमेव । एवं सति "एकाकीहयमारुह्यजगामगहनंवन" मित्यादिपुराणवाक्यमप्ययुक्तंस्यात्तत्रापिद्वितीयस्यतदीयज्ञानस्येच्छायाश्चसत्वात्शस्त्रादीनांवस्त्राणांचसत्वात्किंचायमत्रफलमेकंभुंजानस्तिष्ठतिफलमेकंभुंक्तेएकाकीभुंक्तइत्यादिवाक्यानामयोग्यत्वंस्यात्तत्रापिफलगतरूपरसादिगुणानांक्रियाजात्योश्चसत्वेनैकत्वासंभवात्तस्मादेकाकिपदमसहायवाचकमेवऔदासीन्येलक्षणायांप्रमाणाभावात् ॥

सहस्राक्षेकिंचकारणमित्यादिश्रुत्यर्थंद्वितीयंविभागंपरिहरंति –ईश्वरेच्छायाइत्यादिनाप्रमाणाभावादित्यंतेन । अयंभावः–यच्च किंचकारणमित्यादितथेतीत्यंतमुक्तंतदविमर्शात् नित्येच्छादिनंप्रतीच्छाकारणस्यानुयोज्यत्वात् जडस्याप्यदृष्टस्येच्छाजनकत्वेतस्यनित्यत्वात्सर्वदेच्छास्यात्तस्याऽनित्यत्वेतत्कारणपरंपराविचारेंततईश्वरेच्छायां विश्रांतिःस्यादितिचक्रकापत्तिःक्वाप्यविश्रांतावनवस्थाकालविशेषोद्बोधितस्यैवतस्यतज्जनकत्वेतत्तद्विशेषस्यैवतत्तदुद्बोधकत्वेनियामकःकश्चिच्चेतनोपेक्षितःसचेश्वरएवेच्छाविशिष्टो वाच्यईश्वरसृज्यानांतदधीनानांजीवानांजगव्द्यापारायोगात्बहूनामन्योन्यवैसंमत्येन कार्याव्यवस्थापातात् ॥ (अ० १ पा० १ सू० १५) "नेतरोनुपपत्तेः" (अ० १ पा० २ सू० २) "अनुपपत्तेस्तुनशारीर" इत्यादौप्रतिषेधाच्चजडस्यापिकालविशेषस्यादृष्टस्यचस्वभावादेवकारणत्वेतदृष्टमेवफलदानाद्यंकल्प्यतांकृतंप्राकृतवत्कालकर्माधीनेनेश्वरेणेत्यनीश्वरवादःप्रसज्येत; इच्छाविर्भावंप्रतित्वीश्वरमात्रंकारणप्रपंचंप्रतिचेच्छाविशिष्टःसः सृष्टिश्रुतिभिस्तथानिश्चयात् । जीवाअपिघटादिनिर्माणइच्छामपेक्षंते । इच्छाकरणेतुनस्वातिरिक्तंकरणं । नचजीवेच्छाकारणत्वंब्रह्मेच्छायास्त्वयावाच्यं; तस्याजीवेच्छाजन्यसदसत्कर्मजन्यदृष्टजन्यत्वांगीकारेणचक्रकापत्तेः वैषम्यादितादवस्थ्याल्लोकविरोधाच्च लोकेराजापापकारिणंदंडयति, नतुभूयस्तेनपापंचिकीर्षयति । प्रलयकरणसमयेइयत्तास्वात्मककालेनभूयः

किंच कारणमन्तरा कार्यानुद्भवात्त्वयाऽदृष्टस्याऽनङ्गीकारात्कथं क्रीडेच्छेत्याह–तथेति । तस्मान्नोक्तश्रुतेर्भवदभिमतोर्थः ॥ किंच तत्र क्रीडार्थमितिपदाभावात्तदर्थं द्वितीयमैच्छदिति कुतो लभ्यते ? ॥ समभिव्याहारादितिचेत्–न; उक्तयुक्त्यावाधितत्वात् ॥ किंच द्वितीयमन्तरैव तदनुपपत्त्युक्त्या तत्सृष्टौ क्रीडोपपत्त्या तृतीयादिसृष्टिर्नस्यात् ॥ द्वितीयपदेन स्वान्यलक्षणायामसहायार्थे साधितेनैकाकिपदेन बहुसहायशून्यलक्षणायां च गौरवम् ॥ किंच तदानीमिच्छादेः सद्भावात्कथमेकाकित्वम् ? ॥ इच्छादिः स्वरूपभूतइतिचेत्,–किमन्यत्स्वरूपभूतम् ? ॥ ओमितिचेत् अपसिद्धांत. ॥ तस्मादेकाकीनरमतेइति सृष्टेः प्रागौदासीन्यमात्रमुक्त्वा सद्वितीयमित्यनेन सृष्टिरेवोक्ता इत्याह–श्रुत्यर्थइति ॥

गर्भस्यैकाकित्वानुपपत्तिश्च । किंच "सदेवसोम्येदमग्रआसीत्तदैक्षत आत्मावाइदमेकएवाग्रआसी" दित्यादिश्रुतावपिहिरण्यगर्भस्यैवग्रहणंस्यात्तत्रैकपदविरोधश्चेदत्राप्येकाकिपदविरोधस्तुल्यएव । यदपि (ब्रह्मणोनित्यत्वेनतत्सत्वेनदभिन्नस्यजगतोपिसत्वेसर्वंभवनतदिच्छयोरयोगा) दित्यादिप्रलपितं,-तदपिस्वमतेदोषमदृष्ट्वैवतन्मतेपीच्छानसंभवति । नहिसर्वज्ञस्याप्तकामस्यमिथ्याभूतपदार्थेशशशृंगसदृशइच्छासंभाविता । यदिचजीवकर्मभिरिच्छोत्पत्त्यनंतरंपदार्थानांसत्वमभ्युपगम्यतेतदातेषांत्रैकालिकनिषेधाप्रतियोगितयामिथ्यात्वानुपपत्तिः किंचोत्पत्तेरुत्पत्त्यंतरंचसंतेनवा ? आद्येतत्रापिपर्यनुयोगेऽनवस्था । द्वितीयेतुतस्यानित्यत्वापत्तिरुत्पत्तिमतएवजन्यत्वेनानित्यत्वात्, किंचेश्वरेच्छायांकर्मणोहेतुत्वेपूर्वदोषाः प्रतिपादितास्तस्मादीश्वरेच्छानित्यैवमायदाकारतयैवजातातथैवताबद्धकार्याविर्भावंकरोतिपुनश्चतिरोभावं । नचाविर्भावोनित्योऽनित्योवा ? यद्यनित्यस्तर्हिआविर्भावतिरोभावौपदार्थानांयतस्ततः ॥ "नानित्यतातुविज्ञेयाशास्त्रविद्भिर्विचक्षणैः । तिरोभावेतुयर्थेहिवर्त्तते कारणात्मना" इत्यनेनविरोधइतिवाच्यं । आविर्भावस्यनित्यत्वमेवसिद्धांतेस्वीक्रियते । नचनित्यत्वेप्यनवस्थापदार्थाविर्भावस्येवा येर्भावाविर्भावपदार्थत्वात् । नहिपदार्थाविर्भावादतिरिक्तआविर्भावस्याविर्भावःसंबंधसंबंधभेदभेदादिवत् । अन्यथातत्राप्यनवस्थास्यात् ॥

सहस्राक्षे किंचानेत्यादिनैकल्यं चेत्यन्तंभागंदूषयन्ति-यत्तुसद्वितीयमित्यादि नानवस्थास्यादित्यन्तेन । अयंभावः-यत्तुकिंचात्रेत्यादि प्रथमइतिश्रुतेरित्यन्तंतन्नइदंहिवाक्यंबृहदारण्यके (अ० ३ ब्राह्म० ४ पृ० १२५) "आत्मैवेदमग्रआसीत्पुरुषविधस्सोनुवीक्ष्यनान्यदात्मनोपश्य" दित्युपक्रम्यपठ्यते । नात्रमध्येप्रजापत्युत्पत्तिराम्नाता । नापितत्र "सइममेवात्मानंद्वेधापातय" दित्यादिनोक्तामिथुनसृष्टिः परमात्मनोविरुध्यतेप्रकृतिपुरुषादिनिर्मातृत्वात् एकादशस्कन्धेचतुर्विंशे "वाङ्मनोगोचरातीतंद्विधासमभवद्बृहत् । तयोरेकतरोह्यर्थः प्रकृतिःसोभयात्मिका । ज्ञानंत्वन्यतमोभावः पुरुषस्सोभिधीयत" इत्यादौतत्प्रसिद्धेः मुख्योत्रेत्याशयस्तुनारदपंचरात्रद्वितीयरात्राद्बोद्धव्य । किंचात्मशब्दो वेदान्तेपुनिर्गुणपरब्रह्मवाचकतयाप्रसिद्धइति (अ० १ पा० १ सू० ५) "गौणश्चेन्नात्मशब्दा" दित्यत्रसिद्धं इदमग्रआसीदित्यव्याकृतप्रपंचात्मकत्वोक्तिरपिपरब्रह्मनिरूपणमेवगमयति । अन्यथा "आत्मावाइदमेकएवाग्रआसीत्सदेवसोम्येदमग्रआसीद" इत्यादीन्यपिप्रजापतिपराण्येव स्युः ओंकारेऽपसिद्धान्तोबह्वधिकरणविरोधश्च । नचपुरुषविधइतिविशेषणादप्रमितत्वं "अव्यक्तात्पुरुषः परः दिव्योह्यमूर्तःपुरुषः । सहस्रशीर्षापुरुषः तेनेदंपूर्णंपुरुषेणसर्व" मित्यादिकठमुंडकपुरुषसूक्तबृहन्नारायणप्रभृतिश्रुतिभिः "पुरुषःसप-

र पार्थे''त्यादिस्मृतिभिश्च भगवतस्तथात्वात् आनन्दमयं परमात्मानं प्रकृत्य स एष एव पुरुषविध एवेत्याम्नानात् तत्पुरुषविधतयैवान्येषां पुरुषविधत्वश्रावणाच्च आनन्दमयस्य परमात्मत्वं त्वानन्दमयाधिकरणभाष्ये तत्प्रकाशादिषु च परसमर्थितं पुच्छब्रह्मवादं समूलं निरस्य निर्णीतमिति ततोऽवधेयं । तथात्मातिरिक्तदर्शनाभावेऽपि परमशुद्धाकाशादिकं पश्यत स्वकारणमन्विच्छत परासनस्यास्मगत, महात्मत्वेन भयाद्यनुपपत्ति । किंचाग्रे (पृ० १२५) "स यत्पूर्वोऽस्मात्सर्वस्मात्सर्वान्पाप्मन औषत्तस्मात्पुरुष" इति अपहतपाप्मत्वमपि भगवद्धर्मं "तस्योदिति नाम स एष सर्वेभ्यः पाप्मभ्य उदित उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेदे" ति छान्दोग्यादिषु श्रवणात् एतद्धर्मोपदेशादादित्यान्तर्वर्तिनः परत्वं साधितमतस्तद्धर्माधिकरणे साधकानां सर्वपाप्मदाहोऽपि ब्रह्मभावतस्तत्स्वरूपत्वज्ञानाभ्यामेव उपकोसलविद्यादिश्रुतिभ्य 'इति मां योऽभिजानाति कर्मभिर्न स बध्यते' इत्यादिस्मृतिभ्यश्च विधातुश्च स्वसुताकामनापार्थतिविनाहादौ पाप्मसंबंधः प्रसिद्ध । सोऽबिभेदिति तद्वैतदर्शनेकाकिनाभयस्यान्वद्वारा सिद्धयेभयरूपेण भवन अतएव "तस्मादेकाकी बिभेती"ति हेतुभावः श्रूयते । भयस्य तद्रूपत्वमिच्छावत् बृहदारण्यके (पृ० १६९) "प्राणन्नेव प्राणो नाम भवती"त्यादिन्यायात् "यदिदं किञ्च जगत्सर्वं प्राण एजति निःसृतम् महद्भयं वज्रमुद्यत" मिति कठश्रुतेश्च तस्मात्स वैनैव रेमे इत्यत्र पूर्वोपक्रान्त परमात्मैव तच्छब्देन परामृश्यते, न त्वकस्मात् कमलभव स शब्देनेत्यत्र तु स इति शब्देनेति तच्छब्देनेति वा वक्तुमुचितं । न च मैत्रायणश्रुतौ प्रजापतिशब्ददर्शनात् भ्रमितव्यं "शुक्रेण ज्योतींषि समनुप्रविष्ट प्रजापतिश्चरति गर्भेऽन्त । यस्मिन्निदं सं च वि चैति सर्वं ॥ प्रजापतिश्चरति गर्भेऽन्तः अजायमानो बहुधा विजायत" इत्याद्यनेकश्रुतिषु परब्रह्मणि प्रजापतिशब्दस्य दृष्टत्वात् किंच तत्र (प्रपाठ० २ पृ० १८) "ऊर्ध्वरेतसो वालखिल्या इति श्रूयते अथ क्रतुं प्रजापतिमब्रुवन्नि" ति प्रजापतिवालखिल्यसंवादस्योपक्रान्तत्वात् प्रजापतित्वेन निरूप्यमाणः स्वान्यः प्रजापति परमात्मैव परिग्रहीतुमुचितं तथा पूर्वं (पृष्ठ २०) "यो ह खलु वावोपरिस्थः श्रूयते गुणेष्विवोर्ध्वरेतसः स वा एष शुद्धः पूतः शून्यः शान्तोऽप्राणो निरात्माऽनन्तोऽक्षय्यः स्थिरः शाश्वतोऽजः स्वतन्त्रः स्वे महिम्नि तिष्ठती" त्यादिना परब्रह्मधर्मा एवोपदिश्यते ।

किञ्चात्र सशब्देन ब्रह्मणो न ग्रहणं, किन्तु संसारिणो हिरण्यगर्भस्य तदुत्पत्तिमुक्त्वा प्रवृत्तत्वात् । अग्रे च मिथुनसृष्टेरेवोक्तत्वादित्याह–किञ्चेति ॥ श्रुतौ तत्पदं ब्रह्म न वक्ति, अपितु जीवमित्यन्वयः ॥ जीवो हिरण्यगर्भः ॥ स वै शरीरी प्रथम इति श्रुते ॥ एतेन 'रमणार्थमिदं सर्वं ब्रह्मैव स्वेच्छयाऽभवदि' ति प्रत्युक्तम् ॥ ब्रह्मणो नित्यत्वेन तत्सत्त्वे तदभिन्नस्य जगतोऽपि सत्त्वेन सर्वभवनतदिच्छयोरयोगाच्च । प्रलयेऽनाविर्भूतस्येच्छयाऽऽविर्भाव इति चेत् आविर्भावो नित्योऽनित्यो वा ? यद्यनित्यस्तर्हि आविर्भावतिरोभावौ पदार्थौ नायतस्तत 'नाऽनित्यता तु विज्ञेया शास्त्रविद्भिर्विचक्षणै । तिरोभावे तु कार्यं हि वर्तते कारणात्मना । आविर्भावे तु कार्यं हि यथा मृदि घटादय' इत्यनेन विरुध्यते ॥ आविर्भावस्यापि पदार्थतया शास्त्रविचक्षणैरनित्यताया अज्ञेयत्वोक्ते । यदि नित्यस्तर्हि तस्याविर्भावेऽनवस्था ॥ यत्रैव चानित्यत्वमङ्गीक्रियते तत्रैवोक्तविरोध पूर्वोक्तनित्यत्वाङ्गीकारनैष्फल्यं च ॥ ३७ ॥

तथाचेतमितुरणिएस्यक्षेत्रज्ञस्यतदंशत्वकथनमपि ब्रह्मैवगमयति 'क्षेत्रज्ञंचापिमांविद्धि, ममैवांशः अंशोनानाव्यपदेशादि' त्यादिस्मृतिसूत्रेभ्यः । एवमश्मवदचेतनप्रजानांबोधनायप्राणरूपेणभवनादिकमपितथा "एतस्माज्जायतेप्राण" इतिमुंडकश्रुतेः लिंगोपपत्त्यादितात्पर्यनिर्णायकसत्त्वेपिप्रजापतिशब्दस्यचतात्रकैरपिश्रुतिसहस्रेपरब्रह्मपरत्वेंगीकृतेप्यत्रैवदुराग्रहस्तुपेक्ष्यः । एतेनशुद्धाद्वैतमार्तंडस्थं (का० १२) "रमणार्थमिदंसर्वंब्रह्मैवस्वेच्छयाभवदि"ति समर्थितं । अत्रस्वेच्छया "बहुस्यांप्रजायेयेती" त्यादिश्रुतिप्रसिद्धया ॥ स्वपदंपरप्रेरणाव्यावर्तनाय ॥ एवकारोमध्यमणिन्दुभयत्रान्वेतु ॥ तथाचबहुश्रुतिविचारेतदाब्रह्मातिरिक्तवस्त्वभावात् इच्छातिरिक्तनिमित्ताभावात् आप्तकामस्यप्रयोजनांतराभावाचेश्वरस्वभावसिद्धंरमणमेवसर्गप्रयोजनसिद्ध्यतीतिकृतमाम्रेडितेन ॥ यस्तुब्रह्मणोनित्यत्वेनतत्सत्त्वेतदभिन्नस्यजगतोऽपिसत्त्वेनसर्वभवनतदिच्छयोरयोगउक्तः, स प्रमादात् । नित्यत्वेऽपिपूर्वंतिरोहितत्वादव्याकृतत्वेनाभेदेनवर्तमानत्वात् । बहीरमणस्यचाविहितैच्छिकाभेदाश्रयवस्तुभिरेवनिर्वाहात् तदर्थंसर्वभवनतदिच्छे युज्येतेएव ॥ स्वात्मकत्वाक्षिलस्यापिप्रपंचस्यस्वस्मादाविर्भावनमेवसृष्टिः स्वस्मिन्तिरोभावनंचसंहारइतिश्रुतिसिद्धांतः ॥ श्रूयतेचभूमविद्याप्रभृतिषु "आत्मतआविर्भावतिरोभावात्मतोन्नमित्यादिउपबृंहितंचैतन्मार्कंडेयपुराणेचतुर्थाध्यायेजैमिनिंप्रतिवदद्भि-र्द्रोणपक्षिभिः (श्लो. ६९) "आविर्भावतिरोभावदृष्टादृष्टविलक्षणं । वदंतियत्सृष्टमिदंतथैवांतेचसंहृत" मितितृतीयस्कंधेचतद्विरोधोस्यशयनमाविर्भावस्तुसंभवइतिदशमेऽक्रूरस्तुतौ'यन्नाभिजातादरविंदकोशाद्ब्रह्माविरासीद्यतएपलोक'इतिनवमस्यचतुर्थाध्यायेचचतुर्मुखंप्रति(श्लो०५३) "स्थानंमदीयंसहविश्वमेतत्क्रीडावसानेद्विपरार्धसंज्ञे । भ्रूभंगमात्रेणहिसंदिधक्षोःकालात्मनोयस्यतिरोभविष्यती"ति दशमोत्तरार्धेचवसुदेवंप्रतिभगवता (अ० ८४ श्लो० २५) "खंवायुर्ज्योतिरापोभूस्तत्कृतेषुयथाशयं । आविस्तिरोल्पभूर्येकोनानात्वंयात्यसावपी"तिब्रह्मणएवाकाशाद्यात्मनाविर्भावतिरोभावौताभ्यामल्पत्वभूरित्वनानात्वैकत्वानिचोक्तानितस्माद्बहीरमणार्थं आविर्भावशक्त्यानानारूपेणभवनं तदिच्छाचनानुपपन्ना; अन्यथातद्बोधकश्रुतिव्याकोपापातात् । नह्यसतएवोत्पत्तिमंगीकृत्यश्रुतिः शक्याव्याख्यातुं; शून्यवादस्यार्धवैनाशिकवादस्यवाप्रसक्तेः 'कथमसतः सज्जायेतनासतोविद्यतेभाव' इत्यादिश्रुतिस्मृतिविरोधाच्च । अद्वैतासिध्याद्युक्तरीत्याप्रलयेअविद्यायांसूक्ष्मरूपेणस्थित्यंगीकारेतुत्वदुक्तदोषतादवस्थ्यं । वस्तुतस्तुकारणाद्बहिर्भवनमेवोत्पत्तिपदार्थइतिसर्वमनवद्यं । किंचैवंयदुक्तंतत्रजगतिब्रह्मभेदः प्रतिपिपादयिषितस्तदभेदोवा ? नाद्यः; अद्वैतभंगात् स्वातिरिक्तेच्छायामनाप्तकामत्वापत्तेः । तदात्मानमिति स्वस्यसर्वरूपेणभवनोक्तिविरोधात् "सर्वंखल्विदंब्रह्म" त्यादिव्याकोपाच्च पदार्थानांमिथ्यात्वमाश्रित्यभेदाभावरूपेद्वैतस्यादरे त्वभ्रांतस्येश्वरस्यतज्ज्ञानायोगादिच्छानुपपत्तिःज्ञातस्यैवेच्छानियमात् सर्वज्ञश्रुतिविरोधःसर्वस्यैवाभावात्मिथ्यात्वेनज्ञानेसुतरांतदसंभवः । नहिमृगतृष्णात्वेनतज्ज्ञानेस्तांपातुंशशविषाणंवाऽऽदातुंकश्चिदिच्छतियतनेवा । एतेन "इदंसर्वमसृजत" इत्यादेरपिविरोधोऽनुसंधेयः । अर्धवैनाशिप्रक्रियादिशोत्तरकालेपदार्थसत्तास्वीकारेपसिद्धांतः त्रैकालिकप्रतिषेधप्रतियोगितयामिथ्यात्वानुपपत्तिश्चेतिदिक् । द्वितीयश्चेदंकुर्मः तथासतिश्रुतिसिद्धोर्णनाभित्वादि-

दृष्टांतेन घटादिस्वांशानामाविर्भावतिरोभावाभ्यांनेत्यश्रुत्यादिसिद्धावास्थेयाविति सर्वमनाकुलंयच्च-
प्रलयइत्यादिनैष्फल्यंचेत्यंतत्तु श्रुत्यादिसिद्धपरमतानवगमात् नित्यायेत्यस्याकैतौ अतोनमा-
र्तंडकारिकाबाधः । नचानवस्थाशंकया, उत्पत्त्यादेरपिवोल्यात् । तथाहिउत्पत्त्यादेरुत्पत्त्या-
दिकमस्तिनवा ? आद्येघटोत्पत्तेरप्युत्पत्तिस्तस्याअपिसेत्यनवस्था घटध्वंसकालेध्वंसस्याप्यु-
त्पत्तिघटोत्पन्नांशस्याप्युत्पत्तेत्तिरित्याद्यनवस्था उत्पत्तेर्नाशानंगीकारेध्वंसस्याप्युत्पन्नइति-
व्याहारापत्तिः । अंततोपत्रनित्यत्वंस्वीक्रियेततत्रैवस्वोक्तिविरोधः । पदार्थानित्यतांगीकारनै-
ष्फल्यंच । द्वितीयपक्षेतूत्पत्तेर्नित्यतापातादनित्यतासिद्धांतोभज्येत घटोत्पत्तेर्नित्यतयाघटनि-
त्यत्वायक्षिप्येत उत्पत्त्यादेराविर्भावाद्यंगीकारेवस्तुनएवतावत्शाश्वतादास्थेयौ मिथ्यात्वादुत्प-
त्तिरेवनास्तीतिचेत्कथंप्रतीतिः ? भ्रांतिरेवसेतिचेत्साप्युत्पद्यतेनवा ? आद्येप्रागुक्तानवस्था ।
द्वितीयेतन्नित्यतया मोक्षोच्छेदः उत्पत्त्याद्यभावाय भ्रांतेरपिमिथ्यात्वेजगतः । सत्यत्वसिद्धिः
एवमविद्यात कार्ययोर्ध्वंसस्याप्युत्पत्त्यादिकंविचार्यं उत्पत्तिध्वंसयोराविर्भावतिरोभावयो-
श्चोभयोरप्यस्वीकारेसृष्ट्यादिबोधकबहुश्रुतिविरुद्धश्च । एवंव्यवहारदशायामुत्पत्त्याद्यंगी-
कारेप्युक्तदोषानिरन्मेषा उत्पत्त्यादेरानंत्यतस्यतस्यकारणांतरकल्पकल्पनागौरवंच ।
यदितुसबंधस्यसबंधोभेदाद्भेदइत्यादिकमिवोत्पत्त्यादेस्तदनंगीकृत्यकथंचित्समाधीयेत तदा-
विर्भावपक्षेपिसएवसमाधिः सुगमइतियत्रोभयोः समोदोषइतिन्यायावतारः वस्तुतस्तू-
त्पत्तिरपिधर्मइतिधर्मिसत्तामाक्षिपतितथाचकारणाद्बहिर्भवनमेवसाविस्तरस्तुसर्वार्थनिर्णये
आविर्भावतिरोभावौशक्तीवैरिणइत्यादिकारिकाप्रकाशावरणभंगयोर्द्रष्टव्यं, किंचवस्तुत-
स्तुतयोरिच्छाविषयत्वयोग्यत्वतदविषयत्वयोग्यत्वस्वरूपत्वाङ्गीकारेपिनित्यतानुपपत्तिरित्यनु-
पदंवक्ष्यते—पूर्वमिते तृतीयश्लोकखडनादौ ॥ नित्यैवेति बृहदारण्यके "अनुच्छित्तिधर्मे"
तिसर्वेषांब्रह्मधर्माणांनित्यत्वाम्नानात् ॥ तयेति । येनप्रकारेणकार्यनिर्माणंयावत्कालपर्यंत
स्थापनंवेच्छाऽकारस्यविषयोभवतीतिभावः ॥ अन्यथातत्रेति । सबंधस्यापिसबंधांतरंभेदा-
दपिभेदश्चान्योस्तीतिस्वीकारेतेपुसबन्धभेदादिषु ॥ पदार्थं स्वाश्रयेणनचित्सबंधेनतिष्ठति ।
ससबंधोपिसबंधांतरेणसबंधांतरमपिसबंधविशेषेणेत्यनवस्था ॥ एवंभेदेप्यूह्यं ॥ अंतत-
स्वरूपसबंधत्वंभेदभेदादीनांप्रथमभेदस्वरूपत्वंचस्वीकृत्यतद्वारेणैआविर्भावाविर्भावोपिप-
दार्थाविर्भावस्वरूपइतिसम समाधि' ॥ इदंतुपिशाच पिशाचभाषयैवबोधनीयइति-
न्यायादिदमुक्तं । तत्त्वंतूच्यते ।

ननुसर्वकार्यजातमीश्वरोवेत्तिनवा ? अन्त्येब्रह्मणःसर्वज्ञत्वहानिः ।
प्रथमेसृष्टिकरणंकिमर्थं ? पदार्थानामाविर्भावएवसृष्टिः । सचज्ञानार्ह-
त्वस्वरूपएवतस्यचसर्वदैवसत्वेनतत्कृत्यादीनामनुत्पादात् इतिचेत्,—
सत्यं, नहिज्ञानार्हत्वमाविर्भूतस्यलक्षणं, किंतुतत्तत्कार्यकारित्वं ॥ यथा-
जलहरणादिकार्यकारित्वं मृद्रूपेणावस्थितेऽनाविर्भूतेतत्कार्यकारित्वा-
भावात्त्वन्मतेज्ञानार्हत्वमेवआविर्भावइतिवक्तुंनशक्यते, तथासति-
तमसिस्थितस्यघटस्याविर्भावार्थंप्रतिपाद्यानयनंनिरर्थकंस्यात् । यदि-

तमोऽध्यासस्य घटस्यज्ञानंनास्तितर्हितदर्थंयत्नएवनसंभवति; अज्ञातेऽर्थे-
यत्नस्यादृष्टत्वात् । यदिज्ञानंतर्हिज्ञान विषयत्वरूपस्याविर्भावस्यसत्वा-
त्तदर्थंयत्नोनिरर्थकएवेतित्वयापिपूर्वोक्तमेवलक्षणमादरणीयं । ईश्वर-
स्यसृष्टेःपूर्वमाविर्भूतत्वेनज्ञानाभावेप्यनाविर्भूतत्वेनज्ञानसत्वान्नसर्व-
ज्ञत्वहानिः । किंचक्रीडार्थंसृष्टिःसाचाविर्भूतैरेवपदार्थैःसंभवतिना-
ऽनाविर्भूतैरतएवयोगिनांयोगजधर्मेणव्यतीतान्नादिज्ञानेपिनतैस्तेषां
क्षुदपनयनादिकर्तुंशक्यते । सृष्टिस्तुरमणार्थमेवनजीवानांतत्पदार्थ-
ज्ञानार्थं;तेननचेत्यादिनापूर्वपक्षंकुर्वन्नपास्तः । जीवानांक्रीडोपयोगि-
त्वान्नजीवमात्रार्थंसृष्टिशंकापिसंभवति । क्रीडायांनित्यानित्यत्वप्रश्ने-
नित्यैवेत्युच्यते । तद्दोषपरिहारस्तूत्तरभागेवक्ष्यते । नचजीवस्ये-
श्वराभिन्नत्वेजीवस्यसकलपदार्थज्ञानंनास्तीश्वरस्यास्तीतिकथंसंगतं ?
त्वन्मतेऽविद्यायाअस्वीकारेणाविद्यायाव्यवस्थायाअसंभवादितिवा-
च्यं; "पराभिध्यानात्तुतिरोहितंततोह्यस्यबंधविपर्ययौ" वितिसूत्रेण-
व्यासैरेवास्यदोषस्यपरिहृतत्वात् तत्रयदिजीवस्येश्वरत्वेनेश्वराभि-
न्नत्वंतदाकथंतत्रदुःखित्वमल्पज्ञत्वादिकमितिपूर्वपक्षआह-अस्यजी-
वस्यैश्वर्यादितिरोहितं तत्रहेतुः-पराभिध्यानात्परस्यभगवतोभिध्या-
नंक्रीडेच्छयाजीवेभगवद्धर्मतिरोभावः, ऐश्वर्यतिरोभावाद्दीनत्वं-
पराधीनत्वं, वीर्यतिरोभावात्सर्वदुःखसहनं, यशस्तिरोभावात्
सर्वहीनत्वं, श्रीतिरोभावाज्जन्मादिसर्वापद्विषयत्वं, ज्ञानतिरोभावा
देहादिष्वहंबुद्धिः, सर्वविपरीतज्ञानंचापस्मारसहितस्येवैराग्यति-
रोभावाद्विषयासक्तिः । आनंदांशतिरोभावाज्जीवत्वंकाममयत्वं-
यद्येवंनस्यात्तदाभगवतऐश्वर्यादिलीलानिर्विषयास्यादिति ॥ जीवे
श्वरयोर्भेदस्तुनस्वीक्रियते, जीवेभगवद्धर्मतिरोभावेनैवसर्वदोष-
निराससंभवात् । अतएवप्रागभावादिचतुष्टयमेवनस्वीक्रियते; आवि-
र्भावतिरोभावाभ्यामेवसर्वव्यवहारसंभवात् । उक्तंच'प्रागभावाद-
योनांगीकार्याआभ्यांयतोखिल'मिति ॥ तत्रप्रागभावःकार्यस्यकारणा-
वस्थातोनातिरिच्यते ॥ प्रध्वंसोपिकार्यस्यतिरोभावः; घटःपटो-
नेत्यत्रापिघटेभगवदिच्छयापटत्वस्यतिरोभावाद्भेदोनातिरिच्यते ।
एवमत्यंताभावोनामकारणातिरिक्तेघटादीनांसामयिकस्तिरोभाव-
एव ॥ एवंचाभ्यामेवसर्वव्यवहारोपपत्तौकिंप्रागभावादिस्वीकारेण ? ॥
यच्च (एतेन 'भेदःकार्यतयाजातः क्रीडार्थंतुहरीच्छया ॥ प्रलये-

कारणेतस्यस्थितिर्दृष्टायथामृदि' इतिपूर्वापरव्याकुलंवाक्यंप्रत्युक्तम्) इत्यादिप्रलपितं,-तदप्यज्ञानात्; तादृशभेदपदस्याविर्भावपरत्वात् अतएवाग्रेतिरोभावबोधकंप्रलयपदमपिसंगच्छते । कारिकायांतुप-श्चाल्लयेकारणेहीतितृतीयचरणपाठः । नचघटःपटोनेत्यत्रघटेपटत्व-स्यतिरोभावएवभेदइतिपूर्वोक्तेविरोधइतिवाच्यं, विकृतौप्रकृतिभेद-आविर्भावः, विकृतीनांपरस्परभेदस्तिरोभावएवेत्यत्रतात्पर्यात् स्वन्म-न·सिद्धभेदस्वीकार "आत्मैवेदंसर्वंब्रह्मैवेदंसर्वं" मितिश्रुतीनांविरो-ध·स्यात् । अतएवयथामृदीतिदृष्टान्तोपिसंगतः ॥ नचेत्यादिकत्वनंगी-कारनिरस्तं ॥ कार्यावस्थायामाविर्भावेपिनकारणस्यकार्येभेद· "सर्वं-खल्विदंब्रह्मतज्जला" नित्यादिश्रुते· ॥ अतएवोक्त "सर्वंब्रह्मात्मकं विश्वमिदमावोध्यते पुर· ॥ सर्वशब्देनयावद्धिदृष्टंश्रुतमदोजगत् ॥ बोध्यतेतेनसर्वंहिब्रह्मरूपंसनातनं ॥ कार्यस्यब्रह्मरूपस्यब्रह्मैवस्यात्तु-कारणं" तत्रदृष्टांतोपादानमपि "सुवर्णस्यचयेखंडामुद्रिकाकटका-दय· ॥ सुवर्णत्वेनगृह्णातितथाब्रह्मविदोमति" रित्याद्युक्तम् ॥

सहस्राक्षेकिंचसर्वमित्यादिइत्यलमित्यतभागपरिहरति ननुसर्वमित्यादिनाइत्याद्युक्त मित्यतेन । अयभाव -यत्तुसर्वकार्यमित्यादितथात्मेतीत्यत्तत्तदकिंचित्कर । सर्वैकार्यैर्हरेर्वे-श्येवेतिनाऽ इदयेदनमपिप्रत्युतकार्यनित्यतासाधयति, अविद्यमानस्यशशशृंगादेरिवप्र त्यक्षासंभवात् तत्साक्षात्त्वाच्च । नचार्द्धवैनाशिकप्रक्रिययाकथंचिन्निर्वाहोवाच्य , असत सत्तायां श्रुतिस्मृतिविरुद्धत्वात् त्वयाप्यनंगीकारात्अविरोधाध्यायेसम्यङ्निरस्तत्वेनप्रकृ-तेतन्निरासप्रयासप्रयोजनाभावाच्च ॥ ईश्वरप्रत्यक्षविषयत्वेनसिद्धेनित्यत्वेऽप्युच्चरितवद्जीवा-नुभवयोग्यताऽऽपादनरूपआविर्भावएवतत्तत्पदार्थस्यसृष्टिरितिसिध्यति ॥ 'यदानुभवयो ग्यत्ववर्तमानस्यवस्तुन । आविर्भाव सविज्ञेयस्तिरोभावस्ततोऽन्यथे'तिमार्तंडकारिकाया मनुभवपदमुक्तविधजीवानुभवपर । अत·स्वसिस्थितस्यस्वाभिन्नस्यकार्यस्येश्वरज्ञानविषय त्वेप्यदोष । उक्तयोग्यत्वमेवलौकिकैः कार्यकारित्वमितिव्यवह्रियते अत पिशाचभावयेति न्यायान्मूलेतदेवोक्तअनाविर्भूतघटाल्लौकिकमर्यादयाजलाहरणादिकार्यस्यासंभवादाविर्भूता देवतत्संभवाच्चोक्तयोग्यत्वरूपआविर्भावस्तत्तत्कार्यकारित्वमित्यपिशक्योव्यपदेष्टु कारित्व चकरणशीलत्वतद्धर्मत्वभातेनकस्यचिद्घटस्यातिरोभावदशाया जलानयनाद्यऽकारित्वेपिना व्याप्ति । सिद्धान्तेसामान्यतोज्ञानार्हत्वमात्र नलक्षण, किंतूक्तविधजीवज्ञानार्हत्वमित्येवमूले त्वन्मतइत्यादिप्रपञ्चस्यनिष्कर्ष यदानुभवयोग्यत्वमितिमार्तंडकारिकायायोग्यत्वपदतिमि रमञ्जूषादिस्थिततयातदानीमननुभूयमानेषुकेनाप्यननुभूतदरीविवराङ्कुरादिषुचाव्याप्तिवार णार्थं । वस्तुतश्चअस्मिन्कालेऽस्मिन्देशेएतद्द्वारैवमिदलौकिकमर्यादयाजीवानुभवगोचरकरि ष्यामीतीच्छाविषयत्वमेवाविर्भाव तदविषयत्वंतिरोभाव तेनोभयोर्नित्यत्वेपिनयुगपत्का र्योपरंभप्रसंग , तत्तत्कालएवतदौचित्यात् । महाहीरकाभरणान्यस्मिन्नवसरेऽस्मिन्देशे

सर्वान् दर्शयिष्यामिपुनरस्मिन्कालेदर्शनागोचरीकरिष्यामीतिराजादेरिच्छायाश्चिरंतनत्वेपि-तत्तत्कार्यंतत्तदवसरएवभवति, नतुयुगपत् । एतेनापीश्वरस्यसर्वदासर्ववस्तुवेदनंसिध्यति; अज्ञातइच्छानुदयात् । नचस्वरमणार्थमितिसिद्धांतविरोधः जीवानामेवरमणस्यनिष्पत्तिर्वा-च्यत्वा; आभरणानिस्वत्वाप्रदर्शयतोराजादेरपिरमणस्याप्रत्यूहत्वात् । किंचासौक्रीडाजीवैस्स-स्वस्वपदार्थस्यानुभावनरूपैव ॥ एवंचयथाबालक्रीडासुपांचालिकापुरुषकादेरेवविवाहादौ-विधीयमानेपिबालानां बुद्धिबलादिपुष्टीमत्तांक्रीडासुदार्वादिखंडानांजयपराजययोरपिक्री-डितॄणांमृगशाखामृगप्रभृतिचेतनक्रीडास्वपिक्रीडयितुर्दृष्टुश्च क्रीडासुख्यतयासिध्यत्येव ॥ नतुपांचालिकादीनांमृगादीनामेववा ॥ अन्यथामल्लमहिषमातंगादिक्रीडासुमल्लादीनामेव-ताःसिध्येयुर्नतुराजादीनां ॥ वस्तुतस्तुतद्द्वारालौकिकेश्वराणामेवरमणमितिसुप्रसिद्धम् ॥ तथात्रभगवतएवमुख्यतयारमणंश्रुत्यादिसंमतमप्रत्यूहं जीवानामपिक्रीडोपस्कारत्वाविशे-षात् । अतएवश्रीभागवतादिषुयथादारुमयीयोषायथायंत्रमयोमृगः एवंभूतानिभगवन्नी-शतंत्राणिविद्धिभोःयथाक्रीडोपस्कराणांसंयोगविगमाविह इच्छयाक्रीडितुः स्यातांतथैवेशे-च्छयानृणाम् एवामादयोदृष्टांताउच्यंते । तस्माद्बद्धजीवज्ञानायोगस्यतद्योग्यतापादनमेवा-विर्भावइतिस्वीकारेपिक्रीडैवसृष्टेर्मुख्यंप्रयोजनं, नतुजीवज्ञानमात्रंतत्प्रयोजनं ईश्वरःसृष्टेः-पूर्वमपिस्वलीनान्चाभिन्नान्पदार्थान्जानात्येवतेषुजीवानुभवायोग्यतांचजानात्येवेतिसार्व-ज्ञ्यस्यजीवानुभवार्थमाविर्भावनस्यचनबाधः । उक्तरीतिकंचहीरमणंहिजीवानुभवायोग्यैरेव-पदार्थैःसंभवति संसारिजीवानामनुभवाभावेपि वस्तुतः "दार्थानांब्रह्मात्मकतयानित्य-त्वादेवाश्रांतानांयोगिनांसर्वदातदनुभवःश्रीभागवतादिषु "अनागतमतीतंचवर्तमान-मतींद्रियं । विप्रकृष्टंव्यवहितंसम्यक्पश्यंतियोगिन" इत्यादावुच्यते क्रीडायानित्यत्वं-तुप्रागिहैवोक्तं परमंतारतौल्योबहीरतौ सृष्टिरितिनान्यनस्था अतएवश्रीरामदाचार्य-चरणैः (प्रकरण १ कारिका ७२) "कदाचिद्रमतेस्वस्मिन्प्रपंचेपिक्वचित्सुख-

---

किञ्च सर्वं कार्यं यदि हरिर्नवेत्ति तदाऽज्ञः स्यात्, तर्हि सृष्टिर्मुधा ज्ञानार्हत्वरूपविर्भाव-स्यैवत्वया कार्येऽङ्गीकारात् ॥ नच स्वस्वरूपेण स्थितस्य स्वयंज्ञातत्वेपि जीवानां तज्ज्ञानाभा-वात्तज्ज्ञानार्थं सृष्टिरितिवाच्यम्; स्वरमणार्थमितिसिद्धान्तविरोधात् ॥ जीवानामेव रमणस्य निष्पत्तेः ॥ क्रीडायानित्यत्वयोरुक्तदोषावतारोऽनुसन्धेयः ॥ अधिकन्तूत्तरभागे वक्ष्यते ॥ तदेतदाह-तथात्मेति ॥ भिदिष्टेति ॥ जीवस्येश्वराभिन्नत्वेनेशस्य ज्ञानं न जीवस्येत्युक्तिरेव नसंगता ॥ प्रागभावादयोनाङ्गीकार्याआभ्यायतोऽखिलमितिश्लोकव्याख्यायामभावचतुष्टयस्य-ऽपितट्टीकाकारेण दूषितत्वात् ॥ एतेन 'भेद कार्यतयाजात क्रीडार्थंतुहरीच्छया । प्रलयेका-रणेतस्यस्थितिर्दृष्टायथामृदि' इतिपूर्वापरव्याकुलं वाक्यं प्रयुक्तम् ॥ नच भेदस्योत्पत्तिर्नाविर्-भावइति नियत्वाभावाभिप्रायेण खण्डनमितिवाच्यम्; तन्नत्यटीकायांस्पष्टंखण्डितत्वात् ॥ भेदोत्पत्ते प्राग्जीवस्य तथाज्ञानसत्त्वेन सुख्यभावदोषस्य तादवस्थ्याच्चसत्यपि सर्वंखल्विदमै-तदात्म्यमिदमितिसामान्येनाभेदबोधने भेदोऽनित्यइतरन्नित्यमित्युक्तिः किंनिबन्धनेतिहु चिन्त्यम् ॥ विभेदजनकेऽज्ञाने इतिवदेतस्माज्जायते इत्यस्य जागरूकत्वाच्चेत्यलम् ॥ १ ॥ ३८ ॥

मि"त्युक्तं । अथावरणभंगेविस्तरोगौडवार्तिकविचारश्चावधेयः । आविर्भावादिकमधिक-
मुत्तरभागेसमर्थयिष्यतेयत्तुमिद्दिष्टेत्यादिहृत्यलमित्यंतं,—तस; अग्निविस्फुलिंगन्यायेन-
व्युच्चरणोत्तरंअंशेषु (अ० १ पा० १ सू० १५) "नेतरोऽनुपपत्तेः, (अ० २ पा० २
सू० ३१) पुंस्त्वादिवत्त्वस्यसतोऽभिव्यक्तियोगात्" इत्यादिषुसाधितादानंदांशतिरोभावा-
ज्जीवभावेपराभिध्यानसूत्रोक्तरीत्या तेष्वैश्वर्यादिब्रह्मधर्माणांतिरोभावः ॥ तदतिरोभावेऽ-
विद्यायांवायोगात् ॥ ईशितव्याद्यभावेनभगवतऐश्वर्यादेर्निरुपपत्तापाताच्च ॥ सूत्रे-
तिरोहितमितितुनपुंसकेभावेक्तः, ततोभगवच्छत्याऽविद्यास्वरूपाज्ञानादिपंचपर्वनवाद्वं-
पेहंताममतारूपसंसारप्रलये चकृतेतेषामेवसकलपदार्थाज्ञानं भगवद्दिदृक्षितानामेव-
ज्ञानंचसंभवति नतुब्रह्मण; ज्ञानानंदरूपत्वात्, ऐश्वर्यादिमत्वात्स्वायत्तसर्वशक्तिकत्वाच्च ॥
अंशस्यजीवस्यैवाज्ञानं अंशिनस्तुसकलज्ञानं निर्बोधमितितुसूर्यांशेचक्षुषितिमिराद्युपघातेपि-
सूर्येतदसंबंधवत्सूर्योयथेत्यादिकठादिश्रुतिभिस्तादृशस्मृतिभिश्चसूत्रकृता (अ० २ पा० ३
सू० ४२ । ४६–४७) "प्रकाशादिवन्नैवंपरः ॥ स्मरंतिच" इतिसाधितं ॥ तत्रैवांशाप्यं-
शांशित्वभेदश्चनविरुध्यते तयोर्भेदस्तुनस्वीक्रियतेतस्मिन्वंशेआनंदस्यधर्माणांचतिरोभावा-
देवबंधाज्ञानादिसंभवात् ॥ प्रागभावादिखंडनविस्तरस्तुसर्वार्थनिर्णयनिबंधावरणभंगयोरनु-
संधेयः ॥ तमेवाभिसंधायमार्तंडे प्रागभावादयोनंगीकार्याभाभ्यायतोखिलमित्युक्तं ॥
प्रागुक्तरीत्याऽवश्यमंगीकरणीयाभ्यामाभ्यामाविर्भावतिरोभावाभ्यामेवाखिलव्यवहारोपप-
त्त्यातेनांगीकार्याइत्यर्थः । तथसर्वस्यापिकार्यस्यब्रह्मरूपतयासर्वत्रसर्वधर्माश्रयत्वेपिजलाहर-
णाद्यर्थमेवाविष्कृतेघटाख्येब्रह्मरूपेपटादिधर्माणां आवरणाद्यर्थमेवाविष्कृतेपटाख्येब्रह्मरूपेघ-
टादिधर्माणांचतिरोभावादेवघट.पटोनपटोघटोनेत्यादिरन्योन्याभावाख्योभेदोऽविद्याबद्धै-
र्जीवैर्गृह्यते ॥ वस्तुतस्तुतिरोभावादेवतथाप्रतीतेः सर्वत्रसर्वधर्माविर्भावेतदप्रतीतेश्चसनैव-
स्वीकार्यः ॥ एवमभावत्रयानंगीकारेप्युपपत्तेर्दिङ्मात्रंमूलेदर्शितं । भेद कार्यंतयाजात क्रीडार्थं
तुहरीच्छया । पश्चाल्लयेकारणेहिस्थितिर्दृष्टायथामृदी' तिमार्तंडकारिकात्वनादृत्यैव घटादावित-
रधर्मतिरोभावात्कार्यंतथाहेतुनाभेदकारणावस्थातोवैलक्षण्यप्रतीतिरूपः बहुस्यांप्रजायेयेती-
च्छयैवजात.; अन्यथाक्रीडनानिष्पत्तेः । अतोघटादिपरिच्छिन्नरूपेणाविर्भाव.क्रीडार्थंबहुभवने
च्छयैवजातःतेन तेनकार्येणबहीरमणोत्तरंलयेतिरोभावेसतिकारणेकार्यस्येतिशेष.स्थितिर्दृष्टा ।
हियुक्तमिदं 'यथातिरोभावेघटादीनांमृदिस्थितिः । स्वव्ययमग्रआसीदित्यादिवाक्यानुरोध्येयद-
ष्टांत. इतिकारिकार्थः. ॥ इहमूलेविकृतिप्रकृतिशब्दावुपादेयोपादानकार्यकारणपरौ ॥ स्वत्स-
मतभेदाङ्गीकारेतुमिथ्यासत्ययोरैक्यासंभवात्सर्वंखल्विदमित्यादिश्रुतय श्रौतामृदादिदृष्टांताश्चपी-
ड्येरन् ॥ नचभेदस्येत्यादिकंत्वनभ्युपगमपराहतं ॥ अत कार्यावस्थायामपिघटोयनमृदित्यादि-
भेदोबाह्यज्ञानाल्लब्धः तदवस्थायामपिश्रुतिभिःसर्वस्यब्रह्मतायाबोधनात् सुवर्णार्थिभि सुवर्णे
कटकादीनामुपादीयमानत्वाच्च एतदर्थिकाएवमार्तंडकारिकाउदाहृता स्वन्मतेचभेदस्या-
ब्रह्मत्वेऽवश्यावाच्येकथंनश्रुतिविरोधः? विभेदजनकइतितुतृतीयश्लोकखंडनेचिंतितं । एत-
स्माज्जायतइति मुंडकवाक्यंतुप्राणादिप्रादुर्भावपरमएतदेवानुसंधायप्रपंचितंमूलेघटस्यावि-
र्भावार्थमिति । आविर्भावोत्रलौकिकचाक्षुषरूपो नतुसिद्धांतसंमत. ॥ ज्ञानंनास्तीत्यादि ॥

भतोज्ञानार्हत्वमात्रमाविर्भावलक्षणमसंगतमितिभावः ॥ जीवानांतत्पदार्थज्ञानार्थमिति सर्वैवाक्यंसावधारणमितिन्यायाद्‌भक्षोवायुभक्षइत्यादिवदवधारणंविवक्षितं। तेनज्ञानमात्रार्थमित्येवार्थः ॥ एवंरमणार्थमेवेत्यत्रैवकारोपिवदितस्यमुख्यप्रयोजनत्वंव्यवच्छिनत्ति ॥ तथाचबहीरमणमेवमुख्यसृष्टिप्रयोजनंपरमनाविर्भूतं पदार्थैस्तत्रसंभवतीतितदर्थंप्रागुक्तरीतिकजीवानुभवयोग्यत्वलक्षणआविर्भाव.पदार्थानांसर्वदास्वानुभवगोचराणामपिहरिणाक्रियतेइतिभावः ॥ वक्ष्यतइति विशेषतोवक्ष्यते (अध्याय ३ पाद २ सूत्र ५) "पराभिध्यानात्तु" इतिसूत्रस्यभाष्यात्कंचिदंशमनुवदंति–अस्यजीवेस्येत्यादिना ऐश्वर्यादितिरोहितमिति। ऐश्वर्यादेस्तिरोभावइत्यर्थः। फलितार्थकथनंचेदं ॥ "अभितोध्यानंस्वस्यएतस्यचसर्वतोभोगेच्छे" तिभाष्यास्यफलितार्थमाहुः–क्रीडेच्छेति। आनंदांशतिरोभावादित्यादिस्त्वार्थिकोनुवादः इतरत्तुभागेवविवृतमस्माभि.एवमेतच्छ्लोकखंडनेक्रीडायाएवसृष्टिप्रयोजनत्वं रमणश्रुत्यर्थः एवंच किंचिदाविर्भावतिरोभावविचारश्चसिद्धः ॥ इतिनवमश्लोकखंडनं ॥

ननु सर्वात्मकत्वंचेद्ब्रह्मणस्तदाजीवस्येश्वरत्वमीश्वरस्यजीवत्वंचस्यात् एवंतदभिन्नस्तुतदभिन्नएवेतिन्यायेनब्रह्महत्याऽप्यभिन्नेश्वराभिन्नोयागोपिब्रह्महत्यारूपःस्यात्। एवंब्रह्महत्यादिरपियागरूपः स्यात्। एवंविधिनिषेधादिरपिसंकीर्येतप्रायश्चित्तादिशास्त्रंचव्यर्थंस्यादितिचेत्,–मैवं, "सर्वंखल्विदंब्रह्मे" तिश्रुत्यासर्वस्यब्रह्मात्मकत्वेपिकार्याणांपरस्परंतद्व्यक्तित्वेननैकताब्रह्मरूपेणैकत्वेपितद्रूपेणैयत्वाभावान्नघटेनपटकार्यापत्ति· ॥ किंचत्वन्मतेपिसर्वस्यमायाकार्यस्याविशेषात्तदभिन्नाभिन्नस्यतदभिन्नस्यत्वनियमानुरोधाद्ब्रह्महत्यायागयोरविशेषःकुतोनस्यात्? विधिनिषेधशास्त्रमपिव्यर्थमेवस्यात्। यदिचब्रह्महत्यात्वेनयागत्वेनतेषांभेदःस्वीक्रियेततदास्मन्मतेपितुल्यं ॥ वस्तुतस्तुब्रह्मणस्तत्तत्कार्यनिष्पत्त्यर्थंच तत्तद्रूपेणाविर्भावःस्वीक्रियतेतद्रूपेद्वितीयरूपस्यतिरोभावः सएतयोर्भेदत्वेनव्यवह्रियते। तथाचाविर्भूतेनैवरूपेकार्यनिष्पत्तिर्नानाविर्भूतेनान्यथासृष्टेःपूर्वमपिसकलकार्यनिष्पत्तिःस्यात् ॥ एवंचब्रह्महत्ययाकथंयागादिकार्यनिष्पत्तिः? अतएवमत्स्यादिरूपेणाविर्भूतेनापिभगवताहिरण्यकशिपुवधादिकार्यस्यानिष्पत्तेर्नृसिंहरूपेणाविर्भावःसंगच्छतेएवंतत्तल्लीलार्थंतत्तद्रूपेणाविर्भावः ॥ अत्रचरमणेच्छैवप्रमाणमितिनकोपिदोषः ॥ त्वन्मतेयागस्यमिथ्यात्वाद्ब्रह्महत्याया अपिमिथ्यात्वाद्यागेऽप्रवृत्तिर्ब्रह्महत्याभयंचनस्याद्‌तोबलवद्विद्विष्टसाधनताज्ञानरूपप्रवृत्तिप्रतिबंधकस्याभावेनरागादिवशेनसर्वैवत्वद्द्रोह्रीनिरत·पापेप्रवर्त्तेत यागादीनांचमिथ्यात्वात्तत्कालिकसुखाजनकत्वाच्चततोनिवर्त्तेत ॥

सहयाख्ये सर्वात्माचेदितिदशमश्लोकं सव्याख्यानंननुसर्वात्मकमित्यादिनाद्वास्यास-दत्वमित्यंतेनसंदर्शयिष्यंतः यत्तुतेनेत्यादिव्यर्थस्यादित्यंतंमार्गंव्युदस्यंति—ननुसर्वेत्यादिनानिवर्तेतेत्यंतेन प्रतिबंदीमाहुः—किंचत्वन्मतइत्यादिना । यद्यपिप्रतिबंदीनोत्तरंतथापितदुत्तरेण स्वपक्षाक्षेपोत्तरंसंपद्यत इतिपुरस्तात्परस्ताद्बहुग्रंतदुपादानमदुष्टं ॥ एवमेवाभिप्रेत्यद्वितीयाध्याये व्यासपादैरपितस्या उपन्यासाच्च ॥ विधिनिषेधेति । मायिकानांविहितनिषिद्धसर्वकर्मणां मायाऽभिन्नतया परस्पराभिन्नत्वात् फलेष्वपितथैव द्विशा अविशेषापाताच्चतद्बोधकनानाशास्त्रवैयर्थ्यमुचितमेव ॥ ननुसर्वेषांमायिकत्वाविशेषेपियागत्वब्रह्महननत्वादिना कर्मणांस्वर्गनरकत्वादिना फलानांचविशेषोऽस्त्येवेत्यदोषइतिचेत्—अस्माकंब्रह्मरूपत्वाविशेषेपितेनतेन रूपेणपरस्परप्रतियोगिकभेदाददोषमवगच्छेत्याहुः—यदिचेत्यादिना ॥ द्वितीयरूपस्येति । घटेघटत्वातिरिक्तानांपटादीनांसर्वेषामित्यर्थः ॥ अन्यथेति । तिरोहितैरपि व्यवहारनिष्पत्तिस्वीकारे ॥ एवंचसृष्टिप्रलययोरविशेषएवापद्येत ॥ तद्बोधकशास्त्रव्याकोपोलक्षणभंगाद्यहानानंच प्रसज्येत ॥ मत्स्यादिरूपेणेत्यादि । इदंगुणोपसंहारभाष्यादिषु प्रपंचितं ॥ अयंभावः–तदनूदितासुमार्तंडकारिकासुप्रथमचरणारंभेयच्छब्दस्त्यक्तः चेद्यत इत्यत्रतुबोध्यतइतिप्राक्तनः पाठः बुध्यतेतेनेत्यत्रतुबोध्यतइतिपाठः यत्रयेनेतिदशमस्कंधवाक्येयस्मैयद्यदितिकर्मादिसंग्राहकेवाक्तपाठेपियतः पदेनपौनरुक्त्यापादकोयस्मादितिपाठः कल्पितः । मुद्रिकाकटकाद्यइति पाठोविपर्यस्तः खंडनेचात्रश्लोकेमार्तंडटीकायामुपन्यस्ताः सार्वात्म्यसाधिकायथासोम्ययत्रयेनेत्याद्याः श्रुतिस्मृतीः विस्तरेणविचारितंतत्वमसीतिवाक्यंचासमाधायैवलौकिकन्यायमात्रबलेनकिंचिद्दूषणं स्वचरणोपरिकुठारप्रहारप्रमुक्तावयत्नुपहसनीयः । तथाहि हरेःसार्वात्म्याज्जीवस्त्वीश्वरांशत्वादीशइतिशक्योवक्तुं उच्यते-चतथा तत्वमस्यादिवाक्यैः ईशस्तुसर्वज्ञःसर्वशक्तिमान्पूर्णानंदः सजीवएवेतिनशक्योवक्तुं सूत्रकृताजीवस्याभेदव्यपदेशात्परस्मिन्हिताकरणादिदोषप्रसंगमाशंक्य (अ० २ पा० १

सर्वात्माचेत्सजीवेशकार्याकार्यविपर्ययः ॥
अविरोधेऽव्यवस्थास्यात्तथेष्टैर्हितुवामते ॥ १० ॥

यत्तुतेन 'सर्वंहिखल्विदंब्रह्मतज्जलानि'तिपठ्यते "सर्वंब्रह्मात्मकंविश्वमिदमाबोध्यते-पुरः । *सर्वशब्देनयत्नाद्विस्पष्टंश्रुतमदोजगत् । बुध्यतेतेनसर्वंहिब्रह्मरूपंसनातनम् । कार्यस्यब्रह्मरूपस्यब्रह्मैवस्यात्तुकारणम्*" इति तथा यत्रयेनयतोयस्ययस्मैयस्माद्यथायदा स्यादिदंभगवान्साक्षात्प्रधानपुरुषेश्वरः इतिभागवतेपद्येसर्वस्यब्रह्मताश्रुता श्रुतिसूत्रैःस्मृतिगणैर्दृष्टिःस्वर्णार्थिनोयथा सुवर्णस्यचयेखण्डाःकटकामुद्रिकादय । सुवर्णत्वेनगृह्णातितथाब्रह्मविदोमतिः । यथासौम्येत्यादिश्रुतौस्पष्टमेवनिरूपितम् । तथातत्वमसीत्यत्राभेदोंशाशिविचारतः" इति-सार्वात्म्यमीशस्यवर्णितम्, तन्नयुक्तमित्याहुः–सर्वात्मेति ॥ यदि हरिः सर्वात्मा तर्हिजीवईश-ईशश्चजीवउच्येत । एवं तदभिन्नाभिन्नएवेतिन्यायेन ब्रह्महत्याद्यभिन्नेश्वराभिन्नोयागोऽपि ब्रह्महत्यादिरूपःस्यात् ॥ एवं ब्रह्महत्यादिरपि यागरूपः स्यादिति तद्विधिनिषेधधीः सङ्कीर्येत । एवंच त्वयाकार्यमेव क्रियेत विधिनिषेधप्रायश्चित्तादिशास्त्रं च व्यर्थंस्यात् ॥ ३९ ॥

सू० २२) "अधिकंतुभेदनिर्देशात्" इत्याधिकरणस्यसमर्थनात् ॥ "पादोस्यविश्वाभूतानि" "विष्टभ्याहमिदंकृत्स्नमेकांशेनस्थितोजगत्" इत्यादिश्रुतिस्मृतिभिस्तथैवबोधनाच्च सर्वतरंगाणांतरंगमात्ररूपमिन्नत्वेपि । नहिनदीनाथस्तरंगमात्रत्वेनशक्योव्यपदेष्टुं नापिघटादयःपार्थिवाइतिपृथ्वीघटमात्रंएवंकरचरणादयःस्वांशाइतिनदेवदत्तकरमात्रं इत्येवंकारमंदिनःजीवमात्रत्वव्यपदेशायोगादेवश्वेताश्वतरे "तस्यावयवभूतैस्तुव्याप्तंकृत्स्नमिदंजगत्" "ममैवांशोजीवलोकेजीवभूतः सनातनः" "अंशोनानाव्यपदेशात्" तत्पुरुषंदंसशिलशक्तिध्वांशकृतं । एकस्यैवममांशस्यजीवस्यैवमहामते । ब्रह्मांशकस्यात्मनआत्मबंधनः एवमादिश्रुतिस्मृतिन्यायपुराणवचोभिर्जीवस्यतदंशत्वमेवबोध्यते । नतुब्रह्मणएवजीवत्वं यच्चसर्वस्यब्रह्मात्मकत्वेतदभिन्नाभिन्नइतिन्यायेन यागब्रह्महत्यादेरभेदापादनं,—तदप्यविचारचारत्वमसारवत् । सर्वेषुब्रह्मरूपेषुसर्वशक्तिकत्वेपि यथामत्स्यादिरूपेषु तत्तदवतारनियतकार्यमेव तेनतेनरूपेणप्रणीयते नत्ववतारांतरकार्यं तथैवसतिवैचित्र्येणलीलासंभवात् अन्यथामत्स्यमत्स्यावतारएकएवाऽऽसंवर्तंसर्वमखर्वंनिर्वहेत् यथानीरानयनादिनियतकार्योपयोग्येवघटादिरूपमितरसर्वधर्मतिरस्करणपुरःसरमाविष्क्रियतइति एकैकस्मिन्कार्यरूपेसकलकार्यांतरधर्माकाराद्यतिरोधानमेवभेदइतिकैश्चिदन्योन्याभावइतिचव्यपदिश्यते । एवंचसर्वेषांब्रह्माभिन्नत्वेपिपरस्परप्रतियोगिकतादृशभेदस्यसृष्टिदशायांप्रतीयमानतयाउक्तन्यायमात्रेणयागब्रह्महत्यादेरैक्यमशक्यवचनं । इदानींपरस्परव्यावृत्तयागत्वादिधर्माणांतत्रतत्रस्पष्टंप्रतीतेःउक्तन्यायस्यसमर्थत्वाप्रतिबद्धप्रसरत्वेघटपटादीनांपार्थिवत्वाविशेषात्घटस्यपटरूपतयातेनप्रावरणंसर्वरूपतयातेनैवसर्वकार्याणिपटादेरपितथात्वात्सर्वकार्याणिचापद्येरन् तथापिसर्वेषुघटादिष्वस्तिभातिप्रियाणांब्रह्मरूपत्वेननामरूपयोः सर्वत्रमायिकत्वेनचस्वस्त्रीत्यापिसर्वत्रतन्न्यायप्रसरस्याशक्यनिरोधत्वात् । नचैवं प्रत्यक्षविरोधात् ॥ सर्वस्यैकमायोपादानकतयातत्रयागब्रह्महत्ययोरैक्यंतेनविधिनिषेधधीसांकर्यं स्वर्गनरकादिफलसांकर्यंतथाकार्यप्रवृत्तौस्वाच्छंद्यंविधिनिषेधप्रायश्चित्तशास्त्रवैयर्थ्यंचस्यादेव । नचैवयुक्तं; सर्वशास्त्रव्याकोपात् अथोक्तन्यायात्कारणरूपतयासर्वेषामभेदेपिसृष्टिदशायांघटादित्वेनयागादित्वेनचप्रतीयमानंभेदमाश्रित्यप्रागुक्तदोषाप्रसंगमंगीकुर्यास्तर्हिममापिसम.समाधिः; न्यायस्यप्रत्यक्षविरोधेसर्वत्राद्तुंमशक्यत्वाच्छ्रुत्यादितस्तस्यातिदौर्बल्यात् एकोपादानकानांपारमार्थिकभेदवारणेनतद्विषयलाभस्यासदिष्टत्वाच्च ॥

अग्नेयरित्यादिनासर्वभवनसमर्थत्वाद्विरुद्धधर्माश्रयत्वंब्रह्मणोलक्षणमितिशुद्धाद्वैतमार्तंडटीकाकारोजगाद लोकस्यब्रह्माभिन्नत्वेनलोकेपितल्लक्षणसत्त्वेविरोधकथामात्रोच्छेदप्रसंगइत्यादियदुक्तं,-तदपिनसम्यक्; वेदप्रतिपादितविरुद्धधर्माश्रयत्वंब्रह्मणोलक्षणंवेदे, तेच "आसीनोदूरंव्रजति अपाणिपादोजवनोग्रहीता" इत्यादिनाकारणएवविरुद्धधर्माः प्रतिपादिताः, नकार्ये । नहि कारणस्यसर्वेधर्माःकार्येगच्छंतीतिकस्यापिसंमतम् । अन्यथात्वन्मतेपिब्रह्मणःसच्चिदानंद-

रूपत्वात्तत्कार्यस्यघटादेरपिसच्चिज्ञानंदत्वापत्तिरिष्टापत्तौचतेषांजड-
त्वंनस्यात् । मृच्छिलादिपुसत्त्वैवव्यज्यतेनेतरद्वयमितिवचनविरो-
धश्च । एतेनब्रह्मानित्यमज्ञमित्यपिस्याद्विरोधस्यब्रह्मण्यदूपणत्वादित्या-
दिकमपास्तं, वेदेब्रह्मणितादृशधर्माणामनुक्तत्वात् वेदविरुद्धतर्कश्चो-
पेक्षणीयएव ॥ किंचसर्वंखल्वित्यादिश्रुत्यनुरोधेनब्रह्मणिमिथ्यात्वंतव-
नयेपिकुतोनस्यात् ? किंचब्रह्मभिन्नस्यसर्वस्यापिमिथ्यात्वात्सांख्य-
सौगतादिसमयानांवेदस्यचत्वन्मतेमिथ्यात्वेनतेषांपरस्परंविरोधप
रिहारार्थंयत्नस्तावकीनानांव्यर्थएवस्यात्; विरोधस्यापिमिथ्यात्वा-
त् ॥ किंचकार्याकार्ययोरुभयोरपिसमानत्वात्तुल्यतयाप्रवृत्तिःस्यात् ॥
ननुदृश्यतएवमिथ्यात्वेनजानतांज्ञानिनामुभयत्रप्रवृत्तिर्वानिवृत्तिर्वे-
तिचेत्तर्हित्वन्मतेकिंप्रवर्त्तकमितिवक्तव्यम्–ईश्वरेच्छाकर्मवारागादि
कंवास्वभावोवा ? नाद्यः; त्वदुक्तदोषाणांत्वय्येवनिपातःस्यात् किंच-
त्वन्मतइच्छायाःप्रवर्तकत्वंनसंभवति । जीवस्तत्कार्येप्रवर्त्ततामिती-
श्वरेच्छायाःप्रवर्त्तकत्वंत्वयावाच्यं । तत्रजीवोयदिईश्वरदृष्ट्यास्ति-
तदातदज्ञानकल्पितएवत्वयावाच्यः, अन्यथातस्यमिथ्यात्वानुप-
पत्त्याऽद्वैतहानिःस्यात्तथाचेश्वरस्यभ्रांतत्वापत्तिः ॥ नचेश्वरोमि-
थ्यारूपंजीवादिकंमिथ्यात्वेनैवजानातीतिनोक्तानुपपत्तिरितिवाच्यं,
मिथ्यात्वज्ञानस्यबाधाधीनत्वात् । असतिचबाधेज्ञाननाश्यतत्कल्पि-
तवस्तुनएवाभावात्किंविषयकंज्ञानंतस्यस्यात् ? नहिशुक्तिरजतमि-
थ्यात्वेनजानतांशुक्तिरजतमेवस्यादितीच्छाजायते तस्मात्सर्वथैव-
त्वन्मतइच्छानसंभवति ॥ एवंबहुभावस्यापिमिथ्यात्वाद्बहुस्यांप्रजा-
येयेतीच्छायाअप्यनुपपत्तिः ॥ नचवस्तुतइच्छादिकंनास्त्येव, किंतु-
वेदेअध्यारोपापवादन्यायेनजगदुत्पत्त्यादिकंप्रदर्श्यते । उक्तंच 'ननि-
रोधोनचोत्पत्तिर्नबद्धोनचसाधकः ॥ नमुमुक्षुर्नवैमुक्तइत्येषापरमार्थ-
ते'तीतिवाच्यं, तर्हितवपरमतस्यचमिथ्यात्वात्परमतखंडनार्थंत्वत्प्र-
यासोनिरर्थकएव, माध्यमिकमतानुयायित्वात्सद्भिरुपेक्षणीयश्चा-
सीत्यास्तांविस्तरः ॥ कर्मणः प्रवर्त्तकत्वेज्ञानिनांप्रवृत्त्यनुपपत्तिः सर्व-
स्यत्वन्मतेऽज्ञानोपादेयत्वाज्ज्ञानेनाज्ञाननाशउपादाननाशात्कार्य-
नाशस्यावश्यकत्वेनकर्मणामपिनाशात् ॥ नचज्ञानेनाविद्यानाशेपि-
तच्छेषोस्त्येवेतितन्मूलकस्यप्रारब्धकर्मणःसत्त्वेनप्रवृत्त्याविरोधइति
वाच्यं, ज्ञानेनाविद्यानाशोत्तरंतल्लेशसत्त्वेप्रमाणाभावात् तन्नाशार्थं-
कारणांतरंकल्पनीयमिति ॥ तृतीयेतुज्ञानिनिरागादिसत्त्वात्तस्यज्ञानं-

निष्फलं; स्थितप्रज्ञत्वाभावात् अतएवोक्तंभगवता 'प्रजहातियदाकामान्सर्वान्पार्थमनोगतान् ॥ आत्मन्येवात्मनातुष्टःस्थितप्रज्ञस्तदोच्यते'इति ॥ नापिचतुर्थः; नास्तिक्रमतप्रवेशापत्तेः "पराचुतच्छ्रुते" रितिश्रुतिसूत्रविरोधश्च । अस्मन्मतेचईश्वरएवप्रवर्त्तकः अतएवएषह्येवेत्यादिश्रुतिरपिसंगता ॥ मर्यादामार्गंगीकृतेभ्यः कर्मकारयित्वातत्तत्फलंददाति । नचैतावताकर्मणांहेतुत्वमीश्वरेच्छायाश्चमुख्यत्वात् ॥ किंचेत्यादिनाआपादितदोषस्तुपूर्वमेवनिरस्तः । किंवाकर्मकीदृशमपिकरोतुफलमपिनियमेनस्वेच्छयाददातीत्यादिपक्षस्त्वनंगीकारेणैवपरास्तः ॥ मोक्षमार्गस्तुवेदगुरुशिष्याणांमिथ्यात्वंवामदेवशुकादीनामप्यमुक्तिजीवानांस्वप्नजीवतुल्यत्वंईश्वरस्यापितत्तुल्यत्वंचप्रतिपादयतात्वयैवनाशितः किंचैवंसर्वत्रानाश्वासेनभक्तिमार्गस्याप्युच्छेदस्त्वयासंपादितःकुमार्गेप्रवृत्त्यापत्तिश्च ॥ ननुवेदस्यमिथ्यात्वेपितत्प्रतिपादितस्यमोक्षस्यसत्यत्वान्नमोक्षमार्गोच्छेदः । नहिशब्दस्यक्षणिकत्वेपितत्प्रतिपाद्यघटादीनांक्षणिकत्वंसंभवति ॥ भक्तेर्मोक्षोपयोगित्वादेवनभक्तिमार्गोच्छेदः कुमार्गप्रवृत्तेर्निंदाहेतुत्वान्नतत्रेच्छा । उक्तंच 'बुद्धाद्वैतसतत्वस्ययथेष्टाचरणंयदि ॥ शुनांतत्वदृशांचैवकोभेदोऽशुचिभक्षण'इतिचेत्-न; वेदप्रतिपाद्यस्यस्वर्गादेर्जगतश्चमिथ्यात्वदर्शनेनत्वन्मतानुयायिभिर्यद्वेदप्रतिपाद्यंतत्तन्मिथ्येतिव्याप्त्याब्रह्मणस्तत्स्वरूपावाप्तिरूपमोक्षस्यापिमिथ्यात्वंकुतोनानुमीयेत ? युक्तेस्तुल्यत्वात् ॥ तस्माद्वेदविरुद्धकुतर्केणदोषापादनंस्वमतहानिकरमेवेति ॥

सहस्राक्षे यत्तुसर्वेत्यादिंदोषानिस्तारइत्यंतंभागंपरिहरंति-अप्रह्येत्यादिना हानिकरमेवेतीत्यंतेन । अयमभिप्रायः-सर्वभवनसमर्थत्वादेव ब्रह्मणोविरुद्धधर्माश्रयत्वमित्युक्तं लोकसमब्रह्माभिन्नत्वेपियावद्ब्रह्मधर्माणांकार्येत्वावच्छेदेन प्रकाशस्यानंगीकारात्घटादौसर्वभवनसामर्थ्याभावेन लोकेतल्लक्षणस्यवक्तुमशक्यतयाविरोधकथामात्रंनोच्छिद्यते किंतु जलानलादीनामन्योन्यविरुद्धधर्मैरेवब्रह्मणस्तत्तद्रूपेणभवनस्यश्रुतिसूत्रादिसिद्धतयात्तस्यैववल्लक्षणंयुक्तंयथापृथ्वीकार्याणांलवणशर्करादीनांहिंगुकुरंगनाभिप्रभृतीनांचपरस्परविरुद्धरसगंधादिसंधायित्वेपिपृथिव्याएवततद्रूपेणपरिणामात्तस्याएवषड्विधरससर्वविधगंधाद्याश्रयत्वंनतुलवणादिकार्याणां तेषुरसांतरगंधांतरादितिरोधानात् तथात्रापि कार्येषुशीतस्पर्शोष्णस्पर्शादितत्तद्धर्माणां परस्परव्यधिकरणताऽवधारणात्तेष्वेवतेषांविरोधकथा ब्रह्मतुसर्वकार्यरूपेणभवनसमर्थंसर्वविरुद्धधर्माश्रयश्चेत्यनवद्यं । नचेदंकैवलयौक्तिकं अपितु "आसीनो दूरं अपाणिपादः तदेजतितन्नैजति" इत्यादिकठश्वेताश्वतरेशावास्यादिश्रुतिशतैर्बोध्यते ।

शच्चतुरीयश्लोकखंडनेप्रपंचितं अतोलवणादिवत्कार्यदशायैवविरुद्धानांवस्तुतोविरोधरहितानां-धर्माणामाश्रयत्वादितिसार । एतदेव हृदिकृत्वाश्रीमदाचार्यचरणैस्तत्त्वदीपेभिहित (प्रकरण १ कारिका ७१) प्रापंचिकपदार्थानांसर्वेषांतद्विलक्षणमिति व्याख्यातंच "यद्यपिकारण-धर्माएवकार्येभवंतितथापिकार्यगतत्वेनान्यथाप्रतीतेस्तद्व्यावृत्त्यर्थमाह" इति ॥ अत्रश्रीपु-रुषोत्तमचरणा "ननुपूर्वंश्रितमपरिच्छेदरहितत्वंब्रह्मणिसाधितं तथासतिजगतोब्रह्माभिन्न त्वंसिद्धं तेनप्रापंचिकजडत्वादयोपिब्रह्मणिप्रसज्येरन्नित्यारांकांहृदिकृत्वाहु –यद्यपीत्यादि । समाधत्ते–तथापीति । अन्यथाप्रतीतेरितिक्रीडेच्छयानंदतिरोधापितेतेधर्मा अनेजनत्वाद-योजडत्वादिरूपेण प्रतीयतइतिकारणरूपेणजडत्वादिरूपेणतान्व्यावर्तयितुमाहेत्यर्थः । इद-मेवचदृश्यतेत्वित्यधिकरणेसाधित" इतिव्याचक्षते । एतेनब्रह्मानित्यमशुभमित्यादिप्रलापोपा-स्त ; जीवस्यैवाज्ञत्वात् एकस्यैवममाशस्येतिवाक्यात् मृदश्मादिषुचिदानंदतिरोभावपूर्व-कसत्तामात्रप्रत्ययेनापितत्रैवजडत्वप्रतीतिरुचिता, नतुप्रकटसच्चिदानंदेसर्वज्ञेब्रह्मणितच्छंक्य-वर्तुविद्यारण्येनापिपंचदश्या (प्रक० १५ श्लो० २०) 'सत्ताचिति सुखचेतिस्वभावात्रहाण स्त्रय. ॥ मृच्छिलादिषुसत्तैवव्यज्यतेनेतरद्वय'मितितदेवस्वीकृत ॥ अनित्यत्वंतुब्रह्मोपादान-कत्वेकापिनास्त्येव स्वप्नशुक्तिरजतादयस्तुमायिकाइतितत्तुच्छतायाब्रह्मणिप्रसंग इतिदिक् । लोकेविरोधकथायाअनुच्छेदान्मानाधीनामेयसिद्धिरितिसिद्धांतात्प्रमाणविरुद्धेषुविरोधोद्भा-वनमुचितमेवयत्तोविरुद्धधर्माश्रयत्वादिकं श्रुतिसमतमविप्रतिपन्नंसिद्धेत् । अन्यथातत्रादृशै-

---

यत्तु सर्वभवनसमर्थत्वाद्विरुद्धधर्माश्रयत्वस्य ब्रह्मणोलक्षणत्वमिति तट्टीकाकारोजगाद,–तन्नेत्याह–अविरोधइति ॥ लोकस्य ब्रह्माभिन्नत्वेन लोकेऽपि तस्य लक्षणत्वे विरोधकथा-मात्रस्योच्छेदप्रसङ्गात् ॥ किञ्च ब्रह्मानित्यमशुभमित्याद्यपि साक्षात्त्वयाऽङ्गीक्रियेत सर्वंखल्वित्या-दिश्रुतिबलात् विरोधस्यत्रभूषणत्वात् ॥ एवंच कथं त्वमेव प्रमाणविरोधोद्भावनेन परा-न्विजिगीषेथाः कथंच द्वितीयाध्यायस्थोब्रह्मपरवाक्यानां श्रुतियुक्तिविरोधोद्धारः संगतः ? कथंवात्वद्गुरोर्द्वितीयाध्यायस्थतादृशसूत्रव्याख्या युज्येत ? तववाविरोधपरिहारयत्नः ? किंचै-वमविरोधेऽप्यश्रार्ये प्रवृत्तिर्नपरिहृता ॥ ४० ॥ नन्वीश्वरेच्छैवसर्वत्रकारणं तथाच तथैवा-कार्ये ममाप्रवृत्ति यदाच तस्येच्छा मदीयाऽकार्यकरणविषया जायते तदा क्रियत एव तदितिचेन्नेत्याह–तथेति ॥ अयमभिप्राय –किं हरीच्छावशान्न्यायान्यायौ कुर्वंन्नियमेन सुखदुःखे भुङ्क्ते किंवा कर्म कीदृशमपि तदिच्छया करोतु फलमप्यनियतमेव स्वेच्छया ददातीति ॥ नाद्य, तृतीयश्लोकोक्तरीत्याकर्मणोहेतुत्वापत्ते ॥ किंच यदिदं सुकृतादिकारयति तस्योक्तरीत्या दुष्कृतादितोऽनन्यत्वानपायादुक्ताऽनुपपत्तिर्दुरुद्धरा ॥ नद्वितीय, अत्राश्वा-सेनाप्रवृत्त्यापत्त्या भक्त्यादिमार्गोच्छेदप्रसङ्गात् ॥ एवं निश्चितवत कस्यापि प्रवृत्त्ययोगात् ॥ इष्टएव मोक्षमार्गध्वंस पुष्टिमार्गस्थस्येतिचेत्सहैव पुष्टिमार्गेण मोक्षमार्गं नाशयेथा ॥ न्यायस्य तुल्यत्वेनतत्रापि शङ्कया प्रवृत्त्यभावप्रसङ्गात् ॥ न्यायाद्यविरोधेतूक्तं वक्ष्यामश्च ॥ कुमार्गेप्रवृत्त्यापत्तेश्च ॥ इष्यते इतिचेद्वाह्योसि ॥ कृतप्रयत्नापेक्षस्त्वित्युक्तसूत्रविरोधोप्यत्र पक्षे-ज्ञेय. ॥ तस्मादिच्छाया अनियामकत्वात्कर्मणामेवतत्त्ववाच्य ॥ तथाचोक्तदोषानिस्तार ॥

रेकतरप्रमाणबाधेननिर्विशेषतादिकमेवापद्येत एवंसादरब्रह्मप्रमाणायतन्मानश्रुतिविप्रतिषेधादिपरिहारोद्वितीयाध्यायेभगवताचार्यस्यनासंगतः अन्यथानायथाभासात्वहंभात्कार्यविलक्षणत्वदर्शनादितःप्रकृत्यादिवादमादायैकदेशिभिर्ब्रह्मण्युपादानत्वादिकनिवारितमेवस्यात् कुतस्तदा तस्यतादृशत्वसिद्ध्याशा ? यथाचतैत्तिरीयेआकाशादिसृष्टिराम्नायतेछांदोग्येचतेजःप्रभृतिसृष्टिःविरुद्धधर्माश्रयत्वमात्रेणकस्तत्रविप्रतिषेधपरिहारोयदि (अ० २ पा० ३ सू० १) "नवियदश्रुतेः" इत्याद्यधिकरणानिनस्युः एतेनैवासदाचार्याणांतद्भाष्यप्रणयनप्रयासोपिसफलःसिद्धः । यत्तुकिंचैवमित्यादितच्चलोकेकार्येष्वविरोधस्यांगीकारेणशास्त्रनिषिद्धानांनिषेधशास्त्रबलात्तेष्वप्रवृत्तेः तन्मतेचसर्वंखल्विदमित्यादिश्रुतिबलाद्ब्रह्मणिमिथ्यात्वेसांख्यादिसिद्धांतानांवेदस्यचमिथ्यात्वेनद्वितीयाध्यायादेः शशविषाणेनव्योमकुसुमसमुत्पाटनप्रायप्रयत्नत्वंसत्कर्मदुष्कर्मणोर्मिथ्यात्वाविशेषेणरागात्प्रवृत्तिःस्वाच्छंद्यंचाविरुद्धमेवस्यादित्यादिशक्यं; सुधीभिरधिकमूहितुं । यच्चनन्वित्यादि पक्षेशेषद्वयंतं तत्प्रलापमात्रं । तत्रद्वितीयपक्षाकांडताडवमनंगीकारपराहतं । आद्येकर्मणामनंतरकारणत्वेपिभगवदिच्छायाएवमुख्यंसर्वहेतुत्वंनव्याहतं तद्धेतोरेवेतिन्यायात् "एषउएवएनसाधुकर्मकारयति" इत्यादिश्रुतिस्मृतिन्यायैस्तस्याएवकर्माणिफलानिच प्रतिबोधितायाहेतुतायाअबाधेनबाधायोगात् तपःशब्दवाच्यतत्कृतपर्यालोचनानुरोधि कर्मणामवांतरकारणत्वंतुनतांबाधितुमीष्टे पित्रादेर्दंडकुलालादेश्चपुत्रघटादिकंप्रतितथात्वंभगवतोजगत्कारणतामिवेतिसंक्षेपः । इदंच तृतीयस्यद्वितीयेसू० (३८) फलमतइत्यधिकरणेस्फुटंतत्रसू० (४०) "धर्मंजैमिनिरतएवे" तिपराभिमतंकर्मणांहेतुत्वमनूद्यसू० (४१) "पूर्वंतुबादरायणोहेतुव्यपदेशात्" इतिसिद्धान्तकथनात् सिद्धमधिकं तृतीयश्लोकखंडने यच्चसुकृतदुष्कृतयोरनन्यत्वमुक्तं तच्चिहैवापास्तमतोनफलसांकर्यं तदभिन्नन्यायस्यसर्वत्रानन्यतापादकत्वे भवतांमुखादेरधोपघनानांचभवच्छरीराभिन्नतयापरस्परानन्यत्वंततोभक्षणादिकार्यसांकर्यंचापद्येत अत्रवर्शकामारभ्यबाह्योसीत्यंतः स्वानुरूपदुर्वादाः ससर्गदोषात्परानपिवाचाटयतीतिकिंचित्तथोक्तमतेद्वितीयपक्षारक्षणात्तभक्तिमार्गस्यमोक्षमार्गस्यचध्वंसः कुमार्गप्रवृत्तिर्वाप्रसज्यतेकृतप्रयत्नापेक्षसूत्रार्थस्तुसमर्थितः प्राक्समर्थयिष्यतेचोत्तरभागे एवमिच्छायानियामकत्वसाधनादेवतस्मादित्यादिव्युदस्तं । अन्यथा 'ज्ञानाग्निः सर्वकर्माणिभस्मसात्कुरुतेतथे'तिनष्टकर्मणांज्ञानिनांशुकवामदेवादीनांप्रवृत्तिहेतुः कः स्यात् ? अविद्याध्वंसेतत्कार्यप्रारब्धशेषासंभवस्यसमर्थितचरत्वात् प्रारब्धरहितानांघटपटादीनांचप्रतिव्यक्ति विचित्राप्रवृत्तिव्यवस्था कथंस्यात् ? उक्तानंगीकारेत्वन्मतेप्रवर्तकं दुर्वचं इच्छाबोधकश्रुत्यादेस्तन्मतेथानुपपत्त्यातद्विरुद्धस्त्वदुक्तसर्वदोषाणांत्वद्वादएवापादश्चेत्याहुः तर्हि त्वन्मतेकिंप्रवर्तकमित्यादिना अर्थोनिगद्व्याख्यातः ॥

यच्च यत्त्वित्यादिना 'तत्रोत्तमामध्यमाश्चकनिष्ठाहाधिकारिणः ॥ सर्वंब्रह्म सर्वंब्रह्मसदृशं सर्वंब्रह्मणोभिन्नं तदग्रेचमध्यमपक्षस्यस्वसंमतत्व'मित्यादिनाशुद्धाद्वैतमार्त्तंडोक्तंकिंचिदनूद्यतट्टीकाकृदुक्तमपि-

कार्यात्मनाभेदः कारणात्मनाऽभेदइत्युक्त्वातन्नयुक्तमित्यादिनादोषापादनंतदभिन्नइतिन्यायेनकार्याणामप्यभेदापत्त्याकार्यात्मनाभेदासिद्धेर्भेदाभेदयोःसमसत्ताकयोरप्यविरोधेलोकेविरोधकथामात्रोच्छेदप्रसंगाच्चेत्यादिनाकृतंतदपिनसम्यक्, यतस्तदभिन्नाभिन्नस्यतदभिन्नत्वमितिन्यायस्तुमूलप्रकृतिविकारस्यविकारःसमूलप्रकृतिरूपएवेत्यभिप्रायकः यथाप्रकृतिकार्यस्यमहत्तत्वस्यविकारोहंकारादिःप्रकृत्यात्मकएवेतिअतस्तादृशस्थलएवसप्रवर्त्तते, नतुविकाराणांपरस्परमभेदः। तेनन्यायेनापादयितुंशक्यते । अन्यथाराजसाहंकाराभिन्नमहत्तत्वाभिन्नस्यतामसाहंकारस्यापिराजसत्वापत्तिरेवंचसर्वस्याभिन्नत्वेकार्यमात्रविलोपापत्तिरितिपूर्वमेवोक्तं एकपदार्थप्रतियोगिकयोर्भेदाभेदयोरविरोधोपिपरपदार्थप्रतियोगिकयोस्तयोर्नविरोधाभावसंपादकः कपिसंयोगितद्भेदयोरविरोधेपितद्भेदयोर्विरोधस्यसर्वजनप्रतीतिसिद्धत्वात् सामान्यतोभेदाभेदयोर्विरोधस्तुनास्त्येव, भेदस्यकेवलान्वयित्वात् घटाभिन्नेपिघटेपटभेदस्यसत्त्वात् ॥ भेदाभेदयोः समसत्ताकत्वयदुक्तं,-तदपिदुर्वचं, तथाहिकिंसमसत्ताकत्वसमानकालिकत्वंवासमानदेशत्ववापारिभाषिकंवा? नाद्यः, घटाभेदतद्भेदयोरेककालावच्छेदेनप्रतीयमानत्वात् घटाभेदपटभेदयोर्घटरूपैकदेशेविद्यमानयोरविरोधेपिघटतद्भेदयोर्विरोधस्यजागरूकत्वात्तृतीयोपितादृशपरिभाषायानिर्युक्तिकत्वादेवनसंभवति पारमार्थिकसत्तातिरिक्तयोर्व्यावहारिकपारिभाषिक्योः सत्तयोरसंभवात् तत्स्वीकारेशशशृंगस्यापिप्रतीतेस्तस्यापिप्रातीतिकीसत्तास्यात् । तथासतितुच्छानिर्वचनीययोर्वैलक्षण्यानुपपत्तिः । नचेष्टापत्तिरितिवाच्यं, तथासतिमिथ्यात्वलक्षणेसद्विलक्षणत्वविशेषणस्य ब्रह्मप्रमातिरिक्ताबाध्यत्वेसतिसत्त्वेनप्रतीत्यर्हचिद्भिन्नंप्रतिपन्नोपाधौत्रैकालिकनिषेधप्रति

यत्तु 'तत्रोत्तमामध्यमाश्च·निष्ठाह्यधिकारिण' इत्यादिना सर्वंब्रह्म सर्वंब्रह्मसदृश सर्वंब्रह्मणोऽभिन्न तत्कार्यभूतमित्यधिकारिभेदेनेदंहि विश्वमिति भागवतश्लोकटीकाल्पसुबोधिनीस्थस्वगुरुसमत्यापक्षत्रयमुपन्यस्यान्तिमपक्षस्य भेदपरत्वेन दुष्टत्वमुक्त्वा मध्यमपक्षस्य मध्यमत्व स्वानुरोधित्वेन स्वसमतत्व चोक्त ॥ यच्च भेदाभेदप्रतीतिस्तुमध्यमानाप्रकीर्तितेत्येतद्व्याख्याने कार्यात्मनाभेद कारणात्मनाऽभेदइति तट्टीकायामुक्तं–तत्तुनयुक्त, तदभिन्नाभिन्नइतिन्यायेन कार्याणामप्यभेदापत्त्या कार्यात्मनाभेदासिद्धे भेदाभेदयो समसत्ताकयोरप्यविरोधेविरोधकथामात्रोच्छेदप्रसङ्गाच्च ॥ किंचैव मतद्वय स्वीकुर्वता त्वद्गुरुणा किं वस्तुन्यपि विकल्प स्वीक्रियतेऽत परप्रतारणायेतर पक्ष ? ॥ उभयमपि विज्ञातशास्त्रहृदां हास्यास्पदमेवेत्यलम् ॥ १० ॥ ४१ ॥

योगीनवेत्याकारिकायांविप्रतिपत्तोसत्वेनप्रतीत्यर्हत्वविशेषणस्यचवै-यर्थ्यापत्तिःमतद्वयस्वीकारेहास्यास्पदत्वं, यदुक्तं-तदपिप्रतिबिंबाव-च्छेदाभासवादरूपमतत्रयंस्वीकुर्वतःस्वस्यततोप्यधिकहास्यास्पदत्व-मनवलोक्यैव किंचाचार्यैर्मध्यमपक्षस्यस्वाविरोधित्वमुक्तंतेनस्वमते-तन्मतस्यविरोधोनास्तीत्येवोक्तं नतुतन्मतंस्वकीयत्वेनप्रतिपादितं त्वदीयैस्तुमतत्रयमेवस्वकीयत्वेनप्रतिपादितमतोभवतामेवहास्या-स्पदत्वं ॥

सहस्रासे यत्तुतत्रोक्तमाद्यत्यादिं एवेत्यलमित्यंतंभागंनिराकुर्वंति-यच्चयत्त्वित्यादिना एवहास्यास्पदत्वमित्यंतेन । अत्रेदंज्ञेयं-प्रथमस्कंधपंचमाध्याये (श्लो० २०) इदंहिविश्वं-भगवानिवेतरोयतोजगत्स्थाननिरोधसंभवाइत्यत्रइदंविश्वंहिसर्वंखल्वित्यादिश्रुतिनिश्चयेन-भगवान् इत्युत्तमानाप्रत्ययः इदंविश्वंभगवानिवब्रह्मोपादानकत्वाद्ब्रह्मसदृशमितिमध्यमानां इदंविश्वंभगवांस्तुइतरस्ततोभिन्नोघटात्कुलालइवेतिनिकृष्टानां इतिपक्षत्रयं श्लोकपदयोज-नयैवदर्शितंनतुकल्पनया तत्रतृतीयस्यसर्वथानादरस्तु "यदाह्येवैषएतस्मिन् द्वितीयाद्वैभयं-भवति" इत्यादिश्रुतिविरोधात् । द्वितीयस्तुसूत्रस्थैकदेशिमतानुगुण्यात् श्रुतिसूत्रगीता-द्यभिप्रेतोमुख्यसिद्धांतः प्रथमएव स्वानुरोधितयामध्यमपक्षस्यांगीकारस्तुप्रथमपक्षस्यझी-घ्रंसर्वेषांबुद्ध्यावनारोहात् तादृशानांबुद्धिसौकर्यार्थं. नयुक्तमित्यादिनोक्तदोषास्त्वकिंचित्कराः तथाहि तदभिन्नन्यायस्तुवस्तुतोब्रह्माभिन्नपृथिव्यभिन्नघटादेर्ब्रह्माभिन्नत्वस्यलोके पृथिव्य-भिन्नतंत्वभिन्नपटेपृथिव्यभिन्नत्वस्यचसाधकः नतुकार्येपुपरस्परप्रतियोगिकभेदप्रतीति-बाधकः अतः कार्यात्मनाभेदःसिध्येत् यच्चभेदाभेदयोः समसत्ताकयोरित्यादितत्तुनामार्थी-दितादात्म्यवादिवैयाकरणादिराद्धांतेमायायाः सदसत्त्वाभ्यामनिर्वाच्यत्वबोधकेस्वमतेस्वो-क्तदोषप्रसरमविचार्यैव । वस्तुतोस्माकंतु अभेदएववास्तवोभेदश्चातिरोभावरूपतया बद्ध-जीवप्रतीतिसिद्धइत्येतयोस्त्याद्यैकाधिकरण्यविरोधः किंतुत्वदीयोक्तादिस्थलेपुसः अन्यतरस्य-प्रतीतिकतायाः अशक्यवचनत्वात् मायायांसत्त्वस्यतथात्वेविशुद्धचितः कल्पकत्वादसत्त्वं असत्त्वस्यतथात्वेऽनादिद्वैतंचापद्येतेति । भेदाभेदयोः समसत्ताकयोरित्यादितदुक्तिंदूषयि-तुमाननमप्याहुः-एकपदार्थेत्यादिना । वृक्षाद्यैकस्मिन्पदार्थेऽग्रावच्छेदेनकपिसंयोग्यऽभेदः मूलावच्छेदेनतत्संयोगिप्रतियोगिकभेदश्चाविरोधेनतिष्ठति वृक्षस्यैकस्यैवानुयोगिप्रतियो-गित्वात्परपदार्थप्रतियोगिकयोस्तुतयोः सामानाधिकरण्यमसंभवि नीलाभिन्नोघटइति-प्रत्ययेतत्रनीलभेदस्यपटाभिन्नइतिप्रत्ययेतत्रपटाभेदस्यचाप्रतीतेरित्यर्थः । सामान्यइति । यतः कुतश्चिद्भिन्नेयत्किंचित्प्रतियोगिकोभेदः सुवचइतिभावः । केवलेति । सृष्टिदशायां प्रपंचेतत्तदंशतिरोभावरूपस्यतस्य तथात्वात् । यच्चसमसत्ताकयोस्तयोर्विरोधएवेतिदर्शितं-तत्रसमसत्ताकत्वंविकल्प्यनूषयंतस्तदुक्तौन्यौन्यदर्शयंति-तदपिदुर्वचमित्यादिना । अनू-दिताविप्रतिपत्तिस्तुअद्वैतसिध्यारंभस्था यच्चकिंचैवमित्यादिइत्यलमित्यंतंतत्रभेदाभेदपक्षस्य-मध्यमाधिकारिबोधनार्थतयाउक्तचरत्वात् । किंतुतन्मतेप्रतिबिंबादिपक्षस्वीकारात्किंजी-

येश्वरवस्तुनोः प्रत्येकंवैरूप्यमाहोस्वित्परप्रतारणामात्रंतत् उभययापितदेवहास्यास्पदमित्याहुः—मतद्वयेत्यादिना । किंचप्रतिबिंबवादेप्यवांतरास्तन्मतग्रंथप्रसिद्धाः पट्पक्षाः मात्तैरुक्ताः । यथा अनादिरनिर्वाच्याभूतप्रकृतिश्चिन्मात्रसंबंधिनीमायातस्यांचित्प्रतिबिंबईश्वरः । तस्याएवपरिच्छिन्नानंतप्रदेशेष्वावरणविक्षेपशक्तिमदविद्याभिधानेषुचित्प्रतिबिंबोजीवइत्येकंमतं ॥ १ ॥ त्रिगुणात्मिकायामूलप्रकृतेर्मायाचाविद्याचस्वयमेवभवतीतिसिद्धं । स्वरूपद्वयतत्ररजस्तमोनभिभूतशुद्धसत्वप्रधानामायातस्यांचित्प्रतिबिंबईश्वरः ॥ तदभूतमलिनसत्त्वप्रधानाऽविद्यातस्यांचित्प्रतिबिंबोजीवइत्यपरं ॥ २ ॥ विक्षेपशक्तिप्राधान्येनमायाशब्दितायांमूलप्रकृतावेवचित्प्रतिबिंबईश्वरः ॥ आवरणशक्तिप्राधान्येनाविद्यादिशब्दितायांतस्यामेवचित् प्रतिबिंबोजीवइतितृतीयं ॥ ३ ॥ अविद्यायांचित्प्रतिबिंबईश्वरः अंत.करणेचित्प्रतिबिंबोजीवइतितुरीयम् ॥ ४ ॥ घटाकाशजलाकाशमहाकाशमेघाकाशवत् कूटस्थजीवब्रह्मेश्वरभेदेनचैतन्यचातुर्विध्यवादिनांतुब्रह्माश्रितमायातमसिस्थितासुसर्वप्राणिनांधीवासनासुप्रतिबिंबितचैतन्यमीश्वरः ॥ स्थूलसूक्ष्मदेहावच्छिन्नचैतन्यस्थितेमायाकल्पितेंत.करणेप्रतिबिंबितंचैतन्यंजीवइतिपंचमं ॥ ५ ॥ एवंप्रतिबिंबेश्वरवादिनां पंचपक्षाः । पक्षेत्रिबिंबेश्वरवादिमतेतुजीवोपाधिनांतःकरणादिनाऽच्छिन्नंचैतन्यमीश्वरोबिंबभूतः । अज्ञातेनतत्प्रतिबिंबोजीवस्तत्राप्यज्ञानपरिणामभूतमन्तःकरणं जीवस्याविशेषाभिव्यक्तिस्थानमित्याहुः'' एवमन्येपिविशेषार्थेपुदर्शयंतेइत्यमवच्छेदाभासपक्षयोरप्यवांतरपक्षबाहुल्यंद्रष्टव्यं तथासतितन्मतेजीवेश्वरवस्तुनोरनेकरूपत्वंप्रतारणामात्रत्वंवाआपद्यतएव स्वानुरोधित्वमिति अतोहिमध्यमः पक्षः । शुद्धाद्वैतानुरोधतइत्यादिपुमार्तंडादिभागेषुपत्स्फुटं । एवमस्यश्लोकस्यखंडनेब्रह्मणः सार्वात्म्येपिकार्याणामसांकर्यंतस्यविरुद्धधर्माश्रयत्वं इच्छायाः सर्वहेतुत्वेन्यस्यासामंजस्यं अधिकारिविशेषबोधानुरोधात्कचिद्भेदाभेदपक्षस्यशुद्धाद्वैतसिद्धांताविरोधतः कथनेप्यदूषणत्वसिद्ध ॥ इतिदशमश्लोकखंडनं ॥

योपिशुद्धाद्वैतमार्तंडोक्तंशाक्तानांतुमतेब्रह्मविश्वोपादानमेवहि ॥ निमित्तकारणंशक्तिर्विकारित्वभयादतइत्यादिनाशाक्तमतंतत्खंडनंचोपन्यस्यतत्रब्रूमइत्यादिनातत्र 'मायांतुप्रकृति'मित्यादिश्रुतिमार्कंडेयपुराणाद्यमालोचनमूलकंतद्दूषणाभावकथनमित्यादिदोषउद्भावितः । सोऽपिमायांत्वित्यादिश्रुतिमार्कण्डेयपुराणाद्यभिप्रायमबुध्वैव । नहितत्रशक्तिःकाचिदतिरिक्तास्वतंत्राप्रतिपादिता, किंतुब्रह्मणःसामर्थ्यरूपैव । सा चब्रह्मणोऽभिन्ना अतएवतत्रापितस्याईश्वरीयत्वेनैव 'मायिनंतुमहेश्वरं, महामायाहरेश्चैतत्तयासंमोह्यतेजगत् । यादेवीसर्वभूतेषुविष्णुमायेतिशब्दिता । त्वंवैष्णवीशक्तिरनंतवीर्य्ये'त्यादिनावर्णनं कृतं । व्यासैश्चब्रह्मभिन्नस्यजगत्कारणत्वंनिराकृतं ॥ नचव्यासैःसांख्यमतसिद्धायाःप्रकृतेःप्रधानपदवाच्यायाजगत्कारणत्वंनिराकृतं ।

नशाक्तमतसिद्धायाःशक्तेरितिवाच्यं; यदिशाक्तानांमतेशक्तिपदप्रति-
पाद्यंशुद्धंब्रह्मैवतदानविरोधोयदितद्भिन्नंकिंचित्तदाब्रह्मणएवोपादान-
त्वंतस्यैवनिमित्तत्वंचप्रतिपादयद्भिर्व्यासैरधिष्ठात्रीश्वराणामपिकार-
णत्वं "पत्युरसामंजस्या" दित्यादिसूत्रैःखंडयद्भिःकथंनखंडितं ?
विष्ण्वादिपदानांचशुद्धब्रह्मवाचकत्वं, नतुकिंचिद्विशिष्टवाचकत्वं;
तथासत्युपाधेर्विशेषणरूपस्यनित्यत्वेसदेवेत्यादिश्रुतिविरोधस्तत्रस-
जातीयविजातीयव्यावृत्तेरुक्तत्वात् । अनित्यत्वेचविष्ण्वादीनांजीव-
तुल्यत्वापत्तिः तस्माद्यदिचेत्याद्युक्तदृष्टांतदार्ष्टांतिकयोरसंगतिः ।
यदुक्तं (मुक्तिस्तुनिष्कृष्टतत्स्वरूपात्मकतत्पदार्थेनत्वंपदार्थस्याभेद-
ज्ञाना) दिति,-तदपिनसाधीयः; तादृशाभेदज्ञानमात्रस्यमुक्तिहेतु-
त्वेश्रुताभेदप्रतिपादकशास्त्राणांसर्वेषामेवमोक्षप्रसंगःनचाभेदसा-
क्षात्कारस्यैवमोक्षहेतुत्वंनाभेदपरोक्षज्ञानस्यशाब्दरूपस्येतिवाच्यं;
शब्दादपरोक्षज्ञानासंभवात्; तथासतिश्रवणादीनांतत्रहेतुत्वानु-
पपत्त्याद्दर्शनोद्देशेनश्रवणाद्यनुष्ठानंनिरर्थकंस्यात् । तस्मादीश्वरज्ञाने-
नतद्भक्त्याचमोक्षइतिप्रपंचितंभाष्यप्रकाशादिषुग्रंथगौरवभयान्नेह-
लिख्यते ॥ यत्तु (विष्णुभागवतंनव्यासकृतंकिंतुदेवीभागवतमिति-
मन्यमानाँस्तान्प्रतिविष्णुभागवतविरोधोद्भावनंतूपहासावह)मित्या-
द्युक्तं,-तदप्यविचारितरमणीयं । नह्विवादिमतसिद्धेनैवप्रमाणेनतद-
संमतंसाधनीयतत्संमतंवानिराकरणीयमितिनियमः । नाप्रत्यक्षं-
प्रमाणमितिवदंतंनास्तिकंप्रत्यनुमानेनेश्वरसिद्धिप्रदर्शनमपिहास्यास्प-
दंस्यात् । वस्तुतस्तुविष्णुभागवतंनाष्टादशपुराणांतर्गतं । नचव्या-
सप्रणीतमित्येवहास्यास्पदं; सर्वसंमताष्टादशपुराणांतर्गतपद्मपुराणे-
तन्माहात्म्येस्यसम्यक्तयाप्रतिपादितत्वात् व्यासप्रणीतसूत्रसंमता-
र्थस्यतत्रैवप्रतिपादितत्वात्तदेवव्यासकृतमितिनिश्चीयते । व्यासैर्ब्रह्म-
व्यतिरिक्तस्यजगत्कारणत्वंनिषिद्धमतस्तत्त्वप्रतिपादकंतुव्यासमतवि-
रुद्धत्वादुपेक्षणीयमेव । किंचयदितन्मतसिद्धस्यैवप्रमाणस्यविरोधस्तं-
प्रत्युद्भावनीयइत्येवनियमस्तदावौद्धसिद्धस्यप्रमाणस्यतन्मतेविरोधा-
भावात्तन्मतंसर्वसंमतंकुतोनस्यात् ? यदिचतन्मतस्यतत्संमतप्रमाण-
विरुद्धत्वाभावेपिवेदविरुद्धत्वाच्छिष्टोपादेयत्वमित्युच्यते तदाशक्ते-
र्निमित्तकारणत्वंकिंवेदसंमतंयेनतन्मतमुपादेयंस्यात् ? ॥

सहस्राक्षेसाकारव्यानवइत्येकादशश्लोकंसव्याख्यानंयोपिशुद्धाद्वैतेत्यादिनाऽभत्या-
चेदेनेत्यंतेन खंडयिष्यंत । प्रथमंयत्तुशाक्तानामित्यादिमत्तुस्मृत्यादिचेत्यंतंभागंदूषयंति—

योपिशुद्धेत्यादिना उपादेयंस्यादित्ययंतेन । अयंभाव –शुद्धाद्वैतमार्तंडे शांकरशैवभास्करभैक्षवादीनाबहूनामतानारखंडितत्वेपिस्वमतारिकंदीतादिमवं तेनशैवसुधाकराख्यग्रथनिर्माणतोयहुतरदुराग्रहरूपतदनुरूपाचरणतश्च महादोषंमन्यतामनन्यसामान्यामुपन्यस्यताप्यशुभ्रुत्यपच्छाक्तमतमात्रमुद्धर्तुंमयंप्रयस्तते तेननिश्चीयन्ते अंत शाक्तएवायमिति तंपरिचितवताकिंमदीयपर्यार्थेचेति ॥ म्यस्यमाध्यस्य ग्रमदर्शनंतुमगोपनमात्रफलक मनुवादेऋग्वेदस्थदेवीसूक्तगस्य ‘अहमेवस्वयमिदंवदामी’त्यादिदेव्या समुद्रशायिविष्णुजन्यतावोधनेनतन्मतवाधकमार्तंडे सप्रपंचंविवृतंतदत्रधौल्यांभैवोपात्तं । नास्तिशक्तेरित्यस्यपूर्वार्द्धंसर्वोपनिषदोपाहिमक्षतत्वनिरूपिकाइतिनेद्वानूदित ब्रह्मतत्त्वनिरूपिकासुसर्वासूपनिपत्सुत्वदभिमतरीतिकशक्तेर्वर्णनमपिनास्ति कुतस्तरातासुब्रह्मणोमृदादिवदुपादानत्वमात्रतस्याएवस्वातंन्त्र्येणर्तृत्वचेति एवंकारिकाभिप्रायेसत्यपितन्मायातुप्रकृतिमित्यादिश्रुतिमार्कंडेयपुराणाद्यनालोचनमूलकं तद्वर्णनाभावकथनम् इत्युक्त,–तन्मार्तंडानावलोकित्याभोहनार्थं मायादिवतिश्रुतेर्दीपरत्वेतस्याएवोपादानत्व ब्रह्मणएवनिमित्तत्वचापद्येनेतिसुतरांतन्मतभंगप्रसग । वस्तुतस्तुप्रकृतेर्भगवच्छक्तित्वविधायिकासा । नचयच्छब्दयोगप्राथम्यमेवतुद्देश्यलक्षणमित्यस्यविरोध , तस्यप्रायिकत्वात् । ‘अन्यथामायिनंतुमहेश्वर’मित्यत्रापिविरोधापत्ते । विस्तरस्तुदर्शित तृतीयतुरीयश्लोकखण्डने आत्मनोविकारित्वश्रुतिशास्त्र-

---

साकारध्यानतोध्येय ध्यातार शास्त्रतत्परा ॥
इच्छन्त्युपाधियोगाद्यद्वदते साकृतिश्चिति ॥ ४१ ॥

यत्तु शाक्तानान्तुमतेप्रकृतिश्चोपादानमेवहि निमित्तकारणशक्तिर्विकारित्वभयादतइति शाक्त मतमुपन्यस्य तत्रात्मनेविकारित्व श्रुतिशास्त्रविरोधिहि प्रकृतिर्ह्यस्योपादानमाधारःपुरुष पर सतोऽभिव्यञ्जक कालोब्रह्मतत्त्रितयत्वहम् । इतिभागवतेपद्यउपादानत्वमीरितम् । तद्विरुद्धचेतममतुब्रह्मतोनपृथक्क्वचसा ॥’ इति तन्मते भागवतविरोध स्वमतेप्रकृतेरीशादभिन्नत्वेन तदभाव चोपन्यस्य शङ्कराचार्यदुर्वासोवाक्यविरोधमुक्त्वा नास्तिशक्तेर्वर्णनंहिकारणत्वंतु-दूरत । व्यासैस्तुप्रकृते सर्वकारणत्वतिरस्कृतम् । ब्रह्मण समवायित्वनिमित्तत्वेनिरूपिते’ इत्युक्तं ॥ तत्रब्रूम –मायांतुप्रकृतिमित्यादिश्रुतिमार्कंडेयपुराणाद्यनालोचनमूलक तद्वर्णनाभावकथनम् ॥ व्यासानां तु साङ्ख्यसम्मतप्रधानहेतुवादखण्डने तात्पर्यं ॥ मायायायथा हेतुत्व तथोक्तमस्माभिस्तृतीयश्लोके ॥ यदितु शाक्तै शक्तिशब्देन मायोच्येत ततोऽतिरिक्तं तत्वं नस्वीक्रियेत तदा स्यादेवदोष ॥ यदितु स्मार्तरीत्या विष्ण्वादिशब्दैरिव शक्तिशब्देनापिकेनचिदुपाधिना विशिष्टाचितिरेवोच्येत । उपादानत्वंतु विवर्तोपादानत्वम्, आकारस्तु ध्यानार्थोध्यानेन ध्येयमात्रप्राप्ति । मुक्तिस्तुनिष्कृष्टतत्स्वरूपात्मकतत्पदार्थेन त्वम्पदार्थस्याभेद ज्ञानात्तर्हि न दोष इत्याह–साकारेति ॥ परंतु दुर्वास शङ्कराचार्यवाक्यविरोधेन तेषां हानि र्भवति नवेति ते प्रष्टव्या ॥ विष्णुभागवत नव्यासकृत किन्तु देवीभागवतमिति मन्यमानास्त्वाम्प्रति विष्णुभागवतविरोधोद्भावनन्तुउपहासायहम् ॥ नन्वेवंबौद्धादीनामपीश्वरप्राप्ति स्यादतआह–शास्त्रतत्परा ॥ शास्त्र वेदस्तन्मूलकमन्वादिस्मृत्यादिच ॥ ४२ ॥

विरोधीतिमार्कंडेयदुक्तं,—तदपिनसमाहितं; मार्कंडेयपुराणेतुनोक्तशाक्तमतगंधस्यापि-संबंधः। तत्रयद्योगिभिर्भवभयार्तिविनाशयोग्यमासाद्यवंदितमतीवविविक्तचित्तैः। तद्वः-'पुनातुहरिपादसरोजयुग्ममाविर्भवत्क्रमविलंघितभूर्भुवःस्वः ॥ पायात्स्वःसकलकल्मष-भेददक्षःक्षीरोदकुक्षिफणिभोगनिविष्टमूर्तिः ॥ श्वासानधूतसलिलोत्कणिकाकराल.सिंधुः-प्रनृत्यमिवयस्यकरोतिसंगात् ॥ नारायणंनमस्कृत्ये'त्यारंभात्प्रभृत्यासमाप्तिप्रह्मवादएव-धर्मादिपरिकरसहितःश्रुतिसंमतोनिरूप्यते ॥ यत्तुतत्रैकाशीतितमाध्यायात्प्रभृति त्रयो-दशाध्यायैर्देवीमाहात्म्यंनिरूप्यते तदपिशाक्तयंतदुर्गारूपस्यभगवतएवमाहात्म्यं ॥ दुर्गा-स्वरूपसंग्रहस्तुममवेदांतचिंतामणौ ॥ (प्रक० १२ श्लो० ३२) 'गुणात्मकमचिद्रूपं-प्रकृतिःसृष्टिकालिकं ॥ शक्तिप्रकृत्योर्दुर्गातुविभूति कार्यमिष्यते ॥ रत्यैविभिरसुनाशयाँ-स्तिरोभाव्यापितेनताः ॥ तदंशा-स्वविभूतिभ्योदत्ताःकेचनकेचन ॥ ३३ ॥ आदायामर-शक्तीनामंशान्सानिर्मितापुरा ॥ महिषासुरनाशायेत्यस्यास्तच्छक्तिकार्यता ॥ ३४ ॥ मुख्यत्वेनगुणाश्चांशास्त्रिगुणोपाधिधारिणाम् ॥ त्रयाणामागतातत्रेत्यस्या प्रकृतिकार्यता ॥ ३५ ॥ कार्याणिकार्यरूपायांशक्तीनांप्रकृतेरपि ॥ ततोऽस्यामुपचर्यंतेमाहात्म्यंस्याद-तेकचित् ॥ ३६ ॥ उक्तंद्वितीयेध्याये 'तत्सहस्रशत्या.समाहितः ॥ प्रथमाध्यायवृत्ता-न्तस्तट्टीकायांमयसुन'रितितत्रप्रकृतेःप्रथमकार्यत्वंतस्याअपिमायापदाभिधेयत्वंब्रह्मरूपत्वं-तदीयसत्त्वादिगुणयोगात्परस्यविष्ण्वादिनामधारणंचश्रीभागवतेद्विधासमभवद्बृहत् काल-वृत्त्यातुमायायां प्रकृतिर्ब्रह्मोपादानं 'सत्त्वंरजस्तमइतिप्रकृतेर्गुणास्तै'रित्यादौबहुस्थलेषु-विष्णुपुराणादौचसुप्रसिद्धंश्वेताश्वतरमैत्रायणीयादिश्रुतिष्वपितदनुरोधात्तथासिध्यति । दुर्गामूर्तेःप्रकृतिरूपत्वंतु विष्ण्वादीनांसत्त्वाद्युपाधिकानांत्रयाणामेवतेजसःशक्तिरूपस्य-तदाविर्भावार्थंमुख्यतयैकीभावात् । स्पष्टंचेदंसप्तशतीद्वितीयाध्याये (श्लो० ९) 'ततोतिकोपपूर्णस्यचक्रिणोवदनात्ततः ॥ निश्चक्राममहत्तेजोब्रह्मण.शंकरस्यचे'त्यादिसंदर्भे-अतएव 'सर्वस्याद्यामहालक्ष्मीस्त्रिगुणापरमेश्वरी'तिरहस्यादिषुतत्रतत्रतस्यास्त्रैगुण्यंभण्यते। सर्वशक्तिनाभगवताक्रीडार्थंतत्तत्कार्येषुसकलस्वशक्त्यंतरतिरस्करणपुरःसरंपरिच्छिन्नतत्त-त्स्वशक्त्यंशानांस्थापनाद्देवादिशक्तयोपिवस्तुतोभगवच्छक्तयएव। अतएवश्रीभागवतादिषु-विक्लिष्टशक्तिर्बहुधेवभासीत्यादिवचनासि तस्मात्तत्र (श्लो० १०) 'अन्येषांचैवदेवानां-शक्रादीनांशरीरतः । निर्गतंसुमहत्तेजस्तच्चैक्यंसमगच्छते'त्यादिनादेवशक्तीनामपितस्यामे-कीभावस्याख्यानेपिभगवच्छक्तित्वंसुस्थिरं। अतएवतत्रप्रथमाध्याये (श्लो० ४१) 'तन्ना-श्चविस्मय.कार्यायोगनिद्राजगत्पतेः ॥ महामायाहरेश्चैतत्तयासंमोह्यतेजगदि'तितत्र.सुरथे-नतदुद्भवादिप्रकारेपृष्टे (श्लो० ४७) 'नित्यैवसाजगन्मूर्तिस्तयासर्वमिदंतत'मित्यादिना जगत्परिणामिभगवदंशप्रकृतेः सर्वव्यापकभगवच्छक्तेर्नित्यत्वंभगवदिच्छयादुर्गादिरूपेण-तदाविर्भावनंचोक्त्वा (श्लो० ४९) 'योगनिद्रांयदाविष्णु' (श्लो० ५३) निद्रांभगवतीं-विष्णोः (श्लो० ५४) सुधात्वमक्षरेनित्येत्रिधामात्रात्मिकास्थिते'त्यादौभगवच्छक्तित्व-मुक्तंतेन (श्लो० ५६) 'त्वयैतद्धार्यतेसर्वं'मित्यादौत्वयेतिकरणेतृतीयाअतोनुपदं (श्लो० ५७) 'विसृष्टौसृष्टिरूपात्वंस्थितिरूपाचपालने ॥ तथासंहृतिरूपांतेजगतोऽस्यजगन्मय'

स्वाम्यादयः 'यत्राधिकृत्यगायत्री'मित्यादिवचांसिस्वमतस्थभागवतत्वसाधकवयोदाहरंति।
छळकल्पितस्यतदनसरेसरयेतत्र 'सर्वचैतन्यरूपांतामाद्यांविद्यांचधीमहि। बुद्धिंयानः प्रचो-
दयात्' इतिचतुर्विंशत्यक्षरत्रिचरणश्लोकेनारंभादेस्तत्कथंश्रीधरस्वाम्याद्युक्तरचनासिद्धलक्ष-
णस्यस्वग्रंथेसमावेशार्थधीत्यांस्पष्टमेवकृतत्वेन तद्व्याख्यातंकानितादृशवचांसितेकथमिमि-
त्युदाहरेयुः? शंकराचार्यप्रभृतयः प्राचः प्रसिद्धभागवतस्यैववासनाभाष्यादीनिव्याख्याना-
निकथंकुर्युः? देवीभागवतव्याख्यातानीलकंठस्तुनभारतव्याख्याता, किंत्विदानींप्रवर्तमान-
विक्रमशकस्य विंशेशतकेसकथंचित्समयंजीवसेवकाश्यामासीत्। तंचव्याचक्षाणंसाक्षाद्दृष्ट-
वंतोऽद्यापिसंतोबहवोजीवंति। चतुर्धरनीलकंठेनतुभारतप्रदीपेनक्वापिकल्पितपुराणमघो-
व्याख्यात; तदानींतदभावात्। किंतु प्रसिद्धश्रीभागवतस्यतद्व्याख्यातुः श्रीधरस्वामिनश्चानु-
सरणंबहुस्थलेषुकृतं प्रसिद्धश्रीभागवतदशमस्कंधस्थश्रीकृष्णचरित्रेश्रौततांसमर्थयितुंवेद-
मंत्रानुद्धृत्य मंत्रभागवतंचतेनैवकृतं व्याख्यातंचस्वयमेव अपरार्थशिवतत्वविवेकादिषुबहु-
ष्वेवप्राचीनार्वाचीनप्रामाणिकग्रंथेश्रीभागवतस्यैवप्रामाण्यंतदीयतत्तद्वचनोपन्यासादिनानि-
श्चीयतेनतुतात्रकस्य॥ तत्तद्ग्रंथस्थतत्तत्स्थलादिप्रदर्शनपूर्वकम्; अधिकंतुमयाश्रीभागवत-
शंकानिरासवादविवरणउपपादनीयमित्यलमिहमप्रासंगिकेन। अभ्युपेत्यवादेनसमाधिस्तुमूले
'नहिवादिमते'त्यादिनादर्शितः। पद्मपुराणइति। इदमुपलक्षणं। तथाहि—स्कांदेश्रीभाग-
वतमाहात्म्ये 'परीक्षिच्छुकसंवादोयोसौव्यासेनवर्णितः॥ ग्रंथोऽष्टादशसाहस्रः सोऽसौभा-
गवताभिधः॥' पाद्मेभागवतमाहात्म्ये श्रीभागवतकथाश्रवणायागतानांसख्याने (अध्याय
३ श्लो० १५) 'वेदांतानिचवेदाश्चमंत्रास्तंत्राणिसंहिता। दशसप्तपुराणानिषट्शास्त्राणित-
थाययुः।' इतितद्भिन्नानांसप्तदशत्वोक्तिस्तस्यैवाष्टादशांतर्भूतत्वनिश्चायिका। किंचनारदीये-
ब्रह्मादीनांव्यासकृताष्टादशपुराणानांद्वादशस्कंधसारानुक्रमणिकादर्शिता, साचात्रैवसंगच्छ-
तेनतावके। एवमन्यानिमात्स्यादिवचांस्यन्यत्रवक्ष्यामः। मवोस्तुश्रीभागवतप्रामाण्यमत्र-
संदिग्धंरवन् शैवसुधाकरेचदेवीभागवतस्यैवप्रामाण्यंदर्शयन्बहुस्थलेष्वतद्वचांसिशैवसु-
धाकरप्रथमकिरणादौचतच्चतुर्थस्कंधादिवचांसिस्वनुकूलतयाधीत्यांदुदाहरत्नुपादेयवचनः॥
शंकराचार्यैस्तदनुयायिभिर्मधुसूदनसरस्वत्यप्पय्यदीक्षितादिभिश्चस्वीकृतंतत्प्रामाण्यंदूषय-
न्स्वप्रथमश्लोकोक्तरीत्यासप्तकोटिंचस्वयमेवाभिनिविशते। बौद्धादयस्तुनिरीश्वराइतितन्म-
तेसाकारध्येयाभावादत्रश्लोकेनन्वेवमित्यादिशंकातत्समाधानंचश्रीमतां सर्वत्रत्वात्॥

एवंचास्मन्मते "वेदाःश्रीकृष्णवाक्यानिव्याससूत्राणिचैवहि॥
समाधिभाषाव्यासस्यप्रमाणंतच्चतुष्टयं॥ एतद्विरुद्धंयत्सर्वंनतन्मानं-
कथंचन॥" अतएवतद्विरुद्धानितंत्राणिनप्रमाणं। ननुभागवते 'यआशु-
हृदयग्रंथिंनिर्जिहीर्षुःपरात्मनः॥ विधिनोपचरेद्देवंतंत्रोक्तेनसकेशव'-
मित्यादिनातंत्रोक्तार्चायाअपिभागवतोक्तत्वात्कथं तंत्रस्याप्रामाण्य-
मितिचेत्,—भ्रांतोऽसि। नहिवयंसर्वस्यतंत्रस्याप्रामाण्यं ब्रूमः, किंतु-
पूर्वोक्तमानचतुष्टयविरुद्धांशस्य 'विरोधेत्वनपेक्षंस्यादसतिह्यनुमान'

मितिन्यायात् । यत्तु (शुद्धाद्वैतावलंबेनयादृशंहरिपूजनंत्वत्संमतंतादृशंसक्रमंलिखित्वाखंडयिष्यामः) इत्युक्तं,–तत्तुयुक्तमेव; आसुरप्राकृतिकत्वात् । परंतुशुद्धाद्वैतमार्गज्ञानार्थंतन्मार्गविद उपास्यंतां विनाशानंखंडनस्याशक्यत्वात्, भावानवबोधविहितस्यदोषस्यानादरणीयत्वात् ॥ उक्तंचदीधितिकृद्भिः "मान्यान्प्रणम्यविहितांजलिरेपभूयोभूयोविधायविनतिंविनिवेदयामि ॥ दूष्यंवचोममपरंनिपुणंविभाव्यभावावबोधविहितोनदुनोतिदोष"इति । ननुवेदादिषुचतुर्पुयस्यवर्णनंनास्तितद्विरुद्धंचयत्तन्नप्रमाणमित्युक्तं, तत्रवेदादित्रयप्रामाण्येनास्तिविप्रतिपत्तिःभागवतंचेच्छाक्ताअप्रमाणमितिब्रूयुस्तर्हितत्रत्वयाकिंवक्तव्यमितिचेत्तर्ह्यस्माभिस्तेप्रष्टव्याः—किंभागवताप्रामाण्यंभवद्भिःकेनचिद्धेतुनासाध्यते, वा केनचिच्छब्दरूपप्रमाणेनाध्यवसीयते, वाज्ञामात्रेणवा? नाद्यः; तादृशहेतोस्तैस्त्वयावाऽनुक्तत्वात् । किंचपरार्थानुमानस्यउचितानुपूर्वीकप्रतिज्ञादिपंचकसमुदायरूपन्यायप्रयोगाधीनत्वान्नप्रतिज्ञामात्रेणसाध्यसिद्धिः; अन्यथासर्वप्रमाणानामप्रामाण्यंस्यात् । नापिद्वितीयः; त्वत्संमतेषुप्रमाणेषुवेदादिषुभागवतमप्रमाणमितिनादस्यानुपलब्धेः, तृतीयोपिन, वादिनःपरंप्रत्यनाप्तत्वेनतद्वाक्यस्याप्रमाणत्वात् एवंच 'वैष्णवंनारदीयंचतथाभागवतंशुभं ॥ गारुडंचतथापाद्मंवाराहंशुभदर्शने ॥ एतानिपुराणानिसात्त्विकानिमतानिमे'इतिपद्मपुराणवाक्याद्भागवतस्यसात्त्विकत्वनिश्चयाद्विष्णोश्चसत्त्वमूर्तित्वाद्विष्णुभागवतमेवाष्टादशपुराणांतर्गतंव्यासकृतंचेत्यध्यवसीयते ॥ वैष्णवपुराणसाहचर्याच्चभागवतंवैष्णवमेवतत्रगणितं, नदेवीभागवतं, साहचर्यस्याभिधानियामकत्वात् । उक्तंच'संयोगोविप्रयोगश्चसाहचर्यंविरोधिते'त्यादिनासाहचर्यस्याभिधानियामकत्वं अतएवरामलक्ष्मणावित्यत्रनपरशुरामस्यबलदेवस्यग्रहणंकिंतुदाशरथेरेव ॥ एतेन (तत्रविशिष्यनामनास्तिदेवीभागवतस्यतत्रांतर्भावेणसंदिग्धंचतस्यप्रामाण्यमित्यादि) प्रलपन्कर्मंदिवेषोऽपास्तः ॥ स्वगुरुवाक्यमित्यादिप्रलापस्त्वस्मदभिप्रायमबुध्वैव ॥ यत्तुनन्वित्यादिना'पुराणन्यायमीमांसाधर्मशास्त्रांगमिश्रिता'इतियाज्ञवल्क्यमवताय्येतत्रन्यायपदेनतर्कशास्त्रग्रहणंवाच्यं । तत्रचपरमाणुकारणवादादिवेदविरुद्धंदृश्यतइत्याद्युक्तं,–तदप्यविचारविजृंभितमेव, तत्रन्यायपदस्यपंचावयववाक्यपरत्वात् अतएव 'सत्पक्षप्रसरःसतांपरिमलप्रोद्बोधबद्धोत्सवोविम्लानोनविमर्दनेमृतरसप्रस्यंदमाध्वीक-

मितिसृष्ट्यादिशक्तितांवक्ति जगन्मयेहरौ अन्यथादित्वान्क्षीप्स्यात् । ततः (श्लो० ५९) 'प्रकृतिस्त्वंचसर्वस्यगुणत्रयविभाविनी'तिप्रकृतित्वमुक्त्वा (श्लो० ६२) 'यच्चकिंचित्क्वचिद्वस्तुसदसद्वाऽखिलात्मके ॥ तस्यसर्वस्ययाशक्तिःसात्वंकिंस्तूयसेतदे'तिपुनःशक्तितामुक्त्वा 'विष्णु शरीरग्रहण'मितिप्रकृतिगुणोपाधिकत्वाभिप्रायेणवर्णयित्वानारायणवपुषोबहिर्भूतायायद्दर्शनंनिरूपितंतत्समुद्रशायिनस्तस्मात्तन्महिमवर्धनेच्छयातयाकारितत्वस्वदानींतस्याउद्भवरूपं अतएवऋग्वेदे (अष्टक ८ अध्याय ७ व० ११ ऋ० ५) "अहमेवस्वयमिदंवदामिजुष्टंदेवेभिरुतमानुषेभिः । यंकामयेतंतमुग्रंकृणोमितंब्रह्माणंतमृषिंतंसुमेधां" इतिरुद्रादिनिर्माणमुक्त्वानाभिपद्मजस्यब्रह्मण कथंरत्रयानिर्माणमित्याकांक्षायांनारायणशक्तित्वतद्भिरुयामयैवसप्रसूतोममकारणंचहरिरेवेतिदेव्योच्यते "अहंसुवेपितरमस्यमूर्द्धन्ममयोनिरप्स्वंत.समुद्रे" इति अत्रास्येतिउग्र शिवःपरामृश्यते "अहंरुद्रायधनुरातनोमी" तिवाक्यांतराचेत्यन्यदेतत् तस्याभगवच्छक्तित्वंतुतत्रपंचमाध्याये (श्लो० ६) 'विष्णुमायांप्रतुष्टुवुः (श्लो० १२) विष्णुमायेतिशब्दिता एकादशाध्याये (श्लो० ४) त्वंवैष्णवीशक्तिरनंतवीर्या एवमादावन्येऽतिमेव ॥ एवंदुर्गायाभगवच्छक्तित्वंतदाज्ञयाविर्भावादिकंचनारदपंचरात्रेप्रथमरात्रेद्वादशाध्याये पार्वत्यैवोच्यते (श्लो० ५७) 'तवाज्ञयाचदेवानामाविर्भूताचतेजसि ॥ निहत्यदैत्यान् देवारीन्दत्वाराज्यंसुरायच ॥ ५७ ॥ तत्पश्चाद्दक्षकन्याहमधुनापार्वतीहरे ॥ तवाज्ञयाहरक्रोडेत्वद्भक्ताप्रतिजन्मनि ॥ ५८ ॥ नारायणप्रियाशश्वत्तेननारायणीश्रुतौ ॥ विष्णोरहंपराशक्तिर्विष्णुमायाचवैष्णवी ॥ ५९ ॥ अनन्तकोटिब्रह्मांडमयासम्मोहितंसदा ॥ विदुषांरसनाग्रेचप्रत्यक्षंहिसरस्वती ॥ ६० ॥ महाविष्णोश्चमाताहंविश्वानियस्यलोमसु ॥ रासेश्वरीचसर्वाद्यासर्वशक्तिस्वरूपिणी'ति । एतेनमार्कंडेयपुराणोक्तंप्रायःसर्वमप्यनुसहितं । अतोभगवच्छक्तित्वात्तद्रूपविशेषत्वाच्चदेवीतुमान्यैवकिंतुवेदतदनुकूलबहुतरशास्त्रविरुद्धं शाक्तमतमेवमुमुक्षुभिरुपेक्षणीयं पंचमकारादितत्साधनेषुवेदविरोधस्यसुबोधत्वात्। विस्तरस्तु निबंधग्रहस्तादिपुमभचंद्रोदयादौचावधेयः। यच्चव्यासानामित्यादिश्लोकद्वयंतं तत्रउक्तपूर्वादिभिर्मार्कण्डेयादिवचनैस्तस्या. प्रकृतित्वेत्रिगुणात्मकत्वेसिद्धेतादृशप्रकृतेः कारणत्वेव्यासैरभ्युदस्ततस्यास्तथात्वमर्थादपास्तं ॥ किंचव्यासैस्तदभिप्रेतब्रह्मणउपादानत्वमात्रंतस्ताएवस्वातंत्र्येणनिमित्तत्वंचनसमर्थितं। किंतु "जन्माद्यस्य प्रकृतिश्चप्रतिज्ञा" इत्याद्यधिकरणेषुब्रह्मणएवोपादानत्वंनिमित्तत्वंचसमर्थितमित्यर्थसिद्धंतन्मतदूषणं यच्चयदित्वित्यादि साकारेतीत्यंतं,–तत्तुच्छ, शाक्तैर्निर्विशेषचितेरुपाधिवादस्यचानंगीकारात् उपादानत्वमेवतैस्तस्यानोच्यते । क्वचिद्विवर्तोपादानत्वकथामुक्तिश्चतेषांश्रीनगरावाहयादिरूपावांतरमतभेदाद्विविधाऽन्यथैवातस्तन्मततत्त्वाज्ञानमूलकमकांडतांडवमेतत् ॥ विष्ण्वादिरूपाणिचशुद्धब्रह्मणएवलीलावतारा लीलयातत्प्रकृतिगुणयोगवंतोनतुत्वद्रीत्यानिर्विशेषचितेराकारप्रत्यायकमिथ्योपाधिभूतानितानि ॥ उपाधेर्नित्यत्वेमिथ्यात्वानुपपत्त्याऽद्वैतस्यसदेवेत्यादिश्रुतीनांचबाधः । तदनित्यत्वेकल्पकांतराभावादनुपहितचैतन्यस्यैवकल्पकत्वापत्त्यानिर्विशेषत्वभंग । विष्ण्वादीनांजीवतौल्यं जीववत्तेषामुपाधिध्वंसकसाधनानामश्रवणात् तेषामनिर्मोक्षाज्जीवतआधम्यंचप्रसज्येत ॥ निर्मोक्षेपुन सर्गाद्यसंभवो-

न्यथापुन.पुनर्निर्व्यंतरादिकल्पना ॥ सच्चित्यतावोधकश्रुत्यादिविरोधोजीवस्य "नंजायते-म्रियतेवा"। (अ० २ पा० ३ सू० १७) "नात्माऽश्रुतेः" इत्यादिपुसिद्धेनित्यत्वेपि-तेषामनित्यत्वादाधर्म्यंचतद्वस्थमितिदिक् ॥ तत्त्वमसीत्यादिवाक्यार्थज्ञानादेवमुक्तिरितितु-श्रीमदाचार्यचरणैः श्रीपुरुषोत्तमचरणैश्चसग्रतत्रविस्तरतोनिरस्तं ॥ उपाधियोगाच्चितेः साकृतित्वघटनातुविस्तराच्चिराकृताप्राक् ॥ अतोब्रह्मणोवस्तुतः साकारत्वात्तद्ध्यानतोध्ये-यंतदेवशास्त्रतत्परागच्छतीत्येतावत्तुसंमतं ॥ दुर्वास कृतस्यललितास्तवरत्नस्वशाक्तैरत्याद-रात्तग्रस्यस "पवनमधिपानकमयिक्षोणीमभिगगनमयिकूपीटमयि ॥ रविमयिशशिमयि-दिङ्मयिसमयमयि प्राणमयिशिवेपाहि" इतिसार्वात्म्यबोधकवाक्यस्य शंकराचार्यकृत-सुंदरलहर्यामपितथात्वात्तैस्तस्यान्याख्यानाच्च तत्रत्यस्य "मरुत्त्वं व्योमत्वं मरुदसिमरत्सा-रथिरसिरवमापस्त्वंभूमिस्त्वयिपरिणतायांनहिपरं ॥ त्वमेवस्वात्मानंपरिणमयितुंविश्वव-पुषाचिदानंदाकारं शिवयुवतिभावेनविभृषे" इतिपरिणामबोधकवाक्यस्यचकेवलनिमित्त-त्वादेविरोधतोहानिः स्फुटैव। शंकराचार्या. पण्मतप्रवर्तकदक्षिणमार्गस्तत्संमतएवात-एवतदनुकूलस्तोत्रनिर्मितंतदितिप्रसिद्धेश्च, तेनपरत्वित्यादिनिरस्तं। यच्चविष्णुभागवतमि-त्यादिश्रुत्युक्तोज्ञानरूपत्वात् तदेवउपहासास्पदं भागवतंमहापुराणेष्वष्टादशसुपंचमंदेवी-पुराणंचोपपुराणविशेषइतिवैदिका., एतद्विपरीतंशाक्ताः । वादेवीजतु 'प्रणिपत्यशिवां-देवींशिवंभागवतंतथा ॥ पुराणंसप्रवक्ष्यामी'तिदेवीपुराणस्थंवाक्य तत्रभागवतमिति-पुराणविशेषणंशाक्तामन्यंते, शिवविशेषणंतुवैष्णवाः, अतस्तयोर्महापुराणोपपुराणभाव-एतमादोनतुअन्यतरंनव्यासकृतमितिमाक्तन. कोपिवैदिकोवाशाक्तोवाप्रामाणिकोऽस्तिति। उभयप्रामाण्यस्वीकारादेवास्माकंधर्मशास्त्रनिबंधेषुहेमाद्रिकृत्यकल्पतरुनिर्णयसिंध्वादिषु उभयवचनानिसंगृह्यंते । शाक्तग्रंथेष्वपिश्रीभागवतदशमस्कंधजन्मप्रकरणस्थानि 'गच्छ-देविव्रजंभद्रे दुर्गेतिभद्रकाली'तिएवमादिवाक्यानि (अ० २९ श्लो० १) 'योगमाया-मुपाश्रित' (अ० ३४ श्लो० २) 'आनर्चुरर्हणैर्भक्त्यादेवींचनृपतेंबिका' (अ० ५६ श्लो० ३५ । ३६) 'उपतस्थुर्महामायांदुर्गांकृष्णोपलब्धये ॥ तेषांतुदेव्युपस्थाना-त्प्रत्यादिष्टाशिषासच । प्रादुर्बभूवसिद्धार्थं सदारोहर्षयन्हरिः ॥' इत्यादीनिस्थलांतरवाक्या-निचमानतयोपन्यस्यन्ते । महापुराणत्वाग्रहोपिदेवीपुराणविषयकएव । देवीभागवतं-त्वतितरामर्वाचीनतम अतएवनास्माकंनापिशाक्तानांप्राचामाचारादिबोधकग्रंथेषुवाचित्त-इचनमस्ति । देवीभागवतंत्विदानींवर्तमानविक्रमशकस्यैकोनविंशेशतकेकेनचित्ससशास्त्या-गुप्तवत्याख्यां व्याख्यांविहितवताभास्कररायाख्येनकाश्यांगुप्ततयानिर्मातुमारब्धं, तदस-माप्यैव स्वशरीरंसमापितवान्। तत काशीनाथभट्टइतिप्रसिद्धेनतन्मित्रेणावशिष्टतद्ग्रंथ-भागमतिनिर्मायनिर्मायतामनाश्रयता तेननारायणभट्टत्रंश्याना काश्यामग्रपूजामाभुवताप्राये-णदिवाकरभट्टशर्मणाहस्तेतत्पुस्तकशोधनार्थं बहुशोधनार्थापंणपुर.सरमर्पितं । तैश्चयथा-समत्वंपरिशोधितं। तान्येवभास्करादिकरलिखितपत्रकाणितत्रसति। अतएवप्राक्तनप्रबंधे-पुनकाप्येकमपिदेवीभागवतवचनमुपलभ्यते। किंतुकृत्यकल्पतर्वादौकच्चिद्देवीपुराणस्यैवव-चनानि ॥ पूर्वेषामुक्तविधविवादाप्यासितेगायत्र्यासमारंभवृत्रासुरवधाद्यभावादेवश्रीधर-

भूः ॥ ईशस्यैवनिवेदितः पदयुगेभृंगायमाणभ्रमच्चेतोमेरमयत्त्वविभ्रम-
नघन्यायप्रसूनांजलि'रितिन्यायकुसुमांजलिश्लोकव्याख्यायांपंपोऽन-
घोन्यायः समस्तरूपोपपन्नलिंगप्रतिपादकवाक्यंसएवकुसुमांजलिरि-
त्युक्तंसंगच्छते, नतुपरमाणुकारणवादादिन्यायपदप्रतिपाद्यं ॥
अन्यथातस्यधर्मस्थानत्वात्तत्खंडनमनुचितंस्यात् अतएव 'न्यायचर्चे-
यमीशस्यमननव्यपदेशभाक् ॥ उपासनैवक्रियतेश्रवणानंतरागता'-
इत्याद्यपितत्रैवोक्तं । यत्तु किं चेत्यादिनाप्रतिपादितं (पुराणांतरस्य-
भागवताज्जघन्यत्वेत्वद्वीयैर्विष्णोर्नैवेद्यंनभुज्येत 'अपिदीपावलोकंमे-
नोपयुंज्यान्निवेदितमितिभागवतेतन्निषेधात्),—तदपिनसाधीयः,
तस्यत्वेवमर्थः—दीपावलोकमपिनिवेदितंमेपूजायांनोपयुंज्यात्निवे-
दितंपुनर्ननिवेदयेदित्यर्थः, नतुस्वयंनोपयुंज्यादित्यर्थः; तत्प्रतिपादक-
बहुतरग्रन्थसत्त्वात् अतएव 'त्वयोपभुक्तस्रग्गंधवासोलंकारचर्चि-
ताः॥ उच्छिष्टभोजिनोदासास्तवमायांजयेमही'त्यपितत्रैवोक्तं॥ अन्यथा-
भक्तानांतादृशवचनंकथंस्यात् ? नैवेद्यप्रशंसापिसर्वत्रप्रतिपादिता-
संगताभवति ॥ नच 'उच्छिष्टभोजिनोदासा'इत्यस्यलिङादिशून्य-
त्वात् लिङ्विधेयाभ्यांसहितेनतेनविरोधान्नविधिस्तेनकल्पयितुंशक्यत-
इतिवाच्यं, पूर्वोक्तार्थेनविरोधाभावात् नचतादृशार्थेपूर्वमित्यध्या-
हार्यमन्यस्यैवेतिगौरवं पूर्वंनिवेदितस्यहरयेनिवेदनप्राप्त्यभावश्चेति-
वाच्यं; त्वत्कल्पितेर्थेपिस्वयमित्यध्याहारस्यकल्पनीयत्वात् परस्मैपद-
मपित्वदुक्तार्थेबाधकं प्राप्तिश्चविष्वक्सेनोच्छिष्टगणपतिदृष्टांतेनाश्रय-
द्रव्याभावेनवास्त्येव ॥ नचैवंविष्णोर्निवेदननिषेधेपितदुपभोगेबा-
धकाभावेनत्वयान्यनिवेदितंभुज्येतेतिवाच्यं, अनन्यभक्तानामन्य-
ध्यानस्यान्यपूजनस्यान्यकथालापादीनांनिषेधेनान्यनिवेदितभोजन-
स्यसुतरांदूषितत्वात् दीपावलोकमपीत्यादिनादीपावलोकेनानुज्ञा-
किंतुदीपावलोकस्यतैजसत्वादन्यत्रतदुपयोगस्यागर्हितत्वेपिअन्नेनत-
दुपयोगः ॥ "यद्वैमनुरब्रवीत्तद्भेषज" मितिश्रुत्यामनुस्मृतेरपिप्रामा-
ण्यमस्त्येव, वेदमूलकत्वाद्वेदापेक्षयाजघन्य त्वतुसर्वत्रप्रसिद्धमेव ॥
एतेनआस्तांतावदित्यादिदत्तोत्तरं ॥ यदुक्तं अस्माकंशास्त्रमात्रेपक्ष-
पातोनान्यत्रेति,—तदप्यसत्यमेव। यदिशास्त्रमात्रेपक्षपातस्तदाशास्त्र-
विरुद्धराजसेवादिखडनमंडनादिकंचकिमर्थमाचरितं ? गालिप्रदानं-
शिष्टगर्हितमितिनिश्चितंचेच्छलत्वादिकंग्रंथादावेवकथंनिबद्धमित्यपि
विचारणीयं ॥

सहस्राक्षेएतेनेत्यादिपक्षपातोनान्यग्रेत्यंतंभागंखंडयति – एवंचास्मन्मतत्यादिना विचारणीयमित्यंतेन । अयंभावः–अस्मद्रूथाश्रिवंधादीननालोच्यैवायंप्रलापः । निबंधेहि-श्रीमदाचार्यचरणाः 'वेदाः श्रीकृष्णवाक्यानिव्याससूत्राणिचैवहि । समाधिभाषाव्या-सस्यप्रमाणंतच्चतुष्टयं । उत्तरंपूर्वसंदेहवारकंपरिकीर्तितं । अविरुद्धंतुयत्वस्यप्रमाणंतच्च-नान्यथा । एतद्विरुद्धंयत्सर्वंनतन्मानंकथंचने'तिसाधकदशायांप्रमाणमुक्त्वासिद्धदशायां-सर्वस्यापिवाक्यजातस्यप्रामाण्यमुपपाद्य महावादेप्रागुक्तमेवमुख्यं प्रमाणं । धर्मेतु-श्रुतिर्मन्वादिस्मृतिश्चोभयमपिप्रमाणमेवेत्याहुः – द्वापरादौतुधर्मस्यद्विपरत्वाद्वयंप्रमेत्या-दिना । अत्रप्रथमकारिकायां चकाराभ्यामिनिसूत्राणिउत्तरंपूर्वमित्यत्रपूर्वस्मिन्पूर्वस्मिन् जीवानांसंदेहसंभवेउत्तरोत्तरस्यातद्वारकत्वमेव । चतुर्णामाविर्भावेतेनक्रमेणाविर्भावेचहेतु-तयोक्तं, ननुपूर्वपूर्वस्यजघन्यत्वगंधोपि संदेहवारकत्वमात्रोक्त्यातस्यापादनेरनर्ह्रीत्यात्वदा-चार्यग्रंथानां उपनिषत्सूत्रादिसंदेहवारकत्वादुपनिषदादिषु त्वदाचार्यग्रंथतोजघन्यत्व-योच्येत । अतउत्तरोत्तरेणसंदेहनिवृत्तौ तच्चतुष्टयमेकवाक्यतापन्नंप्रमाणं निगदमात्रा-त्संख्यालाभेप्यतएवपुनस्तच्चतुष्टयमितिप्रमाणमित्येकवचनंचोक्तं ॥ इतिहेतुमन्निरूपवद्वत्यादि-

एतेन 'तन्त्रशास्त्रेणचेद्रूपेतदवैदिकसमतम्' इत्युक्त्वा 'वेदाःश्रीकृष्णवाक्यानिव्यास-सूत्राणिचैवहि । समाधिभाषाव्यासस्यप्रमाणंतच्चतुष्टयम् । एतद्विरुद्धंयत्सर्वंतन्मानंनकथंचन' इतिश्रीमन्निजाचार्यैरुक्तंतन्त्राणिनप्रमा श्रीमदाचार्यचरणैरतएवनिरूपितम् । 'शाक्तास्तांश्चेत्त-तं ब्रूयुस्तेसन्मार्गाद्बहिष्कृताः । इतिराबैधुमार्गेषुदोषाःसन्तिततोहरिम् । शुद्धाद्वैतावलम्बेन-भजेतसुविनिश्चितम्' इतिप्रत्युक्तम् ॥ श्रीमद्भागवते एकादशस्कंधे 'यआशुहृदयग्रन्थिनिर्जि-हीर्षुःपरात्मनः । विधिनोपचरेद्देवंतन्त्रोक्तेनचकेशव'मित्यादिना तन्त्रानुसारेणार्चाया विहित-त्वाच्च ॥ 'शुद्धाद्वैतावलम्बेनयादृशंहरिपूजनं । त्वत्सम्मतं तादृशं लिखित्वा सक्रमं खण्डयिष्या-मोऽनुपदम् ॥ किञ्च वेदादिषु चतुर्षु यस्य वर्णन नास्ति तद्विरुद्धंच यत्तद्दोषवदिति ते संमतम् ॥ तत्र वेदादिप्रामाण्यमुभयसंमतं ॥ भागवतंचेत्तेऽप्रमाणंब्रूयुस्तर्हि तत्र त्वं किंब्रूयाः ? ॥ स्वगुरुवाक्यमितिचेत्–न; स्वगोष्ठीमात्रे विश्वास्यत्वात् ॥ अन्यथा तेऽपि भागवतमप्रमाणं तन्त्रंप्रमाणमिति कंचित्स्वगुरुं कृत्वाऽपि तद्वाक्यंनब्रूयुः ॥ ननु 'पुराणन्यायमीमांसाधर्मशास्त्राङ्ग-मिश्रिताः' इत्यत्रैव भागवतप्रामाण्ये प्रमाणमितिचेत्–तन्न मीमांसायाअतिरिक्ततयोपात्त-त्वेन न्यायपदेन तर्कशास्त्रग्रहणंवाच्यं; तन्नच परमाणुवादादि वेदविरुद्धंदृश्यते । तद्वत् पुराणमपि कस्मिंश्चिदंशे प्रमाणं वेदविरुद्धांशेऽप्रमाणमितिचेत्स्यात्तर्हितादृशभागवतांशविरुद्ध-चेदन्यत्र व्यासादिभिः सर्वज्ञैरिदानींतनैरदृश्यमानवेदमूलकंप्रोक्तं स्यात्तत्कथमप्रमाणं त्वद्गुरु-वाक्येनोच्यते ? ॥ किञ्च विष्णुभागवतस्य तत्र विशिष्यनामनास्ति ॥ पुराणेष्वन्तर्भावेन-प्रामाण्यं कौर्मादिभिःसमम् ॥ देवीभागवतस्य तत्रान्तर्भावेण संदिग्धंच ॥ किञ्च पुराणान्त-रस्य भागवताज्जघन्यत्वेत्वदीयैर्विष्णोर्नैवेद्यं नभुज्येत ॥ अपिदीपावलोकमेनोपयुञ्ज्याञ्चि-चेदितमि'ति भागवते तन्निषेधात् ॥ प्रकरणान्तरेऽपि तद्विधिर्नोपलभ्यते । यतोविकल्पादि-कल्पनाऽवतरेत् ॥ 'निवेदितंतद्भक्तायदद्याद्भुञ्जीतवास्वय'मितितु विकल्पः ॥ किञ्च नैवेद्य-प्रतिपत्तिरियंभक्तालाभे स्वयमिति ॥ वाशब्दोऽनास्थायाम् ॥ एवंच भक्तः सात्वतः ॥

सहस्राक्षेएतेनेत्यादिपक्षपातोनान्यथेत्यंतंभागंखंडयंति – एवंचास्मन्मतत्यादिना विचारणीयमित्यंतेन । अयंभाव –असद्ग्रंथान्निबधादीननालोच्यैवायंमलाप. । निबंधेहि-श्रीमदाचार्यचरणा 'वेदा. श्रीकृष्णवाक्यानिव्याससूत्राणिचैवहि । समाधिभाषाव्या-सस्यप्रमाणंतच्चतुष्टय । उत्तरपूर्वसंदेहवारकंपरिकीर्तितं । अविरुद्धंतुयत्त्वस्यप्रमाणंतच-नान्यथा । एतद्विरुद्धंयत्सर्वंनतन्मानंकथंचने'तिसाधनदशायांप्रमाणमुक्त्वासिद्धदशायां-सर्वस्यापिवाक्यजातस्यप्रामाण्यमुपपाद्य ब्रह्मवादेभागुक्तमेवमुख्यं प्रमाणं । धर्मेतु-श्रुतिर्मन्वादिस्मृतिश्चोभयमपिप्रमाणमेवेत्याहु.–द्वापरादौतुधर्मस्यद्विपरत्वाद्वयंप्रमेत्या-दिना । अत्रप्रथमकारिकायां चकाराद्भागमिनिसूत्राणिउत्तरपूर्वमित्यत्रपूर्वस्मिन्पूर्वस्मिन् जीवानांसदेहसंभवेउत्तरोत्तरस्यातद्वारकत्वमेव । चतुर्णामाविर्भावेतेनक्रमेणाविर्भावेचहेतु-त्वयोक्त, ननुपूर्वपूर्वस्य नन्वन्यत्वगाधोपि सदेहवारकत्वमात्रोक्त्यातथ्यापादनेतत्तद्वीत्यात्वदा-चार्यप्रधाना उपनिषत्सूत्रादिसदेहवारकत्वाद्रुपनिषदादिषु त्वदाचार्यप्रभृतोजघन्यत्व-योच्येत । अतउत्तरोत्तरेणसदेहनिवृत्तौ तच्चतुष्टयमेकवाक्यतापन्नप्रमाण निगदमात्रा-त्सख्यालाभेप्यतएवपुनस्तच्चतुष्टयमितिप्रमाणमित्येकवचनंचोक्त ॥ इतिहेतुमद्दुक्तवद्वत्यादि-

---

एतेन 'तन्त्रशास्त्रेणचेद्रूपेतद्वैदिकसमतम्' इत्युक्त्वा 'वेदा श्रीकृष्णवाक्यानिव्यास-सूत्राणिचैवहि । समाधिभाषाव्यासस्यप्रमाणंतच्चतुष्टयम् । एतद्विरुद्धयत्सर्वंतन्मानंनकथचन' इतिश्रीमन्निजाचार्यैरुक्तंतन्त्राणिनप्रमा श्रीमदाचार्यचरणैरतएवनिरूपितम् । 'शाक्तास्ताश्चेत्त-तन्त्रबूयुस्तेसन्मार्गाद्बहिष्कृता । इतिसर्वेषुमार्गेषुदापा सन्तिततोहरिम् । शुद्धाद्वैतात्स्वलम्बेन-भजेतप्रविनिश्चितम्' इतिप्रत्युक्तम् ॥ श्रीमद्भागवते एकादशस्कन्धे 'यआशुहृदयग्रन्थिनिर्जि-हीर्षु परात्मन । विधिनोपचरेद्देवतन्त्रोक्तेनचकेशव'मित्यादिना तन्त्रानुसारेणार्चाया विहित-त्वाच्च ॥ 'शुद्धाद्वैतावलम्बेनयादृशहरिपूजन । त्वत्समत तादृश लिखित्वा सकम खण्डयिष्या-मोऽनुपदम् ॥ किञ्च वेदादिषु चतुर्षु यस्य वर्णन नास्ति तद्विरुद्धच यत्तद्दोषवदिति ते समतम् ॥ तत्र वेदादिप्रामाण्यमुभयसमतं ॥ भागवतचेत्तेऽप्रमाणब्रूयुस्तर्हि तत्र त्व किंब्रूया ? ॥ स्वगुरुवाक्यमितिचेत्–न, स्वगोष्ठीमात्रे विश्वास्यत्वात् ॥ अन्यथा तेऽपि भागवतमप्रमाण तच्चप्रमाणमिति कंचित्स्वगुरुकृत्वाऽपि तद्वाक्येनब्रूयुः ॥ ननु 'पुराणन्यायमीमांसाधर्मशास्त्राङ्ग-मिश्रिता.' इत्यादेव भागवतप्रामाण्ये प्रमाणमितिचेत्–तत्र मीमासायाअतिरिक्ततयोपात्त-त्वेन न्यायपदेन तर्कशास्त्रग्रहणंवाच्यं, तत्रच परमाणुवादादि वेदविरुद्धदृश्यते । तदिव पुराणमपि कस्मिंश्चिदंशे प्रमाणं वेदविरुद्धांशेऽप्रमाणमितिचेत्स्यात्तर्हितादृशभागवतांशविरुद्ध चेदन्यत्र व्यासादिभि सर्वज्ञैरिदानींतनैरदृश्यमानवेदमूलत्वंप्रोक्त स्यात्तत्कथमप्रमाण त्वद्गुरु-वाक्येनोच्यते ? ॥ किञ्च विष्णुभागवतस्य तत्र विशिष्यनामनास्ति ॥ पुराणेष्वन्तर्भावेण-प्रामाण्य कौर्मादिभिःसमम् ॥ देवीभागवतस्य तत्रान्तर्भावेण सदिग्धच ॥ किञ्च पुराणा त रस्य भागवतात्वन्यत्वेतदीयैर्विष्णोर्नैवेद्य नभुज्येत ॥ अपिदीपावलोकंमेनोपयुञ्ज्यान्नि-वेदितमि'ति भागवते तन्निषेधात् ॥ प्रकरणान्तरेऽपि तद्विधिर्नोपलभ्यते । यतोविकल्पादि-कल्पनाऽवतरेत् ॥ 'निवेदितंतद्भक्तायदद्याद्भुञ्जीतवास्वय'मितिहु विकल्प ॥ किञ्च नैवेद्य-प्रतिपत्तिरियंभक्तालाभे स्वयमिति ॥ वाशब्दोऽनास्थायाम् ॥ एवच भक्त सात्वतः ॥

वत् ॥ अविरुद्धमित्यत्रएकस्तुरवधारणेद्वितीय.शंकानिरासेचोप्यथ तथाच चतुष्टया-
तिरिक्तस्यसकलपुराणेतिहासादे काव्यवस्येत्याशंकानिरासार्थमिदमुच्यते – यत्तुपुराणादिक
मस्यवेदादिप्रमाणास्याविरुद्धमेवतद्विरुद्धार्थाप्रतिपादकतयैवव्याख्यायमानंतदपिप्रमाण
मेव । अन्यथाकाल्पनिकव्याख्यानप्रदातद्विरुद्धार्थकवयाप्रतीयमानन्तुनप्रमाणमितितदर्थं
एवंचपुराणादिषु औपरिष्टिकप्रतीतिनिपयाणामर्थांतराणामेवानुपादेयत्वंसिध्यतिनतुपुरा
णादीनां ॥ ननुतर्हिशाक्यस्मृत्यादिकमपिकथंचित्प्रसह्यतदविरोधतोव्याख्यायमानंप्रमाण-

---

तथाच 'नैवेद्यप्रतिपत्त्यर्थसात्वतश्चेन्नलभ्यते । ग्रासमात्रसमुद्धृत्यजलेऽग्नौवाविनिक्षिपेत्' इति
पुराणान्तरवचनार्थः सङ्गृहीतः ॥ अतएव ब्राह्मणभोजनादूर्ध्वं 'भुञ्जीततैरनुज्ञात शेषंशेष-
सभाजितै'रित्यत्रशिष्टभोजनं पृथग्विहितम् । नतु नैवेद्यभोजनमेव ॥ अतएवाग्रे त्रयोदश्या-
गृहविगादिबहुविप्रादिभोजनमन्नैवेद्येनैव विहितम् ॥ 'नैवेद्यचातिगुणवद्द्यात्पुरुषतुष्टिदम्'
इति पुरुषतुष्टिदस्यैव नैवेद्यत्वात् ॥ अग्रे 'भुक्तवत्सुचसर्वेषुदीनान्धकृपणेषुच । विष्णोस्तत्प्रीणन-
विद्वान्भुञ्जीतसहबन्धुभि'रित्यत्र तत् दीनादिभोजनोत्तरं भोजनं विष्णो प्रीणनमित्यर्थः ॥
यद्वा तदन्नाद्यं भुञ्जीत ॥ विष्णो प्रीणनमिति क्रियाविशेषणम्, नतु तच्छब्देन नैवेद्यपराम-
र्शोऽस्तिव्यवधानात् ॥ पुरुषतुष्टिदस्य सबन्धुबन्धूदरपूरकत्वासम्भवाच्च ॥ किञ्चेदं सर्वं काम्य-
व्रतप्रकरणस्थमिति ज्योतिष्टोमपशुसमानयोगक्षेमतामावेदयेत् ॥ 'उच्छिष्टभोजिनोदासा'
इत्यादितु लिङ्गादिशून्यमिति लिङ्गभ्यासहितेनानेन विरोधान्नविधिकल्पयितु प्रभवति ॥
एतेन 'यज्ञशिष्टाशिन सन्तोमुच्यन्तेसर्वकिल्बिषै'रित्यपिव्याख्यातम् ॥ गीतायास्तन्मते
भागवतादनुत्कृष्टत्वात् ॥ किञ्चाऽन्ययज्ञभोजनशिष्टाशिन यज्ञभुक्ताशातिरिक्ताशिनइत्यर्थप्रती-
त्यान तेन तत्प्राप्ति ॥ पुराणान्तराणि स्मृतयश्चैतद्विरोधेऽप्रमाणानीतितत्र यदि तद्विधायक
वचन स्यात्तर्हि एतद्विरोधादप्रमाणमेवस्यादिति विशेषपरत्वं तद्बलान्नसम्भवति ॥ श्रुति सूत्रंच
तादृशंनास्त्येव यन्निवेदितोपयोगं निदध्यात् इति वैदिकान्पृष्ट्वा निश्चिनु ॥ यदि काचिच्छ्रुतिः
कस्यां चिच्छाखायामुपलभ्यते तर्हि इत्थंनिश्चिनु ॥ सति समानविषयत्वे विकल्प , विषम-
विषयत्वे यावानंशस्तेनाऽक्षिविहितस्तावानेवग्राह्योनेतर , अन्यथा भागवतवाक्याचारितार्थ्य-
प्रसङ्गात् ॥ नच भागवतवाक्यएव अन्यस्मै निवेदितं दीपावलोकमपि मे नोपयुञ्ज्यादित्यर्थ-
इतिवाच्यम्, अन्यनिवेदितस्य हराद्युपयोगाप्राप्त्या निषेधानर्हत्वात् ॥ विष्णोर्निवेदननिषेधेऽपि
स्वदुपभोगे बाधकाभावेन त्वयाऽन्यनिवेदित भुज्येत ॥ अपिशब्देन दीपावलोकेऽनुज्ञाप्रतीत्या
तत्त्वया विष्णवे उपयोज्येत ॥ किञ्च अन्यस्मैपदाध्याहारे मानमन्वेष्य, तच्च यदिपुराणा-
न्तरादि, तर्हि दुर्बलत्वाच्चभागवतीयस्वारसिकार्थं सकोचयेत् ॥ वेदादिकन्तु नास्तीत्युक्तम् ॥
'दत्त्वाचमनमुच्छेषविष्वक्सेनायकल्पये'दिति भागवतविरुद्धश्चायमर्थ ॥ आस्तातावदेतत् ॥
किञ्चपुराणान्तरस्य 'यद्वैमनुरब्रवीत्तद्भेषज'मितिश्रुत्यादिरनुतमनुस्मृतेश्चजघन्यताया किमा
नम् ? सन्मार्गोद्धृहिष्करणन्तुस्वगुरुवाक्यैस्तैरपित्वाम्प्रसुच्यते तस्माच्छास्त्रगन्धसत्त्वे शास्त्र-
णैववाच्यं ॥ बालिप्रदानन्तुशिष्टगर्हितम् ॥ एव शैवादिमतेष्वपि ऊहनीयम् ॥ अस्माकन्तु
शास्त्रमात्रे पक्षपातोनान्यत्र ॥ ४३ ॥

स्यादत आहुः–एतद्विरुद्धमिति । सर्वं चार्वाकार्हतबौद्धादिनास्तिकदर्शनं आस्तिकदर्शन-
तयाऽप्यगृह्यमाणंकाणादादिकंचकथमपिव्याख्यानच्छेदातोपिगमानंवेदविरोधार्थमेवबुद्धादि-
प्रवृत्तेरसंदिग्धतयाश्रीवेदव्यासखंडिततयेन कणभक्षादिप्रवृत्तेरपितथात्वाग्रसित्याचता-
त्सार्थेवकुत्सातत्पर्याभावनिश्चयात पुराणादिषुतत्रतत्रवेदाद्यनुकूलमिदमितिप्रतिपदंकथ-
नात्तदनुकूलैनवसत्वात्पर्येणभाव्यमप्रतारकत्वस्यतेषुसद्भिरादरणादितिभावः । अतोवेद-
विरुद्धतंत्राण्येवपंचमकारमोक्षसाधनत्वप्रतिपादकान्यप्रमाणानि, तदविरुद्धानितुनारदपंच
रात्रादीनिप्रमाणान्येव । एवमर्थमुक्तकारिकाणामबुध्वापरेणकृतः प्रलापएतावतैवनिरस्तः ।
तथापिवैशद्यार्थंकिंचिदुच्यते–यद्विश्रीमद्भागवतइत्यादिविहितत्वाचेत्यंत,–तन्न; एकाद-
शस्यतृतीयाध्याये (श्लो० ४१) 'कर्मयोगंवदतनः पुरुषोयेनसंस्कृतः ॥ विधूयेहा-
शुकर्माणिनैष्कर्म्यंविंदतेपर'मितिविदेहप्रश्नेआविर्होत्रः (श्लो० ४३) 'कर्माकर्मविकर्मे-
ती'त्यादिना विहितप्रतिषिद्धविहिताकरणानांवेदैकगम्यत्वाद्वेदस्यचेश्वरात्मतयादुर्ज्ञेयत्वा-
द्वत्सूरिमोहंस्वाभाविककर्ममोक्षायालौकिककर्मविधानरूपंस्वाभिप्रेतवेदतात्पर्यंचोक्त्वा
(श्लो० ४५) 'नाचरेद्यस्तुवेदोक्तंस्वयमज्ञोऽजितेंद्रियः ॥ विकर्मणाह्यधर्मेणमृत्योर्मृत्यु-
मुपैतिसः' (श्लो० ४६) 'वेदोक्तमेवकुर्वाणोनिःसंगोर्पितमीश्वरे । नैष्कर्म्यांलभते-
सिद्धिंरोचनार्थाफलश्रुति'रितिवेदोक्तानाचरणेमोक्षाभावरूपंदुष्फलं तांत्रिकासमुच्चित-
वेदोक्तमात्राचरणेनासिद्धिंचवर्णयित्वासर्वजनसाधारणंसर्वसुगमंवक्ति (श्लो० ४७)
'यआशुहृदयग्रंथिंनिर्जिहीर्षु.परात्मनः । विधिनोपचरेद्देवंतंत्रोक्तेनचकेशव' मित्यादिना
तंत्रपरमात्मनोविधिनावेदसिद्धेनकेवलपुष्टिमार्गेण तदशक्तौ तंत्रोक्तविधिनाचउपचरे-
दित्यर्थः ॥ वस्तुतस्तुवैदिकप्रकारेतंत्रोक्तराजोपचारादीनामपिवेदाविरुद्धत्वाद्यथासंभवं-
समुच्चयस्तंत्रोक्तेनचेतिचकारेणबोध्यते तथैवसत्याशुहृदयग्रंथिनिर्वारः । तानिचतंत्राणि
'तंत्रंसात्वतमाचष्टनैष्कर्म्यंकर्मणायत'इत्यादिप्रथमस्कंधादिवच.समतानि नारदपंचरात्रा-
दीनि; अग्रेवर्ण्यमानरीतिककेशवपूजाप्रकारस्यपंचरात्रगौतमतंत्रादिष्वेवदर्शनात् । ननुशा-
क्तादिसंमतानिचतुःषष्टिः; तेषुतदभावात्तेनवेदादिविरुद्धानांतेषामप्रामाण्यकथनेबाधकं-
किमेतावतापादितंभवता ? एकादशेसप्तविंशाध्यायेपिभगवदाराधनक्रियायोगेपृष्टेभग-
वान् (श्लो० ७) 'वैदिकस्तांत्रिकोमिश्रइतिमेत्रिविधोमखः ।' इतित्रैविध्यमुक्त्वापि-
केवलवैदिकेस्त्रैपामनधिकारात्केवलतांत्रिकस्यपरंपरयासाधकत्वेपिसाक्षात्परमफलसाध-
कत्वाभावात् त्रैवर्णिकस्यकेवलंतांत्रिकापरिग्रहं (श्लो० ८) 'यदास्वनिगमेनोक्त'मित्या-
दिनादर्शयन् (श्लो० १०) 'उभयैरपिचस्नान'मिति (श्लो० २६) उभाभ्यांवेदतंत्रा-
भ्यांमह्यंतूभयसिद्धये'इति । उपसंहारेच (श्लो० ४९) 'एवंक्रियायोगपथैः पुमान्वैदि-
कतांत्रिकैः । अर्चन्नुभयतः सिद्धिंमत्तोविंदत्यभीप्सिता'मितिसमुच्चयपक्षमेवमुख्यंमन्यते ।
अविरुद्धानांतंत्रादीनांप्रामाण्यं त्वाचार्यैः स्वीकृतमेव । अतएवनिबंधाद्यप्रकरणे (श्लो० ३)
'भगवच्छास्त्रमाम्नाये'त्यत्र "भगवच्छास्त्रंगीताभागवतंपंचरात्रंच" इतिव्याख्यातं ।
प्रकरणसमाप्तौच 'अर्थोऽयमेवनिखिलैरपिवेदवाक्यैरामायणैः सहितभारतपंचरात्रैः ।
अन्यैश्चशास्त्रवचनैः सहतत्वसूत्रैर्निर्णीयतेसहृदयंहरिणासदैवे'त्युक्तं । सर्वार्थनिर्णयेचसर्व-

प्रामाण्यंविस्तरेणविचारितं । वेदादिविरुद्धानामप्रामाण्यंतुकौर्मेखंडेद्वादशाध्यायेहिमाचलं-
प्रतिदेवीवाक्येषुषोडशाध्यायेदेवदारुवनस्थमुनिप्रसंगेवाग्रोत्तरखंडेगुणत्रयविवरणाध्याये-
ऽन्यत्रचपुरुषपुराणेतिहासादिषुमन्वादिस्मृतिषुचसिद्धमेवविस्तरजिज्ञासुभिर्मेचंद्रोदयेतंत्र-
किरणपुराणेद्रष्टव्यं । पूर्वतंत्रे (अ० १ पा० ३ सू० ३) विरोधेत्वित्यधिकरणेप्ययमेव-
राद्धांतः । शुद्धाद्वैतेत्यादिरनुपदमेवत्यंतस्तुप्रलापएव; सकलस्यास्मत्संमतहरिसेवाविधेस्तेन-
दूषितत्वाभावात् । यदिचपैशाच्यमवलंब्यदूषयिष्यसितर्हिवृद्धरिष्यामः—यच्चवेदेत्यादिनू-
युरित्यंतं । तत्रकिंचवेदेत्याद्युक्तिः अविरुद्धंतुयत्स्यस्येतिकारिकार्थाबोधात् श्रीभागवत-
प्रामाण्यंदेवीभागवतस्वरूपंचदिङ्मात्रेणदर्शितंप्राक् । स्वगुरुवाक्यमित्यादिकं तुवल्गनामात्रं;
तथाकथाया अस्माभिराश्रितत्वाभावात् । यच्चनतुपुराणेत्यादिसंदिग्धंचेत्यंतं,–तत्र;
श्रीभागवतप्रामाण्यं नसामान्यवचनमात्राद्वयंवदामः । किंतूक्तचरविधैर्विशिष्टवचोभि-
रपिस्पष्टंतत् (अ० १ उपोद्घातप्रकरणे श्लो० ३) 'पुराणन्यायमीमांसाधर्मशास्त्रांगमि-
श्रिताः । वेदाःस्थानानिविद्यानांधर्मस्यचचतुर्दशे'तियाज्ञवल्क्यवचनेन्यायपदेन पंचावयवं
वाक्यमितिसमाधिर्मूलेयक्षबलिन्यायमनुसृत्योक्तः; तेनवेदार्थनिश्चयशक्त्यसंभवात् 'आर्षं
धर्मोपदेशंचवेदशास्त्राविरोधिना । यस्तर्केणानुसंधत्तेसधर्मंवेदनेतर'इतिमनुनातर्कावश्य-
कतायाः स्मरणाच्चेदमपिनायुक्तं । वस्तुतस्तु तत्रन्यायपदेननीतिशास्त्रमेवमन्यामहे ।
अतएवतत्रत्यंन्यायशब्दार्थमाहुः सर्वार्थनिर्णये श्रीमदाचार्याः (कारिका ८४)–
'न्यायस्तुनीतिशास्त्रंहितर्कोमीमांसयायुतः ॥ मोहार्थोन्यन्यशास्त्राणिबुद्धेकृण्णेतादिच्छया ।
देवांशैः कल्पितान्येवतदुक्तंसर्वथामृषे'ति तच्च "पुराणन्यायेत्यत्रनीतिशास्त्रमेवन्याय-
शब्देनोच्यते, नतुलोकप्रसिद्धं । यस्तर्केणानुसंधत्तइति । तर्कशब्दोवेदानुकूलतर्कवाचक-
मीमांसापर." इत्यादिनास्वयंव्याचक्षते । नीतिशास्त्रंचलक्षाध्यायंब्रह्मणाकृतंदंडनीत्याख्यं-
अयुताध्यायंशिवेनकृतंवैशालाक्षनामकंपंचसहस्राध्यायमिंद्रेणकृतंबाहुदंतकाख्यं त्रिसहस्रा-
ध्यायंबार्हस्पत्यमेवमादिरूपंबोध्यं । तच्चमहाभारते शांतिपर्वणिराजधर्मेषुएकोनषष्टित-
माध्याये (श्लो० २९) 'ततोध्यायसहस्राणांशतंचक्रेस्वबुद्धिज'मित्यारभ्य, (श्लो० ७४)
'येयैरुपायैर्लोकस्तुनचलेदार्यवर्त्मनः । तत्सर्वंराजशार्दूलनीतिशास्त्रेभिवर्णितं' इत्यंतेन-
आद्यंब्राह्मंसप्रमेयंनिरूप्य (श्लो० ७८) 'दंडेननीयतेचेदंदंडंनयतिवापुनः । दंडनीतिरि-
तिख्यातात्रींल्लोकानभिवर्तते'इतितन्नामनिरुच्य (श्लो० ८०) 'ततस्तांभगवान्नीतिपूर्वंज-
ग्राहशंकर'इत्यादिना (श्लो० ८५) 'अध्यायानांसहस्रेणकाव्यः संक्षेपमब्रवीत् । तच्छास्त्र-
ममितप्रज्ञोयोगाचार्योमहायशा'इत्यंतेनवैशालाक्षादीनितत्रोक्तानि; आग्नेयेन्यायसारंप्रव-
क्ष्यामीतिप्रतिज्ञायनीतिशास्त्रसारस्यैवकथनात् । मत्स्यतृतीयाध्याये मीमांसान्यायविद्याच-
प्रमाणाष्टकसंयुते'त्यष्टप्रमाणयोगलिंगाच्च नाक्षपादप्रणीतंपुराणन्यायेत्यत्रविवक्षितं; परमा-
णुकारणवादेश्वरकेवलनिमित्तत्वनित्यजीवेश्वरभेदादिविरुद्धवादैस्तस्यधर्मस्थानत्वासंभवात् ।
कौर्मेपूर्वखंडे (अ० १२) 'नहिवेदादृतेकिंचिच्छास्त्रंधर्माभिधायकं ।' धर्माभिधायक-
मितिक्वचित्पाठः (अ० १६) 'नवेदबाह्येपुरुषेधर्मलेशोपिशंकर ॥ संगच्छतेमहादेव-
धर्मोवेदाद्विनिर्बभौ' इत्यादिवचनशतेभ्यः 'अंगानिवेदाश्चत्वारोमीमांसान्यायविस्तरः ॥

पुराणंधर्मशास्त्रंचविद्याह्येताश्चतुर्दशे'तिमनुवचनेप्येयमेवसतिविस्तरपदंस्वरसतः संगच्छते।
अन्यथाकाणादाद्यपेक्षयामीमांसयोः धर्मशास्त्रस्यपुराणस्यचविस्तीर्णत्वात्तान्मात्रेतत्वसंग-
च्छेत–"प्रतिपदमनुपदं छन्दोभाषाधर्मोमीमांसान्यायस्तर्कइत्युपांगानी" तिचरणव्यूहेपि-
मीमांसान्यायरूपस्तर्कइत्यर्थः; उपांगानांसंख्यानियमाभावात् संख्याधिक्येविद्याधिक्य-
प्रसक्त्यामनुयाज्ञवल्क्यादिविरोधापातात्। उक्तदिशावेदविरुद्धस्यतस्य "नैपातर्केणमति-
रापनेया" इतिश्रौतनिंदयातर्काप्रतिष्ठानादिसूत्रैः परमाचार्येणखंडिततयाचशिष्टापरिग्रह-
विषयेतस्मिन्वेदोपांगताधर्मस्थानतयोरदशक्यवचनत्वाच्च॥ अन्यथापरिग्रहसूत्रंबाधितार्थ-
स्यात्। अतोनिगमकल्पतरुफलभूतेबहुपुराणैः प्रशस्यमानेश्रीभागवतेवेदविरोधगंधोपि-
नास्त्येव, प्रत्यक्षश्रुतिविरुद्धंतन्निर्णायकानुच्छिन्नगीतासूत्रादिविरुद्धंच यत्तंत्रादिकंदृश्येत
तदपिउच्छिन्नवेदमूलकतयायदिप्रमाणंमन्येथास्तर्हिबौद्धचार्वाकादिशास्त्राण्यपितथासंभाव-
नयाश्रद्धस्व॥ तद्ग्रंथेपुसर्वज्ञश्रीकृष्णप्रसिद्धमहर्षिप्रभृतीनांनामलेखपूर्वकंवैस्तथागतधर्मो-
नुष्ठितउद्दिष्टश्चेत्यादिस्पष्टमेवलिख्यते। यदितुतेषांसाकपोलकल्पनेतिमन्येत, तर्हिप्रत्यक्ष-
विरुद्धतन्त्रादिष्वपितुल्यं॥ यच्चकिंचेत्याद्यनतरेदित्यंतंतदबोधात् भारतांतग्रंथाजनितस्य-
श्रुतिभारतांतव्यासमनस्तोपस्यजनकेश्रीभागवतेमुख्यतयासदेहवारकत्वमेवमूमः; नतुपुरा-
णांतरेष्वप्रामाण्यापादकंचत्वमन्यत्वं येनभगवन्नैवेद्यभक्षणादिकमप्रमाणकंस्यात्। तत्रबहुभिः
श्रौतस्मार्तपौराणवचनैर्भगवन्नैवेद्यस्यावश्यभक्ष्यत्वंतन्निषेधाभासवचसांसमूलानि.सदेहा-
व्यवस्थाचमयासत्सिद्धांतमार्तंडेपंचमाष्टकांतरसप्तमप्रश्नोत्तरेदर्शितेतिसुधीभिः कृपया-
तत्रावलोक्यएतत्कृतकोलाहलस्यकेवलविफलत्वमवधारणीयं। तथापिदिङ्मात्रमत्रोच्यते–
तत्रश्रुतिः महोपनिषदि (पृ० २९७) 'एकएवनारायणआसीत् नब्रह्मानद्यावापृथिवी-
सर्वेदेवाः सर्वेपितरः सर्वेमनुष्याः विष्णुनाशितमश्नंति विष्णुनाऽऽघ्रातंजिघ्रंतिविष्णु-
नापीतंपिबंतिविष्णुनारसितंरसयंतितस्माद्विद्वांसोविष्णूपहृतंभक्षयेयु'रिति। गीतायां
'यत्करोषियदश्नासियज्जुहोषिददासियत्॥ यत्तपस्यसिकौंतेयतत्कुरुष्वमदर्पण'मित्यत्र-
नीयस्याप्यर्पणमुक्तं, तच्च 'तैर्दत्तानप्रदायैभ्य'इतितत्रोक्तन्यायात्सत्वचनशतबलाबा-
शनात्पूर्वमेवसिध्यति आचारप्रकाशभगवत्पूजानिरूपणेब्रह्मांडे (पृ० ३१२) 'पत्रंपुष्पं-
फलंतोयमन्नंपानीयमौषधं। अनिवेद्यनभुंजीतयदाहारायकल्पितम्।' कौर्मेपि–'अतर्प-
यित्वागोविंदंयैर्भुक्तंधर्मवर्जितं। शुनोविष्ठासमंचान्नंनीरंचसुरयासम'मिति॥ दूषणो-
द्धारेचसदाचारचंद्रोदयेचेदमेवोपन्यस्तं (पृ० ३१५) तैत्तिरीयब्राह्मणे (कांड० २
प्रपा० ८ अनुवा०) श्रूयते "केवलाघोभवतिकेवलादी॥ अहमेघःस्तनयन्वर्षन्नसी"-
त्यादि। भगवतएवमेघरूपेणवृष्टिकर्तृत्वात् अग्रे "मदादित्याअधिसर्वेतरंती" तितस्यैव-
सूर्यातपप्रवर्तकत्वाचवृष्ट्यातपाभ्यांतेनैवोत्पादितमन्नंतस्माअनिवेद्यभुजान.केवलंपापरूप-
एवभवतीत्यर्थः.॥ अत्रैव "मामदत्वहमदत्यन्यान् अहरंसदमृतोमदामी"तिश्रावित.
भगवतएवाऽत्रात्तृभावस्तुआचारमाधवप्रथमाध्यायविष्णुपुराणेपिदर्शित.–'विष्णुरत्तातथै-
वान्नंपरिणामश्चवैतथे'ति। सूत्रमपिभक्तिमीमांसायां (अ० २ सू० ६८) "स्वयमर्पितं-
ग्राह्यमविशेषात्" इति अत्रस्वयंपदस्यार्पितपदेनग्राह्यपदेनवान्वयविचारस्तत्राप्यादिभा-

वश्यमाणेदेवद्रष्टव्यः ॥ श्रीभागवतेचनवमस्कंधचतुर्थाध्याये (श्लो० १९) 'मुकुंदलिंगाल-यदर्शनेदृशौतद्भृत्यगात्रस्पर्शेऽङ्गसंगम् । घ्राणंचतत्पादसरोजसौरभेश्रीमत्तुलस्यारसनांतद-र्पिते ॥' अत्ररसनांतदर्पितइतिसदानैवेद्यस्यैवभक्षणमुक्तं । अतएवैतद्व्याख्यायां "तदर्पिते-तस्मैनिवेदितेऽन्नादौ इतिश्रीधरस्वामी । एकादशस्कंधेषष्ठाध्यायउद्धवः (श्लो० ४५) 'शय्यासनाटनस्थानस्नानक्रीडाशनादिषु ॥ कथंत्वांप्रियमात्मानंवयंभक्तास्त्यजेमहि ॥ त्वयो-पभुक्तस्रग्गंधवासोलंकारचर्चिताः ॥ उच्छिष्टभोजिनोदासास्तवमायांजयेमही'तिभगव-दुच्छिष्टभोजनस्यमायाजयसाधनत्वंवक्ति । यत्तुतत्रैवैकादशाध्याये (श्लो० ४०) 'अमा-नित्वमदंभित्वंकृतस्यापरिकीर्तनं ॥ अपिदीपावलोकंमेनोपयुंज्यान्निवेदित'मितिवाक्यमुक्तं (पृ० ३०८) तत्रनैवेद्यभक्षणविचारकारः अपिदीपावलोकमित्यत्रअपिशब्दस्यपूर्वार्द्धेन-संगतिः नैवेद्यपरत्वेपूर्वापरग्रंथविरोधादित्याह । तस्यायमाशयः–कृतस्याप्यपरिकीर्तन-मितियोज्यम् । तेननिवेदितंदीपावलोकमपिनोपयुंज्यात् किमुतान्यदितिकैमुतिकन्यायाश्रय-णात् दीपावलोकमात्रनिषेधइति ॥ विपक्षेपूर्वापरग्रंथविरोधस्तु 'दास्येनात्मनिवेदनं, सर्वलाभोपहरणं, यद्यदिष्टतमंलोकेयच्चातिप्रियमात्मनः । तत्तन्निवेदयेन्मह्यंतदानंत्याय-कल्पते' इतिपूर्वापरवाक्यानामसंगतिरूपः; आत्मनोऽप्यग्राह्यत्वापत्तेः, सर्वलाभोपहरणे-नजीवनासंभवात्, जीवनोपयोगिलाभभिन्नलाभस्यैवार्पणेसर्वंतदुपहरणासिद्धेश्चलोकेष्ट-स्वातिप्रियवस्तुजातयोरपिभगवत्एवनिवेदनीयत्वेनस्वस्यतल्लाभापत्तेश्च । तस्माद्दासभूतै-र्मोक्षप्रतिबंधकमायाजिगीषुभिस्तन्महाप्रसादबुद्ध्याभोक्तव्यमेव । अथैतामपिशब्दयोजनां-क्लिष्टांमन्यमानः श्रीधरस्वामी तु "इहत्वयमन्येनवानिवेदितंनस्वीकुर्यात् ॥ एतच्च-साधारणंस्थावरविषयंरागप्राप्तविषयं वा । भक्त्यातु ग्राह्यमेव ॥ 'पद्भिर्मासोपवासै-स्तुयत्फलंपरिकीर्तितं । विष्णोर्नैवेद्यसिक्थेनपुण्यंतद्भुंजतांकलौ ॥ हृदिरूपंमुखेनामनै-वेद्यमुदरेहरेः ॥ पादोदकंचनिर्माल्यंमस्तकेयस्यसोऽच्युत'इत्यादिवचनेभ्यः । यद्वाअन्यस्मै-निवेदितंमेनोपयुंज्यात् मह्यंननिवेदयेदित्यर्थः ॥ 'विष्णोर्निवेदितान्नेनयष्टव्यंदेवतांतरं । पितृभ्यश्चैवतद्देयंतदानंत्यायकल्पते ॥ पितृशेषंतुयोदद्याद्धरयेपरमात्मने ॥ रेतोधाः पितरस्तस्यभवंतिक्लेशभागिन'इत्यादिवचनेभ्य" इतिव्याचख्यौ । अत्रस्थावरप्रतिमानै-वेद्यभक्षणस्याप्यनेकत्रशास्त्रसदाचारसिद्धत्वात्प्रथमपक्षाऽरुच्यारागप्राप्तविषयंवेतिपक्षांतर-मुक्तं । तदेवसारसंग्रहेस्मृगुसहितायांस्फुटीकृतं–'उपवासव्रतानांचभक्तानांब्रह्मचारिणां । विष्णुतीर्थप्रसादंचस्वीकुर्याद्भक्तियोगतः ॥ रसगंधादिलोभेनस्वीकुर्याद्भक्तिकंटक'इति । अत्रपूर्वार्द्धेहस्तादितिशेषः । तृतीयार्द्धेतु य स्वीकुर्यात्सभक्तिकंटकइत्यर्थः । तथातत्रैवविष्णु-रहस्ये 'मंत्रपूतंहिनैवेद्यंनिषिद्धायददातियः । सिद्धोऽपिपातकीनित्यमारुरुक्षुश्चकिंपुनः ॥' निषिद्धास्तुभक्तिहीननास्तिकचांडालादयः ॥ मंत्रपूत'मित्यनेनाऽमंत्रनिवेदितदानेतुनदोष-इत्यर्थे । पुनस्तत्रैवभारते 'अंत्यजायतुयोदद्याद्विष्णुशेषंहविःस्वयं ॥ निरयंसमहाघोरंरौरवं-प्राप्नुयान्नरः ॥ भगवद्भक्तिहीनस्यनैवेद्यंविषमुच्यते ॥ भगवद्भक्तियुक्तस्य तदेवत्वमृतं-भवेत् ॥' वाराहे 'विष्णूच्छिष्टंनदातव्यं नभक्तायकदाचन । दाताप्रतिग्रहीताचउभौनरक-भागिनौ ॥' अतोनिषेधा भक्तिहीनसाधारणान्नबुद्धिरागमात्रभोजिविषयाः । विधयश्च

तदतिरिक्ताऽऽस्तिकचातुर्वर्णिकविषयाइतिश्रीधराद्यभिमतव्यवस्था । अथमहाप्रसादबुद्धी नांभक्तानांतुरागतोभोजनेपिपापनाशोभवत्येव । 'भक्तयालोभात्कौतुकाद्वाक्षुधासंहामने- पिवा । आकंठंभक्षितंतद्वैपुनातिसकलादघादि'त्यादिवचनेभ्यः । अनयैवाऽरुच्याचश्रीधर- स्वामिना यद्वेत्यादिनाव्याख्यानांतरंकृतं । उचितंचैतत् नारदपंचरात्रे चतुर्थरात्रैकादशा- ध्यायेद्वात्रिंशदपराधनिरूपणे-(श्लो० १५) 'शक्तौगौणोपचारश्च ह्यनिवेदितभक्षणं ॥ विनियुक्तावशिष्टस्यप्रदानंव्यंजनस्यचे'तीतरदेवादि- तत्तत्कालभवानांचफलादीनामनर्पणं । विनियुक्तावशिष्टस्यप्रदानंव्यंजनस्यचे'तीतरदेवादि- विनियुक्तावशिष्टवस्त्वर्पणस्याऽपराधत्वकथनात् । भागवततत्त्वभास्करेतु इदमेवप्रदानंव्यं- जनादिकमितिपाठभेदेनपाठ्यवचनत्वेनचोपन्यस्तं । अथच 'दीपालोकमपिमेनिवेदितं' पुन- र्मेनोपयुंज्यादितिवार्थः; परस्मैपदप्रयोगस्वारस्यात् । प्राप्तिस्तुमूलोक्तयुक्त्याआचारप्रकाशा- दिषुनिवेदितपूर्वस्त्राभरणादीनांपुनःपुनर्निवेदनेपिदोषाभावबोधकवचनदर्शनतोन्नादावपि- तद्व्यायप्रमाद्वा । त्वदभिमतस्तुनैवार्थः; स्वयंपदाभावात् बहुतरविधिवाक्यव्याको- पापाताच्च । अतस्तद्भक्षणस्यविधिरेवनतुनिर्मूलाविकल्पादिकल्पना यत्तनिवेदितंतद्भक्तायने- स्यादिआवेदयेदित्यंतं,-तत्तु अष्टमस्कंधषोडशाध्यायवचसांपयोव्रताख्यव्रतविशेषविषय- कतयाप्रकृतेनुपयोगादुपेक्ष्यं । तथापितद्वचसामन्यथार्थवारणायब्रूमः-तत्रपूजायांप्रक्रांता- यांनैवेद्यसमर्पणांतमेवोक्त्वा (श्लो० ४१) 'निवेदितंतद्भक्तायेत्तिमध्येप्रतिपत्तिमुक्त्वा- ऽनुपदं 'दत्वाचमनमर्चित्वे'त्यादिनाशिष्टः पूजाप्रकारउच्यते । तत्रपूजायाअसमाप्तत्वात- न्मध्येभोजनस्यानौचित्यात्पयोमात्रभक्षणनियमवतः शाल्यन्नादिभोजनस्यायोग्यत्वाच निवेदितंतद्भक्तायदद्यादिति आचमनात्पूर्वमेवहोमसमनंतरदानंविधीयते; अन्यत्राभक्ताय- दानस्यनिषेधात् जलादिप्रक्षेपस्यात्रानभिप्रेतत्वाच्च । अथसर्वथास्वयमभोजनेऽवहेलनमित्य- रुच्यापक्षांतरमुच्यते 'भुंजीतवास्वय'मितिनिवेदितंपयोमात्रमपिपूजादिसमाप्तौस्वश्रेयसेभुं- जीतेत्यर्थः । यदितुविकल्पंहित्वानास्थामिहवाशब्दार्थंकल्पयेथास्तर्हिपरैः 'मरौवामेरौवाभग- वतिसमर्पयंतिवन'इत्यादावित्रसमुच्चयः संनियोगशिष्टानांसहवाप्रवृत्तिरित्यादाविवावधारणं- वातदर्थः शक्योनिरूपयितुं । भगवदुपभुक्तं तेनप्रसादतयादत्तमितिबुद्ध्योपयोज्यमेवेत्या- शयेनपूजासमाप्तावुच्यते (श्लो० ४३) 'कृत्वाशिरसितच्छेषा'मितिअतएवएकादशस्कंधे- पिसप्तविंशाध्याये प्रत्यर्हपूजानिरूपणे (श्लो० ४७) 'इतिशेषांमयादत्तांशिरस्याधाय- सादर'मित्यादिभगवतोक्तं प्रकृतेप्रागुक्तनिवेदितभोजनंब्राह्मभोजनोत्तरमेवनतुपूजामध्ये- इतियोधनायअष्टमस्कंधषोडशाध्याये (श्लो० ४३) 'द्विजवरान्भोजयेद्विप्रान्पायसेनयथो- चितं । भुंजीततैरनुज्ञातः शेषंसेष्टः सभाजितै'रितिकथ्यते । अत्रयथोचितमित्युत्तरत्रा- न्वेति । तेनेष्टैः सकलंनिवेदितंभोक्तव्यं; स्वयंतुनियमानुरोधात्पयोमात्रमितिविवेकः सिध्यति, अतएव (श्लो० ४६) 'पयोभक्षोव्रतमिदंचरेद्विष्णवर्चनादृत'इतिपयसएवभक्षण- मुक्तं इहैकपदमवधारणं महाभाष्ये "सिद्धेशब्दार्थसंबंधे" इतिवार्तिकविवरणे "अब्भ- क्षोवायुभक्षः" इत्यादाविवज्ञेयं । अग्रेत्रयोदश्यांमहतींपूजांनिरूपयन् (श्लो० ५२) 'नैवेद्यंचातिगुणवद्दद्यात्पुरुषतुष्टिद'मितिवक्ति । अत्रपुरुषस्यभगवतस्तुष्टिदंपुराणादिषुतत्तो- पकतयोक्तमेवदद्यान्नतुमांसादिकमित्यर्थः । 'हरिर्हिनिर्गुणः साक्षात्पुरुषः प्रकृतेः परः ।

पुरुषपुरुषसूक्तेनेएवमादिषुभगवदर्थकताप्रसिद्धे ॥ अतोनततोबध्यादिवहूदरपूर्णत्वानुपपत्ति, तस्मात् (श्लो० ५६) 'भुक्तवत्सुचसर्वेषुदीनाधकृपणेषुच । विष्णोस्तत्प्रीणनविद्वान्भुञ्जीतसहबन्धुभि'रित्यत्रतत्पूर्वोक्त विष्णो प्रीणन प्रीतिकरण नैवेद्यमित्येवार्थं, नतु त्वदुक्त, भुक्तवत्सुभुञ्जीतेतिवाक्यस्यापरिसमाप्तौमध्येवाक्यान्तरप्रवेशस्यायोगात् प्रीणनक्रियायाभोजनक्रियाविशेषणत्वादरीतिक्लेशाच्च स्पष्टार्थबाधकाभावाच्च ॥ (स्क० ६ अ० १९ श्लो० २०) 'उद्वास्यदेवस्वधाम्नितन्निवेदितमग्रत ॥ अद्यादात्मविशुध्यर्थंसर्वकामर्द्धयेतथा ॥' एवमन्यदपिदृश्यते ॥ 'रसनातदर्पित'इत्यादिस्फुटवाक्यान्तरदर्शनादनिवेदितभक्षणेऽन्यत्रबहुप्रत्यवायश्रवणाच्चनित्यत्वसिद्ध्या नाग्निष्टोमीयपशुवत्कादाचित्कत्वसुवच । वस्तुतस्त्वग्निष्टोमपशुरपिनकाम्य, "वसन्तेवसन्तेज्योतिषायजेते" तिवीप्सावटितविधिनानित्यत्वस्यबोधनात् शक्तस्याहिताग्नेस्तदननुष्ठानेप्रत्यवायश्रवणाच्चातोऽसङ्गतोदृष्टान्त ॥ प्रकृतेपिपयोव्रतमेवकाम्य नैवेद्याशनंतुवचनान्तरेभ्योनित्यमितिहृदय ॥ एतेनैवउच्छिष्टभोजन इत्यादिप्रभवतीत्यतमपास्त, प्रेताग्निहोत्राद्यधिकरणेषु "तृतीयेसगच्छावहै" इत्यादिषुचमाधवेनअर्थवादमात्रेपिविधिकल्पनस्याङ्गीकाराच्च । प्रेताग्निहोत्राधिकरणतु तृतीयस्य तुरीयेपादेपचम । अत्रन्यायमालायामाधव 'धारयत्युपरिष्टाद्धिदेवेभ्यइतिसस्तव । विधिर्वाथोच्यते पित्र्येप्रोक्ताथा पूर्ववत्स्तुति ॥ ८ ॥ ऊर्ध्वंविधारणप्राप्तसमिधोनान्यमानत ॥ अतोहिशब्दसत्यागादपूर्वार्थोविधीयते ॥ ९ ॥' प्रेताग्निहोत्र एवंश्रूयते अधस्तात्समिधधारयन्ननुद्रवेत् उपरिहिदेवेभ्योधारयति । तत्रपि यहविर्होतुहस्तेधारयन् यदामन्त्रपठति तदानींस्रुग्दण्डस्याधस्तात्समिधधारयेदितिविधीयतेतदेतद्दैविकेनोपरिधारणेनस्तूयते ॥ हिशब्देनपूर्वाधिकरणइवानुवादत्वप्रतीतिरितिचेत्–मैव, दैविकेह्यविधिस्रुग्दण्डस्योपरिसमिद्धारणस्यापूर्वार्थत्वेनविधातव्यत्वात् । अनुवादत्वगमकोहिशब्दोसम्वादुपेक्षणीय इतिव्याचष्ट । "तृतीयेसगच्छावहा" इतिवाक्यसनेयिब्राह्मणेर्थवादस्यविधायकत्व पराशरमाधवीयोक्तमुपन्यसिष्यते ॥ हिनिश्चयेनमायाजयेमेतिस्वमतभोक्तृलिङ्प्रयोगस्यात्रापिसत्त्वाच्च 'यज्ञशिष्टाशिन'इतिगीतावाक्यश्रुत्यादिषुयज्ञशब्दस्यविष्णुपरतया तन्नैवेद्याशनस्तावक केचिद्वर्णयन्ति । अधिकरम्यतुतत्स्वाग्निहोत्रपञ्चमहायज्ञादिश्रौतस्मार्तयज्ञशिष्टाशनपरत्वमतोनत्वदुराग्रहकुर्म, गीतायाभागवतादनुत्कृष्टत्वोक्तिस्त्वस्मन्मताज्ञानात् । पुराणान्तराणीत्यादिकंतुपरमताज्ञानमूलकप्रलापमात्रनिरस्तञ्चैतत्प्रागेव ॥ अन्यनिवेदितस्यनिवेदनप्रसङ्गस्तुशैवसुधाकरादौत्वादृशबहिर्मुखैःस्थापितस्यहरौतत्तद्देवान्तरभक्तत्वस्यश्राद्धात्पूर्वंनिवेदनादिनिषेधकानामन्यविषयकवचसाचदर्शनात् अतोनिषेधोयुक्त । अन्यनिवेदितस्यभोजनंतुधर्मप्रवृत्त्यादिबहुमथघ्नं 'अन्यदेवस्यनैवेद्यंभुक्त्वाचान्द्रायणचरेत्' इत्यादिवचनै प्रतिषिद्धमेवेतिनतत्प्राप्ति ॥ दीपावलोकमपिनोपयुज्यादित्यर्थव्यक्त्या दीपावलोकेऽनुज्ञाप्रतीतिस्तुतवैवभ्रम तथासतित्वदभिमतार्थनिषेधश्चतस्यैवसिध्येत् । एकादशे (अ० २७ श्लो० ४३) 'दत्वाचमनमुच्छेषविष्वक्सेनायकल्पये' दितितुकमलाकरभट्टकृताह्निकादिषुविष्णुपूजाप्रस्तावेष्टैः 'उच्छिष्टभोजनदासान्विष्वक्सेनादिकास्तथा । दत्वाशेषंतुभुञ्जीयान्नैवेद्यंस्वयमेवहि । योऽर्चयेत्केशवंनित्यसयातिपरमा–

गते'मित्यादिभिर्वसिष्ठादिवचनैः समानार्थकमिति न विरोधः । विष्णुतो भागवतप्रसादमक्ष-
णस्यावश्यकत्वं निषेधभ्रमजनकवचनव्यवस्थापनधमयासस्सिद्धांतमार्तंडेप्रागुणस्थलेदेवांत-
रनैवेद्यस्याभक्ष्यत्वादिचतद्व्यवहिताग्निमप्रभोक्तरेतत्रयथामतिसमर्थितमितिसुधीभिरवद-
नुसाह्यं । पुराणांतराणांप्रामाण्यंमन्वादिस्मृतीनांचधर्मेप्रामाण्यंश्रीमदाचार्यचरणनिबंध-
आद्यप्रकरणे (श्लो १०–११) 'द्वापरादौतुधर्मस्यद्विपरराद्धयंप्रमा । विरुद्धवचनानां-
चनिर्णयानांतथैवचे'तिस्वीकृतं सर्वार्थनिर्णयेचस्मृत्यादिप्रामाण्यंसुप्रपचितं । स्मृतिरवाच्छु-
त्यपेक्षयाचजघन्यत्वंतुपूर्वतंत्रप्रमाणाध्यायस्मृतिपादोक्तदिशास्त्येव । सर्वमिदंतथैसनेनवा-
सोप्रहणादिस्मृतीनांयथायथंसंकोचाप्रामाण्ययोर्निर्णयात् ॥ तथाप्यधरवेयहुशाखोच्छेदा-
न्मचादिवचनेपुमूलश्रुतेरिदानींतनैरनुपलंभेपिनिर्मूलतायाअशक्यवचनतया 'आचारात्स्मृ-
तिमनिश्चछेत् स्मृतेश्च श्रुतकल्पन'मि तिन्यायेन असंदिग्धमन्वादिवचनैः सिद्धेऽर्थेश्रुतिकल्प-
नयानयंविकल्पमेवदामहत्त्वमाकमत्युतमन्वादिपुगौरवं । स्पष्टंचेदंतत्तन्निबंधावरणभंगयोः
यत्तु "यद्वै मनुरब्रवीत्तद्भेपज" मित्याद्युन्मत्तश्रुतिपाठउपन्यस्त, सतुश्रुतिगंधानाघ्राणात् ।
चस्तुतस्तुतैत्तिरीयसंहितायाद्वितीयकांडे (प्रपाठक० २ अनुवाक० १०) "यद्वैकिंचम-
नुरवदत्तद्भेपज" मितिपाठः । यद्यपिइदंवाक्यं "मानवीऋचौधाय्येकुर्यात्" इतिविधाय-
सद्प्रेस्तावकत्वेनास्ति, तत्रविकृतिरूपेसोमारौद्रेचरावतिदेशतः 'प्राप्तासुसामिधेनीपुमध्ये-
प्रक्षेप्यधाय्यसंज्ञकौमंत्रौ तौमानवौकर्तव्या'वितितत्प्रशंसनार्थोर्थवादरूपस्यास्यस्वार्थेप्रा-
माण्ये अर्थवादानांस्वार्थेप्रामाण्याभावमभ्युपगच्छद्भिर्भवादृशैरशक्यवचनमतोनातयातव-
मनुस्मृतिप्रामाण्यसिद्धिः तथापि तस्यस्वार्थेप्रामाण्याभावेमनुपराशरादिसत्ताबोधकानांम-
न्त्रेतिहासपुराणादीनामपिकथंचित्स्वार्थेऽप्रामाण्यप्रसक्तौमन्वादिसत्तानेप्रामाण्यंव्याहन्येत ।
तथासतितत्कृतस्मृतेरनुदयेऽयंविधिरपिकुंठोभवेत् "ऋषयोवाइन्द्रंप्रत्यक्षंनापश्यन् । 'तंव-
सिष्ठ प्रत्यक्षमपश्यत । अत्रिरददादौर्वायप्रजांपुत्रकामाय" इत्यादीनाबाधितार्थत्वैव-
सभाव्यवेदमूलत्वात्स्मृ-
स्नात् । भट्टवार्तिकेपि 'वैदिके सर्वमाणत्वात्तत्परिग्रहदार्ढ्येत' । सभाव्यवेदमूलत्वात्स्मृ-
तीनांमानतोचिते'त्युक्तं । पराशरमाधवीयारंभेतुक्वचित्पुस्तकेपरिग्रहसमत्वतइत्यपिपाठो-
दृश्यते ॥ किंच (पराशर अ० २ श्लो० १५ विवरणे) माधवेन (पृ० ४७१) "वाज-
सनेयकेपि" तस्माद्वासमानादेव पुरुषादत्ताचाद्यश्चजायतेउततृतीयेसंगच्छावहै चतुर्थे
संगच्छावहे' इति । समानादेकस्मात् पुरुषादत्ताभोक्ताआद्यश्चभोग्य.द्वावप्युत्पद्येतेतौच-
मिथ सकल्पयत कूटस्थमारभ्यतृतीयेचतुर्थेवापुरुषेसंगच्छावहैविवहावहै इत्यर्थं । 'यद्यप्य-
यमर्थवाद' तथापिनान्तरविरोधाभावात् स्वार्थेप्रमाणम्" इतिमातुलसुताविवाहविचारे-
तत्प्रामाण्यं आधारमाधवेप्रतिपादितमिति सर्वसमतत्वेन तस्यतत्स्मृतिस्तावकत्वेप्यदोष-
इतिमन्यमहे । अस्मन्मतेऽर्थवादानांस्वार्थेपिप्रामाण्यांगीकाराच्च स्पष्टंचैतदावरणभंगे ।
एतेन जघन्यत्वेकिमानमित्यंतमपास्तं । शाखाद्वहिष्करणमित्यादेर्निरासस्तु मूलेएवविशदः ॥

यत्तुपर्वंच 'चेतस्तत्प्रवणंसेवाफलरूपातुमानसी ॥ तत्सिद्धयर्थं-
देहवित्तजनिःकार्याततोभवेत् ॥ संसारदुःखनाशोहिब्रह्मात्मत्वाव-
बोधन'मित्याद्युक्त्वा यदितुभक्तिमात्रमुच्यते तर्हिनपरमाप्तिः

तरणहेतुत्वं । नचपद्धातोर्ज्ञानार्थकत्वमेवनभक्त्यर्थकत्वमिति
प्रपूर्वकपद्धातोर्भक्त्यर्थकत्वेबाधकाभावात् । 'उपसर्गेणधात्वर्थो-
बलादन्यत्रनीयत'इत्यभियुक्तवाक्याच्च 'धातूनामनेकार्थत्वादि'ति-
भाष्याच्च अन्यथाजानंतीतिकथंनोक्तं? यदपियत्रेत्यादिना'येतु-
ज्ञानैकसन्निष्ठास्तेषांतुल्यएवहि ॥ भक्तानामेवभवतिलीलास्वादोति-
दुर्लभ'इतिश्लोकमनूद्यतत्रत्यटीकायामक्षरब्रह्मप्राप्त्यांपुनरावृत्तौपुरु-
षोत्तमप्राप्त्यापुनरावृत्तिशंकैवनास्तीतियत्प्रतिपादितंतदुपरितनेत्या-
दिनाबृहद्वामनस्थापूर्वसुखप्राप्त्येपुनर्जन्मशंकास्यादित्यादिप्रलपन्,-
तदपिनकिंचित्; यतोभक्तेर्ज्ञानापेक्षयाधिक्यंव्यासैः प्रतिपादि-
तमेव । एवंचभक्ताः पुरुषोत्तमंप्राप्तालीलास्वादेऽक्षरब्रह्मस्थंश्रीयमु-
नागिरिगोवर्द्धनादिलोकंनित्यमेवानुभवंतितत्रजन्मशंकैवनसंभवति,
लीलायांनित्यप्राप्तस्यसुखस्यापूर्णत्वाभावात् अतएवबृहद्वामनपुराणे-
'नारायणादिरूपाणिज्ञातान्यस्माभिरच्युत'इत्याद्युक्त्वा 'आनंदमात्र-
मितियद्वदंतिपुराविदः ॥ तद्रूपंदर्शयास्माकंयदिदेयोवरोहिन'इत्यादि
श्रुतिप्रार्थनयाभगवानक्षरब्रह्मस्थंश्रीवृंदावनयमुनाश्रीगोवर्द्धनादिलो-
कंतत्रश्रीगोपिकाकदंबस्थितंस्वस्वरूपंदर्शयामास । आहच 'भूतकिं-
करवाणिवः' ततःश्रुतयोनित्यसिद्धगोपिकावन्मनोरथंयाचितवत्यः ।
ततः 'दुर्लभोदुर्घटश्चैवयुष्माकंसुमनोरथः । मयानुमोदितः सम्यक्-
सत्योभवितुमर्हती'त्याह तस्माल्लीलास्वादोदुर्लभ.'सभक्तानामेवभवति
'स्त्रियोवापुरुषावापिभक्तिभावेनकेशवं ॥ हृदिकृत्वागतिंयांतिश्रुतीनां-
नात्रसंशयः ॥' उक्तंचभगवतास्वयमेव–'आब्रह्मभुवनाल्लोकाः पुन-
रावर्तिनोऽर्जुन । मामुपेत्यतुकौंतेयपुनर्जन्मनविद्यते ॥' तस्मात्पुरुषो-
त्तमंप्राप्तस्यपुनर्जन्मशंकाकथमपिनजायते । एतेनतत्रेत्यादिकंसर्वम-
पास्त, एवमुपास्यस्योत्कृष्टत्वमप्ययुक्तमितियत्तेनोक्तं,-तदपिस्वम-
तानुसारेण, तन्मतेमायोपहितस्योपास्यत्वात् शुद्धस्यचज्ञेयत्वात् ।
वस्तुतस्तुज्ञेयस्यशुद्धत्वंनसंभवति, वृत्त्यवच्छिन्नत्वात् वृत्त्यवच्छि-
न्नत्वाभावेज्ञेयत्वासंभवात् । अतएवतन्मतानुसारिभिर्ज्ञेयस्यमिथ्या-
त्वंस्वीकृतम्, किंचयथाश्रुत्यावेद्यत्वप्रतिपादितंतथैवउपास्यत्वमपि
"आत्मानमुपासीतकोऽयमात्मायमुपास्मह" इत्यादिश्रुत्याप्रतिपाद-
नात्कथमुपास्यस्यन्यूनत्वं? नच "नेदंयदिदमुपासत" इतिश्रुत्या-
उपास्यस्याब्रह्मत्वप्रतिपादनादुपास्यस्यन्यूनतेतिवाच्यं, "अविज्ञातं-

विजानतांविज्ञातमविजानतां । अन्यदेवतद्विदितादथोअविदितादधि-
यदिमन्यसेसुवेदेतिदभ्रमेवापिनूनंत्वंवेत्थब्रह्मणोरूप" मित्यादिश्रु-
त्यावेदस्यापिब्रह्मभिन्नत्वेनतस्योत्कृष्टत्वासंभवात् । ननु शब्दवाच्य-
त्वेनवेद्यत्वंनिषिध्यते, लक्षणयावेद्यंब्रह्मस्वरूपमुत्कृष्टमेवेतिचेत्-शब्द-
वाच्यस्यैवोपास्यस्याब्रह्मत्वंश्रुत्याप्रतिपाद्यते, लाक्षणिकस्योपास्य-
सर्वोत्कृष्टत्वेतुबाधकाभावः ॥ इदंचतन्मतानुसारेण, अस्मन्मतेतुश्रे-
यादक्षरादुपास्यस्यपुरुषोत्तमस्यैवोत्कृष्टत्वं । तथाहि-अस्थूलादिवा-
क्यस्योपसंहारे "यएतद्विदित्वाप्रेतिसब्राह्मण" इत्यक्षरवेत्तुर्ब्रह्मज्ञत्व-
मुच्यते "अथपराययातदक्षरमधिगम्यते" इतिश्रुतौचपरविद्याया-
अक्षरज्ञानजनकत्वमेवोक्तं । तेनज्ञानरूपेमार्गेइष्टप्राप्त्युपायेअस्थूलत्वा-
दिगुणकंयदक्षरंतद्विषयकाण्येवज्ञानानीष्टप्रापकाणिनिरूप्यंते । ननु-
पुरुषोत्तमविषयकाणीतिज्ञानविषयविशेषणबलान्निश्चीयते तत्फल-
विचारेच "ब्रह्मविदाप्नोतिपर" मितिश्रुतावक्षरब्रह्मविदोऽक्षरात्पर-
स्यप्राप्तिःफलत्वेनोच्यते । नचाक्षरमेवपुरुषोत्तमइतिवाच्यं; परपद-
प्रयोगवैयर्थ्यापत्तेः "दिव्योह्यमूर्त्तःपुरुष" इतिश्रुतौ 'अक्षरात्परतः
पर'इत्युक्तेतस्यविरोधश्चस्यात् । नचतत्राक्षरपदप्रतिपाद्याप्रकृतिर्वा-
जीवोवास्यादितिवाच्यं; जगत्कारणस्यचेतनस्यैवतत्रप्रकृतत्वेनतत्रा-
प्रकृतप्रकृत्यादिग्रहणेप्रकृतहान्यापत्तेः, 'यस्मात्क्षरमतीतोऽहमक्षराद-
पिचोत्तमः ॥ अतोऽस्मिलोकेवेदेचप्रथितःपुरुषोत्तम'इतिभगवद्वाक्य-
विरोधापत्तेश्चेति । तस्मात्तादृशभगवद्वाक्यादक्षराज्ज्ञेयात्पुरुषोत्तमः
श्रेष्ठस्तत्प्राप्तिरेवफलत्वेननिश्चीयते । तत्कारणजिज्ञासायांचश्रुत्या
"ब्रह्मविदाप्नोतिपर" मिति श्रुतिविवरणभूतया "योवेदनिहितं-
गुहायां सोऽश्नुते" इत्याकारिकयाप्रतिपादितंस्वरूपयोग्यतासंपादक-
मक्षरविषयकंज्ञानंप्रतीयते । अतएवभगवद्गीतायां 'भक्त्यामामभि-
जानाती'त्यस्मात्पूर्वंयत् 'ब्रह्मभूतः प्रसन्नात्मानशोचतिनकांक्षति ॥
समःसर्वेषुभूतेषुमद्भक्तिंलभतेपरा'मितिवाक्यं तस्मिन्ब्रह्मभूतस्य-
भक्तिलाभोक्तेर्ब्रह्मभावस्यचस्वरूपलाभरूपत्वेनानंदाविर्भावात्मक-
त्वादानंदाविर्भावस्यचाविद्यानाशजन्यत्वादविद्यानाशस्यचाक्षरब्रह्म-
ज्ञानजन्यत्वात्परप्राप्तिपूर्वकक्षाविश्रांतमेवाक्षरज्ञानमुक्तं । तथाचकु-
त्रचिदक्षरप्राप्तेर्मुक्तित्वंयदुच्यते,-तदक्षरस्यपरमधामत्वेनपुरुषोत्तमा-
ऽविनाभावादेव । तेन "ब्रह्मवेदब्रह्मैवभवती" तियदवधारणं,-तदपि-

जीवस्याक्षरब्रह्मविदः पुनरावृत्त्यभावेनमृत्य्वतिक्रमणात्केवलाक्षरप्राप्तेर्ब्रह्मभावात्मकत्वेनचोपपद्यमानंनविरुध्यतइति। अतएव "अक्षरधियांत्ववरोधःसामान्यतद्भावाभ्यामौपसदवत्तदुक्तं" मितिसूत्रेणव्यासैरप्ययमेवार्थोद्वदीकृतः। तदर्थस्तुअक्षरविषयिणीनांधियां श्रुतौमुक्तिसाधनेषुयोऽविरोधःप्रवेशानंगणनेतियावत्ससामान्यतद्भावाभ्यांहेतुभ्यांभवति पुरुषोत्तमसंबंधिसंबंधेमुक्तिरितिसामान्यंमर्यादामार्गेऽङ्गीकृतानां 'ब्रह्मभूतः, प्रसन्नात्मानशोचतिनकांक्षति ॥ समःसर्वेषुभूतेषुमद्भक्तिंलभतेपरा'मितिभगवदुक्तेर्ब्रह्मभावानंतरमेवभगवद्भावसंभवात्। ततः पुरुषोत्तमप्रवेशात्तत्रपरंपरयोपयोगोब्रह्मभावस्येत्युभाभ्यांहेतुभ्यांतथेत्यर्थः। वस्तुतस्तुपुरुषोत्तमप्राप्तिरेवमुक्तिरितिभावः॥ नन्वक्षरस्याविशिष्टत्वेनतदुपासकानामपितथात्वात्केषांचित्तत्रैवलयः, केषांचिद्भक्तिलाभइतिकथमुपपद्यतइत्याशंक्यतत्रहेतुदृष्टांतेनाह—औपसदवदिति। उपसदाख्येकर्मणितानूनप्त्रस्पर्शाख्यमौपसदंकर्मास्ति, तत्रातिथ्यायाध्रौवात्स्रुचिचमसेवायदाज्यंचतुरवत्तंपंचावत्तंवासमवद्यतितत्तानूनप्त्रमित्युच्यते। 'अनाधृष्टमसी'तिमंत्रेणषोडशाप्यृत्विजोयजमानेनसहतानूनप्त्रंसमवमृशंति। 'अनुमेदीक्षा'मितिमंत्रेणयजमानस्तत्समवमृशन्यमृत्विजंकामयेतायंयक्षयशमृच्छेदितितंप्रथमंसमवमर्शयेदितिश्रूयतेश्रुतौकल्पेच। अत्रसर्वेषामृत्विजांतानूनप्त्रित्वाविशेषेपियस्मिन्स्नेहातिशयेनतथेच्छातत्रैवतथाकरणंनान्येषु। नहितत्राविशिष्टेषुकथमेवंकृतिरित्यपिपर्यनुयोगः संभवति, एवंप्रकृतेपीति। एवंचोपास्यस्यपुरुषोत्तमस्योत्कृष्टतायाः श्रुतिस्मृतिसूत्रप्रतिपादितत्वाज्ज्ञेयाद्युपास्यस्यन्यूनताप्रतिपादनंसाहसमेव। यत्तु 'मुक्तानामपिसिद्धानांनारायणपरायणः॥ सुदुर्लभ' इत्यत्रमुक्तेतरापेक्षयानारायणपरायणस्यदुर्लभत्वमुक्तं,—तच्चविभक्त्यर्थज्ञानाभावात् मुक्तानांसिद्धानामित्यत्रनिर्द्धारणेषष्ठीनिर्द्धारणंचजातिगुणक्रियादिभिरेकदेशस्यपृथक्करणंनिर्द्धार्यत्वविशिष्टेसामान्यधर्मावच्छिन्नापेक्षयाजातिगुणक्रियाद्यवच्छेदेनयत्किंचिद्धर्मिणिभेदबोधनमितियावत् यथानराणांक्षत्रियः शूरतमइत्यत्रनराभिन्नक्षत्रियः क्षत्रियान्यनरान्यशूरतमाभिन्नइत्यन्वयबोधः। अत्राभेदोभेदश्चनिर्द्धारणषष्ठ्यर्थः। निर्द्धार्यपदार्थविशेष्यतयाप्रकृत्यर्थविशेषणतयाचभेदान्वयः भेदस्यचद्विधाभानमुपगतव्यवहारानांक्षत्रियः शूरइतिप्रयोग""प्रामाण्यानुरोधेनभेदस्याप्यर्थत्वंस्वीकृतं, अभेदसंसर्ग-

कथोधेविरुद्धविभक्तिराहित्यस्यतंत्रतयासंसर्गमर्यादयातद्भानासंभवात्। यदिच भेदस्यद्विधाभानमनुभवविरुद्धंसकृदुच्चरितइतिन्यायेनक्षत्रिया देरपिनद्विधाभानमित्युच्यतेतदाऽभेदएवपष्ठ्यर्थः।तस्यचक्षत्रियेतादात्म्येनान्वयः तस्यचसमानविभक्त्युपस्थापितशूरतमत्वावच्छेदेनान्वयः । तथाचनराभिन्नक्षत्रियाभिन्नशूरतमइत्यन्वयबोधः। केचित्तुक्षत्रियान्यतरत्वव्यापकभेदप्रतियोगितावच्छेदकत्वविशिष्टतादात्म्यसंबंधेननराभिन्नक्षत्रियेशूरतमत्वान्वयइत्याहुः । एवंचमुक्तसिद्धाभिन्ननारायणपरायणाभिन्नोदुर्लभ इत्यन्वयबोधोथवानारायणपरायणान्यमुक्तसिद्धत्वव्यापकभेदप्रतियोगितावच्छेदकोमुक्तसिद्धाभिन्ननारायणपरायणइतिवान्वयबोधोदुर्लभः उभयथापिमुक्तेतरापेक्षयादुर्लभइत्यसंगतमेव । 'तपस्विभ्योऽधिकोयोगी'त्यादिनादर्शितोदृष्टांतस्तुनिर्द्धारणपष्ठ्यघटितत्वाद्विषमः; शक्तिसंभवेलक्षणाया अयुक्तत्वात् । मुक्तानामित्यस्यकुटुंबवासनामुक्तानामित्यर्थइत्यप्ययुक्तमेव। "योवेदनिहितंगुहाया"मितिश्रुतिस्त्वसन्मतमेवपुष्णाति। तदर्थस्तुपूर्वंदर्शितएव। एतेनातएवेत्यादिकमप्यपास्तं ॥

सहस्राक्षे एवंचचेतइत्यादिविरोधाच्चेत्यलमित्यंतंभागंपरिहरंति—परिवस्यादिना इत्यादिकमपास्तमित्यंतेन। व्याससूत्रस्यैवेति। (अ० ३ पा० ३ सू० २७) "सांपरायेततंव्याभावात्तथाह्यन्ये" इतिसूत्रस्य एवकारोऽप्यर्थे ॥ तेनबहुप्रमाणसंग्रहेऽप्यदोषः। वाजसनेयिशाखायामिति। बृहदारण्यकेषष्ठाध्यायेशारीरब्राह्मणाख्येचतुर्थब्राह्मणेत्यर्थः। अत्रकिंचित् भिन्नपाठंप्रमुचरणव्याख्यानमेवसूत्रद्वयस्यानुवदंति—सएपनेतिनेत्यात्मेत्यादिना । अत्रविस्तरःप्रकाशेवक्ष्यमेयः। एतादृशसेति। तत्र "अगृह्योनहिगृह्यते" इत्यादिनोक्तधर्मवत्वं। अत पापमित्यादि । अतइतिल्यब्लोपेपंचमीएतदभिसंधायपापमकरवंएतदभिसंधायपुण्यमकरवं एवमभिसंधानपूर्वककृतेसाध्वसाधूनिउभेब्रह्मवित्तरतीत्यर्थः । अयंमाध्यंदिनपाठ.काण्वशाखायांतु (पृ० ९११) "अत पापमकरवमित्यत.कल्याणमकरवमित्युभेउहैवैपएतेतरतिनैनंकृताकृते तपत" इतिपाठः ॥ निरूप्येति ॥ "एपनित्योमहिमाब्राह्मणस्य" इत्युपक्रमंतेन निरूप्येत्यर्थः ॥ श्रद्धावित्तइत्यत्रसमाहितइतिकाण्वपाठ ॥ पश्येदित्यत्रतुपश्यतीति सर्वोऽस्याऽऽत्माभवती" तिकाण्वैर्नपठ्यते । आथर्वणोपनिषदादिष्विति ॥ इदंवाक्यंतुगोपालता-

---

एवंच 'चेतस्तत्प्रवणसेवाफलरूपातुमानसी । तत्सिद्धयर्थंदेहवित्तजनि कार्यातथोभवेत् संसारदु खनाशोहिब्रह्मात्मत्वाऽवबोधन'मित्यत्र यदि देहवित्ताभ्यां जनितसेवासा तत्फलभूतामानससेवासिद्ध्यर्थं तयाऽमेब्रह्मविद्याप्राप्तिरित्युच्येत तर्ह्यस्माकं नकोपि विद्वेषः ॥ यदितु तत्र तत्प्रवणता ब्रह्मविद्योच्यते तर्हि देहवित्तयोस्तत्रनोपयोग , श्रवणादेरेवतत्रोपयोगात् ॥ इतीदं नास्माभिर्बुध्यते ब्रह्मात्मत्वावबोधनमित्यस्यासङ्गतेश्च ॥ यदितु भक्तिमात्रमुच्यते

पनीयस्थं । आदिपदेन "ब्रह्मसंस्थोऽमृतत्वमेति" इतिछंदोगादिश्रुतीनां "तत्संस्थस्यामृतत्वोपदेशात्" इतिशांडिल्यसूत्रस्य । दशमस्कंधेकुरुक्षेत्रप्रसंगे । 'मयिभक्तिर्हिभूतानाममृतत्वायकल्पते ।' एवमादिपुराणवाक्यसंग्रहः ॥ संपराय परलोकइत्यादि । अत्रयथासभंतरस्येदमितिभक्त्याविभ्यइतिना क्षणमाश्रित्यसांपरायइतिदैर्घ्यंबोध्यं । मुक्तानामपिसिद्धानामितिषष्ठस्कंधचतुर्दशाध्यायस्थं । सूत्रमिति । प्रथमस्यतृतीयेपादे द्वितीयं ॥ 'नराणांक्षीणपापाना'मितिपांडवगीतास्थं ॥ 'समाराध्यवृषध्वज'मितिवराहपुराणीयप्रबोधिनीमाहात्म्यस्थं ॥ द्वितीयसूत्रमवतारयंति–ननुभक्तीत्यादिना । दु सहप्रेष्ठविरहेतिदशमस्कंधे रासपंचाध्यायीस्थं । इतिप्रभुचरणोक्तिप्रायेणसंगृहीतप्रकाशस्थंसगृण्हंति–नन्वन्यैरित्यादिना ॥ अत्रभागवतंचन्यायइत्यंतंप्रकाशमनूद्यफलितमाहु –एवंचज्ञानादिति । तस्मान्मद्भक्तीत्येकादशस्थंवाक्यं ॥ बृहद्वामनपुराणइति । तत्रोत्तरसिद्ध्येभृग्वादीन्प्रतिब्रह्मवाक्यसंदर्भोऽयं ॥ सचोत्तरभागेविशेषत स्फुटंविचारयिष्यते–दुर्लभोदुर्घटश्चेति । अतएवमार्तंडादिपुलीलास्वादोतिदुर्लभइत्याद्युक्तं ॥ खियोपेति । इदंतत्रत्यमेववाक्यं । स्वीकृत

तर्हि नपरप्राप्ति वासुदेव सर्वमिति अहंब्रह्मास्मीतिज्ञानेनैव तत्प्राप्ते ॥ एतेन 'मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते' इति वाक्यात्तु भक्तानामविद्याविनिवृत्तितइत्यपिचिन्तितम् ॥ पद्यतेर्भजत्यर्थत्वाभावात् ॥ गत्यर्थानां ज्ञानार्थतया ज्ञानेनैवाविद्यानिवृत्तेस्तेन वाक्येन प्रतीतेश्च ॥ यत्तु 'येतुज्ञानैकसन्निष्ठास्तेषांतुल्यएवहि । भक्तानामेवभवतिलीलास्वादोऽतिदुर्लभ' इति श्लोकव्याख्यानेऽक्षरब्रह्मप्राप्तस्याऽपुनरावृत्तिमुक्त्वा पुरुषोत्तमं प्राप्तस्य पुनरावृत्तिमाशङ्क्य 'मामुपेत्यतुकौन्तेयपुनर्जन्मनविद्यत'इति भगवद्वाक्येन कैमुतिकन्यायेन समादधौ ॥ ब्रह्मज्ञानेनाक्षर प्राप्तस्य पुनरावृत्त्यभावे ततोऽपि पर प्राप्तस्यसुतरांतदभावसिद्धेरिति,–तन्न; तेतुब्रह्महृदनीताइति वक्ष्यमाणभागवतश्लोकस्य त्वत्सम्मतार्थे सति तेषां गोपानामिव राधादीनामिवच ततोप्युत्कृष्टस्य वृन्दावनादिस्थभृगाललतात्वप्राप्तिपूर्वकमनुभूयमानस्यापूर्वफलस्य प्राप्त्यै पुनर्जन्मनस्त्वया वक्तु त्वदीयै शङ्कितु चोचितत्वात् ॥ विद्वन्मण्डने भक्तानां पुनरागमनस्योक्तत्वाच्च ॥ तदपि तत्खण्डनावसरे खण्डयिष्याम ॥ पुरुषोत्तमाक्षरयोरभेदोऽक्षरपदार्थश्चोक्तएव प्राक् ॥ एवमुपास्याज्ज्ञेयस्योत्कृष्टत्वमप्युक्त, निरतिशयत्वात् ॥ 'मुक्तानामपिसिद्धानानारायणपरायण । सुदुर्लभ'इत्यादिपुराणवाक्यन्तु मुक्तेतरापेक्षया नारायणपरायणस्योत्कर्षमाहेत्यपिशब्देन गम्यते ॥ यथा 'तपस्विभ्योऽधिकोयोगीज्ञानिभ्योपिमतोधिक'इत्यत्रापिशब्दबलेन ज्ञानीतरापेक्षया योगिनआधिक्य प्रतीयते ॥ अस्तु वा मुक्तानामित्यस्य कुटुम्बवासनाया मुक्तानामित्यर्थ, सिद्धानामित्यस्य त्वणिमादिमतामितितावतैवार्थवादत्वोपपत्ते ॥ अतएव 'योवेदनिहितगुहायां सोऽश्नुतेसर्वान्कामान्सहे'त्याद्या श्रुतय 'यावानर्थउदपानेसर्वत सम्प्लुतोदके । तावान्सर्वेषुवेदेषुब्राह्मणस्यविजानत'इत्याद्या स्मृतयश्च सगता ॥ यानि तु पुराणवाक्यानि अनुग्रहेण लीलाऽऽस्वादे प्रमाणतया दर्शयति तानि लीलास्वादस्यानुग्रहप्रयोज्यत्वे एव प्रमाणानि, ननु इतरापेक्षया तस्योत्कर्षेपि ॥ प्रमाणाभावाच्छ्रुत्यादिविरोधाच्चेत्यलं ॥

मिति । दृश्यत्वमिथ्यात्वयोर्व्याप्तिस्वीकारात्तथा ॥ दृश्यत्वं ज्ञेयत्वं । अन्यथाऽऽव्याकाशादावव्याप्तिप्रसंगादितिदिक् ॥ अविज्ञातमित्यादि । तात्रकव्याख्यानांगीकारेपियस्यांतत्वकारोपनिषद्विब्रह्मणउपास्यत्वंप्रतिपिद्धंतस्यामेव "अन्यदेवतद्विदितात् अविज्ञातं" इत्यादिभिर्ज्ञेयत्वमपि प्रतिषिध्यतइत्युपास्यज्ञेयस्याप्यब्रह्मत्वंदुर्वारमितिभावः ॥ अथपरेतिमुंडकश्रुतिरियं । जनकत्वमेवेत्येवकारोप्यर्थे । ज्ञानमार्गाद्भक्तिमार्गस्योत्कर्षंप्रदर्शयितुमत.परं (अध्याय ३ पा. ३. सू. ३३.) 'अक्षरधियांत्वि'तिसूत्रेप्रकाशंश्रीप्रभुचरणोक्तिंचैकीकृत्य प्रायेणानुवदंति–तेनज्ञानरूपेमार्गेइत्यादिना । इदमपिविदुषांसुगममेवेति विशेषतो नव्याख्यायते–तत्रप्रकृतत्वेनेति । दिव्योह्यमूर्तइतिवाक्यविशिष्टेमुंडके । अथपरेत्यादिनातथात्वेन । सबंधिसबंधेइति । भक्तमगे ॥ 'सत्संगान्मामुपागता'इत्येकादशस्कंधादिवाक्यैर्यथा भक्तमंगेभगवत्प्राप्तिहेतुस्तथाऽक्षरपदस्यापिपुरुषोत्तमसबंधितया तज्ज्ञानमपिमुक्तिहेतुरितिसमानत्वं ॥ पुरुषोत्तमप्रवेशादिति 'ततोमांतत्वतोज्ञात्वाविशते-तदनंतर'मितिवाक्यात्तत्रमांपुरुषोत्तमं; पुरुषोत्तमोऽस्मीतिपंचदशाध्यायेकथनात् । सौत्रंदृष्टांतमवतारयंति–नन्वक्षरस्येति ॥ अविशिष्टत्वेकेवलज्ञानिनोभक्तांश्चप्रतिअक्षरस्यस्वज्ञानद्वाराऽविद्यानिवर्तकत्वब्रह्मभावसंपादकत्वादिनाअविशिष्टत्वेसत्यपिकेवलज्ञानिनामक्षरएवलयः "ब्रह्मैवसन्ब्रह्माप्येति" 'विशंतियद्यतयोवीतरागा'इत्यादिश्रुतिस्मृतिसिद्धः । भक्तानांतुपुरुषोत्तमप्रवेशहेतोः फलरूपभक्तेर्लाभ. 'मद्भक्तिंलभतेपरा'मित्यादिवाक्यसिद्धः । एवंफलेवैषम्यंकुतइतिभावः । औपसदवदिति । उपसदःसंबंधिइदं औपसदंतानूनप्त्रं । तदाज्यसमवमर्शनंवा । उपसत्तुज्योतिष्टोमादौ सोमक्रयानंतरदिनत्रयपर्यंतंप्रात सायंकर्तव्यइष्टिविशेषः ॥ तानूनप्त्रंतु सकृदेवभवतितच्चप्रथमोपसद्दिवसएवतत्रक्रीतंसोमंशकटेनप्राग्वंशपूर्वद्वारमानीयशकटमुदगग्रंस्थापयित्वादक्षिणमनड्वाहमेकमेवविमुच्य आतिथ्यायास्तंत्रप्रक्रम्य प्राग्विसर्जनान्नेद्वितीयमपिविमुच्यराजानंशकटादवरोप्यादायपूर्वयाद्वाराप्राग्वंशंप्रविश्यापरेणाहवनीयं दक्षिणातिक्रम्याध्वर्युः प्रतिप्रस्थात्रा पूर्वमानीतामासन्दीमाहवनीयतो दक्षिणस्यांस्थापयित्वातदुपरिप्राचीनग्रीवमुत्तरलोमकृष्णाजिनमास्तीर्य तदुपरिराजानंस्थापयित्वापरिश्रयणवाससापर्याणह्यति अग्निराजानं चान्तेरणमासंचारिष्टेतिसप्रेष्यति ततोऽग्निहननादिकर्मप्रतिपद्यते ॥ साचातिथ्यादृढा भक्षणोत्तरतत्पात्रमार्जनान्तासंतिष्ठने धारयतिध्रौवमाज्यम् । आतिथ्यायार्थैवात् । एतदर्थमेवसंपादितायांजुह्वांचिचमसेवातानूनप्त्रंसमवद्यतिचतुरवत्तपंचावत्तंत्रापंचावदाने एकाप्यायनम् । (तैत्तिरीयसंहिताकां० १ प्रपा० २ अनु० १०) "आपतयेत्वागृह्णामि" प्राणायेदंनमम "परिपतयेत्वागृह्णामि" मनसइदं "तनूनप्त्रेत्वागृह्णामि" अभयइदम् शाक्वरायत्वागृह्णामि" शक्त्यैइदं "शक्मन्नोजिष्ठायत्वागृह्णामि" जीवात्मनइदम् "अनुमेदीक्षां दीक्षापतिर्मन्यतामनुतपस्तपस्पतिरंजसासत्यमुपगेषंँसुवितेमाधाः" इतियजमानप्रथमंतानूनप्त्रंस्पृशति "अनाधृष्टमस्यनाधृष्यंदेवानामोजोभिशस्तिपाअनभिशस्तेन्यं" इतिऋत्विजोयुगपत् स्पृशन्तिसदस्यश्च । यदिसदस्यः । "प्रजापतौत्वामनसिजुहोमि" इतियजमानस्तानूनप्त्रंजिरवजिघ्रतिसकृन्मंत्रेणद्विस्तूष्णीम् । प्रजापतयइदम् ।

अन्वहंवात्रतेप्यपिनयति । सौत्रस्यास्यविकल्पस्यार्थन्तु वक्ष्यामः । अत्रवेदार्थप्रकाशे (कां० १ प्रपा० २ अनु० १०) "आपतिः निःश्वासरूपेणबहिर्गतं पुनर्वाच्चिमुखेनान्तः पततीत्यापतिःप्राणः । हेआज्यप्राणार्थत्वांअस्मिन्पात्रेगृह्णामि । परितोनानाविषयेषु पततीतिपरिपतिर्मनः । तनूं शरीरंनपातयतिनविनाशयतीतितनूनपाजाठराग्निः । शक्तनशीलः शक्करः शक्तिमानपुरुषः, तस्यसबंधिशाक्वरं शक्तिस्वरूपं शक्मन् शक्तिमत्सुयदोजिष्ठं तस्मै ओजोनामाष्टमो धातुः तस्यसारमोजिष्ठं तदवष्टंभेनैवशक्तिरवतिष्ठते एतैर्मन्त्रैस्तानूनप्त्रंग्राह्यम् । 'तानूनप्त्रसंज्ञकजाठरवन्हिविषयस्यशपथकर्मणो हेतुभूतमाज्यंतानूनप्त्रम्' इतिमाधवः । एषांमंत्राणांब्राह्मणन्तुषष्ठकाण्डे द्वितीयप्रपाठकेश्रूयते (अनु० २) 'देवासुरास्संयताआसन्तेदेवामिथोविप्रियाआसन् तेऽन्योन्यस्मैज्यैष्ठ्यायातिष्ठमानाः पंचधान्यक्रामन्नग्निर्वसुभिः सोमोरुद्रैरिन्द्रोमरुद्भिर्वरुणआदित्यैर्बृहस्पतिर्विश्वैर्देवैस्तेमन्यन्तासुरेभ्योवाइदंभ्रातृव्येभ्योरध्यामोयन्मिथोविप्रियास्स्मोयानइमाः प्रियास्तनुवस्ताः समवद्यामहैताभ्यः सनिर्ऋच्छाद्यः ॥ न' प्रथमोऽन्योन्यस्मैद्रुह्यादितितस्माद्यः सतानूनप्त्रिणांप्रथमद्रुह्यतिसआर्तिमार्छतियत्तानूनप्त्रंसमवद्यतिभ्रातृव्याऽभिभूत्यैभवत्यात्मनापरास्यभ्रातृव्योभवतिपंचकृत्वोऽवद्यतिपंचधाहितेतत्समवाद्यंतायोपंचाक्षरापंक्तिः पांक्तोयज्ञोयज्ञमेवावरुंधआपतयेत्वागृह्णामीत्याहप्राणोवाआपतिः प्राणमेवप्रीणातिपरिपतयइत्याहमनोवैपरिपतिर्मनएवप्रीणातितनूनप्त्रइत्याहतनवोहिदेवाः समवाद्यंतशाक्वरायेत्याहशक्त्यैहितेवास्समवाद्यन्तशक्मन्नोजिष्ठायेत्याहौजिष्ठंहितेतादात्मनस्समवाद्यन्तानाधृष्टमस्यनाधृष्यमित्याहानाधृष्टंह्येतदनाधृष्यंदेवानामोज । इत्याहदेवानांह्येतदोजोभिशस्तिपाअनभिशस्तेन्यमित्याहाभिशस्तिपाह्येतदनभिशस्तेन्यमनुमेदीक्षांदीक्षापतिर्मन्यतामित्याहयथायजुरेवैतद्घृतंवैदेवावज्रंकृत्वासोममघ्नन्नन्तिकमिवखलुवाअस्यैतच्चरन्तियत्तानूनप्त्रेणप्रचरन्ति" इत्यादि एतदर्थोपिप्रथमकांडभाष्ये (प्रपा० २ अनु १०) संयत्ता सङ्ग्रामंप्राप्ताः । मिथः परस्परं । तेचदेवाः सर्वेपिस्वातिरिक्तस्यज्यैष्ठ्यमनङ्गीकुर्वाणा पंचव्यूहाअभवन् । तेषुव्यूहेष्वग्न्यादयः पंचदेवताः सेनान्यः वस्वादयः पंचगणा सेनाः । तेकंचित्कालं परस्परविरोधिनोभूत्वापश्चादेवंचारितवन्तः यदिवयमन्योन्यविरोधिनस्तदावैरिणामसुराणांइदंजयरूपंकार्यं वयमेवसाधयामः । ततस्तद्विरोधपरिहारहेतुंशपथंकर्तुं अस्मदीया प्रियाः पुत्रभार्यादिरूपाइमाः तनूरेकत्रसंश्लिष्टाःकुर्मइतिविचार्यसङ्घीकृत्यशपथमेवं परिभाषितवन्तः अस्माकंमध्येय.प्रथमंद्रुह्यतिसताभ्यस्तनूभ्योनिर्गच्छतु भ्रष्टोभवत्विति । यस्माद्देवानामेवंवृत्तंतस्मान्मनुष्याणामपिशपथकृतांमध्येय प्रथमंद्रुह्यतिसविनाशंप्राप्नोति । समानेएकस्मिन् विषयेतानूनप्त्रिण शपथवंत.सतानूनप्त्रिणः । इदानींविधत्ते "यत्तानूनप्त्रं समवद्यतिभ्रातृव्याभिभूत्यैभवत्यात्मनापरास्यभ्रातृव्योभवति" इति । समवद्यतिसम्भूयावदानंकुर्यात् । स्वयंभूतिमान्भवतिवैरीतुपराभवति । इयमेव भ्रातृव्याभिभूतिः । अवदानेसंख्यांविधत्ते । पंचकृत्वोऽवद्यतीत्यादितेदेवाः तन्वदानीपंचधाविभक्ता पश्चात् संभूयैकस्य प्रियतनूरवायस्थापितवन्तः । इतिव्याख्यातः । तदेतत्सर्वमनुसंधायाहु.—श्रुतोक्तरूपेति । कल्पस्तुबौधायनभाष्ये—"अथैतद्ध्रौवमाज्यमाप्यायक सवाचमसयायाचतिवमतर्येदिनि-

धायतस्मिन्नेतत् तानूनप्त्रसमवद्यगृह्णाति" कंसं कांस्यपात्रं । यच्चिन्मनमितिपाठेऽपि-चम्यतेऽस्मिन्नित्यर्थसाम्यात्समस्तएवार्थ.तथा "सयावन्तऋत्विजस्तएवत्समवमृशन्त्यना-धृष्टमस्यनाधृष्यंदेवानामोजोऽभिशस्तिपाअनभिशस्तेऽन्यं" इतिहेतानूनपूत्राज्यस्वंइत.पूर्वे-केनाप्यतिरस्कृतमसि । इतःपरमप्यतिरस्कृतंदेवानामोजः सारमसि । अभिपस्तेर्हि-सारूप्यादन्योन्यविरोधादस्मानूपाल्ययसित्वंपुनरभिशस्तेरविषयमसि । मंत्रस्ययथोक्तार्थः-प्रसिद्धइत्याह "अनाधृष्टमस्यनाधृष्यमित्याहानाधृष्टँ ह्येतदनाधृष्यंदेवानामोजइत्याह-देवानाँ ह्येतदोजोऽभिशस्तिपाअनभिशस्तेन्यमित्याहाभिशस्तिपाह्येवदनभिशस्तेन्यं" इतिदीक्षणीयेऽष्टौयोदेव.सदीक्षापतिः । ममेमांदीक्षामनुजानातु । अहंचांजसासत्यमुपगेषं-आर्जवेनतानूनपत्रस्पर्शनरूपंशपथंप्राप्तोऽस्मिहेतानूनप्त्रसुवितेशोभनमार्गेयज्ञकर्मणिमांस्था-पयमंत्रस्यस्पष्टार्थतामाह–"अनुमेदीक्षांदीक्षापतिर्मन्यतामित्याहयथायजुरेवैतत्" इति-आपस्तंबश्रौतसूत्रेद्वादशप्रपाठके 'आतिथ्यायाध्रौवावसुचिचमसेवातानूनप्त्रंसमवद्यति-चतुरवत्तंपंचावत्तंवापतयेत्वागृह्णामी'त्येते प्रतिमंत्रं 'अनाधृष्टमसीतियजमानसप्तदशा-ऋत्विजस्तानूनप्त्रँ समवमृशंत्यनुमेदीक्षामितियजमानोयंकामयेतयज्ञयशसमृच्छेदितितं-प्रथमंयदिकामयेतसर्वानितिसर्वान्सहावमर्षयेत्तस्माद्य.सतानूनप्त्रिणा'मित्युक्तंप्रजापतौत्वा-मनसिजुहोमीतियजमानस्तानूनप्त्रंत्रिरवजिघ्रत्यन्वहंवाव्रतेप्वपिनयति" इति एतच्चरुद्र-दत्तः–"तनूनपात्संबंधात्तानूनप्त्रमित्याज्यसमाख्या । येनर्त्विज सर्व्वयुगपत् गच्छन्ति चतुरवत्त पंचावत्तंवेति चतुरवत्तिनोपिपंचावत्तप्राप्त्यर्थंनत्वितरस्यइतरार्थे; तस्य पंचावत्तं-सर्वत्रेतिनियमात् । व्यवस्थितविकल्पोवास्यादुभयस्यव्यवस्थानुसारात् अनाधृष्टमसीति-यजमानसप्तदशा ऋत्विजस्तानूनप्त्रँ समवमृशंति । सदस्यस्यानित्यत्वादुक्तं–सप्तदशा-इति । तेनसदस्यस्यवरणे सोप्यवमृशत्येवार्थसाम्यात् । अनुमेदीक्षामितियजमानः गतं । यंकामयेतयज्ञयशसमृच्छेदितितंप्रथमं । यदिकामयेतसर्वानितिसर्वान्सहावमर्शयेत् यज्ञ-निमित्तंयशोयज्ञयशसयज्ञेसाधुकृतमनेनेतितद्यंप्राप्नुयादितिकामयेत यजमानस्तं प्रथममव-मर्शयेत् । यदिपुनः कामयेत । सर्वान् यज्ञयशसमृच्छेदिति तदासहैव सर्वानवमर्शयेत् । तस्माद्य.सतानूनप्त्रिणामित्युक्तं । तस्माद्य.सतानूनप्त्रिणांप्रथमोद्रुह्यति स आर्तिमार्च्छती-त्युक्तं तस्माअन्योन्यमन्यस्मैद्रोग्धव्यमित्यर्थ. । 'प्रजापतौत्वामनसिजुहोमी'तियजमान-स्तानूनप्त्रंत्रिरवजिघ्रति । गत । अन्वहंवाव्रतेप्वननयतितदात्तुमतिव्रतमावृत्तिर्मंत्रस्य" इतिव्याचष्टे रामाण्डारादिकन्तुविशिष्टप्रयोजनाभावान्नोपन्यस्यते ॥ सूत्रेअन्वहंवेतिविक-ल्पस्त्वेवंभातिप्रथमदिन एवत्रिराघ्राणमित्येक पक्ष । प्रतिदिवससकृत्सकृत् व्रतेष्वित्यपरः । अस्मिन्पक्षेमंत्रावृत्तिरितियद्यपितानूनप्त्रसमवमर्शनमुपसद्भिर्भूतं आतिथ्येष्ट्युत्तरंतत् क्रियते तथापि तत्समवमर्शनानन्तरमेवप्रवर्ग्यप्रचारोपसदोरनुष्ठानात्तदन्तरालयोरनुष्ठा-तुमशक्यत्वात्तत्समवमर्शनमौपसदमित्यभिरप्यते । किंचषष्ठकाण्डे द्वितीयप्रपाठके (अनु० १) "स ँ स्पर्शयतिरक्षसामनन्ववचाराय नपुरस्तात् परिदधात्यादि-त्योह्येवोद्यन् पुरस्ताद्रक्षा ँ स्यपहन्त्यूर्ध्वेसमिधावादधात्युपरिष्टादेवरक्षा ँ स्यपहन्ति" इत्यादिना मध्यमपरिधिंदक्षिणोत्तरपरिधिसंधिस्पर्शनंपूर्वभागेचतुर्थपरिधेर्निषेध आधार-

समिधोरूर्ध्वंदिग्बुक्त्वाऽऽहवनीयात्पूर्वभागेदूरेस्थापनंचेत्यादिकंविधीयते । इदंचदर्शपूर्णमासातिदेशलभ्यमप्युपसदर्थमत्रविधीयत इत्युपसदोपि तदंगंभवत्येव । अतएवप्रथमकाण्डभाष्ये (प्रपा० २ अनु० १०) माधवः–"ननुसस्पर्शादिविधयः प्रकृतौदर्शपूर्णमासेष्टावपिसन्तीत्यतिदेशादेवतदनुष्ठानस्यात्रप्राप्तत्वान्नपृथग्विध्यन्तरापेक्षेतिचेत् ,–नउपसदर्थं; विधेयत्वात् । तर्हितत्रैवविधीयतामितिचेत् ,–न; आतिथ्योपसदो.परिध्यादिभेदंवारयितुं साधारणत्वेनात्रैवविधेयत्वात्" इत्याह ॥ एवंचातिथ्यायांविहितमपितद्वयोपसदोऽप्यंगंतथाऽऽतिथ्योत्तरंविहितंतानूनप्त्रसमवमर्शनमप्यधिकारसमर्पकत्वादिनोपसदंगंस्यादेव । अतएव "अनुमेदीक्षांदीक्षापतिर्मन्यतामनुतपस्तपस्पतिः" इत्यादौसमवमर्शनमंत्रे तपःशब्दाभिधेयायाउपसदःसमवमर्शनेसंबंध.स्पष्ट एवाम्नायते । तथाचवेदभाष्यं "तपउपसत् तन्नत्योदेवस्तपस्पति मदीयंतपोऽनुजानातु" इत्यादिकमुपन्यस्तंप्राक् । तस्मात्सूत्रऔपसदशब्देन तत्समवमर्शनस्य ग्रहणंयुक्तमेव । उपसत्संबंधादेव प्रतिदिवसमग्नीषोमीयपर्यंतमाघ्राणपक्षोप्यापस्तंबोक्त प्राग्व्याख्यातः । न चसमवमर्शनोपसदोःप्रवर्ग्यप्रचारेणव्यवधानात् प्रवर्ग्यस्यांगवन्नतूपसदइतिशंक्यं; तथासतियत्रप्रवर्ग्यनिषेधस्तत्र तदपिनभवेत् । तथाहि–तैत्तिरीयारण्यकतुरीयप्रपाठके (अनु० ६) "नोक्थ्येप्रवृंज्यात् प्रजावैपशवउक्थ्यानियदुक्थ्ये प्रवृंज्यात् प्रजां पशूनस्य निर्दहेत्" इतिज्योतिष्टोमविकृतावुक्थ्येप्रवर्ग्यं प्रतिषिध्यतेआपस्तंबसूत्रेप्येकादशप्रपाठके "अग्निष्टोमेप्रवृणक्तिनोक्थ्येप्रवृंज्यात्" इत्यारण्यकस्थप्रवर्ग्यब्राह्मणवाक्यमनूद्यतत्रस निषिध्यते अतउक्थ्येसमवमर्शनोत्तरमुपसदएवक्रियन्तइतिदिक् । यद्यपिदर्शितचरात्प्रकारात् प्रयोगान्तरेपुकश्चिदितरोदृश्यतेयथाबौधायनानां शकटान्राज्ञआदानं प्राग्वंशेनयनं आसद्युपर्यध्वर्य्वास्तीर्णकृष्णाजिनेस्थापनंचयजमानेनेत्यादिः । तानूनप्त्रावदानन्तुतेषांहिरण्यकेशिनांचोभयेषामपिकांस्यपात्रेचमसेवेत्येव । आघ्राणेतु बौधायनानांयजमान.प्रथमादिक्रमेणाध्वर्य्वादीन् सर्वानुपहूयतानूनप्त्रमवजिघ्रतिअथैनदद्भिः सस्पृश्यशालोत्तरेनिनयति । हिरण्यकेशिनान्तु अध्वर्युरवमृश्य "प्रजापतौत्वामनसिजुहोमी" तित्रिरवघ्रायांतर्वेदिनिनयति एवमादिस्तत्रतत्रविशेषोस्त्येव । तथापिप्रायेणापस्तम्बसूत्रमेवानुसृत्येहकर्मप्रकारदिक्प्रदर्शितेतिध्येयम् । इहकिंचिदधिकप्रपंचनंतुतानूनप्त्रादि स्वरूपव्युत्पादनापेक्ष्यदोषः ॥ इत्थंप्रकाशंप्रभुचरणोक्तिंचप्रायेणसगृह्यफलितमाहुः–एवंचोपास्यस्येत्यादिना । अग्रेमूलमतिरोहितार्थं । किंचअत्रेदमवधेयं–सइत्याक्षेपादिदेहवित्ताभ्यामित्यादिनायोविकल्प.कृत सकारिकार्थानवबोधादेव ॥ तत्रहिदेहवित्ताभ्यांजनितैर्यस्यसासाधनरूपासेवा । सयाअहंताममतारूपसंसारस्याविद्याकार्यस्यनाशः । स्वात्मनिप्रपंचेचाक्षरब्रह्मात्मकत्वयाज्ञानमित्यवांतरफलद्वयं भवति । तत सर्वात्मभावापरपर्यायाफलरूपामानसीसेवा । साचब्रह्मज्ञानस्यापि फलरूपेतितस्याब्रह्मविद्यासाधनत्वमशक्यवचनं । अतएव 'समासेन तुकौन्तेय निष्ठाज्ञानस्ययापरे'तिसंक्षेपेणैवज्ञानस्यपरांनिष्ठांप्रक्रम्य 'अहंकारबलंदर्प'मितिससारनाशं 'ब्रह्मभूयायकल्पत'इतिब्रह्मभावंचोक्त्वाब्रह्मभूतस्यपरमभक्तिलाभोभगवताउक्तः ॥ तथसाधनभक्तिर्व्याख्यातानापरपदं । एवं 'भजं-

स्यनन्यमनसोज्ञात्वाभूतादिमव्ययं । इतिमत्वाभजन्तेमांबुधाभावसमन्विताः' ॥ 'योमा-
मेवमसंमूढोजानातिपुरुषोत्तमं । ससर्वविद्भजतिमांसर्वभावेनभारते'त्यादिष्वनेकत्रसार्व-
ज्ञ्यलिंगकब्रह्मज्ञानोत्तरमेवसानिरूप्यते । येदेपिबृहदारण्यके सत्यतपोदमशमदान-
धर्मादीनुक्त्वांते "मानसमितिविद्वा ँ सस्तस्माद्विद्वा ँ सएवमानसेरमते"
इतिज्ञानसंपन्नानामेवमानससेवासिद्धिस्तत्परमत्वंचाम्नायते । विद्यारण्यभाष्येप्ययमानस-
मुपासनविशेषएवव्याख्यायि । अस्मद्ग्रंथेसेतिविशेष्यानुरोधान्मानसीतिस्त्रीलिंगनिर्देशः-
पदार्थस्त्वेकएव । तत्रैवाग्रे "प्राजापत्योहारुणि" रित्यनुवाके "किंभगवंतः-
परमंवदंती" तिपुत्रेणपृष्टःप्रजापतिःसत्यादीनितथात्वेनोक्त्वांते "मानसंवैप्राजापत्यं-
पवित्रंमानसेनमनसासाधुपश्यतिमानसाऋषयःप्रजाअसृजंत मानसेसर्वंप्रतिष्ठितं तस्मान्मा-
नसंपरमंवदंति" अयमेवसाधनभक्तिःबंधाभावब्रह्मज्ञानपरभक्तीनांपूर्वोत्तरभावक्रमःतत्र-
तत्रश्रीभागवतादिषुवर्ण्यते । यथातृतीयस्कंधे (अध्याय २५ श्लोक ४३-४४) 'ज्ञान-
वैराग्ययुक्तेनभक्तियोगेनयोगिनः ॥ क्षेमायपादमूलंमेप्रविशंत्यकुतोभयं । एतावानेवलोके-
ऽस्मिन्पुंसांनिःश्रेयसोदयः । तीव्रेणभक्तियोगेनमनोमय्यर्पितंस्थिरं'इतिबंधाभावज्ञानरूपां-
गयुक्तभक्तियोगाद्ब्राह्मस्थितिरूपामुक्तिरुक्ता ॥ तत्रैव (अध्याय २७ श्लो० २८) 'मद्भक्तः
प्रतिबुद्धार्थोमत्प्रसादेनभूयसे'त्यादिना साधनभक्त्यैवज्ञानंततश्चसोक्ता ॥ (अध्याय ३२
श्लो० २३) 'वासुदेवेभगवतिभक्तियोगः प्रयोजितः । जनयत्याशुवैराग्यंज्ञानंयद्ब्रह्मदर्श-
नम् ॥' इत्यादिना 'आरूढंपदमीक्षते'इत्यंतेनधामाद्वैतसाक्षात्कारादिवर्णितं (चतुर्थस्कंधे
अध्याय ७ श्लो० ४४) 'तन्मायार्थमभिपद्यकलेवरेऽस्मिन् कृत्वाममाहमितिदुर्मतिरुत्प-
थैःस्वैः । क्षिप्तोप्यसद्विषयलालसआत्ममोहंयुष्मत्कथाऽमृतनिषेवकउद्व्युदस्ये'दितिश्रवणा-
दिसाधनभक्त्या बंधव्युदासउदितःतत्रैव (अध्या. ११ श्लो० २९) 'तमेनमंगात्मनिमुक्त-
विग्रहेव्यपाश्रितंनिर्गुणमेकमक्षरमित्याद्युक्त्वा (श्लो० ३०) 'भक्तिंविधायपरमांशनकैर-
विद्याग्रंथिंविभेत्स्यसिममाहमितिप्ररूढ'मितितदेवाख्यायि ॥ तथा (अध्या० १६ श्लो०
२५) 'आराध्यभक्त्यालभतामलंतज्ज्ञानयतोब्रह्मपरंविदंती'ति (अध्या० २२ श्लो० २५)
'हरेर्मुहुस्तत्परकर्णपूरगुणाभिधानेनविजृंभमाणया । भक्त्याह्यसंग सदसत्यनात्मनिस्यान्नि-
र्गुणेब्रह्मणिचांजसारतिः ॥ यदारतिर्ब्रह्मणिनैष्ठिकीपुमानाचार्यवान्ज्ञानविरागरंहसे'त्यादि
तथा (अ० २३ श्लो० ११) 'तस्यानयाःभावत.परिकर्मशुद्धसत्वात्मनस्तदनुसंस्मरणानु-
पूर्त्या । ज्ञानंविरक्तिमदभून्निशितेनयेन चिच्छेदसंशयपदंनिजजीवकोश'मित्यादि (अध्या०
२९ श्लो० ३६।३७।३८) 'अथात्मनोर्थभूतस्ययतोऽनर्थपरंपरा ॥ संसृतिस्तद्व्यवच्छेदो-
भक्त्यापरमयागुरौ ॥ वासुदेवेभगवतिभक्तियोगःसमाहितः । सध्रीचीनेनवैराग्यंज्ञानंचजन-
यिष्यति ॥ सोचिरादेवराजर्षेस्यादच्युतकथाश्रयः । शृण्वतःश्रद्दधानस्यनित्यदास्यादधीयत'
इत्यादिना (श्लो. ४०) 'तायेपित्र्यंत्यवितृप'इतिजीवन्मुक्तानामपिभक्तिरुक्ता ॥ षष्ठस्कंधे
(अध्याय १६ श्लोक ६२) 'दृष्टश्रुताभिर्मात्राभिर्निर्मुक्तः स्वेनतेजसा ॥ ज्ञानविज्ञान-
संतुष्टोमद्भक्त पुरुषोभवेदि'ति ज्ञानविज्ञानोत्तरंभक्तिरुक्ता ॥ सप्तमस्कंधेप्रह्लादः (अ० ७
श्लो० ३२) 'एवंनिर्जितषड्वर्गैःक्रियतेभक्तिरीश्वरे ॥ वासुदेवेभगवतिययासंलभतेर-

ति'मितिसाधनभक्तित फलभक्तिंवक्ति । किंचतप'श्रुतादीनांकेवलानांभगवत्तोषहेतुत्वंप्रति-
षिध्यभक्तेरेवतथात्वंवदतिसएवतत्रैव-(अध्याय ९ श्लो० ९) 'मन्येधनाभिजनरूपतपः-
श्रुतौजस्तेज प्रभावबलपौरुषबुद्धियोगाः ॥ नाराधनायहिभवंतिपरस्यपुंसोभक्त्यातुतोष
भगवान्गजयूथपाय ॥' तत्रैव (श्लो० १८) 'सोहंप्रियस्यसुहृदःपरदेवतायालीलाकथा-
स्तवनृसिंहविरिंचिगीताः ॥ अंजस्तितर्म्यणुगृणन्गुणविप्रमुक्तोदुर्गाणितेपदयुगालयहंससग'
इति ॥ (अध्याय १० श्लो० ४५) 'धर्मोभागवतानाचभगवान्येनगम्यते ।' इति
(अध्या० १३ श्लो० २१) 'यस्यनारायणोदेवोभगवान्हृद्गत सदा ॥ भक्त्याकेवलयाऽ-
ज्ञानंधुनोतिध्वांतमर्कवदि'तिभगवल्लीलाकीर्तनादिरूपयाकेवलयाभक्त्याभागवतधर्मैश्चस-
मूलज्ञानस्यनाशोदर्शितः । अष्टमस्कन्धेच (अध्या० २४ श्लो० ४७-४८.) 'जनो-
ऽबुधोऽयंनिजकर्मबंधन सुखेच्छयाकर्मसमीहतेसुखम् ॥ यत्सेवयातांविधुनोत्यसन्मतिं-
ग्रंथिसभिंद्याद्धृदयंसनोगुरु. ॥ यत्सेवयाग्नेरिवरुद्ररोदनंपुमान्विजह्यान्मलमात्मन-
स्तम ॥ भजेतवर्णंनिजमेषसोऽव्ययोभूयात्सईशःपरमोगुरोर्गुरु ' इति सेवयैवसउक्तः ॥
दशमस्कंधे (अ० ७०) नारदः (श्लो० ३९) 'जीवस्यय.ससरतोविमोक्षणंन-
जानतोऽनर्थवहाच्छरीरत ॥ लीलावतारै स्वयश प्रदीपकंप्राज्वालयत्त्वातमहंप्रपद्ये ।'
(अध्या० ७४ श्लो० ५) 'नवैतेऽजितभक्तानाममाहमितिमाधवत्वंतदेतिचनानाधी-
पशूनामिववैकृते'ति । एकादशस्कंधे (अध्या० ११ श्लो० २५) 'सत्सगलब्धया-
भक्त्यामयिमांसउपासिता ॥ सवैमेदर्शितंसद्भिरंजसाविंदतेपदं ॥' तत्रैव (अध्या० १२
श्लोक० २४) 'एवंगुरूपासनयैकभक्त्याविद्याकुठारेणशितेनधीर ॥ विवृश्च्यजीवाशय-
मप्रमत्त सपद्यचात्मानमथत्यजास्त्रम् ॥' (अध्याय० २० श्लोक ३२ । ३३) 'यत्कर्म-
भिर्यत्तपसाज्ञानवैराग्यतश्चयत् ॥ योगेनदानधर्मेणश्रेयोभिरितरैरपि । सर्वंमद्भक्तियोगेन-
मद्भक्तोलभतेऽजसा ॥ स्वर्गापवर्गंमद्धामकथंचिद्यदिवांछती'ति ॥ एवमादिष्वनेकत्रकेवल-
भक्त्यामोक्षधामप्रवेशादिकमुदितं ॥ नचैवमपिसाधनरूपाफलरूपेतिभक्तिद्वैविध्यकल्पने-
मानाभाव शंक्य ; एकादशस्कंधे (अध्या० ३ श्लो० ३१) 'भक्त्यासजातयाभक्त्या-
बिभ्रत्युत्पुलकांतनु'मित्यादौपूर्वस्यां साधनरूपतायाद्वितीयस्यां तत्फलरूपतायाश्चस्पष्टमे-
वप्रतीते ॥ किंचतत्र (अ० २ कविवचनेषु श्लो० ३२) 'मन्येकुतश्चिद्भयमच्युतस्ये'ति-
भगवदुपासनस्यैवसर्वात्मनासंसारभयनिवर्तकत्वमुक्त्वा (श्लो० ३४) 'येवैभगवते'-
त्यादिनाभक्तिमार्गीयोपायैरविदुषामपिभगवत्प्राप्तिंकथयित्वातदुपायदिक्प्रदर्शनार्थं (श्लोक
३६) कायेनवाचेतिसर्वसमर्पण (श्लोक ३७) 'भयद्वितीयेतिद्वैतभयनिवृत्य
र्थमनन्यभक्त्यासर्वेत सेवनचविधायतत्कथंभावाकांक्षायांमनोनिरोधंजन्मकर्मश्रवण-
कीर्तनादिरूपांसाधनभक्तिंवर्णयित्वा (श्लो० ४२-४३) 'भक्ति परेशानुभवोविरक्ति-
रन्यत्रचैषत्रिकएककाल ॥ प्रपद्यमानस्ययथाऽश्नत स्युस्तुष्टि पुष्टि क्षुदपायोऽनुघास ॥
इत्यच्युतांघ्रिंभजतोऽनुवृत्त्याभक्तिर्विरक्तिर्भगवत्प्रबोध ॥ भवंतिवैभागवतस्यराजंस्तत-
परांशान्तिमुपैतिसाक्षादि'त्युच्यते ॥ इहप्रपद्यमानस्येतिशरणागतिं अनुवृत्त्या अच्युतांघ्रि-
भजत इतिवानुव्रजिसजातसेवांचोक्त्वाप्रथमांतभक्तिपदेनतत्फलभूतकाचित्पराभक्तिर्निरूप्ति-

शब्देनांहस्तसमस्तोपरतिः परेशानुभवभगवत्पयोधशब्दाभ्यामपरोक्षज्ञानंचरपष्टमेवोर्क्तं ॥
फलत्रयेकालव्यवधानाभावयोधनायतुष्यादिदृष्टांतश्चोदाहृतः ॥ ॥ सर्वांतेद्वादश-
स्कंधद्वादशाध्यायोऽपि (श्लोक ७२) 'नैष्कर्म्यमप्यच्युतभाववर्जितंनशोभतेज्ञानमलं-
निरंजनं ॥ कुतःपुनःशश्वदभद्रमीश्वरेनचार्पितंकर्मयदप्यनुत्तम'मितिपुरुषोत्तमभक्त्यसंपा-
दकंकेवलाक्षरजुषांनिरस्ताविद्यमपिज्ञानंविनिंद्य (श्लोक० ५३) 'यशः श्रियामेवपरिश्रमः-
परोवर्णाश्रमाचारतपःश्रुतादिषु ॥ अविस्मृतिःश्रीधरपादपद्मयोर्गुणानुवादश्रवणादिभि-
र्हरे'रितिभगवत्यनर्पितानांसकामकेवलकर्मणांभक्त्यसंपादकत्वात् । परिश्रममात्रत्वंश्रवणा-
दिरूपतनुजभक्त्यैवाविस्मरणंचोक्त्वा (श्लो० ५४) 'अविस्मृतिःकृष्णपदारविंदयोःक्षिणो-
त्यभद्राणिशमंतनोतिच ॥ सत्त्वस्यशुद्धिंपरमात्मभक्तिंज्ञानंचविज्ञानविरागयुक्त'मितिस्पष्ट-
मेवसाधनभक्तेःफलंयथाभावोज्ञानंभक्त्यंतरंचोच्यते ॥ नचपाठक्रमात् ज्ञानंपरभक्तेर-
पिफलमितिवाच्यं; पाठक्रमादार्थक्रमस्यबलीयस्त्वात्; (अध्याय ५ पाद १ सूत्र २)
"अर्थाच्च" इत्यधिकरणेयवागूपाकादौसिद्धत्वात् ॥ अन्यथावैराग्यं ज्ञानस्यापिफलंस्यात् ।
इहभक्तिःपरेशानुभवोविरक्तिरित्यत्रचतस्यतदुत्तरंनिर्देशात् ॥ इष्टापत्तौभक्तौतत्फल-
त्वैकः प्रद्वेषः ॥ आर्थक्रमस्तु'भक्त्याकिलभतेपरा'मित्यादौसिद्धएव ॥ अस्मिन्नेवाध्याये-
(श्लो० ३) 'अत्रसंकीर्तितःसाक्षात्सर्वपापहरोहरिः ॥ नारायणोहृषीकेशोभगवान्सा-
त्वतांपति'रितिपुरुषोत्तमं (श्लो० ४) 'अत्रब्रह्मपरंगुह्यंजगतःप्रभवाप्ययं ॥ ज्ञानंचतदु-
पाख्यानंप्रोक्तंविज्ञानमंयुतम् ॥ भक्तियोग समाख्यातोवैराग्यंचतदाश्रय'मित्यक्षरंब्रह्म-
ज्ञानंविज्ञानंततोभक्तियोगश्चोक्तः ॥ अतोनकोऽपिशंकावकाशः ॥ किंचगीतायामपि-
(अ० १०) 'इतिमत्वाभजंतेमा'मित्युक्त्वा 'ददामिबुद्धियोगंत'मित्यादिना अपरोक्ष-
ज्ञानंसंसारनाशश्चसाधनभजनादेवोक्तः ॥ द्वादशाध्यायेपिस्वस्यपुरुषोत्तमस्यभक्तानामक्ष-
रोपासकानांचविशेषमुक्त्वा 'येतुसर्वाणिकर्माणी'त्यादिनास्वानन्योपासकानांसंसारादचिरा-
दुद्धरणंस्वयमुक्तमितिकृतंबहुना । इदंत्ववधेयं-(स्कं० ७ अ० ५ श्लो० २३) 'श्रवणं-
कीर्तनंविष्णो'रित्यादिना (अ० ११ श्लो० ११) 'श्रवणंकीर्तनंचास्यस्मरणंमहतांगतिः ॥
सेवेज्यावनतिर्दास्यंसख्यमात्मसमर्पण'मित्यनेनचयेनवधासाधनभक्तिप्रकाराउक्तास्तेतनुजा-
भेदाएव ॥ तनुजवित्तजसेवयोः स्वरूपमानसंक्षेपस्तुमदीयचिंतामणौ 'तनुजावित्तजासेवा-
तस्याःसाधनमुच्यते ॥ सर्वेंद्रियैःशुद्धभावात्तत्परैःसेवनाऽऽदिमा ॥ ४५ ॥ तद्विच्छासैः
स्वसर्वस्वोत्थैःसेवानैभवैःपरा ॥ उभेअपिप्रमाणोक्तिप्रथमंतनुजायथा ॥ ऋग्वेदे-
(अष्ट० २ अ० २ वर्ग २६ ऋ० ३) 'तमुस्तोतारःपूर्व्यं यथाविदऋतस्यगर्भंजनु-
षापिपर्तन ॥ आऽस्यजानंतोनामचिद्विवक्तनमहस्तेविष्णोसुमतिंभजामहे ॥' भागवते
(स्कं० ९ अ० ४ श्लो० १८) 'सवैमनःकृष्णपदारविंदयोर्वचांसिवैकुंठगुणानुवर्णने ।
करौहरेर्मंदिरमार्जनादिषुश्रुतिंचकाराच्युतसत्कथोदये ॥' (स्कं. २ अ. ३ श्लो० २१)
'शावौकरौनोकुरुतःसपर्यांहरेर्लसत्कांचनकंकणौवा ॥' (स्कं० १० अ० १० श्लो० ३८)
'वाणीगुणानुकथनेश्रवणौकथायांहस्तौचकर्मसुमनस्तवपादयोर्नः ॥ स्मृत्यांशिरस्तवनिवास-
जगत्प्रणामेदृष्टिःसतादर्शनेऽस्तुभवत्तनूनां' (स्कं० १० अ० ८० श्लो० ३) 'सानन्यया-

तस्यगुणान्गृणीतेकरौचतत्कर्मकरौमनश्च ॥ स्मरेद्वसंतंस्थिरजंगमेपुश्रृणोतितत्पुण्यकथा-सकर्णः ॥' (स्कं० ११ अ० ११ श्लो० ३९) 'संमार्जनोपलेपाभ्यांसेकमंडलवर्तनैः ॥ गृहशुश्रूषणंमह्यंदासवद्यदमायया ॥' (स्कं० ११ अ० १८ श्लो० २१) 'आदर.परिचर्यायासर्वांगैरभिवंदनं ॥' इत्यादौप्रथमाप्रोक्ताद्वितीयाऽप्युच्यते यथा ॥ (स्कं० ११ अ० ११ श्लो० ३५) 'मत्कथाश्रवणेश्रद्धामदनुध्यानमुद्धव ॥ सर्वलाभोऽपहरणंदास्येनात्मनिवेदनम् ॥ (स्कं० १० अ० ८१ श्लो० ४) 'पत्रंपुष्पंफलं तोयंयोमेभक्त्या-प्रयच्छति ॥ तदहंभक्त्युपहृतमश्नामिप्रयतात्मनः ॥' (स्कं० ४ अ० ३१ श्लो० ९) 'तज्जन्मतानिकर्माणितदायुस्तन्मनोवच ॥ नृणायेनेहविश्वात्मासेव्यतेहरिरीश्वरः ॥' (स्कं० ५ अ० १९ श्लो० २१) 'मुकुंदसेवोपयिकंस्पृहाहिनः' तैत्तरीयचित्ति "भर्तासन् भ्रियमाणोबिभर्ति" गीता 'योगक्षेमंवहाम्यहं ॥ इत्यादावपरोक्तैतेएकीभूयसुदुर्लभा ॥ अहैत्यशेषांकुर्वीतदशमीमिमलक्षणां । सर्वार्पणात्प्रवृत्तस्यतत्सेवनेप्रेमनिर्मलं । भवेदेवगुणां-भोधौहरौसान्मानसीतत ।' इतिदिक् । इयंमानस्येव श्रीभागवतादिपुसर्वात्मभावशब्देनाप्युच्यते ॥ तत्स्वरूपंचभूमविद्यादिपुश्रूयते, तदेतद्भाष्यादितोऽवधेयं ॥ अधिकंग्रंथांतरेपु-द्रष्टव्य ॥ एतेनयदिदेहवित्ताभ्यामित्यादि. ज्ञानेनैवतत्प्राप्तेरित्यंत.प्रलापोऽपास्त. ॥ ज्ञानस्य-परभक्त्यंगत्वविस्तरेणभक्तिमीमांसाप्रथमाध्याये (सू० १०) "सांमुख्येतरापेक्षितत्वात्" इत्यादिना (सू० २६) "ब्रह्मकांडतुभक्तौतस्यानुज्ञानायसामान्यात्" इत्यंतेनद्वितीयाह्निकेनसम्यङ्निर्धारित ॥ 'मामेवयेप्रपद्यंत'इतिवाक्यमपिशरणागत्यैवमायातरणं बोधयति ॥ प्रपूर्वकस्यपद्यतेरुपसर्गबलेनतादृशार्थकत्वात् ॥ शंकराचार्यैरपिगीताभाष्येऽत्र ॥ तत्रैवंसति-'सर्वधर्मान्परित्यज्यमामेवमायाविनंस्वात्मभूतंसर्वात्मनायेप्रपद्यते' इतिव्याचक्षाणैः 'सर्व-धर्मान्परित्यज्यमामेकशरणंव्रजे'तिचरमाध्यायवाक्यंस्पष्टस्मारयद्भिः शरणागतिरेवेहार्थः-स्वीकृत. ॥ अत शंकराचार्यविरुद्धार्थस्वीकारस्त्वदुक्तरीत्यातवैवशास्त्रखंगमयति ॥ शरणगत्याससरणतरणंचाष्टमस्कंधे (अध्याय २४ श्लो० ४६) 'अनाद्यविद्योपहतात्मसंविदस्त-न्मूलसंसारपरिश्रमातुराः ॥ यदृच्छयेहोपसृतायमाप्नुयुर्विमुक्तिदो न परमोगुरुर्भवान ॥' एकादशस्कंधे (अध्याय १२ श्लो० १५) 'मामेकमेवशरणमात्मानंसर्वदेहिना ॥ याहि-सर्वात्मभावेनयास्यसेह्यकुतोभयं ॥' मयास्याह्यकुतोभयइतिवापाठः । एवमादिष्वसंदिग्ध-मेवैत्यत्रापिसएवार्थ ॥ तेनएतेनेत्यादिप्रतीतेश्चेत्यंतंनिरस्तं ॥ यच्चयस्त्वित्यादि निरतिशय-त्वत्वादित्यंतंतदबोधान् ॥ अक्षरप्राप्तस्यापुनरावृत्तौपरप्राप्तस्यकैमुतिकासिद्धा 'मामुपेत्यतुकौन्तेयपुनर्जन्मनविद्यते ॥ सर्गेऽपिनोपजायंतेप्रलयेनव्यथंतिचे'त्यादिवचनसिद्धाचसायुक्तैव ॥ 'आवृत्तिश्चदु खदुलाऽध्रुवप्रापंचिकजन्मप्राप्तिरेव ॥ तेनसपद्याविर्भावायंगीकारेऽपिन सनिषिध्यमानाऽऽवृत्तिशब्दवाच्यतयावक्तुं ॥ अतएवभगवान्-'अनन्यचेता सतत'-मितिस्वप्राप्तिमुक्त्वा 'मामुपेत्यकौंतेये'त पूर्वमेव ॥ 'मामुपेत्यतुकौंतेयदु.खालयमशाश्वतं । नाप्नुवंतिमहात्मान संसिद्धिंपरमांगता'इत्युक्तवान् ॥ परमांससिद्धिंलीलाप्राप्तिरूपांमुक्तिं ॥ माध्यंदिनानांपंचाग्निविद्यायां (का० १४ अ० ९. १. १७ शतपथप० ११०१) "तेपु-ब्रह्मलोकेषुपरा परावतोवसन्ति तेषामिहनपुनरावृत्तिरस्ति" इतिपठ्यते ॥ अत्रब्रह्मलोकेषु-

मक्षरमक्षररूपेपुलोपेपुपराः । स्वयंपुरुषोत्तमात्मकतांप्राप्ता.परागत.पुरुषोत्तमाश्रिया शा-
श्वतीः समाः वसंति तेषां इहप्रपंचे न पुनरावृत्तिः दु.खाल्याशाश्वतजन्मरूपाऽस्तीत्यर्थः ॥
काण्वपाठे इहेतिपदाभावेऽपिमाध्यंदिनबृहदारण्यकभाष्येशंकराचार्याः ॥ (अ० ८ ब्रा० २
पृ० १०५८) "तेषांब्रह्मलोकंगतानांनास्तिपुनरावृत्तिरस्मिन्संसारे नपुनरागमनमिहेति-
शाखांतरपाठात्, इत्यादि "तस्मात् अस्माल्लोकात्पुनरावृत्तिर्गम्यते" इत्यंतंव्याचक्षाणा-
स्तत्रापि इहपदार्थप्रदर्शयंति छांदोग्ये-(पृ० २८२) पञ्चमपाठेऽक्षिपुरुषविद्यायां
"एतेनप्रतिपद्यमानाइमंमानवमावर्तंनावर्तंते" इतिमानवावर्तावर्तनमेवनिषिध्यते ॥
एतेनविद्वन्मंडनोक्तंसकलंसमर्थितं ॥ अक्षरपुरुषोत्तमयोस्तारतम्यमभेदश्चप्राङ्निर्णीतः ॥
एवंज्ञानिज्ञेयादक्षरादुपास्यस्यपरस्योत्कर्षोऽपि मूलेचसप्रपंचितः ॥ श्रृगालेत्यादिकंतु
भगवल्लोकनिंदाप्रलापमात्रम् ॥ 'मुक्तानामपिसिद्धाना'मितिवाक्यमपिब्रह्मसंपन्नानांज्ञानि-
नांमध्येपिपुरुषोत्तमपरायण.परभक्तिमान्सुदुर्लभइत्यर्थकमेव । षष्ठस्कंधचतुर्दशाध्याये
(श्लो० २) 'देवानांशुद्धसत्वानामृषीणांचामलात्मनां ॥ भक्तिर्मुकुंदचरणेनप्रायेणोप-
जायत' इतिज्ञानकारणसत्वशुद्ध्यादिशालिष्वपिपुरुषोत्तमभक्तेर्दौर्लभ्यमुक्त्वारज स्विवास-
स्यातेषुप्राणिषुकेषांचिदेवश्रेयस्करंचोक्त्वा 'प्रायोमुमुक्षवस्तेषांकेचनैवद्विजोत्तमाः ॥
मुमूक्षूणांसहस्रेषुकश्चिन्मुच्येतसिध्यति ॥ मुक्तानामपिसिद्धानां' इत्याद्युच्यते । अत्रबुद्ध्यं-
वासनादिरहितामुमुक्षवःपुरुषाःत्रयाश्रुत्यितत्याभिक्षुचर्याहीं.पूर्वमेवोक्ताः ॥ अतोलक्षणा-
फेनोनिर्मूलः; (चतुर्थस्कं० अ० ९ श्लो० १०) 'यानिर्वृतिस्तनुभृतांतवपादपद्मध्याना-
द्भवज्जनकथाश्रवणेनवास्यात् ॥ साब्रह्मणिस्वमहिमन्यपिनाथमाभूत्किंत्वंतकासिलुलितात्प-
ततांविमानात्'सेवमादिपुब्रह्मनिष्ठापेक्षयापरभक्तस्योत्कर्षं स्पष्टएव ॥ नचापिशब्दबलेन-
मुक्तेतरापेक्षयेत्याद्यर्थं कल्प्य ; तद्बलेनतादृशार्थस्यकथमपिसंभवाभावात्, कल्पनेमाना-
भावात् ॥ 'तपस्विभ्योऽधिकोयोगी'तिवाक्येपिशांकरगीताभाष्यादौतथाव्याख्यानस्या-
दर्शनात् ॥ वस्तुतस्तुमुक्तेष्वपिदौर्लभ्येकिमुतामुक्तेष्वितिद्योतनार्थोऽपिशब्दः ॥ तपस्व्या
दित्रयादुत्कृष्टयोगिष्वपिपुरुषोत्तमभक्तस्यैवोत्कर्षो 'योगिनामपिसर्वेषा'मित्यग्रिमवाक्येस्प-
ष्टीकृतः ॥ अतएवशाण्डिल्यसूत्रेष्वपितद्वाक्यमेवादृत्य (अ० १ सूत्र २२-२३) "तदेव-
कर्मिज्ञानियोगिभ्यआधिक्यशब्दात् ॥ प्रश्ननिरूपणाभ्यामाधिक्यसिद्धेः" इतिसर्वत-
उत्कृष्टत्वंनिर्णीतं ॥ अर्थवादाअपिस्वार्थेप्रमाणमित्यसकृदवोचाम ॥ योवेदेतिश्रुति-मागे-
चविवृता ॥ 'यावानर्थ'इतिवाक्यंचनतत्समानार्थमितिवक्ष्यामः ॥ कानिचिदस्मद्ग्रंथवाक्या-
निपुराणवाक्यत्वेनजानन्सर्वज्ञमन्यउपहसनीयोऽसि ॥ लीलास्वादस्येतरापेक्षयोत्कर्षश्रुत्या-
दिसमतमदीदृशामदर्शयिष्यामश्च ॥ एतेनमुक्तानामित्यादिविरोधाद्येत्यलमित्यंतंखंडितं ॥
अधिकंमूलेस्पष्टं ॥

यदपियदित्यादिना टीकाकृदुक्तंकिंचिदनूद्यतच्चेत्यादिनाअस्मि-
न्मार्गइत्यादिनोक्तानांपदार्थानामेवशास्त्राप्रसिद्धतयातत्क्रमस्यशास्त्री-
यत्वाभावेविप्रतिपत्त्यभावादितिजगाद तत्रसप्रष्टव्यः-मार्गइत्यादि-

नोक्तेषुमार्गेष्वपिशरणागत्याचार्यकृष्णादिषुपदेषुकस्यार्थः शास्त्रेनप्रसिद्धः? 'एषनिष्कंटकः पंथामामेकंशरणंव्रज' 'आचार्यवान्पुरुषोवेदे'त्यादौसर्वेषांपदार्थानांप्रसिद्धत्वात्तस्माच्छास्त्राभ्यासेत्वयायत्नः कर्त्तव्योविनाशास्त्राऽभ्यासंप्रलपन्नुपेक्ष्योऽसि । यत्तुभगवत्कृपांकुरस्योद्बोधंप्रतिहेतुत्वेऽपसिद्धांतईश्वरेच्छायास्त्वन्मतेहेतुत्वात् द्वारभूतेत्यादित्वसंगतं; 'समित्पाणिःश्रोत्रियंब्रह्मनिष्ठ'मित्यादिश्रुतिविरोधादित्याद्युक्तं,-तदपितुच्छं; भगवत्कृपायाइच्छाविशेषरूपायाईश्वरेच्छाभिन्नत्वेमानाभावात् किंचघटस्यजलाहरणंप्रत्यन्नस्यतृप्तिंप्रतिहेतुत्वेपीश्वरेच्छायास्तत्रतत्रहेतुत्वस्वीकारेण नतस्याहेतुत्वापलापः संभवति श्रीमदाचार्यकुलस्यद्वारभावोऽपि 'समित्पाणिः श्रोत्रियंब्रह्मनिष्ठ'मित्यादिश्रुत्युक्तमार्गेणोपसन्नस्येवेतिनतादृशश्रुतिविरोधः । अतएवतत्रगुरुणापि "यमेवैषवृणुतेतेनलभ्यः" 'अप्रमत्तेनवेद्धव्यंशरवत्तन्मयोभवेदि'त्यादिनाशरणागतिरेवोपदिष्टेति ॥

सहृत्ताक्षेपत्तुटीकाकृतेत्यादिश्रुतिविरोधादित्यंतभागखंडयंति-यदपीत्यादिना उपदिष्टेतीत्यंतेन ॥ अयंभावः-तेनानूद्यमानेषुटीकाभागेषुसर्वोत्तमत्वभावनमित्यादौद्दढत्वभावनमित्यादय.पाठभेदास्तुतत्रतत्रप्रायेणोपेक्ष्यंते ॥ तत्तुतत्रेत्यादि अभावादित्यंतं तदबोधात् । तत्रोक्तानाभगवन्मार्गतद्रुचिप्रभृतीनांश्रीभागवतादिशास्त्रप्रसिद्धत्वात् । तत्र (स्कंध ४ अ० २ श्लो० ३१) 'एषएवहिलोकानांशिव पंथा सनातनः ॥ यंपूर्वेचानुसतस्थुर्यत्प्रमाणंजनार्दन. ॥ तद्ब्रह्मपरमंशुद्धंसतांवर्त्मसनातन'मिति । (स्कंध ३ अध्याय २९ श्लो० ७) 'भक्तियोगोबहुविधोमार्गैर्भामिनिभाव्यते ॥' एवमादौभक्तिमार्गस्ववर्णन (स्कंध ४ अ. २९ श्लो० ४६) यदायमनुगृह्णातिभगवानात्मभावित. ॥ भक्तिसूत्र (अध्या० २ आ० १ सू० ४९) "मुख्यंतस्यहिकारुण्यं" एवमादौकृपाया-एवसर्वनिदानत्वं (स्कंध १ अ० ५ श्लो० २५) 'एवंप्रवृत्तस्यविशुद्धचेतसस्तद्धर्मएवात्मरुचि.प्रजायते ॥' इत्यादौतद्रुचि. (स्कंध ३ अध्याय २३ श्लो० ५५) 'सङ्गोयस्संसृतेर्हेतुरसत्सुविहितोऽधिया । सएवसाधुषुकृतोनिःसङ्गत्वायकल्पते ॥' (अध्या० २५ श्लोक० २४) 'तएतेसाधवः साध्विसर्वसङ्गविवर्जिता ॥ सङ्गस्तेष्वथतेप्रार्थ्यः सङ्गदोषहराहिते'इत्यादौसत्सङ्गस्यश्रेयोहेतुता ॥ छांदोग्येश्वेतकेतुविद्यायां "आचार्यवान्पुरुषोवेद" । (स्कं० ११ अ० २ श्लो० ३७) 'तन्माययातोबुधआभजेत्तंभक्त्यैकयेशंगुरुदेवतात्मा ॥' (अ० १८ श्लो० ३८) 'अजिज्ञासितमद्धर्मोगुरुंमुनिमुपाव्रजेत् ॥' (स्कन्ध ११ अ. ३ श्लो० २१) 'तस्माद्गुरुंप्रपद्येतजिज्ञासु.श्रेयउत्तमम् ॥ शाब्देपरेचनिष्णातंब्रह्मण्युपशमाश्रयम्' इत्यादौगुरुद्वाराप्रवेशः ॥ गीता (अ० १८) 'सर्वधर्मान्परित्यज्यमामेकंशरणंव्रज ॥' (स्कं० ११ अ० ५ श्लो० ४१) 'देवर्षिभूताप्तनृणांपितृणांनकिंकरोनायमृणीचराजन् ॥ सर्वात्मनायःशरणंशरण्यंगतोमुकुन्दंपरिहृत्यकर्त्तुम् ॥' (अ० १२

श्लो० १५) 'मामेकमेवशरणमात्मानंसर्वदेहिनां ॥ याहिसर्वात्मभावेनमयास्यात्वकुतो-भयः ॥' यास्यसेह्यकुतोभयमितिवापाठः ॥ इत्यादौशरणागतिः ॥ 'भजंत्यनन्यमनसः' 'ससर्वविद्भजतिमा'मित्यादौशुद्धश्रीकृष्णभजनंचसिद्धमेवेतिशास्त्रीयत्वएवनविप्रतिपत्तिः ॥ कृपायां परन्तु.स्वमहात्म्येच्छारूपायामिच्छात्वानपायात्किंचेत्याद्यपास्तं ॥ सत्संगादिकारण-परंपरास्वीकारेऽपीशेच्छायाघटादिकंप्रतीवनिदानत्वमक्षतं, द्वारभूतेत्यादितुसंगतमेव; मुंडकश्रुत्यादिभिरेवकारादिनागुरूपसत्तेरावश्यकतायाबोधनात् । आधुनिकगुरुषुतश्रुतश्रो-त्रियत्वब्रह्मनिष्ठत्वादीनामशेषाणामेकत्राप्रत्यक्षत्वाच्छास्त्रविरोधवारणायतेषांद्वारभूत-त्वमेवोच्यते ॥ यद्द्वाराश्रीमदाचार्यचरणाएवोपदिशंतीतिवस्तुतस्तेषामेवोपसत्तिः ॥ तेषुतुश्रुतिस्मृतिपुराणोक्तलक्षणानांसमन्वयोऽस्तीतिनकोपिविरोधः ॥ इदानींतनानांद्वार-भूततायाअप्यनादरेसंपूर्णलक्षणशालिगुरोःसंप्रतिसर्वमार्गेष्वलभ्यप्रायतयाभक्त्यादिसंप्र-दायाएवोच्छिद्येरन् ॥ अतःशास्त्रोक्तानांयजनश्राद्धाद्यर्हब्राह्मणलक्षणानामशेषाणामिदानींत-नेषुदुर्लभतमत्वेऽपियथोपलभ्यंतत्तैरेवतत्तत्कर्मनिर्वाहइवपरमपुरुषार्थरूपभगवद्भक्तितद्दी-क्षादिनिर्वाहोद्वारभूतैरवश्यंकर्तव्यः ॥ एतच्चसर्वमुपदेशशंकानिरासवादेश्रीपुरुषोत्तम-चरणैस्सत्सिद्धांतमार्तंडेमयाचप्रपंचितमितिततोऽवधेयं ॥ विनेति । शास्त्राभ्यासविना अथवा (स्कं० १० अ० ४ श्लो० ४६) 'आयुःश्रियंयशोधर्मंलोकानाशिषएवच ॥ हंतिश्रेयांसिसर्वाणिपुंसोमहदतिक्रम'इतिश्रीभागवतादिपुसरणास्त्वविनाशस्याश्रुभूतमभ्या-समभितःशेषं । सद्गुरुणेति । मुंडकेअंगिरसा "यमेवैषवृणुतेतेनलभ्यः ॥ प्रणवोधनुः-शरोह्यात्माब्रह्मतल्लक्ष्यमुच्यते ॥ अप्रमत्तेनवेद्धव्यंशरवत्तन्मयोभवेत्" इत्यादौवर्ण-गम्याकृपातन्मयत्वगम्यातदेकप्रतिपत्तिश्चेत्यादिकंदर्शितमित्यर्थः ॥ शरणागतिरेवेत्येव-कारोऽप्यर्थे ॥

ब्रह्मभावादुत्तरमपिफलांतरस्य "योवेदसोऽश्नुतेसर्वान्कामान्सहे"-त्यादिश्रुतिसिद्धत्वाद्यत्त्वित्यादिकमसंगतं ॥ यच्च (यमेवैषवृणुतेतेन-लभ्यइतिश्रुतावेवकारोज्ञानिनोनिरासायेति,-तन्न; ज्ञानीत्वात्मैवमेम-तमितिभगवदुक्त्याज्ञानिनआत्मत्वेनप्रतीयमानत्वा) दित्युक्तं,-तद-पिनशोभनं; "नायमात्माप्रवचनेनलभ्योनमेधयानबहुनाश्रुतेने"त्या-दिनानिषेधंकृत्वावरणमात्रलभ्यत्वप्रबलश्रुतिविरोधेनतादृशस्मृतेर्ज्ञा-

---

यत्तु टीकाकृता भगवत्कृपाङ्कुरस्य स्वतः सत्कारेण भगवन्मार्गीयसंगादिनोद्बोधो मार्गेऽस्मिन् रुचिस्ततोऽस्मिन्प्रवेशेच्छा तत्राप्यङ्कुरस्य दृढत्वेऽस्मिन्मार्गे दृढत्वभावनं ॥ प्रवेशश्च द्वारभूतश्रीमदाचार्यकुलगुरुद्वारा शरणागतिस्ततः शुद्धकृष्णं भजेदित्युक्तं,-तन्नयु-क्तम्; अस्मिन्मार्गे इत्यादिनोक्तानापदार्थानामेव शास्त्राप्रसिद्धतया तत्क्रमस्य शास्त्रीयत्वा-भावे विप्रतिपत्त्यभावात् ॥ किञ्च भगवत्कृपाङ्कुरपदबोध्यस्योद्बोधंप्रति तस्यतस्य हेतुत्वं वद-तोऽपसिद्धान्तः; ईश्वरेच्छामात्रस्य त्वन्मते तत्रापि हेतुत्वात् ॥ द्वारभूतेत्यादित्वसङ्गतं; 'समित्पाणि श्रोत्रियंब्रह्मनिष्ठ'मित्यादिश्रुतिविरोधात् ॥

निप्रशंसाप्रतिपादकत्वकल्पनात् विरोधेत्वनपेक्षस्यादसतिह्यनुमान-मितिन्यायाच्च, श्रुतेरसंजातविरोधत्वात्, मुक्तिंददातीतिवाक्याद्भक्तेर्ज्ञानादिभ्यआधिक्यनिश्चयात् । नचतस्यस्तुतिपरत्वमितिवाच्यं, तथात्वेऽप्याधिक्यबोधकत्वानपायात् पृथक्करणंचपुनर्जीवरूपेणाविर्भावः । सचभेदाभावेपिसंभवति । तेनतत्तुवास्तवभेदाभावइत्यसंगतं । पृथक्त्वमपिनभेदादन्यदितियदुक्तं,-तदपिनकिंचित्, 'अन्योन्याभावतोनास्यचरितार्थत्वमिष्यते ॥ तस्मादयंपृथक्चेतिप्रतीतिर्हि-विलक्षणे'त्यादिनातस्यान्योन्याभाववैलक्षण्येप्रतीते·प्रमाणतयोपन्यस्तत्वात् । एतेनप्रमाणाभावादितिनिरस्तं । यदपि "संपद्याविर्भावः-स्वेनशब्दादि" तिसूत्रव्याख्यानमसदुक्तरीत्यायत्त्वित्यादिनाकिंचिद-नूद्यतन्नयुक्तमित्यादिनातत्रदोषप्रदर्शनं (क्रियतेइतिपदाध्याहारेच-गौरवात् प्रथमान्तार्थस्यतिङं तेनान्वयनियमोनसमूलोयेनक्रियतइति-पदमध्याह्रियतइत्युक्तं तच्चनहिक्रियाविनिर्मुक्तवाक्यमस्तीतिभाष्या-नवगमादधिगतपाणिनीयगोनर्दीयसर्वस्वइतिपूर्वंप्रतिज्ञातंविपरीतत्वे-नदर्शयति ॥ त्रयःकालाइत्यदावपिक्रियाध्याहारस्यपाणिनीयशास्त्र-संमतत्वात्त्रय·कालाइत्याद्यसंगतंस्वशब्दस्यपुरुषोत्तमबोधकत्वेप्रमा-णाभावादितियदुक्तं,-तदपिनकिञ्चित्, ब्रह्मस्यैवग्रहणं तस्यैवभगवता 'अक्षरादपिचोत्तम'इत्यादिनापरत्वेनप्रतिपादनात् तद्व्याख्यानरूपायांऋच्यपितस्यैवग्रहणंयुक्तंनान्यस्येतिशब्दादित्यनेन 'योवेदनिहित'-मित्यादिश्रुतिग्रहणेप्रमाणाभावइतिचेदेपसंप्रसादइतिश्रुतिग्रहणेत-त्रस्थस्वशब्दग्रहणेपिकिंप्रमाणमितितुल्य केवलज्ञानिनांलीलास्वादो-नभवति, ज्ञानोत्तरभक्तियुक्तानांतुलीलास्वादोपिभवत्येव तेनकिंचे-त्यसंगतं । तेतुब्रह्महृदनीताइतिश्लोकस्त्वस्मन्मतएवसंगच्छते । तद्व्याख्यानंतुसुबोधिन्यामाचार्यैं प्रतिपादितं । ग्रंथगौरवभयान्नात्रोक्तं तेनैवयस्त्वित्यादिकंनिरस्तमित्यलमल्पावेशेन ॥ इति श्रीमन्मथुराधीशप्रभुचरणैकतानेनश्रीमत्प्रभुजिद्गोस्वामिस्थानस्थितेनश्रीमद्दीक्षितवंशमौक्तिकगोस्वामिश्रीवल्लभात्मजश्रीविठ्ठलनाथेनविरचितेप्राभंज-नाख्यनामग्रंथेमेयविस्तारभंगोनामप्रथमोभाग· ॥

सहस्राक्षेपत्तुब्रह्मभानमित्यादिस्पष्टमित्यत्तभागपरिहरति-ब्रह्मभानादुत्तरमित्यादिना यावत्पूर्वभागपूरण ॥ अयमर्थ -यत्तुतेनतावन्मूलमित्यादिनिश्चयायेत्यत्तमुक्त,-तदयुक्त, उद्धारादिसाधकप्रमाणानात्वयानुक्तत्वादुक्तप्रमाणानासमहितत्त्वाद्ब्रह्मभानोत्तरमुद्धारेसपः द्याविर्भावाधिकरणसतद्विषयकश्रुतीनातेतुब्रह्म हृदमित्यादिस्मृतीनाचप्रमाणत्वात् ।

फलांतरेसोऽश्नुतइत्यादिश्रुतीनांकौपीतकिपर्यंकविद्यादिश्रुत्यंतराणां'ब्रह्मभूतःप्रसन्नात्मे'त्यादिस्मृतीनांपुराभणितपुराणवचसांचतथात्वात् । विरहक्लेशे "अतसतनूंनंतदामोऽश्नुते-श्रितासइद्वहंतस्तत्समासत" इत्यादिश्रुतीनां (स्कं० १० अ० २९ श्लो० १०) दुःसहः प्रेष्ठविरहेति (स्कं० ११ अ० १२ श्लो० १०) 'निगाढमायेननमेवियोगतीमाधयोऽन्यंददृशुःसुखाये'त्यादिस्मृतीनां विरहतस्तस्यपुरुषोत्तमप्राप्तियोधिकानांसत्वाच्चभगवद्विरहेक्लेशस्यप्यरहारोलोकदृष्टिमात्रेण ॥ वस्तुतश्चानंदरूपःसः लोकेक्षुद्रेऽपिश्रृंगारेविरहंरसस्यैवेतरदलंरसस्यब्रह्मरूपत्वंचसाहित्यविदःसिद्धांतयंति ॥ स्पष्टंचेदंसाहित्यदर्पणतृतीयपरिच्छेदादौ (किंपुनर्भक्त्यंगेभगवद्विरहे । अतएवभक्तिसूत्रकारः (अध्याय २ सूत्र ४४) संमानबहुमानप्रीतिविरहेतरविचिकित्सामहिमख्यातितदर्थप्राणस्थानतदीयता-

---

यत्तु 'ब्रह्मभावंतुसंपाद्यपरमानुग्रहाद्विभुः । गृहस्थितस्वीयजीवंसमुद्धरतियत्नतः ।' इत्युक्त्वोद्धृतौपरमक्लेशः इत्यादि जगाद,—तन्निर्मूलम्; ब्रह्मभावादुत्तरमुद्धारफलान्तरयोः क्लेशस्य चोक्तप्रमाणविरुद्धत्वात्, तत्सद्भावे प्रमाणाभावाच्च ॥ तस्यतावदेवचिरं 'तरतिशोक'मित्यादिश्रुतिभिः कृतकृत्यत्वनिश्चयाच्च ॥ यत्तु 'यमेवैषवृणुतेतेनलभ्य'इतिश्रुतावेवकारोज्ञानिनोनिरासायेति,—तन्न; 'ज्ञानीत्वात्मैवमेमत'मिति भगवदुक्त्या ज्ञानिनएव स्वीकृतत्वेन प्रतीयमानत्वात् ॥ मुक्तिंददातिसकर्हिचिन्नभक्तियोगमितितु भक्तियोगस्तुतिपरं, नतु अक्षरार्थे तात्पर्यवत्तु ॥ अन्यथा भक्तियोगदानस्य सर्वथा निषेधेन तन्नाशैवोच्छिद्येत ॥ अनेकश्रुतिविरोधाच्च ॥ यत्तु समुद्धरतीत्यस्य पृथक्करोतीत्यर्थटीकाकृतः,—तत्तुवास्तवभेदाभावादसंगतं; पृथक्त्वमपितभेदादन्यत्प्रमाणाभावाद्गौरवाच्च ॥ यत्तु संपद्याविर्भाव स्वेनशब्दादितिसूत्रंस्वोक्ते ब्रह्मभावोत्तरं फलान्तरसद्भावे प्रमाणतयोपन्यस्तवान्व्याख्यातवांश्च ब्रह्मसंपद्यस्थितस्य जीवस्य अथवा सम्पद्येत्यन्तर्भावितण्यर्थं' । तथाच ब्रह्मभावं संपाद्य स्वेन पुरुषोत्तमेनाविर्भावः क्रियते ॥ एवं कथमुच्यते तत्राह—शब्दात् 'योवेदनिहितंगुहायांपरमेव्योमन्सोऽश्नुतेसर्वान्कामान्सहब्रह्मणाविपश्चिते'ति । अत्र पुरुषोत्तमसाहित्येन सर्वकामोपभोगोजीवस्य निरूपितः । सलीनस्योद्धरणंविना नसम्भवतीत्यस्मादुद्धरतीत्यर्थः ॥ तथाच श्रीमद्भागवते 'तेतुब्रह्महृदंनीताममाःकृष्णेनचोद्धृता' । ददृशुर्ब्रह्मणोलोक'मित्युक्तमिति,—तन्न युक्तम्; प्रथमव्याख्याने सम्पद्यार्थपृथक्करणाध्याहारे स्थितपदाध्याहारेच द्वितीयव्याख्यानेणिजर्थकल्पने उभयम क्रियते; पदाध्याहारेच गौरवात् ॥ प्रथमान्तार्थस्य तिङन्तार्थेऽन्वयनियमोनसमूलोयेनक्रियतेइतिपदमध्याह्रियेत ॥ 'दशावताराहरे'रित्यत्र विभागपरेश्वयः कालाइत्यत्रच तिङन्तार्थाभावात् तात्पर्याभावेन ज्ञायन्तामित्यादेरप्यध्याहारायोगात्तदर्थाननुभवाच्च ॥ यस्यापि तन्नियमाग्रहस्तन्मतेऽपि औत्सर्गिकभवतिपदाध्याहारं परित्यज्य क्रियतेइत्यस्याध्याहारे नमानम् ॥ स्वशब्दस्य पुरुषोत्तमबोधकत्वे प्रमाणाभावाच्च ॥ शब्दादित्यनेन 'योवेदनिहितंगुहाया'मित्यस्यैवग्रहणे प्रमाणाभावाच्च ॥ तस्मात्स्वेनशब्दस्यतृतीयान्तस्य सूत्रेस्वेनेत्यनुकरणम् ॥ तस्यच शब्दपदेन कर्मधारयःअनुकार्यादनुकरणस्य भेदात्स्वेनशब्दस्य गुरुत्वमितिनतद्गुरु ॥ ततश्च एवमेवैषसंप्रसादोऽस्माच्छरीरात्समुत्थायपरंज्योतिरुपसम्पद्यस्वेनरूपेणाभि-

सर्वतश्चावाप्रातिकूल्यादीनिचस्मरणेभ्योयाहुल्यात्" इत्याह अत्रैवस्वमेश्वरभाष्ये ॥ विरहो-यथागोपीना । विष्णुपुराणे (अंश ५ अध्याय १८ श्लोक १७) 'गुरूणामग्रतोवक्तुं किंब्रवीमिनन क्षम ॥ गुरव किंकरिष्यतिदग्धानाविरहाग्निना' इत्याद्यास्मृतयोदर्शिता । "तस्यतावदेवचिर" इतिश्रुतकेतुविद्यावाक्यतुप्राक्षिणींतनाप्युद्धारादिबाधक ॥ त्वद्रीत्या पिशरीरविमोक्षोत्तरमविलम्बितसपत्तिप्रतिपादकत्वादितिसपत्युत्तरकालिकाविर्भावादौतेन किमायास्यति "तरतिशोकमात्मवित्" इतिभूमविद्यावाक्यचाविद्याकार्यस्यशोकस्यतरण-घक्ति ॥ नत्वानदरूपस्यभक्तस्यविरहस्य ॥ प्रत्युतभूमविद्यायामेवसर्वतआत्मादेशादौ-प्रभुचरणे सन्निवृत्तइत्यधिकतद्ग्रन्थेभ्योज्ञेय ॥ यच्चयत्तुयमेवेत्यादिविरोधाच्चेत्यत,-तन्न, यमेवेतियात्म्यतृतीयमुण्डकद्वितीयखण्डेऽस्ति, तत्र "सवेदैतत्परमब्रह्मधामयत्रविश्वनिहितमा तिशुभ्र ॥ उपासतेपुरुषयेह्यकामास्तेशुक्रमेतदतिवर्ततिधीरा ॥" इतिधाम्नोऽक्षरत परपुरुष "दिव्योह्यमूर्त पुरुष" इतिप्रागुक्त 'पुरुष सपर पार्थ'त्यादिस्मृतिप्रसिद्धपुरुषो त्तमयेअकामा कैवल्यमोक्षमप्यनिच्छतउपासतेभजन्तितेधीरा विरहादिसोढार शुक्रशुक्र-निरविद्य एतत् प्रागुक्तमक्षर अतिवर्तंति । सपद्याविर्भावादतिक्रम्यपरगच्छति ॥ इतिपुरु षोत्तमस्तदुपासनचप्रक्रम्यद्वितीयचिपरोपासकस्यपुरुषोत्तमएवसर्वकामसमाप्तिमुक्त्वापठ्यते "नायमात्माप्रवचनेनलभ्योनमेधयानबहुनाश्रुतेन । यमेवैषवृणुतेतेनलभ्यस्तस्यैषआत्मा वृणुतेतनूस्वा ' इति । अत्र अयप्रागुक्तपुरुषाख्यइत्यात्मविशेषणमक्षरव्यावर्तनाय केवल-ज्ञानसाधनानिचश्रवणादीनि । तत्रमुख्यतयानिदिध्यासनतदधिकारकप्रवचनस्यमननहेतु-मेधाया श्रुतस्यचनिषेधात्प्रकृतेकेवलैस्सै परलाभोनिषिद्ध । अतोयमेवेत्येवकार केवलज्ञानि-व्यवच्छेदार्थइतियुक्तमेव ॥ तनूस्वामितिरूपोपयोगोऽपिभक्तस्यैव ॥ एतदग्रे "नायमा-

---

निष्पद्यते इति श्रुतिस्थतृतीयान्तस्वशब्दादितिसूत्रार्थ ॥ सच मुक्तस्येति स्वस्वरूपेणेतिच अर्थात्तात्पर्याच्च लभ्यते ॥ नैव तव किंचिद्भ्रमक भाति ॥ किंच त्वन्मते ज्ञानिनोलीलास्वादो-नभवति किंतूपासकस्य ॥ सोऽश्नुतेसर्वानितितुज्ञानिपरं नोपासकपरं, योवेदेत्युपक्र-मात् ॥ ज्ञानिनश्च त्वन्मते न पुरुषोत्तमप्राप्तिरिति कथ पुरुषोत्तमेन सहेतिव्याख्यायते ? ॥ तस्माद्ब्रह्मणासहइत्यस्य स्वस्वरूपभूतेन ब्रह्मणा युगपदित्यर्थ ॥ सचकामित्यादौ सशब्दस्या-निन सहशब्दस्य युगपदर्थताया प्रसिद्धत्वात् ॥ कामाना सर्वेषामपि ब्रह्मणोऽभिन्नत्वा-द्ब्रह्मावाप्तौ तदवाप्ते सुलभत्वात् ॥ अतएव 'यावानर्थउदपानेसर्वत सम्प्लुतोदके । तावान्सर्वेषु-वेदेषुब्रह्मणस्यविजानत ' इत्यनेन तुल्यार्थता ॥ त्वन्मतेतु सर्वपदसंकोच स्याद्गीतादिकानु-पयोगात् ॥ यस्तु भागवतश्लोक सोऽपि न त्वदुक्तार्थकोगोपानां पुनरागमनदर्शनात् तस्मात् 'दर्शयामासलोकस्व मित्युक्तेतत्रकथमावाकोश्मायाविन्नुब्रह्मह्रदनीतामग्नाब्रह्मणोलोकदहशु ॥ पुनश्चनब्रह्मह्रदात्कृष्णेनोद्धृताइत्युक्तम् ॥ अक्रूरोयत्र दृष्टवांस्तस्य यमुनाह्रदस्यब्रह्मह्रदइति-नामेत्यादि श्रीधरकृततट्टीकाया स्पष्टम् इत्यलम् ॥ ११ ॥ ४४ ॥ इतिश्रीपरमहंसपरिव्राज काचार्यश्रीमत्स्वरूपानन्दस्वामिशिष्यश्रीमत्सदानन्दस्वामिकृतेप्राभञ्जनसाहस्राम्बेगेपविस्तारोनाम प्रथमोभाग समाप्त ॥ १ ॥ ॥ ६ ॥ ॥

रमाप्रलहीनेनलभ्योनचप्रमादात्तपसोवाप्यलिंगात् ॥ एतैरुपायैर्यततेयस्तुविद्वाँस्तस्यैष आत्माविशतेब्रह्मधाम ॥" इत्यादौविदुषोऽप्युपायैर्यत्नः भक्तिरूपंयत्नंसत्त्वाभिभवजन्यप्रमादाभावः । भक्तिलिंगंसंतापश्चेत्यादिकमपितथैवसतिसंगच्छते एवंकठवल्लीष्वपिद्वितीयवल्ल्यांयमेवैतिवाक्यमस्ति । तत्रापि (स्कंध ६ अ० ३ श्लो० २१) 'द्वादशैतेविजानीमोधर्मंभागवतंभटाः ॥ गुह्यंविशुद्धंदुर्बोधंयंज्ञात्वामृतमश्नुत'इत्यादिपुराणोपबृंहितं "कस्तंमदामदंदेवंमदन्योज्ञातुमर्हती" त्यादिकंपरभक्तिज्ञापकमस्तीत्युक्तमेवयुक्तं ॥ ज्ञानीत्वात्मैवेतिगीतावाक्यंतु'चतुर्विधाभजंतेमामि'त्युपक्रमात् 'तेषांज्ञानीनित्ययुक्तएकभक्तिर्विशिष्यत'इत्यादिमध्यमवाक्याच्चासंदिग्धमेवज्ञानिभक्तपरं, नतुत्वदिष्टार्थकं ॥ अत्रमूलेसमाधिस्तुपिशाच पिशाचभापयेतिन्यायाश्रयात् । वस्तुतस्तुगीताश्रुत्यर्थनिर्णायिकेतिसिद्धंनिबंधादौ–(स्कं० ५ अ० ६ श्लो० १८) 'राजन्पतिगुरुरलंभवतांयदूनांदैवंप्रियः कुलपति क्वचकिंकरोवः ॥ अस्त्वेवमङ्ग भगवान्भजतांमुकुंदोमुक्तिददातिकर्हिचित्स्मनभक्तियोगं' इतिवाक्यंतुज्ञानांगतयाभक्तिकुर्वद्भ्योमुक्तिददाति, नतुफलरूपभक्तियोगमित्यर्थकं । वस्तुस्तुतिमात्रपरत्वंश्रीधरस्वामिभिरपिनिरस्तं । किंचतथात्वेप्यत्रास्तवस्तवस्यनिंदात्वादक्षरार्थेतात्पर्यैस्वीकार्यमेव ॥ असत्तंत्रेऽर्थवादानामपिप्रामाण्यं निबंधावरणभंगपूर्वमीमांसाभाष्यादौप्रपंचितं ॥ प्रकृतवाक्यापपाठोक्तिस्त्वज्ञानात् साधनभक्तेरवांतरफलं ज्ञानंमुख्यफलंभक्तिश्चमन्यमानानामन्यमानसानामस्माकमनुग्रहस्यभवादाशासफलैव ॥ तृतीयस्कंधोपिपंचविंशाध्याये (श्लो० ३६) 'तैर्दर्शनीयावयवैरुदारविलासहासेक्षितवामसूक्तैः ॥ हृतात्मनोहृतप्राणांश्चभक्तिरनिच्छतोमेगतिमण्वींप्रयुंक्त'इतितदेवोक्तंअत्राण्वीगतिर्मुक्तिरितिसर्वसंमतं ॥ एतदग्रे (श्लो० ३७) 'अथोविभूतिंममभागवतींमायामथैश्वर्यमष्टांगमनुप्रवृत्तम् । श्रियंभागवतींवास्पृहयंतिभद्रांपरस्यमेतेऽश्नुवतेतुलोके ॥' इत्यादिना (श्लो० ४०) 'भजत्यनन्ययाभक्त्यातान्मृत्योरतिपारये'त्यंतेनानन्यभक्तानांलीलास्वादादिफलमुक्तमेव ॥ अत्रानेकश्रुतिविरोधइतितुमनोरथमात्रं ॥ अन्नैवाशेषश्रुत्याशयविषयतायानवाध्यादिग्रंथपर्यालोचनेस्पष्टतयालाभात् ॥ अत्रकाश्चित् श्रुतयोविद्वन्मंडनसमासावप्युक्ताः ॥ कठवल्लीष्वपि (वल्ली. ५ म० १२) "एकोवशीसर्वभूतांतरात्माएकंरूपंबहुधाय करोती" तिभक्तकामपूरणार्थस्वरूपस्यबहुधाकरणंयद्वक्ष्येत्यादावुपबृंहितमुक्त्वा (म० १३) 'नित्योनित्यानांचेतनश्चेतनानांएकोबहूनांयोविदधातिकामान्" इत्येकस्यैवमुक्तबहुभक्तजीवकामपूरकत्वतद्दर्शनाच्छाश्वतशांतिः (म० १४) "तदेतदितिमन्यंतेनिर्देश्यंपरमंसुखं" इतितादृशमुक्तेरगणितनिरतिशयानंदसाक्षात्काररूपत्वंचाभिधीयते ॥ भृगुप्रपाठकेपि "आनंदमयपुरुषोत्तमसंक्रमानंतरं "कामान्नीकामरूप्यनुसंचरन् । एतत्सामगायन्नास्त" इतिकामाऽन्नत्वादिकंफलंश्राव्यते । एवंभूमविद्यादिष्वनेकत्रद्रष्टव्यं ॥ एवंविधश्रुतिभागेष्वनुसंचरणादिकंभजनरूपमेवेतिदिक् ॥ उद्धरणंतुपृथक्करणंनचपृथक्त्वंभेदः ॥ तार्किकैरपिपृथक्त्वंगुणविशेष । भेदोऽभावविशेषइतिस्वीकारात् । (कारिका० ११५) 'अन्योन्याभावतोनास्यचरितार्थत्वमिष्यते ॥ तस्मादयंपृथगेतिप्रतीतिर्हिविलक्षणे'तिगुणनिरूपणे विश्वनाथपंचाननेनोभयोर्विलक्षणानुभवरूपमानमदर्शि । अत्रमुक्तावल्यामपितेन "ननुशब्दवैलक्षण्यंनार्थवैलक्षण्यमितिचेन्न, विनार्थभेदं

घदात्पृथगितिवद्दोनेत्यत्रापिपंचमीप्रसंगात् तस्माद्यदर्थयोगेपंचमीसोर्थोनन्तर्थान्योन्याभावतोभिन्नोगुणान्तरंकल्प्यते" इति । वस्तुतस्त्वत्रमार्तंडकारिकायामुद्धरणंतट्टीकायांपृथकरणंचसंपत्त्युत्तरंपुनरक्षराद्विभागरूपआविर्भावएवविवक्ष्यते ॥ सूत्रकृताऽऽविर्भावस्यैवाभिधानात् । एतेनयच्चित्यादि गौरवाच्चेत्यंतंनिरस्तं । यच्चसंपद्याविर्भावसूत्रस्यव्याख्यानंमार्तंडटीकास्थंकिंचित्पाठभेदेनानूद्यतद्दूषणायतन्नयुक्तमित्यादि प्रमाणाभावाच्चेत्यंतमुक्तं,–तदेवनयुक्तं ॥ अत्रहिविषयवाक्यंनब्रह्मवल्लीमात्रं । अपितूत्तरदहरविद्यादिकमपिब्रह्मवल्ल्यां संपत्तेर्वाचनिकत्वाभावात् ॥ अतस्तादृशविषयवाक्योपस्थापनायैवतत्स्थस्यसंपद्येतिपदस्यनिर्देशः ॥ किंचसंपत्तेःसाधनसाध्यतयातत्रजीवस्यैवकर्तृत्वाज्ज्ञानमार्गेऽपितौल्यात्पुरुषोत्तमस्यतत्रानुपयोगादपितथानिर्देशः ॥ अन्यथासंपाद्येत्येववदेत् ॥ केषुचिच्छांकरभाष्यपुस्तकेषुतुसंपाद्याविर्भावइत्यपिपाठोदृश्यते ॥ सोऽप्यस्माकमनुगुणः । वस्तुतस्तुविषयवाक्यानुरोध्येवपाठःप्रामाणिकः ॥ अतःस्थितपदाध्याहारोनक्लेशः ॥ विषयवाक्येल्यपासंपत्तेः पूर्वकालिकत्वंलभ्यते, अतःसंपद्यस्थितोभिनिष्पद्यतआविर्भवतीतितत्रापिस्थितेरार्थिकत्वात् ॥ समानकर्तृकतिङ्रहितेपुत्वाल्यप्घटितेषुचित्रेयुद्धंविलोक्याहंचापलादेत्यवंचितैः तत्रासन्निरिहोच्यद्भिः क्ष्वेडाहेपितवृंहितैरित्यादिवाक्येष्वनेकत्रस्थितपदाध्याहारस्यसुप्रसिद्धेश्च ॥ अध्याहारमात्रस्यैवसूत्रेऽनादरणीयत्वे "सर्वत्रप्रसिद्धोपदेशात् ॥ कंपनात्" इत्याद्यधिकरणानि कथं योज्यानि ? किंतुजिज्ञासासूत्रेऽथशब्दमानंतर्यार्थकंकल्पयित्वातन्निरूपकतयाकैश्चिद्वेदाध्ययनमितरैःपूर्वतंत्राध्ययनमपरैःसाधनचतुष्टयंचाशक्यैकतरपक्षनिश्चयमध्याह्रियते ॥ तादृशस्थलएवाध्याहारक्लेशः ॥ तथाचसाधनचतुष्टयाद्यध्याहारक्लेशान्सुखेनस्वीकुर्वंस्त्वंताध्याहारैरानंदमयाद्यधिकरणान्यप्यन्यथानयन्किमित्यक्लिष्टंवृथा क्षिपसि ? एवंसंपद्येत्यस्यान्यथासंगत्यनुपपत्त्या एषसंप्रसादइतिश्रुतावपिसंपद्यर्थंप्रतिजीवस्यैवकर्तृतयाप्रकृतेस्थितस्सजीवस्येत्यर्थादेवोपतिष्ठेत ॥ अन्यथाजिज्ञासासूत्रादौजिज्ञासुभिरित्यपिनसंबध्येत ॥ प्रकृतसूत्रेजीवात्मोपस्थितिस्त्वाप्यावश्यकी ॥ एवं (अध्याय २ पाद ३ सूत्र ४१) "परात्तुतच्छ्रुते" रितिन्यायेन कारयति 'मत्तः सर्वंप्रवर्तत' इतिश्रुतिस्मृतिभिश्चसर्वप्रतिवस्तुतोभगवतएवप्रयोजकत्वादत्रांतर्भावितोण्यर्थइतिपक्षोपिनक्लिष्टः ॥ शंभ्वादिशब्देषुभवत्यादेरंतर्भावितण्यर्थतायाभट्टोजीदीक्षितादिभिरक्लेशतःस्वीकारात् अतएवव्याख्यासुधाकारोपिशंभुरीशःपशुपतिरित्यत्र "शंसुखंभवतिअंतर्भावितण्यर्थान्मितंद्वादित्वाड्डुः । यत्तुशंभयस्मादितिस्वामिमुकुटौ,–तन्न; कर्तरिकृतोविधानादपादानेडुप्रत्ययाभावात्" इतिव्याचष्टे । संपाद्येत्यनुक्त्वातथाप्रयोगस्त्वानुपूर्वीसाम्येन स्वार्थस्याप्यपरित्यागेनचविषयवाक्यस्योपस्थापनाय ॥ वाक्यस्यक्रियाविनिर्मुक्तत्वासंभवात्सूत्रेस्वेनेतितृतीयान्तकर्तृपदनिर्देशाच्चोभयत्रक्रियतइत्यध्याहारोपिनगुरुः । जिज्ञासासूत्रादौकर्तव्यादिपदान्यध्याहरतां भवतांक्वयमिहैवाक्षमा ? ॥ यच्चप्रथमांतार्थेत्याद्युक्तंतेनभवतांजिज्ञासासूत्रएवाध्याहारासंभवोमतांतरेणतत्संभवेप्यौत्सर्गिकभवतिपदस्यसासिद्ध्येत । नतुकर्तव्यपदस्यकथंचिदपिसः

---

१ चन्द्रभारतेउत्तरगोग्रहे अर्जुनंप्रतिविराट्पुत्रस्योक्तिरियं ।

कर्तृबोधकतृतीयापदानुपादानात् । विध्यर्थकप्रत्ययांतस्यैवाध्याहारकल्पनेमहागौरवाच्च ॥ (अ० २ पा० ३ सू० ४६) "प्रातिपदिकार्थलिंगपरिमाणवचनमात्रेप्रथमे" त्यत्र-महाभाष्ये "अथवाभिहितेप्रथमेत्येतल्लक्षणंकरिष्यते" इतितिङ्कृत्तद्धितसमासैरभिहिते-कर्त्रादौप्रथमांस्वीकृत्यक्रियापदशून्येवृक्षःप्लक्षइत्यादावभिधानाऽभावात्प्रथमायाअनुपपत्ति-माशंक्य "अस्तिर्भवन्तीपरःप्रथमपुरुषोऽप्रयुज्यमानोऽप्यस्तीति । वृक्षःप्लक्षः । अस्तीति-गम्यते" ॥ इत्युच्यते । अग्रेअभिहितलक्षणेदोषमुद्भाव्य "एवंतर्हितिङ्समानाधिकरणे-प्रथमेत्येतल्लक्षणंकरिष्यते । तिङ्समानाधिकरणइतिचेत्तिङोऽप्रयोगेप्रथमाविधिः ॥ तिङ्स-मानाधिकरणइतिचेत्तिङोऽप्रयोगेप्रथमाविधेया । वृक्षःप्लक्षइति । उक्तंपूर्वेण ॥ किमुक्तं ? अस्तिर्भवन्तीपरःप्रथमपुरुषोऽप्रयुज्यमानोप्यस्तीति । वृक्षःप्लक्षः । अस्तीतिगम्यते" । इत्युक्तं । एवंचतिङ्समानाधिकरणएवप्रथमायाविधानस्यभाष्यवार्तिकयोस्स्वीकारात् प्रथ-मान्तार्थस्यतिङन्तार्थेऽन्वयनियमःसमूलएव ॥ अतएवात्रकैयटः एवन्तर्हीति । यथादेवदत्तः पचतीति ॥ प्रासादेआस्तइत्यादौतुव्यधिकरण्यात्प्रथमायाअभावः । तिङोऽप्रयोगइति । नहितिङन्तपदप्रयोगमन्तरेणतत्सामानाधिकरण्यसद्भावः । उक्तंपूर्वेणेतिआक्षिप्तक्रियापदा-पेक्षंसामानाधिकरण्यमस्ति" इतिसामान्यतआक्षिप्तक्रियापदापेक्षंसामानाधिकरण्यंचक्ति । नत्वस्तिपदार्थएवप्रथमान्तार्थोन्वयनियमंदर्शयत्यत.क्रियतइतिपदाध्याहारोनायुक्तः ॥

अत्रविवरणे—"उक्तंपूर्वेणेति । पूर्वग्रंथेनेत्यर्थः । पूर्वेणाऽचार्येणेतिकश्चित्" इत्यादि-व्याख्यातम् ॥ इत्थंचपूर्वाचार्योक्तिरप्युक्तान्वयनियमेमूलम् ॥ भाष्येभवन्तीपरइत्यस्यतु-भवंतीवर्त्तमानत्वादिबोधक.कालस्तत्परइत्यर्थः (पा० ३ सू० १२८) "तृभूवहिवसि-भासिसाधिगडिमंडिजिनन्दिभ्यश्च" इत्यौणादिकसूत्रेणदशभ्योझच्स्यात्सचपित् । तेन-भवन्तःकालइत्युदाहृतम् । तरन्तीनौकेतिवत्पित्वात्तुडोपिभवन्तीतिसिद्धम् ॥ औत्सर्गिकं-भवतिपदाध्याहारमितिसहस्राक्षोक्तिस्तुअस्तिर्भवतिःपरइत्यशुद्धपाठजनितभ्रममूलिका ॥ अतोदशावताराश्रयःकालइत्यादावपिसन्तीत्यार्थिकंसंबध्यते । तथात्रापिक्रियतइति । अस्तिपदमात्राध्याहारेस्वेनेतिकर्तरितृतीयायाअसंगत्यापत्तेः । किंच (अ० २ पा० १ सू० १) समर्थसूत्रेभाष्ये "आख्यातं साव्ययकारकविशेषणंवाक्यम् ॥ आख्यातं साव्ययं सकारकं सकारकविशेषणंवाक्यसंज्ञंभवतीतिवक्तव्यम् ॥ साव्ययं । उच्चैःपठति नीचैःपठति ॥ सकारकम् ॥ ओदनंपचति ॥ सकारकविशेषणम् । ओदनंमृदुविशदं पचति ॥ सक्रियाविशेषणंचेतिवक्तव्यं । सुष्ठुपचति । दुष्ठुपचति ॥ अपरआहआख्यातं-सविशेषणमित्येव । सर्वाणिह्येतानिक्रियाविशेषणानिएकतिङ् ॥ ॥ एकतिङ्वाक्यसंज्ञं-भवतीतिवक्तव्यम् । ब्रूहिब्रूहि" इतिवाक्यलक्षणमुक्तंप्रथमलक्षणापेक्षयाऽऽख्यातंसविशे-षणंवाक्यमित्येवमुख्यंलक्षणम् । इदंचलोकशास्त्रसाधारणम् यत्तुकैयटेनास्यस्वशास्त्रपारि-भाषिकत्वमुक्तंतत्प्रमादादितिनव्याः । अत्राऽख्यातपदंक्रियाबोधकपरंतेनत्वयाशयितव्यं-भोक्तव्यमित्यादौतादृशसुबन्तघटितत्वेपिनाऽव्याप्तिः । विशेषणपदंचसाक्षात्पारंपरिकोभय-परं, अतोनद्यास्तिष्ठतिकूलइत्यादौ पारंपरिकस्यापिनद्यादेःसमानवाक्येन्त.पात.कारकविशेष-णानामपिपरंपरयाक्रियाविशेषणत्वमभिप्रेत्य "सर्वाणिह्येतानिक्रियाविशेषणानी" त्युक्तंभा-

व्यवहृता । इहचानेकपदमेकवाक्यपरंपदानांभेदेसतिपरस्परसाकांक्षतयाविलक्षणवाक्यार्थबोधजनकत्वात् । अतएव (अ० पा० सू०) "अर्थैकत्वादेकंवाक्यंसाकांक्षंचेद्विभागेस्यात्" इतिजैमिनीयमनुसृत्यकविसिंहहरिणा 'साकांक्षावयवंभेदेपरानाकांक्षशब्दकं ॥ क्रियाप्रधानंगुणवदेकार्थंवाक्यमुच्यते'इति ॥ भेदेविभागे । अत्रक्रियैवप्रधानमितरत्सर्वंविशेषणतयागुणभूतम् । यच्चात्रकैयटः "आख्यातमितिचैकत्वंविवक्ष्यतेलक्षणविधानसामर्थ्यात् । पचतिभवतीत्यादौसत्यपिसाध्यसाधनभावेआख्यातयोर्द्वित्वात्समानवाक्यत्वाभाव"इति,— तन्न; आख्यातत्वपर्याप्त्यधिकरणमेकमेवेतिप्रागुक्तभाष्यरीत्याएकत्वविवक्षायाःफलाभावादितिनव्याः । तथासतिब्रूहिब्रूहीतिभाष्यस्थवाक्योदाहरणंनसंगच्छेत; आख्यातद्वित्वात्निर्विशेषणाख्यातमात्रेवाक्यत्वाभावाच्च देवदत्तेत्यध्याहारेणपूरणन्तुनूपितंशब्देन्दुशेखरादौ । एकस्मिन्वाक्येपचतिभवतीत्यादौकारकभावापन्नतिङंतान्तरसंभवमभिप्रेत्य (अ० ८ पा० १ सू० २८) "तिङतिङ" इत्यत्राऽतिङ्ग्रहणंसंगच्छते । तच्चप्रागुक्तवाक्यलक्षणंज्ञापयति, तेनपश्यमृगोधावतीत्यादिषुवाक्यत्वव्यवहारोनिर्बाधः ॥ पचतीत्यादिमात्रेवाक्यत्वाभावादेकतिङीत्यत्रबहुव्रीहिः । एवमभिप्रायादेवसुप्तिङंतचयोवाक्यमितिलक्षणेचयपदं । तिङ्पदंचात्रकारकभावानापन्नमाख्यातत्वपर्याप्त्यधिकरणंतिङन्तंवक्तीतिनाव्याप्तिः । इदमेवस्वशास्त्रपरिभाषितलक्षणमितिनव्याः । ततइदं "समानवाक्येनिघातयुष्मदस्मदादेशावक्तव्याः" इत्याद्यर्थं । एवमभिप्रायादेव "तिङतिङ" इत्यत्रातिङ्ग्रहणप्रत्याख्यापकं "अतिङ्वचनमनर्थकंसमानवाक्याधिकारात्" इतिवार्तिकं ॥ अत्रैवभाष्ये "नचसमानवाक्येद्वेतिङंतेस्त" इत्युक्तम् ॥ एकतिङीतिलक्षणम् स्वशास्त्रपारिभाषिकंसार्वत्रिकंवेतियथातथमास्ताम् ॥ परंनहिक्रियाविनिर्मुक्तंवाक्यंभवतीतित्वविवादंनिष्कृष्टंवाक्यस्वरूपं चोक्तममरसिंहेन (कां० १ व० ६ श्लोक २) 'सुप्तिङन्तचयोवाक्यंक्रियावाकारकान्विते'तिसुबंतचय तिङंतचयश्चवाक्यं । वाशब्द समुच्चये, कारकान्वितक्रियाबोधकंघटमानयेत्यादितिङ्सुप्चयात्मकमपिवाक्यमितिव्याख्यासुधाकारादयः । नागेशभट्टमतेतुवाशब्दश्चेदर्थेकारकंतुसुबंतवाच्यं, क्वचित्तिङन्तवाच्यं, कारकान्विताक्रियाचेत् ॥ एतेननिरर्थकशब्दसमूहोव्यावर्त्यतेसुबंतचयस्तिङंतचय सुप्तिङंतचयश्चवाक्यमित्यर्थं । आद्य प्रकृतिसिद्धमिदंहिमहात्मनां त्वयाशयितव्यमित्यादिः । द्वितीय पचतिभवतीत्यादिः पाकोभवतीत्यर्थ. । तृतीयश्चैत्र पचतीत्यादि. । घटमित्यादौपदमात्रेवाक्यत्वव्यावर्त्तनायचयपदं । एतत्सर्वंइत्युक्तशब्देन्दुशेखरेसमर्थसूत्रउक्तभाष्यस्थलेविवरणेचस्फुटम् ॥ तार्किकादीनांघटमित्यादिमात्रेवाक्यत्वकल्पनंतुसूत्रभाष्याद्यार्षग्रंथविरोधादुपेक्ष्यम् ॥ अतोवाक्येक्रियैवप्रधानं, इतरत्सर्वंतत्रैवसाक्षात्परंपरयावायथायोग्यमन्वेति । तत्रापिप्रथमान्तार्थोऽभेदेनतिङर्थेऽन्वेत्येवमनभिहितकर्तृकर्मणोस्तृतीयाद्वितीयाप्राप्त्यातिङंताभिहितयोरेवतयो प्रथमासंभवात्भाव्येकंठरवेणतिङ्समानाधिकरणेतद्विधानात् फलस्यव्यापारस्यवाश्रयएवतिङर्थतायाः "आश्रयेतुतिङ स्मृता "इत्यादावंगीकारात् । युक्तंचैतत्, तन्दुल पच्यतेदेवदत्त पचतीत्यादौतथाप्रतीतेः । यद्यद्बोधकंतत्तदर्थकमितिनियमात्नचाख्यातस्याश्रयेलक्षणा, तथासतितृतोभावनाधाश्रभानप्रसंगात् । तस्मात्तस्यशक्तिकल्पनेतु युगपद्वृत्तिद्वयविरोधाच्चस्त ॥

नापि "आख्यातपदबोध्याभावनाकिंचिदाश्रिताविशेषणत्वेनगृहीतदाश्रितकत्वाद्घटपदबोध्यघटत्ववत्" इत्यनुमानेनाश्रयलाभस्सुवचःव्याप्त्यादिप्रतिसंधानंविनाप्याश्रययोधस्यानुभवात्। तस्मादाश्रयएवतिङर्थःअतएव (अ० ३ पा० ४ सू० ६९) "लःकर्मणिचभावेचाकर्मकेभ्यः" इतिकर्मणिकर्तरिचलकाराबोधकतारूपांतिबादिशक्तिंतस्थानिनिलकारेप्रकल्प्यविधीयन्ते। किंचपचतिदेवदत्तइत्यत्रदेवदत्ताभिन्नैककर्तृकोवर्त्तमानोव्यापारइत्यभेदान्वयस्यदर्शनादाकरसंमतत्वाचकर्तुंस्तिङ्वाच्यत्वमावश्यकं पक्तापाचकोदेवदत्तइत्यादिकृत्प्रयोगवत् ॥ नचाभेदबोधेसमानविभक्तिकत्वंतंत्रंनीलोघटइत्यादौतथादर्शनादितिवाच्यं; सोमेनयजेतस्तोकंपचतिराजपुरुषइत्यादावप्यभेदबोधाऽऽनापत्तेः ॥ एवं तंडुलाः पच्यंतइत्यत्रतंडुलाभिन्नबहुकर्मकोवर्त्तमानः पाकानुकूलोव्यापारइतिबोधात् फलाश्रयस्यापितिङ्वाच्यत्वंव्याख्यातं। स्पष्टंचैतत्सर्वंवैयाकरणभूषणे। अतःप्रथमांतार्थस्यातिङंतार्थेन्वयनियमः समूलएव। अन्यथावृक्षः प्लक्षइत्यादिमात्रस्यापिवाक्यत्वसिद्धोदाहृतचरभाष्यादिकंबाधितार्थंस्यात् ॥ नाप्यस्तिपदाध्याहारमात्रेणनिर्वाहः सर्वत्रशक्यः; क्रियापदाध्याहारस्थलेविवक्षितार्थानुकूलस्यश्रूयमाणपदकदंबाकांक्षापूरकस्यक्रियापदस्यैवविज्ञैरध्याहरणात् ॥ इत्थंच (तैत्तिरीय कां० सं० १ प्रपा० १ अनु० १) "इषेत्वोर्जेत्वा" इत्यादिषुक्रियारहितमंत्रेषुयथाआच्छिनद्मिसंनमयाम्यनुमार्ज्मीत्यादिवाक्यमेवक्रियापदमध्याह्रियते; अन्यथाद्वितीयायाअनन्वयप्रसंगात् तथासूत्रेष्यस्तिपदाध्याहारेस्वेनेतिकर्त्तरितृतीयाया अनन्वयप्रसंगात्तद्वारणायतादृशं क्रियतइत्येवाध्याहर्त्तव्यम्। (तैत्तिरीयसं० का० १ प्रपा० १ अनु० ४) "इदंदेवानामिदमुमुना सह" इत्यादिप्रथमान्तघटितनिष्क्रियमंत्रेष्वपिशूर्पेनिरुप्तमिदंदेवानामेवस्वमभिमृश्यते इदन्तुशकटस्थंदेवै.सहितानामस्माकंस्वंयागान्तराणामस्माभिःकरिष्यमाणत्वात्प्रोक्ष्यमाणत्वाचेत्याद्यर्थकेषुतत्तत्पदाध्याहारइवात्रापितदध्याहारः ॥ तत्रयथा "इषेत्वोर्जेत्वेतिशाखामाच्छिनत्यूर्जेत्वेतिसंनमयत्यनुमार्ष्टिवा" इत्यापस्तंबकल्पः "इदंदेवानामितिनिरुप्तानभिमृशतीदमुन.सहेत्यवशिष्टान्" इतिकल्पश्चाध्याहारनिश्चायकः, तथात्रापिसंपद्याविर्भावशब्दाभिधेयउद्धरणेभगवत्कर्तृकत्वबोधकं "मग्नाःकृष्णेनचोद्धृता" इत्यादिवाक्यमित्यलं ॥ अयंक्रियतइतिपदाध्याहारोपपादनप्रकारोऽत्रपराऽऽस्यनिर्गतस्यपराऽऽस्यताप्रकाशनायैवादर्शि ॥ वस्तुतस्तुमार्तंडटीकायां सौलभ्यायेदंसर्वं। अतएवास्माकंब्रह्मसूत्रभाष्येक्रियतइतिपदस्याध्याहारोनदृश्यते भाष्येस्थितस्योक्तिरपिसंपत्त्यनंतरंतत्रस्थितस्यैवायमाविर्भावोनतुसंपद्यमानस्य स्वयात्पूर्वमेवसइतितात्पर्यवतीतिभातिसूत्रेस्वेनेतितृतीयाचहेतौ ॥ विषयवाक्येअभिनिष्पद्यतइति जीवस्यकर्तृताश्रवणात्संपत्तावाविर्भावेचगौणीमपिजीवस्यकर्तृतामभिप्रेत्यसंपद्याविर्भाव इति प्रयोगः "क्रीत्वानुशय.अभ्युपेत्याशुश्रूषासंभूयसमुत्थानंप्रसज्यप्रतिषेधः" इत्यादिवत्तेषुप्रयोगाःमनुः (अ० ८ श्लोक० ४) 'संभूयचसमुत्थानंदत्तस्यानपकर्मच ॥' तत्रैव (श्लो० २२२) 'क्रीत्वाविक्रीयवाकिंचिद्यस्येहानुशयोभवेत्' मिताक्षरायां (अ० २) 'अभ्युपेत्यतुशुश्रूषांयस्तांनप्रतिपद्यत' इतिनारदवचनमुपन्यस्य "विवादपदमभ्युपेत्याशुश्रूषाख्यं" इति ॥ एवमादिषुसुप्रसिद्धाः ॥ तथाच तैत्तिरीयेसोभुतइत्यनेनाक्षिप्तःदुदर-

विद्यायाच "परज्योतिरुपसंपद्यस्वेनरूपेणाभिनिष्पद्यते" इत्युक्तोजीवस्य संपत्त्यनंतर-
माविर्भावःसस्वेनपुरुषोत्तमेनैवहेतुनाभवति ॥ श्रुतावभिनिष्पत्तिश्रवणादुत्पत्तिभ्रमवारणा-
यसूत्रआविर्भावउक्त । युक्तंचास्यपरमात्महेतुकत्वम् । अतएवभूमविद्याया "तस्यवाए-
तस्यैवंपश्यतएवमन्वानस्यैवंविजानत" इत्यादिनाभूमब्रह्मविद् फलमुपक्रम्य "आत्मत-
आविर्भावतिरोभावावात्मतोऽन्नमात्मतोबल" इतिपरमात्मनएवाविर्भावादिकप्रतिहेतुत्व-
श्रूयते ॥ नचस्वशब्दस्यपरमात्मबोधकत्वेप्रमाणाभाव शक्य ॥ छांदोग्य (अ० ८)
"सतासोम्यतदासंपन्नोभवतिस्वमपीतोभवतितस्मादेनं स्वपितीत्याचक्षतेस्वपीतोभवति ॥
(अ० १ पा० १ सू० वा० ९) "स्वाप्ययात्" (अध्याय १ पाद ३ सूत्र १)
"द्युभ्वाद्यायतनंस्वशब्दात्" इत्यादिबहुप्रमाणसद्भावात् ॥ पुनराविर्भावागीकारेमानमाह-
सूत्रकार "शब्दादिति" तैत्तिरीये "सोऽश्नुतेसर्वान्कामान्सह ॥ ब्रह्मणाविपश्चितेती"
तिदहरविद्याया "सउत्तम पुरुष सतत्रपर्येतिजक्षन्क्रीडन्रममाण" एवमादिशब्दादि-
त्यर्थ ॥ इदंपुरुषोत्तमेनसहसर्वकामाशनजक्षणक्रीडनादिक "ब्रह्मैवसन्ब्रह्माप्येति"
इत्यादिश्रुत्याब्रह्मापित्तस्यनसंभवति ॥ अत सशब्दोऽपिभूमविद्याद्युक्तमाविर्भावमेव
"स्वेनरूपेणाभिनिष्पद्यते" इत्यादौगमयति ॥ स्वेनपुरुषोत्तमात्मकेनरूपेणाविर्भवतीति-
तदर्थ ॥ यत्तुशब्दादित्यनेनेत्यादि भातीत्यतमवादि,--तदसत्, अतिक्लेशेनात्रस्वनपद-
कर्मधारयस्यभाष्येशंकराचार्यैरंगीकृतत्वाभावात् ॥ किंतुतत्र "केवलेनैवात्मनाऽऽविर्भ-
वति । नधर्मांतरेण" इतिव्याख्यानात्स्वेनेतिपदभिन्नमेवाभिप्रेतप्रतिभाति ॥ अन्यथा
आत्मनेतिकस्यार्थं स्यात् ? धर्मांतरव्यावर्तकंचसूत्रेकिंस्यात् ? एवंचसतिस्वशब्दादि-
त्युक्ति सौत्रस्यशब्दादित्यस्यफलितार्थकथनरूपैवेतिसिध्यति ॥ अतएवस्वेनशब्दादिति
नात्रादिकर्मधारयादिकंचनादर्शि ॥ संपूर्णसाध्यस्यार्थात्तात्पर्याच्चाध्याहारकल्पनापेक्षयाश-
ब्दादित्यत्रैवार्थात्साध्यानुकूलशब्दविलक्षणलघीयोनतुवाक्येविधेयराहित्य ॥ अनेकत्रच-
सूत्रकृताकेवल शब्दोहेतूक्रियते (अ० २ पा० ३ सू० ४) शब्दाच्च ॥ (अ० ४
पा० ४ सू० २२) "अनावृत्ति शब्दात्" इत्यादौएवमिहापिशब्दादित्येवहेतु ॥ इत्थ
चेदशस्थलेषुतत्तद्वाक्यग्रहणेतत्रापिकिंगमकम् ? साध्यानुकूलतयातस्योपस्थितिरितिचेन्म-
माप्यत्रसोऽश्नुतेजक्षन्क्रीडन्नित्यादिशब्दग्रहणतयैवसेत्स्यतिसपर्येत्युक्तिरपितत्सारिक्येत्युक्त
प्राक् । नचब्रह्मवल्ल्याएवोदाहृतत्वात्संप्रसादवाक्यादेर्विषयवाक्यत्वाभाव शक्य , स्थाली-
पुलाकन्यायेनैकतरोदाहरणेऽपि एकत्रनिर्णीतइतिभाष्याद्युक्तपरिभाषयाप्रवृत्तियोग्येसर्वत्र
तत्प्रवृत्तेरिष्टत्वात् ॥ अतएव "जन्माद्यस्ययत , तत्तुसमन्वयात् , ईक्षतेर्नाशब्द , प्रकृतिश्च"
इत्याद्यधिकरणेषुतत्तद्भाष्यकारैरनेकानिवाक्यान्युपन्यस्यते । एवमेवसतिसूत्राणान्यायरूप
त्वंचसंगच्छते । अतइंद्रप्रजापतिसंवादस्याधिकरणस्यप्रवृत्ति प्रकाशकारै शांकरमतमनूद्य-
तत्रेदमत्रधेयमित्यादिनादर्शिता ॥ अत्रसंपत्त्युत्तरजक्षणादिवत्तैत्तिरीयेऽपि "एतमानंदम
यमात्मानमुपसंक्रम्यकामान्नीकामरूप्यनुसंचरन् । एतत्सामगायन्नास्ते" इत्यादिश्रूयते ॥
तत्रापिपरोपसंक्रमानंतरश्रूयमाण कामान्नित्वकामरूपित्वादिकपुरुषोत्तमात्मकरूपेणपुन-
राविर्भावमंतरानघटतइतितत्राप्याविर्भावोवाच्य ॥

अथप्रकाशकारोक्तदिशोत्तरदहरविद्यार्थोऽतिसंक्षेपेणोच्यते ॥ छांदोग्येदशमप्रपाठके
इंद्रप्रजापतिसंवादे "यआत्मावेद्यत्वेनप्रकृतःसदहरविद्योपास्यएव ॥" प्रजापतिवाक्येतस्यै-
वापहतपाप्मत्वादिगुणकस्यप्रत्यभिज्ञानात् ॥ तत्र "यआत्माऽपहतपाप्माविजरोविमृत्यु-
र्विशोकोविजिघत्सोऽपिपासः सत्यकामःसत्यसंकल्पः सोऽन्वेष्टव्यःसविजिज्ञासितव्य.स-
र्वाꣳश्चलोकानाप्नोतिसर्वांश्चकामान्यस्तमात्मानमनुविद्यविजानातीतिहप्रजापतिरुवाच"
इत्युपक्रमः ॥ एतत्प्रजापतिवचःश्रुत्वासुरासुराणांसर्वकामसर्वलोकेप्सयाऽऽत्मविविदिषा-
ऽभूत् ॥ ततोदेवानामिंद्रोदैत्यानांविरोचनश्चजिज्ञासया श्रीप्रजापतिमुपसेदतुः ॥ परंतुवां-
परमासिफलंमत्वानोपसन्नौ ॥ किंतुकामनयेतितदधिकारंहीनंज्ञात्वाब्रह्मचर्यरूपंतपउपदि-
देश ॥ श्लिष्टप्रयोगेणचोवाच ॥ तत्रप्रथमपर्याये "यएषोऽक्षिणिपुरुषोदृश्यते" इत्यपिदर्शन-
मेवोपदिष्टं ॥ तच्च (अ० १ पाद २ सू० १३) "अंतरउपपत्तेः" इत्यधिकरणेस्फुटं ॥
परंताभ्यांनबुद्धम् । किंतुदेहएवात्मात्रगतः ॥ प्रजापतेर्ब्रह्मविद्यात्तत्संनिधौनसंशयोत्पत्तिः ॥
विरोचनस्यत्वसुरत्वादसन्निधानेऽपिदेहात्मवादमात्रेणतोषः ॥ इंद्रस्तुदैवप्रकृतिकत्वात्त-
द्वादेमार्गेएवंभयंददर्श ॥ "अस्मिन्नन्धेऽन्धोभवति" इत्यादि ॥ एवंदृश्यस्याज्ञानेपुनस्त-
पउपदिश्यद्वितीयेपर्यायेस्वप्नसृष्टिकर्तारं "कामंकामंपुरुषोनिर्मिमाणः" इतिकठाद्युक्तंपर-
मात्मानमेवोपदिदेश ॥ "यएषस्वप्नेमहीयमानश्चरति" इति ॥ अत्रापि "एतंत्वेवतेभू-
योऽनुव्याख्यास्यामि" इति ॥ एतच्छब्देनस्वबुद्धिस्थस्यपरामर्शः ॥ नात्विंद्रबुद्धिस्थस्य
इंद्रेणदेहस्यैवपूर्वंबुद्धत्वादिति ॥ परंत्विंद्रेणद्वितीयेपिपर्यायेसनबुद्धः । किंतुदेहाद्भिन्नोजीव
एव स्वप्नद्रष्टोपदिश्यतइतिबुद्धं । सयद्यपिबाह्योपाधिदोषान्नदुष्यतितथाप्यांतरदोषाद्धन्य-
मानमिवच्छाद्यमानमिवाप्रियवेत्ताऽऽदितौल्यरूपाद्दुष्यति । पुनस्तृतीयेपर्यायेसमागत्यभयमुक्तवान् ।
तदासुषुप्त्यधिकरणभूतंपरमात्मानंनज्ञातवान् । किंतुसुषुप्त्यवस्थाकंशारीरमेवज्ञात्वातत्राप्य-
ज्ञानरूपंभयं "विनाशमेवापीतोभवति" इत्थंतेनप्रदर्श्यैन्द्र.पुनरुपससाद । तदाप्रजापतिस्त-
मेवस्वबुद्धिस्थमुपदेष्टव्यत्वेनोपक्षिप्य इंद्रेणानगतस्यजीवस्यसर्वकामभोगयोग्यंस्वरूपंतत्सं-
पत्त्याभवतीतिवक्तुं "मघवन्मर्त्यंवाइदंशरीरं" इत्यादिनाशरीरस्यदु.खदत्वं । अशरीराणां-
वाय्वादीनांपरंज्योतिरुपसंपन्नानांस्वरूपप्राप्तिदृष्टांतेनास्यापिस्वव्याख्यातांपरंज्योतिः पुरुषो-
त्तमसुपसमीपेसंपन्नस्यतद्धामन्यक्षरेस्वकारणेलीनस्यस्वरूपाभिनिष्पत्तिमाविर्भावरूपां एव-
मेवैषसंप्रसादः" इत्यादिनोक्त्वापरस्यज्योतिष स्वरूपमाह—"सउत्तमःपुरुष." इति । यो-
ऽयमुत्तम पुरुषस्त्वन्यःपरमात्मेतिगीताश्लोकद्वयेनकृतनिर्वचनः ॥ अत.परंसंपद्याविर्भूतस्य-
भोगंवक्तुंतत्रपरस्यभोगमाह—"सतत्रपर्येतिजक्षन्क्रीडन्" इत्यादिना ॥ तथाच 'देहेंद्रिया-
सुहीनानांवैकुंठपुरवासिना'मितिसप्तमस्कंधात्तादृशानांसायुज्यादिमतांभगवत्प्रसादरूपस्त-
द्दत्तस्तेनसहभोगोनिराबाधः; पर्येतिभोगेस्वतंत्रोपिभक्तःपराधीनत्वादस्वतंत्रइवभवतीति-
कथनात् ॥ स्पष्टंचेदंतैत्तिरीयेब्रह्मणाविपश्चितेत्यप्रधानतृतीयानिर्देशात् ॥ अत्रोपक्रमेपिसर्व-
लोकाद्यर्थमुपासनाप्रवृत्तिः "सवाएषएतेनदैवेनचक्षुषामनसैतान्कामान् पश्यन् रमतेयए-
तेब्रह्मलोकेतंवाएतंदेवा आत्मानमुपासतेतस्मात्तेषाꣳसर्वेचलोकाआत्ताः सर्वेचकामाः
ससर्वांꣳश्चलोकानाप्नोतिसर्वांꣳश्चकामान्यस्तमात्मानमनुविद्यजानातीतिहप्रजापतिरुवा-

घप्रजापतिरुवाच" इत्युपसंहारश्रुतथैवसतिसंगच्छते। अधिवंतुप्रकाशादिषुज्ञेयं ॥ इहापिप्रकाशमथएवबोधोपयोगिनावेनचिद्विशेषेणसहितोमयानूदित ॥ सपयाविर्भावेस्वहेतुकत्वविधानार्थमेवेदसूत्रमितियुक्त ॥ अन्यथा (अ० १ पा० ३ सू० १९) "उत्तराच्चेदाविर्भूतस्वरूपस्तु" इत्यनेनगतार्थत्वापातात् ॥ (अ० १ पा० ३ सू० ४०) "ज्योतिर्दर्शनात्" इत्यत्रपूर्वंदहरविद्यावाक्यविषयीकृत्यपरज्योतिरितिज्योति शब्दस्यपरब्रह्मपरतायाः साधनात् वाक्यानुपूर्वीविद्याविषययोरैक्यादिहापिसैवसिध्यति यद्यपि "स्वेनरूपेणाभिनिष्पद्यते" इत्यत्रस्वेनआत्मनेतिव्याचक्षते। आविर्भावश्चात्मनैवाक्षरात्सम्भवति, तथापियत्स्वेनपुरुषोत्तमात्मकेनेतिप्राक्व्याख्यातंतत् "उत्तराच्चेदाविर्भूतस्वरूपस्तु" इतिसूत्रैकवाक्यतयाकलितस्यार्थस्यकथनमितिज्ञेयम् ॥ तत्रआविर्भूतस्वरूपपुरुषोत्तमरूपयस्मिन्निति व्याख्यानात् षष्ठीबहुव्रीहौस्वरूपतद्वतोरभेदादुपचारक्लेशापत्तिरितितदाशयात् पुरुषोत्तमावेशेन 'तास्ताविचेष्टाजगृहुस्तदात्मिका' इत्यादिवचनैस्तदात्मकतासम्भवात् अयमर्थअकरेषुप्रपञ्चितइतिकिंबहुना ॥ तत्स्थस्वशब्देति वेदेबहूनां "तेनभागधेयेनोपधावति" इत्यादीनां तृतीयान्तस्वशब्दघटितवाक्यानांसत्वात्तेषांग्रहणं । द्युभ्वाद्यधिकरणइवार्थाभिप्रायात् "ब्रह्मब्राह्मणआत्मना ॥ प्राज्ञेनात्मनापरिष्वक्त" इत्यादीनांवाग्रहणकुतोनुतोनस्याविति भाव ॥ अर्थसंगतिस्तुविद्वद्भिर्यथाकथञ्चिच्छक्याकर्तुं ॥ यच्चकिंचेत्यादिकामानुपभोगाविस्यत,—तत्तुपरमतत्त्वाज्ञानात् ॥ केवलज्ञानिनएवाक्षरविद परलीलास्वाद 'नैष्कर्म्यमप्यच्युतभाववर्जित' (स्क० १० अ० ९ श्लो० २१) 'नायंसुखापोभगवान्' 'देहिनांगोपिकासुत , ज्ञानिनांचात्मभूतानांयथाभक्तिमतामिह । भक्त्यात्वनन्ययाशक्य' इत्यादिवाक्यबलात्प्रतिषिध्यतेनतुपुरुषोत्तमविदोज्ञानिभक्तस्यआप्नोतिपरमितिपरआप्तियोग्यस्य ॥ 'इदंज्ञानमुपाश्रित्यममसाधर्म्यमागता ॥ योमामेवमसम्मूढोजानातिपुरुषोत्तम'-मित्यादिवचनेभ्य ब्राह्मणवाक्यविवरणभूतायामृचि 'सत्यंज्ञानमनन्तंब्रह्माक्षरेयोवेदनिहित'-मर्थात्तत्रभामिनपरंचयोवेदेतिकथनाद्ब्रह्मारयेयवाक्येऽपिब्रह्मविदित्यत्राक्षरब्रह्मपरब्रह्मवित्सिध्यति ॥ इदंच "सवेदैतत्परमंब्रह्मधामयत्रविश्वंनिहितंभातिशुभ्र ॥ उपासतेपुरुषंयेह्यकामास्तेशुक्रमेतदतिवर्तंतिधीरा "इत्यादौमुण्डकादिषुस्फुटम् । तव्द्याख्यानेस्वरूपभूतेनेत्यध्याहारस्यसर्वस्यकामापदेशेनतृतीयानिर्देशेचलक्षणाया सहशब्दस्यलाक्षणिकयौगपद्याश्रंकायाश्चकल्पनापेक्षयास्माकंमताभित तत्त्वार्थएवश्रेयान् ॥ सच्चसाम्प्रतम्परि, विशेषतोविचिकित्सायापरोक्तिनिरसनपुरस्सरंसविस्तरमामकेब्रह्मवल्लिविवरणेद्रष्टव्य ॥ यत्तु (सच क्रमित्यादौसशब्दस्थानिन सहशब्दस्ययुगपदर्थतायाः प्रसिद्धत्वा) दितितन्न (अध्याय २ पा० १ सूत्र ११) विभाषाधिकारात्प्राक्तनेन (अ० पा० १ सू० ६) 'अव्ययंविभक्तीत्यादिनायौगपद्येविहितनित्यसमासस्यअस्वपदविग्रहतया अव्ययीभावेचाकालइतिसहापसहशब्दस्यसचक्रमित्यादावविवक्षेयलस्ततस्ययौगपद्येप्रयोक्तुमशक्यत्वात् । अन्यथा चक्रेणसहेतिव्यस्तमपिप्रयुज्येतअतएवश्रुतौयौगपद्यविवक्षणेनित्यसमासोदुर्वार ॥ किंच "चक्रेणयुगपदितिविग्रहे" इत्यत्रशेखरकृता "युगपत्शब्देनतुनसमास सूत्रगृहीतत्वा" दित्युच्यते । तत्त्वबोधिन्यामपि "अत्रकेचित्युगपच्चक्रमितिसमस्तिसमासेनैव-

भवितव्यंयुगपच्छब्दस्याप्ययत्वात् किन्तु चत्रैणैककालेइत्यादिविग्रहीतुमुचितमित्याहुः” इतिसंगृह्यतेएवंचचत्रेणैककालइतियत् ब्रह्मणैककालइत्यर्थःस्यात् तथाचसतिसचमैंच्य-वतीत्यत्रपुरुषयोरेककालिकधावनवत् जीवब्रह्मणोरेककालिकमशनंसिध्येदिति यौगप-द्येप्रतिपद्यापिकिलशिष्ठममायुष्मता एतदेवाश्रित्यसहशब्दस्ययौगपद्येशक्त्यंगीकारेक्षत्रा-णांसंपत्तिःसक्षत्रमित्यप्यत्रोदाहरणात् संपत्तावपितस्यशक्तिस्वीकारेक्रियतांप्रयुज्यतांचतथा-र्थेक्षत्राणांसहेतिदिक् ॥ नापिममसर्वपदसंकोचः परब्रह्मभिन्नेष्वलौकिकेषुकामेष्वतीतत्वा-द्यसंभवात् ॥ यावानर्थइतिवाक्यंतुनब्रह्मवहुलार्थबोधकंप्रत्यभिज्ञापकपदादिरूपमानगंध-स्याप्यभावात् ॥ किंतु कर्मप्रक्रमस्थं वेदेषुत्रैगुण्यनानाकर्मप्रतिपादनेऽपिसर्वाणितान्येके-नानुष्ठातुमशक्यानिसंपूर्णोजलाशयःपानादावुपयोकुमिवभवोयथासंप्लुतोदकेऽपियावद्वापा-नादिसिद्धिस्तावदुपादेयंतथाज्ञानादिसिद्धयेकर्मेत्यभिप्रायकंतत् ॥ तेननेहास्योपयोगः-कश्चित् ॥ यदपियस्तुभागवतेत्यादिइत्यलमित्यंतदुर्बलच्छलनफलकंलीलोपयोगितयापुनरा-विर्भावस्तुनप्रपंचेपुनरावृत्तिरूपइतिप्रागेवनिर्णीतं इदंचवाक्यंदशमस्कंधेऽष्टाविंशेऽध्याये-भगवतानंदस्यप्रत्यानयनोत्तरमेवंकारंपठ्यते (श्लोक १) ‘नंदस्त्वतींद्रियंदृष्ट्वालोकपाल-होदयं ॥ कृष्णेचसन्नतिंतेषांज्ञातिभ्योविस्मितोऽब्रवीत् ॥ तेत्वौत्सुक्यधियोराजन्मत्वागो-पास्तमीश्वरं ॥ अपिनःस्वगतिंसूक्ष्मामुपाधास्यदधीश्वरः ॥ इतिस्वानांसभगवान्विज्ञाया-खिलदृक्स्वयं ॥ संकल्पसिद्धयेतेषांकृपयैतदचिंतयत् ॥ जनोवैलोकएतस्मिन्नविद्याकाम-कर्मभिः ॥ उच्चावचासुगतिषुनवेदस्वांगतिंभ्रमन् ॥ ॥ इतिसंचिंत्यभगवान्महाकारुणिको-विभुः ॥ हरिरित्यपिपाठः ॥ दर्शयामासलोकंस्वंगोपानांतमसःपरं ॥ ॥ सत्यंज्ञानमनंतं-यद्ब्रह्मज्योतिः सनातनं ॥ यद्धिपश्यंतिमुनयोगुणापायेसमाहिताः ॥ ॥ तेतुब्रह्महृदं-नीताममग्नाः कृष्णेनचोद्धृताः ॥ ददृशुर्ब्रह्मणोलोकंयत्राक्रूरोध्यगात्पुरा ॥ नंदादयस्तुतंदृष्ट्वापर-मानंदनिर्वृताः ॥ कृष्णंचतत्रछंदोभिःस्तूयमानंसुविस्मिता’इति । अत्रश्रीधरस्वामिनः “औत्सुक्ययुक्ताधीर्येषांते ॥ अपिकिं स्वगतिं स्वस्थानं सूक्ष्मां ब्रह्माख्यांच उपाधास्यत् उपाधास्यति नः अस्मान् प्रापयिष्यतीति सकल्पितवंत इत्यर्थः ॥ ११ ॥ इत्येवंभूतं स्वानांस्वेषांतेषामितिवापाठांतरंसकल्पं अखिलदृक्सर्वज्ञः स्वयमेवविज्ञायतेषांसंकल्प-सिद्धये । कृपयैतद्वक्ष्यमाणमचिन्तयत् ॥ १३ ॥ अविद्या देहाद्यहंबुद्धिः ततकामः तत कर्म तैरविद्याकामकर्मभिः । उच्चावचासु देवतिर्यगादिषु भ्रमन् स्वकीयांगतिंनवेद ॥ ब्रह्मस्व-रूपंलोकंवैकुंठाख्यंचतमसःप्रकृते परम् ॥ १४ ॥ देहादिपिहितानांदर्शनमशक्यमितिप्रथमं-देहादिव्यतिरिक्तंब्रह्मस्वरूपंदर्शयामास ॥ तदाह सत्यंअबाध्यं ज्ञानं अजडंअनन्तं अपरि-च्छिन्नं ज्योति प्रकाशं सनातनं शश्वत्सिद्धं ब्रह्म गुणापायेगुणापोहे ज्ञानिनोयत्पश्यंति तत् कृपयैव दर्शयामास ॥ १५ ॥ एवंब्रह्महृदंब्रह्मैवहृदवद्ध्रदः तत्रनिमग्नस्यविशेषविज्ञाना-भावात् ॥ तंब्रह्महृदंतेतुनीता प्रापितास्तस्मिन्मग्नाश्च ॥ तुशब्दोक्तंविशेषमाहपुनः कृष्णे-नउद्धृताः ॥ समाधेरिवोत्थापिताः । ततोब्रह्मणः । तस्यैवलोकंवैकुंठाख्यंददृशुरिति । ननु-ब्रह्मनिमग्नानांपुनर्लोकदर्शनमघटितमेवेत्याशंक्याह—यत्रेति । यत्रयस्मिन्कृष्णेनिमित्तेसति-पूर्वमक्रूरोऽभ्यगात् दृष्टवान् ॥ शुकपरीक्षित्संवादारम्भकत्वाद्भूतनिर्देशः । नह्यतत्र्यैश्वर्ये-

भगवतिकिंचिदप्यसंभावितमितिभावः इतिव्याचक्षते ॥ अत्रब्रह्मण्येवनिमज्जनंपुनस्ततएवभगवतोद्धरणंचतैरपिस्पष्टमेवव्याख्यातं ॥ अन्यथा 'अपिन.स्वगतिंसूक्ष्मा'मितिसकल्पमन्त्रसिद्धयेभगवताकृपयासत्यज्ञानादिलक्षणकब्रह्मधाम्नःप्रदर्शनादिकंचनैवसंगच्छेत ॥ किंचसत्यज्ञानानंतस्वरूपस्यसंस परस्यब्रह्मज्योतिष साक्षात्कारेकथंचिदप्यविद्याशेषस्यवक्तुमशक्यत्वात् "ब्रह्मविद्ब्रह्मैवभवति ॥ ब्रह्मैवसन्ब्रह्माप्येति" इत्यादिश्रुतिभि.प्रतिबंधरहितस्यतदंशस्य "लवणमेतदुदकेऽवधाय यथासैंधवखिल्यउदकेप्रास्तउदकमेवानुविलीयेत" इत्यादिनाछांदोग्यबृहदारण्यकाद्युक्तदृष्टांतेनतत्रविलयोऽवश्यमेवस्यात् ॥ तदाऽप्यविलयेचकदाऽपिसनस्यात् ॥ तदुत्तरकारणांतरस्यत्वयाऽवश्यंवदुरुपपादत्वात् दर्शनोत्तरंतदभावे "भिद्यतेहृदयग्रंथि." इतिकाठकप्रभृतिश्रुतिशतव्याघातापाताच्च ॥ अत्रेचश्रीधरस्वामिनः "अथवा अक्रूरोयत्रदृष्टवांस्तस्ययमुनाह्रदस्यब्रह्मह्रदइतिनामतंह्रदंनीता सतोब्रह्मणोलोकंददृशुः ॥ पुनश्चकृष्णेनोद्धृताःपूर्ववत्तंदृष्ट्वाविस्मिताबभूवुः ॥" इतिरम्भतदुराग्रहग्रस्तै प्राक्तनै परमहंसप्रियाकारादिभि.कैश्चिद्व्याख्यातं ॥ पक्षांतरत्वेनोपन्यस्ततस्यानौचितींध्वनयितुं "व्यवहितान्वयोऽप्रसिद्धकल्पनाचसोढव्या" इतितत्रदूषणंस्पष्टमेवदर्शयंति-दुक्तंचैतत् ॥ मग्नाः संतोददृशुरित्यशक्यंकृष्णेनचोद्धृताइत्यनेनमध्येव्यवधानात् ॥ यत्राक्रूरोऽप्यगात्तंब्रह्मह्रदमितिचात्यंतव्यवहितंकिंचास्मिन्नेवश्लोकेउद्धरणमुक्तं ॥ तदनंतरनंदादयइतिश्लोकोक्तं व्याहन्येत ॥ ईदृशक्लिष्टकल्पनायाअप्यादरेभक्तोदाशरथेर्लंकाधीशस्यद्वेषकृत्कपिरित्यादौदाशरथेर्द्वेषकृत् लंकाधीशस्यभक्तइत्याद्यपिव्याख्यायेत ॥ किंचनदीपरिचयवतांतेषामक्रूरस्येवस्वतएवोन्मज्जनसंभवात्कृष्णेनचोद्धृताइतित्वत्पक्षेव्यर्थमेव ॥ अपिचह्रदविशेषप्रतिनयनेकिंप्रयोजनं ? ॥ भगवत-प्रदर्शनसामर्थ्यउपसमीपे आधास्यतीतित्वत्सकल्पानुरोधात् ॥ असामर्थ्येनापनतोऽपिकिंकस्यस्यात् ॥ नहिह्रदविशेषस्यसस्वभाव.शक्योवक्तुं । अद्यापितत्रमग्नस्यदर्शनप्रसंगात् ॥

त्वत्पक्षेसकल्पविरोधोपिबाधकः किंच अक्रूरोयत्रदृष्टवांस्तस्ययमुनाह्रदस्यब्रह्मह्रदइतिनामेतिकल्पनेऽपिकपोलकल्पनांविनानकिमपिमानमस्ति ॥ व्रजस्थलनिरूपकेषुवाराहब्रह्मवैवर्तादिपुराणभागेषुतादृशेषुपौरुषग्रंथेषुचक्वापिब्रह्मह्रदइतितन्नाम्नोगंधस्याप्यभावात् ॥ श्रीभागवतेऽपितदभावाच्च ॥ एतदेवानुसंधायश्रीधरस्वामिभिरप्यप्रसिद्धकल्पनेतिदूषणांतरमुक्तं ॥ इदानीमप्यक्रूरदर्शनह्रदस्थल अक्रूरघट्टइत्येवोच्यते ॥ नतुब्रह्मह्रदइतिकेनापिव्यवह्रियते ॥ तस्माद्ब्रह्मत्वकल्पनंमनोराज्यविजृंभितं ॥ एवंच श्रीधरकृततट्टीकायास्पष्टमित्युक्तिस्तुधौर्त्यातिशयादेव ॥ विस्तरेणचामीश्लोकाः श्रीमदाचार्यचरणैः सुबोधिन्यांविवृता ॥ तत्सर्वंततोऽनुसंधेयं ॥ भावत्यकोविदोपस्तुकश्चित्संगृह्यतेणौरसुवत्यधियदत्र । अपीतिसंभावनायां सूक्ष्माम्वगतिंवैकुंठाख्यां । उप समीपे । आधास्यति ॥ अस्मन्निकटेतत्किंप्रकटीकरिष्यति । यतोऽधीश्वर ॥ तथास्वसाधनाभावेऽपि तस्यैश्वर्यमेवात्रहेतु ॥ इतिस्वानामित्यत्रस्वाभक्ता । भगवान् सर्वसमर्थ ॥ आचिंतयत् 'मिमेतेसाधनेयोज्या । उतदृष्पयैवफलंदेयमित्याचिंतयत् ॥ तत्रसाधनेदीप्रमनिस्तारोजनोवादस्यनेनदर्शितः । तेनकृपापक्षएवावशिष्टः ॥ तदाह–इतिसंचिंत्येति । महाकरुणयैव-

मदर्शनम् ॥ विभुरितिपूर्वमक्षरदर्शनपुनरुद्धरणाद्युपायसामर्थ्यं । संचिंत्यैवदर्शयामासे- त्युक्त्याभगवानित्यादिपदैश्चतत्रैवस्थित्वातत्कालमेवदर्शयामासनतुप्रचिद्वरचेतिज्ञायते ॥ विलंबेसानाभानाद्धेत्वभावाच ॥ लोकस्यसगुणत्वव्यावर्तनायाह–तमसःप्रकृतेःपरमिति । नवीनरचनाजडत्वपरिच्छेदादिवारणायसत्यादिपदानि । यद्ब्रह्म परधामत्वेनेनसर्वयेदां- तप्रत्ययमितिप्रमाणं । दर्शनमात्रेणसर्वदोषदाहकत्वाऽऽज्योतिः ॥ लोकत्तयासादित्वशंका- निरासायसनातनमिति । निर्गुणत्वंस्पष्टयितुंयद्वीति "सदापश्यंतिसूरयः ॥ सोऽध्वनः पारमाप्नोति" इत्यादौवेदेकांडेपिस्फुटमिदं ॥ निर्गुणानामेवदर्शनाधिकारेतस्यनैर्गुण्यतोः- किंवाच्यं ॥ ब्रह्मविधकत्वैकरसत्वागाधत्वप्रवेशाधारत्वादिगान्हद.कृष्णेनचेतिचकाराद्वैदैः उद्धरणेफलमाह–ददृशुरिति । तत्रपरलीलादर्शनंस्फुटीकृतंनंदादयइत्यनेन ॥ पुरुषोत्तम- साक्षात्कारएवपरमेवाङ्मनसागोचरत्वादगणितआनंदः ॥ अक्षरसाक्षात्कारेतुप्रजापतितः शतगुणः "तेयेशतंप्रजापतेरानंदाःसएकोब्रह्मणआनंद" इतितैत्तिरीयश्रुतेः ॥ अन्नह्म । अक्षरं । (अ० ६ ब्राह्म० ३ पृ० ८२०) "सएकोब्रह्मलोकआनंदः" इतिबृहदार- ण्यकेश्रावणाद् परानन्दस्यागणितत्वमपितैत्तिरीयएवानंदमयोपसंक्रमानंतरंपठितेयतोवाच- इतिश्लोकेस्फुटं ॥ गणनायावाङ्मनसतंत्रत्वात् कृष्णंचतत्रछंदोभि.स्तूयमानमितिलीला- दर्शनंस्पष्टमेवेतिदिक् ॥ इत्थंकारसपद्याविर्भावादिकंनिरवद्यमेवेतितदेतत्सर्वमनुसंधा- योक्तंमूले–अलमत्यावेशेनेति । अस्यैकादशस्यश्लोकस्य खंडनेशाक्तमतंनिरस्तं ॥ प्रसंगा- द्भगवत्प्रसादभक्षणं साधितं । क्षराक्षरपुरुषोत्तमरूपंसानरूपसेवाविभागः । परभक्ते- र्ज्ञानफलत्वंपुरुषोत्तमलीलाप्राप्तिरूपमोक्षस्वरूपयोग्यताजनक.संपद्याविर्भावश्चसमर्थिताः ।

इतिसकलंश्रीकृष्णकृपाजंमंगलमनाकुलमस्माकं   श्रीमद्बालमुकुंदमिंदुवदनंवृन्दावनानंदि- नंवंदेसुन्दरमेकसेवनपराक्षिन्दामिवृन्दारकान् ॥ वक्तंतामचिरंतनादिविपदोऽनंताअनंतारा- ले[2]मंतुंतेगणयन्तुमार्य[3]मितरान्मूर्धानमन्तुंक्षमः ॥ स्थित्वारैव[4]तपर्वतस्यपुरत.श्रीजीर्ण[5]दुर्गपुरे श्री[6]दामोदरकाममोहनविभूसंसेव्यमानान्सदा ॥ श्रीमद्दीक्षितवंशमौक्तिकमणीनेकादशा- नन्वये[7]स्वाचार्या[8]न्वल्लभाभिधगुरून्मातामहान्स्वान्भजे ॥ २ ॥ मंदमपिवेदभागान्सां- गान्षड्दर्शनानिमामंधं । अध्यापितवान् दययानिजजनकंतंभजेघनश्यामम् ॥ ३ ॥ कृष्णयजुर्षि[9]दिवतरो.सुमनः[10] श्लाघ्यास्तैत्तिरीशाखा । तांसेवतेमधुस्यागापस्तंव[11]बद्धि[12]जातिकुलम्

---

१ "एकोहवैनारायणआसनब्रह्मानेशानः" इत्यादिश्रुतिभिः सृष्टिकालेजाताः २ मंतुम- पराधं ॥ ३ अयंभगवतेनिवेदिततयास्वानधीनः ॥ ४ रैवतोलोकेगिरिनारइतिप्रसिद्धःसौराष्ट्र- देशेद्वारकाप्रान्तेपर्वतविशेषः ५ उक्तपर्वतोपत्यकायाजूनागढइतिप्रसिद्धे । ६ क्रमेण श्रीमदा- चार्यश्रीविठ्ठलेश्वरसेवितौभगवत्स्वरूपविशेषौ ॥ ७ श्रीविठ्ठलेशप्रभुज्येष्ठपुत्रश्रीगिरिधरात्मज- स्यश्रीगोपीनाथदीक्षितस्य ८ श्रीवल्लभाचार्यमारभ्यपुरुषपरंपरागणने एकादशसंख्यापूरणान् ९ सर्वमनोरथपूरकत्वसाम्यात्कल्पद्रुमस्य । १० सुमनो विद्वांसः पक्षेपुष्पाणि ११ बौधाय- नहिरण्यकेश्यापस्तंबेतित्रिधासूत्राणितैत्तरीयकाणांसंति १२ द्विजातयो ब्राह्मणाः पक्षिणश्च

॥ ४ ॥ तत्रोद्भूतोमतिमान्वाधूलसगोत्रवारिधेश्चन्द्र. तैलंगलनाटोज्ञातिर्विद्वत्सभार-त्नम् ॥ ५ ॥ य.पंचनद्युपाद्वयगोपीनाथांगतोघनश्यामः ॥ गोवर्द्धनाभिधोहंतत्सूनुस्तन्मुखाधिगतविद्यः ॥ ६ ॥ गर्भगोस्वामिश्रीव्रजवल्लभतनुजयापतिव्रतया ॥ लाडो-नाम्न्यास्मिधूतोगद्गलालापरामिल्य ॥ ७ ॥ मयाऽर्पितादु समयैभ्रजालं निरस्यदूरेबहु-धान्यैकालं ॥ लाभंजनेसाधयितुंविशेषात्प्राभंजनेमारुतशक्तिरेषा ॥ ८ ॥ वसुरामनन्द-चंद्रिरमितवर्षेविक्रमार्कशकगेऽसा । मार्गकृष्ण नवम्यांसगुरौश्रीविठ्ठलोत्सवेपूर्णा ॥ ९ ॥ विस्तारोमेघानां विहृतासारप्रपातद्व्याघात ॥ विहृतो मारुतशक्त्याजवादुर्वारणविधारणया ॥ २० ॥ अभ्रांऽन्तोदितमार्त्तण्डप्रकाशास्तमः शमम् । इत परं चिररम्यंसुदिनंमेप्रसे-रस्यति ॥११॥ सर्दोऽलोचनरोचिष्णु सारव्यापारकारकम् । अवश्यंसुदिनदृश्यचंडमार्त्तण्डे-मंडनम् ॥ ११ ॥ वेदानुयायिविदुष परंभक्तिनिधान् विज्ञापयामिचरणौपरिगृह्यनम्र. । उध्दयागुणदशोन्यपरिश्रमज्ञाअश्रमादशतकालिममक्षमध्वम् ॥ १२ ॥ अन्धोस्म्यहं-निजकरेणनलेखशक्तस्तल्लेखितंनिखिलमेवकरे परेषां ॥ भ्रान्त्यादयोजगतिमानुषबुद्धिधर्मा सर्वांशतोनपरिहर्तुमिमेचशक्या ॥ १३ ॥ सर्दालिवल्लभश्रीमन्मुकुन्दचरणेर्पित. ॥ सामोदैरोचिताकारोबौक्पुष्पाञ्जलिरयं ॥ इतिश्रीमद्वेदव्यासविष्णुस्वामिमतपुण्डरी कमंडलनमार्त्तण्डश्रीमद्वल्लभाचार्यचरणाञ्जचचरीकचित्तनमोक्षगुरुगोस्वामिश्रीव्रजवल्लभ-चरणानुचरेणतैलङ्गज्ञातीयविद्वद्वरपचनद्युपनामकघनश्यामभट्टात्मजेन वेदान्तचिन्ता-मण्याद्यनेकशास्त्रग्रंथनिर्माणरुक्मिणीचंपूादिविविधकाव्यप्रबंधविधायिनागोवर्द्धनाऽऽशुक-विनाविरचितप्राभंजनपूर्वभागस्यमारुतशक्तिनाम्नीटीकासमाप्तिमगमत् ॥

समाप्तः

---

१ मार्गवान पातिराधूलसगोत्रं २ दु समयोविरुद्धसिद्धान्त दृष्ट्यनुपयोगीकालश्च ३ बहुभि प्रकारैरन्येषानाशकंपक्षेबहूनांधान्यानांनाशकं । ४ शुद्धज्ञानस्य पक्षेधान्यादे । ५ (१९ ३८) ६ संवत्सरे अमातगणनयामार्गशीर्षे पूर्णिमान्तगणनयापौषे ७ पक्षेमेघाभ्र-नामिति च्छेद । वस्तुतस्तुमेघविस्तारोनामसद्ग्रन्थपूर्वभागः । ८ विहित कृतो विगतहि-तोयानि सार' सन्मार्गात्पातो ज्ञानघातश्चयतइतिपक्षेआसारो धारासपात प्रपात पंकादिमू-लक अरकारान्तेनोपरोधश्चयतइति । ९ अप्रतिबद्धोविचारो धारणाचयस्या पक्षेविशेषेण यारोगति धारणं वहनं । १० अभ्रान्तैर्भ्रमरहितैरुक्तोशुद्धाद्वैतमार्त्तण्डतत्प्रकाशाख्यौ ग्रंथवि-शेषौपक्षेअभ्राणामंतेनाशेसूर्यउदेति । ११ अज्ञानेअधकारश्च १२ मारुतशक्त्यामेघविस्तार-स्यनाशोत्तर । १३ एतन्नामकंशुद्धाद्वैतमार्त्तण्डटिप्पणंपक्षेप्रकाशोज्वलदिनच १४ सद्वस्तुनआ-लोचनकरपक्षेनिरतरनेत्ररम्य १५ भगवत्सेवादि सारभूतोव्यापार पक्षे दृष्टोत्तमव्यापारस्तत्प्र-वर्त्तकंमारोगतिश्चव्यापारश्चतयो १६ मथ सूर्यश्च १७ परस्यपुरुषोत्तमस्यभक्ति फलरूपाया-भक्ति १८ सताम्माले पंक्ते पक्षेसदाअलीनांभ्रमराणांप्रिय १९ स्वगुरुदत्त श्रीप्रभुचरणसाम-यिर: स्वगृहेविराजमानः श्रीमद्बालमुकुन्दाख्योभगवत्स्वरूपविशेष । २० सामसुयोग्यवचने-पूदारउचिताग्रस्थपक्षेआमोदेनसुगन्धेनसहित समस्तादोचितआकारोस्य । २१ अयंचरणः प्रथमरूपश्चबोधिनीप्रमाणिश्च श्रीमदाचार्योच्छिष्टोभक्तयासंगृहीत ॥